Gaekwad's Oriental Series
Published under the Authority
of the Maharaja Sayajirao
University of Baroda, Vadodara.

General Editor :
Ramkrishna T. Vyas
M.A., Ph.D., Vyākaraṇācārya,
Director, Oriental Institute,
Vadodara.

No. 174

काणादवैशेषिकसूत्रस्य विवरणरूपस्य

प्रशस्तपादभाष्यस्य टीका

# न्यायकन्दली

टिप्पणयोपेता

**Gaekwad's Oriental Series**
**Published** under the Authority
of the Maharaja Sayajirao
University of Baroda, Vadodara.

General Editor :
**Ramkrishna T. Vyas**
M.A., Ph.D., Vyākaraṇācārya,
Director, Oriental Institute,
Vadodara.

**No. 174**

सत्यं शिवं सुन्दरम्

काणादवैशेषिकसूत्रस्य विवरणरूपस्य
प्रशस्तपादभाष्यस्य टीका

# न्यायकन्दली

टीकात्रयोपेता

# NYĀYAKANDALĪ

being
a commentary on Praśastapādabhāṣya,
with three sub-commentaries

*Edited by*

**Late Dr. J. S. Jetly,**
M.A., Ph.D., Nyāyācārya

and

**Vasant G. Parikh,**
M.A., Ph.D.
Head, Department of Sanskrit,
Prataprai Arts College,
AMRELI

**Oriental Institute**
**Vadodara (India)**
**1991**

Copies : 500
First Edition : 1991

Published with the subvention of the University Grants Commission

( C ) All rights are reserved by the publishers

Price : Rs. 275/-

*Copies can be had from :—*

**The Manager,**

**UNIVERSITY PUBLICATIONS SALES UNIT,**

**M. S. University of Baroda Press ( Sadhana Press ),**

**Near Palace Gate, Palace Road, VADODARA-390 001.**

Printed by the Manager, Gaekwad Printrance Pvt. Ltd., New Bagikhana, Vadodara and published by Dr. Ramkrishna T. Vyas, Director, Oriental Institute, Maharaja Sayajirao University of Baroda, Vadodara, September, 1991.

## CONTENTS


| | | Page |
|---|---|---|
| Foreword... | ... ... ... | i-ii |
| Preface ... | ... ... ... | i-ii |
| Introduction | ... ... ... | i-xiii |
| Text | | |

| Chapter | Subject | |
|---|---|---|
| I | द्रव्यपदार्थः | १–२३८ |
| II | गुणपदार्थः | २३९–६३९ |
| III | कर्मपदार्थः | ६४०–६६७ |
| IV | सामान्यपदार्थः | ६६८–६८३ |
| V | विशेषपदार्थः | ६८४–६८७ |
| VI | समवायपदार्थः | ६८८–७०१ |
| Word Index | | ७०३–७२१ |

# FOREWORD

It was long way back in the year 1960 that an important project to prepare the edition of *Nyāyakandalī* by Śrī Śrīdharācārya which is a commentary on *Padārthadharmasaṅgraha* also called *Praśastapādabhāṣya* by Praśastapādācārya, a pioneering work on Kaṇāda's *Vaiśeṣikasūtras*. with two sub-commentaries on it, namely, *Ṭippaṇa* of Naracandrasūri and *Pañjikā* of Rājaśekharasūri, to be Published in the Gaekwad's Oriental Series was mooted. Late Dr. Jitendra S. Jetly who was an eminent scholar of Nyāyavaiśeṣika system of philosophy ( an important work of this system *Kiraṇāvalī* Edited by him was published as G.O.S. No. 154 in 1971 ) agreed to undertake this work in response to the proposal made by Dr. Bhogilal J. Sandesara, the then Director, Oriental Institute.

Late Dr. U. P. Shah, the then Deputy Director, Oriental Institute, discovered one more that is third, commentary on *Nyāyakandalī* namely *Kusumodgama* of Śiḍila Vommideva from Surat around 1971 and was considered suitable to be included in the project. While working on this project, in fact, when he had reconstituted the text of *Nyāyakandalī* on the basis of several manuscripts and had almost completed the text of the two commentaries, Dr. Jetly suddenly and untimely expired on 26-9-1972. The work suffered a break for some time. It was later entrusted to Dr. Vasant G. Parikh, a worthy student of Dr. Jetly on 23-5-75 who accepted the assignment gladly. In 1975, it was decided that Dr. Vasant Parikh will be the joint Editor of the whole project. During the same year Dr. A. L. Thakur, a leading scholar of Nyāyavaiśeṣika philosophy, was requested to check the press copy and suggest alteration, if any. He checked the press copy with great care.

It was only in 1983 that the duly checked press copy was sent to the M. S. University Press to start printing. But due to heavy burden of other University assignments the University Press could not show reasonable progress in the work of printing even after about two years. Therefore, its printing was assigned in 1985 to the Gaekwad Printrance, a leading press in Baroda, competent enough to execute such complex work of printing. In this press too the work progressed very slowly due to certain technical and administrative difficulties.

Originally it was envisaged that the work would be published in two volumes, the second one containing the two commentaries written by Jain commentators. When, therefore, the printing sufficient for publication of the first volume was over, Dr. A. L. Thakur was requested to write Introduction as agreed upon by him but due to indifferent health he could not write it. Dr. Vasant

Parikh therefore was assigned the work of writing the introduction which he gladly accepted. In the meantime the work of printing progressed and when the introduction was also printed off looking to the usual bulk of such works, and keeping in view the easy handling of the volume, it was considered proper to publish the whole work in one volume only. The Research Officers of the Oriental Institute collectively prepared the word-index which appears at the end of the volume.

Thus, with considerable amount of time and due share of difficulties, this very important and ambitious project of the Institute is completed and as a result the *Nyāyakandalī* with three commentaries is being placed in the hands of scholars and students of Nyāyavaiśeṣika school of philosophy which represents the earliest phase of realistic thought in India.

I am indeed grateful to the University Grants Commission and the authorities of the M. S. University of Baroda for financial assistance towards the publication of this volume. Dr. B. N. Bhatt, Deputy Director, Oriental Institute read the proofs from the very beginning. Later Dr. M. L. Wadekar and Smt. Minakshi Dhavadshikar helped him in the work of correcting the proofs. I am thankful to them. I thank also Shri P. H. Joshi, Shri S. Y. Wakankar and Smt. Dr. Usha Brahmachari for preparing the word-index. I must put on record my unreserved gratitude to Shri Satyajitsingh Gaekwad, Manager, Gaekwad Printrance, Vadodara and his colleagues for neat printing of the Volume.

Vadodara:
Rama Navami
V. S. 2047.

R. T. Vyas
Director

# PREFACE

With this publication of the *Nyāyakandalī* ( NK ) and its three Commentaries along with the *Padārthadharmasaṅgraha,* ( PDS ) the dream of late Dr. J. S. Jetly is materialized. It however, took twenty years for its fulfilment, as the outline of this project was prepared by him in 1970. He was kind enough to associate me with him in this project. After his untimely sad demise on 26th June 1972, it was only through his guiding spirit and constant encouragement from the Director of the Oriental Institute, Baroda, that I could reach the completion of this monumental work.

Dr. Jetly was a devout scholar of the *Nyāya-Vaiśeṣika* philosophy. His main concern was to find out and edit the unpublished texts of this system, that are preserved in the form of manuscripts at different places. His thirst for research was almost nostalgic. He had personally visited nearly all the important *Bhāṇḍāras* of India in search of some valuable manuscripts. He spent a few months in 1950-51 at Jaisalmer to rearrange the mss. of its reputed *Bhāṇḍāra*. In course of his exploration of the precious treasure of Mss., in this *Bhāṇḍāra*, he came across a Ms. of the *Kiraṇāvalī* [ a commentary on the *PDS* ] of Udayanācārya. To his pleasant surprise, Dr. Jetly found out that, the Ms. contained some more portion than the printed texts of the *Kiraṇāvalī*, available at that time. The Ms. was complete upto the end of the *Guṇa prakaraṇa*, while all the printed texts ended with the topic *Buddhi* of the *Guṇa Prakaraṇa*. Dr. Jetly edited the *Kiraṇāvalī* in the fresh light of this Ms., and it was published in GOS. [ No. 154 ] by the Oriental Institute, Baroda in 1971. The *Kiraṇāvalī* of Udayana is one of the four well-known commentaries on the *PDS*. It is therefore, a matter of great pleasure that now one more commentary on the *PDS*, i.e. the *Nyāyakandalī* edited by Dr. Jetly, is published in GOS, by the Oriental Institute, Baroda. Thus the publishing of this volume, it seems, has taken the form of the most befitting tribute to the scholarship of the late Dr. Jetly.

In the Introduction to his edition of the *Kiraṇāvalī*, Dr. Jetly has remarked "The study of the *Vaiśeṣika* system was made popular with the help of Praśastapāda. Though it is the digest of *VS.*, for the study of the system, it proved to be the worst enemy of the *Sūtra*-text." ( P. XI ). The four commentaries, therefore are very useful to present a comprehensive picture of the *Vaiśeṣikasūtras*. The *Nyāyakandalī* of Śrīdhara has played a specific role in preserving the classical edifice of the *Nyāya-Vaiśeṣika* philosophy, against the vehement criticism of opponents like the *Mīmāṁsakas* and the *Bauddhas*. It is natural, therefore,

that at times, the delineation of the *NK*, becomes dialectical and abstruse. The three commentaries on the *NK*, published here, may prove helpful for the better understanding of the *NK*, as they are explicit and lucid.

The reading of all these five texts together will thus give an exhaustive idea of the *Nyāya-Vaiśeṣika* philosophy, with occasional flashes of other Schools of Indian philosophy also.

As Dr. Jetly left this world before the completion of this project he can not be associated with any of the drawbacks in this work. I humbly bear the responsibility of all the short-comings that could be found in this work. I crave the indulgence of the learned and sympathetic readers kindly to excuse me for my incompetence to fathom such a vast ocean of the *Nyāya-Vaiśeṣika* polemics.

I am sincerely grateful to all the Directors of the Oriental Institute, Baroda, who have taken deep interest in the completion of this project. I am also beholden to all other research officers and members of the staff of the Institute, for undergoing the severe strain in leading this work to a happy, successful end.

10th June 1991 VASANT PARIKH

# INTRODUCTION

The late Dr. J. S. Jetly had undertaken an ambitious project as early as in 1970. The project was to prepare a critical edition of ( 1 ) *Padārthadharma-saṅgraha* ( *PDS* ) of *Śrī Praśastapāda*, with ( 2 ) *Nyāyakandalī* ( *NK* ) of *Śrī Śrīdharācārya*—a commentary on the former, supplemented with three commentaries on *NK*.-viz. ( 3 ) *Nyāyakandalī-Ṭippaṇa* by Naracandrasūri ( 4 ) *Pañjikā* by Rājaśekharasūri and ( 5 ) *Kusumodgama* by Śiḍila. Out of these five, the printed editions of the first two were available. Dr. Jetly, however used some more manuscripts for collation and thus prepared a fresh text of these two treatises. The remaining three commentaries were unpublished. Dr. Jetly found out MSS. of all these three from different *Bhāṇḍāras* and started to prepare their respective texts. He had already completed the collation of *Ṭippaṇa* and *Pañjikā* and gave me the rough copies of these two edited texts for preparing a press-copy. He then started editing *Kusumodgama*. Unfortunately, he succumbed to a massive heart attack and passed away in 1972, leaving this work unfinished. His untimely and unexpected sad demise brought a halt to his last cherished project for sometime.

However, Dr. B. J. Sandesara, the then Director of Oriental Institute, M. S. University of Baroda, expressed his desire to see the project completed, as it was already accepted by the Institute for publication. Mrs. Sureshaben Jetly kindly gave me the incomplete copy of the edited text of *Kusumodgama* along with the original Manuscript of the same. With the blessings of Mrs. Jetly and warm encouragement from Dr. Sandesara, I could complete the editing of the remaining part of *Kusumodgama* and also the press-copy of the whole work.

Dr. Arunoday Jani, who was the Director of Oriental Institute at that time, showed a keen interest in this treatise and accepted it for publication. However due to some circumstances, the work could not go to the press. It was Dr. Sureshchandra Kantawala, the Director of Oriental Institute, who took an active interest in the project and asked me to rearrange the order of the commentaries and the original text, so as to suit the format of the printing device. This being done, the work actually went to the press. Afterwards, Dr. R. T. Vyas, the present Director of Oriental Institute, took special care for the continuous printing of this work. It is his sincere effort and deep love for the research that has made this publication possible. It is sad that Dr. Jetly could not live to see his project completed.

—2—

*Praśastapādabhāṣya or Padārthadharma-Saṅgraha*—

The *Vaiśeṣika Sūtras* of Kaṇāda are the first available and authentic source of the *Vaiśeṣika* system The text-book of these aphorisms presents basic principles of this system and expounds the nature of six categories (*Padārthas*) viz. *Dravya* ( substance ), *Guṇa* ( quality ), *Karma* ( motion ). *Sāmānya* ( *Genus* ) *Viśeṣa* ( species ) and *Samavāya* ( Inherence ). However the credit of an eleborate delineation of *Vaiśeṣika* system certainly goes to Praśastapāda also known as Praśastadeva, Praśastamati or Praśastakaradeva. His monumental work *Padārthadharma-Saṅgraha,* though known as *Praśastapāda-bhāṣya* is not a commentary on *VS* of Kaṇāda. It is an independent treatise on *Vaiśeṣika* system based on the aphorisms of Kaṇāda. Generally, it is contended that Praśastapāda was either a predecessor or a contemporary of Vasubandhu—the teacher of Diṅnāga and thus he probably belonged to the fourth century A.D.

It seems that Praśastapāda has presented his views so as to meet some of the concepts of Buddhist philosophy, though he rarely enters into any controversy.

*PDS* is a systematic work and so the pattern adopted by Praśastapāda in this treatise, almost became a model for the later writers of manuals on *Nyāya* and *Vaiśeṣika* systems.

In *VS* of Kaṇāda, the three categories, *Sāmānya*, *Viśeṣa* and *Samavāya* were of subjective reality ( *Sāmānya viśeṣa iti buddhyapekṣam-VS* I-ii-3 ). Praśastapāda established their external objective realities and in this way gave a new turn to the realistic system of *Nyāya-Vaśeṣika* philosophy. He also increased the number of qualities to twenty four from seventeen as given by Kaṇāda.

In this monumental work, Praśastapāda has not only elaborated the essence of the six categories but has also dealt with in full a number of important tenets of *Vaiśeṣika* system, such as theory of Atoms ( *Paramāṇuvāda* ), intricacies about the nature of relation ( *Sambandha* ), similarities and differences among categories, theory of creation and destruction of three substances ( earth, water and air ), theory of causation, nature of Self, the problem about an explicit concept of the quality 'number' ( *Saṅkhyā* ), *Pākajaprakriyā,* nature of cognition and judgement, definitions and number of *Pramāṇas* and the role of merits and demerits in relation to the attainment of liberation.

Some of the conclusions as arrived at by Praśastapāda, became pet theories of *Vaiśeṣikas* in later period. Thus, for example, Praśastapāda says with conviction that Self is imperceptible. Its existence is proved only by inference. Similarly, according to Praśastapāda, inherence ( *samavāya* ) is not directly per-

ceived. but is known through inference. *Naiyāyikas* like Udyotakara, on the other hand firmly believe that inherence is perceptible. The commentators on *PDS*, being aware of this controversy, tactfully suggest that this is one of the few traditional differences between *Vaiśeṣika* and *Nyāya* systems.

It seems that many commentaries might have been written on *PDS*, four are prominent and often quoted among them. These commentaries are ( i ) *Vyomavati* by Vyomaśivācārya ( ii ) *Nyāyakandalī* by Śrīdharācārya ( iii ) *Kiraṇāvalī* by Udayanācārya and ( iv ) *Līlāvatī*. The last is not available, but tradition ascribes its authorship to Śrīvatsa who is referred to by Udayana in his *Pariśuddhi*. *Nyāya-Līlāvatī* of Vallabha ( Published by Nirnaysagar Press ) is an independent work on *Vaiśeṣika* system and thus it is different from the *Līlāvatī-a* commentary on *PDS*. Rājaśekhara in his *Pañjikā - a* commentary on *Nyāyakandalī* refers to these commentaries and indicates that the author of *Līlāvatī* is Śrī Vatsācārya ( P. 2 ).

Internal evidence shows that *Nyāyakandalī* is preceded by *Vyomavatī* and is followed by *Kiraṇāvalī*. *Pañjikā* ascribes some of the views refuted by Śrīdhara, to Vyomaśiva and thus suggests that Śrīdhara was well aware of *Vyomavatī* and he also preferred to differ from Vyomaśiva occasionally. *Vyomavatī* was studied by Jain scholars like Prabhācandra ( 9th Century A.D. ) and others. This also suggests that it was earlier than *Nyāyakandalī*.

Vyomaśiva has given full justice to *PDS*, as he has left no portion-however simple it may be uncommented. He however does not stick to *Vaiśeṣika* tenets always. For example Vyomaśiva does not approve of Praśastapāda's contention regarding the place of verbal testimony ( *Śabda Pramāṇa* ). Praśastapāda's statement establishing verbal testimony under inference, is cleverly interpreted by Vyomaśiva so as to show that all instruments of knowledge except verbal testimony are to be included under inference. Vyomaśiva himself however, was not happy with this interpretation and gave another reading, making it possible to classify the verbal testimony as a kind of inference ! But this does not prevent his genuine attitude of leaning more on *Nyāya* system. Udayana also favours *Nyāya* system sometimes in *Kiraṇāvalī*. Srīdhara on the other hand seems to adhere to *Vaiśeṣika* system in interpreting *PDS*. To refer to the above discussion about verbal testimony, Śrīdhara categorically states that the explicit meaning of the relevant sentence of *PDS* is 'the inclusion of verbal testimony under inference '. However it does not imply that he is averse to *Nyāya* system. He often quotes and favours also *Nyāya* system in course of discussion on some problems, where generally they are in agreement with *Vaiśeṣika* system. In fact the very name of his commentary i.e. *Nyāyakandalī* shows his soft attitude towards *Nyāya* system.

Out of these three commentaries on *PDS*, *Kiraṇāvalī* became more popular than the other two. Udayana is, no doubt, a prolific writer on *Nyāya-Vaiśeṣika* system. His polemic discourse is very subtle and lucid. His arguments are poignant. Unfortunately his *Kiraṇāvalī* is incomplete, and there also his favourable approach to *Nyāya* system is conspicuous. The same is the trend of Vyomaśiva. Moreover Vyomaśiva lacks the vigour of Udayana. Hence the relative merit of Śrīdhara is enhanced more naturally. That is why perhaps the study of *Nyāyakandalī* got momentum in later period.

— 3 —

*Nyāyakandalī*

Śrīdharācārya has secured an eminent place in the scholastic galaxy of the *Nyāya-Vaiśeṣika* system by his *Nyāyakandalī*—a very valuable commentary on *PDS*. Śrīdhara himself gives his short bio-data in the colophon of the *Nyāyakandalī*. From it we know that the date of the composition of *Kandalī* was 913 *Śaka Saṁvat* i.e. 991 A.D. His native place was *Bhūriśreṣṭha* in *Rādha* ( modern Bhursut in Howrah district ) in Bengal.[1] His father was Baladeva and mother was Acchokā. He wrote *Kandalī* at the request of Śrī Pāṇḍudāsa, who according to Naracandra and Rajaśekhara was a pupil of Śrīdhara. Dr. Jetly suggests that Pāṇḍudāsa was the king of Rādha.[2]

*Nyāyakandalī* was recognized as a standard work for study in course of time. We find *Kandalī* referred to by Abhayadeva Sūri ( 11th Cent. A.D. ) in his *Vādamahārṇava*, by Devasūri ( 12th Cent. A.D. ) in his *Syādvādaratnākara*, by Upādhyāya Abhayatilaka ( 13th Cent. A.D. ) in his *Nyāyālaṅkāra Ṭippaṇa* and by Guṇaratna Sūri ( 15th Cent. A.D. ) in his commentary of Haribhadra's *Ṣaḍdarśanasamuccaya*.

---

1 In support of this Pt. Phaṇibhūṣaṇa, quotes a verse from the second act of *Prabodhacandrodaya Nāṭaka* by Kṛṣṇa Bhaṭṭa, a son of Srīdhara. He refers to a commentary of this verse which states that Bhursut is the present name of this Bhūrisṛṣṭi and observes that there is a famous village Bhurasuta in the present Hugali Dist. See. *Nyāya Paricaya*, Intro. p. 4.

2 Pt. Phaṇibhūṣaṇa however refers to the opinion of historians according to whom Pāṇḍudāsa was a *Kāyastha* king who ruled Rādha in 10th-11th Cent. A.D. He was a Buddhist and as such different from the Pāṇḍudāsa mentioned by Śrīdhara ( *Ibid.* p. 4 ). But Dr. Jetly sees no objection in accepting the king Pāṇḍudāsa to be the pupil of Śrīdhara.

Other works of Śrīdhara, known from his *Nyāyakandalī* are—( i ) *Advayasiddhi*. ( ii ) *Tattvabodha* or *Tattvaprabodha*. ( iii ) *Tattvasaṁvādinī* and ( iv ) *Saṅgrahaṭīkā*.

Śrīdhara as shown above generally follows *Vaiśeṣika* School in his interpretation of *PDS*. He also defends *PDS* sometimes, if someone finds any discrepancy in *PDS*. Thus, when Kaṇāda says that merit ( *dharma* ) brings release, and Praśastapāda thinks that true knowledge leads to release, Śrīdhara, seeing inconsistancy between these two views, immediately makes amendment and explains that true knowledge produces merit which ultimately leads to release.

After presenting *Maṅgalavāda* in brief, Śrīdhara examines in detail the theory of emancipation ( *Mahodaya* ). He refutes the views of Buddhists, *Sāṅkhyas*, *Mīmāṁsakas* and *Vedātins* and concludes with the *Nyāya-Vaiśeṣika* theory of emancipation-i.e. the proper definition of *Mahodaya* is—the absolute cessation of what is disadvantageous ( *ahita* ). It is however curious to note that he feels that this concept of emancipation cannot be proved by a logical method, but it should be accepted on the strength of *Upaniṣads* ( *Vedānta* )-i.e. by verbal testimony.

It is also interesting to note that Śrīdhara thinks darkness ( *Tamas* ) to be a specific colour and not the absence of light as it is generally believed in *Nyāya-Vaiśeṣika* manuals.

In course of his delineation on the text of *PDS*, Śrīdhara has taken the opportunity to refute vigorously some of the important theories of the opposite schools of thought—that of Buddhists being the chief of them. For example, he enters into a very extensive argument with Buddhists on latter's theory of momentariness ( Kṣaṇikavāda ) and tries to establish its impropriety. Equally important are his discussions on topics like—problem of relation between parts and whole ( *Avayava-avayavivāda* ), objective reality of *Sāmānya*, theory of *Samavāya* and *Vijñānavāda*. He also examines the theory of existence and the nature of Self. He establishes the necessity of existence of God and tackles an interesting question—whether God is enjoined with a body or not. Apart from the theory of Atoms ( *Paramāṇuvāda* ). Śrīdhara presents exhaustively some of the tenets that exclusively belong to *Vaiśeṣikas* such as *Pākajaprakriyā*, *Apekṣābuddhi* in relation to the quality *Saṅkhyā* ( number ), *Viśeṣas* and the quality disjunction ( *Vibhāga* ).

4

The text of *PDS* adopted here, is generally based on the printed text of *NK* with *PDS*, edited by Pt. Vindhyeshvari Prasad Dwivedi, ( Vijayanagaram SK. Series, 1895 ). Dr. Jetly has also used four other texts for collation and marked them as *Ki*, *Tā*, *De* and *Vyo*. Their source is unfortunately not known.

As for the text of *Nyāyakandalī* Dr. Jetly has used three palm-leaf MSS., belonging to *Baḍābhāṇḍāra* of Jaisalmer ( marked as $J_1$, $J_2$ and $J_3$ respectively ). alongwith two printed editions, one of which is edited by Pt. Vindhyeshvari Prasad Dwivedi and other is published from Varanasi, ( They are marked as *Kāśī* 1 and *Kāśī* 2 respectively )

— 5 —

*Ṭippaṇa of Naracandrasūri*—

Out of the three commentaries on *NK*, presented here, the *Ṭippaṇa* of Naracandrasūri is the oldest one. Naracandra was a pupil of Devaprabhasūrī of *Harṣapurīya* of *Maladhārī Gaccha.* Devaprabhasūrī was author of several Jain works such as *Pāṇḍavacarita*-a verified Jain Version of the *Mahābhārata.* He also wrote a commentary on the *Anargharāghava Nāṭaka* of Murāri. Naracandra also wrote a *Ṭippaṇa* on the same play and extended his exegetical activity to the *NK.* He was also the author of a *Prākṛta* grammar called *Prākṛta Prabandha*- and some other Jain works, like *Kathāratnākara, Caturviṁśati Stotra Vastupāla praśasti* and metrical portions of the two of the Giranar Inscriptions of Vastupāl. *Kathāratnākara* was written specially to please his great pupil Vastupāla, whom he had taught grammar. literature and logic—the traditional three *Vidyās* of Gujarat in that age. His work on astrology viz. *Jyotiḥsāra* became so popular that it was known as *Nāracandra.*[1]

The colophon of his *Ṭippaṇa* on *NK*. gives one more piece of information about one more teacher of Naracandra—a fact not known hitherto. From it we learn that Pṛthvīdhara was a teacher of Naracandrasūrī in *Nyāyadarśana.* Whether this Pṛthvīdhara was a Jain or a *Brāhmaṇa Paṇḍita*, is not known.

According to *Prabandhakośa*, Naracandrasūrī died on the 10th day of the dark fortnight of the month *Bhādrapada* in VS. 1287 ( 1231 A.D. ). *Prabandhakoṣa* also notes that some time before his death, he predicted the year of Vastupāla's demise.[2]

---

1 ( a ) Sandesara B. J. : *Literary Circle of Mahāmātya Vastupāla*, Singhi Jain Shastra Sikshapith, Bharatiya Vidya Bhavan, Bombay, pp. 73 to 75.

( b ) The short resume on the life and works of Naracandra as presented here is based on the relevant chapter of the unpublished thesis of Dr. Jetly. —Viz. *" A Critical Survey of the Contribution of Jain writers to Nyāya-Vaiśeṣika Literature with a Critical edition of hitherto unpublished work-a Ṭippaṇa of Naracandrasūri on NK of Śrīdharācārya. "*. ( 1952 ).

2. *Prabandhakośa*, Varanasi ed. P. 127.

The *Ṭippaṇa* is a short running commentary on *NK*. It opens with a *Maṅgala* verse and then elaborates Śrīdhara's discussion on *Maṅgalavāda*. Naracandra here puts forth clearly an inference to prove that the fruit of *Maṅgala* is the removal of obstacles. This inference though indicated by *NK* was not stated in explicit terms. *Ṭippaṇa* fulfils that job. Naracandra further supports the interpretation on '' *Katvā* ' in '*Praṇamya* ' as given by Śrīdhara in *NK* and shows why Vyomaśiva, the predecessor of Śrīdhara is wrong in this matter.

While explaining the meaning of the word *Kaṇāda*, *NK* refers to a satire passed by the *Mīmaṁsakas*. The *Ṭippaṇa* gives the complete verse having this satire and as a rejoinder, quotes a *Maṅgala* verse from *Ślokavārtika* itself to support *NK* in the defence of Praśastapāda who salutes Kaṇāda.

*Ṭippaṇa* then explains in detail the significance and meaning of the term '*Mahodaya* ' as stated in *NK*. *Ṭippaṇa* here makes it clear that it is the *Mādhyamika* school of Bauddhas that is refuted here in *NK*.

In the chapter on the enumeration of categories and their division, *Ṭippaṇa* supports *NK*. Naracandra takes an opportunity here to show a grammatical mistake of other commentators like Vyomaśiva in the explanation of the word '*Padārthadharmasaṅgraha* '.

*NK* favours the *Vaiśeṣika* view that darkness ( *Tamas* ) is not a separate substance. *Ṭippaṇa* elucidates the arguments of *NK*, but at the same time it points out where the *NK* has neglected its own theory. ( *etacca svasiddhāntamanapekṣyaivoktam* ). Surprisingly the *Ṭippaṇa* does not point at the *NK*'s view point that though '*Tamas* ' is not a substance but a peculiar colour—a quality of *Pṛthivī*, and this colour (i.e. *Tamas*) is perceived only when there is absence of light.

*Ṭippaṇa*, however proves definitely that '*Tamas* ' is nothing but absence of light. This is also the theory of *Vaiśeṣikas*. But as stated above *NK* hesitates to accept *Tamas* as a total negation of light ( *Tejas* ).

In course of the discussion about the division of qualities, *NK* makes a casual reference of *Jāti* of ' *Dharmādharma* ' and also of the *Jāti-Saṁskāratva*. The *Ṭippaṇa* discusses this topic in detail and concludes that if there is no '*Pramāṇa* ' for proving '*Adṛṣṭatva* ' *Jāti*, there cannot be a *Pramāṇa* to prove ' *Saṁskāratva* ' *Jāti* also. *Ṭippaṇa* keeps the problem of *Adṛṣṭatva Jāti* open. Thus logically from *Vaiśeṣika* point of view the problem remains unsolved, because *Vaiśeṣikas* do not accept *Adṛṣṭatva* as *Jāti* but accept *Saṁskāratva* as *Jāti* at the same time.

In this way *Ṭippaṇa* generally follows *NK* and remains faithful to it in principle, adding some clarification where necessary. It is interesting to note that occasionally, Naracandra offers his explanations of some topics on the basis of grammatical interpretation. ( e.g. the topic of *Parimāṇa* of an-atom. )

Sometimes Naracandra, on finding some discrepancy or fallacy in the arguments presented by Śrīdhara, improves very tactfully the whole relevant passage and ultimately presents the viewpoint of *NK* in a very consistant form. Thus for example, in *Īśvarasiddhi Prakaraṇa*, Naracandra removes all the logical fallacies of an inference put forth by *NK*, with an ingenious modification. Same trend can be seen in the chapter on *Ātmā*. Here *NK* tries to prove that the '*Caitanya*' ( consciousness ) does not belong to the body. For this *NK* gives an inference with '*Bhūtakāryatva*' as a '*Hetu*'. But this ' '*Hetu*' is fallacious. *Ṭippaṇa*, therefore comes to the rescue of this inference. It splits this '*Bhūtakāryatva*' into, two *Hetus*, Viz. ' '*Bhūtatva*' and ' '*Kāryatva*' and states that—*bhūtatvāt, kāryatvāt ca ityarthaḥ. militasyāhetutve, vyabhicārābhāvāt.*

*Ṭippaṇa* is really a very compact and faithful commentary of *NK*. Its delineation is precise and lucid. Naracandra's mastery of dialectics can be seen in his refutations of the arguments presented by opponents like *Mīmaṁsakas* and *Bauddhas*. The discussions on *Kṣaṇikavāda, Citrarūpa, Apekṣābuddhi, Hetvābhāsa* and *Pramāṇasaṅkhyā* deserve special mention in this matter.

However, after the completion of the chapter on *Guṇas*, the *Ṭippaṇa* hurriedly discusses the remaining categories Viz. *Karma, Sāmānya, Viśeṣa* and *Samavāya*, and this work comes to an end.

It seems that the *Ṭippaṇa* is *Ṭippaṇa*—i.e. concise commentary in its right sense, as it does not unnecessarily repeat the discussion on any topic which is thoroughly exhausted by *NK*. Moreover it does not leave any important point that requires more elucidation at the same time. Therefore though the *NK* is a big commentary on the *PDS*, the *Ṭippaṇa* prefers to be a concise commentary on *NK*.

Though Naracandra is not free from the fault of being too brief in the later chapters mentioned above, his positive and logical approach as a commentator is praiseworthy and hence, it is quite appropriate that he made a very sound impact on the later commentators of *NK*, like Rājaśekhara and Śiḍila.

The text of this *Ṭippaṇa* of Naracandrasūri is based on following four MSS.:

1 'अ'

Material—Paper
Place—Muni Śrī Haṁsavijayajī Private Collection of MSS., Baroda
No. of Folios—77
Size of a Folio—11¼" × 5½"
Lines on each side of a folio—15 to 16
Script—*Devanāgarī*
Writing—Bold, uniform and legible

2 'अ'

Material—Paper

Place—*Vāḍī, Pārśvanātha Bhāṇḍāra, Hemacandra Jñānamandira*

No. of Folios—41

Size of a Folio—12" × 4½"

Lines on each side of a folio—15

Script—*Devanāgarī*

Writing—Small but uniform and legible

3 'क'

Material—Palm Leaf

Place—The Bhandarkar Oriental Research Institute, Poona

No. of Folios—196

Size of a Folio—14½" × 1½"

Lines on each side of a folio—3 to 4

Script—*Devanāgarī*

Writing—Bold, uniform and legible

Remarks—This MS. is copied by Kumudacandra in Vs. 1321 i.e. 1265 A.D. It is the oldest among the available MSS. of the *Ṭippaṇa*. It is fairly correct.

4 'ख'

Material—Palm Leaf

Place—Baḍā Bhāṇḍāra, Jaisalmer

No. of Folios—164

Size of a Folio—14¼" × 1¼"

Lines on each side of a folio—3 to 4

Script—*Devanāgarī*

Writing—Small but uniform and legible

—6—

*Pañjikā of Rājaśekhara Sūri Maladhārī*—

Rājaśekhara Sūri is not unknown to the scholars of *Jaina* philosophy. His works like *Prabandha-Kośa, Syādvādakārikā, Ratnāvatārika-Pañjikā, Kautukakathā, Ṣaḍdarśana-Samuccaya, Antarakathāsaṅgraha* and *Dānaṣaṭtriṁśikā* are well-known, some of which are already edited and published.

From the colophon of *Prabandhakośa*, composed on the Seventh day of the bright half of *Jyeṣṭha* in 1405, it is known that Rājaśekharasūri was a pupil of Śrī Tilakasūri and belonged to *Harṣapurīya Gaccha*[1].

In the colophon of *Pañjikā* on *NK*, Rājaśekhara refers to some of the earlier *Sūris* of *Harṣapurīya Gaccha.* In this *Gaccha* was the celebrated Abhayasūri, the disciple of Śrī Jayasiṁha Sūri. In this lineage came the great Hemacandrācārya. Śrī Candramunīndra and Vibudhendramunī were his disciples. Śrī Municandra was the disciple of Śrī Candrasūri who, in course of time, became the *Guru* of Śrī Devaprabhasūri. Śrī Naracandra Sūri was the disciple of Śrī Devaprabha Sūri. Naracandra wrote *Ṭippaṇa*s on *NK* and *Anargharāghava*. Śrī Narendraprabha was the disciple of Naracandra in whose lineage was Sūri Śrī Padma, who was the *Guru* of Śrī Tilakasūri. Rājaśekhara was the disciple of Śrī Tilakasūri.

*Nyâyakandalī Pañjikā* is a short but comprehensive commentary. Peterson noticed a ms. of this commentary. Mm. Vindyeshvariprasada Dwivedi, the editor of *Nyâyakandalī*, also refers to the *Pañjikā* in his Introduction and gives an abstract from it, though he has not shown the source of the ms. referred to by him.[2]

---

1 श्रीप्रश्नवाहिककुले कोटिकनामनि गणे जगद्विदिते ।
श्रीमध्यमशाखायां हर्षपुरीयाभिधेये गच्छे ॥ १ ॥
मलधारिबिरुदविदितश्रीअभयोपपद सूरिसन्ताने ।
श्रीतिलकसूरिशिष्यः सूरिः श्रीराजशेखरो जयति ॥ २ ॥
... ... ... ... ... ...
शरगगनमनुमिताब्दे ( १४०५ ) ज्येष्ठामूलीयधवलसप्तम्याम् ॥
निष्पन्नमिदं शास्त्रं ... ... ... ... ॥ ८ ॥
—प्रबन्धकोशप्रशस्तिः ।

2 अनेन ग्रन्थारम्भे " श्रीमज्जिनप्रभोरधिगत्य न्यायकन्दलीं किञ्चिदि " त्युक्तम् । अत्राधिगत्य-इत्यस्य अधीत्येति परमार्थः । जिनप्रभविभुश्च १२२६ शाकवर्षे आसीत् । तद्यथा—
दुर्गवृत्तिगरुच्चादिगणस्य श्रीजिनप्रभमुनिप्रभुरेताम् ।
पञ्जिकां [ स ]मुपनीय विनेते ( वितेने ) वृत्तिमल्पमतिबोधनिमित्तम् ॥
रसयुगरविमित( १२२६ )शकवर्षभाद्रपदसितचतुर्दशीदिवसे ।
भाङ्गद्रुम इयं समर्थिता गणयुगलवृत्तिः ॥
भाङ्गम इति कस्यचित् स्थानविशेषस्य नाम ( ? )
—न्यायकन्दली, विज्ञापनम् पृ. ११

It can be seen from this abstract of *Pañjika* that Rājaśekhara, having learnt *Kandalī* from Śrī Jinaprabha, composed his *Pañjikā* in 1226 *Śaka* era, while the historical evidence as well as that of *Prabandhakośa* shows that it was in 1405 *Śaka* era. This discrepancy may be ractified only with the help of some more MSS. of the *Pañjikā*. But unfortunately the very first leaf is missing in the available MSS. of the same. According to Peterson, the MS. of *Pañjikā* referred to by him belonged to *Kalyāṇacandrayati Bhāṇḍāra* at Cambay. On enquiry, however, it is found that this *Bhāṇḍāra* no longer exists. Prof. Velankar in his *Jinaratnakośa*, observes that a MS. of *Pañjika* is in the *Bhāṇḍāra* of *Vimalagaccha Upāśraya*, Ahmedabad. But there is no mention of the *Pañjikā* in the list of MSS. of the said *Bhāṇḍāra*. Hence the *Pañjikā* was not available for a long time.

Dr. Jetly, however, was able to find out two MSS. of this *Pañjikā*. The source of the first MS. ( i.e. A ) is unknown while the second MS. ( i.e. B ) belongs to M.T.B. College, Surat.

It seems that both these MSS. are copies of the same original MS. and there is minor difference in their readings. Both are lacking in the very first leaf. MS. A has seventy-five leaves, but in the whole of the MS. nearly eighteen leaves are missing; while MS. B is incomplete. It starts with the second leaf and ends with leaf no. 117. Leaf no. 52 is duplicated, while leaves from 61 to 65 are missing. However, the combination of these two MSS. gives us a fairly adequate text of the *Pañjikā*, though after the discussion of *Avayava*, under *Anumāna Pramāṇa* ( under *Buddhi* in *Guṇa Prakaraṇa* ), the portion upto the *Sāmānya Padārtha*, is unfortunately lost in both the MSS.

Rājaśekhara seems to be fairly conversant with the *Vaiśeṣika* school. Many stories are told to explain the meaning of the word *Kaṇāda*, the founder of the *Vaiśeṣika* school. Rājaśekhara records an interesting tradition, in the beginning of *Pañjikā*, according to which God himself, being pleased with the penances of the founder, appeared before him in the form of an owl and taught him the six categories. Hence this system is called *Aaulūkya*. Rājaśekhara also refers to four commentaries on *PDS* by name.[3] It is also interesting to note that he thinks that Pakṣilaswāmī, *Nyāyabhāṣyakāra* ( viz. Vātsyāyana ) was none other than Cāṇakya.[4] He thinks that some of the views refuted by Śrīdhara belong to Vyomaśiva.[5] He also knows the four major Buddhist schools.[6]

---

3 P. 2.

4 P. 6

5 PP. 8, 166, 167 ct.

6 P. 1 .

The utility of the *Pañjikā* lies in its faithful presentation of the views expressed by Śrīdhara. Rājaśekhara tries to explain as many concepts of Śrīdhara as possible. He, therefore, gives *Pratīkas* from the *Kandalī* in abundance. He never starts or enters or becomes a party to any new discussion. *Pañjikā* is, therefore, an important and well-balanced gloss on the *Kandalī* creating a sort of clarity of comprehension.

The abundance of *Pratīkas* also helps us to settle some of the readings of the *Kandalī*. Moreover, it seems that Rājaśekhara has consulted more than one MS. of the *Kandalī*. For many a time he offers alternative readings giving his preference occasionally.[7] Generally he prefers the reading as accepted by Naracandra in his *Ṭippaṇa*.[8] Not only in the matter of the readings, but at many other places also Rājaśekhara follows respectfully the views of Naracandra. He displays a great feeling of reverence for Naracandra. He is so modest that sometimes he admits his inability to explain the meaning of a particular sentence of the *Kandalī* and tells frankly that those, who are interested in understanding in details the point under discussion, should see the relevant topic in the *Ṭippaṇa* of Naracandra.[9]

It may be remarked in fine that besides Kaṇāda, Praśastapāda, Pakṣila-Swāmī and Vyomaśivācārya, Rājaśekhara mentions *Jaiminīyas*, *Prābhākaras*, Maṇḍanamiśra, Uddyotakarācārya, Dharmakīrti, Udayana and Bhūṣaṇakāra.

— 7 —

*Nyāyakusumodgama of Śiḍila Vommideva—*

The name of Śiḍila Vommideva is perhaps unknown. From the beginning of this commentary, we can know that he was a *Brahma Bhūpaṭi*. He belonged to the solar race and was the son of a king named Itungola. The peculiarity of this name suggests a Southern origin. Hence it may be presumed that Śiḍila was a king of some Southern state. In the colophon of the commentary, he says

---

7 See PP. 68, 81, 106, 142 etc.

8 e. g. परस्परसंयोगादपि नश्यतीति । परस्परप्रवेशान्तरं संयोगादिति पाठान्तरम् । तत्र श्रीनरचन्द्रटिप्पनकव्याख्यानमनुरुध्यते ।

9 यत्तु, पञ्चभूतसमवायिकारणमित्यत आरभ्य स्वभावभेदोपपत्तेरित्यन्त्यानां वाक्यानामक्षरार्थः सुगमः । भावार्थस्तु संप्रदायाभावादस्माभिर्न ज्ञायते । अत एव न व्याख्यायते । यद्यपि किल श्री नारचन्द्रटिप्पणके एषां वाक्यानां व्याख्यानं किञ्चित्किञ्चिद्दृश्यते तथाप्यस्माभिर्मन्दमति-त्वान्नावगम्यते । अतो नोच्यते । पृ. ११११

that his mother was a daughter of Parvata ( ! ) He was also a *Mahāmaṇḍaleśvara*, a brave warrior and at the same time a master in the dialectical discussions. He was the lord of both—the learned *Paṇḍitas* and brave heroes. We have no source available to know from whom he learnt *Nyāya* philosophy, though he pays homage to some *Guru* in general. He also calls himself *Vajra-Brahma-Nṛpa*—perhaps some title acquired by him ! This commentary is based on a single MS. available from a Patan *Bhāṇḍāra*. The text of the MS. is corrupt at many places. The leaves are very old, torn and eaten by insects at some places. The script, though legible, is often incorrect. It is very difficult to correct the readings of the script in absence of another MS. to compare with. This MS. contains 160 leaves.

Śiḍila presents an elegant commentary on *NK*. He seems to have really mastered the art of dialectics as claimed by him. He explains explicitly a number of topics discussed by Śrīdhara. For example, in *Maṅgalavāda*, he presents a series of arguments to prove that *Maṅgala* has the potentiality to remove all obstacles. Similar are his discussions on the definition of *Pṛthvī*, creation and dissolution, *Kāla*, *Ātmā*, *Pākajaprakriyā* and *Parārthānumāna*.

Śiḍila has a peculiarity of initiating the fresh discussions. He has his own method. He first prepares a suitable ground by anticipating a possible *Pūrvapakṣa* and then presents Śrīdhara's thesis to refute it. He also tries to be clear and decisive not infrequently. We come across a number of phrases such as—*Ayamatrābhisandhiḥ*, *Ayamatrābhiprāyaḥ*, *Iti bhāvaḥ*, *Iti bhāvārthaḥ* etc.

However Śiḍila never enters in any unnecessary discussion. He is modest and does not stretch his arguments beyond a certain limit. Thus while discussing the nature of substance *Tejas*, he accepts faithfully that Gold is a *Tejas dravya*, but knowing that there is not a convincing proof for such contention, he humbly quotes Vallabha—

"*Tejo Hiraṇyamiti Śrutireva Pramāṇam*"

Incidently it is interesting to note that Rājaśekhara also concludes this topic by saying—*Suvarṇādīnām Taijastve Tāvadāgamaḥ Pramāṇamiti* ( P. 114 ). He is always precise and to the point. This commentary serves the purpose of a guide for those who read *NK* for the first time. Śiḍila, therefore, seldom quotes other scholars or commentators other than those already mentioned by Śrīdhara himself, the only exception being the mention of Vallabha ( P. 81 ). In short, this commentary of Śiḍila is a lucid and useful handbook on *Kandalī*.

VASANT PARIKH

# प्रशस्तपादभाष्यम्

अथवा

# पदार्थधर्म्मसङ्ग्रहः

[1] **प्रशस्तपादभाष्यम्**

**प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः ।**
**पदार्थधर्म्मसङ्ग्रहः प्रवक्ष्यते महोदयः ।।**

**[ कन्दलीटिप्पणम् ]**

" अर्हम्[1] "

[१] अव्याहतमनाद्यन्तमनन्तमहिमास्पदम् ।
विष्टपत्रितयोद्योति ज्योतिस्तन्मे प्रसीदतु ।। १ ।।
यथाम्नायं यथाप्रज्ञमात्मनः [2]स्मृतिहेतवे ।
कन्दलीटिप्पनारम्भसंरम्भः क्रियते मया ।। २ ।।

**[ पञ्जिका ]**

ॐ नमः सर्वज्ञाय ।।
अनन्तदर्शनज्ञानसुखवीर्यमयात्मने ।
जिनाय तस्मै कस्मैचित् परस्मै महसे नमः ।।
श्रीमज्जिनप्रभविभोरधिगम्य न्यायकन्दलीं किञ्चित् ।
तस्यां विवृतिलवमहं करवै स्वपरोपकाराय ।।

**[ कुसुमोद्गम ]**

।। श्री गणाधिपतये नमः ।।
नित्यज्ञानदयैश्वर्य(र्यं) सिन्धवे बन्धवे नमः ।
शिवाय विदुषां बन्धविध्वंसनपटीयसे ।। १ ।।
नमो विनायकाय स्तादन्तरायाटवीमिव ।
समूलमुन्मूलयितुं[दन्तुरं] बिभ्रते निजम् ।। २ ।।?
अभूदभूतपूर्व्वाणां गुणानामाकरो नृपः ।
वंशे रवे रितुंगोलः [वीरः] शस्त्रविदां पतिः ।।३।।?

---

१ अर्हम् नमः–ड; २ स्मृतितवे–अ.

## न्यायकन्दली

(१) अनादिनिधनं देवं जगत्कारणमीश्वरम् ।
प्रपद्ये सत्यसङ्कल्पं नित्यविज्ञानविग्रहम् ॥१॥

[ कन्दलीमङ्गलश्लोकार्थः । ]

[टि०] **अनादिनिधने** इत्यादिः—ननु अनादिनिधनत्वं शरीरापेक्षया वा? आत्मापेक्षया वा? नाद्यः, तस्य शरीराभावात् । नापरः, अस्मदाद्यात्मसाधारणत्वेन तदुत्कर्षाख्यापकत्वाभावात् । नैवम् [1]स्वादृष्टोपग्रहाद् भोगायतनस्य ग्रहण-मादिर्मोचनं [2]निधनमिति । न तु [3]तथाप्येकतरोपादानेनैव परस्परापेक्षत्वाद् द्वितीये लब्धे द्वयोरुपादानं व्यर्थम् । प्रागभावप्रध्वंसाभावयो[4]रप्येकैकरूपत्वात् । ईश्वरस्या[5]साधारणताख्यापनार्थं जगच्छब्दोऽत्र सङ्कुचितवृत्तिः, तेन [6]नित्यं प्रत्यकृतत्वेऽपि न दोषः । टीकानमस्कारोऽयम् । तेन भाष्यवन्न केवल एव कर्तृशब्दः प्रयुक्तः । शरीरकार्यसर्गादि करणसमर्थत्वाद् ज्ञानमेव शरीरम् । [7]इतरदेवताव्यवच्छेदेन तत्प्रतिपत्त्या नमस्काराक्षेपः ॥ १ ॥

[पं०] इह किल पूर्वमजिह्मब्रह्माभ्यासदूरीकृतप्रमादाय मुनये कणादाय स्वयमीश्वर उलूकरूपधारी प्रत्यक्षीभूय द्रव्यगुण-कर्मसामान्यविशेषसमवायलक्षणं पदार्थषट्कमुपदिदेश । तदनु स महर्षिर्लोकानुकम्पया षट्पदार्थरहस्यप्रपञ्चनपराणि सूत्राणि रचयाञ्चकार । तेषु सूत्रेषु प्रशस्तकरदेवो भाष्यं सकृद् गुणनमात्रेण महोग्रदष्टकविषापहारदृष्टलोकोत्तरवैभवं चकार । तत्र चतस्रो वृत्तयो निर्वृत्ताः एकां व्योमवतीनाम्नीं वृत्तिं व्योमशिवाचार्यो जुगुम्फ । द्वितीया तु न्यायकन्दलय भिधाना श्रीधराचार्यः संददर्भ । तृतीयां किरणावलीनाम्नीमुदयनाचार्यस्ततान । चतुर्थीं तु लीलावतीति ख्यातां श्रीवत्साचार्यो बबन्ध । चतस्रोऽपि गम्भीरार्थाः ।

तत्रेमां न्यायकन्दलीं प्रारभमानः श्रीधरदेवः शिष्टसमयपरिपालनायेश्वरविष्णुब्रह्मलक्षणाभिष्टदैवतत्रयीमेकेनाद्य-श्लोकेन प्रणिदधानः प्राह । स चायम्

अनादिनिधनं देवं जगत्कारणमीश्वरम् ।
प्रपद्ये सत्यसंकल्पं नित्यविज्ञानविग्रहम् ॥ कं । १ ॥

....... ........................................ .........

[कु०]

तस्य पुत्रो महावीरः शिडिलब्रह्मभूपतिः ।
सा[शा]सद्विषभरं स्पष्टं व्याचष्टे **न्यायकन्दली** ॥४॥
श्रीमन्महावनमुनीन्द्रपदाक्षभक्ति
भास्वत्प्रभोपरतमिस्त्रान्(?) ।
लब्ध्वा[ब्धां] गुरौ[रो]र्मुनिवरादमरावतीति
ख्यातात्यितं बधमनोध(?)यदात्मविद्यम् ॥५॥
न तत्त्वं(?) न द्रव्यं त्यजति गुणवर्गंश्वनुधियां
विधत्ते संतोषं विकसति वसन्कर्मनियतम् ।
द्वयी जाति(:)श्लाघ्या न जहति विशेषा स्वःनिलयम्
गुणाद्यैः सम्बन्धः स्फुरति शिडिलब्रह्मनृपतौ ॥ ६ ॥

---

[टि०] १ स्वादृष्टोपग्रहो—अ, ब, क; २ विधन—अ; ३ तथाप्यैक—ब, क; ४ रप्येकैक — अ; ५ साधारणत्वा — अ, ब; ६ नित्यं द्रव्य — अ, ब, क; ७ देवताऽवच्छेदे — अ.

**न्यायकन्दली**

**ध्यानैकतानमनसो विगतप्रचाराः**
**पश्यन्ति यं [1]कमपि निर्मलमद्वितीयम् ।**
**ज्ञानात्मने विघटिताखिलबन्धनाय**
**तस्मै नमो भगवते पुरुषोत्तमाय ॥२॥**

[टि०] **ध्यानैके** इति–कर्तुर्वैष्णवत्वात् पुरुषोत्तमस्य रुचितस्य नमस्कारः। यत एव [2]ध्यानपरायणमनसोऽत एव विगतप्रचाराः। अद्वितीयत्वं वेदान्ताभिप्रायेण। विघटितानि [3]आश्रितानां बन्धनानि येन, स्वयं नित्यमुक्तत्वात्। अथवा [4]महेश्वरोऽपि पुरुषेषूत्तम इति तस्यैव नमस्कारः। अत्राद्वितीयमिति न विद्यते द्वितीयो यस्य। ज्ञानात्मने इति ज्ञानधर्मवते इत्यर्थः। आत्मशब्दो धर्मेऽपि वर्तते यथा घटत्वं (टात्मा) घटस्य स्वरूपं घटस्य धर्म इत्यर्थः। शेषं प्राग्वत्। २॥

[पं०] [१] [–स्यतम्। अनादि[रि]त्यस्मिन्नुच्यमाने प्रागभावे [न] साधारण्यं प्राप्नोति। प्रागभावो ह्यनादिः सनिधनश्च वक्ष्यते। अनिधनमित्यस्मिन्नुच्यमाने प्रध्वंसाभावो न साधारण्यं प्राप्नोति।][5] प्रध्वंसाभावो हि सादिरनिधनश्च वक्ष्यते। इत्युभयपदोपादानम्। समस्तेन चेतरेतराभावेन साधारण्यं प्राप्नोति। इतरेतराभावो ह्यनाद्यनिधनो वक्ष्यते। अत देवशब्दोपादानाद्विशेषः। देवः क्रीडनशीलः। प्रागभावप्रध्वंसाभावेतरेतराभावा ह्यवस्तुरूपाः। ईश्वरस्तु वस्तुरूप इति देवशब्देन [ध्व]न्यते। जगत्कारणमित्यदृष्टसाधारण्यम्। अत ईश्वरपदोपादानम्। ईश्वरं = शिवम्। सती = पार्वती। तस्यां (न)(?) संकल्पो यस्यासौ सत्यसंकल्पः। –पराचीनावस्थापक्षे। अर्वाचीनावस्थापक्षे तु न तथा। (अ)[6](?) सत्यसंकल्पं–अथवा सत्यसंकल्प[त्वं] तन्मनोव्यापारानुसारेण भूतानां भौतिकानां च चेष्टनात्।

नित्यं विज्ञानमेव विग्रहः। शरीरं यस्य सः तथा तम्। अथवा–अनादिनिधनमित्यन्यथा व्याख्यायते। अनन्ति = प्राणन्ति इति अनाः = प्राणिनस्तेषां आदिर्ग्रसत्वं = संहार इति यावत्। नितरां धनति = गर्जति अनादिनिधनस्तम्। देवं जयवन्तम्। जगतः कं = सुखम्, खं = शब्दम्, ऋच्छति = प्रापयति रम्यादित्वात्कर्तरि युट् प्रत्यये जगत्कारणम्।

[कु०] * अद्याश्वाद्यद्यास्य [ ] व्याख्याः सन्तु विपश्चिताम्।
देशेऽत्र या न दृश्यन्ते ततोऽत्र[त्र] प्रयतामहे ॥ ७ ॥

तत्र तावत्प्रारिप्सितग्रन्थपरिसमाप्तिप्रबय(?) परिपन्थिप्रत्यूहप्रशमफलमभीष्ट न परमेश्वरस्वरूपविवेचनपूर्वकं तत्प्रपत्तिलक्षणं मङ्गलमाचरति–**अनादिनिधनमिति** (कं. १.५)। मङ्गलाचारस्यैतदेकफलत्वं मयेवानंतरं व्याख्यास्यति। तत्र(ई)श्वरं प्रपद्य इत्युक्तो तत्सद्भावे प्रमाणमभिदधान एवेश(श्व)रपदार्थतया लोकप्रसिद्धया प्रसक्तत्(?) राजादी-(दि)व्यवच्छितिः च्छिनत्ति **जगत्कारणमिति** (कं. १.५)। अत्र जगच्छब्दः कार्यवर्गपरतः तदितरस्य कारणानपेक्षित्वात्। प्रमाणं चेदं विवादपदं बुद्धिमत्कर्तृकारणं कार्यत्वाद् घटवदिति। अस्य प्रपञ्चः सृष्टिसंहारपादे भविष्यति

---

१ किमपि–जे. ३। २ परायणे त एव–अ, परायणा–ब, क; ३ आश्रितानीं–अ, ब; ४ महेश्वरेऽपि–अ, ब, क; ५ [ ] एतद् चिह्नान्तर्गतो पाठः 'अ' पुस्तके नास्ति। ६ मूलकन्दल्यां सत्यसंकल्पमिति पदम्। 'अ' इत्यवग्रहत्वेन कल्पितं पञ्जिकाकारेण, अथवा लेखकदोषोऽयम्।

* Some words are missing in verses No. 2, 3 & 7 through scribal error.

## न्यायकन्दली

**[2] [1]शास्त्रारम्भेऽभिमतां देवतां शास्त्रस्य प्रणेतारं गुरुञ्च श्लोकस्य पूर्वार्द्धेन नमस्यति-प्रणम्येति। कर्म्मारम्भे हि देवता गुरवश्च नमस्क्रियन्ते इति। शिष्टाचारोऽयम्।**

**[टि०]** [२] [मङ्गलवादो–भाष्यमङ्गलश्लोकार्थसहितः।]

**[पं०]** जगदुपप्लवकारिणं निग्रहात्। न विद्यते सत्या = सत्यभामा यस्यासौऽसत्यस्तथाविधः संकल्पो मनोव्यापारो यस्य मुक्तत्वात्, सः तथा तम्। नित्यं शाश्वतं यद्विज्ञानं तस्माद्दिक्पार्थिवयं विजिरू पृथग्भावे वेजनं विक्, तां रहति= त्यजतीति। नित्यविज्ञानविग्रहस्तं = ज्ञानात्मकमित्यर्थः। ब्रह्मपक्षे जगत्कारणं ब्रह्माणं ईश्वरं सर्गसमर्थं देवं–इच्छाशीलतया न विद्यते आदि प्रसिद्धं निधनं मृत्युर्यस्य शाश्वतत्वात्। सत्यसंकल्पं सत्यानवदानं सम्यक् कल्पयति = रचयतीति सत्यसंकल्पस्तम्। नित्यविज्ञानः क्षीरनीरविवेचनकलाकुशलो विः=पक्षी हंसस्तत्र ग्रह आदरो यस्य स तथा तं नित्यविज्ञानविग्रहम्।

भूयोऽपि श्रयीमयं नमस्कारमाह :–

**ध्यानैकतानमनसो** विगतप्रचाराः पश्यन्ति यं कमपि निर्मलमद्वितीयम्।
ज्ञानात्मने विघटिताखिलबन्धनाय तस्मै नमो भगवते पुरुषोत्तमाय ॥ कं.। २ ॥

ध्याने एकतानं=एकविस्तारं– अथवा ध्यानैकतां नयति=प्रापयति। यद्वा ध्यानैकतामानयति जीवयति, ध्यानैकतानं ईदृशं मनो येषां ते–तथा विगतप्रचारास्त्यक्तबाह्येन्द्रियव्यापाराः निरुद्धपवनचारा वा कि(कं)मप्यनिर्वचनीयम्। निर्मलं = विशुद्धम्। न विद्यते द्वितीयो यस्य सोऽद्वितीयः। तं शक्तिरहितत्वात् परमशिवस्य–अथवा द्वयोर्भावो द्विता, न द्विता = अद्विता तस्यै हितं = अद्वितीयम्, अद्वैतवादप्रतिष्ठापकत्वात्। पुरुषोत्तमाय = विष्णवे। अथवा[2] पुरे शरीरे शयनात्पुरुषाः = प्राणिनस्तेषामुत्प्राबल्येन तमाराति(?)र्यस्मात्स पुरुषोत्तम–ईश्वरस्तस्मै। अथवा पुरुषानुत्तमयति = क्लेशयति गर्भवासादिना पुरुषोत्तमो = ब्रह्मा तस्मै। शेषं सुगमम्।

अथवा प्रस्तुतग्रंथकारः श्रीधरो भट्टः भक्तः परमवैष्णवः **प्रशस्तकरदेवस्य** पर[म]माहेश्वरस्य भाष्यं विवरीषुः प्रथमपद्ये केवलमीश्वरमेव शरणीभूतवान्। समुचितत्वात्। द्वितीयपद्ये तु केवलं विष्णुं नतवान्। इष्टत्वादिति नमस्कारद्वयार्थः।

[२] **गुरुमिति कणादं** श्लोकस्य पूर्वार्धेन प्रणम्य हेतुमीश्वरं मुनिं **कणादमनमत**। इत्येवंरूपेण नमस्यतीति **भाष्यकारः प्रशस्तकरदेवः** ॥ **प्रेक्षावद्भिरनुष्ठीयमानत्वादिति** –यो यः (नमस्कारः) प्रेक्षावद्भिरनुष्ठीयते स सफलः,

**[कु०]** तथापि धर्म्माधर्म्मयोर्जगत्कारणतया ईश्वरत्वप्रसङ्गात् आह–**अनादिनिधनमिति** तथापि परमाणुषु प्रसङ्गोऽस्त आह **देवमिति** (कं. १.५)। दीव्यतीति देवः। देवत्वैव मेघादयः पदादिषु द्रष्टव्या इत्यत्र देवनं च गतिः। गतिश्च ज्ञानम्। न च परमाणूनां तत्सम्भवः, तथापि जीवानामनित्यज्ञानवतामनादिनिधनानां धर्म्माधर्म्मद्वारा परमाण्वधिष्ठाने जगत्कर्तृत्वेनेश्वरत्वसम्भवोऽस्त आह **सत्यसङ्कल्पमिति** (कं. १.६) सङ्कल्पः इच्छा सत्या अप्रतिहता यस्य स तथोक्तः। न चैवं जीवाः तेषामिच्छायाः प्रतिबन्धसम्भवात्। यथोक्तं भगवानाथपादेन (भगवताक्षपादेन) "ईश्वरः कारणं पुरुष(:) [3]'**कर्म्मफलादर्शनात्**" (न्या. सू. ४–१–१९) इति। तथापि तत्रभवतां योगर्धिसम्पन्नानां जीवन्मुक्तानामनादिभवपरम्परोपात्तकर्माशयप्रक्षयाय परितस्तत्फलोपभोगभागिनः कायान्निर्मिमाणानां सत्स्वकल्पनयो [सत्य-

---

१ ग्रन्थारम्भे–जे. १, २, ३। २ अथ च इति–'अ' पुस्तके. ३ कर्माफल्यदर्शनात् इति सूत्रे पाठः।

## न्यायकन्दली

**फलं च नमस्कारस्य विघ्नोपशमः। न तावदयमफलः[1], प्रेक्षावद्भिरनुष्ठीयमानत्वात्। अन्यफलोऽपि न कर्म्मारम्भे नियमेनानुष्ठीयेत, अविघ्नेन प्रारिप्सितपरिसमाप्तेस्तदानीमपेक्षितत्वात्, फलान्तरस्यानभिसंहितत्वाच्च[2]।**

[**टि०**] **फलं च नमकारस्य**–इत्यादिना प्रमाणं सूचितम्[3]। विवादाध्यासितो नमस्कारो विघ्ननिवृत्तिफलः[4] सफलत्वे[5] सति अन्यफलरहितत्वाद् दधिदुर्वादिवदिति; व्यतिरेके सन्ध्याकर्मादिवदिति[6]। सफलत्वे सतीति विशेषणस्यासिद्धिं परिहरति **न[7] तावदयम्** इति। विशेष्यासिद्धिं परिहरति **अन्यफलोऽपीति**।

[**पं०**] यथा दानादिः। यः सफलो न भवति सः प्रेक्षावद्भिरपि न क्रियते। यथा कण्टकशाखामर्दनम्। इति साधनमत्र द्रष्टव्यम्। **अन्यफल**–इत्यादि विघ्नोपशमलक्षणात् फलादन्यफलोऽपि यदि स्यात्तदा न निश्चयेन कर्मारम्भ क्रियेतेत्यर्थः। तदानीमिति कर्मारम्भकाले, **अनभिसंहितत्वादिति** मनसि अनंगीकृतत्वात्।

[**कु०**] सङ्कल्पनया] ईश्वरत्वप्रसङ्गोऽत आह **नित्यविज्ञानविग्रहमिति** (कं. १.६)। विगृह्यते विविच्य ज्ञायते तदितरेभ्यो येन स विग्रहः व्यावर्तको धर्म इति यावत्। नित्यं विज्ञानं विग्रहो यस्य स तथोक्तः। न च योगिनां नित्यज्ञानं सम्भव(ति) इति य(ज)गत्कारणमित्यस्यानन्तरं नित्यविज्ञानविग्रहमिति सम्बन्धे तु पदान्तराणि स्तुत्यर्थानि।

तदेवमीश्वरस्वरूपविवेचनपूर्व्वकं तत्सद्भावेऽनुमानं प्रमाण[म]भिधाय श्रुतिस्मृतीतिहासपुराणेषु प्राचुर्येण प्रस्तुतानां पुरुषोत्तमादिशब्दानां स एव वाच्यो न तु त(द्र)व्यान्तरं व्यावर्तकधर्मविरहात्। स च केवलं नानुमानगम्यः किन्तु योगिप्रत्यक्षगम्योऽपीति प्रतिपाद[य]न्नमस्करोति **ध्यानैकतानमनस** इति (कं. १–७)। निर्मलं संसारमलरहितं यं कमपि पुरुषोत्तमं वासुदेवं वा अद्वितीयम् न तु पूर्वोक्तादन्यं द्वितीयमित्यर्थः। ज्ञानमात्मा धर्मो यस्य स ज्ञानात्मा, तस्मै विघटिताखिलान्युपासकानां बन्धनानि येनेति तदुपासनायाः फलसूचनम्। भगवते ऐश्वर्यादियुक्ताय तस्मै पूर्वोक्ताय नित्यं विज्ञानविग्रहाय परमेश्वराय नम इति। एवं च नित्यज्ञानेच्छाप्रयत्नवत्तया पुरुषोत्तमशब्दवाच्योऽपीश्वरान्न भिद्यते इति प्रतिपादितं भवति। उक्तं च भविष्योत्तरे :–

> ब्रह्माविष्णुर्विषाङ्कश्च त्रयो देवाः सनातनाः।
> नामभेदैः क्रियाभेदैर्भिद्यन्ते वस्तुतोऽन्यथा॥

वस्तुतः परमार्थतः अन्यथा न भिद्यन्ते इत्यर्थः।

[2] भाष्याद्यश्लोकपूर्वार्द्धस्याप्रस्तुतत्वशङ्कां निराचिकीर्षंस्तात्पर्यमाह– **ग्रन्थारम्भ**[8] इति (कं. १–९)। नमस्क्रियाप्यप्रस्तुतेत्यत आह **कर्म्मारम्भ** इति (कं. १–१०)। शिष्टाचारोऽपि [इ]ष्टोपा(य)[तयैव] एव क्रियते। अनेन किमिष्टं सिद्ध्यतीत्यत आह **फलं चेति** (कं. १–११)। अत्र विप्रतिपत्तिरफलत्वादन्यफलत्वाद्वेति विकल्पे नाद्यः पक्ष इत्याह न तावदिति (कं. १–११)। अनुष्ठानं नाम कालान्तरभावीष्टोपायता ज्ञानपूर्व्वकं करणं ततश्च निष्ठीवनादिना न व्यभिचारः तथापि 'चैत्यं वन्देत स्वर्गकाम' इत्यादिभिर्विपुलस्थानामनुष्ठानेन व्यभिचारः तं[तद्]

---

१ मफलं–जे. १। २ नभिसंहितत्वात्–कं.१। ३ मुदितम्–अ, मुञ्जितम्–त्र; ४ विघ्ननिवृत्ति–अ; ५ फलत्वे–म, सत्त्वफलत्वे–ब; ६ सन्ध्य–अ; ७ तावदयम्–ड; ८ शास्त्रारम्भ इति (कं. १)

## न्यायकन्दली

[3] ननु किं नमस्कारादेव विघ्नोपशमः ? [1]किमुत अन्यस्मादपि भवति ? न तावन्नमस्कारादेवेत्यस्ति नियमः, असत्यपि नमस्कारे न्यायमीमांसाभाष्ययोः परिसमाप्तत्वात् । [2]यदि चान्यस्मादपि [3]तदा भवति नमस्कारस्य नियमेनोपादानं निरुपपत्तिकम् । अत्रोच्यते–नमस्कारादेव विघ्नोपशमः, कर्म्मारम्भे सद्भिर्नियमेन [4]तस्योपादानात् । न च न्यायमीमांसाभाष्यकाराभ्यां न कृतो नमस्कारः, [5]किन्तु तत्रानुपनिबद्धः ।

कथमेषा प्रतीतिरिति चेत् ? कर्त्तुः शिष्टतयैव । अस्तु वा तावदपरः । प्रेक्षावान् म्लेच्छोपि तावद् गुर्वारम्भे कर्म्मणि न प्रवर्त्तते [6]यावदिष्टां देवतां न नमस्यति । यदिमौ परमास्तिकौ [7]पक्षिलशबरस्वामिनौ नानुतिष्ठत इत्यसम्भावनमिदम् ।

[टि०] [3] अत्र [8]परो विघ्नोपशमफलत्वेऽन्वयव्यतिरेकाभावमापादयति **ननु किं नमस्कारादेव** इति ।

[पं०] [3] [9]यदा **चान्यस्मादपि भवतीति** अत्र विघ्नोपशमः कर्ता । किंतु **तत्रानुपनिबद्ध** इति–किंतु न ग्रन्थे निबद्ध इत्यर्थः । **पक्षिलस्वामिशबरस्वामिनाविति । पक्षिलस्वामी न्यायभाष्यकारश्चाणक्यः । मीमांसाभाष्यकारः शबरस्वामी ।**

[कु०]निवृत्तये प्रेक्षावद्भिरिति (कं. १–१२) पदम् । न द्वितीय इत्याह [10]**नाप्यन्यफल** इति । अत्रेदं प्रमाणम्– "कर्मादौ मङ्गलाचारो न विघ्नोपशमव्यतिरिक्तफलो नियमेन प्रेक्षावद्भिः पूर्वमनुष्ठीयमानत्वात्" नियमेन प्रेक्षावद्भिः पूर्वं यन्नानुष्ठीयते न तत् तत्फलकं यथा स्वर्गफला[लः] कारीरी न च विघ्नोपशमव्यतिरिक्तवृष्टिफलतया कारीरी विवक्ष्यत इति वाच्यम् अनुष्ठातृभिरिष्यमाणेनैव न फलोऽफलवानिति साध्यस्य विवक्षितत्वात् । अनिष्यमाणतया विघ्नोपशमोऽप्यफलमित्यतस्तदिच्छायां प्रत्यक्षं प्रमाणमाह–**अविघ्नेनेति** (कं. १.१३) ।

[3] [न] सति भावमात्रेण कारणत्वं किन्तु सत्येव भावेन तच्चेह नास्तीत्याशयवांश्चोदयति **नन्विति** (कं. १.१४) । सत्यम्, सत्येव भावेन कारणत्वं तच्च **न्यायमीमांसाभाष्य**परिसमाप्त्याऽनुमाय इत्याशयवान् परिहरति **अत्रोच्यत**–इति (कं. १.१७) ॥ अदर्शनं कुत इत्यत आह **न चेति** (कं. १.१८) । शिष्टतया परिसमापितसत्कार्यतया । **म्लेच्छोऽपीति** (कं.२.१) । निन्दितमृगयादिष्वपि नमस्कारेण विघ्नोपशमः किं पुनर्महति कार्ये । न च सत्यपि मङ्गलाचारे **किरणावल्यादे**र्विघ्ना(?)प्रतिहतत्वान्न विघ्नोपशमहेतुर्मङ्गलमिति वाच्यम्–शिष्टाचारानुमिताम्नायलिङ्गके कारणे सत्यपि कर्मकर्तृ(सा न)? वैगुण्येन फलानुदयसम्भवाल्लिङ्गावसेये हि व्यभिचारदोषा यत्र तर्हि कर्मादिसाद्गुण्यं तत्र कथं फलानुदये(य)सम्भवाल्लिङ्गावसेये हि व्यभिचारदोषः यत्र तर्हि कर्म्माय?[नुद] इति चेत्, न, दृष्टहेतुसाद्गुणेप्यदृष्टहेतुसाद्गुण्यस्य दुर्विज्ञानत्वात् तर्ह्यदृष्टसाद्गुण्यासाद्गुण्यसन्देहेन हेतुत्वमपि सन्दिह्यत इत्यकारणत्वमेव ज्याय इति चेत्, न, दृष्टगुणभूयस्त्वेनादृष्टवैगुण्यस्यापि परिहारसम्भवात् । दृश्यते ह्यसहायतायाः समर्थस्य सहायसम्पत्तौ शत्रुक्षये सामर्थ्यम् । न च विघ्नहेतुसामर्थ्यानिश्चयात्तदु(पाय)? [दान]एव न कारणमनुपादेयम्, निवर्त्यसन्देहेऽपि निवर्तकस्योपादानात् । न हि पाथाः [योधाः?] पाटवरां [पाटच्चर] निश्चिता धनुराददते इति ।

---

१ उत–कं. १, कं. २ । २ यदा–कं. १, कं. २ । ३ तदा नियमेनोपादानं–कं. १, कं. २ । ४ 'तस्य' इति–जे. १, ३ इत्यत्र नास्ति । ५ किन्त्वनुपनिबद्धः–जे. १, ३. ६ यावदिष्टान्न–कं. १, कं. २ । ७ पक्षिलस्वामिशबरस्वामिनौ –जे. १, ३, पक्षिलशिवस्वामिनौ–कं. ४. पु. ८ अपरो–अ, ब, क; अव परो–ड; ९ उतान्यास्मादपि भवति–कं । १० अन्यफलोऽपि न (कं. १)

## न्यायकन्दली

[4] अक्षरार्थो [1]व्याक्रियते—प्रणम्येति । प्रकर्षवाचिना 'प्र'शब्देन भक्तिश्रद्धातिशयपूर्वकं नमस्कारमाचष्टे । स हि धर्मोत्पादकस्तिरयत्यन्तरायबीजं नापरः । अत एव कृतनमस्कारस्यापि कादम्बर्यादेरपरिसमाप्तिः, विशिष्टनमस्कारभावात् तदवैशिष्ट्यस्य [2]च कार्यगम्यत्वात् । अत्रैव च नमस्कारः क्रियमाणोऽपि करिष्यमाणपदार्थ-

[टि०] [4] **प्रकर्षवाचिना** इति— 'प्र'शब्दस्य द्योतकत्वेन वाचकत्वाभावात्प्रकर्षं[3] वाचयतीति णिजन्तस्य णिन् । भक्ति कायिकी प्रह्वता । [4]श्रद्धा तथेति प्रत्ययः । [5]**स हि धर्म** इति— [6]स भक्तिश्रद्धातिशयपूर्वको नमस्कारः । तस्य [7]चाशुतरविनाशत्वेन कालान्तरेऽन्तरायबीजतिरोधानासमर्थत्वाशङ्कायामुक्तं **धर्मोत्पादक** इति । नन्वन्तरायशब्देन तावद् ग्रन्थपरिसमाप्तिप्रागभावोऽभिधीयते स चानादिरिति कथमुक्तमन्तरायबीजमिति ? [8]नैवम् । [9]अन्तरायशब्देनात्र ग्रन्थकरणे सामग्रीप्रतिबन्धका आलस्यमान्द्यादय [10]उच्यन्ते, तेषां चाधर्मः कारणमिति । नमस्कारः कृत एव 'क्त्वा' प्रत्यये[11]नानूद्यते इति **व्योमशिवेन** व्याख्यातम्, तद्विधिनिषेधाभावानि(न्नि)ष्प्रयोजनमिति दूषयिष्यन् अन्यथा व्याचष्टे

[पं०] [4] **अक्षरार्थ** इति—अक्षरैर्निष्पन्नत्वात्पदमप्यक्षरमुच्यते । ततश्च पदार्थ इत्यर्थः । **प्रकर्षवाचिना प्रशब्देनेति**— ननु 'प्र'शब्दश्चादित्वाद्द्योतको न वाचकः, ततः कथं प्रकर्षवाचिनेत्युपपद्यते? सत्यम् । अत्र णिजन्तं प्रकर्षं वाचयतीति, अतो न दोषः । भक्तिश्रद्धेति — भक्तिः कायिकी, श्रद्धा मानसी इच्छा । **स हि धर्मोत्पादकस्तिरयत्यन्तरायबीजमिति**- नमस्कारो ह्याशुतरविनाशी, तज्जनितस्तु धर्मश्चिरस्थायी । ततो धर्मोत्पादकत्वान्नमस्कारो अंतरायाणां जाड्यमान्द्यादीनां बीजं =पापं तिरस्करोतीत्यर्थः । **नापर इति**—यो भक्तिश्रद्धाशयपूर्वको नमस्कारो न भवति सो अन्तरायबीजं= पापं न तिरस्करोति, तथाविधधर्माजनकत्वादित्यर्थः । कार्यगम्यत्वादिति—कार्यमपरिसमाप्तिः ।

नन्विह नमस्कारः क्रियमाणो वर्तते, क्रियमाणस्य च कथं पूर्वकालभावित्वमिति परवचनमाशंक्याह—**अत्रैव च नमस्कार** इत्यादि । **तदेकवाक्यतामापादयितुमिति** । क्त्वाप्रत्ययान्तस्य हि एकवाक्यताऽवश्यं कर्तव्या । यदुक्तं—

> संभवत्येकवाक्यत्वे, वाक्यभेदो हि नेष्यते[12] ।
> इष्यते वाक्यभेदस्तु पूर्वापरविरोधतः ॥

[कु०] [4] **भक्तिश्रद्धातिशयपूर्वकमिति** (कं. २.३) भजनं भक्तिः । आत्मनो वा पुरुषार्थस्य वा तदधीनता बुद्धि-श्रद्धाआस्तिक्यम । **स हीति** (कं. २.४)? प्रभृति च इत्यर्थः । ननु महता यत्नेन जगन्नगसरद्ममूलस्तग रूपकालङ्कारेण क्रियमाणो महाकवेर्बाणस्य नमस्कारः कथमप्रकृष्टोऽत आह—**तदवैशिष्ट्यस्य** (कं. २.६) [13]वेति । ननु 'नमामि' इति प्राधान्येन नमस्कारेऽभिधातव्ये किमर्थं क्रियान्तरोपसर्जनतया ष्टा? (क्त्वा) प्रत्ययेन निर्दिश्यतेऽत आह [14]**तत्रैवेति** (कं. २.६) । ग्रन्थादावेव क्रियमाणो नमस्कारो ग्रन्थपरिसमाप्तिप्रत्यूहप्रशमैकफलतया ग्रन्थप्रवचनैकहेतुरिति पूर्वकालाभिधायिना 'क्त्वा' प्रत्ययेन निर्दिष्ट इत्यर्थः । तदिदमाह **तदेकवाक्येति** (कं. २.८) । हेतुहेतुमद्भावो ह्येकवाक्यता तस्य हेतुमित्यपेक्षायामाह—हेतुमिति (कं. २.९) । प्रसक्तसङ्कोचे कारणाभावादिति भावः ।

---

१ व्याह्रियते—कं. १, कं. २ । २ 'च'—कं. १, कं. २ इत्यत्र नास्ति । ३ प्रसिद्धं[त्रिका]—अ, ब; ४ श्राद्धा—अ, ब; ५ स हि वि—ड ६ सद्—ड. ७ चापुत वि—अ, ब; ८ एकवाक्यत्वे हि नैव—अ; ९ अन्त्य—अ, ब; १० उच्यतेषां—अ; ११ नूत्पद्यते—अ, ब; १२ नेष्यताम्—'अ' पु. १३ 'वा' कं. १ पुस्तके नास्ति । १४ अत्रैव—कं. १.

## न्यायकन्दली

धर्म्मसङ्ग्रहप्रवचनापेक्षया पूर्वकालभावीति क्त्वाप्रत्ययेनाभिधीयते तदेकवाक्यतामापादयितुम्, न त्वस्य पूर्व[1]कालतामात्रमनूद्यते, [2]अनुवादे ता प्रयोजनाभावात् । हेतुमिति निर्विशेषणेन हेतुपदेन सर्वोत्पत्तिमतां [3]निमित्तं प्रतिजानीते । ईश्वरमिति विशिष्टदेवताया अभिधानम्, लोके तद्विषयत्वेनैवास्य पदस्य प्रसिद्धेः, लोक[4]प्रसिद्धपदार्थोपसङ्ग्रहपरत्वाच्चास्य शास्त्रस्य । मुनिमिति शुद्धात्मज्ञानप्रदीपक्षपिततमसमत्युग्रतपसं

[टि०] **अत्रैव** च इत्यादि । अत्रैव चेति वर्तमानकालसामीप्यातिशयख्यापनार्थम्, [5]शास्त्रादावेवेत्यर्थः । [6]**तदेकवाक्यतेति** एकवाक्यत्वे हि सम्भवति वाक्यभेदस्यानुचितत्वात् स्वसमवेतद्वित्व[7]द्विपृथक्त्वपरत्वापरत्वसंयोगविभागानां [8]समवायिकारणत्वेऽपीश्वरस्य न दोषः । अथवा विशेषाविवक्षया निमित्तता कारणत्वमात्रमित्यर्थः [9]**जीवन्मुक्तमिति**– मिथ्याज्ञानरागादि दोषरहितो जीवन्मुक्तः । दुःखप्रवृत्ती तु तस्यापि स्तः । मिथ्याज्ञानस्य तु[10] सम्यग्ज्ञानेन नाशितत्वाद्दोषापायः

[पं०] **व्योमशिवाचार्येण** प्रणम्येत्यस्य पूर्वकालताऽनुवादमात्रमुक्तम्, तन्निषेद्धुमाह–**न त्वस्य पूर्वकालमात्रतामनूद्यते** इति । अस्य प्रणम्येतिपदस्य **सर्वोत्पत्तिमत्तां निमित्तकारण[11]मिति प्रतिजानीत** इति । इह हि त्रिधा क(का)रणम्, समवायि, असमवायि निमित्तम् । तत्र घटस्य मृद्द्रव्यं समवायिकारणम्, कपालकुशूलादिसंयोगोऽसमवायिकारणम् चक्रचीवरादिसामग्री निमित्तकारणम् । ईश्वरः सर्वनिमित्तत्वान्निमित्तकारणम् । तत एवेश्वरकर्तृकं जगदिति प्रतिज्ञाशास्त्रेऽस्मिन्निर्वाहयिष्यते ।

**तद्विषयत्वेनैवेति**–विशिष्टदेवताविषयत्वेनैव । **अस्य पदस्येति** = ईश्वरपदस्य । **कापोतीं वृत्तिमिति**–इह हि त्रिधा वृत्तिः । शालीना, [या]यावरी कापोती च । तत्र यावता धान्येन कुशूलमात्रं कुंभीमात्रं वा परिपूर्यते, [12]द्व्यहमेकाहं वा वर्तनं भवति, तावन्मात्रस्य परेण स्वयमानीय दीयमानस्य यः परिग्रहः सा शालीना वृत्तिः ।१। [13]परस्मादपरिगृहीतस्वात्मभाजनं द्विदलादिमयं तापसभाजनं वा समादाय यत्प्रत्यंगणं भिक्षाटनं सा यायावरी वृत्तिः ।२। रथ्यापतितान्नकणमात्रोपजीवनं कापोती वृत्तिः ।३। [14]**अत्र निरवकाश. कणान् वा [15]भक्षयन्नित्युपालम्भस्तत्रभवतामिति**–

[कु०] एवं तर्हि सर्वोत्पत्तिमन्निमित्तत्वेनेश्वरसिद्धेः ईश्वरमिति पुनर्वचनं किमर्थमित्यत आह **ईश्वरमिति** (कं. २.१०)। लोकप्रसिद्धदेवताभिध्यभावपदानुवादेन शास्त्रस्य लोकप्रसिद्धप्रपदार्थोपसङ्ग्रहपरत्वसूचने कल्पितविषयत्वं निरस्तमिति भावः । तर्हीश्वरमित्यनेनैव सिद्धे मङ्गले शास्त्रस्य च कल्पितविषयतो निरस्ते हेतुमिति किमर्थमिति चेत्, न, प्रमाणोपदर्शनपरत्वात् । **कणादस्य** लोकप्रसिद्धमेव मुनित्वम्, किमर्थमभिधीयत इत्यत आह **मुनिमितीति** (कं. २.११) । तमसो मिथ्याज्ञानस्य क्षपणो न रागद्वेषमोहकृता. [सः] प्रमादविप्रलिप्सादयो निवर्तिताः । उग्रतपस्तया उन्मादादयः ।

---

१ पूर्वकालमात्रताम्–कं. १, २ । २ अनुवादे वा–कं. १, २ । ३ निमित्ततां–कं. १, २ । ४ प्रसिद्धार्थोपसङ्ग्रहत्त्वादस्य–कं. १, २ । ५ शास्त्रादावित्यर्थः–अ; ६ तदेकवाक्येति–अ, ब, क; ७ पृथक्त्व–अ, ब; ८ समवाय–अ, ब, क; ९ पाठोऽयं मु' पुस्तके नास्ति किन्तु तत्रैव (२) पादटिप्पणेऽन्यपुस्तकस्थः सूचितः–जे नं. १, ३ पुस्तकयोरस्ति । १० 'तु' अबक पुस्तकेषु नास्ति । ११ निमितत्तां प्रतिजानीते–कं. १२ त्र्यहमे० –'अ' पु. १३ तस्मादप्रतिगृह्णीतः 'अ' पु. १४ अत एव निर०–कं. १५ भक्षयित्स्वेत्युपा०–'अ' पु.

न्यायकन्दली

**साक्षादशेषतत्त्वावबोध[1]युक्तं जीवन्मुक्तं पुरुषविशेषमाह, इत्थम्भूत एवार्थे मुनिशब्दस्य [2]लोके प्रयोगदर्शनात् । कणादमिति तस्य कापोतीं वृत्तिमनुतिष्ठतो रथ्यानिपतितांस्तण्डुलक[3]णानादायादायादाय प्रत्यहं [4]कृतस्याहारस्याहारनिमित्ता सञ्ज्ञा । अत एव "निरवकाशः कणान् वा [5]भक्षयित्वा" इत्युपालम्भस्तत्रभवताम् । इदं हि तस्य [6]नामेति तच्छब्दसङ्कीर्त्तनं कृतं प्रशस्तदेवेन, न त्वियं तदुपनिबन्धवैशिष्ट्यख्यापनाय युक्तिरभिहिता, तदुपनिबन्धवैशिष्ट्यस्य मन्त्रादिवाक्यवन्महाजनपरिग्रहादेव प्रतीतेः । न चास्य कणाद[7]शास्त्रवैशिष्ट्यख्यापनेन किञ्चित्प्रयोजनमस्ति ।**

[**टि०**] प्रवृत्त्या च [8]दोषरूपसहकार्यभावाज्जन्म न [9]जायते । जीवनमुक्तत्वं च साक्षादशेष[10]तत्त्वावबोधात्, सोऽप्यत्युग्रतपस्त्वात्, तदपि विशुद्धात्मज्ञानक्षपिततमस्त्वात् शरीरादिव्यतिरिक्तात्मास्तित्वनिश्चये सति तपसि प्रवृत्तेरिति योजना। अन्यथा तु साक्षादशेषतत्त्वाव[11]बोधेत्यनेनैवात्मज्ञानस्य सिद्धत्वात्तदुपादानस्यानर्थक्यप्रसङ्गः । **तस्य** [12]**कापोतीम्** इति । शालीनायायावरीकापोतीप्रभृतयो हि ऋषीणां वृत्तयः । **अत एव** इति । **मीमांसकैर्हि** स्वशास्त्रे उपहासः [13]कृतः—

"[14]कणान् वा [15]भक्षयित्वाथ माहिषाणि दधीनि वा ।
[16]युक्तियुक्तावबोधश्चेत् तद्धि ग्राह्यमसंशयम् ॥"

[**पं०**] तत्रभवतां =अस्मत्पूज्यानां मीमांसकानां, परैः बौद्धैर्दत्त उपालंभः

कणान् वा भक्षयित्वा तु माहिषाणि दधीनि वा ।
युक्तियुक्तावबोधश्चेत्, तत्रैवास्माकमादरः ॥

[17]इति–स उपालंभो नो निरवकाशोऽप्रस्तुत इत्यर्थः । **तच्छब्दसंकीर्तनमिति = कणादशब्देन** संकीर्तनम् । **न त्वियं**

[**कु०**] अशेषतत्त्वावबोधिना ज्ञानम् । एनेन मुनेर्यथावस्थितार्थदर्शनं यथादृष्टप्रतिपादकत्वं च दर्शितं तथापि तत्त्वसाक्षात्कारानन्तरमपवृक्षः [क्तः][स्तः] कथं शास्त्रं प्रणिनायेति शङ्कामपनेतुमाह [18]**जीवन्मुक्तमिति** (कं. २.१२) साक्षात्कृततत्त्वोऽपि तावत्कालमवतिष्ठते यावदुपभोगादुपार्जितकर्माशयं क्षिणोति । तादृशश्च मुनिः शास्त्रं प्रणीतवानिति न वातपुत्रीयता शास्त्रस्येति भावः ।

---

१ जीवन्मुक्तं इति–कं. १, २. इत्यत्र नास्ति किन्तु २ पु. इत्यत्र सर्वत्र तालपत्रपुस्तकेषु चास्ति । २ लोके दर्शनात्–कं. १, कं. २ । ३ कणानादाय प्रत्यहं–कं. १, कं. २ । ४ कृताहारनिमित्ता–कं. १, कं. २ । ५ भक्षयतु–कं. १, कं. २ । श्लोकोऽयं राजशेखरकृतपञ्जिकायामित्थं दत्तः 'कणान् वा भक्षयित्वा तु माहिषाणि दधीनि वा । युक्तियुक्तावबोधश्चेत्तत्रैवास्माकमादरः ॥ अतः 'भक्षयित्वा' इत्येव पाठः समीचीनः । ६ नामधेयमिति–जे. १, जे. ३ । ७ शास्त्रख्यापनेन–कं. १, कं. २ । ८ दोषापायरूप–अ; ९ जन्यते–ड; १० तत्त्वाबोधत–अ; ११ बोधित्यनेनैव–अ, ब; १२ कापोतीति–ड; १३ 'कृत'–अ–पुस्तके नास्ति । १४ कारणान्–अ, ब; १५ भक्षयत्वात्तु–अ, ब, क; १६ युक्तायुक्ताव–अ; १७ इत्युपालंभो निरवकाशः–'अ' पु. १८ पाठोऽयं–कं. १. पुस्तकसम्पादकेन न स्वीकृतः किन्तु २.६ इत्यत्र वर्तते ।

न्यायकन्दली

तावता तत्पूर्वकस्य ग्रन्थस्य वैशिष्टयसिद्धिरिति चेन्न, अवश्यं तत्पूर्वकत्वेन स्वग्रन्थस्य वैशिष्टयसिद्धिः, कर्त्तृदोषेणाऽयथार्थस्यापि निबन्धस्य सम्भावनास्पदत्वात्। सम्भावितप्रामाण्ये प्रशस्तदेवे पुरुषदोषाणा[1]मसम्भव इति चेत्? एवं तर्हि यथा कणादर्शिनां तच्छिष्याणां पुरुषप्रत्ययादेव तथात्वनिश्चयात् तदुपनिबन्धे प्रवृत्तिः, अपरेषाञ्च पुरुषान्तरसंवादात्, एवं [2]प्रशस्तदेवकृतोपनिबन्धेऽपि तच्छिष्याणामपरेषाञ्च प्रवृत्तिर्भविष्यतीति नार्थस्तत्पूर्वकत्वख्यापनेन।

[5] किमर्थं तर्हि [3]कणादर्षेर्नमस्कारः? विघ्नोपशमायेत्युक्तम्, यथेश्वरस्य नमस्कारः। सोऽपि हि न तत्पूर्वकत्वख्यापनाय, व्यभिचारात्। [4]या यस्येष्टा देवता स तां प्रणम्य सर्वकर्म्माणि प्रस्तौति, न [5]कर्म्मणां तत्पूर्वकत्वेन, भक्तिश्रद्धामात्रनिबन्ध-

[टि॰] अत्र च पूर्वार्धे [6]यत् शास्त्रं कृतमित्यध्याहार्यम्। [7]**नश्चियम्** इति उप सामस्त्येन निबध्यन्ते अर्था अत्र इत्युपनिबन्धो मूलशास्त्रमेव। **न चास्य** इति [8]**प्रशस्तकरस्य**।

[5] अव्यभिचारमेव भावयति **या[9] यस्य** इत्यादि। [10]**तथा च मीमांसा** इति—

[पं॰] **तदुपनिबन्धवैशिष्टयख्यापनाय युक्तिरभिहितेति**—रथ्यानिपतितान्कणान् य भक्षितवानिति कृत्वा एतस्य संबन्धिशास्त्रं विशिष्टमिति युक्तिर्नाभिहितेत्यर्थः। **अस्येति—प्रशस्तदेवस्य**। **तावतेति**—कणादशास्त्रवैशिष्टयख्यापनेन **तत्पूर्वकस्येति** = कणादशास्त्रपूर्वकस्य। **स्वग्रन्थस्येति**=भाष्यस्य। **तच्छिष्याणामिति**=कणादशिष्याणाम्। **तथात्वनिश्चयादिति**=सत्यत्वनिश्चयात्। **नार्थ इति** – न प्रयोजनम्।

[5] **व्यभिचारादिति** – न खलु यो य ईश्वरपूर्वको ग्रन्थः, स स विशिष्ट इत्यस्ति नियमः। कर्तृदोषेणान्यथापि

[कु॰] ननु शास्त्रप्रणेतृनिर्देशास्तत्प्रणयनोपयोगिनो धर्म्मा निर्दिष्टव्याः। ते च मुनिमिच्छा(न्वा) नेनैव निर्दिष्टा आहारविशेषप्रतिपादनं तु क्वोपयुज्यत इत्यत आह **कणादमिति** (कं. २.१३)। न मया आहारविशेषः शास्त्रारम्भणोपयोगितया निर्दिश्यते किन्तु मुनेरुक्तवैशिष्टयप्रतिपादनाय, तच्च विघ्नोपशमायेति भावः। तर्हि तदुपनिबन्धवैशिष्टयं कुत इत्यत आह—तदुपनिबन्धवैशिष्टयस्येति (कं. २.१७)। अयं चाङ्गीकृत्य वादः परमार्थतस्तु तदुपनिबन्धवैशिष्टयस्थापनं प्रकृतानुपयोग्येवेत्याह **न चेति** (कं. २.१८)। विशिष्टव्याख्येयविषयतया व्याख्यानवैशिष्टयख्यापनोपयोगमाशङ्कय नि[राक]रोति तावते[ति] (कं. २.१९)।

[5] सा चोदयति [11]**किमर्थमिति** (कं. २.२५) ईश्वरप्रणामेनैव विघ्नोपशमे सिद्धे किमर्थः कणादप्रणाम इति भावः। परिहरति **विघ्नोपशमायेत्युक्तमिति** (कं. २.२५) हि प्रथितो हि मङ्गलारा[चा]रो विघ्नोपशमहेतुरिति भावः। दृष्टान्तस्य साध्यविकलत्वमाशङ्कय परिहरति **सोऽपीति** (कं. ३.१)।

---

१ मसम्भावना–जे. ३। २ प्रशस्तकरनिबन्धेऽपि–जे. १, जे. ३। ३ कणादस्य–जे. १, जे. ३। ४ यस्य हि या–कं. १, कं. ३। ५ कर्म्मणः–कं. १, कं ३। ६ यत्–अ, ब, क; ७ नन्वयमिति–अ, ब; ८ ' ' एतच्चिह्नान्तर्गतो पाठः–अ-पुस्तके नास्ति; प्रशस्तकरस्य व्यभिचारमेव भावयन्नाह–ड; ९ यस्य हि या–मु. १० यथा मु. ११ किमर्थः–कं. १।

## न्यायकन्दली

**नत्वान्नमस्कारस्य।[1] यथा मीमांसावार्त्तिककृता नमस्कृतः[2] सोमार्द्धधरः। न च तत्पूर्विका मीमांसेत्यस्ति प्रवादः। अन्विति ईश्वरप्रणामादनन्तरतां कणादप्रणामस्य [3]परामृशति, अत [4]ईश्वरमादौ प्रणम्य इति ईश्वरप्रणामस्य परामर्शः। [5]अत ईश्वरप्रणामादनु पश्चात् कणादं प्रणम्येत्यर्थः।**

[टि॰] "विशुद्धज्ञानदेहाय [6]त्रिलोकीदिव्यचक्षुषे ।
[7]श्रेयः प्राप्तिनिमित्ताय नमः सोमार्धधार[रि]णे ॥"

[8]अत इति– अनु [9]इत्येतावत्येवोक्ते [10]सान्तरत्वमपि [11]**कणाद**प्रणामस्य स्यादित्यानन्तर्यप्रतिपादनायोक्तमत **इति**।

[पं०] संभवादित्यर्थः। न [12]**कर्मणां तत्पूर्वकत्वेमिति**–न खलु कर्माणि देवतापूर्वाणि। यथा कृष्यादौ–नहि कृषिदेवतया सायेर(?) नाम्न्या कृषिः कृता।

***मीमांसावार्तिककृतेति**–शबरस्वामिना नमस्कृतः। **सोमार्धधर** इति–

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
गुणत्रयविभागाय नमः सोमार्धधारिणे ॥

इत्यनेन श्लोकेन नमस्कृत इत्यर्थः। **न च तत्पूर्विका मीमांसेति**–न चेश्वरपूर्विका मीमांसा वेदमूलत्वात्तस्या इत्यर्थः। **तस्येति**– प्रेक्षावतस्तस्य सम्बन्धमिति शास्त्रस्य सम्बन्धः।

[कु०] नन [13]यदि तत्पूर्वकत्वख्यापनं प्रयोजनं नाभिसमधास्यत् ईश्वरं न नमो करिष्यत इति तर्केण व्याप्तिनिश्चयसम्भवात् कथं व्यभिचार इत्याशङ्क्य तर्के उपाधिमाह [14]**या यस्येति** (कं. ३.२)। तत्पूर्वकत्वख्यापनप्रयोजनाभिसंधानाभावेऽपि देवताया इष्टत्वादेव नमस्कारो घटिष्यत इति भावः। **तत्पूर्वकत्वेनेति** (कं. ३.२)? विष्पापयिषितेनेति (चिरायापयिषितेनेति?) शेषः। नन्विष्टत्वमेव प्रयोजकमिति कुतो निश्चितमतः प्रत्यक्षं प्रमाणमाह **भक्तिश्रद्धेति** (कं. ३.३)। न च तत्पूर्विकेति यदि मीमांसयोगीश्वरपूर्वकत्वं विष्पापयिषितं (चिरायापयिषितं) स्यात् कथं तत्रेश्वरं निराकुर्यादिति भावः। ननु यदि तन्निराकरणात्तदसत्त्वमभिप्रेत कथं तर्हि भक्ति शब्दे[श्रद्धे] अपि स्याताम्। उपास्यत्वेन चोदिते भविष्यतः, निराकरणं चानुमानस्यैवेत्यविरोधः। ईश्वरप्रणामस्य परामर्श इति पश्चाद्भावस्यावधिसापेक्षत्वे प्रत्यासत्तेरीश्वरप्रणामस्यैवावधित्वेऽर्थलभ्येऽपि शिष्यबुद्धिवैशद्यायेति भावः।

---

१ तथा च इत्यधिकं जे. १, जे. ३ पुस्तकयोः। २ सोमावतंस–कं. १, कं. २। ३ दर्शयति–जे. १, जे. ३। ४ ईश्वरं प्रणम्य–जे. १, जे. ३। ५ 'अत'–इति कं. १, कं. २ पुस्तकयोर्नास्ति। ६ देहाय त्रवेदी(?) अ,ब; ७ श्रयः अ. ८ अत इतीति–ड; अन्विति–मु., अत इति ईश्वरप्रणामस्य परामर्शः–जे. १, ३; ९ इत्येतावित्येके–अ, ब; १० –रित्वमपि–ड; ११ करणाद–अ, ब; करणादि–ड; १२ न कर्मणस्तत्पूर्वकत्वेनेति–कं. *अ. पुस्तके अतः पराणि त्रीणि पत्राणि नोपलभ्यन्ते। १३ जदि–प्र.। १४ यस्य हि या–कं. १।

## न्यायकन्दली

[6] **सम्बन्धप्रयोजनयोरनभिधाने श्रोता न प्रवर्त्तते, [1]प्रयोजनाधिगतिपूर्वकत्वात्सर्वप्रेक्षावत्प्रवृत्तेः। तस्याप्रवृत्तौ च शास्त्रं [2]कृतमपि न कृतं स्यादनुपादेयत्वात्। अतः [3]शास्त्रारम्भं समादधानः प्रेक्षावत्प्रवृत्त्यङ्गं तस्य सम्बन्धं प्रयोजनञ्चादौ श्लोकस्योत्तरार्द्धेन कथयति--पदार्थधर्म्मेत्यादि। पदार्था द्रव्यादयः षट्, तेषां धर्म्माः साधारणासाधारणस्वभावाः सङ्गृह्यन्ते सङ्क्षेपेणाभिधीयन्तेऽनेनेति पदार्थधर्म्मसङ्ग्रहः। प्रवक्ष्यत इति। पदार्थधर्म्माणां सङ्क्षेपेणाभिधायको[4]ऽयं ग्रन्थः प्रकृष्टो मया वक्ष्यत इति ग्रन्थकर्त्तुः प्रतिज्ञा। ग्रन्थस्य चेयं प्रकृष्टता यदन्यत्र ग्रन्थे विस्तरेणेतस्ततोऽभिहितानामिहैकत्र तावतामेव पदार्थधर्म्माणां ग्रन्थे सङ्क्षेपेण कथनम्। [5]एतदर्थमेव चास्यारम्भः सत्स्वप्युपनिबन्धान्तरेषु पदार्थधर्म्माणां सङ्ग्रहः पदार्थधर्म्मप्रतीतिहेतुः। [6]पदार्थधर्म्मप्रतीतिश्च न पुरुषार्थः, सुखदुःखाप्तिहान्योः [7]पुरुषप्रयोजनत्वात्। तस्मादयमपुरुषार्थहेतुत्वादनुपादेय एवेत्याशङ्क्य तस्य पुरुषार्थफलतां प्रतिपादयितुमुक्तं महोदय इति।**

**[टि०]** [6] **तेषां धर्मा** इति– यद्यपि षट्पदार्थातिरिक्तस्य धर्मान्तरस्याभावे त एव धर्मास्तथापि [8]भेदविवक्षया तेषामित्यत्र[9] षष्ठी यथा शिलापुत्रकस्य शरीरमित्यत्र।

**[पं०]** [6] **साधारणासाधारणस्वभावा इति** –नवपुराणादयः साधारणाः, पृथुबुध्नोदरादयस्त्वसाधारणाः घटस्य धर्माः। संगृह्यन्ते = संक्षेपेणाभिधीयन्ते। **अनेनेति = पदार्थधर्मसंग्रह** इति। अत्र पुंसि संज्ञायां घः। **अन्यत्र ग्रन्थे इति**= कणादसूत्रोपरि **आत्रेयकृत**भाष्ये। **उपनिबन्धान्तरेष्विति**–आत्रेयतन्त्रादिष्वयमिति पदार्थधर्मसंग्रहः। वाच्यवाचकभाव इति–पदार्थधर्मा वाच्याः, (अ)संग्रहस्तु वाचकः। साध्यसाधनभाव इति– महोदयः साध्यः, पदार्थधर्मसंग्रहप्रतिपत्तिस्तु साधनम्।

[कु०] [6] **प्रयोजनावगतिपूर्वकत्वादिति** (कं. ३.७) यन्निष्प्रयोजनं तन्न प्रवृत्तियोग्यं यथा काकदन्तपरीक्षेत्यर्थकृतमपि न कृतं स्यादिति। अकृतत्वं कृतकार्यकरणमुपचारेण यथा पुत्रकार्याकिरणात् पुत्रोऽपि सन्नपुत्र इति। कृतस्य च कार्यं श्यातुः प्रवर्तनमेव तदिदमाहा[10]नुपादेयत्वादि(दि)ति। तेषां धर्मा इति (कं. ३.१०) विशेषणत्वावस्थाकृतेन भेदेन षष्ठी-प्रयोगः। **सङ्क्षेपेणेति** (कं. ३.११) सूत्रे बहुषु प्रदेशेषु विप्रकीर्णानामेकत्र सङ्कलनम्। **यदन्यत्रेति** (कं. ३.१२) इतस्ततोऽभिहितानाम्। **एकत्रेति** (कं. ३.१३) सङ्ग्रहपदलब्ध [अ]नूद्यविस्तरेणाभिहितानाम्। [11]**ग्रन्थसङ्क्षेपेणाभिधानमिति** (कं. ३.१४)। प्रकर्षप्रदर्शनापौनरुक्त्यम् एतदर्थं सङ्ग्रहार्थं प्रकर्षार्थं च। **सुखदुःखाप्तिहान्योः पुरुषप्रयो-**

---

१ नावगति–जे. १, जे. ३। २ कृतमकृतं स्यात्–कं. १, कं. २। ३ शास्त्रारम्भमादधानः–कं. १, कं. २।
४ भिधायको ग्रन्थः–कं. १, कं. २। ५ एतदेव–क. १, कं. २। ६ तत्प्रतीतिश्च– जे. १, जे. ३।
७ प्रयोजकत्वात्–कं. १, कं. २। ८ विवक्षा–अ; ९ मित्यर्थः–अ; १० प्रतीकमिदं–कं. पुस्तके नास्ति।
११ ग्रन्थे सङ्क्षेपेण कथनम्–कं. १ पुस्तके पाठः।

## न्यायकन्दली

**महानुदयो महत्फलमपवर्गलक्षणं यस्मात्सङ्ग्रहादसौ महोदयः सङ्ग्रहः । एतेन सङ्ग्रहस्य पदार्थधर्म्मैः सह वाच्यवाचकभावः, तत्प्रतिपत्त्या च महोदयेन सह साध्यसाधनभावः सम्बन्धो दर्शितः ।**

[7] **ननु भोः क एष महोदयो नाम ?**

(१) **[1]सवासनक्लेशसमुच्छेदो ज्ञानोपरम इत्येके । तथा च पठन्ति–न [2]प्रेत्य सञ्ज्ञास्तीति । तदयुक्तम्, सर्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रेक्षावत्प्रवृत्त्यनुपपत्तेः, बन्धविच्छेदपर्य्यायस्य मुक्तिशब्दस्यातदर्थत्वाच्च ।**

[टि०][7] **माध्यमिकमाशंकते-सवासना**[3] इति । चित्ते विषयोपरागो वासना । रागद्वेषमोहाः क्लेशाः । ननु **बौद्धमते** क्लेशानामेव ज्ञानरूपत्वात्तदुच्छेदकथनेनैव ज्ञानोच्छेदे [4]कथिते पुनर्ज्ञानोच्छेद इति व्यर्थम्? नैवम् । [5]उपरमशब्दस्य सन्तत्युच्छेदार्थत्वात् । **न प्रेत्य** इति– प्रकर्षेणापुनर्भवेन गत्वा ज्ञानं न भवति. प्रकर्षेण गमने सञ्ज्ञायाः पुनरनुत्पत्तिरित्यर्थः । सर्वतः प्रियतमस्य इति–[6]आत्मनो ज्ञानात्मकत्वात् ।

[पं०] [7] **सवासनाक्लेशसमुच्छेदे** इति – चित्तस्य विषयोपरागो वासना । अविद्या-ऽस्मिता-राग-द्वेषाभिनिवेशाः क्लेशाः । वासनासहितानां क्लेशानामात्यंतिके उच्छेदे सतीत्यर्थः । **ज्ञानोपरम** इति=ज्ञानसंतत्युच्छेदः । **इत्येक इति**– एके = माध्यमिकाख्या चतुर्थबौद्धाः । न प्रेत्य संज्ञास्तीति–प्रेत्यामुत्रभवान्तरे इति वचनाद्भवान्तरे संज्ञाज्ञानं नास्तीत्यर्थः । सर्वत इति–सर्वेभ्यः पुत्रकलत्रादिभ्यः । आत्मन इति– ज्ञानरूपस्यातदर्थत्वात् । **चेति**–मुक्तिशब्दस्य सम्बन्धविच्छेद एवार्थो, न पुनर्ज्ञानसंतानोच्छेदेऽर्थो भवितुमर्हतीत्यर्थः ।

[कु०] **जनत्वादिति** (कं. ३.१६) व्यतिरेकव्याप्तिप्रदर्शनमेतत् । हेतुः सुखदुःखाप्तिहानिव्यतिरिक्तत्वादित्यनुसन्धेयः इत्यतो न वैयधिकरण्यं फलवत्सन्निधावफलं तदङ्गमिति न्यायेनापुरुषार्थस्यापि पदार्थधर्मप्रतीतिहेतुभूतस्य सङ्ग्रहस्योपयोगं दर्शयन् सम्बन्ध्य व्याचष्टे एतेनेति (कं. ३.१८) ।

[7] **सवासनेति** (कं. ३.२१) रागद्वेषमोहाः क्लेशाः । वासनास्तदीयसंस्काराः । ताभिः सह वर्तंते ये तेषां समुच्छेदः । सर्वक्षयस्य रागस्य तदपकारिविषयस्य च द्वेषस्य निवृत्तिः । ततश्चालयविज्ञानसन्ततेस्तु छेदोपसर्गः । नत्वात्मा नाम कश्चिदस्तीति सौगताः । तदेतदनुपपन्नं बुद्धीन्द्रियशरीरमनोव्यतिरिक्तस्य नित्यस्य विभोरात्मनः सत्त्वे वासत्त्वे च समुच्छेदस्याशक्तत्वादित्येतत्सुबोधमित्यनादृत्य प्रवृत्त्यनुपपत्तिव्यवहारविरोधं वाऽऽह **सर्वतः प्रियतमस्येति** (कं. ३.२२) । विशुद्धाया अनन्तायाश्चित्तसन्ततेरनुच्छेदान्न प्रवृत्त्यनुपपत्तिः, नापि व्यवहारविरोध इति पूर्वस्माद्विशेषः ।

---

१ सवासनासमुच्छेदो–कं. १; सवासनसमुच्छेदो–कं. २ । २ प्रेत्य–प्रकर्षेण इत्वा=गत्वा=टिप्पण–जे. १ ।
३ सेवासना–अ; ४ थिते–अ; ५ उपर–ड; ६ आत्तानो–अ, ब.

### न्यायकन्दली

[8] (२) निखिलवासनोच्छेदे [1]विगतविविधविषयाकारोपप्लवविशुद्धज्ञानोत्पादो महोदय इत्यपरे । [2]तदप्ययुक्तम्, [3]कारणाभावादेव तदनुपपत्तेः । भावनाप्रचयो हि तस्य कारणमिष्यते, स च स्थिरैकाश्रयाभावाद्विशेषानाधायकः प्रतिक्षणमपूर्ववदुपजायमानो निरन्वयविनाशी गगन[4]लङ्घनाभ्यासवदनासादितप्रकर्षो न स्फुटाभज्ञानजननाय प्रभवतीत्यनुपपत्तिरेव तस्य । समलचित्तक्षणानां स्वाभाविक्याः सदृशारम्भणशक्तेरसदृशारम्भं

[टि०] [8] कारणाभावमेव दर्शयति – [5]**भावनाप्रचयो** हि इत्यादि । **अपूर्ववद्** इति – न विद्यते [6]पूर्वो यस्यासावपूर्वः प्रथमः [7]स इव तद्वदिति [8]व्याख्येयम् । न [9]पुनरपूर्वो नूतन इति, तथा सति नूतनस्य वास्तवत्वाद् । [10]वतिप्रत्ययार्थानुपपत्तेः । [11]**गगनलङ्घनेति**–यथा प्रत्यहं [12]शरीरान्यत्वात् कालेन भूक्रमणाभ्यासो न प्रकर्षमासादयतीत्यन्वयेन दृष्टान्तः । तदुक्तम्–

दशहस्तान्तरं व्योम यो [13]नाभोत्प्लुत्य गच्छति ।
न योजनमसौ गन्तुं शक्तोऽभ्यासशतैरपि ॥

यस्तु कोऽपि प्रकर्षो दृश्यते स प्रयत्नविशेषादिति । ननु स्थिरैकाश्रयाभावेऽपि भावनाप्रचयसहकृतेन चित्तक्षणेनोत्तरश्चित्तक्षणो [14]निर्मलो निर्म्मीयते । [[15]तेनापि तत्सहकृतेन निर्मलतरः] तेनापि तत्सहकृतेन निर्मलतम इति कथं तदनुपपत्तिरित्याशङ्क्याह **समलचित्तेति** ननु ये हि पूर्वपूर्वतराश्चित्तक्षणास्ते समलचित्तक्षणारम्य एव समर्थास्तेषां

[पं०] [8] **अपरे** इति – वैभाषिक-सौत्रान्तिक-योगाचाराख्या आद्यास्त्रयो बौद्धभेदाः । **तदनुपपत्तेरिति**–विशुद्धज्ञानोत्पादस्याघटनात् । **तस्येति** – विशुद्धज्ञानस्य । **स चेति** = भावनाप्रचयः । **अपूर्ववदिति** – न विद्यते पूर्वो यस्याःसावापूर्वः-प्रथमक्षणः स इव । **लङ्घनाभ्यासवदनासादितप्रकर्ष इति** – साधर्म्यदृष्टान्तोऽयम् । लङ्घनं प्लवनम्, गगनशब्दस्याध्याहारात् । यथा गगनलङ्घनाभ्यासोऽनासादितप्रकर्षस्तथा वासनाप्रचयोऽप्यनासादितप्रकर्षः । अत एव पठंति

दशहस्तांतरं व्योम यो नाभोत्प्लुत्य गच्छति ।
न योजनमग्लौ(?) गन्तुं शक्तोऽभ्यासशतैरपि ॥

**स्फुटाभज्ञानजननायेति** – निर्मलज्ञानजननाय । **तस्येति** – विशुद्धज्ञानोत्पादस्य । भावनाप्रचयाभावे कारणमाह–

[कु०] [8] निराकरोति [16]**तदपीति** । सर्वं क्षणिकमित्याद्युपदिष्टार्थविषयधारावाहिकणं (क्षणं) बुद्धिसन्तानोद्भवो भावनाप्रचयस्तस्या एव बहुत्वम् **अपूर्व[व]दिति** (कं. ३.२६) स्थिरात्मवादमवलम्ब्य प्रतियोगः । **लङ्घनाभ्यासवदिति** (कं. ३.२७) तथा लङ्घनाभ्यासः संस्कारानाधायकतया विशुद्धं चित्तं नोत्पादयति तद्वदित्यर्थः ।

---

१ विगतविषयाकारोपप्लवज्ञानोदयो–कं. १, कं. २; विगतविषयाकारोपप्लवज्ञानोत्पादो–जे. ३ ।
२ तदयुक्तम्–कं. १, कं. २ । ३ कारणाभावे–कं. १, कं. २ । ४ 'गगन'–इति कं. १, कं. २ पुस्तकयोर्नास्ति ।
५ भावाप्रचयो–अ, ब; ६ प्रियो–अ; ७ प्रियतमः स इति–अ; ८ व्याख्यायम्–अ; ९ पुनर्पूर्वो–ड.
१० वत्–ड; ११ लङ्घनेति–मु. ड. १२ शरीरोत्पत्त्वात्–अ, ब. १३ नभोत्पत्य–अ, नाभात्युत्पत्य–ब.
१४ 'निर्मलो' इति अबपुस्तकयोर्नास्ति । १५ [ ] एतच्चिह्नान्तर्गतो पाठः अबपुस्तकयोर्नास्ति ।
१६ प्रतीकमिदं–कं. १ पुस्तके नास्ति ।

## न्यायकन्दली

**प्रत्ययशक्तेश्चाकस्मादनुच्छेदात्, किञ्च पूर्वे क्षणाः [1]स्वरसपरिनिर्वाणाः, अयमपूर्वो जातः, सन्तानश्चैको न विद्यते, बन्धमोक्षौ चैकाधि[2]करणौ न विषयभेदेन वर्तेते, तत्कस्येयं मुक्तिर्य एतदर्थं प्रयतते [3]य प्राप्य च निवृत्तो भवति ?**

**[9] (३) प्रकृतिपुरुषविवेकदर्शनादुपरतायां प्रकृतौ पुरुषस्य स्वरूपेणावस्थानं [4]महोदय इत्यन्ये । तन्न, प्रवृत्तिस्वभावायाः प्रकृतेरौदासीन्यायोगात् । पुरुषार्थनिबन्धना तस्याः प्रवृत्तिः, विवेकख्यातिश्च पुरुषार्थः । तस्यां सञ्जातायां सा निवर्तते कृत-**

[**टि०**] भावनाप्रचयस्य सहकारिणो विरहात्, तत्सहकृतास्तु [5]निर्मलं चित्तक्षणमारप्स्यन्ते इति काऽनुपपत्तिः ? सहकारिभेदेन कार्यभेदाभ्युपगमाद्, अन्यथा पीताकारज्ञानक्षण[6]सन्ततौ नीलसहकारिसद्भावेऽपि नीलाकारता न स्यादित्याशङ्क्याह – **किञ्चपूर्वेक्षणा** इति स्वरसेन स्वभावेन [7]निर्वाणाः । ननु –

"यस्मिन्नेव हि सन्ताने [8]आहिता कर्मवासना ।
फलं तत्रैव सन्धत्ते कर्पासे रक्तता यथा ॥" इति

यत्रैव सन्ताने बन्धस्तत्रैव मोक्ष इति ।

[[9]बन्धमोक्षयोरेकाधिकरणत्वमेवेत्याह **सन्तानश्चैक** ] इति ।

[9] ननु यथा [10]"स्वभावादेव पुरुषार्थाय प्रवर्तते तथा[11]" [12]विमर्शनमन्तरेण स्वभावादेव निवर्तिष्यते इत्याह

[**पं०**] **समलचित्तक्षणानामित्यादिना** – चित्तशब्देन ज्ञानम् । **अकस्मादिति** = निर्हेतुकम् । **पूर्वक्षणा इति** = समलचित्तक्षणाः **स्वरसपरिनिर्वाणा इति** = स्वभावेन विनष्टा इत्यर्थः । एतावता निर्हेतुकविनाश सूचा(श्र)कृता । **अयमिति** = निर्मलचित्तक्षणः । **सन्तानश्चैको न विद्यत इति** – अनवच्छिन्नप्रवाहेण वर्तमानज्ञानक्षणा एव हि संतान इष्यते भवद्भिरित्यर्थः । **बन्धनमोक्षौ चैकाधिकरणाविति** – य एव बद्धः स एव विमुच्यते ।

[9] **प्रकृतिपुरुषविवेकदर्शनादिति** = प्रकृतिपुरुषभेदज्ञानादित्यर्थः । **उपरतायामिति** – प्रकृतिनो(?) निवृतायाम् । **अन्य इति** = सांख्याः । **तस्याः इति** = प्रकृतेः । **विवेकख्यातिरिति** = प्रकृतिपुरुषभेदज्ञानम् । **तस्यामिति** = विवेकख्यातौ ।

[**कु०**] ननु स्थायिसंस्काराभावेऽपि पूर्वपूर्वज्ञा[न] लक्षणत्व[व]सित एवोत्तरक्षण उत्पद्यते रक्तकार्पासबीजसन्तानवदित्यत आह **समलेति** (कं. ४.१) । ननूपदेशजन्यज्ञानप्रवाहस्य सदृशारम्भणेऽपि प्रथमं परोक्षतयोन्त्यं तस्य निर्मलस्यान्ते निर्मलनतेर्भवसाक्षात्कारादन्वव्याप्यं कृतपायं ? न दोष इत्यत आह **किञ्चेति** (कं. ४.२) ।

[9] सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरकारणा, अकारणमकार्यं च कूटस्थचैतन्यरूपः पुरुषः उभयोरनादिविवेकाग्रहः । ततो महदादिभावेन परिणममाणा प्रकृतिराद्यविकारे दर्पणस्थानीये महति बिम्बिते पुरुषे धर्मान् कर्तृत्वभोक्तृत्वादीन् दर्पण इव मलिनिमानं प्रतिचिते मुखे उपदधाना संसारहेतुः । उपदेशाद् विवेकाग्रहे? (कग्रहे?)

---

१ स्वरसनिर्वाणाः–कं. १; कं. २ । २ करणौ विषयभेदेन,–कं. १; कं. २ । ३ य एव च प्रवर्तते–कं. १; कं. २ । ४ मोक्ष–कं. १; कं. २ । ५ निर्मलमपि–अ, ब, क. ६ सन्ततो अ, ब, सन्तानो–क. ७ निर्वाणः–ड. ८ ह्याहिता–अ, ब. ९ [ ] एतच्चिह्नान्तर्गतो पाठः ड पुस्तके नास्ति । १० स्वभावाद्–अ, स्वभावाम्–ब. ११ तेन तथा–अ, ब, क. १२ विमर्शमन्तरेण–ड, विमर्शमन्तरे–अ, ब.

न्यायकन्दली

**कार्य्यत्वादिति चेन्न, [1]तस्या अचेतनाया विमृश्यकारित्वाभावात्। यथेयं कृतेऽपि शब्दाद्युपलम्भे पुनस्तदर्थं प्रवर्त्तते, तथा विवेकख्यातौ कृतायामपि पुनस्तदर्थं प्रवर्त्तिष्यते स्वभावस्यान[2]पेतत्वात्।**

**[10] (४) नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरित्यपरे। [3]तदप्यसारम्, अग्रे निराकरिष्यमाणत्वात्। तस्मादहितनिवृत्तिरात्यन्तिकी महोदय इति युक्तम्।**

[टि०] [4]**यथेयं कृतेऽपि** इति।

[10] [[5]**तस्मादहितनिवृत्तिरात्यन्तिकी**] इति। – ननु किमिदमात्य[6]न्तिकत्वम्? न तावन्निवृत्तस्य पुनरनुत्पादः, तस्य संसारि[7]साधारण्यात्। [8]संसारिणामपि हि यद्दुःखं निवृत्तं न तत्पुनरुत्पद्यते। नाप्युच्छित्तिः, प्रलयेऽपि निर्वाणप्रसंगात्। नापि निवृत्तजातीयस्य पुन[9]रनुत्पादः। कोऽयमुत्पादो नाम? किं प्रागभावः? उत प्रध्वंसाभावः? अथेतरेतरताभावः? अहो स्विदत्यन्ताभावः? तत्र न तावत्पूर्वत्रितयम्, [10]संसारिसाधारण्यात्। नापि तुर्यः। स किं दुःखमात्रस्य वा? दुःखविशेषस्य वा? नाद्यः। तस्य भोगावस्थायां सम्भवेन त्रैकाल्यांऽसत्त्वाऽसिद्धेस्त्रैकालिकाभावस्यैवात्यन्ताभावत्वात्। न द्वितीयः, तस्य [11]संसारावस्थायामपि सम्भवात्। किञ्चिद्धि तदपि दुःखमस्ति यत्संसारिणापि नानुभूयते। नापि समूलं दुःखनिवृत्तिरात्यन्तिकत्वम्। सा किं विद्यमानयोर्दुःखतन्मूलयोः? अविद्यमानयोर्वा? नाद्यः। विद्यमानयोः कतिचित्कालपरिपाकवशाद[12]वश्यम्भाविनिवृत्तित्वेन तन्निवृत्त्यर्थं ज्ञानाभ्यासादिप्रयासवैयर्थ्यम्। नापरः अविद्यमानस्येश्वरेणापि निर्व(व)र्तयितुमशक्यत्वात्। नापि दुःखप्रागभावसहवर्तित्वम्, प्रागभावाभावे सति दुःखस्वीकारप्रसङ्गात्, [13]सहवर्तित्वाभावस्याभावचतुष्टयत्वेन विकल्प्यमानस्य [14]पूर्वदोषप्रसङ्गाच्च। [15]उच्यते, दुःखप्रध्वंसरूपाया दुःखनिवृत्तेरा[16]गामिदुःखमात्रात्यन्ताभावसहकृतत्वमात्यन्तिकत्वमिति।

[पं०] **सा इति** = प्रकृतिः। **तस्या इति** = प्रकृतेः। **इयमिति** = प्रकृतिः। **स्वभावस्येति** = प्रकृतलक्षणस्य।

[10] **अपरे इति** = **जैमिनीयाः**। **वार्तामिति**- वार्तामात्रमसारमित्यर्थः। **अग्र इतिं** = अदृष्टगुणप्रकरणे।

[कु०] सति भर्त्रा दृष्टदोषा स्वैरिणीव पुरुषं प्रति न विपरिणमते। ततश्च पुरुषस्य स्वरूपेणावस्थानं महोदयो भवतीति साङ्ख्यमतमाशङ्कते। **प्रकृतीति** (कं. ४.४)। तत्र प्रकृतेरप्रवृत्ते स्वभावत्वे संसारानुपपत्तेः प्रवृत्तिस्वभावत्वमङ्गीकर्तव्यम्। तथा चानिर्मोक्ष इत्याह **तन्नेति** (कं. ४.५)। शङ्कते **पुरुषार्थेति** (कं. ४.६) दूषयति–**नेति** (कं. ४.७)। अविमृश्यकारित्वमेव दर्शयति **यथेति** (कं. ४.८)।

---

१ अस्या–कं. १; कं. २। २ नपायित्वात्–कं. १; कं. २। ३ तदपि वार्तम्–जे. १; जे. ३। ४ यथेदं–अ, ब. ५ [ ] एतच्चिह्नान्तर्गतो पाठः अ पुस्तके नास्ति, तस्मादहितनिवृत्तिः–ड. ६ –त्यन्तित्वम्–अ, ब. ७ साधारणियात्–अ, ब. ८ संसारिणां हि–अ. ९ रनुत्पादा–अ. १० संसार–अ, ब. ११ संसारातस्यायामपि–अ. १२ वश्य–अ, ब, क. १३ सहवर्ति त्वाभावचातुष्टयेन–अ, सहवर्तित्वाभावचातुष्टयत्वेन–ब. १४ प्रसङ्गात्–अ, ब, क. १५ उद्यते–अ. १६ रागानि–अ,ब.

## न्यायकन्दली

**[1]तस्याः सद्भावे किं प्रमाणम्? दुःखसन्ततिर्धर्म्मिणी अत्यन्तमुच्छिद्यते सन्ततित्वा-[2]त्प्रदीपसन्तति[3]वदिति तार्किककाः। तदयुक्तम्, पार्थिवपरमाणुरूपादिसन्तानेन व्यभिचारात्। "अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" इत्यादयो वेदान्ताः प्रमाणमिति तु वयम्। भूतार्थानामेषामप्रामाण्यप्रसङ्ग इति चेन्न, प्रत्यक्षेणानैकान्तिकत्वात्। अथ मतं भूतार्थ-प्रतिपादकं वचनमनुवादकं स्यात्, ततश्चाप्रमाणत्वं प्रमाणान्तरसापेक्षत्वात्, प्रमायां साधकतमत्वाभावादिति। न सिद्धार्थप्रतिपादकत्वम[4]नुवादकत्वम्, प्रत्यक्षस्याप्यनुवादकत्व-प्रसङ्गात्। किन्त्व[5]धिगतार्थाधिगन्तृत्वम्, ईदृशश्च वेदान्तानामर्थो यद्वयं भूतोऽपि प्रत्यक्षादेः प्रमाणान्तरस्य न विषयः, कुतस्तेषामनुवादकता कुतश्च सापेक्षत्वम्, स्मृतेरिव तेभ्यः पूर्वाधिगमसंस्पर्शेनार्थप्रतीतेरभावात्। अत एव पुरुषवाक्यमपि प्रमाणम्।**

[**टि०**] **दुःखसन्ततिः** इति – एकाश्रयतया सजातीयकार्योत्पादः सन्ततित्वम्।

**तदयुक्तम्** इति – ननु सर्वमुक्तिपक्षाभ्युपगमे उत्पादकस्यादृष्टस्याभावात् पार्थिवपरमाणुरूपादिसन्ततिरप्यत्यन्त-मुच्छिद्यते इति कथमनैकान्तिकत्वम्? नैवम्, सर्वमुक्तिपक्षानभ्युपगमात्। [6]अभ्युपगमे [7]वा तदानीं रूपादिसन्तत्युत्पादक-कारणवत् विनाशकस्याप्यभावेन पार्थिवपरमाणुरूपादीनामनुच्छेदात्। अदृष्टविनाश एव नाशकारण[8]मिति चेत्, न; प्रयोजनं विना विनाशस्याभावात्।

साध्य एवार्थे शब्दप्रामाण्यवादिनो **मीमांसका** अनुमानयन्ति, भूतार्थं वाक्यमप्रमाणम्, भूतार्थप्रतिपादकत्वात् ग्रावोन्मज्जनादिवाक्यवत्, व्यतिरेके [9]अग्निष्टोमेन यजेतेत्यादिवाक्यवदिति। तद् आशङ्कते **भूतार्थानामित्यादि**। **न प्रत्यक्षेण** इति :– प्रत्यक्षज्ञानस्य हि विधिरूपत्वाभावेऽपि प्रमाणत्वात्। [10]**ततश्चाप्रमाणत्वम्** इति – अप्रमाणत्वे हेतुः **प्रमायाम्** इत्यादि। साधकतमत्वाभावेऽपि हेतुः, **प्रमाणान्तरसापेक्षत्वाद्** इति। स्मृतिवत्।

[**कु०**] [10] अभिमतं महोदयं निर्द्धारयति **तस्मादिति** (कं. ४.११)। आत्यन्तिकत्वं निवृत्तेर्निवृत्तजातीयस्य तत्रैव पुनरनुत्पादः। **पार्थिवपरमाणुरूपादिसन्तानेन व्यभिचारादिति** (कं. ४.१३)। ननु सर्वमुक्तौ भूतानामदृष्टस्योत्पत्ति-कारणस्य वै पार्थिवपरमाणुरूपादिसन्तानस्याप्युच्छेद इति कथं व्यभिचार इति असदेत[त्] न सर्वमुक्तेः प्रमाणान्तर-सिद्धत्वे सिद्धसाधनतापत्तेः। एतदनुमानसाध्यत्वे इतरेतराश्रयप्रसङ्गात्। सर्वमुक्तौ जातायामदृष्टरूपकारणाभावात् कार्याभाव इति रूपादिसन्तानोच्छेदज्ञानाद् व्यभिचाराभावज्ञाने सर्वमुक्त्यनुमानमिति। अथ विमता सन्ता[न्त]तिरित्येवं पक्षीकरणान्न व्यभिचार इति चेत् सन्ततित्वमिह सजातीयानां कार्यकारणभावप्रवाहो वा समानाधिकरणानां निरन्तरोत्पादविनाशा वा अधिकरण्या[णा] नियमो वा? आद्येऽसिद्धो हेतुः दुःखानां कार्यकारणभावनियमाभावात्। द्वितीये दृष्टान्तस्य सन्दिग्धसाधनता। पूर्वप्रदीपारम्भकैरेव परमाणुभिरुत्तरप्रदीपारम्भनिश्चयाभावात्। तृतीये सन्दिग्धसाध्यता। प्रदीपजातीयस्यैव कदाचिदत्यन्तोच्छेदानिश्चयादिति भावः।

---

१ तस्य–जे. १, जे. २। २ दीप–कं. १, कं. २। ३ रिवेति–जे. ३। ४ अनुवादकता–जे. १; जे. ३। ५ धिगताधिगन्तृत्वम्–कं. १; कं. २; धिगतार्थगन्तृत्वम्–जे. ३। ६ अभ्युपगमत् तदानीं–अ. ७ अभ्युपगमे वा–ङ, ८ कारणमिति–अ. ९ अग्निमेन–अ; १० ततश्च प्रमाणत्वम्–अ.

## न्यायकन्दली

**[11] नहि तदपि वक्तृप्रामाण्योत्थापनेनार्थं प्रतिपादयति, किन्त्वनपेक्षित-तद्व्यापारं स्वयमेव, उत्पत्ति[1]मात्रं प्रति तदपेक्षणात् । स्वाभाविकी हि पदानां पदार्थपरता, स्वाभाविकी च पदार्थाना[2]माकाङ्क्षायोग्यतासन्निधिमतामितरेतरान्वययोग्यता । तेन यथा वेदे प्रमाणान्तरानपेक्षः [3]शब्दः, शब्दसामर्थ्यादेवार्थप्रत्ययः, एवं लोकेऽपि [4]य एव लौकिका त एव वैदिका इति न्यायेनोभयत्रापि शब्दशक्ते–**

[टि०] [11] [5]किन्त्वनपेक्षितेति यथेन्द्रियादिना स्वशु[6]द्धयनपेक्षेण [[7]पूर्वज्ञानानपेक्षेण] च प्रत्यक्षज्ञानमुत्पाद्यते एवं पुरुष[8]वाक्येण पि वक्तृप्रामाण्यान[9]पेक्षेण प्रतिपाद्यपुरुषज्ञानानपेक्षेण चार्थः प्रतिपाद्यते । अप्रतिपन्नं हि[10] प्रति तस्य प्रतिपादकत्वं न तु स्मृतिवत् प्रतिपन्नं प्रतीति । अत्र कारणमाह **स्वाभाविकी हि** इत्यादि । **आकाङ्क्षा** [11]परस्परं कारकाणामपेक्षा । **योग्यता** उदकेन सिञ्चेत् न तु दहनेन सिञ्चेत् इति । **सन्निधिः** परस्परमासन्नता, न तु कामिनी पर्वतो [12]वह्निमान् मनोहरेत्यादिवत् । ननु शब्दशक्तिमाहात्म्यादेवार्थप्रतीतिस्तर्हि वक्तृप्रामाण्यं किमिति निरीक्ष्यते इत्याह वक्तृप्रामाण्यानुसरणं तु इति ।

[पं०] [11] **अहितनिवृत्तिरिति** = अहितं सुखदुःखम् । तन्निवृत्तिरहितनिवृत्तिः ।

[कु०] **भूतार्थानामिति** (कं. ४.१५) कार्याणां प्रामाण्यं नोपपद्यत इति भावः । अत्र भूतार्थत्वेनाप्रामाण्यानुमानं वाऽनु[वा]दकतया प्रमाणान्तरसापेक्षत्वं वा साध्यते नान्य इत्याह **न प्रत्यक्षेणेति** (कं. ४.१६) । द्वितीयं दूषयितु-मनुवदति **अथेति** (कं. ४.१६) । दूषयति **न सिद्धेति** (कं. ४.१८) । अधिगतार्थगन्तृत्वं पूर्वानुभूतार्थस्मृतिजनकत्व-मित्यनुसन्धेयं वैशेषिकैः प्रमाणसम्प्लवस्येष्यमाणत्वात् । न च वेदान्तानां स्मारकत्वतथात्वमित्याह **ईदृशश्चेति** (कं. ४.१९) । अत एव प्रमाणान्तराविषयीकृत प्रतिपादकत्वादेव न तु कार्यार्थप्रतिपादकत्वात् ।

[11] **ननु** पुरुषवाक्यं वक्तृज्ञानलिङ्गं न तु स्वयमेवार्थप्रतिपादकमित्याशङ्कयाह **नहीति** (कं. ४.२२) । तर्हि वक्तृप्रामाण्ये क्वोपयुज्यत इत्यत आह–[13]**उत्पत्तिमात्रमिति** (कं. ४.२३) । तर्हि तृतीये प्रमाण[णा] (प्रामाण्या? प्रमाणान्तरा?) पत्तिरित्याशङ्कयाह **स्वाभाविकीति** (कं. ४.२४) । वक्तृज्ञानमननुमापयन्नपि शब्दस्तृतीयं प्रमाणम् । तथाहि पदार्थे वा तृतीयप्रमाणं संसर्गे वा ? न तावदाद्यः, पदानां विवक्षावच्छेदकपदार्थलिङ्गत्वात् । एवं हि शब्दमनुमान[नंम? नंऽ?]न्तर्भावयद् व्यज्यते । पुरुषो धर्मी ककुदादिमदर्थविवक्षावान् गोशब्दोच्चारणकर्तृत्वात् अहमिवेति । न द्वितीयः विशिष्टानां पदार्थानामविभागेन संसर्गे लिङ्गत्वादिति भावः । यदि वक्तृज्ञानमनुमापयन्नपि शब्द(:) प्रमाणं तर्ह्यनाप्तवाक्यस्यापि तथाप्रसङ्ग इत्यत आह [14]**वक्तृप्रामाण्यं त्विति** (कं. ५.२) ।

---

१ मात्र एव–कं. १; कं. २ । २ माकाङ्क्षासन्निधियोग्यतावताम्–कं. १; कं. २ । ३ 'शब्द'–इति जे. १; जे. ३ पुस्तकयोर्नास्ति । ४ ये लौकिका वैदिकास्त एव चार्था इति न्यायेन–कं. १; कं. २ । ५ किन्त्वनपेक्षित्वेति अ, ब. ६ शुद्धयनुपेक्षेण अ, ७ [ ] एतच्चिह्नान्तर्गतो पाठः अ–पुस्तके नास्ति । ८ वाक्येणापि अ, ब; ९ नतेक्षेण अ, ब. १० प्रति हि ड; ११ परस्पर अ, ब, क; १२ वह्निमात्ममनोहरेत्यादिवत् अ, ब. १३ उत्पत्तिमात्रः–कं. १ । १४ प्रामाण्यानुसरणं तु–कं. १ ।

## न्यायकन्दली

रविशेषात् । वक्तृप्रामाण्यानुसरणन्तु स्वरूपवि[1]पर्य्यासहेतोर्द्दोषस्याभावावगमाय । प्रत्यक्ष इव स्वकारणशुद्धेरनुगमो विपर्य्यासशङ्कानिरासार्थं इत्येषा दिक् । विस्तरस्त्वद्वयसिद्धौ द्रष्टव्यः ।

[12] **ननु कार्येऽर्थे शब्दस्य प्रामाण्यं न स्वरूपे, वृद्धव्यवहारेष्वन्वयव्यतिरेकाभ्यां कार्य्यान्वि[2]तेषु पदार्थेषु पदानां शक्त्यवगमात् । अतो वेदान्तानां न [3]भूतार्थपरतेति चेत्, [4]वार्त्तमिदम्, स्वरूपपरस्यापि वाक्यस्य लोके प्रयोगदर्शनात् । यथा परिणामसुरसमाम्रं परिणतिविरसञ्च पनसमिति । अत्रापि प्रवृत्तिनिवृत्त्योरुपदेशः, एवं हि वाक्यार्थः परिणामसुरसमाम्रं भक्षय, परिणतिविरसं [5]पनसं मा भक्षयेति । न, वैयर्थ्यात् । सुरसत्वप्रतीत्यैव स्वयमभिलाषात् पुरुषः प्रवर्त्तते, विरसत्वप्रतीत्यैव द्वेषान्निवर्त्तते । का तत्र**

**[टि०]** [12] अथ वेदान्तानामपि विध्यर्थतापादनार्थं परः प्राह **ननु कार्येऽर्थे** इति । कमलमानयेत्यादिना हि परमवृद्धोपदेशेन मध्यमवृद्धेषु व्यवहरत्सु कार्यान्वित एवार्थे बाल[6]व्युत्पत्तिदर्शनात्तत्रैव [7]प्रामाण्यमवगतम । ततो वेदान्ता-

**[पं०]** [12] **उच्छिद्यते इति** – कर्मकर्तरि प्रयोगः । **तार्किका इति** = व्योमशिवपादाः । उपहासश्चायम् । एवं पुरोऽपि पदे व्योमशिवमुत्प्रासयिष्यति । **पार्थिवपरमाणुरूपादिसन्तानेन व्यभिचारादिति** – पार्थिवपरमाणुरूपादिसन्ताना हि सन्ततित्वे सत्यपि नात्यन्तमुच्छिद्यते, नित्यत्वात् । अतः संततित्वादित्यं हेतुरनैकान्तिक इत्यर्थः । **अशरीरं वावेति** – अवधारणेऽव्ययमशरीरं सन्तं – आत्मानं प्रियाप्रिये सुखदुःखे नैव स्पृशत इत्यर्थः । **इत्यादय इति** – आदिशब्दात् न वै सशरीरस्य प्रियाप्रिययोरपहरतिरस्तीत्यादिर्यः । **वेदान्ता इति** - वेदादृशा । **वयमिति** - **न्यायकन्दलीकाराः** ।

अत्र मीमांसकाः साध्य एवार्थे सर्वशब्दानां प्रामाण्यमभ्युपगच्छन्तः प्रत्यवतिष्ठन्ते । **भूतार्थानामेषामित्यादि** – इह वाक्यं द्विधा साध्यार्थं भूतार्थं च । तत्र साध्यार्थं तदुच्यते यतो वाक्यात्कर्तव्यता प्रतीयते, यथा 'अग्निं जुहुयात्स्वर्गकाम' इति कर्तव्यतोपदेशपरं ह्येतद्वाक्यम् । एतदेव च प्रमाणं मीमांसकानाम् । यतो वाक्यात् कर्तव्यता न प्रतीयते किन्त्वर्थकथनमात्रं प्रतीयते तद्भूतार्थम्, यथा–अशरीरं वावेत्यादि वाक्यम् । एतच्चाप्रमाणं मीमांसकानाम् । अत एवोक्तं तैर्भूतार्थानामेषामप्रामाण्यप्रसंग इति दृ(द्र)ष्टव्यम् ।

**[कु०]** [12] भूतार्थानां वाक्यानामप्रामाण्ये निरस्ते सम्प्रति परो भूतार्थपरतामेव वेदान्तानामसहमानः प्रत्यवतिष्ठते **ननु कार्येति** (कं. ५.४) । कार्येति कार्यान्वित एव शक्त्यवगमादिति । हेतुरसिद्ध इत्याशयवान् परिहरति **वार्त्तमिति** (कं. ५.६) । शब्दज्ञानकार्य्येप्यभिसन्धानाच्छब्दव्यापारमाशङ्कते **प्रवृत्तिनिवृत्त्योरिति** (कं. ५.८) ।

---

१ विपर्यय–जे. १; जे. ३ । २ °न्वितेषु पदानां–कं. १; कं. २ । ३ स्वरूप–कं. १; कं. २ । ४ वान्त–कं. १; कं. २ । ५ 'पनसं'–इति कं. १; कं. २ पुस्तकयोर्नास्ति । ६ बालक–अ. ७ प्रामाण्यमवगतमतो अ, ब; ८ वान्त–कं. १ ।

## न्यायकन्दली

वस्तुसामर्थ्यभाविन्युपदेशापेक्षा, [1]अप्राप्ते हि शास्त्रमर्थवद्भवति। [2]अथ प्रवृत्तिनिवृत्त्योरभि[3]सन्धानेनास्य वाक्यस्य प्रयोगात् तादर्थ्यमिति चेत्, [4]अस्त्येतस्य प्रवृत्तिनिवृत्त्यर्थता, किन्तु जनकत्वान्न तु प्रतिपादकत्वेन। [5]प्रतिपादकत्वं तु वाक्यस्य भूतार्थविषयमेव प्रतिपादकत्वेन च प्रमाणानां प्रामाण्यं न जनकत्वेन तस्माद् भूतार्थविषयमेव वाक्यस्य प्रामाण्यम्। यदि तु प्रवृत्तिनिवृत्त्योरभिसन्धानेन वाक्यप्रयोगात् तयोरप्रतीयमानयोरपि [6]शब्दार्थता, आम्रभक्षणोत्तरकालीना तृप्तिर्धातुसाम्यञ्च वाक्यार्थौ स्याताम्, प्रत्यक्षस्य च काञ्चिदर्थक्रियामभिसन्धायोपलिप्सिते विषये

[**टि०**] नामपि प्रमाणत्वात् [7]विध्यर्थताङ्गीकर्तव्येत्यर्थः। **किन्तु जनकत्वाद्** इति – सुरसत्वप्र[8]तीत्या ह्यप्रेरितस्यापि पुरुषस्य प्रवृत्तेः। [9]स्वरूपार्थे व्युत्पत्तौ हेतुद्वयमाह **प्रसिद्धवदे**त्यादि। इह "[10]प्रभिन्नेत्यादौ प्रसिद्धपदसामा"[11]नाधिकरण्यम्। "[12]अयं मधुकर इत्यङ्गुली"[13]निर्देश उपदेशः।

[**पं०**] **प्रत्यक्षेणानैकान्तिकत्वादिति** – प्रत्यक्षं हि भूतार्थविषयम्, न तु साध्यार्थविषयम्, न च तन्न प्रमाणमित्यर्थः। **प्रमायामिति** – प्रमाणफले ज्ञाने इति यावत्। **श्रीधरः प्राह नेत्यादि**। **किन्त्वधिगतार्थगन्तृत्वमिति**। ज्ञातार्थज्ञातृत्वमेवानुवादकत्त्वमुच्यते। न पुनः सिद्धार्थप्रतिपादकत्वमित्यर्थः। **कुतस्तत्सापेक्षत्वमिति** कुतः प्रमाणांतस्यापेक्षत्वमित्यर्थः। **कुतश्च सापेक्षत्वमिति** प्रागंतरं तत्र व्यर्थोऽयमेव। **स्मृतेरिव तेभ्यः पूर्वाधिगमसंस्पर्शनार्थप्रतीतेरभावादिति** – स्मृतेरिवेति वैधर्म्यदृष्टान्तोऽयं, ततश्चायमर्थः – यथा पूर्वं जातप्रत्यक्षज्ञानस्पर्शेन स्मृतेः सकाशादर्थप्रतीतिर्भवति तथा वेदवाक्येभ्यो याऽर्थप्रतीतिः सा न पूर्वज्ञानस्य [स्प]र्शेन किंतु स्वप्रा(न)ध्यानेन। अत एवाधिगतार्थगन्तृत्वा[त्]स्मृतिरप्रमाणम्। न पुनर्वेदास्तानधिगतार्थगन्तृत्वात्। इति हृदयम्।

**अत एवेति** – प्रमाणान्तरनिरपेक्षत्वादेव। **तदपीति** – पुरुषवाक्यमपि। **अनपेक्षिततद्व्यापारमिति** – अनपेक्षितवक्तृव्यापारम्। **पदार्थपरतेति** – पदार्थप्रतिपादकता। **आकांक्षायोग्यतासन्निधिमत्तामिति** – बोद्धुः संबंधिषु जिज्ञासा आकांक्षा, सम्बन्धार्हत्वं योग्यत्वम्, आकांक्षस्यानन्तर्यं सन्निधिः। **स्वरूपविपर्यासहेतोर्दोषस्येति** – शब्दस्वरूपमृषात्वकारणस्य रागद्वेषादेः। रागद्वेषादिग्रस्तो हि यद्वक्ति तन्न सत्यतया परिणमते। यथा कश्चिच्छठो डिम्भान्विप्लावयति–

[**कु०**] विपर्ययेऽतिप्रसङ्गमाह **यदि त्विति** (कं. ५.१४)। शब्दज्ञानकार्यप्रवृत्तिनिवृत्यनुसन्धानेन कार्यपरता वेदान्तानामस्तीत्याह **जनकत्वेनेति** (कं. ५.१७)। शब्दजन्यज्ञानानन्तरं प्रवृत्तिनिवृत्ती अङ्गीकृत्येतदुक्तम्–इदानीं वक्तृचित्ते न स्त एवेत्याह **न चेवमिति** (कं. ५.१९)। ननु गृहीतं सगतिकस्यैव वाक्यं बोधकं, सगतिग्रहश्च 'गामानये'त्यादिवृद्धव्यवहारे

---

१ अप्राप्ये–जे. १; जे. २। २ 'अथ'–जे. १; जे. ३ पुस्तकयोर्नास्ति। ३ अभिसंधानेन वाक्य–कं. १। ४ अस्ति प्रवृत्ति°–कं. १; कं. २। ५ यस्माद् भूतार्थविषय एव प्रामाण्यम्–कं. १; कं. २। ६ शाब्दता–कं. १; कं. २। ७ विध्यर्थः अ; ८ प्रीत्या. अ, ब, क. ९ स्वरूपार्थ ड. १० प्रतिभिन्न अ, ब; ११ सामान्याकरण्यम् अ, ब; १२ इयं अ, ब. १३ री अ ब क.

## न्यायकन्दली

प्रवृत्तस्या[1]र्थक्रियाऽपि प्रमेया स्यात्। जनकत्वेन [2]प्रवृत्तिनिवृत्तिपरत्वं वेदान्तानामपि विद्यते, तेभ्यः स्वरूपप्रतीतौ ध्यानाभ्यासादिप्रवृत्तस्य विगतविविधविकल्पविशदात्मज्ञानोदये सत्यपवर्गस्य भावात्। न चेदमावश्यकं यत्प्रवृत्तिनिवृत्त्यवधिकः प्रमाणव्यापार इति, तयोः पुरुषेच्छाप्रतिबद्धयोरनुत्पादेऽपि वस्तुपरिच्छेदमात्रेणापेक्षाबुद्धेः पर्यवसानात्। न च कार्य्यान्वित एवार्थे पदानां शक्तिः, अनन्वितेऽपि व्युत्पत्तिदर्शनात्। यथेह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीति [3]वर्त्तमानोपदेशे प्रसिद्धेतरपदार्थोऽप्रसिद्धमधुकरपदार्थस्तु यं मधुपानकर्त्तारं पश्यति तं [4]मधुकरशब्दवाच्यत्वेन प्रत्येति। अत्राप्यस्ति पारम्पर्येण कार्यान्वयो वाक्यप्रयोक्तुः, पूर्वं वृद्धव्यवहारात् कार्य्यान्वित एवार्थे मधुकरपदस्य व्युत्पत्तिभावादिति चेत्? न, अनिश्चयात्। वाक्यप्रयोक्तुः किं वृद्धव्यवहारात् कार्य्यान्वितेऽर्थे व्युत्पत्तिरभूत्? किमुत प्रसिद्धपदसामानाधिकरण्येनोपदेशाद्वा स्वरूपेऽर्थे

[पं॰] 'हं हो धावत' डिभका नद्यास्तीरे गुडशकटं पर्यस्तमस्ति, प्रत्यासन्नं तिलशकटं च'–तच्छ्रुत्वा प्रवर्तमानास्ते विप्रलंभभाजो जायन्ते। **स्वकारणशुद्धेरिति**–आकाशदेशधर्माद्यनुग्राहका च कामलादिदोषरहितचक्षुरादिसामग्रीशुद्धेः। **एवं दिगिति**–एतद्दिग्मात्रमित्यर्थः। **अद्वयसिद्धाविति**–अद्वयसिद्धयाख्ये ग्रन्थे। **प्राभाकरा वदन्ति नन्वित्यादि**। **कार्येऽर्थे इति**–साध्येऽर्थे। **न स्वरूपे इति**–न सिद्धेऽर्थे प्रामाण्यमित्यर्थः। **वृद्धव्यवहारेष्विति**–परस्परं गृहीतसंकेतौ वृद्धौ उच्य(च्ये)ते। तयोर्व्यवहारेषु। [5]**न वेदान्तानां भूतार्थपरतेति**–किन्तु तेषामपि शब्दत्वात्साध्यार्थपरतैवेत्यर्थः। **परवाक्यमत्रापीत्यादि**। **तत्रेति**–प्रवर्तनेन निवर्तनेन च। **वस्तुसामर्थ्यभाविनीति**–सप्तम्येकवचनान्तमेतत्पदम्। **शास्त्रमिति** = शिक्षावचनम्। [6]**अभिधानेनेति** = अभिप्रायेण। **तादर्थ्यमिति** = प्रवृत्तिनिवृत्त्यर्थत्वम्। **तस्येति** = वाक्यस्य। **भूतार्थविषय एवेति** = स्वरूपार्थविषयमेव। [7]**प्रमाणानामिति** = प्रत्यक्षादिनाम्। **तयोरिति** प्रवृत्तिनिवृत्त्योः। [8]**शब्दार्थतेति**=शब्दस्यार्थौ शब्दार्थौ, तयोर्भावः शब्दार्थता। शब्दार्थतेत्यस्मात्पुरस्तादेत्यध्याहार्यम्। **वाक्यार्थौ स्यातामिति**–अप्रतीयमानत्वाद्विशेषाद्वाक्यार्थौ प्राप्नुयातामित्यर्थः। **कांचिदर्थक्रियामिति** = स्नानपानादिकाम्। **उपलिप्सिते इति** = उपलब्धुमिष्टे। **विषय इति** = जलादौ। [9]**अर्थक्रियापीति** न केवलं जलादिरित्यपेरर्थः। यथाऽभिसंहितायारपि प्रवृत्तिनिवृत्त्याः शब्दार्थता, एवं प्रत्यक्षेऽप्यभिसंहितायाः स्नानपानाद्यर्थक्रियाया अपि प्रत्यक्षार्थता स्यात्। **प्रत्यक्षस्यार्थो विषयः** प्रमेयमित्यर्थः। **तयोरिति** = प्रवृत्तिनिवृत्त्योः। अनन्वितेऽपीति–कार्योपदेशवर्तमाना प्रवृत्तिशब्दान्वितेऽपीत्यर्थः। **इह**

[कु॰] कार्यान्वित एव स्वार्थपदानां, तत्कथं स्वरूपपरता वाक्यानां स्यादित्यत आह–**न चेति** (कं. ५.२०)। लिङ्भोक्तव्यपञ्चमलकारप्रतिपादिता हि क्रिया श्रोतृपुरुषवृत्तिव्याप्या, इह तु तेषामभावन्न? मधुकरपदार्थः कार्यान्वित इत्यर्थः। चोदयति **अत्रेति** (कं. ५.२४) मधुकरं पश्येत्यध्याहारात्कार्येणान्वयः कुत इत्यत आह

१ °स्यार्थक्रिया प्रमेया–कं. १; कं. २। २ प्रवृत्तिपरत्वं–कं. १; कं. २। ३ वर्त्तमानापदेशे–कं. १; कं. २।
४ मधुकरवाच्यत्वेन–कं. १; कं. २। ५ वेदान्तानां न स्वरूपपरता–कं.। ६ अभिसन्धानेन–कं.।
७–८–९ इमे पाठाः कं–पुस्तके न सन्ति।

## न्यायकन्दली

**इति निश्चयो नास्ति, इदम्प्रथमताया अभावात्। [1]किञ्च वाक्यप्रयोक्तुरन्विते व्युत्पत्तिः श्रोतुश्चानन्विते, अन्यव्युत्प[2]त्त्या चान्यो न शब्दार्थं प्रत्येति, ततश्च मधुकरशब्दस्यानन्वितार्थत्व[3]मन्वितार्थत्वञ्च पुरुषभेदेनेत्यर्द्धवैशसमापतितम्। क्रियाकाङ्क्षानिबन्धनः पदार्थानामन्योन्यसम्बन्धो नाख्यातपदर[4]हितेषु सिद्धार्थेषु वेदान्तवाक्येषु भवितुमर्हतीति चेत्? न [5]तावदत्र सर्वत्र क्रियाया अभावः, यत्र तु नास्ति [6]तत्रापि संसर्गपरतया पदैरभिहितानां पदार्थानामेव योग्यतासन्निधिमतामन्योन्याकाङ्क्षानिबन्धनः सम्बन्धः। तथा च 'काञ्च्यामिदानीं त्रिभुवनतिलको [7]राजा' इत्यत्रापि वाक्यार्थो गम्यत एव। अथवा तत्र श्रुतप्रयुज्यमानाऽस्तिभवतिक्रियानिबन्धनो भविष्यतीति यत्किञ्चिदेतत्।**

[पं०] **प्रसिद्धकमलोदरे मधूनि मधुकरः पिबतीति**—न हि पिबन्तं मधुकरं जानीयात्—'इत्युपदेशोऽस्ति किंतु पिबतीत्येव। **प्रसिद्धेतरपदार्थ इति**—प्रसिद्धाः मधुकरेतराः पदार्थाः यस्य पुंसः सः तथा परवाक्यम्। **अत्राप्यस्ति पारंपर्येणेत्यादि श्रीधरः। न अनिश्चयादिति**—अनिश्चयमेव दर्शयति वाक्यप्रयोक्तुः। **किं वृद्धव्यवहारादित्यादि अत्र च कार्यान्विते इति** सप्तमी पञ्चम्यन्विते। **किं वृद्धव्यवहारात्कार्यान्वितेऽर्थे व्युत्पत्तिरभूदिति**—वृद्धव्यवहारः साक्षादुक्तः परस्परं गृहीतसंकेतौ वृद्धौ।१। **किमुत प्रसिद्धपदसामानाधिकरण्येनेति** [इति] मध्यमव्यवहारः सूचितः। यः किञ्चिज्जनः जानाति सः मध्यमः।२। **उपदेशाद्वा स्वरूपेऽर्थे इति**—इति बाल्यव्यवहारः सूचितः। यः सर्वथा किञ्चिन्न जानाति सः बालः।३। —इति वाक्यार्थाः।

परः प्राह **क्रियाकांक्षेत्यादि। श्रीधरः न तावदित्यादि। तत्रेति**—आख्यातरहिते वाक्ये। **अश्रुतप्रयुज्यमानाऽस्ति** भवति क्रियाकांक्षानिबन्धनः। **सम्बन्ध इति**—यत्रान्यक्रियापदं न श्रूयते तत्रास्ति वर्तमाना परः प्रयुज्यत इति हि वैयाकरणः। अश्रुतं—कोऽर्थः। अश्रुत—क्रियापदं यद्वाक्यं तत्र प्रयुज्यमानेऽस्ति भवति नाम्न्योपक्रिये तदाकांक्षानिबन्धस्तदपेक्षाहेतुः क इति वाक्यार्थः।

[कु०] **वाक्यप्रयोक्तुरिति** (कं. ५.२४)। परिहरति **नानिश्चयादिति** (कं. ५.२५)। सामानाधिकरण्येन समभिव्याहारेण प्रयोक्तृवाक्येनैव सन्देहो निवर्त्यते इत्यत आह **इदं प्रथमताया अभावादिति** (कं. ५.२७)। तद्वाक्यसन्देहनिवृत्तिमङ्गीकृत्यापि दूषणमाह **किञ्चेति** (कं. ६.१)। स्वरूपव्युत्पत्त्यङ्गीकारेऽपि क्रियापदरहितानामुपनिषदामन्वयानुपपत्तिमाशङ्क्य परिहरति **क्रियेति** (कं. ६.३)।

---

१ किञ्च प्रयोक्तु°—कं. १; कं. २। २ °व्युत्पत्त्याऽन्यो—कं. १; कं. २। ३ अनन्वितार्थत्वं च—जे. १; जे. ३। ४ रहितेषु वेदान्तवाक्येषु—कं. १; कं. २। ५ तावत्सर्वत्र—कं. १; क. २; जे. ३। ६ तत्रोप°—कं. १; कं. २। ७ नृपतिः—जे. १; जे. ३।

[13] प्रशस्तपादभाष्यम्

द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां [1]षण्णां पदार्थानां साधर्म्य[2]वैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः ।

न्यायकन्दली

[13] प्रकृतमनुसरामः । अत्र पदार्थ[3]धर्म्मप्रतिज्ञानादेव पदार्थानामपि सङ्ग्रहो लभ्यते, स्वातन्त्र्येण धर्म्माणां सङ्ग्रहाभावात् ।

ननु पदार्थधर्म्माणां सङ्ग्रहपरो ग्रन्थो महोदयहेतुरिति नोपपद्यते, [4]शब्दस्यार्थप्रतिपादनमन्तरेण कार्य्यान्तराभावादित्याशङ्क्य पदार्थधर्म्मप्रतीतिहेतोः सङ्ग्रहस्य पारम्पर्य्येण महोदयहेतुत्वं प्रतिपादयन्नाह – [5]द्रव्यगुणेत्यादि ।

यस्य वस्तुनो यो [6]भावो यत्स्वरूपस्तत्तस्य तत्त्वम् । साधारणो धर्म्मः साधर्म्यम्, असाधारणो धर्म्मो वैधर्म्यम् । साधर्म्यवैधर्म्ये एव तत्त्वं साधर्म्यवैधर्म्यतत्त्वम्, तस्य ज्ञानं निःश्रेयसहेतुः । विषयसम्भोगजं सुखं तावत् [7]क्षणविनाशि दुःखबहुलं स्वर्गादिपदप्राप्यमपि सप्रक्षयं सातिशयञ्च । तथा च कस्यचित् स्वर्गमात्रमपरस्य स्वर्गराज्यम् । अतस्तदपि सततं प्रच्युतिशङ्कया परसमुत्कर्षोपतापाच्च दुःखाक्रान्तं न निश्चितं श्रेयः । आत्यन्तिकी दुःखनिवृत्तिरसह्यसंवेदननिखिलदुःखोपरमरूपत्वा[8]दपुनरावृत्तेश्च निश्चितं श्रेयः । तस्य

[टि०] [13] [ पदार्थोद्देशविभागौ ]

ननु पदार्थधर्माणामेव सङ्ग्रहः प्रतिज्ञातो न तु पदार्थानामपि इत्याह [9]**अत्र च पदार्थधर्मेति** पदार्थाश्च धर्माश्चेति तु जनितोभयसङ्ग्रहे विग्रहे धर्मशब्दस्याल्पस्वरत्वात् प्रागनिपातः स्यात् ।

[पं०] [13] **पदार्थानामेवेति** – न केवलं धर्मिणामित्यर्थः । **स्वातंत्र्येति** – पदार्थान्वितेनेत्यर्थः ।

**अर्थप्रतिपादनमंतरेणेति** – अर्थप्रतिपादनं वर्जयित्वेत्यर्थः । सप्रक्षयं सातिशयं चेत्(ति)यदुक्तं तत्र सातिशयत्वं भावयति । तथा हि **कस्यचिदित्यादिना** । आत्यंतिकान्नित्यादिवाक्ये आत्यन्तिकी तु दुःखनिवृत्तिः **निश्चितं श्रेय इति** पदघटना । **असह्यसंवेदननिखिलदुःखोपरमत्वादिति** – असह्यसंवेदनं च तन्निखिलदुःखं च तन्निवृत्तिरूपत्वात् । **मंडनेनेति शंकराचार्यस्य** चत्वारः

[कु०] [13] यदि पदार्थानां धर्माः सङ्गृह्यन्ते इति ज्ञान[नं] तर्हि पृथिव्यादयो न च[व] रूपादयश्चतुर्विंशतिरित्यप्रस्तुतमापद्यते तत आह **अत्र पदार्थेति** (कं. ६.९) ।

---

१ 'षण्णां'–कि. ता. पुस्तकयोर्नास्ति । २ °वैधर्म्याभ्यां–कि. दे; साधर्म्यतत्त्वज्ञानं–ता । ३ धर्म्मज्ञानादेव–कं. १; कं. २ । ४ शब्दाना°–कं. १; कं. २ । ५ द्रव्यगुणेति–जे. १; जे. ३ । ६ भावस्तत्तस्य–कं. १; २ । ७ क्षणिक°–कं. १; कं. २ । ८ °दपरावृत्तेश्च–कं. १; कं. २ । ९ अत्र पदार्थधर्म मु.

## न्यायकन्दली

**कारणं द्रव्यादिस्वरूपज्ञानम् । एतेन तत्प्रत्युक्तं यदुक्तं मण्डनेन–"विशेषगुणनिवृत्तिलक्षणा मुक्तिरुच्छेदपक्षान्न भिद्यते" इति । विशेषगुणोच्छेदे हि सत्यात्मनः स्वरूपेणावस्थानं नोच्छेदः, नित्यत्वात् । न चायमपुरुषार्थः, समस्तदुःखोपरमस्य परमपुरुषार्थत्वात् । समस्तसुखाभावाद[1]पुरुषार्थत्वमप्यस्तीति चेत् ? न, सुखस्यापि क्षयितया बहुलप्रत्यनीकतया च साधनप्रार्थनाशतपरिक्लिष्टतया च सर्वदा दुःखाक्रान्तस्य [2]विषसम्पृक्तस्येव मधुनो दुःख[3]पक्षे निक्षेपात् । केषां साधर्म्यवैधर्म्य[4]तत्त्वपरीज्ञानमपवर्गकारणमित्यपेक्षायां द्रव्यादीनामिति सम्बन्धः ।**

**[14] द्रव्याणि च, गुणाश्च, कर्म्माणि च, [5]सामान्ये च, विशेषाश्च, समवायश्चेति विभागवचनानुसारेण विग्रहः, उद्देशस्य विभागवचनेन समानविषयत्वात् । आदौ**

[टि०] [14] **उद्देशस्य विभागेति**–[6]नामधेयमात्रसङ्कीर्तनमुद्देशः विशेषसञ्ज्ञानिर्देशो विभाग इति । तत्रान्तराभिप्रायेणात्र विभागवचनत्वम् स्वयं विभा[7]गस्यामननात् । **नियमेन गुणानुविधायित्वाद्** इति :–यत्र गुणास्तत्रैव कर्म नान्यत्रेत्यनुविधानार्थः; न तु यत्र गुणास्तत्र कर्म भवत्येवेति, व्योम्नि सगुणेऽपि कर्माभावात् । **कर्माश्रितत्वादिति** कर्मण्याश्रितत्वादित्यर्थः । **पञ्च पदार्थेति**–पञ्चानां पदार्थानां वृत्तिः सम्बन्ध इत्यर्थः । न तु पञ्चसु पदार्थेषु वृत्तिसम्बन्धो यस्येति, तस्य सम्बन्धान्तराभावात् ।

[पं०] शिष्या :– उम्बेकः सा(का)रिकां वेत्ति, तंत्रं वेत्ति प्रभाकरः ।
मंडनस्तूभयं वेत्ति न किञ्चिदपि रेवणः(?) ॥ १ ॥

**उच्छेदपक्षादिति** बौद्धोऽथ कल्पितात्संतानोच्छेदलक्षणात् । **विशेषगुणोच्छेदे इति**–बुद्धिसुखदुःखेच्छाधर्माधर्मप्रयत्नसंस्कारद्वेषलक्षणानां नवानामत्यन्तं क्षये सन्तीत्यर्थः । **नित्यत्वादिति**–आत्मनोऽविनाशित्वात् । **अयमिति**–विशेषगुणोच्छेदः । [8]**साधनप्रार्थनायाः सपरिक्लिष्टतया चेति**–सुखदुःखसाधनानि स्रक्चन्दनवनिताकूल्यादीनि ।

[14] **द्रव्याणि चेति** नव । **गुणाश्चेति**–चतुर्विंशतिः । **कर्माणि चेति**–पञ्च ।**सामान्ये चेति**–द्वे । विशेषाश्चेति–अनन्ताः । समवायश्चेति–एकः ।

[कु०] तत्त्वशब्दस्य तद्धितान्तत्वे धर्मस्वरूपपरित्यागप्रसङ्गाद् रूढिमाश्रित्य व्याचष्टे **यस्येति** (कं. ६.१६) । स्वरूपं प्रमाणोपपन्नमिति शेषः । षष्ठी तु शिलापुत्रकस्य शरीरमितिवदुपचारमाश्रित्य द्रष्टव्या । ततश्च यद्वस्तु प्रमाणेन निश्चीयते तत्तत्त्वमित्यर्थः । [9]**साधर्म्येण वैधर्म्ये एव तत्त्वमिति** (कं. ६.१७) साधर्म्यवैधर्म्ययोः स्वातन्त्र्येणानभिधानाद्द्रव्यादयोऽपि तत्त्वमित्यनुसन्धेयम् । एतेन स्वोक्तव्याख्यानेन को भेद इत्यत आह [10]**गुणोच्छेदमिति** (कं. ६.२४) । अपवृक्तस्य तत्सुखवेदनयोः प्रमाणाभावादित्यर्थः ।

[14] विभागानुसारेण विग्रहहेतुमाह–**उद्देशेति** (कं. ७.६) । नामधेयेन पदार्थाभिधानमात्रमुद्देशः । उद्दिष्टस्यावान्तरविशेषोद्देशो विभागः । ततश्चोभयोरेकविषयत्वमित्यर्थः । **आदौ द्रव्यसो[स्यो]द्देश इति** (कं. ७.७)

---

१ पुरुषार्थत्वमिति–कं. १; कं. २ । २ विषमिश्रस्येव–क. १; कं. २ । ३ पक्ष–जे. १; जे. ३ ।
४ तत्त्वपरिज्ञान°–कं. १; कं. २ । ५ सामान्यं च–कं. १; कं. २ । ६ नामधेयसङ्कीर्तनमात्र–अ; ७ विभागस्यो–अ;
८ साधनप्रार्थनाशत°–कं. ९ साधर्म्यवैधर्म्ये एव तत्त्वम–कं. १ । १० विशेषगुणोच्छेदे–कं. १–इदं प्रतीकं तु नास्ति ।

### न्यायकन्दली

**द्रव्यस्योद्देशः, सर्वाश्रयत्वेन प्राधान्यात्। गुणानाञ्च कर्म्मापेक्षया भूयस्त्वाद् द्रव्यानन्तरमभिधानम्। नियमेन गुणानुविधायित्वात् कर्म्मणां गुणानन्तरमुद्देशः। कर्म्मान्वितत्वात् सामान्यस्य कर्मानन्तरमभिधानम्। पञ्चपदार्थवृत्तेः समवायस्य सर्वशेषेणाभिधाने [1]प्राप्तेऽर्थाद् विशेषाणां मध्ये [2]कथनमिति। अभावस्य पृथगनुपदेशो भावपारतन्त्र्यात्, न त्वभावात्। द्रव्याणामिति सम्बन्धे षष्ठी। अत्रापि साधर्म्यादिज्ञानस्य निःश्रेयसहेतुत्वे कथिते द्रव्यादि[3]ज्ञानस्यापि कथितम्, साधर्म्यवैधर्म्ययोः स्वातन्त्र्येण ज्ञानाभावात्।**

[**टि॰**] ननु किमिदं भाव[4]पारतन्त्र्यम्? किं भावाश्रितत्वम्? उत भावजन्यत्वम्? अथ भावनिरूपणाधीननिरूपणीयत्वम्? आहोस्वित् भाव[5]प्रतिद्वन्द्वित्वम्? तत्र नाद्यत्रितयम्। कर्मसंयोगादेरपि पृथग[6]नुपदेशप्रसङ्गात्। चरमे भावमात्र[7]प्रतिद्वन्द्वित्वं वा? भावविशेषप्रतिद्वन्द्वि[8]त्वं वा? नाद्योऽभावे तदभावात्। [9]नह्येकत्राभावे समुत्पन्ने [[10]सर्वभावानामभावोत्पत्तिः।] नापरः संयोगविभागादेरपि पृथगनुपदेशप्रसङ्गात्, उत्तरसंयोगस्य कर्मनाशकत्वात्, विभागस्य च [11]संयोगनाशकत्वात्। उच्यते, भावपा[12]रतन्त्र्यं प्रतियोगिनिरूपणाधीननिरूपणीयत्वम्, प्रतियोगी च विरोधी।

[**पं॰**] उद्देशस्य **विभागवचनेन समानविषयत्वादिति**—नामधेयमात्रसंकीर्तनमुद्देशस्तस्योद्देशस्य विशेषसंज्ञानिर्देशलक्षणेन विभागेन सह तुल्यगोचरत्वात्। य एव उद्दिष्टास्त एव विभज्यन्त इति भावार्थः। **नियमेन गुणानुविधायित्वादिति**—गुणपूर्वकमेव कर्म भवतीति नियमः। को भावः? यत्रैव गुणास्तत्रैव कर्म नान्यत्र। न तु यत्र गुणास्तत्र कर्म भवत्येव। व्योम्नि तु गुणेऽपि कर्माभावादिति द्रष्टव्यम्। द्रव्यगुणकर्माश्रितत्वात् **सामान्यस्येति**। अत्र **कर्माश्रितत्वादिति** पाठान्तरं दृश्यते। तत्र कर्मण्यप्याश्रितत्वादिति विग्रहः। **विशेषाणां मध्ये कथनमिति**—मध्ये विशेषाणां कथनमिति योगः। मध्ये इति कोऽर्थः? सामान्यसमवाययोरन्तरे इत्यर्थः।

ननु चतुर्विधो ह्यभावः, स कथं न पदार्थो येन पृथक् नोच्यते—इत्याशंक्याह **अभावस्येत्यादि** भावपारतन्त्र्यादिति प्रतियोगिनिरूपणाधीननिरूपणीयत्वं भावपारतन्त्र्यम्। प्रतियोगी घटादिः। **अत्रापीति**—न केवलं पदार्थधर्मसंग्रह इहेत्यत्र पदार्थधर्मप्रतिज्ञानादेव पदार्थानामपि संग्रहो लभ्यते। स्वातंत्र्येण धर्माणां संग्रहाभावादित्यपेरर्थः।

[**कु॰**] प्रप्पा[धा]नज्ञानमप्रधानज्ञानस्य हेतुरित्यर्थः। **भूतस्त्वा[भूयस्त्वा]विति** (कं. ७.७)। प्रथममक्लिष्टबुद्धेर्भूयो ज्ञानसामर्थ्यं भवति। अल्पं तु क्लिष्टबुद्धिरपि ज्ञातुं शक्नोतीत्यर्थः। **गुणानुविधायित्वादिति** (कं. ७.८) कारणज्ञानानन्तरं कार्यज्ञानं सुकरमित्यर्थः। **कर्म्मान्वितत्वादिति** (कं. ७.९) उपलक्षणमेतत्। [त]त्वं द्रव्यादि [त]त्र द्रव्यादित्रयं ष्यि श्रि? तच्चापि [तत्रापि] त्रिभ्योपकर्षं इत्यर्थः। **पञ्चपदार्थवृत्तेरिति** (कं. ७.९) वृत्तिमनुरूपणेन वृत्ते रूपणीयत्वादिति भावः।

---

१ प्राप्ते विशेषाणां–कं. १; कं. २। २ कथनम्–कं. १; कं. २। ३ ज्ञानस्य–कं. १; कं. २। ४ भावत्वम्–अ. ५ प्रीति–अ; ६ गमु–अ, ब, ७ प्रजि–अ; ८ द्वित्वं–त्र पुस्तकस्यावकाशे दत्तः पाठः। ९ नह्येकत्वाभावे –अ, ब, क; १० [ ] एतच्चिह्नान्तर्गतः पाठः अ-पुस्तके नास्ति। सर्वभावोत्पत्तिः–ब; ११ संशयोग–अ, ब. १२ पारतन्त्राम्–अ, ब.

### प्रशस्तपादभाष्यम्

[15] **तच्चेश्वरचोदनाभिव्यक्ताद्धर्म्मादेव ।**

### न्यायकन्दली

[15] ननु यदि तत्त्वज्ञानं निःश्रेयसहेतुस्तर्हि धर्म्मो न कारणम्? [1]ततश्च सूत्रविरोधः--"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्मः" (वै. सू. १.१.२) इति, [2]अत आह--"तच्चेश्वरचोदनाभिव्यक्ताद्धर्म्मादेवेति । तन्निःश्रेयसं धर्म्मादेव भवति, द्रव्यादित[3]त्त्वज्ञानं तु तस्य कारणत्वेन निःश्रेयससाधनमित्यभिप्रायः । तत्त्वतो [4]निर्ज्ञातेषु बाह्याध्यात्मिकेषु विषयेषु दोषदर्शनाद्विरक्तस्य समीहानिवृत्तावात्मज्ञस्य तदर्थानि कर्म्माण्यकुर्व्वतस्तत्परित्याग-साधनानि च श्रुतिस्मृत्युदितान्यसङ्कल्पितफलान्युपाददानस्यात्मज्ञानमभ्यस्यतः प्रकृष्ट-[5]विनिवर्त्तकधर्म्मोपचये सति परिपक्वात्मज्ञानस्यात्यन्तिक[6]शरीरादिवियोगस्य भावात् ।

[टि०] [15] असङ्कल्पितेति--स्वर्गादिप्राप्तिफलोद्देशाभावादसङ्कल्पितफलत्वम् । [7]प्रकृष्टनिर्वतकेति:--शरीरादि-निर्वतको [8]धर्मविशेषो जायते इति वैशेषिकसिद्धान्तः । तेन शरीरादीनाम् इति । एतावता ग्रन्थेन विवादा[9]ध्यासितः

[पं०] [15-16] 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'--इति कणादसूत्रम् । तस्येति = धर्मस्य । [10]निर्ज्ञातेष्विति = निश्चितेषु । समीहानिवृत्ताविति = चेष्टानिवृत्तौ । तदर्थानीति = विषयार्थानि । तत्परित्यागसाधनानीति तपःप्रभृतीनि । असंकल्पितफलानीति--निदानरहितानि । प्रकृष्ट[11]निर्वतकधर्मोपचये सतीति--धर्मो हि द्विविधः--प्रवर्तको निवृत(वर्त)कश्च । तत्र प्रवर्तकः संसारहेतुर्दानादि । निवर्तको मोक्षहेतुर्ध्यानतपःप्रभृतिः । प्रकृष्टश्चासौ निवर्तकधर्मश्च तस्योपचये सति । परिपक्वात्मज्ञानस्येति--परिपक्वात्मज्ञानस्य सतो योगिन इत्यर्थः ।

[कु०] नन्वभावोऽपि सप्तमः पदार्थः प्रमाणविषय एव तत्र तत्र निरूप्यते । अपवर्ग एवायं तावन्मिथ्याज्ञानादिदुःखान्तानां प्रध्वंसः । द्रव्यादीनामुत्पत्तिविनाशयोश्च प्राक्प्रध्वंसाभावौ । वैधर्म्येषु चेतरेतरात्यन्ताभावौ । तत्कथं तस्यानुद्देश इत्यत आह अभावस्येति (कं. ७.११) । ननु यदि भावपारतन्त्र्यादनुद्देशः, संयोगादीनामप्यनुद्देशः स्यादिति चेत्; न; शिष्याणामूहादिशक्तियुक्तानामत्राधिकार इत्यभावानुद्देशेनैव प्रदर्शिते [तम्] । संयोगाद्यनुद्देशे कारणाभावान्निरङ्कुश-तया चाचार्यस्य विपर्ययशङ्कानवकाशः । सम्बन्धे षष्ठीति (कं. ७.११) । साधर्म्यवैधर्म्यापेक्षया सम्बन्धः । अत्रापीति (कं. ७.१२) । न केवलं सङ्ग्रहप्रतिज्ञामात्रेण द्रव्यादिष्वा? कारः किन्तु तत्त्वज्ञानस्य निःश्रेयसहेतुत्वेऽपीत्यर्थः ।

[15] तन्निःश्रेयसं धर्मादेवेति (कं. ७.१७) धर्माद्भवत्येवेत्यर्थः । ततश्च धर्मस्यापि कारणत्वाङ्गीकारः । नन्वस्तु साक्षात्कारस्य धर्मेण सह समुच्चयः शास्त्रज्ञानं क्वोपयुज्यते इत्यत आह [12]द्रव्यादि [तत्त्व] ज्ञान[13]न्त्विति (कं. ७.१७) तस्य साक्षात्कारस्य च धर्मकारणत्वं व्याख्यातम् । साक्षात्कारकरणत्वं व्याचष्टे आत्मज्ञानमभ्यस्यत इति

१ ततः--कं. १; कं. २ । २ तत आह--कं. १; कं. २ । ३ °तत्त्वज्ञानं तस्य--कं. १; कं. २ । ४ ज्ञातेषु--कं. १; कं. २ । ५ निवर्त्तक--कं. १; कं. २ । ६ शरीरवियोगस्य--कं. १; कं. २ । ७ प्रकृष्टविनि--मु. ८ धर्मो--अ, ब, क; ९ विवादासितः--अ, ब. १० ज्ञातेषु--कं. ११ विनिवर्तक--कं. १२ द्रव्यादितत्त्वज्ञानं तस्य--कं. १ ।

## न्यायकन्दली

**[1]दृष्टो हि विषयाणामहिकण्टकादीनां परित्यागो विशेषदोषदर्शनपूर्वकाभिसन्धिकृत-निवर्त्तकात्मविशेषगुणात् प्रयत्नात्। तेन शरीरादीनामात्यन्तिकः [2]परित्यागोऽपि तद्दोषदर्शनपूर्व्वकाभिसन्धिकृतनिवर्त्तकात्मविशेषगुणनिमित्तो विज्ञात इति मोक्षाधिकारे वक्ष्यामः।**

[टि०] शरीरादित्यागो विषयदोष[3]दर्शनपूर्वकाभि[4]सन्धिकृतनिवर्तकात्मविशेषगुण[5]जन्योऽनिष्टविषयत्यागत्वात् [6]विषादित्यागवत्, इति प्रमाणं सूचितम्।

[पं०] [7]दृष्टो हि विषयाणामित्यादि–अनेन साधनं सूचितं द्रष्टव्यम्। तच्चेदम्–विवादाध्यासितः शरीरादित्यागो विषयदोषदर्शनपूर्वकाभिसन्धिकृतनिवर्तकात्मविशेषगुणजन्यः। अनिष्टविषयत्यागरूपत्वात्, अहिकंटकादित्यागवत्। [8]न दोषदर्शनेत्यादि तेषां शरीरादीनां ये दोषा अशुचित्वाध्रुवत्वादयस्तद्[र्श]नपूर्वको योऽभिसन्धिश्चित्तभावस्तेन कृतो यो निवर्तकः संसारमोचक आत्मविशेषगुणो ध्यानतपःस्वाध्यायादिधर्मो विशेषस्तन्निमित्त इति समासः।

[कु०] (कं. ७.२१)। देहेन्द्रियव्यतिरिक्तो नित्यो विभुः मिथ्याज्ञानरागद्वेषकार्यप्रवृत्तिनिवृत्त्यपायात् धर्माधर्मोपगृहीत-देहेन्द्रियतया बहुविधदुःखादुभयपरिक्लिष्टोऽहमिति निरन्तरमभ्यस्यतस्तद्विषयसाक्षात्कारः। इयांस्तु विशेषः उपदेशस्य प्रमाणतयाजन्यसाक्षात्कारस्य यथार्थंका आतुरकामुक्योर्भावनाया भ्रान्तिमूलतया तत्साक्षात्कारस्यायथार्थतेति समुच्चयस्य कारणत्वमुपसंहरति **प्रकृष्टेति** (कं. ७.२१)। उपचितो निर्वर्त्तको धर्मः आत्मज्ञानपरिपाकश्च संहृत्यात्यन्तिकीं दुःखनिवृत्तिं कुरुते इत्यर्थः। पा(अ)नु तत्त्वसाक्षात्कारस्य सवासनमिथ्याज्ञानस्य निवर्त्तकतया दृष्टेनैव द्वारेण मोक्षहेतुत्व-सम्भवे सति अदृष्टकल्पनायां किं प्रमाणमित्यत आह [9]**दृष्टोहीति** (कं. ७.२२)। अयं प्रयोगः परवार्गो *(परित्यागो)? ज्ञानसहकार्यात्मविशेषगुणसाध्यः स[अ]निष्टपरिहारत्वात् अहिकण्टकादिपरिहारवत्।

स्यादेतत्, किं सर्व्वकर्मसमुच्चयो काम्यसनैमित्तिकसमुच्चयो वा (समुच्चयो वासमुच्चयो वा) यावन्नित्य-समुच्चयो वा? न तावदाद्यः अशक्यत्वात्। नह्यस्ति सम्भवः कश्चित् वर्णाश्रमा[पा]दितानि काम्यानि नित्यानि नैमित्तिकानि च कर्माण्यशेषेणानुष्ठातुमी[मि]ष्टेनापि काम्यकर्मसमुच्चयः फलविरोधाच्चतुर्थाश्रमविधिविरोधाच्च। नापि नैमित्तिकसमुच्चयः, निमित्तासम्भवे तदनुष्ठानान्या[नु]पपत्तेः। नापि यावन्नित्यसमुच्चयः, चतुर्थाश्रमविधि-विरोधादशक्यत्वाच्चेति। तदसत्–यथाधिकारनित्यसमुच्चयस्याविरोधात्। साध्यवैचित्र्ये साधनवैचित्र्यं कथमिति चेत् न वि[नि]वर्तकधर्माद्युपायबहुत्वेऽप्येकत्वाविरोधात्। यथा भिदायां बिले जनयितव्ये अवयवि[वि]भागहेतोः कर्म्मणोऽनेककुठाराद्युपायत्वेप्येकता। किं च धर्म्मस्य ज्ञानकारणत्वेपि समानमेतत्। नह्यस्ति साक्षात्कारवैचित्र्यम्। अपि च केवलज्ञानसाध्यापवर्गवादिनश्च,

---

*१ दृष्टो विषयिणा°–कं. १; कं. २। २ परित्यागोऽविषय°–कं. १; कं. २। ३ दर्शनकाभि–अ; ४ सन्धिकृतः–* अ, ब, क; ५ गुणजन्या–अ, ब, क. ६ विवाद–ब. ७ दृष्टो विषयिणामहिकंटकादीनां–कं.। ८ अयं पाठः–कं. पुस्तके नास्ति। ९ दृष्टो–कं. १। * शरीरपरित्यागः इत्यर्थः स्यात्–सं.।

## न्यायकन्दली

[16] [1]धर्मोऽपि केवलो न निःश्रेयसं करोति यावदीश्वरेच्छया नानुगृह्यते। तेनेदमुक्तम्–ईश्वरचोदनाभिव्यक्ताद्धर्म्मादेवेति। चोद्यन्ते प्रेर्य्यन्ते स्वकार्य्येषु प्रवर्त्यन्तेऽनया भावा इति चोदना [2]ईश्वरचोदना [3]ईश्वरेच्छाविशेषः। अभिव्यक्तिः कार्य्यारम्भं प्रत्याभिमुख्यम्। ईश्वरचोदनयाभिव्यक्तादीश्वरचोदनाभिव्यक्ताद् ईश्वरेच्छाविशेषेण कार्य्यारम्भाभिमुखीकृता[4]द्धर्म्मादेव तन् निःश्रेयसं भवतीति वाक्ययोजना। तच्चेति चकारो [5]द्रव्यादिसाधर्म्यज्ञानेन सह धर्म्मस्य निःश्रेयसहेतुत्वं समुच्चिनोति।

**[टि०]** [16] [6]**नोद्यन्त** इति–एतच्चार्थकथनम् करणे ह्यनटि सति ङीः स्यात्। नोद्यन्तेऽस्या इति तु कृत्वा णिवेत्यासेत्यनः कार्यः। ईश्वरेच्छानां नित्यत्वाद् धर्मविशेषसन्निधमेव विशेषः। **ईश्वरेच्छा[7]विशेषेण** इति–ईश्वरेच्छायाश्च कार्यकरणे नियमेनावस्थानमेवावान्तरव्यापार इति कारकत्वम्।

**[पं०]** **मोक्षाधिकारे** इति–गुणपदार्थ इष्टप्रकरणे। **ईश्वरेच्छाविशेष** इति–ईश्वरस्येच्छा द्विधा–सिसृक्षा संजिहीर्षा च। **प्रतीत्येति**=बुद्ध्वा। **भेदजिज्ञासार्थमिति**–अत्र **भेदज्ञानार्थमिति** पाठांतरम्।

**[कु०]**

न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते॥

इत्यादि ज्ञानकर्मसमुच्चयप्रतिपादकागमविरोधः स्यादित्यलमतिविस्तरेण।

ननु यदि "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति सूत्रं (वै. सू. १:१.२) यथाश्रुतमेव [8]**व्याचिख्यासितं** तर्हि प्रत्येकसमुदायिभ्यामव्यापकतयाऽलक्षणमिति। मैवम्, अभिमतहेतुरतीन्द्रियविहितानुष्ठानजन्यः पुरुषगुणो धर्म इति हि लक्षणमभिमतं सूचितम्। अभ्युदयनिःश्रेयसयोर्भेदेनोपादानं त्वभिमतस्यावान्तरभेदप्रदर्शनायेति यत्किञ्चिदेतद्यत्त्वभ्युदयो ज्ञानं तेन [त्वाभ्युदयेन] कार्येणानुमितो धर्मः ज्ञानं च निःश्रेयसेन कार्येणानुमीयते इति सूत्रं धर्मेण प्रमाणप्रदर्शनपरमिति व्याचक्षते तेषां स्वर्गहेतौ स्वर्गे प्रमाणं न प्रदर्शितमिति न्यूनत्वमवसेयं, न तु यदि देहेन्द्रियव्यतिरिक्तात्मसाक्षात्कारो निवर्त्तकधर्मसहितोऽपवर्गहेतुः तर्ह्यागमविरोधः, श्रूयते हीश्वरोपासनाया अपवर्गहेतुता।

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति।

इति इमामाशङ्कां निराचिकीर्षुः सङ्गतिं करोति **धर्म्मोऽपीति** (कं. ७.२५)।

[16] [9]**इच्छाविशेष** इति (कं. ८. १) ईश्वरेच्छाया एकत्वेऽप्युपासनारूपसहकारिलाभेनोपाधिविशेषव्यपदेश इति विरोधः।

---

१ धर्मोऽपि केवलं तावन्न–कं. १, धर्मोऽपि तावन्न–कं. २। २ ईश्वरस्य चोदना ईश्वरचोदना–जे. १; जे. २। ३ ईश्वरस्येच्छाविशेषः–जे. १; जे. २। ईश्वरस्य–जे. ३। ४ °धर्म्मादेव निःश्रेयसं–कं. १; कं. २। ५ द्रव्यादिज्ञानेन–जे. १; जे. ३, द्रव्यादिसाधर्म्यादिज्ञानेन–कं. १। ६ चोद्यन्ते–मु. जे. १, ३; ७ विशेषण अ, ब, क; ८ व्यादिष्यासितं–हस्तलिखितपुस्तके–कं। ९ **ईश्वरेच्छाविशेषः**–कं. १।

[17] प्रशस्तपादभाष्यम्

**अथ के द्रव्यादयः पदार्थाः, किञ्च तेषां [1]साधर्म्यं वैधर्म्यञ्चेति ।**

**तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्म[2]मनांसि सामान्यविशेष[3]संज्ञयोक्तानि [4]नवैवेति । [5]तद्व्यतिरेकेणान्यस्य सञ्ज्ञानभिधानात् ।**

न्यायकन्दली

**[17] एवं षट्पदार्थज्ञानस्य [6]पुरुषार्थोपायिकत्वं प्रतीत्य तेषां प्रत्येकं [7]भेदज्ञानार्थं परिपृच्छति–अथ के [8]द्रव्यादयः पदार्था इति । कानि द्रव्याणि ? के गुणाः ? कानि कर्म्माणीत्यादि योजनीयम् । न [9]चावश्यं धर्म्मिणि ज्ञाते धर्म्मा ज्ञायन्त इति, तेन [10]धर्म्मेष्वाथ पृथक् प्रश्नः–किञ्च तेषामित्यादि । अत्रापि [11]च समुच्चये ।**

[टि०] [17] भेदजिज्ञासार्थम् इति–ननु भेदजि[12]ज्ञासया ज्ञानार्थं प्रश्नस्य क्रियमाणत्वात्कथं [13]जिज्ञासार्थमित्युक्तम् ? सत्यम् । जिज्ञासाया ज्ञानावधिकत्वात् जिज्ञासैव ज्ञानमतो जिज्ञासार्थं ज्ञानार्थमित्यर्थः । अथवा जिज्ञा[14]साया अर्थं विषयमित्यर्थः ।

[पं०] [17–18] तन्त्रान्तरे इति–न्यायशास्त्रे । तमो नाम रूपसंख्येत्यादि तत्र–रूपवत् तमः, श्यामत्वात् ।१। संख्यावत्तमः, एकद्वयादिस्वरूपेण साक्षात्क्रियमाणत्वात् ।२। परिमाणवत्तमः, दीर्घह्रस्वादिभेदेनोपलंभात् ।३। पृथक्त्ववत्तमः, घटादिभ्यः पदार्थान्तरत्वेनानुभवात् ।४। संयोगवत्तमः, पूर्वादिदिक्भिः(ग्भिः) सहाप्राप्तस्य तस्य प्राप्तिदर्शनात् ।५। विभागवत्तमः, पूर्वादिदिग्भिः सह प्राप्तस्याप्राप्तिसद्भावात् ।६। परत्वापरत्ववत्तमः, इदं-तमोऽस्मात्परमिदं चापरमिति व्यपदिश्यमानत्वात् ।(७)–८। वेगवत्तमः, उदयद्रविकिरणाद्यनुद्धतस्य तस्य शीघ्र-गमनसाक्षात्कारात् ।९। वेगवदिति मतु(प्)प्रत्ययः, स च सर्वत्र संबध्यते । यथा च संबध्यते तथा दर्शितं–

[कु०] [17] जिज्ञासार्थमिति (कं. ८.६) ज्ञानोत्पत्तौ जिज्ञासानिवृत्त्यर्थमित्यर्थः ।

इत्यादि (कं. ८.१४) इत्यादिशब्देन के सामान्ये, के विशेषाः, कः समवाय इति लिङ्गवचनयोरर्थानुस्मरणं, तेन कियन्ति द्रव्याणीति सङ्ख्याप्रश्नः सप्रयोजनः । साधर्म्यवैधर्म्ययोर्द्रव्याद्यव्यतिरेको द्वितीयः प्रश्नो निर्विषय इत्यत आह नावश्यमिति (कं. ८.१३) । धर्म्मतया ज्ञातानामपि धर्म्मत्वेन ज्ञानार्थं द्वितीयः प्रश्न इत्यर्थः । अत्रापीति (कं. ८.१४) न केवलं तच्चेत्यत्र । लक्षणा[15]भिधानसामर्थ्यादिति (कं. ८.१८) । लक्षणीयताविभागसामर्थ्यादित्यर्थः ।

---

१ साधर्म्यं चेति–कि. ता. । २ मनांसि–च, दे. । ३ सञ्ज्ञोक्तानि–व्यो.; कि.; ता; दे. । ४ नवैव–कि. ता. दे. व्यो. । ५ तद्व्यतिरेकेण सञ्ज्ञान्तरानभिधानात्–व्यो. कि. दे.; तद्व्यतिरेकेण सञ्ज्ञानभिधानात्–ता. । ६ पुरुषार्थोपायत्वं–कं. १; कं. २ । ७ भेदजिज्ञासार्थं–कं. १; कं. २ । ८ द्रव्यादय इति–कं. १; कं. २ । ९ नावश्यं–कं. १; कं. २ । १० धर्मेषु–कं. १; कं. २ । ११ च–जे. १; जे. ३ । १२ जिज्ञासाया–अ; ब, क; १३ जिज्ञासार्थं प्रमित्युक्तम्–अ; १४ जिज्ञासा अर्थं–अ, ब; १५ णाभिधाने–कं. १ ।

न्यायकन्दली

उत्तरमाह–तत्रेत्यादि। तेषु द्रव्यादिषु मध्ये, द्रव्याणि पृथिव्यादीनि, सामान्यविशेषसञ्ज्ञया सामान्यसञ्ज्ञया द्रव्यसञ्ज्ञया, विशेषसञ्ज्ञया प्रत्येकमसाधारणसञ्ज्ञया पृथिव्यप्तेज[1]आदिरूपया उक्तानि सूत्रकारेण प्रतिपादितानि। [2]किमेतावन्त्याहोस्विदपराण्यपि [3]सन्तीत्यत आह नवैवेति। ननु नवानां लक्षणाभिधाने सामर्थ्यादपरेषामभावो [4]ज्ञातः, व्यर्थं नवैवेति। न, नवसु लक्षितेषु किमपरेषामसत्त्वादुत सतामप्य[5]नुपयोगित्वान्न लक्षणं कृतमिति संशयो न [6]निवर्त्तेत। लक्षणस्य व्यवहारमात्रसारतया समानासमानजातीयव्यवच्छेदमात्रसाधनत्वेन चान्याभावप्रतिपादनासामर्थ्यात्, तदर्थमवधारणं कृतम्।

## [ द्रव्यविभागः ]

[टि०] ननु सामान्यविशेषसञ्ज्ञोक्तानां नवत्वविधाने पृथिव्यादीनामपि नवत्वमेव स्यादित्याशङ्क्य सामान्यविशेषस[7]ञ्ज्ञोक्तानि [8]नवैवेत्यनुवाद्यविधेयभावमपास्य पृथक्[9]वाक्यतया व्याचष्टे [10]किमेतान्येव इत्यादि। द्रव्याणी[11]त्यनुद्य नवत्वं विधी[12]यते न तु सामान्यविशेषसञ्ज्ञोक्तत्वम्, पृथिव्यादीनामावान्तरभेदेनानेक[13]त्वात्। समा[14]नासमानेति– अवान्तरजात्य[15]पेक्षया समानजातीयत्वम्, परमार्थतः सर्वेषामसमानजातीयत्वात्। अवधारणं कृतम् इति।

[पं०] रूपवदिति संख्यावदिति। एतावता तमसो नवगुणोपेतत्वं दर्शितम्। द्रव्यान्तरमस्तीति = दशमं द्रव्यं तमोऽस्ति। नवसु अन्तर्भावयितुमशक्यत्वात्। पृथिव्यप्तेजस्सु हि स्पर्शरहितत्वात्। वायुमनसोश्च रूपत्वात्। आकाशकालदिगात्मसु त्वनित्यत्वान्नान्तर्भावस्तस्माद्दशमं द्रव्यं तमः। गुणवत्त्वात्। तद्भावे च विलूनशीर्णा नवैव द्रव्याणीति प्रतिज्ञेति चोद्यार्थः।

अत्र कश्चिदाहेति – नैयायिको – व्योमशिवो वा। यदि तमो द्रव्यमिति – अतः पुरस्तादित्यध्याहार्यम्। ननु तेजोणुभिः प्रभामण्डलमारभ्यते, ते च दाहात्मका इति तत्कार्येण प्रभामण्डलेनापि दाहात्मकेन भाव्यमित्याह – अदृष्टवशादनुद्भूतस्पर्शमिति – अदृष्टो धर्माधर्मौ। तथा [तमः] परमाणुभिरपि तमो द्रव्यमिति अत्र चारभ्यत इति

[कु०] अनुपयोगित्वादिति (कं. ८.१९) निःश्रेयसं प्रतीति शेषः। लक्षणस्येति (कं. ८.२०) विभागस्य लक्षणसाध्यव्यवहारव्यवस्थित्यधिकरणमात्रप्रतिपादकतयेत्यर्थः। अन्याभावप्रतिपादनासामर्थ्यादिति (कं. ८.२१) अनेकत्वेन वाक्यभेदप्रसङ्गादित्यर्थः।

---

१ तेजस्त्वादिरूपया–कं. १; कं. २। २ किमेतानि–जे. १; जे. ३। ३ सन्तीत्याह–कं. १; कं. २। ४ ज्ञातव्यः–कं. १; कं. २। ५ अनुपयोगित्वादिति संशयो–जे. १; जे. ३। ६ निवर्त्तते–जे. १; जे. ३। ७ सञ्ज्ञयोक्तानि–मु. ८ नवेत्यनुवाद्य–अ, ब, क; ९ पृथक्यतया–अ; १० किमेतावन्ति–मु., किमेतानि–जे. १, जे. ३; एवं द्वयेऽपि वर्तते; ११ त्यनूद्य–अ, ब; १२ विधीयते–अ; १३ कत्वा–ब; १४ समानेति–अ; १५ °पेक्षया न–अ, ब;

## न्यायकन्दली

**इदमेव [1]सामान्येनोद्दिष्टानां विशेषसञ्ज्ञाभिधानं तन्त्रान्तरे विभाग इति [2]निर्देश इति च कथ्यते। कथमेतदवगतं नवैवेति? अत आह–[3]तद्व्यतिरेकेणेत्यादि। तेभ्यो नवभ्यो व्यतिरेकेण सर्वज्ञेन महर्षिणा सर्वार्थोपदेशाय प्रवृत्तेनान्य[4]स्य दशमस्य संज्ञानभिधानात्।**

[**टि०**] यथा देवदत्तयज्ञदत्तविष्णुमित्रास्त्रय एते समायाता इत्युक्ते सङ्ख्या निर्देशस्य स्वरूपप्रत्यायननिष्टत्वादन्यव्यवच्छेदनसामर्थ्याभावे तदर्थमेव[5]कारकाणां तथाऽत्रापीति। **तद् व्यतिरेकेण** इति–द्रव्याणि यावन्त्युक्तानि तावन्त्येव, सर्वज्ञेत्यादिविशिष्टेन महर्षिणा तावतामेव प्रतिपादितत्वात्, यथा षडेव रसाः। अथवा नवद्रव्यातिरिक्तं द्रव्यमस्तीति वाक्यमनर्थकम्, [6]प्रमाणानुपलभ्यमानार्थत्वात्, [7]शशविषाणमस्तीतिवाक्यवद् इति प्रमाणम्।

[**पं०**] शेषः। **तत्कार्यद्रव्यस्येति** = परमाणुकार्यस्य तमस इत्यर्थः। **क्वचिदनुपलम्भादिति** – यथा दीपकलिकादौ स्पर्शोपलम्भस्तथाऽस्य तमसो न क्वचिदपि स्पर्शोपलम्भः। [8]**स्पर्शवत्कार्यद्रव्यानारम्भका** इति अत्र स्पर्शवतोऽपि तमोऽणवः कर्तृपदं द्रष्टव्यम्। स्पर्शवत्कार्यद्रव्यानारम्भका इति चेदिति अस्मात्पुरस्तर्हीत्यध्याहार्यम्।

**रूपवन्तो वायुपरमाणव इति**–अस्मात्पुरः किञ्चिदित्यध्याहार्यम् **चतुर्धेति** – पार्थिवाप्यतैजसवायवभेदेन। द्वितीयविकल्पस्तद्रहिता वेति। तात्पर्येण परः प्राह **कार्यैकसमधिगम्येत्यादि। परमाणवो यथाकार्यमुन्नीयन्त** इति – यादृशं कार्यं तादृशाः कारणभूता परमाणवोऽनुमीयन्ते, परमाणूनां स्वयमप्रत्यक्षत्वादित्यर्थः। **न तद्विलक्षणा इति** = न कार्यविलक्षणाः, अस्पर्शवत्कल्पनीया इति भावना। **अस्पर्शवत्त्वस्य कार्यद्रव्यानारम्भकत्वेनव्याभिचारोपलम्भादिति**– मनोऽपि ह्यस्पर्शवत्त्वादेव कार्यद्रव्यानारम्भकम्। परवाक्यं **कार्यदर्शनादित्यादि। न तु कारणवैगुण्येन द्रष्टकार्यविपर्यासो युज्यते इति**–दृष्टकार्यं तमो लक्षणम्। अयमत्र भावः–विचार्यमाणमपि कारणं कदाचन न सम्यक्प्रतीतिमागतम्, यावता च तन्नप्रतीतिमागतं तावतैव किं तत्कार्यस्य दृष्टस्य विपर्यासः स्यात्? तस्मादेव यदुक्तं

कार्यं चेदवगम्यते, किं कारणपरीक्षया।
कार्यं चेन्नावगम्यते किं कारणपरीक्षया॥ इति चोद्यार्थः।

**आरम्भकानुपपत्तेरिति**–परमाणुभिरेवमारब्धं च तमो न घटत इत्यर्थः। **अर्थमिति** = अन्धकारः। **आश्रये इति** = घटे। **अप्रतियोगिनीति** = एकज्ञानसंसर्गिणि भूतले। ननु प्राप्यकारित्वादिन्द्रियाणामभावेन कः सम्बन्धो, न चासम्बद्धस्य ग्रहणमित्याह **संयुक्तविशेषणतयेति** चक्षुरश्मिभिः संयुक्तभूतलं तत्र विशेषणीभूतस्याभावस्य संयुक्तविशेषणतत्त्वः

[**कु०**] ननु द्रव्यादीनां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुरित्युक्तम्। अर्थातु(?)दुद्देशश्च कृतः। साधर्म्यवैधर्म्ये चोपरिष्टाद् वक्ष्येते। तत्र द्रव्याणीत्यादिको ग्रन्थो प्रस्तुत इत्याशङ्कयाह [9]**इदमेवेति** (कं. ८.२२)। चेति। वक्ष्यमाणसाधर्म्याद्यधिकरणज्ञापकतापदं विशेषसञ्ज्ञाभिधानमवश्यं कर्तव्यमिति [वि]शेषं न सामान्यमिति न्यायेनाधिकरणासिद्धेश्च पूर्वोत्तरप्रकरणे न सङ्गच्छेयातामिति भावः। तत्रैव वृद्धसम्मतिमाह–[10]**तन्त्रान्तर इति** (कं. ८.२२)। [11]**सर्वार्थोपदेशप्रवृत्तेनेति** (कं. ८.२४) हेयोपादेयव्यतिरिक्तस्य प्रमाणविष[य]स्य सिद्धौ तदुभयतः प्रतिपादनेन निःश्रेयसहेतुशास्त्रप्रणयनमन्यथानुपपद्यमानं मुनेः सर्वार्थोपदेशाय प्रवृत्तिं गमयतीति भावः।

---

१ सामान्योद्दिष्टानां–कं. १; कं. २। २ निर्देशश्च–कं. १। ३ तद्व्यतिरेकेण–जे. १; जे. ३। ४ अन्यस्य संज्ञानभिधानात्–कं. १; कं. २। ५ कारणकरणं–अ, ब. ६ प्रमाणमु० अ, ब. ७ शरीर–अ, ब. ८ स्पर्शवत् द्रव्यारंभका–कं.। ९ इदमेव–कं. १। १० तन्त्रान्तरे–कं. १। ११ सर्वार्थोपदेशाय प्रवृत्तेन–कं. १।

## न्यायकन्दली

[18] **तमो नाम रूप-सङ्ख्या-परिमाण-पृथक्त्व-परत्वापरत्व-संयोग-वि[1]भागपरत्वापरत्ववेगवद् द्रव्यान्तरमस्तीति चेत् ? अत्र कश्चिदाह–यदि तमो द्रव्यम्, रूपवद्द्रव्यस्य स्पर्शाव्यभिचारात् [2]स्पर्शवद्द्रव्यस्य महतः प्रतिघात[3]धर्मकत्वात् तमसि सञ्चरतः प्रतिबन्धः स्यात्, महान्धकारे च भूगोलकस्येव तदवयवभूतानि खण्डावयविद्रव्याणि प्रतीयेरन्निति । तदयुक्तम्, यथा प्रदीपान्निर्गतैरवयवैरदृष्टवशादनुद्भूतस्पर्शमनिबिडावयवमप्रतीयमानखण्डावयविद्रव्यप्रविभागमप्रतिघाति[4]प्रभामण्डलगृहव्यापकमारभ्यते, तथा तमःपरमाणुभिरपि तमो द्रव्यम् । तस्मादन्यथा समाधीयते । तमःपरमाणवः स्पर्शवन्तस्तद्रहिता वा ? न तावत् स्पर्शवन्तः, स्पर्शवतस्त[5]त्कार्य्यद्रव्यस्य क्वचिदप्य[6]नुपलम्भात् ।**

[**टि०**] [18] **[ तमसोऽतिरिक्तद्रव्यचर्चा । ]**

भण्डनाचार्या[7]दीनाशङ्कते **तमो नाम** इति । तमः शब्दाभिधेयं द्रव्यं [8]गुणवत्त्वात्, घटवदित्यनुमानम् । **यदि तमो द्रव्यम्** इति–यद्रूपवत्तत्स्पर्शवदिति व्याप्तिः । स्पर्शवत्तु वायुव[9]न्नीरूपमिति । **यथा प्रदीपाद्** इति–यत्तु प्रदीपप्रभयापि सन्तापविशेषः स समासन्नप्रदीपरश्मीनामेव दूरवर्तिनि प्रदीपे प्रभा[10]सम्बद्धस्या धस्योष्ण[11]स्पर्शाप्रतीतेः । न तु तमस्तावन्नित्यं [12][द्रव्यम्, नित्य] द्रव्यस्य परमाणुरूपत्वे व्योमतुल्यत्वे वा ग्राह्यत्वं न स्यात्, किन्तु द्व्यणुकादिकमारब्धम् । तथा च तमः परमाण्वभ्युपगमे सत्याह **तमः परमाणवः** इति । **क्वचिदप्यनुपलम्भाद्**

[**पं०**] सम्बन्धो गृह्यते । यथाऽघटं भूतलम् । अत्र हि भूतलं विशेष्यम्, अभावस्तु विशेषणम् । तस्माद्युक्तमुक्तं संयुक्तविशेषणतयेति । **तदन्यप्रतिषेधमुखेनेति**–तस्माद् भूतलादन्यो घटस्तन्निषेधद्वारेण । **अन्यस्येति**=प्रतियोगिनः । **न च प्रतिषेधमुखः प्रत्यय इति** किं तु विमुख इत्यर्थः । **सर्वतः समारोपितस्तम इति । प्रतीयत इति**–सर्वत्रैव पृथिव्यां समारोपितो रूपविशेषो, न तु तात्त्विकं किञ्चित्तमोऽस्ति । यन्नीलत्वं नीलोत्पलादौ दृष्टं तत्सर्वत्र समारोप्यत इत्यर्थः । स्वमते मध्यंदिनादिदोषोपगमायाह–**दिवा चोर्ध्वं नयनगोलकस्य नीलिमावभासते[13] इति**–नीलिमा समारोपित इति द्रष्टव्यम् । दिवा आकाशावलोकनकुतूहलेन नायना रश्मयः प्रसृताः । प्रसृत्य च परावृत्ताः स्वनयनगोलकनीलिमानमेव गृह्णन्तीति

[**कु०**] [18] ननु तव–बाह्यप्रतीत्यप्रतीत्योर्निषेधो नोपपद्यते तत्कथं नवैवेति ? मैवम्, द्रव्यतया प्रमिते सुवर्णादौ नवबाह्यत्वनिषेधात् नवबाह्यता(तत्) प्रतीते तमःसादृश्यादौ द्रव्यत्वनिषेधास् तदधिकस्य बुध्यनारोहेण शङ्कानस्ये(स्या)द् तया तदुत्तरस्याप्यवचनीयत्वादिति **प्रतिबन्धः स्यादिति** (कं. ९.४) । अयमभिसन्धिः–तमस्तावद्व्यापकद्रव्यं न भवति कादाचित्कत्वविरोधात् नाप्यगुणः प्रत्यक्षत्वात् कादाचित्कत्वाच्च । परिशेषान्मध्यमपरिमाणं द्रव्यमिति वक्तव्यम् । एवं व्यवस्थिते प्रयोगः तमो मध्यमपरिमाणद्रव्यं न भवति अप्रतिघातकत्वादप्रतीयमानखण्डावयवित्वाच्च अभाववत् । तदिदमेकदेशिमतं व्यभिचारेण दूषयति [14]**नैतदिति** (कं. ९.५) । **अनुद्भूतस्पर्शमनिबिडावयवमिति**

---

१ °विभागवद्–कं. १; कं. २ । २ स्पर्शद्रव्यस्य–जे. १; जे. ३ । ३ °धर्मत्वात्–कं. १; कं. २ । ४ °मण्डलमारभ्यते–कं. १; कं. २ । ५ कार्य्यस्य–कं. १; कं. २ । ६ °दनुपलम्भात्–कं. १; कं. २ । ७ दीनामा-अ. ८ गुणवत्स्यात्–अ, ब, क; ९ वन्नारूप–अ, ब, क. १० सम्बद्धस्योष्ण–ड. ११ स्पर्शप्रतीतेः–अ, ब, क; १२ [ ] एतच्चिह्नान्तर्गतः पाठः 'अ'–पुस्तके नास्ति । १३ वभास–कं. । १४ तदयुक्तम्–कं. १ ।

न्यायकन्दली

**अदृष्टव्यापाराभावात् [1]स्पर्शवत्कार्यद्रव्यानारम्भका इति चेत्? रूपवन्तो वायुपरमाणवोऽदृष्टव्यापारवैगुण्याद्रूपवत्कार्य्यं नारभन्त इति किं न कल्प्येत, किं वा न कल्पित[2]मेतदेकजातीयादेव परमाणोरदृष्टोपग्रहाच्चतुर्धा कार्य्याणि जायन्त इति। कार्य्यैकसमधिगम्याः परमाणवो यथाकार्य्यमुन्नीयन्ते, न तद्विलक्षणाः, प्रमाणाभावादिति चेत् ? एवं तर्हि तामसाः परमाणवोऽप्य[3]स्पर्शवन्तः कल्पनीयाः, तादृशाश्च कथं तमोद्रव्यमारभेरन्? अस्पर्शवत्त्वस्य कार्य्यद्रव्यानारम्भकत्वेनाव्यभिचारोपलम्भात्। कार्य्यदर्शनात्तदनुगुणं कारणं कल्प्यते, न तु कारण[4]वैगुण्येन दृष्टकार्य्यविपर्य्यासो [5]युज्यते जगद्वैचित्र्यस्याप्यपह्नवप्रसङ्गादिति चेत्, न वयमन्धकारस्य प्रत्यर्थिनः, किन्त्वार[6]म्भानुपपत्तेर्नीलिममात्रप्रतीतेश्च द्रव्यमिदं न भवतीति ब्रूमः। तर्हि भासामभात्र एवायं [7]प्रतीयेत? न, तस्य नीलाकारेण**

[टि०] इत्यनेनानुद्भूतस्पर्शप्रदीपप्रभासाम्य[8] निरस्तम्। तस्य हि प्रदीपकलिकादौ स्पर्शोपलम्भोऽस्ति, अस्य तु क्वचिदपि नास्तीत्यर्थः। **अस्पर्शवत्त्वस्य** इत्यनेनानुमानं सूचितम्। तमो न कार्यद्रव्यम्, स्पर्शरहितत्वात्, मनोवत्। न चैवमकार्यद्रव्यत्वापत्तिः [9]बाह्येन्द्रियग्राह्यत्वाद् घटवत्। तर्हि वायुरकार्यद्रव्यम्, सर्वदारूपरहितत्वात् [10][मनोवत्]। अत्र च सर्वदेति तदात्वोत्पन्नद्रव्यव्यवच्छेदार्थम्, उत्पत्त्य[11]नन्तरं द्वितीयक्षणे [12]एव रूपसद्भावात्। नैवम्, स्पर्शवत्त्वान्यथा[नुपपत्तेः] कार्यद्रव्यत्व[13]सिद्धिः। तमोरूपस्य त्वन्यथा[14]प्युपपत्तेः। **मध्यन्दिनेऽपि** इति। आलोकसद्भावेऽपि

[कु०] (कं. ९.६) वातऽप्रतिघातो हेतुः। [15]अप्रतिप्रभाविगमित्यप्रतीयमानं खण्डावयव[वि]त्वे वा हेतुः। स्पर्शवत्कार्यविरहेऽपि तेजःपरमाणूनां स्पर्शवती पृथिवीति दर्शनाद्विशेषणं [16]**क्वचिदपीति** (कं. ९.९)। तेजसि क्वचिद्दृष्टमित्यर्थः। *उपाधिमाशङ्क्य प्रतिबंद्यापरिहरति **अदृष्टव्यापारादिति** (कं. ९.९)। चतुर्धा गन्धरसरूपस्पर्शवती पृथिवीति एकैका* एव येनाप्तेजोवायवप्रतिबंदीमोचनमाशङ्क्य तुल्यन्यायतया परिहरति [17]**कार्यैकेति** (कं. ९.१३)। स्पर्शरहिता वा इति पक्षं दूषयति [18]**तादृशाश्चेति**। दृढप्रमाणावगते तमसि कार्ये स्पर्शवत्त्वानारम्भकत्वयोर्व्याप्तिर्भ [भि]द्यतां पार्थिवत्वलोहलेख्यत्वयोर्वक्ष इवेति शङ्कते **कार्यदर्शनादिति** (कं. ९.१६)। इह दृढप्रमाणं तमसः कार्यद्रव्यत्वविषयं वा तमोमात्रविषयं वा ? आद्येऽसिद्धिरित्याती[ना]?......भानुपपत्तेतिरिति (कं. ९.१७)। द्रव्यस्य कार्यत्वप्रमाणं स्पर्शवत्त्वे सति महत्त्वं तदनुपपत्तेरित्यर्थः। न द्वितीय इत्याह **नीलिममात्रप्रतीतेरिति** (कं. ९.१७)। ततश्च द्रव्यत्वासिद्धिरित्यभिप्रायः।

---

१ स्पर्शवद्द्रव्या°–कं. १; कं. २। २ °मेकजातीयादेव–जे. १; जे. ३। ३ °स्पर्शवन्तः कथं–कं. १; कं. २। ४ वैकल्येन–जे. १; जे. २। ५ युज्यते इति चेत्–कं. १; कं. २। ६ आरम्भकापपत्ते–कं. १; कं. २। ७ प्रतीयते–जे. १; जे. २। ८ सामान्यं–अ, ब. ९ बाह्यैकेन्द्रिय–अ, ब, क; १० [ ] एतच्चिह्नान्तर्गतः पाठः 'ड' पुस्तके नास्ति। ११ नन्तर–अ, ब, क; १२ एक–अ, ब, क; १३ सिद्धे–ड, १४ प्युपपत्तेः–अ, ब; १५ प्रविभागमप्रतिघातिप्रभामण्डलम्–कं. १। १६ क्वचित्–कं. १। १७ प्रतीकमिदं कन्दल्यां नास्ति। १८ आरम्भकामुपपत्तेः इति कन्दल्याम्। भानुपपत्तेतिति हस्तलिखितपुस्तके।

५

## न्यायकन्दली

**[1]प्रतिभासायोगात्, मध्यन्दिनेऽपि दूरगगनाभोगव्यापिनो [2]नीलिम्नश्च प्रतीतेः किञ्च गृह्यमाणे प्रतियोगिनि संयुक्तविशेषणतया [3]तदन्यप्रतिषेधमुखेनाभावो गृह्यते, न स्वतन्त्रः। तमसि च गृह्यमाणे नान्यस्य ग्रहणमस्ति। न च प्रतिषेधमुखः प्रत्ययः। तस्मान्नाभावोऽयम्। न चालोकादर्शनमात्रमेवैतत्, बहिर्मुखतया तम इति, छायेति च कृष्णाकारप्रतिभासनात्। तस्माद्रूपविशेषोऽयमत्यन्तं तेजोभावे सति सर्व्वतः समारोपितस्तम इति प्रतीयते। दिवा चोर्ध्वं नयनगोलकस्य [4]नीलिमाऽवभासते इति वक्ष्यामः। यदा तु नियतदेशाधिकरणो भासामभावस्तदा [5]तावद्देशसमारोपिते नीलिम्नि छायेत्यवगमः। अत एव दीर्घा, ह्रस्वा, महती, अल्पीयसी छायेत्यभिमानः, तद्देशव्यापिनो नीलिम्नः प्रतीतेः अभावपक्षे च भावधर्म्मध्यारोपोऽपि दुरुपपादः। तदुक्तम्–**

**[टि०]** मध्यन्दिने गगनव्यापि नीलिमरूपं तमः प्रतीयते इत्यर्थः। एतच्च स्व[6]सिद्धान्तानपेक्षयैवोक्तम् [7]गगननीलिम्नो [8]नयनगोलकगतनीलिमत्वेन स्वयमभ्युपगमात्। **किञ्च गृह्यमाण** इति। प्रतियोगिनि प्रतिषेध्ये प्रतिषेधाधिकरणे वा स्मृत्या प्रत्यक्षेण वा गृह्यमाणे चक्षुः संयुक्तभूतलादिविशेषणतया अघटं भूतलमित्याद्युल्लेखेनाभावो गृह्यते। **तमसि च** इति– अन्यस्येति प्रतिषेधस्य प्रतिषेधाधिकरणस्य च। एतावता ग्रन्थेन ज्ञेयरूपतया निराकृत्य इदानीं ज्ञानरूपतया निराचष्टे **न चालोकदर्शनेति**। अदर्शनं हि ज्ञानाभावः, स च यथा घटमहं न जानामीत्यन्तरुल्लिखति तथा चालोकमहं न जानामीत्यभाप्यन्तर्मुखतयैवोल्लिखेन्न[9] पुनरिदं तम इति बहिर्मुखतया कृष्णाकारत्वेन प्रतिभासेत इत्येतदाह **बहिर्मुखतया** इति। ननु भासामभावे तमः समारोपाभ्युपगमपक्षेऽतिललाटन्तपे तपने गगनतलावलम्बी नीलिमा कथमवभासते इत्याशङ्क्याह **दिवा चोर्ध्वम्** इति। **अभावपक्षे च** इति–सारूप्यग्रहणं ह्यारोपनिबन्धनम्। [10]न च भावाभावयोः सारूप्यमस्तीति कथमालोकाभावे नीलत्वस्य भावधर्मस्याध्यारोप इत्यर्थः। शुक्लभा[11]स्वररूपविरोधित्वं सारूप्यं निरूप्यत इति चेत, न; शुक्लभास्व[12]रविरोधिते नीलत्ववत् रक्तत्वस्याप्यारोपप्रसङ्गात्। न चारोपे [13]सति निमित्तानुसरणमिति

**[कु०]** एवं तावन्नवैवेति सिद्धं तथापि किमिदं स्यादिति जिज्ञासून् प्रति सुहृत्तया तमःस्वरूपं विवेक्तुकामः परमतं दूषयितुमनुवदति **तर्हीति** (कं. ९.१४)। परे ह्येवं मेनिरे उक्तरीत्यैव द्रव्यस्य सामान्यविशेषसमवायानां व्यक्त्याश्रय सम्बन्धिभिः सहोपलब्धनियतत्वात् कर्म[ण]श्च संयोगविभागासमवायिकारणत्वादनेवंभूतत्वेन तेभ्यो व्यावृत्तस्य द्रव्येषु समवायाभावाद् गुणस्य भावानुप्रवेश एव न युक्तः। तत्र वाऽन्वयव्यतिरेकाभ्यामालोकाभावत्वनिश्चय इति।

ननु शंखे पीतिमारोपवदभावे नीलत्वारोपे को विरोधः, अयमस्ति विरोधः, आरोपितेनैव रूपेण तमोबुद्धि-व्यपदेशसिद्धावभावप्रतीति[14]कल्पनायां कल्पनागौरवमिति। ननु गुणारोपः सर्व्वो गुणिनि प्रत्यक्षत. प्रतीयमाने तद्गुणाभिभवेन दृष्टः शङ्खादौ, इहालोकाभावत्वमप्रतीयतस्तव कथमित्यत आह **मध्यन्दिने** इति (कं. ९.१९)।

---

१ प्रतिभासनायोगात्–जे. १; जे. ३। २ नीलिम्नश्च प्रतीतेः–कं. १; कं. २। ३ अन्य–जे.१; जे. ३। ४ नीलिमावभास–कं. १; कं. २। ५ तद्देश°–कं. १; कं. ३। ६ सिद्धान्तनिरपेक्ष–अ, ब; ७ गमन–अ, ८ वयन–अ, ब; ९ खेत–ड; १० न च नं न च–अ, ब; ११ भावस्वरूप–अ, ब; १२ विरोधितेन–ड; १३ सन्निमित्ता–अ, ब; १४ कल्पनायां कल्पनायां हस्तलिखितपुस्तके।

न्यायकन्दली

**न च भासामभावस्य तमस्त्वं वृद्धसम्मतम् ।**
**छायायाः कार्ष्ण्यमित्येवं पुराणे भूगुणश्रुतेः ॥**
**दूरासन्न[1]प्रदीपादेर्महदल्पचलाचला ।**
**देहानुवर्त्तिनी छाया न वस्तुत्वाद्विना भवेत् ॥ इति ।**

**दुरुपपादश्च क्वचिच्छायायां कृष्णसर्पभ्रमः, चलतिप्रत्ययोऽपि गच्छत्या[2]वरक द्रव्ये यत्र यत्र तेजसोऽ[3]भावस्तत्र तत्र रूपोपलब्धिकृतः । एवं परत्वादयोऽप्यन्यथासिद्धाः ।**

[टि०] वाच्यम् । [4]आरोपस्यैवानुपपद्यमानत्वेनासिद्धत्वादिति यत्किञ्चिदेतत् । **न च भासाम्** इति – छायायाः कार्ष्ण्यमित्याद्युल्ले[5]खेन पुराणे तमसो [6]भूगुणत्वं प्रतिपादितम् । अत्र हि छायाशब्देनारोपितं [7]सारूप्यमुच्यते । कार्ष्ण्यमित्यनेन च नीललक्षणो विशेषः । अन्यथा तु छायाकार्ष्ण्यशब्दयो[8]स्तुल्याभिधेयतायां सहप्रयोगो न स्यात् । **दूरासन्नेति** – दूरवर्तिप्रदीपस्य महती छाया, [9]आसन्नवर्तिप्रदीपस्य तु स्वल्पा । एवं चले प्रदीपे चला निश्चले त्वचलेति सोपस्करं ज्ञेयम् । अभावपक्षे च भावेत्यादिना धर्मारोपासम्भवः उक्तः । इदानीं [10]धर्म्यारोपासम्भवमाह **दुरुपपादश्च** इति ।

[पं०] भावः । **भावधर्माध्यारोप इति** – भावधर्मा दीर्घह्रस्वादयः । **छायायाः कार्ष्ण्यमित्येवं पुराणे भूगुणश्रुतेरिति** – छायायाः पुराणे भूगुणश्रुतेः । केनोल्लेखेन कार्ष्ण्यमिति कार्ष्ण्यं हि भूगुण एव यतः । अत्र छायाशब्देनारोपितं रूपमुच्यते । कार्ष्ण्यमित्यनेन च नीललक्षणो विशेष इति हृदयम् । [11]**गच्छतीति** – गच्छति सति, **आवारके द्रव्ये इति** – भासामवरणकारिणि करिकरभादौ । **अन्यथासिद्धा इति** – छायाया द्रव्यतां विनापि सिद्धाः ।

[कु०] **गृह्यमाण** इति (कं. ९.२१) ग्रहणा[ण]भवनस्मरणोपलक्षणा[12]द् गृह्यमाण इत्यर्थः । संयुक्तविशेषणतया सम्बन्धप्रतीयमानविशेषणतया तदन्यप्रतिषेधमुखेनेत्यर्थः । **नान्यस्य ग्रहणमिति** (कं. ९.२१) अन्यस्याधिकरणस्य । न च प्र[ग्रा]ह्यातियोगि तत्स्मरणमिति शेषः । न च दिवाप्रतिसन्धानमकृत्वा रात्रिप्रतिसन्धानेन क्र[त]मो ग्रहणा[त्] दिवातनालोकस्मरणमर्थसिद्धमिति साम्प्रतं तथा प्रतीत्यभावात् नास्ति नियमः तमोग्रहणे रात्रिरवश्यं प्रतिसन्धातव्येति । न च [13]**प्रतिषेधमुखेनेति** (कं. ९.२२) तम् अर्थान्तर्भावेन प्रलयविनाशावसानवद् वाक्यार्थे पदवचनादयमस्त्येवेति चेत् न दृष्टान्तवैषम्यात् । इह तावत् प्रलय इति प्रशब्दः लये प्रतिष्ठते इत्यत्रैव नञर्थः । विनाश इत्यत्र तु 'नश' अदर्शने इति आचार्येणैव नञर्थे धा ? नुस्मृतः । एवं षोते [खोते?] कर्म्मणीत्यपि, न ह्र हि तमः शब्दे तथेति । **बहिर्मुखतयेति** (कं. ९.२३) अनात्मधर्मतयेत्यर्थः ।

स्वमतमुपसंहरति **तस्मादिति** (कं. ९.२३) । ननु द्रव्यासमवायादगुणस्य कथं रूपविशेषे[षि]तेतीमामाशङ्कामारापाङ्गीकारेण निरस्यन्नेव तमश्छाये विविनक्ति [14]**अत्यन्तेति** (कं. ९.२४) । ननु यदि तेजोभावे सति नीलितत्वारोपः कथं तर्हि मध्यन्दिनवर्तिगगनाभोगव्यापकनीलिमप्रतीतिरित्यत आह **दिवा चेति** (कं. ९.२५) । एवमद्रव्यतया निर्णीते

---

१ प्रदेशादि – कं. १; कं. २ । २ आवारक – जे. १; जे. ३ । ३ ऽसन्निधिः – जे. १; जे. ३ । ४ आरोप्य – अ,ब,क; ५ –खन अ; ६ गुणत्वम् अ; ७ रूप ड; ८ स्तुल्यतायां अ; ९ आसन्नवर्तिप्रदीपस्य महती छायेत्यधिकं–अब पुस्तकयोः; १० धर्मारोपा – अ, ब; ११ अ–पुस्तकेऽत्र पत्रं नष्टम् । १२ वृस्यमाण इति हस्तलिखितपुस्तके । १३ प्रतिषेधमुखः – कं. १ । १४ अत्यन्तम – कं. १ ।

## न्यायकन्दली

**[19] तत्र चालोकाभावव्यञ्जनीयरूपविशेषे तमस्यालोकानपेक्षस्यैव चक्षुषः सामर्थ्यम्, तद्भावभावित्वात्; यथालोकाभाव एव [1]त्वन्मते। नन्वेवं तर्हि सूत्रविरोधः? "द्रव्यगुणकर्म्मनिष्पत्तिवैधर्म्याद्भाभावस्तमः" इति। न विरोधः, भाऽभावे सति तमसः प्रतीतेर्भाभावस्तम इत्युक्तम्।**

[टि०] [19] **तद्भावभावित्वाद्** इति—आलोकानपेक्षचक्षुः सद्भावे तमः[2]प्रतीतेर्भावात् तमोद्रव्यत्वनिषेधानुमानं चेदम्, तमो द्रव्यं न भवति, तेजोद्रव्यान्यत्वे सति आलोकानपेक्षचक्षुर्ग्राह्यत्वाद् आलोकाभाववत्।

[पं०] [19] [3]**अत्र चालोकाभावावव्यञ्जनीयरूपविशेषे तमसि आलोकनपेक्षस्यैव चक्षुषः सामर्थ्यं तद्भावभावित्वादिति**—कोऽर्थः? आलोकाभावभावित्वादित्यर्थः। अयमत्र वाक्यार्थः—यद्ग्रहे हि यदपेक्षं चक्षुषस्तदभावग्रहेऽपि तदपेक्षत इति वृद्धाः। ततो यथा हि घटग्रहणे चक्षु[रा]लोकमपेक्षते, एवं घटाभावग्रहणेऽपि अपेक्ष्यते। एवमालोकाभावव्यंग्यं तमः। कर्मभूतमालोकाभावसहकृतमेव चक्षुः कर्तृभूतं पश्यति। यथा आलोकाभावे एव त्वत्पक्षे भाऽभावस्तम इति वादिनः। पक्षे तमोद्रव्यनिषेद्धानुमानं चेदमिह वाच्यम्; तमो द्रव्यं न भवति। तेजोद्रव्यान्धत्वे सति, आलोकानपेक्षचक्षुर्ग्राह्यत्वादालोकाभावात्।

द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भाऽभावस्तम इति सूत्रम्। अस्यायमर्थः। द्रव्यगुणकर्मणां निष्पत्तिर्द्रव्यगुणकर्मनिष्पत्तिस्तस्या वैधर्म्यम्, तस्मात् द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यात्। द्रव्यगुणकर्माणि हि समवायिकारणादिभ्यः उत्पद्यन्ते। अभावस्तु न तथा। अत्र भाऽभावे सति तमसः प्रतीतेर्भाऽभावस्तम इत्युक्तमिति। कार्ये तमोलक्षणे कारणं भाऽभावे सतीत्युपचर्यत इति भाऽभावस्तम इदं सूत्रम्। न पुनर्मुख्यतया तमसोऽभावरूपत्वस्यापनपरमिति **श्रीधराभिप्रायः**।

[कु०] दीर्घत्वादिगुणप्रतीतिमन्यथोपपादयति **अत एवेति** (कं. ९.२७)। अभिमानो भ्रमः। **अभावपक्षे चेति** (कं. ९.२८)—च शब्दः पूर्वं तमसि गृह्यमाणे चे[वे]द्युक्त इषणसमुच्चये सुखाभावे दुःखारोपवत् संयोगाभावे विभागारोपवदभावेऽपि भावधर्मारोपे न विरोध इति चेत्; विरोधः, दुःखविभागौ हि न[ना]भावधर्मतयाऽरोप्येते किन्तु भावतयैव। इह तु दीर्घत्वह्रस्वत्वादयोऽभावधर्म्मतयेति विशेषः। उक्तेर्थेऽभियुक्तं वाक्यं प्रमाणयति **न चेति** (कं. ९.२८)। चोऽवधारणे। [अ]भावस्य तमः शब्दवाच्यत्वं वृद्धानां प्रामाणिकानां नैव संमतं कुत इत्यत आह पुराणे छायाया भूगुणत्वेन श्रवणात्। को गुणो भुव इत्यत उक्तं **काष्ण्यमित्येवमिति** (कं. १०.१)। आरोपितो नीलिमा छायेति पुराणप्रसिद्धेस्तमसश्च तत्तुल्ययोगक्षेमत्वादित्यर्थः। अभावे भावधर्माध्यारोपस्य दुरुपपादत्वेऽभियुक्तं वाक्यं **दूरेति** (कं. १०.२)। दूरे प्रदीपादौ महती, आसन्ने वाऽल्पा, चलतीति चलने [न] चलतीत्यचला इत्येवं देहादिमनुवर्तमाना भावरूपत्वमन्तरेण नोपपद्यत इत्यर्थः। भावाभावयोरत्यन्तवैसादृश्याद्द्रव्यारोपस्य दुरुपपादत्वमाह **दुरुपपादश्चेति** (कं १०.३)। कर्मप्रत्ययमन्यथोपपादयति **चलतीति** (कं. १०.३)। पूर्वारोपो देशाद्देशान्तरारोप इत्यर्थः। **एवमिति** (कं.१०.४) आरोपदेशपरत्वापरत्वादिभिरित्यर्थः।

[19] नन्विदं रजतमित्याद्यारोपेषु आलोकसहकृतस्यैव चक्षुषः सामर्थ्यावधारणं तरहे = [तर्हि]कथं चक्षुषा रूपमारोप्यते? न च मानसोऽयमारोप इति वाच्यं, मनसो बहिरस्वातन्त्र्यात्, अन्धानां तमः प्रत्ययानुदयाच्च इत्यत आह—[4]**अत्र चेति**। अयमभिसन्धिः, आलोकसहकृतस्यैव चक्षुषः साम[र्थ्यं], तमःप्रतीतिस्तावत् सर्व्वजनप्रसिद्धा

१ त्वत्पक्षे—जे. १; जे. ३। २ प्रतीतेर्भावे भावात्—अ, ब; ३ तत्र—कं.। ४ तत्र च—कं. १।

## न्यायकन्दली

**ईश्वरोऽपि बुद्धिगुणत्वादात्मैव, न तु षड्गुणाधिकरणश्चतुर्दशगुणाधिकरणाद् गुणभेदेन भिद्यते, [1]मुक्तात्मभिर्व्यभिचारात् ।**

[टि०]  [ ईश्वरस्यातिरिक्तद्रव्यचर्चा । ]

ननु तमोद्रव्याभावेऽपि ईश्वराभिधानं दशमं द्रव्यमस्तीत्यत आह **ईश्वरोऽपि** इति । एतेन चानुमानं सूचितम्, ईश्वरः आत्मा, [2]बुद्धिमत्त्वात्, अस्मदाद्यात्मवत् । तत्र ईश्वरः आत्मा [3]न भवति । चतुर्दशगुणानधिकरणत्वात्, आकाशवद् इत्यनुमानेन सत्प्रतिपक्षतामाशङ्क्याह **मुक्तात्मभिर्व्यभिचाराद्** इति--व्यभिचारवारणार्थं सर्वज्ञ चतुर्दशगुणानधिकरणत्वाद् इति हेतौ [4]विशेषिते तु दृष्टान्ते [5]विशेषणस्य वैयर्थ्यं स्यात् । षड्गुणाधिकरणत्वं त्वीश्वरस्य इच्छाप्रयत्नयोर्बुद्धावेवान्तर्भावात् ।

[पं०] यद्युक्तयुक्त्या तमो न द्रव्यं तदेश्वरो दशमं द्रव्यं स्यादित्याह--**ईश्वरोऽपि बुद्धिगुणत्वादात्मैवेति । षड्गुणाधिकारेति**--बुद्धिसंख्यापरिमाणपृथक्[त्व]संयोगवियोगाः षड्गुणा ईश्वरस्य । इच्छाप्रयत्नयोः बुद्धावेवान्तर्भावात् । **चतुर्दशगुणाधिकरणादिति** -- संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माधर्मलक्षणचतुर्दशगुणाधारात् । श्रीधरः प्राह **मुक्तात्मभिर्व्यभिचरादिति** -- बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माधर्माख्यानां नवानां विशेषगुणानां मुक्तात्मसु अभावाद् द्रव्यान्तरत्वप्रसंगः स्यादिति तात्पर्यार्थः ।

[कु०] नापह्नवमर्हति । तत्रारोपवदभावग्रहणेऽपि सामर्थ्यं समानम् । आलोकाभावतमोवादिनाऽपि रूपारोप एष्टव्यः, 'नीलं तमः' इति व्यवहारसिद्धये । एवं स्थिते अभावग्रहणेप्यारोपेऽपि आलोकविरहिणश्चक्षुषः सामर्थ्यद्वयकल्पनाद् वा[व]रमारोपे एव सामर्थ्यमेकं कल्प्यताम् । न चालोकाभावग्रहणे आलोकापेक्षा ग्राह्यविरोधादयुक्तेति चेत्, सत्यमेतत् । यद्यालोकाभावस्य द्रवस्य [द्रव्यस्य] प्रत्यक्षग्राह्यत्वं निश्चितम्, तदेवाद्यापि सन्दिह्यते । तमःप्रतीतिस्त्व(स्व)रूपारोपेणापि संग[स्य]म्यते । ननु यद्यालोकाभावो न प्रत्यक्षः तर्हि विस्फारितचक्षुषो नात्रापवरके आलोक इति तडिति [झडिति ? भडिति] व्यवहारः कथमिति चेत् नरयं प्राचीति वदनुमान तडित्य [झडित्ये] अनुमिति भाडित्यो [तडित्यो] पपत्ते । अनुमानं न विषयानुपलब्धिलिङ्गकं सम्भवत्येव । नन्वारोप्ये रूपे वाऽऽरोपाधिकरणे वा अव्याप्रियमाणं चक्षुः कथमारोपोपकरणमिति चेत् ? कोऽयमारोपव्यतिरेकेण व्यापारो (णा)नाम यदि तावद् ग्रहणं स्मरणं वा तदुभयमारोप्यस्य तावदनुपपन्नं उभयथाप्यारोपाभावप्रसङ्गात् । न हि तत्र[असंसृष्टत] या ? स्मृतं वा अधिकर[ण] विविक्ततया गृहीतं वा आरोपयितुं शक्यते, अधिकरणेऽपि व्यापार[त]त्सम्बन्धमात्रं न तु ग्रहणं, तस्याप्यारोपात् प्रागारोप्य-विवेकेन ग्रहणे आरोपानुपपत्तिरेव । अविविक्तग्रहणं चारोप एव तस्मादारोप्यविषयसंस्कारोद्बोधे अधिकरणसन्निकर्षे च असंसृष्टतया स्मर्तव्ये संसृष्टतयाऽ[5]नुभव आरोप इति युक्तमुत्पश्यामः ।

ननु विवेकाविवेकपरिहाण्या[न्या] निर्विकल्पकान्यतराग्रहे सादृश्यस्यानुपलब्धे कथं संस्कारोद्बोध इति चेत् स्वप्रज्ञानविशेषवददृष्टादेव संस्कारोद्बोधोपपत्तेः । इह वा दिक्करणं दिग्देशो वा, आकाशदेशो वा चक्षुषा सन्निकृष्यत एव । आलोकाभावग्रहणवादिनामप्यधिकरणसिद्धिरेतादृश्येव । अदृष्टसामर्थ्यं च कल्पनीयम् । आलोकाभावे शौक्ल्याभावस्य सादृश्यस्य निमित्तस्य नीलपीताद्यनेकारोपसाधारण्ये नीलान्त[नीलिम्न] एवारोपाय यदाहुस्तएव स्तदेव । आरोपे सति निमित्तानुसरणमदृष्टादिकं चात्र निमित्तमिति । एतेन नालं तम इति सामानाधिकरण्यमप्यविरुद्धमिति द्रष्टव्यम् ।

---

१ मुक्तात्मना--जे. १; जे. ३ । २ बुद्धिमत्वात्--अ, ३ भवति--अ, ब, ४ विशेषितेति--अ, ब; ५ अनुभवे--इति सप्तमी ।

[20] **प्रशस्तपादभाष्यम्**

[1]**गुणा रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेष[2]प्रयत्नाश्चेति कण्ठोक्ताः सप्तदश ।**

**न्यायकन्दली**

[20] **गुणा रूपादयः कण्ठोक्ता [3]सूत्रकारेण [4]साक्षादुक्ताः [5]रूपरसगन्धस्पर्शाः सङ्ख्या परिमाणानि, पृथक्त्वं, संयोगवियोगौ परत्वापरत्वे, बुद्धयः, सुखदुःखे, इच्छाद्वेषौ प्रयत्नश्च गुणा इति। प्रयत्नश्चेति 'च' शब्देनात्रानुक्ता गुणत्वेन लोके प्रसिद्धा गुरुत्वादयः सप्त समुच्चिताः। [6]एवं चतुर्विंशतिरेव गुणाः। ये तु शौर्य्यौदार्य्यकारुण्यदाक्षिण्यौग्र्यादयः,**

[टि०] [20] [ गुणविभागः । ]

**परदुःखप्रहाणेच्छा** इति–[7]कारणं विनेति शेषः। अन्यथा स्वामिनं प्रत्यपि भृत्यस्य कारुण्यं स्यात्। **अदृष्टत्वजात्यभावाद्** इति–धर्माधर्मौ गुणत्वावान्तरोभयाश्रितैकजातिमन्तौ न भवतो रूपरसेत्यादिवाक्ये विभक्तात्मविशेषगुणत्वात्, सुखदुःखवत्। [8]आत्मविशेषगुणत्वादित्येवकृते सम्यग्ज्ञानमिथ्याज्ञानाभ्यां व्यभिचारः स्यात्, व्यवस्थापकाभावाद्वादृष्टत्वजात्यभावः। सर्वोत्पत्तिमन्निमित्ता[9]नित्यात्मविशेषगुणत्वमिति लक्षणं न साधु धर्मस्य दुःखहेतुत्वाभावात्, अधर्मस्य च सुखहेतुत्वाभावादिति। तर्हि अदृष्ट [10][शब्दप्रयोगः कथमुभयत्र? सत्यम्। भावनाव्यतिरिक्तातीन्द्रियात्मविशेष]गुणत्वमित्युपाधेर्नीलत्वादिवद्वा विनाप्युपाधिम्। अथवा सुखजनकत्वं दुःखजनकत्वं चोपाधिमादायाक्षशब्दप्रवृत्तिवदिति। ननु य एव शब्दप्रवृत्तिनिमित्तमुपाधिः, स एवादृष्टत्वव्यवस्थापको भविष्यति। न च वाच्यं सिद्धे ह्यदृष्टत्वे व्यञ्जकचिन्ता कार्या, सिद्धेरेवत्वदृष्टत्वस्य प्रत्यक्षतो वा [11]शुक्लतटतमत्वादिवत्,

[पं०] [20] [12]**तत्रैवान्तर्भवन्तीत्यतः** पुरस्तथाहीत्यध्याहारः। **वेगस्य भावनायाः स्थितिस्थापकस्येति**–क्षिप्तबाणदौ वेगसंस्कारः। १। अनुभवात्स्मृतिं यावद्भावनासंस्कारः। २। आकृष्टमुक्ता शाखा स्वस्थाने याति–इति स्थिति-

[कु०] अदृष्टमहिम्ना एकमेव वस्तु धर्म्मधर्म्मिभावभेदरूपाक्रान्ततयैवारोप्यत इति। **तद्भावभावित्वादिति** (कं. १०.६) तदभावादित्वाच्चेति शेषः। भाभावस्तम इत्यत्र **लौकिक** उपचारे प्रयोजनमालोकाभावोपकरणत्वान्नीलिमारोपस्यालोकापेक्षित्वाशङ्कानिवर्त्तनम्।

ईश्वरस्य नवबहिर्भावमाशङ्क्य परिहरति **ईश्वरोऽपीति** (कं. १०.८)। [13]**न चेति** (कं. १०.९) सङ्ख्यादिभिः पञ्चभिर्बुद्धीच्छाप्रयत्नैश्चाष्टगुणस्येश्वरस्य षड्गुणत्वं चादौ न्यूनतोपल[ब्ध]?–भि? त्यविरोधः। गुणभेदेन अत्र चतुर्दशगुणत्वेन।

[20] ननु च शब्देनानुक्तसमुच्चयादे[व] नद एव द्वयं न एवेति च[त]स्कुत इत्यत आह [14]**लोकसिद्धा इति** (कं. १०.१७)। षडभिधाय सप्तेत्युक्तिरयुक्तेत्यत आह **अदृष्टेति** (कं. १०.२२)। नन्वदृष्टावान्तरभेदेन सप्तत्वे संस्कारावान्तरभेदोपेक्षया नवत्वप्रसङ्ग इति शङ्कते **नन्विति** (कं. १०.२३)। परिहरति **संस्कार** इति (कं. १०.२३)।

---

१ गुणाश्च–कं. १; कं. २। २ प्रयत्नाश्च–ता.। ३ सूत्रेण–जे. १। ४ साक्षात्कथिताः–कं. १; कथिता–कं. २। ५ रूपरसेत्यादिना–कं. १; कं. २; मपृथक्त्वं संयोगविभागौ–इति–जे. ३ पुस्तके। शेषस्तु पाठः जे. १ पुस्तकवत्। निर्दिष्टः पाठः पृथक्त्वं संयोगवियोगौ–इत्यस्य स्थाने। ६ एवं गुणाः चतुर्विंशतिरेव–जे. १; जे. ३। ७ कारुण्यं–अ, ब, क. ८ आत्मगुणत्वा–अ; ९ त्तात्मविशेष... अ, ब; १० [ ] चिह्नान्तर्गतः पाठः गुणत्वमिति पदं च आवृत्तौ ब पुस्तके। ११ शुक्लतरत्वतमत्वादि–अ, ब; १२ पाठोऽयं कन्दल्यां नास्ति। १३ न तु–कं. १। १४ लोके प्रसिद्धा।

### प्रशस्तपादभाष्यम्

**'च' शब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं [1]चतुर्विंशतिर्गुणाः ।**

### न्यायकन्दली

**तेऽत्रैवान्तर्भवन्ति । शौर्य्यो बलवतोऽपि परस्य [2]पराजयं प्रत्युत्साहः । स च प्रयत्नविशेष एव । सततं [3]सन्मार्गानुवर्तिनी बुद्धिरौदार्य्यम् । परदुःखप्रहाणेच्छा कारुण्यम् । तत्त्वाभिनिवेशिनी बुद्धिर्दाक्षिण्यम् । औद्यमात्मन्युत्कर्षप्रत्यय [4]इत्येवमादिः । अदृष्टशब्देन धर्म्माधर्म्मयोरुपसङ्ग्रहः । [5]संस्कार इति । स च वेगस्य भावनायाः स्थितिस्थापकस्य चाभिधानम् । नन्वेवं तर्ह्याधिक्यम् ? न, संस्कारत्वजात्यपेक्षया वेगभावनास्थिति-**

[**टि०**] अनुमानतो वा मनस्त्वादिवत् । तत्र नाद्यः, असम्भवात् । न द्वितीयः, [6]तथा विधेर्लिङ्गानुपपत्तेः । अदृष्टपदप्रयोगात्तत्सिद्धिरिति [7]चेन्न । अन्योन्याश्रयप्रसङ्गात् । सिद्धे हि अदृष्टत्वे शब्दप्रयोगस्तत्सिद्धौ चादृष्टत्वसिद्धिरिति । संस्कारत्रयस्य तु संस्कारत्वस्य स्वाश्रयस्य पूर्वावस्थाप्रापको गुणः संस्कार [8]इति व्यवस्थापकं लक्षणमस्ति । नन्वस्य लक्षणस्य परमाणुगतस्थितस्थापकत्वसंस्काराव्यापकत्वाभावात् कथं संस्कारत्वव्यवस्थापकत्वम् ? न, तज्जातीये [9]उत्पत्तिमतिसम्भवात् । ननु तथापि परमाण्वन्तरनोदनजनितैः पालिप्रध्वंसनिवृत्तप्रतिबन्धैः कर्मभिरारब्धेन परमाणुवेगेन सकलेऽपि तडागावयविनि जनितो यो [10]वेगः स तावत्का[11]रणगुणपूर्वो न तु वातव्यभिघातजन्यः, तदानीमवयवारब्धन् तना[12]वयविनिष्पत्तिसमकालं हि वातव्यभिघातरूपः संयोगः सम्भवति, ततः संयोगानन्तरं क्रिया यदा चाभिघातस्तदैव च कारणगुणक्रमेण [13]वेगोऽपि प्रारब्धः, वेगेन च [14]क्रियेति । स वेगो निष्क्रियेऽवयवि[15]न्यारब्धः क्रियावत्तां जनयतीति [16]पूर्वावस्थाप्रापको न भवति, [17][ततो लक्षणस्याव्यापकत्वम् । सत्यम्, अत्रापि तज्जातीयसम्भवित्वमेवोत्तरम् । एवं च सकर्मावस्थारब्धस्य वेगस्य सकर्मावस्थापादकत्वात् संस्कारत्वे लक्षणं व्यवस्थापकं भवति ।] परमव्यापकत्वादस्य लक्षणस्य [18]लक्षणान्तरं संस्कारत्व[19]साधने प्रमाणं च चिन्त्यम् । अदृष्टत्व[20]साधनप्रमाणवत् संस्कारत्वसामान्य-

[**पं०**] स्थापकसंस्कारः । ३ । अपरः प्राह—एवं सति **न चतुर्विंशतित्वमित्यादि** । श्रीधरः **नेत्यादि** । **अदृष्टत्वजात्याभावादिति**—अदृष्टत्वजातेर्धर्माधर्मव्यक्तिष्वभावः । व्यक्त्याश्रितैकरूपव्यंजकाभावात् । यत्र तु जातिर्भवति तत्र व्यक्त्याश्रितैकरूपव्यंजकसद्भावः । यथा सुरभ्यसुरभिगन्धे घ्राणैकग्राह्यत्वमित्यर्थः । **निर्गुणेष्वपीति**—संख्यागुणरहितेष्वपि ।

[**कु०**] प्रत्यक्षजातीयकार्यत्वे प्रत्यक्षजातीयकार[ण]त्वे च सत्त्वप्रत्यक्षत्वेनोपसङ्गृहीतानामेकजातीयत्वादिति भावः । **अदृष्टत्वजात्यभावादिति** (कं. ११.१) कार्यकारणलक्षणादीनामुपसङ्ग्रहे का[र]णा[ना]मभावादित्यर्थः । **असाधारणधर्मयोगित्वेने**[ति] (कं. ११.२ । भेदवत[:] क्रमबुद्धिविषयत्वात् ।

---

१ चतुर्विंशतिगुणाः—कि । २ पराजयाय प्रत्युत्साहः—कं. १; कं. २ । ३ सन्मार्गवर्तिनी—कं. १; कं. २ । ४ आदि—जे. १; जे. ३ । ५ संस्कार इति च—जे. १; जे. ३ । ६ तथाभूत—ड; ७ चेत्—अ, ब, क. ८ इत्यव्यवस्थापकं—अ, ब; ९ अनुत्पत्तिमत्ति—अ; १० वेगे—अ, ब; ११ कारगुण—अ, ब; १२ —यव—अ, वयत—ब, क; १३ वंगोऽपि—अ; १४ क्रियते—अ, ब, क; १५ वित्प्रारब्ध—अ; १६ पूर्वावस्थापकं भवति—अ, ब; १७ [ ] एतच्चिह्नान्तर्गतः पाठः अब पुस्तकयोर्नास्ति । १८ लक्षणान्तरत्वसाधन—अ, ब; लक्षणान्तरसंस्कारत्व—क; १९ साधनेम—क; २० साधनस्य—ब;

[21] **प्रशस्तपादभाष्यम्**

**उत्क्षेपणा[1]पक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्म्माणि । गमनग्रहणाद् भ्रमण-रेचन[2]स्यन्दनोर्द्ध्वज्वलनतिर्य्यक्प[3]तननमनोन्नमनादयो गमन[4]विशेषा न जात्यन्तराणि ।**

**न्यायकन्दली**

**स्थापकानामेकत्वात् । एवं [5]र्तांह न चतुर्विंशतित्वम् ? अदृष्टत्वजात्यपेक्षया धर्म्मा-धर्म्मयोरेक[6]त्वात् कथं चतुर्विंशतित्वमिति चेत् तन् न, अदृष्टत्वजात्यभावात् । निर्गुणेष्वपि गुणेष्वसाधारणधर्म्मयोगित्वेनोपचाराच्चतुर्विंशतिरिति व्यवहारः ।**

**[21] कर्म्माणि विभजते–[7]उत्क्षेपणेति । कियन्ति तानि ? तत्राह–पञ्चैवेति । ननु भ्रमणादयोऽपि सन्ति ? कथं पञ्चैवेत्यव[8]धारणमत आह–गमनग्रहणादिति । गमन-ग्रहणात्पञ्चैव [9]कर्म्माणि । अत्रोपपत्तिमाह–भ्रमणरेचनस्यन्दनेत्यादि । यस्माद् [10]भ्रमणादयोऽपि गमनविशेषा गमनप्रभेदा न जात्यन्तराणि, तस्माद् गमनग्रहणेनैतेषामपि ग्रहणात् पञ्चैवेत्यवधारणं सिद्ध्यतीत्यर्थः ।**

**[टि०]** साधनप्रमाणस्या[11]प्यभावात् । विवादाध्यासिताः संस्काराः गुणत्वव्यतिरिक्तैकापरजातिमन्तोऽदृष्टान्यत्वे सति गुणगणनायां सूत्रकृता एकशब्देनोपात्तत्वाद् रसवद् इत्यस्यानुमानस्य संस्कारान्यत्वे सति विशेषितस्यादृष्टत्वसाधनेऽपि समर्थत्वात् । ननु गुणानां निर्गुणत्वात् सङ्ख्याभावे कथं चतुर्विंशतिरिति [12]प्रत्यय इत्याह **निर्गुणेष्वपि** इति । द्रव्येष्व[13]साधारणधर्मो द्रव्यत्वम्, गुणेषु गुणत्वम् इत्यसाधारणधर्मयोगित्वमुभयत्र तुल्यमत उपचारः ।

[21–22–23] [ जातिपदार्थपरिचयः ]

**सामान्यमिति**–नित्यमेकमनेकसमवायि सामान्यमिति लक्षणम् । अनेकवृत्तिरिति (इति) तु कृते [14]संयोगवृत्त्या अनेकवृत्तित्वमाकाशस्याप्यस्तीत्यतिव्याप्तिः स्यात् । **यद्यप्येषा** इति–यदा द्रव्यादित्रयं सच्छब्दविषयम्, अन्ये तु पदार्थाः सच्छब्दविषया न भवन्ति तदा सामान्यादिभ्यो व्यावर्तमाना सत्तास्वाश्रयं द्रव्यादित्र्यमपि सामान्यादिभ्यो

**[पं०] असाधारणधर्मयोगित्वेनेति** चतुर्विंशतित्वं हि द्रव्यादिषु पञ्चसु पदार्थेषु नास्ति । किं तु गुणेष्वस्ति । उपचारा-च्चतुर्विंशतिरिति व्यवहार इत्ययमर्थः । चतुर्विंशति गुणा इति व्यवहारमात्रम्, न तु चतुर्विंशतिसंख्या गुणेष्वस्ति । निर्गुणत्वाद् गुणानाम् ।

[21] **भ्रमरा(णा)दयोऽपीति** कर्मविशेषाः ।

[कु०] [21] **अत्रोपपत्तिमिति** (कं. ११.९) वैयधिकरण्यशङ्कापरिहारेणेति शेषः । **न जात्यन्तराणीति** (कं. ११.१०) [भ्र]मणा सह साङ्कर्यप्रसङ्गादित्यादि कर्म्मकाण्डे वक्ष्यते ।

---

१ °वक्षेपण–पाद । २ स्पन्दन–कं. १ । ३ पवनादयो–दे । ४ विशेषा एव न तु–कि; विशेषा एव न–ता । ५ सति–जे. १; जे. ३ । ६ °रेकत्वात् न–कं. १; कं. २ । ७ उत्क्षेपणादीनि–जे. १; जे. ३ । ८ अवधारणसिद्धिः–जे. १; जे. ३ । ९ कर्म्माणीति–जे. १; जे. ३ । १० भ्रमणादयो– जे. १; जे. ३ । ११ प्यास्याभावात्–अ, क, ड; १२ प्रत्येय–अ, ब; १३ ष्वसाधारणधर्मो–अ, ब; १४ संयोगे–अ, ब;

[22]

## प्रशस्तपादभाष्यम्

सामान्यं द्विविधं परमपरञ्च[1]। अनु[2]वृत्तिप्रत्ययकारणम्। तत्र परं सत्ता महाविषयत्वात्। सा चानुवृत्तेरेव हेतुत्वात् सामान्यमेव। द्रव्यत्वाद्यपरम्, अल्पविषयत्वात्। तच्च व्यावृत्तेरपि हेतुत्वात् सामान्यं सद्विशेषाख्यामपि लभते।

## न्यायकन्दली

[22] सामान्यं कथयति—सामान्यं द्विविधमिति। द्वैविध्यमेव कथयति—परमपरं चेति। चोऽवधारणे, परमपरमेवेत्यर्थः। तस्य [3]स्वरूपं कथयति—अनुवृत्तिप्रत्ययकारणमिति। अत्यन्तव्यावृत्तानां पिण्डानां यतः कारणादन्योन्यस्वरूपानुगमः प्रतीयते तत्सामान्यम्। किं तत्परं सामान्यमित्याह—परं सत्तेति। अत्र [4]युक्तिमाह—महाविषयत्वादिति। द्रव्यत्वाद्यपेक्षया बहुविषयत्वादित्यर्थः। सा चानुवृत्तेरेव हेतुत्वात् सामान्यमेव। द्रव्यत्वादिकं तु स्वाश्रयस्य विजातीयेभ्योऽपि व्यावृत्तेरपि हेतुत्वाद्विशेषोऽपि भवति। सत्ता तु स्वाश्रयस्यानुवृत्तेरेव हेतुस्तेन सामान्यमेव। यद्यप्येषा सामान्यादिभ्यो व्यावर्त्तते

[टि॰] व्यावर्तयतीति प्रतीयते। न त्वेवमस्ति तेषामपि सच्छब्दवाच्यत्वात् बाधकवशा तु [5]सत्तासामान्यं न कल्प्यत इति, [6]न त्वभावात। स्वाश्रयं व्यावर्तयतीत्याह [7]भावापेक्षया [8]च इति। नन्वभावस्याप्यस्तीति प्रत्ययविषयत्वात् अभावादपि सत्तास्वाश्रयं न [9]व्यावर्तयति। सत्यम्, अभावस्य हि विधिरूपता प्रतीत्य भावादिदमुक्तम्, [10][अस्तित्वं] तु तस्य प्रामाणिकत्वमित्यर्थः।

[पं॰] सा चेति—सा सत्ता। स्वाश्रयस्येति पृथिव्यादेः। विशेषोऽपि भवतीति सामान्यं विशेषश्च भवतीत्यर्थः। स्वाश्रयस्येति द्रव्यगुणकर्मलक्षणस्य। यद्यप्येषेति—एषा सत्ता। सामान्यादिभ्यो व्यावर्तत इति निःसामान्यत्वासामान्यविशेषसमवायानाम्। न तेभ्यः स्वाश्रयं व्यावर्तयितुं शक्नोतीति—तेभ्यः सामान्यविशेषसमवायेभ्यः, स्वाश्रयं सच्छब्दवाच्यलक्षणं व्यवहारं व्यावर्तयितुं न शक्नोतीति, किन्तु स्वयमेव व्यावर्तयितुं शक्नोतीत्यर्थः।

[कु॰] [22] परमपरं चेति (कं. ११.१८) एकव्यक्तिवृत्तित्वे सतीति शेषः। अत्यन्तव्यावृत्तानामि[ति] (कं. ११.१९) व्य(क्त)क्त्यभेदे अनुगमविरो(हा)[धा]त् तुल्यव्यक्तिषु च द्वितीयादौ व्यावर्त्तकधर्मविरहे प्रमाणाभावात् परस्परपरिहारवत्यो[तो]रेकत्र विरोधात् सामान्येऽनवस्थानात् विशेषेषु लक्षणहानिप्रसङ्गात् समवायसम्बन्धविरहाज्जातेर्बाधः। अत्र युक्तिमिति (कं. ११.२१) प्रमाणमित्यर्थः। तत्र प्रयोगः, सत्तासामान्यं द्रव्यत्वापेक्षया परमिति व्यवहर्तव्यं तदपेक्षया महाविषयत्वात्। यद्यदपेक्षया परमिति न व्यवह्रियते न तत्तदपेक्षया महाविषयं यथा द्रव्यत्वापेक्षया पृथिवीत्वम्। एवं पृथिवीत्वापेक्षया द्रव्यत्वमिति द्रष्टव्यम्। सत्ताया सपक्षेणान्वयोऽपीति विशेषः।

---

१ चेति—कि.; ता; दे। २ तच्चानुवृत्ति—कि. दे। ३ रूपं—कं. १; कं. २। ४ युक्तिमंहाविषयत्वादिति—जे. १; जे. ३। ५ सत्त्वासामान्यं—अ, ब; ६ नित्वभावात्—अ, ७ भावापेक्षया—मु. जे. नं. १, ३; ८ प्रतीकमिदं कन्दलीपाठे नास्ति। ९ न्यावर्तयति—अ; १० [ ] एतच्चिह्नान्तर्गतः पाठः अब पुस्तकयोर्नास्ति।

न्यायकन्दली

तथापि न तेभ्यः स्वाश्रयं व्यावर्त्तयितुं शक्नोति। तेषामपि स्वरूप[1]सतां सद्बुद्धिवेद्यत्वात्। वस्त्वपेक्षया चानुवृत्तिहेतुत्वं विवक्षितम्, तेनाभावाद्व्यावृत्तिहेतुत्वेऽपि न दोषः।

[23] यत्प्रमाणेन प्रतीयते [2]तत्रास्तीति व्यवहारो लोकानां विपर्य्यये तु नास्तीति। तेन प्रमाण[3]गम्यैव सत्तेति केचित्। तदयुक्तम्, प्रमाणोत्पत्तेः प्राग् वस्तुनोऽसत्त्वप्रसङ्गा-दसतश्च खरविषाणस्येव ग्राह्यत्वाभावादन्योन्यसंश्रयापत्तेश्च। अ[4]सतः प्रमाणस्याग्राहकत्वे सत्तायाः प्रमाणग्राह्यतालक्षणत्वे च ग्राहकस्य प्रमाणस्यापि ग्राहकान्तरानुसरणेनानव-स्थापाताच्च।

अथ मतं न ब्रूमः प्रमाणसम्बन्धः सत्तेति, किन्तु प्रमाणसम्बन्धयोग्यं वस्तुस्वरूपमेव सत्ता। योऽपि सत्तासामान्यमिच्छति, तेनापि पदार्थस्वरूपमभ्युपेयम्, निःस्वभावे शशविषाणादौ सत्ताया असमवायात्। एवं चेत्तदेवास्तु, [5]किमन्यया सत्तयेति।

[पं०] [23] [24] विपर्यये तु नास्तीति–यत्प्रमाणेन न प्रतीयते तत्र नास्तीति व्यवहारः प्रवर्तत इत्यर्थः। केचिदिति=प्राभाकराः। अन्योन्यसंश्रयापत्तेरिति सत्तायां सत्यां प्रमाणगम्यताऽप्रमाणगम्यतायां च सत्यां सत्ता-इत्येवंरूपेतरेतराश्रयदोषापातादित्यर्थः। ग्राहकप्रमाणस्यापि ग्राहकान्तरानुसरणेनानवस्थापाताच्चेति–कोऽर्थः? ग्राहकप्रमाणमपि हि सदसद्वा। सच्चेत्, अकिञ्चित्करमित्यर्थः। एवं चेत्तदेवास्तु, किमन्यया सत्तयेतीति सत्ता-समवायात्प्रागपि यदि वस्तुस्वरूपं विद्यते, तदा किं सत्तया? तया हि वस्तुस्वरूपं साधितत्वात्प्रेऽप्यस्तीत्यर्थः। अनन्तेषु शब्दग्रहणाभावादिति–न च सम्बन्धग्रहणं विना एकाकारप्रतीतिरिति भावः। अत्र चात्यंतभिन्नेषु सम्बन्ध-ग्रहणाभावादिति पाठान्तरम्। सुगमम्। परवाक्यं यथा दृष्टंकेत्यादि। कुतस्तत्र सामान्यकल्पनेति–अत्राप्यत्यन्त-भिन्नत्वाविशेषात्प्राप्नोति सामान्यकल्पनेत्याख्यानमित्यतः पुरस्तदेत्यध्याहार्यम्। तेषामिति महीधरसर्षपादीनाम-भावविलक्षणेन रूपेणेति भावेन।

[कु०] न तेभ्य इति (कं. १२.२) व्यावर्तयितुं बाधकज्ञानात्प्राग्व्यावृत्तिबुद्धिं जनयितुं तेषामपि स्वरूपसतां सद्बुद्धिवेद्यत्वेऽपि सामान्यादिषु सत्ता अनवस्थादेर्बाधकादिति द्रष्टव्यम्।

[23] आक्षिपति यत्प्रमाणेनेति (कं. १२.४)। विधिमुखेनेति शेषः। प्रमाणगम्यताविधायकंप्रमाणगम्यता। परिहरति तदयुक्तमिति (कं. १२.५)। अन्योन्यसंश्रयापत्तेरिति (कं. १२.६) सत्त्वात्प्रमाणग्राह्यत्वं, प्रमाणग्राह्यत्वेन सत्त्वमिति। [6]असतः प्रमाणस्येति (कं. १२.७) ननु कारणाभावोऽसद्रूप एव कार्याभावे गमयतीति तत्कथमसद्ग्राहकमिति चेत्, न, तत्राप्यात्यमनःसंयोगस्य सत एव ग्राहकत्वात्। [7]सत्ताव्यतिरेकेण[न]नान्यत्प्रमाणयोग्यत्वमिति (कं. १२...)। परिहाराभासमाशङ्क्याह योऽपीति (कं. १२.९)।

१ स्वरूपसत्तासम्बुद्धिवेद्यत्वात्–कं. १; कं. २। २ तत्रास्ति व्यवहारो–कं. १; कं. २। ३ गम्यतैव–जे. १; जे. ३। ४ सतः प्रमाणस्य–कं. १; कं. २। ५ किं सत्तयेति–कं. १; कं. २। ६ सतः–कं. १। ७ प्रतीकमिदं–कं. १, २ पुस्तकयोर्नास्ति–खं.।

## न्यायकन्दली

[24] अत्रोच्यते, प्रत्येकं पदार्थस्वरूपाणि भिन्नानि, कथं तेष्वेकाकारप्रतीतिः ? एकशब्दप्रवृत्तिश्च ? अनन्तेषु सम्बन्धग्रहणाभावात् । अथ तेष्वेकं निमित्तमस्ति ? सिद्धं नः समीहितम् । यथा दृष्टैकगोपिण्डस्य पिण्डान्तरे पूर्वरूपानुकारिणी बुद्धिरवैति, नैवं महीधरमुपलभ्य सर्षपमुपलभमानस्य पूर्वाकारावभासोऽस्तीति [1]कुतोऽत्र सामान्यकल्पनेति चेत् ? किं महीधरादिषु निखिलरूपानुगमो नास्ति ? उत मात्रयाऽपि न विद्यते ? यदि निखिलरूपानुगमाभावात्तेषु सामान्यप्रत्याख्यानम् ? तर्हि गोत्वमपि प्रत्याख्येयम्, तयोः शाबलेय[2]बाहुलेययोरपि सर्वथा साधर्म्याभावात् । अथ मात्रयाऽपि [3]स्वरूपानुगमो नास्ति ? तदसिद्धम्, सर्व्वेषामपि तेषामभावविलक्षणेन रूपेण तुल्यताप्रतिभासनात् । इयांस्तु विशेषः—गोपिण्डेषु झटिति तज्जातीयताबुद्धिः, भूयोऽवयवसामान्यानुगमात् । महीधरादिषु तु विलम्बिनी, स्तोकावयवसामान्यानुगमेन जातेरनुद्भूतत्वात्, यथा मणिकदर्शनाच्छरावे मृज्जातिबुद्धिः ।

[टि०] [24] अनन्तेषु [4]सङ्केताभावाद् इति—अक्षशब्दप्रवृत्तिवदत्राप्येकशब्दप्रवृत्तिसम्भवे अनन्तेषु सङ्केतकरणाशक्यत्वमेवोत्तरम् । गोत्वमपि प्रत्याख्येयम् इति—स हि गोत्वादिकमभ्युपगच्छति, सत्ताद्रव्यगुणत्वादिकं [5]तु नाभ्युपगच्छतीति ।

[पं०] ननु यदि सर्वेषामपि तेषामभवाद्विलक्षणेन रूपेण तुल्यत्वं प्रतिभासत इत्युच्यते तर्हि किमर्थं गवादौ सामान्यत्वं प्रतिभाति न पर्वतसर्षपादौ इत्याशंक्याह—इयांस्तु विशेष इत्यादि । जातेरिति = सामान्यस्य । मणिकदर्शनादिति = अलिञ्जरदर्शनात् । अर्थक्रियाकारित्वमपि सत्त्वमिति यदेवार्थक्रियाकारि तदेव परमार्थसदिति बौद्धपरिकल्पितम् । तस्य सत्त्वादिति = वस्तुनः सत्त्वात् । [6]अन्योन्याश्रयप्रसंगादिति—अर्थक्रियायां सत्यां सत्त्वम्, सत्त्वे एवार्थक्रिया,

[कु०] [24] अत्रोच्यते इति (कं. १२.११) इह तावद्द्रव्यादिषु सत्सदित्येकाकारप्रतीतिव्यपदेशश्च, सत्ताव्यतिरिक्तं तत्रैकं निमित्तं यदि नास्त्यस्ति वा ? नाद्य[त] इत्याह प्रत्येकमिति (कं. १२.१२) [7]न द्वितीय इत्याह अथ तेष्विति (कं. १२.१३) अत्र प्रयोगः(?) द्रव्यगुणधर्माक्रान्तानि एकाकारप्रतीतिविषयत्वात् शाबलेयबाहुलेयगोपिण्डवदिति । हेत्वसिद्धिमाशङ्कते यथेति (कं. १२.१४) । परिहरति किमिति (कं.१२.१६) । यदि सत्ताव्यतिरेकेण सत्सदित्येकाकारप्रतीतिव्यवहारो नेष्यते तर्हि कथं सामान्यादिषु ताविति चेत् सत्तैकार्थसमवायेनोपचाराद्भविष्यतः । एतेन सत्तासामान्यसमर्थनेन [त]स[द]त् सदिति सर्व्वथा साधर्म्यं शाबलेयादिष्वपि नास्ति । यथा कथंचित्साम्यात्तदित्यवमर्श इहाप्यस्तीत्यर्थः ।

---

१ कुतस्तत्र—जे. १; जे. ३ ।   २ बाहुलेययोः सर्वथा—कं. १; कं. २ ।   ३ सरूपानुगमो—जे. १; जे. ३ ।
४ सम्बन्धग्रहणाभावात्—मु. जे. नं. १, ३;   ५ तु अत्र पुस्तकयोर्नास्ति ।   ६ पाठोऽयं कं. पुस्तके नास्ति ।
७ न द्वितीय इत्याह प्रत्येकमिति न पुनरावृत्तम् ।

न्यायकन्दली

एतेनार्थक्रियाकारित्वमपि सत्त्वं प्रत्युक्तम्, असतोऽर्थक्रियाया अभावात्, अर्थक्रियायाञ्च सत्यां तस्य [1]सत्त्वात्, अर्थक्रियायाश्चार्थक्रियापेक्षया सत्त्वेनानवस्थाने सर्वस्यासत्त्वप्रसङ्गाच्च ।

द्रव्यत्वाद्यपरम्, द्रव्यत्वं गुणत्वं कर्म्मत्वञ्चापरम्, सत्तापेक्षया [2]ऽल्पविषयत्वादित्यर्थः । तथा द्रव्यत्वाद्यपेक्षया पृथिवीत्वादिकमपरम्, तदपेक्षया घटत्वादिकम[3]परम्, गुणत्वाद्यपेक्षया रूपत्वादिकम[4]परम्, तदपेक्षया नीलत्वादिकम्, कर्म्मत्वाद्यपेक्षया चोत्क्षेपणत्वादिकं व्याख्येयम् ।

[25] जलमुपलभ्य वह्निमुपलभमानस्य [5]तदित्यनुगमाभावाद् द्रव्यत्वं नास्तीति केचित् । [6]तदसारम्, द्वयो[7]रपि तयोः स्वप्राधान्येन प्रतीतिसम्भवात् । स्वप्राधान्य[8]प्रतीतिरेव च द्रव्यत्वप्रतीतिः । उत्क्षेपणादिष्वपि चलनात्मकताप्रतीतिरस्ति, सैव च कर्म्मत्वप्रतीतिः । रूपादिषु तु कृतसमयस्यानुवृत्तिप्रत्ययसम्भवाद् गुणत्वस्याप्रत्याख्यानम् । व्यक्तिग्रहणमिव समयग्रहणमपि तस्य प्रतीतिकारणम्, ब्राह्मणत्वस्येव योनिसम्बन्धज्ञानम् । [9]तत्रापि विशुद्धब्राह्मणसन्ततिजस्योत्पत्तिमात्रानुबद्धमपि ब्राह्मणत्वमिन्द्रियपातमात्रेण क्षत्रियादि-

[टि०] [25] द्वयोरपि इति–स्वप्राधान्यप्रतीतिः समवायिकारणत्वप्रतीतिः । रूपादिषु इति–[10]समयः सङ्केतो लक्षणादिः । आस्ताम् इति–प्रस्तुतं गुणत्वं, ततः प्रसङ्गागतं ब्राह्मणत्वं ततोऽनुप्रसक्तं स्त्रीस्वरूपादि ।

[पं०] असतोऽर्थक्रिया, अभावादित्येवमन्योन्याश्रयदोषः । अर्थक्रियायाश्चार्थक्रियापेक्षया सत्त्वेन नावस्थाने सर्वस्यासत्त्वप्रसंगाच्चेति–अर्थक्रिया सती, असती वा । असतीत्वे[त्व]किञ्चित्करी । सती चेत्तस्याऽप्यर्थक्रियया भाव्यमर्थक्रियाकारित्वस्यैव सत्त्वलक्षणत्वात् । तस्या अप्यर्थक्रियाकारित्वे तत्रापि सती असती वेत्याद्यावृत्ताऽनवस्था । ततश्च सर्वस्याप्यसत्त्वं स्यादित्यर्थः ।

[25] तदित्यवमर्शाभावादिति । जलमिदमित्यवमर्शाभावात् । द्वयोरपीति । तयोरिति–जलवह्न्योः स्वप्राधान्यप्रतीतिरेव [11]च द्रव्यत्वप्रतीतिरिति–द्रव्यं हि स्वप्रधानं गुणादयस्तु द्रव्यपरतन्त्रत्वान्न तथा ।

[कु०] [25] कृतसमयस्य–(कं. १३.३) व्युत्पादितलक्षणस्य । ननु प्रत्यक्षा[नु]वृत्तं सामान्यं प्रत्यक्षमेव समयश्चागमः, तत् कथं कृतसमयेन गृह्यमाणं प्रत्यक्षे रूपादौ गुणत्वं सामान्यं भविष्यतीत्यत आह व्यक्तिग्रहणमिवेति (कं. १३.४)। उपदेशसापेक्षेण चक्षुषा जातिप्रतीतौ दृष्टान्तमाह ब्राह्मणत्वस्येवेति (कं. १३.५) । ननु उत्पत्तिशुद्ध्यनवगमे

---

१ सत्त्वादन्योन्याश्रयप्रसङ्गात्–जे. १ । २ ऽल्पविषयत्वाद्–जे. १; जे ३ । ३, ४ अत्र द्वयोरपि स्थानयोः 'अपरम्'–इति जे. १; जे. २ पुस्तकयोर्नास्ति, तदपेक्षया नीलत्वादिकं–इति – कं. १, कं. २ पुस्तकयोर्नास्ति । ५ तदित्यवगमाभावात्–जे. १; जे. ३ । ६ तदसत्–जे. १; जे. ३ । ७ रप्यनयोः–जे. १; जे. ३ । ८ प्रतीतिरेव द्रव्यत्वप्रतीति–कं. १; कं. २ । ९ तथा हि–जे. १; जे. ३ । १० समयसङ्केतो–अ, ब; ११ 'च' इति–कं. पुस्तके नास्ति ।

न्यायकन्दली

विलक्षणतया न गृह्यते, अत्यन्तव्यक्तिसौ[1]सादृश्येन जातेरनुद्भूतत्वात् । यदा तु माता-पित्रोस्तत्पूर्वेषाञ्च वृद्धपरम्परया [2]विशुद्धब्राह्मणत्वमवसितम्, तदा ब्राह्मणोऽयमिति प्रत्यक्षेणैव प्रतीयते । यथा हि सुविदितरत्नपरीक्षाशास्त्रो रत्नजातिभेदं प्रत्यक्षतः प्रत्येति, नापरः । न च तावता रत्नजातिभेदो नास्ति, न च तत्प्रत्यक्षमप्रत्यक्षम् । [3]यच्चोक्तम्—स्त्रीणां स्वभावचपलानां विशुद्धिर्दु[4]रवबोधैवेति । तदसत्, अभियुक्तैः सुरक्षितानां सुकरस्तदवबोधः, कथितश्च तासां बहुविधो रक्षणोपाय [5]इत्यास्तां तावत्प्रसक्तानुप्रसङ्गः ।

[26] तच्च द्रव्यत्वादिकं स्वविषयस्य विजातीयेभ्यो [6]व्यावृत्तेरपि व्यवच्छेदस्यापि हेतुत्वाद्विशेषाख्यां विशेषसञ्ज्ञामपि लभते, न केवलमनुवृत्तिप्रत्ययहेतुत्वात् सामान्यसञ्ज्ञां लभते, व्यावृत्तेरपि हेतुत्वाद्वि[7]शेषसञ्ज्ञामपि लभत इत्यपिशब्दयोरर्थः । किमुक्तं स्यात् ?

[टि०] [ विशेषपदार्थपरिचयः । ]

[26] नित्यद्रव्यवृत्तय इति—उत्पत्तिविनाशयोरवसानस्थत्वाद् अन्तशब्देन नित्यद्रव्याण्युच्यन्ते, तेषु [8]भवा अन्त्याः । अस्यैव [9]व्याख्या नित्यद्रव्यवृत्तय इति । नित्यद्रव्येष्वेव इति—एकेनैवैवकारेण पञ्चपदार्थव्यवच्छेदः । ननु

[पं०] ननु द्रव्यत्वं चलनात्मता च स्फुटमुपलभ्येते, गुणेषु तु कथमनुवृत्तिप्रत्ययो घट इत्येव प्रतीतेरिति चोद्यमाम-माशंक्याह रूपादिषु त्वित्यादि । कृतसमयस्येति = कृतं संकेतस्य । तस्येति—गुणत्वसामान्यस्य संकेतमेव स्थापयति तथाहीत्यादिना । न तावता रत्नजातिभेदो नास्तीति—एवं यावताऽगृहीतसंकेतो व्यक्तिमात्रमेव गृह्णाति न तु शुक्लादिरूपभेदम्, तावता शुक्लादिरूपभेदो नास्ति, किन्त्वस्त्येवेत्यर्थः । न च तत्प्रत्यक्षमिति—यावता संकेताभावा-द्रत्नजातिभेदं नावगच्छति तावतैव न प्रत्यक्षम् । अप्रत्यक्षमित्यर्थः । कथितश्चेति चाणक्यादितन्त्रेषु । प्रसक्तानुप्रसंग इति—प्रसक्ते सामान्ये ब्राह्मणत्वस्यानुप्रसंगः । द्रव्यत्वादौ सामान्यविशेषे किं मुख्यं किं गौणमित्याह द्रव्यत्वादिषु सामान्यशब्दो मुख्य इत्यादिना । भाक्त इति भाक्तो भंग्या भवः । औपचारिक इत्यर्थः ।

[कु०] ब्राह्मणत्वं न प्रतीयत एव, तदवगमे तु प्रतीयमानं पावकत्ववदुपाधिरेवास्तीत्यत आह तथाहीति (कं. १३.९)। अत्र प्रयोगः- ब्राह्[ण]त्वं जातिर्बाधकविरहानुवृत्तिप्रत्ययविषयत्वात्, रत्नत्ववत्—पावकत्वं तु साङ्कर्यं न तथेति । एवं च जातिरङ्गीकर्तव्या । इतरथा प्रत्यक्षानुवृत्तिप्रत्ययविषयतयैव जातिस्वीकारे मनस्त्वादि जातयो न स्यात् [स्युः], तत्र लक्षणेनैवोपाधिनाऽनुवृत्तिप्रत्ययव्यवहारसिद्धेर्जात्यनङ्गीकारारे सास्नाद्युपाधिना गोत्वादेरपि विलयापत्तेरित्यभि-सन्धायाह [10]आस्तामयमिति (कं. १३.१३) ।

[26] परस्परविरोधिनोः समुच्चयानुपपत्तिमाशङ्क्य भक्त्या परिहरति किमुक्तं स्यादिति (कं. १३.१६) । कुतो विशेषशब्दस्य मुख्यार्थपरित्याग इति शङ्कामपनयते ।

---

१ सौसादृश्येनानुद्भूतत्वात् – कं. १; कं. २ । २ विशुद्धं – कं. १; विशुद्धिर्ब्राह्मणत्वं च – जे. १; जे. ३ । ३ यत्तूक्तम् – जे. १; जे. ३ । ४ दुरवबोधेति अभियुक्तैः – जे. १; जे. ३ । ५ आस्तामयं – जे. १; जे. ३ । ६ व्यावृत्तेरपि हेतुत्वाद् – कं. १; कं. २ । ७ विशेषाख्यामपि – जे. १; जे. ३ । ८ भावा – अ, ब; ९ व्याख्यानं – ड; १० आस्ताम – कं. १ ।

प्रशस्तपादभाष्यम्

**[26] नित्यद्रव्यवृत्तयो[1]ऽन्त्या विशेषाः। [2]ते खल्वत्यन्त[3]व्यावृत्तिहेतुत्वाद्विशेषा एव।**

न्यायकन्दली

**द्रव्यत्वादिषु सामान्यशब्दो मुख्यः, अनुवृत्तिहेतुत्वस्य सामान्यलक्षणस्य सम्भवात्, विशेषशब्दश्च भाक्तः, स्वाश्रयो विशिष्यते [4]सर्वतोऽत्यन्तं व्यवच्छिद्यते येन स विशेष इति [5]लक्षणस्यात्राभावात्। इदन्तु लक्षणमन्त्यविशेषेष्व[6]स्ति।**

***नित्यद्रव्यवृत्तयोऽन्त्या विशेषा इति। नित्यद्रव्येष्वेव वर्त्तन्त एव ये ते विशेषा इति।*** **नित्यद्रव्येष्वेति द्रव्यगुणकर्मसामान्यानां व्यवच्छेदः। द्रव्यगुणकर्म्माणि द्रव्येष्वेव वर्त्तन्ते, न नित्येष्वेवेति। सामान्यानि तु न द्रव्येष्वेव। न नित्येष्वेव वर्त्तन्त एवेति बुद्धि-**

[टि॰] द्रव्यगुणकर्मसामान्यानां व्यवच्छेदः किं पदार्थापेक्षया? किं वाऽवान्तरभेदापेक्षया? यद्याद्यस्तर्हि वर्तन्त एव इत्यत्र एवकारेण किमर्थं पुनर्बुद्धिशब्दादीनां व्यवच्छेदः? यदि द्वितीयस्तर्हि अवान्तरसामान्यानामात्मत्वमनस्त्वादीनां द्रव्या[7]वान्तरभेदानां द्व्यणुकादीनाञ्च व्यवच्छेदार्थं पृथक् प्रयत्नान्तरमास्थेयम्। अथ वर्तन्त एव इति एवकारेण सर्वनित्यद्रव्यवृत्तित्वमुच्यते, तेन सामान्यादीनामपि आदिशब्देन व्यवच्छेदः, तेषामप्या[8]त्मस्वेव वर्तित्वादिति समाधीयते तर्हि विशेषाणामपि नित्यनवद्रव्यावश्यवृत्तित्वं प्रत्येकभेदापेक्षया? किं वा विशेषरूपपदार्थापेक्षया? नाद्यः, असम्भवात्,

[पं॰] [26] **नित्यद्रव्यवृत्तय इति** नित्यान्येव च तानि द्रव्याणि दिक्कालाकाशादीनि। तेषु वृत्तिर्वर्तनं येषां ते तथा। [9][**नित्यद्रव्येष्वेति** अनित्यद्रव्यवृत्तिजातीया ये न भवन्ति। तेन जलादिपरमाणुगतरूपादि[षु] न व्यभिचारः। **द्रव्यगुणकर्माणि हि द्रव्येष्वेव वर्तन्त इति**] द्रव्यं द्विधा-अद्रव्यम्। १। अनेकद्रव्यम् च। २। तत्र न विद्यते द्रव्यमन्यतया जनकतया च यस्य तदद्रव्यम्। द्रव्यमाकाशकालदिगात्ममनःपरमाणुलक्षणम्। अनेकद्रव्यजन्यतया जनकतया यस्य तदनेकद्रव्यम्। २। द्रव्ये द्व्यणुकत्र्यणुकचतुरणुकादि। तत्रेह द्रव्यशब्देऽनेकद्रव्यं गृहीतव्यम्। न अद्रव्यम्।

[कु॰] ? (वा)आगामिभाव्यगतान्त्यशब्दसूचितं विशेलक्षणमाह **स्वाश्रय इति** (कं. १३.१७)। ननु नित्यद्रव्यवृत्तयोऽन्त्यविशेष **इति** समस्तं वाक्यं लक्षणं तत्कुतो न विरोधोऽत आह **इदन्त्विति** (कं. १३.१९)। 'तु'रवधारणे, इदमेव लक्षणं परिशिष्टं तु प्रमाणसूचकमित्यर्थः। प्रमाणं चेदं समानजातीयानि तुल्यगुणकर्माणि समानकालवर्त्तीनि समानकार्याणि नित्यानि द्रव्याणि व्यावर्त्तकधर्मवन्ति, व्यावृत्तत्वात्पटादिवदिति। तदेतद्भाष्यमुपादाय **व्याचष्टे नित्येति** (कं. १३.२२)। अत्र बहुवचनेन सिद्धसाधनतां परिहरति **नित्यद्रव्येष्वेवेति** (कं. १३.२३)। द्रव्यगुणकर्मसामान्यानां व्यवच्छेद इति कथमित्यत आह **द्रव्यगुणेति** (कं. १३.२३)। व्यवच्छेदकतयेति शेषः। **अयमर्थः** द्रव्यगुणकर्माणि गुणादिभ्यस्तावद्द्रव्याणि व्यवच्छिन्देति[न्दन्ति] न तु द्रव्याण्यपि परस्परम्। ननु तान्यपि व्यवच्छिन्दन्त्येव

---

१ ह्यन्त्या – कि. पा. ५ पु.। २ ते च खलु – कि.; व्यो.; पा. ५.६। ३ व्यावृत्तिबुद्धिहेतु° – पा.२; ५.६. व्यो., कि.। ४ सर्वतो व्यवच्छिद्यते – कं. १; कं. २। ५ लक्षणस्याऽत्रापि भावात् – कं. १। ६ अस्तीति – जे. १; जे. ३। ७ वान्तरसामान्यानामात्मभेदानां – ब। ८ त्यस्येव – अ, ब, क; ९ [ ] एतच्चिह्नान्तर्गतः पाठः अ पुस्तके नास्ति।

[27] प्रशस्तपादभाष्यम्

अयुतसिद्धानामाधार्य्याधारभूतानां [1]यः सम्बन्ध इहप्रत्ययहेतुः स समवायः ।

न्यायकन्दली

शब्दादीनां व्यवच्छेदः, तेषां समस्तनित्यद्रव्यप्राप्त्यभावात् । ननु किं [2]विशेषा विशेषा एव किं वा द्रव्यत्वादिवदुभयरूपा ? इति । तत्राह--ते खल्विति । खलुशब्दो निश्चये, नित्यद्रव्यवृत्तयो ये विशेषास्ते विशेषा एव निश्चिता, न तु सामान्यान्यपि भवन्तीत्यर्थः । अत्यन्तं सर्वदा, व्यावृत्तेरेव स्वाश्रयस्येतरस्माद्व्यवच्छेदस्यैव, हेतुत्वात् कारणत्वादिति । यथा चेदं तथोपरिष्टादुपपादनीयम् ।

[27] [3]समवायस्य स्वरूपं निरूपयति–अयुतसिद्धानामिति । युतसिद्धिः पृथक्सिद्धिः,

[टि०] [4]द्वितीये तु नित्यद्रव्येष्वेवेत्यनेनैव गुणसामान्यरूपपदार्थव्यवच्छेदे तदेकदेशानां बुद्धिशब्दादीनां व्यवच्छिन्नत्वात्तद्व्यवच्छेदाय वर्तन्त एवेति न कार्यम् । उच्यते, नेदं विशेषाणां लक्षणाभिधानं किन्तु [5]स्वरूपकथनमेव । लक्षणन्तु अत्यन्तव्यावृत्त[6]बुद्धिहेतुर्विशेष इति वक्ष्यते ।

[ समवायपदार्थपरिचयः । ]

[27] पटस्य तन्तुष्वेव इति–तन्तुपटयोर्हि [7]पृथगाश्रयाश्रयित्वमस्ति तन्तूनां स्वावयवसमवेतत्वात् [8][*पटस्य

[पं०] असंभवात् । असंभव अद्रव्यवृत्तित्वस्याधिकृतत्वात् । द्रव्यवृत्तित्वस्य चाद्रव्यद्रव्येऽभावात् । गुणास्तु नित्येष्वनित्येषु ये वर्तन्ते ते इह ग्राह्याः । न तु ये नित्येष्वेव । तेषामुत्तरत्र व्यवच्छेदत्वादिति परमार्थः । बुद्धिशब्दादीनामिति–आदिशब्दात्परिमाणपारिमंडल्यादिव्यवच्छेदः । तेषां समस्तनित्यद्रव्यव्याप्त्यभावादिति–बुद्धिशब्दादीनां क्षणिकत्वादाकाशादिष्ववृत्तेषु सर्वेष्विति भावः । उभयरूपा इति – सामान्यविशेषरूपाः । उपरिष्टादुपपादनीयमिति–विशेषपदार्थे ।

[27] युतसिद्धिः पृथक्सिद्धिरिति अत्र युक् अमिश्रणे इति धातुः । यथा द्वौ भ्रातरौ युतौ जातौ पृथक्-

[कु०] गन्धादयः पृथिव्यादीनीत्यत आह न नित्येष्वेवेति (कं. १३.२४)। तुल्यकर्मस्वेकद्रव्यारम्भकेषु एकक्षणवर्तिष्विति शेषः। तत्र तावन्नित्येषु द्रव्येषु कारणाभावादेव कारणद्रव्यं न व्यवच्छेदकं, तुल्यगुणकर्मतया न गुणकर्माणि, द्रव्यारम्भकतया च न कार्यद्रव्यम्, एकक्षणवर्तितया च न कालोपाधिरित्यर्थः । सामान्यान्यपि नित्यानित्यसाधारणतया नित्येष्वेव व्यवच्छेदकतया न वर्तन्त इत्याह सामान्यानीति (कं. १३.२४) आत्मत्वमनस्त्वे यद्यपि नित्येष्वेव वर्तेते तथाप्यनेकव्यक्तिसाधारणतया न ताभ्यां सिद्धसाधनतेत्यभिप्रायः । असाधारणैः शब्दबुद्ध्यादिभिः सिद्धसाधनतां परिहरति वर्तन्त एवेति (कं. १४.१) तेषामनित्यत्वात् तदभावेऽपि तदाश्रयाणां व्यावृत्ततया न तद्व्यतिरिक्तव्यावर्तकधर्मसिद्धिरित्यर्थः। तदेतदाह तेषामिति (कं. १४.१) । समस्तग्रहणं सर्वकालाभिप्रायं सर्वकालं नित्यद्रव्यवृत्त्यभावादित्यर्थः। उपरिष्टाद् विशेषवैधर्म्यप्रकरणे ।

[27] समवाय-स्वरूपं निरूपयतीति (कं. १४.९)। भेदाभावेन विभागस्याकर्तव्यादिति भावः । पृथगवस्थितिः

---

१ इहप्रत्ययहेतुर्यः सम्बन्धः–दे । २ विशेषा एव–कं. १; कं. २ । ३ समवायस्वरूपं–कं. १; कं. २ ।
४ द्वितीये नित्य इत्यनेनैव–अ; द्वितीये तु नित्यद्रव्ये येत्वनेनैव–ब; ५ मुरूप–अ, ब; ६ बुद्ध–अ, ब;
७ पृथगाश्रयित्वा–अ; ८ [ ] एतच्चिह्नान्तर्गतः पाठः–अ-पुस्तके; *...* एतच्चिह्नान्तर्गतस्तथा ब पुस्तके नास्ति ।

## न्यायकन्दली

**पृथगवस्थितिरुभयोरपि सम्बन्धिनोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वम् सा ययोर्नास्ति तावयुतसिद्धौ, तयोः सम्बन्धः समवायः। यथा तन्तुपटयोः।**

**यद्यपि तन्तवः [1]पटव्यतिरिक्ताः पटे न समवयन्ति, तथाप्युभयोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वं नास्ति, पटस्य तन्तुष्वेवाश्रयित्वात्। यत्र तु द्वयोरपि सम्बन्धिनोः परस्परपरिहारेण व्यतिरिक्ताश्रयाश्रयित्वम्, तत्र युतसिद्धिः, यथा त्वगिन्द्रियशरीरयोः। शरीरं हि त्वगिन्द्रियपरिहारेण पृथगाश्रये स्वावयवे [2]समाश्रितम्, त्वगिन्द्रियं च शरीर-परिहारेण पृथगाश्रये स्वावयवे समाश्रितम्, तेनानयोः संयोगो न समवायः। नित्यानान्तु**

[**टि०**] तु तन्तुसमवेतत्वात्* परं परस्परपरिहारो नास्ति पटस्य तन्तुष्वेव समवेतत्वात्।] **नित्यानां तु** इति–[3]यदि तु [4]पृथग्गतिमत्त्वमेव नित्या[नित्य]साधारणा युतसिद्धिः स्यात् तदा त्वगिन्द्रियशरीरयोरपि [5]पृथग्गतिमत्त्वाभावादयुत-सिद्धिः स्यात्। नन्वेकस्य [6]पृथग्गतिमत्त्वम्? द्वयोर्वा? नाद्यः, परमाणुद्रव्यस्य [7]पृथग्गतिमतो [8][युतसिद्ध्यभावात् संयोगाभावप्रसङ्गः] युतसिद्धेः संयोगव्यापकत्वात्, न द्वितीयः, परमाण्वाकाशयो[9]र्द्वयोर्गतित्वाभावात्, युतसिद्ध्य[10]भावात् संयोगाभावप्रसङ्गः, नैवम्, अत्र विकल्पद्वयस्याविवक्षाप्रतिक्षिप्तत्वात्। ननु नित्ययुतसिद्ध्या नानित्या सम्बन्धिनो व्याप्य[11]न्ते, अनित्ययुतसिद्ध्या तु न नित्या इति लक्षणद्वय[12]स्याप्यव्यापकत्वम्। युतसिद्धिशब्दवाच्यत्वं तु [13]न लक्षणम्। साधारणनिमित्तमन्तरेण तद्वाच्यत्वस्यै[14]वानुपपत्तेः। तस्मादप्राप्तयोर्विद्यमानता युतसिद्धिरिति व्यापकं लक्षणं

[**पं०**]भूतावित्यर्थः। [15]**तन्तवः पटव्यतिरिक्ता न समवयन्तीति**–पटे व्यतिरिक्ताः केवलाः सन्तः पटेऽसत्त्वान्न समवयन्ति, किन्तु स्वाश्रये स्वावयवे अंशुप्रचयविशेषरूपे समवयन्तीत्यर्थः। **पटस्य तन्तुष्वेवाश्रयित्वादिति**–तन्तवो न पटाश्रिता एव, केवलानामपि दर्शनात्। पटस्तु तन्तुष्वेवाश्रितः। अत एवेह पटे तन्तव इति व्यवहारो न प्रवर्तते किन्तु तन्तुषु पट इति। **त्वगिन्द्रियपरिहारेणेति** वायवीयत्वेन त्वगिन्द्रियस्य विजातीयत्वात्तस्य च पार्थिवशरीरानारम्भकत्वात्।

[**कु०**] विविक्तयोः सम्बन्धयोर्विद्यमानत्वम्। तदेवं नित्यानित्यसाधारण्येन युतसिद्धिव्याख्यया नित्यानां विभज्य व्याचष्टे **उभयोरिति** (कं. १४.१०)। अनित्यानामेव समवायमुदाहरति **सा ययोरिति** (कं. १४.११)। **जितमुद्धि** (युतसिद्धि) भेदाश्रयणस्य फलमाह [16]**यत्रद्वयोरिति** (कं. १४.१३)। (पृथग) ? पृथिव्यातिविरहिणोरिति शेषः। **पृथग्गमनयोग्यतेति** (कं. १४.१७) आरब्धद्व्यणुकयोः परमाणो:[ण्वोः] संयोगः समवायो मा भूदिति योग्यताग्रहणम्। **यथा आकाशद्रव्यत्वयोरिति** (कं. १४.१८) उपलक्षणमेतत् यत्रान्यतरदनित्यं गतिमद्वा तत्रापीयमेवायुतसिद्धिस्तयोरपि सम्बन्धः समवाय एव, यथा घटघटत्वयोः परमाणुपृथिवीत्वयोर्वा। **अयुतसिद्धि[17]पदेनैवं निवर्तितत्वादिति** (कं. १४.२१) गगनपतत्रिणोः पृथग्गतिमत्त्वलक्षणा युतसिद्धेः सत्त्वात्। पृथग्गतिमत्त्वं हि सम्बन्धिनोः परस्परं विभागहेतुगतिमत्त्वम्, उभयोरन्यतरस्य वा विवक्षितं, तत्पतत्रिणि वृक्षमूलादग्रमारोहति पुरुष इव गगनदेशाद्देशान्तरं गच्छति विद्यत एवेति।

---

१ पटव्यतिरिक्ताश्रये समवयन्ति–कं. १; कं. ३; जे. ३। २ 'त्वगिन्द्रियं चेत्यारभ्य समाश्रितम्'–इत्यन्तः पाठः कं. १; कं. २ पुस्तकयोर्नास्ति। ३ ये हि–अ, ब; ४, ५, ६, ७ पृथग्भवतिमत्व–अ, ब; ८ [ ] एतच्चिह्नान्तर्गतः पाठः ब-पुस्तके नास्ति। ९ द्वयोः इति ड पुस्तके नास्ति। १० भावा–अ; भाव–ड; ११ व्याप्यते–अ, ब, क; १२ स्याव्यापकत्वम्–अ, ब; १३ 'न' अ, ब पुस्तकयोर्नास्ति। १४ वानुपपद्यमानत्वात्–ड; १५ व्यतिरिक्ताश्रये समवयन्ति–कं.। १६ यत्र तु–कं.। १७ °पदेनैव तस्य।

### न्यायकन्दली

**युतसिद्धिः पृथगाश्रयस्थितिः, पृथग्गमनयोग्यता, सा ययोर्नास्ति तावयुतसिद्धौ, तयोर्यः सम्बन्धः स समवायः, यथाकाशद्रव्यत्वयोरिति। अयुतसिद्धयोः सम्बन्ध इत्युच्यमाने धर्म्मस्य सुखस्य च यः कार्य्यकारणभावलक्षणः सम्बन्धः, सोऽपि समवायः प्राप्नोति, तयोरात्मैकाश्रितयोर्युतसिद्ध्यभावात्। तदर्थमाधार्य्याधारभूतानामिति पदम्, न त्वाकाशशकुनिसम्बन्धनिवृत्त्यर्थम्, अयुतसिद्ध[1]पदेनैव तस्य निवर्त्तितत्वात्। एवमप्याकाशस्याकाशपदस्य च वाच्यवाचकभावः समवायः स्यात्, तन्निवृत्त्यर्थमिहप्रत्ययहेतुरिति।**

[**टि०**] द्रष्टव्यम्। ननु सामान्यं विशेषाक्रान्तमेव दृष्टं यथा वृक्षत्वं शिंश[2]पाद्याक्रान्तम् न पुनस्तद्रहितम्, तदत्रामूर्तेष्वाकाशकालादिषु विशेषयुतसिद्धिलक्षणं पृथगाश्रयाश्रयित्वम् [3]पृथग्गतिमत्त्वं च नास्तीति कथं सामान्यलक्षणस्यापि सम्भवः? अथ विशेष[4]लक्षणानाक्रान्तमपीदं दृष्टं तर्हि युतसिद्ध्या व्याप्तः संयोगः कालाकाशादिभ्यो युतसिद्धिनिवृत्तौ [नि]वर्तेत इति न वाच्यम्। नैवम्, विशेषयुतसिद्ध्यभिप्रायेणाकाशादिभ्यो युतसिद्धि[5]निवृत्तौ संयोगनिवृत्तिरुक्ता न पुनः सामान्ययुतसिद्ध्यभिप्रायेण इति। ननु तथापि [6]परमाण्वाकाशयोः सर्वदा प्राप्तयोरेव विद्यमानत्वात् युतसिद्ध्यभावप्रसङ्गः तदभावे च संयोगाभावप्रसङ्गः। सत्यम् कल्पितप्रदेशापेक्षया विद्यमानयोरप्राप्तिरस्त्येवेति। [7][एवमप्याकाशस्य] इतिः—आकाश इत्येवंरूपस्य शब्दस्याकाशसमवेतत्वेन पदार्थस्य चायुतसिद्धत्वादाधार्याधार[8]भूतत्वाच्च वाच्यवाचकभावसम्बन्धोऽपि समवायः प्राप्नोति, स 'इह' इत्यादिना व्यवच्छिद्यते यस्तु 'इहाकाशे शब्द' इति प्रत्ययः समवाय[9]हेतुको न तु वाच्यवाचकसम्बन्धहे[10]तुक इति दर्शयति **वाच्यवाचक[11]भावे हि** इति।

[**पं०**] **स्वावयवेति** पार्थिवे। इदं च जातीयैकवचनं स्वावयवेष्वित्यर्थः। स्वावयवेषु वायवीयपरमाणुष्वित्यर्थः। घ्राणेन्द्रियं पार्थिवम्। रसनेन्द्रियमाप्यम्। चक्षुरिन्द्रियं तैजसम्। त्वगिन्द्रियं वायवीयम्। श्रवणेन्द्रियं नभ इत्येतत्पुरो वक्ष्यते। **पृथग्गमनयोग्यतेति** द्वयोः पृथग्गमनमन्यतरस्य वा। द्वयोर्यथा परमाण्वोः, अन्यतरस्य यथाऽऽकाशापेक्षयाऽपरमाणोः। आकाशं हि पृथङ्न गच्छति। व्यापकत्वान्निष्क्रियत्वाच्च। परमाणुस्तु विवक्षिताकाशादितस्ततो गच्छतीति तत्त्वम्।

[**कु०**] ननु मुख्यधर्म्मयोः कार्यकारणभावस्य शब्दार्थयोर्वाच्यवाचकभावस्य च व्यावृत्तिरूपसम्बन्धितया प्राप्तिरूपसम्बन्धत्वाभावादयुतसिद्धेरनेन प्राप्तेरित्यभिधानाप्रसक्तेरुपरितनपदद्वयं व्यर्थमिति चेत्, मैवम्, इह हि समवायस्वरूपप्रदर्शनपरम् एव भाष्ये पदानां प्रयोजनमात्रमभिहितं, परमार्थतो लक्षणमयुतसिद्धानामित्यनेन सूचितं नित्यः सम्बन्धः समवाय इति। तथा हि अयुताः प्राप्ता एव ये सिद्धाः तत्सम्बन्धः समवाय इत्युक्तः प्राप्तः पूर्वसम्बन्धिनोरसतोरकारणत्वादकार्यायाः प्राप्तेर्नित्यत्वं प्रतीयते इति केचित्। वयं तु ब्रूमः यद्यपि सम्बन्धिपदे उपसर्जनतया प्राप्तिः प्रतीयते तथापि तस्या एव लक्षणत्वकल्पनायां श्रुतार्थपरित्यागो दोषः स्यादिति यथाश्रुतमेव साध्विति। नित्यः सम्बन्धः समवाय इति वादिनां त्वेकार्थसमवायिनोरपि परस्परं समवायः स्यात्, तच्चानुपपन्न इत्यप्रत्ययाभावात्।

---

१ °पदेनैव व्यावर्तितत्वात्—जे. १; जे. ३। २ पाद्याक्रान्तं—अ, पात्वाद्याक्रान्तं—ड; ३ पृथग्भवतिमत्त्वम्—अ, ब; ४ लक्षणाक्रान्त—अ; ५ निमित्ता—अ, ब; ६ परमाण्वाकाशयोरेव विद्यमानत्वात्—अ, ब; परमाण्वाकाशयोः प्राप्तयोरेव विद्यमानत्वात्—क। ७ [ ] एतच्चिह्नान्तर्गतः पाठः अब पुस्तकयोर्नास्ति। ८ भूतत्वात्व—अ, भूतत्वान्न—ब। ९ हेतुवाचवाचक—अ; १० हैक—अ; ११ भावो—अ, ब, क;

### न्यायकन्दली

वाच्यवाचकभावे हि तस्माच्छब्दात्तदर्थो ज्ञायते न त्विहेदमिति । आधार्य्याधारभूताना-मिहप्रत्ययहेतुरिति कुण्डबदरसम्बन्धो न व्यवच्छिद्यते, तदर्थमयुतसिद्धानामिति ।

[28] अत्र केचिदयुत[1]सिद्धपदं विकल्पयन्ति—किं युतौ न सिद्धौ? आहोस्विदयुतौ सिद्धौ? यदि युतौ न सिद्धौ, कस्तयोः सम्बन्धः, धर्म्मिणोरभावात् । अथायुतौ सिद्धौ, तथापि कः सम्बन्धोऽपृथक्[2]सिद्धत्वादेव । भिन्नयोर्हि सम्बन्धो यथा कुण्डबदरयोरिति ।

तदपरे न मृष्यन्ति । नह्यस्यायमर्थो युतौ न सिद्धौ न निष्पन्नाविति, असतोः समवायानभ्युपगमात् । [3]नाप्यस्यायमर्थः—[4]अयुतौ सिद्धावेकात्मकौ सिद्धाविति, एकात्मकत्वे ह्येकमेव वस्तु स्यान्नोभयम्, परस्परात्मकत्वाभावलक्षणत्वादुभयरूपतायाः । न च तदेकं

[हि०] [28] तस्मान्न स्वरूपाभेदोऽपि इतिः—न केवलं स्वरूपासिद्धिः [5]स्वरूपाभेदोऽपीति । [6]अयस्पिण्डः इति कस्कादिः ।

[पं०] [7]तत्पदस्येति । आकाश इति—शब्दस्य । तस्माच्छब्दादिति—आकाशलक्षणात् । तदर्थ इति—आकाशरूपः ।

[28] किं युतौ न सिद्धाविति प्रसज्योऽयं नञ ।

द्वौ हि नञौ समाख्यातौ पर्युदासप्रसज्यकौ ।
पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् ॥

आहो स्विदयुतसिद्धाविति पर्युदासप्रतिषेधोऽयम् । अपृथग्भूतौ संतौ जातौ—इत्यर्थः । तदपरे न मृष्यन्तीति अपरे वैशेषिकाः । परस्परात्मकत्वाभावलक्षणत्वादिति—घटपटवत् । अथ यद्येकात्मकत्वे एकमेव वस्तु स्यादस्तु तर्हि ।

[कु०] [28] न हि भवति रूपे रस इति समवायमसहमानांस्तादात्म्यवादिन उत्थापयन्ति अत्र केचिदिति (कं. १४.२५) । [8]कस्तयोः सम्बन्ध इति (कं. १५.१) यः समवायः स्यादिति शेषः । [9]नह्यस्यायमिति (कं. १५.३) प्रथमपक्षानङ्गीकारपरहित इत्यर्थः । [10]नाप्ययमिति (कं. १५.४) द्वितीयोऽङ्गीक्रियते । तथापि न तत्तादात्म्यमित्यभिप्रायः । एकमेव वस्तु स्यादिति (कं. १५.४) तथा च द्विवचनानुपपत्तिरित्यर्थः ।

ननु परस्परात्मकत्वाभावविरहोऽपि भेदो व्यवह्रियते यथा वृक्षाणां वनमितीत्याशङ्कयाह न च तदेकमिति (कं. १५.५) । परस्परविलक्षणेनेति (कं. १६.६) 'इह तन्तुषु पटः' इह गोषु गोत्वमित्येवमयुतसिद्धयोरवयवा-वयविनोर्जातिजातिमतोः परस्परविरुद्धसङ्ख्यादिधर्मवत्तया प्रतिभासनादेकत्वमयुक्तं, वृक्षाणां वनमित्यत्रापि अनियत-निर्देशानां वृक्षाणां बहुत्वसङ्ख्यैव वनमिति दृष्टमिति दृष्टान्तोऽपि न युक्त इत्यर्थः । अत्र प्रयोगः विप्रतिपन्नं भेदवत् विरुद्धधर्माध्यस्तत्वात् प्रतिपन्नवदिति । तदेतदाह विलक्षणेऽति[पि] भेदविलक्षणत्वाद् भेदप्रमाणत्वादित्यर्थः ।

---

१ °सिद्धि—कं. १; कं. २ । २ °भूतत्वादेव—जे. १; जे. ३ । ३ नाप्ययमर्थः—जे. १; जे. ३ । ४ अयुतौ सिद्धाविति—कं. १; कं. २ । ५ स्वरूपाभावोऽपीति—अ, ब; ६ अयःपिण्ड—मु. । ७ आकाशपदस्य—कं. । ८ कः सम्बन्धः—कं. । ९ नह्ययमस्य—कं. । १० नाप्यस्यायम—कं. ।

प्रशस्तपादभाष्यम्

[29] **एवं धर्म्मैर्विना धर्म्मिणामुद्देशः कृतः ।**

न्यायकन्दली

**वस्तु परमार्थतः, परस्परविलक्षणेन रूपेण तयोराकारयोः प्रतिभासनात् । विलक्षणाकार-बुद्धिवेद्यत्वस्यैव भेदलक्षणत्वात्, अन्यथा भेदाभेदव्यवस्था[1]नुपपत्तेः । तस्मान्न स्वरूपाभेदोऽप्ययुतसिद्धिः, किन्तु अयुतसिद्धानामिति परस्परपरिहारेण पृथगाश्रयानाश्रितानामित्यर्थः । तथा च सति सम्बन्धो नानुपपन्नः, स्वरूपभेदस्य सम्भवात्, भिन्नयोश्च परस्परो[2]पश्लेषस्य दहनायःपिण्डयोरिव विना सम्बन्धेनासम्भवात् । इयांस्तु विशेषः—वह्नि[3]रुत्पत्तेः पश्चादयःपिण्डेन सह सम्बद्धयते, इह तु स्वकारणसामर्थ्यादुपजायमानमेव तत्र सम्बद्धयते, यथा छिदिक्रिया छेद्येनेत्यलम् ।**

[29] **ननु किमर्थं षडेव पदार्था उद्दिष्टा नापरे? [4]तेषामेव भावात्, तदन्येषामभावाच्च ।**

[टि०] [29] [ अभावचर्चा ]

तदभावश्च सर्वैः इति—आश्रयासिद्धिभयादनेन प्रमाणं सूचितम्—'द्रव्यगुणादिपदार्थषट्कातिरिक्तो भावरूपः पदार्थोऽस्तीति वाक्यमनर्थकम्, प्रमाणानुपलभ्यमानार्थत्वात्, शशविषाणमस्तीति वाक्यवत् ।' ननु दृष्टान्ते किं शशो निषिध्यते? विषाणं वा? तयोः संयोगो वा? नाद्यद्वयम्, [5]स्वस्वस्थाने तयोर्विद्यमानत्वात् । नान्त्यः गवादि-

[पं०] तत्राह **न च तदेकं वस्तु परमार्थत**=इत्यादि—अत्र च तदिति तन्तुपटस्वरूपम् । ननु दहनायस्पिण्डयोरयुतसिद्धत्वाभावात्कथं दृष्टान्तत्वम् येन दहनायस्पिण्डयोरिवेत्युच्यते,—इत्याशंक्याह—**इयांस्तु विशेष इत्यादि । उपजायमानमेवेति**—पटादि । **तत्रेति**=तन्त्वादौ ।

[29] ननु **किमर्थं षडेव पदार्था उद्दिष्टा नापरे** इति प्रश्नः । **तेषामाभावादि**त्युत्तरम् । **सर्वैरिति**—प्रमातृभिः । **विधिप्रत्ययविषयत्वमिति**—अस्तीतिप्रत्ययगोचरत्वम् । [6]**व्यावृत्तं लक्षणमिति** असाधारणं लक्षणं वक्ष्यते इति [7]शेषः ।

[कु०] **पृथगाश्रयानाश्रितानामिति** (कं. १५.९) पृथग्गतिविरहिणां चेति शेषः । परस्परोपसंश्लेषस्य परस्परोपश्लिष्टावयवादिसामान्यमेव । वैशिष्ट्यं विशिष्टबुद्धिविषयतावस्तुस्वरूपं वा व्यावृत्तिर्वा । ततोऽधिकानां बुद्धयनारोहात्किमर्थं नोद्दिष्टा इति शङ्काया अभावा[द]नुत्तरमवचनीयमेवतया 'इहेदमिति प्रत्ययस्य सम्बन्धमन्तरेणानुपपत्तेरिति न प्रमाणं दर्शितम् । प्रयोगस्तु तन्तुपटाः सम्बद्धाः इह प्रत्ययविषयत्वात् । [8]**दहनादयःपिण्डवदिति** (कं. १५.१०) **न** च संयोगेन सिद्धसाधनमित्याह **इयांस्त्विति** (कं. १५.११) । न तन्तुपटयोर्दहनायःपिण्डवदप्राप्तिपूर्व्विका प्राप्तिरित्यर्थः ।

[29] **नन्विति** (कं. १५.१३) अयमाशयः शक्तिसादृश्यादयोऽपरेऽपि प्रतीयन्ते तावत् । यथासम्भवहेयोपादेयभावेन त[ज्]ज्ञानमपि निःश्रेयसोपयोग्येव । ततश्च तदनुद्देशा[न्]न्यूनत्वमुद्देशस्येति । उत्तरं [9]**तेषामभावादिति**

१ °नुपपत्तिः—जे. १; जे. ३ । २ °पसंश्लेषस्य—जे. १; जे. ३ । ३ °रुत्पद्य—जे. १; जे. ३ । ४ तेषामसम्भवात्—जे. १; जे. ३ । ५ सुस्वस्थानतमो—अ, स्वस्वस्थानतमो—ब; ६ व्यावृत्तं तु—कं. । ७ विशेषः—ब. । ८ दहनायःपिण्डयोरिव—कं. । ९ तेषामेव भावात्—कं. ।

## न्यायकन्दली

**तदभावश्च सर्व्वैः प्रमाणैरनुपलभ्यमानत्वाच्छशविषाणवत् । षण्णां सामान्यलक्षणं विधिप्रत्ययविषयत्वम् । [1]व्यावृत्तन्तु लक्षणम्–यथा गुणाश्रयो द्रव्यम् । सामान्यवानगुणः संयोगविभागयोरनपेक्षो न कारणं गुणः । एकद्रव्यमगुणं संयोगविभागयोरनपेक्षकारणं कर्म्म । [2]अनुवृत्तिप्रत्ययकारणं सामान्यम् । अत्यन्तव्यावृत्तिबुद्धिहेतुर्विशेषः । अयुतसिद्धयोराश्रयाश्रयिभावः समवाय इति ।**

**[टि०]** विषाणेनान्यतः समानीतेन संसर्गसम्भवात् । नापि [3]शशशिरःसम्भूतविषाणसंयोगो निषिध्यते अप्रती[4]तस्यानिषेध्यत्वात् । तस्मात्साध्यविकल्पो दृष्टान्तः । सत्यम्, अन्यत्र पशुमस्तक[5]विषाणयोर्जन्यजनकभावः प्रतीतोऽत्र निषिध्यते, ततश्च प्रतिपन्नस्यैवारोप्य निषेधः पक्षधर्मस्य सर्वत्राप्यपूर्वस्यैव सिद्धेः । षडेवेत्येवकारेण च ये भावरूपाः पदार्थाः ते षड् लक्षणाक्रान्ता एवेति भावरूपेषु पदार्थेषु षट्लक्षणयोगो व्यवच्छिद्यते, अतोऽन्या[6]भावोऽर्थादिव भावरूपः पदार्थः षड्व्यतिरिक्तो नास्तीति प्रतीयते, अथवा भावस्वरूपेषु षड्[7]लक्षणातिरिक्तः ।

[ द्रव्यलक्षणम् । ]

गुणाश्रयो द्रव्यमिति लक्षणमुत्पन्नमात्रे निर्गुणेऽवयविनि गुणवत्ताभावादव्यापकमिति केचित् 'कदापि' इत्यनेन विशेषयन्ति, तन्न युक्तम्, विकल्पानुपपत्तेः । तथा हि अपि इत्यनेन न सर्वदेत्याक्षिप्यते । ततश्चैकदा [8]यद् गुणाश्रयस्तद् द्रव्यं यदि तदा नित्यद्रव्याणां द्रव्यत्वं न स्यात् । [9]अथ सर्वदैव गुणाश्रयस्तदा [10][प्रत्यग्रोत्पन्नमगुणं द्रव्यं न स्यात्, एकस्यानुगतलक्षणस्याभावात् । तस्मात्सामान्येन 'एकदा' 'सर्वदा' इति विशेषानपेक्षं 'गुणाश्रय' इत्येतावदेव लब्धम्, योग्यतया तु] प्रत्यग्रोत्पन्नस्यापि द्रव्यत्वमिति ।

[ गुणलक्षणम् । ]

**सामान्यवान्** इति–सामान्यादित्रयव्यवच्छेदः । अगुण इत्यनेनेतरेतराश्रय [11][प्रसङ्गात् द्रव्यव्यवच्छेदार्थं कार्यानाश्रय] इत्युपलक्षणीयम् । न विद्यते गुणोऽप्रधानं कार्यंद्रव्यमाधेयतया यस्येति [12]व्युत्पत्त्या कार्यस्य कारणपारतन्त्र्येण [13]गौणत्वम् । ननु संयोगविभागावेव गुणेषु मध्ये संयोग[14]विभागजनकौ नान्ये गुणा इत्यव्यापकं लक्षणम् । न, कर्म तावत्सं[15]योगविभागयोर[16]नपेक्ष्य [17]कारणं भवति । तद्रूपो गुणो न भवतीतिकर्मरूपतानिषेध एव तात्पर्यात् ।

**[पं०] संयोगविभागयोरनपेक्षो न कारणं गुण** इति–संयोगविभागसापेक्ष एव रूपादिगुणो द्रव्यरूपादिगुणोत्पादकः । **वैशेषिकमते** हि गुणाश्च गुणान्तरमारभन्ते इति पठ्यते । **एकद्रव्यमिति**–एकैकत्र द्रव्ये वर्तमानम् । [18]**अवृत्तमिति**–समवायलक्षणः । अनुवृत्तिप्रत्ययहेतुरित्यर्थः ।

**[कु०]** (कं. १५.१३) शक्त्यादीनामेवात्रान्तर्भावादिति भावः । तथाहि शक्तिस्तावत्स्फोटकार्यान्यथानुपपत्ति कल्प्यमाना प्रतिबन्धाभावो वा वस्तुस्वरूपं वा ? आद्येऽभावानुप्रवेशः, द्वितीये द्रव्यगुणकर्मानुप्रवेशः । सादृश्यं त्व अभावानुद्देशकारणं प्रागभिहितमेव, तदधिकानां बुद्ध्यनारोहमेवाह **तदभावश्चेति** (कं. १५.१४) । सर्वेषां प्रमातृणामनुद्दिष्टशक्त्यादिविषयप्रमाणानुदयादित्यर्थः ।

---

१ व्यावृत्तं लक्षणम्–जे. १; जे. ३ । २ अनुवृत्तं सामान्यम्–जे. १; जे. ३ । ३ शशि–अ, ब; ४ तद्धचनिषेधत्वात्–अ । ५ विषाणविषाणयो–अ, ब; ६ भावा–अ, ब; ७ लक्षणातिरिक्त इति आवृत्तं अबपुस्तकयोः, ८ षट्–अ, ब; ९ अत–अ, ब; १० [ ] एतच्चिह्नान्तर्गतो पाठः अब पुस्तकयोर्नास्ति । ११ [ ] एतच्चिह्नान्तर्गतो पाठः ड पुस्तके नास्ति । १२ व्युत्पत्ता–ड; १३ गौणत्वात्–ड; १४ जनको–ड; १५ विभागयो–अ; १६ रपेक्ष्य–ड; १७ कारणे–अ, ब; १८ अनुवृत्तं–अ; अनुवृत्ति–कं. ।

## न्यायकन्दली

अनुद्दिष्टेषु धर्म्मिषु धर्म्मा न शक्यन्ते वक्तुम्, अतो धर्म्माणामुद्देशं प्रक्रमयितुं [1]सङ्गतिं प्रदर्शयति–एवमिति। एवं पूर्वोक्तेन ग्रन्थेन धर्म्मैर्विना धर्म्मान् परित्यज्य धर्म्मिणामुद्देशः कृतः, धर्म्मिणां संज्ञामात्रेण सङ्कीर्त्तनं कृतमिदानीं धर्म्मा उद्दिश्यन्त इति भावः। यद्यपि पूर्वं द्रव्यादीनां विभागः कृतस्तथाप्युद्देशः कृत इत्युक्तम्, विभागस्य नामधेयसङ्कीर्त्तन[2]मात्रेणोद्देशेऽन्तर्भावात्।

[टि०] [ कर्मलक्षणम्। ]

**एकद्रव्यमिति**–एकमेव द्रव्यं समवायिकारणत्वेन यस्येति विग्रहः, तेनाद्रव्याश्रितादनेकद्रव्याश्रिताच्च [3]द्रव्याद् व्यवच्छेदः। अनेकद्रव्याश्रिता[4]न्नित्यत्वेनाद्रव्यकारणाच्च सामान्यात्, नित्यत्वादेव विशेषात् [5][असमवेतत्वात्]समवायाच्च व्यवच्छेदः। न विद्यते [6]गुणो गुणत्वमस्य इत्यगुणमिति गुणव्यवच्छेदः। नञ् तत्पुरुषे तु पुंस्त्वं स्यादिति तावदेकं कर्मलक्षणम्, द्वितीयं तु [7]संयोगविभागयोरनपेक्ष्यकारणं कर्म इति। संयोगविभागयोरुत्पत्तौ यत्स्वोत्पत्ति[8]पश्चाद भाव्यसाधारणभावरूपकारणानपेक्षं तत्कर्म। द्रव्यं हि स्वोत्पत्तिकारणव्यतिरिक्तं कर्म्मापेक्ष्य संयोगविभागौ जनयति [9]इति तद्व्यवच्छेदः। संयोगविभागौ समुदितौ संयोगजसंयोग[10]विभागजविभागौ प्रति न कारणं किन्तु प्रत्येकमिति ताभ्यामपि व्यवच्छेदः। सामान्यविशेषसमवायान्तं त्वनारम्भकत्वादेव्यवच्छेदः। स्वोत्पत्तिपश्चाद्भावि इति भणनात् स्वोत्पत्ति-समवायिकारणद्रव्यापेक्षत्वेऽपि [11]कर्मणो न दोषः। [12]आसाधारणेति [13]वचनाददृष्टापेक्षत्वेऽपि [14]न दोषः। भावरूपेति भणनात् पूर्वसंयोगाभावसापेक्षत्वेऽपि न दोषः।

[ सामान्यलक्षणम्। ]

[15]**अनुवृत्तमिति**–अनुवृत्तं शुक्लादिरूपं पटादावप्यस्तीत्यनुवृत्तप्रत्ययहेतुरिति व्याख्येयम्।

[कु०] ननु द्रव्यादीनामुपसङ्ग्राहकाभावे पदार्थानामित्येकतया व्यवहा[रा]नुपपत्तेस्तद्वक्तव्यमित्यपेक्षायामाह **षण्णां सामान्यलक्षणमिति** (कं. १५.१५)। व्यावृत्ततयानवगतानां साधर्म्यं दुर्ज्ञानमिति। व्यावृत्तलक्षणमाह [16]**व्यावृत्तेति**। गुणाश्रयत्वं गुणजातीयात्यन्ताभावा(व)धिकरणजातिमत्त्वम्। गुणस्वरूपमाह–**सामान्यवानिति** (कं. १५.१६)। परस्पराविरुद्ध कार्यासमवायिक[का]रणा[ण]जातीयो गुण इति लक्षणं सूचितं तस्माद्गुणे ज्ञाते [तद्राहित्यज्ञानं] तद्राहित्ये ज्ञाते गुणज्ञानमितीतरेतराश्रयत्वं न दोषाय। **एकद्रव्यमिति** (कं. १५.१७) संयोगविभागयोरनपेक्ष-कारणत्वमेव लक्षणम्। द्रव्यगुणस्तदभावादेव व्यावृत्तौ सिद्धायामि[त्ये]तत्पदद्वयं स्वरूपसङ्कीर्त्यर्थमिति द्रष्टव्यम्।

वृत्तकीर्तनस्याप्रस्तुतत्वशङ्कामपाकरोति **अनुद्दिष्टेष्विति** (कं. १५.२१)। [17]**उद्देशान्तर्भावादिति** (कं. १५.२५) सामान्येनोद्दिष्टस्य अवान्तरे विशेषोद्देशो विभाग इत्यर्थः।

---

१ सङ्गतमाह–जे. १; सङ्गतिमाह–जे. ३। २ °मात्रत्वेनो°–जे. १, जे. ३। ३ द्रव्यावच्छेदः–ड; ४ नित्येत्वे–अ, ब; ५ [ ] एतच्चिह्नान्तर्गतः पाठः अब पुस्तकयोर्नास्ति। ६ गुणो इति अ पुस्तके नास्ति। ७ संसयोगयोरन–अ; ससंयोगविभागयोरन–ब; ८ पस्वाद्–अ, ब; ९, १० 'इति'–'विभागज' इति पाठौ अबकपुस्तकेषु भ्रष्टौ; ११ न दोषः कर्मणः–अ, ब, क; १२ असाधारणेऽपि–ड; १३ वचनादपि दृष्टा–ब, ब; १४ ना–अ; १५ अनुवृत्ति मु. किन्तु–जे. १, ३ पुस्तकयोः अनुवृत्तं इति पाठः। १६ व्यावृत्तम्–कं.। १७ उद्देशेऽन्तर्भावाद्–कं.।

[30] प्रशस्तपादभाष्यम्

**षण्णामपि [1]पदार्थानां साधर्म्यमस्तित्वाभिधेयत्व[2]ज्ञेयत्वम् ।**

न्यायकन्दली

[30] **यद्यपि धर्म्माः षट्पदार्थेभ्यो न व्यतिरिच्यन्ते, किन्तु त एव अन्योन्यापेक्षया धर्म्मा धर्म्मिणश्च भवन्तीति । तथापि तेषां [3]धर्म्मिरूपतया परिज्ञानार्थं पृथगुद्देशं करोति–षण्णामपीति । अस्तित्वं स्वरूपवत्त्वम्, षण्णामपि साधर्म्यम्, [4]यस्य यस्य**

[टि०] [ विशेषलक्षणम् । ]

**अत्यन्तव्यावृत्तेति**:–ननु उरणसमूह[5]मध्यासीनस्वस्वोरणपरिग्रहे कमप्यत्यन्तव्यावृत्तबुद्धिहेतुविशेषं तथाभूतरोमस्तोमादिकमालो[6]कन्त एव तद्विदः, ततस्तस्यापि [7]विशेषवत्त्वं स्यादिति नेदं लक्षणं साधु । एकरूपाः स्वरूपसन्तो विशेषा इति केचिद् वदन्ति । व्यावृत्तबुद्धिजनकत्वमेकमेवरूपं [8]न त्वनुवृत्तबुद्धिजनकत्वं द्वितीयं रूपम्, येषामित्यनेन [9]सामान्यविशेषात् स्वरूपमन्त इत्यनेन रोमस्तोमादेर्व्यवच्छेदः, तदपि न समीचीनम्, सत्तासामान्यस्यापि स्वरूपसतोऽनुवृत्त[10]प्रत्ययजनकत्वलक्षणैकरूपकत्वात् विशेषत्वप्रसक्तेः । तस्मान्नित्यद्रव्येष्वेव व्यावृत्तकप्रत्ययहेतवो विशेषा इति लक्षणं साधु ।

[ समवायलक्षणम् । ]

**अयुतसिद्धयोः** इति:–आश्रयाश्रयिभावः इत्यनेन धर्मसुखयोः कार्यकारणभावो [11]व्योमव्योमशब्दयो[12]र्वाच्यवाचकभावश्च व्यवच्छिन्नः ।

[30] [ पदार्थानां साधर्म्यवैधर्म्यनिरूपणम् ]

यत्तावत् अस्तित्वं वस्तुस्वरूपमेव नाभ्युपगम्यते किन्त्वस्तित्वं नाम धर्मविशेषो वस्तुस्वरूपात्पृथक् स किं सर्ववस्तुव्यापकः ? प्रतिवस्तुभिन्नो वा ? प्रथमे दूषणं [13]**तेषामेकस्मिन्** इति । द्वितीये [14]**तु अथास्तित्वम्** इति ।

[पं०] [30] **तदेव तस्यास्तित्वमिति** । कोऽर्थः ? न त्वस्तित्वं भिन्नो धर्मः । **न समवायलक्षणावृत्तिरिति**–समवायलक्षणसम्बन्ध आश्रितत्वशब्देन नोच्यत इत्यर्थः । **समवाये तदभावादिति**–समवाये समवायवृत्त्यभावात् । निस्समवायो हि समवायः । **तत्कल्पनावैयर्थ्यमिति**–अस्तित्वकल्पनावैयर्थ्यम् । **येषां त्विति**–अस्माकम् । **नाप्यस्तित्वमनर्थकमिति**–अत्र अस्तित्वं स्वरूपसत्त्वम् ।

[कु०] [30] धर्माणां षट्पदार्थानतिरेकात् पदार्थानां चोद्दिष्टत्वात् किमर्थमुत्तरः प्रबन्ध इति शङ्कामपनयन्नेव सङ्गतिं करोति **यद्यपीति** (कं. १६.३) । [15]**स्वरूपस[त्त्व]त्वं विधिप्रत्ययविषयत्वम्** । अस्यैव षट्पदार्थानतिरेकमाह

---

१ पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानि–कं. १, कं. २; पदार्थानां साधर्म्यमस्तित्वाभिधेयत्वज्ञेयत्वानि–पा. ५. पु. दे.; २ 'ज्ञेयत्वम्' ताडपत्रीयपुस्तकस्य पाठः प्राचीनत्वाच्छुद्धत्वाच्च स्वीकृतः व्योमवत्यामपि समाहारद्वन्द्वमाश्रित्यायं पाठः स्वीकृतः । ३ धर्मरूपतया–जे. १, जे. ३ । ४ यस्य वस्तुनो यत्सारूपं–कं. १, कं. २ । ५ मध्यमध्यासीन–क; मध्याध्यासीन–ड; ६ कत–अ, ब, क; ७ विशेषत्व–ड; ८ न त्वं वृत्त–अ; ९ विशेषात्–अ, ब; १० प्रत्ययलक्षणैककपत्वात्–अ, ब; ११ व्योमशब्दयो–अ; १२ वाचकप्रत्ययहेतवो विशेषाभावश्च–ब; १३ तेषां कस्मिन्–अ, ब; १४ तु ब पुस्तके नास्ति । १५ स्वरूपवत्त्वं–कं. ।

### प्रशस्तपादभाष्यम्

आश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्यः ।

### न्यायकन्दली

वस्तुनो यद्यत् स्वरूपं तदेव तस्यास्तित्वम् । अभिधेयत्वमप्यभिधानप्रतिपादनयोग्यत्वम्, तच्च वस्तुनः [1]स्वरूपमेव । ज्ञेयत्वं ज्ञानग्रहणयोग्यत्वं तदपि स्वरूपमेव । भावभावस्य स्वरूपमेवावस्थाभेदेन ज्ञेयत्वमभिधेयत्वञ्चोच्यते ।

आश्रितत्वञ्च परतन्त्रतयोपलब्धिः, न समवायलक्षणा वृत्तिः, समवाये तदभावात् । इदञ्चाश्रितत्वं चतुर्विधेषु परमाणुषु आकाशकालदिगात्ममनःसु नास्तीत्याह–अन्यत्र नित्यद्रव्येभ्य इति ।

ये तु [2]धर्म्मांस्तद व्यतिरिक्तानिच्छन्ति तेषामेकस्मिन् समस्तवस्तुव्यापिन्यस्तीति-प्रत्ययहेतावस्तित्वे कल्पिते द्रव्यादिषु सत्तावैयर्थ्यम् । अथास्तित्वं प्रतिवस्तु भिद्यते तदा तत्कल्पनावैयर्थ्यम्, सत्तायाः स्वरूपसत्तायाश्च सदिति प्रत्ययोपपत्तेः । येषान्तु भावस्वरूपमेवास्तित्वं न तेषां व्यर्था सत्ता, स्वरूपस्यानुवृत्तिप्रत्ययहेतुत्वाभावात् । [3]नाप्यस्तित्वमनर्थकं निःस्वरूपे सत्तायाः समवायाभावादित्युभयमुपपद्यते ।

[टि०] द्रव्यादित्रये महासामान्यात् सामान्या[4]दित्रये च स्वरूपसत्त्वाद् अनुवृत्तप्रत्ययोपपत्तेरस्तित्वं तृतीयं धर्मान्तरं नाभ्युपेयं योऽपि हि षट्पदार्थवृत्तिमत्वं धर्मान्तरमिच्छति तेनापि स्वरूपसत्त्वमभ्युपेयं, निःस्वरूपे शशविषाणादौ सत्तासमवायायोगादिति । ननु स्वरूपमेवास्तित्वं यद्यभ्युपगम्यते तदापि किं सत्तासामान्येन ? स्वरूपसत्त्वादे[5]वानुवृत्त-प्रत्ययोपपत्तेः । अथानुवृत्तप्रत्ययार्थं सत्ताभ्युपगमस्तर्हि किं स्वरूपसत्त्वेन इत्याह **येषां तु** इत्यादि ।

[कु०] **यस्येति** (कं. १६.६) । [6]**ज्ञानग्रहणयोग्यत्वमिति** (कं. १६.७) ज्ञानधर्म्माभावाभावस्येति । एकमेव वस्तूपाधि-भेदाद्भिन्नव्यवहारविषयं, यथैक एव पिता पुत्रश्चेति भावः । यद्यप्यभिधेयत्वज्ञेयत्वे भावाभावसाधारणे तथाप्यभाव-वैधर्म्यानभिधानादविरोधः ।

**सत्तावैयर्थ्यमिति** (कं. १६.१४) तेनैव सत्प्रत्ययस्यानुवृत्तेः सत्तायां प्रमाणाभाव इत्यर्थः । स्वरूपस्यानुवृत्ति[7]प्रत्यये हेतुत्वाभावादिति (कं. १६.१६) मुख्याभाव उपचारस्याप्यशक्यत्वादित्यर्थः ।

समवायित्वमाश्रितत्वाद्विविच्य व्याचष्टे **समवायलक्षणावृत्तिरिति** (कं. १६.१९) । अनेकत्वं बहुत्वसङ्ख्या-गुणादिष्टगुणेषु विरुद्धेत्यत आह **परस्परविभिन्नत्वमिति** (कं. १६.२०) ।

---

१ स्वरूपमेव–कं. १, कं. २; भावस्वरूपमेवावस्थाभेदेन–कं. १, कं. ३ । २ धर्मान् व्यतिरिक्तान्–कं. १, कं. २ । ३ न चास्तित्व°–जे. १, जे. ३ । ४ इत्यादि त्रये एव–अ; ५ वानुप्तप्रत्ययोपपत्ते–अ, ब । ६ यद्यपि कं. पुस्तके नायं पाठस्तथापि पादटिप्पणे ज्ञेयत्वं ज्ञानग्रहणयोग्यत्वं तदपि स्वरूपमेव इत्यधिकं रापु. इत्यनेनान्यत्रादर्शपुस्तकेऽयं पाठ उपलभ्यते–कं. । ७ प्रत्यय–कं. ।

### प्रशस्तपादभाष्यम्

**द्रव्यादीनां [1]पञ्चानामपि समवायित्वमनेकत्वञ्च ।**

**गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे ।**

### न्यायकन्दली

**द्रव्यादीनां विशेषान्तानां [2]साधर्म्यं साधयति । समवायित्वं समवायलक्षणा वृत्तिः । अनेकत्वं परस्पर[3]भिन्नत्वं भिन्नत्वं चेतरेतरव्यावृत्तं स्वरूपमेव । द्रव्यादीनामित्युक्ते समवायोऽपि गृह्येत, तदर्थं पञ्चानामित्युक्तम् । पञ्चानामित्युक्ते च केषामिति न ज्ञायते तदर्थं द्रव्यादीनामिति ।**

[**टि०**] **समवायलक्षणावृत्तिः** इति । समवायरूपः सम्बन्धः पञ्चानामप्यस्ति, आकाशादीनामाधारभूतानां कार्यद्रव्यादीनां गुणादीनां चाधेयरूपतयेति वि[4]शेषः ।

[**पं०**] **द्रव्यादीनां विशेषान्तानामिति**–समवायस्य तु समवायो नास्तीत्यभिप्रायः । **अनेकत्वमिति**–पृथिव्यादिभिः भेदैर्द्रव्यादीनां पञ्चानामनेकत्वम् । समवायस्य तु न, एकत्वात् ।

ननु गुणाभावक्रियाऽभावौ कथं विशेषणं येन तद्विशिष्टत्वमुच्यते–अत्राह [5]**यथा चेत्यादि । भावोऽभावस्य विशेषणमिति**–सघटं भूतलमित्यादौ । **तथा चोपनिबद्धमिति**–तैस्तैः शास्त्रकारैः प्रतिपादितम् । **सम्बन्धमपीति**–विशेषणविशेष्यभावलक्षणम् । **कल्पयिष्याम इति** इहैव द्रव्यपदार्थे । उत्तरत्र **यदि संबद्धमेव विशेषणं मन्यस इति**–अनेनेत्यावेदयति यदसम्बद्धमपि विशेषणं भवति यथा श्रीहर्षं देवकुलम् ।

[**कु०**] अभावस्य तुच्छत्वात्कथं विशिष्टव्यवहारहेतुत्वमित्यत आह **यथा भाव** इति (कं. १६.२५) । अयमभिसन्धिः किमिदमभावस्य तुच्छत्वम्? प्रमाणगम्यत्वविरहो वा विधिप्रत्ययविरहो वा? नाद्यः भावग्राहकैरेव चौरव्याघ्राद्यभावाग्रहणे प्रवृत्तिविलापप्रसङ्गात् । नापि द्वितीयः निषेधव्यवहाराविषयतया भावस्यापि तुच्छत्वप्रसङ्गात् ।

**भावाभावयोरिति** (कं. १७.२) संयोगादिसम्बन्धवतामेव दण्डादीनां विशेषणत्वदर्शनादभावस्य तदभावादभावादयुक्तं विशेषणत्वमिति भावः । **अस्ति तावदिति** (कं. १७.२) विशेषणभावस्य सम्बन्धान्तरपूर्वकत्वानुमानस्य समवाये भग्नत्वात स्वरूपोपश्लेष एव विशेषणत्वे प्रयोजकः, स च विशिष्टप्रत्ययरूपकार्योन्नेय इति भावः । [6]**असम्बद्धमेवेति** (कं. १७.३) कल्पनालाघवायेति । **विशेषः** [शेषः] ।

---

१ पञ्चानां समवायित्व°–कं. १, कं. २ । २ साधर्म्यं समवायित्वं–जे. १, जे. २ । ३ परस्परविभिन्नत्वमितरेतरव्यावृत्तं–कं. १, कं. ३ । ४ शेषः–अ, ब, क; ५ यथा––भावो–कं. । ६ **सम्बद्धमेव**–कं. ।

### प्रशस्तपादभाष्यम्

**[31] द्रव्यादीनां त्रयाणामपि सत्तासम्बन्धः, सामान्यविशेषवत्त्वम्, स्वसमयार्थशब्दाभिधेयत्वम्, धर्म्माधर्म्मकर्त्तृत्वञ्च ।**

### न्यायकन्दली

**[31] गुणादीनां समवायान्तानां साधर्म्यमाह–गुणादीनामिति । निर्गुणत्वं गुणाभावविशिष्टत्वम्, निष्क्रियत्वं क्रियाभावविशिष्टत्वम्, [1]यथा च भावोऽभावस्य विशेषणं स्वविशिष्टप्रत्ययजननादेवमभावोऽपि । तथा चोपनिबद्धमघटं भूतलमिति । भावाभावयोरसम्बन्धात् कथमभावो विशेषणमिति चेदस्ति तावदयं विशिष्टप्रत्ययः, तद्दर्शनात्सम्बन्धमपि कल्पयिष्यामः । यदि [2]सम्बद्धमेव विशेषणं मन्यसे ।**

**[टि०]** [31] **अस्ति तावदयम्** इति–स्वरूपप्रत्यासत्तिरूपः सम्बन्धः कल्प्यते । संयोगाभावो हि संयुक्तवत्प्रतिभासते, समवायाभावस्तु समवेतवदिति ।

ननु [3]यद्यसम्बद्धमपि विशेषणं तर्हि गृह[4]स्थितेनापि दण्डेन दण्डी इत्युच्येत् ? न वाच्यम्, विशिष्टप्रत्ययो यत्र दृश्यते [5]तत्रैवं मन्यते नान्यत्रेति ।

**यथा चैतेषु** इति–सत्तासम्भवो तु वृक्षप्रत्ययकारणत्वेन । **अनित्येषु** [6]**तु** इति–कारणैर्हि यदुत्पाद्यते तदसदेवोत्पाद्यते इति । ननु पदार्थान्तं [7]द्वयी गतिः, भावरूपत्वं वा स्यादभावरूपत्वं वा, तत्र [8][सत्ता भावरूपं पदार्थमालिङ्गति ? अभावरूपं वा ?] नाद्यः सत्तावैयर्थ्यप्रसङ्गात्, नापरो निःस्वरूपेण सम्बन्धायोगात् । द्वयोर्हि सम्बन्धो दृष्टः । सत्यम्, इदृशमेव कारणानां सामर्थ्यं यत् सत्तालिङ्गितमेवोत्पादयन्तीति ।

**[पं०]** [31] [1]**एतेष्विति** =द्रव्यगुणकर्मसु । **इदं त्विह निरूप्यत इति** सत्तासम्बन्धसमर्थनेनेति हृदयम् । **श्रीधर उत्तरयति नित्येषु तावदित्यादि** । **अनित्येषु प्रागसत एव सत्तेति** कोऽर्थः ? न सतः सत्ता, नाप्यसतः किन्तु प्रागसतः=

**[कु०]** [31] नास्तिकवैतण्डिकानां मतेन दूषणमाशङ्क्यते **इदं त्विति** (कं. १७.१०) । परिहरति **नित्येष्विति** (कं. १७.१२) । अयमभिप्रायः–अयं विकल्पः समवायस्याङ्गीकारेऽनङ्गीकारे वा व्याहन्यते । अङ्गीकारे तावदयुतसिद्धया विरोधः । अ[न]ङ्गीकारे तु सम्बन्धव्यवहारविरोध इति । कार्यस्य प्राग[भाव]त्वाविशेषे शशविषाणाद्युत्पत्तिप्रसङ्गः परिविदिष्यते तत्राह [10]**कारणसामर्थ्यादिति** (कं. १७.१३) । **अनुवृत्तिव्यावृत्तिहेतुत्वादिति** (कं. १७.१५) द्रव्यत्वं पृथिव्यादिष्वनुवृत्तिहेतुः, गुणकर्मभ्यां व्यावृत्तिहेतुः; एवं गुणत्वमपि रूपादिष्वनुवृत्तिहेतुः द्रव्यकर्मभ्यां व्यावृत्तिहेतुरित्यादि ।

---

१ यथा भावो–कं. १, कं. २ । २ असम्बद्धमेव–जे. १ । ३ यद्यसम्बन्धमपि–अ; ४ स्थितेनापिण्डेन–अ, ब; ५ तत्रैव–अ, ब, क; ६ 'तु' मु. पुस्तके नास्ति, किन्तु – जे. १, जे. ३ इत्यत्रास्ति । ७ द्वितीय–अ, ब; ८ [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति । ९ चैतेषु–कं. । १० सत्ताकारणसामर्थ्याद्–कं. १ ।

## न्यायकन्दली

द्रव्यादीनां [1]त्रयाणामपि सत्तासम्बन्धः सत्तया [2]सामान्येन सह सम्बन्धः समवायरूपो द्रव्यगुणकर्म्मणां साधर्म्यम्। यथा चैतेषु सत्ता[3]सम्बन्धस्तथोपपादितम्। इदन्त्विह निरूप्यते–किं [4]सत्तासम्बन्धः सतोऽसतो वा ? सतश्चेत्प्राक् सत्तासम्बन्धात् सन्नेवासावर्थ इति व्यर्था सत्ता ? अथासतः सम्बन्धः ? खरविषाणादिष्वपि सत्ता स्यात्। नित्येषु तावत्पूर्वापरभावानभ्युपगमः। [5]अनित्येषु तु प्रागसत एव सत्ता कारणसामर्थ्यात्। न च खरविषाणा[6]दिष्वतिप्रसङ्गः, तदुत्पत्तौ कस्यचित्सामर्थ्याभावात्।

अन्यदपि साधर्म्यं द्रव्यादीनां त्रयाणां [7]दइदिति–सामान्यविशेषवत्त्वञ्चेति। अनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यविशेषा द्रव्यत्वादयस्तैः सह सम्बन्धो द्रव्यादीनाम्, स च समवाय एव।

स्वसमयार्थशब्दाभिधेय[8]त्वञ्चेति। वैशेषिकैः स्वयं व्यवहाराय यः सङ्केतः कृतोऽस्मिन् शास्त्रे 'अर्थशब्दाद् द्रव्यगुणकर्म्माणि प्रतिपत्तव्यानि' इति, तेन द्रव्यादीनि त्रीणि निरुपपदेनार्थशब्देनोच्यन्ते।

[टि०] ननु यथा जातिर्व्यवच्छेदमात्रेण चरितार्था तथा द्रव्यगुणावपि कर्मादिरूपत्वेन [9][दानस्पर्शादिक्रियावच्छेकत्वेन] चरितार्थौ न तु [10]धर्मकारणम्, दानस्पर्शादि[11]क्रियास्तु धर्मकारणमिति कथं साधर्म्यं त्रयाणाम् ? न वाच्यम्, व्यापारस्य [12][व्यापारविषयस्य] कारणत्वात् क्रियाधारत्वेन तेषामपि कारणत्वम, सामान्यस्य तु नित्यत्वेनाव्यापार-विषयत्वान्न कारणत्वम्।

[कु०] ननु कर्तृमत्वं कृतिमत्त्वं, कृतिश्च प्रयत्नः; स चात्मन एव न द्रव्यादीनां त्रयाणामित्यत आह [13]धर्म्माधर्म्मयोरिति (कं. १७.११)। कारणमात्रे कर्तृत्वोपचारः कारणावच्छेदकसामान्यादिभ्यो विशेषप्रदर्शनायेति भावः। तथा हि एकैकस्येतरसहकृतस्योभयकर्तृत्वं यथाक्रममुदाहृतमिति नोदाहरणसाङ्कर्यशङ्कावकाशः। एवमन्यदपि यथा एकमेव गाङ्गमम्भः स्तूयमानं निन्द्यमानं च यथाक्रमं धर्म्माधर्म्महेतुरित्यादि निजशक्तिर्वस्तुस्वरूपं सहकारि वा चरितार्थत्वात्। 'गां दद्याद्' इत्यादौ गोत्वादेरनियतदेशकालस्य दानाद्यन्व[या]ये गो तदन्व[य]व्यवच्छेदमात्रे व्यापारः तदन्वयिन एव धर्म्माधर्म्मकर्तृत्वमिति भावः।

---

१ त्रयाणां–कं. १, कं. २। २ सामान्येन सम्बन्धः–कं. १, कं. २। ३ सम्भव°–जे. १, जे. ३। ४ किं सतः सत्तासम्बन्धोऽसतो वा यदि सतः–जे. १, जे. ३। ५ अनित्येषु प्रागसत–कं. १, कं. २। ६ विषाणादिषु प्रसङ्ग–जे. १, जे. ३। ७ कथयति-कं. १, कं. २। ८ त्वं–जे. ३। ९ [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति। १० कर्म–अ, ब; ११ क्रियासु–अ; १२ [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति। १३ धर्म्माधर्म्मकर्तृत्वं–कं.।

### प्रशस्तपादभाष्यम्

[32] कार्य्यत्वानित्यत्वे कारणवतामेव ।

### न्यायकन्दली

धर्म्माधर्म्मकर्तृत्वञ्चेति । धर्म्माधर्म्मोत्पत्तिनिमित्तत्वं त्रयाणाम्, [1]तथा हि भूमिरेकैव दीयमानापह्रियमाणा च धर्म्माधर्म्मयोः कारणम् । एकः संयोगो द्वयोः कारणम्, यथा कपिलास्पर्शो नरास्थिस्पर्शश्च । एवं कर्म्माप्युभयकारणम्, [2]यथा तीर्थगमनं शौण्डिकगृहगमनञ्च, एवमन्यदप्यूह्यम् । धर्म्माधर्म्मकर्त्तृत्वमिति त्वप्रत्ययेन धर्म्माधर्म्मजननं प्रति तेषां निजा शक्तिरुच्यते । ननु जातिरपि तयोः कारणम् ? न, तस्याः स्वाश्रयव्यवच्छेदमात्रेण चरितार्थत्वात् ।

[32] कार्य्यत्वानित्यत्वे कारणवतामेव । येषां द्रव्यादीनामुत्पत्तिकारणमस्ति तेषां कार्य्यत्वमनित्यत्वञ्च धर्म्मो न सर्वेषामित्यर्थः । [3]स्वकारणे समवायः, प्रागसतः सत्तासमवायो वा कार्य्यत्वमित्येके । तदयुक्तम्, प्रध्वंसे तदभावात् । तस्मात् कारणाधीनः

[टि०] [32] कारणाधीनः स्वात्मे इति–अत्र आत्मशब्दस्य स्वरूपवाचकत्वात् स्वशब्दस्य चात्मीयवाचकत्वात् न [4]स्वशब्दस्याधिक्यम् । नन्वत्रापि लाभ इति पदेन प्राप्तिरेवाभिधीयते, सा चोत्पत्तिरेव, उत्पत्तिश्च [5]प्रागसतः सत्तासत्तासमवायो वा ? तथा च पूर्वदोषप्रसङ्गः । न, कारणाधीनः स्वात्मलाभः कालसम्बन्ध इत्यर्थः । प्राक् प्रध्वंसा-

[पं०] पूर्वमसत इदानीं कारणसामर्थ्यादुत्पादवतो वस्तुतः सत्तेत्यर्थः । न च खरविषाणादिष्वतिप्रसङ्ग इति–प्रसंगः सत्ताप्रसंगः । एकः संयोगो द्वयोः कारणमिति न गुणेषु मध्ये कश्चिद्गुणः पापायैव कश्चिच्च धर्मायैव, किन्त्वेकोऽपि संयोगो द्वयोरपि कारणम् । तेषां निजा शक्तिरुच्यत इति–तेषां व्यक्तिरूपाणां द्रव्यादीनां त्रयाणाम् । परवाक्यं ननु जातिरपि तयोः कारणमिति–गोजातिर्हि हस्तपादाभ्यां स्पर्शे धर्माधर्मयोः कारणमिति पराशयः । श्रीधरः नेत्यादि । तस्याः स्वाश्रयव्यवच्छेदमात्रेण चरितार्थत्वादिति कोऽर्थः ? न खलु सा पार्थिवगोव्यक्तिमंतरेण केवलैव स्पर्शहेतुः, किन्तु तथा व्यक्तिरवच्छेदनीया, तावतैव चासौ चरितार्थः । तस्माज्जातिरपि तयोः कारणमिति न वक्तव्यमित्यर्थः ।

[32] ननु कार्यत्वं किमुच्यते? तत्र ब्रूते स्वकार[णे]समवाय इत्यादि–स्वकारणसमवायो यथा तन्तुषु पटः समवेतः । एकेति = व्योमशिवपादाः । प्रध्वंसे तदभावादि[ति]–प्रध्वंसे = प्रध्वंसाभावे, तदभावात् = स्वकारणसमवायाभावात्, प्रागसतः सत्तासमवायाभावाच्च । अयमर्थः प्रध्वंसाभावो हि कार्यः । अथ च न तन्तुषु पट इव

[कु०] [32] एकदेशिनां कार्यत्वव्युत्पादने दोषं प्रदर्शयन् स्वाभिमतं कार्यत्वं निर्धारयति स्वकारणेति (कं. १८.२)। एवमेवानित्यत्वं निर्धारयति [6]प्रागभावेति (कं. १८.७) । ननु यदा घटस्तदा न(ा)विनाशः, यदा विनाशस्तदा न घटस्ततः कथमनयोर्विशेषणविशेष्यभाव इत्यत आह प्रत्येतुरेकत्वादिति (कं. १८.११) । विशेषणविशेषणत्व

---

१ यथा–कं. १; कं. २ । २ 'यथा'–जे. १; जे. ३ पुस्तकयोर्नास्ति । ३ स्वकारण–जे. ३ । ४ न शब्दस्याधिक्यम्–ड; ५ प्रागसतः–अ; ६ प्रागभावे–कं. ।

## न्यायकन्दली

**स्वात्मलाभः [1]कार्य्यत्वमिति लक्षणम्, व्यापकत्वात् । प्राक्प्रध्वंसाभावोपलक्षिता वस्तुनः सत्तैवानित्यत्वमिति केचित् । तदयुक्तम्, अप्रतीतेः । अनित्य इति विनाशीत्येवं लोकः प्रत्येति, न तु सत्ताविशिष्टताम् । उत्पत्तिविनाशयोगित्वमित्यपरः । तदप्यसारम्, प्रागभावे उत्पत्तेरभावात्, तस्याप्यनित्यत्वेन [2]लोके सम्प्रतिपत्तेः । तस्मात् स्वरूपविनाश एवानित्यत्वमिति । यथोक्तम्—"अनित्यत्वं [3]विनाशाख्यं क्रियासामान्यमुच्यते" इति ।**

[**टि०**] **भावेति**—अत्र प्रागभावोप[4]लक्षिता सत्ता कार्यत्वं प्रध्वंसाभावोपलक्षिताऽनित्यत्वमिति द्रष्टव्यम् । [5][अत्र चोभयत्रापि प्राक् प्रध्वंसाभावोपलक्षिता या सत्ता सैवाकाशादौ वर्तते [6]इत्यतिव्यापकत्वम् । **तस्मात्स्वरूपनाश एव इति**—नन्वत्र भाष्ये कारणवतामेवानित्यत्वं] प्रतिपादितम्, स्वरूपविनाशलक्षणस्य त्वनित्यत्वस्य कारण[7]रहितेऽपि प्रागभावे सम्भवात्भाष्यविरोधः? न, द्रव्यगुणकर्मणां साधर्म्ये निरूप्यमाणे 'केषां द्रव्यादीनां साधर्म्यम्', इत्यपेक्षायामुक्तं [8]कारणवतामेव इति । द्रव्यादीनां कारणवतामेवेदं साधर्म्यं नान्येषा[9]मित्येवात्र तात्पर्यम् । **अनित्यत्वं विनाशाख्येति** [10]विनाशाख्या क्रिया प्रध्वंसाभावस्तस्याः [11][सामान्यमप्रध्वस्तसामर्थ्यं] व्यावृत्तत्वेनोपचरितं तदनित्यत्वमित्यर्थः । ननु घटे विद्यमानेऽनुत्पन्न एव प्रध्वंसः कथं विशेषणमित्याह **यद्यपि विनाश** इति । प्रमाणान्तरं कार्यत्वादि । ननु सदित्यत्र वर्तमानकाल[12]'शतृ' प्रत्ययस्ततश्च सतो भवनं सद्भावः; सिद्धो निष्पन्नः सद्भावो यस्येति व्युत्पत्त्याऽभावस्य विद्यमानत्वं

[**पं०**] प्रध्वंसाभावः स्वकारणे मुद्गरादौ समवेतः । मुद्गरादेर्विनाशप्रसंगादनुभवाभावाच्च । नापि प्रागसति प्रध्वंसाभावे पश्चात्सत्ता समवेता भवति । तथा सति वस्तुरूपत्वापत्तेः, तस्याश्चावस्तुरूपत्वात् ।

नन्वनित्यत्वं किमुच्यते ? तत्र ब्रूते—**प्राक्प्रध्वंसेत्यादि** । **वस्तुनः सत्तैवेति**—सत्ता स्वरूपसत्त्वम्, न तु महासत्तेति द्रष्टव्यम् । **केचिदिति—उद्योतकराचार्याः** । **अपर इति व्योमशिवः** । **प्रागभावे उत्पत्तेरभावादिति**—प्रागभावो हि अनादिः सान्तः । **यथोक्तमिति**—उक्तं चेत्यर्थः । **विनाशाख्यं क्रियासामान्यमिति**—भावाभाववर्ति । **यद्यपि विनाशो**

[**कु०**] [विशेष्यत्व] मिहोपलक्षणत्वं तत्र च बुद्धिसिद्धत्वमेव प्रयोजकं न तूपलक्ष्यसमानकालत्वम्; इतरथा कुरुक्षेत्रत्वादिव्यवहारविलोपप्रसङ्ग इत्यर्थः ।

स्यादेतत् पूर्वावधिग[ज]त्वरूपं कार्यत्वं प्रध्वंसेऽप्यस्ति उत्तरावधिसम्बन्धरूपमनित्यत्वं प्रागभावेऽप्यस्ति । ते एव च कार्यत्वानित्यत्वे तद्गतानि[त्य]त्वरूपिते तत्कथं त्रयाणां साधर्म्यम् एते कथं च कारणवतामेवेति नियमः संगच्छते ? कारणविरहिणोऽपि प्रागभावस्यानित्यत्वादिति । नैष दोषः त्रयाणामिति सङ्ख्यया सामान्यादीनामेव भावरूपाणां पर्युदासस्याभिमतत्वात् । अयं च विशेषाणामित्यधिकारादवसेय इति ।

---

१ कार्यत्वलक्षणम्—जे. १ । २ लोकसम्प्रतिपत्तेः—जे. १; जे. ३ । ३ विनाशाख्य—जे. १; जे. ३ । ४ लक्षिप्राप्ता—अ; ५ [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति । ६ इत्यव्यापकत्वम्—अ, ब, क; ७ रहितत्वेऽपि । ८ प्रशस्तपादस्थमेतत्प्रतीकम् । ९ मित्येवाव—अ । १० विनाशाख्यम् मु. किन्तु विनाशाख्य—जे. १, जे. ३; ११ [ ] एतत् चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति; सामान्यमप्रध्वसत ह; १२ शतृ शब्दप्रत्ययस्ततो—अ, ब, क; प्रत्ययस्ततश्च सतो—ह;

### प्रशस्तपादभाष्यम्

[33] कारणत्वञ्चान्यत्र [1]पारिमाण्डल्यादिभ्यः ।

### न्यायकन्दली

यद्यपि विनाशो वस्तुकाले नास्ति, तथापि प्रमाणान्तरसिद्धसद्भावो भवत्येव विशेषणम्, अनित्यो घट इति प्रत्येतुरेकत्वात् । [2]तथा च लोके विनाशि शरीरमध्रुवा विषया इति ।

[33] कारणत्वञ्चान्यत्र पारिमाण्डल्यादिभ्य इति । पारिमाण्डल्यमिति परमाणुपरिमाणम्, आदिशब्दाद् द्व्यणुकपरिमाणम्, आकाशकालदिगात्मनां विभुत्व[3]मन्त्यः शब्दः, मनःपरिमाणं परत्वापरत्वे द्विपृथक्त्वमन्त्यावयविपरिमाणञ्चेत्यादिग्राह्यम् । एतानि परित्यज्यापरेषां द्रव्यादीनां त्रयाणां कारणत्वं समवाय्यसमवायिकारणत्वम् । यद्यपि द्रव्यस्य नासमवायिकारणत्वम्, न च समवायिकारणत्वं गुणकर्म्मणोः, तथापि निमित्तकारणविलक्षणतयेदं साधर्म्यमुक्तम् ।

[टि॰] प्रतीयते, प्रमाणान्तरेण जनितोत्पाद इति पर्यवसानात् । ततश्च प्रमाणान्तरैर[4]भावस्योत्पत्तिर्न घटते । उत्पन्ने वाऽभावेऽनित्यो घट इति वचनकाल एव घटस्यादर्शनप्रसङ्ग इति । सत्यम् । प्रमाणान्तरेण सिद्धो ज्ञातो भविष्यद्रूपतया सद्भावो यस्येत्यदोषः ।

[33] तथापि निमित्तकारणेति – ननु निमित्तकारणविलक्षण[5]त्वं द्रव्यादि[6]त्रयस्यापि नास्ति, तेषामपि ज्ञानादिनिमित्तत्वात् ? सत्यम्, नात्र द्रव्यादित्रयस्य निमित्तकारणवैलक्षण्यं विधीयते [7][किन्तु निमित्तकारणविलक्षणं यत्कारणत्वं तत् त्र्याणामेवास्तीति विधीयते ।]

[पं॰]वस्तुकाले नास्तीति–यदा हि विनाशस्तदा वस्तु नास्ति, यदा च वस्तु तदा विनाशो ना[स्ति] । प्रमाणान्तरसिद्धसद्भाव इति प्रमाणान्तरेण कार्यत्वाख्येन सिद्धः ज्ञातः सद्भावो यस्य विनाशस्य स तथा । प्रत्येतुरेकत्वादिति – येनैव प्रमात्राऽन्यप्रमाणेन प्रतीतो विनाशः स एव घटादौ भावितया विनाशं प्रत्येति । ततश्च व्यवहरति–अनित्यो घट इत्यर्थः ।

[33] पारिमाण्डल्यमिति – परिमण्डलाः परमाणवस्तेषामिदं परिमाणं पारिमाण्डल्यम् । विभुत्वमिति महत्परिमाणम् । [8]अन्त्यः शब्द इति – यः श्रोत्रदेशमागत्य ग्राह्यो भवति । मनःपरिमाणमिति अणुपरिमाणं मनः । द्विपृथक्त्वमिति – इदमस्मात्पृथगिति एक पृथक्त्वम्, इमौ पृथगिति द्विपृथक्त्वम् । एतच्च त्र्यादिपृथक्त्वे कार्ये नासमवायिकारणम् । एकपृथक्त्वानामेव त्र्यादिपृथक्त्वोत्पत्तावसमवायिकारणत्वात् । एतच्च त्रिपृथक्त्वाद्युपलक्षणमिति परिभावनीयम् । अन्त्यावयविपरिमाणं चेति–अन्त्यो हि तन्तुर्नारम्भकः ।

[कु॰] [33] अन्त्यावयवि–परिमाणं चेत्यादि ग्राह्यमित्यादि (कं. १८.१५) ग्रहणेन विनश्यदवस्थद्रव्यसंयोगविभागकर्म्माणि चरमः संस्कारो ज्ञानं च गृह्यन्ते । ननु पारिमाण्डल्यादीनि सामान्यादीनि च ज्ञानं विषयतयोत्पादयन्ति कारणान्येव तत्कथं पारिमाण्डल्यादिव्यतिरिक्तानां त्रयाणामेव कारणत्वमत आह समवाय्यसमवायीति (कं. १८.१६) ।

१ पारिमाण्डिल्यादिभ्यः – कि. । २ तथा लोके – कं. १; कं. २ । ३ °मन्त्यशब्दमनः° – कं. १; कं. २ । ४ भावश्चोत्पत्ति – अ, ब; ५ त्वे – अ, ब, क; ६ 'त्रयस्यापि' इति ड पुस्तके नास्ति । ७ [ ] एतच्चिह्नान्तर्गतः पाठः ड पुस्तके नास्ति । ८ अन्त्यशब्द – कं. ।

प्रशस्तपादभाष्यम्

[34] द्रव्याश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्यः ।

न्यायकन्दली

[34] [1]द्रव्याश्रितत्वञ्चान्यत्र नित्यद्रव्येभ्य इति । नन्वाश्रितत्वं षण्णामित्युक्तं तेनेदं पुनरुक्तम् ? न पुनरुक्तम्, द्रव्योपलक्षितस्याश्रितत्वस्यात्र विवक्षितत्वादिति कश्चित् । तदयुक्तम्, सामान्यादीनामपि द्रव्योपलक्षितस्याश्रितत्वस्य सम्भवान्नेदं [2]द्रव्यादित्रयस्य साधर्म्यकथनं स्यात् । तस्मादित्थं व्याख्येयम् । अन्यत्र नित्यद्रव्येभ्य इति द्रव्यग्रहणमुपलक्षणम्, तद्वृत्तयोऽन्त्या विशेषास्तेऽपि गृह्यन्ते । नित्यद्रव्याणि तद्गतांश्च विशेषान् परित्यज्य द्रव्य एवाश्रितत्वं द्रव्यादीनां त्रयाणां साधर्म्यं नापरेषामित्यर्थः ।

[टि०] [34] **नापरेषाम्** इति–सामान्यसमवायोर्गुणकर्मस्वपि भावात् द्रव्ये एवेत्येव[3]कारेण व्यवच्छेदः । विशेषाणां द्रव्य एवाश्रितत्वमस्तीति [4]चतुर्णामेव साधर्म्यं स्यान्न [5]त्रयाणामिति [6]सदपि साधर्म्यं तेषामुपलक्षणव्याख्यानेन निराकृतम् । अत्र च सकलपदार्थापेक्षया साधर्म्यमिति [7]द्रव्यत्वस्य द्रव्य एव वृत्तावपि न दोषः । अत एव चान्यत्र नित्यद्रव्येभ्य **इत्युक्तम्** । [8]इत्थं कन्दली[9]कृता भाष्यं समर्थितम् । केनचित्तु द्रव्याश्रितत्वं द्रव्यसमवायकारणतेति व्याख्यातं तेन द्रव्यत्वादि[10]सामान्यविशेषविशेषपदार्थयोरप्रसङ्गः । नित्यत्वेनानयोः कारणाभावात् । तथापि [11]नित्यगुणेष्वभावाद् व्यापकत्वेऽन्यत्र नित्यद्रव्येभ्य इत्युपलक्षणं कृतम् । नित्यद्रव्याणि तद्गतांश्च [12]नित्यगुणान् विहायेदं [13]साधर्म्यमिति । तदत्र नोपयोगि, विशेषादिव्यवच्छेदार्थमनेनोपलक्षणस्य कृतत्वात् ।

[पं०] [34] **द्रव्याश्रितत्वं चान्यत्र नित्यद्रव्येभ्य इति**–अत्रेदमेव व्याख्यानं निर्वहति । तद्यथा द्रव्याश्रितत्वं च द्रव्यसमवायिकारणकता, एवं च द्रव्यत्वादिसामान्यविशेषपदार्थयोरप्रसंगः । नित्यत्वेनानयोर्द्रव्यकारणाभावात् । तथापि नित्यगुणेष्वसंभवादव्यापकमत आह–**अन्यत्र नित्यद्रव्येभ्य इति** नित्यद्रव्येत्युपलक्षणम् । नित्यगुणेत्यपि द्रष्टव्यम् । ततो नित्यद्रव्याणि नित्यगुणांश्च विहाय द्रव्यगुणकर्माणामेवेदं साधर्म्यमित्यर्थः । **द्रव्योपलक्षितस्याश्रितत्वस्यात्र विवक्षितत्वादिति**–पूर्वत्र सामान्येनैवाश्रितत्वमुक्तम् । इह तु द्रव्ये इत्युभयोर्विशेष इत्यर्थः । **कश्चिदिति–व्योमशिवः** । **द्रव्ये एवाश्रितत्वमिति**–द्रव्यसमवायिकारणकत्वम् . **द्रव्यादिनां त्रयाणां साधर्म्यं नापरेषामिति** । सामान्यसमवाययोर्गुणकर्मस्यपि भावान्न द्रव्य एवाश्रितत्वमस्ति । विशेषास्त्वपलक्षणव्याख्यया परित्यक्ताः । इति त्रयाणां द्रव्य एवाश्रितत्वं साधर्म्यमिति भावः ।

[कु०] [34] **नित्यद्रव्याणि तद्गतांश्च विशेषान्** [14]विहायेति (कं. १८:२४) द्रव्य एवाश्रितत्वे साधर्म्ये द्रव्यादीनां त्रयाणां चिन्त्यमाने नित्यद्रव्याणि[अनु]त्पाद्यानि अनाश्रितत्वात् । द्रव्यगता विशेषा द्रव्यत्वपृथिवीत्वादयोऽवान्तरविशेषाश्च[अनु]त्पाद्याः । तेषामपि द्रव्य एवाश्रितत्वेन त्रयाणामित्युक्तविरोधप्रसङ्गादिति भावः । द्रव्याश्रितत्वं द्रव्यसमवायिकारणकत्वं नित्यगुणांश्च विहाय त्रयाणां साधर्म्यमिति तु व्याख्यानं(द्याय:)ध्येयम् ।

---

१ द्रव्य एवाश्रितत्वं=समवायिकारणजन्यत्वं द्रव्यजन्यत्वं–टिप्पण. जे. १ । २ द्रव्यादित्रयसाधर्म्यकथनं–कं.१; कं.२ ।
३ कारण–अ, ब; ४ चतुर्था–अ, ब; ५ त्रयामिति–अ, ब; ६ तदपि–ड; ७ द्रव्य एव–अ;
८ कृतं–अ, ब, क; ९ कृतभाष्यं–ड; १० द्रव्यादिसामान्यविशेषपदार्थयो–अ, ब; ११ तथापि गुणेष्वभावात्–ड;
१२ नित्यान् गुणान्–ड; १३ साधर्म्येति–अ; १४ परित्यज्य–कं ।

### प्रशस्तपादभाष्यम्

[35] सामान्यादीनां [1]त्रयाणामपि स्वात्मसत्त्वं बुद्धिलक्षणत्वमकार्य्यत्वमकारणत्वमसामान्यविशेषवत्त्वं नित्यत्वमर्थशब्दानभिधेय[2]त्वञ्चेति ।

### न्यायकन्दली

[35] सम्प्रति सामान्यादीनां साधर्म्यमाह–सामान्यादीनामिति । स्वात्मैव [3]सत्त्वं स्वात्मसत्त्वं स्वरूपं यत्सामान्यादीनां तदेव तेषां सत्त्वम्, न सत्तायोगः सत्त्वम् । एतेन सामान्यादीनां त्रयाणां सामान्यरहितत्वं साधर्म्यमुक्तमित्यर्थः । कथमेतत् ? [4]बाधकसद्भावात् [5]सत्तायां तावत् सत्ता नास्ति, अनिष्टप्रसङ्गात् । विशेषेष्वपि सामान्यसद्भावे संशयस्यापि सम्भवात् । निर्णयार्थं विशेषानुसरणेऽप्यनवस्थैव । समवायेऽपि सत्ताभ्युपगमे तद्वृत्त्यर्थं [6]समवायान्तराभ्युपगमादनिष्टापत्तिरेव दूषणम् । [7]गोत्वादिषु त्वपरजातिमत्त्वेन व्याप्तस्य

[टि०] [35] [8]सत्तायामिति--[9]अनिष्टा अनवस्था । ननु सत्तायामनवस्थानात्सत्ता मा भूत्, गोत्वादौ तु बाधकाभावात्, किं न सत्तेत्याह [10]गोत्वादिषु तु इति – यत्र सत्तासम्बन्धस्तत्रा[11]परजातिमत्त्वमिति व्याप्तिः, ततो गोत्वादिसामान्यादपरजातिमत्त्वं व्यावर्तमानं सत्तामपि व्यावर्त[12]यतीति । तथा च प्रयोगः विवादाध्यासितं सामान्यं सत्तासामान्यरहितम्, अपरजातिरहितत्वात्, समवायवदिति । सामान्यविशेषसमवायाः सत्तारहिताः द्व्यापकरहितत्वाद्, यद्यद् व्यापकरहितं [13][तद् तद् व्याप्यरहितं] यथाऽग्निरहितः प्रदेशो [14][निर्धूम इत्यनुमानात्त्रिष्वपि सत्तानिरासः । [15]अथ यच्छब्दविचारा-

[पं०] [35] **अनिष्टप्रसंगादिति** = अनवस्थाप्रसंगात् । **विशेषेष्वपि सामान्यसद्भावे संशयस्यापि सम्भवादिति** – न केवलं निर्णयो भवति क्वचित्संशयोऽपि भवतीत्यपेरर्थः । यथा स्थाण्वादावूर्ध्वत्वसामान्ययोगात्संशयो भवति । तत्व्यवच्छेदाय कोटरादि विशेषानुसरणम् । एवमिहापि यदि सामान्यं स्यात्तदा संशयोऽपि स्यादिति गमनिका । **निर्णयार्थं विशेषानुसरणेऽप्यनवस्थैवेति** – न केवलं सामान्यनुसरणेऽनवस्था इत्यपि-शब्दः । विशेषेषु सामान्यप्रवेशात्किल

[कु०] [35] ननु स्वात्मसत्वं द्रव्यादिष्वप्यस्तीत्यत आह स्वात्मैवे (पि) [ति] (कं. १९.४) । **संशयस्यापि सम्भवादिति** (कं. १९.४) [16]यथा अनेकेषु शुक्लमानीयतामित्युक्ते शुक्लत्वसामान्याक्रान्तत्वाच्छुक्लो गुणो न किञ्चिद् *व्यावर्तयति एवं विशेषत्वसामान्याक्रान्तविशेषा स्वाश्रयं न व्यावर्तयेयुरित्यर्थः ।* ***गोत्वादिष्विति*** (कं. १९.९) प्रयोगोऽयं गोत्वादीनि न सत्तावन्ति अपरसामान्यरहितत्वात् सत्तावदिति ।

---

१ त्रयाणाम् – कं. १; कं. २ कि., दे. । २ त्वञ्च – दे. । ३ सत्त्वं स्वरूपं – कं. १; कं. २ । ४ बाधकसद्भावात् = व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः – जे. १ टिप्पण । ५ सामान्ये – कं. १; कं. २ । ६ समवायाभ्यु° – कं. १; कं. २ । ७ गोत्वादिष्वपर – कं. १; कं. २ । ८ प्रतीकमिदं मु. पुस्तकस्य ३ पादटिप्पणे अस्ति । ९ अभीस्था – अ, ब; १० गोत्वादिषु मु. गोत्वादिषु तु. – जे. १, जे. ३; ११ पराजितमत्रेति – अ, ब; १२ यायति – अ, ब; १३ [ ] एतच्चिह्नान्तर्गतः पाठः ड – पुस्तके नास्ति । १४ [ ] एतच्चिह्नान्तर्गतः पाठः ड पुस्तके नास्ति । १५ अथ शब्दः – अ । १६ अयथानेनेकेषु – आदर्शपुस्तके ।

## न्यायकन्दली

सत्तासम्बन्धस्य तन्निवृत्तौ निवृत्तिसिद्धिः। कुतस्तर्हि सामान्यादिषु सत्सदित्यनुगमः? स्वरूपसत्त्वसाधर्म्येण सत्ताध्यारोपात्। तर्हि मिथ्याप्रत्ययोऽयम्? को नामाह नेति। भिन्नस्वभावेष्वेकानुगमो मिथ्यैव, स्वरूपग्रहणन्तु न [1]मिथ्या, स्वरूपस्य यथार्थत्वात्। द्रव्यादिष्वपि सत्ताध्यारोपकृत एवास्तु प्रत्ययानुगमः? नैवम्, अ[2]सति मुख्येऽध्यारोपस्यासम्भवात्। न चेयं सामान्यादिष्वेव मुख्या, बाधकसम्भवाद् द्रव्यादिषु च तदभावात्।

बुद्धिलक्षणत्वमिति। बुद्धिरेव [3]लक्षणं=प्रमाणं येषां ते बुद्धिलक्षणाः, विप्रतिपन्नं प्रति सामान्यादिसद्भावे बुद्धिरेव लक्षणं नान्यत्, द्रव्यादिसद्भावे त्वन्यदपि तत्कार्य्यं प्रमाणं स्यादित्यर्थः। कश्चित्पुनरेवमाह–बुद्ध्या लक्ष्यन्ते प्रतीयन्त इति बुद्धिलक्षणाः। तदयुक्तम्, द्रव्यादेरपि स्वबुद्धिलक्षणत्वान्नेदं वैधर्म्यमुक्तं स्यात्।

[**टि०**] नुपपत्तेर] न्वयस्य [4]चेद्वक्तृत्वं तदा [5]त्रयः सत्तारहिताः, [6]अपरसामान्यरहितत्वात्, [7]न यदेवं न तदेवं यथा द्रव्यमिति [8]व्यतिरेकानुमानम्। **द्रव्यादिषु** इति–तस्य बाधकस्याभावात्। **बुद्धिरेव लक्षणं** इति भिन्नेषु गोपिण्डेषु एकाकारः प्रत्ययः पिण्डातिरिक्तविषयः एकाकारप्रत्ययत्वात्, वस्त्रचर्मकम्बलेषु नीलप्रत्ययवत् इत्यादिप्रकारेण सर्वेषां

[**पं०**] संशयो जातः। ततस्तद्व्यवच्छेदाय विशेषपरिकल्पनम्। एवं तत्रापि सामान्यं तत्रापि विशेष इत्यनवस्थिते गमनिका। पूर्वं सत्ताविशेषसमवायेषु सत्तासम्वन्धो निरस्तः, संप्रति गोत्वाद्यपरसामान्येषु तं निरस्यन्नाह–**गोत्वादिष्वपरजातिसम्बन्धेन व्याप्तस्य सत्तासम्बन्धस्य तन्निवृत्तौ निवृत्तिसिद्धिरिति**। [9][अपरजातिसंबंधेनेति =सामान्यविशेषवत्त्वेन, तन्निवृत्ताविति =अपरसामान्यवृत्तौ, निवृत्तिसिद्धिरिति = ] सत्तासम्बन्धनिवृत्तिसिद्धिरित्यक्षरार्थः। भावार्थस्त्वयम् = यत्र सत्तासम्बन्धस्तत्रापरसामान्यमपि भवति। यथा द्रव्ये। अन्वये हि साधनधर्मोच्चारणादनन्तरं साध्यधर्मोच्चारणे साधनं च सत्तासम्बन्धो व्याप्यत्वात्। व्यतिरेके विपर्ययः। इह तु गोत्वादावपरसामान्यं शाबलेयबाहुलेयत्वादिकं निवर्त्तमानं सत्तासम्बन्धमपि निवर्त्तयति[ति]। परवाक्यं **द्रव्यादिष्वपीत्यादि**। [10][**श्रीधरवाक्यं नैवमित्यादि। न चेयमिति**– इयं = सत्ता। **तदभावादिति** = बाधकाभावात्। **सामान्यादिसद्भावे बुद्धिरेव प्रमाणमिति**–अनुवृत्तिबुद्धि-व्यावृत्तिबुद्धि-इहेति बुद्धयो यथाक्रमं सामान्यविशेषसमवायानां प्रमाणमित्यर्थः। **बुद्धिरेव लक्षणमिति पाठान्तरम्**। तत्र लक्षणशब्देन प्रमाणम्। **तत्कार्यं प्रमाणं स्यादिति**–बुद्धिकार्यं प्रमाणं भवेदित्यर्थः। प्रमाणं हि सर्वबुद्धिकार्यमिति गमनिका। बुद्धि

[**कु०**] ननु यदि सामान्ये सत्सदिति प्रत्ययेमित्यं [मिथ्या]! तर्हि किं तदसदेवेत्यत आह **भिन्नस्वभावेष्विति** (कं. १९.१२)। यदिदं भि[न्नत्वं] तदनुगतिनिष्ठत्वमित्यर्थः। ननु द्रव्यादिष्वपि **बुद्धिलक्षणत्वमस्त्येवे**त्यत आह–[11]विप्रतिपन्नं प्रती[ति] तत्कार्यमिति। बुद्धिव्यतिरिक्तव्यापकोप(कोप)लक्षणाः प्रतीयन्ते विषयीक्रियन्ते कारणानपेक्षन्ते। यद्यपीदं प्रागभावे नित्यद्रव्ये नित्यगुणेषु वास्ति तथापि त्रयाणां साधर्म्यं भवत्येवेत्यदोषः।

---

१ **मृषा**–कं. १; कं. २। २ सति–कं. १; कं. २। ३ लक्षणं येषां–जे. १; जे. २। ४ चेद् वक्तृत्वं–अ, ब, क; ५ श्रयः–ड; ६ रहितत्वात्–ड; ७ तदेवं तदेवं–अ; तदेवं–ब; ८ व्यतिरेकानुमानत्वम्–अ, ब, क; ९ [ ] एतच्चिह्नान्तर्गतः पाठः 'अ'पुस्तके नास्ति। १० [ ] एतच्चिह्नान्तर्गतः पाठः 'अ' पुस्तके नास्ति। **११** प्रतीकमिदं कं. पुस्तके नास्ति, विप्रतिपन्नसामान्यादिसद्भावे–इत्यादिकं त्वस्ति–सं.

### न्यायकन्दली

अकार्य्यत्वं कारणानपेक्षस्वभावत्वम्, तच्च [1]सामान्ये तावद् व्यक्तेः पूर्वमूर्ध्वं व्यक्तिकाले चावस्थितिग्राहकेण कारणाभावोपलब्धिसहकारिणा भूयोदर्शनजसंस्कारानुगृहीतेन प्रत्यक्षेणैव व्याप्तिवद् गृह्यते। समवायस्याप्यकार्य्यत्वं [2]पूर्वापरसहभावानवक्लृप्तेः, यदि हि पटस्य समवायः पटात्पूर्वं सम्भवति, असति सम्बन्धिनि कस्यासौ सम्बन्धः स्याद्। अथ पटेन सहोत्पद्यते, तदा पटस्यानाधारत्वं प्राप्नोति। अथ पश्चाद्भवति, तथापि पटस्यानाधारत्वमेव, न च [3]कार्य्यत्वमनाधारं युक्तम्, तस्मादकृतकः समवायः। विशेषाणाञ्चाकार्य्यत्वं वस्तुत्वे सति द्रव्यगुणकर्मान्यत्वात् [4]सामान्यसमवायवत् सिद्धम्।

[टि०] बुद्धि[5]लक्षणत्वम्। **तच्च** [6]**सामान्यस्य** इति :–यावदेका घटव्यक्तिरद्यापि नोत्पद्यते तावदन्यस्यां व्यक्तौ सामान्यं दृश्यते, तद्व्यक्तिविनाशे चान्यस्यां दृश्यते, कारणं च सामान्यस्य किमपि न दृश्यते इत्यकार्यत्वम्। **न च** [7]**कार्यमिति**– ननु द्रव्यनाशस्तावद्रूपनाशे कारणं ततो द्रव्यनाशे सति द्वितीये क्षणे रूपनाशात्कार्यरूपमेकं क्षणं निराधारमेव [8]तिष्ठतीति कथमुक्तम्, न च कार्यमनाधारं युक्तमिति ? सत्यम् द्रव्यनाशस्य रूपनाशं प्रति कारणत्वेनाभ्युपगमात्तत्रैवं क्रियते इह तु निराधारं कार्यं कथमुत्पद्यते इति नाङ्गीक्रियते। [9]**विशेषाणां च** इति – अत्र सामान्येऽन्यव्यवच्छेद्यत्वाभावात् वस्तुत्वे सतीत्यभावव्यवच्छेदार्थं विशेषणं व्यर्थमिति न वाच्यम्, पक्षे सार्थकत्वात्। **सामान्येषु** इति –

[पं०] लक्षण येषां बुद्धया वा लक्ष्यंत इति बुद्धिलक्षणास्तेषां भावो बुद्धिलक्षणत्वमित्युक्तं **व्योमशिवेन** तद्दर्शयति **कश्चित् पुनरेवमाहेत्यादिना**। **स्वबुद्धिग्राह्यत्वादिति**–अत्र **बुद्धिलक्षण**त्वादिति पाठान्तरम्। **पूर्वमिति** = अतीतकाले। **ऊर्ध्वमिति** = भविष्यतिकाले। **व्यक्तिकाल इति** = वर्तमानकाले। **व्याप्तिवद् गृह्यत इति**–यथा व्याप्तिः प्रत्यक्षेण गृह्यते, एवं सामान्यस्यापि कारणानपेक्षस्वभावत्वं प्रत्यक्षेणैव गृह्यत इत्यर्थः। **पूर्वापरसहभावानवक्लृप्तेरिति**– पूर्वापरसहभावनावधारणात्। अनेन कालत्रयाभावो दर्शितं(तः)। **असति सम्बन्धिनि कस्यासौ सम्बन्धः स्यादिति**। द्विष्टत्वात्संबंधस्येति भावः।

[कु०] **कारणाभावोपलब्धीति** (कं. १९.२१) सामान्यस्य हि कारणं भवत्तदाधारतया व्यक्तिरेव स्यात् तथा च तदुपत्तेः प्रागुपलभ्येत। प्रतिव्यक्तिभेदे च सामान्यरूपताहानिरिति तर्कसहकृतेन चक्षुषी[षि] गोत्वाद्यधिकरणाभावोपलब्धिः। ननु यदि चक्षुषि प्रतीयमानमकार्यमिति प्रतीयते तर्ह्येकस्यामेव व्यक्तौ प्रथमत एव दृश्यमानं तथा किं न दृश्यते इत्यत आह–**भूयोदर्शनजेति** (कं. १९.२१)। अनाश्रितत्वं प्राप्नोति। अनाश्रितमुत्पद्यते इति प्रतीतिविरुद्धेति भावः। न च [10]**कार्यमिति** (कं. २०.१) भावरूपं हि कार्यं समवायिकारणवत्, समवायिकारणं च यत्समवेतं कार्यमुत्पद्यते तदेव। तथा च घटस्यानाधारत्वे मृत्पिण्डस्य समवायिकारणत्वव्याघाताद् घटस्यानुत्पत्तिप्रसङ्ग इत्यर्थः।

---

१ सामान्यस्य – जे. १; जे. ३। २ पूर्वपर – जे. १; जे. ३। ३ कार्यम् – जे. १, जे. ३। ४ सामान्यवत्सिद्धम् जे. १; जे. ३। ५ लक्षणम् – ड; ६ सामान्ये मु. किन्तु – जे. १, ३ सामान्यस्य; ७ कार्यत्वं मु. कार्यम् – जे. १, ३; ८ तिष्ठती – अ, ब; ९ विशेषणं वेति – अ, ब, क; १० कार्यत्वम् – कं.।

## न्यायकन्दली

[1]अकारणत्वं समवाय्यसमवायिकारणत्वाभावः, न तु निमित्तकारणत्वप्रतिषेधः, बुद्धिनिमित्तत्वाभ्युपगमाद् । असामान्यविशेषवत्त्वम् अपरजातिरहितत्वमित्यर्थः । सामान्येषु सामान्यन्नाम नापरं सामान्यमस्ति, [2]तत्रापि सामान्यप्राप्ताऽनवस्थानात् । विशेषसमवाययोस्तु सामान्याभावे कथित एव न्यायः । कथं तर्हि सामान्येषु प्रत्ययानुवृत्तिः सामान्यं सामान्यमिति ? अनेकव्यक्तिसमवायोपाधिवशाद् विशेषेष्वप्येकशब्दप्रवृत्तिः, अत्यन्तव्यावृत्तिबुद्धिजनकत्वस्य सर्वत्र [3]सम्भवात् । नित्यत्वं विनाशरहितत्वम्, तदपि सामान्यस्य व्यक्त्युत्पादविनाशयोरवस्थितिग्राहिणा भूयो भूयः प्रवृत्तेन निरुपाधिप्रत्यक्षेण व्याप्तिवन्निश्चीयते । समवायस्य तु सर्वत्र कार्य्योपलम्भादकृतकत्वाच्चानुमीयते । अर्थशब्दानभिधेयत्वञ्चेति । स्वसमयार्थशब्दानभिधेयत्वं चैतेषां साधर्म्यम् । चः समुच्चये ।

**[टि०]** सामान्यमित्यत्र [4]यण् प्रत्ययो घटत्वादिजात्यपेक्षया, सामान्यत्वमित्यत्र [5]तु 'त्व' प्रत्ययः सामान्यत्वजा(न्यजा)त्यपेक्षयेति । ननु सर्वेषु गोत्वादि[6]सामान्येष्वनुवृत्तप्रत्ययहेतोः सामान्यस्यैकत्वाद् व्यक्तेरभेद इति [7]बाधकवशात्तत्र सामान्यान्तरप्रसङ्गस्यैवाभावात्कथमनवस्था दूषणं सम्बध्यते ? [8]सत्यम्, सर्व[9]सामान्यसामान्ये सामान्ये सामान्यप्रत्यय इतरेषु च सामान्येष्वेकनिबन्धन इति [10]पुनः सर्वव्यापकं सामान्य[11]मेकं मन्तव्यमित्याद्यनवस्थाप्रसङ्गो भवत्येव । **विशेषसमवाययोस्तु** इति – विशेषेषु [12]रूपहानिः समवायऽसम्बन्धः ।

**[पं०]** **ननु** व्यक्त्यभेदो जातिबाधकस्तत्कथमत्र व्यक्तिभेदेऽपि न सामान्यमित्याह – **सामान्येषु सामान्यत्वमित्यादि** । **तत्रापीति** = सामान्यत्वेऽपि । **विशेषसमवाययोस्तु सामान्याभावे कथित एव न्याय इति** विशेषेष्वपि सामान्यसद्भावे **संशयस्यापि संभवात्** निर्णयार्थं विशेषानुसरणेऽप्यनवस्थैव । समवायेऽपि सत्ताऽभ्युपगमे तद्वृत्यर्थं समवायान्तराभ्युपगमात् अनिष्टापत्तिरेव दूषणमित्येतेन पूर्वोक्तेन सन्दर्भेणेति ज्ञेयम् ।] **श्रीधर** उत्तरयति – **अनेकव्यक्तिसमवायोपाधिवशादिति** – कोऽर्थः ? यथैकं सामान्यमनेकासु व्यक्तिषु वर्तते तथाऽन्यदपीत्यनेकव्यक्तिवृत्तिमुपाधिमाश्रित्यैकशब्दप्रयोगः **सामान्यं** सामान्यमित्यर्थः । **विशेषेष्वप्येकशब्दप्रवृत्तिरिति** अयं विशेषोऽयं विशेष – इत्येवंरूपा । **नित्यत्वं विनाशरहितत्वमिति**

**[कु०]** सामान्यसमवाययो तर्कसहधर्मिग्राहकप्रमाणावेद्यं, विशेषाणां तु प्रमाणान्तरावेद्यमिति क्रमः । **विशेषाणां चेति** (कं. २०–२) अविशिष्टतया सङ्कीर्णानां विशेषोत्पत्तौ स्वभावपरावृत्तिप्रसङ्ग इत्यनुकूलतर्को द्रष्टव्यः । **बुद्धिनिमित्तत्वाभ्युपगमादिति** (कं. २०.४) – घटत्वादिसामान्यस्येति शेषः । **अपरजातिरहितत्वमिति** (कं. २०.५) सत्ताविरहप्रागेव प्रतिपादनाद्विशेषनिषेधेपि न शेषाऽभ्यनुज्ञा । [13]तत्रापीति – (कं. २०–६) अनङ्गीकारे सामान्यत्वव्याघात इत्यर्थः । अयं च सामान्यं सामान्यमित्यनुवृत्तिप्रत्ययविषयत्वादित्यस्य प्रतिकूलस्तर्कः । **सर्वत्र कार्योपलम्भादिति** (कं. २०.११) नित्येष्वनित्येषु चेहप्रत्ययोपलम्भात्तद्वृतेः समवायस्याश्रयविनाशादिविनाशकारणाभावादिति भावः ।

---

१ अकारणवत्वं – जे. ३ । २ अत्रापि सामान्यप्राप्त्यावस्थानात् – कं. १; कं. २ । ३ भावात् – जे. १; जे. ३ । ४ ष्यण् – ड; ५ तु प्रत्ययः – अ, ब; ६ सामान्ये सामान्यसामान्यप्रत्यय – अ, ब; ७ बाध – ड; ८ सत्या – अ; ९ सर्वसामान्यसामान्ये – क; सर्वसामान्यसामान्य – अ, ब; १० पुरः – ड; ११ मेकन्तच्च – ड; १२ हानिः – अ, ब, क; १३ अत्रापि – कं. ।

### प्रशस्तपादभाष्यम्

[36] पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः [1]स्वात्मन्यारम्भकत्वं [2]गुणवत्त्वं कार्य्यकारणाविरोधित्वमन्त्यविशेषवत्त्वम् ।

### न्यायकन्दली

[36] इदानीं द्रव्याणामेव साधर्म्यं निरूपयति–पृथिव्यादीनामिति । पृथिव्यादीनामेव [3]द्रव्यत्वेन सामान्येन योगः सम्बन्धः । स [4]कियतामित्यत आह–नवानामपीति । अपिशब्दोऽभिव्याप्त्यर्थः । एतेन द्रव्यपदार्थस्येतरेभ्यो भेदलक्षणमुक्तम् । द्रव्यशब्दस्य प्रवृत्तिनिमित्तञ्च चिन्तितम् ।

अत्र कश्चित् चोदयति–द्रव्यत्वयोगो द्रव्यत्वसमवायः, स च पञ्चपदार्थधर्मत्वात् कथं द्रव्यलक्षणमिति । अपरः समाधत्ते–यद्यपि सर्वत्राभिन्नः समवायः, तथापि द्रव्यत्वोपलक्षणभेदाद् द्रव्यस्य लक्षणम्, दृष्टो हि कल्पितभेदस्याप्याकाशस्य श्रोत्रभावेनार्थक्रियाभेद इति । द्वयमप्येतदसाधीयः, यथाकाशं श्रोत्रं नैवं योगो द्रव्यस्य लक्षणम्, किन्तु द्रव्यत्वमेव, तत्त्वसम्बद्धं लक्षणं न स्यादिति योगसङ्कीर्त्तनं लिङ्गस्य

[टि०] [36] [ द्रव्यपदार्थे साधर्म्यवैधर्म्यनिरूपणम् । ]

द्रव्यादिभ्यस्यानित्यत्वकार्यत्वार्थे [5]शब्दाभिधेयत्वादिके साधर्म्ये प्रतिपादिते [6]सामान्यादित्रयस्य तद्विपर्ययः साधर्म्यं लब्धनेवाव्[प]स्या परं सुखबोधार्थं शब्देनाप्युल्लिखितमिति ।

[पं०] प्रध्वंसाभावेन व्यभिचारो मा भूदिति–उत्पत्तिग्रहणं न [7]क्षतम् । प्रध्वंसाभावो हि उत्पत्तिमानपि विनाशरहितः । विनाशरहितत्वादेव च नित्यः । व्यक्त्युत्पादविनाशयोरिति–व्यक्त्युत्पादविनाशयोः सतोरित्यर्थः । निरुपाधिप्रत्यक्षेणेति =निर्दोषप्रत्यक्षेण । सर्वत्र कार्योपलंभादिति = इह प्रत्ययोपलंभात् । कार्यं हि कारणेन सह सम्बद्धं स्यादिति भावः ।

[36] इतरेभ्य इति–गुणादिभ्यः । स चेति = समवायः । पञ्चपदार्थधर्मत्वादिति = द्रव्यगुणकर्मसामान्यविशेषधर्मत्वात् । अपर इति व्योमशिवः । द्रव्यत्वोपलक्षणभेदाद् द्रव्यस्य लक्षणमिति–द्रव्यत्वोपलक्षितः समवायो द्रव्यस्य लक्षणम् । नत्वन्योपलक्षित इत्यर्थः । श्रोत्रभावेनार्थक्रियाभेद इति–श्रोत्ररूपं हि नभः शब्दं शृणोति न शेषम् । द्वयमप्येतदिति चोद्यमुत्तरं च । योग इति–समवायः । किन्तु द्रव्यत्वमेवेति–को भावः ? द्रव्यत्वमेव द्रव्यस्य लक्षणम्,

[कु०] [36] अत्र कश्चिदिति (कं. २०.२०) सामान्यस्य स्वविषयसर्वगतत्वमपश्यन् समवायस्य च लक्षणं पश्यन्निति विशेषः । अपर इति (कं. २०.२२) सामान्यस्य स्वविषयसर्वगतत्वं पश्यन्निति शेषः । द्वयमप्येतदिति (कं. २०.२४) स्वविषयसर्वगतेन सामान्येन लक्षणसिद्धौ समवायस्य लक्षणत्वकल्पनया चोद्यपरिहारावसङ्गताविल्यर्थः । तथा च द्रव्यत्वेनैव भेदः ।

---

१ स्वात्मनारम्भकत्वम्–ता. । २ गुणवत्त्वं च–दे. । ३ द्रव्यत्वेन योगः–जे. १, जे. ३ । ४ कियतामत–कं. १, कं. २ । ५ शब्दाभिधियादिके–अ, ब; ६ सामान्यत्रयस्य–अ, ब, क; ७ कृतम्–अ ।

## न्यायकन्दली

धर्मिण्यस्तित्वकथनम् । तथा चैवं प्रयोगः–पृथिव्यादिकमितरेभ्यो भिद्यते द्रव्यत्वात्, येषामितरेभ्यो भेदो नास्ति तेषां द्रव्यत्वमपि नास्ति, यथा रूपादीनामिति । तस्मादसच्चोद्यमसदुत्तरञ्च ।

अन्यदपि द्रव्याणां साधर्म्यमाह–[1]स्वात्मन्यारम्भकत्वमिति, स्वात्मन्यारम्भकत्वं स्वसमवेतकार्य्यजनकत्वमित्यर्थः । गुणवत्त्वं गुणैः सह सम्बन्धः । [2]एतदप्युभयं गुणादिभ्यो द्रव्याणां वैधर्म्यमन्यत्रासम्भवात् । कार्य्यकारणाविरोधित्वम् । गुणो हि क्वचित्कार्य्येण विनाश्यते, यथा आद्यः शब्दो द्वितीयशब्देन । क्वचित्कारणेन विनाश्यते, यथा अन्त्यः शब्द उपान्त्यशब्देन । कर्मापि कार्य्येण विनाश्यते, यथोत्तरसंयोगेन । द्रव्याणि तु [3]न स्वकार्य्येण विनाश्यन्ते नापि स्वकारणेनेति कार्य्यकारणाविरोधीनि । नित्यानां कारणविनाशयोरभावादेव कारणेनाविनाशः, अनित्यद्रव्याणां कारणविनाशयोः सम्भवेऽपि [4]कारणेन न विनाशः, किन्त्वन्येनेति विवेकः । तथा अन्त्य[5]विशेषवत्त्वमन्त्यविशेषयोगित्वमित्यर्थः ।

[**टि०**] यथाऽन्त्यः शब्द इति :– ननु यदाऽन्त्यशब्द उपान्त्यशब्देन [6]नाश्यते तदा विनश्यतैवो [7][पान्त्य शब्देनोत्पन्नमात्र एव नाशनीयः, ततश्चान्त्यशब्द उत्पन्नो विनष्टश्चेत्येकक्षणमात्रतः कस्मिन्क्षणेऽर्थक्रियां करोतीति] [8]तदर्थं केचिदुपान्त्यशब्द[9]प्रध्वंसस्य कारणत्वं मन्यन्त इति । **नित्यानाम्** इति ।

[**पं०**] न तु समवाय इति भावः । **लिंगस्य धर्मिण्यस्तित्वकथनमिति**–पक्षधर्मत्वकथनम् । यथा लिंगेऽविनाभाव एव गमकः । पक्षधर्मत्वं तु नियतधर्मत्वप्रतिपादनायाह । न ह्यग्नेर्धूमादिलिंगस्यास्तित्वगमकं किन्तु धूम एव गमकः । परसंबद्ध एवासौ गमक इति तस्यास्तित्वं धर्मिणि कथ्यते । एवमत्रापि द्रव्यत्वमेव लक्षणम्, समवायस्तु नैयत्यायेति तात्पर्यम् । **द्रव्यत्वयोगादिति** अत्र द्रव्यत्वादिति **पाठान्तरम्** । [10]**द्रव्यत्वयोगोऽपि नास्तीति**–अत्र **द्रव्यत्ववत्त्वमपि नास्तीति पाठान्तरम्** । **द्रव्याणां वैधर्म्यमिति**–गुणाद्यपेक्षया । **अन्यत्रेति** = गुणादौ । **उपान्त्यशब्देनेति** = अंत्यादर्वाचीनेन शब्देन । **अन्येनेति** = मुद्गरादिना ।

[**कु०**] [11]**एतदपीति** (कं. २१.२) अपि शब्दाद्द्रव्यत्व[म]पि । तत्र द्रव्यत्वमपि तत्र द्रव्यव्यवहारनिमित्तं । द्रव्यत्वम् । समवायिकारणत्वम् । गुणवत्त्वे तु तस्यैव व्यवस्थापके इति भावः । **द्रव्याणित्विति** (कं. २१.७) उभयथाऽपि तृतीये क्षणे कार्यस्यानवस्थानप्रसङ्ग इति भावः । [12]**अनित्यानामिति** (कं. २१.९) कार्येण सतापीति शेषः । किन्त्वन्येनाश्रयविनाशेनासमवायिविनाशेन वाऽनित्यत्वद्रव्यत्वे सतीति विशेषणीयम् ।

[13]अतत्परिहृत्य चार्थं व्याचष्टे **अन्त्यविशेष[व]त्व** (कं. २१.१४) मनाश्रितत्वं चेति चार्थ इति ।

---

१ स्वात्मन्यारम्भकत्वमिति, स्वसमवेत – कं. १, कं. २ । २ एतदप्युभयं द्रव्याणां – जे. १, जे. ३ । ३ न कार्य्येण विनाश्यन्ते न कारणेन–कं. १, कं. २ । ४ कारणेनाविनाशः–पा. २.४ पु., जे. १, जे. ३ । ५ विशेषत्वं–जे. ३ । ६ नादृश्यते – अ; ७ केचित् पदं [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोरावृत्तः । ८ केचिद् – अ, ब, क; ९ प्रशस्य–अ, ब, क; १० द्रव्यत्वात्–कं. । ११ अन्यदपि – कं. । १२ अनित्यद्रव्याणां–कं. । १३ अवयविद्रव्याणि परित्यज्य इति कन्दल्यां पाठः ।

### प्रशस्तपादभाष्यम्

[37] अनाश्रितत्वनित्यत्वे चान्यत्रावयविद्रव्येभ्यः ।
पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वापरजातिमत्त्वे ।
क्षितिजलज्योतिरनिलमनसां क्रियावत्त्वमूर्त्तत्वपरत्वापरत्ववेगवत्त्वानि ।

### न्यायकन्दली

[37] अनाश्रितत्वं क्वचिदप्यसमवेतत्वम्, नित्यत्वं विनाशरहितत्वञ्च द्रव्याणां साधर्म्यम् । तत्किं [1]सर्वेषां साधर्म्यमित्यत आह–अवयविद्रव्येभ्योऽन्यत्रेति । अवयविद्रव्याणि परित्यज्यान्त्यविशेषवत्त्वानाश्रितत्व[2]नित्यत्वान्यन्यत्र सन्तीत्यर्थः । न केवलं पूर्वोक्ताः पृथिव्यादीनां धर्म्माः, किन्त्वनाश्रितत्वनित्यत्वे चेति चार्थः ।

[3]इदानीं द्रव्याणामेव परस्परसाधर्म्यं वैधर्म्यञ्च प्रतिपादयन्नाह–पृथिव्युदकज्वलनपवनात्ममनसामिति । अनेकत्वं प्रत्येकं व्यक्तिभेदः । अपरजातिमत्त्वमिति पृथिवीत्वादिजातिसम्बन्धित्वम् ।

क्षितिजलज्योतिरनिलमनसां क्रियावत्त्वमूर्त्तत्वपरत्वापरत्ववेगवत्त्वानीति । क्रियावत्त्वमुत्क्षेपणादिक्रियायोगः । [4]मूर्त्तत्वमवच्छिन्नपरिमाणयोगित्वम् । परत्वापरत्व[5]वेगवत्त्वानि परत्वापरत्ववेगसमवायः ।

[टि०] [37] [6]ननु नित्यद्रव्येष्वेवकारणेन [7]नाशस्यासम्भवात् कारणेति विशेषणस्यानर्थक्यम्, अविनाश इत्येतावत् एवोपयुक्तत्वात् ? न, अनित्यद्रव्येषु चरितार्थत्वात् । **विषयस्य वैलक्षण्यम्** इति–यथा घटत्वनिबन्धनो घटव्यवहारः सर्वेष्वपि घटेषु सर्वत्रावस्थितेषु भवति । न [8]त्वेकदिगवस्थानमपेक्षते, तथाऽत्रापि संयुक्तसंयोगाल्पत्वबहुत्व[9]सन्निकृष्टादिबुद्धिमात्रनिमित्तक एव परापरव्यवहारः स्यात् न त्वेकदिग्व[गव]स्थानापेक्षः बुद्धेः विषयमात्रालम्बनत्वात्, गुणान्तरस्य चैकदिगवस्थामजनितस्यानभ्युपगमात् ।

[पं०] [37] **अवयविद्रव्याणि परित्यज्यान्त्यविशेषवत्त्वानाश्रितत्वनित्यत्वान्यन्यत्र सन्तीति**–अन्त्य विशेषाणां नित्यद्रव्यवृत्तित्वात् अवयविनस्त्ववयवारभ्यत्वादनित्यत्वात्तदभाव इति द्रष्टव्यम् । **इति चार्थ इति**=इति चकारस्यार्थः ।

[कु०] [37] ननु द्रव्याणीत्याकाशकालदिक्ष्वनेकत्वं दृश्यतेऽत आह **प्रत्येकमिति** (कं. २१.१९) । पृथिवीत्वादिजातिसम्बन्धित्वमिति द्रष्टव्यम् । [द्रव्य]त्वजात्यपेक्षया अपरजातिमत्त्वमित्यर्थः ।

'आत्मा जानाति', 'आकाशं विद्यते' इति सर्व्वेषामपि क्रियावत्त्वं दृश्यतेऽत आह–**उत्क्षेपणादीति** (कं. २१.२४) । परत्वापरत्वयोर्गुणकाण्डान्तःपातिनोरपि([10]सुभाषितरुचितयोप(रि)ह विचारमारभते [11]स उक्तेति) [भाष्योक्त्यो-

१ किं सर्वेषामित्यत आह–जे. १, जे. ३ । २ नित्यत्वान्यत्र–जे. १, जे. ३ । ३ पृथिव्यादीनां द्रव्याणामेव–कं. १, कं. २ । ४ मूर्तत्वं च असर्वगतद्रव्यपरिमाणं मूर्तिः–टिप्पण जे. १ । ५ °वेगवत्त्वानीति–जे. १, जे.३ । ६ न च नित्य–अ, ब; ७ नाशशब्दस्या–अ, ब; ८ चैक–अ, ब, क; ९ सन्निकृष्टादिमात्र–अ; १० अत्र कदाचिद् [ ] एतच्चिह्नान्तर्गतः पाठः स्याद् आदर्शपुस्तकस्थः पाठोऽत्रासमीचीनो भाति । ११ संयुक्त–

### न्यायकन्दली

संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वयोरेव परापरव्यवहारहेतुत्वात् परत्वापरत्वे न स्त इति केचित्, [1]तन्न, भिन्नदिक्सम्बन्धिनोः सत्यपि संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वसद्भावे सत्यपि च द्रष्टुः शरीरापेक्षया सन्निकृष्टविप्रकृष्टबुद्धयोरुत्पादे परापरप्रत्ययाभावात् । एकस्यां दिश्यवस्थितयोः पिण्डयोस्तथा प्रत्यय इति चेत्? अस्ति तर्हि संयोगाल्पीयस्त्वभूयस्त्वाभ्यां विषयान्तरम्, विषयवैलक्षण्यमन्तरेण विलक्षणाया बुद्धेरनुत्पादात् । वेगोऽपि गुणान्तरम्, न क्रियासन्ततिमात्रम्, मन्दगतौ वेगप्रतीत्यभावात् । क्रियाक्षणानामाशूत्पादनिमित्तो वेगव्यवहार इति चेत् ? न, अलातचक्रादिषु क्रियाक्षणानां निरन्तरोत्पादव्ययवतां प्रत्येकमन्तराग्रहणेनाशूत्पादस्य प्रत्यक्षेणाप्रतीतेः, वेगप्रत्ययस्य च भावात् । व्यक्ता च लोके क्रियावेगयोर्भेदावगतिः, वेगेन गच्छतीति प्रतीतेः ।

[टि०] **अलातचक्रादिषु** इति ननु [2]क्रियाक्षणानामन्तरस्य यदग्रहणं तन्निमित्त एव वेगव्यवहारो भविष्यति नाशूत्पादनिबन्धन इति? [3]नायमनुपलम्भदोषः वेगेन गच्छतीत्यत्रापि क्रियाक्षणोत्पा[4]दाप्रत्यक्षत्वेन गच्छतीत्यर्थे द्वयोः शब्दयोर्वेगं गुणान्तरं विनापि सार्थकत्वम् ?नैवम् । स्तोकवे[5]गेऽन्तरप्रतीतौ [6]वेगप्रतीत्यभावप्रसङ्गात् ।

[पं०] **अवच्छिन्नपरिमाणयोगित्वमिति**–असर्वगतपरिमाणयोगित्वमित्यर्थः । **संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वयोरेव परापरव्यवहारहेतुत्वात् परत्वापरत्वे न स्त इति केचिदिति**–[7]कोऽर्थः ? यत्र प्रमातरि व्यापारिते करणेऽपेक्षाबुद्धिः समस्ति । तेन संयुक्तायाऽसौभूमिस्तदवयवानां ये संयोगाः परस्यापरस्य च द्रव्यस्य प्रमातुश्चान्तराले, तेषां भूयस्त्वे परत्वम्, अल्पीयस्त्वे चापरत्वमित्यर्थः । **भिन्नदिक्संबन्धिनोरिति**–वामदक्षिणदिक्संबन्धिनोः पिण्डयोः । **तथा प्रत्यय इति**=परापरप्रत्ययः । **विषयान्तरमिति**–एकदिगवस्थानलक्षणम् । **विषयवैलक्षण्यमिति**–परत्वापरत्वलक्षणम् । **विलक्षणाया बुद्धेरिति**=परापरबुद्धेः । **मन्दगतौ वे[ग]प्रतीत्यभावादिति**–अन्यथा मन्दगतावपि क्रियासन्ततिमात्रमास्थ्यं वेति भावः । **प्रत्यक्षेणाप्रतीतेरिति** क्षणिकत्वेन विनष्टत्वादिति भावः ।

[कु०] स्तयोरिह विचारमारभते संयुक्तेति] (कं. २१.२६) । **अस्ति तर्हीति** (कं. २२.४) परापरव्यवहारौ संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वसन्निकृष्टविप्रकृष्टबुद्धयेकदिगवस्थानव्यतिरिक्तविषयौ । तेषु सत्स्वपि प्रमातर्यनुत्पत्तेरिति भावः । यद्यपि द्वितीयादिकर्मकारणतया क्रियाव्यतिरिक्तो वेगोऽनुमातुं शक्यते उक्तं च सूत्रकृता (नोद) "नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारः तथोत्तरमुत्तरं च" (वै. सू. ५.१.१७) इति तथापि तत्र प्रत्यक्षमपि सुप्रसिद्धमित्याह **वेगोऽपीति** (कं. २२.६) । **मन्दगतादिति** (कं. २२.६) लोके प्रतीयते । समुत्कटविषयत्वात् क्रियासन्ततिप्रतीतावपि यस्यासमुत्कटत्वात् स्फटिकादौ गन्धस्येव च मन्दगतिव्यवहाराः स । वेगः शीघ्रगतौ चन्दनादौ गन्ध इव प्रत्यक्षसिद्ध इति भावः । व्यवहारस्य भावाभावयोरन्यथासिद्धिमाशङ्क्य परिहरति **क्रियाक्षणेति** (कं. २२.७) । ननु क्रियाक्षणानां नैरन्तर्यानुमानकृतोऽयं वेग-व्यवहारः कथं लौकिकप्रतीतिकृत इत्यत आह **व्यक्ता चेति** (कं. २२.९) ।

---

१ न–कं. १, कं. २ ।　२ क्रियामन्तरस्य–अ, ब;　३ नायमलम्भ–ड;　४ पादाप्रत्यक्षत्वेन;　५ गेन्तरप्रतीतौ–अ;
६ प्रतीत्यभावात्–अ, ब, क;　७ अतः पराणि सप्त पत्राणि–'अ' पुस्तके नोपलभ्यन्ते ।

प्रशस्तपादभाष्यम्

[38] आकाशकालदिगात्मनां सर्वगतत्वं परममहत्त्वं सर्वसंयोगिसमानदेशत्वं[1]ञ्च ।

न्यायकन्दली

[38] आकाशकालदिगात्मनां सर्वगतत्वमित्यादि। सर्वशब्देनात्र प्रकृतापेक्षयानन्तरोक्तानि मूर्त्तद्रव्याणि परामृश्यन्ते। सर्वगतत्वं सर्वैर्मूर्त्तैः सह संयोग आकाशादीनाम्, न तु सर्वत्र गमनम्, तेषां निष्क्रियत्वात्। परममहत्त्वमियत्तानवच्छिन्नपरिमाणयोगित्वम्। सर्वसंयोगिसमानदेशत्वं[2] च सर्वेषां संयोगिनां मूर्त्तद्रव्याणामाकाशः समानो देश एक आधार इत्यर्थः। एवं दिगादिष्वपि व्याख्येयम्। यद्यप्याकाशादिकं सर्वेषां संयोगिनामाधारो न भवति, [3]आधारभावेनानवस्थानात्, तथापि सर्वसंयोगाधारत्वात् सर्वसंयोगिनामाधार इत्युच्यते, उपचारात्। अत एव सर्वगतत्वमित्यनेनापुनरुक्तता। तत्र हि सर्वैः सह संयोगोऽस्तीत्युक्तम्। इह तु सर्वेषामाधार इत्युच्यते।

[टि०] [38] सर्वैः मूर्तैः सह इति – युगपत्संयोग इत्यर्थः। ननु यत्राकाशदेशे परमाणु[4]स्तत्र किमाकाश[5]मस्ति न वा? यद्यस्ति तर्हि परमाणोः सावयवत्वम्, यदि नास्ति तदाकाशदेशो नष्टोऽनष्टो वा? नाशे तस्यानित्यत्वम्, अनाशे तु परमाणुमध्येऽवस्थानं वाच्यम्, अवस्थाने पूर्वदोषः, [6]अनवस्थाने आकाशस्याव्यापकत्वम्; नैवम्, परमाणोर्निरवयवत्वेन मध्यासम्भवात् तत्रावस्थानानव[7]स्थानचिन्ताया निरुपपत्तिकत्वात्।

[पं०] [38] मूर्तद्रव्याणीति – क्षितिजलानलानिलमनांसि। सर्वगतत्वं सर्वमूर्तैः सह संयोगः आकाशादीनामिति – अमूर्तैः सह मूर्तानां संयोगो न भवति। अमूर्तानां व्यापकत्वात्, संयोगस्य चाप्राप्तिपूर्वकत्वात्। तेषां च प्राप्तेरभावात्। अप्राप्तानामेव च प्राप्तियोगादिति भावः। तेषां निष्क्रियत्वादिति – निष्क्रियत्वं च व्यापकत्वादवसेयम्। आधारभावेनानवस्थानादिति – आधारो हि आधेयस्याधो भवति। आकाशादिकं तु न तथा, व्यापकत्वात्तस्येति भावः। सर्वसंयोगाधारत्वादिति – सर्वसंयोगिनां योऽसौ आकाशादिना सह संयोगस्तदाधारत्वादित्यर्थः। सर्वसंयोगिनामाधार इत्युच्यते उपचारादिति – संयोगस्य समवेतत्वात्समवायस्य चाश्रयाश्रयिभावेन स्थितत्वात्रोपचर्याधा[र]भावयतेति परमार्थः।

[कु०] [38] ननु सर्वगतत्वं सर्वैः संयोगो विवक्षितः समवायस्यासम्भवात्। तत्र न गुणादिभिः संयोगो द्रव्यत्वात्। परस्परं आकाशादीनां न क्रिया। (न)दः संयोगः अमूर्तत्वात् तदभावात् न संयोग[गो](चोपि)[नापि] अजश्च संयोगो "नाजः संयोग इति निषेत्स्यते तस्मादनुपपन्नमित्याह – सर्वशब्देनेति (कं. २२.१३)। इयत्तानवच्छिन्नेति (कं. २२.१५) हस्तमितस्त्यादिपरिमितप्रभावे अणुत्वावान्तरपरमाणुत्वपरि[मा]णवन्महत्त्वावान्तरपरममहत्त्वमपि परिमाणमाकाशादिषु स्वीकर्तव्यम्। अणुमहत्त्वयोरुभयोरपि परिमाणभेदत्वाविशेषात् इयत्तापचयपरिमाणत्वे सङ्ख्यागुरुत्वयोरपि परिमाणत्वप्रसङ्गः। आधारभावेनेह प्रत्ययविषयत्वेन। अत एवेति (कं. २२.२०) कृत्तद्धितसमासेषु सम्बन्धाभिधानत्वं तुल्यमिति न्यायात्। मूर्तसंयोगित्वं मूर्तसंयोगः। संयोगाधारत्वं संयोगसमवाय इति भेदादिति भावः।

---

१ चेति – कि. दे.। २ देशत्वं सर्वेषां – कं. १; कं. २। ३ अधरभावेन° – जे. १। ४ सूण – अ; ५ मस्ति वा ? – अ, ब; मास्ति न वा – ड; ६ अनवस्था – अ, ब; ७ नस्थान – ड;

### प्रशस्तपादभाष्यम्

[39] **पृथिव्यादीनां** [1]पञ्चानामपि भूतत्वेन्द्रियप्रकृतित्वबाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि ।

### न्यायकन्दली

[39] पृथिव्यादीनामाकाशान्तानामितरवैधर्म्येण साधर्म्यं कथयति–पृथिव्यादीनामिति । भूतत्वं भूतशब्दवाच्यत्वम् । [2]एकनिमित्तमन्तरेणानेकेषु पृथिव्यादिष्वेकशब्दप्रवृत्तिरक्षशब्दवत्, यथा देवनत्वेन्द्रियत्वबिभीतकत्वसामान्यत्रययोगाद्देवनादिष्वक्षशब्दः [3]साङ्केतिकः, तथा पृथिवीत्वादिसामान्यवशात् पृथिव्यादिषु चतुर्षु [4]भूतशब्दसङ्केतः । आकाशे तु व्यक्तिनिमित्त एव भूतं भूतमिति तच्छब्दानुविद्धः प्रत्ययस्तच्छब्दवाच्यतोपाधिकृतः, यथा देवनादिष्वेकोऽक्ष[5] इति प्रत्ययः ।

इन्द्रियप्रकृतित्वमिन्द्रियस्वभावत्वम् । न भूतस्वभावानीन्द्रियाणि, अप्राप्यकारित्वात्, प्राप्यकारित्वं हि भौतिको धर्मो यथा प्रदीपस्येति केचित् । तदयुक्तम्, [6]व्यवहितार्थानुपलब्धेः, यदीन्द्रियमप्राप्यकारि कुड्यादिव्यवहितमप्यर्थं गृह्णीयादप्राप्तेरविशेषात् । योग्यताभावाद् [7]व्यवहितार्थाग्रहणमिति चेत् ? इन्द्रियस्य तावद् योग्यता

[कि०] [39] [8]**एकं निमित्तम्** इति [9]यदि हि भूतत्वं सामान्यमङ्गीक्रियते तदा मूर्तत्वमपि सामान्यमङ्गीकार्यम् । तथा च भूतत्व मूर्तत्वपरिहारेणाकाशे व्यवस्थितम्, मूर्तत्वं तु भूतत्वपरिहारेण मनस्यवस्थितमिति परापरभावानुपपत्तेः पृथिव्यादौ सङ्कर इति परापरभावानुपपत्त्या न भूतत्वमूर्तत्वसामान्यस्वीकारः । यदि तु परापरभावोपपत्तिरहितमेव सामान्यं मन्यते तदा सामान्यद्वयस्वीकारेऽपि न दोषः । तथा [10]**पृथिवीत्वाद्** इति–व्यक्तीनामानन्त्यात् सङ्केतस्य **कर्तुमशक्यत्वात्** पृथिवीत्वादि[11]सामान्यचतुष्टयमाकाशव्यक्तिश्च सङ्केतास्पदमिति । **इन्द्रिय[12]स्वभाववत्त्वम्** इति मनोव्यवच्छेदार्थं बाह्येन्द्रियेति द्रष्टव्यम् । **अभूतस्वभावानि** इति–अन्वये [13]मनोवत् । **विषयस्यापि योग्यता** इति–

[पं०] [39] **एकनिमित्तमन्तरेणेति** नहि भूतत्वं सामान्यमस्ति । **देवनत्वेति**–देवनः पाशकः । **आकाशे च**[14] **व्यक्तिनिमित्त एवेति** तत्र सामान्याभावात् । **तच्छब्दवाच्यतोपाधिकृतेति** न तु घटो घट इति प्रत्ययसारूप्यकृत इत्यर्थः । **इन्द्रियप्रकृतित्वमिति** तनौ व्यवच्छेदाय बाह्येन्द्रियस्वभावत्वमिति व्याख्येयम् । एकीयमतमुपदर्शयति **न भूतस्वभावानीन्द्रियाणीत्यादिना** । **केचिदिति** = बौद्धजैनसांख्याः । **योग्यताभावादिति** = योग्यतायाः अभावादित्यर्थः । नन्वभावः

[कु०] [39-40] [15]नन्विति । यद्यपि बाह्येन्द्रियग्राह्यविशेषगुणत्वं भूतत्वप्रयोजकं तथाप्यनेकजातीयवृत्ते ? (व) *गुणविशेषस्यैकेनैवोपाधिनैकजातिप्रयोजकत्वे परिच्छेदोपाधिकपरिमाणप्रयुक्तं मूर्ति[र्त]त्वमपि जातिः स्यात् ।*

---

१ पञ्चानां भूतत्वमिन्द्रियप्रकृतित्वं–दे. । २ एकं–जे. १ । ३ सङ्केतितः–कं. १, कं. २ । ४ भूतशब्दः सङ्केतितः–कं. १, कं. २ । ५ अक्षप्रत्ययः–जे. १, जे. ३ । ६ व्यवहितानुपलब्धेः–कं. १, कं. २ । ७ व्यवहिताग्रहणम्–जे. १, जे. ३ । ८ एक–मु. ९ यदि भूतत्वं–अ; १० पृथिवीत्वाद्–अ; ११ सामान्यत्रयमाकाश... अ, ब, क; सामान्यत्रयचतुष्टय आकाश...ड; १२ स्वभावत्वम्–ड; १३ मनोभवत्–ड; १४ तु–कं. १५ प्रतीकमिदं कं. पुस्तके न दृश्यते ।

## न्यायकन्दली

**विषयग्रहणसामर्थ्यमस्त्येव तदानीम[1]व्यवहितार्थग्रहणात्, विषयस्यापि योग्यता महत्त्वानेकद्रव्यवत्त्वरूपविशेषाद्यात्मिका व्यवधानेऽपि न निवृत्तैव, आर्जवावस्थानमपि [2]तदवस्थमेव। अथ मतम्–आवरणाभावोऽप्यर्थप्रतीतिकारणं संयोगाभाव इव पतनकर्म्मणि, आवरणे सत्यावरणाभावो निवृत्त इति प्रतीतेरनुत्पत्तिः कारणाभावादिति । नैतत्सारम्, आवरणस्य स्पर्शवद्द्रव्यप्राप्ति[3]प्रतिषेधार्थत्वेनोपलब्धेः, छत्रादिकं हि पततो जलस्य सावित्रस्य च [4]तेजसः प्राप्तिं प्रतिषेधति, न तु [5]स्वस्याभावमात्रं निवर्त्तयति । [6]तथा च सति सुलभमेतदनुमानम्–प्राप्तप्रकाशकं चक्षुः, [7]व्यवहितार्थप्रकाशकत्वात् प्रदीपवत्,**

[**टि०**] नन्वाकाशे महत्त्वमस्ति परं रूपविशेषो नास्ति, द्व्यणुके तु रूपविशेष उद्भूतं रूपमस्ति परं महत्त्वं नास्तीत्य चाक्षुषत्वे द्वयोरप्युद्भूतरूपमहत्त्वयोर्दर्शनं प्रति कारणत्ववचनं युक्तम्, महत्त्वाद्यनेकद्रव्यत्वयो[8]रप्युपादानमनर्थकम्, उद्भूतरूपस्य महतोऽनेकद्रव्यत्वाव्यभिचारेण व्यवच्छेद्याभावात् । [9]सत्यम्, द्वयोरपि दर्शनं प्रति कारणत्वख्यापनार्थमथवा द्वयोरपि तुल्यव्याप्यव्यापकताप्रदर्शनार्थं द्वयोरुपादानम्। ननु द्वयोस्तुल्यव्यापकत्वमसिद्धमिति उद्भूत[10]रूपस्यानेकद्रव्यवतो द्व्यणुकस्य महत्त्वरहितत्वात् ? नैवम्, न विद्यते एकं द्रव्यमाश्रयतया यस्य [11][तदनेकम्, अनेकं द्रव्यमाश्रयतया] विद्यते यस्य तदनेकद्रव्यवत्, सावयवद्रव्यारब्धम् इति व्युत्पत्त्या द्व्यणुकस्यानेकद्रव्यवत्त्वाभावात् । स्थैर्यपक्षाभिप्रायेण घटस्य तत्स्वरूपत्वाद् योग्यताया अनिवृत्तिः । क्षणिकत्वे कुड्याद्यन्तरितस्यापि पुरुषान्तरेणोपलम्भादस्ति तस्मिन्नेव क्षणे योग्यतेति । संयोगाभावः फलादेवृन्तादिनेति । **प्रतीतेः** इति – कुड्यादिव्यवहितस्यार्थस्येति शेषः । **नैतत्सारम्**

[**पं०**] कथं कारणं भवतीत्याह – **संयोगाभाव इव पतनकर्मणीति** सत्यपि हि गुरुत्वे पतनहेतौ यावत्संयोगस्तावत्पतनं न भवति । यथा वृंतसंयोगे बीजपूरस्य, संयोगाभावे पतनम् । इतीति अस्माद्धेतोः । **प्रतीतेरिति** = अर्थज्ञानस्य । **कारणाभावादिति** – आवरणाभावस्य कारणस्याभावात् । **आवरणस्य स्पर्शवद्द्रव्यप्राप्तिप्रतिषेधा[12]र्थत्वेनोपलब्धेरिति** प्राप्तिशब्देन संयोगः । इदमत्रावेदितं भवति – न च स्पर्शवन्तीन्द्रियाणि भवन्मतेऽभौतिकत्वात् । तत आवरणेन

[**कु०**] ततश्च मनसि मूर्तत्वं नभसि च भूतत्वमिति परस्परपरिहारेण वर्त्तमानं जातिद्वयं पृथिव्यादौ सङ्कीर्यतेति भावः । [13]**एकं निमित्तमित्यादि** (कं. २२.२५) को ग्रन्थ एकजातिविरहोपलक्षणपरः । न त्वजादिशब्दवद्भूतशब्दस्यानेकार्थत्व प्रतिपादनपरो भोग्यगुणाश्रयत्वेणे[णै]केनोपाधिसङ्केतसिद्धावनेकार्थकल्पनाया अन्याय्यत्वादिति । प्रकृतिशब्दस्य कारणपर्यायत्वे श्रोत्रं प्रति नभसः कारणत्वाभावोऽत आह – **इन्द्रियस्वभावत्वमिति** (कं. २३.४) । आगामि बांह्यपदसन्निधेर्मनसो वैधर्म्यमनुसन्धेयम् । समानतन्त्रे पञ्चमीनिर्देशश्च तैरेवोपाधिकल्पनया प्रतिविहितः, पृथिव्याभावादिन्द्रियस्वभावत्वेऽभिहिते इन्द्रियाणां पृथिव्यादिस्वभावत्वमर्थान[दु]क्तमिति ।

---

१ °व्यवहितग्रहणात् – जे. १, जे. ३ । २ तदवस्थम् – जे. १, जे. ३ । ३ प्रतिषेधभावोपलब्धेः – कं. १, कं. २ । ४ तेजसः प्रतिषेधति – कं. १, कं. ३ । ५ स्वाभावमात्रं – जे. १, जे. ३ । ६ तथा सति – जे. १, ज. ३ । ७ व्यवहिताप्रकाशकत्वात् – जे. १, जे. ३ । ८ रणुपादान – अ, ब, क; ९ 'सत्यम्' इति अबपुस्तकयोर्नास्ति किन्तु अत्रैव बपुस्तके विषयस्यापि योग्यता इत्यावृत्तम् । १० कूपस्य–अ; न रूपस्य ब; ११ [ ] चिह्नान्तर्गतः पाठः ब पुस्तके नास्ति । १२ प्रतिषेधभावोपलब्धेः – कं. १३ एकनिमित्त ।

न्यायकन्दली

[1]बाह्येन्द्रियत्वाद् वा त्वगिन्द्रियवत् । नन्वेवं तर्हि विप्रकृष्टार्थग्रहणं कुतः ? रश्म्यर्थसंनिकर्षादनुद्भूतरूपस्पर्शा नायना रश्मयो दूरे गत्वा सन्तमर्थं गृह्णन्ति, अत एव महदणुप्रकाशकत्वात् [2]किमिन्द्रियस्य भौतिकत्वं न सिद्ध्यति ? प्रदीपस्येव रश्मिद्वारेण तदुपपत्तेः । यत्र च रश्मयो भूयोभिः स्वावयवैः सहार्थावयविना तदवयवैश्च सह सम्बद्ध्यन्ते, तत्राशेषविशेषास्कन्दितस्यार्थस्य ग्रहणात् [3]स्पष्टं ग्रहणम् । यत्र [4]त्ववयविमात्रेण सम्बन्धस्तत्र सामान्यमात्रविशिष्टस्य धर्म्मिणो ग्रहणा[5]दस्पष्टं ग्रहणम् । यद् गच्छति तत्संनिहित[6]व्यवहितावर्थौ क्रमेण प्राप्नोति । तत्कथं शाखाचन्द्रमसोस्तुल्यकालोपलब्धिरिति चेत् ? इन्द्रियवृत्तेराशुसञ्चारित्वात् [7]उत्पलपत्रशतव्यतिभेदवत्

[टि०] इति – यद्यप्यन्वय[8]व्यतिरेकाभ्यां कुड्यादिसंसर्गप्रागभावस्य कारणत्वावगमात् कुड्याद्यन्तरितत्वे कारणाभावः, तथाप्यावारकं द्रव्यं किमप्यावृण्वत् [9]कार्यं प्रतिषेधयति । नैवमेवेति भूयोभूयस्तथादर्शनादिति ।

[10]तथा च सति इति – ननु व्यवहितार्थप्रकाशकत्वमित्येवं रूपं शिलादावप्यस्ति न तु प्राप्तप्रकाशकत्वमित्यनैकान्तिकत्वम्, नैवम्; प्रकाशकत्वे सति व्यवहितार्थप्रकाशनस्य चिन्तनात् । बाह्येन्द्रियेति–बाह्यग्रहणं मनोव्यवच्छेदार्थम् । अत एव इति । स्वपरिमाणापेक्षया महदल्पं च प्रकाशयतीति तर्कः । अथवा विवादाध्यासितमिन्द्रियम् [11]अभौतिकम्, स्वपरिमाणाधिकपरिमाणप्रकाशकत्वात्, मनोवत् इति परानुमानम् । [12]अत्र अणुग्रहणं दृष्टान्तार्थम्, यथा चक्षुरणुप्रकाशकं तथा महत्[13]प्रकाशकमिति प्रदीपरश्मिभिरनैकान्तिकमित्यर्थः । **क्रमाग्रहणनिमित्तोऽयम्** इति – अत्र कर्मो[14]त्पादकक्षण-संस्कारो[15]त्पादकक्षण - कर्मनाशक्षण - कर्मान्तरोत्पाद[16]क्षणादिक्षणगणनायामितरवेगवत् साधारणे तेजसोऽपि वेगे शाखाचन्द्रमसोस्तुल्यकालोपलब्ध्यनुपपत्तावितरवेगविलक्षणवेगाभ्युपगम एवोत्तरम् । **ननु प्राप्ति इति** – यदि चक्षुरिन्द्रियं

[पं०] तेषामप्रतिघाताद् व्यवहितार्थोपलब्धिः स्यात् । परवाक्यं **नन्वेवं तर्हीत्यादि** । श्रीधरः प्राह **रश्म्यर्थसन्निकर्षादिति** रश्मीनां नयनानामर्थेन विषयेण सह नैकट्यात् । दूरे गत्वा सन्तमर्थं **गृह्णन्तीति** योगः । ननु भौतिकं यावत्परिमाणं तावत्येवार्थक्रियां ... दृष्टम्, यथा कुठारादिकं वटवृक्षादौ । इन्द्रियं तु स्वपरिमाणाधिकमपि वस्तु प्रकाशयति तथा स्वपरिमाणादणवपि प्रकाशयति तत्कथं तस्य भौतिकत्वं युक्तम्, अभौतिकत्वमेव हि प्राप्तमित्याशंक्याह – **अत एव महदणुप्रकाशकत्वादिन्द्रियस्याभौतिकत्वं न सिद्ध्यतीति** । परवाक्यं **यद्गच्छतीत्यादि** । **प्राप्तिपक्षे** इति – नायन-

[कु०] अविप्रतिपद्यमानान् साङ्ख्यानुत्थापयति **न भूतेति** (कं. २३.४) । **तदयुक्तमिति** (कं. २३.६) तदप्राप्यकारित्वं प्रमाणबाधितमित्यर्थः । शङ्कते–**योग्यतेति** (कं. २३.७) । अयमभिसन्धिः – योग्यता हि तादृशइन्द्रियक्षणपरिणाम[:] अर्थक्षणश्च, तयोरप्राप्तयोरेव ग्रहणग्राह्यभावः । व्यवहितविप्रकृष्टाश्च न तादृशा इति तत्किमप्रतीयमानप्राप्तिकल्पनयेति । तत्र प्रतिक्षणपरिणामस्याग्रे निराकरिष्यमाणत्वात् तदतिरिक्तयोग्यता स्वरूपलक्षणा सहकारिलक्षणा

१ बाह्येन्द्रियत्वात् त्वगिन्द्रियवत् – कं. १, कं. ३ । २ किमिन्द्रियस्याभौतिकत्वं – जे. १, जे. ३; पा. २, ४ पु. । ३ स्पष्टग्रहणम् – जे. । ४ अवयवमात्रेण – कं. १, कं. ३; अवयविभागे – जे. ३ । ५ स्पष्टं ग्रहणम् – जे. १, जे. ३ । ६ °व्यवहितार्थौ – कं. १, कं. २ । ७ पलाश° – कं. १, कं. २ । ८ व्यतिरेकाना – अ, ब; ९ त्वार्यं – अ, ब, क; १० तथा सति मु. तथा च सति – जे. १, जे. ३ । ११ अलौकिम् – अ, ब; १२ न्यत्राणु – अ, ब; १३ प्रकाशमिति – अ; १४, १५ त्पाद – ड; १६ कर्म्म तिरोत्पादक्षणो वि – अ, कर्मान्तरोत्पादक्षणादिगणनायाम – ब, क;

## न्यायकन्दली

क्रमाग्रहणनिमित्तोऽयं भ्रमो न तु वास्तवं यौगपद्यम्। ननु प्राप्तिपक्षे [1]सान्तरालोऽयमिति ग्रहणं न स्यात्? न, अन्यथा तदुपपत्तेः। इन्द्रियसम्बन्धस्यातीन्द्रियत्वान्न तदभावाभावकृतौ सान्तरनिरन्तरप्रत्ययौ, किन्तु शरीरसम्बन्धभावाभावकृतौ, यत्र शरीरसम्बद्धस्यार्थस्य ग्रहणं तत्र निरन्तरोऽयमिति प्रत्ययः, यत्र तु तदसम्बद्धस्य ग्रहणं तत्र सान्तर इति।

बाह्यैकैकेन्द्रियग्राह्यविशेष[2]गुणवत्त्वानीति। बाह्यैकैकेन्द्रियेण चक्षुरादिना ग्राह्या ये विशेषगुणा रूपादयस्तैस्तद्वत्ता पृथिव्यादीनामिति। अन्तःकरणग्राह्यत्वमप्येषां गुणानामस्ति, ततश्चैकैकेन्द्रियग्राह्यत्वमसिद्धम्, तदर्थं बाह्यग्रहणम्। एकैकग्रहणं स्वरूपकथनार्थम्।

[**टि०**] प्राप्यमर्थं गृह्णाति तर्हि यथा स्पर्शनेन प्राप्ते [3]निरन्तरः सम्बद्धोऽयमर्थो मया [4][गृहीत इति प्रत्ययो भवति तथा चक्षुरिन्द्रियप्राप्तेऽपि स्यात्, न तु सान्तरोऽसम्बद्धो मया गृहीत इति] सान्तर[5]प्रत्ययस्याप्राप्तिनिबन्धनत्वात्। अस्ति चैवं प्रत्ययः ततोऽप्राप्तस्यैव ग्रहणं मन्तव्यमिति। समाधत्ते [6]**नान्यथा** इति। स्पर्शनगृहीतेऽप्यर्थे संयोगस्य द्विष्ठत्वात् त्वगिन्द्रियस्य चातीन्द्रियत्वात् न तत्रापीन्द्रियसंयोगजनितो निरन्तर[7]प्रत्ययः, किन्तु देहसम्बन्धजनित इति तस्यैव तत्र कारणत्वम्, देहसंयोगाभावस्य तु [8]सान्तरप्रत्यये कारणत्वमिति। **एकैकग्रहणम्** इति–विशेषगुणानां बाह्येन्द्रियेणैकेकेनैव ग्राह्यत्वेन व्यवच्छेद्याभावात्।

[**धं०**] रश्मीनां पदार्थसन्निकर्षे कक्षीयक्रियमाणे इत्यर्थः। **सान्तरालयोऽयमिति। ग्रहणं न स्यादिति**–विप्रकृष्टोऽयमिति ग्रहणं न स्यात्। नायनरश्मयो हि यदि तत्र गत्वाऽर्थं गृह्णन्ति तदा किं दूरं किं वा आसन्नमिति भावः। **श्रीधरः** प्राह **नान्यथा तदुपपत्तेरित्यादि। न तद्भावाभावकृतौ सान्तरनिरन्तरप्रत्ययाविति**–नेन्द्रियसम्बन्धभावाभावकृतौ सान्तरनिरन्तरप्रत्ययौ इत्यर्थः। अत्र चेन्द्रियसम्बन्धभावकृतो निरन्तरप्रत्ययः। इन्द्रियसम्बन्धाभावकृतस्तु सान्तरप्रत्यय इति द्रष्टव्यम्। ननु यथासंख्यमनुसार्य शास्त्रशैल्या यथासंख्यमर्यादाया इह निर्वाहात्।

[**कु०**] वा स्यात्। तदुभयं व्यवहितविप्रकृष्टयोरप्यविशिष्टं प्राप्तिरूपसहकारिवैकल्यमेव केवलमवशिष्यते इत्याह **इन्द्रियस्येति** (कं. २३.८)। अयं प्रयोगः चक्षुरावरणं प्राप्तिप्रतिबन्धकतया आव्रियमाणकार्यं विरुणद्धि आवरणत्वादश्रुवत्। [9]**तथा च सतीति** (कं. २३.१५)–व्यवहितयोरिन्द्रियार्थयोः प्राप्तिव्यतिरिक्तयोग्यत्वे कार्याभावे च सति अनुमानं सुलभम्–अन्यथासिद्धिस्वरूपासिद्धिशङ्काया अनवकाशत्वादित्यर्थः। व्यवहिताप्रकाशत्वादित्यत्र सर्वथाऽप्रकाशकैर्व्यभिचारपरिहाराय प्रकाशकत्वे सतीति विशेषणीयो हेतुः।

न त्वनिन्द्रियस्योपाबृ[धि]त्व[मि]त्याशङ्क्याह **बाह्येन्द्रियत्वादिति** (कं. २३.१६)। अनुपलम्भबाधिता रश्मय इत्यत आह **अनुद्भूतेति** (कं. २३.१७)। ननु यदि रश्मयो निःसरन्ति तर्हि ग्रहणस्पष्टास्पष्टत्वे किं कृते इत्यत आह [10]**यद्रश्मय** (कं. २३.१९)। शङ्कुर्न **यद्गच्छतीति** (कं. २३.२२)।

---

१ सान्तसेऽयमिति–जे. १, जे. ३। २ °गुणवत्त्वमिति–जे. १, जे. ३। ३ निरन्तरसान्तरवेगविलक्षणावबद्धोऽयमर्थो–अ, ब, क; ४ [ ] एतच्चिह्नान्तर्गतः पाठः ब पुस्तके आवृत्तः ५ प्रत्यष्व–अ, प्रत्यक्ष–ब; ६ नान्येषु–ब, क; ७ प्रत्ययम–अ, ब; ८ सान्त–अ, ब; ९ तथा सति–कं.। १० यत्र च रश्मय–कं.।

### प्रशस्तपादभाष्यम्

[40] चतुर्णां द्रव्यारम्भकत्वस्पर्शवत्त्वे ।
त्रयाणां प्रत्यक्षत्वरूपवत्त्व[1]द्रवत्वानि ।

### न्यायकन्दली

[40] चतुर्णां द्रव्यारम्भकत्वस्पर्शवत्त्वे । चतुर्णां पृथिव्युदकानलानिलानाम् । द्रव्यारम्भकत्वं द्रव्यं प्रति समवायिकारणभावः । स च निजा शक्तिरेव । स्पर्शवत्त्वं स्पर्शसमवायः ।

त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्वानि । त्रयाणां क्षित्युदकतेजसां प्रत्यक्षत्वमिन्द्रियजज्ञानप्रतिभासमानता, न तु महत्वादिकारणयोगः, रूपवत्त्वमित्यस्य पुनरुक्तत्वप्रसङ्गात् । नन्वात्मनोऽपि प्रत्यक्षत्वमस्ति ? सत्यम्, बाह्येन्द्रियापेक्षया [2]त्रयाणां प्रत्यक्षत्वमित्युक्तम् । तथा रूपवत्त्वं रूपसमवायः । [3]द्रवत्वं द्रवाणां भावो द्रवत्वं तच्च गुणान्तरम् ।

[टि०] [40–41] न तु महत्त्वादीति महदनेकद्रव्यवत् रूपवत् प्रत्यक्षमिति । ननु रूपवत्त्वमित्यस्य पौनरुक्त्य न भविष्यति, तत्र सामान्येन रूपस्य विवक्षितत्वाद् इह तु उद्भूतस्य रूपस्य प्रत्यक्षताहेतुत्वाद्रिति । सत्यम्, अत्रापि विशेषाविवक्षाया रूप[4]मात्रस्यैव विवक्षा इति ।

[पं०] [40] निजाशक्तिरेवेति – निजं स्वरूपमेव । ननु महत्त्वादिकारणयोग इति महत्यनेकद्रव्यत्वाद्रूपविशेषाच्चोपलब्धिः ।

रूपवत्त्वमित्यस्य पुनरुक्तत्वप्रसंगादिति महत्त्वानेकद्रव्यवत्त्वादीनां रूपवत्त्वाव्यभिचारात् । नन्वात्मनोऽपि प्रत्यक्षत्वमस्तीति अन्तःकरणसंवेद्यत्वात् । इति चार्थ इति – इति चकारस्यार्थः ।

[कु०] विशेषगुणा रूपादय इति (कं. २४.५) – शुक्लत्वभास्वरत्वाद्यवान्तरसामान्यापेक्षया रूपरसस्पर्शानां विशेषगुणत्वं द्रष्टव्यम् ।

---

१ द्रवत्ववत्त्वानि – कि. रूपवत्त्ववत्वानि – दे. । २ त्रयाणामित्युक्तम् – कं. १, कं. २ । ३ द्रवत्वं द्रवत्वं नाम – कं. १, कं. २ । ४ मात्रस्य – अ, ब;

### प्रशस्तपादभाष्यम्

[41] द्वयोर्गुरुत्वं रसवत्त्वञ्च ।
भूतात्मनां वैशेषिकगुणवत्त्वम् ।
क्षित्युदकात्मनां चतुर्दशगुणवत्त्वम् ।
आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम् ।

### न्यायकन्दली

[41] द्वयोर्गुरुत्वम् । द्वयोः पृथिव्युदकयोः, गुरुत्वन्नाम गुणान्तरम्, तस्य भावात् पृथिव्यामुदके च गुरुशब्द²निवेशः । रसवत्त्वञ्च रससमवायः, न केवलं तयोर्गुरुत्वं रसवत्त्वञ्चेति[1] चार्थः ।

भूतात्मनां वैशेषिकगुणवत्त्वम् । भूतानां पृथिव्यप्तेजोवायुनभसा³मात्मनां च वैशेषिकगुणयोगः । विशेषो व्यवच्छेदः, विशेषाय स्वाश्रयस्येतरेभ्यो व्यवच्छेदाय प्रभवन्तीति वैशेषिका रूपादयस्तद्योगो भूतात्मनाम् ।

क्षित्युदकात्मनां चतुर्दशगुणवत्त्वम् । क्षितेरुदकस्यात्मनां चतुर्दशगुणयोगः ।

आकाशात्मनाञ्च क्षणिकैकदेशवृत्तिभिर्विशेषगुणैः सह योगो विद्यते इत्याह— आकाशात्मनामिति । विशेषगुणाः पृथिव्यादीनामपि सन्ति, तन्निवृत्त्यर्थमेकदेशवृत्तिग्रहणम् । ⁴ये च ते आकाशात्मनामव्याप्यवृत्तयो विशेषगुणास्तेषामाशुतरविनाशित्वञ्च स्वरूपमस्तीति क्षणिकसङ्कीर्तनं ⁵कृतम् ।

[पं०] [41] क्षित्युदकात्मनां चतुर्दशगुणयोग इति—रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग[पर]त्वापरत्वगुरुत्वद्रवत्वसंस्कारलक्षणाश्चतुर्दशगुणाः क्षितेः । त एव गन्धरहिता स्नेहसहिताश्चतुर्दशोदकस्य । संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माधर्मस्वरूपास्तु चतुर्दशात्मनः । आकाशात्मनां च क्षणिकैकदेशवृत्तिभिर्विशेषगुणैः सह योगो विद्यत इति—आकाशस्य शब्दो विशेषगुणः, आत्मनां तु बुद्धिः । तथामि(?)ति शब्दो बुद्ध्यादीनाम् ।

[कु०] [41–42] ननूत्पद्य विनाशकारणसन्निधिमनुभूय नश्वराणां कथं क्षणिकत्वमित्यत आह आ[शु]तरेति (कं. २५.९) ।

दिक्कालयोः सर्वोत्पत्तिमन्निमित्तकारणत्वे प्रमाणं पृच्छति नन्विति (कं. २६.१४) । अनिमित्तेऽपि दर्शनादिति (कं.२५.१६) । अधिकरणस्य कारकत्वेऽपि सामान्यापेक्षया अवर्जनीयसन्निधित्वाद्विशेषस्य च व्यवहारो देशनिमित्तत्वं,

---

१ चेति—कि., दे. । २ °निवेशात्—जे. १, जे. २ । ३ °मात्मनां—क. १ । ४ ये च—जे. १ । ५ 'कृतम्'—इति जे. १; जे. ३ पुस्तकयोर्नास्ति ।

### प्रशस्तपादभाष्यम्

[42] दिक्कालयोः पञ्चगुणवत्त्वं सर्वोत्पत्तिमतां निमित्तकारणत्वञ्च ।

### न्यायकन्दली

[42] सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः पञ्चैव गुणा दिशि काले च वर्त्तन्त इत्याह–दिक्कालयोरिति । न केवलमनयोः पञ्चगुणवत्त्वं साधर्म्यं सर्वोत्पत्तिमतां निमित्तकारणत्वञ्च साधर्म्यम् ।

ननु दिक्कालौ सर्वेषामुत्पत्तिमतां निमित्तमिति कुत एतत् प्रत्येतव्यम् ? यदि सन्निधिमात्रेण ? आकाशस्यापि कारणत्वं स्यात्, अथ तद्व्यपदेशात् ? सोऽप्यनैकान्तिकः, गृहे जातो गोष्ठे जात इत्यनिमित्तेऽपि दर्शनात् । अत्रोच्यते–अस्ति तावत् तन्त्वादिप्रतिनियमात् पटाद्युत्पत्तिवद्देशविशेषनियमात् कालविशेषनियमाच्च सर्वेषामुत्पत्तिः, यदि देशकालविशेषावपि न कारणम्, यत्र क्वचन हेतवः कार्य्यं कुर्य्युरविशेषात् । सर्वदा सर्वत्र कारणाभावात् कार्य्यानुत्पत्तिरिति चेत् ? यत्र देशे काले च कारणानि भवन्ति तत्र तेषां जनकत्वं [1]नान्यत्रेत्यभ्युपेतं विशिष्टदेशकालयोरङ्गत्वम्, कार्य्यजननाय तयोः कारणैरपेक्षणीयत्वात् । इदमेव च देशस्य कालस्य च निमित्तत्वम्, यदेकत्र कार्य्योत्पत्तिरन्यत्रानुत्पत्तिरिति ।

[टि०] [42] क्षित्युदकेति–सम्भावितमिदं साधर्म्यं न तु व्यापकमीश्वरात्मन्यसम्भवात् ।

दिक्कालयोः इति [2]तत्समवेतद्वित्वद्विपृथक्त्व[3]संयोगविभागवर्जम्, अन्येषूत्पत्तिमत्सु सर्वशब्दो वर्तते तान्प्रति दिक्[4]कालयोः समवायकारणत्वात् ।**अस्ति तावदिति** देशविशेषो दिक्प्रदेशविशेषः ।

[पं०] [42] **यदि सन्निधिमात्रेणेति**–अतः पुरः तर्हीत्यध्याहार्यम् । **तद्व्यपदेशादिति** ताभ्यां दिक्कालाभ्यां व्यपदेशात्, उदीच्यो वाऽन्तिक इत्यादिकात् । **देशविशेषनियमात्कालविशेषनियमात्सर्वेषामुत्पत्तिरिति** कोऽर्थः ? नियतदेशसद्भावेऽपि नियतकालमन्तरेण कार्यं नोत्पद्यते । नियतकालसद्भावेऽपि च नियतदेशमन्तरेण कार्यं नोत्पद्यते इति । देशकालयोरेव निमित्तकारणता । आकाशात्मनोस्तु संनिहिततायामन्वयमात्रेण न निमित्तकारणता । कारणत्वस्यान्वयव्यतिरेकाभ्यामवसीयमानत्वादित्यर्थः । **यदि देशकालविशेषावपि न कारणमिति**–अस्मात्पुरस्तर्हीत्यध्याहार्यम् । **हेतव इति** = तन्त्वादयः, **कार्यमिति** = पटादिकम् । **सर्वदेति** = सर्वस्मिन्काले । **सर्वत्रेति** = सर्वस्मिन्देशे । **कार्यानुत्पतिरिति चेदिति** अस्मात् पुरस्तर्हीत्यध्याहार्यम् **अङ्गत्वमिति** = हेतुत्वम् ।

**[कु०]** वैय[धि]करण्यं तु विवक्षातः कारकाणि भवन्तीति परिभाषणान्न दोषः । उत्तरम्–**अत्रोच्यते** इति (कं. २५.१७)। 'दिक्कालविशेषौ कार्यविशेषनिमित्तं तदन्वयव्यतिरेकित्वाद् बीजवदिति प्रयोगः । अस्यानुकूलं तर्कमाह **यदीति** (कं. २५.१८) । सामग्रीवैकल्यमुपाधिमाशङ्क्य दिक्कालविशेषयोरपि तदनुप्रवेशेन परिहरति **सर्वदेति** (कं. २५.१९) ।

---

१ नान्यत्रेत्यभ्युपेतव्यं–कं. १, नान्यत्रेत्यभ्युपगन्तव्यं–कं. २ । २ तत्समवेति–इ; ३ संयोगो–अ, ब; ४ लयो–ड;

## प्रशस्तपादभाष्यम्

[43] क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः ।

## न्यायकन्दली

[43] क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः । निमित्तादुपजातं [1](नैमित्तिकम्), नैमित्तिकञ्च तद्द्रवत्वञ्चेति नैमित्तिकद्रवत्वम्, तेन सह क्षितितेजसोर्योगः, पार्थिवस्य सर्पिरादेस्तैजसस्य

[टि०] [43] [ तेजसो नैमित्तिकद्रवत्वस्थापनम् । ]

[2]**गुरुत्ववत्पार्थिवम्** इति–विवादाध्यासितं द्रवत्वं पार्थिवम्, नैमित्तिकद्रवत्वात्, घृतद्रवत्ववदिति । उत्तरं पार्थिवत्वेति । ननु पार्थिव[3]द्रव्यस्यैव भस्मरूपता द्रवत्वस्य [4]तूच्छेद एवेति कथमुक्तं [5]द्रवत्वस्य भस्मीभावो[6]प लब्धेरिति? सत्यम् । भस्मीभावोऽत्र उच्छेद एवाभिप्रेत इति । परोक्तमनुमानं [7][प्रत्यक्षं परिदृश्यमानं] [8]द्रवत्वमपार्थिवम् अत्यन्ताग्निसंयोगेनानुच्छिद्यमानद्रवत्वात्, घृत[9]द्रवत्ववदिति व्यतिरेकिणा सत्प्रतिपक्षं केचिदाह–तत्रा[10]नुच्छिद्यमानत्वं अवयविद्रवत्वापेक्षया वा? परमाणु[11]द्रवत्वापेक्षया वा? नाद्यः, पक्षत्रयाव्यावृत्तत्वेनाहेतुत्वप्रसङ्गात् । अग्न्यभिघातेन हि सुवर्णजलघृतावयविन एव नाश्यन्ते न[12] तद्द्रवत्वम्, द्रवत्वस्यावयविनाशेनैव नाशात्, न द्वितीयः अवयविद्रवत्वस्य पक्षीकृतत्वात्, परमाणुसिद्धस्य हेतोः पक्षेऽभावात् पक्षे एवासिद्धेः । किञ्च सुवर्णमध्य[13]गते उपष्टम्भकपार्थिवे भागे यद् द्रवत्वं [14]तदप्यक्षीयमाणमेव मन्तव्यम्, अन्यथा सुवर्णस्य क्षयः स्यादिति तत्राप्यक्षीयमाणद्रवत्व[15]स्य भावाद् विरुद्धत्वमपि स्यात् । अथात्यन्ताग्नि[16]संयोगेनावयविनाशद्वारेण पुनस्तेष्ववयवेषु अवयव्यन्तरोत्पादनद्वारेण च [17]द्रवत्वस्योच्छेदो जलवृत्तयोरस्ति, सुवर्णे [18]त्ववयव्यन्तरारम्भान्न द्रवत्वोच्छेद इति न पक्षत्रयव्यापित्वम्, तर्हि विद्यमाने [19]सपक्षे विपक्षे च पक्षे एव वर्तनादसाधारणत्वं हेतोः स्यात्, तस्माद् विवादाध्यासितं द्रवत्वं [20]पार्थिवाप्यावयविव्यतिरिक्तावयविसमवेतम्, अत्यन्ताग्निसंयोगेनानुच्छिद्यमानद्रवत्वात्, [21]घृतद्रवत्वद् इति केवल-

[कु०] [43] सुवर्णस्य तैजसत्वमङ्गीकृत्यैव तद्द्रवत्वस्यातद्धर्मत्वमाशङ्क्य परिहरति **गुरुत्ववदिति** (कं. २६.१) । सुवर्णस्य तैजसत्वं साधयितुमुपक्रमते **अत एवेति** (कं. २६.४) । नन्वयं तर्को विपर्ययापर्यवसायी तथा हि अस्य विपर्यय एवं भवेत् । सुवर्णपरमाणवस्तैजसाः परमाणुत्वे क्षीयमाणद्रवत्वे च सति अत्यन्ताग्निसंयोगेऽक्षीयमाणत्वादिति । आद्यविशेषणं कार्यघृते व्यभिचारपरिहाराय, द्वितीयमम्भसि, तृतीयं विशेषणविशेष्यपरिहाराय । अयं वा साधारणः सतोऽपि मपक्षात् सौरालोकादेर्व्यावर्तमानत्वात् । अग्निसंयोगा द्रव्या[वा]? भवतः सुवर्णस्योपष्टम्भिके पार्थिवे भागे दर्शनाद्विरुद्धः । अत्रैव पार्थिवद्रव्यत्वमत्यन्ताग्निसंयोग सति विनश्यतीति पूर्वं व्याप्तेर्भङ्गो द्रष्टव्यः । उपष्टम्भकाऽन्यथा द्रव्य(व)त्वाविनाशस्य सुवर्णद्र(व्य)[व]त्ववादिनाप्यङ्गीकारादिति नानवबोधात् ।

---

१ पाठोऽयं–जे. १, जे. ३ पुस्तकयोरपि नास्ति; किन्तु भाव्यमनेन पाठेन । २ वस्पार्थिवम्–ड; ३ द्रव्यत्वस्यैव–अ, ४ त्वनुच्छेद–अ, ब, क; ५ द्रव्यत्व–ब, क, द्रव्यवत्व–अ; ६ पलब्धिरिति–अ, ब; ७ [ ] एतच्चिह्नान्तर्गतो पाठः ड पुस्तके नास्ति । ८, ९ द्रव्यवत्वं–अ, द्रव्यत्वं–ब, क; १० अनुच्छिद्यमानद्रवत्वम्–अ; ११ द्रव्यवत्वा–अ, द्रव्यत्वा–ब, क; १२ न द्रवत्वम्–अ; १३ मुपगते–अ, ब, क; १४ तदेवाक्षीय–अ; १५ स्याभावाद्–अ, ब; १६ समयोग–त; १७ द्रवस्योच्छेदो–ड; १८ त्वयव्य–अ, ब, क; १९ सपक्षे च पक्षे एव वर्तनाद्–ड; २० पार्थिवाप्यावयविव्यस्तु विपक्षयोः पूर्वावयविनाशने अतिरिक्तावयविसमवेतम्–ब; २१ घृतद्रववद्–अ, ब;

### न्यायकन्दली

**च सुवर्णरजतादेरग्निसंयोगेन विलयनात् । गुरुत्ववत्पार्थिवमेव द्रवत्वं दह्यमानेषु सुवर्णादिषु संयुक्तसमवायात्प्रतीयत इति [1]केचित् । न, पार्थिवद्रवत्वस्यात्यन्ताग्निसंयोगेन भस्मीभावोपलब्धेः,अस्य च तदभावात् । अत एव सुवर्णादिकमपि पार्थिवमेवेति कस्यचित्प्रवादोऽपि प्रत्युक्तः, पार्थिवत्वे सति सर्पिरादिवदत्यन्तवह्निसंयोगेन द्रवत्वोच्छेदप्रसङ्गात् ।**

**[टि०]** [2]व्यतिरेकी कार्यः । अत्र हि [3]सपक्षस्य अविद्यमान[4]त्वात् पार्थिवाप्यावयविनोस्तु विपक्षयोः पूर्वावयविनाशने सति [5]तेष्वेवावयवेष्ववयव्यन्तरोत्पादनाभावात् द्रवत्वस्यात्यन्ताग्निसंयोगेनानुच्छिद्यमानत्वं नास्तीति नासाधारणत्वम्, पूर्वावयविनाशद्वारेण तत्रैव चावयव्यन्तरोत्पादनद्वारेणानुच्छिद्यमानत्वस्य विवक्षि[6]तत्वाच्च [7]पार्थिवाप्यवयविव्यतिरिक्ताप्य[8]परमाणुसमवेते द्रवत्वे विपक्षेऽभावान्न हेतोर्विरुद्धत्वम्; [9]पक्षेऽपि च विद्यमानत्वान्नासिद्धत्वम् । यश्च पार्थिव उपष्टम्भको [10]भागः स सुवर्णस्य [11]द्रवदशायामपि अदृष्टवशाद्द्रव एवास्ते, अत एवाप्यद्रवत्वविलक्षणं पार्थिवद्रवत्वमिति न विरुद्धत्वदूषणमपि। ननु तर्हि अदृष्टवशात्पार्थिवमेव द्रवत्वमत्यन्ताग्नि[12]संयोगेनाप्यत्र न क्षीयते इति किं न [13]कल्पेत? भूयस्तथादर्शनस्य पार्थिवत्वेऽपि समानत्वात् ? सत्यम्, [14]तैजसत्वेऽपि बाधाभावात् । **अत एव** इति–सुवर्णादि पार्थिवम्, नैमित्तिकद्रव[त्व]वत्त्वात् घृतवदिति [15][उत्तरं [16]**पार्थिवत्वम्** इति–सुवर्णं पार्थिवाप्यावयवि न भवति, अत्यन्ताग्निसंयोगेनानुच्छिद्यमानद्रवत्ववत्त्वात् घृतवद्] इत्यनुमानेन [17]परानुमानु(मानमनु)कूलतर्करहितं सत्प्रतिपक्षम् । नन्वत्र यदि पार्थिवाभागः सुवर्णशब्दवाच्यत्वेन पक्षीक्रियते तर्हि पक्षो बाधितः, अथ [18]तैजसं द्रव्यं तदा आश्रयासिद्धिः ?

**[पं०] गुरुत्ववत्पार्थिवमेवेति** पराभिप्रायः । **पार्थिवद्रवत्वस्यात्यन्तमग्निसंयोगेन भस्मीभावोपलब्धेरिति** सर्पिरादिषु पार्थिवद्रव्येषु । **अस्य च तदभावादिति**–अस्य सुवर्णादेस्तदभावात्तस्या भस्मीभावोपलब्धेरभावात् । **सांसिद्धिकद्रवत्वाभावे सतीति**–सांसिद्धिकं स्वाभाविकम् । सांसिद्धिकग्रहणं च अपां व्यवच्छेदाय । **तदप्यसाधनमिति–तदप्यसारमिति**

[कु०] आचार्या ह्येवमभिप्रेति–[19]**द्रवत्वस्योच्छेदप्रसङ्गादिति** (कं. २६.५) । द्रवत्वसहचरितस्य पार्थिवस्य रूपस्यात्यन्ताग्निसंयोगघृतादावुच्छेदो दृश्यते; तद्वत्सुवर्णेऽपि यदि दृश्यमानद्रवत्वसहचरितं रूपं पार्थिवं स्यात्तद्वदेवास्य विनाशप्रसङ्ग इति । ततश्चायं प्रयोगः । रूपवत्वाद्वाय्वादिव्यतिरेकशैत्यस्य स्नेहकार्यसङ्ग्रहस्य सांसिद्धिकद्रवत्वस्य वा[अपा]मुपलब्धेरम्भसश्च व्यतिरेके सिद्धे "सुवर्णं न पृथिवी अत्यन्ताग्निसंयोगप्रतिबन्धविरहे अविनश्यद्रूपत्वाद् सौरा[रा]लोकवदिति । एवं सुवर्णे प्रतीयमानं द्रवत्वं अपार्थिवम् अबाध्यमानसुवर्णसामानाधिकरण्यप्रतीतिविषयत्वाद्रूपवदिति पूर्वकमनुमानं द्रष्टव्यम् । न च सुवर्णमद्रवं ते[ज]स्त्वात् सौरालोकवदित्यनेन बाध इत्य[ति]वाच्यम्, सौरालोके अद्रवत्वस्यादृष्टविरहप्रयुक्तत्वात् इतरथा घृतादिष्वपि पार्थिवत्वाल्लोष्टवदित्यद्रवत्वानुमानं को वारयेदिति । भस्मीभावोपलब्धेरिति (कं. २६.३) पदं पार्थिवद्रवत्वस्य नियमेनात्यन्ताग्निसंयोगेन भस्मीभवत्पृथिवीसामानाधिकरण्येनोपलब्धेः सुवर्णादिसामानाधिकरण्येनो[नु]पलब्धिरिति व्याख्येयम् । **तदप्यनुद्भूतरूपवत्वेनेति** (कं. २६.९) इहानुद्भवो विवक्षितः इतरथा द्रव्यस्य नयनरश्मिवदप्रत्यक्षत्वप्रसङ्गः । अभिभूतरूपं तु महारजनरूपाभिभूतमिति मा पट इव प्रत्यक्षं भवत्येव । अभिभावकं च उपलम्भकपार्थिवभागरूपमेव द्रष्टव्यम् । तेजसः शुक्लरूपत्वेन पीतिमानुपपत्तेः ।

---

१ चेत्–कं. १, कं. २ । २ व्यतिरेकार्थः–अ; ३ सपक्षस्यासपक्षस्या–अ, ब; ४ त्वा–अ, ब; ५ तेष्वावय...–अ, ब; ६ तत्वात्–अ, ब; ७ पार्थिवाप्यायवि–अ, ब, क; ८ परिमाणु–अ, ब; ९ पक्षेऽपि–अ, ब; पक्षे च–ड; १० भावा–अ; ११ द्रवत्वदशायामपि–अ, ब, क; १२ संयोगो–अ, ब, क; १३ कल्पते–अ, ब, क; १४ तैजसत्वे–ड; १५ [ ] एतच्चिह्नान्तर्गतः पाठः अ पुस्तकेनास्ति । १६ पार्थिवत्त्वे–मु. १७ परानुभासनं–ड; १८ तैजसं तद्भव्यं–अ, ब; १९ द्रवत्वोच्छेद–कं. ।

## न्यायकन्दली

**यदपीदमुक्तं पार्थिवं सुवर्णादिकम्, सांसिद्धिकद्रवत्वाभावे सति गुरुत्वाधिकरणत्वाल्लोष्टादिवत्, तदप्यसारम्, किन्तत्र गुरुत्वस्योपलब्धिस्तद्गुणत्वादुतान्यगुणत्वेऽपि [1]घृतादिष्वपि स्नेहवत् स्वाश्रयप्रत्यासत्ति[2]निमित्तादिति संशयस्या[3]निवृत्तेः। यदपि साधनान्तरं परप्रकाश्यमानत्वादिति, तदप्यनुद्भूतरूपवत्त्वेनाप्युपपत्तेरसाधनम्। दिङ्मात्रमस्माभिरुपदिष्टम्।**

[**टि०**] नैवम्, प्रत्यक्षप्रतीयमानस्यावा[4]न्तरतारतम्यवत्त्वात् गुणस्य द्रवत्वस्याधारो यद्द्रव्यं तस्य पक्षीकृतत्वात्। **उतान्यगुणत्वे** इति–स्वाश्रयस्याबादेर्योऽसौ प्रत्यासत्तिनियमः पार्थिवद्रव्येण सह संयोगनियमो नियतः संयोगः तस्मान्नियतसंयुक्तसमवायाद्, एतेन संदिग्धासिद्धिरुक्ता [5]इत्यर्थः। **यदपि** इति–सुवर्णं पार्थिवं परप्रकाश्यमानत्वाद् इति। अत्र परेण स्वव्यतिरिक्तेन चक्षुरादिना प्रकाश्यमानत्वं लोष्टे [6]दीपे च सत्त्वादनैकान्तिकमिति परेणेन्द्रियालोकव्यतिरिक्तेनालोकेनेत्यर्थो व्याख्येयः। **तदप्यनुद्भूतेति**–यदि रूपमनुद्भूतं स्यात् पिशाचादिवत्सुवर्णं नोपलभ्येत तस्मादत्रानुद्भूतमिति तथाविध पार्थिवोपष्टम्भकद्रव्यैरभिभूतमिति व्याख्येयम्। अभिभूतरूपस्य च दर्शनं कुसुम्भाभिभूतशुक्लरूपस्येव पटस्योपपन्नमिति। पार्थिवरूपेणाभिभवोऽपि जलरूपस्य कुङ्कुमरूपेणेवोपपन्नः। एतेनान्यथासिद्धिरुक्ता।

[**पं०**] **पाठान्तरम्। तत्रेति** = सुवर्णादौ। **अन्यगुणत्वेऽपि घृतादिषु स्नेहवत् स्वाश्रयप्रत्यासत्तिविशेषनियमादिति**–घृतं हि पार्थिवम्, तत्र च स्नेहः स्वाश्रयाप्यपरमाणुप्रत्यासत्तेः। स्नेहस्य हि स्वकीय आश्रयो जलम्, तेन प्रत्यासत्तिः पार्थिवघृतादेः। तद्वत्सुवर्णे गुरुत्वम्, गुरुत्वाश्रयपार्थिवपरमाणुप्रत्यासत्तेरित्यर्थः। **यदपि साधनान्तरमुक्तमिति**–पूर्वस्यामेव प्रतिज्ञायाम्: **पार्थिवं सुवर्णादिकमिति**। [7]**अस्य परप्रकाश्यमानत्वादिति**–सुवर्णं हि परेण प्रदीपादिना **प्रकाश्यते** घटादिवत्, ततः कथं तैजसम्? तैजसं हि यदि स्यात्तदाऽग्न्यादिवत्परप्रकाशकं स्यात्, तस्मात्पार्थिवमेवेति पराशयः। **तदप्यनुद्भूतरूपत्वेनाप्युपपत्तेरसाधनमिति**–अपिरेवार्थेऽवधारणे, अप्रकटरूपत्वेनैव परप्रकाश्यमानत्वं सुवर्णस्य स्वभावेन तु तैजसत्वमेवेत्यर्थः।

**कारणाभावादिति**–लक्षणाभावात्। **तत्रायं व्यर्थ इति**–अथ परीक्षाविधिः। **योऽपि ह्रीति–उद्योतकराचार्यः। तस्यापि प्रयोजनादीनां नास्ति परीक्षेति**–तस्याप्युद्योतकराचार्यस्य प्रयोजनादीनां परीक्षासूत्राणि न संशयतीत्यर्थः।

[**कु०**] ननु यदि कार्यरूपस्य सर्वदाऽभिभूतत्वात्परमाणुरूपस्यातीन्द्रियत्वादप्रत्यक्षत्वेनाविनश्यद्द्रव्य[व]त्वादिति हेतुः सन्दिग्धासिद्धः कथं तैजसत्वं सुवर्णस्य साधयेदिति। सत्यम्, किन्तु हिरण्यस्य तैजसत्वे तेजो हिरण्यमिति श्रुतिरेव प्रमाणम्। अयं तु ग्रन्थविस्तेजोघृतमित्य[श्रु]तेर्घृतस्य तस्याभावनिश्चयेन तृणादिसाधर्म्यात् पृथिवीत्वसाधकेन श्रूयमाणार्थबाधो नास्तीति प्रतिपादनपरो द्रष्टव्यः। तथा चोक्तं वल्लभाचार्येण।

अनुच्छिन्नद्रवत्वं [यद्-तद्] वस्तु यस्त्विव [त्त्वि]ह भासते
सुवर्णाव्यवहारोऽयं तत्र शास्त्रे प्रवर्तते॥

इति शास्त्रे श्रुताविव्यर्थः। अत एव श्रीधराचार्योऽपि तर्क[8] **मेवात्यधित**। नानुमानं जे [ये] तु सुवर्णादर्शादेर्भास्वरं **रूपमङ्गीकृत्य** द्रव्यान्तरसर्गान्न स्फुटप्रतीतिः तथाभिभवाच्चेति युक्तिं व्याचक्षते तेषां निशीथे गृहान्तर्निहिते

---

१ घृतादिषु–जे. १, जे. ३। २ नियमादिति–जे. १, जे. ३। ३ निवृत्तिः–जे. १, जे. २। ४ तारप्तस्यवत्वात्–अ; ५ इत्यर्थ इति ड पुस्तके नास्ति। ६ दावे च–अ; ७ 'अस्य'–इति कं. पुस्तके नास्ति। ८ अत्र पाठो व्यत्यस्त इव भाति, तर्कमेवा[श्रि]त्य स्थितः? सं.।

प्रशस्तपादभाष्यम्

[44] [1]एवं [2]सर्वत्र साधर्म्यं विपर्य्ययाद्वैधर्म्यञ्च [3]वाच्यमिति ।

न्यायकन्दली

[44] [4]अनेनैव न्यायेन सर्वत्र [5]पदार्थेष्वन्यदपि साधर्म्यं स्वयं वाच्यम्, विपर्य्ययादितरव्यावृत्ते[6]र्वैधर्म्यं च वाच्यमिति शिष्यानाह–एवमिति ।

अनुद्दिष्टेषु पदार्थेषु न तेषां लक्षणानि प्रवर्त्तन्ते निर्विषयत्वात्, अलक्षितेषु च तत्त्वप्रतीत्यभावः कारणाभावात्, अतः पदार्थव्युत्पादनाय प्रवृत्तस्य शास्त्रस्योभयथा प्रवृत्तिः–उद्देशो लक्षणञ्च । [7]परीक्षायास्त्वनियमः । यत्राभिहिते लक्षणे प्रवादान्तरव्याक्षेपात्तत्त्वनिश्चयो न भवति, तत्र परपक्षव्युदासार्थं–परीक्षाविधिरधिक्रियते । यत्र तु [8]लक्षणाभिधानसामर्थ्यादेव तत्त्वनिश्चयः स्यात्, तत्रायं व्यर्थो नार्थ्यते । योऽपि हि त्रिविधां शास्त्रस्य प्रवृत्तिमिच्छति, तस्यापि प्रयोजनादीनां

[टि०] [44-45] तस्यापि इति–प्रमाणप्रमेयसंशयानां साक्षात् [9]परीक्षासूत्राण्युक्तानि प्रयोजनादीनां तु पदार्थानां नोक्तानीति ॥

शस् [10]"प्रत्ययान्तेति वीप्सित"[11]वीप्स्येऽपि शस्दर्शनात् ।

॥ इति साधर्म्यनिरूपणम् ॥

[पं०] [44] श्रीधरः पृच्छति तत्कस्य हेतोरिति–परोत्तरं लक्षणमात्रादेवैते प्रतीयन्त इति । श्रीधरः प्राह एवं चेत्यादि ।

[कु०] दर्पणादौ भास्वररूपानुपलम्भेन प्रमाणबाधः स्पष्टः । किञ्च श्रुत्यनादरे द्रवत्वादिना वैधर्म्येण तेजो व्यावृत्तौ दशमद्रव्यशङ्कापि दुर्वारेत्यलं बहुनोक्तेन ।

[44] अन्यदपीति (कं. २६.११)–अबादीनामगन्धवत्वम्, अनलादीनामरसवत्त्वमगुरुत्वम्, अनिलादीनामरूपत्वमप्रत्यक्षादि साधर्म्यमनुवृत्तेर्वाच्यमित्यर्थः । इतरव्यावृत्तेरिति (कं. २६.१२) हृदोः साधर्म्यमपि गुरुत्वं तेजःप्रभृतेर्व्यावृत्तेर्वैधर्म्यमित्याद्यपि बोधनीयमित्यर्थः ।

---

१ एवं च–दे । २ सर्वत्र विपर्ययात् साधर्म्यं वैधर्म्यं–पा. ५.५ । ३ वाच्यमिति द्रव्यासङ्करः–कं. १, कं. २; द्रव्यसङ्करः–इति पाठः अन्यत्र कासुचिदपि हस्तलिखितपुस्तकेषु नोपलब्धः । किरणावल्यामपि नास्ति । ४ अनेन–जे. १, जे. ३ । ५ पदार्थे–कं. १, कं. २ । ६ वैधर्म्यं वाच्यमिति–कं. १, कं. २ । ७ परीक्षायास्तु न नियमः–जे. १. जे. ३ । ८ लक्षणविधान–जे. १, जे. २ । ९ सूत्राण्युक्तानी–अ; परीक्षासूत्राण्युक्तानी–ब; १० प्रत्ययात्–मु; प्रत्ययान्ता–जे. १, जे. २; ११ वीप्स्यति–अ; वीप्स्येति–ब;

न्यायकन्दली

नास्ति परीक्षा, तत् कस्य हेतोः? लक्षणमात्रादेव ते प्रतीयन्त इति। एवञ्चेदर्थप्रतीत्यनुरोधाच्छास्त्रस्य प्रवृत्तिर्न [1]त्रिधैवेति। नामधेयेन पदार्थानामभिधानमुद्देशः। उद्दिष्टस्य स्वपरजातीयव्यावर्त्तको धर्म्मो लक्षणम्। लक्षितस्य यथालक्षणं विचारः परीक्षा। उद्दिष्टविभागस्तु न विधान्तरम् उद्देशलक्षणेनैव संगृहीतत्वात्। [2]तथाऽपि पृथगुच्यते। एतान्येवेति नियमार्थं विशेषलक्षणप्रवृत्त्यर्थञ्च विभक्तेषु पदार्थेषु तेषां विशेषलक्षणानि भवन्ति, अन्यथा तानि निर्विषयाणि स्युः। तत्र द्रव्याणि द्रव्यगुणकर्मे[3]त्युद्दिष्टानि द्रव्याणि पृथिव्यप्तेज इति विभक्तानि। सम्प्रति तेषां विशेषलक्षणार्थं प्रकरणमारभ्यते।

[टि०]  [ अथ पृथिवीनिरूपणम्॥ ]

[4]तं प्रति विपर्ययेति – विपर्यये व्यतिरेके सम्बन्धाव्यभिचारेण व्यतिरेक[5]व्याप्त्येत्यर्थः। ईयम् इति–गन्धोपलक्षिता प्रत्यक्षानुमानगृहीता समस्तापि भूः पक्षीकृतेति न सपक्षसद्भावः। या लोके पृथिवी इति – पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वाभिसम्बन्धादित्यर्थः। ननु जलम[6]पीतरेभ्यो भिद्यते इति सपक्षे विद्यमानेप्यगतत्वादसाधारणत्वम्। [7]नैवम्। इतरेभ्य इति पक्षीकृतगन्धद्रव्यादितरेभ्य इत्यर्थः इति सपक्षाभावादिति। समानेति – अर्थः प्रयोजनं लक्षणं

[कु०] वृत्तवर्तिष्यमाणयोः सङ्गतिं दर्शयन्निहेदानीमिति भाष्यं व्याचष्टे अनुद्दिष्टेष्विति (कं. २६.१५)। ननु त्रेधा चास्य शास्त्रस्य प्रवृत्तिरिति समानतन्त्रे दर्शनादुभयथेति विरुद्ध्यतेऽत आह परीक्षायास्त्विति (कं. २६.१७)। ननु किं परीक्षा निष्प्रयोजना? तन्त्रातरेऽपि न स्यात्, अथ सप्रयोजना इहापि स्यादेवेत्यत आह [8]अत्रेति (कं. २६.१७)। प्रवादान्तर[9]व्याकोपो दर्शनान्तरविरोधः। यत्र तु लक्षणाभिधानसामर्थ्यादिति (कं. २६.१९) [10]इद अत्रानुकूलम्–विप्रविपत्तौ हि सत्यां परीक्षाप्रवृत्तिः। न च सर्वत्र विप्रतिपत्तिः, सर्वतन्त्रसिद्धेषु तदभावात् प्रतितन्त्रसिद्धादिषु भवति विप्रतिपत्तिः। यदि लक्षणेनैव निरस्यते तदा तत्रापि किं परीक्षयेति, न कस्यापि प्रयोजनम्।

सं(ह्) कीर्तनं पदार्थानां शास्त्रविषयाणामिति व्याख्यानान्न लक्षणेऽतिव्याप्तिः। अनियतत्वमथ लक्षितायाः परीक्षा[या] दुर्विज्ञानमिति तल्लक्ष[ण]माह लक्षितस्येति (कं. २६.२४)। ननु यद्युद्देशलक्षण एव शास्त्रस्य प्रवृत्तिविधे तर्हि द्रव्यगुणेत्यादिनोद्देशः कृतः। पृथिव्या सम्बन्धात् पृथिवीत्यादिना लक्षणं करिष्यते। पृथिव्यप्तेज इति रूपरसेत्यादिका तु केयं विधेत्यतमात[आह] उद्दिष्टविभागस्त्विति (कं. २६.२४)।

---

१ त्रिधैव – कं. १, कं. २। २ तथाहि – कं. १, कं. २। ३ °द्दिष्टानि पृथिव्यप्तेज° – कं. १, कं. २। ४ त प्रतिविपर्ययेति – अ, तं प्रतिविषय – मु., तं प्रतिविपर्यय – जे. १ जे. ३; ५ व्याप्तेत्यर्थः – अ, ब; ६ मपितरेभ्यो – अ; ७ नैवम् अ पुस्तके नास्ति। ८ यत्र – कं.। ९ व्याक्षेप – कं.। १० अत्राक्षरो भ्रष्टो भाति।

### प्रशस्तपादभाष्यम्

[45] इहेदानीमेकैकशो वैधर्म्यमुच्यते ।
पृथिवीत्वाभिसम्बन्धात् पृथिवी ।

### न्यायकन्दली

[45] इहेदानीमिति । पूर्वं द्वयोर्बहूनां परस्परापेक्षया वैधर्म्यमुक्तम् । इह वक्ष्यमाणे प्रकरणे सम्प्रत्येकैकस्य द्रव्यस्य व्यावर्त्तको धर्म्मः कथ्यते । एकैकश इति शस्[1]प्रत्ययान्ताद् वीप्सात्यन्तबहुव्याप्तिप्रदर्शनार्था ।

उद्देशक्रमेण पृथिव्याः प्रथमं वैधर्म्यमाह—पृथिवीत्वाभिसम्बन्धात्पृथिवीति । यो हि पृथिवीं स्वरूपतो जानन्नपि कुतश्चिद् व्यामोहात् पृथिवीति न व्यवहरति तं प्रति [2]विपर्ययसम्बन्धाव्यभिचारेण व्यवहारसाधनार्थमसाधारणो धर्मः कथ्यते—पृथिवीत्वाभिसम्बन्धात्पृथिवीति । इयं पृथिवीति व्यवहर्तव्या पृथिवीत्वाभिसम्बन्धात् यत्पुनः पृथिवीति न व्यवह्रियते, न तत् पृथिवीत्वेनाभिसम्बद्धम्, यथाबादिकम्, न चेयं पृथिवीत्वेन [3]नाभिसम्बद्धा, तस्मात्पृथिवीति व्यवहर्तव्येति । यो वा पृथिवीति लोके शृणोति न जानाति च तस्याः स्वरूपं कीदृगिति, तं प्रति तस्या स्वपरजातीयव्यावृत्तस्वरूपप्रतिपादनार्थमसाधारणो धर्मः कथ्यते, या लोके पृथिवीति व्यपदिश्यते सा [4]पृथिवी,

[हि०] केवलव्यतिरेकी हेतुः । तथा हि शिरसा इति—[5]वृक्षान्तरितस्य गोरसाधारणेन शिरःपादेनानुमानम् । एतौ इति पदार्थौ शिरःपादरूपौ द्वयोस्त्वनुकर्षणे प्राणि[6]तुर्यङ्गानामित्येकत्वं स्यात् क्लीबस्य च शेषः स्यात् । [7]गन्धसहचरितमिति ननु चतुर्दशगुणा [8]गन्धसहचरिता इति समुदाये पञ्चदशत्वं स्यात् ? नैवम्, तेन सहैव चतुर्दशसङ्ख्योपपत्तेः यथा जामात्रा सहैते दश सन्ति स दशम इत्यर्थः । भाष्यटीके हि नोत्सूत्रे भवत इति सूत्रकारानुमतिं दर्शयति सूत्रकारस्यापि इति । अधिकार इति—आधारे अमट् प्राप्तौ [9]बाहुलकाद् घञ् आङ्भिः सामान्यमिति तुल्यमित्यर्थः ।

[पं०] [45] [10]विपर्ययस्य सम्बन्धाव्यभिचारेणेति—वैधर्म्यसम्बन्धाव्यभिचारेण केवलव्यतिरेकिप्रयोगेणेत्यर्थः । सर्वं हि लक्षणं केवलव्यतिरेक्यनुमानमामनन्ति । स्वपरजातीयव्यावृत्तस्वरूपप्रतिपादनार्थमिति स्वजातीयमबादिद्रव्यम, परजातीया गुणादयः । लक्षणार्थं इति—लक्षणस्य प्रयोजनं व्यवहारविशेषप्रतिपादनार्थमिति व्यामूढस्य । अप्रतिपन्न

[कु०] [45] ननु नित्यवीप्सयोरिति द्विर्वचनं वीप्सायां विधीयते तथा सङ्ख्यैकवचनाच्च वीप्सायामिति शसृप्र[त्य]योऽपि तथैव । एवं चोभयोपादानं किमर्थमित्यत आह [11]एकैकशब्द इति (कं. २७.१) द्विर्वचनेन पृथिव्यादीनामेकस्येति धर्मिसाकल्येन लभ्यते शस् प्रत्ययेन तु तेषामेव प्रत्येकमनेकं वैधमिति गम्यते इत्यर्थः ।

---

१ प्रत्ययाद्—कं. १, कं. २ । २ विषयसम्बन्धा°—कं. १, कं. २ । अत्र विपर्ययपाठे टिप्पणं व्यतिरेकव्याप्तिलक्षणेन—जे. १ । ३ अनभिसम्बद्धा—जे. १, जे. ३ । ४ पृथिवी इति—जे. १, जे. ३ इत्यनयोर्नास्ति । ५ वृक्षान्तरस्य—म, ब, क; ६ तुर्यङ्गाणा—ड; ७, ८ गन्धसहितम्, गन्धसहिता—ड; ९ अबाहुलकाद्—अ; १० विषयसम्बन्धाव्यभिचारेण—कं. । ११ एकैकश—कं. अयमेव समीचीनः पाठः—सं. ।

### प्रशस्तपादभाष्यम्

रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती।

एते च गुणविनिवेशाधिकारे रूपादयो [1]गुणविशेषाः सिद्धाः। चाक्षुषवचनात् सप्त सङ्ख्यादयः। पतनोपदेशाद् गुरुत्वम्।

### न्यायकन्दली

पृथिवीत्वाभिसम्बन्धात्। यथाहोद्योतकरः–"समानासमानजातीयव्यवच्छेदो लक्षणार्थः" (न्या० वा०) एतेनैतदपि [2]प्रत्युक्तम्, यदुक्तमपरैः प्रसिद्धाश्चेत् पदार्था न लक्षणीयाः, अप्रसिद्धा नतरामशक्यत्वात्, स्वरूपेणावगतस्यापि व्यवहारविशेषप्रतिपादनार्थं सामान्येन प्रसिद्धस्य विशेषावगमार्थञ्च [3]लक्षणस्य प्रवृत्तेः। नन्वेवं सत्यनवस्था, लक्ष्यवल्लक्षणस्या-[4]प्यन्यतो लक्षणीयत्वादिति चेन्न, अप्रतीतौ [5]लक्षणस्यापेक्षितत्वात्, सर्वत्र चाप्रतीत्यभावात्, तथा हि–शिरसा पादेन गवामनुबध्नन्ति विद्वांसः, न पुनरेतावप्यन्यतः [6]समीक्षन्ते। यस्तु सर्वथैवाप्रतिपन्नो न तं प्रत्युपदेशः, तस्य बालमूकादिवदनधिकारात्।

[पं०] इति = अव्युत्पन्नः। यदि ते रूपिद्रव्येषु न सन्तीति–पृथिवी च रूपद्रव्यमिति भावः। तत्समवायेनेति = रूपिद्रव्यसमवायेन। तेषामिति संख्यादीनाम्।

[कु०] ननु पृथिवीस्वरूपसिद्धौ किं लक्षणेन? सिद्धे साधनवैयर्थ्यात् तदसिद्धौ वाऽश्रयासिद्धिरत एव पृथिवीसिद्धावितरेतराश्रययित्वमित्यत आह **योहीति** (कं. २८.१२)। पृथिवीमित्युपलक्षणं पृथिवीत्वमित्यपि द्रष्टव्यम्, अन्यथां स्वरूपासिद्धिप्रसङ्गात्, व्यामोहाद्गन्धरूपाद्यनेकसन्निधौ व्यावर्तकविशेषानवधारणात्। **पृथिवीत्वाभिसम्बन्धादिति** (कं. २८.१४) पृथिवीत्वं जातिस्तस्याः सम्बन्धः समवायः, न त्वेकार्थसमवायः संयुक्तसमवायो वा, तथा सति विरोधो व्यभिचारः स्यादिति व्याख्येयम्। [7]**यश्च पृथिवीति** (कं. २८.१६) पृथिवीत्वं च पश्यतीति शेषः। जानाति च तस्याः स्वरूप[मिति] (कं. २८.१७) विवेकेनेति शेषः।

लक्ष्यलक्षणयोः स्वरूपमितरव्यवच्छेदं च जानन्नपि विशेषनिमित्तो यत्र व्यवहारजिज्ञासुः प्रथमः, इतरव्यवच्छेदमात्रजिज्ञासुर्द्वितीय इति विशेषः। एतेन अधिकारिविवेचनेन अशक्यत्वादिति आश्रयासिद्धेरितिभावः। इह लक्षणस्य लक्षणान्तरानुसरणे नानवस्था। यत्र कुत्रचिद्विवेके[च] तं प्रति वा तद्विपरीतं प्रति वा? नाद्य इत्याह **अप्रतीतादिति** (कं. २९.१)। **न पुनरिति** (कं. २९.२)–त्रिचतुरेषु लक्षणेषु पूर्वविदित्तस्यैव लक्षणतयाभिधाने स्वयमेव निरपेक्षः स्यादिति भावः। न द्वितीय इत्याह व्यवहारव्यवच्छेदौ क्वचिदप्रसिद्धौ वा नाद्यः अप्रसिद्धविशेषणत्वप्रसङ्गात्। सिद्धिपक्षेऽपि किमिबादौ पृथिव्यामेव नाद्यः अबादावेवा आदौ व्यवच्छेदस्य व्याहतत्वमित्यर्थः। पृथिवीत्वस्य प्रतीत पृथिवीव्यवहाराद्व्यवच्छेदादेवादेः सपक्षादपि व्यावृत्तेरसाधारणत्वप्रसङ्गात्। न द्वितीयः साधनवैयर्थ्यादिति।

---

१ विशेषगुणान्ता–दे.। २ प्रत्युक्तं, प्रसिद्धाश्चेत्–कं. १, कं. २। ३ लक्षणप्रवृत्तेः–कं. १, कं. २। ४ °प्यन्ततो–कं. १, कं. २। ५ लक्षणापेक्षितत्वात्–कं. १, कं. २। ६ समीक्ष्यन्ते–कं. १, कं. २। ७ यो वा–कं.।

न्यायकन्दली

[1]गन्धसचरितचतुर्दशगुणवत्त्वमपि पृथिव्या इतरेभ्यो वैधर्म्यमिति प्रतिपादयन्नाह–रूपरसगन्धेति। [2]अत्र द्वन्द्वानन्तरं [3]मतुप्प्रत्यययोगात् प्रत्येकं रूपादीनां [4]पृथिव्या सह [5]सम्बन्धो लभ्यते। सूत्रकारस्याप्येते गुणाः पृथिव्यामभिमता इत्याह–एते चेति। गुणानां विनिवेशो द्रव्येषु वृत्तिः, सा प्रति[6]पाद्यत्वेनाधिक्रियतेऽस्मिन्निति गुणविनिवेशाधिकारो द्वितीयोऽध्यायः। तस्मिन् रूपरसगन्धस्पर्शाः [7]पृथिव्यां सिद्धाः सूत्रकारेण प्रतिपादिताः–रूपरसगन्धस्पर्शवती पृथिवीति (वै. सू. २-१-१)। चाक्षुषवचनात् सप्त सङ्ख्यादयः। "सङ्ख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म्म च रूपिद्रव्यसमवायाच्चाक्षुषाणि" (वै. सू. ४-१-१) इति चाक्षुषवचनाद् रूपवत्यां पृथिव्यां सङ्ख्यादयः सप्त सिद्धाः। यदि ते रूपिद्रव्येषु न सन्ति तत्स[8]मवायेन तेषां प्रत्यक्षत्वं सूत्रकारेण नोक्तं स्यादित्यर्थः।

पतनोपदेशाद् गुरुत्वमिति। "[9]संयोगवेगप्रयत्नाभावे गुरुत्वात्पतनम्" (वै. सू. ५-१-७) इत्युपदेशात् सूत्रकारेण पतनसम्बन्धिन्यां पृथिव्यां गुरुत्वमस्तीत्यर्थात् कथितम्, व्यधिकरणस्याकरणत्वात्।

[कु०] नैष दोषः घटादौ व्यवहारव्यवच्छेदयोः प्रतीतत्वेन नाप्रसिद्धविशेषणत्वम्। अबादौ च प्रतीतत्वेन न व्याघातासाधारणत्वे। सर्वस्यां पृथिव्यामप्रतीतत्वान्न साधनवैयर्थ्यम्। ननु तथा[प्यं]शे साधनवैयर्थ्यमिति चेत्, न तावत्प्रमाणान्तराधिगतगोचरत्वेन वैयर्थ्यं, सर्व्वोपसंहारेण व्याप्तिग्रहणवेलायामेव सामान्याकारेण प्रतीतवह्न्यादिविषयानुमानाङ्गीकारात्। नापि पूर्वाधिगतविषयानतिरेकवैयर्थ्यम्, कार्याकार्यसमस्तपृथिव्याः व्याप्ततया व्यवच्छेदयोः पूर्वमनधिग(ते)तयोर्व्याप्ततया क्वचिदप्यप्रतीतेरप्रसिद्धविशेषणत्वं तदवस्थमिति चेत्, न, पक्षधर्म्मतावल्लक्ष्यविशेषाप्रसिद्धेरप्रसिद्धविशेषणत्वात्सर्वानुमानो[च्छेद]प्रसङ्गादिति।

यदुक्तद्विसवत्या शत[स्]प्रत्ययेन च वैधर्म्यानेकत्वमिति तदाहत्याह–गन्धसहचरितेति (कं. २९.४) अत्र च गन्धसाहचर्येण चतुर्दशत्वमायंनानां गुणानां समुदायो वैधर्म्यं गन्धैकार्थसमवायवन्तः प्रत्येकं रूपादय इत्यनुसन्धेयम्। रूपादिभिर्द्रवत्वान्तैर्युक्तः संस्कार इति मध्यमपदलोपिनस्तत्पुरुषान्मरुपि समुदितानामेव सम्बन्धः प्रतीयते स च प्रमाणविरुद्ध इत्यत आह–अत्र द्वन्द्वेति (कं. २९.५)। सूत्रकारेण प्रतिपादिता इति (कं. २९.९) प्रत्यक्षप्रमाणेनेति शेषः।

ननु त्रयाणां रूपवत्त्वाद(दि)त्यत[स्त]स्मिन् समवायेनापि वचनार्थसं(ग)गतेः सर्व्वेषु समवायः कुत इत्यत आह यदि त इति (कं. २९.१३)। वा धर्मान्तरेण सङ्ख्योव्यान्यथासिद्धिशङ्कायामतिप्रसङ्गः स्यादिति भावः। अर्थादिति (कं. २९.१६) अर्थ्यते ज्ञायते अने[ने]त्यर्थो लिङ्गं तस्मादनमा[ना]त्कथितं प्रतिपादितमित्यर्थः। व्यधिकरणस्याकरणत्वादिति (कं. २९.१६) गुरुत्ववत् संयोगविरह इति विशेषः।

---

१ सहचरितं–जे. १, जे. ३। २ अतो–जे. ३। ३ 'वत्'–जे. १। ४ पृथिव्याः–जे. १, जे. ३। ५ सम्बन्धोऽपि–जे. १। ६ पाद्यतेऽनेना°–कं. १, कं. २। ७ पृथिव्याः–जे. ३। ८ समवाये प्रत्यक्षत्वं–कं. १, कं. २। ९ 'संयोगाभावे गुरुत्वात् पतनम्' (वै. सू. ५.१.७) इति सर्वत्र सूत्रपाठः, संयोगप्रतियत्नाभावे–कं. १, कं. २, संयोगप्रयत्नाभावे–जे. ३।

प्रशस्तपादभाष्यम्

[46-47-48] अद्भिः सामान्यवचनाद् द्रवत्वम् । उत्तरकर्मवचनात् [1]संस्कार इति ।

क्षितावेव गन्धः । रूपमनेक[2]प्रकारं शुक्लादि । रसः षड्विधो मधुरादिः । गन्धो द्विविधः सुरभिरसुरभिश्च । स्पर्शोऽस्या अनुष्णाशीतत्वे सति पाकजः ।

न्यायकन्दली

[46] अद्भिः सामान्यवचनाद् द्रवत्वम्, "सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम्" (वै. सू. २-१-७) इति वचनात् पृथिव्यां नैमित्तिकं द्रवत्वमस्तीत्युक्तम् । मधूच्छिष्टशब्देन सिक्थस्याभिधानम् ।

उत्तरकर्मवचनात् संस्कार इति । "नोदनादाद्यमिषोः कर्म, तत्कर्मकारिताच्च संस्कारात् तथोत्तरमुत्तरञ्च" (वै. सू. ५-१-१७) इति सूत्रकारेण इषौ पार्थिवद्रव्ये कर्महेतुः संस्कार इति दर्शयता पृथिव्यां वेगोऽस्तीति ज्ञापितम्, अविद्यमानस्याहेतुत्वात् । यथा चैक एव संस्कार आपतनात् तथोपपादयिष्यामः ।

क्षितावेव गन्धः । [3]अयमस्यार्थः—केवल एवायम[4]साधारणो धर्म इति । सुगन्धि सलिलम्, सुगन्धिः समीरण इति प्रत्ययाद् द्रव्यान्तरेऽपि गन्धोऽस्तीति चेन्न, पार्थिवद्रव्यसमवायेन तद्गुणोपलब्धेः । कथमेष निश्चय इति चेत् ? तदभावेऽनुपलम्भात् ।

[टि०] [46] तथोत्तरम् इति—यथा [5]नोदनाद्यस्य कर्मण उत्पत्तिस्तथोत्तरस्योत्तरसंस्कारादित्यर्थः तदभाव इति—पार्थिवद्रव्याभावे वायौ जले च गन्धो नोपलभ्यते, अत एव सन्निहितपार्थिवद्रव्यगन्ध एव जलवाय्वोरुपलभ्यते न तु गन्धान्तरम् ।

[पं०] [46] नोदनादिति—नोद्यनोदकयोरविभागहेतुः संयोगविशेषो नोदनम्, तस्माच्च कर्मवत्संस्कारा अपि नवनवा उत्पद्यन्ते इत्याह—यथा चैकेत्यादिना । तथोपपादयिष्याम इति गुणपदार्थे । द्रव्यान्तरेऽपीति—क्षितिव्यतिरेकसलिलसमीरणादौ । तदभावे इति=पार्थिवद्रव्याभावे ।

[कु०] [46] कारणमसमवायिकारणत्वमिति व्याख्येयमिति ज्ञापितमनुमानेन । प्रयोगस्तु उत्तरकर्मासमवायिकारणवत् कर्मत्वात् प्रथमकर्मवत् । अत्रैव विपक्षे बाधकमाह अविद्यमानस्येति (कं. २९.२१) ।

रूपादीनां गन्धसाहचर्येणासाधारणत्वं, गन्धस्य तु स्वरूपेणेति प्रदर्शनपरं भाष्यमिति व्याचष्टे [6]अस्यायमिति (कं. २९.२३) । पार्थिवेति (कं. २९.२४) समीरणसलिलसंयुक्तपार्थिवद्रव्यसमवेतो गन्धः समीरणे सलिले चोपलभ्यते इत्यर्थः । स्फटिकादावदर्शनादयमव्यापक इति चेत् न, अनुमानसिद्धेः । तथाहि 'स्फटिको' गन्धवान् पाकजरूपवत्त्वात्, कदलीफलवत्; इतरथा पाक[ज]रूपवानपि न स्या[त्] । [प्रा]गभावव्यतिरिक्तसामग्र्यभेदात्पाकजानामिति ।

---

१ संस्कारः—कं. १, कं. २ । २ प्रकारकं कि., पा. ५-पु. । ३ अस्यायमर्थः—जे. १; जे. ३ । ४ °मसाधारणधर्म इति—कं. १; कं. २ । ५ नोहनाद्यस्य—अ, नोदनाद्यस्य—ब; ६ अयमस्यार्थः—कं. ।

## न्यायकन्दली

[47] यद्यपि रूपं [1]त्रयाणाम् समानम्, तथाप्यवान्तरभेदापेक्षया तदपि पृथिव्या एव [2]वैधर्म्यमित्याह – रूपमनेकप्रकारकमिति । अत्रापि क्षिताववेत्यनु[3]सन्धानीयम् । शुक्लपीताद्यनेकविधं रूपं क्षितावेव नान्यत्रेत्यर्थः । एकस्यां पृथिवीत्वजातौ नाना रूपाणि व्यक्तिभेदेन समवयन्ति । क्वचिदेकस्यामपि व्यक्तावनेक[4]प्रकाररूपसमावेशः, यत्र नानाविधरूपसम्बन्धिभिरवयवैरवयव्यारभ्यते । कथमेतदिति चेत् ? उच्यते यथा[5]वयवैरवयव्यारब्धस्तथावयवरूपैरवयविनि रूपमारब्धव्यम्, अवयवेषु च न शुक्लमेव रूपमस्ति, नापि श्याममेव, किन्तु श्यामशुक्लहरितादीनि । न च तेषामेकं रूपमेवारभते नापराणीत्यस्ति नियमः, प्रत्येकमन्यत्र सर्वेषामपि सामर्थ्यदर्शनात् । न च परस्परं विरोधेन सर्वाण्यपि नारभन्त एवेति युक्तम् । चित्ररूपस्यावयविनः प्रतीतेर[6]रूपस्य द्रव्यस्य प्रत्यक्षत्वाभावाच्च । न चावयवरूपाणि समुच्चितान्यत्र चित्रधिया प्रतीयन्ते, [7]तैरेवावयवी प्रत्यक्ष इति [8]कल्पनायामन्यत्रापि तथाभावप्रसङ्गेनावयविरूपोच्छेदप्रसङ्गः, तस्मात्

[टि०] [47] [9]अन्यत्रापि तथाभावेति-तन्तूनामपि नीरूपत्वे [10][तदवयवानामंशूनामपि स्वावयवापेक्षयाऽवयवित्वात् नीरूपत्वे एवं परमाणावेव रूपसद्भावेऽप्रत्यक्षत्वप्रसङ्गश्च । न तावदितरेतरेति–इतरेतराभाववत्त्वमेवास्ति] नत्वितरेतराभावरूपता । अन्योन्येति–नीलाभावे [11]पीतिभावात् पीत्यभावे च नीलाभावादिति ।

[पं०] [47] त्रयाणामिति = पृथिव्यप्तेजसाम् । अवान्तरभेदापेक्षयेति – अवान्तरभेदाः पीतहरितादयः । नानारूपाणीति – खटिकाधातु हरितालादीनि । [12]अन्यत्रेति एक व[विधं ? ]पटादौ । अथ रूपरहितस्यैवावयविद्रव्ये रूपोपलब्धिर्भविष्यति । तन्निराकुर्वन्नाह – अरूपस्य द्रव्यस्य प्रत्यक्षत्वाभावाच्चेति कोऽर्थः ? यदि तैरवयवी नारभते ततोऽवयविनोऽरूपत्वप्रसंगः । अरूपस्य च न प्रत्यक्षत्वमित्यर्थः । समुच्चितानीति = मिलितानि । पटे–चित्रावयविनि । अन्यत्रापीति = अचित्रे पटावयविनि । तथाभावप्रसंगेनेति – रूपमवयवेष्वेवेतिप्रसंगेन । अवयविरूपोच्छेदप्रसंग इति –

[कु०] [47] यद्यपि गन्धसाहचर्येणैवासाधारणत्वं रूपस्य सिद्धं तथापि प्रकारान्तरेणाप्यसाधारणत्वप्रतिपादनपरं भाष्यमिति व्याचष्टे यद्यपीति (कं. २९.२६) । मत्वां(नन्व)नेकप्रकाररूपस्य नीलत्वपीतत्वादिसमुच्चितजात्याश्रयत्वं वा, एकस्यामेव पृथिवीव्यक्तौ नीलपीतादिव्यक्तिसमुच्चयो वा ? नाद्यः परस्परविरुद्धयोर्जात्योरेकत्र समावेशानुपपत्तेः । द्वितीयोऽपि न व्याप्त्या अनुपलम्भबाधात्, नाव्याप्त्या रूपस्य व्याप्यवृत्तिताविरोधादित्यत आह – एकस्यामिति (कं. ३०.२) ।

---

१ त्रयाणाम् तथाप्य° – कं. १, कं. २ । २ वैधर्म्यमाह – कं. १, कं. २ । ३ °नुषञ्जनीयम् – जे. १, जे. ३ । ४ प्रकारो – जे. १, जे. ३ । ५ रवयवरूपैं – जे. १, जे. ३ । ६ररूपस्य प्रत्यक्ष° – जे. १, जे. ३ । ७ तेनैवा° – कं. १, कं. २ । ८ कल्पनाप्रामाण्य° – जे. १, जे. ३ । ९ अन्यवापि–ड । १० [ ] [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति । ११ पीताभावात्पीताभावे च – अ, ब, क; १२ अत्रापि – कं. ।

## न्यायकन्दली

सम्भूय तैरारभ्यते। तच्चारभ्यमाणं त्रिविधकारणस्वभावानुगमाच्छ्यामशुक्लहरितात्मकमेव स्यात्, चित्रमिति च व्यपदिश्यते। विरोधादेकमनेकस्वभावमयुक्तमिति चेत्? तथा च प्रावादुकप्रवादः—"एकञ्च चित्रञ्चेत्ये[1]तत्तच्च चित्रतरं ततः" इति। को विरोधो नीलादीनाम्, न तावदितरे[2]तराभावात्मकः, भावस्व[3]भावानुगमादन्योन्यसंश्रयापत्तेश्च। स्वरूपान्यत्वं विरोध इति चेत्? सत्यमस्त्येव। तथापि चित्रात्मनो रूपस्य नायुक्तता, विचित्रकारणसामर्थ्यभाविनस्तस्य सर्वलोकप्रसिद्धेन प्रत्यक्षेणैवोपपादितत्वात्। अचित्रे पार्श्वे पटस्येव तदाश्रयस्य चित्ररूपस्य ग्रहणप्रसङ्गस्तस्यैकत्वादिति चेन्न, अन्वयव्यतिरेकाभ्यां समधिगतसामर्थ्यस्यावयवनानारूपदर्शनस्यापि चित्ररूपग्रहणहेतुत्वात्, तस्य च

[टि०] **अचित्रे पार्श्वे इति**—रूपं तावच्चित्रं सकलपटव्यापकं ततो यथा रक्ते पटप्रदेशे पटप्रतीतिर्भवति तथा एकस्य चित्ररूपस्य तत्रापि च रक्तेऽवयवे वर्तमानस्योपलम्भः प्रसज्यते। **तस्य च पार्श्वेति** तस्यावयवनानारूपदर्शनस्येत्यर्थः। तदन्यत्रापि इति—यथा विजातीयाभ्यां [4]तन्तुरूपाभ्यां द्वितन्तुके रूपमारभ्यते तथा समस्तेऽप्यवयविनि विजातीयैरेव रूपैरूपारम्भः [5]स्यादेव, द्वितन्तुकरू[6]पारम्भयोर्विशेषाभावात्। **विवादाध्यासितमिति**—सम्बन्धीति समवायकारणे[7]नेत्यर्थः अन्यथा नैकरूपसम्बन्धः संयुक्तसमवायलक्षणो मञ्जिष्ठाहरितालनीलीद्रव्यसंयोगिनि पटादिद्रव्येप्यस्तीति अनैकान्तिकता स्यात्। एककालं चैकरूपसमवायः साध्यः अन्यथा नानाकाले नानारूपा[8]श्रयेण परमाणुना व्यभिचारः स्यात्। द्रव्यत्वादि-

[पं०] अयमत्र भावः—पटापेक्षया तन्तुरवयवः। तन्वपेक्षया अंशुकः। अंशुकापेक्षया प्रत्यंशुकः। एवं परमाणौ विश्रान्तिः। परमाणुश्च नी(नि)रूपः। एवं रूपोच्छेदप्रसंगः। परः प्राह **विरोधादेकमित्यादि**। **प्रावादुकप्रवाद इति**—प्रावादुको धर्मकीर्तिः। चित्रतरमिति = आश्चर्यतरम्। श्रीधरः पृच्छति **को विरोधो नीलादीनामित्यादि**। [9]**भावस्वभावानुभावादिति**। विधिमुखेन प्रतीतेरित्यर्थः। **अन्योन्यसंश्रयापत्तेश्चेति** नीलसिद्धे तदभावात्मकनीलं सिध्यति। अनीले सिद्धे नीलमित्यन्योन्याश्रयत्वम्। **तदाश्रयस्येति**—स एव पट आश्रयो यस्य चित्ररूपस्य तत्तदाश्रयम्। तस्य तदाश्रयस्य। **तस्यैकत्वादिति**—चित्ररूपे यस्यैकत्वात्। **अवयवनानारूपदर्शनस्यापि चित्ररूपग्रहणहेतुत्वादिति**—न केवलं पटाख्यावयविरूपग्रहणं चित्ररूपग्रहणे हेतुः, अवयवनानारूपदर्शनमपि चित्ररूपग्रहणे हेतुरित्यपेरर्थः। **तदवयवरूपग्रहणाभावादिति**

[कु०] ननु व्यक्तिभेदेन समवेतानि नानारूपाणि कथं पृथिव्या व्यवच्छेदकानि, भागासिद्धत्वादिति चेत्, न, अनेकावान्तरभेदवदेकजातीयस्य पृथिवीत्यजात्याक्रान्ते धर्मिणि व्याप्यवृत्तित्वाविरोधात्। नैवम्, तोये तेजसि च तत्रावान्तरजातिभेदस्यैकयैव विधया समवायादिति। [त]तश्च तोये तेजस्त्वात्यन्ताभाववद्वृत्तित्वान्नीलत्वपीतत्वाद्यधिकरणं रूपं पृथिव्या एव वैधर्म्यमित्यर्थः।

---

१ °त्येतच्चित्रतरं तमः—जे. १, जे. ३। २ इतरेतराभावात्मकत्वं—जे. १, जे. ३। ३ °भावानुभवात्—जे. १, जे. ३। ४ तन्तुरूपाभ्यां इति अ.ब.क.पुस्तकेषु नास्ति। ५ स्यादेवं—अ, ब. ६ द्वितन्तुकरूपारम्भयोर्विशेषाभावात्—अ, ब, क; ७ कारणत्वेनेत्यर्थः—ड ८ ग्रयेण—अ; ९ —स्वभावानुगमात्—कं.।

न्यायकन्दली

पाश्र्वान्तरेऽभावात् । नन्वेवं तर्हि नानारूपैर्द्व्यणुकैरारब्धे द्रव्ये न चित्ररूपग्रहणम्, तदवयवरूपग्रहणाभावात् ? को नामाह [1]न तथेति, नहि परमसूक्ष्मस्य वस्तुनो रूपं विविच्य गृह्यते, यस्य तु विविच्य गृह्यते तस्यावयवरूपाण्यपि गृह्यन्ते । यस्त्वव्यापकानि बहूनि चित्ररूपाणीति मन्यते, तस्य नीलपीताभ्यामारब्धं द्वितन्तुके रूपानुत्पत्तिरेकैकस्यावयवरूपस्यानारम्भकत्वात् । अथ मतम्—तत्रोभाभ्यामेकं चित्रं रूपमारभ्यते, [2]तदान्यत्रापि तथा स्यादविशेषात् । विवादाध्यासितं [3]चित्रद्रव्यमेकरूपद्रव्यसम्बन्धि द्रव्यत्वादितरद्रव्यवत्, तद्गतं रूपमेकमवयविरूपत्वाद् इतरावयविद्रव्यरूपवत् ।

**[टि०]** त्यत्रापि रूपिद्रव्यत्वादिति [4]द्रष्टव्यम् अन्यथा *वाय्वाकाशादिना व्यभिचारः स्यात् । **तद्गतं** [5]**रूपम् इति**— ननु रूपस्य तावदेकत्वमसिद्धं साध्यत्वात् तत्कथं रूपमित्यत्र पक्षे एकवचनम् ? न [6]औत्सर्गिकत्वात् । अवयविग्रहणं पृथक्कालोपजायमानपरमाणुनानारूपव्यवच्छेदार्थम् । **अवयविरूपत्वाद्** इत्येकावयविरूपत्वादित्यर्थः अन्यथा नानावयवरूपैरनेकैर्व्यभिचारः स्यात् । दृष्टान्ते द्रव्यग्रहणं स्वरूपकथनार्थं व्यवच्छेद्याभावात् ।

**[पं०]** तस्य नानारूपद्व्यणुकारब्धद्रव्यस्य येऽवयवा द्व्यणुकलक्षणास्तेषां यद्रूपं तद्ग्रहणाभावात् । **यस्त्विति = व्योमशिवः** । **अव्यापकानि बहूनि चित्ररूपाणीति मन्यते इति** चित्रत्वेन संमतस्य वस्तुनो रूपाणि अव्यापकानि परस्परविशकलितानि बहूनि मन्यते । चित्रपटे यावन्तोऽवयवास्तावन्ति रूपाणि मन्यते । न तु सर्वैरवयवैरेकमेव चित्ररूपमारभ्यत इति मन्यत इत्यर्थः । **द्वितन्तुक इति**=द्वितन्तुकपटे । **अवयवरूपस्येति**=तन्तुरूपस्य । **अन्यत्रापि तथा स्यादिति** बहुभिरप्येकमेव चित्ररूपमारभ्यत इत्यर्थः । बहुभिरप्यवयवैरेकमेव चित्ररूपमारभ्यत इति प्रयोगं दर्शयति **विवादाध्यासितं द्रव्यमित्यादि**— विवादाध्यासितं द्रव्यं चित्रपटलक्षणम् । **द्रव्यत्वादिति**—रूपद्रव्यत्वादिति व्याख्येयम् । अन्यथा द्रव्यत्वादितिकृते वायोरप्येकरूपसंबंधित्वं प्राप्नोति । **इतरद्रव्यवदिति**—अचित्रपटद्रव्यवत् । पुनः प्रयोगं दर्शयति—**तद्गतं रूपमेकमित्यादि** तदगतं = चित्रपटगतम । **इतरावयविद्रव्यरूपवदिति**—अचित्रपटावयविद्रव्यरूपवत् ।

**[कु०]** प्रसङ्गाच्चित्रमेकं रूपं साधयति **क्वचिदेकस्यामपीति** (कं. ३०.३) । अनेके(न) प्रकाराः प्रकृतयोऽसमवायकारणानि नीलपीतादीनि यस्य तदनेकप्रकारं चित्ररूपं तस्येत्यर्थः । **कथमेतदिति** (कं. ३०.४) चित्ररूपस्यैकत्वे किं प्रमाणमित्यर्थः । नन्वचित्रे सर्वेषां समानजातीयं प्रत्येव सामर्थ्यमित्यत आह—[7]**न च परस्परविरोधादिति** (कं. ३०.८) । न रूपं प्रतीयते किन्तु केवलमेव द्रव्यं प्रतीयते इत्यत आह—**अरूपस्येति**—(कं. ३०.९) । द्रव्यस्याप्रत्यक्षत्वे अवयवरूपाभावमुपाधिमाशङ्क्यातिप्रसङ्गेनापाकरोति **अवयवरूपाणीति** (कं. ३०.९) । **श्यामशुक्लेति** (कं. ३०.१२) श्यामत्वादिव्यतिरिक्तैकजात्याक्रान्तमित्यर्थः । चित्रत्वं नामैकां जातिमपश्यतः प्रत्यवतिष्ठन्तो **को विरोध इति** (कं. ३०.१५) । इह विरोधाच्चित्रमपह्नुवानः प्रष्टव्यो जायते । किं कारणं विरोधाद् चित्रानुत्पादः, कार्यस्यैव विरोधान्निःस्वभावता वा, कारणविरोधोऽपि भाववदन्यान्योपमर्दकतया नीलपीतादीनामितरेतराभाव[व]त्तया वा ? नाद्य इत्याह—**न तावदिति** (कं. ३०.१५) । न द्वितीय इत्याह—**स्वरूपान्यत्वमिति** (कं. ३०.१६) । तथापीतरेतराभाववतामपि दण्डचीवरचक्रादीनामेककार्यकरत्वदर्शनादित्यर्थः । कार्यविरोधपक्षं प्रत्याह—**विचित्रकारणेति** (कं.

१ नेति—जे. १, जे. ३ । २ तदन्यत्रापि—कं. १, कं. ३ । ३ द्रव्यं—जे. १, जे. ३ । ४ द्रव्यम्—अ, ब, क । *आकाशादिना—अ । ५ रूपमेवेति—अ, ब । ६ उत्सर्गिकत्वात्—अ, ब, क । ७ न च परस्परं विरोधेन—कं. ।

## न्यायकन्दली

[48] रसः षड्विध इत्यत्रापि पूर्ववद् व्याख्यानम्। यद् गन्धस्य भेदनिरूपणं तत्पारम्पर्येण पृथिव्या अपि स्वरूपकथनमित्यभिप्रायेणाह–गन्धो द्विविध इति। तदेव द्वैविध्यं दर्शयति–सुरभिरसुरभिश्चेति। असुरभिरिति सुरभिगन्धविरुद्धं प्रतिद्रव्यादिसमवेतं

[टि०] [48] अत्रापि पूर्ववद् इति–नानावयविषु नानारसः क्वचिदेकत्रैवावयविनि हरीतक्यादौ नानारसः।

यद्गन्धस्य इति–नन्वितरेषामपि रसादीनां भेदनिरूपणं पारम्पर्येण पृथिव्या एव भेदकथनमिति कथं गन्धवेलायामेवेदमुक्तम्? सत्यम्। रसःषट्विधोऽपि पृथिवी षोढा व्यवस्थापयितुं न शक्नोति, एकावयविन्यपि षण्णां रसानां सम्भवात्; गन्धस्तु व्यवस्थापयति, एकत्राश्रये गन्धद्वयाभावादिति। यत्तु कर्दमकर्पूरारब्धे पिण्डे गन्धान्तरं तत्र स्वस्वाश्रयाश्रितगन्धद्वयप्रतीतिरेव कर्पूरखण्डावयविन्त[2] कर्दमेन सह संयोगस्यैव भावात्। पाकादिन्यायेन कर्पूरकर्दमरूपैकावयवारम्भेऽपि यदि सौर[1]भ्यमाभाति तदा[4] पाकादेव [5]सुरभेर्गन्धान्तरस्योत्पत्तिरसौ[6]रभ्यं चेदसुरभेरिति।

अथवा सोऽप्यसुरभिः इति–ननु यथा कश्चित्स्पर्शः उष्णः कश्चिच्छीतः कश्चिदनुष्णाशीतस्तथा गन्धोऽपि [7]सुरभिरसुरभ्यसुरभिरिति त्रिधाऽभ्युपगन्तव्यम्। नञ् प्रयोगेण तु शेषगन्धस्यासुरभावन्तर्भावे उष्णस्पर्शादिन्योऽनुष्ण इति

[पं०] [48] रसः षड्विध इति–मधुरतिक्तकटुकषायाम्ललवणभेदात्। अत्रापि पूर्ववद्व्याख्यानमिति कोऽर्थः? यथा रूपमनेकप्रकारकं पृथिव्या वैधर्म्यं तथा रसः षड्विधः पृथिव्या वैधर्म्यमित्यर्थः। यद्गन्धस्य भेदनिरूपणं तत्पारंपर्येण पृथिव्या एव रूपकथनमिति–गन्धद्वैविध्यद्वारेण पृथिव्या एव द्विविधं स्वरूपं कथितम्। अन्यथा भेदरहिते न गन्धस्वरूपनिरूपणेनैवान्येभ्योऽबादिभ्यो वैधर्म्यं सिद्धम्। किं भेदकथनेनेति भावः।

[कु०] १०.१७)। अय भावः–यथा नीलमित्यनुवृत्तप्रत्यया नीलत्वजातिरेका एवं चित्रमित्यनुवृत्तिप्रत्ययबलाच्चित्रत्वमपि जातिरेका स्वीकर्तव्या, तदपलापे जातिमात्रविलयापत्तेरिति। न हीति (कं. ३०.२२) परमसूक्ष्मस्य त्र्यणुकस्य स्वरूपं विविच्य रूपत्वावान्तरजातिमत्तया चित्रमिति न गृह्यते इतीष्टापादनस्तर्काभास इत्यर्थः। एवं तर्किते विषये प्रयोगमाह विवादेति (कं. ३०.२६)। अवयविरूपत्वात्–एकद्रव्यरूपत्वात्। यत्तु शुक्लादीनां रूपाणामेकैकव्यक्तितया शुक्लत्वादिजातिभेदं न सहन्ते भेदप्रतीतिमाश्रयभेदो तारतम्यप्रतीतिं वाश्रयमिश्रणेव निर्वहन्ति तेषामापाकनिक्षिप्तकुम्भस्याविनाशे पूर्वरूपविवृत्तिप्रतीतिरुत्तररूपोत्पादप्रतीतिश्च न स्यात्, कुम्भविनाशे तु ते स्यातामपि तथाप्यनेकव्यक्तिवृत्तेर्नित्यस्य सामान्यलक्षणापत्तौ गोत्वादिभिः सह परापरभावानुप[प]त्तेर्जातिसङ्करप्रसङ्गो द्रष्टव्यः।

[कु०] [48] पूर्ववद्व्याख्यानमिति (कं. ३०.२८) स्फटिकादौ गन्ध[व]त्पाकजरूपेणानुमानाद्रसविशेषसिद्धौ रसत्वावान्तरजातिमन्तर्भाव्य रसत्वादिकरणसमवायः पृथिव्या वैधर्म्यमिति रूपेण साम्यं द्रष्टव्यम्। गन्धमात्रस्य पृथिव्येकवृत्तितया [त]द्भेदनिरूपणस्याप्रस्तुतत्वशङ्का(म)पनयनसङ्गतिमाह यदिति (कं. ३०.२८)। पारम्पर्येणेति (कं. ३१.१)–भास्वराभास्वररूपभेदवद्गन्धभेदस्य द्रव्यभेदव्यवस्थापकत्वभ्रमनिरासो नेति भावः। नञः पर्युदासवृत्ति-

१ द्वयो–अ, ब; २ वयविन्त–अ; ३ सोऽवइय–अ, ब, क; ४ तदणकादेव–अ, ब; ५ सुरते–अ, ब; ६ सौरत्यं–अ, ब; ७ सुरभिरसुरभ्यसुरभिरिति–अ, ब; सुरभिरसुरभिरसुरभ्यनसुरभिरिति–ड;

## न्यायकन्दली

प्रतिकूलसंवदेनीयं गन्धान्तरम्, न तु तदभावामात्रम्, विधिरूपेण सातिशयतया च संवेदनात्। उपेक्षणीयस्तु गन्धोऽनुद्भूतसुरभ्यसुरभिप्रभेद एवेति पृथङ्नोच्यते। अथवा सोऽप्यसुरभिरेव सुरभिगन्धादन्योऽसुरभिरिति व्युत्पादनात्।

यथाभूतः स्पर्शोऽस्याः वैधर्म्यं तथा दर्शयति–स्पर्शोऽस्या इति। पाकजः स्पर्शः पृथिव्या वैधर्म्यं तस्य स्वरूपकथनमनुष्णाशीत इति। यद्यपि स्पर्शवत्पाकजौ रूपरसावप्यस्याः वैधर्म्यम्, तथापि रूपरसयोः पाकजत्वानभिधानम्, अन्यथापि तयोर्वैधर्म्यस्य[1] सम्भवात्, वैधर्म्यमात्रस्यैव प्रतिपादनस्यैव[2] विवक्षितत्वात्। अप्रतीयमानपाकेषु[3] स्तम्भादिषु स्पर्शस्य पाकजत्वमनुमानात्। स्तम्भादिषु स्पर्शः पाकजः, पार्थिवस्पर्शत्वात्,

[टि०] स्पर्शोऽपि द्विविध एवाभ्युपगन्तव्यो न त्वनुष्णाशीत इति? सत्यम्, गन्धः प्रकारद्वयप्रतिपादितोऽपि[4] पृथिवीत्वजातिनियतः स्पर्शस्तूष्णो वह्नित्वे नियतः शीतस्त्वप्त्वेऽनुष्णाशीतस्तु पृथिवीत्वे इति त्रिविध एव नियन्तुं शक्यते इति।

**अन्यथाऽपि तयोः** इति–अन्यथाऽनेकप्रकारत्वेनेत्यर्थः। **घटादिस्पर्शस्य** इति–एकेन्द्रियग्राह्यत्वाद्[5] इति तद्गतसङ्ख्यादिव्यवच्छेदार्थम्। तदगुणत्वादिति वायुस्पर्शव्यवच्छेदार्थम्। सर्पवृश्चिकादिस्पर्शविशेषाद्दुःखविशेषोत्पत्तिभावो[6] विपक्षे बाधकम्। द्रव्यमात्रस्य तत्कारणत्वे मदिरादीनां[7] दर्शनस्पर्शनादिभेदे[8] प्रायश्चित्तभेदानुपपत्तिः।

[पं०] **विधिरूपेणेति** अभावो हि निषेधरूपः स्यादिति भावः। **सातिशयतया चेति** न ह्यभावस्य प्रकर्षापकर्षौ भवतः। **अन्यथापि तयोर्वैधर्म्यस्य सम्भवादिति**। पाकजत्वं विना रूपस्य चित्रत्वेन रसस्य च षड्विधत्वेन वैधर्म्यं घटते इत्यर्थः। **एकेन्द्रियग्राह्यत्वे सतीति** संख्या परिमाणादिगुणव्यवच्छेदयो एकेन्द्रियग्राह्यत्वे सतीति विशेषणम्। तेषां दर्शनस्पर्शनाख्येन्द्रियग्राह्यत्वात् **तद्गुणादिपार्थिवगुणत्वात्**[9] **तद्गतरूपवदिति** यथा घटादिगतरूपं एकस्य चक्षुरिन्द्रियस्य ग्राह्यं पार्थिवगुणश्च।

[कु०] माश्रित्य गन्धसामानाधिकरण्यं समर्थयते **असुरभिरिति** (कं. ३१.३)। तत्र हेतुमाह **विधिरूपेणेति** (कं. ३१.४) मण्यादौ चानुमानसिद्धस्य गन्धस्य प्रतीयमानविधायास्तुप्रवे[शा]दे[व] शङश[ङ्का] भवति न विधान्तरत्वशङ्का इत्याह–**उपेक्षणीयमिति**[10] (कं. ३१.४)। सुरभिगन्धादनुकूलवेदनीयावन्यः प्रतिकूलवेदनीयोऽसुरभिरिति व्युत्पादना[त्] तृतीयप्रकारकल्पनागौरवप्रसङ्गादिति भावः।

**तस्य स्वरूपकथनमिति** (कं. ३१.८) पृथिवी स्पर्शवती त्वगिन्द्रियग्राह्यत्वादुदकवदिति स्पर्शसिद्धानु[ष्णा]शीतत्वयोरनुपलम्भबाधे तृतीयस्पर्शसिद्धेः। शीतोष्णावेव स्पर्शौ, अनुष्णाशीतव्यवहारस्तु परस्पराभिभवप्रयुक्त इति कल्पनाव्यामोहमात्रनिबन्धनमित्यनुसन्धेयम्। **अन्यथापीति** (कं. ३१.९) अवान्तरजातिमत्तयेत्यर्थः। ननु तथापि पाकजत्वमपि विद्यमानत्वाद्वक्तव्यमेवेत्यत आह–**वैधर्म्यप्रतिपादनमात्रस्येति**[11] (कं. ३१.१०) नन्वस्तु प्रतीयमानपाकेषु

---

१ वैधर्म्यसम्भवात्–जे. १, जे. ३। २ वैधर्म्यमात्रप्रतिपादनस्यैव–कं १, कं. २। ३ पाकजेषु–कं. १, कं. २। ४ पादितो–अ, ५ ग्राह्यतो–मु. जे. १, ३; ६ त्पत्त्यभावो विपक्ष–अ, ब, क; ७ मदिराविरादीनां–अ; ८ दर्शनादिभेदे–अ, ब; ९ तद्गुणत्वात्–क.। १० उपेक्षणीयस्तु–कं.। ११ वैधर्म्यमात्रप्रतिपादन–कं.।

## प्रशस्तपादभाष्यम्

**[49] सा [1]च द्विविधा–नित्या चानित्या च। परमाणुलक्षणा नित्या, कार्य्यलक्षणा त्वनित्या।**

**सा च स्थैर्य्याद्यवयवसन्निवेशविशिष्टाऽपरजातिबहुत्वोपेता शयनासनाद्यनेकोपकार[2]करी च।**

## न्यायकन्दली

घटादिस्पर्शवत्। घटादिस्पर्शस्यापि पाकजत्वमेकेन्द्रियग्राह्यत्वे सति तद्गुणत्वात् तद्गतरूपवत्।

[49] अवान्तरभेदनिरूपणार्थमाह–**नित्या चानित्या चेति।** प्रकारान्तराभावसंसूचनार्थौ चशब्दौ। का नित्या का चानित्येत्याह–**परमाणुलक्षणा नित्या कार्यलक्षणा त्वनित्येति।** उभयत्रापि लक्षणशब्दः स्वभावार्थः। परमाणुस्वभावायाः पृथिव्याः सत्त्वे किं प्रमाणम्?

[**टि॰**] [49] **परि[3]माणतारतम्यत्वाद् इति**–वैयाकरणाभिप्रायेण तरतमगुणान् [4]द्वण् स्वरूपे तु[5] त्व प्रत्यय इत्यविरोधः। यदुक्तं [6]जातिगुणाज्जातिर्गुणे समासकृत्तद्धितद्धितात्तु सम्बन्धे डित्थादेः स्वरूपे त्वतलादीनां विधिर्भवतीति महतो द्रव्यस्य परिमाणतारतम्यं महत् परिमाणतारतम्यमिति विग्रहः, अन्यथा डात्वं स्यात्। नन्वत्र [7]पक्षेऽणुशब्दप्रयोगो न तावन्मुख्यः परमाणुद्व्यणुकादन्येषां द्रव्याणां [8]महत्त्वात्, नाप्यौपचारिकः परमाणुसिद्ध्यभावे मुख्याणु[9]त्वासिद्धौ गौणप्रयोगानुपपत्तेरितरेतराश्रयप्रसङ्गात्। नैवम्, अणुपरिमाणतारतम्यस्य महापरिमाणापकर्षतारतम्यार्थत्वात् अणुशब्दस्य

[**पं॰**] [49] **महत्परिमाणतारतम्यवदिति** महत्त्वेनोपलक्षितं परिमाण महत्परिमाणमिति व्याख्येयम्। न तु महत्त्व(त्त्वं) तत्परिमाणं चेति व्याख्येयम्। तथा व्याख्यायां हि आकारो महतः कार्यस्तुल्याधिकरणे पदे इत्यनेन महापरिमाणमिति सिद्ध्यते। **द्रव्यत्वे सत्यनवयवत्वादिति** रूपादिगुणव्यवच्छेदाय द्रव्यत्वे सतीति विशेषणम्। बुद्ध्यादीनां तु निरवयवत्वेऽपि द्रव्यत्वाभावादनित्यत्वमिति द्रष्टव्यम्। **कार्यपरिमाणापेक्षयेति** कार्यो घटादिरवयवी

[**कु॰**] कुम्भादिषु स्पर्शस्य पाकजत्वं प्रत्यक्षसिद्धत्वाद् अप्रतीयमानपाकेषु मणिस्तम्भादिषु कथमित्यत आह **अप्रतीयमानेति** (कं. ३१.१०)। न तु रूपरसादिवत्पाकजन्यविशेषाप्रतीतेः कथं घटस्पर्शस्यापि पाकजत्वं, मृदुत्वकठिनत्वे तु प्रशिथिलसंयोगभेद विदे(धा)ति साध्यविकलो दृष्टान्त इत्यत आह **घटेति** (कं. ३१.११)। **एकेन्द्रियग्राह्यत्वे सतीति** (कं. ३१.११) विशेषणं परिमाणादिभिर्व्यभिचारपरिहाराय। आप्यशैत्येन परिहाराय **तद्गुणत्वादिति** (कं. ३१.१२)। [49] **अवान्तरभेदनिरूपणार्थमिति** (कं. ३१.१२) नित्यत्वनियमे प्रमाणाभावादनित्यत्वनियमे च कार्यकारणव्यवस्थानुपपत्तेरिति शेषः। **प्रकारान्तरभावेति** (कं. ३१.१३) अनुष्णाशीतवत् क्वचिद्विहिता निषिद्धव्यतिरिक्तस्य सम्भवात् पदत्वान्तं निवर्तने नावधारणार्थौ च शब्दादिति भावः। **अणुपरिमाणतारतम्यमिति** (कं. ३१.१५) न द्व्यणुशब्देन महत्त्वप्रतियोगिपरमाणुद्व्यणुकपरमाणु[परिभाषा]मुच्यते, यतः परमाणुसिद्धौ द्व्यणुकसिद्धिः, [द्व्यणुक]सिद्धौ तदपेक्षया निकर्षातिशयविश्रान्त्या परमाणुसिद्धिरितीतरेतराश्रयदोषः स्यात्। किन्तु बिल्वादाम(म)लकमणु(सा) मामलकात्कुवलमण्विति येयं परिमाणातिशयापकर्षपरम्परा सैवाणुपरिमाणतारतम्यमित्युच्यते; सा च विश्रान्तिः।

---

१ 'तु'–कं.। २ °वती–दे। ३ तारतम्याद्–अ, ब, क; ४ ध्य?–इ; ५ तु प्रत्यय–अ, ब, क; ६ जातिसमासकृत्तद्धिमातुसम्बन्धे–अ; ७ पक्षेषु–अ, ८ सत्त्वात्–अ, ब, क; ९ णुत्वासिद्धौ–अ, ब, क;

## न्यायकन्दली

अनुमानम्, अणुपरिमाणतारतम्यं क्वचिद् विश्रान्तं परिमाणतारतम्यत्वाद् महत्परिमाणतारतम्यवत्, यत्रेदं विश्रान्तं यतः परमणुर्नास्ति सः परमाणुः। अत एव नित्यो द्रव्यत्वे सत्यनवयवत्वादाकाशवत् अथायं सावयवो न तर्हि परमाणुः, कार्य्यपरिमाणापेक्षया तदवयवपरिमाणस्य लोकेऽल्पीयस्त्वप्रतीतेः, यश्च तस्यावयवः सः परमाणुर्भविष्यति। अथ सोऽपि न भवति, अवयवान्तरसद्भावात्? एवं तर्ह्यनवस्था, ततश्चावयविनामल्पतरतमादिभावो न स्यात्, सर्वेषामनन्तकारणजन्यत्वाविशेषेण परिमाणप्रकर्षाप्रकर्ष[1]हेत्वोः कारणसङ्ख्याभूयस्त्वयोरसम्भवात्। अस्ति ता[2]वदयं परिमाणभेदः, तस्मादणुपरिमाणं क्वचिन्निरतिशयमिति सिद्धो नित्यः परमाणुः। स चैको नारम्भकः, एकस्य नि[3]त्यस्य चारम्भकत्वे कार्य्यस्य सततोत्पत्तिः स्यादपेक्षणीयाभावात्, अविना-

[टि०] व्यवहारसिद्धत्वाच्च। अत एव इति–द्रव्यत्वस्य ग्रहणं बुद्ध्यादेः [4]अनवयवत्वस्य तु घटादेर्व्यवच्छेदार्थम्। विपक्षे बाधकमाह–अथायं सावयव इत्यादि। आश्रयविनाशस्य इति–अंशुक्रियादिना तन्तुनाशे पटनाशः, आश्रयनाशात्[5]तन्तुविभागेन त्ववयवविभागात्। यद्यपि चात्र सं[6]योगनाशो द्रव्यनाशे कारणं [7]तथापि सारूप्यापेक्षया विभागस्य कारणत्वमुक्तम्। इह महत्कार्येति–महतः परिमाणस्याश्रयः कार्यद्रव्यमिति षष्ठीसमासः भा[8]वप्रधानो वा महत्त्वेनोपलक्षितं [9]कार्यद्रव्यं महत्कार्यद्रव्यमिति मयूरव्यंसकादित्वात् समासः। [10]त्र्यणुकं कार्येतिः–अत्र महतः [11]परिमाणस्येति

[पं०] तस्य यत्परिमाणं तदुद्दिश्य–तदवयवपरिमाणस्येति = कार्यावयवपरिमाणस्यावयव्यपरिमाणस्येति यावत्। अथ सोऽपि न भवतीति अथ सोऽपि परमाणुर्न भवतीत्यर्थः। परिमाणप्रकर्षापकर्षहेतोरिति परिमाणप्रकर्षापकर्षयोर्हेतू, परिमाणप्रकर्षापकर्षहेतुतायाः, परिमाणप्रकर्षापकर्षहेत्वोः। इति सिद्धो नित्यः परमाणुरिति–परमाणुत्वसिद्ध्यादिनिरवयवत्वसिद्धिस्ततश्च नित्यत्वसिद्धिः।

कार्यपृथिवीप्रतिपादनायाह स चैक इत्यादि। अविनाशीत्वं च प्रसज्येत इति कार्यस्येति योगः। आश्रयविनाशस्यावयवविभागस्य च विनाशहेतोरभावादिति नित्यत्वादाश्रयविनाशाभावः। एकत्वात्स्ववयवविभागाभावः। त्र्याणामारम्भकत्वमप्ययुक्तमिति–त्र्याणामप्यारम्भकत्वमयुक्तमिति पदघटना। न केवलमेकः परमाणुः कार्यद्रव्यं

[कु०] साऽवयवेऽपर्यवसानबलान्निरवयवमल्पपरिमाणमादाय पर्यवस्यतीति परमाणुसिद्धिः। न त्वेवमप्यपकर्षविश्रान्तिदृष्टान्ते प्रकर्षविश्रान्तसिद्धिः तत्सिद्धौ तत्सिद्धिरितीतरेतराश्रयत्वं तदवस्थमिति चेत् न, विभवान्महानाकाश इत्यादि प्रमाणान्तरादेव प्रकर्षविश्रान्तिसिद्धेः।

एवं परमाणुस्वरूपायां पृथिव्यां प्रमाणमभिधाय तस्याः नित्यत्वे प्रमाणमाह–अत एवेति (कं. ३१.१८)। कार्यगुणैः कर्मणा[व्यभि]चारपरिहाराय द्रव्यत्वे सतीति (कं. ३१.१९) विशेषलक्षणे प्रोच्यानुमा[न] पक्षधर्मता-

१ हेतोः–कं. १, कं. २। २ चायं–जे. १, जे. २। ३ नित्यस्यारम्भकत्वे–जे. १, जे. ३। ४ अवयवत्वस्य–अ, ब; ५ नाशनात्तत्र–अ; ६ संयोगनाशे कारणम्–अ, ब; ७ सा द्रव्यापेक्षया–अ, भावरूपापेक्षया–ड; ८ भावप्राधान्ये वा–ड; ९ कार्यद्रव्यमिति मयूरव्यंसकादित्वाद्–अ, ब; १० अणुकं–अ, ब; ११ परिणामस्येति–अ, ब;

### न्यायकन्दली

**शित्वञ्च प्रसज्येत, आश्रयविनाशस्यावयवविभागस्य च विनाशहेतोरभावात्। त्र[1]याणामप्यारम्भकत्वमयुक्तम्, इह महत्कार्य्यद्रव्यस्योत्पत्तौ स्वपरिमाणापेक्षयाऽल्पपरिमाणस्य कार्य्यद्रव्यस्यैव सामर्थ्यदर्शनात्। त्र्यणुकं कार्य्यद्रव्येणैव जन्यते, महत्परिमाणत्वात्, घटवत्। एवं त्रयाणामेकस्य चारम्भकत्वे प्रतिक्षिप्ते द्वाभ्यामेव परमाणुभ्यामारभ्यते यत् तद् द्व्यणुकमिति [2]सिद्धम्। द्व्यणुकैर्बहुभिरारभ्यत इत्यपि नियमो न, द्वाभ्यां तस्याणुपरिमाणोत्पत्तौ कारणसद्भावेनाणुत्वोत्पत्तावारम्भवैयर्थ्यात्, बहुषु त्वनियमः। कदाचित् त्रिभिरारभ्यत इति त्र्यणुकमित्युच्यते, कदाचिच्च[3]तुर्भिरारभ्यते, कदाचित् पञ्चभिरिति यथेष्टं कल्पना। न च कार्य्यस्य व्यर्थता, यथा यथा कारणसङ्ख्याबाहुल्यं तथा तथा महत्परिमाणतारत[4]म्यस्योपलम्भात्। न चैवं सति द्व्यणुकानामेव घटारम्भकत्वप्रसक्तिः,**

[**टि०**] व्यधिकरणो बहुव्रीहिः उष्ट्रमुखादि[5]त्वाद् वा—बाधनार्थः। [6]मत्वर्थीये वाऽभावप्रत्यये मयूरव्यंसकादित्वाद् उपलक्षणतृती[7]यासमासः। अत्र परममहत्यपि [8]महत्त्वसद्भावादाकाशेन व्यभिचारवारणार्थं महत्कार्यत्वादिति द्रष्टव्यम्। महत्त्वेनोपलक्षितं कार्यद्रव्यमिति मयूरव्यंसकादित्वात्समासः। नन्वत्र विपक्षे बाधकाभावात् व्याप्यत्वासिद्धिः अन्वयव्यतिरेकावधारितसामर्थ्यात्का[9]रणसंख्याबाहुल्यादेव [10]त्र्यणुके महत्वसिद्धेः? नैवम्, सर्वत्र कार्यत्वस्याप्यन्वय-

[**पं०**] नारभते, त्रयोऽपि परमाणव्ये[वः] नारम्भन्ते इत्यर्थः। **स्वपरिमाणापेक्षयेति** साध्यमानपरिमाणापेक्षया। **कार्यद्रव्येणैवेति**—द्व्यणुकत्रयलक्षणेनैव। **द्वाभ्यामेव परमाणुभ्यामारभ्यते यत्तद् द्व्यणुकमिति सिद्धमिति** द्वाभ्यामेव संयुक्ताभ्यां परमाणुभ्यां द्व्यणुकमारभ्यते। ननु त्र्याणामपि संयोगः स्यात् ततस्तैस्त्र्यणुकमारभ्यताम्। नैवम्। त्र्यणुकं महत्कार्यद्रव्यं चाक्षुषं च। तत्कथं त्रिभिरणुभिरचाक्षुषैरारभ्यते। बहुभिरिति त्र्य[त्र्या]दिभिः। **आरभ्यते इति** अग्रेतनं कार्यद्रव्यम्। **न द्वाभ्यामिति** न द्वाभ्यां द्व्यणुकाभ्यामग्रेतनं कार्यद्रव्यमारभ्यते, किन्तु त्र्यादिभिर्द्व्यणुकैरारभ्यत

[**कु०**] पर्यालोचनया विशेष्यासिद्धिं परिहरति **अथेति** (कं. ३१.१९)। ननु [11]वियतः सावयवः द्रव्यत्वान्मूर्तत्वाद्वा तन्तुवदित्यनुमानेन तस्याप्यवयवत्वमनुपपन्नमित्याशङ्क्य तदवयवसाधकानुमानस्य प्रतिकूलतर्कपराह(र)तिमाह **अथ सोऽपीति** (कं. ३१.२१)। निरतिशयं निरवयवम्।

एवं तावन्नित्यायाः पृथिव्याः सद्भावे प्रमाणमभिधायानित्याया उत्पत्तिप्रकारं चिन्तयन् प्रसङ्गाद् द्व्यणुके प्रमाणमाह **स(ह) चैक इति** (कं. ३१.२५)। नन्वेकस्यानारम्भकत्वेऽपि न द्व्यणुकसिद्धि, त्रयाणां संयोगमपेक्ष्यारम्भकत्वेऽपि (कार्य)कार्यकादाचित्कत्वोपपत्तेरित्यतस्तर्कान्तरमाह **त्रयाणामिति** (कं. ३२.२)। आकाशादौ व्यभिचारपरिहाराय कार्यत्वे सतीति विशेषणम्। नित्यद्रव्यगुणकर्म्मसु व्यभिचारपरिहाराय महत्वादिति पदम्।

**घटवदिति**—(कं. ३२.५) ननु घटस्य कार्यत्वकारणत्वमात्रं प्रयोजकान्तम्(मन्) (महत्वे तु) अवयवमहत्वे तु अवयवसङ्ख्याप्रचयाः प्रयोजकाः। तदवयवकार्यत्वं तु अवर्जनीयं सन्धितया न व्यापकमिति चेत्, न, अवयवकार्यत्वा-

---

१ त्रयाणामारम्भकत्वमप्ययुक्तम्—जे. १, जे. ३। २ निश्चितम—जे. १, जे. ३। ३ चतुर्भिः—जे. १, जे. ३। ४ °म्योपलम्भात्—कं. १, कं. २। ५ त्वात्कात्—अ, ब; ६ मत्वर्थेन—अ; ७ तृतीय—ड; ८ महत्कृतसद्भाव—अ, ब; ९ कारण—अ, ब, क; १० अणुके—अ, ब; ११ 'आकाश' इत्यर्थे कोऽपि शब्दो भवेत्?

न्यायकन्दली

घटस्य भङ्गेऽल्पतरतमादिभागदर्शनेन तथैवा[1]रम्भककल्पनात्। तदेवं द्व्यणुकादिप्रक्रमेण क्रियते कार्य्यलक्षणा पृथिवी।

सा चानित्या कारणविभागस्याश्रयविनाशस्य च हेतोः सम्भवात्। कार्य्यलक्षणायाः पृथिव्या अनित्यत्वेन सह धर्मान्तरं समुच्चिन्वन्नाह–सा चेति। स्थैर्यं निविडत्वम्। आदिशब्दात् प्रशिथिलत्वादिपरिग्रहः। अवयवानां सन्निवेशोऽवयवसं[2]योगविशेषः। स्थैर्य्या[3]दयश्च तेऽवयवसन्निवेशाश्च तैर्विशिष्टा अपरजातिबहुत्वोपेता [4]गोत्वशवत्वादि-जातिभूयस्त्वयुक्तेत्यर्थः। परमाण्वादिष्वपरजात्यभावेऽप्यदृष्टवशात्तथा तथा तेषां व्यूहो

[टि०] व्यतिरेकाभ्यां व्याप्तिर्दाढर्यादिति। ननु तर्हि अन्वयव्यतिरेकाभ्यां गृहीतव्याप्तेः का[5]र्यद्रव्यत्वाद् द्व्यणुकस्यापि कार्य[6]द्रव्यत्वारम्भत्वं प्रसज्यते? न, आश्रयासिद्धे[7]रनवस्थापाताच्चेति। त[8]स्याणुपरिमाणेति–कारणयोर्द्वयोर्द्व्यणुकयोर्महत्त्वबहुत्वप्रचयानामभावात्कार्ये महत्त्वोत्पत्तौ कारणं ना[9]स्तीत्यणुत्वमेवोत्पद्यते, अणुत्वाच्च तस्य वैयर्थ्यमुपयोगाभावात्। ननु पार्थिवेषु परमाण्वादिषु कारणेषु गोत्वादिजातिनामभावात्तदारब्धे गवादौ क[10]थं गोत्वादिदर्शनमित्याह–परमाण्वादिषु इति–आदिशब्दाद् द्व्यणुकादिग्रहणम्।

[पं०] इत्यर्थः। तस्येति द्व्यणुकारब्धकार्यद्रव्यस्याणुत्वोत्पत्ता[त्तौ] चारम्भवैयर्थ्यादिति स्थूलत्वोत्पत्तौ ह्यारम्भस्य साफल्यं स्यात्। द्विद्व्यणुकद्रव्यत्वाच्च स्थूलत्वं नोत्पद्यते। अणुत्वस्यैवोत्पादात्। स्थूलत्वानुपपत्तौ महतो घटादिद्रव्यस्यानुत्पत्तिप्रसगः। बहुषु त्वनियम इति व्योमशिवेन हि त्रिभिः द्व्यणुकैरारभ्यते–त्र्यणुकमिति नियमितम्। श्रीधरस्य तु मते द्व्यणुककार्यं सर्वं त्र्यणुकमिति ज्ञेयम्। एतदेव स्पष्टयति–कदाचित्त्रिभिरारभ्यत इत्यादि त्रिभिः द्व्यणुकैः। ननु यदि द्विद्व्यणुकारब्धमणुस्यादिति त्र्यादिभिरेवारब्धव्यं तदा कार्यद्रव्येण द्व्यणुकेन किं कार्यमिति परप्रश्नमाशंक्याह न च [11]कार्यद्रव्यस्य व्यर्थतेत्यादि। न चैवं सति द्व्यणुकानामेव घटारम्भकत्वप्रसक्तिरिति–त्र्यणुकैरेव घट आरभ्यते।

[कु०] भावे अवयविमहत्त्वप्रयोजकानामवयवमहत्त्वादीनामनुपपत्तेर्व्यापकमपि? [व्याप्यमपि] व्यापकमेव धूमेन धूमेन वह्निव्यापकसामर्थ्यादनुमानदर्शनात्। न स्व-कार्याणामपि बहुत्वसङ्ख्याविरोध इति चेत्, न, अकार्यवर्तिबहुत्वस्य क्वचिदपि महत्त्वं प्रति सामर्थ्यादर्शनात्। परमाणुष्वेव भविष्यतीति चेत्, न, व्याप्तिमदूषयित्वा व्यापकानङ्गीकारे तु मात्रविलयापत्तेरिति।

न चैवं सतीति (कं. ३२.११) कार्यैरेव महदारभ्यते इति हि नियमः। न च त्र्यणुकपटयोमहत्त्वं प्रत्यस्ति विशेष इति शङ्कितुभावः। घटस्य भङ्ग इति (कं. ३२.११) यद्यप्यन्त्यावयविनाशमपेक्षमाणैस्तैरेव द्व्यणुकैरवस्थितसंयोगापेक्षैस्तत्र खण्डावयवत्वारम्भणेनाभ्युपपन्नमेतत्, तथाप्यवतिष्ठमान एव घटे बुद्बोदय[बुध्नो]दरपार्श्वलोपा रसाद्यवयवविभागो नोपलभ्येत, खण्डावयविन्यारम्भणायापेक्षणीयान्त्यावयविनाशस्य तदानीमभावादिति भावः।

---

१ °रम्भकल्पनात्–कं. १, कं. २। २ संयोगविभागविशेषः–कं. १, कं. २। ३ °दयश्चावयव–कं. १, कं. २। ४ गोत्वादिजाति–कं. १, कं. ३। ५ कार्यद्रव्याणुकस्य–अ; ६ द्रव्यारब्धत्वं–अ; ७ रनवस्थाभ्यां व्याप्तिर्दार्ढ्यादिति पाताच्चेति–अ; ८ तस्यानु–ड; ९ नास्तीत्यणुत्वस्य वैयर्थ्यमुपयोगाभावात्–अ, ब; १० 'कथं' इति–अ–पुस्तके नास्ति। ११ न च कार्यस्य व्यर्थता–कं.।

## प्रशस्तपादभाष्यम्

[50] त्रिविधं चास्याः कार्य्यम् । शरीरेन्द्रियविषयसंज्ञकम् । [1]शरीरं द्विविधं योनिजमयोनिजञ्च । तत्रायोनिजम[2]नपेक्ष्य शुक्रशोणितं देवर्षीणां शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते । क्षुद्रजन्तूनां यातनाशरीराण्यधर्मविशेषसहितेभ्योऽणुभ्यो जायन्ते । शुक्रशोणितसन्निपातजं योनिजम् । [3]तद्द्विविधं जरायुजमण्डजञ्च । मानुषपशुमृगाणां जरायुजम् । पक्षिसरीसृपाणामण्डजम् ।

## न्यायकन्दली

यथा यथा तदारब्धेष्वपरजातयो व्यज्यन्ते । नन्वदृष्टकारिता सर्वभावानां सृष्टिः, कार्य्यलक्षणा पृथिवी कामर्थक्रियां पुरुषस्य जनयति, येनेयमदृष्टेन क्रियत इत्यत आह—शयनासनेति । शयनासनादयोऽनेक उपकारा[4]स्तत्कारिणी कार्यलक्षणेति ।

[50] कार्य्यान्तरं त्वस्याः समुच्चिनोति—[5]त्रिविधं चेति । कार्यत्रैविध्यमेव दर्शयति—शरीरेत्यादि । शरीरमिन्द्रियं विषय इति संज्ञा यस्य कार्यस्य तत्तथा । भोक्तुर्भोगायतनं शरीरम्, मृतशरीरे [6]तद्योग्यत्वात्तद्व्यपदेशः । शरीराश्रयं ज्ञातुरपरोक्षप्रतीतिसाधनं

टि० [50] भोक्तुर्भोगायतनमिति—अत्र भोक्तृपदं स्वरूपकथनार्थं व्यवच्छेद्याभावात् । ननु भोगस्तावत्स्वसमवेतसुखदुःखसाक्षात्कारः, अत्र चेश्वरव्यवच्छेदार्थं स्व[7]समवेतेत्युक्तम्, तथा च भोगं प्रति तस्य किमायतनत्वम्? [8]न तावत्स[मवायिकारणत्वम्, [9]नाप्यसमवायिकारणत्वम्, न च निमित्तकारणत्वम्, नैव विषयत्वम् । आद्ये आत्मनस्तथात्वापत्तेः, द्वितीये आत्ममनःसंयोगस्य] [10]तृतीये इन्द्रियस्य चतुर्थे सुखस्येति । सत्यम्, आयतनं गृहपरपर्यायः तथा च तेन

[पं०] न द्व्यणुकैरचाक्षुषत्वप्रसंगात् । द्व्यणुकानि ह्यचाक्षुषाणि, अचाक्षुषैरारब्धमचाक्षुषमेव भवति । कारणानुरूपत्वात्कार्यस्य । तस्माद् द्व्यणुकत्रयनिष्पन्नैश्चाक्षुषैस्त्र्यणुकैरेव चाक्षुषं घटादिद्रव्यमारभ्यत इति वाक्यभावार्थः । आश्रयविनाशस्येति—आश्रयः समुदिताः परमाणवः । परमाणुजातिष्वपरजात्यभावेऽपीति—न हि पारंपर्येण गोऽश्वाद्यारम्भकेषु परमाणुद्व्यणुकत्र्यणु[क]चतुरणुकादिषु गोत्वाश्वत्वादयो जातयः सन्ति । व्यूह इति = रचना । भवतीति शेषः ।

[50] नन्वदृष्टकारिता सर्वभावानां सृष्टिरित्यतः पुरतः ततश्चेत्यध्याहारः । ज्ञातुरिति = आत्मनः । अपरोक्षप्रतीतिसाधनं द्रव्यमिति अत्रातीन्द्रियमिति विशेषणमध्याहार्यम् । अन्यथा अंजनेन व्यभिचारः स्यात् ।

[कु०] समुच्चिन्वन्नाह [इति] (कं. ३२.१४) साधकं प्रत्यक्षमिति शेषः । प्रशिथिलत्वादीत्यादिपदेन विष्टम्भकत्वादिपरिग्रहः । [11]संयोगविशेष इति (कं. ३२.१६) जातिव्यञ्ज[क]संस्थानमाकृतिरित्यर्थः । न च द्रव्यान्तरमेतत्सम्भवति । नन्वदृष्टेति (कं. ३२.१९) अदृष्टं चोपभोज[च]कमेवेति शेषः । कामर्थक्रियामिति (कं. ३२.२०) उपयोगमित्यर्थः ।

---

१ तत्र शरीरं—दे । २ मनपेक्ष—कि; व्यो. । ३ तत्तु—कि. । ४ °स्तत्करी—जे. १, जे. ३ । ५ त्रिविधमिति—कं. १, कं. २ । ६ च योग्यत्वाद्—जे. १, जे. ३ । ७ समवेतो युक्तम्—अ, ब, क; ८ न तावत्सतृतीये [ ] एतच्चिह्नान्तर्गतः पाठः अब पुस्तकयोर्भ्रष्टः । ९ ना च—अ, ब, क; १० तृतीये तृतीये—क; ११ संयोगविभागविशेषः—कं. ।

## न्यायकन्दली

**द्रव्यमिन्द्रियम् । शरीरेन्द्रियव्यतिरिक्तमात्मोपभोगसाधनं द्रव्यं विषयः । शरीरभेदं कथयति–योनिजमयोनिजञ्चेति । शुक्रशोणितसन्निपातो योनिः, तस्माज्जातं योनिजम्, तद्विपरीतमयोनिजम् । तदेव दर्शयति तत्रायोनिजमिति । तयोर्योनिजायोनिजयोर्मध्येऽयोनिजं शरीरं शुक्रशोणितमनपेक्ष्य जायते । केषामित्यत आह–देवर्षीणामिति । [1]देवानाञ्च ऋषीणाञ्चेत्यर्थः । अन्वयव्यतिरेकावधारितकारणभावस्य शुक्रशोणितस्याभावे कथं शरीरस्योत्पत्तिरित्यत आह–[2]धर्मविशेषसहितेभ्योऽणुभ्य इति । विशिष्यत**

[टि०] यदवच्छिन्ने आत्मनि भोगस्तदन्त्यावयविपदेन [3]प्राणात्ममनःसंयोगहस्तादीनां व्यवच्छेदस्तेषामपि हस्ते मे वेदना इत्याद्युल्लेखेनात्मावच्छेदक[4]त्वादिति । ननु शरीरान्तःप्राणोऽप्यन्त्यावयवी भवति भोगायात्मावच्छेदकश्चेति तस्यापि शरीरत्वं स्यात्? नैवम्, [5]योवयव्यन्तरे [6]सजातीये मिलितेऽविनष्ट एव कार्यान्तरमारभते सोऽन्त्या[7]वयवी न भवतीति वायोर्वाय्वन्तरे मिलिते सति स्थूलैकवाय्वावयव्यारम्भकत्वेनान्त्यावयवित्वाभावादिति ।

[पं०] **क्रियाविभागादिन्यायेन तयोर्विनाशे सतीति** उदर्यवह्नेः शुक्रशोणितयोश्च संयोगः । ततस्तयोः क्रिया, चलनवलनादिका । क्रियातो विभागः । विभागात्संयोगविनाशः । संयोगविनाशात्तयोः शुक्रशोणितद्रव्ययोर्विनाशः । **उत्पन्नपाकजैरिति** उत्पन्नाः पाकजा रूपादयो येषु ते उत्पन्नपाकजाः तैः । **इतरपरमाणूनामिति** = धर्मविशेषानुगृहीतपरमाणूनाम् । **तत्रापीति** शुक्रशोणितसन्निपातकारणत्वेऽपि । **जातिनिय[म]स्येति** = ब्राह्मणत्वक्षत्रियत्वादिनैयतस्य । **एवं चेदिति**–एवं सतीत्यर्थः । अवयवानामनेकार्थत्वात् । उक्तं च––

धातवाश्चा[श्चो]पसर्गाश्च निपाताश्चेति ते त्रयः ।
अनेकार्थाः स्मृताः सर्वे पदैस्तेषां निदर्शनम् ॥

[कु०] [50] ननु न शरीरत्वादयो जातयः सम्भवन्ति तत्र शरीरत्वेन्द्रियत्वे पृथिवीत्वादिभिः परापरभावानुपपत्तेना जातिविषयत्वे च । निःसामान्यं सामान्यादिवृत्तिता(य)[इ]त्यतो लक्षणमेवोपाधिमाचष्टे **भोक्तुरिति** (कं. ३२.२४) । यद्यपि सुखदुःखसाक्षात्कारो भोगस्तथापि भुज्यन्त इति व्युत्पत्त्या सुखं वा भुज्यते अनेनेतिव्युत्पत्त्या तत्साधनभूता बुद्धयो वा विवक्षिता । तावन्मात्रेणैव लक्षणसिद्धेस्ततश्च सुखायतनं दुःखायतनमित्येवमादि लक्षणानि द्रष्टव्यानि । तेषां चात्मनाऽतिव्याप्तिर्माभूदित्यत उक्तं भोक्तुरिति पदम् । ततश्चेह भोगायतनत्वं भोजकात्मसंयोगाधिकरणत्वं पार्थिवकार्यविचारपावाला? इन्त्यावयवीति च पदं लभ्यते ततश्च शरीरावयवे मनसि च नातिव्याप्तिः । संयोगस्य भोगकारणत्वाविवक्षया न चस्थ्यादावतिव्याप्तिः तस्य हि ना [न] संयोगो भोगहेतुः सत्यपि भोगानुदयादसत्यप्युदयात् । शरीरस्यात्मना संयोगे सत्येव भोगोदय इति कारणत्वं न तस्येति । अतो भोक्तुर्भोगहेतुभूतसंयोगाधिकरणमन्त्यावयवि शरीरमिति वा शरीरलक्षणं निर्व्यूढम् ।

---

१ देवानामृषीणां च–जे. १, जे. ३ । २ धर्मविशेषसहितेभ्य इति–कं. १, कं. २ । ३ प्राणात्मनः–अ, ब; ४ कादिति–अ, ब, क; ५ योऽवान्तरे–अ, ब, क; ६ सजातीय–अ, ब, क; ७ वयवी भवतीति–अ, ब, क;

## न्यायकन्दली

इति विशेषः, धर्म्म एव विशेषो धर्मविशेषः, प्रकृष्टो धर्म्मः, तत्सहितेभ्योऽणुभ्य इति । अयमभिसन्धिः शरीरारम्भे परमाणव एव कारणम्, [1]न तु शुक्रशोणितसन्निपातः, क्रियाविभागादिन्यायेन तयोर्विनाशे सत्युत्पन्नपाकजैः परमाणुभिरारम्भात् । न च शुक्रशोणित[2]परमाणूनामितरपरमाणूनां च कश्चिद्विशेषः, पार्थिवत्वाविशेषात् । अत्रापि कार्य्ये जातिनियमस्यादृष्ट एव हेतुः, एवञ्चेद्धर्म्मविशेषानुगृहीतेभ्यः परमाणुभ्योऽयोनिजशरीरोत्पत्तिर्नानुपपन्ना । ननु दृष्टस्तावत् सर्वत्र शरीरोत्पत्तौ शुक्रशोणितयोः पूर्व[3]कालतानियमः, तेन [4]यथा ग्रावोन्मज्जनाभ्युपगमस्तत्सदृशग्रावान्तरनिमज्जनग्राहकप्रमाणान्तरविरोधादनुपपन्नस्तद्वदयोनिजशरीराभ्युपगमोऽपि, नैवम्, शुक्रादिनिरपेक्षस्यापि शलभादिशरीरस्य दर्शनात् । विशिष्टसंस्थानस्य शरीरस्य शुक्रादिपूर्वतावगतेति चेत् ?

[**टि०**] **शरीराश्रयम्**–शरीराश्रयमित्यनेन धर्माधर्मदीपतत्प्रभादिनिरासः । अपरोक्ष[5]प्रतीतिसाधनमित्यनेन दुष्टरक्तवातादिनिरासः, तेषामागमानुसारेण जन्मान्तरोपात्तपरोक्षाधर्मप्रतीतिसाधनत्वात् । द्रव्यमित्यनेनेन्द्रियार्थसंयोगव्युदासः, भो[6]क्तुरित्यर्थकथनं व्यवच्छेद्याभावात् । ननु [7]शरीराश्रयमित्याश्रयपदस्य सम्बन्ध[8]मात्रार्थत्वाच्छरीरसंयुक्तदीपतत्प्र[9]भादीनामपि इन्द्रियत्वं स्यात् । अथ नियमव्याख्यानेन तेषां व्यवच्छेदस्तथापि सा[10]क्षाद्वा सम्बन्धः पारम्पर्येण वा? आ[11]द्ये इन्द्रियार्थसन्निकर्षस्य संयुक्तसमवायेन शरीरसम्बद्धस्य व्यवच्छेदार्थं द्रव्यग्रहणं न कर्तव्यम्, द्वितीये नयन[12]रश्म्यादिद्वारेण संयुक्तसंयोगादि सम्बन्धेन सम्बद्धस्य दीपतत्प्रभादेर्व्यवच्छेदार्थं यत्नान्तरं कार्यम् । अतीन्द्रियमिति तु [13]विशेषणे इतरेत-

[**पं०**] **विशिष्टसंस्थानस्य शरीरस्य शुक्रादिपूर्वतावगतेति**–देवर्षिशरीरं शुक्रादिपूर्वं विशिष्टसंस्थानत्वादस्मदादिशरीरवदिति । **विशिष्टसंस्थानमात्रानुबन्धकृतेति** विशिष्टसंस्थानमात्रेण सह योऽनुबन्धः प्रतिबन्धो व्याप्तिः प्रस्तावात् । शुक्रादिपूर्वतायां एव तत्कृता शुक्रादिपूर्वता । **बाधकानुमानमपीति**–देवर्षिशरीरं शुक्रादिपूर्वं विशिष्टसंस्थानोपेतत्वात्,

[**कु०**] **शरीराश्रयमि**ति (कं. ३२.२५) शरीराश्रयत्वं **शरीरा**नुपघातानुग्रहप्रयुक्तवद्धत्वम्? अनेन बाह्यालोकव्यवच्छेदः । **प्रतीतिसाधन**मित्यनेन शरीरगतरूपादिभ्यो व्यवच्छेदः । साधनमिति करणव्युत्पत्त्या प्रतीतिं प्रति कर्मभूतेभ्यस्तेभ्यो व्यवच्छेदः । एवं च सति ज्ञातुरिति स्वरूप, कथम् ? अकारणत्वादेवाप्रसक्ते द्रव्यमिति वा ।

**शरीरेति** (कं. ३२.२५) अहं सुकुमार इत्यादिप्रतीत्या हर्षाद्युत्पत्तौ शरीरस्यापि विषयत्वे सम्भवति तद्व्यतिरिक्तोक्तिनियमाव्यावृत्ताशरीरस्यापि विषयत्वेनापि पुरुषार्थप्रतिपादनाय शरीरग्रहणं न व्यर्थमिति प्रतिपादनपरा । ततश्च प्रतीतीति कर्मतयोपभोगसाधनं विषय इति निकृष्टं विषयलक्षणं द्रष्टव्यमिति शरीरग्रहणं न व्यर्थमिति । एवंरूपभवच्छरीरारम्भकत्वमपि पृथिव्या वैधर्म्यमिति शेषः ।

---

१ न शुक्र°–कं. १, कं. २ । २ परमाणूनां कश्चिद्विशेषः–कं. १, कं. २ । ३ °कारणता–पा. २-पु. । ४ तथा–जे. १, जे. ३ । ५ प्रतीत–अ, ब; ६ ज्ञातु–ड. ७ शरीराश्रयपदस्य–अ; ८ मात्रार्थत्वाशरीर–अ, ब; ९ प्रदीना–अ; १० साक्षात्–अ, ब, क; ११ आद्येन्द्रिय–अ, ब; १२ रश्मादि–ड; १३ विशेषता–अ, ब;

## न्यायकन्दली

सत्यम्, तथापि न नियमसिद्धिः, किमदृष्टविशेषाभावादस्मदादिशरीरस्य शुक्रादिपूर्वता, किं वा विशिष्टसंस्थानमात्रानुबन्धकृतेति संदेहात्। एतेन बाधकानुमानमपि [1]पर्य्युदस्तम्, तस्य व्याप्तिसंदेहात्। यच्चात्र वक्तव्यं तद्योगिप्रत्यक्षनिरूपणावसरे वक्ष्यामः।

अधर्मविशेषेणाप्ययोनिजं शरीरं भवतीत्याह–क्षुद्रजन्तूनामिति। क्षुद्रजन्तवो दंशमशकादयस्तेषां यातना पीडा दुःखमिति यावत्, तदर्थं शरीरं यातनाशरीरम्। तदधर्मविशेषसहितेभ्योऽणुभ्यो जायते। [2]इदन्त्विह [3]लोकप्रसिद्धमेव। योनिजं शरीरमाह–शुक्रशोणितसन्निपातजमिति। शुक्रञ्च शोणितञ्च तयोः सन्निपातः संयोगविशेषः,

**[टि०]** राश्रयः इन्द्रिये च लक्षिते तद[4]तीतत्वज्ञानं, तदतीतत्वज्ञाने चेन्द्रियज्ञानम्। उच्यते [5]संस्कारदोषव्यतिरिक्तं साक्षाद् शरीरसंयुक्तमेवा[6]परोक्षप्रतीतिसाधनमिन्द्रियमित्येवात्र[7]लक्षणं शेषं तु स्वरूप[8]कथनमिति। [9]अत्र नयनगो[10]लकस्य शरीरावयवत्वात् साक्षात्तत्संयुक्ताञ्जनकामलादिद्रव्यव्यवच्छेदार्थं संस्कारदोषवर्जनम्। [11]अथेन्द्रियं कर्त्रा स्वयं साक्षाद् व्यापार्यते अपरोक्षप्रतीतिषु [12]च सर्वासु [13]करणत्वेनानुवर्तते आलोकस्तु [14]स्वस्वभावव्यतिरिक्तप्रतीतावेव अञ्जनादिकं सम्यक्प्रतीतौ, दोषास्तु मिथ्या[15]प्रतीताविति इन्द्रियस्य साधकतमत्वमन्येषां तु साधकमात्रत्वमिति विवक्षा, तदा स्वसाक्षात्प्रतीतिसाधकतमं द्रव्यमिन्द्रियमित्येतावदेव लक्षणं रम्यम्। अत्र द्रव्यग्रहणमिन्द्रियार्थसंयोगव्यवच्छेदार्थम्।

**[पं०]** अस्मदादिशरीरवदित्येवंविधमयोनिजशरीरबाधकसाधनमित्यर्थः। **व्याप्तिसन्देहादिति** किमदृष्टविशेषाभावादस्मदादिशरीरस्य शुक्रादिपूर्वता, किं वा व(वि)शिष्टसंस्थानमात्रानुबन्धकृतेत्येवं प्राप्तिसन्देहः। **यच्चेति** दूषणान्तरम्। **अत्रेति** बाधकानुमाने। **तद्योगिप्रत्यक्षनिरूपणावसरे वक्ष्याम** इति अयमभिसन्धिः–योगिप्रत्यक्षनिरूपणप्रकरणे योगिनोऽस्मदाद्यतीन्द्रियार्थद्रष्टारो न भवन्ति, प्राणित्वात्, अस्मदादिवत्–इत्यनुमानं दूषयिष्यते। तदनुसारेण चेदमपि बाधकानुमानं दूषणीयम्।

**[कु०]** ननु यद्यच्छरीरं तत्तत्सर्वं शुक्रशोणितपूर्वकमिति(ती) व्याप्तिमदूषयित्वा न कृती भवानित्यत आह **अयमभिसन्धिरिति** (कं. ३३.७)। **पार्थिवत्वाविशेषादिति** (कं. ३३.९) शुक्लत्वादिजातेरभावादित्यर्थः। ततश्च परम्पराकारणे कारणत्वभ्रमकृता न वास्तवीति भावः। [16]**न त्वेवमिति** (कं. ३३. ) परम्परापि शरीरेणापेक्षणीयैव अन्यथा नरबीजाद्वानरादिजन्मप्रसङ्ग इत्याशङ्क्योपाधिमाह **अत्रापीति** (कं. ३३.१०)। जातिनियमस्य–जातेर्मनुष्यत्वादेर्नियमस्य न शरीरत्वस्य जातिसङ्करप्रसङ्गस्योक्तत्वात्। किं च स्पष्टोऽपि व्यभिचार इति दर्शयितुं शङ्कते **नन्विति** (कं. ३३.११)।

---

१ प्रत्युक्तम्–जे. १, जे. ३। २ इदं हि–जे. १, जे. ३। ३ लोकसिद्ध–कं. १, कं. २। ४ तत्त्वज्ञानं–अ; ५ संस्कारदोष–अ, ब, क; ६ परोक्षा–अ, ब; ७ वात्रोपलक्षणं–अ, ब; वात्रोलक्षणं–क. ८ कथमिति–अ, ब; ९ अथ–अ. १० आलोकस्य–अ. ११ अथेन्द्रियं–अ, ड; १२ 'च' अबपुस्तकयोर्भ्रंष्टः; १३ कारण–अ, ब; १४ स्वभाव–अ, ब, क; १५ प्रतीताविति–अ; १६ प्रतीकमिदं नास्ति कं. पुस्तके।

## न्यायकन्दली

तस्माज्जातं योनिजमित्युच्यते । पितुः शुक्रं मातुः शोणितं तयोः सन्निपातानन्तरं जठरानलसम्बन्धाच्छुक्रशोणितारम्भकेषु [1]परमाणुषु क्रियाविभागादिन्यायेन शुक्रशोणित-निवृत्तावग्निसंयोगात् परमाणुषु [2]पूर्वरूपादिविनाशे सति समानगुणान्तरोत्पत्तौ द्व्यणुकादिप्रक्रमेण कललशरीरोत्पत्तिस्तत्रान्तःकरणप्रवेशो न तु शुक्रशोणितावस्थायाम्, शरीराश्रयत्वान्मनसः । तत्र मातुराहाररसो मात्रया संक्रामति, अदृष्टवशात् । तत्र पुनर्जठरानलसम्बन्धात् कललारम्भक[3]परमाणुषु क्रियाविभागादिन्यायेन कललशरीरे नष्टे समुत्पन्नपाकजैः कललारम्भकपरमाणुभिरदृष्टवशादुपजातक्रियैराहार[4]परमाणुभिः समान-गुणैः सह सम्भूय शरीरान्तरमारभ्यत इत्येषा कल्पना शरीरे प्रत्यहं द्रष्टव्या । शरीरभेदे

[टि०] शरीरेन्द्रियेति–शरीरेन्द्रियेत्यादिना तयोर्निरासः आत्मेति व्यव[5]च्छेद्याभावात्स्वरूपकथनम्, [6]द्रव्यमिति च द्रव्य-रूपविषयविशेषापेक्षया तदा चोपभोगसाधनमि[7]त्यप्यर्थकथनमात्रम् । ननु कामिन्यश्वादिशरीराणामपि लोके विषयत्व-प्रसिद्धिरस्तीति कथं तद्व्यवच्छेदः?

भाष्य[8]कारेण तावत्कार्यत्रैविध्यमुक्तं तेषां पृथक् स्पष्टता प्रतिपादनार्थमिदमुक्तम्; वस्तु[9]वृत्त्या तु स्वप्रतीति-जनको विषय इति विषय[10]लक्षणमभावशरीररूपादिविषयव्यापकमिति । ग्र[11]न्थोक्तं तु लक्षणं शरीरेत्यादि[12]विशेषितं तद्व्यापक द्रव्यविशेषितं रूपाभावाद्यव्यापकम् । आत्मोपभोगसाधनम् इति [13]च यद् व्यर्थमेव व्यवच्छेद्याभावादिति । एवं पार्थिवाप्यादीनां भूतानां शरीरादिलक्षणानि प्रतिपादितानि ।

[पं०] जठरानलसम्बन्धादिति – मातृसक्तजठराग्निसंपर्कात् । शुक्रशोणितारंभकेषु परमाणुषु क्रियाविभागादिन्यायेन –शुक्रशोणितद्रव्यनिवृत्ताविति– शुक्रशोणितारंभकेषु परमाणुषु शुक्रशोणितद्रव्यनिवृत्तौ सत्यामिति पदघटना । केन कृत्वा शुक्रशोणितद्रव्यनिवृत्तौ सत्यामित्यत आह–क्रियाविभागादिन्यायेन प्रथमं मातृजठरानलस्य शुक्रशोणितयोश्च संयोग-स्ततस्तयोः क्रियास(च)लनवलनादिका, क्रियातो विभागः, विभागात्पूर्वसंयोगविनाशः, संयोगविनाशाच्छुक्रशोणितद्रव्य-निवृत्तिरिति क्रमः । परमाणुष्विति – शुक्रशोणितारंभकपरमाणुषु । पूर्वरूपादिविनाशे सतीति अपाकजरूपादिविनाशे सति । समानगुणान्तरोत्पत्ताविति–पाकजरूपरसगन्धस्पर्शोत्पत्तौ । कललशरीरोत्पत्तिरिति एकरात्रोषितः संवलितशुक्र-

[कु०] शरीरेण शुक्रशोणितपूर्वकत्वे उपाधिं दर्शयितुं शङ्कते [14]विशिष्टविशेषाभावादिति (कं. ३३.१६)। गर्भवासदुःखं परिभूय सुखोपभोजकस्यादृष्टस्याभावात् इत्यनेन गर्भवासदुःखमन्तर्भाव्यैवोपभोज[क]मदृष्टमुपाधिरिति लक्षितेन तादृशादृष्टसत्त्वे किं प्रमाणमित्यत आह–यच्चात्रेति (कं. ३३.१८) । तदर्थमिति (कं. ३३.२०) क्षुद्रजन्तूनां शरीरमित्येतावता अयोनिजशरीरसाधकं प्रत्यक्षं दर्शितमेव तथापि यातनाशरीरमिति पदं नारकिणां शरीरमुपलक्षयति ।

---

१ परमाणुषु पूर्वरूपादिनाशे सति–कं. १, कं. २; 'क्रियाविभागादिन्यायेन' इति तु नास्ति । २ रूपविनाशे सति–जे. १, जे. ३ । ३ परमाणुक्रियाविभागादिन्यायेन–जे. १, जे. ३ । ४ परमाणुभिः सह–कं. १, कं. २ । ५ च्छेद्याभावात्–ड; ६ मिति द्रव्यरूप–अ, ब, क; ७ मित्यर्थ–अ, ब, क; ८ कारण–अ, ब; ९ वृत्त्या हि तु–ब; १० लक्षात–अ, ब; ११ यथोक्तं–अ, ब; १२ विशेषक–अ, ब, क; १[3] च यत्–ड; १४ अदृष्टविशेषाभावाद्–

### न्यायकन्दली

**किं प्रमाणम् ? परिमाणभेदः, [1]स्वल्पपरिमाणावच्छिन्ने आश्रये महत्परिमाणस्य परिसमाप्त्यभावात् । अवस्थान्तरापन्नं शरीरं तदाश्रयो भवतीति चेत् ? अवस्थान्तरमाहारावयवसहकारिणः शरीरावयवा आरभेरन् शरीरं वा तत्सहकृतम्, उभयथापि पटादिषु तन्त्वादिवदन्ते हीनाधिकपरिमाणवदनेकशरीरोपलम्भः स्यात्, न चैवम्, तस्मात् पूर्वं प्रनष्टमपरञ्च शरीरमुपजातम् । विवादाध्यासिते परिमाणे भिन्नाश्रये, हीनाधिकपरिमाणत्वात्, घटशरावपरिमाणवत्, [2]विवादाध्यासितं परिमाणमाश्रयविनाशादेव विनश्यति परिमाणत्वात्, मुद्गराभिहतविनष्टघटपरिमाणवत् । प्रत्यभिज्ञानाच्छरीरैकत्वसिद्धिरिति**

**[टि०]** अथ प्रस्तुते प्राह **शरीरभेदम्** इति । यदि योनिः कारणमात्रं [3]तदा द्वैविध्यं न स्यादित्याह **शुक्रेति** । सन्निपातो मेलकः । ऋषयो मन्वादयः [4]मानसाः । ननु यदि परमाणूनामैक्यं तर्हि कथं तज्जनितेऽर्थे शरीरत्वसामान्यमित्याह **अत्रापि कार्ये इति**–यथा गोघटादौ प्रागुक्तं तथात्रापीत्यपेरर्थः । **ननु दृष्टस्तावद् इति**–अयमभिप्रायः-देवर्षिशरीरं योनिजम्, शरीरत्वाद् [5][अस्मदादिशरीरवदिति । तत्र व्यभिचारमाह–**शुक्रादिनिरपेक्षस्य** इति । **विशिष्टसंस्थानशरीरत्वाद् इति** विशिष्टहेतावव्यभिचारमाशङ्कते **विशिष्टेति**] यद्यप्यत्र विशिष्टसंस्थानत्वस्यास्मदादितुल्यत्वेऽसिद्धिः देवादीनां चतुर्भुजादित्वात्, तथापि गोभुजगादौ तदभावेऽपि योनिजत्वादनियामकत्वे व्याप्यत्वासिद्धिमाह **तथापि न नियमसिद्धिः** इति । एतच्च तर्करीत्यैवोक्तं नानुमानं [6]कृत्वेति मुख्यवृत्त्यैवाभि[7]प्रायकं तदेवानुमानं दूषयति **एतेन बाधकानुमानम्** इति । **क्षुद्रजन्तूनाम्** इति–यथा गवां शरीराणीति गोत्वसामान्यालिङ्गितानां तथाऽनस्थिजन्तुत्वोपलक्षितां शरीराणीति [8]षष्ठ्युपपत्तिः ।

**[पं०]** शोणितद्रवे(व)रूपो गर्भः कललः । **तत्रेति** =कललशरीरे । **मातुराहाररसो मात्रया संक्रामतीति**–मध्यनाड्या संक्रामतीत्यर्थः । उक्तं च–

> पुत्रस्य नालो मातुश्च, हृदिनाडी निबध्यते ।
> यया पुष्टिमवाप्नोति, केदार इव कु[ल्य]या ॥१॥

**कललारंभकपरमाणुभिः** शरीरान्तरमारभ्यते–इति सम्बन्धः । किं विशिष्टैः । अदृष्टवशादुपजातिक्रियैः किं कृत्वा शरीरान्तरमारभ्यत इत्याह–**आहारपरमाणुभिः सह सम्भूय [इति]** –कथंभूतैराहारपरमाणुभिः समानगुणैः समानाः कललारम्भकपरमाणुभिस्तुल्या गुणा रूपादयो येषु ते तथा तैः समानगुणैरिति वाक्यार्थः । **शरीरभेदे इति**–प्रत्यहं शरीरान्यत्वे । **शरीरभेदे किं प्रमाणमिति** परप्रश्नः । **परिमाणभेद** इति श्रीधरोत्तरम् । परिमाणभेद इत्येतद् व्याचष्टे–**अल्प**-

**[कु०]** तत्राप्यनेककालायःकुम्भीपाकक्र[क]चदारणादिदुःखानुभवक्षमतयाऽयोनिजं शरीरं सम्भावितमेवेति भावः । **योनि[जं] शरीरमाहेति** (कं. ३३.२१) योनिशब्दस्य कारणापर्यायत्वेन विभागानुपपत्तिशङ्कां परिहरतीति शेषः ।

---

१ अल्प–जे. १, जे ३ । २ विवादास्पदं–जे. १, जे. ३ । ३ द्वैविध्यं तदा इति नास्ति–अ, ब, क; ४ भासः–अ, ब; ५ [ ] एतच्चिह्नान्तर्गतः पाठः अ पुस्तके भ्रष्टः । ६ कृतेति–अ, ब; ७ प्रायिक–ड; ८ षष्ठ्युत्पत्तिः–अ, ब, क;

न्यायकन्दली

चेत् ? न, तस्य सादृश्यविषयत्वेनाप्युपपत्तेः। व्यक्तीनामव्यवधानोत्पादनेनान्तराग्रहणस्यात्यन्तिकसादृश्यस्य च भ्रान्तिहेतोः सर्वदा सम्भवे ज्वालादिव्यक्तिवन्नेदं तदिति बाधकानुदयेऽपि युक्तिद्वारेण बाधकसम्भवात्।

तस्य प्रकारं दर्शयति–द्विविधमिति। द्वे विधे प्रकारौ यस्य तद् द्विविधमिति व्याख्या। जरायुरिति गर्भाशयस्याभिधानम्, तेन वेष्टितं [1]जायत इति जरायुजम्। अण्डं बिम्बं तेन वेष्टितं [2]जायते यत् तदण्डजम्। केषां जरायुजं केषां चाण्डजमित्यत्राह–मानुषेत्यादि। मानुषा अस्मदादयः, पशवः छागाः, "अग्नीषोमीयं पशुमालभेत", "सप्तदश प्राजापत्यान् पशूनालभेत" [3]इति दर्शनात्। मृगाः कृष्णसारादयः, तेषां जरायुजं शरीरम्। इदञ्चोपलक्षणपरम्, अन्येषामपि चतुष्पदां जरायुजत्वात्। पक्षिणः प्रसिद्धाः। सरीसृपाः सर्पास्तेषामण्डजं शरीरम्। एतदपि न नियमार्थमन्येषामपि मत्स्यादीनामण्डजत्वात्।

[टि०] **तत्र मातुः इति**–मात्रया शनैः शनैः [4]स्तोकस्तोकेनेत्यर्थः। [5]**अल्पपरिमाणावच्छिन्न** इति–अत्रापि महतः परिमाणमिति समासः। **अन्ते हीनाधिकेति**–आयुषोऽन्ते परिमाणव[6]तामनेकेषां शरीराणामुपलम्भः स्यात्। ननु बालशरीरेऽविनष्ट एव तत्परिमाणाविनाशे तस्यैव शरीरावस्थान्तरोत्पत्तौ महत्परिमाणान्तर[7]मुपपत्स्यते; त[8]त्र हीनाधिकपरिमाणवतामुपलम्भो भविष्यतीत्याह [9]**विवादास्पदं परिमाणम्** इति–यस्य परिमाणस्य विनाशः सम्भवति तस्याश्रयविनाशत्वमत्र साध्यते न तु सर्वस्य विनाशः परिमाणत्वेन हेतुना ततः परमाणुगतपरिमाणेनाविनाशिना न व्यभिचार इति ग्रन्थकर्तुरभिप्रायः वाक्यकाले तु कार्यपरिमाणत्वादिति हेतुर्विशिष्टः कार्यः।

[पं०] **परिमाणावच्छिन्ने** इत्यादिना। **आश्रये इति**–शरीरलक्षणे। **परिसमाप्त्यभावादिति**-असमानादित्यर्थः। **शरीरं चेति**–शरीरमवयविभूतम्। **तत्सहकृतमिति**–आहारावयवसहकृतमुभयथापि पटादिषु तन्त्वादिवत्। **अन्ते हीनाधिकपरिमाणवदनेकशरीरोपलम्भः स्यादिति**–यथैकतंत्वविवक्षया परिपूर्णपटावयविनि खंडावयविनामनेकेषामुपलंभ एवमन्ते लघु–लघुतर-लघुतमादिपरिमाणवतामनेकेषां शरीराणामुपलम्भः स्यादित्यर्थः। **परिमाणे इति** द्वे प्रथमोत्तरसम्बन्धिनी। **तस्येति**–प्रत्यभिज्ञानस्य। **व्यक्तीनामिति** = शरीरव्यक्तीनाम्। **ज्वालादिव्यक्तिवदिति** – ज्वालाधूमादिव्यक्तीनामिव। **बाधकसंभवादिति**–प्रति(त्य)भिज्ञानगृहीतस्यैकत्वस्य बाधकं प्रमाणं संभवतीत्यर्थः।

[कु०] उत्पत्तेरारभ्याविनाशात् प्रत्यभिज्ञायमानतयैकत्वात्कथं शरीरे पाकजोत्पत्तिकल्पनेत्यभिप्रायवानाह **शरीरभेदेति** (कं. ३४.४)। अवस्थान्तरविरहविशिष्टं परिमाणभेदमुपाधिमाशङ्कते **अवस्थेति** (कं. ३४.६)। इह बाल्यकौमाराद्यवस्था न सामान्यादिद्वयात्मिका, आश्रयभेदो हि तद्भेद [इ]ति। नाप्ययावद्द्रव्यभावी गुणः कर्म वा,

---

१ जायते जरायुजम्–जे. १, जे. ३। २ जायते तदण्डजम्–कं. १, कं. २। ३ इत्यादि निदर्शनात्–जे. १ जे. ३।
४ स्तोकेन–अ, ब, क; ५ स्वल्प–मु; ६ वतेकेषां–ड; ७ मुपपश्यते–अ, ब; ८ न च–ड;
९ विवादास्पद–अ, क; विवादाध्यासितं–मु. विवादास्पदं–जे. १, जे. ३;

### प्रशस्तपादभाष्यम्

[51] इन्द्रियं [1]गन्धव्यञ्जकं सर्वप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणम् ।

### न्यायकन्दली

[51] [2]इन्द्रियस्वरूपनिरूपणार्थमाह–इन्द्रियमिति । सर्वप्राणिनां गन्धव्यञ्जकं गन्धोपलम्भकं यदिन्द्रियं तत्पार्थिवावयवैरारब्धम् । एतावता नियमो न लभ्यते यदेतदेव गन्धमभिव्यनक्ति नान्यत्पार्थिवं द्रव्यम्, तदर्थमाह–[3]जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणम् । जलादिभिरनभिभूतैरप्रतिहतसामर्थ्यैरवयवैरदृष्टवशादितरविलक्षणमारब्धमेतत्, अतो विशिष्टोत्पादादिदमेव गन्धाभिव्यक्तिसमर्थम्, नान्यदित्यर्थः । घ्राणमिति तस्य संज्ञा । आत्मा जिघ्रति गन्धमुपादत्तेऽनेनेति कृत्वा तत्सद्भावे गन्धोपलब्धिरेव प्रमाणम्,

**[टि०]** [51-52] **नान्यत्पार्थिवमिति**–अन्यत् हस्तादि। **तत्सद्भावे इति**–[4]गन्धोपलब्धिः करणसाध्या, क्रियात्वात् छिदिक्रियावत् इति प्रमाणम् । [5]ननु चैत्रस्तिष्ठतीत्यादौ क्रियात्वेऽपि करणसाध्यत्वाभावादनैकान्तिकता । न, तत्रापि स्वस्वरूपस्य स्वावयवानां च [6]करणत्वात् । ननु करणमप्यवान्तरव्यापारशालीति तस्यापि व्यापारपक्षेया कर्तृत्वे करणापेक्षत्वादनवस्था [7]न, अचिन्त्यत्वात् । ननूपलब्धि[8]र्ज्ञानं गुणः, छिदिक्रियाप्यवयववि[9]भागरूपैव, तत्कथमनयोः क्रियात्वम् ?

**[पं०]** [51] **एतदेवेति** नासालक्षणम् । **नान्यदिति** अन्यत्हस्तादि । **पार्थिवत्वेऽपि रूपादिषु मध्ये गन्धस्यैवाभिव्यंजकत्वं प्रमाणमिति** । पार्थिवं घ्राणम् । रूपादिषु मध्ये गन्धस्यैवाभिव्यंजकत्वात् । अत्राभिव्यंजकत्वादित्युच्यमानेऽत्रादिव्यक्तया व्यभिचारस्तस्या आत्वादिसामान्यव्यञ्जकत्वादित्याह–गन्धस्याभिव्यंजकत्वात् । तथाप्यद्भिर्व्यभिचारस्तासामपि प्रथमवर्षणादौ गन्धाभिव्यंजकत्वादित्याह–**गन्धस्यैवेति**–न खल्वापो गन्धस्यैवाभिव्यंजकास्तासां...दर्शनोद्भवदन्तोदकसंप्लवादौ रसस्याप्याभिव्यंजकत्वात् । एवमप्येकदेशसिद्धो हेतुः । गन्धत्वगुणत्वसामान्ययोरपि घ्राणस्याभिव्यंजकत्वादित्याह **रूपादिषु मध्ये इति** ततश्च सामान्याद्यवच्छेदः । यदि तु रूपादिषु मध्ये व्यंजकत्वाद्युच्येत तदाप्यालोकेन व्यभिचारः स्यादित्युक्तं **गन्धस्येति**–एवमद्भिः व्यभिचार इत्युक्तं गन्धस्यैवेत्यनुलोमविलोमाभ्यां विशेषणफलं

**[कु०]** तयोरनुपलम्भ-बाधात्, परिशेषाद् द्रव्यरूपा वक्तव्या तत्राह **अवस्थान्तरेति** (कं. ३४.६)। यदि ज्वालादिवत्सादृश्यनिमित्तोऽयं भ्रमः स्यात् तर्हि तद्वदेव प्रत्यक्षेणैव कदाचिद् बाधकेव न (न च?) भवितव्यमित्यत आह **व्यक्तीनामिति** (कं. ३४.१३) । **युक्तिद्वारेणेति** (कं. ३४.१५) अयं भावः, प्रत्यक्षमेव बाधकत्वेन प्रयोजकं, सर्वत्रानुमेयस्यानुपबाधेनानुमानमात्रविलयापत्तेः, किय[त्] पजीव्यत्वं ताव[दि]ह शरीरस्यावस्थितिग्राहकम्, प्रत्यक्षमुपजीव्य भेदानुमानमुदेति । [10]**गवादय** इति–ग्राम्यश्चतुष्पाद इत्यर्थः । अन्येषां मार्जारमूषकादीनामुभयचारिणामित्यर्थः ।

---

१ सर्वप्राणिनां गन्धव्यञ्जकं–दे. । २ इन्द्रियमाह–कं. १, कं. २ । ३ जलाद्यनभिभूतैरिति–जे. १, जे. ३ । ४ पलब्धि–इ; ५ ननु चैत्रस्तिष्ठत्यादौ क्रियात्वेऽपि करणसाध्यत्वात् छिदिक्रियावदिति प्रमाणम् इति अधिकः पाठः अपुस्तके । ६ करणत्वात्–अ, ब; ७ न तु–ब; ८ ज्ञान–अ, ब, क; , ९ पिभावस्वरूपैव–अ; १० प्रतीकमिदं कं पुस्तके नास्ति ।

## न्यायकन्दली

*क्रियायाः* **करणसाध्यत्वात्, चक्षुरादिव्यापारे च तस्या अनुत्पादात्। पार्थिवत्वेऽपि रूपादिषु मध्ये गन्धस्यैवाभिव्यञ्जकत्वं प्रमाणम्, कुङ्कुमगन्धाभिव्यञ्जकघृतवत्। यथा घृतं स्वगन्धसहितमेव कुङ्कुमगन्धमभिव्यनक्ति, तथा घ्राणमपि स्वगन्धसहितमेवेन्द्रियम्, अतो न स्वगन्धस्य ग्राहकम्, तेनैव तस्याग्रहणात्। यथा घ्राणस्य तथा रसनचक्षुस्त्वगिन्द्रियाणामपि [1]वक्ष्यमाणेन दृष्टान्तबलेन रूपरसस्पर्शसहकृतानामेवेन्द्रियत्वानुमानान्न स्वगुणग्रहणम्। [2]श्रोत्रन्तु शब्दगुणमिन्द्रियम्, अतस्तेनैव शब्दोपलम्भः।**

[**टि॰**] सत्यम्, क्रियते इति क्रिया इति व्युत्पत्या कार्यत्वादित्यर्थो व्याख्येयः। वैयाकरणरीत्या च तर्के 'विधात्वर्थः क्रिया' इति [3]लक्षणेन [4]गुणादीनामपि उत्क्षेपणत्वादिविलक्षणः क्रियेत्युल्लेखोऽभ्युपेयः, जानाति, इच्छति, प्रयतेते, संयुज्यते, समवैति, अस्ति इत्यादिवत्। इन्द्रियसिद्धावपि पार्थिवत्त्वे [5]किंप्रमाणमित्याह–**पार्थिवत्वेऽपि** इति गन्धस्यैवेत्येतावति कृतेऽसिद्धत्वं स्याद्, [6]गन्धत्वं प्रत्यभिव्यञ्जकत्वाद्; [7]अत उक्तं **रूपादिषु** इति। गुणेषु मध्य इत्यर्थः। नवशरावगन्धाभिव्यञ्जकजलस्य मनसश्च व्यवच्छेदार्थमेवकारः। ननु गन्धत्वसामान्येन गन्ध एवाभिव्यज्यते [8]नान्यादित्यनैकान्तिकत्वम्। *न च समानकालमेव गन्धगन्धसामान्ययोरुपलम्भाद् गन्धत्वस्य न गन्धाभिव्यञ्जकत्वमिति वाच्यम्, द्वित्वादिप्रतीतौ*

*[पं॰] प्राग्द्रष्टव्यम्।* ***कुङ्कुमगन्धाभिव्यञ्जकघृतवदिति*** *यथा घृतं पार्थिवमेवं रूपादिषु मध्ये गन्धस्यैवाभिव्यंजकत्वात्, घ्राणमपि पार्थिवमित्यर्थः।* ***स्वगन्धसहितमेवेति*** *स्वगंधसहितमेव सदित्यर्थः।* ***तेनैव तस्याग्रहणादिति*** *स्वात्मनि* क्रियाविरोधात्। न हि सुशिक्षितोऽपि बहुदुःखमारोढुमीष्टे। न च तिक्ताऽप्यसिधारा सूयं सूंछित्ते(?) **तथा रसनचक्षुस्त्वगिन्द्रियाणामिति** अत्र **रूपरसस्पर्शसहकृतानामेवेति**–रसनस्य रससहितस्य, चक्षुषस्तु रूपसहितस्य त्वगिन्द्रियस्य तु स्पर्शसहितस्यै[व] सम्बन्धः। ननु यथासंख्यमनुवर्त्तव्यम्, असंभवात्। यदोन्द्रियं कर्तृस्वगुणं स्वयमेव न गृह्णाति, तत्कथं श्रोत्रं स्वगुणमादत्ते इत्याह **श्रोत्रं तु न स(शब्द)गुणमिन्द्रियमतस्तेनैव शब्दोपलंभ इति** घ्राणेन्द्रियाणामवयवित्वात्स्वावयवगुणारब्धगन्धादिगुणसहितानामेवेन्द्रियत्वम्। श्रोत्रं तु न शब्दगुणेन सहेन्द्रियं भवति। निरवयवनभोद्देशमात्रत्वात्तस्य, शब्दस्य तु क्षणिकत्वात्। ततो वक्त्रा समुच्चारितस्य जलतरंगन्यायेन श्रोतृश्रोत्रदेशे मदैवोत्पन्नस्यास्य श्रोत्रेणैवोपलंभो युज्यत इति भावः।

[**कु॰**] [51] ननु गन्धव्यञ्जकमित्युक्ते कुङ्कुमादेर्गन्धस्य व्यञ्जके तैलादौ सर्व्वव्यञ्जके मनसि चातिव्याप्तिरत आह [9]गन्धोपलम्भक इति (कं. ३४.२४)। गन्धत्वजात्याश्रयस्य सर्व्वस्येति व्याख्याना[त्] तैलादिव्यावृत्तिः। तस्यैवेति व्याख्या(ना)नान्मनो व्यावृत्तिश्च द्रष्टव्या। **नियमो न लभ्य[ते]** इति (कं. ३४.२५) सर्वेषां पार्थिवानां भूयन्तरोपष्टम्भदर्शनादिह किमुपष्टम्भकं द्रव्यं गन्धमभिव्यनक्ति, पृथिवी वा [इति] सन्देह इत्यर्थः। **इतरविलक्षणमिति** (कं. ३५.१) पार्थिवस्य द्रव्यान्तरोपष्टम्भा गन्धोपलब्धिः प्रतिबन्धाप्रतिश्यायादौ तथा दर्शनादिति भावः। अनुपलभ्यमानगन्धत्वेनापार्थिवमिति पक्षानुमा[न]माशङ्क्याह [10]**अथेति। श्रोत्रं चेति** (कं. ३५.१०) ग्रहणकार्यान्यथानुपपत्त्या बाह्येन्द्रियत्वादेव सगुणस्येन्द्रियभावानुमानं बाधितमिति भावः।

---

१ वक्ष्यमाणे तत्तदृष्टान्तबलेन–जे. १, जे. ३। २ श्रोत्रन्तु न सगुण–जे. १, जे. ३। ३ लक्षणे–अ, ब, क; ४ गुणाहीनामव्युक्षेत्वादि–अ; ५ किन्तु–अ, ब; ६ गन्धत्वं स्याद् गन्धं प्रति–अ. गन्धं प्रति–ब; ७ तत–अ; ८ नान्यनित्य–अ, ब; ९ गन्धोपलम्भकम्। १० प्रतीकमिदं कं पुस्तके नास्ति।

### प्रशस्तपादभाष्यम्

[52] विषयस्तु द्वयणु[1]कादिप्रक्रमेणारब्धस्त्रिविधो मृत्पाषाणस्थावरलक्षणः। तत्र भूप्रदेशाः [2]प्राकारेष्टकादयो [3]मृत्प्रकाराः। पाषाणा उपलमणिवज्रादयः। स्थावरा-[4]स्तृणौषधिवृक्षगुल्मलतावतानवनस्पतय इति।

### न्यायकन्दली

[52] शरीरेन्द्रियाभ्यां विषयस्य स्वरूपविशेषं 'तु'शब्देन दर्शयन् भेदं दर्शयति- विषयस्त्विति। द्वयणुकादिप्रक्रमेणारब्ध इति साधारणरूपानुवादः। मृत्पाषाणस्थावर-[5]लक्षण इति। मृत्पाषाणस्थावरादिस्वभाव इत्यर्थः। तेषां मध्ये मृदं स्वरूपेण निर्द्धारयन्नाह-तत्रेति। तत्र [6]भूप्रदेशाः भूगोलकल्पप्रदेशाः। स्थलनिम्नादयः प्राकारेष्ट-कादयः सर्वे ते मृत्प्रकाराः, मृत्प्रभेदा इत्यर्थः। पाषाणभेदमाह-[7]पाषाणा इति। उपलाः शिलाः, मणयः सूर्य्यकान्तादयः, वज्रोऽशनिर्हो[8]राश्च। तृणमुलपादिः, औषधयः फलपाकान्ता गोधूमादयः, ये सपुष्पफलास्ते वृक्षाः कोविदारप्रभृतयः, [9]गुल्माः सस्तूपा

[टि०] द्वित्व-सामान्यज्ञानं ततो द्वित्वज्ञानमिति प्रतिपादितत्वात्, नागृहीतविशेषणे विशिष्टबुद्धिरिति हेतोश्च दर्शितत्वात्। उच्यते न हि सामान्येन पदार्थो व्यज्यते [[10]पदार्थस्य स्वयमेव प्रतीतत्वात्,] [11]पदार्थाप्रतीतौ सामान्यस्याप्रतीतेः विशिष्टप्रतीतौ सामान्यज्ञानमुपयुज्यते इति। घृतवद् इति-वर्षाकालशैत्याभिभूतो हि कुङ्कुमगन्धः सर्षपतैलादिना व्यज्यते। प्रथमं तु तैलसम्पर्काभावेऽपि केसराणां तथाविधगन्धोपलम्भात्। साधारण[12]रूपेति-शरीरेन्द्रिययोरपि द्वयणुकादिप्रक्रमारब्धत्वात् [13]सविटपा सविस्तरा॥

॥ पृथिवी॥ इति[14] पृथिवी॥

[पं०] [52] द्वयणुकादिप्रक्रमेणारब्ध इति साधारणरूपानुवाद इति यथा शरीरेन्द्रिये द्वयणुकादिप्रक्रमेण निष्पद्येते तथा विषयोऽपि द्वयणुकादिप्रक्रमेण निष्पद्यते इति भावः। तथापि तयोः रूपान्तरस्यापि संभवान्नानेन रूपेणाभिधानं कृतमित्यस्य भावार्थोऽस्माभिः संप्रदायाभावान्न ज्ञायते। अभियुक्तैः स्वधिया वा बहुश्रुतमुखाद्वा ज्ञातव्यम्। – इति पृथिवी ॥१॥

[कु०] [52] मृत्पाषाणस्थावर[15]स्वरूपमिति (कं. ३५.१२) मृत्त्वपाषाणत्वस्थावरत्वजातिभिः परस्परव्यावृत्त इत्यर्थः। स्थावरशब्दस्यावयवार्थमनुसृत्य चोदयति नन्विति (कं. ३५.२०)। रूढिर्बलीयस्त्वमाश्रित्य परिहरति सत्यमिति (कं. ३५.२१)। रूपान्तरस्य स्थावरस्वरूपादन्यस्वरूपस्य स्थावरत्वजात्यनाक्रान्तस्येत्यर्थः। अपि शब्दस्त्ववयवार्थानुसारेण द्रष्टव्यः।

---

१ °कादिक्रमेणा° –कं. १, कं. २। २ प्राकारेष्टिकादयः–कि.। ३ मृद्विकाराः–कि. दे. ता.। ४ तृणौषधि-वृक्षलतावतान–कं. १, कं. २; वृक्षतृणौगुल्मलतावतान–कि. ता.। ५ लक्षणः मृत्पाषाण°–जे. १, जे. ३। ६ भूप्रदेशाः स्थलनिम्नादयः–कं. १, कं. २। ७ पाषाण इति–जे. १, जे. ३। ८ हीरश्च–कं. १, कं. २। ९ पाठोऽयं कं. १, कं. २ पुस्तकयोर्नास्ति। १० [ ] एतच्चिह्नान्तर्गतः पाठः अ पुस्तके नास्ति। ११ पदार्थ-प्रतीतो–अ, पदार्थाप्रतीतौ–ब. १२ साधारणरूपेति घृतवदिति ब–; १३ विटपाः मु. सविटपाः–जे. १, जे. ३; १४ 'इति पृथिवी'–क पुस्तके नास्ति। १५ °लक्षण इति–कं., °स्थावरादिलक्षण पा. २.४ पु.।

प्रशस्तपादभाष्यम्

[53] अप्त्वाभिसम्बन्धादापः ।

रूपरसस्पर्शद्रवत्वस्नेहसङ्ख्यापरिमाणपृथक्त्वसंयोग[1]विभागपरत्वापरत्वगुरुत्व-[2]संस्कारवत्यः ।

पूर्व[3]वदेषां सिद्धिः ।

शुक्लमधुरशीता एव रूपरसस्पर्शाः ।

न्यायकन्दली

वंशेक्षुप्रभृतयः । लता प्रसिद्धैव, अवतन्वन्तीत्यव[4]ताना विटपाः केतकीबीजपूरादयः, ये विना पुष्पं फलन्ति ते वनस्पतय [5]उदुम्बरादयः । ननु स्वेच्छाधीनचेष्टाविरहः स्थावरत्वम्, [6]तत्तु मृत्पाषाणयोरप्यस्ति । सत्यम्, तयो रूपान्तरस्यापि सम्भवादनेन रूपे[7]णाभिधानं न कृतम् ।

[53] अपां [8]लक्षणार्थमाह–अप्त्वाभिसम्बन्धा[9]दाप इति । अत्रापि व्यवहारसाधनं समानासमानजातीयव्यवच्छेदो वा लक्षणार्थः, सर्वं [10]पूर्ववत् । इदन्त्विह वक्तव्यम्–स्वयं प्रत्यक्षाधिगतपदार्थभेदः परस्य लक्षणेन प्रतिपादयेत्, अप्रतिपन्नस्याप्रतिपादकत्वात् । भेदश्च पदार्थानामन्योन्याभावलक्षणः । स च यस्याभावो यत्र चाभावस्तदुभयग्रहणेन गृह्यते, अन्यथा तत्स्वरूपप्रतिनियमेन [11]निषेधानुपपत्तिः, गौरश्वो न भवतीति । तत्र किं

[टि०] [ अथ जलनिरूपणम् ]

[53] स्वयं प्रत्यक्षेति–प्रत्यक्षेत्युपलक्षणम्, अनुमानेनाप्यधिगमो ज्ञेयः । अभाव एव विवेक इति–अत्र अभाव एवेति प्रथमान्तत्वे इतरेतराश्रयत्वमित्याःमाश्रयत्वमित्यर्थः, [12]अभावे एवेति सप्तम्यां तु इतरेतराश्रयत्वम् । अभावग्रहणे किमिति विवेकग्रहणम्, यस्मादभाव एव विवेको गृह्यते इति शेषः । [13]तथा च गवार्थी इति–[14]अश्वदर्शनाभावप्रतिपादनेन विजातीयानपेक्षत्वं दर्शितम् । गोशब्दस्मर[15]णाभावेन तु समानजातीयानपेक्षत्वमिति ।

[पं०] [53] अत्रापीति–न केवलं पृथिव्यामप्स्वपीत्यर्थः । यस्याभाव इति–अश्वस्याभावः । यत्र चाभाव इति गवि चाभावः । तत्स्वरूप इति–नियमेनेति अश्वस्य रूपनैयत्येन । परः प्राह तत्र किं [16]संकीर्णस्वभावयोरित्यादि । अयमयं न

[कु०] [53] इदं त्विहेति (कं. ३६.१०) अस्यार्थस्य सर्वलक्षणसाधारण्येऽपि पूर्वमनिरूपणादेव तु शब्दो द्रष्टव्यः । भिन्नयोरिति (कं. ३६.१७) इतरेतराप्रतीतिकारणतया पूर्वमेव भेदप्रतीति[ति]रङ्गीकरणाय । स च भेदतस्त इतरेतराभावो

१ विभागपरत्वगुरुत्व–दे. । २ संस्कारवत्यश्च–कि. । ३ एते च पूर्ववत्सिद्धाः–कि. व्यो. ता. । ४ °ताना नाम विटपाः–कं. १, कं. ३ । ५ औदुम्बरादयः–कं. १, कं. ३ । ६ तच्च–जे. १, जे. ३ । ७ नानेन रूपेणाभिधानं कृतम्–जे. १, जे. ३ । ८ लक्षणमाह–कं. १, कं. २ । ९ आपः–कं. १, कं. २ । १० पूर्ववत्–कं. १, कं. २ । ११ प्रतिषेधानुपपत्तेः–जे. १, जे. ३ । १२ अभाव–अ, ब, क; १३ तथाहि–मु; १४ अथ–अ, ब; १५ स्मरणभावेन–अ, ब; १६ सङ्कीर्णयोरुभयोः–कं. ।

## न्यायकन्दली

[1]सङ्कीर्णस्वभावयोरुभयोर्ग्रहणादन्योन्याभावग्रहणं परस्परविविक्तयोर्वा ? सङ्कीर्णग्रहणे तावदयमयं न भवतीति प्रतीत्यसम्भव एव । परस्परविविक्तयोर्ग्रहणादभावप्रतीतावितरेतराश्रयत्वम्, विविक्तयोर्ग्रहणे सत्यभावग्रहणमभावग्रहणे च विविक्तग्रहणम्, अभाव एव विवेको यतः । अत्रोच्यते, भिन्नयोरितरेतराभावो नत्वितरेतरा[2]भावो भेदः । यदेतद् वस्तुनः प्रात्यात्मिकं [3]स्वरूपं स एव भेदः, त[4]च्चापरदर्शनानपेक्षमिन्द्रियसन्निकर्षमात्रादेव प्रतीयमानं प्रत्येकं विलक्षणमेव संवेद्यते । [5]तथा हि–गवार्थी नाश्वदर्शनात् प्रवर्त्तते, गोशब्दञ्च न स्मरति, तत्राश्वे गवि च स्वेन स्वेनात्मना [6]गृहीते तत्स्वरूपनियमेनान्योन्याभावप्रतीतिर्नानुपपन्ना । न चैवं सति वाच्यं स्वरूपभेद एवास्तु किमन्योन्याभावेनेति, तस्यापि प्रतिषेधविषयस्य संवेदनात् । न केवलमप्त्वमपां वैधर्म्यं स्नेहसहचरितं चतुर्दशगुणवत्त्वमपीतरेभ्यो वैधर्म्यमिति प्रतिपादयन्नाह–रूपरसेति । अत्र द्वन्द्वानन्तरं 'मतुप्'-प्रत्ययः करणीयः ।

[**टि०**] [7]**सङ्ख्यादिप्रतिपादकं तु** इति–सङ्ख्यापरिमाणानि संयोगविभागौ पृथक्त्वं परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणीति सर्वेषु साधारणं सूत्रम् ।

[**पं०**] **भवतीति**–अयं गौः अयमश्वो न भवतीत्यर्थः । **प्रात्यात्मिकमिति** प्रतिनियतत्वेन स्वेनात्मनेति–स्वेन स्वेन रूपेण । **तस्यापीति** = स्वरूपभेदस्यापि । **प्रतिषेधविषयस्य संवेदनादिति** गौरश्वो न भवतीत्युल्लेखेन । **निर्विशेष एवेति** सहज इति । **ध्वनति** = कथयति पदवाक्यं **नन्वयमित्यादि** । श्रीधरः प्राह **नेत्यादि** ।

[**कु०**] न भवति कार्यकारणयोरेकत्वानुपपत्तेरित्यभिप्रायः । [8]किन्विति (कं. ३६.१८) परिशेषादित्यर्थः । वस्तुन इति षष्ठी । **प्रात्यात्मिकमिति** (कं. ३६.१८) तत्र भावार्थेऽपृथगुपचारो द्रष्टव्यः (व्यो?) ।

[9]**साधारणसूत्रमिति** (कं. ३७.५) जातावेकवचनम् । **वैधर्म्यनिरूपणावसर** इति (कं. ३७.५) यद्यपि शङ्का स्नेहचरि[सहि]तचतुर्दशगुणवत्त्वमपामितरेभ्यो वैधर्म्यमित्यनेन विरुध्यते तथापि रूपादयः प्रकारान्तरेणापि प्रतिपादयितु बुभुत्सोत्पादनाय कृतेत्यविरोधः । **शुक्लमेवेति** (कं. ३७.७) एवकारेण नीलादिवच्छुक्लतरत्वाद्यवान्तरभेदो भास्वरत्वं च व्यवच्छिद्यते । इतरथा पृथिवीरूपस्य पाकजत्वेन तारतम्यप्रदर्शनेन तेजोरूपस्य भास्वरत्वप्रदर्शनेन विशेषविधिः शेषनिषेधपर इति न्यायाद् द्रष्टव्यम् ।

---

१ सङ्कीर्णयो–कं. १, कं. २ । २ भाव एव–जे. १, जे. ३ । ३ रूपं–जे. १, जे. ३ । ४ °च्चापरानपेक्ष–जे. १, जे. ३ । ५ तथा च–जे. १, जे. ३ । ६ गृह्यमाणेन–कं. १, कं. २ । ७ साङ्ख्यादि–अ, ब; ८ न लु–कं. । ९ साधारणमेव–कं. ।

### प्रशस्तपादभाष्यम्

[54] स्नेहोऽम्भस्येव सांसिद्धि[1]कञ्च द्रवत्वम् ।

### न्यायकन्दली

पूर्ववदेषां सिद्धिः । यथा [2]पूर्वं पृथिव्यां सूत्रकारवचनादेषां रूपादीनां गुणानां सिद्धिः प्रतिपत्तिस्तथाऽप्स्वपीत्यर्थः । तथा च सूत्रम्–"रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्च" (वै. सू. २.१.२) इति । सङ्ख्यादिप्रतिपादकन्तु साधारणमेव सूत्रम् । वैधर्म्यनिरूपणावसरे पृथिव्यादिसाधारणानां रूपादीनामभिधानमयुक्तमित्याशङ्क्या-वान्तर[3]भेदेनैषामसाधारणत्वं प्रतिपादयति–शुक्लेत्यादि । शुक्लमेव रूपमपां मधुर एव रसः शीत एव स्पर्शः । अप्सु रूपान्तरप्रतीतिराश्रय[4]रूपभेदात् । कथमेतदिति चेत् ? तासामेवोद्धृत्य वियति विक्षिप्तानां धवलिममात्रप्रतीतेः, पुनर्निपतितानामाश्रयरूपानु-विधानात् । [5]तासु न मधुरो रसो गुडादिवदप्रतिभासनादिति चेत् ? न, कटुकषायतिक्त-लवणाम्लविलक्षणस्य रसस्य संवेदनात्, गुडादिवदप्रतिभासनन्तु माधुर्य्यातिशयाभावात् ।

[54] निर्विशेष एव स्नेहोऽपां वैधर्म्यमिति ध्वनति–स्नेहोऽम्भस्येवेति । नन्वयं पृथिव्यामपि वर्त्तते, यथा क्षीरे तैले सर्पिषि च । न सर्वत्र, पाषाणेष्टकाशुष्केन्धनादिष्व-सम्भवात् । यत्तु क्वचित् क्षीरादिषु दर्शनं तत्संयुक्तसमवायादुदकगतस्यैव, यथा सांसिद्धिकद्रवत्वस्य [6]क्षीरतैलयोः स्वाश्रयसन्निकर्षात् । उदक[7]धर्मत्वन्तु स्नेहस्य सर्वत्र

[टि०] ननु तिलादिवत् गुडादिवैलक्षण्यमप्यस्तीत्याह–गुडादिवद् इति–स्तोकं [8]तु माधुर्यं कटुत्वादिविलक्षणमस्त्येवेति नेष[9]त्कटुत्वाद्यभ्युपगमः ।

[पं०] [54] तत्संयुक्तसमवायादुदकगतस्यैवेति–पार्थिवद्रव्ये संयुक्तमपद्रव्यं तत्र समवेतः स्नेहगुण एवंरूपा संयुक्त-समवाया उदकगतस्यैव स्नेहस्य तद्दर्शनमित्यर्थः । यथा सांसिद्धिकद्रवत्वस्य क्षीरतैलयोः स्वाश्रयसन्निकर्षादिति–यथा

[कु०] [10]कटुकादिविलक्षणस्य रसस्य संवेदनादिति (कं. ३७.१०) ओदनादिसाधारणस्याव्यक्तमधुररसस्यानुभवादिति भावः । माधुर्यातिशयाभावादिति (कं. ३७.११) मधुरो हि रसोऽनेकावान्तरतारतम्ययुक्तः, तत्र गुडसाधारण्येना-प्रतीत्या अश्रु(इक्ष?)माधुर्यापह्नवे इक्षुक्षौद्रादिष्वपि माधुर्यं न स्यादिति भावः । यत्तूदके दूषरा(धूसर)दिके दृश्यते तदपि रूपवदाश्रयसम्भेदात् । इदं च सामुद्रस्यैव बलहकपीतमुक्तस्य माधुर्योपलम्भात् ।

---

१ सांसिधिकं द्रवत्वं च–कि. । २ पूर्वस्यां–जे. १, जे. ३ । ३ भेदेन तेषाम्–जे. १, जे. ३ । ४ रूप-संभेदात्–जे. १, जे. ३ । ५ नाप्सु मधुरो रसो–जे. १, जे. ३ । ६ क्षीरतैलयोः उदकधर्मं... कं. १, कं. २ । ७ धर्मत्वं च–जे. १, जे. ३ । ८ च–अ, ब; ९ नव–अ, ब; १० कटुकषायतिक्तलवणाम्लविलक्षणस्य–कं. ।

प्रशस्तपादभाष्यम्

[55] [1]तास्तु पूर्ववद् द्विविधाः, नित्यानित्यभावात्। [2]तासां तु कार्य्यं त्रिविधं शरीरेन्द्रियविषयसञ्ज्ञकम्।

[3]तत्र शरीरमयोनिजमेव वरुणलोके, पार्थिवावयवोपष्टम्भा[4]च्चोपभोगसमर्थम्।

न्यायकन्दली

तदन्वयव्यतिरेकानुविधानात्। तथा चानूपदेशप्रभवानां तरुतृणादीनां [5]स्निग्धता, *जाङ्गलप्रदेशप्रभवानाञ्च रूक्षता। तत्रापि सततं परिषिच्यमानमूलानां स्निग्धत्वं तद्विरहिणाञ्च तन्नास्तीति।

सांसिद्धिकञ्च द्रव्यत्वमिति। न केवलं स्नेहः, स्वभावसिद्धञ्च द्रवत्वमम्भस्येवेत्यर्थः। [6]क्षीरतैलयोः स्वाश्रयसन्निकर्षेण तदुपलम्भः, क्वचित्तयोर्धनत्वोपलम्भात्।

[टि०] [54] **क्षीरतैलयोः** इति–स्वस्य [7]द्रवरूपस्याश्रयो जलं तस्य [8]पार्थिवेन क्षीराद्यवयविना सन्निकर्षात्संयोगात् संयुक्तसमवायादिति भावः।

[पं०] क्षीरतैलयोर्विषयभूतयोरुदके तस्य स्वाभाविकद्रवत्वस्य स्वाश्रयसन्निकर्षादुदकसन्निकर्षाद्दर्शनमिति योगः। क्षीरतैलयोर्मध्ये ह्युदकमस्ति। उदके च स्वाभाविकं द्रवत्वम्, द्रवत्वोपेतोदकसंपर्काच्च क्षीरतैलयोः पार्थिवत्वादद्रवस्वरूपयोरपि द्रवत्वं दृश्यत इति भावः। **अनूपदेशप्रभवानामिति**–सजलप्रदेशजन्मनाम्। **जाङ्गलदेशप्रभवानामिति** जलं गलत्यस्मादिति जाङ्गलशब्दव्युत्पत्तिः। **तत्रापीति** = जाङ्गलदेशेऽपि। **न केवलं स्नेह इति** न केवलं स्नेहोऽपां पृथिव्यादिभ्यो वैधर्म्यमिति योगः। **तदुपलम्भ इति** = द्रवत्वोपलम्भः। **क्वचित्तयोरिति**–क्वथे = निष्पाके धातुना सिद्धम्।

[कु०[ [54] उष्णत्वमग्न्यातपसंप्रयोगादिति सिद्धं एवायमर्थ इत्यनुक्तौ व(अ)म्भःस्नेहस्य साधारण्यमाह **निर्विशेष इति** (कं. ३७.१२) स्नेहस्तत्तद्व्यक्त्तया गुणः अभास्वररूपसाहचर्यनियमाच्च। न तेजःप्रभृतीनामश्च? चानुभवसिद्धः, इत्येवंस्थिते चिन्तयति **नन्विति** (कं. ३७.१३)। स्नेहस्य पृथिवीगुणत्वं गन्धादिवत् सर्वव्यक्तिसाधारणतया चासौरभादिवत् क[ति]पयव्यक्तिवृत्तितया वा? नाद्य इत्याह **सर्वत्रेति** (कं. ३७.११)। तद्द्वितय इत्याह **यत्त्विति** (कं. ३७.१४)। अनैमित्तिकपृथिवीगुणस्य सर्व्वव्यक्तिवृत्तिविशेषसामान्यविशेषस्येव सर्वव्यक्तिवृत्तित्वदर्शनादिति भावः। प्रत्यक्षे विप्रतिपद्यमानं प्रत्याह **उदकधर्मत्वं चेति** (कं. ३७.१४)। ननु सर्वगोपलम्भविशेषे स्वाश्रयसंन्निधि (ध) [व]शादेव क्षीरादौ द्रवत्वोपलब्धि न स्वभावत इति कुतो विनिश्चितमित्यत आह **क्वचित्तयोरिति** (कं. ३७.२०)। क्षीरे तावत्तापेन तोयविगमे घनत्वमुपलभ्यते तैलसर्पिषोश्चात्यन्ताग्निसंयोगे भस्मीभाव उपलभ्यते। तत्र यदि सांसिद्धिकद्रवत्वं तदा आरब्धतैलैरेव परमाणुभिर्भस्मारम्भे भस्मन्यपि द्रवत्वं दृश्येतेति भावः। पार्थिवं च क्षीरस्य घनीभावे क्षीरमिति प्रत्यभिज्ञानात्। तैलसर्पिषोश्च भौमानलेन त्वा (च) द्रष्टव्यम्।

१ ताश्च–कं. १, कं. २। २ 'तासां तु' इति 'दे' पुस्तके नास्ति। ३ 'तत्र' 'दे' पुस्तके नास्ति। ४ 'च' कि. पुस्तके नास्ति। ५ स्निग्धतां–जे. १, जे. ३। * स्वल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः।
स ज्ञेयो जाङ्गलो देशो बहुधान्यादिसंयुतः।

६ क्षीरतैलयोस्त्वा–कं. १, कं. २। ७ द्रव्यत्वरूप–अ, ब, क; द्रवत्वरूप–ड; ८ पार्थिवत्वेन–अ;

## न्यायकन्दली

[55] पृथिव्या इवापामप्यवान्तरभेदेन द्वैविध्यमित्याह–[1]तास्त्विति । परमाणुस्वभावा आपो नित्याः, [2]कार्य्यस्वभावास्त्वनित्याः । कार्य्यञ्च त्रिविधम् । अत्रापि [3]पूर्ववदित्यनुषङ्गः, यथा पृथिव्याः शरीरेन्द्रियविषयसंज्ञितं कार्य्यं त्रिविधमेवमपामपीति ।

[4]तत्र शरीरमयोनिजमेव, पार्थिवं शरीरं योनिजमयोनिजञ्च, आप्यं शरीरमयोनिजमेवेति विशेष इत्यर्थः । ननु मानुषं शरीरं तावत्पार्थिवं गन्धगुणोपलब्धेः, आप्यं तु क्वास्तीत्याह– वरुणलोक इति । इदं शरीरमपामागमात् प्रत्येतव्यम् । [5]द्रवत्वैकस्वभावत्वादपां तदारब्धं शरीरं जलबुद्बुदप्रायं विशिष्टव्यवहारायोग्यं कथमुपभोगसमर्थं [6]स्यादित्यत आह पार्थिवावयवोपष्टम्भादु[7]पभोगसमर्थम् । पार्थिवानामवयवानामुपष्टम्भात्

[टि०] [55] पार्थिवावयवेति–न[8]नु तत्र शरीरे पार्थिवत्वमेव मुख्यं, जलं त्वमुख्यमिति [9]कथं नाभ्युपगम्यते ? नैवम्, आगममूलत्वादस्यार्थस्य आपः क्वचिच्छरीरारम्भिका इन्द्रियारम्भकत्वात् पृथिवीवदित्यनुमानाच्च । न [10]चात्राकाशेनेन्द्रियारम्भकेण शरीरानारम्भकेण व्यभिचार इति वाच्यम्, द्व्यणुकादिप्रक्रमेणारम्भस्यात्र विवक्षितत्वादिति । नन्वेको गन्ध आरम्भको मा भून् रसादयस्तु द्वित्रिचतुर्वृत्तय इति तेषामारम्भकत्वं भविष्यतीत्याह–**चित्ररूपरसेति** ।

[पं०] [55–56] [11]यत्तु **पंचभूतसमवायिकारणमित्यत** आरभ्य **स्वभावभेदोपपत्तेरित्यन्त्यानां** वाक्यानामक्षरार्थः सुगमः । भावार्थस्तु संप्रदायाभावादस्माभिर्न ज्ञायते । अत एव न व्याख्यायते । यद्यपि किल श्री **नारचन्द्रटिप्पणके** एषां वाक्यानां व्याख्यानं किञ्चित्किञ्चिद्दृश्यते तथाप्यस्माभिर्मन्दमतित्वान्नावगम्यते । अतो नोच्यते ।

[कु०] [55] अनुषङ्ग (कं. ३७–२२) इत्यस्य विभक्तिविपरिणामेन तासामिति चेति शेषः । **आगमात्प्रत्येतव्यमिति** (कं. ३७–२६) अ[म्भ]स्त्वं शरीरारम्भकद्रव्यसमवेतं द्रव्यारम्भकसमवेतत्वात् पृथिवीत्ववदित्यनुमानस्य गन्धैकार्थसमवाय उपाधिरिति भावः । विशिष्ट**व्यवहारयोग्यम्** (कं. ३८–१) इन्द्रियाधिष्ठानसम्बन्धायोग्यम् । ननु [12]सर्वशरीरोत्पत्तौ सर्वाण्यपि भूतानि संहत्य कारणं भवन्ति यावच्छरीरं नान्यतममपैति, गन्धक्लेदाति[दि]तत्तत्कार्योपलम्भात्; ततश्च सर्वेषां समवायित्वमेव कुतो नेत्यत आह **येत्विति** (कं. ३८–५) । **कारणगन्धस्येति** ( कं.३८–६) ननु तत्वे को दोषः ? सततोत्पत्तिप्रसङ्ग इति चेत्, अथ बहूनामप्यारम्भकयात्वे कथमयं प्रसङ्गो न स्यात् ? अपेक्षणीयसमवायिकारणविरहादिति मा चोदः, एकस्यारम्भकत्वेऽपि समवाय्यनेकत्वात् । पटादौ बहुभिरेवारम्भदर्शनादित्यपि न, तत्र

---

१ तास्त्वेति – कं. १, कं. २ । २ कार्यस्वभावा अनित्या – जे. १, जे. ३ । ३ पूर्ववदनुषङ्गः – कं. १, कं. २ । ४ 'तत्र' – जे. १, जे. ३ पुस्तकयोर्नास्ति । ५ द्रवत्वैकस्वभावत्वादपां – कं. १, जे. १, जे. ३; अत्र कं. २ इत्यस्यैव पाठः समीचीनः । ६ स्यादित्याह – कं. १, कं. २ । ७ 'उपभोगसमर्थम्' इति – जे. १, जे. ३ पुस्तकयोर्नास्ति । ८ तव – अ, ब, न, क; ९ 'कथं' – इति अ, ब, क पुस्तकेषु नास्ति । १० चाकाशेन – ड; ११ ये तु – कं । १२ सर्वसर्व – आदर्शपुस्तके ।

## प्रशस्तपादभाष्यम्

[56] इन्द्रियं सर्वप्राणिनां [1]रसव्यञ्जकं [2]विजात्यनभिभूतैर्जलावयवैरारब्धं [3]रसनम् । विषयस्तु सरित्समुद्रहिम[4]करकादिरिति ।

## न्यायकन्दली

संयोगविशेषादाप्यं शरीरमुपभोगाय समर्थं स्यात् । आप्यशरीरोत्पत्तौ पार्थिवावयवा निमित्तकारणम्, तेषां संयोगादाप्यावयवानां द्रवत्वे प्रतिरुद्धे विशिष्टमेवेदं शरीरमुत्पद्यते, न जलबुद्बुदप्रायमित्यर्थः । ये तु पञ्चभूतसमवायिकारणं शरीरमित्यास्थिषत, तेषामगन्धं शरीरं स्यात्, कारणगन्धस्यैकस्यानारम्भकत्वात् । चित्ररूपरसस्पर्शञ्च प्राप्नोति, कारणेषु नानारूपरसस्पर्शसम्भवात् । न चैवं दृष्टम्, तस्मान्न पञ्चभूतप्रकृतिकम् । भूजलप्रकृतिकमप्यत एव न स्यात्, [5]अत एव च भूजलानिलप्रकृतिकमपि न स्यात्, भूवाय्वाकाशप्रकृतिकत्वेऽरूपमरसमगन्धञ्च [6]स्यात्, [7]भूदहनानिलप्रकृतिकत्वे चागन्धमरसम् । अनलानिलाकाशप्रकृतिकत्वे चागन्धमरसमरूपं चेत्यादि यथासम्भवं योजनीयम् । न च पञ्चभूतसमवायिकारणत्वे [8]शरीरस्यैकत्वं प्राप्नोति, स्वभावभेदेन भेदोपपत्तेः । मानुषं शरीरं पृथिव्यात्मकं गन्धवत्त्वात् परमाणुलक्षणपृथिवीवत् । उदकादिधर्मोपलम्भः कथमत्रेति चेत् ? संयुक्तसमवायादित्यलम् ।

[टि०] **मानुषं शरीरम्** इति अत्र शरीरमात्रपक्षीकृते आप्यशरीरादौ पार्थिवत्वस्या[9]प्यागमप्रमाणबाधितत्वात् कालात्ययापदिष्टत्वमसिद्धत्वं च । **उदकादि-धर्म** इति–स्नेहक्लेदादिः ।

[पं०] **कथमत्रेति**–अत्र शरीरे । **संयुक्तसमवायादिति**–पार्थिवशरीरेण संयुक्तान्युदकाग्निवाय्वाकाशानि, तत्र समवेतास्तद्धर्मा इत्यर्थः । **न द्रव्यान्तरमिति** = न जलान्तरम् . **इत्यमुत्पत्त्याभावादिति**–विजात्यनभिभूतत्वेनोत्पादाभावात् । **उपभोक्तुरिति** = आत्मनः ॥ इत्यापः ॥ २ ॥

[कु०] सजातीयबहुत्वेन तथोपपत्तेः । विजातीयारम्भे त्वन्यथा भविष्यतीति शङ्काया दुर्निवारत्वात् । किञ्च प्रत्येकं बहुभिरेव पार्थिवादिभिरवयवैरारम्भयं न [यत्र] दोष इत्यत आह **चित्ररूपेति** (कं. ३८–७) ।

**गन्धवत्त्वादिति** (कं. ३८–१३) क्लेदादिविगमेप्यनुवर्तमानं गन्ध[व]त्वादित्यर्थः । [10]**नान्यदुदकद्रव्यमिति** शरीरसंयुक्तमितिशेषः ।

---

१ रसोपलम्भकम्–कि., ता. । २ अन्यावयवानभिभूतैः–कि., ता., व्यो. । ३ रसनेन्द्रियम्–दे. । ४ करकादिः–कं. १, कं. २ दे. । ५ अत एव भूजला°–कं १, कं. २ । ६ भवेत्–जे. १, जे ३ । ७ पाठोऽयं–कं. १, कं. २ पुस्तकयोर्नास्ति । ८ शरीरे–जे. १, जे. ३ । ९ प्यागमबाधितत्वात्–अ, ब, क; १० प्रतीकमिदं कं. पुस्तके नास्ति ।

न्यायकन्दली

[56] इन्द्रियं रसव्यञ्जकं सर्वप्राणिनामिति । सर्वप्राणिनां रसव्यञ्जकं यदिन्द्रियं तज्जलावयवैरारब्धम् । तथापि कस्मात्तदेव रसव्यञ्जकं स्यात्, नान्यदुदकद्रव्यमित्याह– विजात्यनभिभूतैरिति । विजातिभिः पार्थिवावयवैर्येऽनभिभूता अप्रतिहतसामर्थ्या आप्यावयवास्तैरितरद्रव्यविलक्षणमारब्धमत इदं विशिष्टोत्पादाद्रसव्यञ्जकमिन्द्रियं न द्रव्यान्तरम्, तस्येत्थमुत्पत्त्यभावादित्यर्थः । एतच्च नियमदर्शनादेव कल्प्यते । रसनेन्द्रिय[1]सद्भावे रसोपलब्धिरेव प्रमाणम्, क्रियायाः करणसाध्यत्वात् । आप्यत्वं रूपादिषु मध्ये [2]रसस्यैवाभिव्यञ्जकत्वात्, मुखशोषिणां लालादिद्रव्यवत् । विषयनिरूपणार्थमाह– विषयस्त्विति । [3]सरित्समुद्रौ हिमं करको घनोपलमित्यादिर्विषयो भोग्यत्वेन भोक्तुर्भोगसाधनत्वात् ।

[टि०] [56] **आप्यत्वम्** इति–रसत्वं प्रत्यभिव्यञ्जकत्वाद् रसस्यैवेत्यसिद्धिः स्याद्, अत उक्तं ***गुणादिषु**– इति गुणेष्वित्यर्थः । नन्व[4]पामभिनवशरावगन्धं प्रत्यभिव्यञ्जकत्वात् दृष्टान्तासिद्धिः ? नैवम्, तथाविधगन्धाभिभावकतापापनयन एव जलस्य सामर्थ्यदर्शनात् । न च कुङ्कुम[5]गन्धाभिव्यञ्जकघृतेऽप्यभिभावकद्रव्यापनायकत्वं शङ्कनीयम्, सर्वथानभिव्यक्तगन्धस्य कुङ्कुमादेः कुङ्कुमादिविष्टया पुनर्गन्धाभिव्यक्तिदर्शनात् । [6]पृथिवीत्वप्रकरणे तु 'एव'कारेणास्यापि व्यवच्छेदोऽभ्युपगमसिद्धान्तेन । अत्रापि मनो[7]व्यवच्छेदार्थमेवकारः । हरीतकी तु षड्रसेति तदीय एव मधुरो रसो जलपानानन्तरं प्रतीयते न तु जलमाधुर्यं [8]तद् हरीतक्या व्यज्यते इति न तयाऽनेकान्तोऽन्यथा कर्कटीभक्षणानन्तरं कटुरसोपलब्धौ जले [9]कटुकत्वाङ्गीकारप्रसङ्गः । [10]**भोग्यत्वेन भोक्तुः** इति शरीरेन्द्रियव्यवच्छेदार्थं भोग्यत्वेनेत्युक्तम् ॥जलम्॥

[कु०] [56] **विजातिभिरि[ति]** (कं. ३८.१६) विजात्यनभिभूतैरिति वदतः प्रशस्तदेवस्य शिष्टतया (समासान्तविधेरन्यत्वात्सि) विप्रत्ययाभावोऽपि द्रष्टव्यः । **अप्रतिहतसामर्थ्यादिति** (कं. ३८.१७) वाताद्युपह[त]रसनस्य रसानुपलब्धेः द्रव्यान्तरसंसर्गः सामर्थ्यप्रतिबन्धीत्यनुमानादिति भावः । **नियमदर्शनादेवेति** (कं. ३८.१९) शरीरसंयुक्तेषूदकान्तरेषु सत्स्वप्यनेनैव रसाभिव्यक्तिरिति [नि]यमस्य दर्शनादित्यर्थः ।

---

१ सद्भावेऽपि–जे. १, जे. ३ । २ रसस्य व्यञ्जकत्वात्–कं. १, कं. २ । ३ सरित्समुद्रा हिमकरका घनोपला इत्येवमादि–जे. १, जे. ३ । * रूपादिषु–इति मूलपाठः ४ पामभि–अ, ब, क; ५ गन्धाभिभावकद्रव्यापनायकत्वं –अ, ब. ६ पृथिवीप्रकाराणि–अ; पृथिवीत्वप्रकाराणि–ब; ७ व्यवच्छेदकार्थं–ब; ८ 'तद्'–अबक पुस्तकेषु नास्ति । ९ कटुत्वा...ड; १० भाग्यत्वेन – अ;

## प्रशस्तपादभाष्यम्

[57] तेजस्त्वाभिसम्बन्धात्तेजः । रूपस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत् । पूर्ववदेषां सिद्धिः । [1]तत्र शुक्लं भास्वरञ्च रूपम् । [2]उष्ण एव स्पर्शः ।

## न्यायकन्दली

[57] तेजस्त्वाभिसम्बन्धात्तेज इति । व्याख्यानं पूर्ववत् । तेजस्त्वमिव रूपाद्येकादशगुणयोगोऽपि तस्य वैधर्म्यमिति दर्शयति–रूपेत्यादि । [3]पूर्ववदेषां सिद्धिरिति । यथा सूत्रकारवचनाद्रूपादीनां पृथिव्यां सिद्धिस्तथा [4]तेजस्यपीत्यर्थः । तथा च सूत्रम्–"[5]तेजो रूपस्पर्शवत्" (वै. सू. २-१-३) । सङ्ख्यादिप्रतिपादकन्तु साधारणमेव सूत्रम् । यादृशमस्य रूपं तद्दर्शयति–शुक्लं भास्वरञ्चेति । शुक्लं रूपं पृथिव्युदकयोरप्यस्ति, [6]किन्तु न तद्भास्वरं स्वपरप्रकाशकं शुक्लं रूपं तेजस्येवेति वैधर्म्यम् । यत्त्वस्य लोहितं कपिलं वा रूपं क्वचित्प्रतीयते तदाश्रयोपाधिकृतम्, निराश्रयस्य सर्वत्र शुक्लतामात्रप्रतीतेः, यथा प्रदीपप्रभामण्डलस्य सौरचन्द्राद्यालोकस्य च उष्ण एव स्पर्श इति । पृथिव्युदक-

[टि०] [अथ तेजोनिरूपणम् ॥]

[57–58] नान्यतेजोद्रव्यम् इति–न त्वन्यत्तेजोद्रव्यमिति । नन्वन्यदपि प्रदीपादि तेजोद्रव्यं रूपव्यञ्जकमस्ति तदभावे चक्षुषोऽपि रूपव्यञ्जना[7]सामर्थ्यात् । नैवम्, [8]चक्षुर्वत् [9]प्रदीपादेरालोकान्तरसहितस्य व्यञ्जकत्वाभावात् । कार्यनियम [10]एव प्रमाणम् इति [11][रूपोपलब्धिः करणसाध्येत्यादि । तैजसत्वं च तस्य] इति । रूपादिषु इति–रूपत्वघटादिव्यञ्जकत्वेनासिद्धिनिरासार्थम्; एवकारस्तु मनोव्यवच्छेदार्थम् । न च तेजसोऽगुरुगन्धं प्रत्यभिव्यञ्जकत्वाद्

[पं०] [57–59] पृथिव्युदकमरुतामनुष्णाशीतशीतानुष्णाशीतस्पर्शा इति–पृथिव्या अनुष्णाशीतस्पर्शः ।१। उदकस्य शीतः स्पर्शः ।२। मरुतोऽनुष्णाशीतः स्पर्शः ।३। इति यथासंख्यम् । नान्य हीदृशमिति ।

अन्यत् = अग्न्यन्तरम् । कार्यनियम एवेति = रूपोपलब्धिरेव । प्रमाणमिति–कारणनियमे प्रमाणमित्यर्थः । इदं त्विति–चक्षुर्गतं तेजोद्रव्यम् । अनुद्भूतरूपस्पर्शमिति–रूपं च स्पर्शश्च रूपस्पर्शौ, अनुद्भूतौ रूपस्पर्शौ यत्र तदनुद्भूतरूपस्पर्शम् । न स्वाश्रयं दहतीति अनुद्भूतस्पर्शतां लक्षयति नाप्युपलभ्यते । अनुद्भूतरूपतां लक्षयति–उल्काद्यवरो-(बो)ध इति = उल्कादिपरिग्रहः ।

[कु०] [57] रूपाद्येकादशेति (कं. ३९.१३) भास्वररूपेण उष्णस्पर्शेन वा सहचारिता इति शेषः । [12]स्वपरप्रकाशकमिति (कं. ३९.१७) स्वपरप्रकाशनकार्येणाभिव्यक्तं भास्वरत्वं न(!)जातिविशेषस्तद्व्यक्तमित्यर्थः । सौरचन्द्राद्यालोकस्य चेति (कं. ३९.२०) ननु तत्रापि घनीभूतस्योदकस्य शुक्लं रूपं प्रतीयत इति चेत्, उदकरूपेण रूपान्तरानभिभवात् । अन्यथा जलावसिक्ता नीलशाली[टी] धवला प्रतीयेतेति ।

---

१ 'तत्र' कि. पुस्तके नास्ति । २ उष्ण एव स्पर्शः नैमित्तिकं द्रवत्वं च–कि. । ३ पूर्ववत्तेषां–कं. १, कं. २ । ४ तेजसीत्यर्थ–जे. १, जे. ३ । ५ सूत्र पाठे 'अपि' नास्ति । ६ न भास्वरं रूपं स्वरूपप्रकाशकं–कं. १, कं. २ । ७ समर्थात्–अ, ब; ८ क्षुर्वत्–अ, ब; ९ प्रदीपाद्यालोकान्तस्य–अ, क; १० एवाप्रमाण–अ; ११ [ ] एतच्चिह्नान्तर्गतः पाठः–अबपुस्तकयोर्भ्रष्टः । १२ स्वरूपप्रकाशक–कं ।

### प्रशस्तपादभाष्यम्

[58] तदपि द्विविधमणुकार्य्यभावात् । [1]कार्य्यञ्च शरीरादित्रयम् ।
शरीरमयोनिजमेवादित्यलोके । पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम् ।
इन्द्रियं सर्वप्राणिनां रूपव्यञ्जकमन्यावयवानभिभूतैस्तेजोऽवयवैरारब्धं चक्षुः ।

### न्यायकन्दली

मरुतामनुष्णाशीतशीतानुष्णाशीतस्पर्शाः, उष्ण एव तेजसि स्पर्श इति वैधर्म्यम् ।

[58] पृथिव्युदकवत्तेजसोऽपि द्वैविध्यमपिशब्देन सम्भावयन्नाह–तदपीति । [2]अणुकार्यभावात्, कार्यभावात् तेजोऽपि द्विविधमिति । [3]कार्य्यञ्च शरीरादित्रयम्, शरीरमिन्द्रियं विषय इति त्रयं [4]तेजसः कार्य्यम् । शरीरमयोनिजमेवादित्यलोके । ननु दहनात्मत्वात्तेजसां तदारब्धं शरीरं वह्निपुञ्जप्रायं विशिष्टव्यवहारायोग्यत्वान्नोपभोगाय कल्प्यते, तत्राह–पार्थिवावयवोपष्टम्भाच्च इति । [5]पार्थिवावयवानां निमित्तभूतानामुपष्टम्भात् संयोगविशेषात् तेजोऽवयवा उपभोगक्षमं विशिष्टमेव शरीरमारभन्ते, न वह्निपुञ्जप्रायमित्यभिप्रायः ।

[टि०] दृष्टान्तासिद्धिर्वाच्या, तद् गन्धस्य पूर्वमेवाभिव्यक्तत्वात् । सविशेषस्तु तदावारकद्रव्यापनयनात्प्रतिभातीति । केचिद् इन्द्रियमनःसंयोगव्यवच्छेदार्थं द्रव्यत्वे सतीति [6]कुर्वन्ति; तन्न; मनोऽर्थसम्बन्धस्यैव तस्य व्यञ्जकत्वात्, अन्यथा तु तदवयवानां रश्मीनां च व्यवच्छेदार्थं विशेषणान्तरं कार्यं स्यात्, पारम्पर्येण तदवयवानां साक्षाच्च रश्मीनां रूपव्यञ्जकत्वात् । यदा तेषामपि कारणवि[7]वक्षा तदा द्रव्यत्वे सतीति कर्तव्यमेवेति ।

[पं०] सुवर्णादिनां [8]तैजसत्वे तावदागमः प्रमाणमिति–

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेत्प्रदत्तं यः कांचनं गां च महीं च दत्ते ॥

इत्याद्यागमः । पिण्डभावयोग्यं [9]सुवर्णमारभ्यत इति अन्यथा पिण्डीभावः पार्थिवानामेव घटत इति दृष्टव्यम् । द्रव्यनिषेधाय बौद्धः प्रत्यवतिष्ठते–अनुद्भूतरूपस्पर्शं सुवर्णमित्यादिना–सन्दर्भेण । न मृष्यामहे इति = न क्षमामहे । द्रव्यान्तरस्येति अवयविनः । प्रतिसंचयमिति = प्रति परमाणुसमूहम् । बाह्यवस्तुनीति = नीलादौ । तन्मात्रहेतोरिति = वासनापरिपाकमात्रहेतोः । नीलादिभेदकल्पनेति–नीलादिभेदकल्पना क्रियते । येन कादाचित्कमु(त्कत्वमु)पपद्यते इति भावः । प्रतिसंचयमिति = प्रतिपरमाणुसमूहम् । दर्शनस्पर्शनाभ्यामेकार्थग्रहणमपि सिध्यतीति यमहमद्राक्षं तं स्पृशामि यं वा

[कु०] उष्ण एव स्पर्श[9]स्तेजसीति (कं. ३९.२०) चन्द्रचामीकरचक्षुषामनुद्भूतवादप्रतीयमानस्तेजस्तयाऽनुमेय इति भावः ।

[58] कार्य[10]नियम एव प्रमाणमिति (कं. ४०.११) कार्यात् रूपोपलब्धिश्चक्षुषः सद्भावे प्रमाणं, सत्यपि तेजोऽन्तरे शरीरसंयुक्तो अनेनैव रूपोपलम्भ इति नियमो विशिष्टारम्भे प्रमाणमित्यर्थः ।

---

१ कार्यं शरीरादित्रयम्, शरीरेन्द्रियविषयसञ्ज्ञकम्–कि, तत्र कार्यं–दे. । २ अणुकार्यभावात्–जे. १, जे. ३ । ३ कार्यं–जे. १, जे. ३ । ४ तेजसः एव–कं. १, तेजसश्च–कं. २ । ५ पार्थिवानामवयवानां–कं. १, कं. २ । ६ कुर्वन्तीति–अ, ब, क; ७ वक्षा–अ, विक्षा–ब; ८ सुवर्णादिकं–कं । ९ उष्ण एव तेजसः स्पर्शः–कं । १० नियत इति आदर्शपुस्तके ।

### प्रशस्तपादभाष्यम्

[59-60] विषयसञ्ज्ञकं चतुर्विधम्—भौमं दिव्यमुदर्य्यमाकरजञ्च। तत्र भौमं काष्ठेन्धनप्रभवमूर्ध्वज्वलनस्वभावं [1]पचनदहनस्वेदनादिसमर्थम्, दिव्यमबिन्धनं [2]सौर-विद्युदादि, भुक्तस्याहारस्य [3]रसादिपरिणामार्थमुदर्य्यम्, आकरजञ्च सुवर्णादि। तत्र संयुक्तसमवायाद्रसाद्युपलब्धिरिति।

### न्यायकन्दली

[4]इन्द्रियं सर्वप्राणिनां रूपव्यञ्जकमिति। सर्वप्राणिनां रूपव्यञ्जकं यदिन्द्रियं तत्तेजोऽवयवैरारब्धम्। इदमेव कुतो रूपव्यञ्जकमिन्द्रियं स्याद् नान्यत्तेजोद्रव्यमित्यत्रो-पपत्तिः—अन्यावयवानभिभूतैरिति। ये पार्थिवोदकावयवैरप्रतिबद्धसामर्थ्यास्तैजोऽवयवा-स्तैरारब्धं चक्षुः, अत इदं विशिष्टोत्पादाद्रूपाभिव्यञ्जकमिन्द्रियं नान्यत्। [5]तादृशं तदुत्पद्यत इत्यत्रादृष्टमेव कारणम्, कार्य्यनियम एव प्रमाणम्। तैजसत्वन्तु तस्य रूपादिषु मध्ये नियमेन रूपस्याभिव्यञ्जकत्वात् प्रदीपवत्। इदं त्वदृष्टवशादनुद्भूत-रूपस्पर्शम्, तेन न स्वाश्रयं दहति नाप्युपलभ्यते।

[59] विषयसञ्ज्ञकं चतुर्विधम्। विषय इति सञ्ज्ञा यस्य तद्विषयसञ्ज्ञकं [6]तेजःकार्य्यं चतुर्विधम् चातुर्विध्यमेव दर्शयति—भौममित्यादि। [7]तत्र भौममिति। तत्रेति निर्धारणार्थः। भूमौ भवं भौमं काष्ठेन्धनप्रभवं काष्ठस्वभावं यदिन्धनं तस्मात् प्रभवत्युत्पद्यते, निराश्रय-

[टि०] [59] तस्मात्प्र'भवति इति—वस्तूत्पत्तौ काष्टेन्धनं निमित्तीभवत्यत्यर्थः। स्तब्धत्वनाशनं इति—वंशादेः, दहनमिति दाहक्रिया। सुवर्णादीनाम् इति।

[पं०] स्त्राक्षं तं पश्यामीत्यनेनोल्लेखेनैकार्थग्रहणम्। अस्याप्याप्यसंभव इति—एकार्थग्रहणस्याप्यसम्भवः। तेषामिति रूपादीनाम्। एकैकेन्द्रियग्रहणनियमादिति—अवयवी सर्वैरिन्द्रियैः ग्राह्यः, रूपादीनि त्वेकैकेन्द्रियग्राह्याणीत्यर्थः। भवतामिति =बौद्धानाम्। [8]दर्शनस्येति =निर्विकल्पकप्रत्यक्षस्य। परः प्राह—प्रत्येकमतीन्द्रिया अपीति। मनस्कारेन्द्रिययोरपि प्रत्यक्षता स्यादविशेषादिति—कोऽर्थः? यथा मनस्कारेन्द्रियादिषु सत्सु समर्थोत्पन्ना रूपादिपरमाणव ऐन्द्रियकाः स्युः, तथा मनस्कारेन्द्रिययोरपि सामर्थ्यं स्यात्। तदसामर्थ्ये रूपादिपरमाणूनां समर्थत्वानुत्पादात्। यतश्च मनस्कारेन्द्रिययोः

[कु०] [59] [10]स्तब्धत्वनाश इति (कं. ४०.१९) स्तब्धत्वहेत्वोर्वातश्लेष्मणोरपगमेनेत्यर्थः।

आप इन्धनं यस्येति (कं. ४०.२१) [11]व्युत्पादनमिति शब्दप्रवृत्तिनिमित्तभूतजात्युपसङ्ग्राहकव्यावर्तकधर्मकथन-मित्यर्थः।

---

१ पचनस्वेदनादि—कि. दे. ता.। २ सौरं—दे। ३ रसादिभावेन परिणामसमर्थम्—कि.। ४ इन्द्रियं रूपव्यञ्जक-मिति—कं. १, कं. २। ५ ईदृशं—जे. १, जे. ३। ६ तेजसः कार्यं—जे. १, जे. ३। ७ पाठोऽयं—कं. १, कं २ पुस्तकयोर्नास्ति। ८ प्रतीति—अ, ब, क; ९ दर्शनस्पर्शभविषय—कं। १० स्तब्धत्वनाशनं—कं। ११ व्युत्पत्त्या—कं।

## न्यायकन्दली

स्यानुत्पत्तेः । काष्ठग्रहणमुपलक्षणार्थम्, तृणतुषादीनामपि कारणत्वात । [1]ऊर्ध्वज्वलनस्वभावकम्, ऊद्ध्वं ज्वलनं क्रियाविशेषः, तत्स्वभावकं तद्धर्मकम् । पचनस्वेदनादिसमर्थम्, पचनं पूर्वगुणविलक्षणं गुणान्तरोत्पादनम्, स्वेदनं स्तब्धत्वनाशनम्, आदिशब्दाद्विस्फोटादिजननलक्षणं दहनं तत्र समर्थमित्यर्थक्रियोपवर्णनम् । दिव्यमबिन्धनं सौरं विद्युदादिभवं तेजोऽबिन्धनम्, आप इन्धनं यस्येति व्युत्पत्त्या तत्सौरं विद्युदादि, आदिशब्दादुल्काया [2]अवबोधः । भुक्तस्याहारस्य रसादि[3]परिणामार्थमुदर्यम्, उदरे भवं तेजो भुक्तस्याहारस्य रसमलधातुभावेन परिणामप्रयोजनम् । आकरजञ्च सुवर्णादि । आकरः स्थानविशेषः, तस्मिन् सुवर्णरजतादि तैजसं द्रव्यं जायते । सुवर्णादीनां तैजसत्वे तावदागमः प्रमाणम् । न्यायश्चाभिहितः । कथं तर्हि गन्धरसयोरनुष्णाशीतस्पर्शस्य च [4]गुरुत्वस्य चोपलब्धिरत

[टि०] [5]अग्नेरपत्यं प्रथमं सुवर्णम्, भूर्वैष्णवी सूर्यसुताश्च गावः ॥–इत्यागमः । अत्र प्राथम्यं रजताद्यपेक्षया । [6]नन्वप त्यत्वमग्नेर्निमित्त[7]त्वेनापि काष्ठवत् कारणत्वेऽपि सम्भवतीति नेदं तैजसत्वे नियामकम् । सत्यम्, तज्जातीयताख्यापनार्थमपत्यशब्द[8]कीर्तनमन्यथा त्वग्नेः समुत्थमित्येव कुर्यात् । न्यायस्त्वक्षीयमाणद्रव[9]त्वादिति ।

प्रतीयमानेति–[10]रूपपरमाणुस्पर्शपरमाणव एव संहता प्रतिभान्ति न तु स्थिरं किमपि तदतिरिक्तं द्रव्यान्तरत्वमवयविसञ्ज्ञकमेकम् । न स्तम्भोऽयम् इति–विलक्षणं संस्थानं यस्य स विलक्षणसंस्थानाधारोऽवयविसञ्ज्ञकं द्रव्यान्तरं [11]प्रत्यक्षत एव संवेद्यत इति भावः । यदि तु रूपस्पर्शस्वभावमेव स्तम्भादि स्यात्, तर्हि न विलक्षणसंस्थानत्वेनोप[12]लभ्येत, रूपादिस्वभावस्य [13]कुम्भे स्तम्भे चाविशेषात् ।

[पं०] समर्थोत्पन्नत्वमापन्नम् । ततः प्रत्यक्षता व्यापद्यते इत्यर्थः । स नोऽवयवीति–स एकः स्थूलाकारो, नोऽस्माकमभिमतोऽवयवीत्यर्थः । क्वचिदेकः स्थूल इति = एकोऽवयवी । तस्येति–स्थूलावभासस्य । अनेकद्(द्र)ष्टृसाधारणत्वाभावप्रसंगाच्चेति–यो यः पश्यति सः सर्वस्थूलाकारमेव पश्यति । यदि तु विज्ञानस्यैव स्थूलाकारत्वं कल्प्यते न तु विषयस्य तदा स्थूलाकारः सर्वद्(द्र)ष्टृसाधारणो न स्यात् । विज्ञानस्यामूर्तत्वादित्यर्थः । सर्वदा भिन्नाकारेण प्रतिभासनादर्थक्रिया-

[कु०] न्यायश्चेति (कं. ४०.२५) आगमानुग्राहक इति शेषः ।

वासनाभेदादिति (कं. ४१.५) यदि स्तम्भादिप्रत्ययाः सत्या भवेयुः तदैतद्युक्तम्, ते एव त्वनादिमिथ्यावासनावशात् कल्पितविषया इत्यर्थः । नीलादिसंवित्तिभेदोऽपीति (कं. ४१.५) गुणेषु गुणिषि [नि]च नीव ? बुद्धिसाम्ये गुणानां वस्तुत्वं गुणिनः कल्पितत्वमिति विनिगमनाया न हेतुरित्यर्थः । नीलादिभेदकल्पनेति (कं. ४१.८) नीलादिभेदस्य परमार्थत्वमित्यर्थः । तथैव [14]बुद्धिकादाचित्कत्वान्यथानुपपत्त्या स्तम्भादिरपि परमार्थ एव सिद्ध्यतीत्यत आह

---

१ पाठोयं–कं. १, कं. २, पुस्तकयोर्नास्ति । २ अवरोधः–जे. १, जे. ३ । ३ परिणामः–सर्वरूपस्य रूपान्तराव्याप्तिः–टिप्पण जे. १ । ४ गुणस्योपलब्धिः–कं. १, कं. २, गुरुत्वस्य चोपलब्धेः–जे. १, जे. २ । ५ अग्नेपरत्वं –अ; ६ पत्यमग्ने–अ; ७ त्वनापि-अ, ब; ८ कीतमन्यथा–ड; ९ द्रव्यस्पाद् वत्वादिति–अ, ब, द्रव्यत्ववत्त्वादिति–क; १० रूपपरमाणव एव प्रतिभान्ति–अ, रूपपरमाणव एव संहता प्रतिभान्ति–ब, क, संहता एवेति सम्यक् भाति । ११ प्रत्यक्ष एव–ड; १२ लभ्यते–अ, ब; १३ स्तम्भकुम्भे–ड; १४ बुद्धिकारा–आदर्शपुस्तके ।

## न्यायकन्दली

आह–तत्रेति। भोगिनामदृष्टवशेन [1]भूयसां पार्थिवावयवानामुपष्टम्भादनुद्भूतरूपस्पर्शं पिण्डीभावयोग्यं सुवर्णादिकमारभ्यते, तत्र पार्थिवद्रव्यसमवेता इमे रसादयो गृह्यन्ते। इतिशब्दः [2]समाप्तौ।

अनुद्भूतरूपस्पर्शं सुवर्णादिकमिति न मृष्यामहे, प्रतीयमानरूपस्पर्शव्यतिरिक्तस्य द्रव्यान्तरस्याभावादिति चेन्न, स्तम्भोऽयं कुम्भोऽयमिति प्रत्येकविलक्षणसंस्थानसंवेदनाद्रूपादि[3]स्वभावस्य च सर्वत्राविशेषात्। वासनाभेदात् प्रतिसञ्चयं संवित्तिभेद इति चेत्? नीलादिसंवित्तिभेदोऽपि वासनाकृत एवास्तु नार्थो नीलादिभेदेन। असति बाह्यवस्तुनि स्वसन्तानमात्राधीनजन्मनो वासनापरिपाकस्य कादाचित्कत्वानुपपत्तेस्तन्मात्रहेतोर्नीलादिसंवेदनस्य कादाचित्कत्वासम्भवान्नीलादिभेदकल्पनेति चेत्? स्तम्भादिसंवित्तिभेदस्यापि बाह्यवस्त्वननुरोधिनो न कादाचित्कत्वमुपपद्यत इति रूपादिव्यतिरिक्तः प्रतिसञ्चयं वासनाविशेषप्रबोधहेतुर्विलक्षणः संस्थानविशेषः कल्पनीयः, येन दर्शनस्पर्शनाभ्यामेकार्थग्रहणमपि सिद्ध्यति। रूपादिमात्रे वस्तुन्यस्याप्यसम्भवः, तेषामेकैकेन्द्रियग्रहणनियमात्। अपि च, रूपादयः परमाणुस्वभावाः प्रत्येकमतीन्द्रियाः, तद्व्यतिरिक्तः सञ्चयो नास्तीति भवतां कोऽर्थो [4]दर्शनस्पर्शनविषयः? प्रत्येकमतीन्द्रिया अपि परमाणवो मनस्कारेन्द्रियादिषु

**[टि०]** तन्मात्र हेतोः इति–बाह्यनीलाभावे वासनापरिपाकमात्रहेतोर्नी[5]लादिज्ञानस्य बाह्यनीलाभावे न कादाचित्की व्युत्पत्तिः स्याद्, अतो नीलादिभेदाङ्गीकारः। **येन दर्शनेति** यदेवाहमद्राक्षं तदेवास्पार्श्वमित्येकार्थग्रहणं न स्यात् रूपस्पर्शपरमाणूनां भिन्नेन्द्रियग्राह्याणां परस्परं भिन्नत्वात्। **प्रत्येकमतीन्द्रिया** इति–[6]मनस्कारः पूर्व उपादानज्ञानलक्षणः। म[7]नस्कारेन्द्रियादयोऽपि समर्था उत्पन्नाः। पुञ्जात्पुञ्जोत्पत्तिन्यायेन रूपादिपरमाणवोऽपि तथोत्पन्नाः। ननु [8]तद्विषयज्ञानाकारः एव एकः स्थूलः सत्यो भविष्यतीत्याह–**न च विज्ञान** इति। **अनेकदृष्टेति**–यदेव स्थूलं मया दृष्टं तदेवानेनापीति प्रत्ययात् सर्वेषामपि चैकस्तम्भोऽयं स्थूल इति प्रत्ययात्साधारणत्वम्। **तस्माद्** इति। विषय एव [9]न तु

**[पं०] संपादनाच्चेति**–न हि ज्ञानं सर्वदैकाकारम्, नीलपीताद्याकारपरावर्त्तभाक्त्वात्। स्तंभादयस्त्वेकाकाराः। यथा देवार्थक्रियाकारितदेवपरमार्थसत् स्तंभाद्याकारज्ञानं च न गृहादिधारणाद्यर्थक्रियाक्षमम्, स्तंभादयस्तु तत्क्षमास्तस्माद्विज्ञानमेव स्थूलाकारं प्रतिभासत इति न मन्तव्यम्। किन्तु स्तंभाद्यवयव्यर्थो विषय(यी)भूतः स्वीकर्तव्य इत्यर्थः। **इत्यवयविसिद्धिरिति**–इति शब्दः प्रकारवचनः। यथा सर्वदा भिन्नाकारेण प्रतिभासनादर्थक्रियाकारित्वाच्चावयविसिद्धिः।

**[कु०]** [10]**प्रत्यक्षेणैव स्तम्भादिसंवित्तिभेदस्यापीति** (कं. ४१.८)। **वासनाविशेष[प्र]बोधहेतुरिति** (कं. ४१.१०) तु परमतानुसारेणोक्तम्। कादाचित्कबुद्धिविषयत्वेनेति तु तात्पर्यम् एव। **कल्पनीय** (कं. ४१.१०) इत्यत्रापि परमार्थत एवाङ्गीकर्तव्यमित्यर्थः। प्रत्यक्षैव[क्षमे]स्तम्भादीनां नीलादिसाम्यं प्रतिपाद्य तत्र विप्रतिपद्यमानं प्रत्यनुमानप्रदर्शनाय

---

१ भूयसां पार्थिवानां पार्थिवा°–कं. १, कं. २। २ परिसमाप्तौ–जे. १, जे. ३। ३ स्वभावस्य सर्वत्र°–कं. १, कं. २। ४ दर्शनस्य विषयः–जे. १, जे. ३। ५ नीलज्ञानस्य बाह्यनीलाभावे व्युत्पत्तिः स्यादतो–ड; ६, ७–नमस्कारः–ड; ८ तद्विषयः–ड; ९ न त्वज्ञानम्–क; १० प्रत्यक्षेणैव इति कं. पुस्तके नास्ति।

न्यायकन्दली

सत्सु समर्थोत्पन्ना ऐन्द्रियका भवन्तीति चेन्न, समर्थोत्पादेऽपि परमसूक्ष्मस्वरूपानतिवृत्तेः, समर्थोत्पत्तिमात्रेण च चाक्षुषत्वे मनस्कारेन्द्रिययोरपि प्रत्यक्षता स्यात्, अविशेषात् । अथ मतम्, प्रत्येकमस्थूला अपि परमाणवः केशसमूहवत्संहताः स्थूलावभासभाजो भवन्तश्चाक्षुषा जायन्ते, निरन्तरतया चैकत्वेनाध्यवसीयन्ते, इति चेत् ? किमेतेषु बहुषु तदानीमेकः स्थूलाकारो जायते ? किं वा केशेष्विवाविद्यमानः समारोप्य प्रतीयते ? [1]यदि च जायते स नोऽवयवीति । अथाविद्यमानः प्रतीयते, भ्रान्तिस्तर्हि । भ्रान्तिश्चाभ्रान्तिप्रति[2]योगिनीति । क्वचिदेकः स्थूलः सत्योऽभ्युपेयः । न च विज्ञाने तस्य सत्यता युक्ता, स्थूलमहमस्मीति प्रतीत्यनुदयादनेकद्रष्टृसाधारणत्वाभावप्रसङ्गाच्च । तस्माद्विषय एवायमेकः स्थूलः, सर्वदा भिन्नाकारेण प्रतिभासनादर्थक्रियासम्पादनाच्चेत्यवयविसिद्धिः ।

नन्वसति बाधके प्रतीतिसिद्धस्तथेति व्यवह्रियते, अवयविसद्भावे तु बाधकं प्रमाणमस्ति । तथा हि पाणौ कम्पवति तदाश्रितं [3]शरीरं न कम्पते, पादे वा कम्पमाने तद्गतं शरीरं न कम्पत इत्येकस्य विरुद्धधर्मताप्रसङ्गः । तदसङ्गतम्, पाणौ कम्पमाने शरीरकम्पावश्यम्भावनियमाभावात् । यदा पाणिमात्रं चालयितुं कारणं भवति तदा तन्मात्रं चलति न शरीरम्, कारणाभावात् । यदा तु शरीरस्यापि चलनकारणं [4]भवेत् तदा शरीरं चलत्येव । नास्याचलनमस्तीति कुतो विरोधः, यदि हस्तश्चलति न शरीरं तदाऽवयवावयविनो[5]र्युतसिद्धिः प्रसङ्गः ? नैवम्, पृथगाश्रयाश्रयित्वं युतसिद्धिः, न

[टि०] ज्ञानम् । **सर्वदा भिन्नेति**-ज्ञानं हि न सर्वदा एकाकारेण प्रतिभासेत न चार्थक्रियां कुर्यादिति । एतावता ग्रन्थेनावयविसद्भावे प्रत्यक्षमनुमानं च प्रमाणं सूचितम् । स्तम्भोऽयमेक इति प्रत्ययो यथार्थोऽबाधितत्वात् यथैकं ज्ञानमे[6]कः परमाणुरिति वा प्रत्ययः । अबाधित[7]त्वनसिद्धं दर्शयन्नाह **नन्वसति बाधक** इति । **एकस्य विरुद्धधर्मतेति**-वि[8]रुद्धधर्म-

[पं०] एवंप्रकारैरप्यनुमानैरवयवी साध्यत इत्यर्थः । तानि चानुमानानि स्तंभोऽयमेक इति प्रत्ययो येषा[म]र्थोऽबाधित्वात्, यथैकः परमाणुरिति प्रत्ययः तथाऽवयवीति पदं सार्थकम्, पदत्वात्, परमाणुपदवदित्यादीनि द्रष्टव्यानि । **इत्येकस्य विरुद्ध[धर्म]ताप्रसंग इति**-तथा च सति सुलभमनुमानमिदम्,--यद्विरुद्धधर्माध्यासितं तद्भेदवत्, यथा वह्निजले इत्यर्थः । **तन्मात्रमिति** =पाणिमात्रम् । परवाक्यं **यदि हस्तेत्यादि** । [9]**युतसिद्धिप्रसंग** इति भेदसिद्धिप्रसंगः । युक् अमिश्रणे धातुः ।

[कु०] न्यायसूत्रं पठति **येनेति** । (कं. ४१.१०) अयमत्र प्रयोगः स्तम्भादयो रूपादिभ्यो भिद्यन्ते दर्शनस्पर्शनाभ्यां प्रतिसन्धीयमानत्वात्; ये न भिद्यन्ते न ते प्रतिसन्धीयन्ते यथा रूपादय इति व्यतिरेकी हेतुः । प्रतिसन्धानं च भिन्नेन्द्रियजप्रत्ययोरेकविषयतावसायाः । अत्रानुकूलतर्कमाह **रूपादिमात्रे**[10]**चेति** (कं. ४१.११) ।

---

१ यदि जायते–जे. १; जे. ३ । २ °योगिनी क्वचिदेकः–कं. १; कं. २ । ३ शरीरं कम्पते पादे चाकम्पमाने–जे. १, जे. ३ । ४ स्यात्–जे. १, जे. ३ । ५ र्युतसिद्धिः–कं. १, कं. २ । ६ मेकपरमाणुरिति–अ, ब, क; ७ तत्वं सिद्धं–अ, क; ८ विरुद्धे–अ; ९ युतसिद्धिः–कं । १० 'च' कं पुस्तके नास्ति ।

## न्यायकन्दली

चलाचलत्वम्, द्रव्ये चलति गुणस्याचलनेऽपि तयोर्युतसिद्धचभावात् । पृथगाश्रयाश्रयित्वं चावयवावयविनोर्भिन्नत्वेऽपि नास्तीति न युतसिद्धता । यदप्यन्यद् बाधकमुक्तम्, एकावयवावरणे तत्समवेतस्यावयविनो न ग्रहणम्, अनावृतावयवग्रहणे च ग्रहणमित्येकस्य युगपद् ग्रहणमग्रहणञ्च [1]प्राप्नुत इति । तदप्यसारम्, एकावयवावरणेऽवयव्यावरणस्याभावात् । स ह्येकोऽनेकेषु [2]वाऽवयविषु वर्त्तमानः कतिपयावयवावरणेऽप्यनावृतेतरकतिपयावयवग्रहणेन गृह्यते, तस्य सर्वत्राभिन्नत्वात् । यत्तु बहुतरावयवग्रहणवत् स्थूलप्रतीतिर्न भवति, तद्भूयोऽवयवप्रचयग्रहणस्य परिमाणप्रकर्षप्रतीतिहेतोरभावात् । यत्र [3]तु भूयसामवयवानामावरणमल्पतरावयवग्रहणञ्च तत्रावयविनो न ग्रहणम्, यथा जलनिमग्नस्य शिरोमात्रदर्शनात् । एकस्मिन्नवयवे रक्ते तद्देशोऽवयवी रक्तोऽवयवान्तरे [4]चारक्ते न रक्त इत्येकस्य रक्तारक्तत्वप्रसङ्ग इत्यदूषणम्, अविरोधात् । रागद्रव्यसंयोगो रक्तत्वम्, अरक्तत्वञ्च तदभावः । उभयं [5]चैकस्य भवत्येव, संयोगस्याव्याप्यवृत्तिभावात् ।

[**टि०**] कत्वादेकत्वमवयविनो न स्यादिति भावः । यतो विरुद्धधर्माध्यस्तं [6]यत्तन्नाना यथा शीतोष्णे, विरुद्धधर्माध्यस्तश्च पराभ्युपगतोऽवयवीति प्रसङ्गसाधनमन्यथा आश्र[7]यासिद्धिः स्यात् । उत्तरं **पाणौ** इति पाणिगतशरीरस्यापि कम्पाभावादसिद्धो विरुद्धधर्माध्यास इति भावः । **यदि हस्त** इति–यदि हस्त एवाश्रितोऽवयवी स्यात्तदा हस्तचलने सो[8]ऽपि चलेद्, न तु चलति, तस्मादवयवी न हस्ते एव सिद्धः किन्तु पृथगन्यत्र सिद्धो मन्तव्यः । [9]**द्रव्ये चलति** इत्यादि स्वसिद्धान्ताभिप्रायेणोत्तरम् । **उभयं** [10]**चैकस्य** इति–संयोगस्याव्याप्यवृत्तित्वं तथा दर्शनाद[11]ङ्गीक्रियते ।

[**पं०**] **श्रीधरवाक्यं नैवमित्यादि** । **द्रव्ये चलति गुणस्याचलनेपीति**–गुणेषु कर्मणोऽभावात् । चलनं च कर्म । **तस्येति**=अवयविनः । **बहुतरावयवग्रहणवदिति**–बहुतरावयवग्रहणे इव बहुतरावयवग्रहणवत् । सप्तम्यां वति प्रत्ययः । **उभयं चै[12]कस्य भवत्येवेति**–एकस्याप्रत्ययिनः । **अव्याप्य[13]वृत्तित्वादिति**=एकदेशवृत्तित्वादिति ।

[**कु०**] ननु प्रत्येकमेकैकेन्द्रियग्राह्याणामपि संघातसंहन्यमाना[न]द्वाराऽनेकेन्द्रियग्राह्यताऽपि भविष्यतीत्यत आह **अपि च रूपादय** इति (कं. ४१.१२) । [14]**व्यतिरिक्तश्चेति** (कं. ४१.१३) व्यतिरिक्तस्याङ्गीकारगुणित एव सञ्ज्ञाभेदमात्रं स्यादिति भावः । इह समर्थोत्पत्तिः स्थूलरूपोत्पत्तिर्वा अर्थक्रियाकारिमात्रोत्पत्तिर्वा नाद्य इत्याह **स[म]र्थोत्पादेऽपीति** (कं. ४१.१५) । अनुवृत्तावपसिद्धान्त इति भावः । न द्वितीय इत्याह–**समर्थोत्पत्तिमात्रेण चेति** (कं. ४१.१५) । **स मोऽवयवीति** (कं. ४१.२०) सोऽपि भवतामनभिमत इति भावः । **न च विज्ञान** इति (क. ४१.२१) बाह्यो हि स्थूलो निषिध्यते तस्माभि (तस्यापि) ज्ञानाकारस्तु काममस्तीत्यभिप्रायः । [15]**लौकि[क]मर्यादमेति[येति]** बाह्यस्वदर्शनश्रद्धया । स्थूलमहमस्मीति प्रत्यय उ[त्प]द्ये[ते]त्येवेति तं प्रत्याह **अनेके[ति]** (कं. ४१.२२) । एवं गुणिसाधनप्रसङ्गादवगतमवयविनं स्थिरं च प्रतीतिबलाद् बाधकाभावाच्चोपसंहरति **तस्मादिति** (कं. ४१.२३) ।

---

१ प्राप्नोतीति–जे. १, जे. ३ । २ 'वा' इति–जे. १, जे. ३, पुस्तकयोर्नास्ति । ३ 'तु'–जे. १, जे. ३, पुस्तकयोर्नास्ति । ४ चारक्त इत्येकस्य–कं. १, कं. ३ । ५ चैकत्र–कं. १, कं. २ । ६ ह्यस्तं तन्नाना–ड; ७ आश्रयो–ड; ८ मोप–अ, ब; ९ द्रव्यं–अ; १० चैकत्र मु, चैकस्य–जे १, जे. ३; ११ दङ्गीक्रियते–ड; १२ चैकत्र–कं । १३ वृत्तिभावात्–कं. । १४ व्यतिरिक्तः–कं. । १५ प्रतीकमिदं कं. पुस्तके नास्ति ।

## न्यायकन्दली

[60] **इदमपरं बाधकम्, अवयविनः प्रत्यवयवमेकदेशेन वृत्तिः कार्त्स्न्येन वा? प्रकारान्तराभावात्। न तावदेकदेशेन वृत्तिरवयवव्यतिरेकेणास्यैकदेशाभावात्। कार्त्स्न्येन वृत्तौ [1]वाऽवयवान्तरे वृत्त्यभावः, एकावयवसंसर्गावच्छिन्ने स्वरूपेऽवयवान्तराणामनवकाशात्, तत्स्वरूपव्यतिरेकेण चास्य स्वरूपान्तराभावात्। अत्रापि निरूप्यते–यद् वर्त्तते तदेकदेशेन [2]वर्त्तते कार्त्स्न्येन वेति? किमिदं स्वसिद्धमभिधीयते परसिद्धं वा? स्वयं तावत् कस्यचित् [3]क्वचिद् वृत्तिरसिद्धा शाक्यानाम्, परस्यापि नैकदेशकार्त्स्न्याभ्यां वृत्तिः सिद्धा, तयोरवृत्तित्वात्, वृत्तिं प्रत्यकारणत्वाच्च।**

**यद् वर्त्तते तत् स्वरूपेणाश्रयाश्रितभावलक्षणया वृत्त्या वर्त्तते। न चैकस्यानेकसंसर्गो विरुद्ध्यते। दृष्टो हि चित्रज्ञाने नीलाकारावच्छिन्ने पीताद्याकारसंसर्गः। न च तस्य**

[टि॰] [60] **इदमपरमिति**–यत्सत्तत्सवृत्तिकं [4]यथा परमाणुरूपम्। अवयविनस्तु वृत्तिर्नोपपद्यते इति भावः। **अवयवव्यतिरेकेण** इति–यद्यवयवव्यतिरेकेणान्ये[5]देशास्युस्तदा तेष्वप्येकदेशेने समुदायेन वा वृत्तिरिति तदवस्थम्। **परस्यापि नैकेति**–एकदेशकार्त्स्न्याभ्यां कृत्वा [6]वृत्तिस्तयोः स्वयं वृत्तिरूपत्वे सति सम्भवति, यथा द्रव्ये रूपं समवायवृत्त्या वर्तते इति समवाय एव तत्र स्वयं वृत्तिरूपः, वृत्तिं प्रति कारणत्वेन वा। तत्र पक्षद्वयेऽपि दूष[7]णमाह **तयोरवृत्तित्वाद्** इत्यादि। अकारणत्वं वृत्तेः समवायलक्षणाया नित्यत्वात्। [8]**यथैकावयवावच्छिन्न** इति–यथा ज्ञाने तत्रापीत्यर्थः अवच्छिन्ने

[पं॰] [60] परः प्राह **इदमपरमित्यादि**। **अस्यैकदेशाभावादिति**–स्वयं निरंशत्वादवयविनः। **एकावयवसंसर्गावच्छिन्ने इति**–एकावयवसंसर्गपरिसमाप्ते स्वरूपे इति–अवयविनः संबन्धिनि। श्रीधरः प्राह–**अत्रापि निरूप्यत इत्यादि**। **परस्यापीति** = **वैशेषिकस्य**। **अवृत्तित्वादिति**–असमवायत्वात्। **आश्रयाश्रितभावलक्षणया वृत्त्येति**–अवयवेष्वाश्रयभूतेषु अवयवी आश्रित इत्येषा आश्रयाश्रितभावलक्षणावृत्तिः। **न च तस्य प्रत्याकारभेद इति** तस्य चित्रज्ञानं भेदस्य प्रत्याकारं

[कु॰] अवयविनि प्रसङ्गागते[तं] बाधकमाशङ्कते **नन्विति** (कं. ४१.२४)। परिहरति **तदिति** (कं. ४१.२७)। **न चलाचलत्वमिति** (कं. ४२.४) साधि[ता] हि नित्यानां युतसिद्धिरिति भावः। **भिन्नत्वेऽपीति** (कं. ४२.६) पदं तादात्म्यनिरासाय। **कतिपयावयवग्रहणेन गृह्यत** इति (कं. ४२.१०) इतरथा अर्वाग्भागेन मध्यपरभागयोः सर्वदावरणादवयविनो न ग्रहणं स्यादिति भावः। तत्किं द्वित्राणामवयवानां ग्रहणेऽवयवी गृह्यते नेत्याह **यत्रेति** (कं. ४२.१२)। अ[श] सङ्ख्यानियमो न शक्यते किन्तु कार्यमेव प्रमाणमिति भावः।

[60] अव्याप्यवृत्तित्वाद्युगपदेकत्र भावाभाववत्त्वादिति भावः। **अवयवव्यतिरेकेणेति** (कं. ४२ १८) भावे वा तेषामेव वृत्तिर्वाऽवयविन इति भावः। **स्वरूपान्तराभावादिति** (कं. ४२.२०) भावे वाहवः। **स्वयं तावदिति**

---

१ चावयवान्तरे–जे. १, जे. ३। २ वा वर्तते–जे. १, जे. ३। ३ कुत्रचिद्–जे. १, जे. ३। ४ यथारूप–ड; ५ न्यदेशस्तस्य स्यात्तदा–अ, ब; ६ दस्ति तयोः–ड; ७ दूषणे प्राह–अ, ब; ८ तथैका–अ, ब, ड;

## न्यायकन्दली

*प्रत्याकारं भेदः, एकस्यानेकाकारग्रहणानुपपत्तौ भवतां चित्र[1]प्रतीत्यभावप्रसङ्गात् ।* [2]नापि विज्ञानैकत्वादाकाराणामप्येकत्वम्, चित्रानुभवविरोधात् । [3]यथैकावयवावच्छिन्ने एकावयविस्वभावेऽवयवान्तरसमावेशः प्रत्यक्षेणानेकावयवसम्बद्धस्य, [4]तथैकस्य स्थूलात्मनः संवेदनादेकस्मिन्ननेकसंसर्गो दृष्टो नैकस्यानेकेषु संसर्ग इति च वैधर्म्यमात्रम्, एकस्यानेकसंसर्गविच्छेदस्योभयत्राविशेषात् । [5]एवं च यदेकं तदेकत्रैव वर्त्तते, यथैकं रूपमेकश्चावयवीति, तथा यदनेकवृत्ति तदनेकम्, यथानेक[6]भाजनगतानि तालफलान्यनेकवृत्तिश्चावयवीति प्रसङ्गद्वयं [7]प्रत्याख्यातम्, स्वतः परतश्च व्याप्त्यसिद्धेः, स्वतस्तावदेकं विज्ञानमनेकेषु विषयेन्द्रियमनस्कारेषु स्वरूपाभेदेन तदुत्पत्त्या वर्त्तते, परस्याप्येकं सूत्रमभेदेनानेकेषु मणिषु संयोगवृत्त्या वर्त्तते, तथाऽवयव्यवयवेषु समवायवृत्त्या वर्त्तिष्यते नाना च न भविष्यति । सर्वश्चायं प्रसङ्गहेतुराश्रयं निघ्नन्नात्मानम[8]पि हन्ति, अवयव्यभावे परमाणुमात्रे जगति धर्म्मधर्म्मिदृष्टान्तादिप्रतीत्यसिद्धौ निराश्रयस्य वृत्त्यभावात् । अतो नानेन प्रत्यक्षसिद्धोऽवयवी शक्यो निराकर्त्तुम्, प्रत्यक्षसापेक्षस्य तस्य ततो

**[टि०]** सम्बद्धं ज्ञानावयविनोः सादृश्यं नास्तीति प्राह **एकस्मि[9]न्नेकेति**–ज्ञाने हि एकत्राधारे बहून्याधेयानि अवयवीत्वेकमाधेयं [10]बहुत्वाधारेषु वर्तते इति भावः । **एकस्य** इति–ज्ञानेऽवयविनि चैकस्य सतोऽनेकसंसर्गविच्छेदः स तुल्य एवेति । **स्वतस्तावद्** इति–म[11]नस्कारः पूर्वज्ञानक्षणः स उपादानतया, विषयेन्द्रिये तु निमित्ततया ज्ञानकारणमिति तैरनेकैः सह तदुपपत्तिसम्बन्धरूपा वृत्तिरेकस्यैव ज्ञानक्षणस्यास्ति ।

**[पं०]** भेदो भवन्मते खलु नाभ्युपगम्यते इत्यर्थः । **तथेति**–नापीत्यनुवृत्तिस्तथाशब्दस्यार्थः । **एकावयवावच्छिन्ने इति** एकावयवस्वीकृते । **अवयवान्तरसमावेश इति**–अवयवान्तरेण सह समावेश इति समासः । **एकावयवच्छिन्ने एका(का)वयविस्वभावेऽवयवान्तरसमावेश इति**–परोक्तस्यानुवाद एषः । एकस्मिन्निति = ज्ञाने । **अनेकसंसर्ग इति**–अनेकेषां नीलाद्याकाराणां संसर्गः । अनेकसमावेश इति पाठान्तरम् । अर्थः = समान एवानेकस्यानेकेषु संसर्ग इति । अत्र एकस्येति कोऽर्थः ? अवयविनः । **अनेकेष्विति** कोऽर्थः ? = अवयवेषु । **इति च वैधर्म्यमात्रमिति**–इह चतुर्विशति

**[कु०]** (कं. ४२.२२) सिद्धौ वृत्तिमनस्थायित्वापत्ताविति भावः । **तत्स्वरूपेणेति** (कं. ४२.२३) एकदेशवृत्तिविकल्पः । एकस्थानेकत्रवृत्तिधर्मिणं बाधते इति कर्तव्य इति भावः । **चित्रप्रतीत्यभावप्रसङ्गादिति** (कं. ४२.२६) अस्माभिरिव चित्रस्यानङ्गीकारात् । प्रत्ययस्य चानङ्गीकारे चित्रव्यवहारविलोपप्रसङ्गादिति भावः । **नापीति** (कं. ४३ १) आकाराकारिणोरभेदादिति भावः । **चित्रानुभवविरोधादिति** (कं. ४३.१) अनेकाकारवादकर्म ।

---

१ प्रत्ययाभाव – कं. १, कं. २ । २ नापि ज्ञानैकत्वाद्–कं. १, कं. २ । ३ तथा–जे. १, जे. ३ । ४ तस्यैकस्य –जे. १, जे. ३ । ५ एवं यदेकं–कं. १, कं. २ । ६ भाजनगतताल°–कं. १, कं. २ । ७ प्रत्याख्येयम्–जे. १, जे. ३। ८ उपहन्ति – जे. १, जे. २ । ९ न्नेके इति – अ, ब; १० बहुत्वाधारेषु – अ, ब; ११ स्कारपूर्व – अ, ब;

## न्यायकन्दली

दुर्बलत्वात् । भ्रान्तं प्रत्यक्षमिति चेत् ? कुत एतत् ? [1]बाधकेन तदर्थस्यापाकरणादिति चेत्, प्रत्यक्षस्य भ्रान्तत्वे बाधकस्य प्रमाणत्वं बाधकप्रामाण्ये च प्रत्यक्षस्य भ्रान्तत्वमित्यन्यो[2]न्यापेक्षत्वम् । प्रत्यक्षे तु नायं न्यायः, तस्यानपेक्षत्वात् । न चार्थक्रियासंवादिसर्वलोकसिद्धं स्पष्टप्रतिभासं भ्रान्तमिति युक्तम्, नीलादिप्रत्यक्षस्यापि भ्रान्तत्वप्रसङ्गादिति बाधकोद्धारः । परमाणवोऽव[3]यविसद्भावानुमेया अपि सन्तो व्यवहर्त्तव्याः ।

[4]षट्केन युगपद्योग एकस्य परमाणोः षडंशत्वमापादयन् परमाणुसद्भावं बाधत इति चेत् ? कोऽयं युगपद्योगो नाम ? किमेकस्य परमाणोः षड्भिः परमाणुभिः सह युगपदुत्पादः ? किं वा युगपत्संयोगः ? युगपदुत्पादस्तावत् कारण[5]यौगपद्याधीनो

[टि०] प्रत्यक्षेति–तस्य प्रसङ्ग[6]साधनद्वयस्य, [7]ततः प्रत्यक्षात् । [8]ननु भवत्पक्षेऽपि प्रसङ्गसाधनस्य दौर्बल्ये प्रत्यक्षस्य भ्रान्तत्वं, तदभ्रान्तत्वे च प्रसङ्गसाधन[9]स्य दौर्बल्यमित्यन्योन्याश्रयः समान इत्याह–**प्रत्यक्षे तु** इति । अवयविनस्तावत्प्रत्यक्षेण सिद्धिः, परमाणूनां त्वप्रत्यक्षत्वादसत्त्वं स्यादत आह–**परमाणवः** इति ॥तेजः॥

[पं०] जातिदोषा इति नाम्ना प्रसिद्धानि दूषणाभासानि–तेष्वेकं वैधर्म्यं नाम । तच्चैवम्–स नित्यः शब्दः, कृतकत्वात्, घटवदित्यत्र प्रयोगे कश्चिदाह नित्यः शब्दः, निरवयवत्वात्, अनित्यं हि सावयवं दृष्टम्, घटादीति । न चास्ति विशेषहेतुर्घटसाधर्म्यात् । कृतकत्वादनित्यः शब्दः, न पुनस्तद्वैधर्म्यान्निरवयवत्वान्नित्य इति । एतच्च वैधर्म्योद्भावनं दूषणाभासमात्रम् न सम्यक् दूषणम् । कृतकत्वस्य सम्यग्हेतोः, साध्यसाधनक्षमत्वात् । तथाऽन्वयापि यदुक्तं तद्वैधर्माख्यजातिदोषमात्रमित्यर्थः । अत्रैवार्थे हेतुमाह–**एकस्यानेकसंसर्गाविच्छेदस्योभयत्राविशेषादिति** ।

**अतो नानेनेत्यादि** = अनेन प्रसंगद्वयेन । **तस्येति** – प्रसंगद्वयस्य । ततः प्रतिप्रत्यक्षात् । [10]**तदर्थस्येति**–तस्य प्रत्यक्षस्यार्थो विषयोऽवयवी, तदर्थः । तस्य = तदर्थस्य । [11]**अपनयादिति** = अपाकरणात् । **क्वचित्तु–अपाकरणादिति** पाठः । स च सुगमतमः । **तस्यानपेक्षत्वादिति** तस्य प्रत्यक्षस्यानपेक्षत्वात् । कोऽर्थः ? प्रत्यक्षमनपेक्षम् । बाधकप्रमाणं तु सापेक्षम् । प्रत्यक्षस्य भ्रान्तत्वे सति तद्भावात् । इत्यर्थः । **सन्तः** इति विद्यमानाः । **षट्केनेति** = परमाणुषट्केन ।

[कु०] निरपेक्षस्यापि शुक्तिकादौ रजतादिज्ञानस्य भ्रान्तित्वदर्शनादित्यत आह **न चार्थक्रियेति** (कं. ४३.१५) । प्रसङ्गात्परमाणुबाधमुद्धर्तुं प्रस्तौति **परमाणव इति** (कं. ४३.१७) । अपि शब्दः परमाणव इत्यस्यानन्तरं द्रष्टव्यः । अस्यापेक्षया अंशानामणुत्वादंशिनि न परिमाणापकर्षविश्रान्तिरित्यर्थः । **न तत्प्रतिक्षेप इति** (कं. ४३.२५) संयोगस्याव्याप्यवृत्तित्ववाचोयुक्तिस्तु एकस्यैकदा भाववत्तया न त्वंशाधिकरणतया । प्रसङ्गश्चायं परमाणुसिद्धौ धर्मिग्राहकप्रमाणबाधितत्वादसिद्धावाश्रयासिद्धतयानवसरस्तुच्छ इति भावः ।

१ बाधकेनापाकरणात्–कं. १, कं. २ । २ न्यापेक्षित्वम्–कं. १, कं. २ । ३ वयव्यनुमेया–कं. १, कं. २ । ४ षट्केन युगपद्योगात् परमाणोः षडंशता । षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः कं. २ टिप्पण–विज्ञप्तिमात्रतासिद्धिः । ५ यौगपद्यादेव–कं. १, कं. २ । ६ साधनस्य–ड; ७ 'ततः पक्षात् न तु भवत्पक्षात्' इत्यधिकः–अ, ब, क; ८ मनु–ड; ९ स्यादौर्बल्य–अ; १०–११ इमौ पाठो कं. पुस्तके न स्तः ।

प्रशस्तपादभाष्यम्

[61] वायुत्वाभिसम्बन्धाद्वायुः । [1]स्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व-[2]संस्कारवान् ।

न्यायकन्दली

निरंशस्यापि यदि भवेत् को विरोधः, अथ युगपत्संयोगः, सोऽपि नानुपपन्नः, न ह्यंशविषयः संयोगो द्रव्याणाम्, निरंशस्याप्याकाशस्य [3]तत् सद्भावात्, अंशस्याप्यंशान्तरसद्भावे परमाणुमात्रे संयोगस्थितौ तस्याप्रत्यक्षत्वप्रसङ्गाच्च, किन्तु स्वरूपविषयः । एवञ्चेत्, सांशद्रव्यस्येव निरंशस्यापि परमाणोरेकस्य युगपत्कारणसम्भवे सत्यनेकसंयोगाधि-करणत्वमुपपद्यत एवेति न तत्प्रतिक्षेपः ।

[61] प्रत्यक्षं पृथिव्यादित्रयं व्याख्यायाप्रत्यक्षद्रव्यव्याख्यानावसरे नित्यानित्योभय-स्वभावद्रव्यनिरूपणस्य प्रकृतत्वाद्वायुं व्याचष्टे–वायुत्वाभिसम्बन्धाद्वायुरिति । व्याख्यानं पूर्ववत् । तस्य गुणान् कथयति–स्पर्शेत्यादि अत्रापि पूर्ववद् व्याख्या ।

यादृशः स्पर्शोवायौ वर्त्तते तं दर्शयति–स्पर्श इति । पृथिवीस्पर्शः पाकजः परमाणुषु, तत्पूर्वकश्च [4]स्वकार्य्येषु । [5]अस्य वायो स्पर्शोऽपाकज इत्यतो वैधर्म्यम् । अपाकजत्वञ्चास्य पृथिव्यनधिकरणत्वादुदकतेजःस्पर्शवत् । अनुष्णाशीतत्वे सतीत्युदक-

[टि०] (॥अथ वायुनिरूपणम्॥)

[61] अथानन्तरं वाय्वभिधाने कारणमाह प्रत्यक्षमिति–अप्रत्यक्षत्वं बाह्येन्द्रियापेक्षयाऽत्र द्(द्र)ष्टव्यम्, आत्मनोऽन्तःकरणप्रत्यक्षत्वात् । अत्रापि इति–व्याख्या द्वन्द्वानन्तरं मतुप् प्रत्ययादिका । अपाकजत्वं च इति–अत्र वायुस्पर्शः

[पं०] पूर्वपश्चिमदक्षिणोत्तरोर्ध्वाधोलक्षणदिक्षट्कलग्नेनेति द्रष्टव्यम् । यदि भवेदिति–न भवत्येव तावन्नित्यत्वात् । को विरोध इति? परमाणूनां नित्यत्वेनोत्पादाभावादभ्युपगममात्रमेव तन्ननु वाचिकोभ्युपगमः । न ह्यंशविषय इति न ह्यंशापेक्षः । अंशस्यापीति = घटादिद्रव्यांशस्यापि । तस्येति = संयोगस्य । अप्रत्यक्षत्वप्रसंगाच्चेति प्रत्यक्षत्वसुसंयोगः । किन्तु स्वरूपविषय इति संयोग इति पूर्वस्मादनुवर्तते । किन्तु [6]स्वरूपविशेषसंयोग इति को भावः? स्वरूपविषयत्वं च संयोगस्य परमाणुष्वस्तीति भावः ॥ इति तेजः ॥३॥

[61] वायौ संस्कारो दर्शितः इति–संस्कारो वेगाख्यः । पश्चादयमिति प्रत्यक्षवत्परामृश्यते इति अन्यथा

[कु०] [61] प्रत्यक्षशरीरारम्भकतया पृथिव्याः सर्वस्य उर्षे प्रत्यक्षगुणाधिकतया वाप्यां द्वितीयत्वे स्वयं प्रत्यक्षतया तेजसस्तृतीयत्वे च क्रमकारणे प्रसिद्धवा[यो]श्चतुर्थत्वे कारणमाह प्रत्यक्षमिति (कं. ४४.१३) ।

१ तस्य गुणाः–ता । २ संस्कारास्तद्वान्–ता । ३ तद् भावात्–कं. १, कं. २ । ४ स्वकार्येषु–जे. १, जे. ३ । ५ अस्य तु–कं. १, कं. २ । ६ स्वरूपविषय–कं. ।

### प्रशस्तपादभाष्यम्

स्पर्शोऽस्यानुष्णाशीतत्वे सत्यपाकजः, गुणविनिवेशात्सि[1]द्धः। अरूपिष्वचाक्षुषवचनात् सप्तसङ्ख्यादयः। तृणकर्मवचनात् संस्कारः।

स चायं द्विविधोऽणुकार्य्यभावात्।

तत्र कार्य्यलक्षणश्चतुर्विधः, शरीरमिन्द्रियं विषयः प्राण इति।

### न्यायकन्दली

तेजःस्पर्शाभ्यां वैधर्म्यमुक्तम्। अयञ्च द्वितीयाध्यायात्–"वायुः स्पर्शवान्" (२-१-४ वै. सू.) इति सूत्रेण वायौ सिद्ध इत्याह–गुणविनिवेशादिति। अरूपिष्वचाक्षुषवचनात् सप्त सङ्ख्यादयः। रूपरहितेषु द्रव्येषु सङ्ख्यादयश्चाक्षुषा न भवन्तीत्यभिधानादरूपिषु सङ्ख्यादीनां सद्भावः कथितः, अन्यथा तद्वर्त्तिनां तेषामप्रत्यक्षत्वाभिधानमसम्बद्धं स्यात्। तृणकर्मवचनात् संस्कार इति। "तृणे कर्म [2]वायुसंयोगात्" (५-१-१४ वै. सू.) इति वचनाद् वायौ संस्कारो दर्शितः, वेगरहितद्रव्यसंयोगस्य कर्महेतुत्वानुपलम्भात्। तस्य भेदनिरूपणार्थमाह–स चायमिति। स चेति स्मृत्युत्थापितो बुद्धिसन्निहितः पश्चादयमिति प्रत्यक्षवत् परामृश्यते। न केवलं पृथिव्यादयो द्विविधाः, अयमपि द्विविध इति चार्थः। कार्य्य[3]लक्षणश्चतुर्विधः कार्य्यस्वभाव इत्यर्थः। चातुर्विध्यं कथमित्यत आह–शरीरमिन्द्रियं विषयः प्राण इति। तेषां मध्ये शरीरं जात्या निर्द्धारयति–

[टि०] पाकजोऽनुष्णाशीतत्वात् पृथिवीस्पर्शवदित्येतेन न सत्प्रतिपक्षता, [4]पाकजस्पर्शस्य पाकजोद्भूतरूपसाहचर्योपलम्भात्। **स चायम्** इति–नन्विदं प्रत्यक्षकृतं रूपं तत्कथं [5]वायावप्रत्यक्षेऽयमिति निर्देश [6]इत्याह **स च** इति। [7]प्रत्यक्षेऽपि हि तावत् बुद्धिसन्निहितत्वात्तथा व्यपदेश इति भावः। **तेषां मध्ये** इति–निर्धारणं हि जातिगुणक्रियाभिर्भवतीत्यत्र जात्या कल्पितयैव निर्धारणं [8]न तु वास्तव्या पृथिवीत्वेन परा[9]परभावाभावात्। **इन्द्रियम्** इति–सर्वशब्दो नात्र समुचित-

[पं०] वायोरप्रत्यक्षत्वादिदंतया परामर्शो नियुक्त इति भावः। एकीयमतमाह **त्वचा सर्वेन्द्रियाधिष्ठानानीत्यादिना** तस्या इति वचः। **विषयव्यवस्थापनादिति** तत्तदधिष्ठानभेदेन त्वच एव शक्तिभेदं योऽभ्युपगच्छति। नत्विन्द्रियभेदं

[कु०] **तस्य गुणानिति** (कं. ४४.२१) वायुत्वव्यवस्थापकानिति शेषः। व्यवस्थापकत्वं च स्पर्शस्यानुष्णाशीतत्वे सत्यपाकजत्वात् सङ्ख्यादीनां तत्साहचर्याच्च द्रष्टव्यमिति। **अत्रापीति** (कं. ४४.२१)। **अनुष्णाशीतत्वे सतीति** (कं. ४५.३) इदं च प्रत्यक्षसिद्धमित्यर्थः। **असम्बद्धं स्यादिति** (कं. ४५.७) अत्यन्तासतां निषेधस्याप्यनधिकरणादितिभावः। प्रमाणं च 'वायुः सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागवान् द्रव्यत्वात् पृथिवीवत्' स परापरत्ववान् मूर्त्तत्वात् पृथिवीवदिति द्रष्टव्यम्।

---

१ सिद्धेः–कि., ताः। २ 'वायुसंयोगात्'–इति सर्वत्र सूत्रपाठः। ३ लक्षणः कार्यस्वभाव–जे. १, जे. ३। ४ पाकस्पर्शस्य–अ, ब; ५ वायावत्–अ, ब; ६ इत्या स, च–अ, ब; ७ प्रत्यक्षे हि–ड; ८ भवतु–अ, ब, क; ९ परापरभावात्–अ, ब;

प्रशस्तपादभाष्यम्

तत्रायोनिजमेव शरीरं मरुतां लोके, पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम् । इन्द्रियं सर्वप्राणिनां स्पर्शोपलम्भकम्, पृथिव्याद्यनभिभूतैर्वाय्ववयवैरारब्धं [1]सर्वशरीरव्यापि त्वगिन्द्रियम् ।

न्यायकन्दली

तत्र शरीरमिति । अयोनिजमेव न तु पार्थिवशरीरवद् योनिजमयो[2]निजमपि भवतीत्यर्थः । मरुतां लोक इति स्थानसङ्कीर्त्तनम् । भूयसां [3]पार्थिवावयवानां निमित्तकारणभूतानामुपष्टम्भात् संयोगविशेषात् स्थिरं संहतस्वभावमुत्पन्नं पार्थिवशरीरवदुपभोगसमर्थम् ।

इन्द्रियं सर्वप्राणिनां स्पर्शोपलम्भकमिति । यत् सर्वप्राणिनां स्पर्शोपलम्भकमिन्द्रियं तत् पृथिव्याद्यनभिभूतैरप्रतिहतसामर्थ्यैर्वाय्ववयवैरारब्धम्, अतो विशिष्टो[4]त्वादादिन्द्रियं स्यादित्यर्थः । तस्य सद्भावे तावत् स्पर्शोपलब्धिरेव प्रमाणम् । वायवीयत्वञ्चा[5]स्य रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वादङ्गसङ्गिसलिलशैत्याभिव्यञ्जकसमीरणवत् । तच्च सर्वशरीरव्यापि, सर्वत्र तत्कार्य्यस्य स्पर्शोपलम्भस्य भावात् । त्वगिन्द्रियमिति समाख्या त्वचि स्थितमिन्द्रियं त्वगिन्द्रियमित्युच्यते, तत्स्थे तदुपचारात्, त्वचा

[टि०] वृत्तिः, एकेन्द्रियाणामपि त्वगिन्द्रियसद्भावात् । तत्स्थे इति–उपचारात्त्वक्शब्देनैवेन्द्रियमुच्यते अन्यथा[6]ऽस्य [7]रसनघ्राणचक्षुस्त्वक्श्रोत्राणीन्द्रियाणीत्यत्र त्वक्शब्देन केवलेनैवेन्द्रियाभिधानं न स्यात्, अतस्त्वगिन्द्रियं त्वगिन्द्रियमिति [8]समासे त्वचि स्थितमि[9]त्युप(चारप्रद)र्शनार्थमर्थकथनम्, अन्यथा "[10]त्वचि इन्द्रियं त्वगिन्द्रियमि"ति सप्तमीसमासमेव कुर्यादिति । त्वक्शब्दस्य यद्यपि शरीरावगुण्ठनचर्मरूपे मुख्यतो वृत्तिः, तथाप्यत्रोपलक्षणव्याख्यानाद् अन्तर्बहिश्च सकलेऽपि शरीरे मन्तव्या, उष्णजलादिपाने मध्येऽप्युष्णादिस्पर्शसंवेदनात् ।

[पं०] योऽभ्युपगच्छति । तेनापि विषयव्यवस्थाकृतैव तावत्सोऽपि हि त्वच एव द्रष्टृत्वं स्प्रष्टृत्वं श्रोतृत्वं घ्रातृत्व रसयितृत्वं तत्तदधिष्ठानभेदेन मन्यते । तस्माच्चक्षुःस्पर्शनश्रवणघ्राणरसनाख्यानि पञ्चेन्द्रियाणि पृथक् पृथक् स्वविषयपरिच्छेदनप्रत्यला(या)नि तेनापि युक्त्या अंगीकृतान्येवेति भावार्थः ।

[कु०] वेगरहितेति (कं. ४५.८) नोदनाख्यो हि संयोगः कर्म्महेतुः.स च स्पर्शहेतुभ्यां विना नोपपद्यत इति भावः । ([12]ननु त्वगिति शरीरस्य) स च रूपिद्रव्यसंयोगान्तरेणापि तृणकर्मानुमेयः, अप्रत्यक्षस्य कथमिदन्तया प्रत्यवमर्श इत्यत आह स इति (कं. ४५.९) । प्रत्यक्षवदिति (कं. ४५.१०) प्रलापादार्थ्यावापेक्षायामिति ?

सर्वत्र तत्कार्यस्येति (कं. ४५.२१) केशनखलोमदन्तानां शरीरसंयोगिता न शरीरावयवत्वमिति भावः । ननु त्वगिति शरीरस्य सहजमावरणं पार्थिवद्रव्यमुच्यते तत्कथं वायवीयमित्यत आह त्वचि स्थितमिति (कं. ४५.२२) । लौकिकत्वाच्च नोपचारप्रयोजकं श्रद्धेयं तदधिष्ठाने चक्षुरुपघाते तच्छक्तिवैकल्यादन्धादीनां रूपाद्यनुपलब्धिरिति भावः ।

१ सर्वव्यापि–दे. । २ मपीत्यर्थः–कं. १, कं. २ । ३ पार्थिवानां–जे. १, जे. ३ । ४ त्वादनात्–जे. १, जे. ३ । ५ च रूपादिषु–जे. १, जे. ३ । ६ अन्यथा स्पर्शनं–ड; ७ स्पर्शन इति सर्वत्राधिकं न्यस्तम् । ८ समासः–ड; ९ त्युपचारः–अ, ब, क; १० त्वचिन्द्रिय–अ, ब; ११ मपि–अ, ब; १२ अत्र लेखकदोषादधिकं भाति–सं ।

प्रशस्तपादभाष्यम्

[62] **विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः स्पर्शशब्दधृतिकम्पलिङ्गस्तिर्यग्गमनस्वभावो मेघादिप्रेरणधारणादिसमर्थः ।**

न्यायकन्दली

**सर्वेन्द्रियाधिष्ठानानि व्याप्तानि, सत्यां त्वचि रूपादिग्रहणमसत्यामग्रहणमिति त्वगिन्द्रियं सर्वार्थम्, न तु स्पर्शमात्रग्राहकमिति [1]चेत्, तदयुक्तम्, [2]अन्धबधिराद्यभावप्रसङ्गात्, तत्तदधिष्ठान[3]भेदेन तस्याः शक्तिभेदाभ्युपगमे प्रकारान्तरेणेन्द्रियभेदाभ्युपगमः ।**

**[62] [4]विषयव्यवस्थानियमनिरूपणार्थमाह–विषयस्त्विति [5]उपलभ्यमानस्पर्शस्याधिष्ठानभूत आश्रयो यः स विषय इति । किमस्यास्तित्वे प्रमाणम् ? प्रत्यक्षमेव, त्वगिन्द्रियव्यापारेण वायुर्वातीत्यपरोक्षज्ञानोत्पत्तेरिति कश्चित्, तन्न युक्तम्, स्पर्शव्यतिरिक्तस्य वस्त्वन्तरस्यासंवेदनात्, अपरोक्षज्ञाने तु स्पर्श एव प्रतिभाति नान्यत्, यदपि वायुर्वातीति ज्ञानं तदभ्यासपाटवातिशयाद् व्याप्तिस्मरणाद्यनपेक्षं स्पर्शेनानुमानम्, चक्षुषेव वृक्षादि-**

[टि०] [62] [6]**कश्चिदिति–व्योमशिवः । तदभ्यासे**–व्याप्तिस्मरणाद्यनपेक्षमिति व्याप्तिस्मरणं ममोत्पन्नं न वेति । व्याप्तिस्मरणानुभवानपेक्षमित्यर्थो ज्ञेयः, [7]व्याप्तिस्मरणाभावेऽनुमानानुदयात् । अभ्यासपाटवात्तु व्याप्तिस्मरणविषयज्ञानाभावः । **चक्षुषेवेति**–यथा वृक्षादौ चक्षुषा पत्रादिक्रियोपलम्भाद् वाय्वनुमानं तथा स्पर्शेनापीति ; ननु यदा शीतोष्णस्पर्शप्रतीतौ वायुर्वातीति प्रत्ययो भवति तदा स जलानलसम्बन्धी कथं वाय्वनुमापकः? तस्य [8]वायुसमवायाभावात् [9]असम्बद्धस्य चालिङ्गत्वाद् इत्याह **शीतोष्णस्पर्शे**ति । **त्वगिन्द्रियेण** तु इति अन्यस्य वायोरिति भावः । शीतोष्णस्पर्शोप-

[पं०] [62–64] **कश्चिदिति–व्योम**शिवः । **स्पर्शव्यतिरिक्तस्य वस्त्वन्तरस्यासंवेदनादिति** त्वगिन्द्रियेणेति शेषः । स्पर्शनप्रत्यक्षेण स्पर्श एव संवेद्यते वस्तु पुनरनुमानेनेति भावः । इदमेव द्रढयन्नाह **अपरोक्षज्ञाने तु स्पर्श एव प्रतिभाति नान्यदिति । यद्यपि वायुर्वातीति ज्ञानं तदभ्यासपाटवातिशयाद् व्याप्तिस्मरणाद्यनपेक्षं स्पर्शेनानुमानं चक्षुषेव वृक्षादिगतक्रियोपलंभादिति** । यथा वृक्षादौ शाखादिचलनक्रियोपलंभाच्चक्षुषा वायुर्वातीति ज्ञानमनुमानम् । एवं स्पर्शेना-

[कु०] [62] [10]**विषयव्यवस्थापनादिति** (कं. ४५.२६) नियतविषयानियताधिष्ठास्तावत्त्रयः स्वीकृताः तच्च–त्वच एवेति कल्पनम् । रूपादिषु मध्ये रूपस्यैव व्यञ्जकं नं(तै)जसमित्याद्यनेकानुमानविरुद्धमिति भावः । [11]**उपलभ्यमानस्येति** (कं. ४५.२७) रूपासहचरितस्यानुष्णाशीतस्येति शेषः । इतरथा पृथिव्यादौ हेमते[जसि] विषक्तावयवे आप्ये **रौष्मे** (ग्रीष्मे) गृहान्तर्वर्तिनि तेजसि वाऽतिव्याप्तिः ।

अनुमेयत्वा प्रतिपादकभाष्यविरोधिनीं वादिविप्रतिपत्तिं निवारयितुं विचारमारभते **किमस्येति** (कं. ४६.१) ।

१ केचित्–कं. १, कं. २ । २ अन्धाद्यभाव–कं. १, कं. २ । ३ भेदेन शक्तिभेदा°–कं. १, कं. २ । ४ विषयव्यवस्थानाद् विषयनिरूपणार्थमाह–जे. १, जे. ३ । ५ उपलभ्यमानस्पर्श°–कं. १, कं. २ । ६ काश्चिद्–अ; ७ व्याप्त्यस्मरणाभावे–अ, ब; ८ वायुसमवायात्–अ, ब; वाय्वसमवायात्–क; ९ असम्बद्धत्वालिङ्गत्वात्–क; १० विषयव्यवस्था–कं. १ । ११ उपलभ्यमानस्पर्शस्य–कं. १ ।

न्यायकन्दली

गतक्रियोपलम्भात् । शीतोष्णस्पर्शभेदप्रतीतौ वायुप्रत्यभिज्ञानमपि तदाश्रयोपनायकद्रव्यानुमानादेव । त्वगिन्द्रियेण तु शीतोष्णस्पर्शाभ्यामन्यस्य न प्रतिभासोऽस्ति । [1]स्पार्शनप्रत्यक्षो वायुरुपलभ्यमानस्पर्शाधिष्ठानत्वाद् घटवदित्यनुमानं शशादिषु पशुत्वेन शृङ्गानुमानवदनुपलब्धिबाधितम् । द्रव्यस्य स्पार्शनत्वं चाक्षुषत्वेन व्याप्तमवगतं घटादिषु चाक्षुषत्वस्य च वायावभावस्तेनात्र शक्यं स्पार्शनत्वनिवृत्त्यनुमानमेतत्, अतस्तस्याप्रत्यक्षस्य सद्भावेऽनुमानमुपन्यस्यति–स्पर्शशब्दधृतिकम्पलिङ्गः इति । स्पर्शश्च शब्दश्च धृतिश्च [2]कम्पश्च लिङ्गानि यस्येति बहुव्रीहिः ।

योऽयं रूपादिरहितः स्पर्शः प्रतीयते स क्वचिदाश्रितः स्पर्शत्वादितरस्पर्शवत् । न चास्य पृथिव्येवाश्रयो रूपविप्रयोगात् । अस्त्यत्राप्यनुद्भूतं रूपमिति चेन्न, उपलभ्यमानस्य [3]पार्थिवस्य स्पर्शस्योपलभ्यमानरूपेणैव सहाव्यभिचारोपलम्भात्, न चेह

**[टि०]** लम्भेऽपि [4]तदाश्रययोर्द्रव्ययोवि[5]शरारुत्वान्न प्रत्यक्षता यथा शब्दोपलम्भेऽपि व्योम्नः । **व्योमशिवमते** तु शीतो वायुरित्यादौ जलादिस्पर्शोपलम्भेऽपि अन्धस्योष्णो घट इतिवत् वायुप्रत्यक्षत्वम् । **द्रव्यस्य स्पार्शनत्वम्** इति :–यद्[6]द्रव्यं स्पार्शनं न चाक्षुषमपीति व्याप्तिः, यत्तु [7]चाक्षुषं तदस्पार्शनं यथा प्रदीपप्रभा । अनुमानं तु विवादाध्यासितो वायुरस्मदादिस्पार्शनो न भवति, द्रव्यत्वे सत्यचाक्षुषत्वात्, यस्तु स्पार्शनः स द्रव्यत्वे सति चाक्षुषोऽपि भवति, यथा घट इति व्यतिरेकेण, अन्वयेन त्वाकाशादौ दृष्टान्ते स्पर्शाभावः उपाधिः स्यात् । अत्र विवादाध्यासितं पदं परमाणुरूपेण वायुना सिद्धसाधनत्वस्य अस्मादीति योगिप्रत्यक्षस्य द्रव्यत्वे सतीति स्पर्शगुणस्य व्यवच्छेदार्थम् । **योऽयंरूपादिरहितः** इति

**[पं०]** पीत्यर्थः । इदमुक्तं भवति–यदि हि वायुर्वातीति प्रत्यक्षज्ञानं स्यात्तदा कथं चक्षुषा गृह्यते, स्वस्वविषयग्राहकत्वादिन्द्रियाणाम् । तस्मादनुमानमिदम् । **तदाश्रयोपनायकद्रव्यानुमानादेवेति** । तयोः शीतोष्णस्पर्शयोराश्रयौ जलतेजसी, तत्परमाणूपनायकम् । कोऽर्थः । तत्परमाणूपढौककं वायुद्रव्यम् तदनुमानाद्वेव । **चाक्षुषत्वस्येति** स्पर्शेन त्वलक्षणं व्याप्यं प्रति व्यापकस्य । **तेनात्र शक्यं स्पार्शनत्वनिवृत्त्यनुमानमेतदिति**–वायुः स्पर्शेन प्रत्यक्षग्राह्यो न भवति । द्रव्यत्वे सति

**[कु०]** पूर्वपक्षमाह **प्रत्यक्षमेवेति** (कं. ४६.१) प्रयोगश्चायम्–विषयवायुज्ञानं प्रत्यक्षम् इन्द्रियव्यापारानन्तरभावित्वात् घटज्ञानवदिति । हेत्वसिद्धा(द्धि) परिहरति **तन्नेति** (कं. ४६.२) । न त्वनुष्णाशीतस्पर्शोपलम्भेऽनुमीयतां वायुः तद्गुणत्वात् । उष्णशीतस्पर्शोपलम्भं त्वशक्यमनुमानमित्यत आह **शीतोष्णेति** (कं. ४६.५) । प्रयोगस्तु उपलभ्यमानशीतोष्णस्पर्शाधिष्ठानं स्पर्शवद्द्रव्योपनीतं शीतोष्णस्पर्शाधिष्ठानत्वात् घटाद्यानीतपयःपावकवदिति । **अनुपलब्धिबाधितमिति** (कं. ४६.८) स्पर्शानिवभूव–('स्पर्शानुभववद्द्र)व्यानुभवस्यानुव्यवसाययोग्यस्यानुव्यवसायाभावादित्यर्थः ।

---

१ स्पार्शनत्वं = स्पर्शेन्द्रियग्राह्यत्वम् – जे. १ टिप्पण । २ कम्पश्चेति ते – कं. १, कं. २, व्याकरणदृष्ट्याऽयं पाठो न समीचीनो भाति, अतो न स्वीकृतः । ३ पार्थिवस्पर्शस्य – जे. १, जे. ३ । ४ तदाश्रययोर्द्रव्ययो ५ विशरारुत्वात्प्रत्यक्षता – अ, ब, क; ६ यद् द्रव्यास्पार्शनं – अ, ब; ७ क्षुषं – अ । ८ अयमेवार्थदृष्ट्या साधीयान् पाठः ।

### न्यायकन्दली

रूपस्यास्त्युपलम्भस्तस्मान्नायं पार्थिवः स्पर्शः। न चोदकतेजसोरयमाश्रितोऽनुष्णाशीतत्वाद् घटादिस्पर्शवत्। नाप्यमूर्त्तेष्वाकाशकालदिगात्मसु वर्त्तते, स्पर्शस्य मूर्त्ताव्यभिचारोपलम्भात्। मनसाञ्च स्पर्शवत्त्वे परमाणूनामिव तेषां सजातीयद्रव्यारम्भकत्वं स्यात्, न चैवम्, तस्मात्तेषामपि न भवति, अतो यत्रायमाश्रितः स वायुरिति परिशेषः।

एवं शब्दोऽप्यस्य लिङ्गम्, योऽयं पर्णादिष्वकस्माच्छुकशुकाशब्दः श्रूयते तस्याद्यः शब्दः स्पर्शवद्द्रव्यसंयोगजः, अविभज्यमानावयवद्रव्यसम्बन्धित्वे सत्याद्यशब्दत्वाद् दण्डाहतभेरीशब्दवत् यश्चासौ स्पर्शवान् स वायुः। आकाशादीनां स्पर्शाभावात् पृथिव्युदकतेजसां च रूपवतां तच्छब्दहेतुत्वे प्रत्यक्षत्वप्रसङ्गात्। विभागजशब्दव्यवच्छेदार्थम[1]विभज्यमानावयवद्रव्यसम्बन्धित्वे सतीत्युक्तम्।

एवमन्तरिक्षे पर्णादीनां [2]धृतिरवस्थितिः स्पर्शवद्द्रव्यसंयोगकार्य्या प्रयत्नवेगादिकारणाभावे सति धृतित्वाज्जलोपरिस्थित[3]पर्णादिधृतिवत्। यच्च तत् स्पर्शवद्द्रव्यं न तत् पृथिव्यादित्रयमप्रत्यक्षत्वादेवेति द्रव्यान्तरसिद्धिः। इषोः पक्षिणाञ्च स्थितिव्यवच्छेदार्थं प्रयत्नादि[4]कारणाभाव इति।

[**टि०**] रूपाद्येकार्थसमवेतो रूपादिसहितस्तद्विपरीतस्त[5]द्रहितः स्पर्शस्य तु मुख्यतो रूपेण सह सम्बन्धाभावात्। तस्माद् वाक्यकाले विवादास्पदः स्पर्श इति कर्तव्यम्। **अस्त्यत्रापि** इति–उद्भूतत्वं सामान्यविशेषः रूपत्वादिना परापरभावानुपपत्तौ तु रूपावाद्यवान्तरसामान्यान्युद्भूतत्वादीनि बहूनि मन्तव्यानि। **योऽयं पर्णादिषु** इति–[6]पर्णादिष्वित्याधारत्वं पर्णाकाशसंयोग[7]लक्षणा समवायकारणाधारत्वेन ज्ञेयम्, शब्दस्याकाशाधारत्वात्। **अकस्मादिति** दृश्यमानहेत्वतिरिक्तप्रत्यक्षवीक्ष्यमाणाघातकद्रव्यलक्षणहे[8]तुशून्य इत्यर्थः, पर्णवाय्वादीनां तद्धेतुत्वात्। अविभज्यमानावय[9]वपर्णद्रव्यसम्बन्धित्वं शब्दस्य निमित्तत्वेन तज्जन्यत्वात्। **एवमन्तरिक्ष** इति–कुड्यादिस्थव्यवच्छेदार्थम्। ननु यथाऽन्यहेतुत्वावगमो नास्ति तथा

[**पं०**] चाक्षुषप्रत्यक्षाग्राह्यत्वात्, व्योमवत्। **प्रत्यक्षप्रसंगादिति** शब्दस्य प्रत्यक्षत्वप्रसंगादित्यर्थः। **द्रव्यान्तरसिद्धिरिति**–वायुसिद्धिः **तस्या**[10]**प्यन्यहेतुत्वावगमादिति**–भूकम्पस्याप्यन्यहेतुत्वानवधारणात्। अन(ना)धारितेन च न व्यभिचारः।

[**कु०**] ए[त]दप्रत्यक्षत्वानुमानं दूषयित्वा प्रत्यक्षत्वानुमानमाह **द्रव्यस्येति** (कं. ४६.८)। प्रयोगोऽयम्" अस्पार्शनो वायुः द्रव्यत्वे सत्यचाक्षुषत्वात् आकाशवत्। अत्रानुकूलसर्वः यदि स्पार्शनः स्यात् आश्रयेण तुल्योपलम्भसामग्रीकाणां सङ्ख्यापरिमाणादीनामप्युपलम्भः स्यादिति। एवं चोपलम्भमानस्पर्शाधिष्ठानत्वादिति प्रतिपक्षानुमानं सर्वदाऽनुपलभ्यमानसङ्ख्यादिकत्वादनुपलभ्यमानेविषक्तावयवे पाथसि तेजसि च व्यभिचारीति च द्रष्टव्यम्। **लिङ्गानीति** बहुवचनेन प्रत्येकमेव साधनत्वं दर्शयति।

---

१ अविभज्यमानावयवद्रव्येत्युक्तम्–जे. १, जे. ३। २ वृत्ति–कं. १। ३ पर्णादिवत्–कं. १, कं. २। ४ 'इति'–कं. १, कं. २ पुस्तकयोर्नास्ति। ५ स्तद्रहितस्पर्शस्य–अ, ब, क; ६ पर्णादित्याधारत्वं – अ, ब; ७ लक्षणसमवाय–क; लक्षणसवाय–अ, ब; ८ हेतुशून्य इत्यर्थः इति–'अ' पुस्तके नास्ति। ९ वयवद्रव्य–अ; १० तस्यान्य"–कं।

## न्यायकन्दली

तथा वृक्षादीनां कम्पविशेषः स्पर्शवद्द्रव्यसंयोगजो विशिष्टकम्पत्वाद् नदीपूराहतवेतसादिवनकम्पवत्। भूकम्पेन व्यभिचार इति चेन्न, तस्यान्य[1]हेतुत्वावगमात्, स्पर्शवद्द्रव्यसंयोगजे तु विशिष्टकम्पत्वमेव प्रमाणमित्यव्यभिचारः। ननु यदेव द्रव्यं स्पर्शेनानुमितं तदेव शब्दादिभिरप्यनुमीयते, न तु प्रतिलिङ्गं [2]द्रव्यान्तरानुमितिः, किमिह प्रमाणं येनैतदुच्यते स्पर्शशब्दधृतिकम्पलिङ्गो वायुरिति? इदं प्रमाणम्, स्पर्शानुमितद्रव्यकार्य्यत्वेनैव शब्दादीनामुपपत्तौ सम्भवन्त्यां द्रव्यान्तरकल्पनावैयर्थ्यमिति।

[3]एवं व्यवस्थिते वायौ तद्धर्म्मं दर्शयति–तिर्य्यग्गमनस्वभाव इति। तिर्य्यग्गमनं स्वभावो यस्येति। [4]मेघादिप्रेरणे इतस्ततो नयने। धारणे गुरुत्वप्रतिबन्धे। आदिशब्दाद् [5]घर्षणे समर्थः। मेघादीत्यादिपदेन यानपात्रादिपरिग्रहः, तेषामपि वायुना प्रेर्य्यमाणत्वात्।

[टि०] स्पर्शवद्धेतु[6]त्वागमोऽपि नास्तीति सन्दिग्धानैकान्तिकत्वमित्याह **स्पर्शवद्द्रव्य[7]संयोगजे तु** इतिः–**वाय्वोरुर्ध्वगमनम्** इतिः–वायुनानात्वस्य साध्यत्वाद् अत्र वाय्वोरिति पक्षीकरणे द्विवचनं न प्राप्नोति, तस्मादर्थ[8]कथनमिदम्। वाक्ये तु विवादाध्यासितमूर्ध्वगमनं सजातीयपरस्परव्याहृति[9]पूर्वमिति पक्षः कार्यः। अत्र विवादाध्यासितमिति तृणाद्यूर्ध्वगमनानु[10]मितमित्यर्थः। सजातीयग्रहणं प्राकारादिप्रतिस्खलितवातोर्ध्वगमनव्यवच्छेदार्थम्। अन्यकारणाभावे सतीति हे[11]तुविशेषणं

[पं०] भूकंपोऽपि स्पर्शवद्द्रव्यसंयोगज एवेति भावः। अत्रार्थे किं प्रमाणमित्याह **स्पर्शवदित्यादि**। परवाक्यं **नन्वित्यादि**। श्रीधरः प्राह **इदं प्रमाणमित्यादि**। **स्पर्शानुमितद्रव्यकार्यत्वेनैवेति**–स्पर्शानुमितं द्रव्यं वायुलक्षणम्। **संशये सतीति**–वायावेकत्वानेकत्वविषयः संशयः किमयमप्येकः स्यादनेको वेत्येवंरूपः। एकदिक्पथिकयोरिति–**एकदिक्प्रस्थितयोरिति** च द्वौ पाठौ स्तः। अर्थस्तुल्यः।

[कु०] [12]**उपलभ्यमानस्पर्शस्येति** (कं. ४६.१८) पवं वायूपामीते उपलभ्यमानसौरभ्याश्रये कुसुमाद्यवयवे व्यभिचारपरिहाराय। **अकस्मादिति** (कं. ४६.२०) पक्षविशेषणं पाण्यादिना सिद्धसाधनत्वपरिहाराय। शुकशुनेत्यमुकारः। कर्णानामेव परस्परसंयोगेन सिद्धसाधनत्वपरिहाराय सङ्ग्रहणम्। द्वितीयादिषु बाधकपरिहाराय विभागजशब्दपरत्वादिलिङ्गभेदेन व्यवच्छेदार्थमिति। तत्र स्पर्शवद्द्रव्यसंयोगस्य साधारणस्याभावेन विपक्षत्वादिति भावः। अवस्थितिरपतनम्; अचलस्य वायुसंयोगे सत्यनुपपत्तेः।

**विशिष्टकम्पत्वादिति** (कं. ४७.१) रूपवान्नोदनादिविरहो वैशिष्ट्यम्। [13]**न तस्यापीति** (कं. ४७.२) भूकम्पोऽपि पक्षतुल्य इत्यर्थः। **नन्विति** (कं. ४७.३) शब्दपरत्वादिलिङ्गभेदेन यथाऽकाशकाललिङ्गभेद इति भावः।

---

१ हेतुत्वानवगमात्–जे. १, जे. ३। अनवगमात्–अनवधारणात्–अनवधारिते न व्यभिचारः टिप्पण जे. १ एवं टिप्पणेऽपि–जे. १, जे. ३ पुस्तकयोः पाठाऽर्थदृष्ट्या न समीचीनोऽतो न स्वीकृतः। २ द्रव्यान्तरस्थितिरिति–जे. १, जे. ३। ३ एवं स्थिते–कं. १, कं. २। ४ मेघादीनां–जे. १, जे. ३। ५ घर्षणसमर्थः–जे. १, जे. ३। ६ द्वेत्ववगमो–ब; ७ संयोगजस्तु–ब; संयोगजत्वे तु–ड; ८ कथमिदं–अ; ९ रूपमिति–अ, ब, क; १० मिति–ड; ११ सतीति विशेषणं–अ; १२ उपलभ्यमानस्य पार्थिवस्य स्पर्शस्य–कं. १। १३ न तस्य–कं. १।

प्रशस्तपादभाष्यम्

[63] तस्याप्रत्यक्षस्यापि नानात्वं सम्मूर्च्छनेनानुमीयते । सम्मूर्च्छनं पुनः समान[1]जवयोर्वाय्वोर्विरुद्धदिक्क्रिययोः सन्निपातः, सोऽपि [2]सावयविनोर्वाय्वोरूर्द्ध्वगमनेनानुमीयते, [3]तदपि तृणादिगमनेनेति ।

न्यायकन्दली

[63] अनुमीयमानेष्वा[4]काशात्मादिष्वेकानेकत्वोपलब्धौ संशये सति तद्व्युदासार्थमाह–तस्याप्रत्यक्षस्यापीति । सम्मूर्च्छनमपि न ज्ञायते तदर्थमाह–सम्मूर्च्छनमिति । विरुद्धायां दिशि क्रिया ययो[5]स्तयोः समानवेगयोः सन्निपातः परस्परगतिप्रतिबन्धहेतुः संयोगविशेषः सम्मूर्च्छनम्, तेन वायोर्नानात्वमनुमीयते एकस्य संयोगाभावात्, एकदिक्प्रस्थितयोर्यथाक्रमं गच्छतोः सम्मूर्च्छनाभाव इति [6]विरुद्धदिक्क्रिययोरित्युक्तम्=विरुद्धदिक्क्रिययोर्भिन्नदिक्क्रिययोरित्यर्थः । असमानवेगयोः सम्मूर्च्छनं न भवति, एकेनापरस्य विजयात् तदर्थं समानजवयोरिति । अप्रत्यक्षयोर्यथा नानात्वमप्रत्यक्षं तथा संयोगोऽपीति मत्वेदमाह–[7]सोऽपीति । सन्निपातोऽपि । सावयविनोर्वाय्वोरूर्द्ध्वगमनेनानुमीयते, वायोरूर्द्ध्वगमनं परस्परव्याहतिपूर्वकमन्यकारणासम्भवे सति तिर्य्यग्गतिस्वभावद्रव्योर्द्ध्वगतित्वात् परस्पराहतजलतरङ्गोर्द्ध्वगमनवत् । अवयविनोरिति वक्तव्ये सावयविनोरित्युक्तम्,

[टि०] भस्त्रादिप्रेरणव्यवच्छेदार्थम् । यद्यपि चात्र जलतरङ्गावय[8]वी गुरुत्ववत्वाद् अधोगमनस्वभावः तिर्य्यग्गमनं तु वाताविप्रेरणकृतं तथापि दृष्टान्तीकृतयोर्निवातप्रदेशस्थिताङ्गु[9]ल्याहतजलतरङ्गयोस्तिर्यग्ग[10]तिरप्यस्तीति न दृष्टान्तासिद्धिः ।

[पं०] अन्यकारणसम्भवे सतीति भित्यादि प्रति स्यू(?)लितेन वायुना व्यभिचारो माभूदित्यन्यकारणसंभवे सतीत्युक्तम् । विषयवायोर्भेदेनेति विषयभूतः स्पर्शादिलिंगो यो वायुस्तस्य सकाशात्पार्थक्येन । व्यूहनस्येति–छागादिषु

[कु०] [63] अनुमीयमानेष्विति (कं. ४७.११) अनुमीयमानत्वात्समानधर्म्मात्संशय इत्यर्थः । न ज्ञायत इति (कं. ४७.१९) व्याख्यानादृते इति भावः । तदर्थमाहेति (कं. ४७.१२) व्याचष्टे इत्यर्थः । [11]एकस्य(सं)योगाभावादिति (कं. ४७.१५) सर्प्पकुण्डलावावयवानामेव च परस्परसंयोगः । न तु तेनैव तस्य प्रतीत्यभावात् नहि स्वयं स्वेन संयुज्यत इति कश्चित्प्रत्येतीति भावः । तथा संयोगोऽपीति (कं. ४७.१८) अरूपिद्रव्यत्वादचाक्षुषत्वं सङ्ख्यादिसप्तकसाधारणमिति भावः । अणुपरिमाणस्येति (कं. ४७.२२) द्व्यणुकपरिमाणस्येति भावः ।

---

१ जवयोर्विरुद्धदिक्क्रिययोर्वाय्वोः–कि. । २ तृणादिगमनेनानुमितेन सावयविनोरूर्ध्वगमनेनानुमीयते–कि., दे., सावयविनोरूर्ध्वगमनेनानुमीयते तदपि तृणादीनामूर्ध्वगमनेन व्यो. । अत्र तु पाठः कन्दल्यानुसारी स्वीकृतः । ३ 'तदपि' इति 'दे' पुस्तके नास्ति । ४ °काशादिष्वने–कं. १, कं. २ । ५ तयोः सन्निपातः–कं. १, कं. २ । ६ पाठोऽयं–कं. १, कं. २ पुस्तकयोर्नास्ति । ७ सोऽपीति । सोऽपि=सन्निपातोऽपि–कं. १, कं. २ । ८ वयवी–अ, ब; ९ स्थिताङ्गुल्याहत–अ, ब, क; १० भवति–अ, ब; ११ एकस्य संयोगाभावाद्–कं. १ ।

प्रशस्तपादभाष्यम्

[64] प्राणोऽन्तःशरीरे रसमलधातूनां प्रेरणादिहेतुरेकः सन् क्रियाभेदा[1]दपानादिसंज्ञां लभते ।

न्यायकन्दली

अवयवानामप्यवयवित्वविवक्षया स्थूलवायुपरिग्रहार्थम्, अणुपरिमाणस्य तृणादिप्रेरणसामर्थ्याभावात् । ऊद्ध्वंगमनमपि तयोरप्रत्यक्षमिति [2]तत्प्रतिपत्तावनुमानमाह– तृणादिगमनेनानुमीयत इति ।

[64] लोके योगशास्त्रे च विषयवायोर्भेदेन प्रसिद्धस्य [3]प्राणाख्यस्य स्वरूपमाह– प्राणोऽन्तःशरीर इति । अन्तःशरीरे यो वायुर्वर्त्तते स प्राण इत्युच्यते । तस्यार्थक्रियां कथयति–रसमलधातूनां प्रेरणादिहेतुरिति । रस इति [4]भुक्तपीताहारेषु पाकजोत्पत्तिक्रमेणोत्पन्नस्य द्रव्यविशेषस्य ग्रहणम् । [5]मल इति मूत्रपुरीषयोरभिधानम् । धातवस्त्वङ्मांसास्थिशोणितादयः, तेषां प्रेरणस्येतस्ततो नयनस्य, आदिशब्दाद् व्यूहनस्य च

[टि०] [64] धातव इति रसस्य [6]स्वरूपेणैव ग्रहणात्[7] त्वचोऽत्र धातुत्वम् ॥

[पं०] पुरीषवर्तुलत्वादिरचनायाः । एकस्मिन्नाश्रये मूर्तानां समावेशाभावादिति–यत्पुनरनेकप्रदीपप्रमाणामेकत्रसमावेशस्तत्रानुद्भूतस्पर्शत्वं कारणम्, वायुस्तूद्भूतस्पर्श इति हृदयम् ॥ इति वायुः ॥

[कु०] [64] ननु प्राणोऽपि विषय एवोपलभ्यमानस्पर्शाधिष्ठानत्वात् तत्कथं भवद्भिरप्य उपादीयत इत्यत आह लोक इति (कं. ४७.२४) प्रकारान्तरेण पुरुषार्थहेतुत्वादिति भावः । [8]भुक्तपीताहारस्येति (४७.२६) पीतं क्षीरादि द्रष्टव्यम् अपां पाकाभावात् । तस्येति (कं. ४७.२५) शरीरे । पञ्चवायव इति (कं. ४८.२) लोकयोगशास्त्रप्रसिद्धं मूर्तानुमानदेशस्य विरोधं चानुसृत्य वादिविप्रतिपत्तेरिति शेषः ॥

कारुण्यामृतकच्छमूहनि या श्रीधराचार्यवाक्
तज्जाख्यानयकन्दलीकुहकग्रीष्मोष्मणा शोषिता ।
वज्रब्रह्मनृपांबुदध्वनिमसावासाद्य सूतेऽधुना
न्यायाख्यप्रसवश्रियं विदधनीति तर्काभिसंधं सौरभम् ॥

१ दपानादि पञ्च सञ्ज्ञां–ता., प्राणापानादिसञ्ज्ञां–कि. । २ तत्प्रतिपत्तावपि–जे. १, जे. ३ । ३ प्राणस्य–जे. १, जे. ३ । ४ भुक्तवतामाहारेषु–कं. १, कं. २ । ५ मलमिति–जे. १, जे. ३ । ६ रूपेणैव–अ; ७ तमुवोऽत्र धातुत्वम्–अ, ब, क; त्वचोऽत्र धात्वर्थ–ड; ८ प्रतीकमिदं कं. १ पुस्तके नास्ति । अत्र भाष्यांतरप्रतीकेन ।

### न्यायकन्दली

**हेतुः । तस्यैकत्वानेकत्वसंशये सत्याह–एकः सन्निति । ननु पञ्च वायवः [1]शारीराः श्रूयन्ते ? तत्राह–क्रियाभेदादिति । मूत्रपुरीषयोरधोनयनादपानः, रसस्य गर्भ[2]नाडीषु विततनाद् व्यानः, अन्नपानादेरूर्ध्वं नयनादुदानः, मुखनासिकाभ्यां निष्क्रमणात् प्राणः, आहारेषु पाकार्थमुदर्य्यस्य वह्नेः समं सर्वत्र नयनात् समान इति न वास्तवमेतेषां पञ्चत्वम[3]पि तु कल्पितम् । कथम् ? एकस्मिन्नाश्रये मूर्त्तानां समावेशाभावात् ।**

[कु०] ननु उद्देशक्रमानुसारेण वायुनिरूपणानन्तरमाकाशे निरूपयितव्ये सृष्टिसंहारविधेः कोऽवसर इत्यत आह **उत्पत्तिमन्तीति** (कं. ४९.१९) । अयं भावः, इह तावन्नित्यानित्यभेदेन पृथिव्यादीनां द्वैविध्यं निरूपितं, तदेतदनुपपन्नम्, तथा हि अयं कार्यकारणप्रवाहः पृथिव्यादीनां विच्छेदवान् तद्रहितो वा? नाद्यः कार्याणामस्मदादिशक्यज्ञानकारणनैरन्तर्यमान्(णां)? अदृष्टत्वानपेक्षित्वे वैचित्र्यानुपपत्तेः तदा पक्षत्वे च तेषामनियतविपाकसमयतया युगपद्विच्छेदानुपपत्तेरचेतनया च तेषां स्वयमेव प्रवृत्तिनिवृत्त्यनुपपत्तेः । अदृष्टतया अस्मदाद्यधिष्ठानेन प्रवृत्त्यनुपपत्तेश्च । अविच्छेदे **"तद्वचनादाम्नायस्य प्रामाण्यम्"** इति नोपपद्यते, शिष्योपाध्यायसम्प्रदायाविच्छेदेनैवाम्नायस्येश्वरप्रणयनानपेक्षत्वादितीमामनुपपत्तिमपाकर्तुं कार्यवैचित्र्यापादकस्याधिष्ठाताऽस्मदादिविलक्षणो जगत्कर्ता निरूप्यते इत्यवसरवानेव सृष्टिसंहारवाद इति ।

**उत्पत्तिविनाशौ निरूपणीयाविति** । (कं. ५०.१) परोक्तदूषणापाकरणेनेति शेषः । तत्र चेदमपाकरणं, यत्तावदेतदनुमानं यत्कार्यं तदस्मदादिशक्यज्ञानकारणपूर्वकमिति, तदङ्कुरादिना व्यभिचारि । विपर्यये **कार्यकारणसन्तानो**ऽयं कदाचिदस्मदाद्यशक्यज्ञानोपादानपूर्वकः कार्यकारणसन्तानत्वात् आरण्यवह्निसन्तानवदिति परिशिष्टं **चेश्वरवादे स्वयमे**वापाकरिष्यति । ननु "[4]चतुर्णां द्रव्यारम्भकत्वस्पर्शवत्त्वे"(प्र.भा.) इत्यनेन (कार्यं) कार्यत्वानित्यत्वे [5]**कारण[त्वं]**चता दित्यनेन च साधर्म्यप्रकरणे सृष्टिसंहारयो[र्नि]रूपणात्पुनः किं तन्निरूपणेनेत्यत आह **यद्यपीति** (कं. ५०.४) । **विलक्षणयोरिति** (कं. ५०.५) उत्तरस्मिन्नुत्तरस्मिन्सति पूर्वस्य(पूर्वं)पूर्वस्येति ईश्वरेच्छानुसारेण क्रमभावित्वं **वैलक्षण्य**म् । एतच्च पूर्वं न निरूपित(मि)(प्र)तिभावः । **कपिञ्जलानिति** (कं. ५०.६) यद्यपि तत्र चतुर्थ्यालम्भे हिंसानिषेधवन्नेह बहुवचनस्य त्रित्वपर्यवसायित्वनिश्चयहेतुः कश्चिदस्ति तथापि संशयः स्यात् कतीनामिति । एवं परं दृष्टान्ताभिधानं द्रष्टव्यम् । **अर्थप्रतिपादनमात्रस्येति** (कं. ५०.१२) क्रमो विवक्षितः, सृष्टिसंहारयोरप्युपपूर्वकत्वेनानादिता प्रवाहस्य द्योतयितुमिति भावः । दिवः दिवसमित्यनेनेति (कं. ५०.१७) रात्रिश्च तावती [6]**'रात्रिं युगसहस्रान्तामिति** स्मृतेरिति द्रष्टव्यम् ।

**आत्माणुसंयोगाश्च** (कं. ५१.९) इत्यनेन समवायलक्षणा अदृष्टस्य परमाणुभिः प्राप्ति दर्शयति । पारम्पर्येणावयवावयवितया । ननु नित्यवर्गस्य सर्वस्यास्थाने वक्तव्ये किमर्थं परमाणूनामात्मनां चैवाह इत्यत आह **विगादय इति** (कं. ५१.२६) ।

---

१ शरीरे–जे. १, जे. ३ । २ °नाडीविततनाद्–कं. १, कं. २ । ३ किन्तु–जे. १, जे. ३ । ४ चतुर्णां द्रव्यारम्भकत्वे स्पर्शवत्त्वे इति प्रशस्तपादभाष्यम् । ५ "कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्यः" इति प्र. भा. । ६ प्रतीकं इदं–कं. १ पुस्तके नास्ति । किन्तु देवानां दिनं देवानां रात्रिः इति त्वस्ति ।

प्रशस्तपादभाष्यम्

[65] [1]इहेदानीं चतुर्णां महाभूतानां सृष्टिसंहारविधिरुच्यते ब्राह्मेण मानेन [2]वर्षशतान्ते वर्त्तमानस्य ब्रह्मणोऽपवर्गकाले [3]संसारे खिन्नानां [4]सर्वप्राणिनां निशि विश्रामार्थं सकल-

न्यायकन्दली

[65] उत्पत्तिमन्ति चत्वारि द्रव्याण्याख्याय विस्तरात् ।
तेषां कर्म्मपरीक्षार्थमुद्यमः क्रियतेऽधुना ॥

पृथिव्यादीनां चतुर्णामुत्पत्तिविनाशौ निरूपयीणौ । तयोश्च प्रतिप्रकरणं निरूपणे ग्रन्थविस्तरः स्यादिति समानन्यायेनैकत्र निरूपणार्थं प्रकरणमारभ्यते–चतुर्णामिति । सृष्टिसंहारयोर् उत्पत्तिविनाशयोः, विधिः प्रकारः कथ्यते । यद्यप्येकत्र चतुर्णामपि सृष्टिसंहारौ कथ्येते, तथापि नेदं साधर्म्याभिधानम्, प्रत्येकं विलक्षणयोरेव [5]तयोरुपवर्णनात् । महाभूतानामित्युक्ते त्रयाणामेव परिग्रहः स्यात्, कपिञ्जलानालभेतेतिवद् बहुत्व-संख्यायास्ता[6]वतैव चरितार्थत्वात्, अतश्चतुर्णामित्युक्तम् । चतुर्णामित्युक्ते चानन्तरोक्तमेव वायुकार्य्यं शरीरमिन्द्रियं विषयः प्राण इति चतुष्टयं बुद्धौ निविशते, तन्निवृत्त्यर्थं महाभूतानामिति । नन्वेवं तर्हि द्व्यणुकानामुत्पत्तिविनाशौ न प्रतिज्ञातौ स्यातां तेषामणुत्वात् । नैवम्, विधिशब्दोपादानात् । येन प्रकारेण महाभूतानामुत्पत्तिविनाशौ स प्रकारः कथ्यत इत्युक्तम् । तेषाञ्च द्व्यणुकादिप्रक्रमेणोत्पत्तिरापर[7]माण्वन्तश्च विनाश इति । अतो द्व्यणुकानामपि सृष्टिसंहारौ प्रतिज्ञातौ स्याताम्, अर्थप्रतिपादनमात्रस्य विवक्षितत्वात् ।

[टि०] [65–66] [॥ अथ प्रसङ्गागतं सृष्टिसंहारविधिनिरूपणम् ॥]

प्रत्येकं विलक्षणयोः इति :–पृथिव्यादीनां भिन्नकालक्रियादिवैलक्षण्येन प्रत्येकं सृष्टिसंहारयोर्भेदो वास्तवं तु साधर्म्यमेवैतदिति । कपिञ्जलान् इति :–न [8]हिंस्यात्सर्वभूतानीति वाक्यबाधया [9]बहुवचनं यथा त्रिष्वपि चरितार्थमिति

[पं०] [65] प्रत्येकमपि (मिति)=प्रतिद्रव्यम् । विलक्षणयोरिति–कालभेदेन । तयोरिति सृष्टिसंहारयोः । कपिजला-निति–पक्षिविशेषान् । तेषामिति = महाभूतानाम् । पञ्चदशनिमेषा काष्ठेति परिमाणाः । स्वावरुद्धनभोदेशत्यागोप-लक्षितःकालः क्षणः । तद्द्वयं च लवः । प्रोक्तो निमेषश्च लवद्वयम् । काष्ठा तु निमेषाः । काष्ठेति परिमाणाः स्वावरुद्धनभोदेशपंचदशेह परिकीर्तिताः । अक्षिपक्ष्मणोः संयोगनिमित्तं कर्म निमेषः । विभागार्थं च कर्मोन्मेषः ।

१ 'इहेदानीं चतुर्णाम्' इति 'ता' पुस्तके नास्ति । २ वर्षशतस्यान्ते – कि; ५. पु. । ३ संसार – कं. १, कं. २, संसारेऽहनि – दे । ४ प्राणिनां – दे । ५ रेतयो – कं. १, कं. २ । ६ तावत्येव – कं. १, कं. २; तावतैव – त्रिसङ्ख्यतयैव – टिप्पण जे. १ । ७ परमाण्वन्तः – जे. १, जे. ३ । ८ हिंसात् – अ, ब; ९ बहुत्व – ब;

प्रशस्तपादभाष्यम्

भुवनपतेर्महेश्वरस्य सञ्जिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्म-[1]गतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणु[3]संयोगजकर्म्मभ्यः[2] शरीरेन्द्रिय-कारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः। तथा पृथिव्युदक-

न्यायकन्दली

पश्चादुक्तमपि संहारं प्रथमं कथयति—ब्राह्मेण मानेनेति। अस्माकं पञ्चदश निमेषाः काष्ठा। [4]त्रिंशत्काष्ठाः कला। पञ्चदश कला नाडिका। त्रिंशत्कलो मुहूर्त्तः। त्रिंशता मुहूर्त्तैरहोरात्रः। पञ्चदशाहोरात्राः पक्षः। द्वौ पक्षौ मासः। द्वौ मासावृतुः। षडृतवो द्वादश मासाः संवत्सरः। ऋतुत्रयेणोत्तरायणम्, ऋतुत्रयेण च दक्षिणायनम्। उत्तरायणञ्च देवानां दिनम्, दक्षिणायनञ्च देवानां रात्रिः। तथाभूताहोरात्रशतत्रयेण षष्ट्यधिकेन वर्षम्। द्वादशसहस्रैश्च [5]वर्षैश्चतुर्युगम्। चतुर्युगसहस्रेण ब्रह्मणो दिनमेकम्।

इत्यनेन मानेन वर्षशतस्यान्तेऽवसाने, वर्त्तमानस्य ब्रह्मणोऽपवर्गकाले मुक्तिकाले, संसारे नानास्थानेषु भूयो भूयः शरीरादिपरिग्रहेण, खिन्नानां गर्भवासादिविविधदुःखेन दुःखितानां प्राणिनाम्, निशि विश्रामार्थं कियत्कालं दुःखोपशमार्थम्, सकलभुवनपतेः सर्वत्राव्याहतप्रभावस्य, महेश्वरस्य सञ्जिहीर्षा संहारेच्छा भवति। तत्समानकालं तदनन्तरं शरीरेन्द्रियमहाभूतोपनिबन्धकानां शरीरेन्द्रियमहाभूतारम्भकाणां सर्वात्मगतानां

[टि०] अत्रापि सन्देहः स्यात्। [6]आपरमाण्वन्त इतिः—अत्र'अन्त'शब्दः स्वरूपार्थः, आङ् मर्यादायाम्, [7]आ—मर्यादा परमाण्वन्तः परमाणुर्ये[8]षामिति बहुव्रीहिः, अन्यथा आङन्तशब्दयोरेकस्यैकस्य वैयर्थ्यं स्यात्। पञ्चदशाहो[9]रात्राणि इतिः—समाहार एव नपुंसकत्वाद्, अत्र समाहारं कृत्वा तत इतरेतरद्वन्द्वे एकशेषः कार्यः। सञ्जिहीर्षा इति—तावत्कालावच्छेद-को[10]पाध्यवच्छिन्नकालसहकृतत्वम् एवेश्वरेच्छाया उत्पादः तस्यानित्यत्वात् एवं प्रयत्नस्यापीति। तावद्विनाश इति भवति,

[पं०] महेश्वरेच्छात्माणुसंयोगजा[11]नीति – व्यापकत्वादात्मनः द्व्यणुकादिविनाशप्रक्रमेणेति – आश्रयविनाशाद्विनाशः। त्र्यणुकादीनां चाश्रयो द्व्यणुकमेव। अतस्तदादिविनाशः। प्रतिक्रियेति–प्रतिसमाधानम्। ब्रा(ब्र)ह्मणोऽपवर्गकाले निशेत्युक्तमित्यादि—यथा निशायां प्रबोधः प्रत्यस्तमयो भवति, एवमपवर्गकालेऽप्यदृष्टवृत्तिप्रतिबन्धेन मनःसंयोगस्या-समवायिकारणस्याभावात्प्रबोध प्रत्यस्तमयो भवति। अनेन च साधर्म्येणापवर्गोऽप्युपचाराान्निशे(शी)त्युक्तः। अदृष्ट-वदात्मपरमाण्वस्थानसंकीर्तनमिति–अदृष्टवदिरथम मनः।

१ गतादृष्टानां—दे। २ संयोगकर्मभ्यः—दे। ३ माणुनो—दे। ४ त्रिशतिः—कं. १, कं. २। ५ वर्षैर्युगम् —जे. १, जे.३। ६ आपरमाणवन्त—अ; ७ आमर्याद—अ, ब, क; ८ यस्येति—द; ९ रात्राः—मु; रात्राणि—जे. १ जे. ३; १० पाध्यवच्छिन्न—अ, ब; ११ संयोगेभ्यः—कं.।

प्रशस्तपादभाष्यम्

ज्वलनपवनानामपि महाभूतानामनेनैव क्रमेणोत्तरस्मि[1]न्नुत्तरस्मिन् सति [2]पूर्वस्य पूर्वस्य विनाशः। ततः [3]प्रविभक्ताः परमाणवोऽवतिष्ठन्ते धर्म्माधर्म्मसंस्कारा[4]नुविद्धाश्च आत्मानस्तावन्तमेव कालम्।

न्यायकन्दली

सर्वेष्वात्मसु समवेतानामदृष्टानां वृत्तिनिरोधः शक्तिप्रतिबन्धः स्यात्। तस्मिन् सत्यनागतानां शरीरेन्द्रियमहाभूतानामनुत्पत्तिः। उत्पन्नानाञ्च विनाशार्थं महेश्वरेच्छात्माणुसंयोगेभ्यः कर्म्माणि जायन्ते। [5]महेश्वरेच्छासञ्जिहीर्षालक्षणा। अण्विति परमाणुपरिग्रहः। महेश्वरस्येच्छा चात्माणुसंयोगाश्चेति विग्रहः। तेभ्यो जातानि [6]महेश्वरेच्छात्माणुसंयोगजानि तेभ्यो महेश्वरेच्छात्माणुसंयोगजकर्म्मभ्यः। शरीराणामिन्द्रियाणां ये पारम्पर्येण कारणभूता अणवस्तेषु विभागा भवन्ति। विभागेभ्यस्तेषामणूनां संयोगनिवृत्तिः। संयोगनिवृत्तौ सत्यां तेषामापरमाण्वन्तो विनाशः। तेषां शरीरेन्द्रियाणां द्व्यणुकादिविनाशप्रक्रमेण तावद्विनाशो यावत्परमाणुरिति।

[7]प्रजामकाण्डे संहरन्नयमकारुणिको यत्किञ्चनकारी च स्यादिति यत्केनचिदुक्तं तत्रेयं प्रतिक्रिया—प्राणिनां निशि विश्रामार्थमिति। यदप्येतदुक्तम्—"अनन्तानामात्मनामनन्तेष्वदृष्टेषु क्रमेण परिपच्यमानेषु केचिददृष्टक्षयाद् भोगादुपरमन्ते भुज्यन्ते च केचित्। [8]अपरे तु भोगाभिमुखा इत्येवं सर्वत्र विषयप्रवृत्तौ न शरीरादीनां युगपदभावो घटते" इति, तदनेन पराहतम्—अदृष्टानां वृत्तिप्रतिबन्ध इति। ब्रह्मणोऽ[9]पवर्गकाले निशीत्युक्तम्। तत्र सर्वप्राणिनां प्रबोधप्रत्यस्तमयसाधर्म्येणोपचारात्। महाभूतानामप्येवं विनाश

[टि०] पचतीति [10]गम्यमानक्रियाविशेषणे 'यावत्', 'तावच्छ'ब्दौ, अन्यथा तु यावच्छब्दयोगे ग्रामं [11]गच्छतीत्यादिवत् द्वितीया स्यात्। उत्तरस्मिन् इति:—पृथिव्युदकज्वलन[12]पवनेतिपाठक्रमापे[13]क्षयोत्तरोत्तरत्वं न तु सृष्ट्यपेक्षयेति। आशयेति:—[14]कर्मेति धर्माधर्मौ धर्मेणापि धर्मस्योत्पाद्यत्वात् धर्मस्यापि धर्मानुरूपत्वम्। ज्ञानादिना इति:—ननु पूर्वं धर्मज्ञानेत्युक्तं इदानीं तु कथं ज्ञानादिनेति? सत्यम्, धर्मस्य परं प्रत्युपयोगाभावात। विचित्रकर्माशयसहायस्य इति:—अत्र कर्म [15]यागादि तज्जनितौ धर्माधर्मावाशयः कर्माशय इति [16]व्याख्येयम्॥

१ न्नुत्तरस्मिंश्च—कि; ता.। २ पूर्वपूर्वस्य—कि.। ३ प्रविभक्ता एव—दे.। ४ नुविद्धा—कं. १, कं. २। ५ महेश्वरस्येच्छा—जे. १, जे. ३। ६ पाठोऽयं कं. १, कं. २ पुस्तकयोर्नास्ति। ७ प्रजाना—कं. १, कं. २। ८ अपरे भोगाभिमुखा—जे. १, जे. ३। ९ ऽपवर्गकालो निशेत्युक्तम्—जे. १, जे. ३। १० गम्यमानस्य—अ, ब, क; ११ गच्छतीतिवत्—अ; १२ पवनपवनेति—अ, ब, क; १३ पेक्षयोः पूर्वोत्तरत्वं—अ, ब, क; १४ धर्मेति—अ, ब,; १५ यागादि—अ, ड; १६ व्याख्येयः—अ;

प्रशस्तपादभाष्यम्

[65-अ] ततः पुनः प्राणिनां भोगभूतये [1]महेश्वरस्य सिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्म्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादि-

न्यायकन्दली

इत्याह–तथेति। यथा शरीरेन्द्रियाणामापरमाण्वन्तो विनाशस्तथा महाभूतानामप्यनेनैव क्रमेणेति। परमाणुक्रियाविभागादिक्रमेणोत्तरस्मिन्नुत्तरस्मिन् सति पूर्वस्य पूर्वस्य विनाश इति। जले तिष्ठति पूर्वं पृथिव्या विनाशः, तेजसि तिष्ठति जलस्य, वायौ तिष्ठति तेजस इत्यर्थः। ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्ते धर्म्माधर्म्मभावनाख्यसंस्कारैरनुविद्धा उपगृहीताश्चात्मानस्तावन्तमेव कालं ब्रह्मणो वर्षशतमेवावतिष्ठन्ते। दिगादयोऽपि तिष्ठन्ति नित्यत्वात्। किन्त्वात्मनामदृष्टवशात् परमाणवः [2]पुनर्नारप्स्यन्त इति। प्राधान्याददृष्टवशादात्मपरमाण्ववस्थानसंकीर्त्तनम्।

[65] एवं संहारक्रमं प्रतिपाद्य सृष्टिक्रमं प्रतिपादयन्नाह–ततः पुनरिति। यद्यपि [3]तदानीमात्मनां प्राणसम्बन्धो नास्ति, तथापि प्राणिन इत्युक्तं योग्यत्वात्। तेषां भोगभूतये सुखदुःखानुभवोत्पत्तये महेश्वरस्य सिसृक्षा सर्जनेच्छा जायते। तदनन्तरं सर्वेष्वात्मसु गता अदृष्टा वृत्तिं लभन्ते। यद्यपि युगपदुत्पद्यमानासंख्येयकार्योत्पत्तौ व्याप्रियमाणा दिगादिवन्नित्यत्वादेकैवेश्वरेच्छा क्रियाशक्तिरूपा, तथाप्येषा तत्तत्कालविशेषसहकारिप्राप्तौ कदाचित् संहारार्था भवति, कदाचित् सृष्ट्यर्था [4]स्यात्। यदा संहारार्था तदा तदनुरोधाददृष्टानां वृत्तिनिरोध औदासीन्यलक्षणो जायते। यदा त्वसौ सृष्ट्यर्था भवेत्तदा वृत्तिलाभः स्वकार्य्यजननं प्रति व्यापारो भवति। वृत्तिर्लब्धा यैस्ते वृत्तिलब्धा इति।

[पं॰] [65 अ] क्रियाशक्तिरूपेति कार्याणि प्रतिसमर्थरूपा। संकल्पमात्र(त्रा)दिति–न तु कुलालादिवत्सामग्रीयोगादित्यर्थः। प्रजापतीनिति–तत्प्रतिनियतप्रजास्रष्टृन्। मनूनिति–स्वायंभूप्रभृतीन् राजधर्मप्रवर्त्तयितृन्। ऋषीनिति–गौत-

[कु॰] [65] योग्यत्वादिति (कं. ५२.३) भाविकर्मापेक्षयेति भावः। वृत्तिं लभन्ते (कं. ५२.५) कार्याभिमुखी भवन्ति। ननु सिसृक्षा संजिहीर्षयोः कादाचित्कतयेश्वरेच्छाया नित्यता–विरोध इत्यत आह यद्यपीति (कं. ५२.५)। एव न परमाणुष्वपि क्रमे आगमः प्रमाणं द्रष्टव्यम्।

१ महेश्वरसिसृक्षा–कं. १, कं. २। २ पुनरारप्स्यन्ते–जे. १, जे. ३। अत्र पुनरुत्पत्तिकाले इत्यर्थो गृह्यते तर्हि पुनरारप्स्यन्ते इति पाठ एव साधीयान्, ब्रह्मणो निशाकालो यदि गृह्यते तदा नारप्स्यन्त इति पाठः साधीयान्। अत्र त्वस्माभिः सन्दर्भं निरीक्ष्य ब्रह्मणो निशाकालो गृहीतः सं.। ३ तदा–कं. १, कं. २। ४ स्यात्–कं. १, कं. २।

## प्रशस्तपादभाष्यम्

प्रक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति। तदनन्तरं [1]तस्मिन्नेव वायावाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पन्नः पोप्लूयमानस्तिष्ठति। तदनन्तरं [2]तस्मिन्नेव जलनिधौ पार्थिवेभ्यः परमाणुभ्यो [3]महापृथिवी समुत्पन्ना संहतावतिष्ठते। [4]तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिप्रक्रमेणोत्पन्नो महांस्तेजोराशिः केनचिदनभिभूतत्वाद्देदीप्यमानस्तिष्ठति।

## न्यायकन्दली

[5]आहिताग्न्यादित्वान्निष्ठायाः पूर्वनिपातः, दन्तजात इति यथा। सर्वात्मगताश्च वृत्तिलब्धाश्चादृष्टाश्च तानपेक्षन्ते [6]ये तत्संयोगा आत्माणुसंयोगास्तेभ्यः पवनपरमाणुषु कर्म्माण्युत्पद्यन्ते। पवनपरमाणवः समवायिकारणम्। लब्धवृत्त्यदृष्टवदात्मपरमाणुसंयोगोऽसमवायिकारणम्। अदृष्टं निमित्तकारणम्। एवं कर्म्मोत्पत्तौ तेषां पवनपरमाणूनां परस्परसंयोगा जायन्ते। तत्संयोगेभ्यश्च द्व्यणुकान्युत्पद्यन्ते। तदनु [7]त्र्यणुकानीत्यनेन क्रमेण महान् वायुः समुत्पद्यमानो नभसि आकाशे दोधूयमानः क्वचिदप्रतिहतत्वाद् वेगातिशययुक्तस्तिष्ठति। तदनन्तरं तस्मिन्नेव वायावाप्येभ्यः परमाणुभ्यः, तेनैव क्रमेण द्व्यणुकादिक्रमेण, महान् सलिलनिधिरुत्पन्नः पोप्लूयमानः प्रतिरोधकाभावात् सर्वत्र प्लवमानस्तिष्ठति। तदनन्तरं जलनिधेरुत्पत्त्यनन्तरम्, तस्मिन्नेव जलधौ पार्थिवेभ्यः परमाणुभ्यो [8]महापृथिवी समुत्पन्ना संहता स्थिरस्वभावावतिष्ठते। तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिप्रक्रमेणोत्पन्नो महांस्तेजोराशिः केनचिदनभिभूतत्वाद्देदीप्यमानस्तिष्ठति। यद्यपि पयःपावकयोः स्वाभाविको विरोधस्तथाप्यदृष्टवशेनाधाराधेयभावो नानुपपन्नः।

[पं०] भादीन् प्रथमं देवाद्येतृन्। पितृगणानिति–पितृन् कव्यवालादीन् स्वधाभोगाधिकारिणः। गणान्–कुष्मांडादीन् बलिभोगिनः।

[कु०] अप्रतिहतत्वादिति (कं. ५२.१६) तदानीं (प्रति) प्रतिघातकस्य मूर्त्तान्तरस्याभावादित्यर्थः। तस्मिन्नेव वायाविति (कं. ५२.१६) वेगवत्वात् स्पर्शवत्वाच्च गुरुत्वप्रतिबन्धकत्वदृष्टवशाद्द्रष्टव्यम्। सङ्कल्पमात्रादिति (कं. ५२.२४) तत्कालोपाधिसमकृतादिच्छाया मात्रान्न तु कुलालादिवत् कायव्यापारात्।

---

१ तस्मिन्नेवाप्येभ्यः–किं; ना; दे.। २ तस्मिन्नेव पार्थिवेभ्यः–कं. १, कं. २, दे.। तस्मिन्पार्थिवेभ्योऽणुभ्यः–ता.। ३ महापृथिवी संहता–कं. १; कं. २। ४ ततः–ता.। ५ वाहिताग्न्या–जे. १, जे. ३। ६ ये तत्संयोगास्तेभ्यः पवनपराणुषु–जे. १, परमाणुषु–जे ३। ७ त्र्यणुकम्–जे. १; जे. ३। ८ महापृथिवी संहता–कं. १, कं. २।

प्रशस्तपादभाष्यम्

एवं समुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात् तैजसेभ्योऽ[1]णुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्ड[2]मारभ्यते। तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं [3]सकलभुवनसहितमुत्पाद्य प्रजासर्गे [4]विनियुङ्क्ते।

[66-67-68-69] स च महेश्वरेण विनियुक्तो ब्रह्मातिशयज्ञानवैराग्यैश्वर्य्यसम्पन्नः प्राणिनां कर्म्मविपाकं विदित्वा कर्म्मानुरूपज्ञानभोगायुषः सुतान् प्रजापतीन् मानसान् मनुदेवर्षिपितृगणान् मुखबाहूरुपादतश्चतुरो वर्णा[5]न्यानि चोच्चावचानि [6]भूतानि च सृष्ट्वाशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्य्यैः [7]संयोजयतीति।

न्यायकन्दली

एवम् अनन्तरोक्तेन प्रक्रमेणोत्पन्नेषु महाभूतेषु महेश्वरस्य अभिध्यानमात्रात् सङ्कल्पमात्रात्, तैजसेभ्यः परमाणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डं महद् बिम्बमारभ्यते। बिम्बारम्भे पार्थिवा अवयवा उपष्टम्भकाः, तेनेदं वह्निपुञ्जप्रायं नाभूत्। तस्मिन्नण्डे चत्वारि वदनकमलानि यस्य तं ब्रह्माणं सर्वलोकपितामहं सर्वेषामेव लोकानामाद्यं पुरुषं समस्तैर्भुवनैः सहोत्पाद्य प्रजानां सर्गे जनने विनियुङ्क्ते त्वमिदं [8]कुर्विति। स च महेश्वरेण विनियुक्तो ब्रह्मातिशयज्ञानवैराग्यैश्वर्य्यसम्पन्नो ज्ञानञ्च वैराग्यञ्चैश्वर्य्यञ्च ज्ञानवैराग्यैश्वर्य्याणि, अतिशयेन ज्ञानवैराग्यैश्वर्य्याणि तैः सम्पन्न उपचितो ज्ञानातिशयात् प्राणिनां धर्म्माधर्म्मौ यथावत् प्रत्येति। वैराग्यान्न पक्षपातेन प्रवर्त्तते, ऐश्वर्य्यात् कर्म्मफलं भोजयति। प्राणिनां कर्म्मविपाकं विदित्वेति। [9]विविधेन प्रकारेण पाको विपाकः, कर्म्मणां विपाकः कर्म्मविपाकः, तं विदित्वा एतावदस्य कर्म्मफलं भविष्यतीति ज्ञात्वा, कर्म्मानुरूपाणि [10]ज्ञानभोगायूंषि येषां तान् सुतान् प्रजापतीन् दक्षादीन् मानसान् मनः[11]सङ्कल्पमात्रप्रभवान् मनुदेवर्षिपितृगणान् मनून्, देवान्, ऋषीन्,

[पं०] [66] केचिदिति – सांख्यादयः।

[कु०] [66] सृष्टिक्रमप्रतिपादनं भा(भाष्यस्या)ष्यस्यावयवार्थं व्याख्याय तात्पर्यमभिदधानः परोक्षानि दूषणानि परिहरति [12]यत्तु खल्विति (कं. ५३.१५) [13]प्राप्तसमस्तकाम इति (कं. ५३.१७) स्वभावत एव सर्वज्ञत्वादसंसारिणीति भावः। [14]परार्थ[सि]सृक्षयेति (कं. ५३.१८) प्रवृत्तेरिष्टप्राप्त्यनिष्टपरिहारार्थत्वे रागादिरुपाधिरित्यर्थः।

१ परमाणुभ्यः व्यो.। २ मुत्पद्यते – कि.। ३ सर्वं – दे.। ४ नियुङ्क्ते – दे.। ५ न्यान्यप्यु – दे.। ६ भूतानि – कि., ता., दे.। ७ संयोजयति – ता. ८ कुर्वंति – जे. १। ९ विविधप्रकारेण – जे. १, जे. ३। १० ज्ञानभोगायूंषि तान् – कं. १, कं. २। ११ सङ्कल्पप्रभवान् – कं. १, कं. २। १२ यत्खलु – कं. १, कं. २। १३ समस्तावाप्तकाम – कं. १। १४ परार्थासिसृक्षायां – कं. १, कं. २।

न्यायकन्दली

पितृगणान् । मुखबाहूरुपादतश्चतुरो वर्णान् मुखाद् ब्राह्मणान्, बाहूभ्यां क्षत्रियान्, ऊरुभ्यां वैश्यान्, पद्भ्यां शूद्रान्, *अन्यानि चोच्चावचानि क्षुद्रक्षुद्रतराणि च भूतानि सृष्ट्वा*, आशयानुरूपैः आशेते फलोपभोगकालं यावदात्मन्यवतिष्ठत इत्याशयः कर्म्म, तदनुरूपैर्धर्म्मज्ञानवैराग्यैश्वर्य्यैः, संयोजयति यस्य यथाविधं कर्म्म [1]तत्तदनुरूपेण ज्ञानादिना सम्यग् योजयति, मात्रयाऽप्यन्यथा न करोतीत्यर्थः ।

[66] यत् खलु केचिदेवमाचचक्षिरे–प्रेक्षावत्प्रवृत्तिरिष्टार्थाधिगमा स्यादनिष्टपरिहारार्था वा, न चेष्टानिष्टप्राप्तिपरिहारावीश्वरे [2]समस्तावाप्तकामे सम्भवतः, तेनास्य जगन्निर्माणे प्रवृत्तिरनुपपन्ना । तत्रोत्तरम्–प्राणिनां भोगभूतय इति । [3]परार्था सिसृक्षायां प्रवृत्तिर्न स्वार्थनिबन्धनेत्यभिप्रायः । नन्वेवं तर्हि सुखमयीमेव सृष्टिं कुर्य्यान्न दुःखशबलां करुणाप्रवृत्तत्वा[4]दित्यत्रैव परिहारः–प्राणिनां कर्म्मविपाकं विदित्वेति । परार्थं प्रवृत्तोऽपि न सुखमयीमेव करोति, विचित्रकर्माशयसहायस्य कर्त्तृत्वादित्यर्थः । न चैवं सति करुणाविरोधः, [5]दुःखोत्पादस्यापि वैराग्यजननद्वारेण परमपुरुषार्थहेतुत्वात् । यदि धर्म्माधर्म्मावपेक्ष्य करोति नास्य स्वाधीनं कर्त्तृत्वमित्यनीश्वरतादोष इत्यस्यायं प्रतिसमाधिः–आशयानुरूपैर्धर्म्मज्ञानवैराग्यैश्वर्य्यैः संयोजयति । स हि सर्वप्राणिनां कर्म्मानुरूपं फलं प्रयच्छन् कथमनीश्वरः स्यादिति भावः । नहि योग्यतानुरूप्येण भृत्यानां फलविशेषप्रदः प्रभुरप्रभु[6]र्भवति ।

कल्पादावुत्पन्नानां प्राणिनां सर्वशब्दार्थेष्वव्युत्पन्नानां सङ्केतस्याशक्यकरणत्वाच्छाब्दव्यवहारानुपपत्तिरिति चोदनायां प्रत्यवस्थानबीजमिदम्–मानसानिति । योनिजशरीरो हि महता गर्भवासादिदुःखप्रबन्धेन विलुप्तसंस्कारो जन्मान्तरानुभूतस्य सर्वस्य न स्मरति । ऋषयः प्रजापतयो मनवस्तु मानसा अयोनिजशरीरविशिष्टादृष्ट[7]सम्बन्धेनाऽभ्रष्टसंस्काराः कल्पान्तरानुभूतं सर्वमेव शब्दार्थव्यवहारं सुप्तप्रतिबुद्धवत् प्रतिसन्धत्ते, प्रतिसन्धानाच्च

[कु०] परमपुरुषार्थहेतुत्वादिति (कं. ५३.२३) कारुणिकोऽयमित्युपासकानां भक्तिश्रद्धातिशयसिद्ध एव । वचनमेतत्परमार्थतत्कारणस्वभा[वा]नुरोधित्वमस्य स्वभाव इति परिहारः, इतरथाऽपवर्गस्यैव कारुणिकतया सम्पादनप्रसक्तेरिति । कथमनीश्वरः स्यादिति (कं. ५३.२६) अचेतनप्रवर्तकत्वादीश्वरत्वमिति भावः ।

१ तदनुरूपेण–जे. १; जे. ३ । २ प्राप्तसमस्तकामे–जे. १; जे. ३ । ३ परार्थं सिसृक्षया–जे. १; जे. ३ । ४ दित्यत्रैव–जे. १; जे. ३ । ५ त्पादस्य–कं. १; कं. २ । ६ भवतीति–जे. १; जे. ३ । ७ सम्बन्धिनो दृष्ट–कं. १; कं. २ ।

न्यायकन्दली

[1]परस्परं संवदन्तः व्यवहरन्ति । तेषां व्यवहारात् तत्कालवर्त्तिनां प्राणिनां व्युत्पत्तिः, तद्व्यवहारा[2]च्चान्येषा[3]मित्युपपद्यते व्यवहारपरम्परया शब्दार्थव्युत्पत्तिरित्यर्थः ।

[67] किं पुनरीश्वरसद्भावे प्रमाणम्? आगमस्तावदनुमानञ्च । महाभूतचतुष्टयमुपलब्धिमत्पूर्वकं कार्य्यत्वाद् [4]यत्कार्य्यं तदुपलब्धिमत्पूर्वकं यथा घटः कार्य्यञ्च महाभूतचतुष्टयं तस्मादेतदप्युपलब्धिमत्पूर्वकम् । प्रमाणेन पूर्वकोटयनुपलब्धेरसिद्धं पृथिव्यादिषु कार्य्यत्वमिति चेत् ? तदयुक्तम्, सावयवत्वात्, यत्सावयवं तत्कार्य्यं यथा घटः सावयवञ्च पृथिव्यादि तस्मादेतदपि कार्य्यमेव । ननु व्याप्तिग्रहणाद[5]नुमानस्य प्रवृत्तिः, कार्य्यत्व-

[टि०] [67]		[।। अथ प्रसङ्गागतमीश्वरसिद्धिनिरूपणम् ।।]

आगमस्तावद् इतिः—नन्वागमस्याप्यनुमानेऽन्तर्भावात् द्वयोरुपादाने पौनरुक्त्यम्? न, आगमशब्देनानुमा[6]नान्तर्भावानन्तर्भावे विवादास्पदमनुमानमुच्यते, अनुमानशब्देन तु निर्विवादमिति । अत्र च

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ।।

इत्यागमः, प्र[7]सिद्धत्वान्न दर्शितः । अत्र च महाभूतचतुष्टयमिति[8] प्रस्तावतोऽनन्तरोक्तं चतुष्टयं गृह्यते ।

[पं०] [67]		आगमस्तावदिति –

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ।। इत्यागमः ।।

महाभूतचतुष्टयमिति – पृथिव्यप्तेजोवायुलक्षणम् । उपलब्धिमत्पूर्वकमिति – उपलब्धिमान् = बुद्धिमान् पूर्वकारणं यस्य तदुपलब्धिमत्पूर्वकम् । प्रमाणेन पूर्वकोटयनुपलब्धेरिति – पूर्वकोटिशब्देनादिरुच्यते । यत्किल कार्यं घटादि तस्यादिः प्रमाणेनोपलभ्यते, न तु पृथिव्यादीनामादिरुपलभ्यते, अतस्तेषां कार्यत्वं नोचितमिति पराशयः । सावयवादिति अत्रैवं प्रयोगः—कार्यं पृथिव्यादि । सावयवत्वात् । यद्यत्सावयवं तत्तत्कार्यं यथा घटः । सावयवं च पृथिव्यादि । तस्मात्तदपि

[कु०] [67] ननु सृष्टिसंहारयोश्च प्रमाणमागम एव, स चेश्वरे प्रमाणभावेनातत्पर इति शङ्कमानः पृच्छति किं पुनरिति (कं. ५४.१०) । आगमस्तावदिति (कं. ५४.१०) 'द्यावाभूमी जनयं देव एक' इत्यादिः सुप्रसिद्ध इति भावः । महाभूतचतुष्ट[य]मिति (कं. ५४.१०) सकर्तृकतया च विप्रतिपन्नं विवक्षितम् । तेन न प्राकारादौ सिद्धसाधनमित्यर्थः । प्रमाणे[ने]ति (कं. ५४.१२) कार्यत्वं नाम कारणवत्त्वम्, कारणं चोत्पत्तेः पूर्वस्मिन् क्षणे वर्त्तमानमुपपत्तिनिश्चयात्तदु ... न्निश्चयमिति भावः । तदयुक्तमिति (कं. ५४.१३) अनुमानेन निश्चयादित्यर्थः । इह

१ परस्परं बहवो—कं. १; कं. २ । २ च्चापरेषाम्—जे. १; जे. ३ । ३ मित्युत्पद्यते—कं. १ । ४ यद्यत् कार्यं—जे. ३ । ५ नुमानप्रवृत्तिः—कं. १; कं. २ । ६ मानान्तर्भावनन्तरमपि—अ, ब, क; ७ प्रसिद्धत्वात् दर्शित—अ; ८ कुतेऽन्यतरस्य त्यागेन इति—अ, ब, क; पुस्तकेषु अधिकम् ।

## न्यायकन्दली

बुद्धिमत्पूर्वकत्वयोश्च व्याप्तिग्रहणमशक्यम्, घटादिषु कर्तृप्रतीतिकाले एवाङ्कुरादिषूत्पद्यमानेषु तदभावप्रतीतेः । न चाङ्कुरत्वादीनामपि पक्षत्वमिति न्याय्यम्, गृहीतायां व्याप्तावनुमानप्रवृत्तिकाले प्रतिवाद्यपेक्षया पक्षादिप्रविभागः, इह तु सर्वदैव प्रतिपक्षप्रतीत्याक्रान्तत्वाद् व्याप्तिग्रहणमेव न सिद्धयतीत्युक्तम् । अत्र प्रतिविधीयते–[1]घटादिषु कर्तृपूर्वककार्यत्वप्रतीतिरस्ति नाङ्कुरादिष्वित्येवं द्वैतोपलम्भेऽपि व्याप्तिग्रहणसम्भवे पृथिव्यादिषूपलब्धिमत्पूर्वककार्यत्वानुमानं वर्तते–यदि चैवं द्वैतानुपलम्भाद् व्याप्तिग्रहणाभावः, तदानीं मीमांसाभाष्यकृदभिमतं सामान्यतोदृष्टमादित्यगत्यनुमानमपि न सिद्धयति, तत्रापि देवदत्तगतिपूर्वकदेशान्तरप्राप्तिग्रहणकाल एव [2]नक्षत्रादिषु केवल देशान्तरप्राप्ति-

**[टि०]** [3]विप्रतिपन्नं प्रति महाभूतचतुष्टयमिति कृतेऽन्यतरस्य त्यागेनाका[4]शस्य ग्रहणे भागासिद्धो हेतुः सिद्धान्तविरोधश्च स्यात् । [[5]तथा घटस्यापि पक्षान्तर्भूतत्वा] द्दृष्टान्तः कोऽपि न स्यात् । घटादीनां च [6]सकर्तृकत्वाभ्युपगमात् [7]भोगे (भागे) [8]सकर्तृकत्वस्य सिद्धत्वेन साध्यधर्मविशिष्टे धर्मिण्य[9]वर्तमानाद् भागासिद्धो हेतुः स्यात् । तथा 'महा'शब्देन परमाणुवद् द्व्यणुकस्यापि व्यवच्छिन्नत्वात् तस्य पक्षत्वाभावे सकर्तृकत्वासिद्धौ च सपक्षत्वाभावे [10]अकर्तृकत्वासिद्धौ च विपक्षत्वाभावे तस्य का गतिरिति [11]नोद्यं स्यात् । तस्माद् विवादाध्यासितमिति पक्षः कार्यः, सन्दिग्धकर्तृकमित्यर्थः । कार्यत्वाद्

**[पं०]** कार्यमेव । **कार्यत्वबुद्धिमत्पूर्वकत्वयोश्चेति**–कार्यत्वं साधनं बुद्धिमत्पूर्वकत्वं साध्यम् । अंकुरादिषूत्पद्यमानेषु तदभावप्रतीतेर्बुद्धिमत्पूर्वकत्वाभावप्रतीतेः । अंकुरादयो हि कार्यरूपाः, न तु बुद्धिमत्पूर्वका इति गमनिका ।

**प्रतिवाद्यपेक्षया पक्षादिप्रविभाग इति**–प्रतिवादिनोऽप्रतीतो धर्मः प्रतिवादिने साध्यतया प्रतिपाद्यत इत्यर्थः । प्रतिपाद्यपेक्षया पक्षादिप्रविभाग इति पाठान्तरम् । तत्र प्रतिपाद्यः शिष्यः । शेषं सुगमम् । **इहत्विति**–अंकुरादिषु पुनः । **प्रतिपक्षप्रतीत्येति**–अबुद्धिमत्पूर्वककार्यत्वप्रतीत्या । **मीमांसाभाष्यकृदभिमत**मीमांसाभाष्यकृत्शबरस्वामी । **सामान्यतोदृष्टमादित्यगत्यनुमानमिति**–इह त्रिधाऽनुमानम् । तद्यथापूर्ववच्छेषवच्चैव सामान्यतो दृष्टम् । तत्राद्यं कारणात्कार्य-

**[कु०]** यत्कार्यं तत्सकर्तृकमिति । **इह तु सर्वदैवेति**, (कं. ५४.१८) एवमेव व्याप्तिग्रहणे धूमरासभयोरपि व्याप्तिः स्यादिति भावः । [12]**तदा मीमांसेति** (कं. ५४.२०) यद्यप्याकाशादिदेशस्थाप्रत्यक्षतया भिन्नतया च देशान्तरप्राप्तिरादित्यस्य सिद्धा तथापि भवदभिमतमनुसृत्य प्रतिबन्धसिद्धिरिति भावः । समानन्यायतया प्रतिबन्दी मोचनमाशङ्कते **अथ तेष्विति** (कं. ५४.२२) । **तुल्यक[13]क्ष्यत्वाभावादिति** (कं. ५४.२४) कर्तुर्योग्यतयेति भावः । स्वाभ्युपगमप्रदर्शनेन तुल्यकक्ष्यत्वं दर्शयति **एवं चेदिति** (कं. ५४.२४) ।

---

१ 'घटादिष्वारम्य...वर्तते' पर्यन्तः पाठः–कं. १; कं. २ इति पुस्तकयोर्नास्ति । २ नक्षत्रादिषु देशान्तरं–कं. १; कं. २ । ३ विप्रति तु–अ, ब; ४ काशग्रहणे–अ, ब; ५ [ ] एतच्चिह्नान्तर्गतः पाठः ड पुस्तके नास्ति । ६ सकर्तृत्वा–अ, ब; ७ भावे–ड; ८ सकर्तृत्व–अ, ब; ९ वर्तनाद्–ब, क; १० 'अकर्तृकत्वासिद्धावसपक्षत्वाभावे' इत्यधिकं ब पुस्तके, अ पुस्तके अकर्तृत्वासिद्धौ च इति नास्ति । ११ नाद्यं–अ; १२ तदानीं मीमांसाभाष्यकृत्–कं १, कं. २ । १३ °कक्ष्यत्वा–कं १, कं. २ ।

## न्यायकन्दली

मात्रोपलम्भात् । अथ तेषु देशविप्रकर्षेणापि गतेरनुपलब्धौ सम्भवन्त्यां न तया व्याप्तिग्रहणहेतोर्निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य प्रतिरोधः, तुल्य[1]कक्ष्यत्वाभावात् । एवञ्चेत्, [2]अत्राप्यशरीरत्वेनाभ्युपेतस्य कर्त्तुः स्वरूपविप्रकर्षेणाप्यङ्कुरादिष्वनुपलम्भसम्भवान्न तेन निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य सामर्थ्यमुपहन्यत इति समानम् । अपि च भोः! किमनुमानेन कर्त्तृमात्रं साध्यते? पृथिव्यादिनिर्माणसमर्थो वा? कर्त्तृमात्रसाधने ताव[3]दभिप्रेतस्यासिद्धिः, नह्यस्मदादिसदृशः कर्त्ताऽभिप्रेतो भवताम्, न च तेनेदं पृथिव्यादिकार्य्यमर्वाग्दृशा शक्यनिर्माणम्, पृथिव्यादिनिर्माणसमर्थस्तु कर्त्ता न सिद्ध्यत्यनन्वयात्, अन्वयबलेन हि दृष्टान्तदृष्टकर्त्तृसदृशः [4]सिद्ध्यतीति । नायं प्रसङ्गः, कर्त्तृ[5]विशेषस्याप्रसाधनात्, व्याप्तिसामर्थ्याद् बुद्धिमत्पूर्वकत्वे सामान्ये साध्यमाने पृथिव्यादिनिर्माण-

[टि०] इत्यभूत्वाभावित्वादित्यर्थः। [6]अभूत्वाभावित्वं च पूर्वस्वरूपस्योत्तरकालावच्छिन्नं स्वरूपमिति न कार्यत्वानित्यत्वे कारणवतामेवेति भाष्यव्याख्यावसरोक्तदोषावकाशः । **सावयवत्वाद् इति** :—सावयवत्वं यद्यवयवैः सह संयोगः तदाऽऽकाशेन व्यभिचारः, समवायेऽपि सामान्येन व्यभिचारः, तस्यापि पटा[7]वयवतन्तुसमवेतत्वात् । तस्मात्स्वावयवसमवायः सावयवत्वं, द्रव्यस्य सतो [8]द्रव्ये समवाय इत्यर्थः । व्याप्यत्वासिद्धिं परो दर्शयति—[9]**ननु व्याप्तिग्रहणाद् इति** । मीमांसा-

[पं०] मनुमानमिह गीयते । १। यथा रालंबगव [मरालबक?] व्यालतमालमलिनत्विषः वृष्टिव्यभिचरन्तीह नैवंप्रायाः पयोमुचः ॥ १॥ कार्यात्कारणानुमानं यत्तच्छेषवत्मतम् । तथाविधमदीपूरान्मेघो वृष्टो यथोपरि ॥३॥ (॥२॥) यच्च सामान्यतोदृष्टं तदेव गतिपूर्विका पुंसि देशान्तरप्राप्तिर्यथा सूर्योऽपि सा तथा ॥४॥ (३) ॥ इति ॥ परवाक्यं **अथ तेष्वित्यादि** । **तयेति** = अनुपलब्ध्या । **निरुपाधिप्रवृत्तस्येति** = निर्दोषप्रवृत्तस्य । **तुल्यकक्षत्वाभावादिति** गत्यनुपलब्धेर्भूयोदर्शनस्य च तुल्यबलत्वं नास्ति । भूयोदर्शनस्य बलवत्त्वात् । गत्यनुपलब्धेश्चाबलत्वात् । तुल्यबलयोश्च विरोधो नान्ययोरिति भावः । श्रीधरवाक्यं **एवं चेत्यादि** । परः प्राह **अपि (च) भोः किमनुमानेनेत्यादि** क्वचित्तु—अथ मतं किमनुमानेनेत्यादिति पाठो दृश्यते । सोऽपि प्रमाणम् । **अनन्वयादिति** = अव्याप्तः । **अन्वयबलेनेति**—सपक्षानुगमबलेन ।

[कु०] **कर्तृमात्रमिति** (कं. ५५.१) दृष्टान्तधर्मिणि सिद्धः । शरीरा असर्वज्ञ इत्यर्थः । निर्विशेषस्य सामान्यस्य साधयितुमशक्यत्वात् । ननु पर्वतवर्ती वह्निर्महानसवर्त्तिना वह्नेरन्य एव यथा सिद्धयति तद्वदिहापि कुलालादिभ्योऽन्य एव सेत्स्यतीत्यत आह **अन्वयबलेनेति** (कं. ५५.४) । व्यक्तिभेदेऽपि तज्जातीयस्यैव सिद्धि[रि]ति भावः । **कर्तृविशेषस्येति** (कं. ५५.५) व्याप्तिमात्रे[णे]ति शेषः । तर्हि केन साधयिष्यत इत्यत आह **व्याप्तिसामर्थ्यादिति** (कं. ५५.५) । **विशेषः(प्र)सिद्ध्यतीत्यत्र** (कं. ५५.६) गूढाभिसन्धिः । तमेव विवरीतुं चोदयति [10]**न सिद्ध्यत्विति** (कं. ५५.७) विवृणोति **नेति** (कं. ५५.७) । अभिप्रेतं विशेषमुपस्थाप्य प्रतीत्यपर्यवसानं पक्षधर्मताया बलं तेनाभिप्रेतो विशेषः

---

१ कक्ष — जे. १, जे. ३ । २ अत्राशरीर — कं. १, कं. २ । ३ दभिप्रेतासिद्धः — कं. १, कं. २ । ४ सिद्धयति — जे. १, जे. ३ । ५ विशेषस्य प्रसाधनात् — जे. २ । ६ अभूतत्वा — अ, ब; ७ घटा — अ, ब; ८ द्रव्य — अ; समवायेत्यर्थः — ब ९ तमनु — अ, ब, क; १० मा — कं. १, कं. २ ।

### न्यायकन्दली

सामर्थ्यलक्षणोऽपि विशेषः [1]सिद्धचत्येव, निर्विशेषस्य सामान्यस्य सिद्धचभावात् । [2]ननु मा सिद्धचतु सामान्यमिति चेन्न, कार्य्यत्वेन सह तद्व्याप्ते[3]रप्रतिक्षेपार्हत्वात् । यदि हि व्याप्तमपि न सिद्धचति, धूमादप्यग्निसामान्यं न सिद्धचेत्, अग्निविशेषस्यानन्वितस्यासिद्धेः, [4]निर्विशेषस्य च सामान्यस्यानवस्थानात् ।

अथेदमुच्यते—द्वयमनुमानस्य स्वरूपं व्याप्तिः पक्षधर्म्मता च, तत्र [9]व्याप्तिसामर्थ्यात् सामान्यं सिद्धचति, [5]पक्षधर्म्मताबलेन चाभिप्रेतो विशेषः पर्वताद्यवच्छिन्नवह्निस्वलक्ष-[6]णात्मा सिद्धचति । अन्यथा पक्षधर्म्मतायाः क्वोपयोगः, क्व [7]चानुमानस्य गृहीतग्राहिणः प्रामाण्यम् ? एवञ्चेत्, ईश्वरानुमानेऽपि तुल्यम्, अन्यत्राभिनिवेशात् । अथ मतम्, सिद्धचत्यनुमाने विशेषोऽपि यत्र प्रमाणविरोधो नास्ति । तथा हि—धूमात्पर्वतनितम्ब[8]वर्त्ति-वह्निविशेषसिद्धौ का नामानुपपत्तिः? दृष्टो हि देशकालादिभेदः स्वलक्षणानाम् ।

[टि०] भाष्यकृत् शबरस्वामी । कार्यत्वेन सह इति:—तस्य सामान्यस्य व्याप्तिः प्रतिहन्तुं न शक्यते, व्याप्तिबलाच्च यत्सामान्यं [9]सिद्धचति तद् विशेषाक्रान्तमेव सिद्धचतीति भावः । [10]ननु [अन्येन केनचित्त[11]स्वानभिमतेन] [12]विशेषेणाक्रान्तं सेत्स्यतीत्याह पक्षधर्मताबलेन इति—अभिप्रेतो विशेषो नित्यज्ञानादिरूपः सिध्यतीति सम्बन्धः । पक्षधर्मतेति पर्वता-

[पं०] श्रीधरः—नायं प्रसंग इत्यादि । तद्व्याप्तेरिति = बुद्धिमत्पूर्वकत्वसामान्यव्याप्तेः । पक्षधर्मताबलेन चाभिप्रेतो विशेषः इति । कार्यं चेदमित्याकारेण । व्याप्तमपीति कार्यत्वेति न हेतुना व्याप्तमपीत्यर्थः । सामान्यमिति = बुद्धिमत्पूर्वकत्व-सामान्यम् । अग्निविशेषस्यानन्वितस्यासिद्धेरिति—तार्णपर्णादिरथकाष्टादिप्रभव इति यो वह्नेर्विशेषः स धूमेन सहान्वितो संयुक्तः । न हि धूमेन विशेषो ज्ञायते । किन्तु वह्निसामान्यम्, अत एव धूमेनासिद्धिरित्यर्थः । क्व चानुमानस्य गृहीतग्राहिणः प्रामाण्यमिति अग्नित्वं हि पूर्वमेव सिद्धम् समस्ति । यदि तदनुमानात्पर्वतादिधर्म्यवच्छिन्नं न प्रतीयते

[कु०] सिद्धचतीत्यर्थः । तर्हि व्याप्त्या किं क्रियत इत्यत आह—तत्रेति (कं. ५५.१०) । एवमनङ्गीकारे सर्वानुमानोच्छेदः । प्रतिबन्दी(न्दि)(न) माह यदिहीति (कं. ५५.८) दृष्टान्तदृष्टस्य विशेषस्य पक्ष एव प्रमाणबाधितत्वात्तदितरस्य चाव्याप्त्यत्वान्निर्विशेषस्य सामान्यस्य सिद्धयोगाद्धूमानुमानेऽपि समान इति भावः ।

यत्रोभयोः समो दोषः परिहारोऽपि तत्समः ।
नैकः पर्यनुयोग्यः स्यात्तादृगर्थनिरूपणे ।। इति दर्शयन्नाह

---

१ सिद्धचति—जे. १, जे. ३; सिद्धचतीति—जे. २ । २ 'ननु' जे. १ पुस्तके नास्ति; ननु न सिद्धचतु—जे. ३ । ३ रप्रतिक्षेपत्वात्—कं । ४ निर्विशेषस्यानवस्थानात्—कं । ५ पक्षधर्मताबलेन इत्याक्लिष्टः पाठः जे. ३ इत्यत्र विपर्यस्तः पुनरावृतश्च । ६ वह्निलक्षणात्मा—कं । जे. २ । ७ जे. २ इत्यत्र क्वचानुमानस्य इत्यस्य स्थाने घारानुमानस्येति पाठः अन्यत् सर्वं जे. ३ वत् आवृत्तम् । ८ नितम्बवृत्ति—कं. । ९ सामान्यं तद्—अ; १० अन्येन—अ, ब, क; 'ननु' नास्ति । ११ तदा—अ, ब, क; अ—पुस्तके [ ] एतच्चिह्नान्तर्गतः पाठः आवृत्तः । १२ विशेषणा—अ;

## न्यायकन्दली

**ईश्वरानुमाने तु विशेषो न सिद्धयति, प्रमाणविरोधात् । तथा हि–नात्र [1]शरीरपूर्वकत्वं साधनीयम्, शरीरे सत्यवश्यमिन्द्रियप्राप्तावतीन्द्रियोपादानोपकरणादिकारकशक्तिपरिज्ञानासम्भवे सति कर्त्तृत्वासम्भवात् । [2]अशरीरपूर्वकत्वञ्चाशक्यसाधनम्, [3]सर्वोहि कर्त्ता कारकस्वरूपमवधारयति, तत इच्छतीदमहमनेन निर्वर्त्तयामीति, ततः प्रयतते, तदनु कायं व्यापारयति, ततः कारणान्यधितिष्ठति, ततः करोति, अनवधारयन्नप्रयतमानः कायमव्यापारयन् [4]कारणान्यनधितिष्ठन् न करोतीत्यन्वयव्यतिरेकाभ्यां बुद्धिवच्छरीरमपि कार्य्योत्पत्तावुपायभूतम् । निखिलोपाधि[5]प्रहाणे व्याप्तिग्राहकप्रमाणादेवावधारितं न**

[**टि०**] वच्छेदलक्षणो हि विशेषो न [6]दृष्टान्ते दृष्टः किन्त्वपूर्व एवेत्यर्थः । [[7]अन्यत्राभिनिवेशाद् इति] अभिनिवेश[8]श्चेत्तव न भविष्यति तर्हि तुल्यता सत्यैवेति । **बुद्धिवच्छरीरमपि** इतिः – अत्रोपमायां 'वत्' । **वह्निरेवेन्धनेति** धूमाद्धि यो वह्निः [9]सिद्धयति स इन्धनदाहक एव सिद्धयति न त्वदाहकः । **एवं तर्हि** इति–व्याप्तिदार्ढ्यात् सामान्यं सिद्धयत्येवेति भावः ।

[**पं०**] तदा किमनुमानेन । तत्साध्यस्यार्थपूर्वमेव सिद्धत्वादित्यर्थः । **ईश्वरानुमानेऽपि तुल्यमिति** यथाऽग्निसामान्ये सिद्धयति पर्वतावच्छिन्नाग्निलक्षणो विशेषः सिध्येदेवं बुद्धिमत्पूर्वकत्वसामान्यसिद्धयति सति पृथिव्यादिनिर्माणसामर्थ्याख्यो विशेषः सेत्स्यत्येवेति भावः । **सिद्धयत्यनुमाने विशेषोऽपीति**–अनुमानमध्ये विशेषोऽपि सिद्धयतीत्यर्थः । **अतीन्द्रियोपादानोपकरणादीत्यादि**–अतीन्द्रियमुपादानपरमाणुलक्षणम्, अतीन्द्रियमुपकरणम् अदृष्टलक्षणं द्रष्टव्यम् । **कारकस्वरूपमवधारयतीति** प्रथममिति शेषः । **करणानीति**–कुठारादीनि । **निखिलोपाधिग्रह[10]णेनेति** = निःशेषदोषत्यागेन । **व्याप्तिग्राहकप्रमाणादेवेति**–अन्वयव्यतिरेकव्याप्तिग्राहकात्प्रत्यक्षप्रमाणादेवेत्यर्थः । **इन्धनविकारसामर्थ्यमिति**–इन्धनविकारस्यार्द्रत्वलक्षणस्य सामर्थ्यम् । **धूमानुमाने इति** धूमानुमाने उपायभूतं न शक्यते हातुमित्यर्थः । **तत्परित्यागे इति** = शरीरपरित्यागे । **अशरीरवदिति** = अशरीर इव ।

[**कु०**] **अथेदमिति** (कं. ५५.११) । वह्निस्वलक्षणं [11]**वह्निव्यक्तिरचमवी** न तु बौद्धवत् परमाणुपुञ्जरूपं तस्याग्रे निराकरिष्यमाणत्वात् । ननु धूमानुमाने विशेषयोर्महानसपर्वतरूपाधिकरणभेदो वस्त्वाअदः ईश्वरानुमाने कर्तृव्यापकः शरीरसम्बन्धः तदभावकृतोऽपीति वैषम्यमाशङ्क्यते **अथ मतमिति** (कं. ५५.१४) शेषोपपत्तिः पक्षधर्मताबलादिति शेषः । **अतीन्द्रियोपा[दा]नोपकरणादि[कारक]शक्तिपरिज्ञानासम्भवे सतीति** (कं. ५५.१८) योगिनामपि प्रमाणाभावेनानभ्युपगमादियदनुमानं, यो य इन्द्रियवान् सोऽस्मदाद्यतीन्द्रियसाक्षात्कारविरही इन्द्रियत्वादस्मदादिवदित्यपव्यभिचारीति द्रष्टव्यम् । परोक्षं चोपादानोपकरणज्ञानं न कर्तृत्वप्रयोजकम्, अनुमितागतपरमाण्वदृष्टादीनामस्मदादीनामङ्कुरादिकर्तृत्वप्रसङ्गात् । तर्ह्यशरीरीशङ्का [स]शरीरस्यापि कर्तव्या ।

---

१ शरीरि–जे. १, जे. २; जे ३ । २ अशरीरि–जे. १; जे. २; जे. ३ । ३ सर्वोऽपि–कं. १; कं. २ । ४ पाठोऽयं–कं. १; कं. २ इत्यनयोर्नास्ति । ५ ग्रहणे–कं. १; कं. २; प्रहाणेन–जे. २; जे. ३ । ६ दृष्टान्त–अ; ७ [ ] एतच्चिह्नान्तर्गतः पाटः ड–पुस्तके नास्ति; ८ श्चेन्न भविष्यति–ड; ९ सिद्धयः सिद्धयति–अ; १० प्रहणे–अ; ग्रहणे–के । ११ अर्थदृष्ट्या वह्निव्यक्तिरेकमेव एतादृशः पाठः पूर्वापरसम्बन्धेन स्यादिति भाति अथवा वह्निस्वलक्षणं वह्निव्यक्तिरवयवी एतादृशः पाठः स्यात्– ।

न्यायकन्दली

**शक्यते प्रहातुं वह्नेरिवेन्धनविकारसामर्थ्यं धूमानुमाने, तत्परित्यागे च बुद्धिरपि परित्यज्यताम्। प्रभावाति[1]शयादेवशरीरवदबुद्धिमानेवायमीश्वरः करिष्यति। उपादानोपकरणादिस्वरूपानभिज्ञो न शक्नोतीति चेत्? कुत एतत्? तथानुपलम्भादिति चेत्? फलितं ममापि मनोरथद्रुमेण, न तथा यावदिच्छाप्रयत्नव्य[2]वहिता बुद्धिः कार्य्योत्पत्तावुपयुज्यते यथेदमव्यवहितव्यापारं शरीरम्।**

**एवं तर्हि का गतिरत्र बुद्धिमत्कर्तृपूर्वकत्वसामान्यस्य? अगतिरेव, उभयोरपि शरीरित्वाशरीरित्वविशेषयोरनुपपत्तेः, [3]निर्विशेषस्य च [4]सामान्यस्य सर्वत्र सिद्धयभावात्। किमनुमानस्य दूषणम्? न किञ्चित्, पुरुष एवायं विशेषाभावाच्छशविषाणायमाने साधनानर्हे सामान्ये साधनं प्रयुञ्जानो निगृह्यते, यथा कश्चिन्निशितं कृपाणमच्छेद्यमाकाशं प्रति व्यापारयन्। अथानुमानदूषणं विना न तुष्यति भवान्, [5]तदानीमिदमशरीरिपूर्व-**

[टि०] **व्याप्तिग्राहकप्रमाणेति**—व्याप्तिग्राहकेण प्रत्यक्षेण घटादौ शरीरिण एव कर्तृदर्शनाद् प्रमाणबाधितेऽशरीरिकर्तृपूर्वकत्वलक्षणेऽर्थे प्रवर्तमानो हेतुः कालत्ययापदिष्टः। ननु घटादौ शरीरिपूर्वकत्वं कथं गृहीतमात्मनोऽप्रत्यक्षत्वात्? न स्वात्मा [6]तावच्छरीरी प्रत्यक्षः, परस्तु शरीरी अनुमित इति।

[पं०] अथ **वैशेषिकः** प्राह—**उपादानोपकरणादीत्यादि**। बौद्धः **कुत एतदिति**। वैशेषिकः **तथानुपलम्भादिति चेदिति**। **बौद्धः फलितं ममापीत्यादि**। कोऽर्थः? बुद्धेः मे(जे)नितत्वात्। प्रथमं हि बुद्धिस्ततः इच्छा ततः प्रयत्नेति व्यवहितकारणभूतयापि बुद्धया विना चेन्न कार्योत्पत्तिरिष्यते ततः शरीरं विना विशेषेण न घटते, तस्याव्यवहितकारणत्वादित्यर्थः। वैशेषिकः **एवं तर्हीत्यादि**। परः प्राह **अगतिरेवेत्यादि**। वैशेषिकः **किमनुमानस्य दूषणमित्यादि**। परः प्राह **न किञ्चिदित्यादि**। **भवानिति** = वैशेषिकः। **व्याप्तिग्राहकप्रमाणबाधितत्वादिति**—व्याप्तिग्राहकं प्रमाणं भूयोभूयोदर्शनम्,

[कु०] एकत्वं दर्शयन् प्रत्याचष्टे (अशरीरी)**तत्परित्याग इति** (कं. ५५.२४) प्रौढिवादमवलम्ब्य बुद्धिपरित्यागवाचोयुक्तिर्नत्वशरीरत्वादीश्वरोऽपि न बुद्धिमान् मुक्तात्मवदित्यनुमानम् आश्रयासिद्धिप्रसङ्गात्। **फलितं ममापीति** (कं. ५६.१) यथोपदानानभिज्ञः कुर्वन्नोपलभ्यते एवं कारकाण्यधितिष्ठन्नपीति समानमित्यर्थः। बुद्धेरपि शरीरं कार्योत्पत्ताव्यहितो याय इत्याह **न तथेति** (कं. ५६.१)। **का गतिरिति** (कं. ५६.२) कार्यस्य व्यापकस्येति शेषः। **अगतिरेव**—(कं. ५६.४) अप्रतीतिरेव। **किमनुमानस्येति** (कं. ५६.४) सामग्रीवैकल्यमव्युत्पाद्य कार्यानुत्पत्तिप्रतिपादनमशक्यमिति भावः। **नि[7]गृह्यन्त इति** (कं. ५६.६) असाधनीयमेतदिति। प्रतिपत्तिविरहादप्रतिपत्त्या। असा[8]धनीयेसाधनीयमिति

१ °शवाद—कं. १; कं. २। २ व्यवहिताकार्योत्पत्तौ—कं. १, कं. २। ३ निर्विशेषस्य—कं. १; कं. २। ४ सामान्यस्य सिद्धयभावात्—कं. १; कं. २; जे. १; जे. ३। ५ तदिद°—कं. १; कं. २। ६ भावत्—अ; ७ निगृह्यते—कं. १, कं. २। ८ प्रतीकमिदं कं: १. पुस्तके नास्ति;

## न्यायकन्दली

कत्वानुमानं व्याप्तिग्राहकप्रमाणबाधितत्वात् कालात्ययापदिष्टम्, व्याप्तिबलेन चाभिप्रेतमशरीरित्वविशेषं [1]विरुन्धद् विशेषविरुद्धम्, [2]तत स च विरुद्धावान्तरविशेष एवेति पूर्वपक्षसङ्क्षेपः।

[68] [3]अत्र प्रतिसमाधिः—किं शरीरित्वमेव कर्त्तृत्वमुत परिदृष्टसामर्थ्यकारक[4]प्रयोक्तृत्वम्? न तावच्छरीरित्वमेव कर्त्तृत्वम्, सुषुप्तस्योदासीनस्य च कर्त्तृत्वप्रसङ्गात्, किन्तु परिदृष्टसामर्थ्यकारकप्रयोजकत्वम्, तस्मिन् सति कार्य्योत्पत्तेः। तच्चाशरीरस्यापि निर्वहति यथा स्वशरीरप्रेरणायामात्मनः। अस्ति तत्राप्यस्य स्वकर्म्मोपार्जितं तदेव शरीरमिति

[पं०] तेन बाधितत्वात्। यद्यत्कार्यं तत्तद् बुद्धिमत्पूर्वकमित्यत्र व्याप्तिग्रहणकाले अंकुरादिभिर्व्यभिचारादिति भावः। **कालात्ययापदिष्टमिति** = प्रमाणबाधिते पक्षे हेतुः प्रयुज्यमाने कालात्ययापदिष्टः। **व्याप्तिबलेन चाभिप्रेतशरीरित्वविशेषं विरुन्धद्विशेषविरुद्धमिति** — व्याप्तिबलेन विरुन्धदिति योगः। अयं वाक्यार्थः -बुद्धिमत्पूर्वकत्वं साध्यो धर्मस्तद्विशेषोऽशरीरित्वं वक्तुरभिप्रेतं तद्विरुद्धं सशरीरत्वं व्याप्तिबलेन साध्यते। अतः कारणादशरीरिपूर्वकत्वानुमानं विशेषविरुद्धं द्रष्टव्यमिति पूर्वपक्षसंक्षेपः।

[68] —अथ समाधानम्। आत्मनः इति शरीरस्यापि। **प्रेरणोपायो न भवतीति** अत्र शरीरमिति पूर्वस्मात्सं-बध्यते। ततश्चायं वाक्यार्थः। शरीरं शरीरप्रेरणोपायो न भवति किन्त्विच्छाप्रयत्नावेव शरीरप्रेरणोपायौ। **स्वात्मनि**

[कु०] विपरीतप्रतिपत्तेर्विप्रतिपत्त्या वेति शेषः। नन्वाकाशस्य निरवयवतयाऽवयवनोदनरूपसामर्थ्यैकदेशवैकल्यादेव कुठारमुद्यच्छन्नपि गगने नोदनमकुर्वन् पुरुषो निगृह्यते तद्वदिहापि सामग्रीवैकल्यप्रयुक्तकार्याभावतयैव निग्रहो वक्तव्य इत्यत आह [5]**तदानीमिति** (कं. ५६.७)। **कर्त्(य)त्कार्यं** तत्सकर्तृकमिति घटादौ व्याप्तिं ग्राहयत् प्रमाणं तदानीमेव यत्कार्यं तच्छरीरिकर्तृकमित्यपि ग्राहयति उपजीव्यतया प्रबलं चेति भावः। **त[6]च्चेति** (कं. ५६.९) अभिमतविशेष-व्यावृत्ततया सपक्षस्यैव विवक्षि[त]त्वात्[त]त्र वर्त्तमानो विशेषविरुद्धसाध्यसामान्यविरहिणि विपक्षे वर्तमानो मुख्यो विरुद्ध इति विवेक इति भावः।

[68] **अत्रेति** (कं. ५६.१०) अनाधारित्यर्थः (?)। शरीरस्य व्यापकत्वे सिद्धे व्याप्तिग्राहकप्रमाणबाधः व्याप्तिपक्षधर्मतयोर्विरोधो वा तव(तत्र)[श]रीरस्य व्यापकत्वं कर्तृस्वरूपतया कार्यत्वं हेतुमेव प्रति वाऽन्या; एनं कर्तारं प्रतिवेति विकल्पयति **किं शरीरित्वमिति** (कं. ५६.१०)। **सुषुप्तस्येति** (कं. ५६.१२) तस्यापि हि कर्तृस्वरूप-तयाङ्गीकृतं शरीरमस्त्येवेति भावः। अस्तु तर्हि द्वितीय इत्यत आह **तच्चेति** (कं. ५६.१३)। इह शरीरस्योपायतया वा कर्तृव्यापारत्वं साहचर्यमात्रेण वा? आद्य इत्याह **यथेति** (कं. ५६.१३)। द्वितीयं शङ्कते [7]**प्रेर्यतेति** (प्रेर्यतयेति) (कं. ५६.१६)। निराकरोति **ईश्वरस्यापीति** (कं. ५६.१६)। अयं स्वभावः स्वशरीरप्रेरणे शरीरस्य भोगायतन-[त]या वा साहचर्यकर्मतया वा आर्ये (र्थे) कर्मित्वमुपाधिः। द्वितीयेत्वभिमतत्वान्न बाध्यते। न विरुध्यते चेति।

---

१ विरुन्धन्—जे. १, जे. २, जे. ३। २ ततश्च—कं. १, कं. २; तच्च—जे. १, जे. ३। ३ अस्य सम्प्रति समाधिः—जे. २। ४ प्रयोजकत्वम्—कं. १, कं. २। ५ इदमपि प्रतीकं नोपलभ्यते कं. तदिदम् इत्यस्ति। (कं. ५६.७)। ६ ततश्च—कं १.। ७ प्रेर्यतया—कं. १।

न्यायकन्दली

**चेत् ? सत्यमस्ति, परं प्रेरणोपायो न भवति, स्वात्मनि क्रियाविरोधात् । प्रेर्य्यतयाऽस्तीति चेत् ? ईश्वरस्यापि प्रेर्य्यः परमाणुरस्ति । [1]ननु स्वशरीरे प्रेरणाया इच्छाप्रयत्नाभ्यामुत्पत्तेरिच्छाप्रयत्नयोश्च सति शरीरे भावादसत्यभावाद् अस्ति तस्य स्वप्रेरणायामिच्छाप्रयत्नजननद्वारेणोपायत्वमिति चेन्न, तस्येच्छाप्रयत्नयोरुपजननं प्रत्येव [2]कारणत्वात्, लब्धात्मकयोरिच्छाप्रयत्नयोः प्रेरणाकरणकाले तु तदनुपाय[3]भूतमेव शरीरं कर्म्मत्वादिति व्यभिचारः, अनपेक्षितशरीरव्यापारस्येच्छाप्रयत्नमात्र[4]सचिवस्यैव चेतनस्य कदाचिदचेतनव्यापारं प्रति सामर्थ्यदर्शनात्, बुद्धिमदव्यभिचारि तु कार्य्यत्वमितीश्वरसिद्धिः ।**

[टि०] [64] अ[5]नपेक्षितशरीरव्यापारस्य इति–ननु स्वशरीरच[6]लने प्राणसम्बन्धमात्माऽपेक्षते इति कथमिच्छाप्रयत्न[7]सचिवस्यैव कर्तृत्वमित्युक्तम् ? मुमूर्षुशरीरगतस्य वातग्रस्तशरीरा[8]पराधंगतस्य वाऽऽत्मनो हस्तादिचलनसमर्थ-

[पं०] **क्रियाविरोधादिति** । न हि स्वमात्मानं छिनत्ति । **ईश्वरस्यापि प्रेर्यः परमाणुरस्तीति**–सोऽपि प्रेरणोपायः प्राप्नोतीति भावः । परः **शरीरे प्रेरणायेत्यादि** । **तस्येति** = शरीरस्य । **इच्छाप्रयत्नयोरूपजननं प्रति[9]कारणत्वादिति** न तु स्वप्रेरणायामिति शेषः । **तदनुपायभूतमेवेति**–तद् = शरीरम् । **कर्मत्वादिति** प्रेर्यत्वात्कर्मभूतं हि शरीरम् । **व्यभिचार इति**

[कु०] पुनरप्युपायतया दृष्टान्तेऽपि कर्तृव्यापकत्वमाशङ्कते [10]**शरीरप्रेरणाया इति** (कं. ५६.१६) [ ] या: प्रयत्नजननद्वारेणेति (कं. ५६.१८) पदेन स्वात्मनि क्रियाविरोधो नास्तीति सूचयति ।

ननु यथेच्छाप्रयत्नजननद्वारा परम्परया कारणमिति शरीरप्रेरणायामकारणमिति परित्यज्यते एवं बुद्धिरपि परित्यज्यतामिति चोद्यमपाकुर्वन्नुपसंहरति **बुद्धिमदव्यभिचारित्विति** (कं. ५६.२२) । यद्यपि नित्यः प्रयत्नो बुद्धिं नापेक्षत इति प्रयत्नवत्पूर्वकत्वमात्रमुपस्थाप्य महाभूतचतुष्टये कार्यत्वं पर्यवस्यति तथापि 'ईशानः सर्वभूतानाम्' इत्यागमबलेन नित्यज्ञानेच्छयोरपि नित्यप्रयत्नेन तुल्ययोगक्षेमत्वादपरित्याग इति भावः । पुनरपि साहचर्यमात्रेण भोगायतनस्य व्यापकत्वमाशङ्क्य कार्येच्छाप्रयत्नत्वोपाधिना परिहरति [11]**इच्छाप्रयत्नयोरिति**. (कं. ५६.२२) । ननु नित्यबुद्ध्यादि तयोराकाशादिष्वस्मदादिबुद्ध्यादिषु च परस्परपरिहारेणोपलभ्यमानयोरेकत्रेश्वरबुद्ध्यादौ समवायविरोध इत्याशङ्क्याह **न चेति** (कं. ५६.२४) ।

अयमभिसन्धिः, इह नित्यत्वबुद्धित्वयो[वि]रोधो भवन् यथासङ्ख्यमाकाशादावस्मदादिबुद्धौ च प्रतिनियताधिकरणतया वर्तमानयोर्वाऽन्यतरस्मिन्नेकत्रोपसंक्रियमाणयो र्वा ? अप्रतीति(?) परमेश्वरे उपसंह्रियमाणयोर्वा प्रतीते वा ? आद्ये तावदविरोधः उष्णशीतयोरिव पावके पयसि च वर्तमानयोः । द्वितीयेऽपि न विरोधः, अस्मदादिबुद्धौ नित्यत्वस्य गगने वा बुद्धित्वस्यानभ्युपगमात् । तृतीये तु उपसंहाराधिकस्याप्रतीतेरेव न विरोधः । न हि शशविषाणे

१ ननु स्वशरीरे इति–जे. १, जे. २, जे. ३ इत्येतेषु पुस्तकेषु नास्ति । २ कारणत्वात्–कं. १, कं. २ । ३ °भूतमेव कर्मत्वात्–जे. १, जे. २, जे. ३ । ४ सचिवस्य–जे. १, जे. ३ । ५ अनुपेक्षित–अ, ब; ६ स्खलने–अ; ७ सचिवकर्तृमि–अ; सचिवकर्तृत्व–ब, क; ८ शरीरार्धं–अ, ब; शरीरपार्श्वं–क; ९ प्रत्येवं कारकत्वात्–कं । १० स्वशरीरे प्रेरणाया–कं. १ । ११ इच्छाप्रयत्नोत्पत्तावपि–कं. १. ।

## न्यायकन्दली

इच्छाप्रयत्नोत्पत्तावपि शरीरमपेक्षणीयमिति चेत् ? अपेक्षतां [1]यत्रानयोरागन्तुकत्वम्, यत्र पुनरिमौ स्वाभाविकावासाते तत्रास्यापेक्षणं व्यर्थम् । न च बुद्धीच्छाप्रयत्नानां नित्यत्वे कश्चिद् विरोधः । दृष्टा हि रूपादीनां गुणानामाश्रयभेदेन द्वयी गतिः– [2]नित्यतानित्यता च । तथा बुद्ध्यादीनामपि भविष्यतीति । सेयमीश्वरवादे वादि- [3]प्रतिवादिनोरपि पराकाष्ठा । अतः परं प्रपञ्चः ।

[टि०] स्येच्छाप्रयत्नसद्भावेऽपि पादच[4]लनासामर्थ्यात्? सत्यम् । तथापि शरीरानपेक्षस्यैव तावत्तत्रापि कर्तृत्वमस्त्येवेति । **दृष्टा हि** इति–जलपरमाणुरूपादयो हि नित्याः, अवयविगता[5]स्त्वनित्याः ।

[पं०] अशरीरित्वाख्याहेतोः– । **कदाचिदिति** स्वशरीरप्रेरणायाम् । **बुद्धिमदव्यभिचारि तु कार्यत्वमिति**–कोऽर्थः? कार्यत्वहेतुशरीरत्वं व्यभिचरति । बुद्धिमत्त्वं तु न व्यभिचरतीत्यर्थः । **अस्यापेक्षणमिति** = शरीरस्यापेक्षाणाम् । **दृष्टा हि रूपादीनां गुणानामाश्रयभेदेन द्वयी गतिरिति**–ये नित्यद्रव्याश्रिता रूपादयस्ते नित्याः । ये त्वनित्यद्रव्याश्रितास्तेऽनित्याः ।

[कु०] उष्णत्वशीतत्वे अपि विरुध्येते इति । चतुर्थः परिशिष्यते तत्राह–[6]**दृष्टा** हीति (कं. ५६.२५) । नित्यता पयःपरमाण्वादौ घटादावनित्यता तथा बुद्ध्यादीनामिति । ईश्वरे धर्मिग्राहकप्रमाणादेव नित्यता बुद्धेः । न ह्यस्ति सम्भवः सर्गादौ महाभूतोपादानादिबुद्धिरनित्या भवतीति । अस्मदादिबुद्धौ चानित्यताप्रमाणत्व एवेति । एवं कर्तृत्वाशरीरित्वयोरपि कुलालादौ शुकादौ च परस्परपरिहारेणोपलभ्यमानयोर्धर्मिग्राहकादेः प्रमाणादीश्वरे विरोधः परिहरणीय इति भावः ।

एवमसिद्धत्वानैकान्तिकत्वकालात्ययापदिष्टत्वविरुद्धत्वाद्याशङ्क्य परिहृतानि । घटादौ सपक्षे वर्तमानतयाऽनध्यवसितत्वमनाशङ्कनीयमेव । ईश्वरो न कर्ता मुक्तात्मवदित्यादेः प्रतिपक्षस्य चाश्रयासिद्धिर्धर्मिग्राहकप्रमाणबाधाभ्यामनाशङ्कनीयत्वमेव । प्रकरणसमत्वम्, अस्मदादिशक्यज्ञानोपादानत्वं क्रियादिदर्शन(:)कृतबुद्धिविषयत्वमित्येवमादीनामुपाधितया शङ्क्यमानानामस्मदादिकर्तृत्वप्रयोजकतया कर्तृत्वसामान्यं साध्यं प्रति अव्यापकत्वात्स्पष्टमनुपाधित्वमिति सर्वहेत्वाभासशङ्का निराकरणादनवद्यमनुमानमित्याशयेनोपसंहरति **सेयमिति** (कं. ५६.२६) । ननु जीवानामेवादृष्टद्वारा महाभूतोपादानपरमाण्वधिष्ठानसम्भवात्सिद्धसाधनमस्तु दूषणं स चासिद्धभेद एव संदिग्धसाध्यतारूपलक्षणविरहात् तत्प्रवृत्तेर्हेतोरपक्षधर्मत्वादित्यत आह अतः **परमिति** (कं. ५७.१) ।

---

१ यत्र तयोः–कं. १, कं. २ । २ नित्यत्वमनित्यत्वं च–जे. १; नित्यता चानित्यता च–जे. २ । ३ °वादिनोः परा°–कं. १, कं. २ । ४ चलन–अ, ब; ५ ह्यनित्याः–अ, ब, क; ६ दृष्टा–कं. १, कं. २ ।

## न्यायकन्दली

[69] आत्माधिष्ठिताः परमाणवः प्रवर्तिष्यन्त इति चेन्न, तेषां स्वकर्मोपार्जितेन्द्रियगणाधीनसंविदां [1]शरीरोत्पत्तेः पूर्वं सर्वविषयावबोधविरहात्। अस्त्यात्मनामपि सर्वविषयव्यापि [2]सहजचैतन्यमिति चेन्न, सहजं शरीरसम्बन्धभाजां तत् केन [3]विप्लुतं येनेदं सर्वत्रापूर्ववदव[4]भासयति। शरीरावरणतिरोधानात् तदात्मन्येव समाधीयते, न बहिर्मुखं भवतीति चेत्? व्यापकत्वेन तस्य विषयसम्बन्धानु[5]च्छेदेन नित्यत्वेन च विषयप्रकाशस्वभावस्यानिवृत्तौ का तिरोधानवाचोयुक्तिः? वृत्तिप्रतिबन्धश्चै[6]तन्यस्य तिरोधानमिति चेत्? कथं तर्हि शरीरिणां विषयग्रहणम्? क्वचिदस्य [7]वृत्तयो न निरुध्यन्त इति चेत्? कुतोऽयं विशेषः? इन्द्रियप्रत्यासत्तिविशेषाद् यद्येवम्, इन्द्रियाधीनश्चैतन्यस्य विषयेषु वृत्तिलाभो न सन्निधिमात्रनिबन्धनः, सत्यपि व्यापकत्वे सर्वार्थेषु प्र[8]वृत्त्यभावादिन्द्रियवैयर्थ्यप्रसङ्गाच्चेति साधूक्तमशरीरिणामात्मनां न विषयावबोध इति।

[टि०] [69] परमाणवः चेतनाधिष्ठिताः कार्याय प्रवर्तन्ते अचेतनत्वाद् घटवदित्याशङ्क्याह–आत्माधिष्ठिता इति। समाधीयते विलीनं भवतीत्यर्थः। साधूक्तमिति:–अ[9]स्माभिरिति शेषः। पराञ्चि खानि इतिः–ब्रह्मा हि पराञ्चि

[पं०] [69] तेषामिति = आत्मनाम्। शरीरोत्पत्तेः[10] पूर्वं विषयावबोधविरहादिति–विषयावबोधाभावे वस्तु(स्तु)तोऽधिष्ठातृत्वमिति भावः। येनेति = येन हेतुना। इदमिति = चैतन्यम्। अवभासयतीति अत्र विषयानिति शेषः। तदिति = चैतन्यम्। समाधीयते इति = लीयते। तस्येति = ज्ञानस्य। वृत्तिप्रतिबन्ध इति – शक्तिप्रतिबन्धः। शरीरिणामिति = सशरीराणाम्। इन्द्रियप्रत्यासत्तिविशेषादिति इन्द्रियप्रत्यासत्तिलक्षणो यो विशेषः उत्कृष्टतेति यावत्।

[कु०] [69] इह कारणाधिष्ठानं नाम ज्ञात्वा प्रवर्तनं न तु कार्यादिभोगित्वमात्रम् इतरथा कुलालादिप्रसङ्गा(त्)। तच्च सर्गादौ भोक्तृणां सत्यपि कर्मसम्बन्धेन न शक्यमित्याह न तेषामिति (कं. ५७.२)। अस्त्यात्मनामिति (कं. ५७.३) इन्द्रियाद्यनेकजन्मनामेकजन्मस्यापि ज्ञानस्य तत्र नियमेन समवायस्यान्यथानुपपत्त्या कल्पितमिति भावः। सर्वत्रापूर्ववदिति (कं. ५७.४) अज्ञानमेव विषयमालम्ब्य ज्ञानोत्पत्तिदर्शनान्मृत्पिण्डादावसतोऽपि घटादेः समवायवत् कारणस्वभावेनाप्यथोपपत्तेरर्थापत्तिः परिक्षीणेति भावः। अपूर्ववद्विषयावलम्बनस्यान्यथोपपत्तिमाशङ्कते शरीरेति (कं. ५७.५)। इह तिरोधानं[नात्] सम्बन्धः प्रतिबन्धो वा चक्षुपटयोरिव पटादीनां सम्बन्धिन एव निवर्तनं वा(त्)प्रदीपस्येव वाय्वादिनेति। उभयमपि न सम्भवतीत्याह [11]त(द्)–व्यापकत्वेनेति (कं. ५७.६)। यद्येवमिति

---

१ शरीरोत्पत्तेः सर्वविषया–कं. १, कं. २। २ सहजं चैतन्यमिति चेत् शरीरसम्बन्धभाजां–जे. १, जे. २, जे. ३। ३ विप्लुतम्–जे. १, जे. २, जे. ३। ४ आभासयति–जे. १, जे. २, जे. ३। ५ °नुच्छेदे–जे. १, जे. २, जे. ३। ६ चैतन्यतिरोधान–कं. १, कं. २। ७ वृत्तयो निरुध्यन्ते–जे. १। ८ वृत्त्यभावादिन्द्रियवैयर्थ्यप्रसङ्गाच्च–कं. १। ९ अस्माभिरित्यावृत्तम्–अ पुस्तके; १० त्पत्तेः विषयाव°–कं। ११ चेद्व्यापकत्वेन–कं. १.।

## न्यायकन्दली

तथा चैके [1]वदन्ति–"पराञ्चि [2]खानि व्यतृणत् स्वयम्भूस्तस्मात् [2]परान् पश्यति नान्तरात्मन्" इति । अनवबोधे च [3]तेषां नाधिष्ठातार इति तेभ्यः परः सर्वार्थदर्शिसहजज्ञानमयः कर्त्तृस्वभावः कोऽप्यधिष्ठाता कल्पनीयः, चेतन[4]मधिष्ठातारमन्तरेणाचेतनानां प्रवृत्त्यभावात् ।

स किमेकोऽनेको वा ? एक इति वदामः । बहूनामसर्वज्ञत्वेऽस्मदादिवदसामर्थ्यात्, सर्वज्ञत्वे त्वेकस्यैव सामर्थ्यादपरेषामनुपयोगात् । न च [5]समप्रधानानां भूयसां सर्वदैकमत्ये हेतुरस्तीति कदाचिदनुत्पत्तिरपि कार्य्यस्य स्यात्, एकाभिप्रायानुरोधेन सर्वेषां प्रवृत्ता-[6]वेकस्यैवेश्वरत्वं नापरेषाम्, [7]मठपरिषदामिव कार्य्योत्पत्त्यनुरोधेन सर्वेषामविरोधे प्रत्येकमनीश्वरत्वम् । तदेवं कार्य्यविशेषेण [8]सिद्धस्य कर्त्तृविशेषस्य सर्वज्ञत्वान्न कुत्रचिद्वस्तुनि विशेषानु[9]पलम्भोऽस्ति । अतो न तन्निबन्धनं मिथ्याज्ञानम्, मिथ्याज्ञानाभावे च

[टि०] बाह्यार्थग्राहकाणीन्द्रियाणि सृष्टवान् त[10]स्मात् कारणादस्मदादिशरीरान्तर्वर्तमान आत्मा परान् शरीराद्युपादानयोग्यान् परमाणूंश्च पश्यति । परोक्षार्थं इन्द्रियैरेव ग्राह्यो नात्मना । इन्द्रियाणि च न परमाणुग्रहणे समर्थानीति भावः । 'व्यतृणत्' इति तृटे [11]रौधादिकस्य ह्यस्तन्या रूपम् । अतो न तन्निबन्धनम् इति । शुक्तिकाविशेषानुपलम्भे हि तत्र

[पं०] तस्मादिन्द्रियप्रत्यासत्तिविशेषात् । साधूक्तमिति अस्माभिरिति शेषः । अशरीरिणामिति – अजातशरीराणाम् । पराञ्चीति परार्थगामीनि । व्यतृणदिति – असृजत् । परानिति – परान्भावान् । तेषां नाधिष्ठातार इति – तेषां विषयाणामधिष्ठातारोऽस्मदादीनामात्मनो न भवन्तीत्यर्थः । अविरोधे इति – ईश्वरत्वाविरोधे । अनुभवसद्भावादिति –

[कु०] (कं. ५७.९) इन्द्रियादिव्यापारानन्तरभाविविषयावभासिव्यतिरिक्तमिति यच्चैतन्येन प्रमाणमस्ति, अर्थापत्तेश्चाभिहितमेव दूषणमिति भावः ।

नान्तरिति (कं. ५७.१३) सहजं चैतन्यं विषयावभासव्यतिरिक्तमात्मनो नास्तीत्यर्थः उपसंहरति तेभ्य (कं. ५७.१३) इति । एवमुपलब्धिमत्तया सिद्धस्यात्मभेदत्वात् समस्तात्मधर्मप्रसक्तौ(क्तौ) संसारित्वेनानीश्वरापातशङ्कानिरासाय गुणान्तवधारयन्नितरानपेक्षया द्वित्वसङ्ख्याप्रश्नपूर्वकं निरस्यति स किमिति (कं. ५७.१५) । उप[ल]ब्धिमत्पूर्वकमित्यत्र समासे विभक्तिलोपेन सङ्ख्याविशेषानवगमात् प्रश्नः बहु[त्व]स्ते किमसर्वज्ञाः सर्वज्ञा वा ? आद्यं दूषयति

---

१ पठन्ति – जे. १, जे. २, जे. ३ । २ पराङ् – कं. १, कं. २ । परान्–पदार्थान्–टिप्पण – जे. १ । ३ तेषां–परमाणूनामधिष्ठातारः–जे. १ – टिप्पण । ४ चेतनव्यापार – जे. १, जे. २, जे. ३ । ५ समस्तप्रधानानां – जे. ३ । ६ °कस्येश्वरत्वं–कं. १; कं. २ । ७ 'मठ' इति जे. १, जे. २, जे. ३ पुस्तकेषु नास्ति । ८ सिद्धकर्तृविशेषस्य – जे. ३ । ९ नुपलम्भः – कं. १; कं. २ । १० तत्कारणाद् – अ, ब; ११ रोधादिकस्य – अ, ब;

## न्यायकन्दली

न तन्मूलौ रागद्वेषौ, तयोरभावान्न तत्पूर्विका प्रवृत्तिः, [1]प्रवृत्त्यभावे च न तत्साध्यौ धर्म्माधर्म्मौ, [2]तयोरभावात् तज्जयोरपि सुखदुःखयोरभावः, सर्वदैव चानुभवसद्भावात् स्मृतिसंस्कारावपि नासाते इत्यष्टगुणाधिकरणो भगवानीश्वर इति केचित्। अन्ये तु बुद्धिरेव तस्याव्याहता क्रियाशक्तिरित्येवं वदन्त इच्छाप्रयत्नावप्यनङ्गीकुर्वाणाः षड्गुणाधिकरणोऽयमित्याहुः। स किं बद्धो मुक्तो वा? न तावद् बद्धः, बन्धनसमाज्ञातस्य [3]बन्धहेतोः क्लेशादेरसम्भवात्। मुक्तोऽपि न भवति, बन्धविच्छेदपर्यायत्वान्मुक्तेः। नित्यमुक्तस्तु स्यात्, यदाह तत्रभवान् पतञ्जलिः—"क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" इति।

[टि०] रजतभ्रमः। **बन्धन[4]समाम्नातस्यैतस्य** इतिः—बन्धनरूपेण कथितस्य। **क्लेशकर्मेति**—अविद्या–अस्मितारागद्वेषाभिनिवेशाः क्लेशाः, कर्माणि या[5]गादीनि, विपाका जात्यायुर्भोगाः, आशया धर्माधर्मसंस्काराः, संस्काराणां तु केवलानामशयत्वे कर्मशब्देन धर्माधर्मयोरभिधानम् ॥ ७ ॥ [6]वायुः ॥

[पं०] ज्ञानसद्भावात्। **अष्टगुणाधिकरण इति**—संख्यापरिमाणपृथक्त्वसंयोगबुद्धिविभागेच्छाप्रयत्नाख्याऽष्टौ ईश्वरगुणाः। **क्लेशकर्मविपाकाशयैरिति**—अविद्याऽस्मितारागद्वेषमोहाभिनिवेशाः क्लेशाः। मिथ्याज्ञानमविद्या स्थूलाहंकारोऽहमित्यस्मिता। विषयेष्वभिसंगो रागः। अप्रीतिलक्षणो द्वेषः। मोहो वैचित्र्यमज्ञानं वा। अभिनिवेश आग्रहः। स च द्विधा—तत्त्वाभिनिवेशः मिथ्याभिनिवेशश्च। कर्मशुभाशुभस्वरूपम्। जात्यायुर्भोगा विपाकाः. संसारवासना = आशयः। क्लेशाश्च कर्म च विपाकाश्च आशयश्चेति द्वन्द्वसमासः ॥ ईश्वरसिद्धिः ॥ छ ॥

[कु०] **बहूनामिति** (कं. ५७.१६)। द्वयोरप्युपलक्षणम्। द्वितीयं दूषयति **सर्वज्ञत्व** इति (कं. ५७.१६)। **अनुपयोगादिति** (कं. ५७.१७) अनेककल्पनागौरवं दर्शयति किं च ते प्रत्येकं कार्यकारणा वा समुदिता वा। आद्येऽपि समप्रधानभावभाजो वा न वा?। तत्राद्यं दूषयति **न चेति** (कं. ५७.१७)। द्वितीयं दूषयति **एकाभिप्रायेति** (कं. ५७.१८)। समुदितानां कार्यकारित्वत्वाद्[त्व]दूषयति **पेरिषदामिवेति** (कं. ५७.१९)। संसारित्वाप्रयोजकामिथ्याज्ञानादि(दी)नपाकरोति **तदेवमिति** (कं. ५७.२०)। अस्मदाद्यसर्वज्ञाशक्यत्वं कार्यस्य विशेषः। **सुखदुःखयोरिति** (कं. ५७.२३) शरीरेन्द्रियाणामुपलक्षणम्। एवमसंसारित्वादेवा बद्धत्वे। अत एव बन्धप्रतियोगिमुक्त्याभावे च सिद्धे स्पष्टार्थमुभयाभावं प्रश्नपूर्वकं व्युत्पादयति **स किमिति** (कं. ५७.२६)। **नित्यमुक्त** इति (कं. ५८.३) नित्योऽसंसारी भगवानीश्वरः सिद्ध इत्यर्थः।

---

१ प्रवृत्त्यभावेन—जे. २। २ तयोश्चाभावात्—जे. २। ३ दुःखहेतोः—जे. १, जे. २, जे. ३। ४ समाज्ञातस्यैतस्येति—जे. १, जे. ३; समाम्नातस्यैतेति—अ, ब, क; ५ योगादीनि—अ, ब; ६ यद्यपि वायुनिरूपणं पूर्वमेव समाप्तं किन्तु प्रसङ्गागतं सृष्टिसंहारनिरूपणमीश्वरसिद्धिश्च अत्रैव समाविष्टे इति वायुनिरूपणप्रकरणसमाप्तिः टिप्पणकारेणात्र सूचिता।

### प्रशस्तपादभाष्यम्

[70] आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्यस्तिस्रः सञ्ज्ञा भवन्ति, [1]आकाशः कालो दिगिति ।

[2]तत्राकाशस्य गुणाः शब्दसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः ।

### न्यायकन्दली

[70] आकाशादीनां त्रयाणां सङ्क्षेपार्थमेकेन ग्रन्थेन वैधर्म्यं कथयति—आकाशकालदिशामिति । आकाशस्य कालस्य दिशश्चैकैकत्वादपरजातिर्नास्ति, तस्या व्यक्तिभेदाधिष्ठानत्वात् । अपरजात्यभावे चाकाश इति काल इति दिगिति तिस्रः सञ्ज्ञा पारिभाषिक्यो न पृथिव्यादिसञ्ज्ञावदपरजातिनैमित्तिक्य इत्यर्थः । [3]सञ्ज्ञैवैषामितरवैधर्म्यं यस्याः सञ्ज्ञाया विना निमित्तेन शृङ्गग्राहिकया सङ्केतः सा पारिभाषिकी यथायं देवदत्त इति । यस्याः पुनर्निमित्तमुपादाय सङ्केतः सा नैमित्तिकीति विवेकः ।

सम्प्रति [4]प्रत्येक[5]निरूपणार्थमाह—[6]तत्राकाशस्य गुणा इति । तेषां त्रयाणां मध्ये आकाशस्य गुणाः शब्दसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः । शब्दादिगुणयोगोऽप्याकाशस्य वैधर्म्यम् ।

[टि०] (।। अथाकाशनिरूपणम् ।।)

[70–71] [7]**योऽप्ययमधिकरणेति**:—[8]यस्तिहायमालोको घनान्धकारे खद्योतदर्शनाद् 'इहायं खद्योत' इति च प्रत्ययः सोऽपि तदवयवापेक्ष एवेति । अकारणगुणपूर्वकत्वस्यासिद्धिमाशङ्क्याह [9]**रूपादिवद्** इति:—विवादाध्यासितः शब्दः[10] [शङ्खादिसमवायकारणपूर्वो न भवति] शङ्खाद्युत्पत्त्यनन्तरम[11]नुत्पादात्, व्यतिरेके यथा रूपम् ।

[पं०] [70] **शृङ्गग्राहिकयेति**—यदयं गौरिति हस्तादिना दर्शयते सा शृंगग्राहिका । तया शृंगग्राहिकया साक्षात्कारेणेति यावत् । लक्षणशब्दोऽयम् । **सा नैमित्तिकीति**—यथा, गच्छतीति गोः । **शब्दादिगुणयोगोऽपीति** न केवलं पारिभाषिकी संज्ञा पृथिव्यादिभ्यो वैधर्म्यं शब्दादिगुणयोगोऽपि वैधर्म्यमितिरपेरर्थः । परवाक्यं—**नन्वाकाशस्येत्यादि** ।

[कु०] [70] समस्य निरूपणे कारणमाह **संक्षेपार्थमिति** (कं. ५९.४) **व्यक्तिभेदाधिष्ठानत्वादिति** (कं. ५९.६) अनेवंभूतत्वे त्वनुवृत्तिप्रत्ययस्य प्रमाणस्याभावादित्यर्थः । **यस्याः सञ्ज्ञाया** इति (कं. ५९.८) नन्वाकाशशब्दस्यापि शब्दाश्रयत्वं निमित्तमस्ति तत्कथमियं पारिभाषिकीति चेत् न, व्यक्तिस्वरूपस्यैव सङ्केतग्रहणे शक्ये सति शब्दाश्रयत्वस्य निमित्तत्वात् कल्पनायां कल्पनागौरवप्रसङ्गात् शब्दवदाकाशमिति चानयोः पर्यायतया सह प्रयोगानुपपत्तिप्रसङ्गाच्चेति सञ्ज्ञैवेत्यवधारणमपरजातीति व्यवदच्छेदमात्रपरमन्यथा शब्दादिगुणयोगवैधर्म्यमित्यादिभिर्वक्ष्यमाणविरोधप्रसङ्गात् । **शब्दादिगुणयोगोऽपीति** (कं. ५९.१२) शब्दस्वरूपेण वैधर्म्यं सङ्ख्यावदस्तु तत्साहचर्येणेति भावः ।

---

१ आकाशं–कि; व्यो. । २ तत्राकाशगुणाः–कि; तस्य गुणाः–व्यो । ३ सञ्ज्ञैषा–कं. १; कं. २ । ४ प्रत्येकं–कं. १; कं २। ५ निरूपणार्थमिदमाह–जे. ३ । ६ तत्राकाशस्येति–जे. १; जे. २; जे. ३। ७ याप्यय–अ; ८ ये–अ, ब; ९ पररूपादिवद–मु; १० [ ] एतच्चिह्नान्तर्गतः पाठः ड पुस्तके नास्ति । ११ मुत्पादात्–अ, ब, क;

### प्रशस्तपादभाष्यम्

**[71-72-73-74] [1]शब्दः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वादयावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेश्च न [2]स्पर्शवद्विशेषगुणः। बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वादात्मन्यसमवायादहङ्कारेण विभक्तग्रहणाच्च नात्मगुणः। श्रोत्रग्राह्यत्वाद् [3]वैशेषिकगुणभावाच्च न दिक्कालमनसाम्। [4]परिशेषाद् गुणो भूत्वा आकाशस्या[5]धिगमे लिङ्गम्।**

### न्यायकन्दली

**[71] नन्वाकाशस्य सद्भावे किं प्रमाणम्? प्रत्यक्षमेव, वियति पतति पतत्त्रिणि चक्षुर्व्यापारेणेहायं पक्षी प्राप्तो नेहेति नियतदेशाधिकरणा प्रतीतिरिति [6]केचित्, तदयुक्तम्, अरूपस्य द्रव्यस्य चाक्षुषत्वाभावात्। योऽप्ययमधिकरणप्रत्ययस्तत्र वितताऽलोकमण्डलव्यतिरेकेण [7]न द्रव्यान्तरं प्रतिभाति, अत आकाशस्य सद्भावे परिशेषानुमान-म्[8]पन्यस्यञ्छब्दस्य द्रव्यान्तरगुणत्वं निषेधति–शब्द इति।**

**[टि०]** आश्रयोत्पत्त्यनन्तरमित्यर्थकथनम्, तस्य शङ्खादेः शब्दं प्रत्याश्रयत्वस्या[9]सिद्धेः। **सामान्यवि[10]शेषेति** [11]शब्दो-विशेषगुणः, [12]सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियग्राह्यत्वात् रूपादिवत्, अत्र सामान्यविशेषवत्त्वे सतीति रूपत्वेन बाह्ये-त्यात्मगतैकत्वेन, एकेति घटादिसङ्ख्यया, इन्द्रियेत्याकाशेन व्यभिचारवारणार्थम्। [13]योगीन्द्रियव्यवच्छेदार्थमस्मदादीति

**[पं०] [71]** श्रीधर एकैकीयमतमाह–**प्रत्यक्षमेवेत्यादिना**। **केचि[14]दिति**–मीमांसकाः। **स्वाश्रयस्य यत्समवायिकारण-मित्यादि**–स्वाश्रयस्य शंखादेर्यत्समवायिकारणं पार्थिवपरमाणवस्तद्गुणपूर्वकः शब्दो न भवतीत्यर्थः। **अतः सुखादिव-त्स्पर्शवतां विशेषगुणो न भवतीति**–सुखादयो हि तस्याश्रयसमवायिकारणगुणपूर्वकास्तेषां हि स्वाश्रय आत्मा, तत्समवायिकारणं च नैवास्ति नित्यत्वादिति भावना। **सामान्यविशेषवतस्तस्य बाह्येन्द्रियग्राह्यत्वेन रूपादिवद्विशेष-गुणत्वसिद्धेरिति**–अत्रैवं प्रयोगो विधेयः शब्दो विशेषगुणः, सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियग्राह्यत्वात्, रूपादिवत्।

**[कु०] [71]** नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते इति धर्मिण्युपलब्धे लक्षणं वक्तव्यमित्यभिप्रायेण पृच्छति **नन्विति** (कं. ५९.१३)। **नियतदेशाधिकरणा प्रतीतिरित्यते** (कं. ५९.१४) देश(देश) ग्रहणं कालव्यावर्तनाय। [15]**अरूपद्रव्यस्येति** (कं. ५९.१५) अत्र द्रव्यग्रहणं गुणकर्मसामान्यव्यावृत्तये। **स्वाश्रयस्येति** (कं ५९.१७) पराभिप्राये-णेति भावः। **सामान्य[16]विशेषत्व** (५९.२०) इति पदं रूपत्वादिभिर्व्यभिचारपरिहाराय। आत्मना व्यभिचारपरिहाराय बाह्यग्रहणम्। सङ्ख्यादिभि[र्व्यभि]चारपरिहारायैकग्रहणम्। **प्रत्यक्षत्वे सतीत्यनुवर्तनीयमिति** (कं. ६०.१) पिठरपाकस्य निराकरिष्यमाण[त्वा]न्न तद्रूपादिभिर्व्यभिचार इत्यर्थः।

---

१ तत्र शब्दः–कि। २ स्पर्शवतां–दे। ३ विशेषगुणभावाच्च–कि। ४ पारिशेष्यात्–कि। ५ °धिगमने–ता। ६ चेत्–कं. १; कं. २। ७ 'न' जे. २ पुस्तके नास्ति। ८ उपन्यस्य–जे. २। ९ सिद्धः–अ, ब; १० विशेषवत–मु. जे. १, जे. ३; ११ शब्दोऽपि इति भ्रष्टं अ पुस्तके; १२ सामान्यत्वे–अ, ब, क; १३ योगीन्द्र–अ, ब, क; १४ अयं पाठो कन्दल्यां नास्ति। १५ अरूपस्य द्रव्यस्य–कं. १.। १६ विशेषवत।

## न्यायकन्दली

स्वाश्रयस्य [1]यत्समवायिकारणं तद्‌गुण[2]पूर्वकः। शब्दो न भवति, [3]पटरूपादिवदाश्रयोत्पत्त्यनन्तरमनुत्पादात्। अतः सुखादिवत् स्पर्शवतो विशेषगुणो न [4]भवति। विशेषगुणत्वप्रतिषेधे सामान्यगुणत्वं भविष्यतीति नाशङ्कनीयम्, सामान्यविशेषवतस्तस्य बाह्यैकेन्द्रियग्राह्यत्वेन [5]रूपादिवद्विशेषगुणत्वसिद्धेः। पार्थिवपरमाणुरूपादयः स्पर्शवद्विशेषगुणा अथ चाकारणगुणपूर्वकाः परमाणोरकार्य्यत्वात् तद्व्यवच्छेदार्थं प्रत्यक्षत्वे सतीति कृतम्। यावद्द्रव्यं शब्दो न भवति सत्येवाश्रये शङ्खादौ तस्य विनाशात्, अतोऽपि सुखादिवत् स्पर्शवद्विशेषगुणो न भवति।

तत्रापि पार्थिवपरमाणुरूपादिभिरेव व्यभिचारः, तेषां सत्येवाश्रये [6]परमाणावग्निसंयोगेन विनाशात् तदर्थं प्रत्यक्षत्वे सतीत्यनुवर्त्तनीयम्। हेत्वन्तरञ्चाह–आश्रयादन्यत्रोपलब्धेश्च। स्पर्शवद्विशेष[7]गुणत्वे च शब्दस्य शङ्खादिराश्रयो वाच्यः। स च तस्मादन्यत्र

[टि०] कार्यम्। स्नेहद्रवत्वयो द्वीन्द्रियग्राह्यत्वेऽपि सपक्षैकदेशवृत्तित्वमेव हेतोः न तु[8] दूषणम्। आश्रयादन्यत्र इति–अत्राप्याश्रयग्रहणमर्थकथनार्थम्, शब्दं प्रति [9]शङ्खादेराश्रयत्वासिद्धेः। वाक्यं तु विवादास्पदः शब्दः शङ्खादिविशेषगुणो न भवति, तदन्यत्रोपलभ्यमानत्वात्, अन्वयेन यथा स्नेहः, व्यतिरेकेण तद्‌गतरूपवद् इति कर्तव्यम्।

[पं०] रूपत्वादीनां बाह्यैकेन्द्रियग्राह्यत्वे सत्यपि विशेषगुणत्वाभावात्। सामान्यविशेषवत्त्वे सतीति विशेषितम्। ग्राह्यत्ववदित्युक्ते व्योमादिपरोक्षार्थं (१) घटादिप्रत्यक्षार्थसंख्या (२) आत्मगतैकत्वसंख्या (३) रूपत्वैर्व्यभिचारस्तदपोहाय क्रमेण–इन्द्रिय–१– एक –२– बाह्य –३– सामान्यविशेषवत्त्वादिति –४– विशेषणानीति सूक्ष्मेक्षिकया परिभाव्यम्। तद्व्यवच्छेदार्थं प्रत्यक्षत्वे सतीति कृतमिति। कोऽर्थः? पार्थिवपरमाणूनां ये रूपादयस्ते स्पर्शवद्विशेषगुणाः, न च कारणगुणपूर्वकाः। परमाणूनां कारणाभावात्। एवंशब्दोऽपि कारणगुणपूर्वकत्वाभावेऽपि स्पर्शवद्विशेषगुणो भविष्यतीति [10]प्रश्ने इदमुत्तरम्। प्रत्यक्षः शब्दस्ते चाप्रत्यक्षा इति कुतः साधर्म्यमित्यर्थः।

[कु०] अहङ्कारविकारत्वोप (त्वे च) सर्ववेद्यविषयव्याप्तानीन्द्रियाणीत्याशयेनाशङ्कते इन्द्रियाणामिति (कं. ६०.५) तदन्येषामनुपयोगादिति (कं. ६०.९) प्राप्त्याविषयग्राहकव्यतिरिक्तेन्द्रियसद्भावे प्रमाणाभावादित्यर्थः। ननु भवन्मतेऽपि चक्षुषो रश्मिरूपा रश्मयो विद्यन्त एव तत्कथं व्यतिरिक्तेन्द्रियसद्भावे प्रमाणाभाव इत्यत आह न[11] च श्रोत्र इति (कं. ६०.९)। तैजसतया चक्षुषो रश्मिरूपा वृत्तयो भवन्तु, अतैजस्य तु ता न घटन्त इत्यर्थः। नन्वतैजसेनापि घ्राणेन प्रदेशान्तरवर्तिकेतकीकुसुमादिगन्धग्रहणवदत्रापि भविष्यतीत्यत आह नापीति (कं. ६०.११) युक्तं गन्धस्य कारणगुणपूर्वकयावद्द्रव्यभावित्वाभ्यां पृथिवीवृत्तित्वनिश्चया[द]देशान्तरोऽयं च भेदे च प्रमाणसिद्धे तदाश्रयस्य

---

१ यः–जे. २। २ पूर्वः–कं. १; कं. २। ३ रूपादिवत्–जे. १; जे. २; जे. ३। ४ भवतीति–जे. २। ५ रूपत्वादीनां बाह्यैकेन्द्रियविशेषगुणत्वाभावात् सामान्यविशेष[व]त्त्वे सतीति विशेषितम्–टिप्पण–जे. १। ६ परमाण्वग्नि–जे. १; जे. ३। ७ गुणत्वे–कं. १; कं. २। ८ तद्दूषणमिति रम्यं स्यात्। ९ सङ्खादि–ड; १० प्रश्नः –भ। ११ श्रोत्रवृत्तिः इति पाठे श्रोत्रेति भाव्यम्।

## न्यायकन्दली

**दूरे कर्णशष्कुलीदेशे समुपलभ्यते, न चान्यगुणस्यान्यत्र ग्रहणमस्ति, तस्मान्न स्पर्शवद्विशेषगुणः। ननु शङ्खादिदेशस्थित एव शब्दो गृह्यते, इन्द्रियाणामासंसारमण्डलव्यापित्वादिति चेन्न, संनिकृष्टविप्रकृष्टयोरविशेषेणोपलब्धिः स्यात्। व्यापकत्वेऽपीन्द्रियाणां पुरुषार्थेन हेतुना क्षोभ्यमाणानां यदधिष्ठानदेशेभ्यो विषयग्रहणानुगुणवृत्तयो निर्गता विषयं विश्नुवते तदा विषयग्रहणस्य भावान्नाव्यवस्थेति चेत्? विषयग्रहणार्थानीन्द्रियाणि, विषयग्रहणञ्च वृत्तिनिबन्धनम्, वृत्तय एवेन्द्रियाणि तदन्येषामनुपयोगान्निःप्रमाणकत्वाच्च। न च श्रोत्रवृत्तिर्विषय[1]देशं गत्वाऽर्थमुपलभते, चाक्षुषप्रतीताविव शब्देऽपि दिक्सन्देहानुपपत्तिप्रसङ्गात्। नापि स्वाश्रयं परित्यज्य गुणस्यागमनमस्ति, न च शङ्खवर्त्तिना तेनान्तराले शब्द आरब्धव्यः, स्पर्शवद्विशेषगुणस्य स्वाश्रयारब्धे द्रव्ये विशेषगुणान्तरारम्भदर्शनात्, शङ्खारब्धस्य च द्रव्यस्य शङ्खश्रोत्रयोरन्तरालेऽनुपलम्भात्। न चाप्राप्तस्य**

[पं०] [2]अत्रापीति—यावद्द्रव्यभावित्वेऽपि। सांख्यः प्राह—**ननु शङ्खादीति**। परः **व्यापकत्वे** इत्यादि। [[3]**पुरुषार्थेन हेतुनेति**—पुरुषार्थो हि सांख्यानां मते प्रयोजकः। "पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणम्।" [सां. का. ३१]—इति वचनात्।] पुरुषार्थशब्देनादृष्टमुच्यते। **क्षोभ्यमाणानामिति**—प्रेर्यमाणानाम्। **व्यश्नुवते इति** विशेषणव्याप्नुवन्ति। **निष्प्रमाणकत्वाच्चेति**—इन्द्रियाणां हि प्रमाणत्वं विषयग्रहणं तच्च वृत्तिभिरेव कृतम्। अतस्तानि निष्प्रमाणानि। **तेनेति**—शब्देन। **स्पर्शवद्विशेषगुणस्येति**—स्पर्शवतो द्रव्यस्य पृथिव्यादेर्विशेषगुणो गन्धादिस्तस्य स्पर्शवद्विशेषगुणस्य। **स्वाश्रयारब्धे द्रव्ये इति**—गन्धाद्याश्रय पार्थिवादिपरमाण्वारब्धे घटादौ। **विशेषगुणान्तरारम्भदर्शनादिति** स्पर्शवद्विशेषगुणेन गुणान्तरमारभ्यते इत्यर्थः। दृश्यते ह्येतत्। स्पर्शवन्तस्तन्तवस्तेषां विशेषगुणो रूपं तस्य स्वकीय आश्रयस्तन्तवस्तैरारब्धे द्रव्ये पटलक्षणे विशेषगुणान्तरस्य पटरूपस्यारंभो भवतीति तात्पर्यम्। अथ शङ्खश्रोत्रयोरन्तराले शङ्खेन

[कु०] **लेशेनेन्द्रियदेशप्राप्तिरवश्यकल्पनीयेति**। शब्दस्य तु न सङ्ख्यादिगुणत्वमथापि सिद्धम्, अतस्तदाश्रयस्य लेशेन श्रोत्रदेशागमनं कल्पयितुं न शक्यमिति भावः। **स्पर्शवद्विशेषगुणस्य** (कं. ६०.१२) इत्यत्र विशेषग्रहणं स्वाश्रयानारब्धेऽपि द्वित्वादिकमारभमाणस्यैकत्वस्य व्यवच्छेदाय। अस्तु तर्ह्यप्राप्तस्य शङ्खादिगुणस्य शब्दस्य श्रोत्रेण ग्रहणमिति भाष्यव्याख्यानावसरे प्रतिपादितं प्राप्यकारित्वं स्मरयन् प्रत्याचष्टे **न चेति** (कं. ६०.१४)। उपसंहरति **संवेति** (कं. ६०.१५)। ननु माभूच्छङ्खादिगुणः, वायुगुणो भविष्यति, मूर्त्तानां परस्पराभिघातप्रेरिते वायौ उत्पन्नः शब्दः स्वाश्रयगत्या श्रोत्रं प्राप्य ग्रहीष्यते तथा च केचिदाहुः वायुरापद्यते शब्दतामिति अत आह **[4]अस्मिन्नन्तरालव्यापिनीति** (क. ६०.१५) इदमत्राकूतम्—श्रोत्रं तावद्बहिरिन्द्रियतया गुणावान्तरजात्या स्वग्राह्यजातीयगुणवदास्थेय[म्]। बहिरिन्द्रियत्वं च नियतविषयत्वेन सिद्धमेव। ततश्च शब्दस्य वायुगुणत्वे श्रोत्रस्यापि वायुत्वप्रसक्ते स्पर्शग्राहकत्वप्रसक्तौ न वायवीयं श्रोत्रम्। ततश्च शब्दोऽपि गुणावान्तरजात्या ग्राहकेन्द्रियवर्तिगुणजातीयगुणो भवन्न वायुगुण इति इदं चान्तरालव्यापिनीद्वितेन सूचितमिति।

---

१ विषयदेशे—जे. १; जे. ३। २ तत्रापि—कं। ३ [ ] चिह्नान्तर्गतो पाठः 'अ'पुस्तके नास्ति। ४ यस्मिन्—कं १, कं. २।

न्यायकन्दली

ग्रहणमस्ति, अतिप्रसङ्गात् । तस्माच्छङ्खादिगुणत्वे शब्दस्यानुपलब्धिरेव । अस्ति च तदुपलब्धिः, सैव तस्य द्रव्यान्तरगुणत्वं साधयति, यस्मिन्नन्तरालव्यापिनि शब्दस्य शब्दान्तरारम्भक्रमेण श्रोत्रप्रत्यासन्नस्य ग्रहणं स्यात् ।

[72] आत्मगुणनिषेधार्थमाह–बाह्येन्द्रियप्रत्यक्षत्वादिति । श्रोत्रं तावद् बाह्येन्द्रियं नियमेन बाह्यार्थप्रकाशकत्वाच्चक्षुर्वत्, तद्ग्राह्यश्च शब्दस्तत्प्रतीतेस्तद्भावभावित्वात् । यस्तु बाह्येन्द्रियाग्राह्यो नासावात्मगुणो यथा रूपादिः, तस्मादयमपि न तद्गुण इत्यर्थः । इतोऽपि शब्दो नात्मगुण आत्मान्तरग्राह्यत्वादनेकप्रतिपत्तृसाधारणत्वादित्यर्थः । या खलु वीणावेण्वादिजा शब्दव्यक्तिः सन्ततिद्वारेणैकेन पुरुषेण प्रतीयते सैवापरेणापि तद्देशवर्तिना प्रतीयते, न त्वेवं सुखादिरित्यात्मगुणवैधर्म्यान्नात्मगुणः । आत्मन्यसमवायादपि शब्दो नात्मगुणः रूपादिवत् । आत्मन्यसमवायस्तस्यासिद्ध इति चेत् ? न, रूपादिवद् बहिर्मुखतया प्रतीतेरात्मगुणानामभ्यान्तरत्वेनावगमात् । [1]इतश्च नायमात्मगुणः–अहङ्कारेण

[टि०] [72–73] श्रोत्रं तावद् इतिः–नियमेनेति मनोव्यवच्छेदार्थम् । आत्मान्तरग्राह्यत्वाद् इतिः प्रत्यक्षत्वादित्यर्थः, अन्यथा सु[2]खादिप्रतिपत्तिरपि मुखविकासाद्यनुमानादनेकस्यापि प्रति[3]पत्तुरस्तीत्यनैकान्तिकता स्यात् ।

[पं०] किमपि द्रव्यमारभ्यते तदसत् । कुत इत्याह–शङ्खारब्धस्य च द्रव्यस्येत्यादि शङ्खारब्धस्येति कोऽर्थः? शब्दस्य स्वाश्रयः शङ्खादिस्तदारब्धस्य । अयमत्र वाक्यभावार्थः । तथा तन्त्वारब्धे पटे तन्तुरूपेण पटे रूपमारभ्यते । तथा यदि शङ्खेनान्तराले प्रारब्धं स्यात् । तदा शङ्खशब्देन तत्र द्रव्ये शब्दे आरभ्यते । न चान्तराले द्रव्यारंभकोऽप्यस्ति । सैवेति–शब्दोपलब्धिरेव । तस्येति शब्दस्य ।

[72] यस्मिन्निति = द्रव्यान्तरे । ग्राह्य इति = श्रोत्रग्राह्यः । तत्प्रतीतिरेति = शब्दप्रतीतेः । तद्भावभावित्वादिति = श्रोत्रभावभावित्वात् । संततिद्वारेणेति = जलतरंगन्यायेन । तदभिधानशीलतयेति = प्रियवागभिधानशीलतया । तयाप्रतीत्यभावादिति–प्रियवागभिधानशीलताप्रतीत्यभावात् । तद्ग्राह्य इति = श्रोत्रग्राह्यः ।

[कु०] [72] ननु बाह्यगुणत्वमनात्मगुणग्राहकेन्द्रियग्राह्यत्वात् तथा च शब्दस्यानात्मगुणत्वे श्रोत्रस्य तद्ग्राहकस्य बाह्येन्द्रियत्वं नासिद्धौ शब्दस्य बाह्येन्द्रियग्राह्यत्वं तेनानात्मगुणत्वमिति चक्रकमित्यत आह श्रोत्रं तावदिति (कं. ६०.१७) । नियमेन बाह्यार्थप्रकाशकत्वादिति (कं. ६०.१८) नियतविषयत्वादित्यर्थः । न चानेकप्रतिपत्तृसाधारणत्वं सन्दिग्धासिद्धम्, सर्वोऽपि स्वकर्णशष्कुलीं विवरवर्तिनो भिन्नामेव शब्दाद् गृह्णाति उतैकामेवेति सन्देहात् । अथ भेर्यादिवृत्तित्वे प्रतिषिद्धे वीचीतरङ्गादिना न्यायेनानेकेषामप्येकत्वानुमानेनानेकप्रतिपत्तृसाधारणत्वमिति चेत्, एवं तर्ह्यनेकानुमातृसाधारणत्वं ह्यर्थः स्यात्, तथा च सुखादिना (व्यदिना) व्यभिचार इत्यर्थः । अत आह या खल्विति (कं. ६०.२१) । तथा चानेकप्रतिपत्तृप्रत्यक्षत्वे सति सन्तानद्वारणैकमूलत्वं हेत्वर्थ इति न व्यभिचारः । नाप्यसाधारणत्वं

१ इतश्चायं नात्मगुणः–जे. १; जे. २; जे. ३ । २ मुखादि–अ, ब; ३ पत्तरपि मुस्तिरस्ती ( ) अ, –दनेकस्य प्रतिपत्तिरस्ति–ब, क;

## न्यायकन्दली

अहमितिप्रत्ययेन, विभक्तस्य व्यधिकरणस्य ग्रहणात्, यः खल्वात्मगुणः सोऽहङ्कार-समानाधिकरणो गृह्यते, यथा सुख्यहं दुःख्यहमिति, न त्वेवं [1]शब्दस्य ग्रहणमतो नात्मगुणः। प्रियवागहमिति व्यपदेशोऽस्तीति चेत्? सत्यम्, किन्तु तदधिष्ठानशीलतया न तु [2]तद्गुणाधिक·णत्वेन, मृदङ्गादिशब्देषु तथा प्रतीत्यभावात्।

[73] अस्तु तर्हि दिशः कालस्य मनसो गुणस्तत्राह–श्रोत्रग्राह्यत्वादिति। किमुक्तं स्यात्? ये दिक्कालमनसामुभयवादिसिद्धाः [3]संयोगादयो गुणास्ते श्रोत्रग्राह्या न भवन्ति, अयन्तु तद्ग्राह्यस्तस्मान्न तद्गुणः। दिक्कालमनसां विशेषगुणो नास्ति, अयन्तु विशेषगुण इतोऽपि तेषां न भवतीत्याह–वैशेषिकगुणभावाच्चेति। शब्दो दिक्कालमनसां गुणो न भवति विशेषगुणत्वात् सुखादिवदिति प्रयोगः।

[पं०] [73–75] तेषां न भवतीति = तेषां संबंधी न भवतीत्यर्थः। उत्तरत्रापीति = उत्तरसाधनेऽपि। तस्यैवेति = द्वितीयज्ञानस्यैव।

[कु०] पटगतरूपाणामनेकप्रतिपतृप्रत्यक्षाणां [4]तन्त्वादिकारणपरंपरया एतपरमाणुरूपादिमूलत्वेन वायूपनीतानां कुसुमादिसौरभाणामप्येवं रूपत्वेन हेतोः सपक्षेऽपि सत्त्वात्। एवंभूतस्यात्मगुणत्वे रूपादयोऽप्यात्मगुणा भवेयुरिति भावः। आत्मगुणवैधर्म्यादिति (कं. ६०.२३) अनात्मगुणसाधर्म्याच्चेति शेषः। बहिर्मुखतयाप्रतीतेरिति (कं. ६०.२४) प्राच्योऽयं प्रतीच्योऽयमिति शरीरा[5]वच्छिन्नदेशसम्बन्धितया प्रतीतेर्भागासिद्धिमाशङ्क्य परिहरति प्रियवागहमिति (कं. ६०.२८) सामानाधिकरणप्रतीतिसाम्येऽपि सुखे समवायित्वं वाचितुमिति[चे]न्न त्वमिति विशेषः, कुत इत्याह मृदङ्गादिशब्देष्विति (कं. ६१.१)। वाद्यात्मसमवेता शब्दत्वान्मृदङ्गध्वनिवदित्यनुमानादि[ति] भावः।

[73] ननु शब्दस्य दिक्कालमनोगुणत्वाभावे साध्ये श्रोत्रग्राह्यत्वादित्यसाधारणो हेतुरतद्गुणतया सपक्षाद्रूपादेरपि व्यावृत्तत्वादित्याशयवान् पृच्छति किमुक्तं स्यादिति (कं. ६१.३)। उत्तरमाह ये दिक्कालमनसामिति (कं. ६१.३) अयमभिसन्धिः श्रोत्रग्राह्यत्वादित्येकेन्द्रियजातीयमुपलक्षयति तस्मादेवंप्रयोगः शब्दो दिक्कालमनोगुणो न भवति एकेन्द्रियग्राह्यजातीयत्वाद् गन्धादिवदिति। यथाश्रुतं भाष्यं व्यधिक[र]णमित्यन्यथा प्रयोगमा[र]चयति शब्द इति (कं. ६१.६)।

---

१ शब्दग्रहणम्–जे. १; जे. ३। २ तदधिकरणत्वेन–जे. १; जे. २; जे. ३। ३ संयोगादयस्ते–कं. १; कं. २। ४ तंतावोदि इति प्रामादिकः पाठः लेखकदोषात्। ५ वच्छीन्नदेशः सम्बन्धिः तयोः इत्यशुद्धः पाठः लेखकदोषात्।

## न्यायकन्दली

[74] नन्वेकस्मिन्नर्थेऽनेकसाधनोपन्यासो व्यर्थः, एकेनैव तदर्थपरिच्छेदस्य कृतत्वादिति चेत् ? किमेकप्रमाणावसिते प्रमाणान्तरवैयर्थ्यं फलाभावात् ? पुरुषेणानपेक्षितत्वाद्वा ? न तावत् फलं नास्ति पूर्ववदुत्तरत्रापि तदर्थप्रतीतिभावात् । नापि पुरुषस्यानपेक्षा सर्वत्र । यत्राति[1]शयविषयमाधुर्य्यात् प्रत्यनुभवं सुखोत्पत्तिः, तत्र दृष्टेऽपि पुनः पुनर्दर्शनाकाङ्क्षा भवत्येव यथाऽत्यन्तप्रियपुत्रादौ । यत्र त्वनपेक्षा तत्रापि पूर्ववदुत्तरस्यापि कारणसद्भावे सति प्रवृत्तस्य न वैयर्थ्यम्, तद्विषयपरिच्छेदेनैवार्थेनार्थवत्त्वात् । पिष्टपेषणे त्वशक्त-भङ्गताप्राप्तौ फलमेव [2]न भवति । अन्यदपि [3]प्रमाणं विषयपरिच्छेदमात्रमेवार्थक्रियाया विषयसाध्यत्वात् । [4]एकपरिच्छिन्ने द्वितीयस्य साधकतमत्वाभाव इति चेत् ? न स्वकार्य्ये

[टि०] [74] **नन्वेकस्मिन्** इति [5]एकैकेनैवानुमानेनेतरद्रव्याष्टकव्यवच्छेदसिद्धावन्येषां वैयर्थ्यम् । ननु [6]विषयाणा-मनतिरेको न वाच्यः । न[7]वनवकालक्षणोपाध्यवच्छिन्नस्य प्रतिज्ञानं न[8]वनवस्य विषयस्य प्रतिभासनात् अत आह -**प्रतिज्ञानं च** इति । ननु तर्ह्यविरामप्रसङ्ग इत्याह **न चैवं सति** इति । चक्षुरादिव्यापाराभावे स्वयमेव विरामात् ।

[कु०] [74] 'अनधिगतार्थगन्तृ-प्रमाणम्' इति विषयेषु प्रमाणानां व्यवस्थां वदतो मीमांसकानुत्थापयति **नन्विति** (कं. ६१.६) **यत्र त्वनपेक्षेति** (कं. ६१.११) तथा सत्यनपेक्षिते विषये ज्ञानमेव स्यात् किन्तु सामग्रीं सा च पूर्ववदुत्त-रेषामपि अविशिष्टा । **अर्थश्च** सर्वेषां प्रमितिरेव अतो न वैयर्थ्यमिति भावः । **पिष्टपेषणन्यायेनेति नीयते ज्ञायते [इ]** त्यनेनार्थ इति न्यायो दृष्टान्तः । यथा पिष्टं न पिष्यते तथा प्रमितं न प्रमातव्यमिति भावः । वैषम्यं दर्शयति–**पिष्टपेषणे** **त्विति** (कं. ६१.१३) दृष्टान्ते सामग्रीविरहा[त्]–तदेकदेशस्य योग्यकर्मणा विरहात् इह तु प्रमाणसामग्रीसमस्ताऽस्त्ये-वेति भावः ।

ननु विषयं ज्ञापयत्प्रमाणमर्थक्रियां निवर्तयति तस्या प्रथमेन निर्वर्तिताया द्वितीयेन किं क्रियत इति पिष्टपेषण-न्यायस्तदवस्थ एवेत्यत आह **अन्यदपीति** (कं. ६१.१४) । निष्पादितक्रिये कर्मणि साधनस्य साधनत्वमतिपात इत्यभिप्रायेण इष्यते **एकपरिच्छिन्न** इति (कं. ६१.१४) । [परि] हरति **नेति** (कं. ६१.१५) । प्रतिप्रमाणं भिन्ना एव प्रमितयः तत्रस्थस्य स्वस्यां प्रमितौ सर्वमपि साधकतममेवेति भावः । नन्वधिगतार्थमात्रगोचरत्वेन स्मृतिवदप्रामाण्यं कुतो न स्यादित्यत आह–**अन्यथेति** (कं. ६१.१६) । अधिगतार्थविषयत्वाद्द्वितीय [म] प्रमाणमिति वदन् प्रष्टव्यो जायते अप्रमाणमिति किमयथार्थमुच्यते ? अधिगतार्थमिति वा ? आद्ये प्रत्यक्षविरोधः यथार्थमेवेत्यनुव्यवसायात् । द्वितीये सिद्धसाधनं साधनं साध्यसमं च । स्मृतेस्तु सत्यपि यथार्थत्वे पूर्वानुभवबलायाते तत्साधनं च महर्षिभिः प्रमाणेषु न परिसङ्ख्यानम् । द्वितीयप्रभृतीनां तु स्वतन्त्रेणैव यथार्थत्वमिति विशेष इति भावः । **उपायाभावे सतीति** (कं. ६१.१८) विषयान्तरसंचारस्तावद्दृश्यते । ततश्च धारावाहिकविज्ञानानां विरमेण तत्करणविरामोऽपि कल्पनीय इति भावः ।

**गुणः शब्द** इति (कं. ६१.२०) अस्पर्श[व]त्वे सति सामान्यवतामनाधारत्वादिति वा इति शेषः ।

---

१ °तिशयमाधुर्यात्–कं. १; कं. २ । २ नास्तीति–जे. १; जे. २; जे ३ । ३ प्रमाण–कं. १; कं. २ । ४ एकत्व–जे. २ । ५ एकैकानुमानेन–अ, ब, क; ६ विशेषयाणा–अ, ब; ७ न च न च–अ, ब; ८ न च न च सा–अ, नवनवसा–ब;

## न्यायकन्दली

तस्यैव साधकतमत्वात् । अन्यथा धारावाहिकं [1]ज्ञानमप्रमाणं स्यात्, [2]विषयस्यानतिरेकात् । प्रतिज्ञानञ्च कालक्षणानामतिसूक्ष्माणामप्रतिभासनात् । न चैवं सत्यनवस्था, [3]उपयोगाभावे सति विरामादित्यलम् ।

[75] ननु यदि नाम पृथिव्यादिद्रव्याष्टकगुणः शब्दो न भवति तथाप्याकाशस्य सद्भावे किमायातम् ? तत्राह–परिशेषादिति । गुणः शब्दः, गुणश्च गुणिना विना न भवति, न चैष पृथिव्यादीनां गुणः, द्रव्यान्तरञ्च नास्ति, तस्माद्यस्यायं गुणस्तदाकाशमिति

[टि•] [75] **गुणः शब्द** इति :– शब्दो गुणः, सामान्यविशेष[व]त्वे सति अस्मदादिबाह्यैकेन्द्रियग्राह्य[4]जातीयत्वाद् रूपवद् इति गुण[5]त्वसिद्धिः । अत्र सा[6]मान्यविशेषत्वे सतीति रूपत्वेन व्यभिचारवारणार्थम् । 'अस्मदादि' इति योगिष्वसिद्धिवारणार्थम् 'बाह्ये'ति मनोऽव्यवच्छेदेनासिद्धिवारणार्थम्, एकेति प्रत्यक्षद्रव्यव्यवच्छेदार्थम्, तेषां द्वीन्द्रियग्राह्यत्वात् । न च द्वीन्द्रिय[7]ग्राह्य एकेन्द्रियग्राह्य[8]त्वमप्यस्तीति व्यभिचारः, एकशब्दस्यावधा[9]रणार्थपरत्वात् अन्यथा व्यवच्छेद्याभावाद् एकग्रहणवैयर्थ्यं स्यादिति । जातीयग्रहणं दीपप्रभादिव्यवच्छेदार्थम्, तेषां स्वयमेकेन्द्रियग्राह्यत्वेऽपि तज्जातीयस्य तेजोऽन्तरस्य द्वीन्द्रियग्राह्यत्वात । **व्यधिकरणस्य** इति:–[10]समवायिकारणैकार्थसम[11]वायसमवायिकारणसमवायलक्षणप्र[12]त्यासत्तिद्वयाभावेन समवायिकारणप्रत्यासत्त्यभावात् । **अनाश्रितत्वाद्** इति–स[13]मवायोऽप्यनाश्रितो भवतीत्यनैकान्तिकत्वं स्यादिति । अनाश्रितत्वाद् इति आश्रयैकस्वभावत्वादित्यर्थो [14]व्याख्येयः । **यस्य बाह्यैकेन्द्रियग्रा**[15]**ह्येति**:– ननु [16]ग्राह्यजातीयगुणव्यक्त्यन्तरवत्त्वं [17]तद्गुणकत्वं वा ? ग्राह्यगुणवत्त्वं वा ? नाद्यः, पक्ष एवासिद्धेः, न हि श्रोत्रं ग्राह्य[18]जातीयगुणव्यक्त्यन्तर[19]वत्, किन्तु [20]ग्राह्येणैव गुणेन गुणवतस्तस्य स्वसमवेतग्राहकत्वात्, न द्वितीयः; दृष्टान्तस्य

[कु•] [75] **सर्वत्राविशिष्ट** इति (कं. ६२.१) आश्रयभेदप्रतिपादनौपयिकवैशिष्ट्यरक्षित-इत्यर्थः । **ननु शब्दोपीति** (कं. ६२.२) तारतारतरादयः शब्दा भिन्नाः तारतम्यत्वात् शुक्लशुक्लतरादि[वदि]त्याश्रयभेदसिद्धावाकाशनानात्वं सिद्धमिति भावः । **एकस्मादिति** (कं. ६२.४) तीव्रमन्दाद्यभिघातादिनिमित्तत्वात्कारणतारतम्यान्वयव्यतिरेकानुविधायितया तारतम्यवन्तोऽपि शब्दा नाश्रयभेद प्रसाधयितुमीशत इति भावः । **तस्मान्न तयोरेकत्वमिति** (कं. ६२.११) प्रतीतिभेदादेकत्वैकपृथक्त्वे परस्परभिन्ने इत्यर्थः ।

ननु सूत्रप्रमाणव्युत्पादनं न त्वागमः इत्यतः प्रमाणं दर्शयति **यद्विभ्वीति** (कं. ६२.१३) । **श्रूयमाणाद्यशब्दवदिति** (कं. ६२.१७) श्रूयमाणशब्दस्यासमवायिकारणशब्दवदित्यनुसन्धेयम् । यथाश्रुते तु **कार्यकारणभावेन प्रत्येतव्यमिति** (कं. ६२.१८) वक्ष्यमाणमसम्बद्धं स्यात् । नत्वेकसन्तानवर्तित्वमुपाधिर्भविष्यति तत्कथं व्यापकत्वम् । न च नभोभेदे प्रमाणाभावादनुपाधित्वम्, इतरेतराश्रयत्वापत्तेः, [एकत्वेऽ]नुपाधित्वमनुपाधित्वे चैकत्वमिति । तदेतदयुक्तं यद्याकाशं प्रतिशब्दसन्तानं भिन्नमविभु च स्या तदा[ऽऽका]शापरिमाणं भवेन्मध्यमपरिमाणं वा; आद्ये शब्दस्याप्रत्ययत्वप्रसङ्गः, द्वितीये च मध्यमपरिमाणद्रव्यस्य नियमेन कार्यत्वादस्पर्शद्रव्यस्य अन्यथा समवायेन व्यभिचारः स्यात् ।

---

१ विज्ञानं–जे. १; जे. २; जे. ३ । २ विषयानतिरेकात्–जे. १; जे. २; जे. ३ । ३ उपायाभावे–कं. १; कं. २ । ४ जातीयतीयत्वाद्–अ; ५ गुणसिद्धिः–अ; ६ सामान्यत्वे–अ, ब, क; ७ ग्राह्ये–ड; ८ ग्राह्यमप्यस्तीति–अ, ब; ९ धारणपरत्वात्–अ, ब, क; १० समवाय–अ, ब, क; ११ समवायकारण–अ, ब, क; १२ प्रत्यासत्त्यभावात्–अ, ब; प्रत्यासत्तिद्वयाभावेन समवायिप्रत्यासत्त्यभावात्–क, ड; १३ समवाये–अ, ब; १४ व्याख्याय–अ, ब; १५ ग्राह्येणेति–अ, ब, क; १६ जात्य–ड; १७ तद्गुणकत्वं अबपुस्तकयोर्नास्ति । १८ जातीयक–ड; १९ वता–अ; २० ग्राह्ये गुणैव–अ, ब; ग्राह्येनैव–ड;

प्रशस्तपादभाष्यम्

[75-अ] शब्दलिङ्गाविशेषादेकत्वं सिद्धम् । तदनुविधानादेकपृथक्त्वम् [1] । विभववचनात् परममहत्परिमाणम् । शब्दकारणत्ववचनात् [2] संयोगविभागाविति ।

अतो गुणवत्त्वादनाश्रितत्वाच्च द्रव्यम् । समानासमानजातीयकारणाभावाच्च नित्यम् ।

न्यायकन्दली

परिशेषादाकाशस्याधिगमे प्रतिपत्तौ लिङ्गमित्यर्थनिर्देशः । प्रयोगः पुनरेवं द्रव्यान्तरगुणः शब्दो गुणत्वे सति पृथिव्याद्यष्टद्रव्यानाश्रितत्वाद् यस्तु द्रव्यान्तरगुणो न भवति नासौ गुणत्वे सति पृथिव्याद्यष्टद्रव्यानाश्रितो यथा रूपादिरिति व्यतिरेकी ।

[75-अ] सद्भावप्रतिपादकादेव प्रमाणादाकाशस्य शब्दगुणत्वं तावत् प्रतीतम् । सम्प्रति सङ्ख्यादिगुणत्वप्रतिपादनार्थमाह [3]–शब्दलिङ्गाविशेषादिति । शब्दो हि [4] लिङ्गमाकाशस्य शब्दश्च सर्वत्राविशिष्ट एक इत्येकरूपमेवाकाशं [5] सिद्ध्यति, भेदप्रतिपादकप्रमाणाभावादित्यर्थः । ननु शब्दोऽपि तारतरादिरूपेण [6] विविध एव ? सत्यम्, न तु तेन रूपेणास्य लिङ्गता, किन्तु गुणत्वेन, तच्चाविशिष्टं [7] नाश्रयभेदावगमाय प्रभवति, एकस्मादप्याश्रयात् कारणभेदेन तारतरादिभेदस्य [8] शब्दस्योत्पत्त्यविरोधात् ।

[टि०] साध्यवैकल्यापत्तेः । न हि ग्राह्यस्य घटादेरेव रूपं चक्षुष्यस्ति [9], किन्तु रूपत्वसामान्यालिङ्गितत्वेन [10] तज्जातीयं रूपं गुणव्यक्त्यन्तरं [11] तस्य तैजसत्वात् । सत्यम्, अत्र विशेषाविवक्षया ग्राह्यगुणजात्यालिङ्गितगुणवत्त्वं तद्गुणकत्वमिष्टं, तच्च [12] स्वसमवेतशब्दग्राहिणोऽपि श्रोत्रस्यास्त्येव, श्रोत्रसमवे तस्यापि [13] शब्दजात्यालिङ्गितस्य ग्राह्यत्वादिति । ननु यदि श्रोत्रं सगुणं तर्हि घ्राणेन्द्रियव्याख्यावसरे कथमुक्तं श्रोत्रं तु न सगुणमिन्द्रियमिति? सत्यम्; तत्र न [14] सगुणं

[कु०] **समानजातीयमिति** (कं. ६२.२५) यद्यपि कारणाभावान्नित्यसाधू[क्तम्]नह्यकार्यत्वनित्यकारणत्वयोर्व्याप्तौ कश्चित्प्रतिमल्लः, तथाप्यकारणमेव कथमिति जिज्ञासायां कारणभेदोपवर्णनम् । तत्र भेदाभावात् समवायिकारणाभावः । तदभावादितरकारणाभाव इति सुव्यक्तमित्यर्थः । **सर्वशब्दोपलब्धिः स्यादिति** [15] (कं. ६२.२७) कर्णशष्कुलीमप्रत्यासीदतामपि शब्दानामुपलब्धिः स्यादित्यर्थः । **श्रूयतेऽने[नेति]** (कं. ६३.१) शब्दोपलब्धिलक्षणकार्यं कों ज्ञेयः कर्णशष्कुल्यवच्छिन्नो नभोदेशः श्रोत्रमित्यर्थः । ननु स बधिरस्याप्यस्तीत्यत आह–**विशेषणमिति** (कं. ६३.३) ।

---

१ विधानात्पृथक्त्वम्–कि. ता. । २ कारणवचनात्–दे. ता. । ३ गुणप्रतिपादनार्थ–जे. १; जे. २ । ४ शब्दोलिङ्ग–कं. १; कं. २ । ५ एकमेवाकाशं–जे. १; जे. २; जे. ३ । ६ तरतरादिरूपेण–जे. १; तरतमादिरूपेण–जे. ३ । ७ तत्त्वविशिष्टं–जे. १ । ८ तरतमादिभेदस्य––जे. १; जे. २; जे. ३ । ९ चक्षुष्वस्ति–अ, ब; १० रूपत्वे–अ, ब; ११ तज्जातीयं रूपं गुणं–ड; १२ तत्वसमधिगत–अ, ब, क; १३ तस्या–अ, ब, क; १४ न, न,–अ, ब, क; १५ सर्वशब्दोपलब्धिराकाशस्य–कं. १, ।

प्रशस्तपादभाष्यम्

[1]सर्वप्राणिनां च शब्दोपलब्धौ निमित्तं श्रोत्रभावेन ।

श्रोत्रं पुनः [2]श्रवणविवरसञ्ज्ञको नभोदेशः, शब्दनिमित्तोपभोगप्रापकधर्माधर्म्मोपनिबद्धः । तस्य च नित्यत्वे सत्युपनिबन्धक[3]वैकल्याद्बाधिर्य्यमिति ।

न्यायकन्दली

तदनुविधानादेकपृथक्त्वमिति । एकत्वानुविधाना[4]देकपृथक्त्वम् । अस्ति चाकाशे भेदप्रतिपादकप्रमाणाभावात् [5]सर्वसिद्धमेकत्वम्, तेन पृथक्त्वमपि सिद्धमित्यर्थः । केचिद्वस्तुनो निजं स्वरूपमेवैकत्वम्, [6]न तु सङ्ख्याविशेष इत्याहुः । तेषामेको घट इति सहप्रयोगानुपपत्तिः पर्य्यायत्वात् । येऽपि पदार्थानां स्वाभाविकमेक[7]पृथक्त्वमित्याहुः, तेषामपि प्रतियोग्यनुसन्धानरहितस्यैकत्वविकल्पवत् पृथक्त्वविकल्पोऽपि प्राप्नोति, न चैवं स्यात्, अयमस्मात् पृथगिति पृथक्त्वस्य विकल्पनात् । तस्मान्न तयोरेकत्वम् ।

[टि०] गुणसहितमेव चक्षुरादिवदिन्द्रियम्, इन्द्रियकार्यकारिविषयग्राहकमित्यर्थः । यथा चक्षुरादीनि स्वयमेकेन गुणेन गु[8]णवन्ति, अन्यद् [9]गुणान्तरं गृह्णन्ति तथा न.[10]श्रोत्रं श्रोत्रस्य ग्राह्येणैव गुणेन गुणवत्त्वाद् इति भावः । अन्यथा तस्य इति :– तस्य शरीरस्य । ॥ आकाशम् ॥

[पं०] [75-अ] ननु धारावाहिकज्ञाने प्रतिसंवेदनं भिन्ना एव क्षणा अवभासन्ते, तत्रेहेत्याह–प्रतिज्ञानं चेत्यादिना । उपायाभावे इति =फलाभावे । व्यतिरेकीति [11]अन्वये दृष्टान्ताभावान्नान्वय इत्यर्थः । तेनरूपेणेति =तारतरादिरूपेण । एकस्मादप्याश्रयादिति= यथैकात्मसमवेतस्य प्रियप्रियतरादिविषयलक्षणनिमित्तकारणाभेददर्शनात्सुखस्य तारतमादिभेदः । तथाऽऽकाशलक्षणैकाश्रयसमवेतस्य शब्दस्य तालोऽष्ट (ताल्वोष्ट)पुटादिनिमित्तकारणभेददर्शनात्तारतरादिभेदः संभवतीत्यर्थः । केचिदिति [12]भूषणकाराः । एको घट इति सहप्रयोगानुपपत्तिरिति । घट इत्यनेनैव स्वरूपस्य गतत्वात् ।

[कु०] नन्वाकाशस्य श्रोत्रत्वे सिद्धे [13]सत्येवं स्यात्तदेव कुतः सिद्ध [14]अयमस्यार्थ इति (कं. ६३.५) अयं प्रयोगः । शब्दो गुणत्वावान्तरजात्या स्वसमानजातीयगुणवतेन्द्रियेण गृह्यते बाह्यैकेन्द्रियग्राह्यगुणत्वाद्रूपवत् । एवमाकाशस्य श्रोत्रत्वं प्रसाध्य भाष्यस्य[15]योर्विशेषणयोः प्रयोजनं दर्शयति तच्चेति (कं. ६३.८)। [16]नन्वेवं तर्हीति (कं. ६३.१०) कर्णशष्कुल्युत्पादभागे अदृष्टव्यापार इत्यभिप्रायः शङ्कितः । तस्येति (कं. ६३.१२) परिहारभाष्यम् । कार्यपर्यन्तो व्यापारो धर्माधर्मयोरित्यभिप्रायेण व्याचष्टे तस्येति । उपलक्षणं चैतत् वातादिना कर्णशष्कुल्युपधानेऽपि चिकित्सानिवर्त्यबाधिर्यदर्शनात् ।

---

१ सर्वप्राणिनां च–कं. १; कं. २, कि. । २ श्रवणको–दे । ३ वैकल्ये–दे । ४ पृथक्त्वम्–जे. १; जे. २; जे ३ । ५ उत्सर्गसिद्धम्–जे. १; जे. २; जे. ३ । ६ न–जे. १, जे. ३, न च–जे. २ । ७ पृथक्त्व–जे. १; जे. २; जे. ३ । ८ गुणवन्ति–अ, ब; ९ गुणन्तरं–अ, ब; १० न श्रोत्रस्य ग्राह्येणैव–अ, ब; न श्रोत्रं ग्राह्येणैव–क । ११ अन्वयदृष्टान्ताभावान्ना० अ । १२ दूषणकाराः–अ; १३ आदर्शपुस्तके तु 'सत्येवं स्यां तदेवकुतः सिद्धच् इति पठ्यते किन्तु अर्थदृष्ट्या यच्छुद्धं तदेवास्माभिः स्थापितम् । भ्रष्टपाठस्तु लेखकदोषादापातितः । १४ अयमर्थ –कं. १ । १५ भाष्यस्तु–कं. आदर्शपुस्तके । १६ नन्वेवमपि–कं. १ ।

न्यायकन्दली

विभवत्ववचनात् परममहत्परिमाणमिति । द्रव्यत्वादाकाशस्य परिमाणयोगित्वे सिद्धे "विभववान्महानाकाशः"[1] इति सूत्रकारवचनात् परममहत्त्वमाकाशे सिद्धम् । यद्विभु तत्परममहद्यथात्मा विभु चाकाशं तस्मादेतदपि परममहत् । विभुत्वं सर्वगतत्वं तदाकाशस्य कुतः सिद्धमिति चेत् ? सर्वत्र शब्दोत्पादात्, यद्याकाशं व्यापकं न भवति, तदा सर्वत्र शब्दोत्पत्तिर्न स्यात्, समवायिकारणाभावे कार्य्योत्पत्त्यभावात् । दिवि भुव्यन्तरिक्षे चोपजाताः शब्दा एकार्थसमवेताः शब्दत्वात् श्रूयमाणाद्यशब्दवत्, श्रूयमाणाद्यशब्दयोश्चैकार्थसमवायः कार्य्यकारणभावेन प्रत्येतव्यो व्यधिकरणस्यासमवायिकारणत्वाभावात् ।

शब्दकारणत्ववचनात्[2] संयोगविभागाविति । "संयोगाद्विभागाच्छब्दाच्च शब्दस्य निष्पत्तिः" इति सूत्रेणाकाशगुणं[3] शब्दं प्रति संयोगविभागौ कारणमित्युक्तम् । तेनाकाशे संयोगविभागौ सिद्धौ व्यधिकरणस्यासमवायिकारणत्वाभावात् ।

अतो गुणवत्त्वादनाश्रितत्वाच्च द्रव्यम् । यत आकाशं गुणवद् अतो गुणवत्त्वाद् द्रव्यं घटादिवत्, न केवलं गुणवत्त्वादाकाशं द्रव्यमनाश्रितत्वाच्च[4] द्रव्यं परमाणुवत् । समानासमानजातीयकारणाभावाच्च[5] नित्यमिति । समानजातीयं समवायिकारणमसमानजातीयमसमवायिकारणं निमित्तकारणञ्च तेषामभावान्नित्यम् ।

सर्वप्राणिनां शब्दोपलब्धौ निमित्तमिति । नन्वेवं सर्वेषां सर्वशब्दोपलब्धिराकाशस्य सर्वत्राविशेषादत आह–श्रोत्रभावेनेति ।

किं पुनः श्रोत्रंतत्राह – श्रोत्रं[6] पुनरिति । श्रूयतेऽनेनेति श्रवणं श्रवणञ्च तद्विवरञ्चेति श्रवणविवरं तदेव संज्ञा यस्य नभोदेशस्य स नभोदेशः श्रोत्रम्, तत्पिधाने शब्दस्यानुपलम्भात् । तस्य विशेषणमाह–शब्दनिमित्तेत्यादिना । शब्दनिमित्त उपभोगः

[पं०] पर्यायत्वादिति घटः कुम्भः इतिवत् । प्रतियोग्यनुसन्धानरहितस्येति । प्रतियोगीद्वितीयः । संबंधिपदार्थस्तदनुसंधानरहितस्य प्रमातुः । तयोरिति = पृथक्त्वैकत्वयोः । श्रूयमाणाद्यशब्दवदिति श्रूयमाणोंत्यशब्दः, श्रूयमाणश्चाद्यश्च श्रूयमाणाद्यौ च तौ शब्दौ च श्रूयमाणाद्यशब्दाविव श्रूयमाणाद्यशब्दवदिति विग्रहः । व्यधिकरणस्यासमवायिकरणत्वाभावादिति पृथगाश्रयाश्रितस्यासमवायिकारणत्वं न भवति । यदाहुः – समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यमसमवायिकारणम् । अनाश्रितत्वाच्चेति–अनाश्रितत्वमित्यसमवेतत्वव्याख्याने न परमाणोराकाशाश्रितत्वेऽपि द्रव्यत्वे सिद्धे

१ 'विभवान्महानाकाशस्तथा चात्मा' इति वै. सूत्रम् (वै. सू. ७-१-२२)। २ शब्दकारणवचनात्–जे. १; जे. २; जे. ३ । ३ सूत्रकारेण – जे. १, जे. ३ । ४ °त्वाच्च परमाणुवत् – कं. १; कं. २ । ५ भावात् नित्यमिति–जे. १; जे. २; जे. ३ । ६ इत्याह – जे. १; जे. ३ ।

प्रशस्तपादभाष्यम्

[76-77] कालः परापरव्यतिकर[1]यौगपद्यायौगपद्यचिरक्षिप्रप्रत्यय[2]लिङ्गः। तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तावन्यनिमित्ता[3]भावाद्यदत्र निमित्तं स कालः।

न्यायकन्दली

सुखदुःखानुभवस्तस्य प्रापकाभ्यां धर्म्माधर्म्माभ्यामुपनिबद्धः सहकृत इति। अयमर्थः– यस्य बाह्यैकेन्द्रिय[4]ग्राह्यविशेषगुणग्राहकं यदिन्द्रियं तत्तद्गुणकं यथा रूपग्राहकं चक्षूरूपाधिकरणम् श्रोत्रञ्च तथाभूतस्य शब्दस्य ग्राहकं तस्मात्तदपि शब्दगुणकम्, शब्दश्चाकाशगुण इति निर्णीतम्, तेनाकाशमेव तावच्छोत्रं तच्च व्यापकमपि न सर्वत्र शब्दमुपलम्भयति प्राणिनामदृष्टवशेन कर्णशष्कुल्यधिष्ठाननियतस्यैव तस्येन्द्रियत्वात्, यथा सर्वगतत्वेऽप्यात्मनो देहप्रदेशे ज्ञातृत्वं नान्यत्र, शरीरस्योप[5]भोगार्थत्वात्, अन्यथा तस्य वैयर्थ्यात्। नन्वेवमपि बधिरस्य शब्दोपलब्धिः स्यात् कर्णशष्कुलीसद्भावादत्राह– तस्य चेति। तस्याकाशस्य नित्यत्वेऽप्युपनिबन्धकयोर्धर्म्माधर्म्मयोः सहकारिभूतयोर्वैकल्यादभावाद् बाधिर्य्यम्। इति शब्दः [6]समाप्तौ।

[76] कालस्य निरूपणार्थमाह–काल इति। दिग्विशेषापेक्षया यः परस्तस्मिन्नपर इति प्रत्ययः, यश्चापरस्तस्मिन् पर इति प्रत्ययः परापरयोर्व्यतिकरो व्यत्ययः। [7]तथा च

[पं०] समवायस्यापि द्रव्यत्वं स्यात्।–इत्यनाश्रितत्वमाश्रयैकस्वभावत्वं व्याख्येयम्। तेन संबंधाभावात्। सर्वेषामनाश्रयेण समवायेन न व्यभिचार इत्युदयनः। बाह्यैकेन्द्रियग्राह्यविशेषगुणस्येति–सुखादयो विशेषगुणा मनसा गृह्यन्ते। न च ते तस्य गुणाः। अतस्तद्व्यवच्छेदाय बाह्यग्रहणम्। बाह्यैकेन्द्रियग्राह्यश्चासौ विशेषगुणश्च बाह्यैकेन्द्रियग्राह्यविशेषगुणः। तस्येति समासः। क्वचित्तु बाह्यै[?]केंद्रियग्राह्यगुणविशेषस्येति पाठः। अर्थः स एव तत्तद्गुणकमिति–अत्र बहुव्रीहिः। प्रयोगश्चात्र-श्रोत्रेन्द्रियं शब्दगुणकम्, बाह्यैकेन्द्रियग्राह्यगुणविशेषग्राहकत्वात्। तथाभूतस्य बाह्यैकेन्द्रियग्राह्यस्य ।। इत्याकाशद्रव्यम् ।। ५ ।।

[76-77-78] पूर्वापरादिप्रत्यया इति–युगपदादिप्रत्यय इति च द्वौ पाठौ स्तः। तत्प्रत्ययविलक्षणत्वादिति। एके इति भूषणकारादयः। असंबद्धस्य निमित्तत्वे चातिप्रसंगादिति–अन्यथा [9]काशीस्थितनीलेन पाटलिपुत्रस्थस्य

[कु०] [76] अप्रत्यक्षद्रव्येष्वणुकार्यभावेन प्रत्यक्षद्रव्यसाधर्म्याद्द्वयोः प्राथम्यं उपभोग्यगुणाश्रयतया नभसस्तदानन्तर्यम् उपभोग्यगुणनिमित्ततया च दिक्कालयोः निरूपितव्यम्। तयोरवधिनिरपेक्षतपनधर्मोपनादकतया[का]लस्य दिक्-

१ °व्यतिकरयौगपद्यचिर°–ता.। २ यद्यपि सर्वेषु भाष्यादर्शेषु 'दे' विहाय 'लिङ्गम्' इति पाठः तथापि सर्वासां टीकानां व्याख्यानुसारेण 'लिङ्ग' इत्येव पाठः साधीयान्; 'दे' पुस्तके तु उपलभ्यते अतः स्वीकृतः। ३ सम्भवाद्–व्यो.। ४ ग्राह्यगुणविशेषस्य ग्राहकं–जे. १; जे. २; जे. ३। ५ भोगायतनत्वम्–जे. १ जे. ३। ६ परिसमाप्तौ–जे. २। ७ तथा युगपत्प्रत्यय–जे. १; जे. २; जे. ३। ८ अत्र लेखकेन गणनाय ग्रन्थाग्र १००० इति लिखितमस्ति। ९ काशीस्थेन नीलेन–अ।

प्रशस्तपादभाष्यम्

सर्वकार्य्याणा[1]ञ्चोत्पत्तिस्थितिविनाशहेतुस्तद्व्यपदेशात् । क्षणलवनिमेषकाष्ठाकलामुहूर्त्तयामाहोरात्रार्द्धमा[2]समासर्त्वयनसंवत्सरयुगकल्पमन्वन्तरप्रलयमहाप्रलयव्यवहारहे[3]तुश्च ।

न्यायकन्दली

युगपत्प्रत्ययोऽयुगपत्प्रत्ययश्च क्षिप्रप्रत्ययश्चिरप्रत्ययश्च काललिङ्गम् । ननु कालस्याप्रत्यक्षत्वात्तेन सह [4]युगपदादिप्रत्ययानां व्याप्तिग्रहणाभावात् कुतो लिङ्गत्वमत आह– तेषामिति । तेषां युगपदादिप्रत्ययानां विषयेषु द्रव्यादिषु पूर्वप्रत्ययविलक्षणानां द्रव्यादिप्रत्ययविलक्षणानामुत्पत्तावन्यस्य निमित्तस्याभावात् । एतदुक्तं भवति–द्रव्यादिषु विषयेषु पूर्वापरादिप्रत्यया जायन्ते, न चैषां द्रव्यादयो निमित्तं तत्प्रत्ययविलक्षणत्वात्, न च निमित्तमन्तरेण कार्यस्योत्पत्तिरस्ति, तस्माद्यदत्र निमित्तं स काल इति ।

[टि०] (॥ अथ कालनिरूपणम् ॥)

[76] [[5]परापरे इति] ननु युगपदादिप्र[6]त्ययानां कालं प्रति लिङ्गत्वं भवतु तेषां कालनिबन्धनत्वात् । [7][परापरप्रत्ययोस्तु कथं लिङ्गत्वम्? तयोः परत्वापरत्वगुणनिबन्धनत्वात् । ] सत्यम्, परत्वापरत्वजन[8]नद्वारेण [पराप[9]र]

[पं०] मणेरुपरंजनप्रसंगः । अन्योन्यप्रतियोगित्वमिति परस्परं सहाख्यम् । अनुत्पन्नस्थितनिरुद्धानामिति–भविष्यद्वर्तमानातीतानाम् । वस्तुद्वयस्येति युवस्थविररूपस्य । तत्सहकारिणेति = ग्रहणसहकारिणा । भूयसामुत्पादव्यापारयोरिति–युगपत्पद्यते–युगपत्कुर्वन्तीतिवत् । एकग्रहणसहकारिणेति । कालेन कथं विशिष्टा प्रतीतिरिति–कालः कथं विशेषणमित्यर्थः ।

[कु०] पदार्थादुत्कर्ष इत्यनेनाभिप्रायेण सङ्गतिमाह कालस्य निरूपणार्थमिति (कं. ६४.६) । दिग्विशेषेति (कं. ६४.६) अनियममात्रमभिप्रेत्यैतदुक्तं न नियमेन व्यत्ययमभिप्रेत्य कदाचिद्दिगपेक्षया परप्रत्ययविषये च कालापेक्षयापि परप्रत्ययसम्भवात् । द्रव्यादिप्रत्ययविलक्षणानामिति (कं. ६४.११) अत्र यद्यपि परापरप्रत्यययोः परत्वापरत्वरूपगुणनिमित्ततया युगपदादिप्रत्ययानां च तपनपरिस्पन्दविशेषावच्छिन्नकालपिण्डसंयोगरूपगुणनिमित्ततया च तद्द्रव्यादिप्रत्ययविलक्षणत्वं तथापि तेषां गुणानां कालापेक्षितयेदमुक्तम् ।

ननु परापरप्रत्ययौ तपनपरिस्पन्दप्रकर्षनिकर्षान्वयव्यतिरेकानुविधायितया तावन्मात्रमपेक्षमाणौ न कालमनुमापयितुं शक्नुत इत्यभिप्रायेण शङ्कते आदित्येति (कं. ६४.१४) । समाधत्ते [10]तदयुक्तमिति (कं. ६४.१५) । अयमभिसन्धिः–यौ हि परापरप्रत्ययौ परत्वापरत्वगुणनिमित्तकौ तौ च गुणौ तपनपरिस्पन्दप्रकर्षनिकर्षावच्छेदविषयिणीं बुद्धिं निमित्तीकृत्योत्पद्येते इति गुणकाण्डे वक्ष्यते । तपनपरिस्पन्दाश्च नाप्राप्ताः पिण्डमवच्छिन्दन्ति, ततस्तत्प्राप्तिरपेक्षणीया । न च

१ कार्याणामुत्पत्ति–दे । २ मासायन–दे । ३ हेतुः–कं; कि । ४ परापरादि–कं. १, कं. २ । ५ परापरेति प्रतीकमिदं सर्वेष्वपि पुस्तकेषु नास्ति । ६ प्रत्ययान्तानां–अ, ब, क; ७ [ ] एतच्चिह्नान्तर्गतः पाठः अ ब क पुस्तकेषु आवृतः । ८ जनद्वारेण–अ, ब; ९ अत्रापि 'परापर' इति पदेन भाष्यमर्थं दृष्टव्या । १० तदनयुक्तं आदर्शपुस्तकं ।

## न्यायकन्दली

आदित्यपरिवर्त्तनाल्पीयस्त्वनिबन्धनो युवस्थ[1]विपिण्डाभ्यां परापरव्यवहार इत्येके, तदयुक्तम्, आदित्यपरिवर्त्तनस्य युवस्थविरयोः सम्बन्धाभावादसम्बद्धस्य निमित्तत्वे चातिप्रसङ्गात् ।

[77] सहभावो यौगपद्यमित्यपरे, [2]तदप्यसङ्गतम्, कालानभ्युपगमसहार्थाभावात् । कस्याञ्चित् क्रियायां भावानामन्योन्यप्रतियोगित्वं सहार्थ इति चेन्न, अनुत्पन्नस्थित-निरुद्धानामन्योन्यप्रतियोगित्वाभावात् सहभवताञ्च प्रतियोगित्वे कालस्याप्रत्याख्यान[3]-मेवेत्युक्तम् । एवमयुगपदादिप्रत्यया अपि समर्थनीयाः । कालस्याभेदात् कथं प्रत्ययभेद

[टि०] प्रत्ययौ प्रति कालस्यापि कारणत्वात् । **असम्बद्धस्य** इति:—ननु [4]यथाऽघटं भूतलमित्यत्र असम्बद्धोऽप्यभावो विशेषणं भवतीत्येवमिहापि भविष्यति ? न तत्रापि संयुक्तवत्प्रतिभासोऽस्ति, अत्र तु सर्वथा [5]सम्बन्धाभाव एवेति ।

[77] **कस्याञ्चिद्** इति :—प्रतियोगित्वं सम्बन्धित्वम् । **नानुत्पन्ने** इति :—यद्येवमन्योन्यप्रतियोगिता स्यात् तदा भविष्यद्वर्तमानविनष्टानां पदार्थानां परस्परापेक्षयाऽपि प्रतियोगिता स्यात् । न च भविष्यदतीतयोः सत्तासम्बन्धोऽपि

[पं०] **कश्चिदिति—व्योमशिवः** । **विशिष्टप्रत्ययस्येति**—कालविशिष्टाभावप्रत्ययस्य । **न तु दण्डादिवद्विशेषणत्वमिति**—यथा दण्डीत्यत्र दण्डो विशेषणं दण्डी विशेष्यं [6]तद्वन्नात्रेत्यर्थः । **विषयसंबन्धमन्तरेण विशेषान्तराभावादिति**—विषयस्य घटादेः

[कु०] तपनसमवेतानां परत्वाद्याधारपिण्डप्राप्तिः स्वरूपेण सम्भवति । तस्मात् पटे महारजननी[रा]गस्येव पिण्डे तपनपरिस्पन्दस्योपनायकद्रव्यं कल्पनीयम् । न च महारजनमिव स्वरागं तपन एवं स्वपरिस्पन्दमुपनयति, अप्राप्तेः । अत एव न पृथिव्यादिकमन्यदपि मूर्तं द्रव्यम[द्रव्यस्य]संयोगिना केनचिद्द्रव्येण तपनपरिस्पन्द उपनेयः । न च विभुनाप्या-काशेनात्मना वा स उपनीयते, तयोः स्वसंयुक्तद्रव्यान्तरगतं धर्मं स्वसंयुक्तद्रव्यान्तरे उपनेतुमशक्तौ । ह्येकस्यामभिहतायां [भेर्यां] सर्वासु भेरीषु दण्डसंयोगमुपनीयानेकशब्दमुत्पादयेत् । आत्मा च स्वसंयुतया यत्र क्वचिद्वर्तमानया जपदा सर्वानेव स्फटिकमणीनुपरञ्जयेत् । न च दिशोपनीयते तस्याः केवलं संयोगोपनायकतया कल्पितत्वम् । तस्मात्तदतिरिक्तं किञ्चिद्विभुद्रव्यं कल्पनीयम् । स काल इति महर्षिभिः परिभाषित इति । तदयं प्रमाणार्थः 'स्थविरादिपरत्वं तपन-परिस्पन्दप्रकर्षबुद्धिजन्यं, तदन्वयव्यतिरेकानुबिधानात्, यद्यदन्वयव्यतिरेकानुविधायि तत्तज्जन्यं यथा कुविन्दानुविधायि कुविन्दजन्यः पटः । तपनपरिस्पन्दाश्च पिण्डप्रत्यासन्नाः तदवच्छेदकत्वात् पटावच्छेदकमहारजनरागवत् । सा च प्रत्या-सत्तिर्द्रव्यकृता द्रव्यान्तरसमवेतप्रत्यासत्तित्वात् पटे महारजनरागप्रत्यासत्तिवदिति ।

[77] **सहभावो यौगपद्यमिति** (कं. ६४.१६) यौगपद्यं हि 'युगपद्भवन्ति' 'युगपदवतिष्ठन्ते' इत्येवमादि-प्रत्यया जायन्ते ते कथं कालमनङ्गीकृत्य समर्थनीया इति भावः । [7]**कस्यां चिदिति** (कं. ६४.१७) एकक्रियावच्छेदो ह्यनेकेषां सहार्थः न चैककालसम्बन्ध इति भावः । **नेति** (कं. ६४.१८) या क्रिया व्यक्ता वा असहापि भवन्त्या एकजातीयया वा सहैकभवन्त्या वा सम्बन्धः सहार्थः स्यात् ? आद्यस्तावदसम्भावी क्रियाया एकद्रव्यत्वात्, द्वितीये त्वतिप्रसङ्ग इत्याह **अनुत्पन्नेति** (कं. ६४.१८) । तृतीये सिद्धं नः समीहितमित्याह **सह भवतामिति** (कं. ६४.१८) ।

---

१ °स्थविरयोः—कं. १, कं. २ । २ तदसङ्गतम्—कं. १, कं. २ । ३ ख्यानमित्युक्तम्—जे. १; जे. २; जे. ३ । ४ यथा पटं-अ, ब; ५ सम्बद्धाभाव—अ, ब; ६ तद्वत्तत्रे°—अ । ७ 'तस्यां चदिति' आदर्शपुस्तकपाठः ।

न्यायकन्दली

इति चेत् ? सामग्रीभेदात्, वस्तुद्वयस्योत्पादसद्भावयोर्यदेकेन ज्ञानेन ग्रहणं तत्सहकारिणा कालेन परापरप्रत्ययौ जन्येते, भूयसामुत्पादव्यापारयोरेकग्रहणसहकारिणा युगपत्प्रत्ययः कार्यस्योत्पादविनाशयोरन्तर्वर्तिनां क्रियाक्षणानां भूयस्त्वाल्पीयस्त्व[1]ग्रहणसहकारिणा चिरक्षिप्रप्रत्ययाविति यथासम्भवं वाच्यम् । ननु तत्तन्निबन्धन एवास्तु प्रत्ययभेदः कृतं कालेन ? न, असति तस्मिन् वस्तूत्पादाभावात् । न तावदत्यन्तासतो गगनस्योत्पादः, नाप्यत्यन्तासतो नरविषाणस्य, किन्तु प्रागसतः । कालासत्त्वे चाभावविशेषणस्य प्राक्शब्दार्थस्याभावान्नायं विशेषः सिद्ध्यतीति न कस्यचिदुत्पत्तिः स्यात् । अप्रत्यक्षेण कालेन कथं विशिष्टा प्रतीतिरिति चेत् ? तत्राह कश्चित्–विशिष्टप्रत्ययस्योत्पत्ताविन्द्रियवत् कारणत्वं कालस्य, न तु दण्डवद् विशेषणत्वमिति, त[2]दप्यसारम्, [3]बोधैकस्वभावस्य ज्ञानस्य विषयसम्बन्धमन्तरेण विशेषणान्तराभावात् । तस्मादप्य-

[टि०] नास्ति क्व प्रतियोगितेति वाच्यम्, न तावत्तयोः सर्वथा सम्बन्धाभावः किन्तु वर्तमानकाले एव सत्तासम्बन्धो नास्तीति कालस्तत्राप्यभ्युपगन्तव्य एव । नन्वत्र 'स्थित' इत्यत्र भूते 'क्तः' ततश्च स्थानं भूतमस्येति तस्य वर्तमानत्वसम्बन्धाभावादतीतत्वमेव प्रसज्यते । न चोत्पन्नो घट इत्यादिव[4]द् वाच्यम्, तत्रापि विवादोदयात् । सत्यम्, स्थित[5]इत्यत्र हि स्थीयमानताया एवातीतत्वं गम्यते यथा उत्पन्नो घट [6]इत्यत्रोत्पद्यमानताया इति । **वस्तुद्वयस्य इति** :– यदैकस्य वस्तुनः सद्भावोऽन्येन ज्ञानेन गृहीतो भवति, [7]दिनान्तरे चान्यस्योत्पादग्रहणं तदा 'एकेन' इति ज्ञातृविशेषणम् । ज्ञानग्रहणयोस्तुल्यार्थत्वाद्, [8]ग्रहणं विषयीकरणं तत्र वस्तुनि ज्ञानव्यापारणमित्यर्थः । **कालासत्त्वे च इति** अभावस्य विशेषणं

[पं०] कालसम्बन्धं विना विशेषान्तराणां नवपुराणादीनामभावात् । इदमुक्तं भवति न हि तावदिन्द्रियादीनां कारणानां कुत्रापि विषयत्वमिष्टम् । घटादीनामेव विषयत्वमिष्टम् । विषयस्यैव विशेषणत्वं घटते, न कारणस्य । यदि कालस्य कारणत्वमिष्यते तदा न प्रागसत इत्यत्र प्राक् शब्दस्य कालरूपस्य विशेषणत्वं घटते । यदा विषयसंबन्धो भवति तदैव विशिष्टत्वमित्यतो वैशिष्ट्यं प्रत्ययस्य न घटते । ततः कारणादिदं **व्योमशिवोक्तमुत्तरमसारमेव** ।

**तत्कारणतयेति**–शरीरावस्थाः कार्याः, कालसंयोगः कारणम्, अन्यस्याभावात् । **तयोरिति**–युवस्थविरशरीरयोः । **यथासुरभिचन्दनमिति**–सुरभित्वं घ्राणग्राह्यम्, चन्दनं चक्षुर्ग्राह्यम । **अघटं भूतलमिति**–अघटत्वमभावप्रमाणग्राह्यं भूतलं

[कु०] **वस्तुद्वयस्येति** (कं. ६४.२०) यद्यप्युत्पादमात्रापेक्षया तपनपरिस्पन्दप्रकर्षनिकर्षविषयिणीं बुद्धिमपेक्षमाणेन कालेन परत्वापरत्वम् उत्पाद्य युवस्थविरयोः परापरप्रत्ययौ जन्येते तथा **सिद्धावग्रहणपिण्डविनाशे** परत्वापरत्वयोरनुत्पत्तेः । **भूयसामिति** (कं. ६४.२२) एकसूर्यगत्यवच्छिन्नानेकोत्पादज्ञानसहकारिणा कालेन युगपत्प्रत्ययः पूर्वपूर्वोत्पादावच्छे[दि]न ।

**ननु [9]तत्तन्निबन्धन** इति (कं. ६४.२४) असम्बद्धोऽपि तपनपरिस्पन्दः कुरव इव क्षेत्रं विषयमुपलक्षयतीति भावः । **नायं विशेष** इति (कं. ६५.३) **कुरवोऽपि** प्राक्सम्बद्धा एव क्षेत्रमुपलक्षयन्तीति । अभावोऽपि सम्बद्धौरव ? (सम्बद्धयोरेव) तपनपरिस्पन्दैरवच्छिद्यते इति कालानाङ्गीकारे उपलक्षणीया उत्पादादयो न सिद्ध्येयुरिति भावः । **अप्रत्यक्षेणेति** (कं. ६५.४) विशेषणज्ञाने सति विशिष्टप्रत्ययः तेन विशेषणानुमानमितीतरेतराश्रयत्वादिति भावः ।

१ ल्पीयस्त्वसहकारिणा–जे. १; जे. ३; ..सहकारिणां–जे. २ । २ तदसारम्–कं. १, कं. २ । ३ बोधस्वभावज्ञानस्य–जे. १; जे. २; बोधस्वभावस्य ज्ञानस्य–जे. ३ । ४ तद–ड; ५ इत्यत्र स्थीयमानतायाः–अ, ब, क; ६ इवोत्पद्यमानताया–अ, ब, क; ७ दिनान्तरं–अ, ब, क; ८ ग्रहण–अ, ब, क; ९ तत्तन्निमित्तनिबन्धन–कं. १, कं. २ ।

न्यायकन्दली

थोच्यते । युवस्थविरयोः शरीरावस्थाभेदेन तत्कारणतया कालसंयोगेऽनुमिते सति पश्चात्तयोः कालविशिष्टतावगतिः प्रत्येतुरेक[1]त्वात्, प्रमाणान्तरोपनी[2]तस्यापि विशेषणत्वाविरोधात्, यथा सुरभि चन्दनमिति। यथा वा मीमांसकानामघटं भूतलमिति, घटादिषु तु मूर्त्तद्रव्यत्वेनावस्थाभेदेन वा शरीरवत् कालसम्बन्धेऽनुमिते तद्विशिष्टो युगपदादिप्रत्ययो जातः। पश्चात् कार्य्यत्वादिविप्रतिपन्नं प्रति [3]काललिङ्गत्वमित्यनवद्यम्।

सर्वकार्य्याणाञ्चोत्पत्तिविनाशहेतुः। अत्र युक्तिमाह–तद्व्यपदेशादिति। तेन कालेनोत्पत्त्यादीनां व्यपदेशात् उत्पत्तिकालो विनाशकाल इत्यादिव्यपदेशात् कालस्य तत्र हेतुत्वमित्यर्थः। कार्य्यान्तरमपि तस्य कथयति–क्षणलवेत्यादि। निमेषस्य चतुर्थो भागः

[टि०] यः प्राग् इत्यस्य शब्दस्यार्थः। स एव न सम्भवति प्राचिकाले प्रागिति व्युत्पत्तेः। नी[illegible]पद्रव्यस्य च प्रत्यक्षत्वाभावादाह तस्मादन्यथो[4]च्यते इति [5]पारिशेष्याद् युवस्थविरशरीरावस्थायां काल एव कारणमिति भावः। सुरभिचन्दनमित्यत्र घ्राणोपस्थापितो गन्धो विशेषणम्। यथा वा इति भूतलं प्रत्यक्षम[6]भावरूपप्रमाणान्तरगृहीतम्। ननु [7]युवस्थविरदेहयोस्तावदवस्थाभेदेन कालसंयोगानुमानम्, घटादौ तत्कथमित्याह घटादिषु तु इति।

[पं०] प्रत्यक्षग्राह्यम्। तयोश्च विशेषणविशेष्यभावो दृश्यते। घटादिषु तु मूर्तद्रव्यत्वेनावस्थाभेदेन वा शरीरत्वकालसम्बन्धेऽनुमिते इति। अमेन प्रयोगं दर्शयति–यन्मूर्तद्रव्यं तत्कालसंयोगि यथा शरीरम्। तथा च घटादि। अत्र चावस्थाभेदाः प्रत्यक्षाः। कालस्तु विशेषणमनुमानं गम्यत इति गमनिका। तद्विशिष्ट इति =कालसंबन्धविशिष्टः। धर्मिणीति =काले। व्यधिकरणस्य[वि]भागस्याविनाशकत्वादिति–वध्यघातकलक्षणविरोधेनेति शेषः। [8]प्रारंभ इति। कोऽर्थः? प्राक्भावोपलक्षितः कालः प्रारंभः। स्थितिरिति कोऽर्थः। मत्तयोपलक्षितः काल स्थितिः। विनाश इति कोऽर्थः। प्रध्वंसाभावोपलक्षितः कालो विनाशः। विलक्षणबुद्धिवेद्यत्वादिति। अत्र सहप्रयोगानुपपत्तेश्चेति द्वितीयोऽपि हेतुः स्वधिया वाच्यः।
–इति कालद्रव्यम् ॥ ६ ॥

[कु०] बाधंकस्वभावस्येति (कं. ६५.६) घटोज (घटज) ज्ञानं चक्षुःकारणमपि चक्षुर्विशिष्टतया नोत्पद्यते। चाक्षुषं घटज्ञानमित्यत्र त्वनुव्यवसाये चक्षुर्विशेषणतया व्यवसायमनुरञ्जयद्विषय एव न तु कारणमिति भावः। युवस्थविरयोरिति (कं. ६५.७) तपनपरिस्पन्दप्रकर्षनिकर्षाभ्यामवस्थाभेदानुमानाभ्यां विशिष्टप्रत्ययः प्रत्ययः प्रथममेव लौकिकानां परीक्षयाऽस्तु व्यधिकरणाना[.]परिस्पन्दाना[.][म]नवच्छे(ना)कतदा तदुपनायकमनुपा(मा)य परादिप्रत्ययाः कालविशिष्टप्रत्यया इति व्यवहरन्ति। तपनपरिस्पन्दाश्च प्रथममेव प्रमाणसिद्धाः। तत्सम्बन्धस्तु लौकिकविशिष्टप्रत्ययेन सत्तया कारणम् अज्ञानतया यथा शुक्लः पट इत्यत्र रूपविशिष्टप्रत्यये समवायो वैशिषिकाणां, नैयायिकानां च, अहं शरीरीति प्रत्यये अदृष्टरूपसम्बन्ध इति भावः।

---

१ रेकत्वे–जे. १; जे. २; जे. ३। २ °नीतस्य–जे. १; जे. २; जे. ३। ३ कालस्य लिङ्गम् जे. १; जे. २; जे. ३। ४ न्यथोन्यते–अ, ब; ५ परिशेषाद्–ड; ६ मभावस्वभावरूप–ड; ७ युवस्थविरयोः–अ, ब, क; ८ आरंभ–कं।

## प्रशस्तपादभाष्यम्

[78] तस्य गुणाः सङ्ख्यापरिमाणपृथक्त्वसंयोगवि[1]भागाः ।

**काललिङ्गाविशेषादेकत्वं सिद्धम् । तदनुविधानात् पृथक्त्वम् । कारणे काल इति वचनात् परममहत्परिमाणम् । कारण[2]परत्वादिवचनात् संयोगः । तद्विनाशकत्वाद् विभाग इति ।**

## न्यायकन्दली

**क्षणः, क्षणद्वयेन लवः, अक्षिपक्ष्मकर्म्मोपलक्षितकालो निमेष इत्यादिगणितशास्त्रानुसारेण प्रत्येतव्यम् ।**

**[78] एवं धर्म्मिणि सिद्धे तस्य गुणान् कथयति—तस्य गुणा इति ।**

**कालस्य द्रव्यत्वात् सङ्ख्यादियोगे सिद्धे तद्विशेषप्रतिपादनार्थमाह—काललिङ्गाविशेषादिति । कालस्य लिङ्गानां युगपदादिप्रत्ययानामविशेषादेकत्वम्, कालस्य भेदे [3]प्रमाणान्तराभावादित्यर्थः । ननु युगपदादिप्रत्ययभेद एव तद्भेदप्रतिपादकः ? नैवम्, कालाभेदेऽपि सहकारिभेदात् प्रत्ययभेदोपपत्तेः । तदनुविधानात् पृथक्त्वमिति ।**

[टि०] [78] [[4]काल]**पिण्डसंयोगोऽभिहत** इति कारणे कालसंयोगे कार्ययोः परत्वापरत्वयोरुपचारात् परत्वापरत्वशब्देन संयोगाभिधा[5]नम् ।

[कु०] ननु दण्डीत्यादिविशिष्टप्रत्यये विशेषणविशेष्ययोरेकप्रमाणव्यक्तिगोचरता वा एकजातीयप्रमाणगोचरता वा विवक्षिता? नाद्य इत्याह—**यथा सुरभीति** (कं. ६५.९) न द्वितीय इत्याह—[6]**यथा मीमांसकानामिति** (कं. ६५.१०) । ते ह्यभावं षष्ठप्रमाणगोचरं विदुः । घटादिष्वपीत्यत्रापि लौकिकानां तपनपरिस्पन्दभेदविशिष्टतयैव युगपदादिप्रणस्परा: परीक्षकाणामेव तु कालानुमानपुरस्कारणेति विवेचनीयम् । इतरथा इतरेतराश्रयत्व[स्य] दुष्परिहरत्वात् ।

सर्वोत्पत्तिमतां निमित्तकारणत्वमिति यत्प्रागुक्तं तत्प्रदर्शनार्थं भाष्यमवतारयति **सर्वकार्याणामिति** (कं. ६५.१३) । उत्पत्तेराधारः काल उत्पत्तिकाल अथोत्पन्न इत्येवमादिव्यपदेशादित्यर्थः । [7]**निमेषेति** (कं. ६५.१६) उत्पन्ने कर्मणि यावन्न विभागस्तावान् कालः क्षण इत्यर्थः ।

[78] **तस्य गुणानिति** (कं. ६५–१८) संयुक्तसमवेतोपनायकतया संयोगाधारत्वेन द्रव्यत्वे सिद्धे तत एव सङ्ख्यादिपञ्चयोगसिद्धे पुनस्तत्कथनं विशेषगुणराहित्यप्रत्यापादनायेति मन्तव्यः, विशेषविधिः शेषनिषेधपर इति न्यायात् ।

---

१ विभागाः पूर्ववदेते सिद्धाः—दे । २ कारणपरत्वादिति—कि. । ३ प्रमाणाभावाद्—जे. १; जे. २; जे, ३ । ४ काल—मु. ५ धाना—ड; ६ यथा वा—कं. १. कं. २ । ७ निमेषस्य—कं. १ कं. २ ।

प्रशस्तपादभाष्यम्

**तस्याकाशवद्द्रव्यत्वनित्यत्वे सिद्धे ।**

**काललिङ्गाविशेषादञ्ज[1]सैकत्वेऽपि सर्वकार्य्या[2]णां प्रारम्भक्रियाभिनिर्वृत्तिस्थितिनिरोधोपाधिभेदान्मणिवत्पाचकवद्वा नानात्वोपचार इति ।**

न्यायकन्दली

एकत्वस्य [3]पृथक्त्वानुविधानं साहचर्य्यनियमः, तेनैकत्वात् पृथक्त्वसिद्धिः । "कारणे काल" (वै.सू. ७-१-२५) इति वचनात् । परममहत्परिमाणमित्यनेन "का[4]रणे कालाख्या" इति सूत्रं लक्षयति । युगपदादिप्रत्ययानां कारणे कालाख्या कालसञ्ज्ञेति सूत्रार्थः । तेन व्यापकः कालो लभ्यते, युगपदादिप्रत्ययानां सर्वत्र भावादित्यभिप्रायः । कारणपरत्वादिति वचनात् संयोग इति । "कारणपरत्वात् कारणापरत्वाच्च परत्वापरत्वे" (वै. सू. ७-२-२२) इति सूत्रे कारणपरत्वशब्देन कालपि[5]ण्डसंयोगोऽभिहितः । तेनास्य संयोगगुणत्वं सिद्धम् । तद्विनाशकत्वाद्विभाग इति । तस्य संयोगस्य कृतकत्वादवश्यं वि[6]नाशे । विभागो विनाशकः, सर्वत्राश्रयविनाशाभावात् । अतः काले विभागसिद्धिर्व्यधिकरणस्य विभागस्याविनाशकत्वात् ।

[**टि०**] **अत्र च** 'परत्वाद्' इति परत्वोत्पादककालसंयोगादित्यर्थः । परत्वोत्पादकश्च कालो बहुतरतरणिसञ्चरणावच्छिन्नः एवम् 'अपरत्वाद्' इत्यस्याप्यर्थः । **यथा गुणवत्त्वाद्** इतिः–अत्रापि [7]**अनाश्रयत्वाद्** इति आश्रयैकस्वभावत्वाद् इत्यर्थः, अन्यथा समवायेन व्यभिचारः स्यात् । **कालस्य तु क्रिया[8]भिसम्बन्ध** इतिः–निवर्त्यनिवर्तकभावरूपो हि वास्तवः सम्बन्धः कालदेवदत्तयोरस्ति, देवदत्तस्यापि तन्दुलसमवायिन्यां पचिक्रियायां निवर्तकत्वेनैव क[9]र्तृत्वात्, मणौ तु रक्त[10]रूपसमवायो भ्रान्तः । ॥ कालः ॥

[**कु०**] लिङ्गानि षडभिधाय लिङ्गाविशेषादिति वचनमयुक्तमित्याशयेन शङ्कते [11]**नन्विति** (कं. ६५.२१) । परिहरति **नैवमिति** (कं. ६५.२१) । **सहकारिभेदा(श्च)** (कं. ६५.२२) सामग्रीभेदादिति । प्राणत्वोपपार्णनः? **सर्वत्र भावादिति** (कं. ६६.१) सर्वेषु मूर्तेषु स्वसंयुक्तपनसम्भवे त[त्] परिस्पन्दोना[श्रा]यकत्वव्यापकत्वे सतीति घटते । व्यापकत्वं च [न] परममहत्वेन विना घट[त] इत्यभिप्रायः । **कारणपरत्वशब्देनेति** (कं. ६६.३) परत्वस्य कारणं यः कालपिण्डसंयोगः स कारणे कार्योपचारात् परत्वमित्युक्त इत्यर्थः । [12]**व्यधिकरणस्याविनाशकत्वादिति** (कं. ६६.६) तथात्वे खदिरे प्रवृत्तया छिदया पनसः छिद्येतेति भावः ।

---

१ सैकत्वे सति–ता । २ कार्याणामारम्भ–कं. कि । ३ पृथक्त्वेनानुविधानं–कं. १ । ४ पाठान्तरमिदम् सूत्र तु 'कारणे कालः' इति । ५ °पिण्डस्य–जे. १; जे. ३ इत्यत्र कालपिण्डस्य स्थाने केवलं 'पिण्डस्य' इति पाठः । ६ विनाशिनो–कं. १; कं. २ । ७ अनाश्रितत्वाद्–मु. जे. १, जे. ३; ८ क्रियासम्बन्ध–मु. ९ कर्तृत्वात्–अ; कर्तृकत्वात्–ब; १० रूपरक्तरूप–ड; ११ राष्टत्विति आदर्शपुस्तके लेखकदोषादशुद्धः पाठः । १२ व्यधिकरणस्य विभागस्याविनाशकत्वात्–कं. १ ।

### न्यायकन्दली

तस्याकाशवद् द्रव्यत्वनित्यत्वे सिद्धे । यथा गुणवत्त्वादनाश्रितत्वाच्चाकाशं द्रव्यं तथा कालोऽपि। यथा समानासमानजातीयकारणाभा[1]वाच्च नित्यमाकाशं तथा कालोऽपि।

यद्येकः कालः कथं तत्रानेकव्यपदेश इत्याह—काललिङ्गाविशेषादिति । काललिङ्गानां परापरादिप्रत्ययानामविशेषाद् भेदाप्रतिपादकत्वादञ्जसा मुख्यया वृत्त्या कालस्यैक[2]त्वे सिद्धे नानात्वोप[3]चारान्नानात्वव्यपदेशः । कुतः ? सर्वेषां कार्य्याणामा[4]रम्भ उपक्रमः, क्रिया[5]या अभिनिर्वृत्तिः क्रियायाः परिसमाप्तिः, स्थितिः स्वरूपावस्थानम्, निरोधो विनाशः, एषामुपाधीनां भेदान्नानात्वव्यपदेशः । यथैको मणिः स्फटिकादिर्नीलाद्युपाधिभेदान्नील इति पीत इति व्यपदिश्यते तथा कालोऽप्येक एवोपाधिभेदादारम्भकाल इति क्रिया[6]भिव्यक्तिकाल इति क्रि[7]यास्थितिकाल इति निरोधकाल इति व्यपदिश्यत इत्यर्थः । मणेरुपाधिसम्बन्धो न वास्तवः, कालस्य तु क्रियासम्बन्धो वास्तव इति प्रतिपादयितुं दृष्टान्तान्तरमाह—पा[8]चकवद्वेति । यथैकस्य पुरुषस्य पचनादिक्रियायोगात् पाचक इति पाठक इति व्यपदेशस्तथा कालस्यापि, न तु प्रारम्भादिक्रियैव कालो विलक्षणबुद्धिवेद्यत्वादिति ।

*[कु०]* अनेकव्यपदेश इति (कं. ६६.९) अतीतोऽनागतो वर्तमान इति वा । **प्रारम्भकाला** इति यथाश्रुतभाष्यानुरोधेन चानेक(।) व्यवहारः कथमित्यर्थः । **भेदाप्रतिपादकत्वादिति** (कं. ६६.१०) कालस्यैकत्वे सामग्रीभेदात्प्रत्ययभेदोपपत्तेरिति भेदाप्रतिपादकत्वं प्रागुक्तमेव द्रष्टव्यम् । ***सर्वेषां कार्याणामिति*** (कं. ६६.११) धर्माणां धर्मिणां चेति व्याख्येयम् । तत्र धर्मापेक्षया धर्मिणामेकरूपत्वेऽपि त्रैकाल्यं यथा भावयिष्यति, कुविन्दः पटं भावयति अभयवदिति; तत्र ह्येकरूपोपि कुविन्दः पटोत्पादनव्यापारासन् प्रागभावापेक्षया भावयिष्यतीति तदुपलक्षितः कालोऽपि यथाव्यापाराश्रिततया तु वर्तमानः तदुपलक्षितः । कालोऽपि तथा(यथा) व्यापारोपरमापेक्षया अतीतस्तथा तदुपलक्षितः । कालोऽपि यथा धर्म्यपेक्षया वर्तमानं न विद्यते व्योमेति। अत्र हि धर्मिणः सत्तैव विवक्षिता पूर्वापरीभावो वर्तमानतया व्यपदिश्यते। अनागतं तु धर्म्यपेक्षया भविष्यति पट 'इत्य(नि)[9]त्र व्याप्रियमाणपटकारणानि दृष्ट्वा असन्नेव पटे भविष्यतीति निर्दिश्यते। धर्म्यपेक्षया अतीतं तु प्रध्वस्ते पट इति। अत्र हि प्रध्वंसस्य धर्मस्य वर्तमानत्वेऽपि तत्प्रतियोगिनोनो[[10]न्यती]तत्वे प्रध्वस्त इति भूतप्रत्ययः अत्रापि तदुपलक्षितः कालोऽपि यथा[तथा]व्यपदिश्यत इति त्रिष्वनुसरवजनीयम् । क्वचित्तु धर्ममात्रवर्तमानत्वेपि बुद्धिसिद्धो धर्मी वर्तमानतया निर्दिश्यते भविष्यति पट इति । धर्मस्यातीततया धर्मा[ती]तत्वं । क्वचित्तु भूत इति । अत्र हि वर्तमान एव पटे परत्वोत्पत्तिरूपधर्मातीतत्वेन भू[त]प्रत्ययो निर्दिश्यते इत्यादि स्वयमूहनीयम् । यथाश्रुतभाष्यानुरोधे त्वतिरोहितार्थैव कन्दलीति ॥   ×   ×   ×

---

१ कारणाभावान्नित्य—कं. १; कं. २ । २ स्यैकत्वेऽपि—कं. १; कं. २ । ३ °पचारो—जे. १; जे. २; जे. ३ । ४ प्रारम्भ—जे. १; जे. २; जे. ३ । ५ क्रियाभिनिर्वृत्तिः—जे. १; जे. २; जे. ३ । ६ क्रियाभिव्यक्तिकाल—जे. १; जे. २; जे. ३ । ७ 'क्रियास्थितिकाल'—इति — कं. १, कं. २ पुस्तकयोर्नास्ति । ८ पाचकेति—कं. १; कं. २ । ९ नि अधिको भाति । १० न्यतीतत्वम् इति शुद्धः पाठः ।

## प्रशस्तपादभाष्यम्

[79] दिक् पूर्वापरादिप्रत्ययलिङ्गा । मूर्त्तद्रव्यमवधिं कृत्वा मूर्त्तेष्वेव द्रव्येष्वेतस्मादिदं पूर्वेण दक्षिणेन पश्चिमेनोत्तरेण पूर्वदक्षिणेन [1]दक्षिणापरेणा[2]परोत्तरेणोत्तरपूर्वेण चाधस्तादुपरिष्टाच्चेति दश प्रत्यया यतो भवन्ति सा दिगिति, अन्यनिमित्तासम्भवात् ।

तस्यास्तु गुणाः सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः कालवदेते सिद्धाः ।

## न्यायकन्दली

[79] युगपदादिप्रत्ययलिङ्गत्वमिव कालस्य पूर्वापरादिप्रत्ययलिङ्गत्वं दिशो वैधर्म्यमिति प्रतिपादयन्नाह–दिक् पूर्वापरादिप्रत्ययलिङ्गेति । पूर्वमित्यपरमित्यादिप्रत्ययो लिङ्गं यस्या दिशः सा तथोक्ता । एतदेव दर्शयति–मूर्त्तद्रव्यमित्यादिना । [3]अमूर्त्तस्य द्रव्यस्य नावधित्वम्, नापि पूर्वापरादिप्रत्ययविषयत्वमस्त्यनवच्छिन्नपरिमाणत्वात् । अत इदमुक्तं मूर्त्तद्रव्यमवधिं कृत्वा, मूर्त्तेष्वेव द्रव्येष्विदमस्मात् पूर्वेणेत्यादिप्रत्यया यतो भवन्ति सा दिगिति । एतस्मादिदं पूर्वमित्यस्मिन्नेवार्थे पूर्वेणेति निर्देशः, प्रातिपदिकार्थे तृतीयोपसङ्ख्यानात् । ननु पूर्वापरादिप्रत्ययानां कार्य्यत्वात्कारणमनुमीयते, तत्तु दिगेवेति कुतो निश्चयः ? तत्राह–अन्यनिमित्तासम्भवादिति । न तावत् पूर्वापरादिप्रत्ययानां द्रव्यमात्रं

[टि०] (॥ अथ दिग्निरूपणम् ॥)

[79-80] तृतीयोपसङ्ख्यानाद् इति :– प्रकृत्यादिभ्य उपसङ्ख्यानमिति अन्यथाऽऽनन्त्यादव्ययानां पूर्वेणेत्यादीनि सर्वाण्युत्पन्नान्यव्ययानि प्रथमैकवचनान्तानि । तेनाधस्तादुपरिष्टाद् योगेऽपि दि[4]क्शब्दविहिता पञ्चमी [5]एतस्मादित्यत्र सिद्धा । [6]रिरिष्टादस्तात् [7]प्रत्यययोगे तु पञ्चम्यपवादा [8]रिरिष्टादस्तात् इति षष्ठी स्यात्, प्रत्ययान्तत्वेऽपि वा तदपेक्षया आवृत्या एतस्मादित्यत्र षष्ठी व्या[9]ख्येया, पूर्वेणेत्याद्यपेक्षया तु पञ्चमी । पूर्वेणेत्यादावपि एन प्रत्यया-

[पं०] [79] प्रातिपादकार्थे तृतीयोपसंख्यानादिति–लिंगार्थमात्रे तृतीयाभिधानादित्यर्थः । स एवेति । यथा कथञ्चिदवस्थिते द्रव्ये तेषामुत्पत्तिप्रसंगादिति एवं पूर्वोक्त एव । उभयाभावप्रसंगश्चाधिक इति अन्योन्यापेक्षया एकस्यापि

[कु०] [79] दिक्कृते परत्वापरत्वे गुणकाण्डे वक्ष्येते अतस्तल्लिङ्गत्वं तत्रैव सेत्स्यतीत्यत्रानभिधानमित्याशयवान् भाष्यमवतारयति युगपदादीति (कं. ६७.११) । यद्यपि ग्रीष्मात्पूर्वं वसन्त इति (व्या)[10]पकस्यां[एकस्याम्] अवधित्वं दृश्यते तथापि दक्षिणोत्तरादिप्रत्य[य]समभिव्याहृतपूर्वादिप्रत्ययेषु पूर्वस्यावधित्वं चान्वयव्यतिरेकाभ्यां निश्चितमित्यभिप्रायेणाह–[11]अमूर्तद्रव्यस्येति (कं. ६७.१४) । अनवच्छिन्नपरिमाणत्वादिति (कं. ६७.१५) चानवच्छिन्नपरिमाणे च दर्शनादिति नेयं न हेतुतया, ग्रीष्मादिषु व्यभिचारप्रसङ्गात् ।

१ दक्षिणपश्चिमेन – दे । २ पश्चिमोत्तरेण – दे । ३ अमूर्त्तद्रव्यस्य – जे. १; जे. २; जे. ३ । ४ दिक्शब्दयोगविहिता–अ, ब; ५ अधस्ताद्–अ, ब, क; अस्माद्–ड; एतस्माद्–मु; ६ रिरिष्टास्तात्–अ; रिष्टादस्तात्–ड; ७ प्रययोगे–अ, ब; ८ रिरिष्टास्तात्–अ; रिष्टादस्तात्–ड; ९ ष्वारेयया(!)–अ, ब; १० एकस्याम इति शुद्धः पाठो भाति । ११ अमूर्तस्य–कं. १ ।

न्यायकन्दली

निमित्तम्, यथाकथञ्चिदवस्थिते द्रव्ये तेषामुत्पत्तिप्रसङ्गात् । परस्परापेक्षया द्रव्ययोरुत्पत्तिनिमि[1]त्वेऽपि स एव दोषः, उभयाभावप्रसङ्गश्चाधिकः । क्रियागुणादिनिमित्तत्वे च समानगुणक्रियादिषु प्रत्ययविशेषो न स्यात् । तेन यदेषां निमित्तं सा दिगिति । यत्रैतस्मादिदमिति पञ्चमी प्रयुज्यते, अन्यथा सापि निर्विषया स्यात् । अवधावियं प[2]ञ्चमीति चेत् ? सत्यम्, किन्त्ववधित्वं दिगपेक्षया न[3] तु द्रव्यमात्रस्य, सर्वत्राविशेषप्रसङ्गात् । तस्या अप्रत्यक्षत्वेऽपि कालवद् विशिष्टप्रत्ययहेतुत्वं वाच्यम् । गुणवत्त्वं द्रव्यलक्षणं तदस्यामस्तीति प्रतिपादयन्नाह–[4]तस्यास्तु गुणा इत्यादि । कालवदेते सिद्धाः, यथा काललिङ्गाविशेषात् कालस्यैकत्वं सिद्धं तथा दिग्लिङ्गावशेषाद् दिश एकत्वम्, यथा तदनुविधानात् काले पृथक्त्वं 'तथा [5]दिशि, यथा' कारणे काल (वै. सू. ७-१-२५) इति वचनात् परममहत्परिमाणं तथा कारणे दिगिति वचनाद् दिशः परममहत्परिमाणम् । सर्वत्र तत्कार्यस्य पूर्वापरादिप्रत्ययस्य भावात् । यथा कारणपर[6]त्वात् कारणापरत्वाच्च कालस्य, संयोग[7]गुणवत्वं प्रतिपादितं तथा दिशोऽपि, यथा संयोगविनाशकत्वात् काले [8]विभागः सिद्धस्तथा दिशीत्यतिदेशार्थः ।

[टि०] न्तत्वे द्वितीया (यथा) षष्ठ्या वैनेनानञ्चेरिति विशेषबाधितत्वात् तद्योगे पञ्चमी न स्यात् । **उभयाभावप्रसङ्गश्च इति**:–अन्योन्यापेक्षया एकस्यापि प्रत्ययस्यानुदयात्, अत एव 'एतस्माद्' इति दिग्योगविहितत्वात् पञ्चम्याः । [9]अवागञ्चति इति नन्वेषु यदि अवादिशब्दानामेव अर्वायादयोऽर्थास्तर्हि [10]अञ्चुधातुप्रयोगो व्यर्थः पुनरुक्तत्वात् । सत्यम्, [11]अञ्चुधा[12]तुना सामान्येन तावद् गमनमुच्यते, [13]तच्च अर्वाक् प्रत्यक् च भवति, ततो विशेषापेक्षयोक्तं अवागित्यादि ।

[पं०] प्रत्ययस्यानुदयादिति भावः । अत एवैतस्मादिदमिति पञ्चमी प्रयुज्यते इति पाठः । **यत्रैतस्मादिदमिति पञ्चमी प्रयुज्यते** इति पाठान्तरम् । [14]तत्र चायं यत्र यस्यां [तदस्यां] = दिशि । शेषं सुगमम् । **अन्यथा साऽपि निर्विषया स्यादिति** सा हि पंचमी दिक् शब्देभ्यो विहिता । **न तु द्रव्यमात्रस्येति**–नतु द्रव्यमात्रस्यावधित्वम् । परवाक्यं–**ननु दिग्लिङ्गेत्यादि** । श्रीधरवाक्यं **नैकस्मिन्नर्थे** इत्यादि ।

[कु०] **यथाकथञ्चिदिति** (कं. ६७.२०) सर्वत्रावस्थितेषु घटादिप्रत्ययवत्साधारणत्वप्रसङ्गादित्यर्थः । **स एव दोष इति** (कं. ६७.२१) पूर्वापरादिप्रत्ययोपि कदाचित्सा[स्या]दिति भावः । **उभयाभावप्रसङ्गश्चेति** (कं. ६७.२१) ह्रस्वदीर्घादिषु तु परिमाणतारतम्ये प्रसिद्धे परस्परापेक्षो व्यवहार उपपद्यते पूर्वापरादिषु तु दिगसङ्काकारे वायदृष्टविषयानुपपत्तौ नोपपद्यत इति भावः । अ[15]त एवेति द्रव्यादीनां पूर्वापरादिशब्दप्रवृत्तिनिमित्तत्वानुपपत्तौ यद्यत्र निमित्तं तस्यां तस्य स्वस्वाभिधेयस्यापेक्षया नियतादवधेः पञ्चमीति भावः । तदिदमुक्तं **किन्त्ववधित्वं दिगपेक्षयेति** (कं. ६८.१) ।

१ °निमित्तत्वे स एव–जे. २ । २ पञ्चमी चेत्–जे. ३ । ३ न द्रव्यमात्रस्य–जे. १; जे. ३ । ४ तस्या गुणा–जे. १; जे. २; जे. ३ । ५ दिशीति–जे. २ । ६ परत्वाच्चेति कालस्य–कं. १; कं. २ । ७ गुणत्वं–कं. १; कं. २ । ८ विभागसिद्धिः–जे. १; जे. २; जे. ३ । ९ अवा–ड; १० भवु–अ, ब; अ ब ड; ११ अञ्च्–ड; १२ धातुनामामात्येन–अ, ब; १३ तच्चार्वाक्–क; तत्त्वावाक्–अ; तत्त्ववाक्–ब; १४ तत्र च यत्र यस्स्यादिति –अ । १५ प्रतीकमिदं कन्दल्यां नोपलभ्यते ।

### प्रशस्तपादभाष्यम्

[80] [1]दिग्लिङ्गाविशेषादञ्जसैकत्वेऽपि दिशः परम[2]महर्षिभिः श्रुतिस्मृतिलोकसंव्यवहारार्थं मेरुं प्रदक्षिणमावर्त्तमानस्य भगवतः सवितुर्ये संयो[3]गविभागाः लोकपालपरिगृहीतदिक्प्रदेशानामन्वर्थाः प्राच्यादिभेदेन दशविधाः सञ्ज्ञाः कृताः, [4]ततो भक्त्या दश दिशः सिद्धाः। तासामेव देवता[5]परिग्रहवशात् पुनर्दश सञ्ज्ञा भव[6]न्ति–माहेन्द्री, वैश्वानरी, याम्या, नैर्ऋती, वारुणी, वायव्या, कौबेरी, ऐशानी, ब्राह्मी, नागी चेति।

### न्यायकन्दली

[80] ननु दिग्लिङ्गाविशेषो न सिद्धः पूर्वापरादिप्रत्ययानां परस्परतो भेदात्, तथा च सति दिशो भेद इति युक्तम्, न, एकस्मिन्नेवार्थे युगपद्वस्त्वन्तरापेक्षया पूर्वापरादिप्रत्ययोत्पत्तेः, दिग्भेदे हि यत्पूर्वं न तत्र पश्चिमप्रत्ययो भवेत्। सर्वदिक्सम्बन्धस्तस्यास्तीति चेत्? तर्हि सर्वार्थेषु सर्वापेक्षया सर्वेषां सर्वे प्रत्ययाः प्रसज्येरन्। न चैवम्, तस्मादेका दिक्, प्रत्ययभेदस्तूपाधिभेदात्।

[7]प्रथमादित्यसंयोगस्य तदार्जवावस्थितस्य च द्रव्य[8]स्यान्तराले पूर्वा दिगिति व्यवहारः, मध्याह्नसंयोगस्य तदार्जवावस्थितस्य चान्तराले दक्षिणेति, अस्त[9]मयसंयोगस्य तदार्जवावस्थितस्य च द्रव्यस्यान्तराले पश्चिमेति, यत्रादित्यसंयोगो न दृश्यते तत्र मध्याह्नसंयोगप्रगुणावस्थितद्रव्यापेक्षयोत्तरव्यवहारः, तासामन्तरालेषु पूर्वदक्षिणादि-

[टि०] अवागादि गमनरूपं यद् गमनं तदवागादिशब्देनोच्यत इत्यर्थः। यथा चूर्णपेषं पिनष्टीति। [[10]बाहुलका चात्राधिकरणे क्विप्। प्रदक्षिणम् इति] तिष्ठद्गिवत्यादय इत्यव्ययीभावे क्रियाविशेषणम्। ॥ दिक् ॥

[पं०] [80] तस्येति=वस्तुनः। सर्वेषामिति=प्रमातॄणाम्। उपाधिभेदादिति = विशेषेण भेदात्। [11]प्रथमादित्यसंयोगस्येति–मेषतुलसंक्रान्तिप्रथमदिनादित्यसंयोगस्येत्यर्थः। [12]मध्याह्नसंयोगस्येति–मध्याह्नसूर्यसंयोगस्य मध्याह्नसंयोगप्रगुणा-

[कु०] [80] अत्रैवमालोचनीयम्–इह तावन्मेरुं प्रदक्षिणमावर्तमानस्य सवितुर्ये मेरुणा संयोगास्ते तूपाधिकाः पूर्वादिप्रत्यया इति च क्वानेन चान्यधर्मेनान्यत्र विशिष्टप्रत्ययः अतिप्रसङ्गात्। तस्मात्संयोगोपनायकं क्रियोपनायककालवद्व्यापकं द्रव्यं कल्पनीयम्। न च कालेनैव संयोगोप्यानीयत इति वक्तुं शक्यते कालस्य धर्मिसर्वधर्मोपानीयकत्वेऽतिप्रसङ्गात्। न च क्रियासंयोगयोरेकजातिजत्वेन तावन्मात्रोपनाय[क]तया कालेनैव प्राच्यादिव्यवहारो भवेत्। किञ्च

१ दिग्लिङ्गादञ्जसैकत्वेऽपि–दे। २ परमर्षिभिः–ता। ३ संयोगविशेषाः–कं. कि; संयोगविभागास्तेषां–दे। ४ अतो–कं. कि। ५ परिग्रहात्–कं. कि.। ६ भवन्ति तद्यथा–ता–यथा माहेन्द्री–दे। ७ पूर्वं°–कं. १; कं. २। ८ द्रव्यस्यान्तराले दक्षिणेति–कं. १; कं. २। ९ अस्तमयसूर्यसंयोगस्य–जे. ३। १० [ ] एतच्चिह्नान्तर्गतः पाठः अव पुस्तकयोर्नास्ति, बाहुलकाद् व्यधिकरणेऽपि प्रदक्षिणमती–क; ११ पूर्वमादित्य°–कं। १२ पाठोऽयं कं पुस्तके नास्ति।

न्यायकन्दली

व्य[1]वहार इत्युपपद्यते प्रतीतिभेदः। आदित्यसंयोगनिबन्धन एवास्तु प्रत्ययः ? न, तस्य मूर्त्तद्रव्यसंयो[2]गाभावात् असम्बद्धस्य च प्रत्ययहेतुत्वासम्भवात्। एतदेव दर्शयति–दिग्लिङ्गाविशेषादिति। दिश एकत्वे [3]स्थितेऽपि महर्षिभिः प्राच्यादिभेदेन दशविधाः सञ्ज्ञाः कृताः। कीदृश्यस्ताः ? अन्वर्थाः, [4]अनुगतोऽर्थो यासामिति सा अन्वर्थाः। केषामर्थस्तास्वनुगतः ? लोकपालैरिन्द्रादिभिः परिगृहीतानां दिक्प्रदेशानाम्। सवितुर्ये [5]संयोगविभागास्तेषामित्यध्याहारः। तथा हि–प्रथममस्यामञ्चति सवितेति प्राची। अवागञ्चतीति अवाची। प्रत्यगञ्चतीति प्रतीची। उदगञ्चतीति [6]उदीची किं विशिष्टस्य सवितुः ? मेरुं [7]प्रदक्षिणमावर्त्तमानस्य, मेरुं प्रदक्षिणं परिभ्रमतः। किमर्थं सञ्ज्ञाः कृताः? [8]श्रुतिश्च स्मृतिश्च लोकश्च [9]तेषां संव्यवहारार्थम्। सम्यग् व्यवहारार्थम्। श्रौतो व्यवहारो न प्रतीचीशिराः [10]शयीतेत्यादिः। स्मार्त्तो व्यवहार आयुष्यं प्राङ्मुखो भुङ्क्ते [11]इत्यादिः। लोकव्यवहारः पूर्वं गच्छ दक्षिणमवलोकये[12]त्यादिः। यतो दश सञ्ज्ञाः कृतास्ततो भक्त्या उपचारेण दश दिशः सिद्धा व्यवस्थिताः। माहेन्द्र्यादिसंज्ञास्तु नार्थान्तरविषयाः, किन्तु तासामेव निमित्तान्तरवशात् प्रवर्त्तन्त इत्याह–[13]तासामेवेत्यादि। महेन्द्रस्येयमिति माहेन्द्री। वैश्वानरस्येयं वैश्वानरीत्यादि सर्वत्र निर्वचनीयम्।

[पं०] **वस्थितद्रव्यापेक्षयेति**–मध्याह्नसूर्यसंमुखावस्थितद्रव्यापेक्षयेत्यर्थः। **पूर्वदक्षिणादिव्यवहार** इति आग्नेयादिकोण-व्यवहारः। परः प्राह–**आदित्यसंयोगनिबन्धन एवास्तु प्रत्ययत** इति–आदित्यसंयोगमिबन्धन एव पूर्वादिप्रत्ययोऽस्तु किं दिक्कल्पनयेति भावः। **श्रीधरो नेत्यादि**। **तस्येति**–आदित्यसंयोगस्य–**तास्विति**–संज्ञाऽस्तु ॥ इति दिक्द्रव्यम् ॥छ॥

[कु०] कालोपनीतधर्मविशिष्टा वर्तमानादिप्रत्ययाः सर्वप्रमातृसाधारणा दृष्टाः। एवं पूर्वापरादिप्रत्ययानामपि तदुप-नीतधर्मकार[ण]त्वे तद्वदेव प्रमातृसाधारण्यं स्यात्। न च पूर्वापरादिप्रत्ययाः साधारणाः। यत्र हि कस्यचित्पूर्वप्रत्ययः तत्रैवान्यस्यापरप्रत्यय इति प्रमातृनियमदर्शनात्। न चोपनायकाभेदे(कभेदे)प्युपानयभेदे[दो] न कार्य इति वाच्यम्, अवश्यं संयोगोपनायके कल्पनीये प्रमातृनियमे च प्रमाणसिद्धेः श्रुतिस्मृतीतिहासपुराणेषु दिक्कालयोर्भेदप्रसिद्धिमनुसृत्यैव द्रव्यान्तरकल्पनाया अविरोधात्। यदाह भाष्यकारः **दिशः [14]परमर्षिभिः[श्रुति]स्मृतिलोकव्यवहारार्थमिति**।

**युगपद्वस्त्वन्तरापेक्षयेति** (कं. ६८.१२) युगपदवधिभेदापेक्षया एकस्मिन्नेव पर्वतादौ पूर्वमपरं चेत्यादि प्रत्ययो[या]उत्पद्यन्ते। न च परमार्थतो दिग्भेदे प्रत्य[य]समावेशः सम्भवति[तीति]भावः। [15]**सर्वार्थापेक्षयेति** (कं. ६८.१४) यमवधिं कृत्वा यत्र पूर्वप्रत्ययस्तमेवावधिं कृत्वा तत्रैवापरप्रत्ययप्रसङ्ग इति भावः। **मध्याह्नसं[16]योगस्येति** (कं. ६८.१८)

१ °व्यवहारा–जे. २। २ सम्बन्धाभावात्–जे. २। ३ स्थिते–कं. १; कं. २। ४ अनुमतोऽर्थो–जे. २। ५ संयोगविभागातिशेषा–जे. १; संयोगा–जे. २। ६ उदीचीत्यादि–जे. १; जे. ३। ७ प्रदक्षिणं परिभ्रमतः–जे. १। ८ श्रुतिः–कं. १। ९ तेषां सम्यग्व्यवहारार्थ–कं. १; कं. २। १०,११,१२ °त्यादि–जे. १; जे. २। १३ तासामेवेति–जे. १; जे. २; जे. ३। १४ परममहर्षिभिः पा. ६ पु., श्रुतिस्मृति–कं. १, २)। १५ सर्वा–कं. १, कं. २। १६ संयोगप्रगुणः–कं. १, कं. २।

प्रशस्तपादभाष्यम्

[81] आत्मत्वाभिसम्बन्धादात्मा । तस्य सौक्ष्म्याद[1]प्रत्यक्षत्वे सति करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते । [2]वास्यादीनामिव करणानां कर्तृप्रयोज्यत्वदर्शनात् शब्दादिषु प्रसिद्ध्या च प्रसाधकोऽनुमीयते ।

न्यायकन्दली

[81] यस्य तत्त्वज्ञानं निःश्रेयसाय घटते विपर्ययज्ञानं संसारहेतुर्यदर्थानि च भूतानि तत्प्रतिपादनार्थमाह—आत्मत्वाभिसम्बन्धादात्मेति, आत्मत्वं नाम सामान्यं तदभिसम्बन्धादात्मेति [3]व्यवहार इत्यर्थः । इदमस्येतरेभ्यो वैधर्म्यम् । ननु दृश्यस्य सत्त्वं तदाकारसंवेदनेन व्याप्तम्, न चात्माकारं कस्यचित्संवेदनमस्ति, अतो व्यापकानुपलब्ध्या तस्य सत्त्वमेव निराक्रियते कुतो धर्म्मनिरूपणमित्याशङ्क्य तत्सद्भावे बाधकं प्रमाणं नास्ति प्रत्यक्षानुपलब्धेरन्यथासिद्धत्वात्, साधकञ्च प्रमाणमनुमानमस्तीति प्रतिपादयन्नाह तस्येति । प्रत्यक्षोपलब्धियोग्यताविरहः सौक्ष्म्यम् । तस्मादप्रत्यक्षस्यात्मनः करणैः शब्दाद्युपलब्धयः करणसाध्याः क्रियात्वाच्छिदिक्रियावदित्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते । कुत इत्याह—वास्यादीनां करणानां कर्तृप्रयोज्यत्वदर्शनात् । यत्करणं तत्

[टि०] (॥ अथ आत्मनिरूपणम् ॥)

[81] अतो व्यापकानु[4]पलब्ध्या इतिः यदुपलब्धिल[5]क्षणं प्राप्तं सदनुपलभ्याकारं तदसद् यथा जलाशये वह्निः; अनुपलभ्याकारश्चात्मेति प्रसङ्गः । प्रत्यक्षोपलब्धीति बाह्येन्द्रियप्रत्यक्षमत्र ग्राह्यम्, आत्मनो मानसप्रत्यक्षत्वस्य

[पं०] [81] परवाक्यं—ननु दृश्यस्येत्यादि । अन्यथासिद्धत्वादिति सौक्ष्म्यादेव सिद्धत्वात् । आकाशस्य श्रोत्रस्य यथाऽऽत्मना सह साक्षात्सम्बन्धो नास्ति । विभुत्वादिति—संयोगो ह्यन्यतरकर्मज उभयकर्मजश्च । माजः संयोग इति

[कु०] प्रथमचरमावधित्वसं[6]योगराहित्ये न तु मध्यमसंयोगराहित्ये च सति दक्षिणेति व्यवहारः न तु मध्यसंयोगे सति तूत्तरेति विभागः । सूर्यमपेक्ष्य यतः पृथिवि सा अधरा, पृथिवीमपेक्ष्य यतो नक्षत्राणि सोर्ध्वा । स° इति चन्द्रद्रव्यम् । एतदेवेति (कं. ६८.२१) दिग्भेदानामौपाधिकत्वं दर्शयतीत्यर्थः ।

लोकपालैरिन्द्रादिभिरिति (कं. ६८.२३) अत्र सवितुश्चेति 'च'शब्दलोपो द्रष्टव्यः इतरथा सवित्रेति वादिक् प्रदेशैरिति वा निर्दिष्टव्यत्वात् भाष्ये । दिक्प्रदेशानामिति (कं. ६८.२४) पदमावर्तनीयं संक्षि[प्त]प्रकाशनाय । ×

कु० [81] [यस्य]? [7]त्वभोग्यगुणाश्रयनिमित्तभावेन पृथिव्यादयः सप्त निरूपिताः, अथोपभोक्ता[कर्तृ]निरूपणप्रयोजनमाह यस्येति (कं. ७०.१८) । नन्वात्मत्वं नाम सामान्यं बह्वष्वात्मव्यक्तिषु प्रतीतासु प्रत्येतव्यं, तथा च

१ अप्रत्यक्षत्वे करणैः—दे । २ वास्यादीनां—कं. । ३ व्यवहारः—कं. १; कं. २ । ४ नुपलब्धेति—अ; ५ लक्षणं प्राप्तं—अ, ब, क; ६ संयोगरहित्ये न तु मध्यमसंयोगरहित्ये इति लेखक दोषात् हस्तलिखितपुस्तके ऽशुद्धः पाठः—सं । ७ प्रतीकमिदं कन्दल्यां न दृश्यते—सं ।

## न्यायकन्दली

केनचित् कर्त्रा प्रयुज्यते कार्ये व्याप्रार्यते, यथा वास्यादिकं वर्धकिना। करणञ्च श्रोत्रादिकं तस्मात् [1]केनचित् कर्त्रा प्रयोक्तव्यं य एषां प्रयोक्ता स आत्मा। आकाशस्य श्रोत्रस्य यद्यप्यात्मना सह साक्षात् सम्बन्धो नास्ति, विभुत्वात्, तथाप्यात्मना तस्य प्रयोज्यत्वमन्तःकरणाधिष्ठानद्वारेण, यथा हस्तेन [2]सन्दंशसंयोगिना तत्संयुक्तस्यायः-पिण्डस्य संयोगः, करणत्वञ्च श्रोत्रादीनां [3]नियतार्थस्य ग्राहकत्वात् प्रदीपवत्। यद्य-प्यात्मा अहं ममेति स्वकर्म्मोपार्जितकार्यकारणसम्बन्धोपाधिकृत[4]कर्तृत्वस्वामित्वरूप-सम्भिन्नो मनसा संवेद्यते, तथाप्यत्र[5]प्रत्यक्षत्ववाचोयुक्तिर्बाह्येन्द्रियाभिप्रायेण। शब्दादिषु [6]प्रसिद्धया च प्रसाधकोऽनुमीयते। शब्दादिषु [7]विषयेषु या प्रसिद्धिर्ज्ञानं तत्रापि प्रसाधको ज्ञातानुमीयते। [8]ज्ञानं च क्वचिदाश्रितं क्रियात्वात् छिदिक्रियावत् यत्रैवमाश्रितं स आत्मा।

[टि०] प्रतिपादयिष्यमाणत्वात्। शब्दाद्युपल[9]ब्धय इतिः-अत्र 'क्रियात्वादि'ति कार्यत्वादित्यर्थः, ज्ञानानामुत्क्षेपणादि-रूपत्वाभावात्। ज्ञानं क्वचिदाश्रितम् [इति]। अत्रापि कार्यत्वादित्यर्थः।

[पं] वचनात्। न चानयोः कर्मास्ति। विभुत्वात्। उभयोर्व्यापकयोर्न संयोग इति हि सुप्रतीतमिति भावः। बौद्धः प्राह —अथेवमित्यादि। इदं = ज्ञानम्। स्वयमेवेति = स्वतंत्रमेवेत्यर्थः। परवाक्यं—कार्यकारणभावादित्यादि। तथाभूतयोरिति

[कु०] मानसेनाक्षप्रत्यये वक्ष्यमाणेऽन्यानुगृहीतेन देहेन्द्रियव्यतिरिक्तस्वात्मसिद्धावपि परेषामप्रतीतत्वात् सामान्यस्वा-सिद्धिरिति शङ्कानिराकरणपरतया भाष्यमवतारयितुं तदाकारसंवेदनाभावेनाश्रयसिद्धिशङ्काव्याजेन स्वरूपासिद्धिमा-शङ्कते नन्विति (कं. ७०.२१)। कुतो धर्मनिरूपणमिति (कं. ७१.१) व्यक्तिभेदग्रहणाभावात् सामान्यरूपस्यात्मतत्त्वस्य निरूपणं कुत इत्यर्थः। तत्सद्भावे (कं. ७१.२) परात्मसद्भावे। प्रत्यक्षानुपलब्धेरिति (कं. ७१.२) अन्यथा अयोग्य-तयापि परमाण्वाकाशवदनुपलब्धेः संगम्यमानत्वादिति भावः। व्याप्तिप्रदर्शकं भाष्यं प्रमाणप्रदर्शनतयाऽवतारयितुं पृच्छति कुत इति (कं. ७१.६)। यत्करणमिति (कं. ७१.७) अत्र श्रोत्रादीनि कर्त्रा प्रयुज्यन्ते कर(ण)त्वादितिहेतु-प्रतिज्ञे ग्रन्थाद् बहिर्द्रष्टव्ये। येषामिति (कं. ७१.८) प्रत्यक्षयोग्यस्य बाधितत्वात् पक्षधर्मतासहायात् करणत्वसिद्धेः। प्रत्यक्षेऽर्थे वृद्धव्यवहारप्रसिद्धया आत्मेति सञ्ज्ञेत्यभिप्रायः।

नन्वात्मनः करणाधिष्ठानं नाम प्रयत्नवताऽऽत्मना कारणस्य संयोगः स च नाजः संयोग इति निषे(षि)(ध्य) मानत्वाद्विभुना विश्वाकाशात्मकश्रोत्रस्य न सम्भवतीत्यत आह—आकाशस्य श्रोत्रस्येति (कं. ७१.९)। एवमात्मत्व-सामान्यसिद्धये परात्मसाधनमनुमानं विप्रतिपत्तिदशायां स्वात्मन्यपि प्रवर्तते इति दर्शयन्नाह यद्यपीति (कं. ७१.१२)।

१ केनचित्प्रयोक्तव्यम्—कं. १; कं. २। २ सन्दंशयोगिना—कं. १; कं. २; जे. २; संन्दशसंयोगः—जे. ३। ३ नियतार्थग्राहक—जे. १; जे. २; जे. ३। ४ कर्तृता—कं. १; कं. २; जे. २। ५ प्रत्यक्षता—जे. १; जे. २; जे. ३। ६ प्रसिद्धयाश्च—जे. २। ७ विषयेषु प्रसिद्धिज्ञानं—कं. १; कं. २; विषयेषु या प्रसिद्धिर्विज्ञानं—जे. १। ८ ज्ञानं क्वचिदाश्रितं—कं. १; कं. २। ९ लब्ध इति—ड;

## न्यायकन्दली

अथेदं स्वयमेव जानाति न पराश्रितमिति चेत्? किमिदं नित्यम्? प्रतिक्षण-विनाशि वा? यदि नित्यम्? सञ्ज्ञाभेदमात्रम्। अथ क्षणिकम्, चिरानुभूतस्य न स्मरणम्, प्रतिपत्तृभेदात्। यत्तु कार्यकारणभावात् पूर्वक्षणानुभूतस्योत्तरेण स्मरणम्, यत्पुनः पित्रानुभूतस्य पुत्रेणास्मरणम्, तत्र पितृपुत्रज्ञानयोः [1]कार्यकारणभावाभावात्, शरीरयोश्च तथाभूतयोरचेतनत्वात्। तदयुक्तम्, आत्माभावे कार्यकारणभावस्या-निश्चयात्। कारणविज्ञानकाले कार्यज्ञानमनागतम्, तत्काले च [2]कारणमतीतम्। न च ताभ्यामन्यः कश्चिदेको [3]द्रष्टास्तीति कस्तयोः क्रमभाविनोः कार्य्यकारणभावं प्रतीयात्। अथ मतम्, स्वात्मग्राहिणी पूर्वा बुद्धिः स्वात्माव्यतिरिक्तं स्वस्य कारणत्व[4]मतिरूपं गोचरयति। उत्तरापि बुद्धिः स्वरूपविषया तदव्यतिरिक्तमात्मीयं कार्य्यत्वमपि गृह्णाति,

[टि०] **यदि नित्यम्** इतिः–ननु सञ्जाभेदमात्रं कथम्? केवलकर्तृरूपेण तस्यास्वीकृतत्वात्, किन्तु कर्तृकरण[5]संभेद-रूपस्यैव परैरभ्युपगतत्वात्? सत्यम्, स्थिरमेकं ज्ञातृरूपं तावत्सिद्धमेवेति भावः। **यत्पुनः [6]पित्रनुभूतस्य** इति ननू-पाध्यायज्ञानस्य शिष्यज्ञानं [7]प्रति कारणत्वाद् उपाध्यायानुभूतस्या[8]पि शिष्येण स्मरणप्रसङ्गः? सन्तानभेदादस्मरणमिति

[पं०] =कार्यकारणभूतयोः। **तत्काले** इति कार्यविज्ञानकाले। **तस्याः कारणमिति** =कार्यबुद्धेः कारणमित्यर्थः। **अस्या इति** =कारणबुद्धेः कारणमित्यर्थः। **ताभ्यामगृहीतमिति**–पूर्वोत्तरधीभ्यामनवधारितं कारणत्वकार्यत्वस्वरूपमित्यर्थः।

[कु०] अहं ममेति कर्तृत्वं स्वस्मिंश्च शरीरेन्द्रियसङ्घातस्येति वदतश्चार्वाकाभिरसितु तद्विषयमेव कर्तृत्वं स्वामित्वं च जन्मान्तरीयसम्बन्धोपाधिकृतम्। 'चक्षुषा पश्यामि' 'शरीरं प्रेरयामि' 'मम च चक्षु'र्मम च शरीरमिति च। एवं रूपमिति च द्रष्टव्यम्।

प्रसिद्धशब्दस्योत्पत्तिवाचकत्वशङ्कां निरस्यन् विचष्टे **प्रसिद्धिर्ज्ञानमिति** (कं. ७१.१५)। **क्रियात्वादिति** (कं. ७१.१६) *कार्यत्वादिति व्याख्येयम्, अन्यथा ज्ञानस्य परिस्पन्दत्वाभावेन हेत्वसिद्धिप्रसङ्गात्*, क्रियाशब्दस्य धात्वर्थपरत्वेऽपि विनश्यतीत्यादावनैकान्तिक[त्व]प्रसङ्गाच्च। विपतिपन्नमिति च ज्ञानं विशेषणीयम् ईश्वरज्ञाने कार्यत्वस्य[9](म्) भागासिद्धिर्माभूदिति। **अथेदमिति** (कं. ७१.१७) आश्रयाश्रयिभावस्य क्वचि[द]प्यनङ्गीकाराद-प्रसिद्धविशेषणः पक्ष इति भावः। **सञ्ज्ञाभेदमात्रमिति** (कं. ७१.१८) न तावद् घटपटादिविषयावच्छिन्नस्य ज्ञानस्य नित्यत्वम्, उत्पत्तिविनाशयोरनुभवात्। तदतिरेकिणः कूटस्थस्यान्यविद्यावशात् कल्पितविषयावच्छेदेनानेकवृत्तिज्ञान-सम्बन्धेन ज्ञातुर्ज्ञानादभेदसाधनं परिशिष्यते। न चैतदनिर्वचनीयस्यातिनिराकरणवेलायां निराकरिष्यते। तस्मा-त्स्वयमेव [10]जानाती(त्य)न्द्रियाधिकारणजन्यविषयावभासरूपज्ञानसम्बन्ध एव कस्यचिन्नित्यस्य वस्तुन इति वाच्यम्। तथा च सञ्ज्ञाभेदमात्रमिति भावः। **प्रतिपत्तृभेदादिति** (कं. ७१.१९) एकस्य प्रतिपत्तुरभावादित्यर्थः।

---

१ कार्यकारणभावात्–जे. १; जे. २; जे. ३। २ कारणमतीम्–कं. १; कं. २। ३ द्रष्टास्ति–जे. १; जे. २; जे. ३। ४ मतिरूपं–कं. १; कं. २। ५ करणरूपस्यैव–अ, ब, क; ६ पित्रानुभूतस्य–अ; ७ पितृ–अ, ब; ८ स्याविशेषेण–अ; ९ म अधिको भाति–सं। १० जानातीन्द्रियाधिकरण–ह. प्र।

### प्रशस्तपादभाष्यम्

**[82] न शरीरेन्द्रियमनसामज्ञत्वात्। न शरीरस्य चैतन्यम्, [1]घटादिवद्भूतकार्य्यत्वात्, मृते चासम्भवात्। नेन्द्रियाणाम्, करणत्वात्, उपहतेषु विषयासान्निध्ये चानुस्मृतिदर्शनात्।**

### न्यायकन्दली

**ताभ्याञ्च प्रत्येकमुपात्तं [2]कारणत्वं कार्य्यत्वं च तदुभयजनितैकवासनाबलभुवा विकल्पेना[3]ध्यवसीयत इति चेत्? अहो कुसृष्टिकल्पना? पूर्वोत्तरधियौ स्वात्ममात्रनियते, कुतस्तस्याः कारणमहमस्याश्चास्मि कार्य्यमिति [4]प्रतीयेताम्। पर[5]स्परवार्त्तानभिज्ञत्वात्, ताभ्यामगृ[6]हीतं च कुतोऽध्यवस्यति, तस्यानुभवानुसारित्वात्?**

**[82] भवतु पराश्रितं [7]ज्ञानम् तदधिकरणन्तु शरीरमिन्द्रियं मनो वा भविष्यति।**

**तत्राह–न शरीरेन्द्रियमनसामिति। उत्तरवाक्यस्थितं चैतन्यमिति पदमिह**

[**टि०**] न वाच्यम्, सन्तानस्य पदार्थान्तरस्याभावात्। उपाध्यायज्ञानक्षणस्य शिष्यज्ञान[8]क्षणं प्रत्युपादानका[9]रणत्वा-भावादस्मरणमि[10]त्यपि न[11] वाच्यम्। [[12]पूर्वकालभावित्वाद् अतिरिक्तस्योपादानत्व[13]स्याभावात्] स्वोपादानज्ञान-क्षणोपाध्यायज्ञानक्षणयोर्नियतप्राक्कालभा[14]वित्वाविशेषसद्भावात्। [15]**प्रतीयाताम्** इति :–सप्तमी यातामन्तम्।

[82] **नन्वेतदपि** इति :–यद् भवद्भिः शरीरादीनां चैत[16]न्यनिषेधाय बलवत्साधनमुपक्रान्तं तदपि साध्यमेव अद्याप्यसिद्धमित्यर्थः। **भूतकार्यत्वाद्** इति हेतुद्वयं तुल्यसाध्यदृष्टान्तत्वाद् एकेनैव [17]पदेनोपात्तं तेन भूतत्वात्कार्यत्वाच्चेत्यर्थः,

[**पं०**] [82] परः प्राह–**भवत्वित्यादि**। [18]**यदि त्विति**–किन्त्वित्यर्थः। **तदधिकरणमिति**=ज्ञानाधिकरणम्। ज्ञानस्याधार

[**कु०**] शिष्योपाध्यायबुद्ध्योः सत्यपि कार्यकारणभावे स्मरणादर्शनादप्रयोजकः कार्यकारणभाव इत्येतत्प्रसिद्धमेव दूषण-मित्युपेक्ष्य सौगतनये कार्यकारणभावस्य प्रतिपत्तिरपि न सम्भवतीत्याह **तदयुक्तमिति** (कं. ७१.२१)। यद्यपि बुद्धीनां स्वात्मग्रहणमग्रे निराकरिष्यते तथाप्य[19]भ्युपगम्य(म)वादोऽयम्। **स्वात्ममात्रनियते** इति (कं. ७२.२) मात्रग्रहणेन बुद्ध्यान्तरग्राहणं प्रतिपादयति। कारणत्वं कार्यत्वं च प्रतियोगिना सहैव ग्रहीतव्ं (गृहीते)। ततश्च कार्यकार(ण)-त्वयोर्धर्मितादात्म्ये सत्यपि बुद्धीनां स्वात्मग्राहकत्वे प्रतियोग्यग्रहणादग्रहणमिति भावः।

[82] तदेवं संस्काराधाराभावे स्मृत्यनुपपत्तेर्ज्ञानाश्रयः स्थायी कश्चिदङ्गीकरणीय इति बौद्धान् पराजित्य भाष्यमवतारयितुं चार्वाकमुत्थापयति **भवतु पराश्रितमिति** (कं. ७२.४)

---

१ घटवत्–ता। २ कार्यत्वं कारणत्वं च–जे. १; जे. ३। ३ नाध्यवसाय–जे. १; जे. ३। ४ प्रतीयाताम्–जे. १; जे. ३; प्रतीयताम्–जे. २। ५ परस्परं–जे. २। ६ मगृहीतं कुतो–कं. १; कं. २। ७ ज्ञानं यदि तदधिकरणं–जे. १; ज्ञानं यदि तु तदधिकरणं–जे. २। ८ ज्ञानं–ड; ९ करणत्वा–ड; १० मिति न वाच्यम्–अ, ब, क; ११ न वाच्यमिति बकपुस्तकयोरावृत्तम्। १२ [ ] एतच्चिह्नान्तर्गतः पाठः अ पुस्तके भ्रष्टः। १३ तस्याभावात् इत्यनन्तरम्; १४ भावित्वविशेष–अ, ब, क; भावित्वाभावित्व–ड; १५ प्रतीयेताम्–अ; १६ चैत्य–अ, ब; १७ पादेन–अ; १८ पाठोऽयं कं पुस्तके नास्ति, किन्तु जे–२ पुस्तकेऽस्ति। १९ अभ्युपगम्य–ह.प्र।

## न्यायकन्दली

सम्बद्धयते। शरीरेन्द्रियमनसां चैतन्यं न भवति, कुतस्तत्राह–अज्ञत्वादिति। ज्ञानं प्रति समवायिकारणत्वाभावादित्यर्थः। नन्वेतदपि साध्याविशिष्टमित्याशङ्क्याह–न शरीरस्येति। चैतन्यं शरीरस्य न भवति घटादिवच्छरीरस्य भूतकार्य्यत्वात्, यद्भूतकार्यं न तच्चेतनं[1] यथा घटः, भूतकार्य्यञ्च शरीरम्, तस्मादेतदप्यचेतनम्। युक्त्यन्तरमाह–मृते चासम्भवादिति। मृते शरीरे चैतन्यस्यासम्भवादित्यनेनायावद्द्रव्यभावित्वं विवक्षितम्। चैतन्यं शरीरस्य विशेषगुणो न भवति, [2]अयावद्द्रव्यभावित्वात् संयोगवत्। अत एव तत्कारणान्यप्यचेतनानि, तेषां चैतन्ये कार्य्येऽपि चैतन्यं स्यात्। एकस्मिन् शरीरे ज्ञातृबहुत्वञ्च प्राप्नोति। ततश्चैकाभिप्रायेण प्रवृत्तिनियमाभावादिदोषः। नेन्द्रियाणां करणत्वादिति। इन्द्रियाण्यचेतनानि करणत्वाद्दण्डवत्। हेत्वन्तरञ्च समुच्चिनोति–उपहतेष्विति।

[टि०] मिलितस्याहेतुत्वे व्यभिचाराभावा[3]त्। ज्ञानं विशेषगुणः अव्याप्यवृत्तित्वे सति प्रतिनियतेन्द्रियग्राह्यत्वात् [4]शब्दवदिति प्रमाणे(णेन) ज्ञानस्य [5]विशेषगुणत्वं सिद्धम्। अत्रापि अव्याप्यवृत्तित्वे इत्यनेन सामान्यव्य[6]वच्छेदः प्रतिनियतेत्यादिना संयोगादिव्यवच्छेदः। तत्र शरीरविशेषगुणत्वं [7]चैतन्यस्य [8]निषेधति–चैतन्यं न[9] शरीरस्य इति। ननु शरीरावयवानां हस्तादीनां गुणो भविष्यतीत्याह–अत एव तत्कारणानीति अत एव यावद् द्रव्यभावित्वादित्यर्थः। विपक्षे [10]बाधकं प्राह तेषां चैतन्य इत्यादि कार्यविशेषगुणानां कारणगुणपूर्वकत्वदर्शनात्। ननु चैत्रो मैत्रेण यदा करोति तदा चेतनमपि करणमस्तीति व्यभिचारः। मैत्रस्य चैत्रापेक्षया करणत्वेऽप्यवान्तरव्यापारापेक्षया कर्तृत्वमप्यस्तीति न वाच्यम्, दण्डादावपि तुल्यत्वात्। सत्यम्, परं मैत्र[11]स्य स्वप्रयोजनं प्रति स्वतन्त्रस्यापि कर्तृत्वमस्ति न तु दण्डादेरिति। नन्विन्द्रियाणां करणत्वमसिद्धमिति हेत्वन्तरमाह–उपहतेषु इति :–विवादास्पदं स्मृतिरूपं ज्ञानमिन्द्रियकर्तृकं न भवति तद्व्यतिरेके-

[पं०] इति यावत्। तत्कारणानीति=शरीरकारणानि=अवयवा इत्यर्थः। कार्येऽपीति=शरीरेऽपि। इन्द्रियाण्यप्यचेतनानि करणत्वाद्दण्डादिवदिति अत्राह कश्चित्–यथा चैत्रो मैत्रेण कार्यं करोति तदा मैत्रः करणरूपः सचेतनश्च, तत्कथमचेतनत्वं करणस्य। अत्रैवं समाधेयम्–इह यत्सर्वथा परतन्त्रं तदेव करणम्, मैत्रस्तु स्वतंत्रोऽपि भवति तत्कथं लंघ्यते चन्द्रहासः।

[कु०] नन्वेतदपीति (कं. ७२.८) चैतन्यं चेतनाया आश्रयत्वं समवायिकारणत्वं तु कार्यभूतायाश्चेतनाया आश्रयत्वम्, इत्यनयोर्भेदेऽपि हेतोरसिद्धत्वात् साध्याविशिष्टं च द्रष्टव्यम्। भूतकार्यत्वादिति (कं. ७२.९) हेतुद्वयं समस्य निर्दिष्टं द्रष्टव्यम्; अन्यथा विशेषणविशेष्ययोरन्यतरस्य वैयर्थ्यप्रसङ्गात्। एवमनङ्गीकारे घटादयोपि चेतयेरन्निति तर्को द्रष्टव्यः। मृते चासम्भवादिति (कं. ७२.११) हेतुरु[प]जीवनेनोपाधिना प्रयोजक इत्यन्यथा व्याचष्टे [12]अनेनेति (कं. ७२.११) कर्त्रधिष्ठितस्यैव कारणत्वादिन्द्रियाणां चैतन्ये तदतिरिक्तस्याधिष्ठातुरभावेन तच्चानुपपत्तिः। कारणत्वादित्यसानुकूलस्तर्कः।

---

१ तदचेतनम्–जे. १; जे. २; जे. ३। २ अयावद्द्रव्यभावित्वं–जे. २। ३ भावादुपाध्यायज्ञानस्य शिष्यज्ञानक्षणं प्रत्युपादानकारणत्वाभा[व?]ज्ञानं विशेषगुण……अ; ४ शब्दवत्–ड; ५ विशेषणत्व–ड; ६ विच्छेदः–ड; ७ चैतन्यं इति नास्ति ड पुस्तके। ८ निषेपति–अ; ९ चैतन्यं शरीरस्य विशेषगुणो न मु.–जे. १, ३; १० बाधके–ड; ११ चैत्रस्य–अ, ब, क; १२ द्यनेम–ह. प्र.।

## न्यायकन्दली

विनष्टेष्वपीन्द्रियेषु पूर्वानुभूतोऽर्थः स्मर्यते, न चानुभवितरि विनष्टे स्मरणं युक्तम्, तस्मान्नेन्द्रियगुणो ज्ञानम् । न च विषयस्य पूर्वानुभूतस्या[1]सान्निध्येऽपि स्मृतिर्दृष्टा, [2]बाह्येन्द्रियाणां प्राप्यकारित्वात् । तस्मात् स्मृतिस्तावन्नेन्द्रियाणाम् । तदभावादनुभवोऽपि न स्यादन्यस्यानुभवेऽन्यस्यास्मरणादित्यर्थः । अत एव विषयस्यापि न चैतन्यम्, नष्टे विषये तत्स्मरणायोगात् । इतोऽपि न तस्य चैतन्यम्, [3]तद्देशेज्ञानस्य तज्जन्यस्य च

[**टि०**] णापि जायमानत्वात् यद् यद् व्यतिरेकेणापि [[4]जायते न तत् तत्कर्तृकम् यथा कुम्भकारव्यतिरेकेणापि] जायमानः पटः । **किञ्च विषय[5]स्य इति** विनष्टघटस्मृतिः इन्द्रियकर्तृका न [6]भवति तदप्राप्तावपि [[7]जायमानत्वात्, यद् यद् प्राप्तावपि] जायते न तत् तत्कर्तृकम्, यथा कुम्भकाराप्राप्तौ [8]पटः] [[9]**अत एव विषयस्यापि** इति विवादाध्यासिता घटस्मृतिः घटाश्रिता न भवति तद् व्यतिरेकेणापि जायमानत्वात्, यथा मृत्पिण्डव्यतिरेकेण पटः ।] **इतोऽपि**[10]**न तस्य** इति :–चैतन्यं विषयाश्रितं न भवति । **तद्देशे**ऽजायमानत्वात् तद्गतरूपवत् । यदि ज्ञानं तद्देशं स्यात्तर्हि [11]सुखमपि तद्देशं संवेद्यते इति तर्कः । तर्कान्तरं चाह–**बुद्धिपूर्वकचे**[12]ष्टेति–चेष्टाविशेषो हि बुद्धिपूर्वक एवोच्यते इति द्वयोरुपादानं स्पष्टार्थम् । इदं त्वनुमानं न स्यात्, विषयश्चेतनो न भवति, बुद्धिपूर्वकचेष्टाविरहादिति सपक्षविपक्षाभावेनासाधारणानैकान्तिकत्वात्, सर्वेषां पक्षीकृतत्वादा[13]त्मनश्चासिद्धेः, सिद्धौ च चेष्टासद्भावाभावात् शरीरस्य चेतनासमवायाभावाच्च [14]व्यतिरेकितेति ।

[**पं०**] त्रयं ते मम पत्रिण इत्यत्र स्वातंत्र्यम् । [औ]पचारिकमिदम्, नतु तात्त्विकं वाक्यम् । **तस्मात्स्मृतिस्तावन्नेन्द्रियाणामिति** यदीन्द्रियाणां स्मृतिः स्यात्, तदा तेषां प्राप्यकारित्वात्स्मृतिकाले विषयसन्निकर्षः स्यात् । न च तदा विषयसन्निकर्षोऽस्ति । अततत्वादिति भावः । **अन्यस्यानुभवेनान्यस्यास्मरणादिति** । न हि चैत्रानुभूतं मैत्रः स्मरति । किन्तु येनैवानुभूतं स एव स्मरति । यदा च सर्वथा स्मरणस्य सतोऽपि इन्द्रियकार्यत्वेन[15]प्रतिषेधः कृत एवेति भावः । **तद्देशेति** = विषयदेशे । रूपमहमद्राक्षमित्यादि शब्दस्तु नोक्तः । तत्र किं कारणम् । श्रोत्रस्याकाशत्वेनात्मसंबंधाभावादित्युक्तं प्रागिति संभावयामः ।

[**कु०**] हेत्वन्तरं चेति (कं. ७२.१६) अ[त्र]प्रयोगः, 'स्मृतिर्नेन्द्रियकार्या तदभावेऽपि जायमानत्वात्, यथा व्रीहिबीजाभावेऽपि जायमानोऽयं मङ्कुरो न व्रीहिबीजा(ज)कार्यं इति । **किञ्चेति** (कं. ७२.१८) अत्रापि प्राच्येव प्रतिज्ञा, हेतुस्तु इन्द्रियाप्राप्तविषयत्वात् लैङ्गिकज्ञानवदिति । **तदभावादिति** (कं. ७२.२०) तत्प्रतिपन्नस्यानुभवस्येन्द्रियं न कर्तृ विषयस्यास्मर्तृकत्वात् । यथा देवदत्तानुभवस्य यज्ञदत्तः । तद्विषयस्यास्मर्ता तदकर्ता । **अत एवेति** (कं. ७२.२०) असान्निध्येऽप्यनुस्मृतिदर्शनादेव । ननु विषयस्यैव स्मर्तृत्वे सन्निधिमपेक्ष्यैवेत्यत आह **नष्ट** इति (कं. ७२.२१) । एवं नाशहेतुमसन्निधिं व्याख्याय सम्प्रति कार्यपेक्षया देशभेदहेतुकमप्यसन्निधिं व्याचष्टे **इतोऽपीति** । (कं. ७२.२१) ।

---

१ असान्निध्ये स्मृतिर्दृष्टा – जे. १; जे. २; जे. ३ । २ बाह्येन्द्रियाणामप्राप्यकारित्वं – जे. १; जे. २; जे. ३ । ३ तद्देशज्ञानस्य – कं. १; कं. २ । ४ [ ] एतच्चिह्नान्तर्गतः पाठः ड पुस्तके नास्ति । ५ विशेषयस्य – अ, ब; ६ भवन्ति – अ; ७ [ ] एतच्चिह्नान्तर्गतः पाठः – ड पुस्तके नास्ति । ८ घटः – अ, ब, क; ९ [ ] एतच्चिह्नान्तर्गतः पाठः – अब पुस्तकयोर्नास्ति । १० 'न' अब पुस्तकयोर्नास्ति । ११ मुख्यमपि – अ, ब; १२ चेष्टिति – अ, ब; १३ दात्ममथा – अ, ब; १४ व्यतिरेकतेति – अ, ब, क; १५ निषेधः – ब;

### प्रशस्तपादभाष्यम्

[83] [84 to 88] [89] नापि मनसः, करणान्तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसङ्गात्, स्वयं करणभावाच्च । परिशेषादात्मकार्यत्वात्तेनात्मा समधिगम्यते ।

### न्यायकन्दली

सुखादेरननुभवात्, बुद्धिपूर्वकचेष्टाविशेषाभावाच्च । न चेन्द्रियचैतन्ये विषयचैतन्ये च [1]रूपमहमद्राक्षं रसमन्वभवं स्पर्शं स्पृशामि गन्धं घ्रास्यामीति रूपादिप्रत्ययानामेक[2]कर्तृत्वप्रतिपत्तिसम्भवः, रूपादीनां चक्षुरादीनाञ्च भेदात् ।

[83] अस्तु तर्हि मनोगुणो ज्ञानम्? तस्य सर्वविषयत्वे नित्यत्वे च प्रतिसन्धानाद्युपपत्तेस्तत्राह—नापि मनस इति । ज्ञाता [3]मनो यदि चक्षुरादिव्यतिरिक्तं कारणान्तरमपेक्ष्य रूपादीन् प्रत्येति सञ्ज्ञाभेदमात्रे विवादः, यदपेक्षणीयं तन्मनो यच्च ज्ञानाधिकरणं मनः

[टि०] [83] तदा[4] रूपरसादिषु इति चेतनाश्रयो व्यापकं(क), एकदेशवृत्तिविशेषगुणवत्त्वाद्, आकाशवद्, इत्यनु-

[पं०] [83] तस्येति = मनसः । प्रतिसन्धानाद्युपपत्तेरिति एकस्यैव रूपरसज्ञानादिघटनात् । युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगमित्यभिप्रायेणाह । अथ नापेक्षते करणान्तरं तदा रूपरसादिष्वित्यादि । कारणान्तरापेक्षायामिति पंचेन्द्रियान्तरा-

[कु०] अयमभिसन्धिः सामान्यवतः सामान्यवतामनाधारस्य सुखादेर्गुणत्वाद्गुणस्वरूपस्य च गुणिदेशोपलम्भनियमात् ज्ञानसुखादेर्विषयश्च विषयदेशव्यतिरेकोपलम्भाच्च विषयगुणत्वमिति विषयदेशव्यतिरेकोपलम्भस्यासिद्धिमाशङ्क्य परिहरति बुद्धिपूर्वकेति (कं. ७२.२२) । यदि घटादयश्चेतयेरन्नान्येनानधिष्ठिता प्रवर्तयेरन्नेति परात्मानुमानपरिशेषानुकूलस्तर्को द्रष्टव्यः । न चेन्द्रियेति (कं. ७२.२१) तत्र यः स इत्यध्याहारादेककर्तृकानुसन्धानं द्रष्टव्यम् । न च शरीरचैतन्यादिदं भविष्यतीति वाच्यं तस्य प्रागेव निषेधाद् बाल्यकौमाराद्यवस्थाभेदेषु परिमाणभेदवत्तया भिन्नेन पूर्वावस्थानुभूय[5][त]स्योत्तरावस्थानुस्मरणप्रसङ्गाच्च । अन्येन दृष्टस्यान्येनास्मरणात् । तथा चैत्रेण दृष्टं मैत्रः स्मरेदिति ।

[83] ननु कारणान्तरानपेक्षत्वे इत्येतस्मिन्नेव पक्षे दोष उच्यते, सापेक्षत्वपक्षे को दोष इत्यत आह इ[6]न्द्रियेषु [7]सान्निध्याविशेषादिति (कं. ७३.४) । एकस्यैव सर्वेन्द्रियसन्निधौ रूपरसादिप्रत्ययानां प्रागुक्तमेककर्तृता प्रतिसन्धानं प्रमाणं द्रष्टव्यम् । [8]युगपदालोचनानि प्रसज्यन्त इति (कं. ७३.२) ननु दीर्घश[9]ष्कुलीभक्षणादौ रूपरसादिप्रत्यया युगपद्भवन्त्येवेतीष्टापादनतया तर्काभासोऽयमिति, नैष दोषः आवृत्य नर्तकीमुखादिकमित्थं निरीक्षमाणस्य इन्द्रियान्तरसन्निहितविषयान्तरेषु ज्ञानानुदयाद्व्यासङ्गे तावत् ज्ञानक्रमः स्पष्ट एव दृष्टस्तद्दृष्टान्तबलेन यदा [श]ष्कुलीभक्षणादौ रूपादिप्रत्ययानां क्रमानुमानादिति सिद्धान्ते ज्ञानक्रममुपपादयति [10]कारणान्तरेति (कं. ७३.३)। *आत्मनो वैभवं मनसो गुणत्वं चाग्रे वक्ष्यत इत्यभिप्रायेणाह [11]तत्रेति (कं. ७३.२) । [12](यदु) यद्यपि संस्कारोद्बोधक्रमेण स्मृतिक्रमा सिद्धा ।

---

१ रूपमद्राक्षं—कं. १; कं. २ । २ मेकैकरूपत्वं—कं. १, कं. २ । ३ मनो यदि चक्षुरादिविविक्तं—कं. १; कं. २ । ४ तदान्वय—अ, ब, तदात्व—क; ५ अर्थदृष्टया 'अनुभूतस्य' इति भाव्यम् । ७ सान्निध्याभावादिति—कं. १, कं. २ । ९ 'श'कुली Ms. ६, ८, १०, ११ अत्र प्रतीकानां व्युत्क्रमो दृश्यते । * पङ्क्तिरियमत्र न सम्बद्धा भाति—सं । १२ अनर्थमधिकमिदम—सं ।

न्यायकन्दली

**सोऽस्माकमात्मेति। अथ नापेक्षते करणान्तरम्, तदा रूपरसादिष्विन्द्रियसम्बद्धेषु युगपदालोचनानि प्रसज्यन्ते, कारणयौगपद्यात्। [1]करणान्तरापेक्षायां तु तस्याणुत्वे सर्वेन्द्रियेषु सान्निध्याभावाद्युगपदालोचनानुत्पत्तिः। [2]तथान्तःकरणाभावे युगपत्स्मरणानि स्युरपेक्षणीयाभावात् करणापेक्षायां तु तत्संयोगस्य युगपदसामर्थ्यात् क्रमेण स्मृत्युत्पत्तिः।**

**यत्तूक्तं केनचिदेकस्य नित्यस्य क्रमयौगपद्याभ्यामकरणमिति। तदयुक्तम्, युग[3]पत्करणासम्भवात्, उत्तरकालमकरणञ्च कर्त्तव्याभावात्। [4]न चैतावता [5]तस्या सत्त्वम्, अर्थक्रियाकारित्वव्यतिरिक्तस्य सत्त्वस्येष्टत्वात्।**

**इतोऽपि मनोगुणो ज्ञानं न भवति, मनसः स्वयं करणत्वादित्याह–स्वयं करणभावाच्चेति। मनश्चेतनं न भवति करणत्वाद् [6]घ्राणादिवदिति। असिद्धं मनसः करणत्वम्, कर्त्तृत्वाभ्युपगमादिति चेत्? मनसः कर्त्तृत्वे रूपादि[7]प्रतीतौ चक्षुरादिवत् सुखादिप्रतीतौ करणान्तरं मृग्यं क्रियायाः करणमन्तरेणानुपजननात्। तथा सति च सञ्ज्ञाभेदमात्रम्, कर्त्तुः करणस्य चोभयोरपि सिद्धत्वात्।**

[**टि०**] मानान्मनसोऽपि चेतनाश्रयत्वेन व्यापक[त्व]सिद्धौ युगपदालोचनप्रसङ्गः। कारणान्त[9]रानपेक्षत्वे दोषमुक्त्वा सापेक्षत्वे तदभावमाह–[8]**करणान्तरापेक्षायां तु** इति।

[**पं०**] पेक्षायाम्। **यत्तूक्तं केनचिदिति** बौद्धापेक्षः। **तथा सतीति** करणान्तराभ्युपगमेपि सति। **संज्ञाभेदमात्रमिति** पंचेन्द्रिया[णि], एकं मनो ह्यात्मेति। अपरं तु करणमित्यर्थः। **मूर्तत्वादिति**–नियतद्रव्यपरिमाणं मूर्तिः, सा अस्यास्तीति मूर्तः। अभ्रादित्वादप्रत्ययस्तस्य भावो मूर्तत्वम्। तस्मात् = मूर्तत्वात्। **अन्येषामिति**–गुणादीनां पञ्चानाम्। अथ

[**कु०**] हेतुरिति स्मृतियौगपद्यप्रसङ्गादिति प्रशिथिलस्तर्कः; तथाप्यनुभूतसहचरितादिविषयोपलम्भक्रमात् संस्कारोद्बोधक [म] इति मना[नसो] स्मृतिक्रमे कारणत्वमित्यभिप्रायेणाह तदेति (कं. ७३.२)।

[10]**यत्तुक्तं केनचिदिति** (कं. ७३.६) [इ]च्छापि न यस्य? स्थायिनयस्य? सम्बन्ध(द्धे)न्द्रियैः संयोगवशायुगपदालोचनानि भवेयुरित्ययं तर्कस्तद्विपर्ययः क्रमवति निरूपणादिज्ञानानि कर्मवत्सहकारिकार्याणि क्रमेण जायमानत्वात्, घटशरावोदञ्चनादिवदित्यनुमानं च। एकस्य स्थायिनः क्रमेण वा युगपद्वा करणे सति सङ्गच्छेयातां, तदेव तु न सम्भवतीति चोदयितुर्भावः। **युगपत्करणसम्भवात्** (कं. ७३.७) सहकारियौगपद्ये सतीति शेषः। उपलक्षणं चैतत् सहकारिक्रमेणैव क्रमकारित्वस्यापि सम्भवात्। [11]**क्रमाभावादिति** सहकार्यभावादित्यर्थः।

---

१ कारणान्तरा–कं. १; कं. २। २ अथान्तःकरणाभावो–कं. १; कं. २। ३ करणमसम्भवात्–जे. १; जे. २; जे. ३। ४ न च तावता–कं. १, कं. २। ५ तस्य सत्त्वम्–कं. १; कं. २। ६ घटादिवदिति–कं. १; कं. २। ७ प्रतिपत्तौ–जे. २। ८ कारणान्तरापेक्षत्वे तदभावमाह–अ, ब; ९ कारणा – मु. करण जे. १, जे. ३; १० यत्तूक्तं – कं. १, कं. २। ११ प्रतीकमिदं कन्दल्यां नोपलभ्यते।

## न्यायकन्दली

इतोऽप्यचेतनं मनो मूर्त्तत्वाल्लोष्टवत् । यदि शरीरेन्द्रियमनसां गुणो ज्ञानं न भवति, तथाप्यात्मसिद्धौ किमायातं तत्राह–परिशेषादिति । ज्ञानं तावत् कार्य्यत्वात् कस्यचित् समवायिकारणस्य कार्य्यम्, शरीरेन्द्रियमनसाञ्च तदाश्रयत्वं प्रतिषिद्धम् । [1]न चान्येषां वक्ष्यमाणेन न्यायेन ज्ञानका[2]रणत्वप्रसक्तिरस्ति, अतः परिशेषादात्मकार्य्यं ज्ञानम् । [3]आत्मकार्य्यत्वाच्च तेन ज्ञानेनात्मा समधिगम्यत इत्युपसंहारः ।

ननु सर्वमेतदसम्बद्धम्, क्षणिकत्वेनाश्रयाश्रयिभावाभावात् । तथा हि–सत्त्वमर्थक्रियाकारित्वम्, तच्च क्रमयौगपद्याभ्यां व्याप्तम्, क्रमाक्रमानात्मकस्य प्रकारान्तरस्यासम्भवात् । अनेकार्थक्रियाणामनेककालता हि क्रमः, यौगपद्यं चैककालता, न चैकानेकाभ्यामन्यः प्रकारोऽस्ति, परस्परविरुद्धयोरेकप्रतिषेधस्ये[4]तरविधिनान्तरीयकत्वात् । अक्षणिकत्वे तु न क्रमसम्भवः, समर्थस्य [5]क्षेपायोगात् । असमर्थस्य कालान्तरेऽप्यज[6]नकत्वं स्वभावस्या[7]निवृत्तेः । क्रमवत्सहकारिलाभात्क्रमेण करणं तस्येति चेत् ?

[पं०] बौद्धः प्राह–ननु सर्वमेतदित्यादि । क्रमाक्रमात्मकस्य प्रकारान्तरस्याभावादिति–क्रमाक्रमव्यतिरिक्तस्य प्रकारान्तरस्याभावादिति द्वौ पाठौ । अर्थः सुगमम् । इतरविधिनान्तरीयकत्वादिति–इतरविध्यविनाभावित्वादित्यर्थः । समर्थस्य क्षेपायोगादिति–

कार्याणि हि विलम्बन्ते कारणासन्निधानतः ।
समर्थहेतुसद्भावे क्षेपस्तेषां तु किं ततः ॥ इति वचनात् । क्रमवत्सहकारिलाभादिति क्रमवन्तो ये सहकारिणस्तल्लाभात् ।

[कु०] आत्मकार्यं ज्ञानमिति (कं. ७३.१७) पृथिव्याद्यष्टद्रव्याद्यतिरिक्तद्रव्यकार्यं ज्ञानं तदनाश्रितत्वे सति कार्यत्वात्, न यदेवं न च[त]देवं यथा गन्ध इति व्यतिरेकी ।

नन्विति (कं. ७३.१८) ज्ञानाश्रयत्वेनात्मसाध[न]मिदमयुक्तम् । आश्रयाभावो हि स्थैर्ये सति वक्तव्यः । अस्थिरस्याश्रयत्वानुपपत्तेरित्यर्थः । सामान्यरूपस्य वासत्वस्य स्थैर्येऽप्युपपद्यमानतया न क्षणिकत्वेन व्याप्तिरित्यत आह तथाहीति (कं. ७३.१९) । परस्परविरुद्धयोरिति (कं. ७३.२२) एकानेकयोर्भावाभावरूपतया परस्परविरोधो द्रष्टव्यः । एवं सत्त्वस्य व्याप्तिपदस्पर्शत(न)योरक्षणिकाद्व्यावृत्तिं दर्शयति अक्षणिकत्व इति (कं. ७३.२३) । वर्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोर्भावः समर्थो च नेष्य(ष्ट?) इत्याह समर्थस्येति (कं. ७३.२३) । न द्वितीय इत्याह–असमर्थस्येति (कं. ७३.२३) ।

---

१ न चान्येषु–कं. १; कं. २ । २ ज्ञानकारणत्वं प्रति शक्तिरस्ति–कं. १; कं. २ । ३ आत्मकार्य्यत्वात्तेन–कं. १; कं. २; आत्मकार्यत्वादेव–जे. २ । ४ स्यापर–जे. २; जे. ३ । ५ क्रमायोगात्–पा. १ पु. ६ प्यजनकत्वस्व–कं. १, कं. २ । ७ स्यानतिवृत्तेः–कं. १; कं. २ ।

## न्यायकन्दली

[84] अत्र वदन्ति–यदि सहकारिणो भावातिशयं न जनयन्ति नापेक्षणीयाः, अकिञ्चित्करत्वात् । [1]जनयन्ति चेत् ? स किं [2]भावव्यतिरिक्तः ? अव्यतिरिक्तो वा ? [3]व्यतिरिक्तपक्षे तावदतिशयादेवागन्तुकादन्वयव्यतिरेकाभ्यां कार्योत्पत्तिरित्यक्षणिकस्य न हेतुत्वम्, सत्यपि तस्मिन्नभावात् । सहकारिकृताशयसहितस्य तस्य जनकत्वमिति चेत् ? अतिशयस्याति[4]शयानारम्भे कीदृशी सहायता ? आरम्भे चानवस्थायाः का प्रतिक्रिया ? सहकारिजन्योऽतिशयः स चाक्षणि[5]कस्येत्यपि सुभाषितम्, अनुपकार्य्यानुपकारकयोः सम्बन्धाभावात् । भावादभिन्नोऽतिशयः सहकारिभिः क्रियत इत्यपि न [6]पेशलम्, भावस्य पूर्वोत्पन्नस्य पुनरुत्पत्त्यभावात् । प्राक्तनो हि भावोऽनतिशयात्मा निवर्त्तते, अन्यश्चातिशयात्मा [7]जायत इति चेत् ? क्षणिकत्वसिद्धिः ।

ननु क्षणिकस्यापि सहकारिभिः किं क्रियते ? न किञ्चित्, किमर्थं [8]तर्हि तेन ते अपेक्ष्यन्ते ? को वै ब्रूते अपेक्ष्यन्ते इति, प्रत्येकमेव हि कार्यजननाय समर्था अन्त्या-

[टि०] [84] **अनुपकार्यानुपकारकयोः** इति:–कार्यकारणभावा[9]भावाद् अनुपका[10]र्यंतेति भावः । **अन्त्यावस्थाभाविनः** इति समर्थक्षणोत्पादकपूर्वज्ञानक्षणावस्थापेक्षया समर्थक्षणावस्थाया [11]अन्त्यत्वम् । **अत्राप्यमीषाम्** इति–अमीषां क्षितिबीजादिक्षणानां कारणानि उपादानक्षणादीनि प्रष्टव्यानि । यैः कारणैरुपादानक्षणादिकैः कर्तृभूतैरमूनि समर्थबीजक्षण-

[पं०] [84] **अत्र वदन्तीति** =बौद्धाः । **सहकारिण** इति कर्तारः । **भावस्यातिशयं न जनयन्तीति**–अस्मात्पुरस्तादेत्यध्याहार्यम् । **स किं तावद् व्यतिरिक्त** इत्यत्र सोऽतिशयः । **सत्यपि तस्मिन्नित्यत्र** तस्मिन्नक्षणिके । **अतिशयस्यातिशयान्तरानारम्भे कीदृशी सहायतेति** । कोऽर्थः । अतिशयेनाप्यतिशयान्तरमक्षणिकवस्तुनो यदि नारभ्यते तर्हि **कथमेतद**क्षिक (क्षणिक) वस्त्वतिशयसाहाय्यमपेक्षते । अन्यथाऽतिप्रसंगादित्यर्थः । **सहकारिजन्योऽतिशयः** । स **चाक्षणिकस्येति सुभाषितमिति** । व्यतिरिक्तपक्षे इति द्रष्टव्यम् । उपहासवाक्यं चेदम् । न सुभाषितमिति भावः । **अनुपकार्यानुपकारकयोः संबंधाभावादिति**–नित्यत्वादनुपकार्यं, अक्षणिकं वस्तु, व्यतिरिक्तत्वादनुपकारकः । सहकारिजन्योऽतिशयस्तयोः **सम्बन्धो**

[कु०] [84] **अत्र वदन्तीति** (कं. ७३.२५) भावाः सहकारिणः किमर्थमपेक्ष[–]न्ते ? स्वात्मसिद्धर्थं वा कार्यार्थं वा उपकारार्थं वा ? नाद्यः स्वात्मनः स्वकारणादेव सिद्धत्वान्नित्यत्वाद्वा । नापि द्वितीयः, समर्थस्य स्वयमेव कार्यकर्तृत्वात्, असमर्थस्य सहकारिसम्पत्तावप्यजनकत्वादिति । तृतीयः परिशिष्यत इत्याह **यदीति** (कं. ७३.२५) । उपकारं जनयन्तो भावाः किमुपकृता जनयन्ति अनुपकृता वा ? । अनुपकृतानामुपकारकत्वे भावस्यानुपकृतस्य कार्यकरत्वप्रसङ्गः ।

१ 'जनयन्ति चेत्' जे. २ पुस्तके भ्रष्टम् । २ तावद्व्यति°–कं. १; कं. २ । ३ व्यतिरेक–कं. १; कं. २ । ४ तिशयान्तरानारम्भे–कं. १; कं. २ । ५ स्येति–कं. १; कं. २ । ६ सुपेशलम्–कं. १; कं. २ । ७ जायते चेत्–जे. १, जे. २, जे. ३ । ८ तर्हि तेनापेक्ष्यन्ते–कं. १, ते चापेक्ष्यन्ते–पा. २ पु. । ९ भावादनु–अ; १० कार्येणेति–ब; कार्यतिति–क; ११ अन्त्यं रूपम्–अ;

न्यायकन्दली

वस्थाभाविनः क्षणाः, का तेषां परस्परापेक्षा ? यत्तु तदानीं परस्परं प्रत्यासीदन्ति तदुपसर्पणकारणस्यावश्यम्भावनियमात् न तु सम्भूयकार्यकरणाय, तत्काले चोपसर्पण-हेतुनियमस्तेषां वस्तुस्वाभाव्यात् ।

प्रत्येकं समर्था हेतवः [1]प्रत्येकमेकैकमेव कार्यं जनयेयुः । किमित्येकमनेके कुर्व्वन्ति ? अत्राप्यमीषां कारणानि प्रष्टव्यानि [2]यान्यमून्येकार्थनिर्वर्त्तनशीलानि प्रभावयन्ति । वयं तु [3]यथादृष्टस्य वस्तुस्वभावस्य वक्तारो न पर्य्यनुयोगमर्हामः । कार्य्यमेकेनैव कृतं किमपरे कुर्व्वन्तीति चेत् ? न कृतं कुर्व्वन्ति किन्त्वेकेन क्रियमाणमपरेऽपि कुर्व्वन्ति । यत्रैकमेव समर्थं तत्रापरेषां क उपयोग इति चेद् ? सत्यम्, न ते प्रेक्षापूर्वकारिणो यदेवं विमृश्योदासते । एकं कार्य्यमनेकस्मादुत्पद्यत इति दुर्घटमिदम्, कारणभेदस्य कार्य्यभेदहेतुत्वादिति चेन्नैवम्, सामग्रीभेदाद्धि कार्य्यभेदो न सहकारिभेदात्,

[टि०] क्षितिक्षणादीनि कर्मतापन्नानि अङ्कुरलक्षणैककार्यजननशीलानि प्रभाव्यन्ते उत्पाद्यन्ते इत्यर्थः । क्रमेण कार्यकरणं घटते इति–भिन्नकालावच्छेदेन [4]क्रियाणामेकेन करणं क्रमेण करणमुच्यते । क्षणिकत्वे तु [5]एकस्य युगपदेव स्वामर्थक्रि[6]यां विधाय [7]निवृत्तस्योत्तरस्यां क्रियाया[8]म[न]नुवर्तनात् कथं क्रमकरणमुच्यते ? सत्यम्, एकसन्तानाभिप्रायेण

[पं०] न भवतीत्यर्थः । अन्यश्चातिशयात्मा जायते[9]चेदिति–अस्मात्पुरस्तादिदयध्याहार्यम् । ननु क्षणिकस्यापीत्यादि प्रश्नः । उत्तरं न किञ्चिदिति । प्रश्नः किमर्थमित्यादि । उत्तरं तु को वै ब्रूते इत्यादि । अन्त्यावस्थाभाविन इति–समर्थक्षणोत्पादकपूर्वज्ञानलक्षणावस्थापेक्षया समर्थक्षणावस्थाया अन्त्यत्वं द्रष्टव्यम् । प्रत्यासीदन्तीति–प्रत्यासन्नीभवन्ति । वैशेषिकः प्राह–प्रत्येकं समर्था इत्यादि । बौद्धः प्राह–अत्राप्यमीषामित्यादि । यानीति कर्तृणि । अमूनीति कर्मभूतानि । प्रभावयन्तीति कार्याणि जनयन्ति । समुदितवाक्यार्थस्त्वयम्–क्षितिबीजादिक्षणानां कारणानि उपादानानि प्रष्टव्यानि । यैः

[कु०] उपकृतानामुपकारकत्वेऽनवस्थेत्येतद्दूषणं सुबोधमित्यपेक्ष्य प्रकारान्तरेण विकल्प्य दूषयति स किमिति (कं. ७३.२६) । अनुपकार्येति (कं. ७४.४) अन्येन क्रियमाणस्योपकारस्यान्यसम्बन्धित्वेऽतिप्रसङ्गादित्यर्थः । सहकारिसमवधानात्प्रत्यक्षसिद्धे चापेक्षेत्यत आह प्रत्येकमेवेति (कं. ७४.९) । अन्त्यावस्थाभाविन (कं. ७४.९) इत्यनेन सहकारिसमवधानात् ? प्राचीनस्यान्यत्वम् विवक्षितक्षणिकत्वं प्रतिपादयति ।

प्रत्येकं कुर्वतां का नाम सहकारितेत्यत आह एककार्यकारितेति (कं. ७४,१९) । अनेनैतदपि परिहृतं वेदितव्यं यथा (हु?) हुः स्थिरवादिनः पुञ्जात्पुञ्जोत्पत्तौ बीजाय[ते]नैव स्वभावेनाकुते [नाङ्कुरं] करोति किं तेनैव एव

१ प्रत्येकं कार्यं–कं. १, कं. २ । २ यान्यप्रत्येकार्थं–कं. १, कं. २ । ३ यथादृष्टवस्तुस्वभाव–जे. १, जे. ३ । ४ क्रियाणामेकेण करणमुच्यते–अ, ब; ५ एतस्य–अ, ब; ६ क्रिया–अ, ब; ७ निवृत्तरस्यां–अ; ८ मननु–ड; ९ जायते इति चेद्–कं ।

## न्यायकन्दली

एककार्य्यकारितैव सहकारिता, तस्मात् [1]क्षणिकत्वे न क्रमवतां भावानां क्रमेण कार्य्यकरणं घटते, दुर्घटा तु अक्षणिकस्यार्थक्रियेति । युगपत्करणमपि दुर्घटम्, तावत्कार्य्यकरण-समर्थस्य स्वभावस्योत्तरकालमप्यनिर्वृतेः । कृतस्य करणं नास्ति, कर्त्तव्यञ्चास्य न विद्यते, निखिलस्य कार्य्यकलापस्य सकृदेव, कृतत्वात्, अतः क्षणान्तरे न करोतीति चेत् ? तर्हि अयं तदानीमसन्नेव, समस्तार्थक्रियाविरहात् । तदेवं व्यापकयोः क्रमयौग-पद्ययोर[2]नुपलम्भादक्षणिकान्निवर्तमानं सत्त्वं क्षणिके व्यवतिष्ठते । तथा च सति सुलभं क्षणिकत्वानुमानं यत् सत् तत् क्षणिकं, सन्ति च द्वादशायतनानीति ।

[टि०] क्रमोत्पत्त्या क्रमकरणम्, वस्तुवृत्त्या तु[3] युगपदेव करणमिति । तावत्कार्य[4]करणस्य इतिः–यावन्ति समग्राणि पूर्वापरकालस्य कर्तव्यान्येकहेलया कृतानि तावत्कार्यकारि[5]त्वरूपस्य स्वभावस्य ।

"पञ्चेन्द्रियाणि श[6]ब्दाद्याः विषयाः पञ्चमानसम् ।
धर्मायतनमेतानि द्वादशायतनानि च ॥"

अन्तर्व्याप्तिकत्वान्न दृष्टान्तः ।

[पं०] कारणैरुपादानादिकैः कर्तृभूतैरमूनि समर्थबीजक्षणक्षितिक्षणादीनि कर्मतापन्नानि, एककार्यजननशीलान्युत्पद्यन्ते । अनेकस्मादिति–अनेकेभ्य इत्यर्थः । वैशेषिकवाक्यं–कृतस्य करणं नास्तीत्यादि । बौद्धवाक्यं तर्ह्ययमित्यादि । द्वादशायतनानीति–

पञ्चेन्द्रियाणि, शब्दाद्या विषया पञ्च, मानसम ।
धर्मायतनमेतानि द्वादशायतनानि वै ॥

[कु०] मादीनु ? नाद्येन, आद्ये सर्वेषामङ्कुरत्वापातः, एकदेशतापातश्च । द्वितीये त्वक्षणिकस्यापि भावस्य प्रतिकार्यं स्वभावभेदादनेकत्वमिति भिन्नदेशस्य भिन्नस्वभावस्यानेककार्यस्य जनकतया स्वकारणादेव कस्यचित्क्षणस्योत्पत्तेः, कारण-स्वभावस्यापर्यनुयोज्यत्वादिति । [7]दुर्घटका त्विति (कं. ७४.२०) क्षणिकस्य सहकारिविरहे असत्त्वादेवापेक्षाविरहः; *अक्षणिकस्य तु सर्वदा सत्त्वेऽपेक्षा विरहे सर्वदाकरणप्रसङ्ग* इति शेषः । **उत्तरकालमप्य[8]नुवृत्तेः** (कं. ७४.२२) [इति] [का]र्याङ्गीकारादिति शेषः ।

---

१ क्षणिकत्वे–कं. १; कं. २ । २ रनुपलम्भेन–कं. १; कं. २ । ३ तु–अ, ब, क; पुस्तकेषु नास्ति । ४ कार्यकरणसमर्थस्य–मु; ५ कारित्वस्य–अ, ब; ६ शब्दाद्याः पञ्च–अ; ७ दुर्घटा–कं. १ कं. २ । ८ प्यनिवृत्तेः ।

## न्यायकन्दली

[85] अत्रोच्यते न सत्त्वात् क्षणिकत्वसिद्धिः, तस्य विपक्षव्यावृत्त्यनवगमात् । यत्क्रमयौगपद्यरहितं तदसत्, यथा वाजिविषाणम्, क्रमयौगपद्यरहितञ्चाक्षणिकमिति बाधकेनाक्षणिकात् क्रमयौगपद्यव्यावृत्त्या सत्त्वव्यतिरेकप्रतीतिरिति चेन्न, अक्षणिकस्याप्रतीतौ सत्त्वस्य ततो व्यावृत्तिप्रतीत्यसम्भवात्, यथा प्रतीयमाने जले तत्र वह्निधूमयोरभावप्रतीतिः, एवमक्षणिके दृश्यमाने क्रमयौगपद्याभावात्सत्त्वाभावः [1]प्रत्येतव्यः । न चाक्षणिको नाम कश्चिदस्ति भवताम्, यथाऽप्रतीयमानेऽपि पिशाचे [2]ततोऽन्यव्यावृत्तिः प्रतीयते स्तम्भः पिशाचो न भवतीति, तद्वदेतदपि भविष्यतीति चेद् ? न, व्यावृत्तेरनुपलब्धिप्रमाणैकगोचरत्वात्, *तद्विविक्तेतरपदार्थोपलब्धिस्वभाव*[3]*योश्चानुपलब्धेः प्रतियोग्युपलब्धिमन्तरेणाभावात्* । न च स्वरूपविप्रकृष्टत्वे पिशाचस्य [4]ततोऽन्यव्यावृत्तिप्रतीतिसम्भवः । कथं तर्हि स्तम्भः पिशाचो न भवतीति प्रतीतिरिति चेत् ? नायं

[टि०] [85] व्या[5]वर्त्यव्यावृत्ति[6]विषययोरन्यतराप्रथनेऽपि व्यावृत्तिः प्रतीयते इति बौद्धोत्तरमाशङ्कते **यथाऽप्रतीयमानेपि इति** :–अत्र चाक्षणिकस्य व्यावृत्तिविषयस्याप्रतीतौ कथं सत्त्वव्यावृत्तिप्रतीतिरिति श[7]ङ्कायां व्यावृत्तिविषयाप्रत्यक्षत्वेऽपि व्यावृत्तिर्दृश्यते इति :–पिशाचः स्तम्भो न भवतीति दर्शयितुं युक्तं परं तथा न स[8]म्भवतीत्येकतराप्रतीतावपि व्यावृत्तिः प्रतीयते इति अनेनैवाभिप्रायेण स्तम्भः पिशाचो न भवतीत्येतदेव दर्शितम् । नन्वत्र स्तम्भात् पिशाचो व्यावर्त्यते न तु पिशाचात् स्तम्भः तत्कथं तत इति पञ्चमी? नैवम्, यथा स्तम्भात् पिशाचत्वं व्या[9]वर्त्यते तथा पि[10]शाचात् स्तम्भोऽपि व्या[11]वर्त्यते व्यावृत्तेरुभयत्रापि तुल्यत्वात् । **तद्विविक्ते** इति–तेन निषेध्येत विवि[12]क्तो य इतरः स्तम्भादिः ।

[पं०] [85] **अत्रोच्यते इति** श्रीधरेण । तस्येति । **तस्य विपक्षव्यावृत्त्यनवगमादिति**–अक्षणिकव्यावृत्तिनिश्चयाभावादित्यर्थः । बौद्धं वाक्यं–[13]**यत्तु क्रमयौगपद्यरहितमित्यादि** । बौद्धवाक्यं **यथाऽप्रतीयमानेऽपीत्यादि**–**तद्वदेतदपीति** । अक्षणिकत्वात्सत्त्वव्यावर्तनम् । **तद्विविक्तेतरपदार्थोपलब्धिस्व**[14]**भावाया इति** । तस्मात्पिशाचाद्विविक्तो व्यतिरिक्तो य इतरः पदार्थः स्तंभलक्षणस्तदुपलब्धिस्वभावाया इति विग्रहः । **प्रतियोग्युपलब्धिमिति** पिशाचोपलब्धिम् । [15]**ततोऽन्य-**

[कु०] [85] **विपक्षव्यावृत्त्यनवगमादिति** (कं. ७५.१) उभयवादीसिद्धस्याक्षणिकस्य [कस्य]चिदभावादेवयस्तावन्न सम्भवत्येवेति भावः । विपक्षव्यावृत्त्यनवगमो विपक्षाभावाद्वा व्यावृतौ प्रमाणाभावाद्वा ? न उभयमपि नास्तीत्याशङ्कते **यत्क्रमयौगपद्यरहितं तदसदिति** (कं. ७५.२) । **बाधकेन** व्यापकानुपलम्भेन हि वाजिविषाणं क्रमेण वा युग-

---

१ प्रतिपत्तव्यः–जे. ३ । २ ततो व्यावृत्तिः–जे. २ । ३ स्वभावत्वाच्चा–कं. १, कं. २; स्वभावाश्चानुपलब्धेः –जे. २ । ४ ततो व्यावृत्ति–कं. १, कं. २ । ५ व्यावर्त्य–ब; ६ विषयो–अ; ७ शङ्काया–अ, ब; ८ न भवती–अ; परं तथा न सम्भवतीति दर्शयितुं युक्तं इत्यावृत्तं ड पुस्तके । ९ व्यावृत्यते–अ, ब, क; १० पिशाचा–ड; ११ व्यावृत्यते–अ, ब, क; व्यावर्तते–ड; १२ तद्विवक्ते–अ, ब; १३ यत्क्रम–अ; क्रमयौग.– कं । १४ स्वभावत्वाद–कं । १५ ततो व्यावृत्ति–कं ।

## न्यायकन्दली

संसर्गप्रतिषेधः, किन्तु तादात्म्यप्रतिषेधोऽयम्, स च स्तम्भात्मतया प्रसञ्जितस्य पिशाचस्य दृश्यत्वाभ्यनुज्ञानात् प्रवर्त्तते नान्यथा, यथोक्तम्—"तादात्म्येन यावान्निषेधः स [1]सर्वोऽप्युपलब्धिलक्षणप्राप्तत्वाभ्युपगमेन क्रियते" इति। तत्र स्तम्भस्वरूपैकनियता स्तम्भप्रतीतिस्तद[2]नात्मव्यवच्छेदकारणम्, यदि स्तम्भः पिशाचो भवेत् तेनाप्या[3]त्मना ज्ञातः स्यात्। न च ज्ञानं [4]स्तम्भत्ववत्पि[5]शाचात्मकत्वमपि गृह्णाति, तस्मादयं पिशाचो न भवतीति।

अथ मतं न नीलादिव्यतिरिक्तोऽक्षणिकः क्षणिको वा कश्चिदस्ति, किन्तु प्राक्तनबुद्धिवेद्यो नीलादिक्षणोऽधुनातनबुद्धिवेद्यान्नीलक्षणादभेदेनारोप्यमाणोऽक्षणिक इत्युच्यते। भेदेन व्यवस्थाप्य[6]मानस्तु क्षणिक इति। तत्र नीलादि[7]ष्वेवेयं क्रमाक्रम-

[टि०] प्रतियोग्युपलब्धीति:—प्रतियोगिनः पिशाचादेरुपलम्भमन्तरेण तद्विवेकस्य दुर्विज्ञानत्वात्। नायं संसर्गेति:—संसर्गप्रतिषेधो हि व्यधिकरण इदमत्र नास्तीति इदमस्माद् व्यावर्तत इत्युल्लेखेन भवति[8], स च प्रतिषेध्यप्रतिषेधाधा[9]रयोर्द्वयोरप्युपलम्भे भवति; तादात्म्यनिषेधस्त्वयमयं न भवतीत्युल्लेखेन। स च निषेधाधारप्रतीतौ सत्यां निषेध्यस्य दृश्यत्वाङ्गीकारेऽपि भवति। त[10]तश्चाक्षणिकात् सत्त्व[11]व्यावर्तनेऽत्र संसर्गप्रतिषेधः। स च निषेधाधारनिषेध्ययोर्द्वयोरपि [12]प्रथने एव भवति, नैकतरस्याप्य[13]प्रथने इति नायं निषेधः 'स्तम्भः पिशाचो न भवतीत्यनेन तादात्म्यनिषेधेन समान इति भावः। ननु सत्त्वक्षणिकत्वयोस्तादात्म्यं ततश्चाक्षणिकत्वसत्त्वयोरपि तादात्म्यप्रतिषेध एव वाच्यः तत्कथं पिशाचो न भवतीत्यस्माद्

[पं०] व्याव्यावृत्तिप्रतीतिसंभव इति पिशाचतः स्तंभव्यावृत्तिप्रतीतिसंभवः। नायं संसर्गप्रतिषेध इति—यथाऽघटं भूतलमित्यत्र संसर्गप्रतिषेधस्तद्वदत्र नेत्यर्थः। स चेति तादात्म्यप्रतिषेधः। यथोक्तमिति उक्तं चेत्यर्थः। तदनात्मव्यवच्छेदकारणमिति स्तंभस्य योऽसौऽनात्मा—अस्वरूपभूतः पिशाचस्तस्य यो व्यवच्छेदस्तदत्र कारणम्। तेनाप्यात्मनेति तेनापि स्वरूपेण स्वभावप्रतीतिरिति। अर्थक्रियाकारित्वादभावप्रतीतिः। अयमुपलभ्यत इति वर्तमानत्वेनोपलभ्यत इत्यर्थः। श्रीधरः प्राह अत्रापि किमवेमित्यादि। अत्रापीति कोऽर्थः? नीलादिक्षणेषु। विपक्ष इति—अक्षणिकोऽर्थः। [14]येन च स्वरूपेणेति

[कु०] यद्वार्थक्रियां करोति सर्वथाप्यहेतुत्वात्प्रमाणसिद्ध एव कुत्रचित्कस्यचिन्निषेधः प्रत्येतव्य इत्यभिप्रायेण परिहरति नेति (कं. ७५.४)। न चाक्षणिको नामेति (कं. ७५.६) वाजिविषाणं च न प्रमाणसिद्धमिति भावः। यथा अदृश्यप्रतियोगिकोऽभावो (वः) प्रतीयते एवमदृश्याधिकरणकोऽपीत्यभिप्रायेणाशङ्कते यथा अप्र[15]तीयमाने पिशाच इति (कं. ७५.६)। साध्यविकलो दृष्टान्त इति समाधत्ते न व्यावृत्तेरिति (कं. ७५.८)। इदं च पराभिप्रायेणोक्तम्। एवमनुपलब्धेस्तद्विविक्ते पक्षेतरपदार्थोपलब्धिलक्षणत्वमपि। अस्मन्मते अभावः प्रतियोगिग्राहकप्रमाणगोचर एव। अनुपलब्धिश्च नास्तीत्युपलब्धिरेवेति। प्रतियोग्युपलब्धिमिति (कं. ७५.९) प्रतियोगिन उपलब्धियोग्यतामिति। पृच्छति कथं तर्हीति

---

१ स सर्वं—कं. १, कं. २। २ तदनात्म्य—जे. १, जे. २। ३ आत्मना = स्वरूपेण। ४ स्तम्भवत्—जे. २। ५ पिशाचात्मताम्—कं. १, कं. २; जे. ३। ६ °मानश्च—कं. १, कं. २; मानश्चाक्षणिक—जे. २; मानः—जे. ३। ७ ष्वेव—कं. १; कं. २। ८ भवत—ड; ९ धारयोरप्युपलम्भे—अ, ब, क; १० तत्स्वाक्षणिकत्वात्—अ, ब; ततश्चाक्षणिकत्वात्—क; ११ व्यावर्तनोऽत्र—अ, ब; १२–१३ प्रथमे—ड; १४ इदं प्रतीकं कपुस्तके नास्ति। १५ ऽप्रतीयमानेऽपि पिशाच—कं. १, कं. २।

## न्यायकन्दली

व्यावृत्त्या सत्त्वाभावप्रतीतिः। यदि पूर्वोप[1]लब्धः क्षण एवायमुपलभ्यते तदा सम्प्रतितनीमर्थक्रियां प्रागेव कुर्य्यात्, प्राक्तनीं वा सम्प्रत्येव, न पुनः क्रमेण कुर्यात्, एकस्य कारकत्वाकारकत्वविरोधात्। नापि सर्वं पूर्वमेव [2]करोति, सम्प्रत्यर्थक्रियारहितस्यासत्त्वप्रसङ्गादिति। [3]अत्रापि किमेवं सत्त्वस्य हेतोर्वास्तवो विपक्षो दर्शितः? कल्पनासमारोपितो वा समर्थितः? न तावद्वास्तवो विपक्षो नीलादीनामक्षणिकस्यावास्तवत्वात् [4][येन च रूपेण ते वस्तुमन्तस्तेन चार्थक्रियाकारिण एवेति न विपक्षता। कल्पनासमारोपितस्तु विपक्षो न वस्तुसाधनस्यानुमानस्याङ्गं, तस्यालीकत्वात् सर्व एवायमनुमा[ना]नुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्म्यादिभावेनेति चेत्, न, हेतुहेत्वाभासव्यवस्था-

[टि०] भेदः ? सत्यम्, [5]अक्षणिकात्तावत्सत्त्वं व्यावर्तते ततो वैयधिकरण्ये संसर्गप्रतिषेध एव भवतीति सिद्धान्तः। अत्र यद्यपि तादात्म्यप्रतिषेधे निषेधाधाराप्रथमेऽपि निषेधो भवति, संसर्गप्रतिषेधे तु निषेधा[6]धारप्रथनमन्तरेण निषेधो न भवतीति दर्शयितुमुचितं येन स्तम्भः पिशाचो न भवतीत्यतस्तादात्म्यप्रतिषेधादक्षणिकात् सत्त्वं व्यावर्तते, इत्यस्य संसर्गप्र[7]तिषेधस्य भेदो दर्शितः स्यात्, परं तथा सम्भावाभावात् तादात्म्यप्रतिषेधो निषेधाधारनिषेध्ययोरेकतरोपलम्भे सति इतरस्योपलभ्यताङ्गीकारेऽपि भवति। संसर्गप्रतिषेधस्तु द्वयोरप्युपलम्भ एव भवतीत्येतदेव दर्शितम्।

[पं०] क्षणिकत्वलक्षणेन। [8]ते इति = नीलादिक्षणाः। [9]वस्तुसन्त इति परमार्थसन्तः। न विपक्षतेति तेषां सत्त्वात्। न चाक्षणिकस्तथाभूतोऽस्तीति–धूमानुमाने हि प्रमाणसिद्धे एव जलाशयो विपक्षः। अक्षणिकस्तु प्रमाणसिद्धो नास्तीत्यर्थः। असाधारणत्वमिति साध्यासाधकः केवलपक्षवृत्तिरसाधारणोऽनध्यवसितसंज्ञकः। यथा शब्दानित्यत्वे साध्ये, 'श्रावणत्वादि'त्यसाधारणः। श्रावणत्वं हि शब्दं धर्मिणं विहाय न सपक्षे वर्तते, नापि विपक्षेऽतोऽसाधारणत्वं हेतोरिति। सत्त्वादित्यस्य, अन्वय इति व्याप्तिः। क्षणिकत्वसिद्धौ विपक्षव्यावृत्तिमात्रेणैव हेतुत्वं सत्त्वस्य भविष्यतीत्याशंक्याह न च

[कु०] (कं. ७५.१०)। अक्षणिकात्सत्त्वव्यावृत्तिः न संसर्गप्रतिषेधः। अत्रैव चायं नियम इति समाधत्ते नायमिति (कं. ७५.११)। [10]स्तम्भात्मकतयेति (कं. ७५.१२) पिशाचस्य दृश्यतानभ्युपगमे दृश्यस्तम्भात्मकतया प्रसङ्गाना-(नी)नुपपत्तिरिति भावः। स्तम्भग्राहकस्यैव प्रमाणस्य दृश्यतया(सा)भ्युपगतपिशाचात्मतानिषेधग्रहणेऽनुकूले तर्कमाह तत्रेति (कं ७५.१४)।

एवं वाजिविषाणविषयस्य विपक्षतायां विवक्षान्तरमाशङ्कते अथ मतमिति (कं. ७५.१७)। एवमध्यारोपितस्थायित्वात्पक्षादेव विपक्षभूतात् सत्त्वव्यापकयोः क्रमाक्रमयोर्व्यावृत्तिं दर्शयति यदीति (कं. ७५.२१)। एकस्येति (कं. ७५.२२) सम्प्रतितनी(य)मर्थक्रियां प्रति कारकत्वं प्रोक्तानां प्रत्यकारकत्वमिति क्रमकरणे एकस्यैव कारकत्वा

१ पलब्धक्षण–कं. १, कं. २। २ कुर्यात्–कं. १, कं. २। ३ तत्रापि–कं. १, कं. २। ४ [ ] एतच्चिह्नान्तर्गतः पाठः–कं. १, कं. २ पुस्तकयोर्नास्ति। ५ अक्षणिकत्वात् तत्सत्त्वं–अ, ब, क; ६ निषेधाधारे–अ, ब, क; ७ प्रतिषेध्यस्य–अ, ब, क; ८–९ इमे प्रतीके क पुस्तके न स्तः। १० स्तम्भात्मतया–कं. १, कं. २।

## न्यायकन्दली

नुपपत्तेः, कल्पनामात्रारोपितस्य पक्षादिभावस्य सर्वत्र सुलभत्वात् तस्मादनुमानाद्वा-स्तवीमर्थगतिमिच्छता लिङ्गस्य त्रैरूप्यविनिश्चयार्थं धूमानुमानवत् सर्वत्र प्रमाणसिद्धः पक्षादिभावो दर्शयितव्यो न कल्पनामात्रेण, न चाक्षणिकस्तथाभूतोऽस्तीति व्यतिरेका-सिद्धिः। तदसिद्धावन्वयस्याप्यसिद्धिस्तस्यास्तत्पूर्वकत्वादित्यसाधारणत्वं हेतोः। अपि च बाधकेनाक्षणिकात् सत्त्वव्यतिरेकः प्रसाधितः, क्षणिकत्वसत्त्वयोरन्वयः कुतः सिद्ध्यति ? न च तत्र विपक्षव्यावृत्तिमात्रेण हेतुत्वमसाधारणस्यापि हेतुत्वप्रसङ्गात्। केवलव्यति-रेक्यनुमानञ्च [1]स्वयमनिष्टम्। [2]अक्षणिके सत्त्वं न भवतीत्यवस्थापितेऽर्थात् क्षणिकाश्रयं सत्त्वमित्यन्वयसिद्धिरिति चेत् ? न तावदर्थादिति सत्त्वस्य हेतोः परामर्शः, असिद्धान्वयस्य तस्याद्यापि हेतुत्वाभावात्। बाधकमेव तूभयव्यापारं प्रमाणान्तरं व्याप्ति

[टि०] हेतुहेत्वाभासेति :—पक्षमात्रवृत्तित्वेऽपि क[4]ल्पनासमारोपितसपक्ष[5]विपक्षवृत्त्यवृत्तिभ्यां हेतुः स्यात्। तस्यास्त-त्पूर्वकत्वाद् इति पक्षमा[6]त्रवृत्तित्वात् बौद्धमतेऽसाधारणोऽनैकान्तिकः [7]सत्त्वाद् इति हेतुः [8]स्वमते त्वनध्यवमित इति। व्यतिरेकव्याप्त्यभ्युपगमेन आह अपि च बाधकेन इति। ननु नैयायिकेन केवलविपक्षव्यावृत्तो हेतुः केवलव्यतिरेकीत्युच्यते इत्यत आह केवलेति :—स्वयमिति बौद्धैः। न तावद् इति :—अर्थादित्यस्य न स[9]त्त्वादित्ययमर्थः।

ननु क्रमयौगपद्य[10]रहितत्वलक्षणाद् बाधकादनुमानादेव समर्थात् द्वयमपि भविष्यति [11]व्यतिरेकसिद्धिरन्वय-सिद्धिश्च। अथवाऽन्यस्मात्कस्माच्चिदप्यनुमानाद् भविष्यतीत्याह बाधकमेव तु इति। सत्त्ववैयर्थ्यम् इति :—'सत्त्वाद्' इति हेतुना हि यत्साध्यं तस्य व्याप्तिसाधकप्रमाणान्तराद् [12]बाधकाद् वा प्रमाणात् सिद्धिः। पक्षे सामान्येन इतिः— द्वादशायतनरूप एव पक्षे तद्रूपाविवक्षया सामान्येन व्याप्तिग्रहणम्, आयतनेषु तु विशेषरूपतया विवक्षितेषु सत्वात्

[पं०] तत्रेत्यादि। केवलव्यतिरेक्यनुमानं च स्वयमनिष्टमिति अन्वयव्यतिरेकप्रियत्वाद् बौद्धस्येति भावः। बाधकमेवेति अक्षणिकत्वसत्त्वनिषेधकमेव प्रमाणम्। उभयव्यापारमिति—अन्वयव्यतिरेकव्यापारम्। सम्बन्धिप्रतीतिनान्तरीयकत्वादिति द्वादशायतनेषु याऽन्वयप्रतीतिः सा सम्बन्धिप्रतीतिस्तदविनाभावित्वात्। संबन्धप्रतीतेरिति क्षणिकत्वसम्बन्धप्रतीतेः। पक्षे इति द्वादशायतन इति रूपे। सामान्येन व्याप्तिग्रहणमिति बाधकानुमानेनेति शेषः। विशेषे इति द्वादशाना-मन्यतरस्मिन्। व्यावर्त्याभेदेन कल्पितभेदयोरिति—अक्षणिकत्वमसत्त्वमित्याकारेण। तादात्म्यं चानुमानाङ्गमुक्तमिति

[कु०] कारकत्वप्रसक्तिरिति भावः। अ[13]त्रापि किमेवमिति (कं. ७५.२४) किं शब्द आक्षेपे, वास्तवो न दर्शित एक-कल्पनासमारोपितश्च न समर्थित एवेति भावः। कथमित्यत आह—न तावदिति (कं. ७५.२५)। बुद्ध्यारूढेन कल्पितेन सौगतनये धर्मधर्मिभावस्यैवाव[स्तु]त्वादिति भावः। अन्वयस्य व्याप्तिः कल्पिताद्विपक्षाद्व्यतिरेकसिद्धावपि केव[ल] व्यतिरेकिणमनङ्गीकुर्वता सपक्षे सत्त्वं विना न व्याप्तिरित्यभ्युपगमेन दूषयति अपि चेति (कं. ७६.१)। विपक्षे

१ स्वयमेवानिष्टम्—जे. ३। २ अक्षणिकेऽपि—कं. १, कं. २; अक्षणिकसत्वं—जे. ३। ३ प्रतीकमिदं मु. पुस्तके नास्ति किन्तु—जे. १, ३ इत्यत्रास्ति। ४ सकल्पना—ड; ५ विपक्षवृत्तिभ्यां—अ; ६ पक्षमाण—अ, ब; ७ सत्त्वादि—अ, ब, क; ८ स्वयमते—अ, ब; ९ सदित्ययमर्थः—अ; १० रहितलक्षणाद्—अ, ब, क; ११ व्यतिव्यतिरेक—अ, ब; १२ बाधकात्प्रमाणात्—अ; १३ तथापि—कं. १. कं. २।

## न्यायकन्दली

**प्रसाधयद् द्वादशायतनेष्वेव प्रसाधयेन्निर्विषयाया व्याप्तेः प्रत्येतुमशक्यत्वात्, द्वादशायतनव्यतिरिक्तस्य चार्थस्याभावात्। तेषु चान्वयप्रतीतौ क्षणिकत्वस्यापि प्रतीतिः, सम्बन्धिप्रतीतिनान्तरीयकत्वात् सम्बन्धप्रतीतेरिति सत्त्ववैयर्थ्यम्। पक्षे सामान्येन व्याप्तिग्रहणं विशेषे सत्त्वस्य हेतुत्वमिति चेन्न, निर्विशेषस्य सामान्यस्य प्रतीतेरभावात्। विशेषपरिनिष्ठयोश्च क्षणिकत्वसत्त्वसामान्ययोः प्रतीयमानयोर्नीलादिगतं क्षणिकत्वं प्रतीतमिति सूक्तं सत्त्ववैयर्थ्यमिति। बाधकादक्षणिकत्वव्यावृत्त्यसत्त्वव्यावृत्त्योर्व्याप्तिग्रहणम्, [1]सत्त्वात्तु वस्त्वात्मकक्षणिकत्वप्रतीतिरिति चेन्न, व्यावर्त्यभेदेन कल्पितभेदयोर्व्यावृत्त्योस्तादा[2]त्म्याभावात्। तादात्म्यञ्चानुमानाङ्गमुक्तम् वस्त्वात्मनोः क्षणिकत्वसत्त्वयोस्तादात्म्यात्। तदात्मकत्वेनाध्यवसितयोरपि व्यावृत्त्योस्तादात्म्यमिति चेत्? न,**

[टि०] क्षणिकत्वं साध्यते इत्यर्थः। ननु द्वादशायतनान्येव पक्षः, तत्र सामान्येन व्याप्तिर्गृहीता तत्रैव च सत्त्वस्य हेतुत्वम्। तत्किमिदं सामान्यविशेषयोरन्तरम्? सत्यम्। यच्छब्दोपनिबन्धनोच्यमानानि तान्येव सामान्यव्यपदेशं लभन्ते, इदं शब्देन तु विशेषव्यपदेशमिति। नीलादिगतं द्वादशायतनगतमित्यर्थः। बाधकप्र[3]माणस्य सत्त्वहेतोश्च भिन्नविषयत्वेन चरितार्थत्वमाशङ्कते **बाधकादक्षणिकत्वेति** :–बाधकानुमानाद् यदसद्व्यावृत्तं तदक्षणिकव्यावृत्तमिति प्रतीतम्, सत्त्वात्तु यत्सत्तत्क्षणिकमिति प्रतीतमित्यर्थः। अ[4]सत्त्वव्यावृत्त्यक्षणिकत्वव्यावृत्त्योस्तादात्म्याभावेन सम्बन्धाभावाद[5]सत्त्वव्यावृत्तेः प्रमाणानां निराचिकीर्षुराह **न [6]व्यावर्त्यभेदेन** इति :–क्षणिकसतोर्भेदेन व्यावृत्त्योरपि भेदः कल्प्यते, ततो न तयोस्तादात्म्यं स्वरूपेणावस्तुत्वात्। **न[7] वस्तुनोः** इति य[8]देव सत्तदेव क्षणिकमिति तादात्म्यं वस्तुभूतयोः परमार्थरूपयोः सत्त्वक्षणिकत्वयोर[9]न्यतः प्रमाणान्तरान्न तावत्प्रतीतम्। अथ प्रतीतं[10]तर्हि यत्क्रमयौगपद्यरहितं तदसदिति बाधकप्रमाणस्य

[पं०] –परेण हि सर्वं क्षणिकं सत्त्वादित्ययं हेतुः स्वभावहेतुरुक्तः। स्वभावहेतौ च प्रयुज्यमाने तादात्म्यमुपयुज्यते; तच्च प्रकृते नास्तीति हृदयम्। **वस्तुनोस्तादात्म्यस्यान्यतोऽप्रसिद्धेरिति** वस्तुभूतयोः क्षणिकत्वसत्त्वयोरपि हि तादात्म्यसिद्धि र्बाधकानुमानादेव, नत्वन्यस्मात्कुतश्चिदिति भावः। **बाधकस्यापि वैयर्थ्यमिति** न केवलं पूर्वोक्तं सत्त्वस्यैव वैयर्थ्यम्,

[कु०] बाधकप्रवृत्त्या पक्ष एवान्वयो निश्चेक्षत इति शङ्कते अ[11]**क्षणिकत्व** इति (कं. ७६.४)। अर्थात् परि[शे]षादित्यर्थः। अत्र विकल्पः परिशेषो नाम लिङ्गविशेषः.

स किं सत्त्वबाधकं वा ततोऽन्यद्वा? नाद्य इत्याह **न तावदिति** (कं. ७६.५)। नोत्तरावित्याह – **उभयव्यापारमिति** (कं. ७६.६)। अक्षणिकात्सत्त्वस्य व्यावर्तनं क्षणिकेऽवस्थानं चोभौ व्यापारौ। **न निर्विशेषस्येति** (कं. ७६.१०) नास्माकमिव सौगतानामनुगतं सामान्यमस्ति यत्क्रोडीकारेण विशेषात् परिहृत्य व्याप्तिर्गृह्येतेति भावः। स्वरूपं सामान्यं नास्ति सौगतनये तथाप्यपोहरूपमस्त्येवेत्याशङ्कते **बाधकादिति** (कं. ७६.१३)। इह(व्या)त्वा?प्तिस्तादात्म्यमभिप्रेतं, तादात्म्यं च भिन्नयोरभेदः शिंशपावृक्षयोरिव वक्तव्यम्। व्याप्तिसाधकत्वमङ्गीकृत्य सत्त्वस्य वैयर्थ्यमुक्तम्।

---

१ सत्त्वत्तो – जे. १; जे. ३, सत्त्वांशे – जे. २। २ °दात्म्य – कं. १, कं. २। ३ प्रमाणश्च – अ, ब; ४ सत्त्वव्यावृत्तिक्षणिकत्वव्यावृत्यो – अ, ब, क; ५ यदसत्त्वव्यावृत्त्योस्तादात्म्याभावेन सम्बन्धाभावादसत्त्वव्यावृत्तेः – क; ६ व्यावर्तभेदेन – अ, ब, क; व्यावृत्त्यभेदेन मु. पादटिप्पण? व्यावर्त्याभेदेन मु. पा. टि. २. ७ न च – अ, ड; ८ यदेवासत्तदेवाक्षणिकमिति – अ, ब, क; ९ रन्यत् – अ, ब; १० तर्हि क्रमायौगपद्य – अ; तर्हि क्रमयौगपद्य – ब, क; ११ अक्षणिके – कं. १, कं. २।

## न्यायकन्दली

**वस्तुनोस्तादात्म्यस्याप्यतोऽप्रसिद्धेः, प्रसिद्धौ वा बाधकस्यापि वैयर्थ्यम् । न च व्यावृत्योः प्रतिबन्धनिश्चये वस्तुसिद्धिरस्ति वस्त्ववस्तुनोर्भेदादसम्बन्धाच्च ।**

**[86] यदप्युक्तम्—धर्मोत्तरेण घटे बाधकेन व्याप्ति प्रसाध्य शब्दे सत्त्वात् क्षणिकत्वप्रसाधनमित्युभयोरपि सार्थकत्वं विषयभेदादिति । तत्रापीदमुत्तरम् । घट इव शब्देऽपि बाधकस्य प्रवृत्त्यविरोधात् प्रमाणान्तरानुसरणमफलमिति । न चाक्षणिकस्यार्थक्रियानुपपत्तिः, सहकारि[1]साहित्ये सति कार्य्यकरणस्वभावो हि भावो नानपेक्षकारकस्वरूपः, तस्य यथान्वयव्यतिरेकावगतसामर्थ्याः सहकारिणः सन्निपतन्ति तथा कार्य्योत्पत्तिरित्युपपद्यते स्थिरस्यापि क्रमेण करणम् । अनेककारणाधीनस्य कार्य्यस्यैकस्मादुत्पत्त्यभावात् ।**

**[टि०]** वैयर्थ्यम्, तस्मादेव प्रमाणान्तरात् यत्सत्तत्क्षणिकमिति व्याप्तिप्र[2]तीतेः । एतावता ग्रन्थेन असत्त्वव्यावृत्त्यक्षणिकत्वव्यावृत्योः [[3]प्रतिबन्धाभावेन सत्त्वक्षणिकत्वयोरपि व्याप्त्यभावो दर्शितः । सम्प्रति व्यावृत्योः] प्रतिबन्धमभ्युपगम्याह [4]**न च व्यावृत्योः** इति । [5]व्यावृत्योः प्रतिबन्धसिद्धौ सत्वक्षणिकत्वयोः किमायातम् ? अक्षणिकव्यावृत्तिक्षणि[6]कत्वयोरसत्त्वव्यावृत्तिसत्त्वयोश्च वस्त्ववस्तुनोस्तादात्म्याभावात् । ननु तादात्म्याभावेऽपि सम्बन्धान्तरं किञ्चिद् भविष्यतीत्याह **असम्बन्धाच्च** इति ।

[86] अर्थक्रियाकारो च[7] भविष्यत्यक्षणिकश्चेति दर्शयन् सत्त्वहेतोः सन्दिग्धानैकान्तिकत्वं प्राह **न चाक्षणिकस्यार्थक्रिया** इति । ननु सहकारिणो यदि भावस्यातिशय न[8] जनयन्ति किमित्यपेक्ष्यन्ते ? जनयति चेत् तस्मादेवातिशयात् [9]कार्योत्पत्ती भावोऽकिञ्चित्कर इति यदुक्तं तत्परिहरति **न च सहकारी** इति ।

**[पं०]** किन्तु बाधकस्यापि वैयर्थ्यमित्यपेरर्थः । **न च व्यावृत्योः प्रतिबन्धनिश्चये वस्तुसिद्धिरस्ति वस्त्ववस्तुनोर्भेदादसम्बन्धाच्चेति** यदि व्यावृत्योरवस्तुभूतयोस्तादात्म्यं, तदा क्षणिकस्य वस्तुनः किमायातं, येन ततः सिद्धिः स्यात् । यतः परस्परं वस्त्ववस्तुनोर्भेदः असम्बन्धश्च इत्यर्थः ।

[86] **घटबाधकेन व्याप्ति प्रसाध्येत्यादि** 'यत्क्रमयौगपद्यरहितं [10]तदसदि'ति बाधकप्रवृत्तिः । **प्रमाणान्तरानुसरणमिति** सत्त्वारब्धप्रमाणान्तरानुसरणम् । **नानपेक्ष्यकारकस्वरूप इति**—अपेक्षामकृत्वा कारकस्वभावो न, किन्तु सापेक्ष एव कारकस्वरूपः । **भावो न कारक इति**—अत्र भावशब्देन नित्यपदार्थः । **नापि सहकारिणो भावस्येति**—

**[कु०]** [86] इदानीमक्षणिकेऽपि क्रमस्योपपत्तेर्बाधकस्यासिद्धिमाह—**न चाक्षणिकस्येति** । (कं. ७६.२१) भावस्यान्यप्रयुक्तसन्निधितया वा, अवर्जनीयसन्निधितया वाऽन्वये सत्यप्यकारणत्वाशङ्क्य[**त्वमाशङ्क्या**]ह—**अकारकत्वे हीति** (कं. ७७.१) । कार्यजातिनियमे करणजातिरेव प्रयोजिका इतरथा **कार्यकारणभावस्यैव** दुर्वचनापत्तेरित्यर्थः । **किन्तु**

---

१ साहित्ये हि—कं. १, कं. २ । २ प्रतीतिः—अ, ब, क; ३ [ ] एतच्चिह्नान्तर्गतः पाठः अपुस्तके नास्ति । ४ न व्या० —अ, ब, क; जे. १, जे.३ । ५ 'व्यावृत्योः' इति अबकपुस्तकेषु नास्ति । ६ क्षणिकत्वयोः रसत्त्व— ब, ड; ७ 'च' अपुस्तके नास्ति । ८ 'न' अबपुस्तकयोर्नास्ति । ९ कार्योत्पत्तेर्भावो—ड; १० यथा घटः—इति व्याप्ति कृत्वा यद्यत्सत् तत्क्षणिकं यथा शब्द इति विषयभेदेन क्षणिकत्वप्रसाधनं तस्माद्बाधकसत्त्वयोरुभयोरपि सार्थकमित्यर्थः **बाधकस्य प्रवृत्त्यविरोधादिति** यत्क्रमयौगपद्यरहितं

### न्यायकन्दली

न च सहकारिसापेक्षित्वे सति तत्कृतादेवातिशयात् कार्य्योत्पत्तेर्भावो न कारक इति युक्तम्, भावस्वरूपानुगमेन कार्य्योत्पाददर्शनात् । अकारकत्वे हि [1]यवबीजस्य क्षित्युदकसंनिधौ शालिबीजा[2]द्यवाङ्कुरोऽपि स्यात्, नियमकारणाभावात् । नापि सहकारिणो भावस्य स्वरूपातिशयमादधति किन्तु सहकारिण एव ते, अतिशयः पुनरेतस्य सहकारिसाहित्यम्, अनतिशयोऽपि [3]तदभाव एव, तस्मिन् सति ततः कार्य्यस्य भावादसत्यभावात्, जनकाजनकक्षणभेदा[4]भ्युपगमस्तु सर्वदावस्थानग्राहिप्रत्यक्षबाधितः, सुसदृशक्षणानामव्यवधानोत्पादेनान्तराग्रहणादवस्थानभ्रमोऽयमिति चेत्? स्थिते क्षणिकत्वे प्रत्यक्षस्य भ्रान्तता, तद्भ्रान्तत्वे च [5]क्षणिकत्वस्थितिरित्यन्योन्यापेक्षता । न च यद्यस्योत्पत्तिकारणं विनाशकारणञ्चान्वयव्यतिरेकाभ्यामवगतं तयोरभावे तस्योत्पत्तिविनाशकल्पना युक्ता, निर्हेतुको विनाशो, बीजमपि बीजस्य कारणमिति चासिद्धम् । अङ्कुरजनकं बीजं बीजकृतं

[टि०] नन्वेको बीजक्षणो जनक एकश्चाङ्कुराजनक इति विरुद्धधर्माध्यासाद् द्वयोरपि बीजक्षणयोर्भेदे इत्याह **जनकाजनकेति** । बीजं प्रति [6]ह्यङ्कुरादिक्रमोत्पन्नो वनस्पतिविशेषः कारणं दृष्टं तन्नाशं प्रति च [7]पाषाणपेषणादिकं दृष्टम्, ततस्तयोरभावे कथं बीजस्योत्पादवि[8]नाशौ घटेते इत्येतद् दर्शयति **न**[9] **च यद्यस्य** इति ।

ननु विनाशस्तुच्छत्वादहेतुक एव भविष्यति बीजाच्च बीजमुत्पत्स्यते इत्यत आह **निर्हेतुको विनाश** इति । नन्वेकरूपस्यैव वस्तुनः [10]कारकाकारकरूपद्वयं [11]कथं घटते इत्याशङ्क्याह [12]परिहरति [13]**निर्भागं वस्तु** इति । यत्किञ्चित्र

[पं०] अत्र सहकारिणः कर्तृभूताः । **तदभाव एवेति** सहकारिणामभाव एव । **तत इति** तस्माद्बीजात् । **कार्यस्येति**–अंकुरस्य । अथ निर्हेतुको विनाशो बीजस्य कारणमित्युक्तं त्वयोक्तम् । तत्राह **निर्हेतुको विनाशो बीजमपि बीजस्य कारणमिति चासिद्धमिति** । अत्रैव साधनमाह–**अंकुरजनकं बीजमित्यादि** । **बीजकृतं न भवतीति** । कोऽर्थः ? किन्त्वङ्कुरकृतमेव बीजं भवतीत्यर्थः ।

[कु०] **सहकारिण एव त** (कं. ७७.३) इत्यनेन संहत्य कार्यं कुर्वन्ति न त्वतिशयमादधतीत्य(रि)धिगम्यते । ततश्चातिशयेनाप्यतिशयः कर्तव्यः । आशादिनातिशयैरतिशयः कर्तव्य इति चान[व]स्था परिहृता बोद्धव्या । ननु यदि स्वरूपान्तर्गतो वा सहकारिजनितोऽतिशयः कोऽपि नाङ्गीक्रियते तर्हि कारणेषु सातिशयनिरतिशयप्रसिद्धिर्लौकिकी कुत इत्यत आह **सहकारिसाहित्यमे**[14]**वेति** (कं. ७७.४) । जनकाजनकक्षणस्थितिसहावस्थानग्रहणाज्जनकत्वयोर्देशभेदे नैकस्मिन् क्षण इव कालभेदेन स्थिरेऽप्येकस्मिन् न विरोध इति भावः ।

---

१ बीजस्य–जे. १; जे. २; जे. ३ । २ द्यङ्कुरो–कं. १; कं. २ । ३ तदभावः–जे. १ । ४ भ्युपगमः–कं. १, कं. २ । ५ क्षणिकत्वसिद्धिः–कं. १; कं. २ । ६ ह्यन्तुरोविक्रमोत्पन्नो–अ, ब; ७ पाषणापषणा–अ; ८ विनाशो घटते–अ; ९ प्रतीकमिदम् 'अ' पुस्तके नास्ति । १० कारकारक–अ, ब; ११ ...द्वयं घटते–अ, ब, क; १२ आह परिहरति–अ, ब, क; १३ निर्भागं–अ, ब; १४ एव–कं. १ कं. २ पुस्तकयोर्नास्ति ।

न्यायकन्दली

न भवति बीजत्वाच्छालिस्तम्भमूर्द्धस्थितबीजवत्। निर्भागं वस्तु तस्य कारकत्वमकारकत्वञ्चेत्यंशावनुपपन्ना[1]विति चेत्। यत्किञ्चिदेतत्। यथा वह्नेर्दाहं प्रति कारकत्वमकारकत्वञ्च स्नानं प्रति, न च ताभ्यामस्य स्वरूपभेदः, तथैकस्यैव भावस्य सहकारिभावात्कारकत्वमकारकत्वञ्च तदभावात्, कथमन्यस्य सन्निधावन्यस्य कारकत्वं कारकत्वेऽपि कथं कस्यचिदेव [2]न सर्वस्येति चेत्? अत्र वस्तुस्वभावाः पर्य्यनुयोक्तव्याः।

वयन्तु यत्र येषामन्वयव्यतिरेकाभ्यां सामर्थ्यमवगच्छामः, तत्र तेषामेव सामग्रीभावमभ्युपगच्छन्तो नोपालम्भमर्हामः। त्वत्पक्षेऽपि क्षित्युदकबीजानामेवाङ्कुरोत्पत्तौ सहकारिता नापरेषाम्, [3]तत्रापि वस्तुस्वभावादपरः को हेतुः? प्रत्येकमेव बीजादयः समर्था न परस्परसहकारिण इति चेत्? किमर्थं तर्हि कृषीबलः [4]परिकर्षितायां भूमौ बीजमावपति उदकञ्चासिञ्चति? परस्पराधिपत्येन तेभ्यः प्रत्येकमङ्कुरजननयोग्य-

[टि॰] किञ्चिदित्यर्थः। अत्र युक्तिमाह यथा वह्नेः इति। अन्यस्य [5]सन्निधावन्यस्य कारकाभ्युपगमेन बौद्धमाशङ्कते कारकत्वेऽपि कथम् इति। यदि क्षितिसलिलसन्निधावन्यस्य कारकत्वं भवति तर्हि कथं बीजस्यैव कारकत्वं न शिलाशकलस्येति परस्पराधिपत्येन इति :– इयमेव हि[6] सहकारिणां सहकारिता [7]यत्प[8]रस्परोपष्टम्भेन प्रत्येकमङ्कु[9]रजननसमर्थबीजोत्पादनम्। परिहरति य[10]ङ्कुरेति –अङ्कुरजननसमर्थ[11]बीजक्षणस्योपादानभूतो यो बीजक्षणः, स यदि स्वकारणेभ्योऽङ्कुरजननसमर्थबीजक्षणोत्पादनसमर्थ उत्पन्नस्तर्हि किं क्षितिसलिलाभ्याम्? यदि स्वसमर्थ[12]स्तथापि

[पं॰] बौद्धः प्राह निर्भागं वस्त्वित्यादि। वैशेषिकः प्राह यत्किञ्चिदेतदित्यादि। [13]परस्परोपकारित्वेनेति। तयोरिति = अवनिसलिलयोः। स्वभावस्येति–असमर्थत्वस्य। भावस्यापीति–अङ्कुरोत्पत्तिसामर्थ्यरूपस्य। उत्पादानन्तरमेवेति यदा तद्बीजं प्रथममेवोत्पन्नं ततोऽनन्तरक्षण एवेत्यर्थः। [14]क्रुध्यति भवानिति प्रत्येकमेव बीजादयः समसर्था(समर्था)–

[कु॰] स्थित इति (कं. ७७.७) प्रमाणान्तरेण क्षणिकत्वसिद्धौ सत्त्वस्य वैयर्थ्यं प्रागुक्तमनुसन्धेयमिति भावः। तदेवं सत्त्वस्य हेतोरन्यथासिद्धिमभिधाय स्थायित्वे सतर्कं प्रमाणमाह न चेति (कं. ७७.८)। तत्र यदि भावः क्षणिकः स्यान्निर्हेतुकावुत्पत्तिविनाशौ स्यातामिति तर्कः। विप्रतिपन्नमङ्कुरजनकं बीजं सस्यकार्यं बीजत्वात् सस्यमूर्द्धास्थितबीजवदिति प्रमाणं द्रष्टव्यम्। अन्यथोपन्यासस्तु परकीयरीतिमनूद्य निषेधायेति। यथा वह्नेरिति (कं. ७७.१२) विषयभेदेनापि कुर्वत्वाकुर्वत्वयोरुपपत्तिरित्यर्थः।

१ विति – कं. १; कं. २। २ न तु – कं. १। ३ तथापि – कं. १; कं. २। ४ परिकर्मितायां – कं. १। ५ सन्निधानस्य – अ, ब; ६ इयमेव सहकारिणां – ड; ७ यत् – ब; ८ परोप्यपरोपष्टम्भेन – अ, ब; ९ मङ्कुरबीजोत्पादनं – अ, ब; १० प्रतीकमिदं – अबपुस्तकयोर्नास्ति; ११ बीजक्षणस्योत्पादो न भूतो – अ, ब, क; १२ तथापि – अ, ब; १३ राधिपत्येन – कं, अ। १४ भ्राम्यति – अ; कं।

### न्यायकन्दली

[1]क्षणोपजननायेति चेत्? यद्यङ्कुरजननयोग्यक्षणोपजननाय बीजं स्वहेतुभ्यः समर्थमुपजातं किमवनिसलिलाभ्याम्? अथासमर्थम्? तथापि तयोरकिञ्चित्करः सन्निधिः, स्वभावस्यापरित्यागात्। क्षित्युदकाभ्यां बीजस्य स्वसन्तानवर्त्तिन्यसमर्थक्षणान्तरारम्भणशक्तिर्निरुद्धयते इति चेत्? अस्तु तस्मादसमर्थक्षणानुत्पत्तिः, समर्थक्षणोत्पत्तिस्तु दुर्लभा, कारणाभावात्। न च स्वभावभूतायाशश[2]क्तेरस्ति निरोधो भावस्यापि निरोधप्रसङ्गात्। [3]सहेतुकश्च विनाशः प्राप्नोति, विशिष्टक्षणोत्पादनशक्त्याधानञ्च बीजस्याशक्यं क्षणिकत्वात्, स्वभावव्यतिरिक्तशक्त्युत्पादने चोत्पन्नोत्पादनप्रसङ्गात्। तस्मादसमर्थस्योत्पादवतो न [4]कदाचित् क्रिया, समर्थस्योत्पादानन्तरमेव करणमिति द्वयी गतिः। न त्वर्थान्तरसाहित्ये सति करणम्, तस्यानुपयोगात्। अथ मतम् एकस्मात्कार्य्यानुत्पत्तेर्बहुभ्यश्च तदुत्पत्तिदर्शनात् सहितानामेव सामर्थ्यमिति? किमित्येवं वदद्भ्योऽस्मभ्यं [5]क्रुध्यति भवान्? तदेवमक्षणि[6]कस्याप्यर्थक्रियोपपत्तेरनैकान्तिको हेतुः।

[**टि०**] किं ताभ्याम्? स्वभावस्यासमर्थस्य क्षित्यादिसान्निध्येप्यनपगतत्वात्। शक्तिनिरोधमभ्युपगम्य सिद्धान्तवाद्याह **अस्तु तस्माद्** इति :— निरोधो विनाशः। **भावस्यापि** इति :—[7]शक्तिशक्तिमतोरभेदात् क्षितिसलिलाभ्यां [8]बीजादिशक्तिविनाशाभ्युपगमे निर्हेतुको विनाश इति सिद्धान्तस्य [9]क्षतिमापादयति [10]**सहेतुकश्च** इति :—अथ यथा क्षितिसलिलाभ्यामशक्तिर्नाश्यते तथा समर्थोत्पादनश[11]क्तिर्जन्यते, [12]इत्येतदाशङ्क्याह **विशिष्टक्षणेति** :—किञ्चैवमभ्युपगमे उपादानीभूत[13]बीजक्षणसामर्थ्यासामर्थ्ययोरनुपयोगात् क्षितिसलिलाभ्यां शिला[14]शकलादप्यङ्कुरोत्पादनसमर्थो बीजक्षण उत्पाद्येत। **असमर्थस्योत्पादवतः** इति:—असमर्थश्चेदुत्पन्नस्तर्हि नास्य काचिदर्थक्रियेत्यर्थः। **तेनापि** इति:—अवश्यंभाविविनाशेनेत्यर्थः।

[**पं०**] न परस्परसहकारिण इति वदन्। **अनैकान्तिको हेतुरिति**—अत्र हेतुः सत्त्वारब्धः। **तेनापीति** कृतकत्वेनापि। [15]**हेत्वन्तरायकृतमिति** लगुडाद्यायतत्ताम्। हेत्वन्तरमिति लगुडादिकम्। **प्रतिबन्धवैकल्ययोरिति** प्रतिबन्धो मंत्रादिकृतः शक्तिघातः। वैकल्यं प्रकृत्या असमर्थत्वम्। **न च भावादभिन्नस्य नाशस्य हेत्वन्तरजन्यतेति**। भावादभिन्नस्य नाशस्य

[**कु०**] यन्मते स्वकारणादुपजनिता भावा एव नियमेन स्वकार्यनिवर्तने समर्थाः तन्मते **कथमन्यंसे**[स्ये]त्यादि वाय[क्य]स्व को वस(श) इति शङ्कते **प्रत्येकमेवेति** (कं. ७७.१९)। आगन्तुकसामग्रया तु प्रदेशाद्विसदृशारम्भणं भवद्भिरङ्गीकर्तव्यम्, इतरथा लौकिकप्रवृत्तिविरोधः स्यात्। तत्र च सहकारिनियमेन कार्यनियमे च स्वभाव एव शरणमित्याशयवान् समाधत्ते **किमर्थमिति** (कं. ७७.२०)। कार्यजननायापेक्ष्यमाण एव सहकारी। न चास्माकं मते तथेति शङ्कते **परम्पराधिपत्येनेति** (कं. ७७.२१)। कार्याय वा [16]तद्योगक्षणोपजननाय वा कश्चिद्विशेष इत्याशये[न] विकल्प्य दूषयति [17]**यद्येति** (कं. ७७.२२)।

---

१ क्षणजननाय—कं. १, कं. २। २ शक्तेर्निरोधः—जे. १। ३ सहेतुश्च—पा. १ पु.। ४ काचित्—कं. १, कं. २। ५ *भ्राम्यति—कं. १, कं. २।* ६ *मक्षणिकस्य—कं. १, कं. २।* ७ *शक्तिमतोरभेदात्—अ;* ८ *बीजशक्ति—ड;* ९ क्षिति—अ, ब; १० सहेतुश्च मु-(१) पादटिप्पणे ११ शतिरुत्पादनशक्ति—अ; १२ इति तदाशङ्क्याह—ड; १३ बीजलक्षण—अ, ब, क; १४ शलाशकला—अ, ब, क; १५ तरायततामिति—अ; कं। १६ तद्योस। Ms १७ यदि—कं. १; कं. २।

## न्यायकन्दली

यदप्युक्तं [1]कृतकानां भावानामवश्यम्भावी विनाशः, तेनापि शक्यं क्षणिकत्वमनुमातुम्, तथाहि यद्येषां ध्रुवभावी तत्र तेषां कारणान्तरापेक्षा नास्ति यथा शरकृपाणादीनां लोहमयत्वे, ध्रुवभावी च कृतकानां विनाश इत्यनुमानं विनाशस्य हेत्वन्तरायत्ततां प्रतिक्षिपति । [2]ये हि हेत्वन्तरसापेक्षा न ते ध्रुवभाविनः, यथा वाससि रागादयः, तथा यदि भावा अपि स्वहेतुभ्यो विनाशं प्रति हेत्वन्तरमपेक्षन्ते तदा हेत्वन्तरस्य प्रतिबन्धवैकल्ययोरपि [3]सम्भवात् । कश्चित्कृतकोऽपि न विनश्येत् ? [4]स्वहेतोस्तु विनश्वरस्वभावा जायमाना उत्पत्त्यनन्तरमेव विनश्यन्तीति सिद्धं क्षणिकत्वम् ।

अपि च भावस्याविनश्वरस्वभावत्वे विनाशोऽशक्यकरणो वह्नेरिव शीतिमा, विनश्वर[5]स्वभावत्वे नार्थो हेतुभिः, न च भावादभिन्नस्य विनाशस्य हेत्वन्तरजन्यता, कारणभेदस्य भेदहेतुत्वात् । भिन्नस्य हेत्वन्तरादुत्पादे च भावस्योपलब्ध्यादिप्रसङ्गः, [6]अन्योत्पादावन्यस्वरूप[7]प्रच्युतेरभावात् । घटो नष्ट इति च भावकर्तृको व्यपदेशो न स्यात्, किन्त्वभावो जात इति [8]व्यपदिश्येत, तथा च सति घटः किमभूदिति वार्त्ताप्रश्ने तस्य निवृत्तौ प्रस्तुतायामप्रस्तुतमेव [9]कथितं स्यात् । तस्माद् भावस्वभाव एव विनाश इति ।

[टि०] **तथा हेत्वन्तरस्य** इति :–वस्तूत्पादककारणेभ्योऽन्यस्य [10]विनाशहेतोरुत्पा[11]देऽपि व्यापारति[12]रोधानं प्रतिबन्धः । वैकल्यम[13]नुत्पाद एव । स्व[14]हेतोरित्युत्पादकादेव हेतोः । **घटो नष्ट** इति :–घटलक्षणो हि भावो नाशक्रियाकर्तेति । अभावो जात [15]इति व्यपदेशे सति किं स्यादित्याह [16]**तथा सति च** इतिः–विनष्टे घटे केनापि अजानता कोऽपि पृष्टो घटः किमभूदिति घटस्वरूपविषये प्रश्ने घटो निवृत्त इत्युत्तरे दातुं युक्ते 'अभावो [17]जात' इति घटाद् व्यतिरिक्तस्योत्पादस्वरूपकथनमसम्बद्धमेव यथा मृते गृहपतौ ग्रामा(दा)गतेन गृहपतिः किमभूदिति प्रश्ने कृते गृहमिदं नवमुत्पन्नमित्युत्तरमिति ।

[पं०] भावहेतुजन्यतैव घटते इत्यर्थः । **भावस्येति** घटादेः । **उपलब्ध्यादिप्रसङ्गा इति** नाशस्य भिन्नत्वात् **अन्योत्पादेति** विनाशोत्पादे । **भावकर्तृक इति** भावो घटादिः कर्ता यस्यासौ भावकर्तृकः । **तस्य निवृत्तौ प्रस्तुतायाम(म)प्रस्तुतमेव कथितं (कथं) स्यादिति**–घटः किमभूदिति पृष्टे घटो नष्ट इत्यप्रस्तुतम् । अभावो जात इति तु प्रस्तुतम् ।

[कृ०] ध्रुवभावित्वेन विनाशस्य प्रसङ्गतद्विपर्ययाभ्यां निर्हेतुकत्वं प्रसाध्य ततः क्षणभङ्गं साधयति **स्व[18]हेतोस्त्विति** (कं. ७८.१४) । अत्रापेक्षणीयाभावादिति दोषः । **अपि चेति** (कं. ७८.१५) । निर्हेतुकत्वेऽपि प्रमाणान्तरमाह **न चेति** (कं. ७८.१७) । ([19]तर्कमाह **न चेति** (कं. ७८.१०) । [20]तर्कमाह [21]**कारणाभावस्येति** (कं. ७८.१८) हेत्वसिद्धिमाशङ्क्य परिहरति [22]**विनाशस्व भिन्नस्येति** (कं. ७८.१७)। अनिष्टान्त[र]माह [23]**अन्योत्पादेन चेति** (कं. ७८.१९) ।

---

१ कृतकानामवश्य–कं. १, कं. २। २ ये हेत्वन्तर–कं. १, कं. २, जे. २। ३ सम्भवे–कं. १, कं. २। ४ स्वहेतुतश्च–कं. १, कं. २। ५ स्वभावत्वे वा–कं. १, कं. २। ६ अन्योत्पादेन–जे. १; अन्योत्पादे–जे. ३। ७ प्रच्युत्यभावात्–जे. १, जे. २, जे. ३। ८ चोपदिश्येत–जे. २। ९ कथं–कं. १; कं. २। १० विनाशे–अ, ब; ११ त्पादे व्यापारः–ड; १२ तिरोधानप्रतिबन्धः–अ; १३ मनुत्पादक एव–अ, ब; १४ हेतोरुत्पादकादेव–अ, ब, क; १५ इति च–अ, ब, क; १६ तथा च सति–मु; १७ जातु–अ, ब; १८ स्वहेतुतः–कं. १, कं २। १९ तर्कमाह न चेति पुनरावृत्तं भाति। २० तर्कमाह कारणाभावस्य इति यथार्थः पाठः। २१ कारणभेदस्य–कं. १, कं. २। २२ अभिन्नस्य विनाशस्य–कं. १. कं. २। २३ अन्योत्पादन्य–कं. १ कं. २।

## न्यायकन्दली

[87] अत्रोच्यते–उत्पन्नो भावः किमेकक्षणावस्थायी? किं वा क्षणान्तरेऽप्यवतिष्ठते? क्षणान्तरावस्थितिपक्षे तावत्क्षणिकत्वव्याहतिरनेककालावस्थानात्, एकक्षणावस्थायित्वे [1]तु तस्य क्षणान्तरे स्थित्यभाव इति न भावाभावयोरेकत्वम्, कालभेदात्। अथ मतं न ब्रूमो भावः स्वस्यैवाभावः, किन्तु द्वितीयक्षणः पूर्वक्षणस्याभाव इति, तदप्यसारम्, पूर्वापरक्षणयोर्व्यक्तिभेदेऽपि स्वरूपविरोधस्याभावात्। यथा घटो भिन्नसन्ततिवर्त्तिना घटान्तरेण सह तिष्ठति, एवमेकसन्ततिवर्त्तिनाऽपि सह तिष्ठेत्, द्वितीयक्षणग्राहिप्रमाणान्तरस्य तत्स्वरूप[2]विधिचरितार्थस्य प्रथमक्षणे निषेधे प्रमाणत्वाभावात्। अभावस्तु

[टि०] [87] **एकक्षणावस्थायित्वे तु**[3] इति :–यत्र हि क्षणे भावो न तत्रैवाभावोऽपि, यत्र चाभावो न [4]तत्र भावोऽपीति। [5]**पूर्वापरेति** यद्यपि पूर्वापरक्षणौ स्वरूपेण भिन्नौ तथापि न तयोर्विरोधः, यथा भिन्नसन्तानवर्तिनोर्घटक्षणयोरिति, तथा च दूषणमाह **यथा घट** इति। ननु यथा त्वन्मते अभावोपलम्भे घटावस्थानं नोपलभ्यते तथा मन्मतेऽप्युत्तरक्षणस्यैव [6]पूर्वक्षणाभावरूपत्वाद् उत्तरक्षणोपलम्भे कथं पूर्वक्षणावस्थानमुपलभ्यते इति [7]बौद्धमतमाशङ्कयाह **द्वितीयक्षणग्राही** इति। द्वितीयक्षणग्राहकं यत्प्रमाणान्तरं प्रत्यक्षलक्षणं तत् द्वितीयक्षणस्वरूपप्रतिपादने एव शक्तं [[8]पूर्वक्षणं न [9]गृह्णात्येव न तु] [10]पूर्वक्षणो नास्तीति [11]निश्चेतुमलंभूष्णु। यदि [12]ह्यस्मन्मत इव च त्वन्मतेऽपि भावविरोधिनः पदार्थान्तरस्याभावरूपस्य ग्रहणं स्यात् तदा तदुपलम्भ एव भावावस्थाननिषेधे

[पं०] [87] **अत्रोच्यते श्रीधरेण** तस्य **क्षणान्तरे स्थित्यभाव इति** काक्वा व्याख्येयम्। **न भावाभावयोरेकत्वं कालभेदादिति**–कोऽर्थः। न भावस्वभाव एवाभावः। परस्परविरोधात्। क्षणान्तरे च कालभेदादित्यर्थः। **न ब्रूमो भावः स्वस्यैवाभाव इति**–न ब्रूमो भावः स्वभावस्यैवाभाव इति द्वौ पाठौ। अर्थस्तुल्य एव। **एकसन्ततिवर्तिनापीति** घटान्तरेण। **तस्योत्पत्तिरिति**–अभावस्योत्पत्तिः। **तस्यावस्थानमिति**–अभावस्यावस्थानम्। **तस्योपलम्भ इति**–अभावस्योपलम्भः। **एवं च सतीति** भावाभावयोर्विरोधे सतीत्यर्थः। **तदभावस्येति** घटाद्यभावस्य। **हेत्वन्तरसापेक्षस्येति** लगुडाद्यायत्तस्य।

[कु०] [87] **अत्रोच्यत** इति (कं. ७८.२२) प्रत्यासन्ने द्वितीयेऽनुमाने (दूणा) दूषणाद्दूषणमुच्यत इत्यर्थः। [13]**अथ न ब्रूम इति** (कं. ७८.२५) यद्यपि भावः सो[स्वो]त्पत्तिक्षणेऽभावा[द्] भिद्यते तथापि द्वितीये क्षणे स्वाभा[वा]त्मैवेति भावाभावयोरेकत्वं क्षणिकत्वं च न विरुध्यत इत्यर्थः। परिहरति **तदप्यसारमिति** (कं. ७९.१)। द्वितीयक्षणात्पूर्वक्षणस्य विरोधोऽविरोधो वा? नाद्य इत्याह **पूर्वापरेति** (कं. ७९.२)। व्यक्तिभेदेऽङ्गीक्रियमाणेऽपीति शेषः। **सह तिष्ठेदिति** (कं. ७९.३) [त]तश्च क्षणिकत्वव्याघातः सहग्रहणप्रसङ्गश्चेति द्वयमनिष्टम्। न द्वितीय इत्याह **द्वितीय-**

---

१ तु क्षणान्तरे–कं. १, कं. २। २ विधेश्चरि–कं. १, कं. २। ३ तु मु.(५)पा. टिप्पणे नास्ति। ४ तत्रैसावो–ड; ५ पूर्वापरेऽपि–अ,ब,क; ६ पूर्वाक्षणा–अ,ब,क; ७ बोधमाशङ्क्याह–ड; ८ [ ] एतच्चिह्नान्तर्गतः पाठः अ पुस्तके नास्ति। ९ गृह्णात्येतदनु–ब; १० पूर्वः क्षणो–ड; ११ निश्चितमलंभूष्णु–अ, ब; १२ ह्यस्मिन्–अ, ब, क; १३ अथ मतं न ब्रूम–कं. १, कं. २।

## न्यायकन्दली

भाव[1]प्रतिषेधात्मैव, घटो नास्तीति प्रतीत्युदयात्। ततस्तस्योत्पत्तिर्भावस्य निवृत्तिः, तस्यावस्थानं भावस्यानवस्थितिः, तस्योपलम्भो भावस्यानुपलम्भ इति युक्तम्, परस्परविरोधात्। एवञ्च सति न भावस्य क्षणिकत्वं पश्चाद्भाविनस्तदभावस्य हेत्वन्तरसापेक्षस्य भावानन्तर्य्यनियमाभावात्, तथा च दृश्यते घटस्योत्पन्नस्य चिरेणैव विनाशो मुद्गराभिघातात्। भावात्मको घटविनाशो मुद्गराभिघातात् तु कपालसन्तानोत्पादः स्यादित्यसङ्गतम्। [2]स्वसन्तानप्रतिबद्धायाः सदृशारम्भणशक्तेरप्रतिघाते विलक्षणसन्तानोत्पत्त्यसम्भवात्। मुद्गराघातेन तस्याः प्रतिहतौ च भावप्रतिघाते कः प्रद्वेषः? न च कारणकार्य्यत्वे भाववदभावस्यापि वस्तुत्वप्रसक्तिस्तस्य [3]प्रतिषेधस्वभावस्य प्रत्यक्षादिसिद्धत्वात्।

[टि०] शक्तः स्यात्, किन्तु भवन्मते भावरूप एवोत्तरक्ष[4]णस्तस्य च पूर्वक्षणेन विरोधाभावात्तदुपलम्भेन कथमुत्तरक्षणावस्थानभावाभावः प्रतिपाद्यते? यथा भिन्नसन्ततिवर्तिघटक्षणोपलम्भेनेति भावः। ननु यथाऽस्मन्मते पूर्वक्षणाभावरूपस्योत्तरक्षणस्य ग्राहकं प्रत्यक्षमुत्तरक्षणग्रहणे एव चरितार्थं न पूर्वक्षणनिषेधे समर्थं तथा त्वन्मतेऽपि भावव्यतिरिक्तकारणजनितत्वाद् [5]भावाद्भिन्नस्याभावस्य ग्राहकं प्रत्यक्षं तद्ग्रहणेनैव चरितार्थं कथं भावनिषेधे समर्थं यथा घटान्तरविषयं प्रत्यक्षमिति [6]**बौद्ध**मतमाशङ्क्याह **अभावस्तु** [7]**भावप्रतिषेधे**ति।

[पं०] **बौद्धवाक्यं भावात्मको घटविनाश इति वैशेषिकवाक्यं– इत्यसंगतमित्यादि। विलक्षणसन्तानोत्पत्त्यसंभवादिति** विलक्षणः सन्तानः कपालसन्तानः। **तस्या इति** सदृशारंभणशक्तेः। **भावप्रतिघाते कः प्रद्वेष इति** भावस्य शक्तेरव्यतिरिक्तत्वादित्याशयः। **कारणकार्यत्वे इति** कारणोत्पाद्यत्वे। **वस्तुत्वप्रसक्तिरिति** विधिरूपवत्त्वप्रसक्तिः। अपेक्षितपरव्यापारो हि भावः। स्वभावनिष्पत्तौ कृतक इत्युच्यते। हेत्वन्तरजन्यत्वे स्वविनाशस्य कृतकत्वादनित्यत्वं प्राप्नोतीत्याशंक्याह–**ईदृशं चास्य स्वरूपमित्यादि। नष्टस्यानुपलम्भादिति** नष्टस्य वस्तुनोऽदर्शनात्। नाशोऽपि हि

[**कु०**] **क्षणेति** (कं. ७९.४)। तस्माद्द्वितीयपक्षस्यान्य एव भावः स्वीकर्तव्यः। ततश्च न च भावाभिन्नस्येति हेतुरसिद्ध इत्याह **अभावस्त्विति** (कं. ७९.५)।

एवं **रूपस्या**[स्य] विनाशस्य हेत्वन्तरनैरपेक्ष्यप्रसाधने [8]**वर्षवाह** [**दोषं चाह**] **तथा चेति** (कं. ७९.९)। मुद्गराभिघातस्य घटविनाशकत्वाभ्युपगमाङ्गीकाराच्च बाध इति शङ्कते **भावात्मक** इति (कं. ७९.१०)। यद्यद् घटेन सह भिन्नं कारणं तत्सर्वं भावरूपं यथा पटः। एवं घटविनाशोऽपि पटेन सह भिन्नकारणश्चेद्भावरूपः स्यादित्याशङ्क्य परिहरति

---

१ निषेधात्मैव – जे. ३। २ सन्तान – कं. १। ३ वस्तुप्रतिषेधस्वभावस्य – कं. १; क. २। ४ क्षणे तस्य – अ, ब, क; ५ भावोद्भिन्नस्य – अ; ६ बौद्धमाशङ्क्याह – ड; ७ प्रतिप्रतिषेधेति – अ, ब, क; ८ दोषं चाह इति शुद्धः पाठो भाति– सं।

## न्यायकन्दली

ईदृशञ्चास्य स्वरूपं यदयं कृतकोऽपि भाववन्न विनश्यति, नष्टस्यानुपलम्भात्। प्रमाणाधिगतस्य वस्तुस्वभावस्य परसाधर्म्येण निरा[1]करणे जगद्वैचित्र्यस्यापि निराकरणम्। अन्योत्पादे कथमन्यस्य स्वरूपप्रच्युतिरित्यपर्य्यनुयोज्यम्, वस्तुस्वाभाव्याद्। घटो विनष्ट इति च व्यपदेशस्तदवयव[2]क्रियादिन्यायेनाभावोत्पत्त्यैव। अत एवायं तस्यैवाभावो न सर्वस्य। न चास्य समवायिकारणं किञ्चित्, तदभावान्नासमवायिकारणम्। [3]क्व कार्य्यमनाधारं दृष्टम्? इदमेव दृश्यते तावत्, न ह्ययं घटे समवैति तस्याभावात्, नापि भूतले अन्यधर्म्मत्वात्। कथं तर्हि नियतदेशः प्रतीयते? प्रतियोगिनियमात्।

[**टि०**] ननु [4]नायं मुद्गरो घटविनाशकारी किन्तु कपा[5]लसन्तानकारी घटविनाशस्तु घटात्मक एवेत्याशङ्क्याह **भावात्मको घटेति**। ***मुद्गराभिघातेनेति** :– यथा शक्तिमतोऽभिन्नायाः शक्तेर्मुद्गराद्विनाशः तथा घटविनाशोऽप्यङ्गीक्रियतामिति। ननु [6]यत्कार्यं तद् घटवद् वस्तुरूपं दृष्टम्, ततोऽभावोऽपि वस्तुरूपः स्यादित्याह **न च कारणेति**। यद्यपि जन्यं कारणैरेव जन्यत इति कारणपदं व्यर्थं तथापि **बौद्धै**रुपचारेण कल्पितं जन्यत्वं तस्मादङ्गीक्रियत इति कारणपदो[7]पादानम्। तथापि कृतकत्वात् घटवदभावस्यानित्यत्वं स्यादित्याह **ईदृशं चास्य** इति। [8]भावरूपं कृतकत्वं समवायकारणाश्रितत्वं वा [9]विनाशित्वे प्रयोजकमिति भावः। यदि हि प्रध्वंसो वि[10]नश्येत् घट उपलभ्यतेति विप[11]क्षे बाधकम्। ननु

[**पं०**] नश्येच्चेत्, तदाभावोन्मज्जनप्रसंगः स्यादित्यर्थः। **वस्तुस्वभावस्येति** वस्त्वत्राभावलक्षणं तस्य योऽसौ स्वभावो न्यित्वाख्यस्तस्य वस्तुस्वभावस्य। **परसाधर्म्येणेति**–घटादिसाधर्म्येण। **अन्योत्पादे इति**–अभावोत्पादे। **अन्योन्यस्येति** घटस्य। **तदवयवक्रियाविभागादिन्यायेनेति** तस्य घटस्यावयवानां कपालादीनां प्रथमं क्रियासलनवलनादिका, क्रियातो विभागः, विभागात्पूर्वसंयोगविनाशः, उत्तरसंयोगोत्पत्तिरिति क्रमः। **तस्यैवाभाव इति** घटस्यैवाभावः। परः कार्यमनाधारं न दृष्टमिति तन्तुषु पटवदिति गमनिका।

[**कु०**] **न चेति** (कं. ७९.१३)। ननु यदि नाशः सहेतुकः स्याद् भाववदेव विनश्येदित्यत आह–**ईदृशं चेति** (कं. ७९.१४)। भावात्म[क]ज्ञानप्रसक्तिप्रतिकूलतर्कपराहतत्वादप्रयोजकमिति भावः। **तदवयवेति** (कं. ७९.१८) भेदेऽपि न कारणविशेष्यतया तद्धर्मव्यपदेश इति भावः। एतदेवाह **अत एवेति** (कं. ७९.१८)। यदि विनाशः सहेतुको भवेत् भाववत्कारणत्रयजन्यो भवेदित्यत आह **न चेति** (कं. ७९.१९)। कारणत्रयजन्यत्वे भावत्वे सति कार्यत्वमुपाधिरित्यर्थः। अन्यधर्मत्वा(द्)अन्यकार्यत्वाद्। [12]**विशेषणत्वमपीति** (कं. ७९.२३) संयोगसमवा[य]योर्भावेऽपि प्रतियोग्युपश्लेषणस्वभावतया चोपश्लिष्टत्वादित्यर्थः।

---

१ करणत्वे–कं. १; कं. २। २ क्रियाविभागादि–जे. ३। ३ मनाधारं न–जे. १; जे. २। ४ नार्यं–अ, ब; ५ कपालकारी–ड; *मुद्गराघातेनेति मूलपाठः। ६ यत्कार्यं–अ; यत्कार्यं–ब; ७ पदानम्–अ, ब; ८ भावरूपं–ड; ९ विनाशत्वे–अ, ब; १० निनश्येत्–अ, ब; ११ पक्षे–अ, ब; १२ विशेषणमपीति–कं. १. कं. २।

## न्यायकन्दली

अयमस्य स्वभावो यत् संयुक्तप्रतिषेधे संयुक्तवत् प्रतिभाति, समवेतप्रतिषेधे समवेतवत् प्रतिभाति। विशेषणमपीत्थमेव, न पुनरस्य संयोगसमवायौ, तयोर्भावधर्म्मत्वात्। तदेवं सिद्धोऽभावो भावविरोधी [1]नास्तीति बुद्धिवेद्योऽर्थः, यत्कृतो दहनतुहिनयोरपि विरोधः। दहनाभावस्तुहिने [2]तुहिनाभावश्च दहने इत्यनयोर्विरोधो न स्वरूपेण विधेर्विध्यन्तर-

[टि०] सर्वं कृतकं वस्तुरूपं विनश्वरं दृष्टं, तथा कथमभावो न तथेत्याह **प्रमाणाधिगतस्य** इति। ननु घटोत्पत्तिव्यतिरिक्तकारणजन्यत्वे कारणभेदात्तस्य घटाद् भिन्नत्वे तदुत्पत्तौ घटनाश [3]इत्यादि पूर्वमुक्तं तत्क्रमेण परिहरति **अन्योत्पादे** इति। [4]**विशेषणत्वमपि** इति :—अघटं भूतलमिति। **नास्ति** इति :—नास्ति घट इत्युल्लेखेन या बुद्धिस्तया वेद्यः। [5]**दहनाभावस्तुहिन** इति :—यद्भावो भावलक्षणमिति सप्तमी तत्र सतीत्यर्थः। आधारसप्तम्यां चेतरेतराभावोऽपि व्याख्येयः। **सवितुरुदयेति** :—सवितुरुदयास्तमयौ ध्रुव[6]भाविनौ क्रमेण च भवतः अन्यथा [7]त्वेकहेलयैवोदयास्तप्रसङ्गः। एतच्च क्षणभ[8]ङ्गासिद्धौ लोकव्यवहारापेक्षयोक्तं, क्षणिकाङ्गीकारे तु[9] यः सूर्यक्षण उदेति [10][स उदेत्येवेति]। **ए[11]कसामग्रीप्रतिबन्धेऽपि** इति :—यद् येषां ध्रुवभावि तत्तेषां का[12]रणान्तरापेक्षमित्यत्र कारणान्तरापेक्षानिषेधे साध्येऽनैकान्तिकतायां

[पं०] श्रीधरः प्राह—**इदमेव दृश्यते तावदित्यादि** इदमेवाभावाख्यम्। **तस्याभावादिति** घटस्याभावात्। **कथं तर्हीत्यादि** प्रश्नः। उत्तरं तु **प्रतियोगिनियमादिति** प्रतियोगी घटस्तत्रैव नियतत्वादभावोऽपि नियतदेश[शे] प्रतीयते इत्यर्थः। **अयमस्य स्वभाव इति** अत्रास्याभावस्य। **संयुक्तप्रतिषेधे संयुक्तवत् प्रतिभातीति** यथाऽत्र भूतले घटो नास्ति। **समवेतवत्प्रतिभातीति** यथा नेह तन्तुषु पटः। **विशेषणमपीत्थमेवेति** घटरूपविशेषणप्रतिषेधेऽभावो विशेषणवत्प्रतिभाति यथाऽघटं भूतलमित्यर्थः। **नास्ति बुद्धिवेद्योऽर्थ इति** नास्तिरूपायाः बुद्धेर्वेद्यः। कर्तरि षष्ठीयम्। **यत्कृत इति** येन भावविरोधिनाऽभावेन कृतः। **विधेर्विध्यन्तरविरोधाभावादिति** एतेन पूर्वापरक्षणयोर्विधि[रू]पत्वान्न विरोधो मे इति

[कु०] नन्वाभावावस्थानं भावस्य न स्थितिरिति न युक्तमतादात्म्यादिविपर्ययशङ्कामुपसंहारव्याजेन निरस्यति **तदेवमिति** (कं. ७९.२४)। **दहनाभाव** इति (कं. ७९.२५) दहनत्वाभाव इत्यर्थः। ततश्च धर्मयोः परस्पराभाववद्देशनियमेन धर्मिणो विरोध इति भावः। ये यस्य हेत्वन्तरसापेक्षा न ते तस्य ध्रुवभाविन इत्यस्य प्रसङ्गस्य द्वेधा विपर्ययः सम्भवति। ध्रुवभावित्वाद्विनाशोऽपि हेत्वन्तरनि[र]पेक्ष इति निषेधमुखेन वा? तेन सहैकसामग्रीप्रतिबद्ध इति विधिमुखेन वा? तत्राद्यमनूद्य व्यभिचारेण दूषयति [य]च्चेति (कं. ७९.२६)। कालभेदः (कला) पञ्चदशकालमुहूर्तात्मकः।

---

१ नास्ति—कं. १, कं. २। २ तदभावाश्च—जे. १, जे. २। ३ इति—अ, ब; ४ विशेषणमपि मु. विशेषणत्वमपि—ब; ५ प्रतीकमिदं भ्रष्टं डपुस्तके। ६ भाविनो—अ, ब; ७ त्वेकाह—अ; ८ भङ्गसिद्धो—अ, ब; ९ भूयः—अ, ब, क; १० [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति। ११ एका—अ; १२ कारणांनपेक्ष्य—ड;

## न्यायकन्दली

**विरोधाभावात्। यच्च ध्रुवभावित्वादभावस्य हेत्वन्तरानपेक्षेत्युक्तम्, तदपि सवितुरुदयास्तमयाभ्यामनैकान्तिकम्, तयोरनपेक्षत्वे हि कालभेदो न स्यात्। एकसामग्रीप्रतिबन्धेऽपि स एव दोषः। नियतो हि वाससि रागहेतुर्नियतकालश्च तस्य तत्कालासन्निधिमात्रेण रागस्यानुत्पादः सिद्ध्यति, अनन्तास्तु विनाशहे[1]तवोऽनियतकालाश्च तेषां सर्वदा सर्वेषां प्रतिबन्धस्याशक्यत्वात् कश्चिदेको निपतत्येव। [2]कालान्तरे स च निपतितः क्षणेनैव भावं विनाशयतीत्युपपद्यते कृतकत्वेऽपि ध्रुवो विनाशः।**

[टि०] यद् येषां ध्रुवभावि तत्तेषां सामग्रीप्रतिबद्धतुल्यकारणजन्यमित्यत्र विधिरू[3]पतायामपि साध्यायां स एवानैकान्तिकतादोषः, इति व्याख्यायां तात्पर्यतो द्वयोः साध्ययोर्विशेषो नास्ति। नियतो हीत्यादिवाक्यानां चाकाश[4]पतितत्वं [5]स्यात् तस्मादन्यथा व्याख्येयम्, पूर्वं हि यद् येषां ध्रुवभावि तत्र तेषां कारणान्तरापेक्षा नास्तीत्यन्वयेऽनैकान्तिकतादोषो दत्तः, इदानीं तु विनाशे हेत्वन्तरस्य प्रतिबन्धे व्यापार[6]वारणे कश्चित्कृतको[7]ऽपि न विनश्येत्, तस्माद् ये हेत्वन्तरसापेक्षा न ते ध्रुवभाविनो यथा वाससि रागदय [8]इत्येकस्याः कस्याश्चिद् विनाशसामग्र्याः प्रतिबन्धेऽपि यस्त्वया व्यतिरेको दर्श्यते तत्राप्यनैकान्तिक[9]तादोष इत्यर्थः। उदयास्तयोर्हेत्वन्तरसापेक्षत्वेऽपि ध्रुवभावित्वात्।

[पं०] –सूचितम्। **सवितुरुदयास्तमयाभ्यामनेकान्तिकमिति** सवितुरुदयास्तमयौ ध्रुवभाविनौ क्रमेण च भवतः। अन्यथा त्वेकहेलयैवोदयास्तसमयप्रसङ्गः। एतावता सवितुरुदयास्तमयौ कालभेदरूपसामग्र्यपेक्षणात्ध्रुवभाविनावपि हेत्वन्तरसापेक्षावित्युक्तम्। इदमेव दर्शयति–**तयोरनपेक्षत्वे हि कालभेदो न स्यादिति** कोऽर्थः? तयोरुदयास्तमययोः कारणानपेक्षत्वे स्वीक्रियमाणकालपार्थक्यं न स्यात्। किन्तु युगपदेव द्वावपि स्याताम्। न च स्याताम्। तस्मादुदयस्य पृथक्सामग्री। अस्तमयस्य च पृथगित्यायातमित्यर्थः। **एकसामग्रीप्रतिबन्धेऽपि स एव दोष इति** अनन्तासु विनाशसामग्रीषु सर्वासां सामग्रीणां प्रतिबन्धाभावादुदयास्तमयाभ्यामनैकान्तिकमेव दोषः। ननूक्तम्–ये हेत्वन्तरसापेक्षा न ते ध्रुवभाविनो यथा वाससि रागादयः, तत्राह **नियतो [हि] वाससीत्यादि**। **तस्येति** रागहेतोः।

[कु०] द्वितीये व्यभिचारमतिदिशति–**एकसामग्रीप्रतिबन्धेऽपीति** (कं. ८०.२)। प्रसङ्गे नियतहेतुत्वं नियतकालत्वं चोपाधिमाह **नियतो हीति** (कं. ८०.३)। ततश्चानुकूलतर्कस्य प्रशिथिलमूलत्वं द्रष्टव्यमित्यर्थः। **कश्चिदेक इति** (कं. ८०.५)। अन्ततः कालविशेषाऽपीति शेषः। ध्रुवो [10]नाश इति (कं. ८०.७) हेत्वन्तरसापेक्षोऽपीति शेषः। प्र[11]त्यक्षेणेनं [ण न] यत्सत्तत्क्षणिकमित्यादिव्याप्तिग्रहणस्य प्रत्यभिज्ञानरूपस्योपजीव्यत्वादिति भावः।

---

१ हेतवो नियत–कं. १, कं. २। २ कालान्तरे च–कं. १, कं. २। ३ रूपतयामपि–अ; ४ चाकाशे पतितं –अ, चाकाशपतित्वं–ब, क; ५ स्यादन्यथा–ड; ६ वारणा–अ, ब; ७ ऽपि विनश्येत–अ, ब; ८ इत्येकस्याश्चिद्–अ, ब; ९ कत्व–ड; १० विनाश–कं. १. कं. २। ११ अत्र प्रत्यक्षेण यत्सत्तत्क्षणिकम् इति पाठोऽर्थदृष्ट्या सङ्गच्छते–सं।

## न्यायकन्दली

[88] सर्वञ्चैतत्क्षणभङ्गसाधनं कालात्ययापदिष्टम्, प्रत्यभिज्ञाप्रत्यक्षेण प्रतीतस्य पुनः प्रतीतेः। नन्वेष प्रत्ययो न भावस्य पूर्व्वापरकालावस्थानं शक्नोति प्रतिपादयितुम्, न ह्येतदेकं विज्ञानम्, कारणाभावात्। इन्द्रियं सन्निहितविषयं न पूर्वकालत्वमवगाहते, संस्कारोऽपि पूर्वानुभवजन्मा तद्विषये नियतो नापरकालतां परिस्पृशति, न च ताभ्यामन्यदुभयविषयं किञ्चिदेकमस्ति यदेतद् विज्ञानं प्रसुवीत। इतोऽपि नैतदेकं विज्ञानं स्वभावभेदात्, इदमिति हि प्रत्यक्षता तदिति हि [1]परोक्षत्वम्, प्रत्यक्षतापरोक्षत्वे च परस्परविरोधिनी [2]नैकस्य युज्येते, तस्माद् ग्रहणस्मरणात्मके द्वे इमे संवित्ती भिन्नविषये।

अत्र ब्रूमः–प्रतीयते तावदेतस्माद् विज्ञानात् पूर्वापरकालावच्छिन्नमेकं वस्तुतत्त्वम्, [3]तदस्य विषयो न भवतीति [4]संवित्तिविरुद्धम्। ग्रहणस्मरणे च नैकं विषयमालम्बेते,

[टि०] [88] ननु [5]वासमि रागादीनां हेत्वन्तरसापेक्षत्वध्रुवभावित्वाभावयोरविनाभावो दृष्टः। तत्र नियतहेतुसापेक्षत्वमुपाधिमाह नियतो हि इत्यादिः। स एवायमिति प्रत्यभिज्ञाने [6]हि स इति पूर्वकालतापरामर्शः अयमिति प्रत्यक्षांश इति। तत्र संस्कारेन्द्रियाभ्यां भिन्नविषयाभ्यां भिन्नमेवात्र ज्ञानविषयं जनितं न चेकं संस्कारेन्द्रियव्यतिरिक्तं किञ्चित् पूर्वापरावस्थाद्वयकारणमिति येन द्वयात्मकमेकं प्रत्यभिज्ञानमुत्पाद्यते इति ग्राह्यभेदात् कारण[7]भेदाच्च ज्ञानभेदमापाद्य [8]स्वभावभेदादपि भेदमापादयति इतोऽपि नैतद् इति। [9][ग्रहणस्मरणे च इति।] यदा हि वाराणस्यां [10]घटं गृहीत्वा पाटलीपुत्रस्थः स्मरति तदा ग्रहणस्मरणे एकं [11]विषयमालम्बेते, परमत्र प्रस्तुताभिप्रायेणोक्तम्।

[पं०] [88] कालात्ययापदिष्टमिति प्रत्यक्षविरुद्धे पक्षे प्रयुज्यमानो हेतुः कालात्ययापदिष्टः। यथाऽनुष्णोऽग्निः, द्रव्यत्वात्, जलवदित्यादिवत्। प्रत्यभिज्ञाप्रत्यक्षेण प्रतीतस्य पुनः प्रतीतेरिति प्राक् प्रत्यक्षेण प्रतीतस्य वस्तुनः प्र[त्य]भिज्ञाप्रत्यक्षेण पुनः प्रतीतेः। अक्षणिकत्वं सिद्धमत एव प्रत्यक्षविरुद्धः। क्षणभंगवादव्यवस्थापनाय हेतुप्रयोगः, फल्गुरिति भावः। बौद्धः प्राह–नन्वेष प्रत्यय इत्यादि एष प्रत्ययः प्रत्यभिज्ञालक्षणः। अपरकालतामिति वर्तमानकालताम्। उभयविषयमिति ग्रहणस्मरणविषयम्। वस्तुतत्त्वमिति घटादिः। ग्रहणस्मरणे च नैकं विषयमालम्बेते इति किन्तु

[कु०] [88] परकीयं प्रत्यभिज्ञानदूषणमाशङ्कते नन्वेष इति (कं. ८०.८)। सिद्धान्तिमतानुसारेणैकवचनं द्रष्टव्यम्। नन्विन्द्रियव्यापारानन्तरं जायमानस्येन्द्रियमेव कारणं न भविष्यतीत्यत आह इन्द्रियमिति (कं. ८०.९)। अस्तु तर्ह्यसन्निहितविषयः संस्कारः कारणमित्यत आह संस्कारोऽपीति (कं. ८०.१०)।

प्रतीयते तावदिति (कं. ८०.१५) तदेवेदमित्यभेदावधारणेन सामानाधिकरण्यस्याप्यन्यथानुपपत्तेरित्यर्थः। [12]तदस्येति (कं. ८०.१५) तदभिन्नं ज्ञानेऽवभासमानमप्यस्य। अविषय इति संवित्तिविरुद्धं सर्वासामपि वित्तीनां विषयविलोप-

---

१ पारोक्षम्–जे. १, परोक्षम्–जे. २, जे. ३। २ नैके–कं. १, कं. २। ३ तदप्यस्य–कं. १, कं. २। ४ संविद्–कं. १, कं. २। ५ दषसि–अ, वससि–ब; ६ हि अबकपुस्तकेषु नास्ति। ७ भेदत्वे ज्ञाने भेद–ड; ८ स्वाभव–अ, ब; ९ [ ] एतच्चिह्नान्तर्गतः पाठः–अब पुस्तकयोर्भ्रष्टः। १० घट–अ; ११ मालम्बते–अ, ब; १२ तदप्यस्य–कं १. कं. २।

न्यायकन्दली

तस्मादेकमेवेदं विज्ञानमिति प्रतीतिसामर्थ्यादुभयविषयमास्थेयम् । प्रतीयमानकार्य्योत्पत्तये चाप्रतीयमानमपि कारणं कल्पयन्ति विद्वांसो न तु कारणाप्रतीत्या विशदमपि कार्य्यमपह्नुवते जगद्वैचित्र्यस्याप्यपह्नवप्रसङ्गात् । तेन यद्यपि प्रत्येकमिन्द्रियसंस्कारावसमर्थौ तथापि संहताभ्यामिदमेकं कार्य्यं प्रत्यभिज्ञास्वभावं प्रभावयिष्यते, भविष्यति चैतदुभयकारणसामर्थ्यादुभयविषयम्, प्राप्स्यति च प्रत्यक्षतां विषयेन्द्रियसामर्थ्यानुविधानात् । न च यत्रैकैकमसमर्थं तत्र मिलितानामपि तेषामसामर्थ्यम् ? प्रत्येकमकुर्वतामपि क्षित्युदक[1]बीजादीनामन्योन्यसन्निधिभाजामङ्कुरादिजननोपलब्धेः । यत्र विलक्षणा सामग्री तत्र कार्य्यमपि विलक्षणमेव स्यादिति सुप्रतीतम्, तेनास्य सन्निहितासन्निहितविषयतालक्षणे प्रत्यक्षतापरोक्षते न विरोत्स्येते । अत एव चेन्द्रियसन्निकर्षाभावेऽपि पूर्वकाल-

[ह्रि०] प्रस्तुते हि संस्कारस्य पूर्वकालावच्छिन्नं ग्राह्यं प्रत्यक्षस्य तु सम्प्रतिकालावच्छिन्नमित्यवच्छेदभेदान्न द्वयोरेको विषयः । ननु शिलाशकलानामिव येषां प्रत्येकमसामर्थ्यं तेषां मिलितानामप्यसामर्थ्यमेव तत्कथं संस्कारप्र[2]त्यक्षादीनां प्रत्येकम[3]सामर्थ्ये मिलितानामपि सामर्थ्यमत आह [4]**यत्रैकैकम्** इतिः– द्विविधं हि भावानां सामर्थ्यम्, स्वरूपसारूप्यं सहकारिसामर्थ्यं च । तत्र प्रत्येकं स्वरूपसामर्थ्यं मिलितानां च सहकारिसामर्थ्यमपि इति सामर्थ्यद्वयसद्भावे कार्योत्पत्तिरिति भावः । स्वभावभेदं निराचष्टे **यत्र विलक्षणेति** ।

[पं०] प्रत्यक्षतापरोक्षतालक्षणं विषयद्वयमालम्बेते । **एकमेवेदं विज्ञानमिति**–इदमंशतदंशग्राहकम् । **उभयविषयमास्थेयमिति** उभयस्य ग्रहणस्मरणरूपस्य सम्बन्धी विषयो यस्य तत्तया । न पुनरुभयं विषयो यस्य । तस्यैकविषयत्वेनोक्तत्वात् । **प्रतीयमानकार्योत्पत्तये इति** प्रतीयमानं यत्कार्यं प्रत्यभिज्ञालक्षणं तस्योपपत्तये । **अप्रतीयमानमपि कारणमिति** इन्द्रियसंस्कारलक्षणम् । **जगद्वैचित्र्यस्याप्यपह्नवप्रसंगादिति** न खलु जगतः सकलानि कारणानि ज्ञायंते । **सन्निहितासन्निहितविषयतालक्षणे इति** सन्निहित इदमंशः, असन्निहितस्तदंशः । **तन्मात्रानुबन्धित्वादिति** इन्द्रियजज्ञानमात्रानुबन्धित्वात् । **न चैकस्योभयकालतायां कदाचिदनुपपत्ति[रि]त्यत्र एकस्येत्येकस्य** वस्तुनः ।

[कु०] प्रसङ्गानिरालम्बनवादस्य चाग्रे[ग्रे]निराकरिष्यमाणत्वादिति भावः । ननु प्रत्यभिज्ञाभेदेन विषयस्याभेदसाधनमुपक्रम्य कारणाभेदात् स्वभावभेदाच्च प्रत्यभिज्ञाने दूषिते विषयाभेदात्तदभेदसाधने स्पष्टमितरेतराश्रयत्वमित्यत आह **ग्रहणस्मरणे चेति** (कं. ८०.१६)। अयं भावः इह भवतां तत्तांशस्मरमिदंतांशे ग्रहणमिति द्वे एते संवित्ती अभ्युपगम्येते । तयोश्च तत्तेदन्तावच्छिन्नवस्तुमात्रनियतयोस्तदेवेदमिति सामानाधिकरण्येनाभेदावधारणं विदश्रम[मि]ति । **प्रतीतिसामर्थ्यादिति** (कं. ८०.१७) ग्रहणस्मरणाभ्यां विलक्षणतयाऽनुव्यवसीयमानत्वादित्यर्थः । **उभयविषयमिति** (कं. ८०.१७) उभयविशेषणविशिष्टविषयमित्यर्थः । तदेवमनुव्यवसायबलाद् ग्रहणस्मरणाभ्यामन्यत्वमेकत्वं च प्रत्यभिज्ञानस्य प्रसाध्य

---

१ बीजाना–कं. १, कं. २ । २ प्रत्यक्षाभ्यां–ड; ३ मसामर्थ्यम्–अ, ब, क; ४ न च यत्रैकैक–ड;

## न्यायकन्दली

**[1]प्रत्यक्षतैव, इन्द्रियजज्ञानविषयत्वात् तन्मात्रानुबन्धित्वाच्च प्रत्यक्षतायाः । असन्निहितमपि परिच्छिन्ददिन्द्रियं पूर्वकालतामेव परिच्छिनत्ति न भविष्यत्कालताम्, तत्र संस्कारस्य सहकारिणोऽभावात् । न चैकस्योभयकालतायां काचिदनुपपत्तिः, येनास्योभयकालतां सङ्कलयतः कल्पनात्वम्, दृष्टो ह्येकस्यानेकेन विशेषणेन सम्बन्धो यथा [2]चैत्रस्य छत्रपुस्तकाभ्याम् । युगपच्छत्रपुस्तकसम्बन्धे क्रमेण कालद्वयसम्बन्धे च न कश्चिद् विशेषः, एकस्योभयविशेषणावच्छेदप्रतीतेरुभयत्राविशेषात् । तदेवं देशकालावस्थाभेदानुगतमेकं**

[टि०] **इन्द्रियज[3]ज्ञानेति** :– ननु प्राप्यकारित्वाद् इन्द्रियाणामप्राप्यापूर्वावस्था कथमिन्द्रियगोचरः ? सत्यम्, संयुक्तविशेषणतया गोचरत्वम् । [4]यद्यविद्यमानमपि तदानीमिन्द्रियग्राह्यं तर्हि भविष्यत्कालता कथं नेन्द्रियग्राह्येत्याह **असन्निहितमपि** इति । ननु गोभावो वर्तमानकालसन्निहितो नासावतीतकालसम्बन्धः, [5]तस्मात्कालद्वयविशिष्टं भावमेकदैव गृह्णत् प्रत्यक्षं [6]काल्पनिकमेवेत्याह–**न चैकस्योभयेति** :– एकस्य ग्राह्यस्य विषयस्यानेककाल[7]सम्बन्धे यद्यनुपपत्तिः स्यात्, तदेककालसम्बद्धस्य वस्तुनः सम्बन्धिनीमनेककालता गृह्णतोऽस्य प्रत्यभिज्ञानस्य काल्पनिकत्वं स्यात् न त्वेवमस्ति एकस्याप्यनेकेन सह सम्बन्धाभ्युपगमात् । नन्वेकस्य चैत्रस्य युगपद्द्वयेन सम्बन्धः पूर्वापर[8]कालाभ्यां तु क्रमेणेति कुतो दृष्टान्तेन साम्यमित्याह **युगपच्छत्रेति** :– एतावांस्तु विशेषो यदेकत्र साक्षाद् विशेषणतया [9][अन्यत्र संयुक्तविशेषणतया] प्रतीतिरिति । [10]**तदेवंदेशेति**:–देशभेदेन यदेव वाराणस्यां दृष्टं तदेव पाटलिपुत्रे । [11]कालभेदेन यदेव कल्पे दृष्टं तदेवाद्य । अवस्थाभेदेन यदेव नवं दृष्टं तदेव पुराणमिति ।

[पं०] ननु प्रत्यक्षतापरोक्षते तावत्स्यूः(स्तः?), विरोधाभावस्य तयोः सत्योरेव भणितुमर्हत्वात्तत्कथं प्रत्यक्षतैव ज्ञानस्य ! उच्यते – यथा नीलपीताद्याकारवत्त्वेऽपि ज्ञानस्यैका चित्रता तथाऽत्रापि प्रत्यक्षतैवैका, नाकारद्वयव्यपदेशः । **येनास्योभयकालतामिति – अत्रास्येति** प्रत्यभिज्ञानस्य । **युगपच्छत्रपुस्तकसंबन्ध इति** चैत्रस्य । **क्रमेणकालद्वयसम्बन्ध इति प्रत्यभि-**

[कु०] कारणानुपपत्तिं परिहरति **प्रतीयमानेति** (कं. ८०.१७)। जगद्वैचित्र्यस्याऽपह्नवप्रसङ्गात् तदनुकूलस्य विचित्रस्यादृष्टस्य [12]कारणस्य क[क]ल्पत इति शेषः । तर्हि कल्पयतु भवानित्यत आह **तेनेति** (कं. ८०.१९)। प्रत्यक्षतापरोक्षतारूपस्वभावभेदान्नैतदेकं विज्ञानमिति यदुक्तं तत्राह **प्राप्स्यति चेति** (कं. ८०.२२) । यद्यपि पूर्वकालता संस्कारस्यैव विषयः, तथापि विषयस्येन्द्रियसन्निकर्षादिन्द्रियस्यैव प्राधान्यम् । यथा सुरभि चन्दनमिति घ्राणैकविषयत्वेऽपि विशेष्यग्राहिप्राधान्येन विशिष्टज्ञानस्य चाक्षुषत्वमनुव्यवसायेन निश्चीयते; न तद्वदिहापीति भावः ।

---

१ प्रत्यक्षैव – जे. १, जे. २, जे. ३ । २ पाण्डुदासस्य – – जे. ३ । ३ ज्ञातेति – अ, ब; ४ यद्यमान – भ; ५ तत्काल – अ, ब; ६ कात्य – अ, ब; ७ सम्बन्धि – ड; ८ कालयोभ्यांस्तु – अ, ब, क; ९ [ ] एतच्चिह्नान्तर्गतः पाठः ड पुस्तके नास्ति । १० तदेशेति – अ, तद्देशेति – ब; ११ कालभेदे – अ, ब, क; १२ कारणस्य कल्पना इत्यर्थदृष्ट्या सङ्गच्छते – सं ।

## न्यायकन्दली

वस्तुतत्त्वमध्यवसन्ती प्रत्यभिज्ञा भावानां प्रतिक्षणमुत्पादविनाशौ तिरयतीति। भ्रान्तेयं प्रतीतिरिति चेन्न, बाधकाभावात्। क्षणभङ्गसाधन[1]मेव बाधकमिति चेत्? प्रत्यक्षबाधे सत्यबाधितविषयत्वादनुमानोदयः, उदिते च तस्मिन् प्रत्यक्षबाध इत्यन्योन्याश्रयत्वम्। प्रत्यक्षे तु नायं विधिस्तस्यानपेक्षत्वात्, ज्वालादिषु सामान्यविषयं प्रत्यक्षं विशेषविषयञ्चानुमानमित्यविरोधान्न प्रत्यक्षेणानुमानोत्पत्तिनिषेध इत्यलम्।

[टि०] ननु यदि प्रत्यक्षबाधितं दृढमप्यनुमानं नोदेति तर्हि कथं ज्वालादौ प्रत्यक्षबाधितस्य भेदप्रतिपादकानुमानस्योदय इत्याह **ज्वालादिषु** इति :-ज्वालादौ हि भिन्नव्यक्तिसमवेतैकसामान्यालम्बनत्वेन प्रत्यभिज्ञानमन्यथासिद्धं भेदानुमानं तु भिन्नपरिमाणाश्रयत्वादिति [2]दृढव्याप्तिकमिति। ननु घटक्षणविषयप्रत्यभिज्ञानेऽपि समानमिदम्? नैवम्, बौद्धसिद्धान्ते सामान्यान[3]भ्युपगमात्। ज्वालादौ तु सामान्याभ्युपगमोऽस्ति घटशरावादौ च भिन्नपरिमाणाश्रयत्वभिन्नत्वयोर्दृढव्याप्तिग्राहकेण प्रत्यक्षेणाबाधितेन प्रत्यभिज्ञाप्रत्यक्षमन्यथासिद्धं बाधितं, न त्वेवं घटक्षणे इति।

[पं०] ज्ञायाम्। **प्रत्यक्षे** इति-अस्मदीये प्रत्यभिज्ञानाख्ये। **अनुमानोदय** इति त्वत्प्रयुक्तस्यानुमानस्योदयः। **प्रत्यक्षे तु नायं विधिरिति** प्रत्यक्षे तु नान्योन्याश्रयदोषोपपत्तिरित्यर्थः। ननु प्रत्यक्षबाधितं दृढमप्यनुमानं नोदेति, कथं तर्हि ज्वालादौ प्रत्यक्षबाधितस्य, 'इयं ज्वालाभिन्नपरिमाणाश्रयत्वात्, वस्तुद्वयवत्'-इत्यनुमानस्योदय इत्याह **ज्वालादिष्वित्यादि**। **सामान्यविषयमिति** ज्वालात्वसामान्यविषयम्। **इत्यविरोधादिति** समानविषययोर्हि विरोधः।

[कु०] ननु बीजादीनां क्षित्याद्यसहकृतानां कार्यान्तरानुपलम्भादङ्कुरादिकमुत्सर्गकार्यमेव; इह तु वर्तमानावच्छिन्नाग्रहणमन्यदेवोत्सर्गकार्यमिन्द्रियस्येति कथं तदतिपातः संस्कारसचिवस्य स्यात्? न हि स[ह]कारिसहजलाभेऽपि वह्नेरौपसर्गिकदाहादिकार्यातिपातेन सेचनादौ सामर्थ्यमुपलब्धमित्यत आह **यत्रेति** (कं. ८०.२४)। तेषां किञ्चित्सहकारिलाभे औत्सर्गिककार्यमतिपत्य कार्यान्तरजनकत्वं दृश्यते; यथा दावानलदग्धस्य वेत्रबीजस्य कदलीकाण्डजनकत्वमिति भावः।

**भ्रान्तेयमिति** (कं. ८१.८) या या प्रत्यभिज्ञा सा सा भ्रान्ता यथा ज्वालाप्रत्यभिज्ञा, इयं च प्रत्यभिज्ञेत्यनुमानादिति। उपाधिमाह **नेति** (कं. ८१.८)। साधनव्यापकत्वमाशङ्कते **क्षणभङ्गेति** (कं. ८१.८)। ननु यद(व)नपेक्षत्वात्प्रत्यक्षमनुमानेन बाध्यते कथं तर्हि प्रत्यभिज्ञानमनुमानेन बाध्यत इत्यत आह **ज्वालादिष्विति** (कं. ८१.१०)। तत्र विरुद्धसंसर्गेण भेदानुमानादनेककालसम्बधिसामान्यविषयतया प्रत्यभिज्ञानमन्यथासिद्धिः प्रत्यभिज्ञाया इति भावः।

---

१ मेतस्या–कं. १, कं. २। २ दृष्ट–अ, ब; ३ भ्युपगमात्–अ, ब;

## न्यायकन्दली

[89] योऽप्यतिप्रौढिम्ना प्रत्यक्षसिद्धं क्षणभङ्गमाह, तस्यानुभवाभाव एवोत्तरम्। नीलमेतदिति[1] हि प्रतिपत्तिर्न तु क्षणिकमेतदिति नीलत्वाव्यतिरेकिणी क्षणिकता, तस्याः पृथगर्थक्रियाया अभावात्। अतो नीलत्वे गृह्यमाणे क्षणिकत्वमपि गृह्यते, सुसदृशक्षणभेदाग्रहणात्। तथा नाध्यवसीयत इति चेत्? अहोऽपरः प्रज्ञाप्रकर्षो यदयमनुभवमपि व्याख्याय कथयति। यन्नाध्यवसितं तद्गृहीतमिति मृगतृष्णिकेयम्, प्रत्यक्षबलोत्पन्नादध्यवसायादन्यस्य प्रत्यक्षदृष्टत्वव्यवस्थानिबन्धनस्यानभ्युपगमात्। यस्मिन्नध्यवसीयमाने यन्नियमेन नाध्यवसीयते नीलपीतयोरिव तयोस्तादात्म्याभिधानमपि प्रलापः। क्षणिकं प्रत्यक्षं ज्ञानं स्वसमानकालवर्त्तिनीमर्थस्य सत्तां परिच्छिन्दत् तत्कालासम्बद्धतां व्यवच्छिन्दत् तत्काला[2]भावव्यभिचारिणं कालान्तरसम्बन्धमपि व्यवच्छिन्दत् तदेक-

[टि०] **प्रत्यक्षबलेति** :–बौद्धमते हि घटोऽयमित्यध्यवसाय एव घटविषयप्रत्यक्षसद्भावे व्यवस्थापको न पुनरन्यः। **यस्मिन्नध्यवसीयेति** :–घटत्वेन क्षणिकत्वस्य तादात्म्यं नास्ति तदध्यवसायेऽपि तस्यानध्यवसायात् [3]यथा नीलस्य पीतेनेति। पुनः क्षणिकत्वस्य प्रत्यक्षतायां युक्तिमाशङ्कते **क्षणिकं प्रत्यक्षं ज्ञानम्** इति :–तत्क्षणिकं ज्ञानं यत्र काले स्वयमस्ति तत्कालवर्तिक्षणसत्त्वमपि परिच्छिन्नति, ततश्च[4] तेन ग्रहणकालेम सम्बन्धाभावं व्यवच्छिन्नत्ति वर्तमानकाल-

[पं०] [89] [5]**अनुभवबाध एवेति**–अनुभवाभाव एव। **बौद्धवाक्यं नीलत्वाव्यतिरेकिणीत्यादि**। **प्रत्यक्षबलोत्पन्नादिति**–निर्विकल्पकबलोत्पन्नात्। **अध्यवसायादिति** विकल्पात्। **यस्मिन्निति** नीले यदि विक्षणिकत्वम्। **तयोरिति** नीलत्वक्षणिकत्वयोः। **तत्कालासम्बद्धतां व्यवच्छिन्ददिति**–विकल्पात्, वर्तमानकालासंबन्धनिषेधवत्। **तत्काला(ल)भावाव्यभिचार(रि)णमि(णः इ)ति** तत्काले वर्तमानकालाभावोऽतीतानागतयोः। स **कालान्तरसम्बन्धमिति** भविष्यदतीत-

[कु०] [89] ननु यदि क्षणिकत्वं धर्मिणो भिन्नं स्यात्त[6]घग [र्तहि यद]नुभूयेत न चैवमिति शङ्कते **नीलत्वाव्यतिरेकिणीति** (कं. ८१.१३)।

**नन्वभेदे क्षणिकमित्यपि** कदाचिदनुभूयेतेत्यत आह मु[स]दृशेति (कं. ८१.१५)। **अप्रतिभासमानस्य** विषयत्वकल्पनायामतिप्रसङ्ग इत्यभिप्रायवानुपहासेनोत्तरमाह **अहो पर इति** (कं. ८१.१६)। यन्नाध्यवसितं न सविकल्पकेन निश्चितं तद्गृहीतं निर्विकल्पकेन विषयीकृतमिति मृगतृष्णिकाप्रमाणबाधितमित्यर्थः। कुत इत्यत आह **प्रत्यक्षबलोत्पन्नादिति** (कं. ८१.१७)। निर्विकल्पकपृष्ठभागिनः सविकल्पकादन्यस्य निर्विकल्पकस्य दृष्टत्वव्यवस्थापकता न स्यादित्यर्थः। पूर्वं क्षणिकत्वस्य नीलादिभ्यो व्यतिरेकमङ्गीकृत्यानुमानाभाव उक्तः, इदानीं सोऽपि नास्तीत्यत आह **यस्मिन्निति** (कं. ८१.१८)। गृह्यमाणागृह्यमाणयोस्तादात्म्यं प्रमाणबाधितमित्यर्थः।

यद्यभ्युपगमेनाह [7]**स्वात्मानमेवेति** (कं. ८१.२३)। यदवच्छिन्नकालावस्थायितामर्थस्य गृह्णीयादिति भावः। **पूर्वापरेति** (कं. ८१.२४)। उपलक्षणमेतत्–अर्थस्य भावाभावयोरप्यग्रहणस्य तादवस्थ्यादेतत्कालत्वव्यवच्छेदो न तु

---

१ दिति हि प्रतिपत्तिर्न क्षणिक–कं. १, कं. २। २ कालभावव्यभिचारिणः–कं. १, कं. २। ३ तथा–अ, ब, क; ४ श्चेतन–ड; ५ अनुभवाभाव एव–कं। ६ अर्थदृष्टया [र्तहि यद] इति पाठः सङ्गच्छते–सं। ७ स्वात्मनामेवेति Ms.।

## न्यायकन्दली

क्षणावस्थायित्वं क्षणिकत्वं गृह्णातीति चेत्? काशकुशाव[1]लम्बनप्रायमिदम्, स्वात्मानमेव न गृह्णाति विज्ञानम्, कुतः स्वसमान[2]कालतामर्थस्य गृह्णाति ? गृह्णातु वा, तथापि पूर्वमयं नासीत् पश्चाच्च न भविष्यतीत्यत्र प्रत्यक्षमजागरूकं पूर्वापरका[3]लाग्रहणात्। वर्तमान[3]कालत्वपरिच्छेदे चातत्कालव्यवच्छेदो युक्तो भावाभावयोर्विरोधान्न तु कालान्तर-सम्बन्धव्यवच्छेदो मणिसूत्रवदेकस्यानेकसम्ब[4]न्धाविरोधात्। प्रपञ्चितश्चायमर्थोऽस्माभि-स्तत्त्वप्रबोधे तत्त्वसंवादिन्याञ्चेति नात्र प्रतन्यते।

किञ्च सर्वभावक्षणिकत्वाभ्युपगमे कस्य संसारः? ज्ञानसन्तानस्येति चेत्? न, सन्तानिव्यतिरिक्तस्य सन्तानस्याभावात्। अथ मतं नैकस्यानेकशरीरादियोगः संसारः, किं तर्हि? ज्ञानसन्तानाविच्छेदः, स च क्षणिकत्वेऽपि नानुपपन्नः। तदप्यसारम्,

[टि०] [5]सम्बद्धस्यैव ग्रहणात्। वर्तमानकाल[6]सम्बद्धं च गृह्णत् कालान्तरेण भूतादिना सम्बन्धं व्यवच्छिनत्ति, यतो भूतादिकालसम्बन्धो वर्तमानकाल[7]सम्बन्धाभावं न व्यभिचरति, यत्रैव वर्तमानकालसम्बन्धाभावस्तत्रैव भूतादिकाल-सम्बन्धात्। [8]यत्र तु वर्तमानकालसम्बन्धाभावो नास्ति तत्र भूतादिकालसम्बन्धस्यापि निवृत्तेः। काशकुशेति– धर्मार्थादित्वादलघु[9]स्वरस्यापि प्राङ्निपातः।

स्वसिद्धान्तश्रद्धालुतया समाधाय बौद्धाभिप्रायेणापि समाधत्ते गृह्णातु वा इति। [10][पूर्वापरकालयोरेवाप्रतीतौ तत्र भावास्तित्वनास्तित्वप्रतीत्यभावात् भूतलाप्रतीतौ हि तत्र घटास्तित्वनास्तित्वाप्रतीतेः। ननु यत एव ज्ञानं]

[पं०] सम्बन्धम्। स्वात्मानमेव न गृह्णाति विज्ञानमिति वैशेषिकमतापेक्षयेदमुक्तम्। वैशेषिको हि "ज्ञानं स्वं स्वयं न प्रकाशयति। स्वात्मनि क्रियाविरोधात्।" इति प्रमाणयति स्वसिद्धान्ताभिप्रायेण समाधाय बौद्धाभिप्रायेणापि समाधत्ते गृह्णातु वेत्यादि। अतत्कालव्यवच्छेद इति वर्तमानकालाभावमात्रव्यवच्छेद एव। कालान्तरसम्बन्धव्यवच्छेद इति भविष्यदतीतकालसम्बन्धव्यवच्छेदः। तत्त्वप्रबोधे तत्त्वसंवादिन्यां चेति स्वरचितग्रन्थद्वयनाम नीयते। अथ यादृक्जातीयं

[कु०] कालान्तरसम्बन्धव्यवच्छेद इति। यस्य तस्मिन् कालेऽभावो नास्ति तस्य कालान्तरे भाव इति प्रतिबन्धे हि तद्व्यवच्छेदो भवेत्। स च क्षणिकत्वसिद्धेः? [11]पागुन्निश्चयः स्थिरतयैकस्यानेककालसम्बन्धाविरोधात्। अत एकस्यानेक-सम्बन्धे प्रतिसम्बन्धिस्वभावभेद[:] स्यादिति यदि तदपि न एकस्यैव चित्राभिज्ञानस्य भवन्मतेनेह नीलपीतादिसम्ब-न्धत्वाभ्युपगमादित्यभिप्रायेण मणिसूत्रोदाहरणं द्रष्टव्यम्।

**कस्य संसार** इति *(कं. ८२.२) यस्यापवर्गाय सुगतवाक्यानि श्रूयन्त इति भावः।* ***अथ मतमिति*** *(कं. ८२.३)* न वयं भवन्त इवैकस्यानेकस्यानेकशरीरेन्द्रियादियोगं संसारं वदामः, किन्तु ज्ञाना[ना]मेव परस्परं कार्यकारणभावः। स च क्षणिकानामपि सङ्गच्छत इत्यर्थः। ननु कार्यकारणभावयोः साजात्यं तावद्[भव]द्भिरप्यङ्गीकृतं नह्यस्ति सम्भवः

---

१ लम्बनमिदम्–कं. १, कं. २। २ कालता–कं. १, कं. २। ३ कालपरिच्छेदे–कं. १, कं. २। ४ न्धत्वा–कं. १, कं. २। ५ सम्बन्धस्यैव–अ, ब; ६ सम्बन्धाभावसम्बद्धं–अ, ब; ७ सम्बन्धो भावं न व्यभि.–अ; सम्बद्धाभावं न व्यभि.–ड; सम्बन्धाभावं व्यभि.–ब, क; ८ यत्र वर्तमान–ड; ९ स्वरस्य–अ; १० [ ] एतच्चिह्नान्तर्गतः पाठः अबक पुस्तकेषु नास्ति। ११ पाठो अस्पष्टः।

न्यायकन्दली

**गर्भादिज्ञानस्य प्राग्भवीयज्ञानकृतत्वे प्रमाणाभावात्, नहि समानजातीयादेवार्थस्योत्पत्तिः, विजातीयादप्यग्नेर्धूमस्योत्पत्तिसम्भवात् । अथ मतं यस्यान्वयव्यतिरेकावतिशयञ्च यदनुविधत्ते तत्तस्य समानजातीयमुपादानञ्चेति स्थितिः, ज्ञानञ्च [1]बोधात्मकत्वमतिशयं बिभर्त्ति तच्च पृथिव्यादिभूतेषु नास्ति, तस्माद्यस्यायमतिशयस्तदस्य समानजातीय-मुपादानकारणमिति स्थिते गर्भज्ञानं ज्ञानान्तरपूर्वकं सिद्ध्यति, कारणव्यभिचारे कार्य्यस्याकस्मिकत्वप्रसङ्गादिति ।**

**तदप्यसारम्, अदहनस्वभावेभ्यो दारुनिर्मथनादिभ्यो वह्नेर्दाहातिशयोत्पत्तिवद-बोधात्मकेभ्योऽपि चक्षुरादिभ्यो बोधात्मकत्वातिशयोत्पत्तिसम्भवे बोधात्मककारणकल्पना-नवकाशात्, अतो न प्राक्तनजन्मसिद्धिर्भविष्यति । जन्मान्तरमित्यपि न सिद्ध्यति, [2]मरणे शरीरान्त्यज्ञानेन ज्ञानान्तरं प्रतिसन्धातव्यमित्यत्र प्रमाणाभावात् । यद्यत्राविकलकारणा-**

[टि०] पूर्वापरकालौ न गृह्णाति, अत एव वर्तमानकालग्रहणात् क्षणिकता प्रत्यक्षा इत्याह [3]**वर्तमानकालत्वेति**—तत्काल-स्याभावोऽतत्कालम् [4]अमक्षिकवत्समासः । यदा हि ज्ञानेन वर्तमानकालसम्बन्धो गृह्यते तदा वर्तमानकालसम्बन्धाभाव एव व्यवच्छिद्यते, न तु प्राक्कालसम्बन्धोऽस्य [5]नाभूदिति [6]ज्ञायते । मृतिसमय एव ज्ञानसन्तानोच्छेदात् । ज्ञानसन्ताना-विच्छेदस्य संसारत्वं निराचष्टे **गर्भादिज्ञानेति** । **अदहनस्वभावेभ्यः** इति :—बौद्धाभिप्रायेण दृष्टान्तोऽयम्, वैशेषिकमते तु [7]तदन्तर्गतवह्निपरमाणुभ्य एव दहनोत्पत्तिः । **यद्यत्र** इति :—अविकला सम्पूर्णा कारणावस्था कारणरूपता यस्य तद् अविकलकारणावस्थं समर्थमित्यर्थः ।

[पं०] कार्यं [ता]दृक् जातीयं कारणं कल्प्यं चेदित्याह —**न हि समानेत्यादि विजातीयादप्यग्नेर्धूमस्योत्पत्तिसंभवादिति** वैशेषिकमते हि तैजसोऽग्निः, तज्जातस्तु धूमः पार्थिवः । **यस्येति** कारणस्य । **यदिति** = ज्ञानं कर्तृ, **तदिति** कारणम्, **तस्येति** कार्यस्य । **अतिशयमिति** विशेषम् । **दारुनिर्मथनादिभ्य** इति अधः काष्टं दारु, उपरिकाष्टं निर्मथनम् ।

[कु०] पार्थिवावयवैराप्यस्योत्पत्तिरिति । ततश्च ज्ञानं ज्ञानकार्यमिति सिद्ध्यतीत्यत आह **न हीति** (कं. ८३.५) । उपादानजातिनियमो द्रव्ये द्रष्टव्यः । स च भवन्मतेऽनुपपन्नः जातेर्द्रव्यस्य चानङ्गीकारात् किन्तु यत्प्रतीत्य यदुत्पद्यते तत्तस्य कारणमित्येतावन्मात्रमभ्युपगम्यते । तत्र च नोपादानं किञ्चि[त्] न च जातिनियमानुवृत्तिरित्यर्थः ।

यद्यपि यत्समवेतं कार्यं तदुपादानमिति नास्मन्मतेन च जातिर्वस्तु सत्तातथाप्यन्यदेवोपादानत्वमपोहरूपा च जातिर्भविष्यतीत्याशयवानाशङ्कते **अथ मतं यस्येति** (कं. ८२.७) । अत्रापि व्यभिचारः समान इति समाधत्ते **तदपीति** (कं. ८२.११) । परे[ण] स्थायिपरमाण्वनङ्गीकाराच्च निर्मथनादिभ्योऽपि दहनोत्पत्तिरित्यवसेयम् । एवं ज्ञानस्य

१ बोधात्मकम्—जे. २; जे. ३ । २ मरणं—जे. १; जे. २; जे. ३ । ३ वर्तमानकालपरिच्छेदे मु., वर्तमान-कालत्वपरिच्छेदे—जे. १, जे. ३; ४ मक्षिकवत्—अ; ५ मा भूदिति—अ, ब, क; ६ जायते—क; ७ तर्दतर्गत—अ;

## प्रशस्तपादभाष्यम्

[90] शरीरसमवायिनीभ्याञ्च हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां रथकर्म्मणा [1]सारथिवत् प्रयत्नवान् विग्रहस्याधिष्ठातानुमीयते, प्राणादिभिश्चेति। कथम्? शरीरपरिगृहीते वायौ विकृतकर्म्मदर्शनाद् भस्त्राध्मापयितेव, निमेषोन्मेषकर्म्मणा नियतेन [2]दारुयन्त्रप्रयोक्तेव, देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वात् गृहपतिरिव।

## न्यायकन्दली

वस्थं [3]तत्तत्रजनयत्येव यथाविकलजननावस्थं बीजमङ्कुरं प्रति, [4]अविकलज्ञानजननावस्थं चान्त्यं ज्ञानमिति प्रमाणमस्तीति चेत्? न, ज्वालादीनामन्त्यक्षणेन व्यभिचारात्, स्नेहवर्त्ति[5]क्षयाविनाऽन्त्यज्वालाक्षणस्य कारणावस्थावैकल्यादविकलत्वं नास्तीति चेत्? अन्त्यज्ञानस्यापि मरणपीडया पीडितस्याविकलकारणावस्थत्वमसिद्धमिति सुव्याहृतं क्षणिकत्वे परलोकाभाव इत्युपरम्यते।

[90] आत्मसिद्धौ प्रमाणान्तरमप्याह–शरीरसमवायिनीभ्यामिति। प्रवृत्तिनिवृत्तिभ्यां प्रयत्नवान् विग्रहस्य शरीरस्याधिष्ठातानुमीयते। [6]लतादिनिवृत्तिप्रवृत्तिव्यवच्छेदार्थं शरीरसमवायिनीभ्यामित्युक्तम्। [7]स्रोतःप्रेरितमृतशरीरप्रवृत्तिनिवृत्तिव्यवच्छेदार्थञ्च

[टि०] [90] लतादीति :–लतादीनां शरीरत्वमस्य नाभीष्टम्। बुद्धिपूर्वकचेष्टेति :–नदीस्रोतः प्रेरितशवशरीस्यापि

[पं०] चक्षुरादिभ्य इति भौतिकेभ्यः। अतो न प्राक्तनजन्मसिद्धिरिति क्षणभङ्गुरवादे इति शेषः। ज्वालादीनामिति दीपार्चिरादीनाम्। परवाक्यं स्नेहवर्तीत्यादि।

[90] साधनोपादानपरिवर्जनद्वारेणेति सुखदुःखयोः साधनानि स्रक्चन्दनवनितासर्पकंटकविषादीनि, तेषामु-

[कु०] कार्यत्वे प्रमाणाभावमभिधाय ज्ञानकारणत्वेऽप्याह भविष्यतीति (कं. ८२.१४) [8]मरणशरीरान्त्यज्ञानेनेति (कं. ८२.१४) म्रियमाणे शरीरे चरमं यज्ज्ञानं तेनेत्यर्थः। अन्त्यज्ञानस्यापि (कं. ८२.१९) इति कार्यस्य जन्मना स्नेहवर्त्तिक्षयस्य कारणावस्थावैकल्यहेतुत्वं ज्वालायां यथा कल्प्यते तद्वज्ज्ञानेऽपि मरणानन्तरस्याजननान्मरणपीडाया एव कारणावस्थावैकल्यहेतुत्वं कल्पयितुं सुशं(श)कमिति भावः॥

[90] नन्वनुवृत्तिप्रमाणस्यात्मत्वस्य सिद्धये परात्मनिरूपणं प्रस्तुतं तथा च यथा परात्मात्(त्म)प्रसिद्धिः तथा परबुद्धेरपीति शङ्का निराकरणपरमनन्तरभाष्यमवतारयति–आत्मसिद्धादिति (कं. ८२ २२)। लतादीति (कं.

---

१ सारथिरिव–दे। २ दारुयन्त्रेण–दे। ३ तज्जनयत्वेव–कं. १; कं. २; तत्तज्जनयत्येव–जे. १; जे. २। ४ अविकलं जननत्वस्थं–कं. १; कं. २। ५ क्षयादीनाम्–कं. १; कं. २। ६ लतादिप्रवृत्ति–कं. १, कं, २। ७ स्रोतःपतित–कं. १, कं. २। ८ मरणे–कं १. कं. २।

न्यायकन्दली

हिताहितप्राप्तिपरिहारयोग्याभ्यामिति । हितं सुखमहितं दुःखम्, तयोः प्राप्तिपरिहारौ हितस्य प्राप्तिरहितस्य परिहारः, तत्र योग्याभ्यां समर्थाभ्यामिति बुद्धिपूर्वकचेष्टापरिग्रहः। रथकर्मणा सारथिवदिति दृष्टान्तकथनम् । साधनोपादानपरिवर्जनद्वारेण हिताहितप्राप्ति-परिहारसमर्था चेष्टा [1]प्रयत्नपूर्विका विशिष्टक्रियात्वात् रथक्रियावत् । शरीरं वा प्रयत्नवदधिष्ठितं विशिष्टक्रि[2]याश्रयत्वात् रथवत् । प्राणादिभिश्चेति । प्राणादिभिश्च प्रयत्नवानधिष्ठाताऽनुमीयत इत्यनुषञ्जनीयम् । प्राणादिभिरित्यनेन "प्राणापाननिमेषो-न्मेषजीवनमनोग[3]तीन्द्रियान्तरविकाराः" "सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि" (वै. सू. ३-२-८) इति सूत्रोक्तसमस्तलिङ्गपरिग्रहः । कथमिति प्रश्नपूर्वकं प्राणापानयो-र्लिङ्गत्वं दर्शयति—शरीरपरिगृहीत इति । वायुस्तिर्य्यग्गमनस्वभावः, शरीरपरि[4]गृहीते च वायौ प्राणापानाख्ये विकृतं स्वभावविपरीतं कर्मोर्ध्वगमनमधोगमनञ्च दृश्यते, तस्मात् प्रयत्नवान् विग्रहस्याधिष्ठातानुमीयते, यस्तथा वायुं प्रेरयति, अन्यथास्य विकृ[5]तत्वा-सम्भवात् । भस्त्राध्मा[6]पयितेवेति दृष्टान्तः, शरीरं प्रयत्नवदधिष्ठितमिच्छापूर्वक-

[टि०] [7]चेष्टा श्वानं प्रति हितप्राप्त्यर्था कश्चित्प्रति [8]दौर्गन्ध्येनाहितप्राप्त्यर्था च भवति । परं यस्यैव प्रयत्नेन जनिता चेष्टा तस्यैव [9]यदि हिताहितप्राप्तिनिमित्तं सेह गृह्यते इत्यभिप्रायवतो बुद्धिपूर्वकेति व्याख्यानम् । नन्वत्र दृष्टान्ते किं साक्षात्प्रयत्न[10]वदधिष्ठितत्वं पारम्पर्येण वा ? नाद्योऽसिद्धे, नापरः पक्षे [11]एवासिद्धेः, नैवम्, विशेषाविवक्षया

[पं०] पादानपरिवर्जने, तद्द्वारेण। तेन [हि] द्विवायुकादिभिर्नानैकान्तिकमिति द्वयोर्वेगवतोर्विरुद्धदिक्क्रिययोः सन्निपातो द्विवायु[:] । तत्र वायोरूर्ध्वगमनमस्ति । न चात्मेत्यनैकान्तिकम् । इच्छापूर्वकस्य वायोरूर्ध्वगमनस्य तत्राभावादित्यर्थः ।

[कु०] ८२.२३) अचेतनतृणादिक्रियया व्यभिचारनिवृत्त्यर्थमित्यर्थः । लतादीनामपि शरीरस्य वक्ष्यमाणत्वात् । स्रोतः [12]प्रेरितेति (कं. ८२.२४) शरीरसमवायिन्यापि प्रयत्नानपेक्षया क्रियया व्यभिचारनिवृत्त्यर्थमित्यर्थः । मृतशरीरस्या-भोगायतनशरीरत्वात्तत्र योग्याभ्यामिति द्वयोरपि पृथगेवहेतुत्वात् व्यर्थविशेषणत्वम्, [13][योग्यग्रहणं च हिताहितप्राप्ति-परिहारयोरन्तरायसम्भवेऽपि प्रवृत्तिनिवृत्त्योः प्रयोजकत्वप्रतिपादनाय] प्रयत्नपूर्विका [इति] तद्विषयज्ञानकार्यप्रयत्न-वत्संयोगपूर्विकेत्यर्थः । तत्रानुकूलस्तर्कः प्रयत्नवत्–संयोगाभावे तत्कार्यविशिष्टे चेष्टते [चेष्टेति] स्यादिति । **प्रश्नपूर्वकमिति** (कं. ८३.७) उत्तरपर्यालोचनया प्रश्नस्यापि तद्विषयत्वमिति भावः । शरीरं प्रयत्नवदधिष्ठितं भोक्त्रधिष्ठितमिति व्याख्यानान्नेश्वरेण सिद्धसाधनाना (नानि) ।

---

१ प्रयत्नवत्पूर्विका – जे. २ । २ क्रियात्वाद् – कं. १, क्रियत्वाद्–कं. २ । ३ गतीन्द्रियविकाराः – कं. १, कं. २ । ४ परिगृहीते–कं. १, कं. २ । ५ विकृतवाय्वसम्भवात्–कं. १, कं. २ । ६ °ध्मापयितेव–कं. १, कं. २; ध्मापयितेति –जे. २ । ७ चेष्टा–अ, ब; ८ दौर्गन्धना–अ, ब; ९ यद्धि–ब; १० वदष्ठितत्वं–अ; ११ एव सिद्धेः–अ, ब, क; १२ स्रोतः पतित – कं. १. कं. २ । १३ [ ] एतच्चिह्नान्तर्गतः पाठः पुनरावृत्त आदर्शपुस्तके–सं ।

न्यायकन्दली

विकृतवाय्वाश्रयत्वाद् भस्त्रावत्। शरीरपरिगृहीतेत्यनेनेच्छापूर्वकत्वं दर्शितम्, तेन हि द्विवायुकादिभिर्नानैकान्तिकम्। निमेषोन्मेषकर्मणा नियतेन दारुयन्त्रप्रयोक्तेवेति अक्षिपक्ष्मणोः संयोगनिमित्तं कर्म निमेषः, [1]विभागार्थं च कर्मोन्मेषः। तेन कर्मणा दारुयन्त्रप्रयोक्तेव विग्रहस्य प्रयत्नवानधिष्ठाता अनुमीयते। वायुवशेनापि दारुयन्त्रस्य निमेषोन्मेषौ स्याताम्, तन्निवृत्त्यर्थं नियतेनेति। अनेनेच्छाधीनत्वं दर्शयति। शरीरं प्रयत्नवदधिष्ठितमिच्छाधीननिमेषोन्मेषवदवयवयोगित्वाद् दारुयन्त्रवत्।

जीवनलिङ्गकमनुमानं कथयति–देहस्येति। वृद्धिः प्रसिद्धैव। क्षतस्य भग्नस्य च संरोहणं पुनः सङ्घटनं तयोर्निमित्तत्वाद् गृहपतिरिव प्रयत्नवानधिष्ठाता अनुमीयते। शरीरस्य वृद्धिक्षतसंरोहणं च प्रयत्नवता कृतं वृद्धिक्षतभग्नसंरोहणत्वाद् गृहवृद्धिक्षतभग्नसंरोहणवत्। वृक्षादिगतेन वृद्ध्यादिना व्यभिचार इति चेन्न, तस्यापीश्वरकृतत्वात्, न तु वृक्षादयः सात्मकाः, बुद्ध्याद्युत्पादनसमर्थस्य विशिष्टात्मसम्बन्धस्याभावात्।

[टि०] लोकव्यवहारसिद्धस्य प्रयत्नवदधिष्ठानमात्रस्यैवाभीष्टत्वात्। एवमितरेष्वपि। [4]तेन द्विवायुकेतिः– विरुद्धदिक्[5]यवाय्वभिधानादूर्ध्वगमनादिभिः। ननु प्राकाराभिधातो[6]च्छालिते वायौ प्राकारेऽपि ईश्वरेच्छाविकृतवाय्वा[7]श्रयत्वमस्ति, न तु प्रयत्नवदधिष्ठितत्वम्? नैवम्; तत्रापीश्वरस्य [8]प्रयत्नवतः सत्त्वात्। वृद्धिः इति–अवयवो[9]पचयः।

[पं०] दारुयन्त्रप्रयोक्तेवेति पाटवप्रयोक्ते वा। जीवनलिङ्गकमिति वृद्धिक्षयात्मिका वृत्तिर्जीवनम्, जीवनं लिङ्गमस्येति बहुव्रीहौ कच्।

प(पे)लकमिति लाक्षागोलकम्।

[कु०] इच्छाधीननिमेषोन्मेषवदिति (कं. ८३.१७) ननु परात्मवत्परेच्छाया अप्यप्रसिद्धत्वाद्विशेषणासिद्धो हेतुः? अथ हिताहितप्राप्तिपरिहारस्यायोग्यतयानिमेषोन्मेषकर्मण इच्छापूर्वकत्वमनुमीयत इति तर्हि प्रवृत्तिनिवृत्तिभ्यामेव गतार्थमेतत्। सत्यम्। प्रपञ्चार्थस्तूपन्यासः। वृद्धिः प्रसिद्धैवेति (कं. ८३.१९) पूर्वावयवविनाशमपेक्षमाणैस्तदारम्भकैरागन्तुकावयवसहायैरधिकपरिमाणस्यावयविन आरम्भणं वृद्धिरित्यर्थः। तस्यापीश्वरकृतत्वादिति (कं. ८३.२२) अभ्युपगमवादोऽयम्, इतरथा प्रवृत्तोऽपि तेनैव सिद्धसाधनत्वप्रसङ्गात्। वृक्षादयोऽपि शरीरधारिण एवेति परि[र]मार्थ इतरथा त एव[व]र्षाद्यनुकूलविषयसम्बन्धे हर्षविषादानुपपत्तेः। मानसैः पक्षिमृगतां वाचकैरन्त्यजातितां नरस्याच[व]रतामेति (मति?) कायिकैरिहयानकैरित्यादिस्मृतिविरोधप्रसङ्गाच्च।

---

१ विभागार्थं कर्मो–कं. १, कं. २। २ कथयति–कं. १, कं. २। ३ संरोहणं प्रयत्नवता–कं. १, कं. २। ४ तेन हि–मु. जे. १, ३; ५ हिक्षित्वाय्व–अ, दिक्षिवाय्व–ब; ६ च्छलितो–अ, ब; ७ श्रयमस्ति–अ, ब, क, ८ प्रयत्न ततः–अ, ब; ९ वापचयः–अ;

### प्रशस्तपादभाष्यम्

[91] अभिमतविषयग्राहककरणसम्बन्धनिमित्तेन मनःकर्म्मणा गृहकोणेषु पेलकप्रेरक इव दारकः, नयनविषयालोचनानन्तरं रसानुस्मृतिक्रमेण रसनविक्रियादर्शनादनेकगवाक्षान्तर्गतप्रेक्षकवदुभयदर्शी [1]कश्चिदेको विज्ञायते ।

सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते ।

### न्यायकन्दली

[91] मनोगति[2]लिङ्गकमनुमानमुपन्यस्यति—[3]अभिमतेत्यादि । अभिमतो विषयो जिघृक्षितोऽर्थः, तस्य यद्ग्राहकं करणं चक्षुरादि तेन [4]यो मनसः सम्बन्धस्त[5]स्य निमित्तेन मनःकर्मणा । [6]गृहे कोणेषु कोष्ठेषु भूमौ रोपितं पेलकं प्रति हस्तस्थितस्य पेलकस्य प्रेरको दारक [7]इव प्रयत्नवान् मनःप्रेरकोऽनुमीयते । प्रयत्नवता प्रेर्य्यं मनः, अभिमतविषयसम्बन्धनिमित्तक्रियाश्रयत्वाद्दारकहस्तगतपेलकवत् । वाय्वादिप्रेरितस्यानभिमतेनापि सम्बन्धो भवति । [8][एतदर्थमभिमतविषयेत्युक्तम् । इन्द्रियान्तरविकारं दर्शयति] नयनविषयेति । नयनविषयस्य रूपस्यालोचनाद् [9]ग्रहणादनन्तरं रसस्यानुस्मरणक्रमेण

[टि०] [91] [10]अभिमतेति :—न तु स्वरश्मीनामभिमतसम्बन्धनिमित्ताया: क्रियाया आश्रयत्वं चक्षुर्गोलकस्याप्यस्ति न तु प्रयत्नवत् प्रेर्यत्वम्, तस्य मनःप्रेर्यत्वात् । [11]सुखादीनि इति :—[12]सुखादयो विशेषगुणाः कार्यत्वे सत्यव्यापकत्वे वा एकेन्द्रियग्राह्यजातीयत्वात् रूपवदिति [विशेष] गुणत्वसिद्धौ गुणत्वाद् इति हेतुः, आत्मनः सुखत्वादिसामान्यस्य च

[पं०] [91] वृद्धावस्थायां स्मरणायोगादिति, वृद्धावस्थायामस्मरणप्रसंगादिति द्वौ पाठौ स्तः । अर्थः सदृश एव ।

[कु०] [91] मनसोऽणुत्वं वक्ष्यते । तस्य च गति मनः ([13]मनोगति ?) इन्द्रियसम्बन्धकमाज्ञानक्रम ? इति च । एवं स्थिते प्रयोगोऽयमित्याह प्रयत्नवतेति (कं. ८४.१) ।

ननु साक्षात्कारायोग्यं मनः कथं प्रयत्नेन प्रेर्यते ? दण्डादीनां साक्षात्कृतानामेव प्रयत्नेन प्रेर्यत्वदर्शनात् । [न] चादृष्टवशादसाक्षात्कृतमपि मनःप्रयत्नप्रेरितं भविष्यतीति साम्प्रतम्, अदृष्टादेवाभिमतविषयग्राहककरणसम्बन्धनिमित्तकर्मोत्पत्तिसम्भवे तदतिरिक्तप्रयत्नकल्पनायां कल्पनागौरवप्रसङ्गादिति । सत्यमेवमेतत् । [अ]दृष्टाङ्गीकारे च तदाश्रयात्मसिद्धिरवर्जनीया तदाप्यभिमतवचनादिच्छानुविधायि कर्म गृह्यते । इच्छा च प्रयत्नं मध्येकृत्यैव कर्मोत्पादयति । तत्श्चासाक्षात्कृतेऽपि मनसाम् [इ]च्छानुविधायि कर्मादृष्टवशात्प्रयत्नपूर्वकमभ्युपगन्तव्यम् । अन्यथा बुभुत्सातिशयेन पटुतरप्रत्य[या]नुदयप्रसङ्गादिति ।

---

१ कश्चिदेको विज्ञायते इति – ता. दे पुस्तकयोर्नास्ति । २ लिङ्गमनुमानं – जे. ३ । ३ अभिमतेत्यादिना – कं. १, कं. २ । ४ योगो मनस्सम्बन्धः – कं. १, कं. २ । ५ तन्निमित्तेन– जे. ३ । ६ गृहकोणेषु भूमावारोपितं– जे. ३ । ७ इति – जे. १, जे. २ । ८ [ ] एतच्चिह्नान्तर्गतः पाठः – कं. १, कं. २ पुस्तकयोर्नास्ति । ९ ग्रहणानन्तरं – कं. १, कं. २ । १० प्रतीकमिदं अपुस्तके भ्रष्टम्, अभिमतविषयसम्बन्धेति – ड; ११, १२ मुखा – अ, ब; १३ पाठव्युत्क्रमादर्शो न स्पष्टः स ।

## न्यायकन्दली

रसनेन्द्रि[1]यान्तरस्य विकारो दृश्यते, तस्मादुभयोर्ग[2]वाक्षकयोरन्तर्गतः प्रेक्षक इव द्वाभ्यामिन्द्रियाभ्यां रूपरसयोर्दर्शी कश्चिदेकोऽनुमीयते। किमुक्तं स्यात्? कस्यचिदिष्टफलस्य रूपं दृष्ट्वा तत्सहचरितस्य पूर्वानुभूतस्य रसस्य स्मरणात्तत्रेच्छा भवति, ततोऽपि प्रयत्न आत्ममनस्संयोगापेक्षो रसनेन्द्रियविक्रियां करोति। सा दन्तोदकसंप्लवानुमिता रसनेन्द्रियविक्रिया इन्द्रियचैतन्ये न स्यात्, प्रत्येकं नियताभ्यां चक्षूरसनाभ्यां रूपरसयोः साह[3]चर्य्याप्रतीतौ रूपदर्शनेन रसस्मृत्यभावात्। अस्ति चायं विकारः, तस्मादिन्द्रियव्यतिरिक्तः [4]कोऽप्यस्त्युभयदर्शी यो रूपं दृष्ट्वा रसस्य स्मरति। शरीरमेव चो[5]भयदर्शि भविष्यतीति चेन्न, बालवृद्धशरीरयोः परिमाणभेदेनान्यत्वे सिद्धे बालावस्थानुभूतस्य वृद्धावस्थायामस्मरणप्रसङ्गात्।

न केवलं पूर्वोक्तैर्हेतुभिः, सुखदुःखेच्छाद्वेषादिभिश्च गुणैर्गुण्यनुमीयते [6][सुखादीनि द्रव्याश्रितानि गुणत्वाद्रूपादिवत्। योऽसौ गुणी स आत्मेति। ननु शरीराश्रिता एव सुखादयः तत्राह <u>ते च न शरीरेन्द्रियगुणा</u> इति। न प्रतिज्ञामात्रेण कस्यचिदर्थस्य

[टि०] व्यवच्छेदार्थं [7]विशेषणे जातीयग्रहणम्, दीपादिप्रभाव्यवच्छेदार्थम्, तेषां स्वयमेकेन्द्रियग्राह्यत्वेऽपि तज्जातीय[8]तेजोऽन्तरस्य द्वीन्द्रियग्राह्यत्वात्। [9]**अहं सुखीति**–अहंकारप्रत्ययस्य यो विषयस्तत् सम्बन्धित्वेन [10]सुखाद्यवच्छेदः प्रतीयते। विषयस्येत्यत्र [11]सम्बन्धे षष्ठी [12]अवच्छेदस्येत्यत्र तु कर्मणि। **तत्कृत एव इति** :–तेनात्मना कृतः। [13]**तदालम्बनत्वेन**

[कु०] ननु देहेन्द्रियातिरिक्तश्चेतनः नयविषयालोचनानन्तरं रसनविक्रियादर्शनादिति किं केन सम्बध्यते इत्यतः प्रश्नपूर्वकं तात्पर्यमाह–कि[14]**मुक्तमिति** (कं. ८४.६)। इदमत्रानुमानमभिप्रेतं चक्षुरादिकमचेतनं नियतविष[य]त्वात् गवाक्षवत्। अथवा चेतनश्चक्षुरादिव्यतिरिक्तः, अनियतविषयत्वात अनेकगवाक्षप्रेक्षकपुरुषवदिति न केवलं कार्यैः कारणमात्मानुमेयः किन्तु गुणैर्गुणितयाऽपीति चार्थ इत्यभिप्रायः। गुणत्वादिति कार्यत्वे सत्यैकेन्द्रियग्राह्यत्वेन गुणत्वममीषां गन्धादिवद्द्रष्टव्यम्। तथापि सामान्यान्तर्भावे कार्यत्वव्याघातः। कार्यद्रव्यत्वे कर्मत्वे च पृथिव्यात्रियं च तत्कर्मवच्च द्वीन्द्रियग्राह्यत्वापातो वायुवत्तकर्मवच्चाग्राह्यत्वापातो वेत्यनुकूलस्तर्को द्रष्टव्यः।

ननु सुखादीनामहंप्रत्ययस्य चापदात्मकत्वादेकवाक्यभावो न युज्यते इत्यत आह **एकवाक्यत्वमेकाधिकरणत्वमिति** (कं. ८४.१५)। अभिधानधर्मस्याभिधेय उपचारादेतद्द्रष्टव्यम्। उपचारप्रवृत्तिनिमितानामेकार्थसमवाये प्रमाण(इ)वचनं यथाहुः भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति स्थूलोऽहं कृशोऽहमिति शरीरधर्मसामानाधिकरण्यादहं–प्रत्ययोऽपि शरीरविषय इत्यत आह **अहमिति** (कं. ८४.१६)।

---

१ °न्तरविकारो–कं. १, कं. २; °नेन्द्रियविकारो–जे. ३। २ °वाक्षयोरन्तःप्रेक्षक–कं. १, कं. २। ३ °चर्य्यप्रतीतौ–कं. १, कं. २। ४ कोऽप्युभयदर्शी–कं. १, कं. २। ५ मेवोभय°–कं. १, कं. २। ६ [ ] एतच्चिह्नान्तर्गतः पाठः–कं. १, कं. २ पुस्तकयोर्भ्रष्टः। ७ विशेषेण–ड; विशेषणा–अ, ब; ८ त्वेजो–अ, ब, क; ९ प्रतीकमिदं अब पुस्तकयोर्भ्रष्टम्। १० मुखा–अ, ब; ११ सम्बन्धे इति अब पुस्तकयोर्नास्ति। १२ अवच्छेद्यस्य मु.। १३ लम्बनत्वे च–मु. जे. १, जे. ३; लत्वेन–ड; १४ कमुक्त MS.

न्यायकन्दली

सिद्धिरस्तीत्यमेनाभिप्रायेणाह कस्मादिति। कारणमाह—अहङ्कारेणैकवाक्यताभावादिति।] अहङ्कारेणाहमितिप्रत्ययेनैकवाक्यत्वमेकाधिकरणत्वं सुखादीनामहं सुखी अहं दुःखीत्यहङ्कारप्रत्ययविषयस्य सुखाद्यवच्छेद्यस्य प्रतीतेः। अहं प्रत्ययश्च न शरीरालम्बनः, परशरीरेऽ[1]भावप्रसङ्गात्। स्वशरीरे [2]एवायं प्रत्ययो भवतीति चेन्न, अविशेषात्। शरीरालम्बनो[3]ऽहंप्रत्ययः स्वशरीरवत् परशरीरमपि चेत् प्रत्यक्षं तत्र यथा [4]स्थूलत्वादिप्रत्ययः स्वशरीरे परशरीरेऽपि भवति, एवमहमितिप्रत्ययोऽपि स्यात्, स्वरूपस्योभयत्राविशेषात्। स्वसम्बन्धिताकृते तु विशेषे तत्कृत एवायं प्रत्ययो न [5]स्वरूपालम्बनः, तदालम्बनत्वे चान्तर्मुखतयापि न भवेत्। अत एवायं नेन्द्रियावलम्बनः, इन्द्रियाणामतीन्द्रियत्वात्, अस्य च लिङ्ग[6]शब्दाद्यनपेक्षस्य प्रत्यक्षप्रत्ययत्वात्, तस्मात् सुखादयोऽपि

[टि०] इति—शरीरमालम्बनं यस्य [7]स तथा। **अनुभवस्मरणे** इति—'न शरीरेन्द्रियमनसाम्' इत्यस्य भाष्यस्य व्याख्यावसरे भूतस्यात्कार्यत्वाच्चोक्तम्। शरीराणां भिन्नत्वेन प्रतिसन्धानमिन्द्रियाणां च विनाशे तदुपलब्धार्थस्मरणे विपक्षे बाधकमुक्तम्। **ततोऽपि** इति—सुखादयो न शरीरविषयाः अनुभव[8]स्मरणाभ्यां सहैकाधिकरणतया प्रतिसन्धीयमानत्वात् व्यतिरेके यथा रूपम्। य एवाहं गौर आसं स[9] एवेदानीं श्याम इति तु प्रतिसन्धानं परिमाणभेदाच्छरीरभेदसिद्ध्या [10]बाधितम्, प्रस्तुतं तु न [11]बाधितमित्यभ्रान्तमेवेति।

[पं०] अविशेषादिति यदुक्तं तदेव प्रकटयति **शरीरालम्बनोऽहंप्रत्यय इत्यादि**—शरीरालम्बनोऽहंप्रत्यय इत्यतः पुरः ततश्चेत्यध्याहार्यम्। **तत्कृत इति**—आत्मकृतः। न स्वरूपालंबन इत्यर्थः। **तदालंबनत्वे इति** शरीरालंबनत्वे। **न भवेदिति**—अत्राहंप्रत्ययः कर्त्ता। **अत एवेति** अन्तर्मुखत्वादेव। **अस्य चेति**—अहं प्रत्ययस्य च। **शरीरेन्द्रियाणामित्युक्तमिति** प्रागेव। **न तद्विषया इति** न शरीरेन्द्रियविषयाः।

[कु०] किमहंप्रत्ययः शरीरमात्रालम्बनस्तद्विशेषालम्बनो वा? नाद्य इत्याह [12]**परशरीरेऽपीति** (कं. ८४.१७)। द्वितीयमाशङ्क्य दूषयति **स्वशरीर** (कं. ८४.१७) इति। **अविशेषादिति** (कं. ८४.१८) आत्मनो देहव्यतिरेकासिद्धौ स्वपरशब्दोत्पा (**द्येत्यादि**) देहविशेषणानुपपत्तेरित्यर्थः। विशेषाङ्गीकारे च सिद्धान्तः समीहितमित्याह [13]**स्वसम्बन्धितयेति** (कं. ८४.२०)। **अन्तर्मुखतयेति** (कं. ८४.२२)। मम शरीरमिति शरीरस्वामिविषयतेत्यर्थः।

अत एवेति (कं. ८४.२२) 'चक्षुषा पश्यामि' इतीन्द्रियस्वामिविषयतयानुभवादित्यर्थः। किञ्चेत्याह **इन्द्रियाणामिति** (कं ८४.२२)। सुखादीनां शरीरेन्द्रियानाश्रयते(ति) स्वयं हेत्वन्तरमाह **किञ्चेति** (कं. ८४.२४)। संयोगादिसामान्यगुणैर्व्यभिचारपरिहाराय शरीरेन्द्रियविशेषगुणा न भवन्ती[ति] तत्र विशेषपदेन साध्यविशेषणम्।

---

१ ऽभावात्—कं. १, कं. २। २ एवायं भवतीति—कं. १, कं. २ स्वस्वशरीरे एवायं प्रत्ययो—जे. २। ३ ऽयंप्रत्ययः—जे. १, ऽहङ्कारप्रत्ययः—जे. ३। ४ स्थूलादि—कं. १, कं. २। ५ शरीरालम्बनः—कं. १; कं. २। ६ शब्दानपेक्षस्य—कं. १; कं. २। ७ तथा—अ, ब, क; ८ स्मरणा—अ, ब, क; ९ एव श्याम—अ; से एवेदानीं—ड; १० बाधीतम्—अ, ब; ११ बाधितम् तदित्यभ्रान्तमेवेति—अ, ब, क; १२ परशरीरे कं. १. कं. २. कं. ८४.१९ इत्यत्र 'परशरीरेऽपि इत्यस्ति किन्त्वत्र तन्न ग्राह्यं तदनन्तरं स्वशरीरं इति प्रतीकस्य दर्शनात्—सं। १३ स्वसम्बन्धिता°—कं. १, कं. २।

## प्रशस्तपादभाष्यम्

[92] ते च न शरीरेन्द्रियगुणाः, कस्माद[1]हङ्कारेणैकवा[2]क्यताभावात् प्रदेशवृत्तित्वादयावद्द्रव्यभावित्वाद् बाह्येन्द्रियाप्रत्यक्षत्वाच्च, तथा[3]हंशब्देनापि पृथिव्यादिशब्दव्यतिरेकादिति ।

## न्यायकन्दली

न शरीरेन्द्रियविषयाः । किञ्च, योऽनुभविता तस्यैव स्मरणमभिलाषः, सुखसाधनपरिग्रहः, सुखोत्पत्तिः, [4]दुःखेषु द्वेष इति सर्व[5]शरीरिणां प्रत्यात्मसंवेदनीयम् । अनुभवस्मरणे च न शरीरेन्द्रियाणामित्युक्तम् । ततोऽपि सुखादयो न तद्विषयाः ।

[92] युक्त्यन्तरञ्चाह–प्रदेशवृत्तित्वादिति । दृश्यते प्रदेशवृत्तित्वं सुखादीनां पादे मे सुखं शिरसि मे [6]वेदनेति प्रत्ययात् । ततश्च शरीरेन्द्रियगुणत्वाभावः, तद्विशेषगुणानां व्याप्यवृत्ति[7]त्वाव्यभिचारात् । सुखादयः शरीरेन्द्रियविशेषगुणा न भवन्ति, अव्याप्यवृत्तित्वात्, ये तु शरीरेन्द्रियविशेषगुणास्ते व्याप्यवृत्तयो दृष्टाः, यथा रूपादयः, न च तथा सुखादयो व्याप्यवृत्तयः, तस्मान्न शरीरेन्द्रियगुणा इति व्यतिरेकी । कर्णशष्कुल्यवच्छिन्नस्य नभोदेशस्य

**[टि०]** [92] ननु श्रोत्रेन्द्रियं तावदाकाशं तस्य च गुणः शब्दः प्रदेशवृत्तिरस्तीति व्यभिचार इत्याह **कर्णशष्कुली** इति । ननु [8]शरीरगुणो गुरुत्वमिन्द्रिय[9]गुणाश्च रूपादयोऽप्यप्रत्यक्षास्ततो व्यभिचार इति बाह्येन्द्रियप्रत्यक्षत्वादित्यस्य मानसप्रत्यक्षत्वादित्यर्थमभिसन्धाय [10]प्राह–**शरीरेन्द्रियगुणानाम्** इति । **परिशेषाद्** इति [11]सुखादयः प्रतीतद्रव्यव्यतिरिक्त-

**[पं०]** [92] **तद्विशेषगुणानामिति** शरीरेन्द्रियविशेषगुणानाम् । **व्यतिरेकीति** केवलव्यतिरेकी हेतुः । इति **व्य[इतव्य]भिचार इति** कोऽर्थः ? तत्रापि व्याप्यवृत्तित्वं सिद्धमेवेत्यर्थः । **इन्द्रियगुणप्रतिषेधे तु नायं हेतुरिति** इन्द्रियगुणत्वप्रतिषेधविषये पुनरयं हेतुरयावद्द्रव्यभावित्वाख्यो नोपयुज्यते इत्यर्थः ।

**[कु०]** [92] **तद्विवरव्यापीति** (कं. ८५.७) परमाणुपरिमितस्य नभसः श्रोत्रत्वमभिप्रेत्य–तदुक्तम् । (शब्द) प्राच्यत्वादिदिग्विशेषव्यपदेशेष्विन्द्रियव्यापकत्वेऽप्युदात्तानुदात्तादिवत्सानुनासिकवच्च ध्वनिधर्मोपाधितयोपपादनाय इत्यविरोधः । ननु शरीरेन्द्रियगुणत्वप्रतिषेधे बाह्येन्द्रियप्रत्यक्षत्वादिति व्यभिचारी हेतुः, चक्षुरादिगुणानामप्रत्यक्षत्वादित्यत आह–**शरीरेन्द्रियेति** (कं. ८५.१०) । गुरुत्वादीनामित्यादिपदेन शब्दव्यतिरिक्तानां सर्वेषामिन्द्रियगुणानां ग्रहणम् । **विधान्तरं त्विति** (कं. ८५.१२) मानसप्रत्यक्षा इत्यर्थः ।

---

१ दहङ्कारेण सह–ता । २ °वाक्यत्वाभावात्–व्यो. (४०६) । ३ तथाऽहंशब्देन पृथिव्यादि°–ता । ४ दुःखप्रद्वेष–कं. १, कं. २ । ५ शरीराणां–जे. २ । ६ दुःखमिति–कं. १, कं. २ । ७ °वृत्तिव्यभिचारात् –कं. १, कं. २ । ८ गुणौ–अ; ९ गुणश्च–अ, ब, क; १० प्रहारं–भ; ११ मुखादयाः–अ;

न्यायकन्दली

**श्रोत्रेन्द्रियभावमापन्नस्य यश्शब्दो गुणो भवति स तद्विवरव्यापीत्यव्यभिचारः। इतोऽपि न [1]शरीरगुणाः सुखादयो भवन्ति, अयावद्द्रव्यभावित्वात् व्यतिरेकेण रूपादय एव निदर्शनम्। इन्द्रियगुणप्रतिषेधे तु नायं हेतुः, श्रोत्रगुणेन शब्देनानै[2]कान्तिकत्वप्रसङ्गात्। इतोऽपि न शरीरेन्द्रियगुणाः सुखादयो बाह्येन्द्रियाप्रत्यक्षत्वात्। शरीरेन्द्रियगुणानां द्वयी गतिः – अप्रत्यक्षता गुरुत्वादीनाम्, बाह्येन्द्रियप्रत्यक्षता रूपादीनाम्। विधान्तरन्तु सुखादयस्तस्मान्न तद्गुणा इति शरीरेन्द्रियगुणत्वे प्रतिषिद्धे परिशेषात्तैरात्मानुमीयत इति स्थितिः।**

**ननु सुखं दुःखञ्चेमौ विकाराविति नित्यस्यात्मनो न सम्भवतः। भवतश्चेत् सोऽपि चर्म्मवदनित्यः स्यात्। न, तयोरुत्पादविनाशाभ्यां तदन्यस्यात्मनः स्वरूपप्रच्युतेरभावात्। नित्यस्य हि स्वरूपविनाशः स्वरूपान्तरोत्पादश्च विकारो नेष्यते,**

[**टि०**] द्रव्याश्रिताः तदनाश्रितत्वे सति गुणत्वात्, व्यतिरेके रूपादयः। ननु 'अहं' शब्देन अहं स्वरूपमेवाभिधास्यते इत्याह **न च [3]स्वरूपेति** :– ननु शब्दः स्वरूपाभिधास्यति? न; तत्रापि शब्दत्वजात्यभि[4]धानात्।

[**पं०**] **सोऽपि चर्मवदनित्यः स्यादिति**–

वर्षातपाभ्यां किं व्योम्नः चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत्सोऽनित्यः, खतुल्यश्चेदसत्फलः॥

**तयोरिति** सुखदुःखयोः। **तदन्यस्येति** सुखदुःखव्यतिरिक्तस्वरूपस्य। [5]**गुणान्तरोत्पादस्त्वविरुद्ध एवेति** अत्र तु शब्दः

[**कु०**] प्रसङ्गाद्वेदान्तिन उत्थाप्य दूषयति **नन्विति** (कं. ८५.१३)। सोऽपि [6]**चर्मवदनित्यः स्यादिति** (कं. ८५.१४) येषां घटादिविकारमापन्नाः पृथिव्यादय इति। किमयं विकारो नाम? अनित्यधर्मयोगो वा? पूर्वावस्थापरित्यागेनावस्थान्तरापत्तिर्वा? नाद्य इत्याह **न तयोरिति** (कं. ८५.१५)। धर्मधर्मिणौ परमार्थतो भिन्नौ; ततश्च भिन्नस्य धर्मस्योत्पादविनाशयोः स्वतोरपि धर्मिणो न किञ्चिदिति भावः। न द्वितीय इत्याह **नित्यस्य हीति** (कं. ८५.१६)।

यद्यपि तथा शब्देनाहंशब्दस्य प्रकृतसुखादि सामं (म्यं) प्रतिपाद्यते तथापि शब्दस्याकाशगुणत्वान्न गुणतया आत्मनो लिङ्गं शब्दः किन्त्वतिभिधान तयेति (**किन्त्वभिधानं तस्येति**) दर्शयन् सामान्यतो दृष्टा (ष्टं) तावदाह **अहं शब्द** इति (कं. ८५.२२)। ततश्चोपमानोपमेयभावो लिङ्गत्वसामान्येन द्रष्टव्यः। अहमिति प्रत्यक्षेणात्मज्ञानाख्याने तु [त]था शब्दश्चानुमीयत इति शब्दश्च न सङ्गच्छेते इति पूर्वानुमानदृष्टान्तेषु सारथियन्त्रकारादीनां शरीर(रि)त्वाच्छरीरस्याधिष्ठातुश्च तद्वि[7]परीतत्वाद्विशेषविपरीत इति चोद्यम्। [8]**तस्येत् वरसिद्धौ** परिहृतत्वात् परिहाराय प्रत्यक्षोपवर्णनमिति न पेशलम्।

---

१ शरीरेन्द्रियगुणाः–कं. १, कं. २, जे. २; जे. ३। २ °कान्तिकत्वात्–कं. १; कं. २। ३ स्वरूपमभिधेयम्–मु. स्वरूपाभिधानम्–जे. १, जे. ३; ४ मानात्–अ, ब, क; ५ तरोत्पादश्चाविरुद्ध एव–कं। ६ धर्मवद्–MS.। ७ तद्विपरीर MS। ८ पाठोऽस्पष्टोऽतोऽर्थः न स्पष्टः–सं।

## न्यायकन्दली

गुणनिवृत्तिर्गुणान्तरोत्पादश्चाविरुद्ध एव। अथास्य नित्यस्य सुखदुःखाभ्यां किं क्रियते ? स्वविषयोऽनुभवः। सुखदुःखानुभवे सत्यस्यातिशयानतिशयरहितस्य क उपकारः ? अयमेव तस्योपकारोऽयमेव[1] चातिशयो यस्मिन् सति सुखदुःखभोक्तृत्वम्। तथाहंशब्देनापीति। यथा सुखादिभिरात्मा अनुमीयते तथाहंशब्देनाप्यनुमीयते, अहंशब्दो लोके वेदे चाभियुक्तैः प्रयुज्यमानो न तावन्निरभिधेयः। न च स्वरूपमभिधेयं युक्तं स्वात्मनि क्रियाविरोधात्। यथोक्तम्–"नात्मानमभिधत्ते हि कश्चिच्छब्दः कदाचन।"

तस्माद् योऽस्याभिधेयः स आत्मेति नन्वयं पृथिव्यादीनामेव वाचको भविष्यति तत्राह–पृथिव्यादिशब्दव्यतिरेकादिति। यो[2] यस्यार्थस्य वाचकः स तच्छब्देन समानाधिकरणो दृष्टः, यथा द्रव्यं पृथिवीति[3]। अहंशब्दस्य तु पृथिव्यादिवाचकैः शब्दैः सह व्यतिरेकः समानाधिकरणत्वाभावः, अहं पृथिव्यहमुदकमिति प्रयोगाभावात्, तस्मान्नायं पृथिव्यादिविषयः। ननु शरीरविषय एवायं दृश्यते स्थूलोऽहमिति ? न, अहं जानामि अहं स्मरामीतिप्रयोगात्। शरीरस्य च ज्ञानस्मृत्यधिकरणत्वं निषिद्धम्, तस्मादात्मोपकारकत्वेन लक्षणया शरीरे तस्य प्रयोगः, यथा भृत्येऽहमेवायमिति व्यपदेशः।

[पं०] समुच्चये। परवाक्यं–**अथास्य नित्यस्येत्यादि**। स्वरूपविषयोऽनुभवो [**स्वविषयोऽनुभवो**] इति द्वौ पाठौ स्तः। अर्थः सुगमः। आचार्यः–**अयमेव** तस्योपकार इत्यादि। **यस्मिन् सतीति** सुखदुःखानुभवे सति। **न च स्व*रूपाभिधानं युक्तमिति**–अहमिति शब्दः। स्वरूपमेव स्वीयमेव रूपमभिधत्ते इत्यपि नेत्यर्थः। न च स्वरूपमभिधेयं युक्तमित्यपि पाठः क्वचिद्दृश्यते, सोऽपि सुष्टु। **यथोक्तमिति** उक्तं च भद्रेनेत्यर्थः। नास्तिकः प्राहः–**नन्वयं पृथिव्यादीनामेवेत्यादि**।

[कु०] शब्दस्वरूपेणैव सिद्धसाधनत्वमाशङ्क्य परिहरति **न चेति** (कं. ८५.२३)। **स्वात्मनि क्रियाविरोधादिति** (कं. ८५.२३) यत्तु सञ्ज्ञा(:) **स्वरूपमेव** प्रवृत्तिनिवृ[त्ति]मन्तमभिधाय सञ्ज्ञिनमभिदधत इति स्वरूपस्याभिधेयत्वकल्पनं यज्जात्यादिनिमित्तान्तरविरहोपलक्षणपरमित्यविरोधः। **नात्मानमिति** (कं. ८५.२४) नात्म[म]मान्तमिति विवक्षितम्। अतः सर्वशब्दे शब्दशब्दे च न विरोधः।

भाष्योक्तं परिशेषमवतारयति **नन्वयमिति** (कं. ८५.२५)। किमहं शब्दः पृथिव्यादिसामान्यविषयो वा, तद्विशेषविषयो वा ? नाद्यः घटादावभावादित्याह **अहं पृथिवीत्यादि** (कं. ८६.२)। तर्हि सर्वा पृथिवी सर्वं वोदकमहमिति व्यपदिश्येतेत्यभिप्रायः। द्वितीयमाशङ्क्य दूषयति **नन्वयमिति**[4] (कं. ८६.३)। **तस्य गुणानिति**[5] (कं. ८६.७) कादाचित्कतया कार्याणां सुखादीनां समवायिकारणसिद्धये द्रव्यत्वसिद्धये (द्रव्यत्वसिद्ध)[6] एवेति शेषः। यद्यपि सुख्यहं दुख्यहमिच्छामि द्वेष्मि प्रयत इत्येवं मनसा सर्वशरीरिभिः सुखादयोऽनुभूयन्ते तथापि महर्षेर्गौरवात्सूत्रसम्मतिं प्रति प्रदर्शनमित्यनुसन्धेयम्।

---

१ ऽयमेवातिशयः–जे. ३। २ यो हि–जे. ३। ३ पृथिवी–जे. ३। ४ ननु शरीरविषय एवायम्–कं. १; कं. २ इत्यत्र पाठः। ५ तस्य च गुणा–कं. १; कं. २। ६ अधिकं भाति।

प्रशस्तपादभाष्यम्

[93-94] तस्य गुणा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मसंस्कारसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः। आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः। धर्म्माधर्म्मावात्मान्तरगुणानाम[1]कारणत्ववचनात्। संस्कारः, स्मृत्युत्पत्तौ कारणवचनात्। व्यवस्थावचनात् सङ्ख्या।

न्यायकन्दली

[93] एवं व्यवस्थिते सत्यात्मनो गुणान् कथयति–[2]तस्य गुणा इत्यादिना। बुद्ध्यादीनामात्मनि सद्भावे सूत्रकारानुमतिं दर्शयति–[[3]आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धा इति]। आत्मलिङ्गाधिकार इति प्राणापानादिसूत्रं (वै. सू. ३-२-४) लक्षयति। [4]धर्म्माधर्म्मा[5]वात्मान्तरगुणानामकारणत्वाविति वचनात्सिद्धौ। दातरि वर्त्तमानो दानधर्मः [6]प्रतिग्रहीतरि वर्त्तमानं प्रतिग्रहधर्मं जनयतीति कस्यचिन्मतं [7]प्रतिषेधयता सूत्रकृतोक्तम्–"आत्मान्तरगुणानामात्मान्तरगुणेष्वकारणत्वात्" (वै. सू. ६-१-७) इति। अस्यायमर्थः–आत्मान्तरगुणानां सुखादीनामात्मान्तरगुणेषु सुखादिषु कारणत्वाभावाद्धर्म्माधर्म्मयोरन्यत्र वर्त्तमानयोरन्यत्रारम्भकत्वम[8]युक्तमिति। एतेन धर्म्माधर्म्मयोरात्मगुणत्वं कथितम्,

[टि०] [93] आत्मान्तरगुणानाम् इति:–ननु पुत्रसुखं पितुः सुखकारणं भवति? नैवम्, तत्रापि [9]मुखप्रसादानुमितसुखज्ञानस्य कारणत्वात्।

[पं०] [93] कस्यचिन्मतमिति जरन्मीमांसकमतम्। अन्यत्रारंभकत्वमयुक्तमिति–अन्यत्रारम्भ्येवेति द्रष्टव्यम्।

[कु०] [93] अन्यथेति (कं. ८६.१५) अनात्मगुणयोर्धर्माधर्माधारा: (रयो) रात्म[गु]णैः सुखादिभिः साधर्म्यं कथनं न संगतं स्यादित्यर्थः। सूत्रस्य प्रमाणसिद्धार्थानुवादकत्वात्सूत्रकारस्य हृदि विपरिवर्तमानं प्रमाणमाह (पूर्वानुभूत इति–(कं. ८६.१८)। अन्वयव्यतिरेकाभ्यामन्वयस्यैव स्मृतिकारणमस्त्वित्यत आह न तत्रेति (कं. ८६.१८)। अभावस्यापि प्रतियोग्यतिशयकृत(तो) योऽतिशयो भविष्यतीत्यत आह–अभ्यासेति (कं. ८६.१९)। ननु पूर्वपूर्वानुभवकृतातिशयोत्तरोत्तरानुभवानुशयकल्पनायां सर्वमेतदसमञ्जसं स्यादित्यत आह स्थैर्येति (कं. ८६.२१) अत्रायं प्रयोगः स्मृतिरनुभवजनिताऽतिशयकार्या शा (सा)तिशयत्वे सति चिरविनष्टतदन्वयव्यतिरेकानुविधायित्वात्।

---

१ मकारणवचनात्–ता; दे। २ तस्य च –कं. १; कं. २। ३ [ ] एतच्चिह्नान्तर्गतः पाठः जे. २ पुस्तके नास्ति। ४ 'धर्माधर्मावात्मान्तरगुणानामकारणत्ववचनाविति'–अधिकः पाठः कं. १, कं. २ पुस्तकयोर्दृष्टः। ५ आत्मगुणेष्वात्मान्तरगुणानामकारणत्वात् (वै. सू. ६-१-७) इति सूत्रम्–से। ६ प्रतिग्रहीतरि धर्मं–कं. १, प्रतिगृहीतरि अधर्मं–कं. २। ७ निषेद्धुं–जे. ३, कं. १, कं. २; प्रतिषेद्धं–जे. १। ८ मयुक्तम्–जे. ३। ९ सुख–भ, ब;

## न्यायकन्दली

अन्यथा तयोः सुखादिसाधर्म्यकथनेनानारम्भकत्व[1]समर्थनमसम्बद्धं स्यात् । संस्कारः स्मृत्युत्पत्ताविति । *आत्ममनसोः [2]संयोगविशेषात् संस्काराच्च स्मृतिरिति (वै. सू. ९-२-६)* सूत्रं लक्षयति । पूर्वानुभूतोऽर्थः स्मर्य्यते, न तत्रानुभवः कारणम्, चिरविनष्टत्वात्, नाप्यनुभवाभावः कारणमभावस्य [3]निरतिशयत्वेन स्मृतेः पटुमन्दादिभेदानुपपत्तेरभ्यास-वैयर्थ्याच्च । तस्मादनुभवेनात्मनि कश्चिदतिशयः कृतो यतः स्मरणं स्यादिति संस्कार-कल्पना । ये तु विनष्टमप्यनुभवमेव स्मृतेः कारणमाहुः, तेषां विनष्टमेव ज्योतिष्टोमादिकं [4]स्वर्गादिफलस्य साधनं भविष्यतीत्यदृष्टस्याप्युच्छेदः स्यात् । व्यवस्था वचनात् संख्येति । "[5]नानात्मानो व्यवस्थातः" (वै. सू. ३-२-१६ अथवा ३-२-२०) इति सूत्रेणा[6]त्मनानात्व-प्रतिपादनाद् बहुत्वसङ्ख्या सिद्धेत्यर्थः ।

[टि॰] केचिदात्माद्वैतवादिनोऽनुमानयन्ति विवादाध्यासिता [7]देहा [8]मदीयेनैवात्मना आत्मवन्तः, देहत्वात्, मदीयदेहवद् इति । तत्र आत्मवत्त्वं [9]यद्यात्मसंयोगमात्रं विवक्षितं तदा सिद्धसाधनम् । अथ भोगाय[10]तनत्वेन तद्वत्त्वं तर्हि सुखादि-*प्रत्यभिज्ञानबाधा,* विपक्षे बाधकाभावाच्च सन्दिग्धविपक्षव्या[11]वृत्ततेति । तत्र प्रत्यनुमानं सूचयति [12]नानात्मनः इतिः– 'व्यवस्थितत्वाद्' इति हेतुः पूर्वापरवेश्मस्थितप्रदीपवद् गृहपतिवद् वा । नन्वात्मनां भेदासिद्धौ बहुत्वसंख्याया अप्यसिद्धेः 'आत्मानः' इति पक्षे कथं बहुवचनम् ? सत्यम्, स्वसिद्ध्यपेक्षया बहुवचनं दत्त्वा परं प्रति हेतूपन्यासः ।

[पं॰] वह्न्यादावन्यत्रापि ज्वलनक्रियाहि(हे)तुत्वात् । निरतिशयत्वेनेति निरुपाख्यत्वेन । येस्त्विति – मीमांसकाः ।

[कु॰] [13]आत्मान इति (कं. ८६.२३) बहुवचनेनानुवादः सजातीयापेक्षामन्तरेण नोपपद्यते । ततश्च बहुत्वसङ्ख्याविना-भावीति भावः । कश्चित्सुखी कश्चिद्दुःखीतीयं व्यवस्था एकत्वेऽप्युपपते ? पादे मे सुखं शिरसि मे वेदनेतिवच्छरीरा[14]भावेनापि कश्चिन्मुक्तः कश्चित्संसारीति व्यवस्था एकात्मकवादिभि[र]नङ्गीकृते अद्यापि कस्यचिदमुक्ते, वसिष्ठो मुक्तो वामदेवो मुक्त इत्यादीनि तु वाक्यानि मुक्तिसाधनसम्बन्धमात्रेणोपचारात्प्रवृत्तानीत्यङ्गीकारात् ईश्वरानीश्वर-

१ समर्थनं स्यात्–जे. २; समर्थनं न स्यात्–कं. १, कं. २ । २ संयोगात् संस्काराच्चेति स्मृतिसूत्रं– कं. १, कं. २; संयोगात् संस्काराच्च स्मृतिरिति –जे. १; जे. २; जे. ३; 'वस्तुतः आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः' इति सूत्रपाठे पाठः तदनुसारी च पाठोऽस्माभिः स्थापितोऽत्र–सं. । ३ निरतिशयत्वेन पटुमन्दादि° – कं. १, कं. २ । ४ स्वर्गादिफलसाधनं–कं. १ । ५ 'व्यवस्थातो नाना' (वै. सू. ३-२-२०) इति सूत्रपाठः; 'नाना व्यवस्थातः इत्यपि पाठः चन्द्रानन्दविरचितसूत्रपाठे तत्र तु सङ्ख्या ३-२-१६ । ६ आत्मनां नानात्व – जे. १; जे. २; जे. ३ । ७ देहाद्या–अ, ब, क; ८ मदीयेनैवात्मना–अ; ९ यदात्म–ड; १० –यतन तद्वत्त्वं–अ; यतनत्वेन वद्वत्त्वं–ड; ११ वृत्तेति; १२ नात्मान–अ; १३ नानात्मान–कं. १; कं. २ । १४ भाद–Ms.

### न्यायकन्दली

अथ केयं व्यवस्था? [1]नानादेहभाविनां ज्ञानसुखादीनामप्रतिसन्धानम्, ऐकात्म्ये हि यथा [2]बालावस्थायामनुभूतं वृद्धावस्थायामनुसन्धीयते मम सुखमासीन्मम दुःखमासीदिति, एवं देहान्तरानुभूतमप्यनुसन्धीयेत, अनुभवितुरेकत्वात्। न चैवमस्ति, अतः प्रतिशरीरं नानात्मानः। यथा सर्वत्रैकस्याकाशस्य श्रोत्रत्वे कर्णशष्कुल्याद्युपाधिभेदाच्छब्दोपलब्धिव्यवस्था, तथात्मैकत्वेऽपि देहभेदादनुभवादिव्यवस्थेति चेद्? विषमोऽयमुपन्यासः, प्रति-पुरुषं व्यवस्थिताभ्यां धर्म्माधर्म्माभ्यामुपगृहीतानां शब्दोपलब्धिहेतूनां कर्णशष्कुलीनां व्यवस्थानाद्युक्ता तदधिष्ठाननियमेन शब्दग्रहणव्यवस्था। ऐकात्म्ये तु धर्म्माधर्म्मयोर[3]व्यवस्थानाच्छरीरव्यवस्थाभावे किं कृता सुख[4]दुःखाद्युत्पत्तिव्यवस्था? मनस्सम्बन्धस्यापि साधारणत्वात्। यस्य तु[5] नानात्मानः, तस्य सर्वेषामात्मनां सर्वगतत्वेन सर्वशरीरसम्बन्धेऽपि न साधारणो भोगः। यस्य कर्म्मणा यच्छरीरमारब्धं तस्यैव तदुपभोगायतनं न सर्वस्य, कर्मापि यस्य शरीरेण तस्यैव तत्कुरुते नापरस्य, एवं शरीरान्तरनियमः कर्म्मान्तरनियमादित्यनादिः।

[टि०] नन्वात्मनानात्वपक्षेऽप्यात्मनो व्यापकत्वात् सर्वशरीरमनःसम्बन्ध[6]स्य साधारणत्वात् समानो दोषः इत्याह यस्य [7]तु नानात्मान इति। कर्मनियमात् शरीरनियमः, शरीरनियमाच्च कर्मनियम इत्यन्योन्याश्रयस्यानादित्वं परिहारमभिप्रायीकृत्य प्राह एवं च शरीरान्तरनियम इति।

[पं०] अथ केयं व्यवस्थेति प्रश्नः। उत्तरं तु ना[8]नादेहभाविनां ज्ञानसुखादीनामप्रतिसन्धानमित्यादि। परः प्राह यथा सर्वत्रैकस्येति।

[कु०] व्यवस्थापि भ्रान्तिसिद्धेत्याशयवान् पृच्छति अथ केयमिति (कं. ८६.२४) [9]विदित[ता]भिसंधेत्तुत्तरे?[10] नानादेहभाविनामिति (कं. ८६.२४) अत्र प्रयोगः विमतानि सुखादीनि भिन्नाधिकरणानि अप्रतिसन्धीयमानत्वात् यान्यभिन्नाधिकरणानि तानि प्रतिसन्धीयन्ते यथा मामकानीति व्यतिरेकी। अत्र शरीरभेदव्यावृत्तप्रयुक्तमप्रतिसन्धानमित्याशङ्क्याह [11]ऐकात्म्यन्नति [ऐका[11]त्म्ये हीति]।

विषम इति (कं. ८७.३) श्रोत्रभेदव्यवस्था एककर्णशष्कुलीभेदोपपादकधर्माधर्मभेदप्रयोजकात्मभेदस्य विद्यमानत्वे दृष्टान्तदार्ष्टान्तिके तु व्यवस्थायाः प्रयोजकस्य विद्यमानत्वमिति वैषम्यम्। मनःसम्बन्धस्यापीति (कं. ८७.७) [12]योऽहं रूपमद्राक्षं सोऽहं (सोऽहम्) स्पर्शं स्पृशामीति कर्तुरेकत्वे करणभेदः सन्नपि नानुसन्धानं प्रतिहन्तीति भावः।

---

१ नानाभेद–कं. १, कं. २। २ बाल्या–कं. १, कं. २। ३ रव्यवस्थापनाद्–जे. ३। ४ °दुःखोत्पत्ति–कं. १; कं. २। ५ च–जे. ३। ६ धस्या–अ, ब, क; ७ नात्मान–अ; ८ नानाभेद०–कं। ९ पाठोऽर्थदृष्टया न स्पष्टः। १० नानाभेद–कं. १, कं. २। ११ ऐकात्म्ये हि–कं. १; कं. २। १२ षोहं – Ms.

## न्यायकन्दली

[94] अथ मतम्, एकत्वेऽपि परमात्मनो जीवात्मनां परस्परभेदाद् व्यवस्थेति, तदसत्, [1]परमात्मनो जीवात्मनां भेदेऽद्वैतसिद्धान्तक्षतिः, "अनेन [2]जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति जीवपरमात्मनोस्तादात्म्यश्रुति[3]विरोधश्च । अविद्याकृतो जीवपरमात्मनोर्भेद इति चेत् ? कस्येयमविद्या ? किं ब्रह्मणः ? किमुत [4]जीवानाम् ? न तावद् ब्रह्मणोऽस्त्यविद्यायोगः, [5]शुद्धबुद्धस्वभावत्वात् । जीवाश्रयाविद्येति चान्योन्याश्रयदोषपराहतम्, अविद्याकृतो जीवभेदो जीवाश्रयाविद्येति । बीजाङ्कुरवदनादिरविद्याजीवप्रभेद इति चेत् ? बीजाङ्कुरव्यक्तिभेदवदविद्याजीवयोः पारमार्थिकत्वाभावा[6]दनुपपन्नं व्यक्तिभेदेन च बीजाङ्कुरयोरन्योन्यकारणता, जीवस्तु सर्वासु भवकोटिष्वेक एव, मानुषपशुपक्ष्यादियो[7]निषु प्रत्यग्रजातस्य शिशोर्जातिसाम्यादाहारविशेषाभिलाषेण तासु तासु जातिषु

[टि०] [94] नन्वेव[8]मद्वैतपक्षेऽपि भविष्यति यथा नानात्व[9]वादिनो योगिनः कृतानेक [10][शरीरस्यादृष्टविशेषात् सुखदुःखादिव्यवस्थेति । नैवम्, योगिन इव अस्मदादेरप्यन्य] शरीरसुख[11]दुःखानामात्मीयत्वेन [12]प्रतिसन्धानप्रसङ्गात् । **अनेन जीवेन** इतिः– नाम गवाश्वादिकम्, रूपं खुरककुदलाङ्गूलसास्नादिमत्त्वाद्याकारविशेषः । [13][अनेन जीवेन प्रविश्य अहं ब्रह्म, कर्ता नामरूपे कथयामि ।] ननु बीजाङ्कुरादिवद् अनादित्वादन्योन्याश्रय इत्याशङ्क्य परिहरति **बीजाङ्कुरवद्** [14]इत्यादि । [15]बीजाङ्कुरव्यक्तिभेदवद् इति व्यतिरेकदृष्टान्तः ।

[पं०] [94] **परस्परभेदाद् व्यवस्थेति**–अत्र व्यवस्था धर्माधर्मादि [16]**परमात्मनो जीवात्मनां भेद इति** अत्र परमात्मन इति पंचम्येकवचनम् । **तमनुप्रविश्येति**–देहान्तरसंक्रम्य । **नामरूपेति**–प्रमाणप्रमेये । **व्याकरवाणीति** परमात्मरूपो वेदः प्राह । येन संबन्धोपाधिना जीवात्मनां परस्परं भेदः परमात्माभेदेपीत्येवं त्रिदण्डीरूपवेदान्तिकमतमपास्यैकदण्डीमतं निराकुर्वन्नाह–**अविद्याकृतो जीवपरमात्मनोर्भेद इति** । **चेत्यादिना** । **ब्रह्मणः इति** = परमात्मनः । **शुद्धबुद्धिस्वभावत्वादिति शुद्धबुद्धस्वभावत्वादिति** द्वौ पाठौ स्तः । **बीजांकुरव्यक्तिभेदवदविद्याजीवयोः पारमार्थिकत्वाभावादिति** यथा

[कु०] [94] **अथ मतमिति** (कं. ८७.११) जीवानां परस्परभेदाद् व्यवस्था । परमात्मैन एकत्वाच्चैकात्म्यमिति शङ्कायाः [परिहारमाह] **तदसदिति** (कं. ८७.१२) । किं ते जीवाः परमात्मनोऽभिन्ना[भिन्ना] वा ? आद्येऽभिन्नेन परमात्मनोऽभिन्नानां जीवानां परस्परं भेदानुपपत्त्या व्यवस्थानुपपतिरित्याशयवान् द्वितीये दूषणमाह **परमात्मन इति** (कं. ८७.१२) ।

नन्वविद्याजीवयोरपि कल्पितो व्यक्तिभेदो भविष्यति । ततश्च बीजाङ्कुरवदनादितया परस्पराश्रयत्वमपि न दोषायेत्यत आह **जीवस्त्विति** (कं. ८७.१९) । साम्येन जात्युन्नि[न्नी]तेन । **असङ्गतिरिति** (कं. ८७.२३)

---

१ परमात्मनो भेदे – कं. १; कं. २ । २ जीवेनानुप्रविश्य – जे. १; जे. २; जे. ३ । ३ विरोधाच्च – कं. १; कं. २ । ४ जीवात्मनाम् – जे. ३ । ५ शुद्धबुद्धि – जे. २ । ६ °दनुपपन्नः – जे. २; जे. ३ । ७ योनिप्रत्यग्र– कं. १; कं. २ । ८ मध्यैत– अ, ब; ९ वादिना – ड; १० [ ] एतच्चिह्नान्तर्गतः पाठः ब पुस्तके नास्ति, ११ दुःखानात्मीयत्वेन – अ, ब; १२ प्रीतसन्धान – अ; १३ [ ] एतच्चिह्नान्तर्गतः पाठः डपुस्तके नास्ति । १४ इति – अ; १५ बीजाङ्कुरवद्–अ, ब, क; १६ परमात्मनो भेद – कं ।

न्यायकन्दली

जन्मान्तरकृतस्य तत्तदाहार[1]विशेषाभ्यासस्यानुमानपरम्परया तस्यानादिशरीरयोगप्रतीतेः, तत्राविद्याकृतो जीवभेदो जीवभेदाच्चाविद्येत्यसङ्गतिः। ब्रह्मवज्जीवस्याप्यनादिनिधनत्वेन ब्रह्मप्रतिबिम्बता, तस्मात् "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुतिप्रामाण्यादनादिनिधनं ब्रह्मतत्त्वमेवेदं सर्वदेहेषु [2]काशते इति वाच्यम्, तथा सति चानुपपन्ना व्यवस्थेति सूक्तं "नानात्मानो व्यवस्थात" इति। अभेदश्रुतयस्तु गौणार्था [3]इत्येषा दिक्। न च नानात्मपक्षे सर्वेषां क्रमेण मुक्तावन्ते [4]संसारोच्छेदः, अपरिमितानामन्त्यन्यूनातिरिक्तत्वायोगात्। यथाहुर्वार्त्तिककारमिश्राः—

अत एव च विद्वत्सु मुच्यमानेषु सन्ततम्।
[5]ब्रह्माण्डलोकजीवानामनन्तत्वादशून्यता॥
अन्त्यन्यूनातिरिक्तत्वे युज्यते परिमाणवत्।
वस्तुन्यपरिमेये तु नूनं तेषामसम्भवः॥ इति।

[टि०] ननु तर्हि एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन इत्यादि [6]अभेदप्रतिपादकश्रुतिविरोध इत्याह **अभेदश्रुतयस्तु** इति। [7]गौणार्था इति अन्याभिप्रायपराः परमब्रह्मण इव (एव) ध्येयत्वख्यापनपरत्वात्तासाम्। [8]**अपरिमितानामिति**—'त्व'शब्दस्त्रयेणाभिसम्बध्यते। अपरिमिता एतावन्तः [9]सन्त्येते इति परिच्छिन्नाः।

[पं०] बीजांकुरव्यक्तेः भेदः पारमार्थिकस्तथाऽविद्याजीवयोर्भेदो न पारमार्थिकः। **तमेव भान्तमनुभातीति** तमेव परमात्मानं प्रकाशमानमनुप्रकाशते। **सर्वमिति** स्तंभकुम्भादि। **तस्य भासा इति** तस्य परमात्मानः प्रतिभासेन। **तथा सतीति** जीवात्मनां ब्रह्मप्रतिबिम्बत्वे सति। **गौणार्था इति**—अन्यार्थप्रतिपादनपराः। परमब्रह्मण एव ध्येयत्वख्यापनार्थत्वात्। **वार्तिककारमिश्रा इति उद्योतकराचार्याः।** **परिमाणवदिति**-अत्र मतु[प्]प्रत्ययः। परिमाणयुक्तं वस्त्वित्यर्थः।

[कु०] एकस्यैवानेकशरीरयोगे प्रमाणसिद्धे प्रतिजन्म जीवभेदकल्पनाया अनुपपत्तिरिति भावः। **ब्रह्मवदिति** प्रतिबिम्ब[व]-दग्राहिकाया अप्यविद्याया अनादित्वादिति शेषः। **तस्मादिति** (कं. ८७.२४) एवं जीवपरमायो [मात्मनो]र्भ्रान्तेऽपि भेदो न सिद्धयति यदा तदा व्यवस्था नोपपद्यत इति भावः। **गौणार्था** इति (कं. ८८.१) स्वात्मसाक्षात्कारेणापवर्ग इति तस्यैकत्वभेदश्रुतीनामर्थ इत्यर्थः। किञ्चैतमकस्य [कस्य] चिद्व्यासादेः साधनानुष्ठानेन सम्भवन्त्यां मुक्तौ जगदेव मुच्येत; असम्भवत्यामतःपरमपि न सम्भवत्येव तच्चोद्यमस्मत्पक्षं नावगाहत इत्यभिप्रायेण स्वपक्षं निर्वक्ति न चेति (कं. ८८.१)।

---

१ °विशेषस्या–कं. १; कं. २। २ प्रकाशते इति न वाच्यम्–कं. १; कं. २। ३ इति दिक्–कं. १; कं. २। ४ संसारोच्छेदप्रसङ्गः–जे. ३। ५ ब्रह्माण्डलोके–कं. १; कं. २। ६ भेद–अ; ७ गौणार्था अन्याभि०–अ, ब, क; ८ अपरमित्तानाम्–अ, ब; ९ सन्ति ये इति–ब;

### प्रशस्तपादभाष्यम्

[95] पृथक्त्वमप्यत एव। [1]तथा चात्मेतिवचनात् परममहत्परिमाणम्। सन्निकर्षजत्वात् सुखादीनां संयोगः। [2]तद्विनाशकत्वाद्विभाग इति।

### न्यायकन्दली

[95] पृथक्त्वमप्यत एव। "नानात्मानो व्यवस्थातः" इति वचनादेव पृथक्त्वं सिद्धम्, सङ्ख्यानुविधायित्वात्पृथक्त्वस्येत्यभिप्रायः। तथा चात्मेतिवचनात्परममहत्परिमाणमिति। "विभववान् महानाकाश" "तथा चात्मा" (वै. सू. ७-१-२२) इति सूत्रकारवचनादाकाशवदात्मनोऽपि विभुत्वात् परममहत्परिमाणं सिद्धमित्यर्थः। विभुत्वञ्चात्मनो वह्नेरूर्ध्वज्वलनाद् वायोस्तिर्यग्[3]गमनादवगतम्। ते ह्यदृष्टकारिते। न च तदाश्रयेणासम्बद्धमदृष्टं तयोः कारणं भवितुमर्हति, अतिप्रसङ्गात्। न चात्मसमवेतस्यादृष्टस्य साक्षाद्द्रव्यान्तरसम्बन्धो घटत इति स्वाश्रयसम्बन्धद्वारेण तस्य सम्बन्ध [4]इत्यायातम्। ततः समस्तमूर्त्तद्रव्यसम्बन्धलक्षणमात्मनो विभुत्वं सिद्ध्यति। स्वभावत एव वह्नेरूर्ध्वज्वलनं [5]नादृष्टवशादिति चेत्? कोऽयं स्वभावो नाम? यदि वह्नित्वमुत दाहकत्वम्?

[टि०] [95] ननु युगपत्सर्वैर्मूर्तैः सह संयोगो विभुत्वं तत् कथमात्मनि सिद्धमित्याह विभुत्वं च इति। न च तदाश्रयेण इति:–तयोरूर्ध्वज्वलनतिर्यक्[6]पवनयोः। अनुमानं च आत्मा विभुः अणुत्वाभावे सति नित्यद्रव्यत्वात् गगनवत्। अणुत्वे शरीरस्य सर्व[7]स्याचैतन्यप्रसङ्गः। अनिन्धनप्रभवस्य इति:–अनिन्धनं मण्यादितेजः विद्युदाद्यबिन्धनम्।

[पं०] [95] तदाश्रयेणेति तयोरूर्ध्वज्वलनतिर्यक्पवनयोराश्रयेण वह्निवायुलक्षणेन। तयोरिति ऊर्ध्वज्वलनतिर्यक्पवनयोः। न च तदाश्रयेणासम्बद्धमदृष्टं तयोः कारणं भवितुमर्हतीति।

अत्राह कश्चित् तिलकभ्रामकलोहप्रमुखैर्व्यभिचार इति। नैवम्। तिलकभ्रामकलोहप्रमुखानां द्रव्यत्वात्। अदृष्टस्य च गुणत्वात्। द्रव्यान्तरसम्बन्ध इति वह्न्यादिसम्बन्धः। स्वाश्रयसम्बन्धद्वारेण तस्य सम्बन्ध इति[8] न्यायाविति तस्यादृष्टस्य वह्न्यादिना सह सम्बन्धो भवति। कथं? स्वाश्रयसम्बन्धद्वारेण। अयं भावः–अदृष्टमात्मन्याश्रितम्, आत्मा च विश्वव्यापीत्यतोऽदृष्टमपि तत्संबद्धत्वाद्विश्वव्यापि। अतो दूरे दूरतरेऽपि वह्न्यादिना सहादृष्टं

[कु०] [95] नन्वात्मा विभुः। वायोस्तिर्यग्गतिमत्वाद्वह्नेरूर्ध्वज्वलनादिति किं केन सम्बन्ध[यते] इत्यत आह ते हीति (कं. ८८.१२)। [9]स्वभाव एवेति (कं. ८८.१६) तदीयोष्णस्पर्शवत्कारणान्तरनिरपेक्षमित्यर्थः। स्वभावो नाम नियमस्य प्रयोजको धर्मः। स चेह तेजोजातिविशेषो वा, उष्णस्पर्शो वा रूपविशेषो वा, कारणविशेषो वा, अतीन्द्रियो वा कश्चिदितिविकल्प्य क्रमेण दूषयति को[य]मिति (कं. ८८.१६)।

---

१ तथात्मवचनात्–ता; तथा चात्मवचनात्–व्यो. (४१०)। २ तद्विनाशात्–ता। ३ पवनात्–कं. १; जे. १; जे. २। ४ इति न्याय्यम्–जे. ३। ५ नादृष्टादिति–कं. १; कं. २। ६ पवनयोर्वाऽनुमानं–ब; ७ स्य चैतन्य–अ, क; ८ इत्यात्तं–कं। ९ स्वभावत–कं. १; कं. २।

न्यायकन्दली

[1]रूपविशेषो वा ? तप्तायः[2]पिण्डे वह्नेरपि स्यात् । अथेन्धनविशेषप्रभवत्वं स्वभाव इति ? अनिन्धनप्रभवस्य विद्युदादिप्रभवस्य चोर्ध्वज्वलनं न स्यात् । अथातीन्द्रियः कोऽपि स्वभावः कासुचिद् व्यक्तिष्वस्ति यासामूर्ध्वज्वलनं दृश्यत इति, पुरुषगुणे कः प्रद्वेषः ? [3]यस्य हि कर्म्मणो गुरुत्वद्रवत्ववेगा न कारणं तस्यात्मविशेषगुणादुत्पादः, यथा पाणिकर्म्मणः पुरुषप्रयत्नात्, ऊर्ध्वज्वलन[4]तिर्य्यग्गमनादीनां कर्म्मणां गुरुत्वादयो न कारणमभावात्, तत्तत्कार्य्यविपरीतत्वाच्च । तस्मादेषामप्यात्मविशेषगुणादेवोत्पादो न्याय्यः । ऊर्ध्व-ज्वलनतिर्य्यक्[5]पवनान्यात्मविशेषगुणकृतानि गुरुत्वादिकारणाभावे सति कर्म्मत्वात् पुरुषप्रयत्नजपाणिकर्म्मवत् ।

सन्निकर्षजत्वात्सुखादीनां संयोगः । सुखादीनामात्मगुणानां मनःसंयोगजत्वादात्मनि संयोगः सिद्धः, व्यधिकरणस्यासमवायिकारणत्वाभावात् । तद्विनाशकत्वाद् विभाग इति । तस्य संयोगस्य विनाशकत्वाद् [6]विभागः सिद्धः, आत्ममनसोर्नित्यत्वेनाश्रयविनाशस्य

[टि०] तत्कार्यविपरीतत्वाद् इति -गुरुत्वकार्याद् अधःपतनाद् [7]वह्निवायुकर्मणी विपरीते । एवं व्याप्तिसिद्धावनुमान[8]यन्ति-ऊर्ध्वज्वलनेति:–ननूभयत्रापि वेगोऽस्तीति विशेषणा[9]सिद्धत्वम्? नैवम्, [10]वेगोत्पत्तौ कर्मणः कारणत्वान्नो[11]दनाद्यभावे च कर्मोत्पत्त्यभावात् तदभावे च वेगोत्पत्त्यभावात् । ॥ आत्मा ॥

[पं०] सम्बध्यते । स्वाश्रयसम्बन्धद्वारेण तस्य सम्बन्ध इत्यायातमित्यपि पाठः क्वचिद्दृश्यते । सोऽपि श्लाघीयान् । नादृष्टा-दिति चेदिति–नादृष्टवशादिति चेदिति द्वौ पाठौ स्तः । अर्थस्तुल्यः । तप्तायःपिण्डे वह्नेरपि स्यादिति कोऽर्थः ? तप्तायः-पिण्डवह्नेरप्यूर्ध्वज्वलनं प्राप्नोति । न च तस्योर्ध्वज्वलनमित्यर्थः । अनिन्धनप्रभावस्येति सूर्यकान्तादौ । पुरुषगुणे इति–

[कु०] कः श्रद्धेय इति धर्मिकल्पनातो वरं धर्मक[ल्प]नेत्यर्थः ।

गुरुत्वद्रवत्ववेगा इति (कं. ८८.२१) नोदनाभिघातयोरप्युपलक्षणम् । आत्मविशेषगुणादिति (कं. ८८.२१) स चात्मविशेषगुणो दृष्टान्तेषु प्रयत्नः । अग्न्यूर्ध्वज्वलनहेतुरदृष्टं स्वकार्यकर्माश्रयसंयुक्तसमवेतं व्यधि[करण] कर्महेतुगुणत्वात् विप्लवदातुकर्महेतुस्रोतवत इति विभुत्वानुमानं द्रष्टव्यम् ।

व्यधिकर[ण]स्येति (कं. ८८.२६) भावे वा यत्र कुत्रचिदन्त्यतन्तुयोगे सति रण्डाकार रण्डावस्थितेभ्योपि तन्तुभ्यः पट उत्पद्येतेति भावः । संयोगकार्यतया तावदवश्यं विनाशां [शः] । विनाशश्च विरोधिगुणाद्वा आश्रय-नाशाद्वेति द्वितीयगतिरित्याशयवानाह आत्ममनसोरिति (कं. ८९.१) ।

---

१ रूपादिविशेषो–जे. ३ । २ पिण्डे–कं. १; कं. २ । ३ यस्य कर्मणो–कं. १; कं. २ । ४ तिर्यक्पवनादीनां –कं. १. कं. २; जे. १, जे. २ । ५ पवनादीति–जे. ३ । ६ विभागसिद्धिः–जे. ३ । ७ वह्निर्वायु–अ; ८ –यति–अ, ब, क, ड; ९ सिद्धित्वम्–अ, ब, क; १० गोत्पत्तौ–अ; ११ नोद्यना–अ, ब, क;

प्रशस्तपादभाष्यम्

[96-97] [1]मनस्त्वयोगान्मनः । सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञान[2]सुखादीनामभूत्वोत्पत्तिदर्शनात् करणान्तरमनुमीयते ।

श्रोत्राद्य[3]व्यापारे [4]स्मृत्युत्पत्तिदर्शनाद् बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तर[5]भावाच्च ।

न्यायकन्दली

विनाशहेतोरभावादित्यर्थः । नन्वात्मनि नित्ये स्थिते नित्यात्मदर्शिनः सुखतृष्णापरिप्लुतस्य सुखसाधनेषु रागो दुःखसाधनेषु द्वेषस्ताभ्यां प्रवृत्तिनिवृत्ती ततो धर्म्माधर्म्मौ ततः संसार इत्यनिर्मोक्षः । नैरात्म्ये त्वहमेव नास्मि [6]कस्य सुखं दुःखमित्यनास्थया सर्वत्र रागद्वेषरहितस्य प्रवृत्त्यादेरभावे सत्यपवर्गो घटत इति चेन्न, नित्यात्म[7]दर्शनेऽपि विषयदोषदर्शनाद् वैराग्योत्पत्तिद्वारेण तस्योत्पत्तिरित्यलम् ।

[96] प्रधानत्वात् प्रथममात्मानमाख्याय तदनन्तरं मनोनिरूपणार्थमाह—मनस्त्वयोगान्मन इति । व्याख्यानं पूर्ववत् । [8]मनस्त्वं नाम सामान्यं मनोव्यक्तीनां भेदे स्थिते सत्यनुमेयम् ।

[टि०] [96] (॥ अथ मनोनिरूपणम् ॥)

[9]आत्मेन्द्रियार्थेति :—ननु शिला[10]शकलमङ्कुरं प्रत्यनु[11]त्पादकं त्वस्ति परं न [12]कारणान्तरसापेक्षमिति तेन व्यभिचारः ? सत्यम्, [13]यद्धि येन सामग्र्यां सत्यां जन्यते तत् तस्य कार्यं यथाऽङ्कुरो बीजस्य शिलाशकलेन

[पं०] अदृष्टे । **यस्य कर्मण इति** [य]स्या हि क्रियाया इत्यर्थः । **तत्कार्यविपरीतत्वाच्चेति** गुरुत्वकार्यादधःपतनाद्वह्निवायुकर्मणी विपरीते । बौद्धः प्राह—**नन्वात्मनीत्यादि । नित्यात्मदर्शिन इति** वैशेषिकस्य । **सुखतृष्णापरितस्येति**—**सुखतृष्णापरिप्लुतस्येति** द्वौ पाठौ । द्वेधाऽप्यदोषः । **तस्योत्पत्तिरिति**—मोक्षस्योत्पत्तिः ॥ छ ॥ इत्यात्मद्रव्यम् ॥

[96] **समानगुणकार्या इति** समानगुणाः कार्याणि यास्ताः समानगुणकार्याः । [14]**अपरसामान्ययोग इति**

[कु०] नन्वस्तु क्षणभङ्गनिराकरणादात्मनि प्रमाणसद्भावाच्च स्थिरात्मसिद्धिस्तथापि न तज्ज्ञानमपवर्गहेतुः प्रत्युत संसारमेव प्रतनोमीत्यतो नैरात्म्यदृष्टिरेवोपासनीयेति सौगतमाशङ्क्य दूषयति नन्विति (कं- ८९.२) ॥

[इत्यात्मनिरूपणम] । × × ×

[96] ये भोग्यस्य भोक्तुश्च निरूपणानन्तरं भोगाय करणं प्राप्तमित्यभिप्रायेण सङ्गतिं करोति **प्रधानत्वादिति** (कं. ९०.१) । ननु पृथिवीत्वादिवन्मनस्त्वं नाम सामान्यं प्रत्यक्षं न प्रतीयते, नातः सिद्धं मनस्त्वमित्यत आह

१ मनस्त्वाभिसम्बन्धान्मनः—कि. दे । २ सुखदुःखानाम्—ता; दे; व्यो. (४२४) । ३ व्यापारे च—ता । ४ स्मृतेरुत्पत्ति—दे । ५ भावाच्चान्तःकरणम्—कं. १; कं. २; कि.—भावाच्चेति—दे । ६ कस्य दुःखमित्यनास्थायां—कं. १; कं. २ । ७ दर्शिनोऽपि—कं. १; कं. २ । ८ मनस्त्वं सामान्यं—जे. २; जे. ३ । ९ आत्मा इन्द्रियार्थेति—अ, ब; १० सकल—क; ११ त्पादकमस्ति—अ, ब, क; त्पादक तु मस्ति—ड, किन्तु – त्पादकं नास्ति इत्येव सत्यः पाठः । १२ करणा—क; १३ यद्विषयेण—अ, ब, क; १४ परसामा॰—कं. ।

न्यायकन्दली

**या हि समानगुणकार्य्या व्यक्तयस्ता[1]स्वपरं सामान्यं दृष्टं यथा घटादिषु, समानगुणकार्य्याश्च मनोव्यक्तयस्तस्मा[2]त्तास्वपरसामान्ययोगः। असिद्धे मनसि तस्य धर्म्मनिरूपणमन्याय्यमिति मत्वा तस्य सद्भावे प्रमाणमाह–सत्यप्यात्मेन्द्रियार्थसान्निध्ये इति। आत्मन[3]स्तावत् सर्वगतत्वात् सर्वेन्द्रियैर्युगपत्सम्बन्धोऽस्त्येव, इन्द्रियाणामपि सन्निहितैरर्थैः सन्निकर्षो भवति, तथाप्येकस्मिन् विषये प्रतीयमाने विषयान्तरे ज्ञानसुखादयो न भवन्ति, तदुपरमाच्च भवन्तीति दृश्यते, तद्दर्शनादात्मेन्द्रियार्थसन्निकर्षेभ्यः करणान्तरमनुमीयते यस्य सन्निधानाज्ज्ञा[4]नसुखादीनामुत्पत्तिः, असन्निधानाच्चानुत्पत्तिः। आत्मेन्द्रियार्थसन्निकर्षाः कार्य्योत्पत्तौ करणान्तरसापेक्षाः, सत्यपि सद्भावे कार्य्यानुत्पादकत्वात् तन्त्वादिवत्, यच्च तदपेक्षणीयं तन्मनः। एकार्थोपलब्धिकालेऽनुपलभ्यमानस्याप्यर्थान्त-**

[**टि०**] [5]तु कदाचिदपि नाङ्कुरो जन्यते, इत्यङ्कुरस्य शिलाशकलकार्यत्वाभावात् कार्यानुत्पादक[6]हेतोः शिलाशकले विपक्षे [7]गमनाभावान्न व्यभिचारः। **रूपोपलब्धिकाले** इति–[8]इन्द्रियाणामतीन्द्रियत्वात् तैः [9]सह युगपत्सन्निहितानां [10]विषयाणां संयोगोऽप्यतीन्द्रियोऽधिष्ठानसंयोग एव तु प्रत्यक्ष इत्यधिष्ठानसंयोगेनेन्द्रिय[11]संयोगोऽनुमितः। अत्र च विशेषाविवक्षया सन्निकर्षमात्रं [12]साध्यते तेन वर्त्यधोभागे सन्निहितायाः अङ्गुल्या दीपकलिकया सह चक्षुर्गोलक[13]सन्निहितस्य [14]चाञ्जनस्य चक्षुरिन्द्रियेण सह संयुक्तसंयोगरूपेऽपि [15][सन्निकर्षे न दोषः। अन्यथा तु गन्धादीनां घ्राणादिभिः सह संयुक्तसमवायरूपेण सन्निकृष्टत्वात्] संयुक्तसंयोग[संयोग]रूपसन्निकर्षाभ्यां व्यभिचारः स्यात्।

मनःसद्भावे प्रमाणान्तरं [दर्शयति] **स्मृतिस्तावद्** इति। [16]नन्वनुमानज्ञानं [17]स्वप्नज्ञानं च ज्ञानं भवति,

[**पं०**] मनस्त्वयोगः। **तदुपरमाच्चेति**–एकविषयप्रतीत्युपरमाच्च। **तद्दर्शनादिति** ज्ञानसुखोत्पत्तिदर्शनात्। **तन्त्वादिवदिति** यथा केवलास्तन्त्वादयो न कार्योत्पादकाः किन्तु तन्तुसंयोगापेक्षाः, एवमत्र मनःसंयोगमपेक्षन्तेऽऽत्मेन्द्रियसन्निकर्षाः। **तन्मन इति** असमवायिकारणभूतम्। **उपलभ्यमानगन्धादिवदिति** यथा गन्धाद्युपलब्धिकाले गन्धादिभिः सहात्म[म]नः

[**कु०**] **मनस्त्वं नामेति** (कं. ९०.२)। [18](न) **तस्य धर्मनिरूपणमिति** (कं. ९०.५)। इतरव्यवच्छेदरूपसाध्यधर्मनिरूपणमसिद्धे धर्मिणि न युक्तमिति भावः। **सत्यपीति** (कं. ९०.६) अत्र कार्यशब्देन कदाचिदिति गम्यते। तेन सर्वथाङ्कुरकार्यानुत्पादके शिलादौ न व्यभिचारः। न हि तेन कदाचिदप्यङ्कुरादिकं [ज]न्यते।

---

१, २ तासु परं–कं. १; कं. २। ३ स्तावत्सर्वेन्द्रियैः–कं. १; कं. २। ४ ज्ञानादीनां–जे. १; जे. २; जे. ३। ५ तु अबकपुस्तकेषु नास्ति। ६ कस्य हेतोः–अ, ब, क; ७ गमनात् मवात्र–अ, ब, क; ८ इन्द्रियाणि–अ, ब इन्द्रियाण–क; ९ सहा–अ, ब, क; १० विषयाणि–अ, ब; ११ संयोगा–अ; १२ साध्यन्ते तेन–अ, ब, क; १३ मभिनिहितस्य–अ, ब, क; १४ 'चाञ्जनस्य' इति अबपुस्तकयोर्नास्ति। १५ [ ] एतच्चिह्नान्तर्गतः पाठः अबकपुस्तकेषु आवृत्तः। १६ नन्वनुमान–अ, ब, क; १७ स्वप्नं ज्ञानं भवति–अ; १८ अत्र कन्दल्यां 'तस्य धर्मनिरूपणम्' इति पाठः अत्र तु 'न' इत्यधिकः, 'धर्मनिरूपणमतमिति' च पाठः अत्र 'मत' इत्यधिकं भाति इति शुद्धः पाठः स्थापितः –सं.।

### न्यायकन्दली

रस्येन्द्रियसन्निकर्षोऽस्तीति किं प्रमाणम्? इन्द्रियाधिष्ठानसन्निधिरेव। रूपोपलब्धिकाले गन्धादयोऽपि घ्राणादिभिः सन्निकृष्यन्ते, तदधिष्ठानसन्निहितत्वादुपलभ्यमानगन्धादिवत्।

प्रमाणान्तरमप्याह–श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनादिति। स्मृतिस्तावदिन्द्रियजा ज्ञानत्वाद् गन्धादिज्ञानवत्, न चास्याः श्रोत्रादीनि करणानि, बधिरादीनां [1]श्रोत्रादिव्यापाराभावे तस्या उत्पत्तिदर्शनात्। तस्माद्यदस्याः करणमिन्द्रियं तन्मनः। न केवलं पूर्वस्मात्कारणात् करणान्तरानुमानं बाह्येन्द्रियैश्चक्षुरादिभिरगृहीतानां सुखादीनां रूपाद्यपेक्षया [2]ग्राह्यान्तरभावाच्च तदनुमानमित्याह–बाह्येन्द्रियैरिति। सुखादिप्रतीति-

[टि॰] नन्विन्द्रियजमित्यनेकान्तः? सत्यम्, इन्द्रियलक्षणाक्रान्तत्वेन मनसोऽपीन्द्रियजन्येत्युक्तम्। अभिप्रायीकृतं तु [3]करणसाध्येति तेन न व्यभिचारः। स्वप्नज्ञानं प्रति तु [4]करणान्तरस्यादर्शनात्, तस्यापि मनोजन्यत्वेन पक्षाभि[5]मतत्वात्। अस्मदाद्यपरोक्षज्ञानत्वादिति वा कार्यम्। ईश्वरज्ञानव्यवच्छेदार्थमस्मदादीति। सुखादिः [6]प्रतीतिः [इति] विवादाध्यासितेति कर्तव्यम्, तेनेश्वरस्यास्मदादिसुखप्रतीत्याऽनिन्द्रियजन्यया पुत्रसुखप्रतीत्या च [7]तन्मुखप्रसादाद्यनुमित्या न भागासिद्धिः।

अभिन्नकारणत्वाद् इति–यद्येनाभिन्नहेतुकं [8]तज्जातीयं यथा घटाद् घटान्तरम्। विज्ञानेनाभिन्नहेतुकं च सुखादिकमित्यत्र प्रतिकूलतर्कमाह ज्ञानस्वभावत्वे इति–एक[9]स्वभावत्वे भेदायोगात्। न तु धवत्वशिंशपात्वयोर्भेदोऽपि [10][यथा वृक्षात्मताया उभयसाधारणत्वात् [11][[तदेकात्मकत्वं तथा सुखदुःखाकारयोर्भेदेऽपि] बोधात्मतायाः साधारणत्वात्]] तदेकस्वभावता भविष्यतीति बौद्धोत्तरमाशङ्क्य आह–[12]बोधाकारस्य इति। [13]बुद्धेर्विषयभेदमन्तरेण

[पं॰] सन्निकर्षः। इन्द्रियजा इति मनोजाः। श्रोत्रादिकारणभावे इति–श्रोत्रादिव्यापाराभावे इति द्वौ पाठौ स्तः। तत्र व्यापाराभावादित्यत्र। तत्र = सुखादिप्रतीतौ। अभिन्नकारणत्वादिति ज्ञानस्य सुखादीनां चात्मैव समवायिकारणम्। ज्ञानात्मकाः सुखादय इति। तदतद्रूपिणो भावास्तदतद्रूपहेतवः।

[कु॰] इन्द्रियाणामतीन्द्रियतया सन्दिग्धविशेषणासिद्धिमाशङ्क्य परिहरति एकेति (कं. ९०.१२)। रूपोपलब्धिकाल इति (कं. ९०.१४) अत्र विभता इति पक्षविशेषाध्याहारान्न कालात्ययापदिष्टत्वमसिद्धा[त्वं] च। [14]ज्ञानादिति (कं. ९०.१४) अलौकिकत्वे सतीति विशेषणाध्याहारान्नानुमितौ व्यभिचारः। सौगतमतेन सुखादिव्यतिरिक्ता यास्तत्प्रतीतेराश्रयस्यासिद्धिमाशङ्कते–अभिन्नकारणत्वादिति (कं. ९०.२२)। सुखदुःखयोर्जात्या परस्परमभेदो [न] वा आद्ये प्रत्यक्षविरोध इत्याह नेति (कं. ९०.२३)। द्वितीये तु भिन्नयोरभिन्नेन(न्नेन) सह तादात्म्यमनुपपन्नमित्याह परस्परेति (कं. ९०.२४)।

---

१ श्रोत्रादिकरणाभावे–जे. ३। २ ग्राह्यान्तराणां–कं. १; कं. २; जे. १; जे. २। ३ साध्येत्युक्तं–अ, ब, क; ४ कारणा–अ, ब, क; ५ मतम्–अ; ६ प्रपीति–अ, ब, क, प्रतीतीति–ड; ७ च मुखप्रसादा–ड; ८ तत्सजातीयं–अ, ब, क; ९ स्वभावे–अ; १० [ ] एतच्चिह्नान्तर्गतः पाठः ड पुस्तके नास्ति। ११ [[ ]] एतच्चिह्नान्तर्गतः पाठः अ पुस्तके नास्ति। १२ बोधाधिकारस्य–अ, ब, क; १३ युद्धेर्वि–अ, ब; १४ ज्ञानत्वाद्–मु. कं।

न्यायकन्दली

रिन्द्रियजा, अपरोक्षप्रतीतित्वाद् रूपादिप्रतीतिवत्, यच्च तदिन्द्रियं तन्मनः, चक्षुरादीनां तत्र व्यापाराभावात्। अभिन्नकारणत्वाज्ज्ञानात्मकाः सुखादयः [1]स्वसंवेद(ना) न करणान्तरेण गृह्यन्ते इति चेन्न, ज्ञानस्वभावत्वे सुखदुःखयोरविशेषप्रसङ्गात्। [2]परस्परभेदे च न तयोर्ज्ञानात्मकता, बोधाकारस्योभयसाधारणत्वेऽपि सुखदुःखाकारयोः परस्परव्यावृत्तत्वात्। न चानयोर्विज्ञानाभिन्नहेतुजत्वम्, ज्ञानस्या[3]र्थादुत्पत्तेः, तस्माच्च वासनासहायात् सुखदुःखयोरुत्पादात्, अन्यथोपेक्षाज्ञानाभावप्रसङ्गात्। न च स्वसंवेदनं विज्ञानमित्यपि सिद्धम्, एकस्य कर्म्मकरणादिभावे दृष्टान्ताभावात्, स्वप्रकाशः प्रदीपोऽस्ति दृष्टान्त इति चेन्नैवम्, सोऽपि हि पुरुषेण ज्ञायते [4]ज्ञाप्यते च चक्षुषा।

[टि०] एकस्वभावत्वे [5][भेदाभावाद् [सुख]दुःखरूपग्राह्यस्यानङ्गीकारात्] भेदायोगाच्च वृक्षत्वशिंशपात्वेऽपि भिन्ने सामान्ये स्वीक्रियते न त्वेकस्वभावे इति। अभिन्नहेतुकत्वं चैकदेशापेक्षया वा सामग्र्यापेक्षया वा? आद्ये घटपुञ्जात् घटपुञ्जोत्पत्तौ सर्वेषां रूपरसगन्धादिभिर्व्यभिचारः। द्वितीये तु प्राह न चानयो इति। तस्माच्च इतिः–ज्ञायमानादर्थात्। [6]यदि तु वासनामन्तरेण विषयमात्रादेव सुखाद्युत्पत्तिः स्यात्तदा मुनेरपि सुखादिज्ञानं स्यात्, [7]न तूपेक्षाज्ञानमिति एतद् दर्शयति– [8]अन्यथोपेक्षा इति।

स्वसंवेदनत्वे च सौत्रान्तिका अनुमानयन्ति–यत्प्रकाशकं तत्स्वप्रकाशे परानपेक्षं यथा [9]प्रदीपः, प्रकाशकं च ज्ञानमिति। [10]परप्रकाशस्यापि प्रकाशकत्वे घटादेरपि प्रकाशकत्वप्रसङ्ग इति, तत्राह न च [11]स्वसंवेदनम् इत्यादि।

[पं०] न सुखादिपरिज्ञानं विज्ञानाभिन्नहेतुजमिति धर्मकीर्तिवचनात्, बोधाकारत्वेनाभेदः सुखदुःखयोरिति चेदाह– बोधाकारस्योभयसाधारणत्वेऽपीत्यादि। परस्परव्यावृत्तत्वादिति यथा वृक्षत्वेनाभेदेऽपि धवखदिरयोर्धवत्वखदिरत्वाभ्यां भेदस्तथाऽत्रापि। ततश्च भेदे सत्यनयोः कथं ज्ञानात्मतेत्यर्थः तस्माच्चेति–ज्ञानाच्च। अन्यथोपेक्षाज्ञानाभावप्रसङ्गादिति

[कु०] ननु ज्ञानत्वं सामान्यं सुखदुःखे तु तद्विशेष्यौ[षौ] भविष्यत इत्यत आह बोधेति (कं. १०.२५)। उभयोः सुखदुःखजन्मनि बोधाकारस्य वस्त्वंतरस्य प्रतीतौ सत्यामेव[त]द्विलक्षणयोः परमनुकूलतया व्यावृत्तस्याः(स्य) प्रत्यक्षसिद्धत्वात्सामान्यविशेषभावोऽपि न सङ्गच्छत इति भावः। तस्मादिति (कं. १०.२६) वासना रागद्वेषौ तत्सहायादर्थात् सुखदुःखयोरुत्पत्तिरितरथा हेमन्तेऽपि चन्दनस्पर्श(ः) सुखं स्यात् वीतरागस्यापि कामिनीस्पर्शसुखं स्यात्। एतदेवाह–[12]अन्यथेति–(कं. १०.२७)। सुखादीनां विज्ञानाद्भेदे सिद्धे स्वयंप्रकाशत्वेऽपि सुखदुःखाद्युपलब्धिकरणतया मनः सिद्ध्यत्येव तथापि प्रसक्तं परमतं निरस्यति न चेति (कं. १०.२७)। कर्मकरणादिशब्देन क्रियादि गृह्यते।

---

१ सुखसंवेदनानि न कारणान्तरेण–कं. १; (च) न कारणान्तरेण–कं. २; स्वयंवेदनान्तःकरणेन–जे. २। २ परस्परभेदेन च–जे. २; परस्परभेदे तु–जे. ३। ३ °स्यार्थाकारा°–कं. १; कं. २। ४ ज्ञाप्यते चक्षुषा–कं. १; कं. २। ५ [ ] एतच्चिह्नान्तर्गतः पाठः अबक पुस्तकेषु नास्ति। ६ यदि वासना–अ; ७ तत्–ड; ८ अन्यापेक्षेति–अ, ब; ९ प्रदीपप्रकाशकं–अ, ब; १० परप्रकाशस्यापि–अ, ब; ११ स्वे संवेदनम्–अ; १२ अन्यथेपि आदर्शपुस्तके।

## न्यायकन्दली

**ज्ञानञ्च तस्य क्रिया, [1]न तु स्वयं करणं कर्त्ता कर्म्म क्रिया च भवति। यथात्मवादिनां स्वप्रतीतावात्मना युगपत्कर्म्मकर्त्तृभावः, तथा ज्ञानस्यापि करणादिभाव इति चेन्न, अविरोधात्, ज्ञानक्रियाविषयत्वं कर्म्मत्वमात्मनस्तस्यामेव च [2]स्वातन्त्र्यात् कर्तृत्वम्, न स्वातन्त्र्यविषयत्वयोरस्ति विरोधः। करणत्वं क्रियात्वन्तु सिद्धसाध्यत्वाभ्यामेकस्य परस्परविरुद्धम्, कारणकरणयोरेकत्वाभावात्। एवं परप्रयोज्यता करणत्वमितरा-[3]प्रयोज्यत्वं च कर्त्तृत्वमित्यनयोरपि विरोधः, विधिप्रतिषेधस्वभावत्वादित्यतो नैषामेकत्र सम्भवो युक्तः।**

[टि०] तदेव ज्ञानं प्रकाश्यत्वात्कर्म लाक्षणिकाभिप्रायेण धात्वर्थत्वात्। ज्ञानस्य क्रियात्वे क्रियायाश्च करणसाध्यत्वे तदेव करणं करणान्तरानभ्युपगमात्। आदिशब्दात् कर्तृत्वं च क्रियात्वं चेति। ननु पुरुषेण ताव[4]त्तेनैव प्रदीपेन कृत्वा स एव प्रदीपो दृश्यते इति दृष्टान्ते एकस्य कर्मकरणताऽस्त्येवेत्याशङ्कते **स्वप्रकाश** इति। दीपो हि तदा [5]कर्मैव वस्तु स्वा[6]भाव्याच्च घटादिवन्न चक्षुर्व्यतिरिक्तालोका[7]पेक्षाऽभाववत्। **करणत्वं क्रियात्वं तु** इतिः–अनिष्पन्नाक्रियानिष्पाद-कत्वात्करणं सिद्धं क्रिया तु करणनिष्पाद्यत्वात्साध्या।

[पं०]–कोऽर्थः? यदि स्त्र्यादिदर्शनमात्रेणैव सुखादयः स्युः, तदा मुनीनामुपेक्षाबुद्धिर्न स्यादित्यर्थः। **यथाऽऽत्मवादिनामिति–यथाऽऽत्मवेदिनामिति** द्वौ पाठौ। **तस्यामेवेति** ज्ञानक्रियायामेव। **सिद्धसाध्यत्वाभ्यामिति** निष्पन्नक्रियासंपादनात्करणं सिद्धम्। क्रिया तु साध्या करणनिष्पाद्यत्वात्। **एकस्येति**–ज्ञानस्य। **अनयोरपीति**–करणकर्त्रोरपि। **नैषामेकत्र संभवो युक्त इति** कोऽर्थः? कार्यकारणयोः करणकर्त्रो[8]श्चैकत्र ज्ञाने संभवो न युक्त इत्यर्थः।

[कु०] न [1]तु **स्वयं करणमिति** (कं. ९१.२) नत्वालोकासहकृतस्य चक्षुषः करणत्वात् प्रदीपः **करणकोटौ निविशत** इति चेन्न, अकर्मभूतस्यैव तमोमण्डलैकदेशस्य करणशरीरानुप्रवेशित्वाद्। **यथात्मवादिनामिति** (कं. ९१.२) ज्ञानमिति ज्ञानव्यतिरिक्तात्मवादिनामित्यर्थः। **युग[प]त्कर्मकर्तृभाव इति** (कं. ९१.३) यद्यपि परसमवेतक्रियाफलशालि कर्म इति कर्मलक्षणपर्यालोचन[9]या नात्मनः कर्मत्वं तथापि करणव्यापारविषयः(यं) कर्म इति लक्षणानुसाराश्च दोषः।

[10]**न च विषयस्येति** (कं. ९१.५) उभयोरपि सिद्धवस्तुधर्मत्वादिति भावः। [11]**कार्यकरणयोरिति** (कं. ९१.६) **कार्यानुकूलव्यापाराद्धि** करणं तदा च नियमेन कार्यं न प्रागभाव इति तयोरेकत्वं प्रमाणाबाधितमित्यर्थः।

---

१ न च–कं. १; कं. २। २ स्वातन्त्र्यं–जे. १; जे. २; जे. ३। ३ प्रयोज्यत्वं कर्तृत्वम्–कं. १, कं. २; जे. १; जे. २। ४ तेनेव–अ; ५ कर्मैव–अ, ब, क; ६ भाव्याच्च न–अ, ब, क; ७ पेक्षाभाववत्–ड; ८ च–मु. कं.। ९ ना–आदर्शपुस्तके। १० न च स्वातन्त्र्यविषयत्वयोः–कं। ११ कारणकरणयोः–कं., कार्यकारणयोः–पा. ३ पू.।

न्यायकन्दली

[97] अथ मतं न ज्ञानस्य [1]करणादिभावः स्वसंवेदनार्थः, किन्तु स्वप्रकाशस्वभावस्य तस्योत्पत्तिरेव स्वसंवेदनमिति। अत्रापि निरूप्यते किं तदर्थस्य प्रकाशः ? स्वस्य वा ? यद्यर्थस्य प्रकाशः, [2]तदुत्पत्तेरर्थस्य संवेदनं स्यान्न तु स्वस्येति [3]स्वस्यासंवेद्यतादोषः। अथेदं स्वस्य प्रकाशः, तदेव प्रकाश्यं प्रकाशश्चेति क्रियाकरणयोरेकत्वं तदवस्थम्। न च स्वोत्पत्तिरेव स्वात्मनि क्रियेत्यपि निदर्शनमस्ति। यदपि स्वसंवेदनसिद्धौ प्रमाणमुक्तं यद्यदायत्तप्रकाशं तत्तस्मिन् प्रकाशमाने प्रकाशते, यथा प्रदीपायत्तप्रकाशो घटो ज्ञानायत्तप्रकाशाश्च रूपादय इति। तत्रापि यदि ज्ञानमेवार्थप्रकाशोऽभिमतः, तदा [4]तदायत्तप्रकाशा रूपादय इत्यसिद्धमनैकान्तिकञ्चेन्द्रियेण। [5]अथ च [7]ज्ञानजन्योऽर्थप्रकाशो न तु [6]ज्ञानमेवार्थप्रकाशस्तदा दृष्टान्ताभावः, ज्ञानजनकस्य प्रदीपस्यार्थप्रकाशकत्वाभावात्। एतेनैतदपि प्रत्युक्तम्–

[टि०] [97] अथेदं स्वस्य प्रकाश इत्यादि दूषणं स्वपरप्रकाशत्वेऽपि तस्याङ्गीक्रियमाणे समानम्। ननूत्पत्तिरेव तस्य क्रियेति न पूर्वोक्तो दोष इत्याह *न चास्योत्पत्तिः इति। निदर्शनं दृष्टान्तो नास्ति। यद्यदायत्तेति :–यद् घटादिकं यस्य ज्ञानस्यायत्तप्रकाशं तद् घटादिकम्, तस्मिन् इति ज्ञाते। अत्र प्रकाशशब्दं विकल्प्य दूषयति तत्रापि यदि इत्यादि। ज्ञानायत्तः प्रकाशो ज्ञानं येषामिति हि कृते एकं तावत्पदार्थज्ञानं प्रकाशरूपं मन्तव्यम्, यस्य च ज्ञानस्य तत्प्रकाशरूपं ज्ञानमायत्तं तद् द्वितीयं मन्तव्यम्, एवं चासिद्धं ज्ञानद्वयस्यास्वीकारात्। इन्द्रियायत्तप्रकाशाश्च घटादय

[पं०] [97] तदिति–ज्ञानम्। अर्थस्येति–घटादेः। तस्यासंवेद्यतादोष इति तस्य ज्ञानस्य संवेद्यतादोषः प्राप्नोतीत्यर्थः। अथेदमिति–अत्रेदं ज्ञानम्। न च स्वोत्पत्तिरेव स्वात्मनि क्रियेत्यपि निदर्शनमस्तीति स्वोत्पत्तिरेव स्वात्मनि क्रियेत्यत्रापि किञ्चिन्निदर्शनं नास्तीत्यर्थः। प्रमाणमुक्तमिति बौद्धैः। अनैकान्तिकं चेन्द्रियेणेति–इन्द्रियं हि रूपादीन्प्रकाशयति। न च तेषु प्रकाशमानेषु तत्प्रकाशते। अतीन्द्रियत्वात्। अथ ज्ञानजन्योऽर्थप्रकाशो न तु ज्ञानमेवार्थप्रकाशस्तदा दृष्टान्ताभावः, ज्ञानजनकस्य प्रदीपस्यार्थप्रकाशत्वाभावादिति–अस्य वाक्यस्यायमर्थः–य एव ज्ञानजन्यो भवति स एवार्थप्रकाशरूपः। प्रदीपश्च ज्ञानजनकस्तस्यार्थप्रकाश[स्य]त्वासंभवः। तस्मात्प्रदीपायत्तप्रकाशो घट(?) इति दृष्टान्तो न घटते। अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यतीति–अघटं सूत्रमेतत्। व्याख्या–अप्रत्यक्षेणाप्रति-

[कु०][97] अत्रापि निरूप्यत इति (कं. ९१.१०) स्वश्चासौ प्रकाशश्चेति स्वप्रकाश इति बौद्ध(?) स(स्व)प्रकाश इत वेत्याशयेन विकल्प्यत इत्यर्थः। न च स्वोत्पत्तिरेव, सिद्धास्यैव क्रिया[वि]षयत्वादिति भावः। असिद्धमिति (कं. ९१.१६)–ज्ञानव्यतिरेकेण तदायत्तप्रकाशाभाव इत्यर्थः। अथ ज्ञानजन्यमिति (कं. ९१.१६) प्राकट्यमित्यर्थः। दृष्टान्ताभाव इति (कं. ९१.१७) साधनविकलत्वादिति शेषः। प्रदीपेन ग्राह्यं न जन्यते यतस्तदेवाह–ज्ञानजनकस्येति (९१.१७)। अर्थप्रकाशकत्वाभावात् (कं. ९१.१८) प्राकट्यजनकत्वाभावादित्यर्थः।

---

१ करणाद्यभावः–कं. १; कं. २; जे. २;। २ तदुत्पत्ति–जे. १; जे. ३। ३ तस्यां–कं. १; कं. २; जे. ३।
४ ज्ञानायत्त–जे. १; जे. ३। ५ अथ ज्ञान–जे. १; जे. ३। ६ ज्ञानमेव तदा–जे. १; जे. ३।
* न च स्वोत्पत्तिरिति मूलपाठः। ७ अथ च ज्ञानजन्यो–कं।

न्यायकन्दली

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्धचति" इति ।

नहि ज्ञानस्य प्रत्यक्षताऽर्थस्य दर्शनम्, किन्तु विज्ञानस्योत्पत्तिः, तत्रासंविदितेऽपि ज्ञाने तदुत्पत्तिमात्रेणैवार्थस्य संवेदनं सिद्धचति । कथमन्यस्योत्पत्तिरन्यस्य संवेदनमिति चेत् ? किं कुर्मो वस्तुस्वभावत्वात् । न चैवं सति सर्वस्य संवेदनम् ? तस्य स्वकारणसामग्रीनियमात् प्रतिनियतार्थसंवित्तिस्वभावस्य प्रतिनियतप्रतिपत्तृसंवेद्यस्यैव चोत्पादात् ।

अपरे पुनरेवमाहुः—ज्ञानसंसर्गाद्विषये प्रकाशमाने [1]प्रकाशस्वभावत्वात् प्रदीपवद्विज्ञानं प्रकाशते, प्रकाशाश्रयत्वात् प्रदीपवर्तिवदात्माऽपि प्रकाशत इति त्रिपुटीप्रत्यक्षतेति ।

[टि०] इन्द्रियेऽप्रकाश्यमानेऽपि प्रकाशन्ते । इन्द्रियाणामतीन्द्रियत्वादित्यनेकान्तः । ज्ञानमेव नार्थप्रकाशः किन्तु ज्ञानजन्योऽर्थप्रतिभासो नाम कार्यान्तरमिति नासिद्धतादोष इत्याशङ्क्य ततो दूषयति [2]अर्थज्ञानजन्योऽर्थेति । अर्थस्य हि ज्ञानमेव प्रकाशकं तत्रैवार्थप्रतिभासनात् । प्रदीपादिना तु ज्ञानमेव जन्यते तत्वर्थः प्रकाश्यते इति । [3][अप्रत्यक्षेति [4]अप्रत्यक्षेणाप्रतिभासमानेन जडेनोपलम्भेन कथमर्थो [5]दृश्यते ।] अप्रत्यक्षोपलम्भस्येति कर्मधारयः ।

[पं०] भासमानेन जडेनोपलंभेन कथमर्थो दृश्यते । अयं कर्मधारयः । अप्रत्यक्षश्चासौ उपलम्भश्च । अप्रत्यक्षोपलम्भस्यापरोक्षज्ञानस्येत्यर्थः । तदुत्पत्तिमात्रेणैवेति ज्ञानोत्पत्तिमात्रेणैव । अन्यस्योत्पत्तिरिति ज्ञानस्योत्पत्तिः । अन्यस्य संवेदनमिति—अर्थस्य संवेदनम् ।

अपरे इति प्राभाकराः । ज्ञानसंसर्गादिति—ज्ञानेन सह ग्राह्यग्राहकभावलक्षणसम्बन्धात् । त्रिपुटीप्रत्यक्षतेति—ज्ञेयज्ञानज्ञातृरूपा । [6]पाण्डुदास इति ग्रन्थकृच्छिष्यनाम । ज्ञातृज्ञानयोरप्रतिभासनादिति कोऽर्थः ? केवलं घटाख्यं ज्ञेयमेव प्रकाशते । अनयोरिति ज्ञातृज्ञानयोः । ज्ञातृज्ञानविशिष्टार्थस्येति—घटाख्यस्य । एकोपलम्भव्यासक्तेनेति—मनसा । अनेकार्थप्रतिभास इति द्वित्वाद्यर्थप्रतिभासः । प्रत्यर्थबुद्धिभेदेऽभ्युपगम्यमाने पुष्पितास्तरव इति बहुत्वसंख्याविशिष्टः प्रत्ययो न स्यात् । कुत इत्याह—बुद्धिभेद एव तु न तथा प्रतिभास इत्यादि । तासामिति—बुद्धीनाम् । [7]तत्कार्याविच्छाप्रयत्नाविति बुद्धिपूर्वको इच्छाप्रयत्नावप्यनेकविषयौ इत्यर्थः । विभवादिति—व्यापकत्वात् । तदभावादिति व्यापकत्वाभावात् । नित्यद्रव्यगतस्य विभवाभावस्याणुपरिमाणत्वाव्यभिचारादिति—अन्येषु नित्यद्रव्येषु विभव एवास्ति, अत्र मनसि नित्यद्रव्यत्वं विभवाभावश्चात एव परमाणुपरिमाणत्वं सिद्धमिति भावना । अथ कथमित्यादि परः प्रश्नः । श्रीधरः प्राह—न भवन्ति तावदिति । व्योमशिवमुद्दिश्याह अनेनात्ममनःसंयोगस्यैकस्येत्यादि—अत्रानेनेति मनसा । समानमेतद्विभुत्वेऽपि मनस इति—आत्मना संयोग एक एव, अतो नाणुत्वसिद्धौ कारणं वाच्यमिति व्योमशिवेन ।

[कु०] अर्थदृष्टिस्तद्विषयज्ञानप्रत्यक्षत्वा[त्वं] वा प्रत्यक्षो [प]जन्यमर्थारं[भो] वा ? नाद्य इत्याह तर्हि ज्ञानार्थयोरभिन्नत्वादिति शेषः । न द्वितीय इत्याह किन्त्विति (कं. ९१.१९) तज्जन्यार्थान्तरे प्रमाणाभावादिति शेषः । किं कुर्म इति (कं. ९१.२१) स्वयं प्रकाशत्वाङ्गीकारे विषयप्रतिपत्तिनियमयोः कारणे पृष्टे स्वभावावलम्बनेनोत्तरं वक्तव्यमित्यर्थः । [8]प्रतिनियतप्रतिपत्तृसंवेद्यस्येति (कं. ९१.२३) प्रति[न]यतं प्रतिपत्तृकं संवेद्यं यस्य विज्ञानस्येति

१ प्रकाशकत्वात्—जे. ३ । २ अथ च—मु. अथ—जे. १, जे. ३ । ३ [ ] एतच्चिह्नान्तर्गतः पाठः अ पुस्तके नास्ति । ४ अप्रत्यक्षे प्रतिभास—ब; ५ दृश्यते इति अबकपुस्तकेषु पाठः । ६ प्रतीकमिदं कं. पुस्तके नास्ति । ७ तथा तत्कार्या—अ; तत्कारणा—कं । ८ प्रतीपमियतमपतिपतृसंवेद्यस्येति—न्या. कु. आदर्शपुस्तके ।

### प्रशस्तपादभाष्यम्

[98] तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व[1]संस्काराः । प्रयत्नज्ञानायौगपद्यवचनात्प्रतिशरीरमेकत्वं सिद्धम् । पृथक्त्वमप्यत एव । तदभाववचनादणुपरिमाणम् । अपसर्पणोपसर्पणवचनात्संयोगविभागौ । मूर्तत्वात्परत्वापरत्वे संस्कारश्च ।

### न्यायकन्दली

तदप्यसत्, घटोऽयमित्येतस्मिन् प्रतीयमाने ज्ञातृज्ञानयोरप्रतिभासनात् । यत्र त्वनयोः प्रतिभासो घटमहं जानामीति, तत्रोत्पन्ने ज्ञाने ज्ञातृज्ञानविशिष्टस्यार्थस्य मानसप्रत्यक्षता । न तु ज्ञातृज्ञानयोश्चाक्षुषज्ञाने प्रतिभासः, तयोरपि चाक्षुषत्वप्रसङ्गात् ।

[98] तदेवं सिद्धे मनसि तस्य गुणान् प्रतिपादयति–तस्य गुणा इत्यादिना । सङ्ख्याद्यष्टगुणयोगोऽपि [2]मनसो वैधर्म्यम् । सङ्ख्यासद्भावं कथयति–प्रयत्नेत्यादिना । प्रतिशरीरमेकं मन आहोस्विदनेकमिति संशये सति सूत्रकृतोक्तम्–"प्रयत्नायौगपद्याज्ज्ञानायौग[3]पद्याच्च"

[टि०] [98] प्रभाकरमतमाशङ्कते अपरे पुनरेवमाहुः, इत्यादि । ज्ञानेन सह योऽसौ संसर्गो ग्राह्यग्राहकलक्षणः सम्बन्धस्तस्याज्ञानम् । अनुमानं तु ज्ञानज्ञातृज्ञेयप्रतिभासनात्, त्रिपुटी[4]ज्ञानं [5]विषयस्वस्वरूपस्वाश्रयप्रकाशकं, प्रकाशस्वभावत्वात् प्रदीपवदिति । तत्र किमिदं प्रकाशस्वभावत्वम् ? यदि भावस्वरूपत्वं [6]तदाऽसिद्धिः, अथ ज्ञानत्वं तदा

[पं०] तदुच्यते इति श्रीधरेण। विभुत्वादिति –कोऽर्थः? यदि मनसो विभुत्वमङ्गीक्रियते । आत्ममनसोः परस्परसंयोगाभावे इति–न हि महद्द्रव्ययोरेकत्वसंयोगो भवति असमवायिकारणाभावादिति आत्ममनःसंयोग एव हि ज्ञानसुखादीनामसमवायिकारणम् । आत्मार्थसंयोगस्य ह्यसमवायिकारणत्वेऽर्थदेशे ज्ञानोत्पत्तिः स्यादिति–अयमत्र वाक्यार्थः–यदि आत्मार्थसंयोग एव ज्ञानोत्पत्तौ असमवायिकारणमिष्यते, तदाऽर्थदेशे ज्ञानोत्पत्तिः स्यात्, न पुनरन्तर्मुखतया । प्रदेशवृत्तीनां गुणानामिति संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तित्वम् । बुद्ध्यादयोऽन्तर्बहिश्चोपलम्भानुपलम्भाभ्यामव्यापका इति वक्ष्यमाणत्वात् ज्ञानादीनां प्रदेशवृत्तित्वं ज्ञातव्यम् ।

[98] आकाशात्मकेन श्रोत्रेणात्मनः संयोगाभावादिति न हि महतोराकाशात्मनोः संयोगो घटते । बहिर्देशे

[कु०] बहुव्रीहिगर्भो बहुव्रीहिः । समासान्तविधेरनित्यत्वान्नद्यृतश्चेति प्रत्ययो न कृतः । घटोऽयमित्यत्र ज्ञातृज्ञानयोरपि प्रभासमानत्वे घटवत्ताभ्यामपि ज्ञानमवच्छिद्येतेति भावः । ज्ञातृज्ञानविशिष्टस्येति (कं. ९२.१) अनुव्यवसायमात्रज्ञानविशेषणतया अनुव्यवसायार्थः प्रकाश इत्यर्थः । तयोरपीति (कं. ९२.२) विषयस्य हि चाक्षुषत्वं चक्षुर्जन्यज्ञानप्रकाशमानत्वं नान्यदित्यर्थः ।

[98] सङ्ख्यासद्भावमिति (कं. ९२.४) सङ्ख्याविशेषसद्भावमित्यर्थः । सङ्ख्यासामान्यस्य द्रव्यत्वादेव सिद्धौ स च विशेषः कीदृश इत्याशङ्क्य विमर्शपूर्वकं तत्साधकं सूत्रं पठति प्रतिशरीरमिति (कं. ९२.६) । तेनेति

१ संस्काराश्चेति–दे । २ मनोवैधर्म्यम्–जे. ३ । ३ च्चैकम्–सू. पा; च्चैकं. मन इति–जे. १; जे. ३ । ४ त्रिपुटिविषय–अ, ब, क; ५ विषयस्वरूपत्वाश्रयप्रकाशसुभावत्वात्–अ, विषयस्वस्वभावत्वात्–ब; ६ असिद्धिः–अ, ब;

## न्यायकन्दली

प्रतिशरीरमेकं मनः (वै. सू. ३-२-३) इति । तेन प्रतिशरीरमेकत्वं सिद्धमिति । मनोबहुत्वे ह्यात्ममनःसंयोगानां बहुत्वाद्युगपज्ज्ञानानि प्रयत्नाश्च भवेयुः, दृश्यते च क्रमो ज्ञानाना-मेको[1]पलम्भव्यासक्तेन विषयान्तरानुपलम्भाद् निवृत्तव्यासङ्गेन चोपलम्भादित्युक्तम् । एवं प्रयत्नानामपि क्रमोत्पाद एव, एकत्र प्रयतमानस्यान्यत्र व्यापाराभावात्, समाप्तक्रियस्य च भावात्, तस्मादेकं मनः । तस्यैकत्वे खल्वेक एवैकदा संयोग इत्येकमेव ज्ञानमे[2]कश्च प्रयत्न इत्युपपद्यते । यस्तु क्वचिद्युगपदभिमानस्तदलातचक्रवदाशुभावात् न तु तात्त्विकं यौगपद्यमेकत्र दृष्टेन कार्य्यक्रमेणान्यत्रापि [3]करणस्य तस्यैव सामर्थ्यानुमानात् । नन्वेवं तर्हि द्वाविमावर्थौ पुष्पितास्तरव इत्यनेकार्थप्रतिभासः कुतः ? कुतश्च स्वशरीरस्य सह प्रेरणधारणे, न, अर्थसमूहालम्बनस्यैकज्ञानस्याप्रतिषेधाद् बुद्धिभेद एव न तु तथा प्रतिभासः, [4]सर्वासामेव तासामेकैकार्थनियतत्वात् । एवं शरीरस्य प्रेरणधारणे च

[**टि०**] साधनविकल्पे दृष्टान्त इति दूषणम् । अथ प्रत्यक्षबाधितस्य पक्षत्वाभावात् पक्षदोषेणा[5]सिद्धतां दर्शयन्नाह [6]**पाण्डुवासोऽयमित्यादि** । अयं ग्रन्थकृच्छिष्यः । [7]**यत्वनयो** इति :–अनयो ज्ञातृज्ञानयोः । प्रथमं तावत्पाण्डुदासोऽयमिति ज्ञानं [8]चाक्षुषं ततो ज्ञानान्तरेणात्मसमवेतस्य **पाण्डुदास**ज्ञानस्य ज्ञानं तत आत्मज्ञानं ततो ज्ञातरि ज्ञाने च जाते[9] सति ताभ्यां विशिष्टोऽर्थो[10]ऽपि मनसा गृह्यते इति सिद्धान्तः । **यस्तु क्वचिद्** इतिः द्वित्रिच्छिन्नानां गोधापुच्छादिनां [11]युगपत्प्रयत्नात् कर्म दृश्यते तदपि चक्षुस्फुरणादिवददृष्टोपग्रहादिति । **बुद्धिभेद एव** इति । भेदे एव सति तथा प्रतिभासो न स्यात् । एकत्वानुमानं तु [12]विवादास्पदमेकम्, एकदा एक[13]ज्ञानासमवायकारणाधारत्वादात्मवदिति । विवादास्पदमित्येकदेहावच्छिन्नमित्यर्थः । एकदेति क्रमेणानेकज्ञानासमवायकारणाधारत्वेनासिद्धिवारणार्थम् । विपक्षे युगपज्ज्ञानोत्पत्तिर्बाधिका ।

[**पं०**] **इति**–अर्थदेशे । **तस्मादिति**–यतः कारणात् । सुखादीनां बहिर्देशे प्रत्ययो नास्ति । शब्दज्ञानस्योत्पादोऽप्यस्ति, ततः कारणादित्यर्थः । **पूर्वशरीरादिति**–मृतशरीरात् । पूर्वशरीरादपसर्पणं–शरीरान्तरेऽपसर्पणमित्येतत्सप्रपंचं वक्ष्यते कर्मपदार्थप्रान्ते । **शरीरान्यत्वे सति सर्वविषयज्ञानोत्पादकत्वादिति** किल सर्वविषयज्ञानोत्पादकं शरीरमप्यस्ति । तत्पुनः

[**कु०**] (कं. ९२.६) एकत्र ज्ञानस्य वा प्रयत्नस्य वोत्पत्तौ विषयान्तरे तदनुत्पत्तिः विषयात्मतत्सन्निकर्षव्यतिरिक्तसहकारि-विरहप्रयुक्ता तेषु सत्से[षु] च कार्यानुत्पत्तित्वात् सम्प्रतिपन्नवदिति प्रयोगः । अत्र तर्कमाह मनो-बहुत्वे इति (कं. ९६.७)।

[14]**तथैव सामर्थ्यानुमानादिति** (कं. ९२.१३) विप्रतिपन्नानि ज्ञानानि युगपन्नोत्पद्यन्ते ज्ञानत्वाद् व्यासक्तज्ञानवदिति प्रयोगः । ननु द्वाविमावर्थाविति समूहालम्बनमेकमेव ज्ञानं न तु ज्ञानयौगपद्यमिति कुतो विनिगमनेत्यत आह–

---

१ अन्योपलम्भ–जे. २ । २ एकः प्रयत्नः–कं. १; कं. २ । ३ कारणस्य तथैव –जे. १; जे. ३; तथैव करणस्य जे. २ । ४ सर्वासामेकैकार्थ–कं. १; कं. २ । ५ सिद्धितां–अ, ब, क; ६ घटोऽयम्–मु. जे. १, जे. ३ । ७ यत्र त्वनयोः–मु.जे.१,जे.३ । ८ चक्षुषं–अ; ९ ज्ञाने सति-ड; १० ऽर्थोऽप्यमनसा–अ, ब; ११ युतवत् –अ, ब; १२ विवादास्पदमेकदा–अ, ब; १३ ज्ञानसमवाय–क; ज्ञानासमवायाधारत्वा–ड; १४ तस्यैव–कं ।

## न्यायकन्दली

प्रयत्न[1]विशेषादेकस्मादेव भवतः, यथानेकविषयमेकं [2]ज्ञानं तथा तत्कारणाविच्छाप्रयत्नावपीति न किञ्चिद् दुरुपपादम् । पृथक्त्वमप्यत एवेति । सङ्ख्यानुविधानादेव पृथक्त्वमपि सिद्धमित्यर्थः । [3]तदभाववचनादणुपरिमाणम् । विभववान्महानाकाशस्तथा चात्मेत्यभि[4]धाय "सूत्रकारेण तदभावादणु मन" (वै. सू. ७-१-२३) इत्युक्तम् । तस्मादणुपरिमाणं मन इति सिद्धम् । नित्यद्रव्यगतस्य विभवाभावस्य अणुपरिमाणत्वाव्यभिचारात् । विभवाभावश्चास्य युगपज्ज्ञानानुपपत्त्यैव समधिगतः । मनसो [5]विभुत्वे तस्य युगपत्समस्तेन्द्रियसम्बन्धाच्चक्षुरादिसन्निकृष्टेषु रूपादिषु ज्ञानयौगपद्यं स्यात् ।

अथ कथमेकेन्द्रियग्राह्येषु घटादिषु मनोधिष्ठितेन चक्षुषा युगपत्सन्निकृष्टेषु ज्ञानानि युगपन्न भवन्ति? आत्मेन्द्रियार्थसन्निकर्षाणां यौगपद्यान्न भवन्ति । तावदनेनात्ममनःसंयोगस्यैकस्य युगपदने[6]कस्य ज्ञानस्योत्पादनसामर्थ्याभावः कल्प्यत इति चेत्?

[**टि०**] भट्टा हि [[7]मनोविभुत्वेऽनुमानयन्ति] मनो विभुज्ञानासमवायकारणाश्रयत्वात् सर्वदा स्पर्शरहितद्रव्यत्वाद् वा, आत्मवदिति । अत्र तत्कालोत्पन्नद्रव्यस्यैकक्षणं स्पर्शरहितत्वात् तद्व्यवच्छेदार्थं सर्वदेति गुणादिव्यवच्छेदार्थं द्रव्यत्वादिति । इत्याशङ्क्याह–[8]**विभावाभावश्च** इति–मनोऽविभु, [9]विभुसंयोगित्वात् परमाणुवत् इति सत्प्रतिपक्षता । अथवा मनोऽणु, आत्मव्यतिरिक्तद्रव्यत्वावान्तरापरजातिमत्त्वे सति [नित्य] द्रव्यत्वात् परमाणुवदिति सत्प्रतिपक्षता । युगपज्ज्ञानोत्पत्ति-

[**पं०**] स्पर्शवत् । अतः शरीरान्यत्वे सतीति सविशेषणो हेतुः । **साधारणमिति** – आत्ममनसोः सामान्यम् । **मनश्चैतन्ये निषिद्धऽपीति** आत्मसिद्धिप्रकरणे । **इच्छाद्वेषपूर्वकेणेति** – स्वप्नादावनेकार्थदर्शनं जीवनपूर्वकम् प्रयत्नप्रकरणे वक्ष्यमाणमिदं भेदद्वयम् ।

[**कु०**] **बुद्धिभेदे** [10]**चेति** (कं. ९२.१६)। तथैव प्रतिभासे [भे]दे प्रत्यर्थं बुद्धिभेदाङ्गीकारे द्वित्वाद्यनेकसङ्ख्याविलयापत्तिरिति भावः ।

ननु विभवो नाम सर्वमूर्तसंयोगस्तदुभय[म]वश्यमध्यमपरिमाणतयापि सङ्गच्छत एवेत्यत आह **नित्येति** (कं. ९२.२१) । मनोऽणु अविभुत्वे सति नित्यद्रव्यत्वात्परमाणुवदिति प्रयोगः । गूढाभिसन्धिः पृच्छति **अथ कथमिति** (कं. ९२.२४) । परिहाराभासमाशङ्कते न [11]**संभवति तावदिति** (कं. ९२.२६) । अभिसन्धिमुद्घाटयति **समानमेतदिति** (कं. ९२.२७) । **विभुत्वादिति** (कं. ९२.२८) नाजः संयोग इत्यजसंयोगस्य निषेत्स्यमानत्वादित्यभिप्रायः ।

---

१ °विशेषादेव–जे. ३ । २ विज्ञानं–जे. ३ । ३ तदभावादणुपरिमाणम्–जे. १, जे. २, जे. ३ । ४ भिधाय तदभावादणुमन –कं. १; कं. २; भिधाय सूत्रकारेण तदभावादणुपरिमाणं मनः –जे. ३ । ५ विभुत्वे युगपत् – कं. १; कं. २ । ६ दनेकज्ञानस्य –जे. १; जे. २; जे. ३ । ७ चितुत्वे – अ, ब; [ ] एतच्चिह्नान्तर्गतः पाठः इ पुस्तके नास्ति । ८ विभावाभावस्य–मु । ९ संविभुसंयोगित्वात् – क; संयोगित्वात् – अ; १० एव – कं । ११ भवन्ति – कं ।

## न्यायकन्दली

समानमेतद्विभुत्वेऽपि मनसः, तस्मादविभुत्वेऽपि [1]तस्य युक्त्यन्तरं वाच्यम्, तदुच्यते विभुत्वादात्ममनसोः परस्परसंयोगाभावे सत्यात्मगुणानां ज्ञानसुखादीनामनुत्पत्तिरसमवायिकारणाभावात्। आत्मार्थसंयोगस्य ह्यसमवायिकारणत्वेऽर्थदेशे ज्ञानोत्पत्तिः स्यादसमवायिकारणा[2]व्यवधानेन प्रदेशवृत्तीनां गुणानामुत्पादात्। आत्मेन्द्रियसंयोगस्यासमवायि[3]कारणत्वेऽपि शब्दज्ञानानुत्पत्तिः, आकाशात्मकेन श्रोत्रेणात्मनः संयोगाभावात्। न च बहिर्देशे प्रत्ययो नापि शब्दज्ञानानुत्पादः, तस्मादात्मार्थसंयोगस्यात्मेन्द्रियसंयोगस्य चासमवायिकारणत्वे प्रतिषिद्धे परिशेषादात्ममनःसंयोगस्यासमवायिकारणत्वं व्यवतिष्ठते, तच्च मनसो व्यापकत्वे न सम्भवतीत्यनुत्पत्तिरेव ज्ञानसुखादीनाम् अस्ति च तेषामुत्पादः, स एव मनसो विभुत्वं निवर्त्तयतीति।

[टि०] विपक्षे बाधकम्। ननु मनसो व्यापकत्वादात्मसवन्द्रियसम्बन्धेऽपि बुभुत्सा[5]नियमात् न [6]ज्ञानयौगपद्यं भविष्यति? नैवम्, बुभुत्सामन्तरेण गच्छत्तृणादिज्ञानानुत्पादप्रसङ्गात्। [7]बुभुत्सयैव [8]ज्ञाननियमे मनःकल्पनावैयर्थ्याच्च। अथ पर एकस्यात्ममनःसंयोग[9]स्यैकमेव ज्ञानं प्रति कारणत्वं विभुत्वेऽपि मनसः समानमिति [10]प्रतिपिपादयिषुराह अथ कथम् इत्यादि। [11]घटादीनां बहुत्वाद् इन्द्रियसंयोगिनामपि बहुत्वे [12][इन्द्रियद्वारेण मनःसंयोगानामपि बहुत्वे] किमित्येकमेव समूहालम्बनं ज्ञानं न तु प्रतिघटमेकैकमित्यर्थः।

[पं०] विशुद्धविविधन्यायमौक्तिकप्रकराकर इति—न्यायशब्देन प्रमाणोपपन्नानि वाक्यानि उच्यन्ते। पदार्थप्रवेशन्यायकन्दलीटीकायामिति—पदार्थप्रवेशकमिति प्रशस्तकरभाष्यनाम, तस्य न्यायकन्दल्याख्या या टीका तस्याम्।

[कु०] पूर्वशरीरादिति (कं. ९३.११) वीतरागजन्मदर्शनादेकस्यानेकशरीरयोगसिद्धे व्यापकस्य संयोगहेतुक्रियाविरहान्मनसस्तदभावेऽपसर्पणोपसर्पणयोरसिद्धौ प्रेत्यभावानुपपत्तिरिति भावः। परत्वापरत्ववेगाः सिद्धा इति (कं. ९३.१३) अतीन्द्रियेऽपि मनस्यनुमिति(:) पापेक्षाबुद्ध्या परत्वापरत्वयोरुत्पत्तिर्न विरुध्यते। अदृष्टकार्यकर्मयोगित्वेनापि फलनादिवदेव वेगोऽपि प्रमाणसिद्धि(द्धः) स्वीकर्तव्य इति भावः। अस्पर्शत्वात्वाद्द्रव्याणा[ना]रम्भकत्वमिति (कं. ९३.१४) भाष्यस्य मूर्तत्वाद्र(द्द्र)व्यानारम्भकमिति न प्रतिपक्षः मूर्तस्याप्यनारम्भाविरोधात्। आरम्भे तु स्पर्श एव प्रयोजकः। यदि स्पर्शवान् पुनर्नारभे(द) अनुपभोग्यगुणः स्यादित्यनुकूलतर्कसम्भवादित्यभिसन्धायासिद्धिमात्र

---

१ तस्य—कं. १, कं. २ पुस्तकयोर्नास्ति। २ व्यवधाने—जे. ३। ३ °कारणत्वे शब्द—कं. १, कं. २। ४ भवति—जे १, जे. २, जे. ३। ५ नियमवदिति—अ, ब, क; ६ ज्ञानायौगपद्यं—ड; ७ बुभुत्सैव—अ, ब, क; ८ नियमेन—ड; ९ स्यैव ज्ञानं—ड; १० प्रतिपादयिषु—ड; ११ घटादीनामपि बहुत्वाद्—क; १२ [ ] एतच्चिह्नान्तर्गतः पाठः अपुस्तके नास्ति।

### प्रशस्तपादभाष्यम्

अस्पर्शवत्त्वाद् द्रव्यानारम्भकत्वम् । क्रियावत्त्वान्मू[1]र्त्तत्वम् । साधारणविग्रहवत्त्वप्रसङ्गा-[2]दज्ञत्वम् । [3]करणभावात्परार्थम् । गुणवत्त्वाद् द्रव्यम् । प्रयत्नादृष्टपरिग्रहवशादाशु-सञ्चारि चेति ।

[4]इति प्रशस्तपादभाष्ये द्रव्यपदार्थः ॥

### न्यायकन्दली

अपसर्पणोपसर्पणवचनात् संयोगविभागाविति । "अपसर्पणमुपसर्पणमशीतपीत[5]संयोगाः कायान्तरसंयोगाश्चादृष्टकारितानि" (वै. सू. ५-२-१९) इति सूत्रेण मनसः पूर्व-शरीरादपसर्पणं शरीरान्तरे चोपसर्पणञ्चादृष्टकारितमित्युक्तम्, तस्मादस्य संयोगविभागौ सिद्धौ । मूर्त्तत्वात्परत्वापरत्वे संस्कारश्च । विभवाभावा[6]त्तावत् मूर्त्तत्वं सिद्धं तस्माद् घटादिवत् परत्वापरत्ववेगाः सिद्धाः । अस्पर्शवत्त्वाद् द्रव्यानारम्भकत्वम् । अस्पर्शवत्त्वं मनसः शरीरान्यत्वे सति सर्वविषयज्ञानोत्पादकत्वादात्मवत् सिद्धम्, [7]तस्माच्चात्मवदेव सजातीयद्रव्यानारम्भकत्वम् । क्रियावत्त्वान्मूर्त्तत्वमिति । अणुत्वप्रतिपादनान्मूर्त्तत्वे सिद्धेऽपि विस्पष्टार्थमेतदुक्तम् । साधारणविग्रहवत्त्वप्रसङ्गाद[8]ज्ञत्वम् । यदि ज्ञातृ मनो

[टि०] **समानमेतद्** इतिः—यद्यप्यात्ममनसोर्विभुत्वात् सर्वेन्द्रियैः संयोगो युगपदस्ति तथापि एक एवासौ आत्ममनःसंयोग इत्येकमेव ज्ञानमुत्पद्यते न तु बहूनीति अविभुत्वसमाधानं विभुत्वेऽपि समानम् । [9]स्वसिद्धान्ताभिप्रायेण समाधत्ते **विभुत्वादात्ममनसोः** इत्यादि ।

[कु०] परिहरति **[अ]स्पर्शवत्त्वं मनस इति** (कं. ९३.१४) । न त्वस्पर्शत्वया अमूर्तत्वमनुमीयतां ततश्च परत्वा-परत्ववेगानुमानमुच्छिद्येतेति शङ्कानिराकरणाय भाष्यं पठति ।

**अणुत्वप्रतिपादनादिति** (कं. ९३.१८) विभवाभावस्य च परममहत्त्वेन विरोधा च(त्) कार्यस्य मध्यमपरि-माणा[ण]योगादणुत्वसाधकस्यानुकूलतर्कवत्तयाऽस्पर्शवत्त्वममूर्तत्वे न प्रयोजकमिति भावः । [10]**मनसश्चैतन्यमिति** (कं. ९३.२१) तस्यैवाचैतन्यसाधनस्य करणस्यानुकूलतर्कतयेति शेषः । **अज्ञत्वे सिद्ध** इति (कं. ९३.२२) सामान्येन परार्थत्वसाधकेऽज्ञत्वे सिद्धेऽपि कथं वा निराकरणायेति शेषः । [11]**इच्छापूर्वेति** (कं. ९३.२४) गुरुत्वादिवत्प्रयत्ना-दृष्टयोरपि क्रियाकारणत्वमनुमेयमित्यर्थः ।

---

१ मूर्तम्–जे । २ °दज्ञम् – जे । ३ स्वयंकरणभावात् – दे । ४ इति द्रव्यपदार्थः समाप्तः–जे । ५ मशितजीनसंयोगाः कार्यान्तरसंयोगाश्चेति सूत्रपाठे–कर्मान्तर इति पाठान्तरम् टिप्पण्याम ४ पा. पु. । ६ °भावा-न्मूर्तत्वं–कं. १, कं. २ । ७ तस्माद्–कं. १ । ८ दज्ञम्–जे. १, जे. २, जे. ३ । ९ त्वसिद्धान्त–अ, ब; १० मनश्चैतन्ये–कं । ११ इच्छाद्वेषपूर्वक–कं ।

न्यायकन्दली

भवेच्छरीरमिदं साधारणमुपभोगायतनं स्यात्, न चैवम्, एकाभिप्रायानुरोधेन तस्य सर्वदा प्रवृत्तिनिवृत्तिदर्शनात्, तस्मादज्ञं मनः। चैतन्ये निषिद्धेऽपि प्रक्रमात् पुनरेतदुक्तम्। अज्ञत्वे सिद्धे सत्याह–करणभावात् परार्थमिति। परार्थं [1]परस्योपभोगसाधनमित्यर्थः। गुणवत्त्वाद् द्रव्यं पृथिव्यादिवत्। प्रयत्नादृष्टपरिग्रहवशादाशुसञ्चारि चेति [2]द्रष्टव्यम्। इच्छाद्वेषपूर्वकेण जीवनपूर्वकेण च प्रयत्नेन परिगृहीतं स्थानात् स्थानान्तरमाशु सञ्चरति, तथा अदृष्टेन परिगृहीतं मरणाच्छरीरान्तरमाशु सञ्चरतीति द्रष्टव्यम्। इतिशब्दः परिसमाप्तौ।

विशुद्धविविधन्यायमौक्तिकप्रकराकरः।
सेव्यतां द्रव्यजलधिः स्फुटसिद्धान्तविद्रुमः ॥

इति भट्टश्रीश्रीधरकृतौ [3]पदार्थप्रवेशकन्यायकन्दलीटीकायां द्रव्यपदार्थः समाप्तः ॥

[टि०] नन्वात्मप्रकरण एव मनसश्चैतन्यं निषिद्धं किं पुनर्निषिध्यत इत्याह मनस[4]श्चैतन्ये इति। इच्छाद्वेषपूर्वकेण इति:–जाग्रदवस्थायामिच्छाद्वेषपूर्वकः स्वप्नावस्थायां तु प्राणधारणपूर्वकः।

[5]विशुद्धविविधेत्यादि न्यायाः प्रमाणानि। ॥ मनः ॥

[6]इति श्रीमलधारिशिष्यपण्डितनरचन्द्रकृतौ कन्दलीटिप्पणके द्रव्यपदार्थः समाप्तः ॥ शुभं भवतु ॥

[पं०] इति मलधारिश्रीश्रीतिलकसूरिशिष्यश्रीराजशेखरसूरिविरचितायां श्रीन्यायकन्दलीपंजिकायां द्रव्यपदार्थः समाप्तः। [7][ शुभं भवतु कविहृदयानाम्। ]

[कु०] द्रव्याणि प्रतिपादितानि मुख्यानि सङ्ख्यावतां संतोषाय गुणान्वितानि मुनिवाक्ययोगमपेक्षणात्
व[रा]ज्ञब्रह्मावसुन्धराधिपतिना धात्रीधरेन्द्रात्मजवैक्रमोजविकासनालभरणेन्दीवरस्य संप्रीतये ॥

इति श्रीमन्मण्डलेश्वरेण शस्त्रशास्त्रविदां पत्या शिङ्गिलवोमिदेवेनविरचिते
न्यायकन्दलीव्याख्याने न्यायकुसुमोद्गमोदये द्रव्यपदार्थः ॥

---

१ परार्थः–कं. १, कं. २ पुस्तकयोर्नास्ति। २ 'द्रष्टव्यम् – जे. १, जे. २, जे. ३ पुस्तकेषु नास्ति। ३ पदार्थप्रवेशान्यायकन्दली–कं. १; कं. २। ४ श्चैतान्य–अ, ब; ५ विशुद्धिविविधेरित्यादि–अ, ब; ६ पं. नरचन्द्रकृतौ द्रव्यपदार्थः–अ, ब, क। ७ [ ] एतच्चिह्नान्तर्गतो पाठो 'ब' पुस्तके नास्ति।

# अथ गुणपदार्थनिरूपणम्

प्रशस्तपादभाष्यम्

[99] रूपादीनां गुणानां सर्वेषां गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं [1]निर्गुणत्वं निष्क्रियत्वम्।

न्यायकन्दली

ॐ

[99] नमो जलदनीलाय शेषपर्यङ्कशायिने।
लक्ष्मीकण्ठग्रहानन्दनि:[2]ष्यन्दाय मुरद्विषे ॥

द्रव्यपदार्थं व्याख्याय गुणानां निरूपणार्थमाह–रूपादीनां गुणानामिति। [3]गुणत्वं नाम सामान्यं तेनाभिसम्बन्धो गुणानामिति परस्परसाधर्म्यकथनम्। इतरपदार्थवैधर्म्य-कथनमप्येतत्। गुणत्वं रूपादिषु रत्नत्वमिवोपदेशसहकारिणा प्रत्यक्षेणैव गृह्यते। यत्तु प्रथममस्य कर्मादिविलक्षणतया न ग्रहणं तदाश्रयपारतन्त्र्यस्यात्यन्तिकसादृश्यस्य सम्भवात्। रूपादीनां गुणानामिति स्वरूपमात्रकथनम्। सर्वेषामित्यभिव्याप्तिप्रदर्शनार्थम्।

॥ अथ गुणः ॥

( गुणग्रन्थे साधर्म्यवैधर्म्यप्रकरणम् )

[टि०] [99-100] **वेगवद् वायुसंयोगेन** इत्यादि:–मूर्तत्वं व्यापकं क्रियावत्त्वं तु व्याप्तमिति ग्राह्यं न तु यथासङ्ख्यं [4]मूर्त्यभावेन क्रियाया निवृत्तिसिद्धेर्व्युत्पादनात्। आकाशस्य क्रियायाः संयोगविभाग[5]घटनया निष्फलत्वप्रसङ्गः।

अथ गुणपदार्थः।

[पं०] [99] **रत्नत्वमिवेति** यथा रत्नस्वरूपं सुपरीक्षितरत्नशास्त्रः प्रत्यक्षेण वेत्ति।

[99] ॥ [ गुणपदार्थः ] ॥

गुणग्रामे शम्भो तपति विविशते यस्य धिषणा
गुणैर्बद्धाख्यानैर्न पुनरिह बध्येत स पुमान्।
अतस्तैरप्यो स गुण गरिमलामतिशयं
त्रयीयं तात्पर्यात्प्रकटयति पर्या[य]पटिमा ॥

न तु गवादिषु गोत्वादिकस्येव रूपरसादिष्वेकाकारावमर्शाभावाद् गुणत्वासिद्धिरित्यत आह **गुणत्वमिति**

---

१ निष्क्रियत्वमगुणत्वं च–कि। निष्क्रियत्वमगुणवत्त्वं च–जे, दे, व्यो. ४३७। २ नि:ष्यन्दायासुर–कं. १; कं. २।
३ गुणत्वं सामान्यं–जे. १, जे. ३। ४ मूर्तभावेन–अ, ब; ५ घटनाया–अ, ब, क;

## न्यायकन्दली

**द्रव्याश्रितत्वं द्रव्योपसर्जनत्वम्। एतच्च धर्ममात्रकथनं न तु [1]वैधर्म्याभिधानं द्रव्यकर्म्मादिष्वपि सम्भवात्।**

**एवं निर्गुणत्वं गुणरहितत्वं गुणानां स्वरूपं तेषां स्वात्मनि गुणान्तरानारम्भकत्वात्, तदनारम्भकत्वञ्च रूपादिषु रूपाद्यन्तरानुपलब्धेरनवस्थानाच्च। एवं सत्येकं रूपमणुः शब्द इत्यादिव्यवहार उपचारात्। सङ्ख्यादिकं रूपाद्याश्रयं न भवति गुणत्वाद् रूपादिवत्। स्वरूपान्तरं कथयति–निष्क्रियत्वमिति। द्रव्ये गच्छति रूपादिकमपि गच्छतीति चेत्? न, वेगवद्वायुसंयोगेन व्योमादिषु क्रियाया अभावाच्छाखादिषु च भावाद् अन्वयव्यतिरेकाभ्यां मूर्त्तत्वक्रियावत्त्वयोर्व्याप्य[2]व्यापकभावसिद्धौ मूर्त्यभावेन रूपादिषु [3]क्रियाया निवृत्तिसिद्धेः। [4]कथं तर्हि तेषु गमनप्रतीतिः? आश्रयक्रियया, यथैव सत्तायां नहि सत्ता स्वाश्रयेण सह गच्छति, एकस्य गमने विश्वस्य गमनप्रसङ्गादिति।**

**[टि०] यस्तु तेषाम्** इतिः–यथा एकमाकाशमित्यादौ। **न [5]तस्य [6]जात्यन्तरेतिः**–यद्यपि परमेणाणुत्वेन महद्भूच इतरेभ्यश्चतुर्विधा अपि परमाणवो व्यवच्छिद्यन्ते तथापि शुक्ल[7]भास्वररूपेण तेजोवदितरेभ्यो द्रव्येभ्यो [8]न व्यवच्छिद्यन्ते इति न विशेषगुणत्वम्।

**[कु०]** (कं. ९४.११)। कृतममयस्यानुवृत्तिप्रत्ययसद्भावादित्यर्थः। शानुशारेण [सानुसारेणा] रूपादिगुणशब्दयोरन्यतरोपादानेपीष्टसिद्धे किमर्थमुभयोरुपादानमित्यत आह **रूपादीनामिति** (कं. ९४.१४)। **द्रव्यकर्मादिष्विति** (कं. ९४.१६) आश्रितत्वं चान्यत्र नित्य[9]द्रव्येभ्य इत्युक्तत्वाद्द्रव्याश्रितत्वमस्ति। नित्यद्रव्यादीनां विशेषान्तराणां द्रव्याश्रितत्वमित्यपि व्याख्याने द्रव्यकर्मणोर्विशेषाणां च सम्भवादिति भावादिभावः (भावः)।

**एवं निर्गुणत्वमिति** (कं. ९४.१७) साधर्म्यमात्रमित्येतदेवमित्येतेनातिदिश्यते। गुणादीनां पश्चानामित्यनेन कर्मादीनामपि निर्गुणस्योक्तत्वात्। गुणेषु गुणा भवन्तः कार्याः, नित्या वा? नाद्य इत्याह [10]**आत्मनि गुणानारम्भकत्वादिति** (कं. ९४.१७) तत्रैव द्रव्यत्वेन गुणत्वव्याघात इत्यर्थः। प्रमाणविरहश्चेत्याह **तदनारम्भकत्वं चेति** (कं. ९४.१८)। नित्यास्तु सामान्यवन्तः कार्याश्रया न सन्त्येव नित्याश्रयास्तु परिशिष्यन्ते तत्राह **अनवस्थानादिति** (कं. ९४.१८)। नन्वस्तु सजातीयानामनवस्थापातात्प्रतीत्यभावाच्चाभावः, विजातीयेष्वनवस्थाया अभावात् प्रतीतौ च सत्यामेकं रूपमित्यादिव्यवहारस्य मुख्यत्वे को विरोध इत्यत आह **सङ्ख्यादिकमिति** (कं. ९४.१९)। साधर्म्यान्तरमित्यर्थः पूर्वोक्तादेव हेतोः। **द्रव्ये गच्छतीति** (कं. ९४.२१) गतिमद्द्रव्याश्रया रूपादयस्तावन्न ति[ष्ठ]न्ति पूर्वदेशेऽनुपलम्भात्। अतो गच्छन्तीति वक्तव्यं तृतीयप्रकाराभावादित्यर्थः। **कथं तर्हीति** (कं. ९४.२३) गतिमत्स्वाश्रयसंयोगिदेशभेदेन सहोपलभ्यमानत्वमित्यर्थः। [11]**स्वाश्रयक्रिययेति** (कं. ९५.१) यथा घट सन्नेह वा सन्निति सत्ताया स्वाश्रयसंयोगिदेशभेदेन सहोपलम्भ इत्यर्थः। दृष्टान्तस्य साध्यविकलत्वमाशङ्क्य परिहरति **एकस्येति** (कं. ९५.२)। द्रव्यगुणकर्मणां सत्ताश्रयतया सामान्यादित्रयस्य न तदेकार्थवृत्तितया तद्गमने गतिरवश्य भाविनीति शेषः।

---

१ –वैधर्म्मम्–जे. ३। २ –व्यापकत्व–जे. ३। ३ क्रियानिवृत्ति–कं. १, कं. २। ४ कथं तेषु–जे. ३।
५ ने तस्य–अ, ब, मु; ६ ज्ञात्यन्तरेति–अ; ७ भास्वरूगातजोत्र ..–अ, ब; ८ 'न' अबकपुस्तकेषु नास्ति।
९ द्रव्येणन्युक्तत्वाद्द्रव्याश्रितत्वं–ह. प्र। १० स्वात्मनि गुणान्तरानारम्भकत्वाद्–ह. प्र। ११ आश्रयक्रियया–ह. प्र।

प्रशस्तपादभाष्यम्

[100-101] रूपरसगन्धस्पर्शपरत्वा[1]परत्वगुरुत्वद्रवत्वस्नेहवेगा मूर्त्तगुणाः ।
बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा अमूर्त्तगुणाः ।
सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागा उभयगुणाः ।
संयोगविभागद्वित्वद्विपृथक्त्वादयोऽनेकाश्रिताः ।
शेषास्त्वेकैकवृत्तयः ।

**रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा वैशेषिकगुणाः ।**

न्यायकन्दली

[100] **सम्प्रति परस्परमेव तेषां साधर्म्यं वैधर्म्यञ्च प्रतिपादयन्नाह—रूपेत्यादि । एते मूर्त्तानामेव गुणा नामूर्त्तानाम् । तथा हि रूपस्पर्शपरत्वापरत्ववेगाः पृथिव्यादिषु त्रिषु, वायौ रूपवर्जम्, रूपस्पर्शवर्जं मनसि, रसगुरुत्वे पृथिव्युदकयोः, द्रवत्वं पृथिव्युदकतेजस्सु, स्नेहोऽम्भसि, गन्धः पृथिव्याम् ।**

**अमूर्त्तगुणान् कथयति—[2]बुद्धिसुखदुःखेत्यादि । बुद्ध्यादयो भावनान्ता आत्मगुणाः । आकाशगुणः शब्दः ।**

[**टि०**] **बाह्यार्थप्रकाशकत्वाद्** इति :—साक्षादिति [3]ज्ञेयं पारम्पर्येण मनसोऽपि कारणत्वात् ।

[**पं०**] [100] **एकं रूपमणुः शब्द इत्यादि व्यवहार उपचारादिति** एकत्वं हि सङ्ख्या । सा च गुणस्तत्कथं रूपे गुणे स्यात् ? निर्गुणत्वात् गुणानाम् । अण्विति च परिमाणम् । तच्च गुणस्तत्कथं शब्दे गुणे स्यात् ? निर्गुणत्वात्गुणानाम् । तर्हि एकमिति अण्विति व्यवहारः कुतः ? उपचारादिति ब्रूमः । समानासमान[4]जातीयसाधर्म्येणोपचार इति वाक्यार्थः । **क्रियाया** इति [5]चलनादेः । **मूर्तत्वक्रियात्वयोर्व्याप्यव्यापकभावः सिद्ध इति** मूर्तत्वं व्यापकं क्रियावत्त्वं च व्याप्यमिति

[**कु०**] [100] एते **मूर्तानामेवेति** (कं. ९५.६) साधारणतया वैधर्म्यमित्यर्थः । **भावनान्ता** इति (कं. ९५.११) भावना संस्कारविशेषा । ननु रूपत्वादिजात्याक्रान्तामन्येषामनेकद्रव्यवृत्तित्वात्कथमेतद्वैधर्म्यमित्यत आह **एकेति** (कं. ९५.१६) । [6]**आदिशब्दादिति** (कं. ९५.१८) द्वित्वं द्विपृथक्त्वं चादिर्येषामिति बहुव्रीहिं कृत्वा पश्चात्संयोगविभागशब्दाभ्यां द्वन्द्वस्य करणादस्यार्थस्य सिद्धिः ।

१ परत्वद्रवत्व — दे । २ बुद्धिसुखेत्यादि — कं. १, कं. २ । ३ ज्ञेय — ड; ४ जातीयव्यवच्छेदसाध० — ब. ।
५ चलनादिः — ब. । ६ आदिशब्दगृहीता — कं ।

## न्यायकन्दली

संख्यापरिमाणपृथक्त्वसंयोगविभागाः उभयगुणाः मूर्त्तामूर्त्तगुणाः ।

संयोगविभागद्वित्वद्विपृथक्त्वादयोऽनेकाश्रिताः, एका संयोगव्यक्तिरेका च विभागव्यक्तिरुभयोर्द्रव्ययोर्वर्त्तत इत्यनेकाश्रितत्वम् । एवं द्वित्वद्विपृथक्त्वव्यक्त्योरपि । आदिशब्दगृहीतास्तु [1]त्रित्वत्रिपृथक्त्वादिव्यक्तयो यथासम्भवं बहुष्वाश्रिताः । अनेकशब्दश्च 'एको न भवति' इति व्युत्पत्त्या द्वयोर्बहुष्वपि साधारणः ।

शेषास्त्वेकैकवृत्तयः 'शेषाः' रूपादिव्यक्तयः, एकस्यामेव व्यक्तौ वर्त्तन्ते, न पुनरेका रूपव्यक्तिः संयोगवदुभयत्र व्यासज्य वर्त्तत इत्यर्थः ।

विशेषगुणान् निरूपयति–रूपरसगन्धेत्यादि । विशेषो व्यवच्छेदः, तस्मै [2]प्रभवन्ति ये गुणास्ते वैशेषिका गुणा रूपादयः । ते हि स्वाश्रयमितरस्माद्व्यवच्छिन्दन्ति न संख्यादयः, तेषां स्वतो विशेषाभावात् । यस्तु तेषां विशेषः स आश्रयविशेषकृत एवेति बोद्धव्यम् ।

[टि०] न तावदर्थमात्रम् इति :–कुड्यान्तरिते[3]ऽर्थे सत्यपि तद्बुद्धेरननुमानात् । ज्ञानसम्बन्ध इति :–ज्ञानविषयीकृतो ह्यर्थो [4]ज्ञात इत्युच्यते । [5]पाकैः इति :–[6]अग्निसंयोगैरित्यर्थः ।

[पं०] ग्राह्यम् । न तु यथासङ्ख्यम्; मूर्त्यभावेन क्रियायानिवृत्तिसिद्धये व्युत्पादनात् । मूर्त्यभावेनेत्यादि व्यापकं हि निवर्तमानं व्याप्यमादाय निवर्तते । तेष्विति रूपादिषु । आश्रयक्रिययेति आश्रयो द्रव्यं तस्य या क्रिया चलनादिः, तया । विश्वस्य गमनप्रसङ्गादिति निखिलविश्वव्यापित्वात्तस्याः ।

स्वतो विशेषाभावादिति–सङ्ख्यादयोऽमुकत्रैवेति न । आश्रयविशेषकृत एवेति एको घटः, एकः पट इत्येवम् ।

[कु०] तस्मै प्रभवतीति (कं. ९६.२) सन्तापादिगणे सक्तुमांसादनेभ्यश्चेति चशब्दस्यानुक्तसमुच्चयार्थत्वाद्विशेषशब्दो द्रष्टव्यः । [7]विनयादि पाठा वयार्थिकणेश्राश्रयचतुर्थीसमासस्य मृग्यत्वादिति भावः । ते हीति (कं. ९६.२) स्वाश्रयव्यवच्छेदौपयिकतया द्रष्टव्यः । न सङ्ख्येति (कं. ९६.३) स्वाश्रयस्य जातिभेदेन व्यवच्छेदो विवक्षित इत्यभिप्रेतत्वादित्यर्थः ।

---

१ त्रित्वपृथक्त्वादि – जे. १ । २ भवन्ति – जे. १, जे. ३ । ३ ऽर्थेऽपि तद्बुद्धेरनुमानात् – अ, ब; ऽर्थे सत्यपि तद्बुद्धेरनुमानात् – ड; ४ ज्ञानत – अ, ब; ५ पाकेनेव – मु. पाकैः – जे. १, जे. ३; ६ असंयोगै – अ, ब, क; ७ अत्रार्थदृष्ट्या पाठश्चिन्तनीयः ।

प्रशस्तपादभाष्यम्

सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगाः सामान्यगुणाः ।

शब्दस्पर्शरूपरसगन्धा बाह्यैकैकेन्द्रियग्राह्याः ।

[1]सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगा द्वीन्द्रियग्राह्याः ।

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नास्त्वन्तःकरणग्राह्याः ।

न्यायकन्दली

सङ्ख्यादयः सामान्यगुणाः । सामान्याय [2]स्वाश्रयसाधर्म्याय गुणाः, न स्वाश्रयविशेषायेत्यर्थः । नन्वणुपरिमाणं परमाणूनां व्यवस्थापकम् ? [3]न, तस्य जात्यन्तरपरमाणुसाधारणत्वात् । सांसिद्धिकद्रवत्वमपां [4]वैशेषिकगुण एव तेन नैमित्तिकग्रहणम् ।

शब्दस्पर्शरूपरसगन्धा बाह्यैकैकेन्द्रियग्राह्याः । बाह्यानीन्द्रियाणि चक्षुरादीनि बाह्यार्थप्रकाशकत्वात् । तैः [5]प्रत्येकं रूपादयो गृह्यन्ते ।

सङ्ख्यादयो वेगान्ता द्वीन्द्रियग्राह्याः–[6]चक्षुस्पर्शनग्राह्याः। यथा चक्षुषा 'स्निग्धोऽयम्' इति प्रतीतिरेवं त्वगिन्द्रियेणापि [7]भवतीति, सङ्ख्यादिवत् स्नेहोऽपि तदुभयग्राह्यः ।

बुद्ध्यादयः प्रयत्नान्ता अन्तःकरणग्राह्याः, मनसा प्रतीयन्त इत्यर्थः ।

[टि०] तथा [8]ज्ञाततायामपि इतिः–जिज्ञासाया अभावेनानवस्थापरिहारो वैशेषिकाणामिव मानसे प्रत्यक्षे [9]समानः । परं ज्ञातताया अनुभव अपरोक्षताप्रतिभासस्य तु ज्ञानरूपत्वमित्येव सदुत्तरम् । **न ज्ञानेन क्रियते** इतिः–कार्यकारण-[भावा]भावान्न तयाऽनुमानं सम्भवति । **अस्य कारणम्** इत्यादिः–अस्य विषयसंवेदनस्य कारणम् । तस्य च मूलज्ञानस्य

[पं०] **सांसिद्धिकमिति** (कं. ९६.९) स्वाभाविकम् ।

**बाह्यार्थ[10]प्रकाशकत्वमिति** (कं. ९६.१३) साक्षादिति ज्ञेयमन्यथा पारम्पर्येण मनसोऽपि कारणत्वात् ।

**केचिदिति** (कं. ९६.२०) भाट्टाः । **तस्य व्यभिचारादिति** (कं. ९६.२१) कुड्यान्तरितार्थेन व्यभिचारः । कुड्यान्तरितार्थे सत्यपि तद्बुद्धेरननुमानात् **ज्ञानसम्बन्धो हि[11] ज्ञाततेति** (कं. ९६.२१) ज्ञानविषयीकृतो ह्यर्थो ज्ञात

[कु०] **बाह्यार्थे**ति (कं. ९६.१३) आत्मनस्तद्गुणेभ्यश्चान्येषां ग्राहकत्वादिति ।

इह प्रथमत एवार्थो ज्ञायमानो ज्ञाततया सह जायत इति न युज्यते इतरेतराश्रयप्रसङ्गात् । ज्ञानेन ह्युत्पन्नेन ज्ञातता जन्यते तत् सहितमर्थमवलम्ब्य ज्ञानोत्पत्तिरिति । तस्मादुत्तरकालं ज्ञानान्तरेण ज्ञाततासहितार्थो ज्ञायत इति

---

१ पाठोऽयं दे पुस्तके भ्रष्टः । २ सामान्याय साधर्म्याय–जे. १ । ३ न जात्यन्तरं–कं. १; कं. २ । ४ विशेष–कं. १; कं. २ । ५ एकैकशः–जे. १, जे ३ । ६ पाठोऽयं–जे. १, जे. २ पुस्तकयोर्नास्ति । ७ भवति–कं. १, कं. २ । ८ ज्ञातयोयामपि–अ, ज्ञातयायामपि–ब; ९ समानं–अ, ब, क; १० *प्रकाशकत्वात्–कं, ब । ११ 'हि' कं. पुस्तके नास्ति ।

## न्यायकन्दली

बुद्धिरनुमेया नान्तःकरणेन गृह्यत इति केचित्, तदयुक्तम्, लिङ्गाभावात्। न तावदर्थमात्रं लिङ्गम्, तस्य व्यभिचारात्। ज्ञातोऽर्थो लिङ्गं चेत्? ज्ञानसम्बन्धो ज्ञातता, याऽसौ ज्ञानकर्मता सा प्रतीयमाने ज्ञाने न प्रतीयते, [1]सम्बन्धिप्रतीतिनान्तरीयकत्वात् सम्बन्धप्रतीतेरिति कथं [2]तद्विशेषणार्थो लिङ्गं स्यात्? लिङ्गवल्लिङ्गविशेषणस्यापि ज्ञायमानस्यैवानुमान[3]हेतुत्वात्। अथ मन्यसे 'ज्ञानेन स्वोत्पत्त्यनन्तरमर्थे ज्ञातता नाम काचिदवस्था जन्यते [4]पाकेनेव तण्डुलेषु पक्वता, सा चार्थधर्मत्वादर्थेन सह प्रतीयते' इति। तदप्यसारम् अननुभवात्। यथा हि तण्डुलानामेवौदनीभावः पक्वताऽनुभूयते नैवमर्थस्य ज्ञातता। या चेयमपरोक्षरूपता [5]हानादिव्यवहारयोग्यता च तस्य, साऽपि हि ज्ञानसम्बधो न [6]धर्मान्तरम्। यथा चार्थे ज्ञायमाने ज्ञातता, तथा ज्ञाततायामपि ज्ञायमानायां ज्ञाततान्तरमित्यनवस्था। अथेयं स्वप्रकाशा? ज्ञाने कः प्रद्वेषः?

**[टि०]** ज्ञातृव्यापाररूपता। ननु यदि तज्ज्ञानं नित्यं तर्हि विषयसंवेदनं सततमेव प्रसज्यते न तु कदाचिदेव विषयसान्निध्य इत्येतदाचार्यनोद्यमाशङ्क्य परः प्राह **कादाचित्कविषयेन्द्रियेति**।

[पं०] इत्युच्यत इति भावः। **सम्बन्धि[7]प्रतीतिनान्तरीयकत्वात्सम्बन्धप्रतीतेरिति** (कं. ९६.२२) क्रियाकर्मक्रियाकर्मणी सम्बन्धिनौ। सम्बन्धः क्रियाकर्मत्वम्। **तद्वि[8]शेषण** इति (९६.२३) ज्ञानविशेषणः। **लिङ्गविशेषणस्येति** (कं. ९६.२४) ज्ञातत्वस्य। **[9]पाकैरिति** (कं. ९६.२५) अग्निसंयोगैः। **[10]साऽप्ययथार्थधर्मत्वादर्थेन सह प्रतीयत** इति (कं. ९६.२६) को भावः? प्रथमं ज्ञातताऽर्थधर्मत्वादर्थेन सह प्रतीयते ततो ज्ञानावस्थोऽर्थो बुद्धिमनुमापयतीति भावः। **तस्येति** (कं. ९७.२) अर्थस्य। **ज्ञाततान्तरमिति** (कं. ९७.४) ज्ञातता हि ज्ञाता सती अनुमापयति।

[कु०] वक्तव्यं तत्राह **यथेति** (कं. ९७.१)। **नैवमर्थस्येति** (कं. ९७.१) अर्थधर्मस्य प्रमातृनियमानुप[प]त्तेः, ज्ञाततायां च तत्सम्भवादसमवायिकारणाभावाच्च। द्वित्वादिसाम्यानुप[प]त्तेरिति भावः। यथार्थज्ञानेन न कोऽपि विशेषो जन्यते तर्ह्यज्ञातेः सह सामान्यं स्यात्ततश्च ज्ञानादिव्यवहारोऽपि न सिद्ध्येदित्यत आह **या चेयमिति** (कं. ९७.२)। **अथेयमिति** (कं. ९७.४) ज्ञाततान्तरविरहेऽपि यदि ज्ञानव्यवसी[यमानता] [11]तर्ह्यर्थविषयमपि ज्ञानमेवमेवास्त्विति [ज्ञा]ततादिविषयं ज्ञानं स्वयं प्रकाशेन मनसाऽनुव्यवसीयेत तर्ह्यर्थविषयमपि ज्ञानमेवमेवास्त्विति तात्पर्यान्नापसिद्धान्तः।

---

१ सम्बन्धिप्रतीत्यधीनत्वात् – कं. १, कं. २। २ तद्विशेषेणोऽर्थो – कं. २, तद्विशेषणोऽर्थो – जे. १, जे. ३। ३ –हेतुत्वम् – कं. १, कं. २। ४ पाकैरिव – जे. १, जे. २। ५ –हानादियोग्यता – जे. ३। ६ न धर्मान्तर-धर्मान्तरम् – कं. १। ७ प्रतीत्यधीनत्वात् – कं। ८ तद्विशेषणार्थो – कं। ९ पाकेन – कं। १० सा च – कं। ११ अत्र वाक्यमिदं पुनरावृत्तमिव भाति – सं।

न्यायकन्दली

वस्तुतस्त्रिकालविशिष्टोऽप्यर्थो ज्ञानेन प्रतीयमानो वर्त्तमानकालावच्छिन्नः प्रतीयते। या च [1]त्रिकालस्य वर्त्तमानकालावच्छिन्नावस्था [2]सा ज्ञातता, ज्ञानकृतत्वात्तस्य लिङ्गमिति कश्चित्। तदपि न किञ्चित्, वर्त्तमानावच्छिन्नता हि वर्त्तमानकालविशिष्टता। सा चार्थस्य स्वाभाविकी, न ज्ञानेन क्रियते किन्तु प्रतीयते।

योऽपि हि विषयसंवेदनानुमेयं ज्ञानमिच्छति, सोऽप्येवं पर्यनुयोज्यः—किं विषयसंवेदनमात्मनि समवैति? विषये वा? न तावद्विषये, तच्चैतन्यप्रतिषेधात्। अथात्मनि समवैति? ततः किमन्यद्विज्ञानं यदस्यानुमेयम्। [3]अस्य कारणं ज्ञातृव्यापारलक्षणं तदिति चेत्? तत्किं नित्यम्? अनित्यं वा? यद्यनित्यं तदुत्पत्तावपि कारणं वाच्यम्। विषयेन्द्रियादिसहकारी ज्ञानमनः[4]संयोगस्तस्य कारणमिति चेत्? सैव सामग्री विषयसंवेदनोत्पत्तावस्तु किमन्तर्गडुना तेन? अथ तन्नित्यम्? कादाचित्कविषये[5]न्द्रियसंनिकर्षादिसहकारि कादाचित्कं विषयसंवेदनं करोतीत्यभ्युपगः, [6]तदस्याप्यागन्तुककारणकलापादेव विषयसंवेदनोत्पत्तिसिद्धौ तत्कल्पनावैयर्थ्यम्? विषयसंवेदनादेवार्थावबोधस्य तत्पूर्वकस्य व्यवहारस्य च सिद्धेः।

[पं०] **त्रिकालस्येति** (कं. ९७.६) वस्तुनः। [7]**सा [ज्ञातता] ज्ञानकृतत्वात्तस्य लिङ्गमिति** (कं. ९७.६) भवति हि कार्यं कारणस्य लिङ्गम्, यथा धूमोऽग्नेः। **कश्चिदिति** (कं. ९७.७) **मीमांसकैकदेशीयः**। **न ज्ञानेन क्रियते किन्तु प्र[ती]यत इति** (कं. ९७.९) अत्र 'प्रतीयते' इति वर्तमानकालविशिष्टतया ज्ञायते। अयं भावः—कार्यकारणभावाभावान्न वर्तमानकालविशिष्टतयाऽनुमानं सम्भवत्यतो ज्ञानकृतत्वादित्यसिद्धो हेतुः।

**योऽपीति** (कं. ९७.९) **प्राभाकरः**। **ततः किमन्यद्विज्ञानमिति** (कं. ९७.११) आत्मसमवेतज्ञानादन्यत् किं तत्। आत्मसमवेतज्ञानमेव तदित्यर्थः। **यदस्येति** (कं. ९७.१२) अस्य विषयसंवेदनस्य। **ज्ञातृव्यापारलक्षणमिति** (कं. ९७.१२) मूलज्ञानम्। [8]**तस्येति** (कं. ९७.१४) ज्ञातृव्यापारलक्षणस्य। [9]**तेनेति** (कं. ९७.१५) ज्ञातृव्यापारलक्षणेन। **तत्कल्पनावैयर्थ्यमिति** (कं. ९७.१७) ज्ञातृव्यापारकल्पनावैयर्थ्यम्।

[कु०] **तदपि न किञ्चिदिति** (कं. ९७.७) अतीतानागतयोर्वर्त्तमानकालावच्छिन्नता वर्तमानकालविषयता चेत् साध्याविशिष्टो हेतुः स्यादिति [त्याहु]रेके। स्वरूपासिद्धिरित्याह [10]**वर्तमानकालावच्छिन्नेति** (कं. ९७.८)। सोऽप्येवं प्रमाणाभावेन **किमन्त(र्गतल)[डु]नेति** (कं. ९७.१५) विषयसंवेदनव्यतिरिक्ते आत्मनः संयोगकार्ये तस्मिन्नप्रमाणमस्तीति तात्पर्यम्। तत्कल्पनायां प्रमाणाभाव इत्यर्थः। अर्थविबोधस्यासंविदितत्वव्यावृत्तेः।

---

१ त्रिकालावच्छिन्नस्य–जे. १। २ ज्ञातता सा.–जे. १, जे. ३। ३ यदस्य करणम्–जे. १। ४ संयोगोऽस्य–कं. १, कं. २। ५ विषयेन्द्रियासन्निकर्ष–कं. १, विषयेन्द्रियादिसन्निकर्ष–पा. २ पु। ६ तदापि–जे. १, जे. ३। ७ सा ज्ञातता–कं। ८ अस्य–कं। ९ अनेन–कं। १० वर्तमानकालावच्छिन्नता–कं.।

## न्यायकन्दली

[101] अथोच्यते – विषयेन्द्रियादिजन्यं विज्ञानं कथमात्मन्येव समवैति ? यद्यात्मा सहजज्ञानमयो न स्यात्। तस्याचेतनत्वे हि कारणत्वाविशेषादिन्द्रियादिष्वपि ज्ञानसमवायो भवेदिति। तत्र स्वभावनियमादेव नियमोपपत्तेः। यथा तन्तूनाम[1]पटात्मकत्वेऽपि तन्तुत्वजातिनियमात्तेषु समवायो न तुर्यादिषु, तद्वदचिदात्मकेऽप्यात्मन्यात्मत्वजातिनियमाद् ज्ञानसमवायस्य नियमो भविष्यति।

एतेनैतदपि प्रत्युक्तं यदाहुरेके 'स्वसंवेदनमात्मनो निजं चैतन्यम्' इति; संसारावस्थायामपि तस्यावभासप्रसङ्गात्। [2]अविद्यया वा तस्य तिरोधानमिति चेत् ? किं ब्रह्मणोऽप्यविद्या ? [3]का च नित्ये स्वप्रकाशे तिरोधानवाचोयुक्तिः ? न च तिरोहिते तस्मि[4]न्नन्यस्य प्रतिभानमस्ति, 'तस्य भासा सर्वमिदं [5]भाति' इति श्रुतेः। भासते चेत् ? [6]सर्वस्य मुक्तिः, विद्याविर्भावे सत्यविद्याविलयात्। अथेयं न विलीयते ? न तर्हि विद्याप्रकाशस्तस्या विलयहेतुरित्यनिर्मोक्षः। निर्भागस्यैकदेशेन प्रतिभानमनाशङ्कनीयम्।

[टि०] [101] एतेनैतदपि प्रत्युक्तं यदाहुरेके इति :—वेदान्तवादिन इत्यर्थः। [7]का च नित्ये इति :—निरवयवस्यामूर्तस्य [8]स्वप्रकाशस्यावरणसम्भवाभावात्। ननु सर्वं तावदावृत्तं परं यस्यैकस्य मोक्षस्तस्मिन्नेकत्र देशे प्रतिभानं भविष्यतीत्याह–निर्भागस्य इति। [9]सावयवस्यैवैकदेशसम्भवात् तत्रावरणं सम्भवति न तु निरवयवस्येति।

[पं०] [101] आत्मत्वजातिनियमादिति (कं. ९७.२२) समवायिकारणत्वनियमादिति।

एके (कं. ९७.२३) इति–वेदान्तवादिनः। निजमिति (९७.२५) नित्यम्। नित्ये स्वप्रकाशे इति (कं. ९७.२६) निरवयवस्यामूर्तस्य स्वप्रकाशस्यावरणसम्भवाभावादिति भावार्थः। ननु सर्वं तावदावृत्तं यस्यैकस्य मोक्षस्तस्मिन्नेकत्र देशे संसारावस्थायामपि प्रतिभानं [10]न भविष्यतीत्याशङ्कयाह निर्भागस्यैकदेशेनेत्यादि (कं. ९८.३)। सावयवस्यैकदेशे सम्भवात्तत्र प्रतिभानं सम्भवति न तु निरवयवस्य स्वप्रकाशस्यैकदेशेन प्रतिभानं सम्भवतीत्यर्थः। इति प्रत्युक्तमिति (कं ९८.१२) एतन्मीमांसकमतनिषिद्धमित्यर्थः।

[कु०][101] सहजज्ञानमय इति (कं. ९७.१९) अन्नमयो यज्ञ इति वत्तत्प्रकृतवचनेन [म]यट् नत्वविकारे आत्मनो ज्ञानविकारत्वस्य परेणाप्यनभिमतत्वात्, नापि स्वरूपे अनुशासनविरोधात्, विज्ञानात्मवादस्य प्रागेव निराकरणाच्च।

किं ब्रह्मणोपीति (कं. ९७.२५) स्वयंप्रकाशनित्यचिदात्मके तद्विरोधिगुणसम्बन्धस्यानुपपत्तेरिति भावः। इह तिरोधानं विषयविनाशो वा आवरणं वा ? नाद्य इत्याह नित्य इति (कं. ९७.२५)। न द्वितीय इत्याह स्वप्रकाश इति (कं. ९७.२६)। प्रतिभासो तावत्संसारावस्थायामिति शेषः। अंशस्फुरणाद् विषयज्ञानम्, अंशान्तरे वा स्फुरणादविद्यासम्बन्धश्चेति शङ्कां निरस्यति निर्भागस्येति (कं. ९८.३)।

---

१ अपटत्वेऽपि–कं. १, कं. २। २ अविद्यया तस्य–जे. १, जे. ३। ३ कथं–कं. १, कं. २। ४ अन्यप्रतिभानम्–कं. १, कं. २। ५ विभाति–कं. १, कं. २। ६ सर्वमुक्तिः–कं. १, कं. २। ७ कथं च–मु. का च–जे. १, जे. ३; ८ स्वस्ये प्रकाशेस्यावरणसम्भवात्–अ, स्वप्रकाशस्यावरणसम्भवात्–ब; ९ सोऽवयव –अ; १० 'न' इति 'ब' पुस्तके नास्ति।

### प्रशस्तपादभाष्यम्

[102] गुरुत्वधर्माधर्मभावना ह्यतीन्द्रियाः ।

अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वगुरुत्वद्रवत्वस्नेहवेगाः कारणगुणपूर्वकाः ।

### न्यायकन्दली

[102] गुरुत्वधर्माधर्मभावना अतीन्द्रियाः, न केनचिदिन्द्रियेण गृह्यन्त इत्यर्थः ।

अपाकजरूपादयो वेगान्ताः कारणगुण[1]पूर्वकाः स्वाश्रयस्य यत्समवायिकारणं तस्य ये गुणास्तत्पूर्वका रूपादयः, तन्तुरूपादिपूर्वकाः पटरूपादयः, नियमेन तद्धर्मानुविधानात् । अतत्पूर्वकत्वे हि पटे यत्किञ्चिद् गुणान्तरं स्यान्नियमहेतोरभावात् ।

एतेनैकमेव सर्वत्र शुक्लं रूपं प्रत्यभिज्ञानादिति प्रत्युक्तम् । तरतमादिभावानुपपत्तिप्रसङ्गाच्च । तस्मात्सामान्यविषया प्रत्यभिज्ञा ।

पार्थिवपरमाणुरूपादयः पाकाद्वह्निसंयोगाज्जायन्ते न तु परमाणुसमवायिकारणाश्रितरूपादिपूर्वकाः, अतस्तन्निवृत्त्यर्थमपाकजग्रहणम् । सिद्धायामुत्पत्तौ कारणगुणपूर्वकत्वमकारणगुणपूर्वकत्वं चेति निरूपणीयम् । जलादिपरमाणुरूपादीनां चोत्पत्तिरेव नास्तीति

[टि०] [102, 103, 104] केचित् [2]सामान्यवत् शुक्लादिगुणानपि व्यापकान् नित्यांश्चाहुस्तन्निराचष्टे **एतेनैकमेव** इत्यादि ।

[पं०] [102] उत्पत्तिरेव नास्तीति (कं. ९८.१६) पार्थिवपरमाणुरूपादीनां हि पाकजोत्पत्तिरस्ति जलादिपरमाणुरूपादीनां तु पाकजोत्पत्तिरेव नास्ति नित्यत्वादित्यर्थः । **अनयोरिति** (कं. ९८.१९) द्रवत्ववेगयोः । **वेगवदित्यादि** (कं. ९८.१९) वेगवद्भिराप्यपरमाणुभिरारब्धो यो जलावयवी प्रवाहद्वयरूपस्तत्समवेतयोः ।

[कु०] [102] कारणगुणपूर्वका इत्यत्र कारणगुणशब्दस्य कर्मधारयत्वे द्रव्यकर्मणां द्वित्वादीनां च तथाविधत्वेन तद्रूपादीनामेव वैधर्म्यं स्यात्: अन्तःषष्ठीसमासं स्वाश्रयापेक्षया कारणत्वं वाऽश्रित्य व्याचष्टे **स्वाश्रयस्येति** (कं.९८.९)। पूर्वभावित्वं प्रत्यासत्तिश्च पटरूपापेक्षया तन्तुरूपादीनामविशिष्टं ततश्च रूपस्य रसोऽपि कारणं स्यादिति शङ्कां निरस्यति **तन्तुरूपादीति** (कं. ९८.१०) । सजातीयमेव कारणमित्यभिप्रायः । अत्र प्रमाणमाह **नियमेनेति** (कं. ९८.११) । अत्र प्रयोगः पटरूपादयः सजातीयांस्तन्तुरूपादीनपेक्ष्योत्पद्यन्ते तत्तारतम्यानुविधायित्वात् यद्य[द]पेक्ष्य न भवति तत्तारतम्यं नानुविधत्ते यथा रूपाद्यनपेक्षं कर्मेति व्यतिरेकी तर्कमाह– [3]**अतत्पूर्वकत्वेति** (कं. ९८.११) । **यत्किञ्चिदिति** (कं. ९८.११) पटरूपादिकं तन्तुरूपादितारतम्यं नानुविदधीतेति भावः । एतेन तन्तुरूपादिभ्यः पटरूपादीनां भेदप्रतिपादनेन एकत्वे कार्यकारणभावानुपपत्तेः । हेत्वन्तरमाह–**तरतमेति** (कं. ९८.१३) । **सिद्धायामिति** (कं. ९८.१५) कारणविशेषविधेः कारणसामान्यविधिनान्तरीयकत्वादिति भावः । **स्वरूपकथनमिति** (कं. ९८.१७)

१ पूर्वाः–जे. १, जे. २ । २ सामान्यवत्–अ, ब; ३ अतत्पूर्वकत्वे–कं ।

### प्रशस्तपादभाष्यम्

[103] बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म[1]भावनाशब्दा अकारणगुणपूर्वकाः ।

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्द[2]तूलपरिमाणोत्तरसंयोगनैमित्तिकद्रवत्वपरत्वापरत्वपाकजाः संयोगजाः ।

### न्यायकन्दली

न व्यभिचारः । [3]एषां च कारणगुणपूर्वकत्वाभिधानं स्वरूपकथनं न त्ववधारणार्थम्, नैमित्तिकद्रवत्ववेगयोरकारणगुणपूर्वकत्वस्यापि सम्भवात् । कारणगुणपूर्वकत्व[4]मनयोर्वेगवदारब्धजलावयविसमवेतयोर्द्रष्टव्यम् ।

[103] बुद्ध्यादयः शब्दान्ता अकारणगुणपूर्वकाः स्वाश्रयस्य यत्समवायिकारणं [5]तद्गुणपूर्वका न भवन्ति, नित्यगुणत्वात् ।

बुद्ध्यादयः संयोगजाः । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना आत्ममनःसंयोगजाः । शब्दो भेर्याकाशसंयोगजः । तूलपरिमाणं प्रचयाख्यसंयोगजम् । उत्तरसंयोगः संयोगजः संयोगोऽभिमतः । नैमित्तिकद्रवत्वं वह्निसंयोगजम् । परत्वापरत्वे दिक्कालपिण्डसंयोगजे । पार्थिवपरमाणुरूपरसगन्धस्पर्शा वह्निसंयोगजा इति विवेकः ।

[टि०] प्रचयाख्येति प्रचयः प्रशिथिलसंयोगविशेषः ।

[पं०] [103] स्वाश्रयस्येति (कं. ९८.२२) मनःसंयोगस्य भेर्यादेश्च । यत्समवायिकारणमिति (कं. ९८.२२) आत्माकाशलक्षणम् । नित्यगुणत्वादिति (कं. ९८.२३) नित्ययोरात्माकाशयोर्हि गुणा एते ।

प्रचयाख्यसंयोगजमिति (कं. ९९.२) प्रशिथिलः संयोगः प्रचय इत्युच्यते । उत्तरसंयोगः संयोगजः संयोगोऽभिमत इति (कं. ९९.३) यथा तन्तुवायसक्तन्तुतृणसंयोगात् तन्त्वन्तरसंयोगो भवति ।

कर्मजौ इति (कं. ९९.७) यत्र धनुर्मुक्तशरादौ । अकारणगुणपूर्वकोऽपीति अपिशब्दात्कारणगुणपूर्वकश्चानन्तरमेवोक्तः ।

[कु०] अपाकजपदस्य विश्लिष्टस्थ द्रवत्व[त्वा]पादना[न]त्वयानुपपत्तेः, वेगस्य कर्म ? [6]यस्यापि सम्भवादिति । पूर्वोक्तसाधर्म्यविपर्ययम् ।

[103] बुद्ध्यादीनां साधर्म्यं विवक्षत् तदनुसारेण व्याचष्टे स्वाश्रयस्येति (कं. ९८.२२) । नित्यगुणत्वादिति (कं. ९८.२३) स्वाश्रयस्य समवायिकारणविरहादिति भावः ।

बुद्ध्यादयः संयोगजा इति (कं. ९९.१) एतद्गुणान्तरेभ्य एव वैधर्म्यं न तु द्रव्यकर्मभ्यां तयोरपि संयोगजत्वात् । तत्र विभागमाह– बुद्धिसुखेति (कं- ९९.१) । शब्द इति शब्दविशेषोऽभिमतः । विभागजे शब्दजे... संयोगजत्वाभावादित्याह शब्द इति (कं. ९९.२) । तूलपरिमाणमिति (कं. ९९.२) समानसंख्यापरिमाणैरारब्धे (द्रं)द्रव्ये सजातीयपरिमाणापेक्षयाधिकपरिमाणस्योपलक्षण ...शिथिलसंयोगः । प्रचयः संयोगजः संयोगः संयोगकाण्डे वक्ष्यति ।

---

१ भावनास्त्वकारणगुणपूर्वकाः – दे । २ स्थूल– जे । ३ एषां कारण – कं. १, कं. २ । ४ तयोः – जे. १, जे. ३ । ५ तत्पूर्वकाः – जे. ३ । ६ नैमित्तिकद्रवत्ववेगयोरकारणगुणपूर्वकत्वस्यापि सम्भवात्– कं ।

## प्रशस्तपादभाष्यम्

[104] संयोगविभागवेगाः कर्मजाः ।

शब्दोत्तरविभागौ विभागजौ ।

परत्वापरत्वद्वि[1]त्वद्विपृथक्त्वादयो बुद्ध्यपेक्षाः ।

रूपरसगन्धानुष्णस्पर्शशब्दपरिमाणैकत्वैकपृथक्त्वस्नेहाः समानजात्यारम्भकाः ।

## न्यायकन्दली

[104] संयोगविभागवेगाः कर्मजाः । आद्यौ संयोगविभागौ कर्मजौ । [2]अकारणगुणपूर्वकोऽपि ।

शब्दोत्तरविभागौ विभागजौ । आद्यः शब्दो विभागादपि जायते, [3]उत्तरो विभागो विभागादेव जायत इति विवेकः ।

परत्वापरत्वद्वित्वद्विपृथक्त्वादयो [4]बुद्ध्यपेक्षाः । एषामुत्पत्तौ निमित्तकारणं बुद्धिः । आदिशब्दात् त्रित्वत्रिपृथक्त्वादिपरिग्रहः ।

रूपादयः स्नेहान्ताः समानजात्यारम्भकाः । कारणरूपात् कार्यरूपं रसाद्रसो गन्धाद् गन्धः स्पर्शात् स्पर्शः स्नेहात् स्नेहो महत्त्वान्महत्त्वमित्यादि योज्यम् । शब्दस्तु स्वाश्रये एव [5]शब्दान्तरारम्भकः । [6]अत्र च कारणत्वमात्रं विवक्षितम्, न स्वसमवायिकारणत्वम्; अन्यथा विजातीयानां पाकजानां निमित्तकारणस्योष्णस्पर्शव्यवच्छेदोऽसङ्गतार्थः स्यात् । नन्वेवं तर्हि कथं रूपादीनां ज्ञानकारणत्वम् ? न, तद्व्यतिरेकेण समानजातीयारम्भकत्वस्याभिप्रेतत्वात् ।

[टि०] तद्व्यतिरेकेणेति :– आत्मधर्मव्यतिरेकेणेत्यर्थः ।

[पं०] [104] विभागादपीति (कं. ९९.९) न केवलं संयोगात् ।

बुद्ध्यपेक्षा इति (कं. ९९.१२) अपेक्षाबुद्धिजाः ।

स्वाश्रय इति (कं. ९९.१८) भेर्यादौ । विजातीयानामिति (कं. ९९.१९) असमवायिकारणेषु हि निमित्तं कारणं विजातीयम् । पाकजानामिति (कं. ९९.१९) रूपादीनाम् । नन्वेवमिति (कं ९९.२०) कोऽर्थः ? रूपादीनां समानजात्यारम्भकत्वे स्वीक्रियमाणे इत्यर्थः । तद्व्यतिरेकेणेति (कं. ९९.२१) तच्छब्देनात्मधर्मास्ततश्च आ[त्म]धर्मव्यतिरेकेणेत्यर्थः ।

[कु०] [104] संयोगादिसामान्योक्तावपि सामर्थ्याद्विशेषे विश्रान्तिरित्याह आद्याविति (कं. ९९.७) ।

[वि]भागादपीत्यपि (कं. ९९.९) शब्दो नियमव्यावृत्तये । संयोगशब्दाभ्यामपि शब्दोत्पत्तेः ।

निमित्तकारणं बुद्धिरिति (कं. ९९.१२) अप्रत्यासत्तेर्नासमवायिकारणमित्यर्थः ।

उष्ण[7]स्पर्शस्य व्यवच्छेद इति (कं. ९९.२०) संग्रहनिमित्तस्य स्नेहस्य चेति शेषः । [8]तद्व्यतिरेकेण (कं. ९९.२२) आत्मधर्मव्यतिरेकेण ।

---

१ द्वित्वपृथक्त्वादयो–जे, व्यो. (४३५) । २ पाठोऽयं–कं. १, कं. २ पुस्तकयोर्नास्ति । ३ उत्तरविभागो–जे.१ । ४ बुद्ध्यपेक्षाः–अपेक्षाबुद्धिजाः टिप्पण–जे. १ । ५ शब्दारम्भकः–जे. १, जे. २ । ६ अथ कारणत्वं–कं. १, कं. २ । ७ स्पर्शव्यवच्छेदः–कं । ८ तद्व्यतिरेकिण–ह. प्र. ।

### प्रशस्तपादभाष्यम्

[105] सुखदुःखेच्छाद्वेषप्रयत्नाश्चासमानजात्यारम्भकाः ।

संयोगविभागसङ्ख्यागुरुत्वद्रवत्वोष्णस्पर्शज्ञानधर्माधर्मसंस्काराः समानासमानजात्यारम्भकाः ।

### न्यायकन्दली

[105] सुखादयोऽसमानजात्यारम्भकाः । सुखमिच्छायाः कारणं दुःखं द्वेषस्य इच्छाद्वेषौ प्रयत्नस्य सोऽपि कर्मणः । [1]पुत्रसुखं पितरि सुखं जनयति, अन्यथा तस्य प्रमोदानुपपत्तिरिति चेत्? तदसारम्, पुत्रस्य हि मुखप्रसादादिना सुखोत्पत्तिमनुमाय पश्चात् पितरि सुखं जायते । तत्रास्य पुत्रस्य सुखं न कारणम्, तस्यैतावन्तं कालमनवस्थानात् । किन्तु लैङ्गिकी तद्विषया प्रतीतिः कारणमिति प्रक्रिया ।

संयोगादयः संस्कारान्ताः समानासमानजात्यारम्भकाः । संयोगात् समानजातीय उत्तरसंयोगो विजातीयं द्वितूलके महत्परिमाणं, विभागाद्विभागः शब्दश्च, कारणगतैकत्वसङ्ख्यातः कार्यवर्तिन्येकत्वसङ्ख्या, [2]द्वित्वबहुत्वसङ्ख्याभ्यां चाणुत्वमहत्त्वे, गुरुत्वाद्

[टि०] [105–106] **पुत्रस्य हि मुखप्रसादादिना** इतिः—नन्वत्र [3]सुखोत्पत्त्यनुमानक्रियायाः पिता कर्ता जनिक्रियायास्तु सुखं कर्तृ ततो भिन्नकर्तृकत्वात् कथमनुमायेत्यत्र 'क्त्वा' प्रत्ययः? सत्यम्, सुखं [4]जायते इत्यस्य सुखयात् जायत इत्यर्थः । अन्तर्भूतण्यर्थत्वाद् वा मिनोतेर्न दोषः ।

[पं०] [105] रूपा(सुखा)दयो गुणा असमानज्ञानजातीयानपि ज्ञानादीनात्मधर्मान् जनयती(न्ती)ति यावत् । **अनुमाये** (कं. ९९.२६) त्यत्र भिन्नकर्तृकत्वात्तेन [यु]युज्यते । चिन्त्यमेतद् । **तद्विषयेति** (कं. १००.१) पुत्रसुखविषया प्रक्रियेति सिद्धान्तः ।

**संयोगात्समानजातीय उत्तरसंयोग** इति (कं. १००.५) प्रथमं ह्याकाशाङ्गुलीयसंयोगस्तत्राङ्गुल्यन्तरं संयुज्यते । **कारणगतैकत्वसङ्ख्यात** इति (कं. १००.७) कारणानि परमाणवः । कारणगतेति सर्वत्र योज्यम् । **कार्यवर्तिनी** (कं. १००.७) इति यथा एकं द्व्यणुकम् । **उष्णस्पर्शादिति** (कं. १००.९) अग्न्यादिसत्वात् ।

[कु०] [105] **सुखमिच्छाया** इति (कं. ९९.२४) यद्यपि सुखज्ञाने न तज्जातीयसुखान्तरेच्छा तथापि ज्ञायमानं सुखमपि पूर्वभावित्वानियमेनेच्छाकारणमपि [एषि]तव्यमिति भावः । एवं दुःखस्य द्वेषकारणत्वमेव । ([5]सेयं)

**अणुत्वमहत्त्वे** इति (कं. १००.८) द्व्यणुकेऽणुत्वं परमाणुत्वेन पारिमाण्डल्यस्य कारणत्वाभावादिति भावः । **गुरुत्वादवयविनि** गुरुत्वम् । [6]**ज्ञानाज्ज्ञानमिति** (कं. १००.९) लिङ्गज्ञानाल्लिङ्गिज्ञानम् । [7]**धर्माद्धर्म** इति (कं. १००.१०) यथापजः धनं वादृष्टपर्यंतं शिवपूजाविधेः फलम् । **स्मरणं चेत्यु**(कं. १००.१०)पलक्षणं; क्रिया चेत्यपि द्र[ष्ट]व्यम् । अत्र स्नेहोऽप्युपसङ्ख्येयः, अवयवस्नेहादवयविस्नेहः, समानजातीयेऽपि सङ्ग्रहारम्भे न विरोधः ।

---

१ पुत्रस्य सुखं—जे. २ । २ द्वित्वसङ्ख्या—जे. १ । ३ सुखोत्पत्त्य—अ, ब; सुखोत्पत्त्या—क । ४ जायते—अ । ५ अत्रायं पाठो व्यर्थो भाति—सं । ६ ज्ञानाज्ञान—ह. प्र. । ७ धर्माधर्म—ह. प्र. ।

प्रशस्तपादभाष्यम्

[106] बुद्धिसुखदुःखेच्छाद्वेषभावनाशब्दाः स्वाश्रयसमवेतारम्भकाः ।
रूपरसगन्धस्पर्शपरिमाणस्नेहप्रयत्नाः परत्रारम्भकाः ।
संयोगविभागसङ्ख्यैकपृथक्त्वगुरुत्वद्रवत्ववेगधर्माधर्मास्तूभयत्रारम्भकाः ।

न्यायकन्दली

गुरुत्वान्तरं पतनं च, द्रव्यत्वाद् द्रवत्वान्तरं स्यन्दनक्रिया च, उष्णस्पर्शादुष्णस्पर्शः पार्थिवपरमाणुरूपादयश्च, [1]ज्ञानाज्ज्ञानान्तरं संस्कारश्च, धर्माद्धर्मः सुखं च, अधर्मा[2]दधर्मान्तरं दुःखं च, संस्कारात् संस्कारः स्मरणं च ।

[106] बुद्धिसुखदुःखेच्छाद्वेषभावनाशब्दाः स्वाश्रयसमवेतारम्भकाः । सुखादयस्तावद्यत्र स्वयं वर्तन्ते तत्रैव कार्यं जनयन्ति । बुद्धिस्तु द्वित्वादिकं परत्रारभमाणाप्यात्मविशेषगुणं जनयन्ती स्वाश्रयसमवेतमेव जनयति, नान्यत्र ।

रूपरसगन्धस्पर्शपरिमाणस्नेहप्रयत्नाः परत्रारम्भकाः । [3]अवयवेषु वर्तमाना रूपादयो यथासम्भवमवयविनि रूपादिकमारभन्ते, आत्मनि समवेतः प्रयत्नो हस्तादिषु क्रियाहेतुः ।

संयोगादय उभयत्रारम्भकाः । स्वाश्रये तदन्यत्र चारम्भकाः । तन्तुषु वर्तमानः संयोगस्तेष्वेव पटमारभते, विषयेन्द्रियसंयोगश्चात्मनि ज्ञानम् । वंशदलयोर्विभागोऽ-

[टि०] द्वित्वबहुत्वेति – परमाणुद्वयगतद्वित्वसङ्ख्यया [4]द्व्यणुकेऽणुपरिमाणोत्पत्तिः [5]परमाणुगताणुत्वस्य द्व्यणुकाणुत्वं प्रत्यकारणत्वात् । कारणगतेन हि [6]परिमाणेन कार्ये परिमाणं जन्यमानं स्वतः प्रकृष्टमेव जन्यते [7]यथा महद्भ्यां मृत्पिण्डाभ्यामेको [8]महत्तरो मृत्पिण्डः, तथा च परमाणुपरिमाणात् द्व्यणुकेऽणुतरपरिमाण[9]मुत्पद्येतेति ।

[पं०] [106] बुद्धिस्तु द्वित्वादिकमिति (कं. १००.१४) 'अपेक्षाबुद्धिजा सङ्ख्या' इति वचनात् । परत्रेति (कं. १००.१४) चैत्रादौ । आत्मविशेषगुणमिति (कं. १००.१५) सुखादिकम् ।

तेष्वेव पटमारभते इति (कं. १००.२३) स्वाश्रयारम्भकोदाहरणत्वे तत् । विषयेन्द्रियसंयोगश्चात्मनि[10] ज्ञानमिति (कं. १००.२३) तदन्यत्रारम्भकत्वोदाहरणमेतत् । वंशदलयोर्विभाग (कं. १००.२३) इति निमित्तकारणम् । वंश-

[कु०] [106] प्रयत्नो हस्तादिष्विति (कं. १००.१९) विहितनिषिद्धविषय इति शेषः । ततश्च विहितनिषिद्धविषयप्रवृत्तिरूपप्रयत्नेन स्वाश्रये धर्माधर्मारम्भेऽपि न विरोधः । उ[भ]यत्रारम्भकेषु सङ्ग्रहहेतुस्नेहः । क्रिया धर्माधर्महेतुर्विहितनिषिद्धविषयः प्रयत्नः उभयसङ्ख्येयः विशिष्यत इति संयोगत्वावान्तरजातिभेदेन वक्ष्यते कर्मकाण्डे ।

१ ज्ञानाज्ज्ञानं – कं. १, कं. २ । २ दधर्मो – कं. १, कं. २ । ३ अवयवे – जे. १, जे. २ । ४ द्व्यणुके परिमाणोत्पत्तिः – अ । ५ गताणुत्वस्य – ड । ६ परमाणेन – अ । ७ तथा – अ, ब, क । ८ महत्तरोत्पिण्डमुद्धा च – अ, ब । ९ मुत्पद्यते – अ, ब, क । १० विज्ञानमिति – कं ।

### प्रशस्तपादभाष्यम्

[107] गुरुत्वद्रवत्ववेगप्रयत्नधर्माधर्मसंयोगविशेषाः क्रियाहेतवः ।

रूपरसगन्धानुष्णस्पर्शसङ्ख्यापरिमाणैकपृथक्त्वस्नेहशब्दाना[1]मसमवायिकारणत्वम् ।

### न्यायकन्दली

[2]न्यत्राकाशे शब्दमारभते, वंशदलाकाशवि[3]भागश्च स्वाश्रय आकाशे । अवयववर्तिन्येकत्वसङ्ख्या [4]अवयविन्येकत्वसङ्ख्यामारभते, स्वाश्रये च द्वित्वादिसङ्ख्याम् । अथावयवेष्वेकपृथक्त्वमवयविन्येकपृथक्त्वं स्वाश्रयेषु [5]द्विपृथक्त्वादिकमिति । कारणगताश्च गुरुत्वद्रवत्ववेगाः कार्येषु [6]गुरुत्वद्रवत्ववेगानारभन्ते, स्वाश्रयेषु क्रियाम् । धर्माधर्मावात्मनि सुखदुःखे परत्र चाग्न्यादौ ज्वलनादिक्रियाम् ।

[107] गुरुत्वादयः क्रियाहेतवः । गुरुत्वात्पतनं द्रवत्वात् स्यन्दनं वेगादिषोरुत्तरकर्माणि प्रयत्नाच्छरीरादिक्रिया धर्माधर्माभ्यामग्न्यादिक्रिया । विशिष्यते इति विशेषः, संयोग एव विशेषः संयोगविशेषः, [7]विशिष्टः संयोगो नोदनाभिघातलक्षणः, सोऽपि क्रियाहेतुरिति वक्ष्यते ।

[टि०] वंशदलाकाश[8]विभागश्च स्वाश्रये इति विभागस्य द्विष्ठत्वे आकाशोऽपि स्वाश्रयमेव ।

[107] एवं ज्ञानादीनामिति – ज्ञानमिच्छाया इच्छा प्रयत्ने क(का)रणं न भवति सर्वात्मगुणान्प्रति तेषां

[पं०] दलाकाशविभाग इति (कं. १००.२४) असमवायिकारणम् । स्वाश्रये आकाशे (कं. १००.२४) इति द्विष्टत्वाद्विभागस्य । अवयववर्तिनीति (कं. १००.२५) अवयव[स्था] । स्वाश्रये इति (कं. १००.२१) पृथक्परमाणुद्वयादौ । एकपृथक्त्वमिति (कं. १००.२६) कर्तृभूतम् (२) एकपृथक्त्वमिति (कं. १००.२६) कर्मभूतम् । स्वाश्रयेष्विति (कं. १००.२६) द्वितन्तुकपटादिषु । [9]द्विपृथक्त्वादिकमिति (कं. १००.२६) कर्मभूतम् । क्रि[या]मिति (कं. १०१.१) पतनस्यन्दनगमनरूपाम् ।

[107] वक्ष्यते (कं. १०१.८) इति कर्मपदार्थे । चतुर्षु महाभूतेष्वप्रत्ययं कर्म । गमनमेव नोदनादिभ्यो भवतीत्यधिकारे ।

[कु०] [107] समवायिकारणैकार्थेति (कं. १०१.१२) समवायिकारणेन सह एकस्मिन्नर्थे समवा[य] इति विग्रहः । अवधृत[10]सामर्थ्यवदिति (कं. १०१.१७) विशेषस्य व्यावर्त्यं प्रश्नपूर्वकं दर्शयति नन्वेवं तर्हीति (कं. १०१.१५) । अत्र प्रयोगः बुद्धयादयो न *धर्माधर्मसमवायिकारणकाः आत्मगुणत्वात् प्रमेयत्वाद्वा* । अधर्माद्दुःखवद्धर्मात्सुखवच्चेति ।

---

१ नां समवायि – दे । २ परत्रा – जे १, जे. २ । ३ विभागः स्वाश्रय – जे. ३ । ४ अवयविन्येकत्वम् – कं. १ । ५ त्रिपृथक्त्वा – कं. १, कं. २ । ६ ताना – कं. १, कं. २ । ७ विशिष्टसंयोगो – जे. २ । ८ विभागश्चेत् – अ, ब, क । ९ त्रिपृथक्त्वादिकमिति – कं । १० सामर्थ्यंस्तु – कं ।

## न्यायकन्दली

रूपादयः शब्दान्ता [1]असमवायिकारणम् । समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यम-समवायिकारणम् । प्रत्यासत्तिश्च समवायिकारणसमवायः समवायिकारणैकार्थसमवायश्च । सुखादीनां समवायिकारणमात्मा, तत्र समवायादात्ममनःसंयोगस्तेषामसमवायिकारणम् । नन्वेवं तर्हि धर्माधर्मयोरप्यसमवायिकारणत्वं स्यात्, न, तयोः समस्तात्मविशेषगुणोत्पत्तौ सामर्थ्यानवधारणात् । तथा हि–धर्मादधर्मदुःखयोरनुत्पत्तिः, अधर्माच्च धर्मसुखयोरनुत्पादः । एवं ज्ञानादीनामपि प्रत्येकं व्यभिचारो दर्शनीयः । सर्वत्रावधृतसामर्थ्यस्तु ज्ञात्मनःसंयोग इत्येतावता विशेषेण तस्यैवासमवायिकारणत्वम् । तथा पटरूपस्य समवायिकारणेन पटेन सहैकस्मिन्नर्थे तन्तौ समवायात् तन्तुरूपं पटरूपस्यासमवायिकारणं न रसादयः, तस्यैव तदुत्पत्तावन्वयव्यतिरेकाभ्यां सामर्थ्यावधारणात् । एवं रसादिष्वपि [2]योज्यम् । उष्णस्पर्शस्य पाकजारम्भे निमित्तकारणत्वमप्यस्ति, तदर्थमनुष्णस्य ग्रहणम् । रूपरसगन्धानुष्णस्पर्शपरिमाणस्नेहानां समवायिकारणैकार्थसमवायादसमवायिकारणत्वम्,

[टि०]कारणत्वव्यभिचारात् । **सर्वत्रावधृत[3]सामर्थ्यस्तु** इति :–समर्थे चैकत्रैवा[4]समवायिकारणे कार्योत्पत्तौ [5]जागरूकेऽनेककल्पनावैयर्थ्यम् । **तदर्थम[6]नुष्णग्रहणम्** इति :–अनात्मधर्मापेक्षया चासमवायिकारणत्वं तेन रूपादीनां ज्ञानं प्रति [7]निमितत्त्वेऽपि न तैर्व्यभिचारः ।

[पं०] **धर्माधर्मयोरपीति** (कं. १०१.१४) निमित्तकारणत्वेनेष्टयोः । **असमवायिकारणत्वं स्या**दिति (कं. १०१.१४) सुखादिष्वसमवायिकारणत्वं प्राप्नोतीत्यर्थः । **समस्तात्मविशेषगुणो**त्पत्ताविति (कं. १०१.१५) आत्मविशेषगुणा ज्ञानादयस्तेषामुत्पादे । **सामर्थ्यानवधारणा**दिति (कं. १०१.१५) निमित्तकारणं हि तौ । द्वितीयप्रत्यासत्तिमाह **तथा पटे**त्यादि (कं. १०१.१८)। **एकस्मिन्नर्थे तन्तौ समवाया**दिति (कं. १०१.१९) पटोऽपि तन्तुसमवेतः पटरूपमपीत्यर्थः । **पाकजारम्भ** इति (कं. १०१.२१) पाकजरूपाद्यारम्भे । [8]**समवाय(यि)कारणसमवाया**दिति (कं. १०१.२४) समवाय(यि)कारणमाकाशः । **उभयथाकारणत्वमिति** (कं. १०१.२५) समवायिकारणे कारणै[का]र्थसमवायिकारणसमवायिकारणसमवायेन वा समवायिकारणत्वमित्यर्थः । **कारणवर्तिनो**रिति (कं. १०१.२६) पृथक्परिमाणद्वयस्थयोः ।

[कु०] एवं ज्ञानादीनामपि न सुखादिकं [9]बुद्ध्यसमवायिकारणकम् । [10]प्राच्येष्वन्यतेत्पाद्दोताः प्रयत्नवदित्यादिप्रयोगः । **अन्वयव्यतिरेकाभ्यामिति** (कं. १०१.२०) तारतम्यानुविधाना[त्] इत्यर्थः । तदर्थमनुष्णेति (कं. १०१.२२) अत एव सावधारणमित्यनुसन्धेयम् । तथाऽरुणया क्रीणाति, वायव्यंगश्वेतमालभेत कपिलां न ताडयेदित्यादि श्रुतिस्मृतिबलाद् भूयस्य धर्माधर्मोत्पत्तौ निमित्तत्वा[द]स्यापि दर्शनाविरोधः ।

---

१ समवायिकारणम्–न समवायिकारणमसमवायिकारणम्–जे. १, जे. २। २ योज्यते–कं. १; कं. २। ३ सामर्थ्यस्थितिः–अ, ब। ४ ऽसमवायकारणे–अ, ब, क। ५ जागरूकेऽनेक–अ। ६ मनुष्णस्पर्शग्रहणम्–मु., मनुष्णग्रहणम्–जे. १, जे. ३। ७ मितत्त्वे–अ। ८ समवायि इति शुद्धः पाठः सर्वत्र कं. पुस्तके। ९ एतत्पदानन्तरं बुद्ध्यसमवायिकारणेकार्थेत्यादिकः पाठोऽत्र पुनरावर्तितः ह. पुस्तके। १० अर्थदृष्टयेदं वाक्यमसम्बद्धं भाति–सं।

### प्रशस्तपादभाष्यम्

**बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानां निमित्तकारणत्वम् । संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानामुभयथा कारणत्वम् ।**

### न्यायकन्दली

कारणवर्त्तिनामेषां [1]कार्यसमानजातीयारम्भकत्वात् । शब्दस्य समवायिकारणसमवायादसमवायिकारणता, आकाशाश्रितेनाकाशे एव शब्दान्तरारम्भात् । सङ्ख्यापृथक्त्वयोरुभयथा कारणत्वम्, [2]कारणवर्त्तिनोस्तयोः कार्ये यथासङ्ख्यमेकत्वैकपृथक्त्वारम्भकत्वात्, स्वाश्रये द्वित्वद्विपृथक्त्वजनकत्वात् ।

बुद्धचादीनां निमित्तकारणत्वम् । तेषां निमित्तकारणत्वमेवेत्यर्थः ।

संयोगविभागोष्णस्पर्शगुरुद्रवत्ववेगानामुभयथा कारणत्वम् । असमवायिकारणत्वं निमित्तकारणत्वं [3]चेत्यर्थः । तथा हि—भेरीदण्डसंयोगः शब्दोत्पत्तौ निमित्तं भेर्याकाशसंयोगोऽसमवायिकारणम् । [4]एवं वंशदलविभागो निमित्तं वंशदलाकाशविभागोऽ-

**[टि०]** एवं [5]द्रवत्ववेगयोः इति–[6]द्रवत्वं स्वाश्रये [7]स्यन्दनोत्पत्तावसमवायिकारणम्, सङ्ग्रहे निमित्तम्, वेगः स्वाश्रये कर्मप्रत्यसमवायिकारणं [8]नोदकस्थितश्च नोदने निमित्तम्, वेगवद् द्रव्यसंयोगस्यापि नोदनहेतुत्वात् ।

**[पं०]** **कार्येति** (कं. १०१.२६) द्व्यणुके । कारणवर्त्तिनोरित्यादिगद्येन समवायिकारणैकार्थसमवायो दर्शितः । यतो द्व्यणुकमपि परमाणुद्वये समवेतम् । द्वित्वसङ्ख्यापि इति भावना । स्वाश्रये **द्वित्वद्विपृथक्त्वजनकत्वादिति** (कं. १०१.२६) स्वाश्रये द्व्यणुके द्वित्वं च द्विपृथक्त्वं च सङ्ख्यापृथक्त्वे कर्तृणी जनयतः । अत्र समवायिकारणसमवायः । एवं त्रित्वत्रिपृथक्त्वादिजनकत्वमप्यूह्यम् ।

[9]**पाकजानामिति** (कं. १०२.१०) पार्थिवरूपरसगन्धस्पर्शानाम् । [10]**नोदनाभिघातेति** (कं. १०२.११) नोद्यनोदयोः परस्परमविभागहेतुः कर्म । नोदनादविभागहेतुः कर्माभिघातः ।

**[कु०]** बुद्धिमिव धर्माधर्मा(व)दपि प्रति द्रव्यादीनां त्रयाणां निमित्तत्वादात्मधर्मं विहायेत्यभिप्रायात् । न च रसस्य जीवनपुष्टिबलारोग्यनिमित्तत्वेन विरोधः, आगमेतर(मात्र)गम्यस्य निमित्तत्वस्य व्यवच्छेद्यत्वेनेहाभिसन्धानात् । न चाभिधानोत्पादेनाय(र्थ)क्रिययापेक्ष्यमाणस्पर्शविशेषस्य निमित्तत्वाद्विरोधः, एकश्रेय(एककाश्र) कार्यं प्रतीति विवक्षितत्वात् । संख्यापृथक्त्वयोरित्यर्थः ।

**उभयथेति** (कं. १०२.६) समवायिकारणसमवायात् समवायकारणैकार्थसमवाया चेत्यर्थः । द्रव्यादीनां त्रयाणामप्यात्मधर्मान् प्रति निमित्तकारणमविशिष्टं सत्कथं बुद्धयादीनामेवैतदित्यत आह **निमित्त** [11]**कारणमेवेति** (कं. १०२.७) । **स्वाश्रये पतनस्ये** (कं. १०२.१०) त्युपलक्षणम् । कार्यगुरुत्वस्यापि कारणगुणत्व[म]समवायिकारणं भवत्येव ।

---

१ सजातीया–कं. १; कं. २ । २ कारणवर्त्तिनो कारणैकार्थसमवायः, स्वाश्रये समवायिकारणसमवायः–जे. १, टिप्पण । ३ चेति–जे. १, जे. २ । ४ एवं विभागे दलविभागो–कं. १, कं. २ । ५, ६ द्रव्यत्वद्रव्यत्वं–अ, ब । ७ स्यन्दनोत्तपत्त्या च समवायि–अ, ब । ८ नोदन–अ । ९ पाकमजानामिति अ–पुस्तके लेखनप्रमादजः पाठः । १० नोदनाभिघातः–कं । ११ कारणं च–कं ।

### प्रशस्तपादभाष्यम्

[108] [1]परत्वापरत्वद्वित्वद्विपृथक्त्वादीनामकारणत्वम् ।
संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तित्वम् ।

### न्यायकन्दली

समवायिकारणम् । उष्णस्पर्श उष्णस्पर्शस्यासमवायिकारणं पाकजानां निमित्तकारणम् । गुरुत्वं स्वाश्रये पतनस्यासमवायिकारणम् । [2]नोदनाभिघातक्रियोत्पत्तौ निमित्तकारणम् । [एवं] द्रवत्ववेगयोरपि योज्यम् ।

[108] परत्वापरत्वादीनामकारणत्वम् । नैतान्यसमवायिकारणं नापि निमित्तकारणम् । द्वित्वद्विपृथक्त्वादीनामित्यादिपदेन त्रिपृथक्त्वानां परमाणुपरिमाणपरममहत्परिमाणयोश्च परिग्रहः ।

संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तित्वमिति । प्रदेशवृत्तयोऽव्याप्यवृत्तयः स्वाश्रये वर्त्तन्ते न वर्त्तन्ते चेत्यर्थः । नन्वेतदयुक्तम्, युगपदेकस्यैकत्र भावाभावविरोधात् । नानुपपन्नम्, प्रमाणेन तथाभावप्रतीतेः । तथा हि–महतो वृक्षस्य पुरुषेण सहाग्रे संयोगो मूले च तदभावः प्रतीयते, मूले वृक्षोपलम्भेऽपि संयोगस्य सर्वै[3]रनुपलम्भात् अग्रे

[टि०] [108] युगपदेक[4]स्यैकत्र इति :–एकस्या[5]धेयस्यैकत्राधारे युगपद्भावाभावयोर्विरोधात् आधेयस्यापि विरुद्ध-धर्माध्या[6]सात् भेदप्रसङ्ग इति भावः । प्रमाणेनेति प्रत्यक्षेणेत्यर्थः । वृक्षे एव पुरुषस्य इति :–ननु यथा पुरुषस्य वृक्षे [7]भाव एवं वृक्षप्रदेशेऽप्यस्ति तत्कथं 'वृक्षे एवेत्यवधारणं कृतम् ? सत्यम्, प्रस्तुताभिप्रायेणेदं कृतम् । प्रस्तुते हि

[पं०] [108] प्रमाणेनेति (कं. १०२.२०)–प्रत्यक्षेण । मूले वृक्षोपलम्भेऽपि संयोगस्य (कं. १०२.२१) इत्यत्र गद्ये मूले संयोगस्य इति पदशे[9]षः ।

[कु०] [108] नापि निमित्त [10]कारणत्वमिति (कं. १०२.१३) आत्मधर्मान् विहायेति शेषः । बुद्ध्यादीनां प्रति परत्वादीनामपि निमित्तकारणत्वात् ।

ननु शब्दाश्रयस्यात्मनश्च प्रदेशा न सन्त्येव, घटपटादीनामवयवरूपप्रदेशसद्भावेऽपि संयोगविभागयोस्तन्मात्र-वृत्तित्वेऽवयवानामप्यवयवितया परमाणुवृत्तित्वपर्यवसानेऽतीन्द्रियत्वमेव पर्यवस्येदित्यत आह प्रदेशवृत्तयोऽव्याप्यवृत्तय इति (१०२.१८) तदेतत्किमित्यत आह स्वाश्रय (कं. १०२.१९) इति । विधिनिषेधयोः स्वरूप इति विरोधं दृष्ट्वा

१ परत्वापरत्वद्विपृथक्त्वादीनाम्–जे. । २ नोदनाभिघातः–कं. १, कं. २ । ३ रनुपलम्भात् न च–कं. १, कं. २ । ४ स्यैकत्र–अ, ब, क । ५ स्याध्येयस्यैकत्राधारे–अ, ब । ६ ध्यासप्रसङ्ग–अ । ७ सावग च–ड । ८ वृक्षेण–ड । ९ पदयोगः–ब । १० कारणम्–कं; अत्रापि विशिष्टमित्यादिपाठः पुनरावर्तितः ।

## न्यायकन्दली

चोपलम्भात्। न च मूलग्रयोरेव संयोगतदभावौ, तत्प्रदेशावच्छेदेन वृक्षे एव पुरुषस्य भावाभावप्रतीतेः। यदि प्रदेशस्य संयोगो न प्रदेशिनस्तदा प्रदेशस्यापि स्वप्रदेशापेक्षया प्रदेशित्वान्निष्प्रदेशे परमाणुमात्रे संयोगः स्यात्। तद्वृत्तिस्तु संयोगो न प्रत्यक्ष इति संयोगप्रतीत्यभाव एव पर्यवस्यति। यथा च रूपादिभेदेऽप्येकोऽवयवी न भिद्यते तथा [1]संयोगः, सदसद्भावाभ्यां तदभावाभ्यामपि, उभयत्रापि तदेकत्वस्य प्रत्यक्षसिद्धत्वात्। यद्यप्युभयाश्रयः संयोगस्तयोरुपलब्धा[2]वुपलभ्यत एव, तथापि तस्य रूपादिवद् गृह्यमाणाखिलावयवावच्छेदेनानुपलम्भादव्यापकत्वम्। एवं शब्दोऽप्याकाशं न व्याप्नोति, तत्रैवास्य देशभेदेनोपलम्भानुपलम्भाभ्यां युगपद्भावाभावसम्भवात्। बुद्ध्यादयो ह्यन्तर्बहिश्चोपलम्भानुपलम्भाभ्यामव्यापकाः। कथं तर्हि धर्माधर्माभ्यामग्न्यादिषु क्रिया, तयो[3]स्तद्देशेऽभावादिति चेन्न, तत्रासतोरपि तयोः स्वाश्रयसन्निधिमात्रेण निमित्तत्वात्। यथा वस्त्रस्यैकान्ते चाण्डालस्पर्शोऽपरान्तसंयुक्तस्य त्रैवर्णिकस्य प्रत्यवायहेतुस्तथैवमपि द्रष्टव्यम्।

[टि०] तत्र परैः संयोगो न मन्यतेऽत एवकारेण [4]प्रामाणिकत्वं तस्य व्यवस्थाप्यत इति। अथ संयोगभावाभावलक्षणविरुद्धधर्माध्यासात् पराभिप्राय[5]प्रसञ्जितमवयविनो भेद निरस्यति–**यथा च रूपादिभेदेऽपि** इति :–रूपरसगन्धस्पर्शादीनामितरेतरभाववतां भेदेऽपीत्यर्थः।

[कु०] सहानवस्थानभ्रमेण चोदयति **नन्विति** (कं. १०२.१९)। एकत्रधर्मिणि प्रमाणबाध्ये हि सहानवस्थानलक्षणो विरोध इत्याश्रयवान् परिहरति **नानुपपन्नमिति** (कं. १०२.२०)। सहावस्थाने प्रमाणं प्रत्यक्ष[प्र]माणतया हाति। प्रत्यक्षस्यान्यथासिद्धिमाशङ्क्य परिहरति **न चेति** (कं. १०२.२२)। स्वरूपतद्धीनामपि [स]हावस्थाने दृष्टान्तमाह **यथेति** (कं. १०२.२५)। मूले च सन्नेव संयोगः सम्बन्धिनोरन्यतरस्यानुपलम्भेनापि नोपलभ्येतेति शङ्कामपनयति **यद्यपीति** (कं. १०३.१)। **तत्रैवास्य देशभेदेनेति** (कं. १०३.३)। यद्यप्याकाशस्य देशा न सन्ति निरवयवत्वात् तथापि प्रदेशवृत्तिसंयोगोपाधिना देशव्यवहारो द्रष्टव्यः। **अन्तर्बहिरिति** (कं. १०३.४) शरीरापेक्षया द्रष्टव्यम् नन्वात्मविशेषगुणानां शरीरावच्छिन्नं चिछन्नत्वं) शरीरवृत्तित्वे अग्न्यादीनामूर्ध्वज्वलनादिकमदृष्टकारितमिति विरुद्धमित्याशङ्कते **कथं तर्हीति** (कं. १०३.४)। परिहरति **तत्रेति** (कं. १०३.५)।

---

१ संयोगतदभावाभ्या–कं. १, कं. २। २ वुपलभते–कं. १, कं. २। ३ स्तद्देशेऽसम्भवात्–जे. १, स्तद्देशासम्भवात् –जे. २। ४ प्रमाणकत्वं–अ, ब। ५ प्रायसञ्जितमवयविनो – ब।

प्रशस्तपादभाष्यम्

[109] **शेषाणामाश्रयव्यापित्वम् ।**

**अपाकजरूपरसगन्ध[1]स्पर्शपरिमाणैक[2]पृथक्त्वसांसिद्धिकद्रवत्वगुरुत्वस्नेहानां यावद्द्रव्यभावित्वम् ।**

**शेषाणामयावद्द्रव्य[3]भावित्वम् ।**

**[4]रूपादीनां सर्वेषां गुणानां प्रत्येकमपरसामान्यसम्बन्धाद्रूपादिसंज्ञा भवन्ति ।**

न्यायकन्दली

[109] **शेषाणामाश्रयव्यापित्वम् । उक्तेभ्यो येऽन्ये ते शेषाः । तेषामाश्रयव्यापित्वं संयोगादिवदव्यापकं न भवतीत्यर्थः ।**

**अपाकजरूपादीनां यावद्द्रव्यभावित्वम् । यावदाश्रयद्रव्यं तावद्रूपादयो विद्यन्ते । पाकजरूपादयः सत्येवाश्रये [5]न सन्तीत्यपाकजग्रहणम् ।**

**शेषाणामयावद्द्रव्यभावित्वम् । अपाकजरूपादिव्यतिरिक्ता गुणा यावद्द्रव्यं न [6]भवन्ति, सत्येवाश्रये नश्यन्तीत्यर्थः ।**

[टि०] [109] उक्तेभ्यो येऽन्ये इति तेषां रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वगुरुत्वद्रवत्वस्नेहवेगस्थितिस्थापकपरत्वापरत्वानामित्यर्थः ।

[7]रूपत्वं सामान्यम् इति–केचित् **प्राभाकरा** इत्यर्थः । **न तेषाम्** इत्यादिः–तेषां नीलादीनां चक्षुषा ग्रहणमेव रूपमित्युल्लेखेन भवति । यदि तु चक्षुर्ग्राह्यतानिमित्तो रूपप्रत्यक्षस्तया प्रथमं चक्षुर्ग्रहिताग्रहणं स्यात्तत उपाधिज्ञाने

[पं०] [109] **मूलाश्रयोरेव संयोगतदभावौ** इति (कं. १०२.२२) मूले तदभावोऽग्रे संयोग इति व्याख्येयं न तु यथासङ्ख्यं ग्राह्यमसम्भवात् । **तत्प्रदेशावच्छेदेनेति** (कं. १०२.२२) मूलाग्रलक्षणव्याप्त्या । **तद्वृत्तिरिति** (कं. १०२.२४) परि(र)माणुमात्रवृत्तिः । **तदेकत्वस्येति** (कं. १०२.२६) अवयव्येकत्वस्य । **उभयाश्रय**(कं. १०३.१) इति–पुरुषवृक्षाश्रयः । **तयोरिति** (कं. १०३.१) पुरुषवृक्षयोः । **तत्रैवेति** (कं. १०३.३) आकाशे । **अस्येति** (कं. १०३.३) शब्दस्य । **अग्न्यादिषु क्रियेति** (कं. १०३.५) क्रिया ज्व(लना)दिका । **स्वाश्रयसन्निधौति** (कं. १०३.६) स्वाश्रय आत्मा ।

[कु०] [109] **अयावद्द्रव्यभावित्वमिति** (कं. १०३.१६) संभ[व]मात्रेणैतदुक्तं क्वचित्संयोगादीनां ज्वालादिषु यावद्द्रव्यभावित्वसम्भवात् ।

अपर[8]**जात्येति** (कं. १०३.२१) गुणत्वावान्तरजात्येत्यर्थः । **रूपत्वाद्यपर** इति (कं. १०३.२२) रूपत्वादिकं रूपादीनां लक्षणमित्यर्थः । **न तेषामि[ति]** (कं. १०३.२५) चक्षुःसम्बन्धस्योपाधेर्ग्रहणात्प्रागेव रूपं रूपमित्यनुगम-

---

१ गन्धानुष्ण–जे । २ पृथकत्व गुरुत्व–जे । ३ भावित्वं चेति–कं. १, कं. २ । ४ रूपादीनां प्रत्येक–दे । ५ नश्यन्ति–कं. १ कं. २; न भवन्ति–जे, २ । ६ सन्ति–कं. १; कं. २ । ७ रूपत्व–अ, ब । ८ जातेः–कं. ।

न्यायकन्दली

सम्प्रति प्रत्येकं गुणानां परस्परवैधर्म्यप्रतिपादनार्थमाह–रूपादीनामिति । रूपमादिर्येषां गुणानां तेषामेकैकं प्रत्यपरजाते रूपत्वादिकायाः सम्बन्धाद्रूपादिसंज्ञा रूपमिति रस [1]इत्यादि संज्ञा भवन्ति । रूपत्वाद्यपरसामान्यकृता रूपादिसंज्ञा रूपादीनां प्रत्येकं वैधर्म्यम् । [2]रूपत्वादिसामान्यं नास्तीति केचित्, तदयुक्तम्, नीलपीतादिभेदेषु रूपं रूपमिति प्रत्ययानुवृत्तेः । चक्षुर्ग्राह्यतोपाधिकृता तदनुवृत्तिरिति चेन्न, तेषां रूपमित्येवं चक्षुषाऽग्रहणात् । तद्ग्राह्यतानिमित्तत्वे हि ग्रहणादनन्तरं तथा प्रत्ययः स्यात् । चक्षुर्ग्राह्यता तद्ग्रहणयोग्यता, सा च नीलादिषु त्रिकालावस्थायिनीति चेत् ? अस्तु कामम्, किन्त्वेषा यदि प्रतिरूपं व्यावृत्ता, प्रत्ययानुगमो न स्यात्, एकनिमित्ताभावात् । अथानुवृत्ता, संज्ञाभेदमात्रम् । एवं रसादयोऽपि व्याख्याताः ।

**[टि०]** सति रूपमिति प्रत्ययः स्यात्, न त्वेवमस्ति झटित्येव रूपमिति [3]प्रत्ययोदयात् । ननु यदि साक्षाच्चक्षुर्ग्राहि(ह्य)तोपाधिः स्यात्तदा तावकीनो दोषः [4]स्यात्, न त्वेवमस्ति, चक्षुर्ग्रहणयोग्यताया उपाधित्वात्तस्याश्च चक्षुरिन्द्रियग्रहणात्पू[5]र्वकालमपि सत्त्वादित्येतदाशङ्कते **चक्षु[6]र्ग्राहिता तद्ग्रहणेति** ।।

( इति गुणग्रन्थे साधर्म्यवैधर्म्यनिरूपणम् ।। )

**[पं०]** **सत्येवाश्रये [7]न सन्तीति** (कं. १०३.१४) आश्रये सत्यपि पाकजोत्पत्तेः प्रागमीषामभावात् ।

**प्रत्येकमिति** (कं. १०३.२०–२३) परस्परम् । मीमांसकानाशङ्कयाह [8]रूपत्वमित्यादि (कं. १०३.२३) । **तदनुवृत्तिरिति** (कं. १०३.२४) रूपानुवृत्तिः । **रूपमित्येवं चक्षुषाऽग्रहणादिति** (कं. १०३.२५) । चक्षुषाग्रहणादिति चक्षुषा रूपमित्येव गृह्यते न तु रूपं रूपमित्यनु[गता]कारः प्रत्यय इत्यर्थः । ग्रहणादिति (कं. १०३.२५) वस्तुग्रहणात् । **तथा प्रत्यय इति** (कं. १०३.२६) रूपं रूपमिति प्रत्ययः ।

**[कु०]** दर्शनादित्यर्थः । **ग्रहणादनन्तरमिति** (कं. १०३.२५) उपाधिग्रहणानन्तरमेवोपहितप्रत्ययेन भवितव्यमिति भावः । शङ्कते तत्रातीन्द्रियायां योग्यतायां प्रमाणाभावात् स्वरूपमेव योग्यता तदतिरिक्तारिक्तावी(पि) इन्द्रियग्राह्या ना[न] इत्याह **अस्तु काममिति** (कं. १०३.२७) । द्वितीयमाशङ्क्य परिहरति **अथेति** (कं. १०३.२८) । **एवं रसादय इति** (कं. १०३.२८) रसत्वादिजाति[9]मत्त्वमिति शेषः । एतेनेन्द्रियविशेषग्राह्यतोपाधित्वे रूपाद्यनुवृत्तीनामितरेतराश्रयत्वं इन्द्रियविशेषे सिद्ध एव रूपाद्यनुवृत्त(त्ति)सिद्धिः रूपादिग्राहकत्वेनेन्द्रियविशेषसिद्धिरित्युक्तप्रायं द्रष्टव्यम् ।

१ इति–कं. १; कं. २ । २ रूपत्व–कं. १; कं. २ । ३ प्रत्ययादयात्–अ, ब । ४ स्यान्ना–अ । ५ पूर्वमपि–ड । ६ चक्षुर्ग्राह्यताद्–अ, ब । ७ नश्यन्तीति–कं । ८ रूपत्वसामान्य–कं । ९ मत्रयेति शेषः इत्यशुद्धं–ह. प्र ।

### प्रशस्तपादभाष्यम्

[110-111] तत्र रूपं चक्षुर्ग्राह्यं पृथिव्युदकज्वलनवृत्ति द्रव्याद्युपलम्भकं नयनसहकारि शुक्लाद्यनेकप्रकारं सलिलादिपरमाणुषु नित्यं पार्थिवपरमाणुष्वग्निसंयोगविरोधि [1]सर्वकार्येषु [2]कारणगुणपूर्वकमाश्रयविनाशादेव विनश्यतीति ।

### न्यायकन्दली

[110] सर्वपदार्थानामभिव्यक्तिनिमित्तत्वादादौ रूपं निरूपयति–तत्र रूपं चक्षुर्ग्राह्यमिति । तेषां गुणानां मध्ये रूपं चक्षुषैव गृह्यते [3]नेन्द्रियान्तरेण । ननु रूपत्वमपि चक्षुषैव गृह्यते कथमिदं वैधर्म्यं रूपस्य ? न, गुणेभ्यो वैधर्म्यस्य विवक्षितत्वात् । तथा च प्रकृतेभ्यो निर्द्धारणार्थं तत्रेत्युक्तम् । सामान्यादस्य वैधर्म्यं तु सामान्यवत्त्वमेव । पृथिव्युदकज्वलनवृत्ति । पृथिव्युदकज्वलनेष्वेव वर्त्तते । द्रव्याद्युपलम्भकम् । यस्मिन्नाश्रये वर्त्तते तस्य द्रव्यस्य तद्गतानां च गुणकर्मसामान्यानामुपलम्भकम् । नयनसहकारि । स्वगतं रूपं चक्षुषो विषय[4]ग्रहणे सहकारि । शुक्लाद्यनेकप्रकारम् । शुक्लादयोऽनेके प्रकारा यस्य तत् तथाविधम् । सलिलादिपरमाणुषु नित्यम् । [5]सलिलपरमाणुषु तेजःपरमाणुषु च नित्यम् ।

[टि०] [110 to 112] [ अथ रूपरसनिरूपणम् ]

ननु यद्यपि गुणेभ्य इदं वैधर्म्यं तथापि रूपत्वसामान्येन सह साधर्म्यं तदवस्थमेवेत्याह सामान्यादस्य इति । यदि ह्यकारणस्य इति :–ननु द्रव्योत्पादनद्वारेण तद्गतरूपं [6]प्रत्यपि संयोगस्य कारणत्वात् [7]कथमकारणस्य

अथ रूपगुणे(णः)

[पं०] [110] गुणेभ्यो वैधर्म्यस्य विवक्षितत्वादिति (कं. १०४.८) शेषगुणेभ्यो हि रूपस्य वैधर्म्यं विवक्षितं न पुनः सामान्यात् । रूपत्वं च सामान्यं न गुणः । प्रकृतेभ्य इति (कं. १०४.९) रसादिभ्यः । स्वगतं रूपं चक्षुषो विषय[8]ग्रहणसहकारीति (कं. १०४.१२) चक्षुषः स्वगतं रूपं विषयग्रहणे सहकारि भवति । चक्षुर्हि तैजसं अतः स्वरूपसहकृतमेव पररूपं गृह्णातीति भावः । वक्ष्याम इति (क. १०४.१६) पाकजोत्पत्तौ ।

[कु०][110] नन्वस्तु चक्षुर्ग्राह्यत्वं गुणान्तरेभ्यो वैधर्म्यं रूपत्वसामान्यात्तु कथमित्यत आह सामान्यादिति (कं. १०४.९) । तच्च सामान्यादीनां त्रयाणामित्यत्रोक्तमित्यर्थः । सङ्ख्यादीनामपि पृथिव्यादिवृत्तित्वात्कथमिदं वैधर्म्यमित्यत आह पृथिव्युदकज्वलनेष्वेवेति (कं. १०४.१०) । यस्मि[न्नि]ति (कं. १०४.११) एतेन क्वचित्तु समवायात्क्वचिदेकार्थसमवायात्क्वचित्समवेतसमवायाच्च रूपस्य विषयोपलब्धिकारणत्वेन कारणस्थस्य पुरुषार्थहेतुत्व-

---

१ सर्वकार्यद्रव्येषु–कं. भा. कि. भा. । २ कारणपूर्वं – दे । ३ नेन्द्रियान्तरेण रूपमेव चक्षुर्ग्राह्यम्–जे. १; जे. २ । ४ ग्रहण – पं । ५ सलिलादि – जे. १; जे. २ । ६ प्रत्यभि – ड । ७ मकारणसंयोगस्येत्युक्तम् – अ, ब । ८ ग्रहणे – कं ।

## न्यायकन्दली

पार्थिवपरमाणुष्वग्निसंयोगविरोधि । [1]अग्निसंयोगो विरोधीविनाशकः पार्थिवपरमाणुरूपस्येति च वक्ष्यामः । [2]सर्वकार्येषु कारणगुणपूर्वकम् । [3]कार्यद्रव्यगतं रूपं [4]स्वाश्रयसम[5]वायिकारणरूपपूर्वकम् । आश्रयविनाशादेव विनश्यति । कार्यरूपविनाशस्याश्रयविनाश एव हेतुः ।

[111] आश्रयविनाशाद्रूपस्य विनाश इति न मृष्यामहे सहैव रूपद्रव्ययोर्विनाशप्रतीतेरिति चेन्न, कारणाभावात् । मुद्गराभिघातात् तावद[6]वयवक्रियाविभागादिक्रमेण द्रव्यारम्भक[7]संयोगनिवृत्तौ तदारब्धस्य द्रव्यस्य विनाशः कारणविनाशात्, तद्गतरूपविनाशे तु किं कारणम् ? यदि ह्यकारणस्याप्यवयवसंयोगस्य [8]विनाशाद्रूपविनाशः, [9]कपालरूपाण्यपि ततो विनश्येयुरविशेषात् । [10]तस्मात् पूर्वं द्रवस्य विनाशस्तदनु रूपस्य, आशुभावात् क्रमस्याग्रहणमिति युक्तमुत्पश्यामः ।

[टि०] संयोगस्येत्युक्तम् ? नैवम्, [11]साक्षात्कारणत्वस्यात्र विवक्षितत्वात् । अन्यथैकार्थसमवायलक्षणया प्रत्यासत्त्या तस्यकपाल[12]मालां प्रत्यपि कारणत्वात्, तद्विनाशे कपालमालानाशप्रसङ्गात् । ननु गुणगुणिनोस्तादात्म्याभ्युपगमात्

[पं०] [111] **न मृष्यामहे** इति (कं. १०४.१८) मीमांसकवचनम् । **अवयवविभागादि क्रमेणेत्यादि** (कं. १०४.२०) अवयवानां ? [13]स्थासकोशादीनां क्रिया चलनवलनाधिका भवति, ततः क्रियातो विभागः, विभागात् पूर्वसंयोगविनाशः, उत्तरसंयोगोत्पत्तिरिति क्रमस्तेन घटादिद्रव्यारम्भकसंयोगस्य निवृत्तौ सत्याम् । **तयारब्धस्येति** (कं. १०४.२०) संयोगारब्धस्येति घटादेर्विनाशः । **कारणविनाशादिति** (कं. १०४.२१) संयोगविनाशाज्जायते इति वाक्यार्थः ।

[कु०] मुक्तमिति भावः । [14]**चक्षुषो विषयग्रहण इति** (कं. १०४.१२) तत्सहितस्यैव चक्षुषो यदा सह गुणानामिन्द्रियभावादिति पार्थिवपरमाणुरूपस्योत्पादकविनाशकौ दर्शयितुं सलिलादिपरमाणुषु नित्यत्वमुक्तम् । अतो गुणान्तरसाधारणत्वान्नेदं वैधर्म्यमित्यचोद्यम् ।

[111] **सहैवेति** (कं. १०४.१९) अनाश्रयस्य कदाचिदप्यग्रहणादिति भावः । चक्षुरुन्मेष [निमेष] ग्रहणयोरिवानुमानात्कार्यकारणभावः क्रमाद्ग्रहणं चेत्यादाय तत्परिहरति नेति (कं. १०९.१८) । अकारणनाशादकार्यनाशे योऽतिप्रसङ्ग[स्त]स्य परिहाराय तादात्म्यमाशङ्कते **ये त्विति** (कं. १०४.२४) । यद्यपि गुणे भेदः प्रागेव

---

१ अग्निसंयोगो विनाशकः – कं. १; कं. २ । २ कार्यद्रव्येषु–कं. १; कं. २ । ३ त्र्यणुकः – टिप्पण जे. १ । ४ त्र्यणुकः–टिप्पण जे. १ । ५ द्व्यणुकः–टिप्पण जे. १ । ६ अवयवक्रियाः विभागादिक्रिया दनोनाख्याः – टिप्पण–जे. १ । ७ संयोगस्य – जे. १; जे. २ । ८ विनाशे–जे. १, नाशो रूपनाशकः – जे. २ । ९ कपालरूपाण्यपि नश्येयुः – जे. १; जे. २ । १० तस्माद्द्रव्यस्य नाशः – जे. २ । ११ साक्षाकारणस्य – अ, साक्षात्करणस्य अत्र – ब । १२ कपालमाल–अ । १३ अत्र लेखकप्रमादाद्विचित्र एवाऽस्पष्टार्थः पाठोऽजनि । १४ चक्षुको विषयग्रहणादेति – ह. पु. ।

न्यायकन्दली

ये तु रूपद्रव्ययोस्तादात्म्यमिच्छन्तो द्रव्यकारणमेव [1]रूपस्य कारणमाहुस्ते इदं प्रष्टव्याः–किं परमाणुरूपं रूपान्तरमारभते न वा? आरभमाणमपि किं स्वात्मन्यारभते? किं वा स्वाश्रये परमाणौ? यदि नारभते? यदि वा स्वात्मनि स्वाश्रये चारभते? द्व्यणुके [2]रूपाद्यनुत्पत्तौ तत्पूर्वं जगदरूपं स्यात्। [3]अथ तद् द्व्यणुके आरभते, अविद्यमानस्य [4]स्वाश्रयत्वायोगादुत्पन्ने द्व्यणुके पश्चात्तत्र रूपोत्पत्तिरित्यवश्यमभ्युपेतव्यम्, निराश्रयस्य कार्यस्यानुत्पादात्। तथा सति तादात्म्यं कुतः? पूर्वापरकालभावात्। किञ्चावस्थित एव घटे रूपादयो वह्निसंयोगाद्वि[5]नश्यन्ति तथा सति जायन्ते चेति भवतामभ्युपगमः, यस्य चोत्पत्तौ यस्यानुत्पत्तिर्यन्निवृत्तौ चानिवृत्तिर्न तयोस्तादात्म्यमिति प्रक्रियेयम्। न चात्यन्तभेदे पृथगुपलम्भप्रसङ्गः, सर्वदा रूपस्य द्रव्याश्रितत्वात्। एतदेव कथम्? वस्तुस्वाभाव्यादिति कृतं [6]गुरुषु प्रतिकूलवादेन।

[पं०] यदि ह्यकारणस्येत्यादि (कं. १०४.२१) घटादिरूपं हि अवयवरूपादुत्पन्नं न चावयवसंयोगात्। अतोऽवयवसंयोगो घटादिरूपं प्रति अकारणम्। अकारणस्यापि चावयवसंयोगस्य नाशे रूपनाशः स्याच्चेत् तर्हि अवयवसंयोगस्य नाशे कपालरूपाण्यपि विनश्येयुरविशेषात्। घटादिगतरूपं प्रति हि अकारणत्वमवयवसंयोगस्य, कपालरूपाणि च प्रति तुल्यमेवेति वाक्यार्थः।

स्वात्मनीति (कं. १०४.२६) रूपे एव। तत्पूर्वकं जगदिति (कं. १०४.२७) तत्पूर्वकं द्व्यणुकपूर्वकम् द्व्यणुकादिः सृष्टिरिति कृत्वा। प्रक्रियेयमिति (कं. १०५.६) वाङ्मात्रमेतदित्यर्थः।

[कु०] प्रसाधितः तथापि परिहारान्तराभिधित्सया पुनराशङ्कते इत्यपौनरुक्त्यम्। तत्र भेदसाधकस्य प्रमाणस्यानुकूलतर्कं विकल्पपूर्वकं दर्शयति इदमिति (कं. १०४.२५)। ततश्च पक्षत्रयेऽप्यनिष्टाक्षे[7]पश्चतुर्थः पक्षः परिशिष्यते इत्यत आह अथेति (कं. १०५.१)। तदयं प्रमाणार्थः–द्व्यणुकं स्वरूपाद् व्यतिरिक्तं तदाश्रयत्वात् बदरादिवत्कुण्डमिति। भवतां (कं. १०५.४) पिठरपाकवादिनामित्यर्थः। पृथगुपलम्भप्रसङ्ग इति (कं. १०५.६) सहोपलम्भनियमेन स्यादित्यर्थः।

१ रूपकारण–जे. १; जे. २। २ रूपानुदत्तौ तत्पूर्वकं–कं. १; कं. २। ३ अथ द्व्यणुके–जे. १; जे. २। ४ आश्रयत्वा–जे. १; जे. २। ५ विनश्यन्ति जायन्ते च–जे. १; जे. २। ६ गुरुप्रतिकूल–कं. १; कं. २। ७ °निष्टापक्षेश्च°–ह. पु.।

### प्रशस्तपादभाष्यम्

[112] रसो रसनग्राह्यः पृथिव्युदकवृत्तिर्जीवनपुष्टिबलारोग्यनिमित्तं रसनसहकारी मधुराम्ललवणतिक्तकटुकषायभेदभिन्नः। अस्यापि नित्यानित्यत्वनिष्पत्तयो रूपवत्।

### न्यायकन्दली

[112] सम्प्रति बाह्यैकैकेन्द्रियग्राह्यस्य प्रत्यक्षद्रव्यवृत्तेर्विशेषगुणस्य निरूपणप्रसङ्गेन रसगन्धयोर्व्याख्यातव्ययोरुभयद्रव्यवृत्तित्वविशेषेणादौ रूपं व्याख्याय रसं व्याचष्टे– रसो रसनग्राह्य इति। गुणेषु मध्ये रस एव रसनग्राह्यो रसनग्राह्य एव रसः। पृथिव्युदकवृत्तिः। पृथिव्युदकयोरेव वर्त्तते। जीवनपुष्टिबलारोग्यनिमित्तम्। जीवनं प्राणधारणम्, पुष्टिरवयवोपचयः, बलमुत्साहविशेषः, आरोग्यं रोगाभावः, एषां रसो निमित्तम्। एतच्च सर्वं वैद्यशास्त्रादवगन्तव्यम्। रसनसहकारी। स्वगतो रसो रसनस्य बाह्यरसोपलम्भे सहकारी। मधुराम्ललवणतिक्तकटुकषायभेदभिन्नः। मधुरादिभेदेन भिन्नः षट्प्रकार इत्यर्थः। तस्य च नित्यानित्यत्वनिष्पत्तयो [1]रूपवत्। यथा रूपं पार्थिवपरमाणुष्वग्निसंयोगादुत्पत्तिविनाशवत् सलिलपरमाणुषु नित्यं कार्ये कारणगुणपूर्वकमाश्रयविनाशाद्विनश्यति, तथा रसोऽपि।

[टि०] पूर्वापरकालता नाङ्गीक्रियते द्व्यणुके चारब्धे रूपमेवारब्धमिति कथमयं दोष इत्याह – किन्त्ववस्थित एव इति। सर्वदा रूपस्य इति :–अविनश्यदवस्थस्येति ज्ञेयम्, विनश्यदवस्थस्य द्रव्य[2]रहितस्यैवैकक्षणावस्थायित्वात् ॥ रूपं रसश्च ॥

[पं०] [112] विशेषगुणस्येति (कं. १०५.१२) रूपस्य। रसगन्धयोरित्यादिः (कं. १०५.१३) रूपं व्याख्याय गन्धरसयोर्मध्यात् आदौ रसं व्याचष्टे इति योगः। किमिति गन्धं प्रथमं न व्याचष्टे इत्याह–उभयद्रव्यवृत्तित्वविशेषेणेति (कं. १०५.१३) गन्धादि पृथिव्यामेवेति स एकद्रव्यवृत्तिः। रसस्तु पृथिव्युदकलक्षणोभयवृत्तिरित्यतो गन्धाद्विशिष्टः। ततो गन्धात् प्रथमं रसं व्याचष्टे इति वाक्यार्थः। उत्पत्तिविनाशवदिति (कं. १०५.२१) उत्पत्तिविनाशयुक्तम्, यद्यपि प्रथमं विनाशः श्यामादीनां, ततः पाकजानामुत्पत्तिस्तथापि प्राधान्यादुत्पत्तेरादौ ग्रहणम्।

[कु०] [112] एषां रसो निमित्तमिति (कं. १०५.१७) उपलक्षणमेतत्। मरणकार्श्यबलहानिरोगाणामपि रसनिमित्तत्वाद्। यद्यप्येतद् गन्धादेरप्यस्ति तथापि रसप्राधान्यादविरोधः। भाष्ये नित्यानित्यशब्दौ भावप्रधानौ द्रष्टव्यौ।

---

१ रूपादिवत्–जे. १, जे. २। २ रकित–अ।

प्रशस्तपादभाष्यम्

[113] गन्धो घ्राणग्राह्यः पृथिवीवृत्तिर्घ्राणसहकारी [1]सुरभिरसुरभिश्च। अस्यापि पूर्ववदुत्पत्त्यादयो व्याख्याताः।

न्यायकन्दली

[113] गन्धो घ्राणग्राह्यः। गन्ध एव घ्राणग्राह्यो घ्राणग्राह्य एव गन्धः। ननु कथमयं नियमः? स्वभावनियमात्। ईदृशो गन्धस्य स्वभावो [2]यदयमेव घ्राणेनैकेन गृह्यते नान्यः, दृष्टानुमितानां नियोगप्रतिषेधाभावात्। पृथिवीवृत्तिः। पृथिव्यामेव वर्त्तते नान्यत्र। घ्राणसहकारी। स्वगतो गन्धो घ्राणस्य सहकारी। सुरभिरसुरभिश्चेति भेदः। अस्यापि पूर्ववदुत्पत्त्यादयो व्याख्याताः। यथा रसः पार्थिवपरमाणुष्वग्निसंयोगा-दुत्पत्तिविनाशवान् कार्ये कारणगुणपूर्वक आश्रय[3]विनाशाच्च विनश्यति, तथा गन्धोऽपि। नित्यत्वं पुनरस्य नास्त्येव।

[टि०] [113] ( ॥ अथ गन्धनिरूपणम् ॥ )

दृष्टानुमितानाम् इति:– [4]नियोगोऽभ्यनुज्ञानाविधिः तद्विपरीतः प्रतिषेधः, तौ प्रत्यक्षानुमानगृहीतानामर्थानां न सम्भवतः। किन्तु यथादृष्टा एव तेऽभ्युपेया इति ॥ गन्धः ॥

[पं०] [113] ननु कथमयं नियम (कं. १०६.१) इति प्रश्नः। स्वभावनियमाद् (कं. १०६.२) इत्युत्तरम्। नियोगप्रतिषेधाभावस्य प्रतिषेधाभावात्।

[कु०] [113] ननु कथमिति (कं. १०६.२) सर्वसाधारणोऽपि न्यायो विभवात् क्वचिन्निरूप्यते। भेद इति (कं. १०६.५) असुरभिरिति सुरभिविपरीतो भाव एवानुभवसिद्धः अधर्मवत्। न तु सौरभ्याभावमात्रमिति भावः। ननूत्पत्तिविनाशयोर्द्वित्वेन बहुवचनानुपपत्तिरित्यतः कारणविरोधिभ्यां सह बहुत्वमुपपादयति यथा रस [5]एतेष्विति (कं. १०६.५) विशेषगुणमध्य इति पूरणीयम्।

---

१ स द्विविधः सुरभिरसुरभिश्च – जे.। २ येनायमेव – जे. १; जे. २। ३ °विनाशाद्वि – कं. १, कं. २। ४ नैयागो– अ, ब। ५ एतेषु कं. पुस्तके नास्ति।

### प्रशस्तपादभाष्यम्

[114] स्पर्शस्त्वगिन्द्रियग्राह्यः [1]क्षित्युदकज्वलनपवनवृत्तिस्त्वक्सहकारी रूपानुविधायी शीतोष्णानुष्णाशीतभेदात् त्रिविधः। [2]अस्यापि नित्यानित्यत्वनिष्पत्तयः पूर्ववत्।

### न्यायकन्दली

[114] स्पर्शस्त्वगिन्द्रियग्राह्यः। त्वचि स्थितमिन्द्रियं तेनैव स्पर्शो गृह्यते [3]नान्येन। क्षित्युदकज्वलनपवनवृत्तिः। एतेष्वेव [4]वृत्तिरेव। त्वक्सहकारी। स्वगत[5]स्पर्शस्त्वगिन्द्रियस्य विषयग्रहणसहकारी। रूपानुविधायी रूपमनुविधातुमनुगन्तुं शीलमस्य, यत्र रूपं तत्र [6]नियमेन तस्य सद्भावात्। शीतोष्णानुष्णाशीतभेदात् त्रिविधः। काठिन्यप्रशिथिलादयस्तु संयोगविशेषा न स्पर्शान्तरम्, उभयेन्द्रियग्राह्यत्वात्। अस्यापि नित्यानित्यत्वनिष्पत्तयः पूर्ववदिति। व्यवहितस्य रसस्य ग्रहणं न गन्धस्य, तस्य नित्यत्वाभावात्।

[टि०] [114] ( ॥ अथ स्पर्शनिरूपणम् ॥ )

त्वचि स्थितम् इत्युपलक्षणम्, तेन शरीरावरणचर्मव्यतिरेकेण शरीरमध्येऽपि वर्तमानस्य [7]त्वगिन्द्रियत्वं भवत्येव। [8]त्वक्सहकारीत्यत्रोपचारात् त्वक्शब्देन तत्स्थमिन्द्रियमुपलभ्यत इति ॥ स्पर्शः ॥

[पं०] [114] शीतोष्णानुष्णाशीतभेदादिति (कं. १०६.१५) शीतः स्पर्शो जले उष्णः स्पर्शोऽग्नौ, अनुष्णाशीतस्पर्शः पृथिव्याम। न स्पर्शान्तरमिति (कं. १०६.१६) न स्पर्शभेदः। उभयेन्द्रियग्राह्यत्वादिति चक्षुःस्पर्शनेन्द्रियग्राह्यत्वात्। (कं. १०६.१७) विशेषगुणा हि एकेन्द्रियग्राह्या एव।

[कु०] [114] अनाद्यस्थितिस्थापकेतिव्याप्तेः, यत्र रूपमित्यनेनानुविधानं व्याप्तिः। व्याप्तेश्च व्याप्य[व्याप]कोभयनिष्ठत्वेऽपि व्यापकव्यापारं वक्षित्वात्पुरुषव्याचष्टे रूपमनुविधातुमिति (कं. १०६.१४) कर्मव्यापारताविवक्षायां रूपमनुविधायि यस्येति बहुव्रीहेरप्यविरोध एव। इदं च सङ्ख्यासाधारणमपि विशेषगुणत्वे सति विशेषितं वैधर्म्यं द्रष्टव्यम्।

---

१ पृथिव्युदक – जे. व्यो. ४४४। २ तस्यापि – जे। ३ नान्येनेति – जे. १, जे. २। ४ वृत्तिरेतस्य – जे. १; जे. २। ५ स्पर्शस्त्व – कं. १; कं. २। ६ नियमेन सद्भावात् – कं. १। ७ त्वगिन्द्रियत्वं च – अ, ब। ८ त्वेकसहकारी–अ, ब।

## प्रशस्तपादभाष्यम्

[115] **पार्थिवपरमाणुरूपादीनां पाकजोत्पत्तिविधानम् । घटादेरामद्रव्य[1]स्याग्निना सम्बद्धस्याग्न्यभिघातान्नोदनाद्वा तदारम्भके[2]ष्वणुषु कर्माण्युत्पद्यन्ते तेभ्यो विभागा विभागेभ्यः संयोगविनाशाः संयोग[3]विनाशेभ्यश्च कार्यद्रव्यं [4]विनश्यति ।**

**तस्मिन् विनष्टे [5]स्वतन्त्रेषु परमाणुष्वग्निसंयोगादौष्ण्यापेक्षाच्छ्यामादीनां विनाशः पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात् पाकजा जायन्ते ।**

## न्यायकन्दली

[115] पार्थिवपरमाणुरूपादीनामुत्पत्तिविनाशनिरूपणार्थमाह – पार्थिवपरमाणुरूपादिना-मिति । यद्यपि परमाणव एव पृथिवी, तथापि ते कार्यरूपपृथिव्यपेक्षया पार्थिवा उच्यन्ते । पृथिव्या इमे कारणं परमाणवः पार्थिवपरमाणवः, तेषां ये रूपादयस्तेषां पाकजानामु-त्पत्तेर्विधानं प्रकारः कथ्यते । नन्वेवं सति श्यामादिविनाशनिरूपणं न प्रतिज्ञातं स्यात्, नैवम् प्रकारशब्देन तस्यावबोधात् । [6]एवं हि रूपादीनां पाकादुत्पत्तिप्रकारः । यत्र पूर्वेषां विनाशादपरेषामुत्पादस्तमेव प्रकारं दर्शयति–घटादेरामद्रव्यस्येत्यादिना । आदिशब्देन

[टि०] [115] ( ॥ अथ पाकजोत्पत्तिप्रक्रियानिरूपणम् ॥ )

**आमद्रव्यस्य** इति :– प्रस्तुतपाकापेक्षया [7]आमत्वं [8]पार्थिवस्यापक्वत्वाभावात् । **औष्ण्यापेक्षाद्** इति :–चन्द्रचक्षु-स्तेजसोरनुष्णयोरपाकहेतुत्वात् । ननु घटादिद्रव्येऽविनष्ट एव श्यामादिरूपादि[9]विनाशो रक्ताद्युत्पादश्च किं न भवति ? स्वतन्त्रेष्वेव परमाणुषु रूपादिविनाश इत्यत्र किं प्रमाणमित्याह **स्वतन्त्रेषु परमाणुषु** इति । तन्त्वादौ हि पटोत्पत्तेः

[पं०] [115] **श्यामादीति** (कं. १०७.१४) श्यामशब्देन रूपमुपलक्ष्यते तेन रूपादीति व्याख्येयम् । [10]**अवरोधात्** (कं. १०७.१४) इति सङ्ग्रहात् । **कर्मणीति** (कं १०७.१८) चलनादीति । [11]**न साक्षादिति** साक्षादारम्भका हि द्व्यणुकादय एव न तु पर[मा]णवः ।

[कु०] [115] **पृथिव्या इमे** (कं. १०७.१२) इति । विकाराणभावेऽपि वैशेषिकोऽणित्यर्थः । नन्वपक्वद्रव्यस्येति नोपपद्यते, पार्थिवस्य सर्वस्य पक्वादित्यत आह **पाकार्थमिति** (कं. १०७.१७) आरम्भकेप समवायिकार[णे]ष्वित्यर्थः ।

---

१ स्याग्निसंयुक्तस्य – दे । २ परमाणुषु – दे । ३ विनाशेभ्यः कार्यं द्रव्यं – दे । ४ विनश्यतीति – जे । ५ 'स्वतन्त्रेषु' इति–जे. व्यो. (४४६) दे. पुस्तकेषु च नास्ति । ६ यथा – कं. १; कं. २ । ७ आमत्वा – अ, ब । ८ पार्थिवस्यापेक्षत्वाभावात् – अ, ब, क । ९ विनाशा – अ । १० अवबोधात् – कं । ११ इदं प्रतीकं कं पुस्तके नास्ति ।

### न्यायकन्दली

शरावादयो गृह्यन्ते । आमद्रव्यस्येत्यपक्वद्रव्यस्येत्यर्थः । पाकार्थमग्निना सम्बद्धस्य परमाणुषु कर्माण्युत्पद्यन्ते, आमद्रव्यस्य घटादेः संयोगिनोऽप्युदकपरमाणवः सन्ति, तन्निवृत्त्यर्थमाह– तदारम्भकेष्विति । तस्य घटादेरारम्भकेष्वित्यर्थः । घटाद्यारम्भकाश्च परमाणवः पारम्पर्येण कर्मणां कारणमित्याह–अग्न्यभिघातान्नोदनाद्वेति । पार्थिवस्य परमाणोरग्निनाऽभिघातो नोदनं वा संयोगविशेषः, स च कर्माधिकारे वक्ष्यते । तेभ्यो [1]विभागास्तेभ्यः कर्मभ्यः परमाणूनां विभागाः । विभागेभ्यः द्व्यणुकारम्भकसंयोगविनाशाः संयोगविनाशेभ्यश्च कार्यद्रव्यं विनश्यति, विभागेभ्यो द्व्यणुकलक्षणं कार्यद्रव्यं विनश्यति ।

तस्मिन् विनष्टे स्वतन्त्रेषु परमाणुष्वग्निसंयोगादग्निगतौष्ण्यापेक्षाच्छ्यामादीनां पूर्वरूपरसगन्धस्पर्शानां विनाशः । पुनरन्यस्मादग्निसंयोगात् पाकजा जायन्ते ।

**[टि०]** प्रागेव रूपं दृष्टं न तु पटावरोधे सति पश्चात् । **आरभ्यमा[2]णरूपत्वाद्** इति :– सलिलपरमाणुगतरूपेऽपि रूपत्वमस्ति परं द्रव्येषु भवनं नास्ति तस्य नित्यत्वाद् अत उक्तमारभ्यमाणेति । रूपादि [3][**विनाशोत्पादत्वाद्** इति :– पूर्वशब्दविनाश उत्तरशब्दोत्पादश्च] एकेनैव मध्यशब्देन क्रियेते इति तन्निरासार्थं रूपादि इत्युक्तम् ।

**[पं०]** **अग्निगतौष्ण्यापेक्षा**दिति (कं. १०७.२५) मन्त्रादिप्रतिबन्धकाऽभावादग्नेरौष्ण्यम् । **पाकजा** इति (कं. १०८.१) रूपादयः ।

**कार्याऽनवरुद्धे एव द्रव्ये** इति (कं. १०८.२) अद्यापि कारणावस्थेष्विव परमाणुषु, न तु कार्यप्रवृत्तेषु । **आरभ्यपरमाणुरूपादिवदिति** तन्त्वादिरूपे एव द्रव्ये इत्यर्थः । अनारब्धकार्यकारणभावापन्ने केवलपरमाणुरूपे एव द्रव्ये इत्यर्थः । **कार्यानवरुद्धेष्विति** (कं. १०८.३) कारणावस्थेष्वेव । **आरभ्यमाणरूपादित्वादिति** (कं. १०८.३) आरभ्यमाणा रूपादयः यैः । कार्यद्रव्ये इति समासः । कार्यरूपत्वादित्यर्थः । **तन्त्वादिरूपादिवदिति** (कं. १०८.६) तन्त्वादौ

**[कु०]** आप्यानामपि निमित्ततयाऽरम्भकत्वात् । ननु कथं परमाणूनां घटारम्भकत्वं? द्व्यणुकव्यतिरेकेण परमाणूनां कार्याभावादित्यत आह **घटादीति** (कं. १०७.२०)। ननु कार्यविनाशे किं प्रमाणमित्यत आह **स्वतन्त्रेष्विति** (कं. १०७.२५) । अवयविरूपस्य कारणपूर्वकत्वनियमात् परमाणुरूपस्यारम्भसिद्धिः । इदं [4]चाप्यादिपरमाणुरूपादिव्यवच्छेदीयविशेषणम् । **यद्यप्येकस्यैव** मध्यशब्दस्यै(ज)कजातीयं प्रति व्यक्तिभेदेन पूर्वस्य विनाशकत्वमुत्तरस्योत्पादकत्वं च दृष्टम्, उपान्त्यस्यैकमेव व्यक्तिं प्रति कालभेदेनोत्पादकत्वं विनाशकत्वं च दृष्टं तथा च रूपादीनां नैवमित्याह **न च[य]देवेति** (कं. १०८.७) अत्र तर्कः, उत्पद्यमानपाकजावयवाविनाशे कार्यरूपादिविनाशस्याश्रयविनाशहेत्वभावादकारणत्वप्रसङ्गः ।

---

१ तेभ्यो विभागा विभागेभ्यः संयोगविनाशाः–कं. १; कं. २। २ मारणरूपत्वाद्–ब; माणरूपादित्वाद्–मु. ३ [ ] एतच्चिह्नान्तर्गतः पाठः बपुस्तके नास्ति । ४ चाप्पी–ह. पु. ।

## प्रशस्तपादभाष्यम्

[116] तदनन्तरं भोगिनामदृष्टापेक्षादात्माणु[1]संयोगादुत्पन्नपाकजेष्वणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगाद् द्व्यणुकादि[2]क्रमेण कार्यद्रव्यमुत्पद्यते। तत्र च [3]कारणगुणपूर्वप्रक्रमेण रूपाद्युत्पत्तिः।

## न्यायकन्दली

स्वतन्त्रेषु परमाणुषु पाकजोत्पत्तौ कार्यानवरुद्ध एव द्रव्ये सर्वत्र रूपाद्युत्पत्तिदर्शनं प्रमाणम्। परमाणुरूपादयः कार्यानवरुद्धेष्वेव द्रव्येषु भवन्ति, आरभ्यमाणरूपादित्वात्, [4]तन्त्वादिरूपादिवत्। पूर्वरूपादिविनाशेऽपि [5]रूपाद्यन्तरोत्पत्तिः प्रमाणम्। रूपादिमति रूपाद्यन्तरारम्भासम्भवाद् रक्तादिरूपादयो रूपादिमत्सु नारभ्यन्ते रूपादित्वात् तन्त्वादिरूपादिवत्। एवं [6]परमाणुषु पूर्वरूपादिविनाशे सिद्धे वह्निसंयोग एव विनाशहेतुरवतिष्ठते, तद्भावभावित्वादन्यस्यासम्भवात्। न च यदेव रूपादीनां विनाशकारणं तदेव तेषामुत्पत्तिकारणमित्यवगन्तव्यम्, तन्तुरूपादीनामन्यत उत्पत्तेरन्यतश्च विनाशदर्शनात्। तेन परमाणुषु रूपादीनामन्यस्मादग्निसंयोगादुत्पत्तिरन्यस्मादग्नि[7]संयोगाच्च विनाश इत्यवसीयते। परमाणुरूपादिविनाशोत्पादावेककारणकौ न भवतः, रूपादिविनाशोत्पादत्वात्। तन्तुरूपादिविनाशोत्पादवत्।

[116] [8]तदनन्तरं भोगिनामदृष्टापेक्षादात्माणुसंयोगादुत्पन्नपाकजेषु परमाणुषु कर्मोत्पत्तौ

[116] गुर्वीयं कल्पना इति :– [9]पिठरपाके प्रमाणाभावादिति भावः। ननु विवादाध्यासितं [10]पिठरं पच्यते पृथीवित्वात् परमाणुवदिति प्रमाणमस्ति, न, औष्णापेक्षाग्निसंयोगस्य प्रयोजकत्वात् [11]पिठरनाशे च कारणस्य

[पं०] हि पटोत्पत्तेः प्रागेव रूपं दृष्टम् न तु परविरोधे पश्चात् बौद्धानां मते विनाशोत्पत्त्योरेकमेव कारणमतस्तान् तान्प्रतिक्षिपन्नाह **न च यदेवेत्यादिना** (कं. १०८.७)। **तेषामिति** (कं. १०८.८) रूपादीनाम्। **रूपादिविनाशोत्पादत्वादिति** (कं. १०८.११) मध्यशब्दो हि पूर्वशब्दस्य विनाशमुत्तरशब्दस्योत्पादं च करोति अतो रूपादिग्रहणम्।

[कु०] पूर्वरूपाद्यविनाशे चानेकरूपादिप्रसङ्गः, वह्निसंयोगस्य विनाशोत्पादकारणत्वा(त्वं)ङ्गीकारे कारणान्तरासम्भवे न तयोरकारण[12]कत्वप्रसङ्गः। एकस्मादेवोत्पत्तिविनाशाङ्गीकारि(रे) वरम[न्त्य]संयोगस्योत्पादकविनाशकत्वे द्व्यणुकादे रूपादिमत्त्वप्रसङ्ग इति।

---

१ संयोगेभ्यो – दे। २, ३ प्रक्रमेण – दे; गुणप्रक्रमेण – कं. १; कं. २। ४ तन्त्वादिरूपवत् – कं. १; कं. २। ५ रूपान्तरोत्पत्तिः – कं. १; कं. २। ६ परमाणुषु रूपादिनाशे – जे. २। ७ °संयोगाद्विनाश – कं. १; कं. २। ८ तदनन्तरमित्यादि – कं. १; कं. २। ९, १०, ११ विवर – अः १२ °कत्वे – ह. पु।

## न्यायकन्दली

तेषां परस्परसंयोगाद् द्व्यणुकादिप्रक्रमेण कार्यद्रव्यमुत्पद्यत इति। उत्पन्नेषु घटादिषु येषां तत्साध्ययोः सुखदुःखयोरनुभवो भोगो भविष्यति ते भोगिनः, तेषामदृष्टं धर्माधर्मलक्षणम्, तमपेक्षमाणादात्मपरमाणुसंयोगादुत्पन्नपाकजरूपरसगन्धस्पर्शेषु परमाणुषु कर्माण्युत्पद्यन्ते। तेभ्यस्तेषां परमाणूनां परस्परसंयोगास्ततश्च [1]द्वाभ्यां परमाणुभ्यां द्व्यणुकं त्रिभिर्द्व्यणुकैस्त्र्यणुकमित्यनेन क्रमेण [2]कार्यद्रव्यं घटादिकमुत्पद्यत इति। तत्र च [3]कारणगुणपूर्वप्रक्रमेण रूपाद्युत्पत्तिः। परमाणुद्वयरूपाभ्यां द्व्यणुके रूपं द्व्यणुकरूपेभ्यश्च त्र्यणुकरूपमित्यनेन क्रमेण घटादौ रूपरसगन्धस्पर्शोत्पत्तिः। सङ्ख्यादीनां न पाकजत्वं तेषामविलक्षणत्वात्। ननु स्पर्शस्यापि वैलक्षण्यं न दृश्यते, सत्यम्, [4]तथापि तस्य पाकजत्वमनुमानात्। तच्च [5]पृथिव्यधिकारे दर्शितम्। पाकजोत्पत्त्यनन्तरं परमाणुषु क्रिया न तु श्यामादिनिवृत्तिसमकालमेवेति रूपादिमत्येव द्रव्ये रूपादिमत्कार्यद्रव्यारम्भ-

[टि०] वह्न्यभिघातस्य प्रबलत्वात्। **तस्मान्निरन्तरा एव** इति :– ननु यदि निरन्तरास्तर्हि कथं मध्यक्षिप्तोदकादीनां [6]स्रवणम्? न, तथाविधेन च्छिद्रेण जलस्य सुखप्रवेशत्वात् वह्नेस्तु वेगातिशयेन [7]तथाविधे प्रविशतो घटभङ्गहेतुत्वात् तच्छिद्रं सदपि न विवक्ष्यते यथाऽनुदरा कन्या इत्यत्र उदरमिति। [8]**घटे रूपादय** इति :– अत्र दृष्टान्तार्थमापाकमध्यस्थिते

[पं०] [116] [9]आत्मोऽणुसंयोगादिति (कं. १०८.१४) आत्मनो व्यापित्वादण्डभिस्संयोगः। **द्व्यणुकरूपेभ्य** (कं. १०८.१८) इत्यसमवायिकारणेभ्यः। त्रिभिर्हि द्व्यणुकैरेकैकं त्र्यणुकं निष्पद्यतेऽतो द्व्यणुकरूपेभ्य इत्यत्र बहुवचनम् त्र्यणुकरूपमिति (कं. १०८.१८) अत्र एकवचनम्। **अविलक्षणत्वादिति** (कं. १०८.१९) पाकावस्थायामप्येकरूपत्वात्। घटादिष्वामक्षणयोर्वर्तमानानां रूपादीनामिव न सङ्ख्यादीनामपि वैलक्षण्यमीक्ष्यते इति भावः। **तच्च पृथिव्यधिकारे दर्शितमिति** (कं. १०८.२१) पार्थिवघटादिस्पर्शः पाकजः एकेन्द्रियग्राह्यत्वे सति पार्थिवगुणत्वात्, पृथिवीगतरूपादिवदित्येवं दर्शितम्। [न] तु **श्यामादिनिवृत्तिसमकालमेवेति** (कं. १०८.२१) श्यामादिनिवृत्तिकाले हि ते परमाणवो नीरूपादिका जाता। अस्ति च तदा स्वयमरूपादिकाः सन्तो रूपादिघटादिकार्यद्रव्यारम्भिकां क्रियां कथं कुर्वन्ति? अतः पाकजरूपाद्युत्पत्त्यनन्तरमेव तेषु क्रिया इति हृदयम्।

[कु०] [116] **उत्पन्नेष्विति** (१०८.१२) भोगिनो विशिनष्टि। इदं च लौकिकसम्बन्धनियमप्रयोजकं दर्शयितुं कुलालादिप्राच्यप्रयासवैयर्थ्य(पर) परिहर्तुमुक्तमित्यवगन्तव्यम्। पुनर्घटोपत्तौ रूपाद्युत्पत्तिः प्रमाणं, घटोत्पत्तिरेव द्व्यणुकाद्यान्तरालिककार्योत्पत्तावित्येवमादि कार्यमेव कारणे प्रमाणं द्रष्टव्यम्। न तु द्व्यणुके पक्वं परमाणुरू[पं] परमाणुरूपाद्रूपमुत्पद्यत इत्यसङ्गतम्, उत्तररूपोत्पत्तेः प्रागेव द्रव्यारम्भकसंयोगानुकूलक्रियोत्पत्तिसम्भवादित्यत आह

१ द्वाभ्यां द्व्यणुकं – कं. १; कं. २। २ कार्यं – जे. १; जे. २। ३ कारणगुणप्रक्रमेण – कं. १; कं. २। ४ तथाप्यस्य – कं. १; कं. २। ५ पार्थिवघटादिस्पर्शः पाकजः, एकेन्द्रियग्राह्यत्वे सति पार्थिवगुणत्वात्, पृथिवीगत रूपादिवत् इति दर्शितम्–टिप्पण नं. १। ६ श्रवणम्–अ, ब; ७ तथाविधच्छिद्रे – अ, ब; ८ घटरूपादय – मु. ९ आत्मपरमाणु – कं।

## न्यायकन्दली

हेतुभूतक्रियादर्शनाद् [1]कल्प्यते। परमाणुक्रिया रूपादिमत्येव जायते रूपादिमत्कार्यारम्भहेतुभूतक्रियात्वात् पटारम्भकसंयोगोत्पादकतन्तुक्रियावत्।

अथ [2]कथं कार्यद्रव्ये एव रूपादीनामग्निसंयोगादुत्पादविनाशौ [3]न कल्प्येते? प्रतीयन्ते हि पाकार्थमुपक्षिप्ता घटादयः सर्वावस्थासु [4]प्रत्यक्षतश्छिद्रविनिवेशितचक्षुषा, प्रत्यभिज्ञायन्ते च [5]पाकोत्तरकालमपि त एवामी घटादय इति, तत्राह—न चेति। उपपत्तिमाह—सर्वावयवेष्विति। अन्तर्बहिश्च सर्वेष्ववयवेषु वर्त्तमानस्य समवेतस्यावयविनो बाह्ये वर्त्तमानेन वह्निनाऽव्याप्तेर्व्यापकस्य संयोगस्याभावात् कार्यरूपादीनामुत्पत्तिविनाशयो[6]रक्लृप्तिरन्तर्वर्त्तिनामपाकप्रसङ्गादिति भावः। सच्छिद्राण्येवावयविद्रव्याणि। तत्र यदि नाम महतस्तेजोऽवयविनो नान्तःप्रवेशोऽस्ति, [7]तत्परमाणूनां स्वस्त्येव ततो व्याप्तिर्भविष्यति?

[**टि०**] घटे इति ज्ञेयम्। तत्रापि मुद्गराभि[8]हतेन केनापि [9]सिद्धसाधनतानिरासार्थमेवकारः। परमाणुव्यवच्छेदार्थं कार्यद्रव्येति। [10]द्रव्यशब्दो गगनशब्दो वा स्वरूपकथनार्थः। एवं वक्ष्यमाणेऽप्यनुमाने व्यवच्छेदो ज्ञेयः।

[**पं०**] [11]अथ मतमिति हे [12]भद्रौ गोयुवरोः। **कार्यद्रव्ये एवेति** (कं. १०८.२५) घटे एवाखण्डे इत्यर्थः। **उत्पादविनाशौ**[13] **किं न कल्प्येते** (कं. १०८.२५) किमर्थं परमाणुविभागादिकल्पना क्रियते इति पराभिप्रायः। छिद्रनिवेशित[14]चक्षुषेति (कं. १०८.२६) छिद्राणि धूमनिस्सरणार्थं पवनप्रवेशार्थं च इष्टकापाके रच्यन्ते। **व्यापकस्य संयोगस्याभावादिति** (कं. १०९.२) संयोगस्य प्रवेशवृत्तित्वादिति भावः। [15]कार्ये इत्यादि (कं. १०९.३) कार्ये घटे रूपादीनां वृत्तिरकल्पना, किन्तु परमाणुष्वेव रूपादीनामुत्पत्तिविनाशयोः कल्पनेत्यर्थः। परः प्राह **सच्छिद्राण्येवेत्यादि** (कं. १०९.४) सच्छिद्राणीति सान्तराणि खण्डावयवित्वात् **अवयविद्रव्याणित्यस्मात्** (कं. १०९.४) पुरोवर्तन्त इति क्रियाध्याहारः। **यदि नामेति** (कं. १०९.४) यद्यपि। **तत्परमाणूनामिति** (कं. १०९.५) तेजोऽवयविपरमाणूनाम्।

[**कु०**] **पाकजोत्पत्त्यनन्तरमिति** (कं. १०८.२१) वायुपरमाणुमनःक्रियाभ्यां व्यभिचारपरिहाराय रूपादीत्यादिविशेषणं, तदेवं पीलुपाकं सिद्धं कृत्वैतत्सर्वमभिहितम्। अतः परं तमसहमानान् पिठरपाकवादिन उत्थाप्य दूषयितुं भाष्यमवतारयति **अथेति** (कं. १०८.२४)। [16]**कार्यद्रव्य** इति अभ्यन्तरावयवच्छिन्न इत्यर्थः। **सच्छिद्राणीति** (कं. १०९.४) कथ(मथ)-मन्यथा घटान्तर्वर्तिनीनामपां बहिस्स्यन्दनमिति भावः।

---

१ दृश्यते—कं. १; कं. २। २ मतं—जे. १; जे. २। ३ किन्न—जे. १, जे. २। ४ प्रत्यक्षाश्छिद्रविनिवेशितदृशा—कं. १, कं. २। ५ पाकजोत्तर—कं. १। ६ रक्लृप्ते—कं. १; कं. २। ७ तत्परमाणूनां ततो—कं. १; कं. २। ८ हितेन—ब, क। ९ सिद्धि—अ, ब, क। १० शब्दो गत शब्दो—अ, ब, क। ११ अथ कथं—कं। १२ अत्रास्य सम्बन्धो न दृश्यते। अन्य एव वा पाठः स्यात्। १३ विनाशौ कल्प्येते। १४ दृशा—कं.। १५ कार्य—कं। १६ कार्य इति—ह. पु।

### प्रशस्तपादभाष्यम्

[117-118] न च [1]कार्यद्रव्ये रूपाद्युत्पत्तिविनाशो वा सम्भवति, सर्वावयवेष्वन्तर्बहिश्च वर्त्तमानस्याग्निना व्याप्त्यभावात्। अणुप्रवेशादपि च व्याप्तिर्न सम्भवति, कार्यद्रव्यविनाशादिति।

### न्यायकन्दली

[117] तत्राह–अणुप्रवेशादपीति। न तावत्परमाणवः सान्तराः, निर्भागत्वात्। द्व्यणुकस्य सान्तरत्वे [2]चानुपपत्तिरेव, तस्य परमाण्वोरसंयोगात्। संयुक्तौ चेदिमौ निरन्तरावेव। सभागयोर्हि वस्तुनोः केनचिदंशेन संयोगात् सान्तरः संयोगः। निर्भागयोस्तु नायं विधिरवकल्पते। [3]स्थूलद्रव्येषु च प्रतीयमानेष्वन्तरं न प्रतिभात्येव, त्र्यणुकेष्वेवान्तरम्, तच्चानुपलब्धियोग्यत्वान्न प्रतीयत इति गुर्वीयं कल्पना। तस्मान्निरन्तरा एव घटादयः। तेषामन्तस्तावदग्निपरमाणूनां प्रवेशो [4]भवति यावत्पार्थिवावयवानां व्यतिभेदो न स्यात्।

[टि०] किञ्च इति–पूर्वमित्यामदशायाम्, इदानीं तु पाककाले। न च नोदनेति:–यथैकत्र निबिडपाषाणपिण्डे भूमिम[5]भिहत्य किञ्चिच्च भूम्या सहाधःप्रविश्योर्ध्वमु[6]च्छलिते नोदनाभिघातयोरविरुद्धयोः समावेशो दृष्टस्तथा नात्रेति व्यतिरेकेण दृष्टान्तः। यदा [7]चान्त्यावयवानाम् इत्यादि:–अन्त्यावयवा घटारम्भकाः। पूर्वावयवी आमो घटः।

[पं०] [117] अणुप्रवेशादपीति (कं. १०९.५) अणुप्रवेशादपि, अतस्तेजो व्याप्तिर्न भवतीत्यर्थः। अवयविद्रव्याणां सच्छिद्रत्वमुक्तं परेण तत्क्रमेण खण्डयति न तावत्परमाणव (कं. १०९.६) इत्यादिना। सान्तरत्वे इति (कं.१०९.६) सच्छिद्रत्वे अङ्गीक्रियमाणे सति। अनुत्पत्तिरेवेति (कं. १०९.७) द्व्यणुकमुत्पद्यते एव नेति प्राप्नोतीत्यर्थः। स्थूलद्रव्येष्विति (कं. १०९.९) द्विद्व्यणुकादिषु। अन्तरं न प्रतिभात्येवेति (कं. १०९.९) अणुत्वात्। त्र्यणुकेष्विति (कं. १०९.१०) द्व्यणुकात्रयनिष्पन्नेषु। त्र्यणुकेष्वेवान्तरमिति (कं. १०९.१०) अत्र त्र्यणुकग्रहणं चतुरणुकादीनामुपलक्षणम्। ततश्च त्र्यणुकेष्वेवेत्यस्य त्र्यणुकचतुरणुकादिष्वेव स्थूलद्रव्येष्वित्यर्थः सिद्धः। गुर्वीयं कल्पनेति (कं. १०९.१०) अस[त्] कल्पनैवेयम्। पिठरपाके प्रमाणाऽभावादित्यर्थः। व्यतिभेद इति (कं. १०९.१२)

[कु०] [117] तर्हि सभागत्वाद् घटादेः सान्तरत्वमस्ति [इ]त्यत आह स्थू[ल]द्रव्येष्विति (कं. १०९.९)। अपां स्यन्दनमप्यवयवविनाशमेवानुमापयति। दृश्यते ह्यम्भः संयोगस्यापि पार्थिवविनश[नाश्य]त्वं, कथमन्यथाम्भसि विनिक्षिप्तस्य लोष्टादेर्वि(क)लयनं प्रत्यक्षसिद्धानु[भूतं] क्वचित्कमण्डलादौ सान्तरता सानुमतैवेति भावः। गुर्वीयमिति (१०९.१०) प्रमाणविरहिणीत्यर्थः।

---

१ कार्यद्रव्य एव–कं. भा. कि. भा.। २ चानुत्पत्ति–कं. १; कं. २। ३ स्थूलद्रव्येषु प्रतीयमानेष्वन्तरं–कं. १; कं. २। ४ नास्ति–कं. १; कं. २। ५ हेत्य–अ, ब। ६ मुच्छलति–ड। ७ चान्यावयवानाम्–मु.।

न्यायकन्दली

स्पर्शवति द्रव्ये तथाभूतस्य द्रव्यान्तरस्य प्रतीघाताद् व्यतिभिद्यमानेषु चावयवेषु क्रियाविभागादिन्यायेन द्रव्यारम्भकसंयोगविनाशादवश्यं द्रव्यविनाश इति कुतस्तस्याणुप्रवेशा[1]दपि व्याप्तिः । न च कार्यद्रव्येष्वाश्रयविनाशादन्यतो रूपादीनां विनाशः कारणगुणेभ्यश्चान्यत उत्पादो दृष्टः, तेनापि घटवह्निसंयोगाद्रूपादीनामुत्पत्तिविनाशौ न कल्प्येते ।

घटरूपादय आश्रयविनाशादेव नश्यन्ति कार्यद्रव्यगतरूपरसगन्धस्पर्शत्वाद् मुद्गराभिहतनष्टघटरूपादिवत् । तथा घटरूपादयः कारणगुणेभ्य एव जायन्ते कार्यद्रव्यगतरूपादित्वात् [2]पटगतरूपादिवत् । किञ्च, पूर्वमवयवानां [3]प्रशिथिलः संयोग आसीदिदानीं काठिन्यमुपलभ्यते, न च नोदनाभिघातयोरिव शैथिल्यकाठिन्ययोरेकत्र समावेशो युक्तः, परस्परविरोधात् । तस्मात् पूर्वव्यूहनिवृत्तौ व्यूहान्तरमेतदुपजातम् । [4]तथा सति च

[टि०] विनश्यत्ता विनाशकारणसान्निध्यं विनश्यदवस्थत्वमित्यर्थः । उपरिनिक्षिप्त[5]शरावधूलीकर्प्परादीनामाधेयता, घटस्य चाधारत्वं तैश्च घटाना[6]माधरणम् । अन्यथा तु घटस्य भङ्गो [7]आधरणानामधः[8]पत्तनं स्यात् ।

[पं०] विशकलितत्वम् । **द्रव्यान्तरस्येति** (कं. १०९.१३) तेजसः । **द्रव्यारम्भकसंयोगविनाशादिति** (कं. १०९.१४) अत्र द्रव्यं द्व्यणुकादि । **अणुप्रवेशादिति** (कं. १०९.१४) तेजोऽणुप्रवेशात् । **कारणगुणेभ्य इति** (कं. १०९.१५) परमाणुगतरूपादिभ्यः **तेनापीति** (कं. १०९.१६) तेनापि कारणेन । [9]**घटे सत्येव वह्निसंयोगाद्रूपादीनामुत्पत्तिविनाशौ न कल्प्येते इति** । (कं. १०९.१६) आश्रयस्य तदवस्थत्वेन आश्रयविनाशाभावादिति भावः ।

अत्र प्रयोगं दर्शयति [10]**घटे रूपादय** (कं. १०९.१७) इत्यादि । **कार्यद्रव्यगतरूपरसगन्धस्पर्शत्वादिति** (कं. १०९.१७) परमाणुव्यवच्छेदार्थं कार्यग्रहणम् । [11]**घटे इति** (कं. १०९.१८) (आपाकमध्यस्थिते) **कारणगुणेभ्य इति** (कं. १०९.१८) परमाणुरूपादिभ्यः । **पटगतरूपादिवदिति** (कं. १०९.१९) यथा पटगता रूपादय कारणगुणेभ्य एव, कोऽर्थः? तन्तुगतरूपादिभ्य एव जायन्ते **न च नोदनेत्यादि** (कं. १०९.२०) यावेकत्र निबिडपाषाणपिण्डे भूमिमभिहत्य किञ्चिच्च भूम्या सहाधः प्रविश्योर्ध्वगुच्छलिते नोदनाभिघातयोरावरुद्धयोः समावेशो दृष्टस्तथा नैकत्र वस्तुनि शैथिल्यकाठिन्ययोः समावेशो दृष्ट । घटे सत्येव पाक आङ्गीकारे तु स्यात् । इदमत्र तत्त्वम्–आमावस्थायां हि

[कु०] **कारणगुणेभ्यश्चेति** (कं. १०९.१५) अवयव्यारम्भसमयवर्तिभ्य इति शेषः । तेनावतिष्ठमान एव पूर्वस्मिन्नवयविन्युत्पन्नपाकजानामवयवानां रूपादीनि रूपाद्यन्तरमेवारम्भत इति नाशङ्कनीयम् । **शैथिल्यकाठिन्ययोरिति** (कं. १०९.२१) संयोगावान्तरजातिविशेषयोरित्यर्थः । परे[ण] पूर्वावयविनोऽविनाशे यानि प्रमाणानिन्यावक्ष्यंते तानि

---

१ दभिव्यक्ति – कं. १; कं. २ । २ पटरूपादिवत् – जे. १, जे. २ । ३ प्रशिथिलता – कं. १; कं. २ । ४ तथा सति – कं. १; कं. २ । ५ शिराव – अ, ब । ६ आवरणम् – अ, ब, ड । ७ आवरणना – अ, ब, ड । ८ पातनं – अ, ब, क । ९ घटवह्निसंयोगाद् – कं । १० घटरूपादय – कं । ११ घटरूपादय – कं ।

## न्यायकन्दली

प्राक्तनद्रव्यविनाशः कारण[1]विनाशः, द्रव्यान्तरस्योत्पादः [2]कारणान्तरसद्भावादेवेत्यवतिष्ठते। प्रत्यभिज्ञानं च ज्वालादिवत् सामान्यविषयम्। सर्वावस्थोपलब्धिरपि कार्यस्य विनश्यतोऽपि क्रमेण विनाशात्। नहि घटः परमाणुसञ्चयारब्धो येन विभक्तेषु परमाणुषु सहसैव विनश्येत्, किन्तु द्व्यणुकादिप्रक्रमेणारब्धः। [3]तस्य स्वतन्त्रेषु परमाणुषु द्व्यणुकत्र्यणुकाद्यसङ्ख्येयद्रव्य[4]विनाशपरम्परया चिरेण विनश्यतो [5]यावन्नविनाशस्तावदुपलब्धिरस्त्येव। एकतश्च पूर्वेऽवयवा विनश्यन्ति, अन्यतश्चोत्पन्नपाकजैरणुभिरपूर्वे तत्स्थाने एव द्व्यणुकादिप्रक्रमेणारभ्यन्ते, तेन पक्वापक्वावयवदर्शनम्। यदा [6]चान्त्यावयवानां नाशात्पूर्वावयविनो विनश्यत्ता तदैवापूर्वावयवाना[7]मुत्पादादवयव्यन्तरस्योत्पद्यमानता क्षणान्तरे पूर्वावयवि[8]विनाशोऽवयव्यन्तरस्य चोत्पाद इत्याधाराधेयभावोऽव[9]धारणं च स्यात्, यावन्तः पूर्वस्यावयवास्तावन्त एवोत्तरस्यारम्भकाः (इति) तत्परिमाणत्वं तत्सङ्ख्यात्वं चोपपद्यते।

**[पं०]** शैथिल्यं–पक्वावस्थायां च काठिन्यम् एते च द्वे अपि परस्परविरुद्धे। अतो घटे सत्येव द्वयमिदं शैथिल्यकाठिन्याख्यं जातमिति वक्तुं न युक्तम्। **कारणविनाशादिति** (कं. १०९.२२) संयोगविनाशात्। [10]**कारणान्तरसद्भावादिति** (कं. १०९.२३) संयोगान्तरसद्भावात्। **प्रत्यभिज्ञानं च ज्वालादिवत्सामान्यविषयमिति** (कं. १०९.२३) यथाऽभिनवाभिनवोत्पद्यमानेष्वपि ज्वालादिषु न एवामी न एवामी ज्वालादय इति ज्वालादि[त्व]त्वसामान्यविषयं प्रत्यभिज्ञानं तथा अपरथा उत्पन्नेष्वपि घटादिषु सामान्यविषयमिव प्रत्यभिज्ञानमिति भावः। [11]**स्वतन्त्रेष्विति** (कं. १०९.२५) स्वतन्त्रेषु परस्परविशकलितेषु कर्त्तव्येष्वित्यर्थः। **पक्वापक्वावयवदर्शनमिति** (कं. ११०.३) आपाकान्तर्घटादीनां पक्वाश्चापक्वाश्चावयवा दृश्यन्ते [12]यत्र विनश्यदवस्थास्ते अपक्वा ये चोत्पन्नपाकजैरणुभिरारभ्यन्ते ते पक्वाः। [13]**अन्त्यावयवानामिति** (कं. ११०.३) घटारम्भकाणामपक्वखण्डावयविकपालानाम्। **पूर्वावयविन इति** (कं. ११०.४) आमघटस्य। **विनश्यत्तेति** (कं. ११०.४) आश्रयविनाशलक्षणविनाशकारणसान्निध्यम्। **उत्पद्यमानतेति** (कं. ११०.५)? वह्निसंयोगस्योत्पादकारणस्य सान्निध्यम्। **अपूर्वावयवानामिति** (कं. ११०.४) पक्वकपालावयवानाम्। **अवयव्यन्तरस्येति** (कं. ११०.५) पक्वघटस्य। [14]**आधाराधेयभावः आवरणं च स्यादिति** (कं. ११०.५) उपरि निक्षिप्तशरावधूलीकर्पूरादीनामाधेयता घटस्य चाधारत्वं तैश्च घटानामावरणम्। [15]अन्यथा तु घटस्य भङ्गे आवरणानामधःपतनं स्यादित्याशयः।

**[कु०]** क्रमेणोपक्षिप्य प्रतिक्षिपति **प्रत्यभिज्ञानमिति** (कं. १०९.२३)। सामान्यविषयमित्यर्थः। **क्रमेणेति** (कं. १०९.२४) उत्पत्तिविनाशयोरन्तरालाग्रहणादित्यर्थः। अस्तु तर्हि यदा विनाशस्तदानुपलब्धिरित्यत आह **एकतश्चेति** (कं. ११० २)।

---

१ विनाशात्–कं. १; कं. २। २ कारणसद्भावादे...–कं. १; कं. २। ३ तस्य द्व्यणुक–कं. १; क. २। ४ विनाशात्परम्परया–कं. १; कं. २। ५ यावद–कं. १; कं. २। ६ चान्या–कं. १; कं. २। ७ मुत्पादात् क्षणान्तरे–कं. १; कं. २। ८ विनाशो–कं. १; कं. २। ९ आवरणं च–जे. १; जे. २। १० कारणसद्भावादिति–कं। ११ विभक्तेषु–कं। १२ तत्र–ब। १३ अन्यावयवाना–कं। १४ आधारभावोऽवधारणं–कं। १५ अन्यथा घटस्य–अ।

## न्यायकन्दली

[118] **प्रक्रिया तु द्व्यणुकस्य विनाशः, त्र्यणुकस्य विनश्यत्ता, श्यामादीनां विनश्यत्ता, सक्रिये परमाणौ विभागजविभागस्योत्पद्यमानता, रक्ताद्युत्पादकस्याग्निसंयोगस्योत्पद्यमानतेत्येकः कालः। ततस्त्र्यणुकविनाशः, तत्कार्यस्य विनश्यत्ता, श्यामादीनां विनाशः, विभागजविभागस्योत्पादः, संयोगस्य विनश्यत्ता, रक्ताद्युत्पादकाग्निसंयोगोत्पादः, रक्तादीनामुत्पद्यमानता, श्यामादिनिवर्त्तकाग्निसंयोगस्य विनश्यत्तेत्येकः कालः। [1]ततस्त्र्यणुककार्यविनाशः, तत्कार्यस्य विनश्यत्ता, विभागजविभागात्संयोगस्य विनाशः, उत्तरस्य संयोगस्योत्पद्यमानता, रक्तादीनामुत्पादः, श्यामाद्युच्छेदकाग्निसंयोगस्य विनाशः, द्वितीयपरमाणौ द्रव्यारम्भकक्रियाया उत्पद्यमानतेत्येकः कालः। ततस्तत्कार्यस्य विनाशः, तत्कार्यस्य विनश्यत्ता, उत्तरसंयोगस्योत्पादः, क्रियाविभागविभागजविभागानां विनश्यत्ता,**

[**टि०**] [118] एकत्र परमाणौ द्व्यणुकनाशक्रियाविभागादिन्यायेन श्यामे द्व्यणुके विनष्टे यया रीत्या यावद्भिः [2]क्षणैः रक्तं द्व्यणुकमुत्पद्यते' तद्दर्शयति **प्रक्रिया तु** इत्यादि। **विभागजविभागस्य** इति :– यः [3]कर्म्मणा द्व्यणुकारम्भस्य सक्रियस्य परमाणोर[4]परेण परमाणुना विभागो जनितस्तेन द्रव्यना[5]शानन्तरं द्रव्यनाशविशिष्टं [6]कालं स्वतन्त्रं

[**पं०**] [118] एकत्र परमाणौ द्व्यणुकनाशकक्रियाविभागादिन्यायेन श्यामे द्व्यणुके विनष्टे यया रीत्या यावद्भिः क्षणैः रक्तं द्व्यणुकमुत्पद्यते तद्दर्शयति। **प्रक्रियेत्यादि** (कं. ११०.७) **द्व्यणुकस्य विनाशस्त्र्यणुकस्य विनश्यत्तेति** (कं. ११०.७) त्रिभिर्द्व्यणुकैस्त्र्यणुकं तत एकस्य परमाणोर्विघटनात्[7] द्व्यणुकस्य विनाशस्तद्विनाशात्त्र्यणुकस्य विनश्यत्तेत्यर्थः। **सक्रिये परमाणौ विभागजविभागस्योत्पद्यमानतेति** (कं. ११०.८) अत्र **परमाणाविति** निर्महृते[8] द्व्यणुकविनाशादेकत्वम्। इह हि आद्यो विभागः कर्मजस्ततो विभागादेव विभाग इति स्थितिः। ततो यः कर्मणा द्व्यणुकारम्भकस्य सक्रियस्य परमाणोरपरेण परमाणुना सह विभागो जनितस्तेन द्व्यणुकद्रव्यनाशानन्तरं द्व्यणुकनाशविशिष्टं कालं स्वतन्त्रं वावयवमपेक्ष्य द्व्यणुकावस्थिताकाशादिदेशेनापि सह विभागः कर्तव्य इति द्व्यणुकनाशकार्यविभागजविभागस्योत्पद्यमानता। एवमन्यत्रापि यत्र यत्र विभागजविभाग इति दृश्यतेऽत्राधिकारे, तत्र तत्रेति ज्ञेयम्। प्रथमं द्रव्यविभागस्ततस्तदवच्छिन्नाकाशादिदेशेन सह विभागः। **तत्कार्यस्येति** (कं. ११०.९) त्र्यणुककार्यस्य खण्डावयविनः। **श्यामादीनामिति**

[**कु०**] [118] **प्रक्रियात्विति** (कं. ११०.७) शिष्यबुद्धिवैशद्यायेति शेषः। 'अत्रेति प्रक्रियापरिशुद्धिः। अग्निना नोदनाविघातयोरन्यतरस्मात्क्रियाविभागादिन्यायेन द्व्यणुकविनाशः। ततः स्वतन्त्रे परमाणौ श्यामादिनिवृत्तिः। ततो रक्ताद्युत्पत्तिः। ततः पक्वे परमाणौ द्रव्योत्पा(त)दकक्रियोत्पादः। तत आकाशादिदेशाद्विभागः। ततः पूर्वसंयोगनाशः, द्रव्योत्पादकसंयोगः। ततो नवमकारणप्रक्रमेण रक्ताद्युत्पत्तिः। तत्तत्सहभुवां तु कीर्तनं सम्पातायातं तत् क्षणगणनायां

---

१ ततस्तत्कार्यविनाशः, तत्कार्यविनश्यता, उत्तरस्यसंयोगस्योत्पाद्यमानता – कं. १; कं. २। २ रक्ता – अ, ब, क।
३ कम्मंणो – ड। ४ परपरेण – ब। ५ नात्वान्तरं – अ। ६ कालकालं – अ, ब; कालं कालं – क।
७ विघटिते – ब। ८ प्रतीकमिदं कन्दल्यां नास्ति तत्र तु एवं सर्वत्र (कं. ११०.२५) इति दृश्यते।

न्यायकन्दली

**द्वितीयपरमाणौ क्रियाया उत्पादः, विभागस्योत्पद्यमानतेत्येकः कालः। ततस्तत्कार्यस्य विनाशः, तत्कार्यस्य विनश्यत्ता, क्रियाविभागविभागजविभागानां विनाशः, द्वितीयपरमाण्वाकाशविभागस्योत्पादः, तत्संयोगस्य विनश्यत्तेत्येकः कालः। ततस्तत्कार्यस्य विनाशः, तत्कार्यस्य विनश्यत्ता, परमाण्वाकाशसंयोगविनाशः, उत्तरसंयोगस्योत्पद्यमानतेत्येकः कालः। ततस्तत्कार्यस्य विनाशः, तत्कार्यस्य विनश्यत्ता, परमाणोः परमाण्वन्तरेण सहोत्तरसंयोगोत्पादः, द्व्यणुकस्योत्पद्यमानता, विभागकर्मणोर्विनश्यत्तेत्येकः कालः। ततस्तत्कार्यस्य विनाशः, तत्कार्यस्य विनश्यत्ता, द्व्यणुकस्योत्पादः, तद्गतानां रूपादीनामुत्पद्यमानता, विभागकर्मणोर्विनाशः, ततः क्षणान्तरे कारणगुणप्रक्रमेण द्व्यणुके [1]गुणान्तरोत्पाद इति। एवं [2]सर्वत्र द्व्यणुकेषु कल्पना।**

**त्र्यणुकाद्युत्पत्तौ तु कर्म न चिन्तनीयम्, युगपद् बहूनां परमाणूनां संयोगादुत्पन्नेषु [3]द्व्यणुकान्तरकारणस्य परमाणोर्द्व्यणुकान्तरकारणेन परमाणुना सह संयोगाद् द्व्यणुकस्य द्व्यणुकान्तरकारण[4]परमाणुना संयोगः, ततोऽपि द्व्यणुकयोः संयोग इत्यनेन [5]क्रमेण**

[टि०] वाऽवयवमपेक्ष्य द्व्यणुकावच्छिन्ना[6]काशादिदेशेनापि सह विभागः कर्तव्य इति द्व्यणुक[7]नाशकाले विभागजविभागस्योत्पद्यमानता संयोगस्य विनश्यत्तेति द्व्यणुकावच्छिन्ना[8]काशादिदेशेन सह सक्रियस्य परमाणोर्यः संयोगस्तस्य [9]विनश्यत्तेति। **एवं [10]सर्वद्व्यणुकेषु** इति :– एवमिति नवसु क्षणेषु रक्तस्योत्पत्तिरित्यर्थः॥ पाकजोत्पत्तिः॥

[पं०] (कं. ११०.१०) द्व्यणुकगतानाम्। संयोगस्य **विनश्यत्तेति** (कं. ११०.११) द्व्यणुकावच्छिन्नाकाशदेशेन सह सक्रियस्य परमाणोर्यः संयोगस्तस्य विनश्यत्ता। **द्वितीयपरमाणाविति** (कं. ११०.१५) विघटितपरमाणुतो द्वितीये परमाणौ। **क्रियाविभाग[11]विभागानां विनाशयत्तेति** (कं. ११०.१७) संयोगोत्पादे हि विभागो विनश्यति। **परमाण्वाकाशसंयोगविनाश** इति (क. ११०.१९) द्व्यणुकमध्याद्विघटितस्य परमाणोः पूर्वविष्टब्धाकाशदेशेन सह संयोगविनाशः। **गुणान्तरोत्पाद** इति (कं. ११०.२४) पाकजरूपाद्युत्पत्तिः। **एवं सर्व[त्र]द्व्यणुकेषु कल्पनेति** (कं. ११०.२४) सर्व[त्र] द्व्यणुकेषु

[कु०] नोपयुज्यते। सेयं नवक्षणा प्रक्रि[या]यो यत्कर्मणा पूर्वद्व्यणुकविनाशस्तदितरपरमाणावुत्पादककर्मचिन्तयाऽऽचार्येण कृता। उत्पादककर्मचिन्तायां तु द्रव्ये विनाशसमकालमेव विभागजविभागाङ्गीकारेऽपि दशक्षणा भवन्ति। तस्यापि पृथक्क्षणाङ्गीकारेणैकादशक्षणा भवन्ति। सोऽपि हि पूर्वसंयोगविनाशादुत्तरसंयोगोत्पत्तौ द्रव्यारम्भकसंयोगविनाशहेतुक्रियानिवृत्त्योपक्षणीयः, क्रियावति क्रियान्तरानुत्पादात्, अनयोश्च साध्यसाधुत्वविवेको विभागे स्फुटीभविष्यति।

---

१ गुणान्तरोत्पादः – कं. १; कं. २। २ सर्वं – जे. १; जे. ३। ३ द्व्यणुकान्तरस्य – जे. २। ४ परमाणोश्च – जे. १ जे. ३। ५ क्रमेण संयोगजसंयोगेभ्य एमेषा – कं. १; कं. २। ६, ८ कादेशेन – अ. ब; ७ नाशककाले – अ, ब, क; ९ विनश्यत्ता – ड; १० सर्वत्र – मु. ११ विभागविभागजविभागानां – कं.।

**प्रशस्तपादभाष्यम्**

[119] एकादिव्यवहारहेतुः संख्या ।

**न्यायकन्दली**

**द्व्यणुके संयोगजसंयोगेभ्य एव एतेषामुत्पादात् । एवं यथोपदेशं यथाप्रश्नं च व्याख्यातमस्माभिः ।**

**[119] [1]सर्वलोकप्रसिद्धेऽपि सङ्ख्यास्वरूपे ये केचिदत्यन्तबुद्दर्शनाभ्यासतिरोहितबुद्धयो विप्रतिपद्यन्ते तान् [2]प्रतीदमाह–एकादिव्यवहारहेतुः सङ्ख्येति[3] । व्यवहृतिर्व्य[4]वहारो ज्ञेयज्ञानं व्यवह्रियतेऽनेनेति व्यवहारः [5]शब्दः, एक इत्यादि व्यवहारः, एकादिव्यवहार एकं द्वे त्रीणीत्यादिप्रत्ययः शब्दश्च, तयोर्हेतुः सङ्ख्येति । एकं द्वे त्रीणीत्यादिप्रत्ययो विशेषणकृतो विशिष्टप्रत्ययत्वाद् दण्डीतिप्रत्ययवत् । एवं शब्दमपि पक्षीकृत्य विशिष्टशब्दत्वादिति [6]प्रयोगो दर्शयितव्यः ।**

[टि०] [119] ( ।। अथ सङ्ख्यानिरूपणम् ।। )

**व्यवह्रियतेऽनेन** इति :–अर्थकथनम् करणे 'अनट' प्रसङ्गात् । व्यवह्रियतेऽस्माद् इति तु वाक्यं कार्यम् । **न तावत्क्वचिदस्य** इति :– य एव पूर्वं [7]मया नीलाकारो गृहीतस्तमेवेदानीं [8]गृह्णामीत्येव संवादो यदि स्यात् तदा नीलाकारस्याभ्रान्तत्वं कल्पते (कल्प्येत) ; न त्वेवमस्ति । [9]अत्रैवं हेतुद्वयमाह **तदेकज्ञानेति** ।

**[पं०]** नवभिः क्षणै रक्तस्योत्पत्तिरित्यर्थः । द्व्यणुकेष्विति त्रिषु द्व्यणुकेषु मध्ये इत्यर्थः । **संयोगजसंयोगेभ्य** [10]एव तेषामुत्पादादिति (कं. १११.१) संयोगजसंयोगेभ्य एव तेषां त्र्यणुकानामुत्पादो न तु कर्मभ्यः । आद्यसंयोगस्यैव कर्मजत्वाच्छेषाणां संयोगजत्वादेवेति भावना ।। इति पाकजोत्पत्तिः ।।

।। अथ सङ्ख्या ।।

[119] **ये केचिदिति** (कं. ११३.१७) बौद्धाः । **विशेषणकृत** इति (कं. ११३.२०) विशेषणं चेह सङ्ख्या ।

**[कु०]** इयं च प्रक्रिया नष्ट द्व्यणुककारणपरमाणावुत्पादकनाशकक्रियाद्वयाङ्गीकारेण द्रष्टव्या । द्व्यणुकान्तरारम्भकपरमाणौ संयोगनाशद्रव्यनाशश्यामादिनिवृत्ति रक्ताद्युत्पत्तिः । रक्ताद्युत्पत्तिकालेषु यथाक्रममुत्पादकक्रियाङ्गीकारे द्व्यणुकविनाशमारभ्य पञ्चमादिष्वये ? क्षणेषु द्व्यणुके रक्ताद्युत्पत्तिर्द्रष्टव्या ।

[119] धर्मिणि विप्रतिपत्तेरभावात् सङ्ख्यात्वाभिसम्बन्धात् सङ्ख्येति लक्षणस्य **रूपादीनां सर्व्वेषामित्यादि-**

---

१ सिद्धेऽपि–कं. १; कं. २ । २ प्रत्याह–कं. १; कं. २ । ३ एकादीति–कं. १; कं. २ । ४ व्यवहारो ज्ञानं –जे. १; जे. २ । ५ शब्दः, एकादिव्यवहारः–कं. १; कं. २ । ६ हेतुरवगन्तव्यः । ७ नीलाकारो मया–ड; ८ गृह्णामीत्येव–अ, ब, क; ९ अत्रैव–अ, ब, क; १० एतेषा–कं ।

## न्यायकन्दली

नन्वयं प्रत्ययो रूपादिविषयः? न, तत्प्रत्ययविलक्षणत्वात्। रूपनिमित्तो हि प्रत्ययो नीलं पीतमित्येवं स्यान्न त्वेकं द्वे [1]इत्यादि। अस्तु तर्हि निर्विषयो रूपादिव्यतिरिक्तस्यार्थस्याभावात्। कुतोऽस्मिन्नेकद्वि[2]त्र्याद्याकारो जातः? [3]आलयज्ञानप्रतिबद्धवासनापरिपाकादिति चेत्? नीलाद्याकारोऽपि तत एवास्तु, नहि ज्ञानारूढस्य तस्य सङ्ख्याकारस्य [4]च कश्चिदनुभवकृतो विशेषो येनैकोऽर्थजोऽनर्थजश्चापर इति प्रतिपद्यामहे। अथायं विशेषोऽ[5]यमभ्रान्तो नीलाकारः, सङ्ख्याकारस्तु विप्लुत इति। तदसारम्, नीलाकार[6]स्याप्यत्राभ्रान्तत्वे प्रमाणाभावात्। न तावत् क्वचिदस्यास्ति संवादः, तदेकज्ञाननियतत्वात् क्षणिकत्वाच्च। अत एव नार्थक्रियापि। न च प्रत्येकं सर्वज्ञानेषु स्वाकारमात्रसमाहितेषु पूर्वापरज्ञानवर्त्तिनामाकाराणां सादृश्यप्रतिपत्तिरस्ति, येन तत्सदृशाकारप्रवाहोपलब्धि-

[टि०] ननु येनैव नीलाकारेण मया पूर्वमर्थक्रिया कृता तेनैवेदा[7]नीमपि करोमीत्यर्थक्रिया अभ्रान्तत्वे प्रमाणं भविष्यतीत्याह अत एव नार्थक्रियापि इति। नापि सदृशेति :–[8]स्तम्भदर्शनानन्तरं कुम्भदर्शनस्यापि भावात्। ननु

[पं०] सौत्रान्तिकः प्राह नन्वयमित्यादि (कं. ११३.२२) रूपादिविषय इति (कं. ११३.२२) न तु सङ्ख्यादिविषय इति भावः। परः प्राह अस्तु तर्हीत्यादि (कं. ११३.२३)। अर्थस्येति (कं. ११४.१) सङ्ख्यालक्षणस्य। श्रीधरः पृच्छति कुतोऽस्मिन्नित्यादि (कं. ११४.१)। आलयविज्ञानेत्यादि (कं. ११४.२) सामान्याकारज्ञानसन्तान आलयज्ञानम्। तस्येति (कं. ११४.२) नीलाद्याकारस्य। [9]विप्लव(प्लुत) इति भ्रान्तः। क्वचिदस्यास्तीति (कं. ११४.६) अस्य नीलाकारस्य। तदेकज्ञाननियतत्वादिति (कं. ११४.६) नीलाकारो यस्मिन् स्वमाकारमर्पितवान् तस्मिन्ने-

[कु०] भाष्येण दर्शितत्वात् किमपरमवशिष्यते यदर्थमुत्तरं भाष्यमित्यत आह [10]सर्वलोकेति (कं. ११३.१७)। दुर्दर्शनं (कं. ११२.१७) सौगतादिमतम्। सङ्ख्येयस्वरूपादिना सिद्धसाधनतां परिहरन् प्रयोगमारचयति एकं द्वे त्रीणिति (कं. ११३.१९)। न त्वेकं द्वे इति तथात्वे एकं नीलं द्वे नीले इति सह प्रयोगो न स्यादिति भावः। कुत इति (कं. ११४.१) निरालम्बनत्वाविशेषे प्रत्ययानामाकारवैचित्र्यं नोपपद्यत इति भावः। शङ्कते [11]आलयेति (कं. ११४.२) विज्ञानसन्ततावनादि मिथ्या वासना परिपाकः स कोऽप्यस्ति यो बाह्य इव एकं द्वे इति प्रत्ययैरालम्ब्यत इति भावः। नीलाकारस्येति (कं. ११४.५) उभयोऽपि बुद्धयारूढत्वेनावि(न)शेषादिति भावः। अत एवेति (कं. ११४.७) क्षणिकत्वादेवार्थक्रियानिर्भासकाले नीलादेस्सत्त्वादर्थक्रियानिर्भासस्य च प्रामाण्यसन्देहता तदवस्थात्वेच्चेति भावः।

---

१ इति – जे. १; जे. २। २ त्रीणीत्याद्याकारो – कं. १; कं. २। ३ आलयविज्ञान – कं. १; कं. २। ४ व – कं. १; कं. २। ५ यदभ्रान्ता – जे. १; जे. २। ६ स्याप्यभ्रान्तत्वे – जे. १; जे. २। ७ –वेदानामप्यर्थक्रिया – अ, ब, क; ८ स्तम्नुनैव नीलाकारेण दर्शनान्तरं – अ, ब; ९ विप्लुत–कं.। १० यद्यपि प्रतीकमिदं नास्ति कन्दल्यां तथापि सर्वलोकसिद्धेऽपि (कं. ११३.१७) इति पाठः क्वचित्कन्दल्यां स्यादिति भाति – सं.। ११ आलंबयेति – ह. पु.।

### न्यायकन्दली

**निबन्धनः संवादो व्यवस्थाप्येत, नापि सदृशाकारोपलम्भ एव सर्वत्र, विलक्षणाकारोपलम्भस्यापि क्वचिद् भावात् । न चार्थजत्वादेव नीलाकारस्याभ्रान्तत्वसिद्धिः, अर्थस्याप्रतीतौ तज्जन्यत्वविनिश्चयायोगात्, अन्यतश्च प्रमाणादर्थप्रतीतावाकारकल्पनावैयर्थ्यात्, आकारसंवेदनादेवार्थसिद्ध्यभ्युपगमे [1]चाभ्रान्ताकारसंवेदनादर्थसिद्धिः, सिद्धे चार्थे तज्जन्यत्वविनिश्चयादाकारस्याभ्रान्तत्वसिद्धिरित्य[2]न्योन्यापेक्षत्वम् । अबाधितत्वं च नीलाकारवज्ज्ञानारूढस्य सङ्ख्याकारस्याप्यस्ति, अर्थगतत्वेन च बाधाया असम्भवो नीलादिष्वपि [3]दुरधिगमः, तेषां स्वरूपविप्रकृष्टत्वात् । तस्मादाकारमात्रसंवेदनमेव सर्वत्र, [4]स चेदेकत्राऽनर्थजोऽन्यत्रापि तथैवेति न नीलादिसिद्धिः । असति बाह्ये वस्तुनि स्वसन्तानमात्राधीनजन्मनो वासनापरिपाकस्य कादाचित्कत्वानुपपत्तौ तन्मात्रहेतोर्नीलाद्याकारस्य कादाचित्कत्वासम्भवान्नीलादिकल्पनेति चेत्, एक[5]द्वित्र्याद्याकारस्यापि बाह्यवस्त्वननुरोधिनो न कादाचित्कत्वमुपपद्यत इति सङ्ख्यापि कल्पनीया, उपपत्तेरुभयत्राप्यविशेषात् ।**

[**टि०**] क्वचिदप्यबाधितत्वान्नीलाकार[6]स्याभ्रान्तत्वमित्याह **अबाधितत्वं च** इति । ननु नीलाद्याकाराणामर्थगतत्वादभ्रान्तत्वम्, सङ्ख्याकारस्य तु ज्ञानारूढत्वात् भ्रान्तत्वमित्याह **अर्थगतत्वेन च** इति :– सौत्रान्तिकमते ह्यर्थः स्वरूपविप्रकृष्ट एव ।

[**पं०**] वैकस्मिन्ज्ञाने नीलाकारो नियतः। **विलक्षणाकारोपलम्भस्यापि क्वचिद्भावादिति** (कं. ११४.१०) नीलाकारानन्तरं पीताकारस्याऽनुभूयमानत्वात् । अर्थप्रतीतिस्तदा भवति यदाऽर्थाकारे ज्ञाने सङ्क्रान्तो भवति। न चैवमस्ति [अ]र्थाकारस्याद्याप्यप्रतीतत्वात् । अर्थे हि प्रतीते नीलाकारप्रतीतिः। **अन्यतश्च प्रमाणादिति** (कं. ११४.११) अनुमानात् । **तेषामिति** (कं. ११४.१६) नीलादीनाम् । **स्वरूपाद्पकृष्टत्वादिति** (कं. ११४.१६) सौत्रान्तिकमते हि

[**कु०**] **न च** [7]**प्रत्येक** इति (कं. ११४.७) एवं हि सादृश्यप्रतिपत्तिर(म)यमनेन सदृश इति। तथा च द्वयोराकारयोरेकज्ञानविषयत्वेन भवितव्यम् । तत्तु [त]त्त्वदर्शनेन सम्भवतीति भावः। ननु च पूर्वविदि जानजनिततद्वासनासविदस्योत्तरान्तरस्य विज्ञानस्योत्पत्तेराकारसादृश्यप्रतिपत्तिर्भविष्यतीत्यत आह **नापीति** (कं. ११४.९)। स्वदर्शनश्रद्धातिशयेनोभयोरपि विज्ञानयोः स्वाकारमात्रनिय[ते]च्छाविशेषेऽपि नीलादिज्ञानविषयसंवादात् प्रमाणत्वमिति शङ्कां निरस्यति **न चेति** (कं. ११४.१०)। आकारकल्पनावैयर्थ्यात् [इति] (कं. ११४.१२) अन्यस्य स्वाकारं विहायार्थविषयत्वाङ्गीकारे सर्वस्यापि तथात्वेनाकारविलोपप्रसङ्गादित्यर्थः। आकारस्याबाधितत्वकादाचित्कत्वाभ्यां बाह्यार्थसिद्धिरिति शङ्काद्वयं क्रमेणोपन्यस्य तुल्यन्यायतया निरस्यति **स्वाकारेत्यादिना** (कं. ११४.८) **उभयत्राप्यविशेषा** (कं. ११४.२०)दित्यन्तेन ।

---

१ वाऽभ्रान्ता – कं. १; कं. २। २ न्योन्यापेक्षित्वम् – कं. १; कं. २। ३ दुरवधिगमः – जे. ३। ४ न – कं. १; कं. २। ५ द्वित्र्याकारस्यापि – कं. १; कं. २। ६ रस्याभ्रान्तित्व – अ, ब; रस्य भ्रान्तत्व – ड; ७ प्रत्येकम् – कं।

### प्रशस्तपादभाष्यम्

[120] सा पुनरेकद्रव्या चानेकद्रव्या च । तत्रैकद्रव्यायाः सलिलादिपरमाणुरूपादीनामिव नित्यानित्यत्वनिष्पत्तयः । अनेकद्रव्या तु द्वित्वादिका परार्द्धान्ता ।

### न्यायकन्दली

यदपि द्रव्यव्यतिरिक्ता सङ्ख्या न विद्यते, भेदेनाग्रहणादित्युक्तम्, तदप्ययुक्तम्, परस्परप्रत्यासन्नानां वृक्षाणां दूरादेकत्वाद्यग्रहणेऽपि स्वरूपग्रहणस्य सम्भवात् । एवं रूपादिव्यतिरेकोऽपि व्याख्यातः, दूरे रूपस्याग्रहणेऽपि द्रव्यप्रत्ययदर्शनात् ।

[120] एवं सिद्धे सङ्ख्यास्वरूपे तस्या भेदं प्रतिपादयति–'सा पुनरेकद्रव्या चानेकद्रव्या चेति । एकं द्रव्यमाश्रयो यस्याः सा एकद्रव्या । अनेकं द्रव्यमाश्रयो यस्याः सा अनेकद्रव्या । 'च' शब्दावेकद्रव्यानेकद्रव्ययोरन्योन्यसमुच्चयं प्रदर्शयन्तौ प्रकारान्तराभावं कथयतः । तत्रैकद्रव्यानेकद्रव्ययोर्मध्ये एकद्रव्यायाः सलिलादिपरमाणुरूपादीनामिव नित्यानित्यत्वनिष्पत्तयः यथा सलिलपरमाणौ रूपरसस्पर्शा नित्यास्तथैकत्वसङ्ख्यापि । यथा च कार्ये सलिलस्य रूपादयोऽनित्या आश्रयविनाशाद्विनश्यन्ति कारणगुणप्रक्रमेण च निष्पद्यन्ते, तथैकत्वसङ्ख्यापि ।

[टि०] [120] सलिलादिपरमाणुरूपादीनामिति–ननु सलीलादिपरमाणुरूपादीनां नित्यत्वेन तत्कथम'नित्यत्वस्या-

[पं०] नीलाकारं मे ज्ञानं तस्माद् हि नोऽेन भाव्यमित्युल्लेखवेद्या नीलादयः स्वतः स्वरूपविप्रकृष्टा एवेति भावः । सर्वत्रेति (कं. ११४.१७) सङ्ख्यायां नीलादौ अर्थे च । एकत्रेति (कं. ११४.१७) सङ्ख्यादौ । अन्यत्रापीति (कं. ११४.१७) नीलादावपि । बाह्यवस्त्वननुरोधिन इति (कं. ११४.२०) सौत्रान्तिकमतापेक्षया ।

[120] कार्यसलिलरूपादय इति (११५.४) जलावयवारब्धावयविनः ।

[कु०] एवं रूपादिव्यतिरेक इति (कं. ११४.२३) रूपादिभ्यः सङ्ख्याया व्यतिरेक इत्यर्थः । द्रव्यप्रत्ययदर्शनादिति (कं. ११४.२४) सङ्ख्याविशिष्टस्य द्रव्यस्य प्रत्ययो दृश्यत इत्यर्थः । एतेन स्वरूपाभेद एकत्वं स्वरूपाभे[दो] द्वित्वादिकमिति प्रत्युक्तं, स्वरूपाभेदस्य प्रतिवस्तुनियतत्वादेकत्वस्य चानुवृत्तत्वात् । स्वरू[प]भेदस्य च द्वित्वादिषु परार्धान्तेषु साधारण्येन द्वित्वत्रित्वादिसङ्करप्रसङ्गादिति । तद्वदसमुच्चय एकत्वं समुच्चयो द्वित्वादिकमिति प्रत्युक्तं द्वित्वादेरेव समुच्चयत्वात् भिन्नानामभिन्नबुद्ध्यग्रहमात्रस्य समुच्चये द्वित्वादिविलोपप्रसङ्गाच्चेति । न च सामान्यविशेषा एकत्वादयः सन्त्विति वाच्यं पृथिवीत्वादिभिः सह सङ्करप्रसङ्गादिति । एकादिव्यवहार इति च गणनामात्रस्य विवक्षितत्वात् प्रत्येकं भागासिद्धिः । समुदायस्य स्वरूपासिद्धिरिति भावे वक्तव्यं गणनाहेत्वेकस्यैकत्वादिपरार्धान्तसर्वसङ्ख्या साधारणत्वादिति ।

---

१ एकद्रव्या–जे. १, जे. २ । २ सलिलरूपादय–जे. १, जे. २ । ३ मनित्यस्याप्य–ब, क । ४ सलिलस्य–कं. ।

### प्रशस्तपादभाष्यम्

[121] [122] [123] तस्याः खल्वेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाद् विनाश इति । कथम्? यदा बोद्धुश्चक्षुषा समानासमानजातीययोर्द्रव्ययोः सन्निकर्षे सति तत्संयुक्तसमवेतसमवेतैकत्व[1]सामान्यज्ञानोत्पत्तावे[2]कत्वसामान्यतत्सं[3]म्बन्धज्ञानेभ्य [4]एकगुणयोरनेकविषयिण्येका बुद्धिरुत्पद्यते तदा तामपेक्ष्यैकत्वाभ्यां स्वाश्रययोर्द्वित्वमारभ्यते । ततः पुनस्तस्मिन् द्वित्वसामान्यज्ञानमुत्पद्यते ।

[5]तस्माद् द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनश्यत्ता, द्वित्वसामान्यतत्स[6]म्बन्धतज्ज्ञानेभ्यो द्वित्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः ।

तत इदानीमपेक्षाबुद्धिविनाशाद् द्वित्वगुणस्य विनश्यत्ता, [7]द्वित्वगुणबुद्धितः सामान्यबुद्धेरपि विनश्यत्ता, द्वित्व[8]गुणज्ञानतत्सम्बन्धेभ्यो द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः ।

### न्यायकन्दली

अनेकद्रव्या तु द्वित्वादिका परार्द्धान्ता । द्वित्वमादिर्यस्याः सा द्वित्वादिका, परार्धान्तो यस्याः सा परार्धान्ता । यस्मिन्नियत्ताव्यवहारः समाप्यते स परार्धः । एकद्रव्यवर्त्तिन्या [9]एकत्वसङ्ख्यायाः सकाशाद् द्वित्वादेरनेक[10]वृत्तित्वविशेषप्रतिपादनार्थः 'तु' शब्दः ।

[टि०] ष्यतिदेशः? नैवम्, सलिलं कार्यरूपं, तच्च तदादिभूतपरमाणवश्च [11]सलिलादिपरमाणवः । अथवा सलिलादयः कार्यरूपाः, ते च प्रत्यासत्तेस्तत् परमाणवश्चेति विग्रहेण द्वयोरपि ग्रहणात् ।

[पं०] [121] [12]एकैक गुणादिति (११५.१६) एकैकलक्षणे सङ्ख्ये द्वे । एकगुणयोरिति (११५.१८) एकाख्य-

[कु०] [120] [13]तस्या भेदमिति (कं. ११४.२५) गुणान्तरेभ्यो वैधर्म्यं दर्शयितुमिति शेषः । सलिलादिपरमाणुरूपादीनामिति (कं. ११५.२) भाष्यपदस्यायं विग्रहः, सलिलमादिर्यस्य तत् सलिलादि स चासौ परमाणुश्च सलिलादिपरमाणुः, तस्य रूपमादिर्येषां द्व्यणुकादिरूपादीनामिति । यस्मिन्नियत्तेति (कं. ११५.७) अयमर्थ आगमात्प्रत्येतव्यः ।

---

१ सामान्ये – जे. १ । २ 'एकत्वसामान्यज्ञानोत्पत्तौ' इत्यधिकं 'दे' पुस्तके । ३ सम्बन्धतज्ज्ञानेभ्यः – कि. भा. व्यो. (४५७) । ४ एकत्वगुणयोः कि. । ५ तस्माद्द्वित्वसामान्यज्ञानादपेक्षाबुद्धिविनाशाद् द्वित्वगुणस्य विनश्यत्ता, द्वित्वगुणबुद्धितः सामान्यबुद्धेरपिरपि विनश्यत्ता द्वित्वगुणज्ञानतत्सम्बन्धेभ्यो द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः –दे, ततः पुनः – कि. भा. । ६ तज्ज्ञानतत्सम्बन्धेभ्यः – (यो. ४५७), तत्सम्बन्धज्ञानेभ्यः – जे. । ७ द्वित्वगुणज्ञानं द्वित्वसामान्यज्ञानस्य विनाशकारणम् – कं. १, कं. २ । ८ गुणतज्ज्ञानसम्बन्धेभ्यः – कं. १, कं. २ । ९ एकसङ्ख्यायाः – जे. २ । १० वृत्तिविशेष – जे. १, जे. २ । ११ सलिलादिपरमाणवश्च, सलिलादिपरमाणवः – अ, ब, क । १२ एकगुणौ – कं. । १३ तस्य – ह. पु ।

## न्यायकन्दली

**[121] तस्याः खल्वेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धि[1]विनाशाच्च विनाशः। खल्वित्यवधारणे, तस्या एकत्वेभ्यो निष्पत्तिरेव, न त्वेकैकगुणसमुच्चय[2]मात्रत्वमित्यर्थः। एकत्वे चैकत्वानि चेति समासाश्रयणम्, अन्यथा द्वित्वोत्पत्तिकारणं न कथितं स्यात्। अनेकविषयबुद्धिसहितेभ्य इति। अनेकशब्द एको न भवतीति व्युत्पत्त्या द्वयोर्बहुषु च द्रष्टव्यः, अनेकेषु विषयेषु या बुद्धिस्तत्सहितेभ्य इति। एतदेव प्रश्नपूर्वकं प्रतिपादयति–कथमित्यादिना। यदा यस्मिन् काले बोद्धुरात्मनश्चक्षुषा समानजातीययोर्घटयोरसमानजातीययोर्घटपटयोर्वा सन्निकर्षे [3]संयोगे भूते सति चक्षुःसंयुक्तयोर्द्रव्ययोः प्रत्येकं समवेतौ [4]यावेकैकगुणौ तयोः समवेतं यदेकत्वं सामान्यं तस्मिन् ज्ञानमुत्पद्यते। विशेषणज्ञानं विशेष्यज्ञानस्य कारणम्। एकगुणयोश्च विशेष्ययोरेकत्वसामान्यं विशेषणम्,**

[**टि०**] [121] **एकगुणयोश्च** इति :–एकत्व[5]सामान्याश्रयौ गुणावेकगुणाविति विग्रहः कार्यः। **न च विषय[6]सम्बन्धात् (सम्बन्धम्)** इति :–विषयैः सह यः सम्बन्धस्तं नाधितिष्ठति, विषयैः सह मनो न सम्बध्यते इति भावः। ननु तर्हि विषयान्तःकरण[7]सम्बन्धाभावात् कथं मनःसम्बद्धानां ज्ञानहेतुत्वमित्याह **चक्षुरधिष्ठानादेव च** इति। तस्य मनसः सम्बन्धाश्चक्षुरधिष्ठानद्वारेणैव कार्यहेतवो न तु साक्षाद् विषयाधिष्ठानद्वारेण।

[**पं०**] सङ्ख्ययोः। **तेनादौ[8] तत्र ज्ञानं चिन्त्यत** इति (कं. ११५.१८) तत्रेति एकत्वसामान्येनागृहीतविशेषणाद्विशेष्ये बुद्धिः प्रवर्तते। अतः प्रथमम् एकत्वसामान्यज्ञानं, तत एकगुणज्ञानमिति वाक्यार्थः। **न च प्रत्यासत्तिमन्तरेण चाक्षुषं ज्ञानं जायत** इति (कं. ११५.१९) सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना–इति वचनात्। प्रत्यासत्तिमेव दर्शयति–**एकत्वसामान्यस्येत्यादिना** (कं. ११५.१९)। **इन्द्रियेणेति** (कं. ११५.२०) चक्षुरिन्द्रियेण सह। **संयुक्तसमवेत समवायलक्षण** इति (कं. ११५.२०) चक्षुरश्मिभिः संयुक्तं घटादि, तेन समवेता सङ्ख्या, तया सह समवाय एकत्वसामान्यस्येत्यर्थः। **ज्ञानोत्पत्तौ** इति (कं. ११५.२१) सामान्यज्ञानोत्पत्तौ। **एकत्वसामान्यादित्यादि** (कं. ११५.२१)

[**कु०**] [121] **न त्वेकैकेति** (कं. ११५.१०) तथा द्वे, द्वित्व त्रित्वव्यवस्थानुपपत्तिरिति भावः। समासग्रहणमतन्त्रेण ग्रहणं तच्च जातौ बहुवचननिर्देशात्सिद्धं यथा 'हलोऽनन्तराः संयोग इति भावः। **एतदेवेति** (कं. ११५.१४) एकत्वानामसमवायिकारणत्वम्, अनेकैकविषयिण्या बुद्धेश्च निमित्तकारणत्वमित्यर्थः। नत्वनेकैकगुणविषयिणी बुद्धिर्द्वित्वादेरुत्पादिकेत्यभिप्रायः। एकत्वसामान्यबुद्धिचिन्ता क्वोपयुज्यत इत्यत आह **विशेषणज्ञानमिति** (कं. ११५.१७)।

---

१ विनाशाद्विनाशः–कं. १, कं. २। २ मात्रमित्यर्थः–जे. १, जे. २। ३ संयोगे सति–कं. १, कं. २। ४ यावेकगुणौ–कं. १; कं. २। ५ सामान्याश्रयोवेकगुणाविति–अ। ६ सम्बन्धाम्–अ, ब; सम्बन्धात्–क, मु.–जे. १, जे. ३। ७ सम्बन्धां कथं–अ। ८ तत्रैव–कं.।

न्यायकन्दली

तेनादौ [1]तत्रैव ज्ञानं चिन्त्यते। न च प्रत्यासत्तिमन्तरेण चाक्षुषं ज्ञानं जायत इत्येकत्वसामान्यस्येन्द्रियेण संयुक्तसमवेतसमवायलक्षणः सम्बन्धो दर्शितः। एवं ज्ञानोत्पत्तौ भूतायामेकत्वसामान्यात् तस्यैकत्वस्यैकगुणाभ्यां सम्बन्धाज्ज्ञानाच्च एकगुणयोरनेकविषयिण्युभयैक[2]गुणालम्बिन्येका बुद्धिरुत्पद्यत इति, एकं चक्षुरिन्द्रियमन्तःकरणेन युगपदुभयोरधिष्ठानासम्भवादेकस्यैव सर्वदा विषयग्राहकत्वे द्वितीयस्य कल्पनावैयर्थ्यात्। तस्योभाभ्यां गोलकाभ्यां रश्मयो [3]निस्सरन्ति विषयैश्च सह सम्बध्यन्ते, प्रदीपस्येव गृहान्तर्गतस्य गवाक्षविवराभ्याम्। तत्रान्तःकरणं साक्षाच्चक्षुरधितिष्ठति न विषय-

[टि०] नन्वेकस्मादात्म[म]नःसंयोगादस्त्वेकस्यैव निर्विकल्पस्योत्पत्तिः युगपदनेकसङ्केतस्मरणाभावात्, सविकल्पकं [4]त्वनेकमेवास्तु इत्याशङ्क्याह – अत एव [5]सविकल्पकेति।

ननु द्वित्वे सामान्यविशेषरूपे नित्येऽप्यङ्गी[6]क्रियमाणेऽपेक्षाबुद्ध्यन्वयव्यतिरेकानुविधानं भविष्यति स्वाभिव्यक्त्यर्थं

[पं०] अत्र एका बुद्धिरुत्पद्यत इति [7]त्रिपु स्थानेषु सम्बध्यते। तद्यथा एकत्वसामान्यादेका बुद्धिरिति द्वित्वबुद्धिरुत्पद्यते। [8]तथा **तस्यैकत्वस्यैकगुणाभ्यामिति** (कं. ११५.२१) एकाख्या सङ्ख्याभ्यां सम्बन्धादेका बुद्धिरुत्पद्यते। तथा **तज्ज्ञानाच्चेति** (कं. ११५.२१) एकत्वज्ञानादेका बुद्धिरुत्पद्यते। **एकगुणयोरिति** (कं. ११५.२२) एकाख्यासङ्ख्ययोः। **उभयैकगुणा[9]लम्बनवतीति** (कं. ११५.२२) उभयरूपौ द्रव्यद्वयस्थौ यौ एकगुणौ एकाख्यौ द्वे सङ्ख्ये ते आलम्बनम् आश्रयोऽस्यास्तीति उभयैकगुणालम्बनवती एवं विधा द्वित्वधीरुत्पद्यत इति वाक्यार्थः। अथ किम् तया उभयगुणालम्बनया(लम्बिन्या) एकबुद्ध्या (द्वि)विधं य चक्षुर्गोलकयुगाधिष्ठानचक्षुरिन्द्रियद्वयेनापि युगपदनयोर्गुणयोर्गृहीतत्वात् तत्राह **एकं चक्षुरिन्द्रियमित्यादि** (कं. ११५.२२)। अथवा एवमापातनिका क्रियते न तु द्वित्वं द्वयोर्वस्तुनोर्गृह्यमाणयोर्भवति तत्कथमनेकविषयं ज्ञानं युगपदुत्पद्यते इत्याशङ्क्याह एकं चक्षुरिन्द्रियमित्यादि। एकं चक्षुरिन्द्रियमिति कोऽर्थः? गोलकद्वयं दृष्ट्वा द्वे चक्षुरिन्द्रिये इति मा मंस्था, उभाभ्यामपि गोलकाभ्यामेकमेव चक्षुरिन्द्रियमित्यर्थः।

[कु०] ननु प्रतिविषयं भिन्ना एव बुद्धयः, विषयावच्छेदस्यैव बुद्धिभेदहेतुत्वात्। किञ्च कारणभेदादपि चाक्षुष्यो बुद्धयो न नि[ष्प]द्यन्त इत्याशङ्कां चक्षुरेकत्वे साधने दूषयति **एकं चक्षुरिति** (कं. ११५.२२)। **अन्तःकरणेनेति** (कं. ११५.२३) अणुत्वादिति शेषः। **एकस्येति** (कं. ११५.२३) रूपोपलब्धितृष्णापूर्वकं कर्म एकेनैव स्वकार्यं निर्वर्तयितुमीष्टे यथा रसनेन रसोपलब्धितृष्णापूर्वकं कर्म। ततश्च द्वितीयकल्पनायां प्रमाणाभाव इत्यर्थः। ननु यद्येकं चक्षुः कथं तर्हि द्वित्वमुपलभ्यत इत्यत आह **तस्येति** (कं. ११५.२४)। न तावच्चक्षुः प्रत्यक्षं येन तद्द्वित्वमुपलभ्यते किन्तु अधिष्ठाने चक्षुत्वभ्रमः ततश्च द्वित्वमपि तदीयमेवेति भावः।

---

१ तत्र ज्ञानं – जे. १, जे. २। २ गुणालम्बनवती – जे. १, जे. २। ३ निश्चरन्ति – जे. १, जे. २। ४ त्वेक – ड। ५ सविकल्पे – मु. सविकल्पके – जे. १, जे. ३। ६ क्रियमाणोपक्षा – अ, क्रियमाणोपेक्षा – ब। ७ द्विषु – अ। ८ तथा – कं. पुस्तके नास्ति। ९ गुणालम्बिनी – कं।

न्यायकन्दली

सम्बन्धात्, बहिर्निर्गमनाभावात्, चक्षुरधिष्ठानादेव च तस्य सम्बन्धा ज्ञानोत्पत्तिहेतवः। एवं च सति युगपदनेकेषु विषयेषु ज्ञानं भवत्येव, कारणसामर्थ्यात्। तच्च भवदेकमेव प्र[1]भवति, आत्मान्तःकरणसंयोगस्यैकस्यैकज्ञानोत्पत्तावेव सामर्थ्यात्।

अत एव [2]सविकल्पकोत्पत्तिरपि, युगपदभिव्यक्तेष्वनेकसङ्केतविषयेषु संस्कारेषु स्मृतिहेतुष्वात्मान्तःकरणसंयोगस्य सामर्थ्यादेकस्यानेकविषयस्मरणस्योत्पादात्। यदि नामानेकगुणालम्बनैका बुद्धि[3]रुपजाता ततः [4]किमित्यत आह? [5]तदा तां बुद्धिमपेक्ष्यैकत्वाभ्यामेकगुणाभ्यां स्वाश्रययोर्द्रव्ययोर्द्वित्वमारभ्यते। स्वाश्रययोः समवायिकारणत्वम्, एकगुणयोरसमवायिकारणत्वम्, अनेकविषयाया बुद्धेर्निमित्तकारणत्वम्। यदेकगुणयोरेका

[**टि०**] तदपेक्षणादित्याशङ्कते **उभयगुणालम्बनस्य** इति। **यदि हि** इत्यादि:–यदि हि द्वित्वमपेक्षाबुद्ध्यभिव्यक्तं स्यात्तदा यथा प्रदीपाभिव्यक्तो घटः पुरुषान्तरेणोपलभ्यते तथा द्वित्वमप्युपलभ्येत, न त्वेवमस्ति, यस्यैव हि उभयैकत्वालम्बना बुद्धिस्तस्यैव द्वित्वप्रत्ययात्। **बुद्धिजत्वे तु यस्य** इति:–यस्यैव बुद्ध्या सुखं जन्यते तस्यैव सुखज्ञानं नान्यस्येति

[**पं०**] **द्वितीयस्येति** (कं. ११५.२४) चक्षुरिन्द्रियस्य। **तस्येति** (कं. ११५.२४) चक्षुरिन्द्रियस्य। **अन्तःकरणमिति** (कं. ११५.२६) कर्तृभूतं चक्षुरिति। कर्मभूतं विषय[6]सम्बन्धान् इति शसन्तं पदम्। **तस्येति** (कं. ११५.२७) मनसः। **सम्बन्धा** इति (कं. ११५.२७) कर्तृभूताः। **एकज्ञानोत्पत्तावेव सामर्थ्यादिति** (कं. ११६.१). एकस्मिंश्चाक्षुषे ज्ञाने अनेकविषयग्रहणं भवत्येव इन्द्रियान्तरज्ञानं तु न भवति तदिति परमार्थः न विकल्पद्वयं सकृदिति।

सौगतमतं निरस्यन्नाह **अत एवेत्यादि** (कं. ११६.१)। **एकस्यानेकविषयस्मरणोत्पादादिति** (कं. ११६.३) अनेकविषयत्वेऽपि स्मरणमेकमेवेत्यर्थः। **अनेकगुणालम्बनेति** (कं. ११६.३-४) अनेकसङ्ख्यालम्बना पृथग् द्रव्यद्रयाश्रितैकैकसङ्ख्याश्रिता इति यावत्। **एका बुद्धिरिति** (कं. ११६.४) द्वित्वबुद्धिः। **स्वाश्रययोरिति** (कं. ११६.५) द्रव्ययोः। **एकगुणयोरिति** (कं. ११६.६) एकाख्यासङ्ख्ययोः। **क्षणद्वयात्मकलवाख्यकालाभिप्रायेणेति** (कं. ११६.८) *प्रथमक्षणे बुद्धिरुत्पद्यते, द्वितीयक्षणे तामपेक्ष्य द्वित्वमुत्पद्यतेऽतो बुद्धिः कारणं द्वित्वं कार्यम्।* ***कार्यकारणयोरिति***

[**कु०**] चक्षुष एकत्वं समर्थ्य प्रतिविषयं मनसम्बन्धस्य भेदं विचारयति **तत्रेति** (कं. ११५.२६)। तर्हि विषयभेदे ज्ञानं भिन्न(न)त्वित्यत आह **तच्च भवदिति** (कं. ११५.२८)। तत्र तर्कमाह **अत एवेति** (कं. ११६.१)। यदि विषयभेदो ज्ञानं भिन्द्यात् समूहालम्बनं सविकल्पकं न स्यादिति भावः। [7]**लवात्मकेति** (कं. ११६.८) अवच्छेदकतपनपरिस्पन्दसमुदायस्यैकत्वं, विवक्षया तदवच्छिन्नस्याप्येकत्वमविरुद्धमित्यर्थः। [अलौकिकमिति (कं. ११६.९)] [8]लोक्यतेऽनेनेति

---

१ भवति–जे. १, जे. २। २ सविकल्पो–कं. १, कं. २। ३ रुत्पन्ना–जे. १, जे. २। ४ किमेतावता–कं. १, कं. २। ५ तदेतां–कं. १, कं. २। ६ सम्बन्धाद्–कं। ७ क्षणद्वयात्मलवाख्यकाल इति कन्दल्याम्। ८ अत्र [अलौकिकमिति] प्रतीकेन भाव्यम्–सं। (३ पे. हृ. पु.)

### न्यायकन्दली

**बुद्धिरुत्पद्यते तदेकत्वाभ्यां द्वित्वमारभ्यत [1]इत्येककालतानिर्देशः क्षणद्वयात्मकलवाख्य-कालाभिप्रायेण । क्षणाभिप्रायेण तु कालभेद एव, कार्यकारणयोः पूर्वापरकालभावात् । ज्ञानादर्थस्योत्पाद इति नालौकिकमिदं सुखादीनां तस्मादुत्पत्तिदर्शनात् । बाह्यार्थस्योत्पादो न दृष्ट [2]इति न वैधर्म्यमात्रम्, तदन्वयव्यतिरेकानुविधायित्वस्योभय[3]त्राप्यविशेषात् । [4]उभयगुणज्ञानालम्बनस्य द्वित्वाभिव्यञ्जकत्वे [5]सिद्धे द्वे इति ज्ञानस्य [6]तदा नानन्तर्य्य-नियमोपपत्तिरिति चेन्न, अनियमप्रसङ्गात् । यदि हि द्वित्वमबुद्धिजं स्याद्रूपादिवत्पुरुषा-न्तरेणापि प्रतीयेत, नियमहेतोरभावात् । बुद्धिजत्वे तु यस्य बुद्धया यज्जन्यते तत् तेनैवोपलभ्यत इति नियमोपपत्तिः । प्रयोगस्तु द्वित्वं बुद्धिजं नियमेनैकप्रतिपत्तृवेद्यत्वाद्,**

[**टि०**] बुद्धिकार्यत्वपक्षे तु न दृष्टान्त इति भावः । तदेवं प्रतिबन्धसिद्धावनुमानयन्ति **द्वित्वं बुद्धिजं** इत्यादि । एकानेक-प्रतिपत्तृवेद्यघटव्यवच्छेदार्थं नियमेनेत्युक्तम् । ननु तथापि प्रयत्नस्तावन्न बुद्धिजः तस्येच्छाजन्यत्वात्, न च कर्णकोटरा-ध्यासीना शब्दव्यक्तिः, तस्याः पूर्वशब्दजन्यत्वात्; नापि जागराद्यज्ञानं प्रथमाक्षसन्निपातजं वा स्मृतिर्वा तेषामात्ममन-

[**पं०**] (कं. ११६.८) कार्यं द्वित्वं कारणमेका बुद्धिस्तयोः कार्यकारणयोः । **ज्ञानादिति** (कं. ११६.९) अपेक्षाबुद्धिलक्षणात् । **अर्थस्येति** (कं. ११६.९) द्वित्वस्य । ननु ज्ञानात् सुखादीनामा[भ्य]न्तराणामेवार्थानामुत्पत्तिर्दृष्टा न बाह्यानाम्, स्वपेक्षा बुद्धिलक्षणज्ञानात्तु द्वित्वस्य बाह्यार्थस्योत्पत्तिविद्भिरुच्यते इति । **सुखादीनां तस्मादुत्पत्तिदर्शनादिति** (कं. ११६.९) असिद्धो हेतुर्वैषम्यादिति । परवचनमाशङ्कयाह—**बाह्यार्थस्योत्पादो न दृष्ट** इति (कं. ११६.१०) । **वैधर्म्यमात्रमिति** (कं. ११६.१०) वैधर्म्यमात्रमिति कोऽर्थः ? असदुपालम्भा जातिदूषणमात्रमे[त]दिति यावत् । **तदन्वयव्यतिरेकानुविधायित्वस्योभयत्रेति** (कं. ११६.१०) द्वित्वे सुखादौ च । **द्वित्वाभिव्यञ्जकत्वेपीभि**(ति) (कं. ११६.११) निमित्तभावेन जनकत्वं विनापि द्वित्वाभिव्यञ्जकत्वमात्रेणैव । उभयगुणालम्बनं च ज्ञानान्तरं द्वे इति प्रत्ययं नियमेन करिष्यति, अलं द्वित्वस्योभयगुणालम्बनज्ञानजन्यत्वकल्पनयेत्यर्थः । **[7]तदाऽनन्तर्यनियमोपपत्तिरिति** (कं. ११६.१२) उभयगुणालम्बनज्ञानानन्तरभावित्वनिश्चयोपपत्तिः । **नियमहेतोरभावादिति** (कं. ११६.१३) जन्यजनकभावो हि नियामकः ।

[**कु०**] लोकः प्रमाणं तत्र विहितं लौकिकम् । ततोऽन्यदलौकिकं प्रमाणादिकमित्यर्थः । **वैधर्म्यमात्रमिति** (कं. ११६.१०) सामान्यव्याप्तिमदूषयित्वा 'पक्षे साध्यानङ्गीकारे विवक्षितपर्वतवर्तिनोऽपि धूमस्य वह्निपूर्वकत्वं न दृष्टमित्यादेऽपि सुवचत्वादनुमानमात्रोच्छेदप्रसङ्ग इत्यर्थः । ज्ञानान्वयव्यतिरेकानुविधायित्वं न द्वित्वस्य किन्तु तज्ज्ञानस्येति शङ्कते **उभयगुणेति** (कं. ११६.११) । **नियमेनैकप्रतिपत्तृवेद्यत्वादिति** (कं. ११६.१५) अभिव्यक्तिपक्षे नित्यानित्यत्वादि-

१ इत्येककालनिर्देशः—कं. १, कं. २ । २ इति वैधर्म्यमात्रम्—जे. १, जे. ३ । ३ उभयत्राविशेषात्—कं. १, कं. २ । ४ उभयगुणालम्बनस्य—कं. १, कं. २ । ५ सिद्धे सति—कं. १, कं. २ । ६ तदाऽनन्तर्यं—जे. १, जे. २ । ७ तदा नानन्तर्यं—कं ८ पे. (ह. पु.) ।

न्यायकन्दली

यन्नियमेनैकप्रतिपत्तृवेद्यं तद् बुद्धिजं यथा सुखादिकम् । नियमेनैकप्रतिपत्तृवेद्यं च द्वित्वं तस्मादिदमपि बुद्धिजम् ।

एवं द्वित्वस्योत्पन्नस्य प्रतीतिकारणं निरूपयति–ततः पुनरिति । ततो द्वित्वोत्पादादनन्तरं द्वित्वसामान्ये तस्मिन् ज्ञानमुत्पद्यते । अत्रापि संयुक्तसमवाय एव हेतुः । एकत्वसामान्यापेक्षया पुनरिति वाचोयुक्तिः । द्वित्वसामान्यं द्वित्वगुणस्य विशेषणम्, न चागृहीते विशेषणे विशेष्ये बुद्धिरुदेति, अतो [1]विशेष्यज्ञानकारणत्वेनादौ सामान्यज्ञानं निरूपितम् । अस्य सद्भावेऽपि द्वित्वसामान्यविशिष्टा द्वित्वबुद्धिरेव प्रमाणम् । तस्याः सद्भावेऽपि [2]द्वे द्रव्ये इति ज्ञानं प्रमाणम् । द्वे द्रव्ये इति ज्ञानं विशेषणज्ञानपूर्वकं विशिष्टज्ञानत्वाद् दण्डीति ज्ञानवदित्यनुमिते गुणज्ञाने तस्यापि विशिष्टज्ञानत्वेन विशेषणज्ञानपूर्वकत्वमनुमेयम् ।

[**वि०**] संयोगविषयेन्द्रियसंयोगसंस्कारादिजन्यत्वात् । [3]न च तथा[4]ऽऽत्मा तस्य नित्यत्वात्, तत एतेषु बुद्धिजत्वाभावेन विपक्षेषु नियमेनैकप्रतिपत्तृवे[5]द्यत्वस्य गतत्वादनैकान्तिकत्वम्? सत्यम्, तद् व्यवच्छेदार्थं प्रयत्न-शब्द-ज्ञान-ज्ञानाधारान्यत्वे सतीति विशेषणीयम् ।

[पं०] **द्वित्वसामान्ये** (कं. ११६.१८) द्वित्वसामान्ये ज्ञाते सतीत्यर्थः । **तस्मिन्निति** (कं. ११६.१८) द्वित्वे । **अत्रापीति** (कं. ११६.१९) न केवलमेकत्वे द्वित्वेऽपीत्यर्थः । **संयुक्तसमवेतसमवाय एवेति** (कं. ११६.१९) चक्षुःसंयुक्ते द्वे द्रव्ये तयोः समवेतं द्वित्वं, तत्समवेतं द्वित्वसामान्यम् । **न चागृहीते विशेषणे विशेष्ये बुद्धिरुदेतीति** (कं. ११६.२०) अयमत्र भावः, द्वित्वसामान्ये ज्ञाते एव हि द्वित्वं ज्ञायते । विशेषणज्ञानपूर्वकत्वाद्विशेष्यज्ञानस्य । **विशेषणज्ञानपूर्वकमिति** (कं. ११६.२३) द्रव्ये इति विशेषणे ज्ञाते द्वि इति ज्ञायते इत्यर्थः । **गुणज्ञाने** इति (कं. ११६.२४) द्वित्व[6]सङ्ख्या[ज्ञा]ने । **तस्यापीति** (कं. ११६.२४) गुणज्ञानस्यापि । **विशेषणज्ञान[7]पूर्वक[त्व]मिति** (कं. ११६.२४) अत्र विशेषणं द्वित्वसामान्यम् ।

[**कु०**] विकल्पपराहतत्वात्काकतालीयन्यायेनापेक्षया बुद्धिमतां ज्ञायमानं द्वित्वं सामग्रीभेदादन्यदेवेति विशेष्यासिद्धिश्च नाशङ्कनीयेति । अपेक्षाबुद्धिः द्वित्वजननी, अभिव्यञ्जकत्वानुपपत्तौ सत्यां बुद्ध्या नियमेनानुविधीयमानत्वात् शब्दं प्रति संयोगवदिति चापेक्षाबुद्धेर्द्वित्वोत्पादकत्वसिद्धिः । न **चागृहीतेत्यादिना** (कं. ११६.२१) प्रबन्धेन गृह्यमाणं विशेषणं विशिष्टबुद्धेः कारणमित्युक्तो विशेषविधिः शेषनि[षेध]पर इति न्यायादालम्बनत्वं निषिद्धं भवति । अस्य च प्रयोजनं द्वित्वविनाशकाले तद्विशिष्टबुद्धेरुत्पत्त्यविरोध इति प्रतिपादनम् । अतस्तद्विवक्षमानानुत्थाप्य दूषयति ।

---

१ विशेष्यविज्ञानं–कं. १, कं. २ । २ द्वे इति ज्ञानं–जे. २ । ३ च न–ड । ४ चात्मा तस्य–ड । ५ वेद्यस्य–अ, ब, क । ६ संङ्ख्याने–पं. । ७ पूर्वकत्व–कं. ।

### न्यायकन्दली

[122] ये तु विशेषणविशेष्ययोरेकज्ञानालम्बनत्वमाहुः, तेषां सुरभि चन्दनमित्यत्र का वार्त्ता? नहि चक्षुर्गन्धविषयं न च घ्राणं द्रव्यमादत्ते। अत एव न ताभ्यां सम्बन्धग्रहणम्, उभयसम्बन्धिग्रहणाधीनत्वात्सम्बन्धग्रहणस्य। यथा संस्कारेन्द्रियजन्यं प्रत्यभिज्ञाप्रत्यक्षमुभयकारणसामर्थ्यात्पूर्वापरकालविषयम्, एवं चक्षुर्घ्राणाभ्यां सम्भूय जन्यमानमिदं कारणद्वयसामर्थ्यादुभयविषयं स्यादित्येके समर्थयन्ति।

तदपि न साधीयः, निर्भागत्वात्। यदि ज्ञानं सभागं स्यात्तदा कश्चिदस्यांशो घ्राणेन जन्यते कश्चिच्चक्षुषेत्युपपद्यते व्यवस्था, किन्त्विदमेकमखण्डमुभाभ्यां जनितं यदि गन्धं द्रव्यं च गृह्णाति, तदा गन्धोऽपि चाक्षुषो द्रव्यमपि घ्राणगम्यं प्रसक्तम्, तज्जनितज्ञानविषयत्वलक्षणत्वात्तदिन्द्रियग्राह्यतायाः। न चाणुत्वान्मनसो युगपदुभयेन्द्रियाधिष्ठानसम्भवः। तस्माद् घ्राणेन गन्धे गृहीते पश्चात्तद्ग्रहणसहकारिणा चक्षुषा

[टि०] [122] **अत एव न ताभ्याम्** इति :—करणे तृतीया, कर्तृतृतीयायां तु न कर्तरि इति निषेधात् सम्बन्धग्रहणमित्यत्र कर्मजषष्ठीसमासो न स्यात्। [1]**प्रत्यक्षतो सति** इति :—यद्यपि पुरुषो दण्डी, पर्वतो वह्निमान् इत्युभयत्राप्येकालम्बनत्वमुभयालम्बनत्वं वा तुल्यं तथापि सुरभिचन्दनमित्यत्र बाधवशादेकालम्बनत्वसिद्धावन्यदपि विशिष्टं

[पं०] [122] **ये त्विति** (कं. ११६.२५) यौमादयः (यौगादयः?)। **सुरभिचन्दनमित्यत्र का वार्ते**ति (कं. ११६.२५) सुरभीति विशेषणं हि घ्राणज्ञानालम्बनमिति, विशेष्यं तु चक्षुर्ज्ञानालम्बनमतः कथंचिद्विशेषणविशेष्ययोरेकज्ञानालम्बनता स्यादिति भावः। एतदेवोपपादयति **न हि चक्षुरित्यादिना** (कं. ११६.२६)। **ताभ्यामिति** (कं. ११६ २६) करणे तृतीया। **उभयसम्बन्धिग्रहणाधीनत्वादिति** (कं. ११७.१) गन्धो द्रव्यं च सम्बन्धिनौ तयोश्च नैकेन ग्रहणमित्यर्थः। **एके समर्थयन्तीति** (कं. ११७.३) नैयायिकैकदेशीयाः।

**तज्जनितेत्यादि** (कं. ११७.७) अत्र तदिति शब्देनेन्द्रियम्। यद्यदिन्द्रियजनितज्ञानविषयं तत्तदिन्द्रियग्राह्यमिति वाक्यार्थः। **तद्ग्रहणसहकारिणेति** (कं. ११७.८) गन्धग्रहणसहकारिणा। **केवलविशेष्यालम्बनमेवेति** (कं. ११७.९) विशेष्यशब्देनात्र चन्दनं केवलविशेष्यालम्बनमेवेदं विशेष्यज्ञानं जन्यत इति न पुनरेकज्ञानालम्बने विशेषणविशेष्ये

[कु०] [122] ये त्विति (कं. ११६.२५)। **का वार्ता** (कं. ११६.२६) कः प्रतिकार इत्यर्थः। **अत एव न ताभ्यां सम्बन्धग्रह[ण]मिति** (कं. ११६.२६) परमतानुसारेणोक्तम्। अस्मन्मते समवायस्यानुमेयतया विशिष्टज्ञानं प्रति सत्तया कारणत्वात् परमतमाशङ्क्य निरस्यति **यथेति** (कं. ११७.१)। **निर्भागत्वादिति** (कं. ११७.४) निरवयवत्वादित्यर्थः। निरवयवत्वं च गुणत्वादिति द्रष्टव्यम्। ननु निर्भागत्वमपि विचित्रकारणजनितत्वा[त्] उभयविषयं भविष्यतीत्याशङ्क्याह **न चाणुत्वादिति** (कं. ११७.७)। गन्धग्रहणस्य कारणत्वेन विशिष्टज्ञानोत्पत्तौ सम्भवत्यां तज्जनितसंस्कारस्य चक्षुषे गन्धेऽपि प्रवृत्तिकल्पनायां कल्पनागौरवप्रसङ्ग इति भावः।

अस्तु भिन्नेन्द्रियग्राह्ययोर्विशेषणविशेष्ययोरेवं मानेन्द्रियग्राह्ययोस्तुतयोर्विशेष्यज्ञानमुभयालम्बनं भविष्यतीत्यत आह [3]**तथा सतीति** (कं. ११७.१०)। [4]**लैङ्गिकज्ञानव्यवच्छेदार्थमिति** (कं. ११७.१२) तस्योभयालम्बनत्वाभावे

१ प्रत्यक्षत्वे सति इति मूलपाठः। २ मर्थते – ह. पु.। ३ तथा च – कं.। ४ लिङ्गिकव्यवच्छेदार्थम् – ह. पु.।

## न्यायकन्दली

**केवलविशेष्यालम्बनमेवेदं [1]विशेष्यज्ञानं जन्यत इत्यकामेनाप्यभ्युपगन्तव्यम् । तथा च सत्यन्येषामपि विशेष्यज्ञानानामयं न्याय उपतिष्ठते । विवादाध्यासितं विशेष्यज्ञानं केवलविशेष्यालम्बनं प्रत्यक्षत्वे सति विशेष्यज्ञानत्वात् सुरभि चन्दनमिति ज्ञानवत् । प्रत्यक्षत्वे सतीति लैङ्गिकज्ञानव्यवच्छेदार्थम् । ननु यदि द्रव्यस्वरूपमात्रमेव विशेष्यज्ञानस्यालम्बनम्, असत्यपि विशेषणे तथा प्रत्ययः स्यात् । अथ विशेषणस्य जनकत्वान्न तदभावे विशेष्यज्ञानोदयः, तथापि द्रव्यरूपप्रत्यया[2]दस्य न विशेषः, विषयविशेषमन्तरेण ज्ञानस्य विशेषान्तराभावात्, न, अनभ्युपगमात् । न [3]विशिष्टज्ञानस्य द्रव्यस्वरूपमात्रमालम्बनं ब्रूमः, किन्तु विशिष्टम् । विशिष्टता च स्वरूपातिरेकिण्येव, या दण्डीति ज्ञाने प्रतिभासते । न खलु तत्र पुरुषमात्रस्य प्रतीतिर्नापि दण्डसंयोगितामात्रस्य । तथा**

[**टि०**] प्रत्यक्षज्ञानमेकालम्बनमित्यस्याभिमतम् । लैङ्गिकज्ञानं तु उभयालम्बनमेवाभिगतमिति तद् व्यवच्छेदः[4] कृतः । **भूषणस्तु** लैङ्गिकज्ञानमप्येकालम्बनमेवाभ्युपगच्छतीति । [5]**न हि यथा** दण्डी इति :– दण्डीत्यत्र यथा सामान्याधिकरण्येन स्वोपरक्तप्रत्ययजनकत्वं प्रतीयते न तथा (तथा) जटाभिस्तापस इति । उपसर्जनत्वं तु अर्थक्रियायामुपयोगानतिशयलक्षणं

[**पं०**] इत्याशयः । **लैङ्गिकज्ञानव्यवच्छेदार्थमिति** (कं. ११७.१२) लैङ्गिकं हि विशेष्यज्ञानं न केवलविशेष्यालम्बनं किन्तु विशेषणविशेष्योभयालम्बनमेव [6][तत् । यतो वह्निर्विशेषणं पर्वतो विशेष्यस्तदालम्बनं वह्निमानिति ज्ञानम् । **भूषणस्तु** लैङ्गिकमप्येकावलम्बनमेवेत्य]भ्युपगच्छति । असत्यपि **विशेषणे तथा प्रत्ययः स्यादिति** (कं. ११७.१३) विशेषणं विनापि विशेष्यप्रत्ययः स्यान्न च भवति । यतो विशि(शे)ष्यते इति विशेष्यं विशेष्यते केन ? विशेषणेनेति विशेषापेक्षणात् । **द्रव्यस्वरूपप्रत्ययादस्य न विशेष** इति (कं. ११७.१५) अस्येति विशेषणस्य । ततश्चायमर्थः – य एव प्रत्ययो विशेषणे स एव स्वरूपमात्रेपीति, अतो न विशेषः । **विषयविशेषमन्तरेण ज्ञानस्य विशेषान्तराभावादिति** (कं. ११७.१५) विषयवैशिष्टयं विना ज्ञानवैशिष्टयं न भवतीत्यर्थः । **किन्तु विशिष्टमिति** (कं. ११७.१७) विशिष्टमेव द्रव्यस्वरूपं विशिष्टज्ञानस्यालम्बनं ब्रूम इत्यर्थः । **स्वरूपातिरेकिण्येवेति** (कं. ११७.१७) स्वरूपतोऽधिकैव ।

[**कु०**] विशेषणांशस्य वह्न्यादेः सिद्धिः स्यादित्यर्थः । गूढाभिसन्धिः पृच्छति [नन्विति] (कं. ११७.१३) अतिसन्धिमुद्घाटयितुं शङ्कते **अथेति** (कं. ११७.१४)। अतिसन्धिमुद्घाटयति [8]**तत्रापीति** (कं. ११७.१५)। विशेषान्तराभावादिति द्रष्टव्यम् । **लैङ्गिकत्वादयो** हि विशेषा लिङ्गाद्यन्वयव्यतिरेकानुविधायितानुमेयाः । [7]**येनेति** केवलद्रव्यप्रत्ययस्य विशेष्यप्रत्ययस्य च येन कारणेनाविशेषः स्यादित्यर्थः । **नापि दण्डसंयोगितामात्रस्येति** (कं. ११७.१८) संपातायातं परेणापि तथा नाभ्युपगमात् । विशिष्टस्योभयातिरेकसप्तमोऽभावः स्यादत आह **वैलक्षण्यमिति** (कं. ११७.१९) ।

ननु किमिदमुपसर्जनत्वं नाम ? न तावत्कारणत्वम्, चक्षुरादीनामपि तथात्वप्रसङ्गात् । नापि ज्ञायमानत्वे सति कारणत्वं, शब्दादेरपि तथात्वप्रसङ्गात् । नापि [स्वोपरक्तप्रतीतिहेतुः] स्वोपरक्तप्रतीतिहेतुत्वस्यैव विचार्यमाणत्वात् । तादात्म्य[मि]ति चेत् धर्म्मिणोस्तदनुपपत्तेः, भेदप्रयुक्तो हि धर्मधर्मिभावः । भेदाश्रयणादयमदोष इति

---

१ विशिष्टं ज्ञानं–जे. १, जे. २ । २ दस्याविशेषः–जे. १, जे. २ । ३ विशेष्यज्ञानस्य–कं. १, कं. २ । ४ च्छेदाकृतः–अ । ५ न हि यथा दण्डीति प्रतीकं अबपुस्तकयोर्नास्ति, कपुस्तके तु प्रतीकमस्ति किन्तु तदनन्तरं 'च नहि यथा' इति पाठोऽप्यस्ति । ६ [ ] एतच्चिह्नान्तर्गतः पाठो ब पुस्तके नास्तित ७ तथापि–कं । ८ प्रतीकमिदं कन्दल्यां नोपलभ्यते–सं. ।

## न्यायकन्दली

**च दण्डीति प्रतीतावितरविलक्षण एव पुरुषः संवेद्यते। वैलक्षण्यं चास्य दण्डोपसर्जनत्वमेव। अत एव विशेषणं व्यवच्छेदकमिति गीयते। दण्डो हि स्वोपसर्जनताप्रतिपत्तिं पुरुषे कुर्वन् पुरुषमितरस्माद् व्यवच्छिनत्ति। अयमेव चास्योपलक्षणाद्विशेषः। उपलक्षणमपि व्यवच्छिनत्ति न तु स्वोपसर्जनताप्रतीतिहेतुः। नहि यथा दण्डीति दण्डोपसर्जनता पुरुषे प्रतीयते तथा जटाभिस्तापस इति तापसे जटोपसर्जनता, दण्डोपसर्जनता पुरुषस्य प्राधान्यं चार्थक्रियायामुपभोगातिशयाऽनतिशयापेक्षया। नन्वेवं तर्ह्यापेक्षिकोऽयं विशेषण-विशेष्यभावो न वास्तवः, किं न दृष्टो भवद्भिः कर्तृकरणादिव्यवहार आपेक्षिको वास्तवश्चेति कृतं विस्तरेण संग्रहटीकायाम्।**

[**टि०**] विशेषणे उपलक्षणे वा[1] तुल्यमिति। ननु घटानां विंशतिरित्यत्र न घटानां तावद्विशेषणत्वं व्यधिकरणत्वात् नाप्युपलक्षणत्वं, तृतीयोत्पत्तिप्रसङ्गात्। न उपलक्षणत्वेऽपि सम्बन्धविवक्षया षष्ठ्या [2]अनिवार्यमाणत्वात्। तत

[**पं०**] **अस्येति** (कं. ११७.२०) विशेषणस्य। **उपलक्षणादिति** (कं. ११७.२२) जटादिकात्! जटाभिस्तापसमद्राक्षीदित्यादौ। **न तु स्वोपसर्जनताप्रतिपत्तिहेतुरिति** (कं. ११७.२२) न पुनः समानाधिकरणतया इतरव्यावृत्तिप्रतीतिहेतुरि(त्य)र्थः। **दण्डोपसर्जनतेति** (कं. ११७.२३) दण्डस्य गुणीभूतता। **जटोपसर्जनतेति** (कं. ११७.२४) अस्मात्पुरः प्रतीयते इति योज्यम्। **उपयोगातिशयाऽनतिशयापेक्षयेति** (कं. ११७.२५) पुरुषस्य प्राधान्यमुपयोगातिशयापेक्षया दण्डस्योपसर्जनता तूपयोगानतिशयापेक्षयेति ज्ञेयम्, न तु यथासङ्ख्यं द्रव्यम्।[3] बौद्धाः प्राहुः **नन्वेवमित्यादि** (कं. ११७.२५) श्रीधरः प्राह **किं न[4] दृष्टमित्यादि** (कं. ११७.२६)। **आपेक्षिक** इति (कं. ११७.२६) यः क्रियायां मुख्यत्वादत्यन्तमुपयोगी स कर्ता ये तु क्रियायां गौणत्वान्नात्यन्तमुपयोगिनस्ते करणादयः इत्यनया अपेक्षया चरति आपेक्षिकः कर्तृकरणादिव्यवहार इत्यर्थः।

[**कु०**] चेत्, न। विधिनिषेधयोरेकत्वाङ्गीकारे सर्व्वं सर्व्वात्मकं(त्वं) स्यादित्यत आह **अत एवेति** (कं. ११७.२०)। व्यवच्छेदकत्वे समाने कुतोऽयं विशेष इत्यत आह **नहि यथेति** (कं. ११७.२३)। वि[शे]षणोपलक्षणयोः सामानाधिकरण्ये, वैयधिकरण्याभ्यां विशेष इत्यर्थः। ननु [5]प्रतीतौ समानायां दण्डादेर्व्यवच्छेदकत्वं पुरुषादेर्व्यवच्छेद्यत्वं कुत इत्यत आह [6]**दण्डस्येति** (कं. ११७.२४) जटानां चेति शेषः। अर्थक्रियाप्रतिपत्तिलक्षणो अतिशयो व्याप्यत्वम्।

**नन्वेवं तर्हीति** (कं. ११७.२५) आपेक्षिको न च काल्पनिकः। नियतजातीयविषयबुद्ध्यनुविध–विशिष्ट विशेषणं बुद्धिमद्वेद्यत्वे सति बुद्धिरहितैरस्य(वे)दादिभिरभेद्यत्वादित्यर्थः। तत्रास्मदादिदिभिरवेद्यत्वादित्युक्ते गुरुत्वादिभिर्व्यभिचारः तन्निवृत्त्यर्थं वेद्यत्वे सति। बुद्धिरहिते ज्ञानमभिप्रेतं तथापि जागराद्यबुद्धिः प्रयत्नाभ्यामबुद्धिजात्यामपि वदन्मानवेद्याभ्यां व्यभिचार अत उक्तं नियतजातीयेति। तथा द्वित्वत्रित्वादयो नियतजातीयामेकैकगुणविषयिणीं बुद्धिमनुविधा[य] प्रतीयमानसामान्यविशिष्टतया गृह्यन्ते, यथा वा दृष्टान्तभूताः सुखादयो नियतजातीयस्रगादिबुद्धिमनुविधाय प्रतीयमानसुखत्वादिसामान्यविशिष्टाः प्रतीयन्ते। नैवं नागराद्यबुद्धिप्रयत्नौ। तद्यथा पिरत्नकुण्डल्यादयो हि नियतजातीयविषयबुद्धिमनुविधाय प्रतीयमा[नाः] कुण्डलादिविशिष्टतया प्रतीयन्ते न च बुद्धिनाः

---

१ च–ब; २ अविचार्यत्वात्–अ, ब; ३ द्रष्टव्यं–ब। ४ न दृष्टो–कं। ५ प्रतीतौ इत्यर्थं दृष्ट्वा सम्यग् भाति–सं। ६ दण्डोपसर्जनता– कं. न तु दण्डस्य इति पाठः।

न्यायकन्दली

द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनश्यता । उभयैकगुणालम्बना बुद्धिरपेक्षाबुद्धिरित्युच्यते । तस्या द्वित्वसामान्यज्ञानाद्विनश्यता विनाशकारणसान्निध्यं द्वित्वसामान्यात् । तस्य द्वित्वगुणेन सह सम्बन्धाज्ज्ञानाच्च द्वित्वगुणबुद्धेरुत्पद्यमानता उत्पत्तिकारणसान्निध्यम् । द्वित्वसामान्यज्ञानमपेक्षाबुद्धेर्विनाशकं गुणबुद्धेश्चोत्पादकम् । तेन तदुत्पत्तेरेवैकस्य विनश्यता परस्य चोत्पद्यमानतेत्युपपद्यते विनश्यत्तोत्पद्यमानतयोरेककालत्वम् । [१]तत इदानीमपेक्षाबुद्धिविनाशाद् द्वित्वस्य विनश्यत्तेत्यादि अपेक्षाबुद्धिविनाशो द्वित्वविनाशस्य कारणम्, [२]तदभावे तस्यानुपलम्भात् । अतोऽपेक्षाबुद्धिविनाशो द्वित्वस्य विनश्यत्ता । दृष्टो गुणानां निमित्त[३]कारणाविनाशादपि विनाशो यथा मोक्षप्राप्त्यवस्थायामन्त्यतत्त्वज्ञानस्य शरीरविनाशात् ।

[टि०] **इदानीमपेक्षाबुद्धि[४]विनाशाद्** इति :–नन्वत्र [५]भाष्येऽपेक्षा[६]बुद्धिविनाशाद् द्वित्वस्य विनश्यत्तेति किमित्युक्तम्, अपेक्षाबुद्धिनाशस्य द्वित्वगुणनाशं प्रति कारणत्वेन विनश्यत्तां प्रत्यकारणत्वात् ? सत्यम्, विनाशं प्रति हेतुत्वे[७]नान्यजन्यताख्यापनार्थं द्वित्वविनश्यत्तां प्रत्यपेक्षाबुद्धिनाशस्य कारणत्वमुपचर्यत इति ।

[पं०] **अपेक्षाबुद्धेरिति** (कं. ११७.२७) निमित्तकारणभूतायाः **द्वित्वसामान्यादिति** द्वित्वसामान्यात् ।१। तथा तस्य द्वित्वसामान्यद्वित्वगुणेन द्वित्वाख्यसङ्ख्यया सह सम्बन्धात् ।२। तथा [८]**तज्ज्ञानादिति** (कं. ११८.३) द्वित्वसामान्यज्ञानात् ।३। एवं त्रिधा द्वित्वसङ्ख्याबुद्धेरुत्पद्यमानता–उत्पत्तिकारणसान्निध्यं भवतीत्यर्थः । **एकस्येति** (कं. ११८.४) अपेक्षाबुद्धिलक्षणस्य वस्तुनः । [९]**अपरस्येति** (कं. ११८.५) द्वित्वगुणबुद्ध्याख्यवस्तुनः । ननु समवाय्यसमवायिकारणविनाशाद्दृष्टः कार्यस्य विनाशो, न तु निमित्तकारणविनाशात्, अपेक्षाबुद्धिस्तु द्वित्वोत्पत्तौ निमित्तकारणमेव, ततोऽपेक्षाबुद्धिविनाशो द्वित्वविनाशस्य कारणमिति न घटते इति परवचनमाशङ्क्याह [१०]**दृष्टो हि गुणानामित्यादि** (कं. ११८.७) । **यथा मोक्षप्राप्त्यवस्थायामिति** (कं. ११८.८) नवानामात्मगुणानामत्यन्तोच्छेदो मोक्षः तल्लाभकाले । **अन्त्यतत्त्वज्ञानस्य शरीरविनाशादिति** (कं. ११८.८) तत्त्वज्ञानस्य हि निमित्तकारणं शरीरं, शरीरविनाशे च तत्त्वज्ञानस्यापि विनाश इत्यर्थः ।

[कु०] तदर्थमविशिष्टेति पदम् । एवं द्वित्वादयो हि केवलसामान्यविशिष्टाः प्रतीयन्ते न तु विशिष्टविशेषणसम्बन्धितया । घटस्य द्वित्वमित्यत्र यद्यपि घटत्वसामान्यविशिष्टघटशिष्टतया द्वित्वं प्रतीयते तथापि न भागासिद्धिः शङ्कनीया । [११]**द्रष्टव्यस्येति**–विशेषणीभूतस्य द्वित्वस्य पक्षीकरणात् । [१२]**सर्वावेद्यतयेति**–नापि बाह्यैर्घटादिभिर्व्यभिचारः स्यादत उक्तं तद्बुद्धिरहितैरित्यादि । ईश्वरयोग्यापेक्षया योगाविशेष्यासिद्धिपरिहाराय अस्मदादिभिरिति । विदितपरमार्थमिति भावः । [१३]**को वै** इति न वयमपेक्षां कल्पनां ब्रूमः वस्तु सत एव प्रतियोगि बुभुत्सानुसारेण प्रतिपिपादयिषामिति भावः । [१४]**सामान्यज्ञानादिति** । ... ... तत्सान्निध्यस्य तदुत्पत्तिव्यतिरेकेऽपि हेतुत्वं दर्शयितुं पञ्चमी एवमुत्तरत्रापि ।

---

१ तत इदानीमपेक्षाबुद्धिविनाशो द्वित्वविनाशस्य कारणम् – कं. १, कं २ । २ तत्सद्भावे – कं. १, कं. २ । ३ कारणादपि – कं. १, कं. २ । ४ विनाश–मु. विनाशात्–जे. १, जे ३ । ५ भाष्योपेक्षा–अ । ६ बुद्धित्वस्य विनश्यत्तेति–अ । ७ नान्यताख्यापनार्थं–अ, ब । ८ सम्बन्धाज्ज्ञानाद्–कं । ९ परस्य–कं । १० दृष्टो गुणानां –कं । ११, १२, १३, १४ इमानि प्रतीकानि कन्दल्यां न सन्ति–सं. ।

## न्यायकन्दली

**[123] द्वित्वगुणज्ञानं द्वित्वसामान्यज्ञानस्य विनाशकारणं बुद्धेर्बुद्ध्यन्तरविरोधात्। तथा द्रव्यज्ञानस्यापि कारणम्। अतो गुणबुद्ध्युत्पाद एवैकस्योत्पद्यमानताऽपरस्य विनश्यता स्यात्। द्वित्वगुण[1]ज्ञानतत्सम्बन्धेभ्य इति। द्वित्वगुणश्च तस्य ज्ञानं च सम्बन्धश्चेति योजना।**

[टि०] [123 124] **तदनन्तरं द्रव्यज्ञानाद्** इत्यादि। ननु निरूढा तावदियं [2]प्रक्रिया प्रथमे क्षणे [3]एकत्वसामान्यज्ञानोत्पादोऽपेक्षाबुद्धेश्चोत्पाद्यमानता।१। ततो द्वितीयक्षणे [4]अपेक्षाबुद्धेरुत्पादः द्वित्वगुणस्योत्पाद्यमानता, एक[त्व]सामान्यज्ञानस्य विनश्यत्ता।२। ततस्तृतीयक्षणे द्वित्वगुणोत्पादः एकत्वसामान्यज्ञानस्य विनाशः [5]द्वित्वसामान्यज्ञानस्योत्पाद्यमानता च।३। ततश्चतुर्थक्षणे द्वित्वसामान्यज्ञानोत्पादः, द्वित्वगुणबुद्धेरुत्पद्यमानता अपेक्षाबुद्धेर्विनश्यत्ता।४। ततः पञ्चमे क्षणे [6]द्वित्वगुणज्ञानोत्पादः [7][अपेक्षाबुद्धेर्विनाशः] द्वित्वगुणस्य [8]विनश्यत्ता, द्वित्वसामान्यज्ञानस्य विनश्यत्ता द्वे द्रव्ये इति ज्ञानस्योत्पाद्यमानता।५। ततः षष्ठे क्षणे द्वे द्रव्ये इति ज्ञानस्योत्पादः संस्कारस्योत्पद्यमानता, [9]द्वित्वगुणस्य विनाशः, द्वित्वसामान्यज्ञानस्यापि विनाशः द्वित्वगुणज्ञानस्य विनश्यत्ता।६। ततः सप्तमक्षणे संस्कारस्योत्पत्तिः द्वित्वगुणज्ञानस्य विनाशः द्वे द्रव्ये इति ज्ञानस्य विनश्यत्ता।७। ततोऽष्टमे क्षणे द्वे द्रव्ये इति [10]ज्ञानस्य विनाश इति।

[पं०] [123-124] **एकस्येति** (कं.११८.१०) द्रव्यज्ञानस्य। **अपरस्येति** (कं. ११८.११) द्वित्वसामान्यज्ञानस्य। [11]**तस्य सम्बन्ध** इति (कं. ११८.१२) ग्राह्यग्राहकभावलक्षणः। **तदनन्तरं द्वे द्रव्ये** इत्यारभ्य **इत्येकः काल** इति यावत् (कं. ११८.१२) एतावता सन्दर्भेण योऽर्थं उक्तः स भाष्याक्षरातिरिक्तोऽस्तीति द्रष्टव्यम्। न मोहो कार्यः **यद्यपीत्यादि** (कं. ११८.१३) अत्र द्वित्वं नास्तीति विनष्टत्वात् **द्वित्वस्य विनाश** इत्युक्तेः। **तदिति** (कं. ११८.१३) द्वित्वम्। **अस्येति** (कं. ११८.१३) द्रव्यज्ञानस्य। **स इति** (कं. ११८.१६) **कार्योत्पत्त्यनुगुणो** व्यापारः। नन्वेवं तर्हि व्यापारस्यैव कारणत्वं न तु मौलिक्यं कारणस्येत्याह—**न चैवमित्यादि** (कं. ११८.१८) **तस्येति** (कं. ११८.१८) द्वित्वस्य। **भाक्तमिति** (कं. ११८.१८) औपचारिकम्। **स्वव्यापारेण व्यवधानाभावादिति** (कं. ११८.१८) स्वांशम व्यवधायकमिति वचनात्। **शरमुक्तिसमकाल** (कं. ११८.१९) इत्यस्मात्पुरः केनचिच्छत्रुणा। (३१-२) **इत्यध्याहार्यम्**।

[कु०] [123] कथमनयोरेककालतेत्यत आह **द्वित्वसामान्यज्ञानमिति** (कं. ११८.४)। [12]**त[त्स]द्भाव** इति (कं. ११८.६) अपेक्षाबुद्धिविनाशस्य सद्भावे गणयत उत्तरोत्तरसङ्ख्याभिः सह पूर्वसङ्ख्यानुपलम्भः प्रत्यक्षसिद्धः। स चानुपलब्धिकारणान्तरेष्वसत्सु भङ्गं विनाशमेव ग[ण]यति। नत्वेवं कारणान्तरेपि उत्पन्नत्वेन रूपादितया सताऽप्यनुपलम्भो द्वित्वादीनां तदुपलब्धिप्रतिबन्धकत्वं गमयतीति भावः। ननु निमित्तविनाशेऽपि कार्यविनाशे कुलालादिविनाशे घटादिविनाशः स्यादित्यत आह **दृष्टो**[13]**हीति** (कं. ११८.७)। विनाशकान्तराभावे क्वचिन्निमित्तविनाशस्यापि गुणविनाशकत्वमङ्गीकरणीयम्। इतरथा विनाश आकस्मिकः स्यात्। न चातिप्रसङ्गः यथादर्शनं व्यवस्थापनादिति भावः।

**इति योजनेति** (कं. ११८.१२) न केवलं विशेष[ण]ज्ञानमेव विशेष्यबुद्धेः कारणं किन्तु जायमानं विशेषणमपि इतरथा बहुवचनं नोपपद्यत इति भावः।

---

१ ज्ञानसम्बन्धेभ्यः—कं. १, कं. २। २ प्रतिक्रिया—अ, ब। ३ एक—ड। ४ अपेक्षाऽपेक्षाबुद्धेरुत्पादः—अ, ब। ५, ६ द्वि च—अ। ७ [ ] एतच्चिह्नान्तर्गतः पाठः अबकपुस्तकेषु नास्ति। ८ विमर्श्यत्ता—अ, ब। ९ द्विगुणस्य—अ। १० ज्ञानविनाशः—अ, ब, क। ११ तस्य ज्ञानं च सम्बन्धश्च—कं। १२ तत्सद्भावं—कं.। १३ 'हि' कन्दल्यां नास्ति।

### प्रशस्तपादभाष्यम्

[124] [1]तदनन्तरं द्वे द्रव्ये इति द्रव्यज्ञानस्योत्पादः, द्वित्वस्य विनाशः, द्वित्वगुणबुद्धेर्विनश्यत्ता, द्रव्यज्ञानात् संस्कारस्योत्पद्यमानतेत्येकः कालः।

तदनन्तरं द्रव्यज्ञानाद् [2]द्वित्वगुणबुद्धेर्विनाशो द्रव्यबुद्धेरपि [3]संस्कारादिति।

### न्यायकन्दली

[124] तदनन्तरं द्वे द्रव्ये इति द्रव्यज्ञानस्योत्पादो द्वित्वस्य विनाशो [4]गुणबुद्धेर्विनश्यत्ता, संस्कारस्योत्पद्यमानता द्वित्वसामान्यज्ञानस्य विनाशो गुणबुद्धेर्विनश्यत्तेत्येकः कालः। यद्यपि द्वे द्रव्ये इति ज्ञानोत्पत्तिकाले द्वित्वं नास्ति, तथापि तदस्य कारणम्, कार्योत्पत्तिकाले कारणस्थितेरनुपयोगात्। कार्योत्पत्त्यनुगुणव्यापारजनकत्वं हि कारणस्य कारणत्वम्। स चेदनेन कृतः, किमस्य कार्योत्पत्तिकाले स्थित्या? व्यापारादेव कार्योत्पत्तिसिद्धेः। न त्वेवं सति तस्याकारकत्वम्, व्यापारद्वारेण तस्यैव हेतुत्वात्। न चैवं सति भाक्तं कारकत्वम्? स्वव्यापारेण व्यवधानाभावात्। अन्यथा शरमुक्तिसमकालं निष्ठुरपृष्ठाभिघातादभिपतितस्य धन्विनः क्षणान्तरभाविनि लक्ष्यव्यतिभेदे कर्तृत्वं न स्यात्।

तदनन्तरं द्रव्यज्ञानाद् गुणबुद्धेर्वि[5]नाशः, संस्कारस्योत्पद्यमानता, ततः संस्कारस्योत्पादो द्रव्यबुद्धेर्विनश्यत्ता, क्षणान्तरसंस्काराद् द्रव्यबुद्धेर्विनाशः, द्रव्यबुद्धिविनाशकारणत्वं च, संस्कारस्य तद्भावभावित्वाद[6]न्यस्याऽसम्भवाच्च।

[टि०] ततो द्वित्व[7]गुणज्ञानविनाशकाले संस्कारस्योत्पाद्यमानतेत्यनुपपन्नं द्वित्व[8]गुणज्ञानविनाशसंस्कारयोर्द्वे द्रव्ये इति ज्ञानजन्यत्वेन तुल्यकालभावित्वात् तत्कालो संस्कारस्योत्पाद इति [9]तु युक्तम्, द्रव्यनाशोत्पादकाले तु गुणज्ञानविनश्यत्तावत् संस्कारस्योत्पद्य[10]मानतेति च वक्तुं युक्तम्। सत्यम्, द्वे द्रव्ये इति [11]ज्ञानप्रयोजनां द्वित्वोत्पादप्रक्रियां समाप्य शिष्यार्थं तदनन्तरमित्यनपेक्षयैव द्रव्यज्ञानकालापेक्षया संस्कारस्योत्पद्यमानतेत्युक्तम्। भाष्यकारेणाप्यत्र अपेक्षाबुद्धिनाशद्रव्यज्ञानोत्पद्यमानतालक्षणस्य द्रव्यज्ञानोत्पाद–गुणज्ञानविनश्यता–संस्कारोत्पद्यमानता[12]क्षणस्य क्षणद्वया[13]त्मकत्वाभिप्रायेणैककालतामभिप्रेत्य तदनन्तरं द्रव्यज्ञानाद् गुणबुद्धेर्विनाश इत्युक्तम्।

[पं०] **तदनन्तरं द्रव्यज्ञानाद् गुणबुद्धेर्विनाश** इति (कं. ११८.२०) पूर्वं हि विनश्यत्ता उक्ताऽऽसीत्। **संस्कारस्योत्पाद** इति (कं. ११८.२१) पूर्वं हि उत्पद्यमानता उक्ताऽऽसीत्। **तद्भावभावित्वादिति** (कं. ११८.२३) संस्कारभावे द्रव्यबुद्धिविनाशस्य भावात्।

[कु०] [124] **कार्योत्पत्त्यनुगुणेति** (कं. ११८.१५) समवायिकारणव्यतिरिक्तस्येति शेषः। इह विशेषणस्य विशेष[ष्य]ज्ञानानुत्पादानुकूलो व्यापारः स्वविषयं ज्ञानमेव कूपस्य खनितुः प्रमादा[त्] पति[त]ब्राह्मणपरनिमित्ते प्रतिबाधाभावस्तु तदुद्देशाभावो द्रष्टव्यः।

---

१ भाष्यमिदं मे दे. पुस्तकयोर्नास्ति, तदनन्तरं द्वे द्रव्ये इति ज्ञानोत्पादः–कि. भा.। २ द्रव्यगुणबुद्धेः–जे. दे.। ३ संस्कारात्–कं. १, कं. २। ४ पाठोऽयं–कं. १, कं. २ पुस्तकयोर्नास्ति। ५ विनाशाद्–कि. जे.। ६ दन्यथा–कं. १, कं. २। ७, ८ गुणनाश–क। ९ इति न युक्तम्–अ, ब, क। १० मानतेव–अ, ब। ११ इति प्रयोजनां–अ, ब। १२ मानताक्षणद्वयात्मक–अ, ब, क। १३ द्वयात्मकत्वाभिप्रा....ड।

### प्रशस्तपादभाष्यम्

[125] एतेन [1]त्रित्वाद्युत्पत्तिः व्याख्याता । **एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो** *निष्पत्तिरपेक्षाबुद्धिवि[2]नाशाच्च विनाश इति ।*

### न्यायकन्दली

[125] एतेन [3]त्रित्वाद्युत्पत्तिर्व्याख्याता । एतेन द्वित्वोत्पत्तिविनाशनिरूपणप्रक्रमेण त्रित्वादीनामुत्पत्तिर्व्याख्याता । तमेव प्रकारं दर्शयति–एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाच्च विनाश इति ।

एतेन शतसङ्ख्याद्युत्पत्तिरपि समर्थिता । प्रत्येकमनुभूतेष्वेकैकगुणेषु क्रमभाविनां संस्काराणामन्त्यगुणानुभवानन्तरं शतव्यवहारसंवर्तकादृष्टाद्युगपदभिव्यक्तौ संयोगैकत्वादनेकविषयैकस्मरणोत्पादे सत्यनुभवस्मरणाभ्यामपेक्षाबुद्धिभ्यां स्वाश्रयेषु शतसङ्ख्या

[टि०] [125-126-127] **अनुभवस्मरणाभ्याम्** इति :–अत्रानुभवो [4]विनश्यदवस्था, सन् कारणं द्वयोर्ज्ञानयोरविनश्यदवस्थयोः सहावस्थानायोगात् । स्वाभिप्रायसमाधानं भङ्ग्यन्तरेणाह **अपरे तु प्रतीतेः** इति । [5]**समवायिनः** श्वैत्याद् इति :–समवायिनः इत्यनेन सम्बन्धस्य श्वैत्यादित्यनेन विशेषणस्य, श्वैत्यबुद्धिरित्यनेन विशेषणज्ञानस्य च विशिष्टज्ञानं प्रति कारणत्वमुक्तम् ।

[पं०] [125] **एकैकगुणेष्विति** (कं. ११९.१) एकद्व्यादिषु नवनवत्यन्तासु सङ्ख्यासु । **अन्त्यगुणानुभवानन्तरमिति** (कं. ११९.१) अन्त्यगुणोऽगान्त्या सङ्ख्या सा च शतलक्षणा ग्राह्या । **युगपदभिव्यक्ताविति** (कं. ११९.२) युगपदभिव्यक्तौ सत्यामित्यर्थः । **अनेकविषयैकस्मरणोत्पादे** इति (कं. ११९.२) अनेकशब्देनात्र शतं द्रष्टव्यम् । **अनुभवस्मरणाभ्यामपेक्षाबुद्धिभ्यामिति** (कं ११९.३) ये अनुभवस्मरणे ते अपेक्षाबुद्धी । **स्वाश्रयेष्विति** (कं. ११९.३) द्रव्येषु । [6]**पूर्वद्रव्येति** (कं. ११९.४) अनेन एकद्व्यादयो नवनवत्यन्ता लभ्यन्ते । **अन्त्यद्रव्येति** (कं. ११९.४) अनेन शतं लभ्यते । **प्रत्यक्षैवेति** (कं. ११९.४) प्रत्यभिज्ञा प्रत्यक्षैव । परः **प्राह यत्र विनष्टेष्वित्यादि** (कं. ११९.४) अत्र एकीयमतेनोत्तरमाह **नोत्पद्यते** (कं. ११९.६) इत्यादिना । **तत्रेति** (कं. ११९.७) पिपीलिकासु । **शतव्यवहारस्तु रूपादिष्विव गौण** इति (कं. ११९.७) यथा रूपादिष्वेकं रूपमित्यादि व्यवहारो गौणस्तथाऽत्रापि । रूपादयो हि

[कु०] [125] **एतेनेति** (कं. ११८.२३) विनाशश्च व्याख्यात इति शेषः । **तमेवेति** (कं. ११८.२५) विनाशसहितमिति शेषः । इह गुणानां निर्गुणतया असमवायिकारणेषु गुणरूपविशेषाभावेऽपि द्वित्वादि[द्यु]त्पत्तिचिन्तावैयर्थ्यभयात्तदतिरिक्तविशेषानङ्गीकारेऽपि अनवस्थावैयर्थ्याभ्यां समवायिकारणेषु द्वित्वा(द्यु)(दु)त्पत्तेः प्राक्कृतादृशविशेषानङ्गीकारेऽपि निमित्तकारणस्य विषयकृतविशेषाभावेऽपीति तदतिरिक्तपारोक्ष्यादिविशेषस्य द्वित्वमित्यादिसाधारण्येनाप्रयोजकत्वेऽप्यदृष्टस्य दृष्टमुपाधिमुपादायैव कार्यविशेष प्रयोजकत्वेऽपि अन्यथाख्यातिमये बिलक्षणबीजविरहेण द्वित्वादिबुद्धेर्भ्रान्तत्वे वा सम्भवति । द्वित्वत्रित्वादिकार्यविशेषोत्पत्तिनियमोऽपेक्षाबुद्धेः सहकारिभेदादवगन्तव्यः ।

---

१ त्रित्वाद्युत्पत्तिरपि–कं. कि. दे. । २ विनाशाद्–कि. जे. । ३ द्युत्पत्तिरपि व्याख्याता–कं. १, कं. २ ।
४ विमर्श्य–अ, ब । ५ समवायिनः समवेताच्छ्वैत्याद्–मु.–जे. १, जे. ३ । ६ सर्वद्रव्य–कं. ।

न्यायकन्दली

जन्यते। सा च [1]पूर्वद्रव्यसंस्कारसचिवा अन्त्यद्रव्यसंयुक्तेन्द्रियज्ञानविषयत्वात् प्रत्यक्षैव। यत्र विनष्टेषु सङ्ख्येयेष्वन्ते सङ्कलनात्मकः प्रत्ययो जायते, शतं पिपीलिकानां मया निहतमिति, तत्र कथं शतसङ्ख्याया उत्पत्तिः? आश्रयाभावात् नोत्पद्यत एव तत्र सा, कारणाभावात्। शतव्यवहारस्तु रूपादिष्विव गौण इत्येके समर्थयन्ति। अपरे तु प्रतीतेस्तुल्यत्वादुपचारकल्पनामनादृत्यातीतानामेव द्रव्याणां संस्कारोपनीतत्वादाश्रयतामिच्छन्ति। यदत्यन्तमसत् [2]खपुष्पादि तदकारणम्, निःस्वभावत्वात्। अतीतानां तु वर्तमानकालसम्बन्धो नास्ति, न तु स्वरूपम्, तेषां स्मृतिसन्निहितानां [3]तत्कार्यानुगुणसहकारिलाभात् समवायिकारणत्वमविरुद्धम्। न चैवं सति सर्वत्र तथाभावः, यथादर्शनं

[पं०] गुणाः सङ्ख्यापि गुणस्ततो निर्गुण इति वचनाद् रूपादिगुणेष्वेकत्वादिकं न युज्यते, औपचारिकं तु भवति तथा पिपीलिकादिष्वपि शतव्यवहार औपचारिक इत्यर्थः। एके इति (कं. ११९.७) वैशेषिकैकदेशीयाः। अपरे त्विति (कं. ११९.८) वयं श्रीधरमिश्राः। **प्रतीतेस्तुल्यत्वादिति** (कं. ११९.८) प्रतीतिस्तु विद्यमाने विनष्टे च तुल्यैव। [4]**आश्रयतामिति** (कं. ११९.९) शतसङ्ख्यां प्रति आधारत्वम्। **तदकारणमिति** (कं. ११९.९) काक्वा व्याख्येयम्। **वर्तमानका[ल]सम्बन्धो नास्तीत्ये**(कं. ११९.१०)तदपि काक्वा। **न तु स्वरूपमित्येत**दपि (कं. ११९.१०) काक्वा। **न तु स्वरूप**मित्यतः पुरो नास्तीति पूर्वतो योग्यं, न तु स्वरूपं नास्तीत्यर्थः। तत्रेति (कं. ११९.११) एवं सतीत्यर्थः। **एषामिति** (कं. ११९.११) अतीतानां द्रव्याणाम्। **स्मृतिसन्निहितानामिति** (कं. ११९.११) स्मृत्या प्रत्यासन्नीभूतानाम्। [5]**तत्कार्यानुग्रहणसहकारिलाभादिति** (कं. ११९.११) तच्च तत्कार्यं शतसंख्यालक्षणम्। तस्यानुगुणमुत्पत्तौ [अ]नुकूलं यत्सहकारि अपेक्षाबुद्धिलक्षणं निमित्तकारणं तल्लाभात्। **समवायिकारणत्वमिति** (कं. ११९.११)

[कु०] **अनुभवस्मरणाभ्यामिति** (कं. ११९.३) विच्छिन्नेन्द्रियसन्निकर्षे एकोनशतसङ्ख्याधारवस्त्वनेकैकगणविषयस्मृत्यनन्तरंन्तरभाविन्या शततमानुभवरूपयाऽपेक्षाबुद्ध्या शतसङ्ख्यया जायते। अविच्छिन्नेन्द्रियसन्निकर्षेषु द्वित्वादिसाम्यमेवेति भावः। ननु प्रत्यक्षाप्रत्यक्षवृत्तेः शतसङ्ख्यायाः प्रत्यक्षत्वं कुत इत्यत आह **सा चेति** (कं. ११९.२)। अवयवी वा आधारैकदेशेन सह शतसङ्ख्या गृह्येत इति भावः। अस्तु विच्छिन्नेन्द्रियसन्निकर्षेषु स्वयं विद्यमानेषु समवायिकारणेष्वेवं शतादिसङ्ख्याया उत्पत्तिः नष्टेषु तु समवायिकारणेष्वियं प्रक्रिया न सङ्गच्छत इति तत्र विचारमारभते **यत्रेति** (कं. ११९.४)। **सङ्कलनात्मक** इति (कं. ११९.५) बहिरिन्द्रियनिरपेक्षेण मनसा संहृत्य कलनं सङ्कलनं तत्स्वरूप इत्यर्थः। तत्र **कथमिति** (कं. ११९.६) चतुर्विंशति गुणा इतिवद्गौणः, उत नव द्रव्याणीतिवन्मुख्य इति संशयात्प्रश्नः। स्वमतमाह **नोत्पद्यत** (कं. ११२.६) इति। **एके** (कं. ११९.७) वयमिति शेषः। परमतमाह **अपरे त्विति** (कं. ११९.८)। नन्वसतः कारणत्वमनुपपन्नमित्यत आह **यदत्यन्तेति** (कं. ११९.९) गगनकुसुमादेरतीतानां को भेद इत्यत आह **अतीतानामिति** (कं. ११९.१०)। [6]दग्धैरपि तन्तुभिः पटारम्भप्रसङ्ग इत्यत आह **न चैवमिति** (कं. ११९.१२)। [7]**तदुपस्थापकेति**–स्मृत्यैवानुभवोपस्थापने अन्योन्याश्रयप्रसङ्ग इत्यर्थः। यथादर्शनमतीतस्य

१ सर्वद्रव्य–कं. १, सर्वद्रव्ये–कं. २। २ गगनकुसुमादि–जे. १, जे. २। ३ तर्कानु–कं. १, कं. २। ४ आश्रयताम्–कं। ५ तर्कानुगुण–कं। ६ दुग्धै–ह. पु.। ७ तदुपस्थापना–कं।

न्यायकन्दली

व्यवस्थापनात् । अतीतस्य जनकत्वेऽनुभवस्यैव स्मृतिहेतुत्वसम्भवे संस्कारकल्पनावैयर्थ्यमिति चेन्न, निरन्वयप्रध्वस्तस्यानुपस्थितस्यापि कारकत्वात्, [1]तदुपस्थापकान्वयकल्पनायां तु संस्कारसिद्धिः । तथा चान्त्यवर्णप्रतीतिकाले पूर्ववर्णानां विनष्टानामपि स्मृत्युपनीतत्वादर्थप्रतीतौ निमित्तकारणत्वमस्त्येव । यथेदं तथा समवायिकारणत्वमपि केषाञ्चिद्भविष्यति । यथा च संस्कारसचिवस्य मनसो बाह्ये स्मृत्युत्पादनसामर्थ्यमेवं प्रत्यक्षानुभवजननसामर्थ्यमपि दृष्टत्वादेषितव्यम् । एवं च सति नान्धबधिराद्यभावो बाह्येन्द्रियप्रवृत्त्यनुविधायित्वात् ।

[पं०] सङ्ख्यां प्रतीति द्रष्टव्यम् । **तथाभाव** इति (कं. ११९.१२) अतीतस्यापि जनकत्वम् । **अनुभवस्यैवेति** (कं. ११९.१३) *अतीतत्वविशिष्टस्य ।* [2]*तस्येति–अनुभवस्य । अनुपस्थापितस्येति (कं. ११९.१४) संस्कारलक्षणं विशेषमनादधतः ।* **(अ)कारकत्वादिति** (कं. ११९.१४) स्मृत्यजनकत्वादित्यर्थः । [3]**तदुप[स्थाप]कान्वयकल्पनायां तु संस्कारसिद्धिरिति** (कं. ११९.१४) तस्यानुभवस्योपस्थापको दूरस्थस्यासन्नीकर्ता कश्चिद्यदि अन्वयेन–सातत्येनागच्छन् कल्प्यते तदा संस्कारसिद्धिः । संस्कारो हि भावनाख्यो दूरस्थमप्यनुभवमासन्नीकरोति ततश्च स्मृतिरुत्पद्यत इति वाक्यतात्पर्यार्थः । **अन्त्यवर्णप्रतीतिकाले** इति (कं ११९.१५) श्लोकादिषु । **केषांचिदिति**–(कं. ११९.१७) पिपीलिकादीनाम् । **बाह्ये** इति (कं. ११९.१७) च बाह्येऽर्थे । **प्रत्यक्षानुभवजननसामर्थ्यमपि दृष्टत्वादेषितव्यमिति** (कं. ११९.१८) प्रत्यक्षरूपोऽनुभवो विशिष्टद्रव्यगतसङ्ख्याविषयस्तज्जननसामर्थ्यं मनस एषितव्यम् । शतसङ्ख्या हि प्रत्यक्षा अतस्तदनुभवः प्रत्यक्षोऽनुभव इति भावना । ननु यदि संस्कारसचिवद्मनोऽध्यक्षानुभवमपि जनयेत्तर्हि अन्धबधिरादीनामपि जनयिष्यति इत्यन्धबधिराद्यभावप्रसङ्गस्तत्राह **एवं च सतीत्यादि** (कं. ११९.१८) । **बाह्येन्द्रियप्रवृत्त्यनुविधायित्वादिति** (कं. ११९.१९) अस्य पुरो मनस इति शेषः ।

[कु०] स्मृत्योपनीतस्य कारणत्वे दृष्टान्तमाह **तथा चेति** (कं. ११९.१५) । नन्वेवमतीतेष्वन्त्यनाशात् सङ्ख्या कथं प्रत्यक्षा इन्द्रियसन्निकर्षाभावादित्यत आह **यथेति** (कं. ११९.१७) । केवलस्य [म]नसो बाह्यविषयज्ञानत्वे बधिरोऽपि शब्दं शृणुयादन्धोऽपि रूपं पश्येदित्यत आह **एवं चेति** (कं. ११९.१८) । उत्तरस्य परमतत्वं, दृष्टत्वा[दि]दोषाद(च) तथा दर्शनदृष्टमर्यादातिक्रमेण चतुर्विंशति गुणा इत्यत्रापि सङ्ख्याव्यवहारस्य मुख्यत्वापत्तिः । तत्र गुणानां समवायित्वकल्पनायां द्रष्टव्यापत्तिर्नैवमिति तस्य स्मृत्या रजतोत्पत्तिः किन्न कल्प्यते ? तथैवेति वदता ज्ञानेषु सत्यत्वमिथ्यात्वविचाराय जलाञ्जलीयतां सर्वत्र दृष्टाङ्गीकारेण सर्वस्य सत्यत्वात् स्वनिर्वचनीयं सर्वमिति । तदिदमायातं शांतिकर्मणि वेतालोदय इति । तत्र च निरूपणं प्रक्रम्य निर्वचनीयपक्षे पतितोसीति कि(ल) शतं पिपीलिकानां मया निहृ[त]मित्यत्र कां बाह्येन्द्रियप्रवृत्तिमनुविधीयमानो बाह्यं विप्रवर्तते च तावद् बाह्येन्द्रियजनितानुभवकार्यसंस्काररूपाम् । अनुभवस्यैवानुदयश्च सन्निकर्षाभावादित्यत उक्तम् अत एव नानुभवरूपामित्यलं विस्तरेण ।

परमतानुसारेण भाष्यस्य सङ्गतिमाह **यत्र विनष्ट** इति (कं. ११९.१९) परमार्थतस्तु स्थित एवाश्रये द्वित्वादिविनाशस्य कारणमुक्तम् । इदानीं द्वित्वविनाशे कारणान्तरं चिन्त्यत इति ।

---

१ तदुपस्थापनाकल्पनायां–कं. १, कं. २ । २ प्रतीकमिदं कं. पुस्तके नास्ति । ३ तदुपस्थापना –कं; तदुपस्थापन – पा. १ पु. ।

### प्रशस्तपादभाष्यम्

[126] क्वचिच्चाश्रय[1]विनाशादपि । कथम् ? यदैकत्वाधारावयवे कर्मोत्पद्यते तदैवैकत्व-[2]सामान्ये ज्ञानमुत्पद्यते, कर्मणा चावयवान्तराद्विभागः क्रियते, अपेक्षाबुद्धेश्चोत्पत्तिः ।

ततो यस्मिन्नेव काले विभागात् संयोगविनाशस्तस्मिन्नेव काले द्वित्वमुत्पद्यते । [3]संयोगविनाशाद् द्रव्यविनाशः, सामान्यबुद्धेश्चोत्पत्तिः ।

ततो यस्मिन्नेव काले सामान्यज्ञानादपेक्षाबुद्धेर्विनाशस्तस्मिन्नेव काले आश्रय-विनाशाद् द्वित्वविनाश [4]इति ।

### न्यायकन्दली

यत्र विनष्ट एव [5]आश्रये स्मृत्युपनीते द्वित्वमुत्पद्यते, तत्र स्मृतिलक्षणापेक्षाबुद्धि-विनाशादेवास्य विनाशः, यत्र त्वाश्रये विद्यमाने तदुत्पन्नं तत्र न केवलमपेक्षाबुद्धि-विनाशादस्य विनाशः, क्वचिदाश्रयविनाशादपि स्यात् ।

[126] एकस्य द्रव्यस्य द्वयोर्वा द्रव्ययोरभावाद् द्वे इति प्रत्ययाभावादित्याह–क्वचिच्चा-श्रय[6]विनाशादपीति । कथमित्यन्नेन पृष्टस्तदुपपादयन्नाह–यदेति । यस्मिन् काले एकगुणाश्रयस्य द्रव्यस्यावयवे क्रियोत्पद्यते तस्मिन् काले एकगुणवर्तिन्येकत्वसामान्ये

[पं०] [7]आश्रय (कं. ११९.१९) पिपीलिकादौ । अस्येति (कं. ११९.२०) द्वित्वस्य । तदिति (कं. ११९.२१) द्वित्वम् ।

[126] एकस्य द्रव्य[स्य] द्वयोर्वा द्रव्य[यो]रभावे इति (कं. ११९.२२) एकस्य द्रव्यस्याभावे द्वयोरपि द्रव्ययोरभाव इत्यर्थः । एकगुणाश्रयस्येति (कं ११९.२४) एकसङ्ख्याधारस्य । द्रव्यस्येति (कं. ११९.२४) अङ्गुल्यादेः । अवयवे इति (कं. ११९.२४) खण्डे । कर्मणेति (कं. ११९.२६) क्रियया । [8]अपेक्षाबुद्धिरिति (कं. ११९.२६) एकगुणयोरनेकविषयिणी एका बुद्धिरपेक्षाबुद्धिः । ततो [9]यस्मिन्काले अवयवविभागाद्द्रव्यारम्भकसंयोग-

[कु०] [126] आश्रयनाशस्य गुणविनाशकारणतायामविप्रतिपत्तेः कथमित्याक्षेपः । कथमित्यत आह कथमित्यन्नेनेति (कं. ११९.२३) । यस्मिन्काल इति (कं. ११९.२८) एकत्वसामान्यज्ञानं–क्षणमारभ्य पञ्चमे क्षणेऽपेक्षाबुद्धिविनाशः । अवयवे कर्मोत्पत्तिक्षणमपि चतुर्थक्षणे भवता द्रव्यनाशेनाऽप्यपेक्षाबुद्धिविनाशसमकाल एव द्वित्वविनाश इति प्रक्रिया-सङ्क्षेपः । [10]समभावित्वादिति (कं. १२०.४) नन्वदृष्टस्य भोगार्थं सर्वोत्पत्तिकारणत्वाङ्गीकार(।) उत्पन्नेन पुरुषस्य

१ विनाशादिति–कं. १; कं. २ । २ सामान्य–कं. १; कं. २ । ३ ततः संयोगविनाशात्–कि. भा. । ४ 'इति' जे पुस्तके नास्ति । ५ पराश्रये–कं. १, कं. २ । ६ विनाशादिति–कं. १, कं. २ । ७ पराश्रय–कं. । ८ अपेक्षाबुद्धेः । ९ यस्मिन्नेव–कं । १० सहभावित्वात्–कं. ।

### प्रशस्तपादभाष्यम्

शोभनमेतद्विधानं वध्यघातकपक्षे, सहानवस्थानलक्षणे तु विरोधे द्रव्यज्ञानानुत्पत्तिप्रसङ्गः। [1]कथम्? गुणबुद्धिसमकालमपेक्षाबुद्धिविनाशाद् द्वित्वविनाशे तदपेक्षस्य द्वे द्रव्ये इति द्रव्यज्ञान[2]स्यानुत्पत्तिप्रसङ्ग इति।

### न्यायकन्दली

ज्ञानमुत्पद्यते, क्षणान्तरे [3]कर्मणा चावयवान्तराद्विभागः क्रियते, एकत्वसामान्यज्ञानादपेक्षाबुद्धेश्चोत्पत्तिः, यस्मिन्नेव कालेऽ[4]वयवविभागाद् द्रव्यारम्भकसंयोगविनाशस्तदापेक्षाबुद्धेर्द्वित्वमुत्पद्यते, ततः संयोगविनाशाद् द्रव्यस्य विनाशः, द्वित्वसामान्यबुद्धेश्चोत्पाद इत्येकः कालः।

तते यस्मिन् काले द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनाशस्तदैवावयविविनाशाद् [5]द्वित्वस्य विनाशः, न [6]त्वपेक्षाबुद्धिविनाशस्तस्य कारणम्, सहभावित्वात्। अत्र यद्यपि द्वे द्रव्ये इति ज्ञानमकृत्वैव प्रणष्टस्य द्वित्वस्योत्पत्त्या न किञ्चित् प्रयोजनम्, तथापि कारणसामर्थ्यभावी कार्योत्पादो न प्रयोजनापेक्ष इति तदुत्पत्तिचिन्ता कृता।

[पं०] विनाश इति (कं ११९.२७) छिद्यमानावस्थायामेतत् द्रष्टव्यम्। **अपेक्षाबुद्धेर्द्वित्वमुत्पद्यत** (कं. १२०.१) इत्यत्रापेक्षाबुद्धेरिति पञ्चम्यन्तं पदम्। **द्वित्वसामान्यबुद्धिरिति** (कं. १२०.१) द्वित्वसामान्यज्ञानस्य।

[7]**तस्य तस्य कारणमिति** (क. १२०.३) तस्य द्वित्वविनाशस्य। **सहभावित्वादिति** (कं. १२०.४) सहभाविनो हि सव्येतरगोविषाणयोरिव न कार्यकारणभावः। **अत्रेति** (कं. १२०.४) आश्रयविनाशाद्द्वित्वविनाशे। **द्वे द्रव्ये इति ज्ञानम**[8]**कृत्वैवेति** (कं. १२०.४) द्वितीयावयवस्य विनष्टत्वात् कथं द्वे द्रव्ये इति ज्ञानमुत्पद्यते इति भावेन।

[**कु०**] कश्चिदुपभोगः कर्तव्यः। स च विशिष्टज्ञानमकृत्वैव विनश्यता न क्रियत एवेत्यत आह [9]**तत्रेति** (कं. १२०.४)। सर्वप्रयोजनस्यास्माभिर्ज्ञातत्वादुत्पत्तिसिद्धौ किञ्चित्प्रयोजनमपि कल्प्यमिति भावः। द्वित्वाद्युत्पत्तिविनाशव्युत्पत्तिप्रशंसायाम्, अप्रस्तुतत्वशङ्कापरिहरणसङ्गतिं करोति **इह खल्विति** (कं. १२०.६)। विशेषविधेः शेषनिषेधपरतया-

---

१ 'कथम्' इति जे. व्यो. पुस्तकयोर्नास्ति। २ स्याभावप्रसङ्ग इति–जे., वे। ३ कर्मणावयवान्तराद्–कं. १, कं. २। ४ अवयवद्रव्य–कं. १, कं. २। ५ द्वित्वविनाशः–कं. १; कं. २। ६ त्वपेक्षाबुद्धेर्विनाशस्तत्–कं. १; कं. २। ७ तत्कारणमिति–कं। ८ मकृत्यैवेति–कं। ९ अत्र–कं.।

## न्यायकन्दली

इह खलु द्वित्वोत्पत्तिप्र[1]क्रमे पूर्वपूर्वज्ञानस्योत्तरोत्तरज्ञानाद्विनाशो दर्शितः। स [2]चायं ज्ञानानां विरोधे सत्युपपद्यते। विरोधं च तेषां वध्यघातकस्वभावं केचिदिच्छन्ति, सहानवस्थानं चापरे। तत्राचार्यो वध्यघातकपक्षपरिग्रहं कुर्वन्नाह–शोभनमेतद्विधानमिति। एतद्विधानमेष [3]द्वित्वोत्पत्तिप्रकारः। वध्यघातकपक्षे द्वितीयं ज्ञानमुत्पद्य क्षणान्तरे पूर्वविज्ञानं नाशयतीति पक्षे शोभनं युक्तमित्यर्थः। सहानवस्थानलक्षणे विरोधे तु एकस्य ज्ञानस्योत्पादोऽपरस्य विनाश इति पक्षे द्वे द्रव्ये इति ज्ञानानुत्पत्तिप्रसङ्गः, तस्मात् सहानवस्थानलक्षणो न युक्त इत्यभिप्रायः। एतदेवोपपादयति–कथमित्यादिना। सहानवस्थानपक्षे हि [4]द्वित्वसामान्यज्ञानोत्पत्तिकाले एवापेक्षाबुद्धेर्वि[5]नाशाद् द्वित्वस्य विनश्यत्ता, गुणबुद्धिसमकालं च द्वित्वस्य विनाश इति क्षणान्तरे द्वित्वापेक्षस्य द्वे द्रव्ये इति ज्ञानस्योत्पत्तिर्न भवेत् कारणाभावात्।

[पं०] **द्वितीयं ज्ञानमुत्पद्येति** (कं. १२०.१०) प्रथमक्षणे। **क्षणान्तरे** (कं. १२०.१०) इति द्वितीयक्षणे। **सहानवस्थानलक्षणे तु विरोधे** (कं. १२०.११) इत्यस्मात्पुर एकस्मिन्नेव क्षणे इत्यध्याहार्यम्। **गुणबुद्धिसमकालमिति** (कं. १२०.१५) द्वित्वगुणलक्षणसङ्ख्याबुद्ध्युत्पादसमकालं द्वे द्रव्ये इति ज्ञानस्योत्पत्तिर्न भवेत्। **कारणाभावादिति** (कं. १२०.१६) अयमत्राशयः वध्यघातकपक्षे तु द्वित्वसामान्यज्ञानमेकस्मिन् क्षणे उत्पन्नं सत् द्वितीयक्षणेऽपेक्षाबुद्धिविनाशयितुमारभते। तस्मिन्नेतत् द्वितीयक्षणे द्वित्वगुणबुद्धिरुत्पन्ना, साप्युत्तरक्षणे द्वित्वगुणं विनाशयितुमारभते ततो द्वे द्रव्ये इति ज्ञानोत्पत्तिः। ततो द्वित्वगुणस्य विनाशः।

[कु०] पक्षान्तरानुपपत्तौ तात्पर्यं नाप्रस्तुतप्रशंसेति भावः। सहानवस्थानलक्षणे च विरोधे उत्तरज्ञानकारणस्यैव पूर्वज्ञानविनाशकत्वाङ्गीकारा(न)दहेतुको विनाश इति सन्देहानुपपत्तिः; गुणबुद्धिसमकालमित्यस्य द्वित्वविनाश [इ]त्यनेनान्वयं दर्शयन् व्याचष्टे **सहानवस्थानपक्ष** इति (कं. १२०.११)।

---

१ क्रमेण – कं. १; कं. २। २ स च – कं. १, कं. २। ३ द्वित्वप्रकारः – कं. १; कं. २। ४ द्वित्वकाले – कं. १, कं. २। ५ विनाशो – जे. १; जे. २।

## प्रशस्तपादभाष्यम्

[127] लैङ्गिकवज्ज्ञानमात्रादिति चेत्? स्यान्मतम्, यथाऽभूतं भूतस्येत्यत्र लिङ्गाभावेऽपि ज्ञानमात्रादनुमानम्, तथा [1]गुणविनाशेऽपि गुणबुद्धिमात्राद् [2]द्रव्यप्रत्ययः स्यादिति।

न, विशेष्यज्ञानत्वात्। नहि विशेष्यज्ञानं सारूप्याद्विशेषणसम्बन्धमन्तरेण भवितुमर्हति। तथा चाह सूत्रकारः–"समवायिनः श्वैत्याच्छ्वैत्यबुद्धेः श्वेते बुद्धिस्ते कार्यकारणभूते" (वै. सू. ८-१-९) इति।

## न्यायकन्दली

[127] अत्राशङ्कते–लैङ्गिकवदिति। एतद्विस्पष्टयति–[3]स्यान्मतमित्यादिना। [4]एवं ते मतं स्यादिदमभिप्रेतं भवेत्। यथा ध्वनिविशेषेण पुरुषानुमाने [5]ज्ञातं ज्ञानानन्तरमेव ध्वनिलक्षणं लिङ्गमभूतमविद्यमानं विनष्टमेव भूतस्य विद्यमानस्य पुरुषविशेषस्य लिङ्गं भवतीति लिङ्गस्याभावेऽपि तज्ज्ञानमात्रादेव लैङ्गिकं ज्ञानं जायते, तथा गुणबुद्धिसमकालं द्वित्वे विनष्टेऽपि तज्ज्ञानमात्रादेव द्वे द्रव्ये इति ज्ञानं स्यादिति। अन्यस्तु–अभूतं वर्षकर्म भूतस्य वाय्वभ्रसंयोगस्य लिङ्गमित्यत्र वर्षकर्मणो [6]यथा लिङ्गस्याभावेऽपि [7]तज्ज्ञानमात्रादेवानुमानमिति व्याचष्टे। तदसङ्गतम्, नह्यत्र वर्षकर्म लिङ्गम् अपि तु तस्याभावः। स च तदानीमस्त्येव, स्वरूपेण वस्त्वनुत्पादे प्रागभावस्याविनाशात्। तस्मादस्मदु[8]क्तैव रीतिरनुसरणीया।

[पं०] [127] **ध्वनिलक्षणं लिङ्गमभूतमिति** (कं. १२०.१८) क्षणिकत्वाद्ध्वनेः। **द्वित्वे विनष्टेऽपीति** (कं. १२०.२१) सहानवस्थानपक्षापेक्षमिदम्। **वर्षकर्मेति** (कं. १२०.२२) वृष्टिः। **भूतस्य वाय्वभ्रसंयोगस्य लिङ्गमितीति** (कं. १२०.२२) अत्राऽयं प्रयोगः वाय्वभ्रसंयोगो भूतो, वर्षकर्माभावात्। **तस्याभाव** इति (कं. १२०.२४) प्रागभावलक्षणः। **वस्त्वनुत्पादे** इति (कं. १२०.२४) वर्षादीनां वस्तूनामनुत्पत्तौ।

[कु०] [127] भूतं मन इतिवद्भूतप्रत्ययपरत्वे भूतशब्दस्य प्रस्तुतविरोधधर्मि[9]प्रत्ययपरतां व्याचष्टेऽ**भूतमविद्यमानमिति** (कं. १२०.१९)। यथा भूतस्येत्यत्र अकारप्रश्लेषिणां मतं दूषयति **अन्यस्त्विति** (कं. १२०.२१)। **वस्त्वनुत्पाद** इति (कं. १२०.२४) तदानींतनत्वविशेषणमपि प्रागभावस्य कालान्तररूपभावोत्पत्त्यैव विनश्यतीति भावः।

---

१ गुणविनाशे–जे। २ द्वे द्रव्ये इति प्रत्ययः–कि. भा। ३ स्यान्मतमिति–जे. १, जे. ३। ४ एवं मतं–जे. १, जे. २। ५ ज्ञानं ध्वनिलक्षणम्–कं. १, कं. २; –ज्ञानानन्तरमेव ध्वनिलक्षणम्–जे. २। ६ लिङ्गस्याभावेपि–कं. १, कं. ३, जे. २। ७ ज्ञानमात्रादेवं–जे. २। ८ दुक्तानीतिरेव–जे. १, जे. २। ९ धर्मित्पदपरतां–ह. पु.।

न्यायकन्दली

परिहारमाह–न, विशेष्यज्ञानत्वादिति । ज्ञानमात्रादेव 'द्वे द्रव्ये इति ज्ञानोत्पत्तिरित्येतन्न, कस्मात् ? विशेष्यज्ञानत्वात् । भवतु विशेष्यज्ञानं तथापि कुतो ज्ञानमात्रान्न भवति ? तत्राह–नहीति । विशेषणं विशेष्यस्य 'सरूपं विशेष्यस्यानुरञ्जकं विशेष्ये स्वोपसर्जनताप्रतीतिहेतुरिति यावत् । न चाविद्यमानस्यानुरञ्जकत्वं स्वोपसर्जनताप्रतीतिहेतुत्वं युक्तम्, अतो न विशेष्यज्ञानं विशेषणसम्बन्धमन्तरेण भवितुमर्हतीति विशेष्यज्ञानं सारूप्याद्विशेषणानुरक्तत्वाद् विशेषणसम्बन्धमन्तरेण भवितुं नार्हतीत्यत्रार्थे । सूत्रकारानुमतिं दर्शयति–तथा चाहेति । समवायिनः समवेताच्छ्वैत्याच्छ्वेतगुणाच्छ्'वैत्यबुद्धेः श्वेतगुणबुद्धेः श्वेते द्रव्ये बुद्धिर्भवति श्वेतं द्रव्यमिति । ते विशेषणविशेष्यबुद्धी कार्यकारणभूते कार्यकारणस्वभावे इति सूत्रेण 'विशेषणस्यानुरञ्जकत्वमुक्तम् । तच्चाविद्यमानस्य नास्तीति भावः ।

[पं०] विशेष्यज्ञानमिति (कं. १२०.२७) द्वे द्रव्ये इति ज्ञान(मिति 'द्वे द्रव्ये इति ज्ञान)विशेष्यम् । विशेषणसम्बन्धमिति (कं. १२१.३) द्वित्वं विशेषणम् । सारूप्यादि[ति] सारूप्यस्य सकाशात् । विशेषणानु(र)क्तत्वादिति हेतोः । समवायिन इति व्याख्येयपदम् । समवेतादिति व्याख्यानपदम् । श्वैत्यादिति (कं. १२१.६) व्याख्येयं पदं श्वेतगुणादिति (कं. १२१.६) व्याख्यानपदम् । विशेषणभूतान् श्वेतगुणादित्यर्थः । श्वैत्यबुद्धेरिति व्याख्येयपदं श्वेतगुणबुद्धेरिति व्याख्यानपदम् । श्वेते द्रव्ये इति (कं. १२१.६) विशेष्यभूते । कार्यकारणभूते इति (कं. १२१.७) कार्यभूता विशेष्यबुद्धिः, कारणभूता विशेषणबुद्धिः । अविद्यमानस्येति (कं. १२१.८) द्वित्वस्य ।

[कु०] हेतोरप्रयोजकत्वमाशङ्क्य भाष्येण परिहारः भवत्विति (कं. १२०.२७) । स्वोपसर्जनता प्रतीतिहेतुरिति (कं. १२१.१) स्वसामानाधिकरण्येन व्यावृत्तिप्रतीतिहेतुरित्यर्थः । तदयं प्राणार्थः द्वे द्रव्ये इति ज्ञानं विशेष[ण]सम्बन्धकार्यं विशिष्टज्ञानत्वाद्दण्डीति ज्ञानवत् । समवायिनः समवेता (कं. १२०.५)दित्यनेन सम्बन्धस्य कारणत्वमुक्तम् । श्वैत्यादित्यनेन विशेषणस्य । श्वैत्यबुद्धेरिति (कं. १२०.६) [श्वे]तज्ञानस्य । विशेषणविशेष्यबुद्धी इति (कं. १२१.७) विशेषणं च विशेष्यबुद्धिश्चेति विग्रहः ।

---

१ द्वे इति – जे. १, जे. २ । २ स्वरूपविशेष्या – कं. १, कं. २ । ३ श्वेतबुद्धेः श्वेतगुणबद्धेः – जे. १, श्वैत्यबुद्धेः श्वेते द्रव्ये – कं. १ । ४ विशेषणमनुरञ्जकम् – जे. १, जे. २ । ५ पुनरावृत्तमिवाभाति – सं. ।

### प्रशस्तपादभाष्यम्

[128] [1]न तु लैङ्गिकं ज्ञानमभेदेनोत्पद्यते। तस्माद्विषमोऽयमुपन्यासः। न, आशूत्पत्तेः। यथा शब्दवदाकाशमित्यत्र त्रीणि ज्ञानान्याशूत्पद्यन्ते, तथा द्वित्वादिज्ञानोत्पत्तावित्यदोषः।

### न्यायकन्दली

[128] सम्प्रति लैङ्गिकज्ञानस्य विशेष्यज्ञानात् 'तु' शब्देन विशेषं सूचयन्नाह–न त्विति। लैङ्गिकं ज्ञानं लिङ्गाभेदेन लिङ्गिनो लिङ्गोपसर्जनताग्राहितया नोत्पद्यत। तस्माद्विषमोऽयमुपन्यासः। लैङ्गिकवदित्युपन्यासो विषमो द्वे द्रव्ये इति ज्ञानेन सह तुल्यो न भवतीत्यर्थः। द्वे [2]द्रव्ये इति ज्ञानकाले द्वित्वमपि नास्ति कथं [3]तद्विशिष्टमेव ग्रहणम्? न, ज्ञानोत्पत्तेः पूर्वस्मिन् क्षणे यस्य सद्भावात्। सर्वत्र [4]हि प्रत्यक्षज्ञानस्य पूर्वक्षणवर्त्येवार्थो विषयः, अस्ति च द्वे [5]द्रव्ये इति ज्ञानोत्पादात् पूर्वस्मिन् क्षणे द्वित्वमिति [6]तदुपसर्जनता प्रत्ययः भवत्येव।

[टि॰] [128] [7]लैङ्गिकज्ञानम् इति :– लिङ्गाभेदेनेत्यस्य व्याख्यानं [8][लिङ्गोपसर्जनताग्राहितयेति। यदि तु] लिङ्गोपसर्जनताग्राहितयेत्ययमर्थो न स्यात्तदा [9]प्रस्तुते विशिष्टज्ञाने विशेषण[10]विशेष्ययोर्भिन्नयोरभेदावग्राहितया भ्रान्तत्वं [11]स्यादिति। द्वे द्रव्ये इति ज्ञानस्य [12]बहुपदार्थविषयत्वाभावात् समूहज्ञानमित्येतद् व्याख्यानयति द्वित्वगुणविशिष्टेत्यादि।

[पं॰] [128] लिङ्गिन्ते लिङ्गोपसर्जनता–[13]आहितयेति (कं. १२१.१०) लिङ्गाभेदेनेत्यस्य व्याख्यानमेतत्। द्वे द्रव्ये इति ज्ञानेन सह तुल्यो न भवतीति (कं. १२१.११) एते द्विविशेष्ये स्वोपसर्जनता ग्राहिलिङ्गिकं न तथा लिङ्गिनो भिन्नत्वादिति भावः। परः प्राह द्वे द्रव्ये इत्यादि (कं. १२१.१२)। [14]तद्विशिष्टग्रहणमिति (कं. १२१.१३) द्वित्वविशिष्टग्रहणम्। सूरिवाक्यं नेत्यादि (कं. १२१.१३)। तस्येति (कं. १२१.१३) द्वित्वस्य। पूर्वक्षणवर्त्येवार्थो विषय इति (कं. १२१.१४) [15]तुल्यक्षणयोर्विषयिता[भा]वाभावात्।

[कु॰] [128] लिङ्गोपसर्जनग्राहितेति (कं. १२१.१०) [16]प्रतिमानायवस्थिति समानाधिकरणलिङ्गविषयत्वेनेत्यर्थः। नहि भवति श्वेतं द्रव्यमिति व[त्]धूमवा[न्]ग्निमा[न]नुमितिः क ... धूमवत्त्वात् अग्निमानिति विशेष्यज्ञानस्य केवलविशेष्यालम्बनत्वमुक्तं विस्मृत्य कश्चिच्चोदयति द्वे द्रव्ये इति (कं. १२१.११) वध्यघातकलक्षणेऽपि विरोध इति शेषः। विशेष्यज्ञानं चेति विशेषस्य कारणत्वमात्रमित्युक्तम् स्मारयत् परिहरति। सर्वत्र प्रत्यक्षेति विशेष्यज्ञानस्य

---

१ ननु–दे। २ द्वे इति–जे. १, जे. २। ३ तद्विशिष्टं ग्रहणं ज्ञानोत्पत्तेः–जे. १, जे. २। ४ द्वित्व–कं. १, कं. २। ५ द्वे इति–जे. २। ६ तदुपसर्जनता–कं. १; कं. २। ७ लिङ्गिकं–अ, ब। ८ [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति। ९ प्रस्तुत–अ, ब, क। १० विशेष्ययोरभेदा ... अ। ११ स्यादिति लिङ्गोपसर्जनता–अ। १२ बहुपदार्थता–अ, ब। १३ ग्राहितया–कं। १४ तद्विशिष्टमेव–कं। १५ तुल्यलक्षणयोर्विषयविषयभावा॰–ब। १६ प्रतीयमानावस्थिति इति पाठः स्यात्–सं.।

### प्रशस्तपादभाष्यम्

[129 to 134] वध्यघातकपक्षेऽपि समानो दोष इति चेत्? स्यान्मतम्–[1]ननु वध्यघातकपक्षेऽपि तर्हि [2]द्रव्यज्ञानानुत्पत्तिप्रसङ्गः? कथम्? [3]सामान्यबुद्धिसमकालं संस्कारादपेक्षाबुद्धिविनाशादिति।

### न्यायकन्दली

इदं त्विह वक्तव्यम्–द्वे द्रव्ये इति ज्ञाने यथा द्रव्यं प्रतिभाति तथोपसर्जनीभूतं द्वित्वमपि, न [4]चाविद्यमानस्य द्वित्वस्य प्रतिभासो युक्तः। तस्मादेतदविनष्टमेव तदानीं विशेष्यज्ञानस्यालम्बनं स्यात्, तदवभासमानतालक्षणत्वात् तदालम्बनताया इत्यत आह–नाशूत्पत्तेरिति। द्रव्यज्ञानकाले द्वित्वं न विनष्टमित्येतन्न, आशूत्पत्तेर्द्वित्वगुणज्ञानस्य द्रव्यज्ञानस्य च शीघ्रमुत्पादात् क्रमस्याग्रहणे द्वित्वद्रव्ययोरेकस्मिन्नेव ज्ञाने प्रतिभास इत्यभिमानः। वस्तुवृत्त्या तु पूर्वं द्वित्वस्य प्रतिभासस्तदनु द्रव्यस्येत्यर्थः। अत्र प्रकृतानुरूपं दृष्टान्तमाह–यथेति। शब्दवदाकाशमित्यत्र शब्दज्ञानमाकाशज्ञानं शब्दविशिष्टाकाशज्ञानं च त्रीणि ज्ञानान्याशूत्पद्यन्ते यथा, तथा [5]द्वे इत्यादि विज्ञानोत्पत्तावपि। किमुक्तं स्यात्? यथा शब्दादिविज्ञानेष्वाशुभावितया क्रमस्याग्रहणे युगपत्प्रतिभासाभिमानस्तथा द्वित्वद्रव्यज्ञानयोरपीति।

[129] वध्यघातकपक्षेऽपि द्रव्यज्ञानानुत्पत्तिप्रसङ्ग इति केनचिदुक्तं तदाशङ्कते–वध्यघातकपक्षेऽपीति। अस्यार्थं विवृणोति स्यान्मतमित्यादिना। यदि गुणबुद्धिसमकालं

[पं०] इदं त्विह वक्तव्यमिति (कं. १२१.१५) अत्र परेणेति शेषः। एतदिति (कं. १२१ १७) द्वित्वम्। विशेष्यज्ञानस्येति (कं. १२१.१७) द्वे द्रव्ये इति ज्ञानस्य। तदवभासमानतालक्षणत्वात्तदालम्बनताया इति (कं. १२१.१८) यद्यस्मिन् ज्ञानेऽवभा[सते] तत्तस्यालम्बनमित्यर्थः। शब्दवदिति (कं. १२१.२२) अत्र वतुप्रत्ययः।

द्वित्वविनाशे द्रव्यज्ञानं नोत्पद्यते इत्याति [म]ह्यानवस्थानपक्षे।

[129] अत्रोपपत्तिमाहेति (कं. १२२.३) परः कर्ता। सा[मा]न्यबुद्धिसमकालमिति (कं. १२२.३)

[कु०] पूर्वक्षणवर्त्येव विशेषणं कारणमित्यर्थः। प्रकृतस्य सिद्धान्त उद्ग्राह्य[व्य] निवर्तनीयामाशङ्क्याह इदं त्विति (कं. १२१.१५)। वस्तुवृत्त्येति (कं. १२१-२१) नाशकारणपर्यालोचनया स्वभावपर्यालोचनया वेत्यर्थः। शब्दज्ञानमिति (कं. १२१.२३) अभिहितान्वयनये पदार्थप्रतीतिपूर्वकत्वात्तत्संसर्गप्रतीते [ए]वमुच्यते। उपपादितमर्थं प्रश्नपूर्वकं सम्पिण्डयन् दर्शयति [6]किमुक्तमिति (कं. १२१.२४)।

---

१ वध्यघातकपक्षेऽपि तर्हि–दे। २ ज्ञानानुत्पत्तिप्रसङ्गः–कि. भा.। ३ द्वित्वसामान्य–कं. भा. कि. भा.। ४ चाविद्यमानस्य प्रतिभासो–जे. १, जे. २। ५ द्वित्वादि–कं. १, कं. २। ६ न किमुक्तमित्पतति–ह. पु.।

### प्रशस्तपादभाष्यम्

न समूहज्ञानस्य संस्कारहेतुत्वात् । समूहज्ञानमेव संस्कारकारणं नालोचनज्ञानमित्यदोषः ।

ज्ञानयौगपद्यप्रसङ्ग इति चेत् ? स्यान्मतम् ननु ज्ञानानां वध्यघातकविरोधे ज्ञानयौगपद्यप्रसङ्ग [1]इति । न, अविनश्यतोरवस्थानप्रतिषेधात् । ज्ञानायौगपद्यवचनेन [2]ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानं प्रतिषिध्यते । नहि वध्यघातकविरोधे ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानमस्तीति ।

### न्यायकन्दली

द्वित्वविनाशे द्रव्यज्ञानं नोत्पद्यते ? तर्हि वध्यघातकपक्षेऽपि तदनुत्पत्तिः । अत्रोपपत्तिमाह –सामान्यबुद्धिसमकालं संस्कारादपेक्षाबुद्धिविनाशादिति । यथापेक्षाबुद्धिरुत्पन्ना द्वित्वं जनयति तथा संस्कारमपि, स च तस्या विनाशकः । तेन संस्कारस्य द्वित्वस्य चोत्पादे द्वित्वसामान्यज्ञानस्य चोत्पद्यमानतापेक्षाबुद्धेर्विनश्यत्तेत्येकः कालः । ततो द्वित्वसामान्यज्ञानस्य चोत्पादो [3]गुणबुद्धेश्चोत्पद्यमानतापेक्षा[4]बुद्धेर्विनाशो द्वित्वस्य विनश्यत्तेत्येकः कालः । ततो गुणबुद्धेरुत्पादो द्वित्वस्य विनाश इति क्षणान्तरे तदपेक्षस्य द्वे इति

[टि०] [129] आलोचनाज्ञानं व्याख्यानयति निर्विकल्पकमपेक्षाज्ञानम् इति । एकत्वसामान्यविशिष्टैकगुणालम्बनत्वेन सविकल्पकमप्यपेक्षाज्ञानं [5]संस्कारजनकत्वेन निर्विकल्पकतुल्यत्वान्निर्विकल्पकमुच्यते । अस्माच्च संस्कारा[6]नुत्पत्तिः तत् कार्यस्य द्रव्यं विना केवलस्यैकगुणस्मरणस्याभावात् । अथवा अपेक्षाज्ञानेनैकत्व[7]सामान्यं विशेषणमेकगुणश्च विशेष्यं स्वरूपेणैव गृह्यते न तु विकल्पे इति तन्निर्विकल्पकमेवेति । अपेक्षाज्ञानस्य इति :–वाक्यं तु विवादा[8]ध्यासितं

[पं०] द्वित्वबुद्धिसमकालम् । [9]संस्कारादपेक्षाबुद्धेविनाश [10]इत्यत्रेति कं. १२२.३) यद्यपेक्षाबुद्धेः संस्कार उत्पद्येत तदा तेनापेक्षाबुद्धेर्विनाशः क्रियेत कार्यभूतस्य ज्ञानस्य कारणभूतज्ञानविनाशकत्वात्ततोऽपेक्षाबुद्धिविनाशे द्वित्वं नोत्पद्येत । तदभावे [द्वे] द्रव्ये इति ज्ञानं कुतः स्यात् ? न चेद् संस्कारः समूहज्ञानादुत्पद्यते नापेक्षाबुद्धितः । ततः संस्कारेण नापेक्षाबुद्धिर्विनाश्यते । ततः कथं द्वित्वाभावो येन द्वे द्रव्ये इति ज्ञानं न भवेदिति भावः । [11]तदेवेति (१२२.१०) कर्तृपदम् ।

[कु०] [129] यदि गुणबुद्धिसमकालमिति (कं. १२२.१) सहानवस्थानपक्षे इति प्रकरणादवसीयते । नन्वपेक्षाबुद्धिरप्येकत्वसामान्यविशिष्टानेकगुणविषयिणी समूहज्ञानमेवेत्यत आह समूहज्ञानं द्वित्वगुणविशिष्टद्रव्यज्ञानमेवेति (कं. १२२.१०) । स्मरणयोग्यार्थविषयज्ञानस्य समूहविषयत्वमिति भावः । [12]निर्विकल्पमिति (कं. १२२.११)

---

१ चेत् – कि. भा. । २ वचनेन–युगपदुत्पत्ति – दे । ३ गुणबुद्धेरुत्पद्यमानता – जे. १; जे. २ । ४ बुद्धिविनाशो– जे. १; जे. २ । ५ संस्कारा... अ, ब, क । ६ नुत्पत्तिरुक्तार्थस्य – अ, ब । ७ सामान्यविशेषमेक – अ, सामान्यं विशेषमेक – ब, ड । ८ ध्यासितुं – अ, ब । ९ संस्कारादपेक्षाबुद्धिविनाशादिति–कं । १० –इत्येतत्रेति–ब । ११ एतदेव– कं । १२ निर्विकल्पकम्–कं ।

## न्यायकन्दली

ज्ञानस्यानुत्पाद इति वध्यघातकपक्षेऽपि तुल्यो दोषः। समाधत्ते–न, समूहज्ञानस्य संस्कारहेतुत्वादिति। [1]संस्कारादपेक्षाबुद्धेर्विनाश इत्येतन्न, कुतः समूहज्ञानस्य संस्कारहेतुत्वात्। एतदेव विवृणोति–समूह इत्यादिना। समूहज्ञानं द्वित्वगुणविशिष्टद्रव्यज्ञानमेव संस्कारं करोति, नालोचनज्ञानम्, न निर्विकल्पमपेक्षाज्ञानम्, अतो नास्य संस्काराद्विनाश इत्यर्थः। अपेक्षाज्ञानस्य संस्काराहेतुत्वे द्रव्यविवेकेनैकगुणयोः स्मरणं प्रमाणम्, गुणविशिष्टद्रव्यज्ञानस्य तद्धेतुत्वे [2]च विशिष्टद्रव्यस्मरणं प्रमाणम्।

यदि ज्ञानमुत्पद्य पूर्वोत्पन्नं ज्ञानं विनाशयति [3]तदैकस्मिन् क्षणे तयोः सहावस्थानं प्राप्नोति, ततश्च ज्ञानायौगपद्यादिति सूत्रविरोध इति केनचिदुक्तं तदाशङ्कते–ज्ञानयौगपद्यप्रसङ्ग इति चेत्? स्यान्मतमित्यादिना। अस्य विवरणं करोति–नन्वित्यादिना। समाधत्ते–नेति। एकस्मिन् क्षणे विनाश्यविनाशकज्ञानयोः सहावस्थानं न दोषाय, ज्ञानायौगपद्यादिति सूत्रेणाविनश्यतोरवस्थानप्रतिषेधात्। एतदेव दर्शयति–ज्ञानायौगपद्यवचनेन युगपदुत्पत्तिरवि[4]नश्यतोश्च युगपदवस्थानं प्रतिषिध्यत इति। वध्यघातकपक्षे

[टि०] ज्ञानं संस्कारजनकं न भवति, कदाचिदपि स्मरणाजनकत्वात् सम्प्रतिपन्ननिर्विकल्पकज्ञानवदिति। जनकत्वं च पार्यन्तर्येणेति [5]नासिद्धता। [6]यत्तु स्मरणं तदेकगुणविशिष्टद्रव्यज्ञान[7]जनितसंस्कारकृतं द्रव्यव्यतिरिक्तस्यैकगुणस्यास्मरणात्।

[पं०] नालोचनाज्ञानमिति (कं. १२२.११) यदुक्तं तद्विवृणोति न निर्विकल्पकमपेक्षाज्ञानमिति (कं. १२२.११)। अस्यायमर्थः–एकत्वसामान्यविशिष्टैकगुणालम्बनत्वेन सविकल्पकमप्यपेक्षाज्ञानं संस्काराजनकत्वेन निर्विकल्पकमुच्यते। इदं च संस्कारं करोति, तत्कार्यस्य द्रव्यं विना केवलस्यैकगुणस्मरणस्याभावात्। द्रव्यविवेकेनेति (कं. १२२.१३) [8]द्रव्याद्व्यतिरेकेण। एकगुणयोरिति (कं. १२२.१३) एकाख्यसङ्ख्ययोः। तद्धेतुत्वे इति (कं. १२२.१३) संस्कारहेतुत्वे।

तयोः सहावस्थानं प्राप्नोतीति (कं. १२२.१५) सत एव विनश्यत्वात्।

[कु०] स्मरणायोग्यार्थविषयमित्यर्थः। एतदेवाह अपेक्षाज्ञानस्येति (कं. १२२.१२)। द्वित्वोत्पत्तिसमानकालभाविन एकगुणविशिष्टद्रव्यज्ञानस्य चापेक्षाबुद्धिनाशकत्वं(रा) नाशङ्कनीयं द्वित्वाद्युत्पत्तिविरुद्धस्यैव एकगुणज्ञानस्य गुणिज्ञानहेतुत्वात्। अत्र च प्रमाणं द्वे द्रव्ये इति व्यवहारकाले एकं द्रव्यमिति व्यवहाराभावादिति। एकादिव्यवहारस्य नीलादिव्यवहारसाम्येन सालम्बनतया [9]सङ्ख्या प्रतिपादिता।

---

१ पाठोऽयं–कं. १, कं. २ पुस्तकयोर्नास्ति। २ चाविशिष्ट–कं. १; कं. २। ३ तदैतस्मिन्पक्षे–कं. १; कं. २। ४ रविनश्यतोश्चावस्थानं–जे. १; जे. २। ५ सिद्धता–अ, क; ६ ये तु–अ; ७ जनितं–अ, ब; ८ अत्र हस्तलिखितपुस्तके लेखकप्रमादात् द्रव्याद्व्यतिरेकेणेति पुनरावृत्तं भाति–सं। ९ संख्यप्रेतिपादिता–ह. पु.।

## न्यायकन्दली

च न ज्ञानयोर्युगपदुत्पादोऽस्ति, नाप्यविनश्यतोः सहावस्थानमेकस्योत्पादे द्वितीयस्य विनश्यद्रूपत्वादित्याह—न हीति । 'इति' शब्दः समाप्तिं कथयति ।

[130] अयि भोः सर्वमिदमुत्पत्त्यादिनिरूपणं द्वित्वस्यानुपपन्नम्, तत्सद्भावे प्रमाणाभावात् । द्वे इति ज्ञानं प्रमाणमिति चेत् ? न, ग्राह्यलक्षणाभावात् । तथा ह्यर्थो ज्ञानग्राह्यो भवन्नु¹त्पन्नो अनुत्पन्नो वा ? उभयथाप्यनुपपत्तिरनुत्पन्नस्यासत्वात्, उत्पन्नस्य च स्थित्यभावात् । अतीत एवार्थो ज्ञानग्राह्यस्तज्जनकत्वादिति चेत् ? न, ²वर्तमानतावभासविरोधादिन्द्रियस्यापि ग्राह्यत्वप्रसङ्गाच्च । ईदृश एवार्थस्य स्वकारणसामग्रीकृतः स्वभावो येन जनकत्वाविशेषेऽप्ययमेव ग्राह्यो नेन्द्रियादिकम्, तदनन्तरक्षणविषयश्च वर्तमानतावभास इति चेत् ? किं पुनरिदमस्य ग्राह्यत्वम् ? ज्ञानं प्रति हेतुत्वमिति चेत्? पुनरपीन्द्रियस्य ग्राह्यत्वमापतितम्, हेतुत्वमात्रस्य तत्राप्यविशेषात् । ज्ञानस्य स्वसंवेदन-

[टि०] [130] ग्रन्थकारो हि प्रथमं वैभाषिकमतं ³ततः सौत्रान्तिकमतं योगाचारेण दूषयित्वा ततः स्वयं ⁴योगाचारमपि निराकरिष्यमाणः प्रथमं बाह्यार्थप्रत्यक्षवादिनं वैभाषिकं निराकरिष्यन् योगाचारमुत्थापयति अयि भोः सर्वम् इत्यादि । अर्थजत्वाघटनां च दर्शयति न चातीतानागतयोः इति :— योगिप्रमुखाणां ह्यतीता⁵नागतार्थदर्शनस्याप्यङ्गी⁶कृतत्वात् । न च तदुत्पत्तेरन्यद् इति :—ज्ञानस्यार्थादुत्पन्नत्वमेव नियतार्थग्राहिता स्वभावहेतुर्नान्य इत्यर्थः ।

[पं०] [130] अथ ग्रंथकारः प्रथमं वैभाषिकमतं ततः सौत्रान्तिकमतं योगाचारेण दूषयित्वा ततः स्वयं योगाचारमपि निराकरिष्यमाणः प्रथमं बाह्यार्थप्रत्यक्षतावादिनं वैभाषिकं निराकरिष्यन् योगाचारमुत्थापयति अयि भोः सर्वमिदमित्यादिः (कं. १२२.२३) स्थित्यभावादिति (कं. १२२.२६) क्षणिकत्वेनै (व?) वर्तमानतावभासविरोधादिति (कं. १२२.२७) नीलं पश्यामीति यो ज्ञाने वर्तमानतावभासः स विरुध्यते । इन्द्रियस्यापि ग्राह्यत्वप्रसङ्गाच्चेति (कं. १२२.२७) तस्यापि ज्ञानजनकत्वादिति भावः । वैभाषिकमतमाश्रित्य वैशेषिको योगाचारं प्रत्याह ईदृश एवेति (कं. १२२.२७) त्यादि । अयमेवेति (कं. १२३.१) अर्थ एव । ⁷नेन्द्रियादिकमिति (कं. १२३.२) । तदनन्तरक्षणविषय इति (कं. १२३.२) तस्माद् व्यतीतात् ज्ञानजनकादर्थक्षणात् समनन्तरं योऽसावर्थक्षणो ज्ञानसमानकालो

[कु०] [130] तत्र विज्ञानवादिनः साध्यविकलो दृष्टान्त इति प्रत्यवतिष्ठन्त इत्याह ⁸अयि भो इति (कं. १२२.२३) । ननु ग्रहणेऽवभासमानत्वमेव ग्राह्यलक्षणं भवत्वित्यत आह तथाहीति (कं. १२२.२४) । इह तावत् सविकल्पकत्वं ? कल्पितविषयत्वं सम्प्रतिपन्नम् अतो निर्विकल्पकमवशिष्यते तत्र विकल्पयति अर्थो ज्ञानग्राह्य इति (कं. १२२.२४) । उत्पन्नस्येति (कं. १२२.२६) क्षणभङ्गीकारान् सहोत्पादमात्रेण विषयत्वेऽतिप्रसङ्गाच्चेति शेषः । अती[त][इ]ति (कं. १२२.२६) [त]त्रावभासमानत्वं तत्कालवर्तित्वमप्रयोजकत्वमिति भावः । तदनन्तरे समानकालवर्तिविषयतया वर्तमानावभासस्य क्वचिदभाव इति भावः । किं ⁹पुनरस्येति (कं. १२३.२) अस्त्विदं स्वाभाविकं ग्राह्यत्वं तत्किं

१ नुत्पन्नो भवति—कं. १; कं. २ । २ वर्तमानावभास—जे. २ । ३ तः—अ; ४ गाचारमपि—अ; ५ नागतादर्शन—अ, ब; ६ कृतवात्—अ, ब, क; ७ प्रतीकमिदं पञ्जिकाकारेण न व्याख्यातं लेखकदोषवशाद्वा व्याख्या भ्रष्टा तन्न ज्ञायते । ८ अपि—कं । ९ पुनरिदमस्य—कं ।

## न्यायकन्दली

मे[1]वार्थस्य ग्राह्यतेति चेत्? अन्यस्य स्वरूपसंवेदनमन्यस्य ग्राह्यतेत्यतिचित्रमेतत्। न चित्रम्, स्वभावस्यापर्यनुयोज्यत्वात्। अर्थावग्रहस्वभावं हि विज्ञानम्। तेनास्य स्वरूपसंवेदन[2]मेवार्थस्य ग्रहणं भवति। [3]यदर्थजं चेदं तस्यैवायमवग्रहो न सर्वस्येति नातिप्रसक्तिः। न, [4]एकत्वात्। अर्थजत्वं नाम ज्ञानस्यार्थादुत्पत्तिः। [5]सा चैका। न ज्ञानार्थयोरुभयोर्धर्मो भवतुमर्हति। अनेकवृत्तित्वेन नानात्वापातात् यदि तु ज्ञानस्य धर्मो नार्थं नियमयेत्। अथार्थस्य न ज्ञानम् अन्यधर्मत्वात्, उभयनियमाच्च तयोः [6]परस्परग्राह्यग्राहकभावव्यवस्था नैकसम्बन्धिनियमात्। न चातीतानागतयोरर्थयोर्ज्ञानं प्रत्यस्ति [7]कारकत्वम्, असत्त्वात्। विषयविषयिभावनियमाद् ग्राह्यग्राहक[8]भावनियम इति चेन्न, अभेदात्। ग्राह्यत्वमेव विषयत्वम्, [9]ग्राहकत्वं च विषयित्वम्, तयोः प्रतिनियमे एव

[टि०] एवं वैभाषिकमतं योगाचारेण दूषयित्वा विषयाप्रत्यक्षतावादिनं ग्राह्याकारज्ञानप्रत्यक्षतावादिनं **सौत्रान्तिकं** योगाचाराद् दूषयिष्यन् आशङ्कयति **अथोच्यते** इत्यादि। येन ग्राह्येण ज्ञानं [10]स्वसरूपं स्वाकारसहितमुत्पाद्यते तदस्य ज्ञानस्य ग्राह्यमित्यर्थः, न तु पूर्वमेकत्रक्षणे ज्ञानमर्थं[11]नोत्पद्यते ततो द्वितीयक्षणे स्वरूपं क्रियते क्षणभेदाभावात्। [12]**सह्यसाधारण** इतिः–आकारेण ह्यसाधारणेन ज्ञानमर्थं[13]विशेषेण योज्यते, न तु साधारणेनेन्द्रियादिकेनेत्यर्थः।

[पं०] न साद्विषयः। **अस्येति** (कं. १२३.३) अर्थस्य। **अन्यस्य स्वरूपसंवेदनमन्यस्य**[मिति] (कं १२३.५) अन्यस्य स्वरूपसंवेदनम[न्यस्य] अर्थस्य ग्राह्यता। परः प्राह **न चित्रमित्यादि** (कं. १२३.५) अस्य **स्वरूपसंवेदनमेवार्थस्य ग्रहणं भवतीति** ज्ञानस्य ह्येतदेव–स्वरूपं यदर्थग्रहणं ततो यदस्य स्वरूपसंवेदनं तदेवार्थग्रहणमिति भावः। **यदर्थनमिति** (कं. १२३.७) यस्यासौ अर्थ(स्य)(स्स)यदर्थो व(य)दर्थाज्जातं यदर्थनमिति समासः। मूलपक्षवादी सूरिराह [14]**नैकत्वादि** (कं. १२३.८)त्यादि। [15]**न ज्ञानार्थयोसमयोर्धर्म्मेति भवितुमर्हतीति** (कं. १२३.९) यस्योत्पत्तिस्तस्यैव सो धर्म इत्यर्थः। यदि तु ज्ञानस्य धर्म इत्यस्मात् [16]पुनस्तदेत्यध्याहार्यम्। **अथार्थस्य न ज्ञानमिति** यदि अर्थस्य धर्मस्तदा न

[कु०] हेतुत्वमात्रं वा तदितरत् किमपि वेति(चेव)वचनीयममिति भावः। तत्राद्यं दूषयति **ज्ञानमिति** (कं. १२३.३)। द्वितीयमाशङ्क्य दूषयति **ज्ञानस्येति** (कं. १२३.४)। **चित्रमिति** (कं. १२३.५) अतिप्रसङ्गादिति भावः। **अथ विग्रहस्वभावं हीति** (कं. १२३.६) अर्थनियतस्वरूपमित्यर्थः। **यदर्थजं चेति** (कं. १२३.७) हेतुत्वेन नियतं तदीय ग्राह्यलक्षणमित्यर्थः। अनेकवृत्तित्वेनेति पदेन [ए]कवृत्तित्वं नाना यथानेकभाजनगतानि तालफलानीति भावः।

---

१ मेवान्यस्य – कं. १ कं. २। २ संवेदनमर्थस्य – जे. १, जे. २। ३ यदर्थजं त्विदं – जे. २। ४ नैकार्थत्वात् – कं. १; कं. २। ५ सा चैका न च ज्ञानार्थयोर्धर्मं इति नार्थं – कं. १; कं. २। ६ परस्परं – जे. १, जे. २। ७ कारणत्वम् – कं. १; कं. २। ८ ग्राह्यग्राहकभाव इति – जे. १, जे. २। ९ ग्राहकत्वमेव – कं. १, कं. २। १० स्वरूपं – अ, ब; ११ नोत्पाद्यते – अ ब; १२ स चा – मु. सह्य – जे. १, जे. ३; १३ विशेषण – अ, ब; १४ न एकार्थत्वात् – कं; नैकत्वात् – पा. २. पु.। १५ न च ज्ञानार्थयोर्द्धर्म – कं। १६ पुरस्तात्तत् – ब।

न्यायकन्दली

कारणे पृष्टे तदेवोत्तरमुच्यत इति सर्वोत्तरधि[1]यामिदं परिस्फुरति। [2]नियतार्थग्राहितापि ज्ञानस्य स्वभाव इति चेत् ? स पुनरस्य स्वभावो यदि निर्हेतुको नियमो न प्राप्नोति। अथ [3]कारणवशात् ? तदेवोच्यतां किं स्वभावपरिघोषणया, न च तत्त[4]दुत्पत्तेरन्यत्। पश्यामः।

अथोच्यते यदुत्पादयति [5]सरूपयति च ज्ञानम्, तदस्य ग्राह्यं नेतरत्। अवश्यं चार्थाकारो [6]ज्ञानेऽपर्येषितव्यः, अन्यथा निराकारस्य बोधमात्रस्य सर्वार्थं प्रत्यविशेषाद् नीलस्येदं पीतस्येदमिति व्यवस्थानुपपत्तौ ततोऽर्थविशेषप्रतीत्यभावात्। अत एव विषयाकारं प्रमाणमाहुः। स [7]चासाधारणो ज्ञानमर्थविशेषेण सह घटयति, न साधारणमिन्द्रियादिकम्। तदुक्तम्--

[पं०] ज्ञानं नियमेदित्यर्थः (नियमयेद्)। अर्थजत्वाघटनां दर्शयति न चातीतानागतयोरित्यादि (कं. १२३.१०)। योगिप्रमुखाणां ह्यतीतानागतार्थदर्शनस्याङ्गीकृतत्वादिति वाक्यतात्पर्यार्थः। प्रतिनियम इति (कं. १२३.१३) [8][प्रतिनियमविषय[:]। सर्वोत्तरधियामिति (कं. १२३.१४) सर्वेभ्य उत्तरा प्रकृष्टा धीर्येषामितित्युपहसति नियम इति (कं. १२३.१५)] प्रतिनियतत्वम्। तदेवेति (कं. १२३.१५) कारणमेव। न च तदुत्पत्तेरन्यत्पश्याम इति (कं. १२३.१६) ज्ञानस्यार्थादुत्पन्नत्वमेव नियतार्थग्राहितास्वभावहेतुर्नान्य इत्यर्थः।

एवं वैभाषिकमतं योगाचारेण दूषयित्वा विषयाप्रत्यक्षतावादिनं ग्राह्याका[र] ज्ञानप्रत्यक्षतावादिनं सौत्रान्तिकं योगाचाराद्दूषयिष्यन्नाशङ्कयति अथोच्यत (कं. १२३.१६)। यदुत्पादयति सरूपयति च ज्ञानं तदस्य ग्राह्यं नेतरदिति (कं. १२३ १७) यद्वस्तु घटादिकर्तृज्ञानं कर्मतापन्नमुत्पादयति स्वसमानरूपं च करोति तद् घटादि अस्य ज्ञानस्य ग्राह्यं नान्यत्। यदुत्पादकं तदाकारार्पकं च तद्ग्राह्यमित्यर्थः। येन ग्राह्येण ज्ञानं स्वरूपं स्वाकारसहितमुत्पद्यते तदस्य ज्ञा स्य ग्राह्यमिति यावत्। इह च [9]क्षणभेदाभावादुत्पादनं सरूपीकरणं च एकक्षण एव ज्ञेयम्। तत इति (कं. १२३ .९) बोधमात्रात्। स इति (कं. १२३.२०) आकारः। साधारणमिति (कं. १२३.२१) नीलपीतयोः साम[ा]न्यम्। इन्द्रियादिकमिति (कं. १२३.२१) = कर्तृभूतम्।

[कु०] किञ्च अपोहस्यापि ग्राह्यलक्षणं वक्तव्यं तदभावे विकल्पस्य तद्विषयतापि न स्यात्तदभावेऽनुमानप्र त्तेरपि न स्यादित्याशयेनाह न चातीतानागतयोरिति (कं. १२३.१०)। नियतार्थेति (कं. १२३.१३) न च यं ग्रा ग्राहकभावनियमहेतुतया विषयविषयिभावं ब्रूमहे (तु) किन्तु स्वभावतया नोक्तदूषणावसर इति भावः। नियमो न प्राप्नोति (कं १२३.१५) [इति] अस्यैव ग्राहकमित्यसाधारण्यं प्राप्नोति अहेतुकस्य वल्लघुष्णत्वादेः सर्वसाधारणत्वदर्शनादित्यर्थः।

१ धियां परिस्फुरति – कं. १; कं. २। २ नियतार्थविग्राहिताऽपि – कं. १; कं. २। ३ कारणवात् – जे. १; जे. २। ४ तदुत्पत्ते–कं. १; कं. २। ५ सरूपयति ज्ञानम्–कं. १; कं. २। ६ ज्ञानेऽप्येषितव्यः–कं. १; कं. २। ७ सह्यामाधारणो – जे. १, जे. २। ८ [ ] एतच्चिह्नान्तर्गतो पाठः बपुस्तके नास्ति। ९ क्षणभेदाभावाद्–द्विरावृत्तं लेखकप्रमादवशात् – सं।

## न्यायकन्दली

अर्थेन घटयत्येनां नहि मुक्त्वार्थरूपताम् ।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता ॥

[131] [1]अपरत्र चोक्तम्–नहि वित्तिसत्तैव तद्वेदना युक्ता, तस्याः सर्वत्राविशेषात् । तां तु सारूप्यमाविशत् [2]सरूपयन्तं घटयेदिति । अत्रोच्यते–साकारेण ज्ञानेन किमर्थोऽनुभूयते? किं वा स्वाकारः? किमुतोभयम्? न तावदुभयम्, नीलमेतदित्येकस्यैवाकारस्य सर्वदा संवेदनात् । अर्थस्य च ज्ञानेनानुभवो न युक्तः, तस्य स्वरूपसत्ताकाले ज्ञानानुत्पादाज्ज्ञानकाले चातीतस्य [3]वर्तमानतयावभासायोगात् । ज्ञानसहभाविनः क्षणस्यायं वर्त्तमानतावभास इति स्वसिद्धान्तश्रद्धालुतेयम्, तस्य तदग्राह्यत्वात् । कश्चात्र

**[टि०]** [4]**अर्थेन घटयति** इति:–अर्थरूपतामर्थकारमुक्त्वा [5]अन्यो नैनां बुद्धिमर्थेन संयोजयति किन्तु अर्थरूपतैव योजयतीति भावः ।

[131] **नहि वित्तीति**:–वित्तिसत्ता सद्रूपं ज्ञानमित्यर्थः । **तस्याः सर्वत्र** इति:–नीलादौ पीतादौ च वित्तेर्ज्ञानस्य तुल्यत्वात् नीलवेदनं [6]पीतवेदनमित्यादि विशेषो न स्यादिति भावः । सारूप्येणार्थाकारेण [7]पुनःस्तां

**[पं०] अर्थेन घटयत्येनमित्यादिकः** श्लोकः (कं. १२३.२२) व्याख्या–अर्थरूपतामुक्त्वाऽर्थाकारं मुक्त्वाऽन्यः कश्चिदेनां प्रमेयाधिगतिं–प्रमेयबुद्धिं नार्थेन संयोजयति किं त्वर्थरूपतैवेति भावः । तस्मात्प्रमेयाधिगतेः प्रमेयबुद्धेः प्रमाणम् । किम्? सिद्धो मेर्थरूपताऽर्थाकार एव । अयमत्रभावः=यदाज्ञानमर्थाकारं भवति तदाऽर्थो मया ज्ञात इति निश्चयो भवति यथा घटाकारं ज्ञानम् । तस्माद् बहिर्घटेन भवितव्यमिति श्लोकार्थः ।

[131] **वित्तिसत्तेति** (कं. १२३.२५) [8]सद्रूपं ज्ञानम् । **तद्वेदनेति** (कं. १२३.२५) अर्थवेदना । **सर्व[त्रा]-विशेषाविति** (कं. १२३.२६) नीलादौ पीतादौ च वित्तेः सर्वत्र तुल्यत्वादित्यर्थः । **तां तु सारूप्यमाविशत्** [9]**सरूपयन्तं घटयेदिति** (कं. १२३.२६) सारूप्यं तु कर्तृभतं तां वित्तिसत्तां सरूपयन्तं स्वसदृशं ज्ञानं जनयन्तं घटादिकमर्थं

**[कु०] न च तदुत्पत्तेरिति** (कं. १२३.१६) **सा च दूषितेति** भावः । **सरूपयति ज्ञानमिति** (कं. १२३.१७) ज्ञाने स्वाकारमर्पयतीत्यर्थः । ननु ज्ञानस्य स्वाकारत्वे किं प्रमाणं यदर्पको विषयः स्यादित्यत आह **अवश्यं चेति** (कं. १२३.१७) । विषयनियमान्यथानुपपत्त्या आकारः कल्पनीय इत्यर्थः ।

एनां बुद्धिमर्थरूपतामर्थात्मकतां मुक्त्वा नह्यन्यदर्थेन घटयतीत्यर्थः । **प्रमेयाधिगतेः प्रमाणं** (कं. १२३.२३) कारणमित्यर्थः । **किमर्थं इति** (कं. १२३.२६) अर्थमात्र इत्यर्थः ।

[131] **एकस्यैवाकारस्ये**(कं. १२४.१)त्युपलक्षणं द्वयोरसंवेदनादित्यर्थः । आनन्तर्याच्चरमं दूषयित्वाऽऽद्यं दूषयति **अर्थस्येति** (कं. १२४.१) । **स्वसिद्धान्तेति** (कं. १२४.४) अतीतविषयस्य वस्त्वन्तरवर्तमानताग्रहणेऽति

---

१ अपरं चोक्तम्–जे. १, जे. २ । २ सरूपयितुं–कं. १, कं. २ । ३ वर्तमानता–कं. १, कं. २ । ४ अर्थत–अ, ड; ५ अन्येनैनां–अ, ब; ६ नीलवेदनमित्यादि विशेषो... अ; ७ पुनम्नां–अ, ब; ८ तद्–ब । ९ सरूपयितु–कं; सरूपायत–पा. १ पु. ।

## न्यायकन्दली

**हेतुर्यद्विज्ञानं नियतमर्थं बोधयति न सर्वम् ? नहि तयोरस्ति तादात्म्यम्, तदुत्पत्तिश्च न व्यवस्थाहेतुरित्युक्तम् । तदाकारता नियमहेतुरिति चेत् ? किमित्येको नीलक्षणः समानाकारं नीलान्तरं न गृह्णाति ? ग्राहकत्वं ज्ञानस्यैव स्वभावो नार्थस्येति चेत् ? तथाप्येकं [1]नीलविज्ञानं सर्वेषां नीलक्षणानां ग्राहकं स्यात्, तदाकारत्वाविशेषात् । तदुत्पत्तिसारूप्याभ्यां स्वोत्पादकस्यैवार्थक्षणस्य ग्राह्यता न [2]सर्वेषामिति चेत् । इन्द्रियसमनन्तरप्रत्यययोरपि ग्राह्यतापत्तिः । ताभ्यामपि हि ज्ञानमुत्पद्यते, बिभर्ति च तयोर्यथास्वं विषयग्रहणप्रतिनियमं [3]बोधात्मकत्वं च सारूप्यम् । अथ मतं यदेतद्विषयग्रहणप्रतिनियतत्वमिन्द्रियसारूप्यं विज्ञानस्य, यदपि समनन्तरप्रत्ययसारूप्यं बोधात्मकत्वम्, तदुभयमपि सर्वज्ञानसाधारणम्, असाधारणं तु विषयसारूप्यम्, [4]विज्ञानस्य नीलजे एव**

[टि०] बुद्धिमनुप्रविशता सा बुद्धिः स्वरूपसम्पर्केणार्थेन संयोज्यत इत्यर्थः योगाचारेण सौत्रान्तिकं दूषयति :– **अत्रोच्यते** इत्यादि । **तस्य तद्ग्राह्यत्वाद्** इति :– तस्य ज्ञानसहभाविनो [5]नीलादिक्षणस्य तेन पूर्वनीलक्षणविषयिणा ज्ञानेनाग्राह्यत्वात् । **तदुत्पत्तिश्च न** इति – विषयवदिन्द्रियादेरपि तथा भावप्रसङ्गोऽतीतानागतार्थविषयस्य [6]च योगिज्ञानस्यानुत्पाद[7]प्रसङ्ग इत्युक्तम् ।

[8]अत्र सौत्रान्तिकपरिहारमाशङ्कयति **अथ मतं यदेतद्** इत्यादि :– ज्ञानत्वेन समोऽव्यवधानादनन्तरः स चासौ प्रत्ययश्च समनन्तर[9]प्रत्ययस्य उत्तरज्ञानोत्पादकारणं पूर्वज्ञानक्षण उच्यते । **एतावता विशेषेण** इति :– ज्ञानेनार्थं एव

[पं०] च घटयेत् संयोजयेदित्यर्थः । सारूप्येणार्थाकारेण पुनस्तां बुद्धिमनुप्रविशता सा बुद्धिः स्वरूप[10]समर्पकेणार्थेन संयोज्यत इति यावत् । योगाचारेण सौत्रान्तिकं दूषयन्नाह **अत्रोच्यते** इति (कं. १२३.२६) । अल्पवक्तव्यत्वात् तृतीयं विकल्पं प्रागेव निराकुर्वन्नाह **न तावदुभयमित्यादिना** (कं. १२३.२७) । प्रथमं विकल्पं निराकुर्वन्नाह **अर्थस्येत्यादिना** (कं. १२४.१) । **तस्य स्वरूपसत्ताकाले** [11]**ज्ञानस्या[नु]त्पादादिति** (कं. १२४.२) अर्थेन ज्ञानम् । यदा च ज्ञानमुत्पन्नं तदार्थोऽतीतः कार्यकारणयोः पूर्वापरकालभावित्वादिति । भावना नाकारणं विषय इति वचनात् ज्ञानकारणभूत एवार्थो ज्ञानेऽवभासते नान्यो ज्ञानसहभाविनश्चार्थक्षणस्य ज्ञानं प्रत्यकारणत्वात् । [12]ज्ञानेन (ज्ञानेन) अवभासो ?

[कु०] प्रसङ्ग इति । **तस्य तदग्राह्यत्वादिति** (कं. १२४.४) उत्पाद्यज्ञानं तत्र स्वाकारमर्पयतो ग्राह्यत्वाङ्गीकारात्सहभुवश्चानुत्पादकत्वादाकारानर्प(र्प)कत्वाच्चेति भावः । साकारविज्ञानवादिनाप्याकारार्पकस्यैवोत्पादकस्य विज्ञानेन ग्रहणमित्यत्र नियमे स्वभाव एव कारणं वक्तव्यमिति परिशेषयितुं सम्भाविनः [13]पक्षानुमन्यस्य दूषयति **कश्चात्र** (कं. १२४.४) त्यादिना **कस्येय**[14]**मोक्षे**(कं. १२४.२१)त्यन्तेन । परिशेषिते पक्षे दूष[ण]माह **एवं चेदिति** (कं. १२४.२२) । **अकार[ण]माकार** इति (कं. १२४.२४) स्वभावादेव विषयविषयिभावसिद्धावाकारो निष्प्रमाणक इत्यर्थं दृष्टान्तेन दृढयति **न हि छिदिक्रियेति** (कं. १२४.२८) ।

---

१ नीलज्ञानं – कं. १, कं. २ । २ सर्वेषामिति – कं. १, कं. २ । ३ बोधात्मकं – कं. १; कं. २ । ४ नीलजे एव नीलज्ञाने – कं. १; कं. २ । ५ नीलादिलक्षणस्य – क, नीलादिलक्षणस्थेन पूर्वनील – अ, ब; ६ च अबकपुस्तकेषु नास्ति । ७ प्रसङ्गात् – अ; ८ असौत्रान्तिक – अ; ९ प्रय – अ, ब; १० अतःपराणि षट्पत्राणि बपुस्तके नष्टानि । ११ ज्ञानानुत्पादाद् – कं । १२ ज्ञानेन ज्ञाने न इति पुनरावृत्तं भाति – सं । १३ पक्षे हेतु – इति सम्भवेत् – सं. । १४ माज्ञा – कं ।

## न्यायकन्दली

नील ाने नीलाकारस्य संभवात् । यश्चासाधारणो धर्मः स एव नियामक इत्येतावता विश ंण ज्ञानमर्थं गृह्णाति नेन्द्रियसमनन्तरप्रत्ययाविति । तदप्यसारम्, समानविषयस्य सम न्तरप्रत्ययस्य ग्रहणप्रसङ्गात् ।

यो विज्ञाने नीलाद्याकारमर्पयति स एव तस्य ग्राह्यः, न च धारावाहिकविज्ञाने स नन्तरप्रत्ययान्नीलाद्याकारस्योत्पत्तिः, [1]किन्त्वर्थादर्थस्यैव, तदुत्पत्तावन्वयव्यतिरेकाभ्यां सर्वत्र सामर्थ्योपलब्धेर्बोधाकारोत्पत्तावेव बोधस्य सामर्थ्यावगमादिति चेत् ? [2]नीलाद्याकारसमर्पको ग्राह्य इति कस्येयमाज्ञा ? नान्यस्य कस्यचित्, तस्यैव तु ग्राह्यत्वस्वभावनियमो नियामकः । एवं चेत् स्वभावनियमादेव नियमोऽस्तु, ज्ञानं हि [3]स्वसामग्रीप्रतिनियमात् प्रतिनियतार्थसंवेदनात्मकमेवोपजायते । अर्थोऽपि संवेद्यस्वभावनियमादेव

[टि०] गृह्यते न पुनरिन्द्रियं समनन्तरप्रत्ययश्चेत्यर्थः । समान[4]विषयस्य इति :– धारावाहिक[5]विज्ञानेषु समनन्तरप्रत्ययस्य तत्कार्यस्योत्तरज्ञानस्य सन्तानाभिप्रायेण तदेकनीलविषयत्वात् समनन्तरप्रत्ययस्य कार्यज्ञानेन [6]सह समानविषयत्वम् । यथा च [7]पूर्वनीलक्षणेन उत्तरो नीलक्षणो जन्यते तथा तदाकारेण पूर्वज्ञानेनोत्तरो ज्ञानक्षणो जन्यते । ततश्च यथोत्तरो नीलो विषय उत्तरज्ञानेऽसाधारणं [8]स्वं नीलमाकारमर्पयति तथा समनन्तरप्रत्ययोऽपि इत्यसाधारणस्वा[9]कारसम्पर्क-

[पं०] न युक्त इत्यालोच्याह = **तस्य तदग्राह्यत्वादिति** (कं. १२४.४) तस्य ज्ञानसहभाविनः क्षणस्य तेन ज्ञानेनाग्राह्यत्वादि अर्थः (दित्यर्थः) । **न हि तयोरस्ति तादात्म्यमिति** (कं १२४.५) न खलु भिन्नकालभाविनोस्तादात्म्यमिति भावः । **तदुत्पत्तिश्च न व्यवस्थाहेतुरित्युक्तमिति** (कं. १२४.५) विषयवत् इन्द्रियादेरपि तथाभावप्रसङ्गोऽतीतानागतार्थविषयस्य च योगिज्ञानस्योत्पादप्रसङ्ग इत्युक्तं **तदाकारतेति** (कं. १२४.६) अर्थसारूप्यम् । **नीलक्षण** इति (कं. १२४.७) बाह्यः । **नीलान्तरमिति** (कं. १२४.७) बाह्यम् । **सर्वेषामिति** (कं. १२४.८) देशकालान्तरभाविनाम् । **स्यादिति** (कं. १२४.९) प्राप्नोति । **स्वोत्पादकस्येति** (कं. १२४.९) ज्ञानोत्पादकस्य । **इन्द्रियसमनन्तरप्रत्यययोरिति** (कं. १२४.१०) समो ज्ञानव्यवहितत्वेन चानन्तरः प्रत्यय उत्तरज्ञानोत्पादककारणं पूर्वक्षणः समनन्तरप्रत्ययः इन्द्रियसमनन्तरप्रत्ययश्च इन्द्रियसमनन्तरप्रत्ययौ तयोरिति विग्रहः । **विषयग्रहणप्रतिनियममिति** (कं. १२४.११) इन्द्रियं प्रति । **बोधात्मकत्वमिति** (कं. १२४.१३) समनन्तरप्रत्ययं प्रति । **सर्वज्ञानसाधारणमिति** (कं. १२४.१४) नीले पीते च तुल्यम् । **नेन्द्रियसमनन्तरप्रत्ययादिति** (कं. १२४.१७) ज्ञानं [10]कर्तृ (कर्तृ)इन्द्रियसमनन्तरप्रत्ययौ तयोरिति गृह्णाति । अतः

[कु०] द्वितीयमुपन्यस्य दूषयति ([11]अंति) **तत्र विकल्पोऽसमर्थ एवेति** (कं. १२५.५) । उत्प्रेक्षा विषयादन्यत्रेति शेषः । अर्थो ज्ञानेन मा ग्राहि गृहीतस्त्वाकारः कल्पयिष्यत इत्याशङ्क्य दूषयति **ज्ञानाकार** इति (कं. १२५.५) । **किमिदानीमिति** (कं. १२५.६) आकारानुसारिवाक्यार्थकल्पने स्थूलाकारस्यापि कल्पना प्रसज्यते तच्चानिष्टमित्यर्थः । **बहुष्विति** (कं. १२५.८) अवयविनोऽनङ्गीकारादिति शेषः । [12]**सुनिरूपितप्रायम्** इति (कं. १२५.११) एकादिव्यवहारहेतुरिति भाष्यव्याख्यानावसर इति शेषः ।

---

१ किन्त्वर्थादस्यैव–कं. १; कं. २ । २ नीलाकारस्य–जे. १; जे. २ । ३ स्वसामग्री प्रतिनियतार्य–कं. १; कं. २ । ४ विषयश्च–ड । ५ विज्ञानेप्यसम–अ, ब । ६ ज्ञानेन समविषय–अ; ज्ञानेन समविषयत्वं–ब । ७ पूर्वनीलक्षणो जन्यते–अ, ब, ड । ८ स्वनील–अ, ब । ९ स्वाकारमर्पकत्वात्–अ, ब । १० 'कर्तृ'पदं पुनरावृत्तमिव भाति–सं । ११ कन्दल्यां नास्ति । १२ निरूपितप्रायम्–कं ।

न्यायकन्दली

संवेद्यते, नेन्द्रियादिकमित्यकारणमाकारः। नहि छिदिक्रिया वृक्षाकारवती येनेयं [1]वृक्षेण सह सम्बद्ध्यते न कुठारेण, किन्त्वस्या वृक्षस्य च तादृशः स्वभावो यदियमत्रैव नियम्यत नान्यत्र। अस्येदं संवेदनमिति च [2]व्यवस्था तत्रास्य तदवभासमात्रनिबन्धनैवेति तदर्थमप्याकारो न मृग्यः।

अथ साकारेण ज्ञानेनार्थो न संवेद्यत एव, किन्तु स्वाकारमात्रम्। तदर्थसद्भावो निष्प्रमाणको न तावदर्थस्य ग्रहणम्, न चाध्यवसायः विकल्पो [3]ह्यध्यवस्यति, स चोत्प्रेक्षामात्रव्यापारो भवन्नपि प्रत्यक्षपृष्ठभावित्वाद्यत्र प्रत्यक्षं प्रवृत्तं तत्र स्वव्यापारं परित्यज्य कारणव्यापारमुपाददानो वस्तु साक्षात्करोति। यत्र तु प्रत्यक्षमेवाप्रवृत्तं तत्र

[टि०] त्वात्सोऽपि ग्राह्यः स्यादिति भावः। एतावता ग्रन्थेन किमर्थो गृह्येत किमुतोभयमिति विकल्पद्वयं निराकृत्य किं वा आकार इति तृतीयं विकल्पं **योगाचारो** निराचष्टे **अथ साकारेण** इति। **विकल्पो [4]ह्यध्यवस्यति** इति :–अध्यवसायरूपो भवतीत्यर्थः। **स च** इति शब्दार्थयोरविद्यमान[5]वाच्यवाचकभावपरिकल्पनमुत्प्रेक्षा। स्वव्यापारमुत्प्रेक्षारूपं कारण-व्यापारदर्शनरूपम्। स्थूलाकारस्य बाह्यस्याभ्युपगमे दोषमाह **का गतिरस्य वचनस्य** इति :–अस्येति वक्ष्यमाणस्य।

[पं०] तयोर्ग्राह्यत्वापत्तिरित्याशयः। **समानविषयस्य समनन्तरप्रत्ययस्य ग्रहणप्रसङ्गादिति** (कं. १२४.१७) यथा उत्तरो नीलक्षणविषय उत्तरज्ञाने असा[धा]रणं स्वं नीलाकारं समर्पयन् ग्राह्यः स्यात्तथा पूर्वज्ञानस्वरूपः समनन्तरप्रत्ययोऽपि असाधारणस्वाकारसमर्प्यकत्वाद् ग्राह्यः स्यादित्यर्थः।

परवाक्यं **यो विज्ञान** (कं. १२४.१८) इत्यादि। य इति घटादिः। **तदुत्पत्ताविति** (कं. १२४.२०) ज्ञाने नीलाद्याकारोत्पत्तौ। **बोधाकारोत्पत्तावेवेति** (कं. १२४.२१) न नीलाद्याकारोत्पत्ताविति भावः। **नीलाद्याकारसमर्प्यको ग्राह्य इति** (कं. १२४.२१) अर्थ एव ज्ञानस्य ग्राह्य इत्यर्थः। परवाक्यं **नान्यस्ये**(कं. १२४.२२)त्यादि। **तस्यैवेति** (कं. १२४.२२) नीलादिकस्यैव। **श्रीधरः योगाचारमुखेन** प्राह = एवं चेत् [6]स्वभावनियमोऽस्तिति (स्वभावनियमादेव नियमोऽस्त्विति) (कं. १२४.२३) किं तदाकारतयेति भावः। **नेन्द्रियादिकमिति** (कं. १२४.२५) अत्रादिशब्दा[त्] समनन्तरप्रत्ययो गृह्यते। न च वाच्यं तदाकारता[7]मन्तरेण प्रतिनियमो न स्यादिति यतश्छिदिक्रिया तदाकारतां विनापि वृक्षेणैव सह सम्बध्यते न कुठारेण। ततो यथाऽत्र प्रतिनियमस्तथा ज्ञानेऽपि स्वभावादेवासौ भविष्यतीत्याह **न हि छिदिक्रियेत्यादिना** (कं. १२४.२५) **तदवभासमात्रनिबन्धनैवेति** (कं. १२४.२८) यस्यार्थस्यावभासो भवति तस्येदमिति संवेदनमित्यर्थः।

ज्ञानेन स्वाकारोऽनुभूयत इति द्वितीयं विकल्पं प्रति[ब]न्धयन्नाह योगाचारमुखेन **श्रीधरः अथ साकारेणेत्यादिना** (कं. १२४.२८)। **अर्थस्येति** (कं. १२५.२) रिगिरित्रायमाणपरमाणुलक्षणस्य। **ग्रहणमिति** (कं. १२५.२) निर्विकल्पकेन। **न चाध्यवसाय** इति (कं. १२५.२) विकल्पेनार्थस्य। **उत्प्रेक्षामात्रव्यापार** इति (कं. १२५.२)

---

१ वृक्षेण सम्बध्यत–जे. १; जे. २। २ व्यवस्था तदवभासमात्र–कं. १; कं. २। ३ ह्यवशिष्यते–कं. १; कं. २। ४ ह्यविशेष्यते–मु. ह्यध्यवसति–जे. १, जे. ३। ५ वास्य–अ, ब। ६ स्वभावनियमादेव नियमोऽस्तु–कं, अयमेव पाठः साधीयान्। ७ मन्तरेणमन्तरेण पञ्जिकायाम् 'मन्तरेण' पुनरावृत्तं भाति।

## न्यायकन्दली

**विकल्पोऽप्यसमर्थ एव, कारणाभावात्। ज्ञानाकारः स्वसदृशं कारणं व्यवस्थापयन्नर्थसिद्धौ प्रमाणमिति चेत्? तत्किमिदानीं स्थूलाकारस्य समर्पकोऽप्यर्थो बहिरस्ति? का गतिरस्य वचनस्य--**

**तस्मान्नार्थेन विज्ञाने स्थूलाभासस्तदात्मनः।**
**एकत्र प्रतिषिद्धत्वाद्बहुष्वपि न सम्भवः॥ इति।**

**अथायमनर्थजः? कुतश्चिन्निमित्तात् कदाचिद्भवति, असन्नेव वा प्रतीयते, तद्वदितराकारोऽपि भविष्यति, असन्नेव वा प्रत्येष्यते, न चाकारवादे ज्ञानाकाराणां भ्रान्ताभ्रान्तत्वविवेकः सुगम इति निरूपितप्रायम्।**

[**टि०**] तदेव दर्शयति [1]**तस्मान्नार्थेन** इति। तस्मादिति अवयविवादोक्तदूषणोपसंहारः। उभयत्राप्याधारसप्तमी। एकत्र परमाणौ स्थूलात्मता तावन्नास्ति [2][ततो बहुष्वपि नास्ति]। यथैकत्र नीले पीताकारप्रतिभासाभावे बहुष्वपि नीलेषु न पीतप्रतिभासः। **अथायम्** इतिः-अयं ज्ञानस्य स्थूलाकारः, [3]इतराकारो नीलाद्याकारः। **निरूपितप्रायम्** इति-अस्यैव सङ्ख्याप्रकरणस्यादौ निरूपितम्, अर्थस्य परोक्षत्वात्। **हेतुत्वसादृश्ययोः** इतिः-यदा वह्निधूमयोर्द्वयोरपि ग्रहणं भवति तदैवायमस्य [4]कारणमयमस्य सदृश इति ज्ञायते, ततश्चानुमानं प्रवर्तते, न चैवं प्रकृते अर्थस्याप्रत्यक्षत्वात्।

[**पं०**] शब्दार्थयोरविद्यमानत्वाद्वाच्यवाचकभावपरिकल्पनमुत्प्रेक्षा। **स्वव्यापारमिति** (कं. १२५.३) निर्विकल्पकव्यापारम्। **कारणाभावादिति** (कं.१२५.५) विकल्पस्य हि प्रत्यक्षप्रवृत्तिकारणम्। **तत्किमिदानीं स्थूलाकारस्य समर्पकोऽप्यर्थो बहिरस्तीति** (कं. १२५.६) [बा]ह्यो?ऽर्थः न च [5]भवताऽपीष्येते स्वलक्षणमात्राङ्गीकारादित्यर्थः। बहिरस्तीत्यस्माच्च पुरो यद्यस्ति तर्हीत्यध्याहार्यम्। **अस्य वचनस्येति** (कं. १२५.७) अग्रेतनकारिकारूपस्य **धर्मकीर्तिवचसः** तदात्मन इति। **एकत्र प्रतिषिद्धत्वादिति** (कं. १२५.८) अनेन सम्बन्धः। तदात्मन इति स्थूलात्मकतायाः। **एकत्रेति** परमाणौ।। **बहुष्वपीति**(क. १२५.८) परमाणुषु।

परवाक्यम्-**अथायमित्यादि** (कं. १२५.८) अत्र ज्ञानस्य स्थूलाकारः। **कुतश्चिन्निमित्तादिति** (कं. १२५.८) वासनामात्रात्। सूरिराह **तद्वदितराकारोपीति** (कं. १२५.९) नीला......(नीलाद्याकारोपीति पाठः)। **न चाकारवादे ज्ञानाकाराणां भ्रान्ताभ्रान्तत्वविवेका सुगम** इति (कं. १२५.१०) स्थूलं भ्रान्तं नीलादि चाभ्रान्तमिति विवेको दुर्घटः स्यादुभयत्राप्याकारस्य भावादित्यर्थः। **इति निरूपितप्रायमिति** (कं. १२५:११) सङ्ख्याप्रकरणस्यादौ निरूपितम्। [6]अर्थस्य परोक्षत्वादिति।

[**कु०**] **किन्त्वेति** (कं. १२५.११) इह कल्पनं तावदनुमानं तच्च सम्बन्धग्रहणाधीनम्, सम्बन्धग्रहणं च [7]**सबन्धग्रहणाधीनमिति** भावः। एवं परकीयस्य ग्राह्यलक्षणस्य दूषणमुपसंहरन् स्वमतं साधयितुमुपक्रमते **तदेवमिति** (कं. १२५.१४)।

---

१ तस्मान्नर्थेन-अ। २ [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति। ३ इतराद्याकारो-अ, ब, क; ४ कारणमस्य-अ, ब; ५ भावतीपीष्यते-पञ्जिका-सं। ६ प्रतीकमिदं कं. १, कं. २ पुस्तकयोर्नास्ति। ७ पुनरावर्तितमिदं भाति-सं।

## न्यायकन्दली

किञ्च, तदानीं बोधाकारः सदृशमर्थं कारणं कल्पयति, यदि यादृशो बोधाकारस्तादृश [1]एवार्थस्तस्य कारणमित्यवगतम् । न चार्थस्यासंवेद्यत्वे तथा प्रतीतिः संभवति, हेतुत्वसादृश्ययोर्विनिश्चयस्योभयग्रहणाधीनत्वादिति नाकारादर्थसिद्धिः । तदेवं न हेतुत्वं ग्राह्यलक्षणं नाप्याकारार्पणक्षमस्य हेतुत्वम्, तस्माद् ग्राह्यलक्षणाभावाद् बुद्धेरन्योऽनुभाव्यो नास्तीति साधूक्तम् ।

इतोऽपि बुद्धिव्यतिरिक्तोऽर्थो नास्ति, यद्यसौ जडो न स्वयं प्रकाशेत । [2]न च तस्य प्रकाशकान्तरमुपलभामहे, सर्वदैवैकस्यैवाकारस्योपलम्भात् । अथास्ति प्रकाशम्,

[टि०] एवमुभयमतं निराकृत्य योगाचारः स्वयं पूर्वोक्त ग्राह्यलक्षणाभावादित्येतत्क्रमेण **वैभाषिकं सौत्रान्तिकं च** प्रति व्यवस्थापयन्नुपसंहरति **तदेवं न हेतुत्वम्** इत्यादि । यो हेतुः स ग्राह्य इति – **वैभाषिक**प्रतिपादितग्राह्यलक्षणमतीतानागतार्थग्रहणादव्यापकम् । [3][इन्द्रियसमनन्तर[4]प्रत्ययाभ्याम[ति]व्यापकम् ।] **सौत्रान्तिका**भिमतमाकारा[5]र्पणक्षणस्य सतो यद्हेतुत्वं तद्ग्राह्यलक्षणमित्येतदपि [6]न, अर्थस्याप्रत्यक्षत्वेन ज्ञानार्थकारयोः कार्यकारणभावानवधारणादर्थस्याप्रामाण्यप्रसङ्गात् । [7]**सर्वदैवैकस्य** इति एकस्य घट इत्याकारस्य । **न** [8]**तत्स्वयम्** इति तेन स्वयमप्रकाशमानेनाप्रकाशस्वभावो [9]विषयोऽपि न प्रकाश्येत यथा घटो जडरूपेण परान्तरेणेत्यर्थः ।

[पं०] **किं च तदानीमि**त्यत्र (कं. १२५.११) गद्ये काक्वाख्या । **इत्यवगतमिति** (कं. १२५.१२) अस्मात्पुरः स्यादिति क्रियाऽध्याहार्या । **न चार्थस्यासंवेद्यत्वे तथाप्रतीतिः सम्भवतीति** (कं. १२५.१२) यदि हि अर्थः संवेद्यः स्यात्तदा कल्प्येत यत् अयं बोधाकारोऽस्यार्थस्य सदृशोऽयं वाऽनेन जनित इति, न चैवम् अर्थस्य प्रत्यक्षत्वादिति वाक्यार्थः । तथा प्रतीतिरिति कारणप्रतीतिः सदृशप्रतीतिश्च । **हेतुत्वसादृश्ययोर्विनिश्चयस्योभयग्रहणाधीनत्वादिति** (कं. १२५.१३) यदा वह्निधूमयोर्द्वयोरपि ग्रहणं भवति तदैवायमस्य कारणम्, अयमस्य सदृश इति ज्ञायते ततश्चानु ना(मा)नं प्रवर्तते न चैवं प्रकृतेऽर्थे [त]स्याप्रत्यक्षत्वादित्यर्थः । **अन्योनुभाव्यो नास्तीति साधूक्तमिति** (कं. १२५.१५) नान्योनुभावो(व्यो) बुद्ध्यास्ति तस्यानानुभावो(व्यो)ऽपरः ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशते इत्येतत् सुष्ठूक्तमित्यर्थः ।

**इतोऽपीति** (कं. १२५.१६) वक्ष्यमाणादपि हेतोः । **असौ इति** (कं. १२५.१६) अर्थः । **प्रकाशकान्तर** (कं. १२५.१७) मित्यस्य स्थाने प्रकाशान्तरमिति पाठः क्वचिद्दृश्यते तत्र ज्ञानान्तरमित्यर्थः । **एकस्यैवाकारस्येति**

[कु०]बुद्धिव्यतिरेकोऽर्थस्य सदातनो वा कादाचित्को वा नाद्य इत्याह **यद्यसावपि** [इति] (कं. १२५.१६) । स्वयं प्रकाशे जडत्वव्याघातादिति भावः । न द्वितीय इत्याह **न चेति** (कं. १२५.१६) । **सर्वदेति** (कं. १२५.१७) प्रतीयमानप्रकाशात्मकत्वव्यतिरेकेण कादाचित्कत्वस्य जडत्वस्यानुपलम्भादित्यर्थः । ननु सर्वदा जडोऽपि प्रकाशात्मकस्य

---

१ एवाकारस्य-कं. १; कं. २ । २ न चैतस्य–जे. १; जे. २ । ३ [ ] एतच्चिह्नान्तर्गतः पाठः डपुस्तके नास्ति । ४ प्रत्ययभ्योमभ्या एकं–अ, प्रत्ययाभ्यामभ्या एकं–ब; ५ रर्पण–अ; ६ 'न' इति अबकपुस्तकेषु नास्ति । ७ सर्वदेतकस्येति – अ, ब; ८ न तश्चयमिति – अ; ९ विषयेत न–अ, ब;

## न्यायकन्दली

**न तत्स्वयमप्रकाशमानमप्रकाशस्वभावं विषयमपि प्रकाशयेत् । यदव्यक्तप्रकाशं तदव्यक्तम्, यथा कुड्याद्दिव्यवहितं वस्तु, अव्यक्तप्रकाशश्च परस्य बाह्योऽर्थः । तथा यत्परस्य प्रकाशकं तत्स्वप्रकाशे सजातीयपरानपेक्षम्, यथा प्रदीपः, प्रकाशकं च परस्य ज्ञानमिति । अतः प्रकाशमानस्यैव बोधस्य विषयप्रकाशकत्वमिति न्यायादनपेतम् । तथा सति सहोपलम्भ-नियमात् [1]सच्चन्द्रासच्चन्द्रयोरिव वेद्यवेदकयोरभेदः, [2]भेदस्य हि सहोपलम्भानियमो व्यापको नीलपीतयोर्युगपदुपलम्भनियमाभावात् । सहोपलम्भानियमविरुद्धश्च सहोपलम्भ-नियम इति व्यापकविरुद्धोपलब्ध्या भेदादनियमव्याप्त्या व्यावर्तमानो नियमोऽभेदे व्यवतिष्ठत इति प्रतिबन्धसिद्धिः । न च 'सह' शब्दस्य साहाय्यं यौगपद्यं वार्थः, तयोश्च**

[**ठि०**] एवं विज्ञप्तिसिद्धौ बाह्य ([3]वस्त्वभाव)वादी केवलविज्ञानवादी **योगाचारः** प्रथमं विषयं ततो ज्ञानं पक्षीकृत्या-[4]नुमानयति **यदव्यक्तप्रकाशम्** इत्यादिः । अव्यक्तोऽस्वसंवेदनरूपः प्रकाशो ज्ञानं यस्य ग्राह्यस्य । यद्विषयं [5]ज्ञानं स्वसंवेदनं न भवति सोऽर्थोऽप्रत्यक्ष इति भावः । [6]कुड्यादिव्यवहिते वस्तुनि प्रतिभासस्यैवाभावादव्यक्तप्रकाशत्वम् । **परस्य** इति ज्ञानासंवेदनतावादिनो **वैशेषिकस्य** इत्यर्थः । [7]**वैभाषिकादीनां** तु स्वसंवेदनस्य सिद्धत्वात् ।

एवं [8]स्वसंवेदनासिद्धौ [9]बाह्यार्थेन ज्ञानस्याभेदं साधयति **तथा सति** इति – यद्येन सह नियमेनोपलभ्यते [10]तत्ततो न भिद्यते यथा सच्चन्द्रादसच्चन्द्रः । नियमेनोपलभ्यते [11]च ज्ञानेन सहार्थं इति व्यापकानुपलब्धिः । [12][व्यापकानुप-

[**पं०**] (कं. १२५.१७) घट इत्याकारस्य । **प्रकाशक**मिति (कं. १२५.१८) ज्ञानम् । **न तत्स्वयमप्रकाशमानमप्रकाश-स्वभावं विषयमपि प्रकाशये**दिति (कं. १२५.१८) वैशेषिकाणां ज्ञानस्यासंवेदितत्वात् न, तेन स्वयमप्रकाशमानेन अप्रकाशस्वभावो विषयोऽपि प्रकाश्यते यथा जडरूपो घटो ब(ज)डरूपेण घटान्तरेणेत्यर्थः । **यदव्यक्तप्रकाशं तदव्यक्त**मिति (कं. १२५.१८) यस्य वस्तुनः स्वप्रकाशकाले प्रकाशकं ज्ञानं न प्रकाशते तदव्यक्तप्रकाशमित्यर्थः अव्यक्तोऽस्वसंवेदनरूपः प्रकाशो ज्ञानं यस्य ग्राह्यस्य । यद्विषयं विज्ञानं स्वसंवेदनं न भवति सोऽर्थोऽप्रत्यक्ष इति भावः । **यथा कुड्यादिव्यवहितं वस्त्व**ति (कं. १२५.१९) दृष्टान्तः । अत्र प्रकाशस्यैवाभावादव्यक्तप्रकाशत्वं **परस्ये**ति (कं. १२५.१९) वैशेषिकस्य **यत्परस्य प्रकाशकं तत्स्वप्रकाशे सजातीयपरानपेक्ष**मिति (कं. १२५.२०) वैशेषिकाणां हि ईश्वरज्ञानादन्यदन्यज्ज्ञानं ज्ञानान्तरवेद्यमित्यभिप्रायः । **परस्ये**ति (कं. १२५.२१) ज्ञानास्वसवेदनताव[ा]दिनो वैशेषिकस्य । ज्ञानस्य स्वसंवेदनतासाधिता । अथ बाह्यार्थेन ज्ञानस्याभेदं साधयति **तथा सती**त्यादिना (कं. १२५.२२) सन्दर्भेण । यद्येन सह नियमेनोपलभ्यते तत्ततो न भिद्यते [य]था सच्चन्द्रादसच्चन्द्रः । नियमेनोपलभ्यते च सह अर्थ इति

[**कु०**] ज्ञानस्य विषयविभवात्प्रकाशत इत्याशङ्क्य दूषयति **अथे**ति (कं. १२५.१७)। तत्रानुपलम्भप्रसङ्गमाह **यदव्यक्त-प्रकाश**मिति (कं. १२५.१८) । प्रसङ्गविपर्ययमाह **तथे**ति (कं. १२५.२०) । चक्षुराद्यपेक्षप्रकाशमानोऽपि विपक्षो माभूदित्युक्तं **सजातीये**ति (कं. १२५.२०)। अस्तु ज्ञानं स्वयंप्रकाशे अर्थस्य तदव्यतिरेके किमायातमत आह

---

१ सर्वज्ञासर्वज्ञयोरिव–कं. १; कं. २ । २ भेदस्य–कं. १; कं. २ । ३ वस्तुभाव–अ, ब, क; ४ मानयन्ति–ड; ५ *विज्ञानं–ड;* ६ *कुड्यादिहिते–अ;* ७ *वैभाक्षिकादीनां–ड;* ८ *एव–ड;* ९ *बाह्यर्थेन–अ, ब;* १० *तत्तेन–अ;* ११ 'च' अबकपुस्तकेषु नास्ति । १२ [ ] एतच्चिह्नान्तर्गतः पाठः अपुस्तके नास्ति ।

### न्यायकन्दली

**भेदेन व्याप्तत्वाद्विरुद्ध इति वाच्यम्, आभिमानिकस्य सहभावस्य हेतुविशेषणत्वेनोपादानात् दृष्टान्ते द्विचन्द्रे आभिमानिकः सहभावो न तात्त्विकः, चन्द्रस्यैकत्वात्। सार्वज्ञ्यवित्तक्षणः स्वेनात्मना सह सर्वान् प्राणिनो युगप[1]दुपलभते। न च तेषां [2]सर्वज्ञादभेद इत्यनैकान्तिकत्वमिति चेत्? न, अनियमात्। क्षणाभिप्रायेण तावद्ययोः सहोपलम्भस्तयोरसौ नियत एव, [3]क्षणिकयोः प्रत्येकं [4]पुनरनुपलम्भात्। किन्तु स न विवक्षितः सन्तानाभिप्रायेण [5]सहोपलम्भनियमो हेत्वर्थः। न च सर्वज्ञसन्तानस्य चित्तान्तरसन्तानेन सह युगपदुपलम्भोऽस्ति, सर्वज्ञस्य कदाचित् स्वात्ममात्रप्रतिष्ठस्यापि सम्भवात्। न च [6]तदानीमयम सर्वज्ञः, [7]सर्वज्ञानसामर्थ्यसम्भवात्।**

[**टि०**] लब्धिः। [8]‘व्यापकानुपलब्धिमेव] स्फुटयति **भेदस्य हि**[9] इत्यादि। प्रतिषेधस्य ज्ञानार्थयोर्भेदस्य [10]व्यापकः सहोपलम्भानियमः [11][तस्य विरुद्धः सहोपलम्भनियमः] तस्योपलब्धिः, तथा। **सहशब्दस्य** इति:--सहार्थो हि तुल्ययोगो विद्यमानता च। [12]तत्र [13]तुल्ययोगे यत्रैकस्य प्राधान्यमपरस्य गौणत्वं तत्र साहाय्यं यथा देवदत्तेन सहागतः। यत्र तु द्वयोरपि प्राधान्यं तत्र यौगपद्यं यथा चैत्रमैत्रौ[14]सहायातौ। **सर्वान् प्राणिन** इति अस्मदादिविज्ञानक्षणान्। [15]**क्षणिकयोः**

[**पं०**] व्यापकानुपलब्धिः। तामेव स्फुटयति **भेदस्य** **हीत्यादि** (कं. १२५.२३) गद्येन। प्रतिषेध्यस्य ज्ञानार्थयोर्भेदस्य व्यापकः सहोपलम्भानियमः, [16]तस्य विरुद्धः सहोपलम्भानियमः, तस्य विरुद्धः सहोपलम्भनियमः, तस्योपलब्धिः तयोः। शेषं गद्यं सुगमम्। [17]न वरं **प्रतिबन्धसिद्धिरिति** (कं. १२५.२६) अन्वयसिद्धिः **सहशब्दस्य साहाय्यं यौगपद्यं वार्थः** (कं. १२५.२६) इति। साहाय्यं यथा पुत्रेण सहागतः। यौगपद्यं यथा चैत्रमैत्रौ सहायातौ। **आभिमानिकस्येति** (कं. १२६.१) यतो न पारमार्थिकोऽस्ति अर्थः किन्तु ज्ञानमेवैकम्। अतः सहभावस्यानेकस्मितिषु? त्वादेकस्मिन्नसौ आभिमानिक एवेति भावना। **सार्वज्ञ्यश्चित्तक्षण स्वेनात्मना सह सर्वान् प्राणिनो युगपदुपलभते** इति (कं. १२६.३) सार्वज्ञ्यश्चित्तक्षणः इति ज्ञानक्षणः कर्ता। स्वेनात्मना सहेति स्वरूपेण सह। सर्वान् अपि इति अस्मदादिज्ञानक्षणान्;

[**कु०**] [18]**तथा चेति** (क १२५.२२)। व्यतिरेकसाधकस्य सहोपलम्भस्य व्याप्तिं साधयति **भेदस्य**[19]**हीति** (कं. १२५.२३)। **सह शब्दस्येति** (कं. १२५.२६) साहाय्ये 'सह' शब्दो यथा महानद्या सह कुल्या समुद्रमुपसर्पतीति यौगपद्ये सह शब्दे यथा पुत्रेण सह भुङ्क्त इति।

---

१ दुपलभ्यते–कं. १; कं. २। २ सार्वज्ञज्ञानाभेद–कं. १, कं. २। ३ क्षणयोः–कं. १, कं. २। ४ पुनरनुपलम्भाभावात्–जे. १; जे. २। ५ सहोपलम्भनियमः–कं. १; कं. २। ६ तदानीमसर्वज्ञः–कं. १; कं. २। ७ सर्वज्ञात्–कं. १; कं. २। ८ [ ] एतच्चिह्नान्तर्गतः पाठः अपुस्तके नास्ति। ९ 'हि' अपुस्तके नास्ति–जे. १, जे. ३ इत्यत्रास्ति। १० व्यापक–अ, ब, क; ११ [ ] एतच्चिह्नान्तर्गतः पाठः अब पुस्तकयोर्नास्ति। १२ तु–अ; १३ तुल्ययोगे–अ, ब, १४ सहायतो–अ, ब; १५ क्षणयोः–मु, किन्तु क्षणिकयोः इति–जे. १, जे. ३, इत्यत्र; १६ तस्य विरुद्धः सहोपलम्भानियमः–इति पुनरावृत्तं भाति–सं। १७ 'न वरं' इति मुद्रितकन्दल्यां नास्ति–सं। १८ तथा च–कं। १९ हि कन्दल्यां नास्ति।

न्यायकन्दली

अपचन्नपि पाचको यथा, तथा यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते, यथात्मा ज्ञानस्य, वेद्यन्ते च नीलादयः। भेदे हि ज्ञानेनास्य वेद्यत्वं न स्यात्, तादात्म्यस्य नियमहेतोरभावात्, तदुत्पत्तेरनियामकत्वात्। अन्येनान्यस्यासम्बद्धस्य वेद्यत्वे चातिप्रसङ्गादिति भेदे नियमहेतोः सम्बन्धस्य व्यापकस्यानुपलब्ध्या भेदाद्विपक्षाद् व्यावर्तमानं वेद्यत्वमभेदेन व्याप्यत इति हेतोः [1]प्रतिबन्धसिद्धिरिति। एतेनाहमित्याकारस्यापि ज्ञानादभेदः समर्थितः। यश्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिश्चन्द्रमसि द्वित्वावभास इव भ्रमः। तत्रा[2]प्यनादिरविच्छिन्नप्रवाहाभेदवासनैव निमित्तम्। यथोक्तम्—

"[3]भेदश्चभ्रान्तविज्ञाने दृश्येतेन्दाविवाद्वये" इति।

[टि०] इति :– सर्वज्ञ[4]ज्ञानक्षण उपलम्भकोऽस्मदादि[5]ज्ञानक्षणश्च यो ग्राह्यस्तयोः सहोपलम्भानन्तरं [6]विनाशान्नियतः सहोपलम्भोऽस्त्येव। एवं नीलपीतादिक्षणेष्वपि समानम्। ननु रूपेण सह द्रव्यस्य नियमेनोपलम्भो वैशेषिकैरभ्युपगम्यते [7][न त्वभेद इति व्याप्तिरन्यतरा[8]सिद्धा? नैवम् तैरपि [9]बुद्धेर्बुद्ध्यन्तरेण सहोत्पादानभ्युपगमात् द्रव्यगुणयोः सहोपलम्भानभ्युपगमात्]।

[पं०] युगपदुपलभते स्वसंविदितत्वात् सर्वज्ञज्ञानक्षणस्वरूपमिव सर्वानपि अस्मदादि ज्ञानक्षणात् युगपज्जानातीति अर्थः। [10]**सार्वज्ञ्यादिति** (कं. १२६.४) सार्वज्ञाचित्तक्षणात्। **अनियमादिति** (कं. १२६.४) नियमो हि तदा स्यात् यदैकदा सहोपलम्भो दृष्टः पुनरन्यदा दृश्यते न चैवम्, क्षणिकत्वात् सर्व[ज्ञ] ज्ञानस्येतरज्ञानेन सह कथंचि[दभे]दात् कथंचिद् भेदाच्च। एतदेवोपपादयन्नाह **क्षणाभिप्रायेणे**त्यादिना (कं. १२६.५)। **असौ** इति (कं. १२६.५) अभेदः। **नियत एवे**ति (कं. १२६.५) सर्वज्ञज्ञानक्षण उपलम्भको अस्मदादि[रि]ति ज्ञानक्षणश्च यो ग्राहस्तयोः सहोपलम्भानन्तरं विनाशान्नियतः सहोपलम्भोऽस्य; एवं नीलपीतादिक्षणेष्वपि समानम् [11]**क्षणयोरि**ति (कं. १२६.५) ग्राह्यग्राहकक्षणयोः। [12]**पुनरनुपलम्भादि**ति (कं. १२६.६) विनष्टत्वेन।

विज्ञानवाद्येवानुमानान्तरमाह **तथा यद्वेद्यते** इत्यादि (कं. १२६.९)। **आत्मे**ति (कं. १२६.१०) स्वरूपम्। **अस्ये**ति (कं. १२६.११) अर्थस्य। **तादात्म्यस्य नियमहेतोरभावादि**ति (कं. १२६.११) भेदाभ्युपगमे तादात्म्यासम्भवादित्याशयः। नियमहेतोरिति इदमस्य ग्राहकमिदमस्य ग्राह्यमिति नियमः। **सम्बन्धस्ये**ति (कं. १२६ १३) [13]तादात्म्यस्य। **एतेनाहमित्याका[र]स्यापि ज्ञानादभेदः समर्थित** इति (कं. १२६.१४) न पुनरात्माऽस्तीत्याशयः।

[कु०] **आभिमानिकस्ये**ति (कं. १२६.१) प्रतीतिमात्रमेव साधनाङ्गं न प्रमितिरिति भावः। ननु च पक्षे सहभावस्याभिमानिकत्वे साधनविकलो दृष्टान्त इत्यत आह **दृष्टान्त** इति (कं. १२६.२)। अन्यथा सर्वेषां सर्वज्ञत्वप्रसङ्गादिति भावः। **मा नियमादि**ति (कं. १२६.४) अनियमो नाम कादाचित्कपृथगुपलम्भनिषेधाय इत्यर्थः। ननु कादाचित्कत्वसहोपलम्भ एव हेत्वर्थः अस्माद्विवक्षित इत्यत आह **क्षणाभिप्रायेणे**ति (कं. १२६.५)। इह नीलपीतयोरपि

१ प्रतिबन्धसिद्धिः–जे. १; जे. २। २ अनाद्यविच्छिन्न–जे. ३। ३ भेदश्चाभ्रान्तिविज्ञाने दृश्येतेन्दाविव द्वये। ४, ५ ज्ञानलक्षण–अ, ब; ६ विनाशानियतः–अ, ब, क; ७ [ ] एतच्चिह्नान्तर्गतः पाठः डपुस्तके नास्ति। ८ सिद्धि–अ, ब; ९ युद्धेर्बुद्ध्यन्तरेण–ब; १० सार्वज्ञ्यज्ञानाभेदः–कं। ११ क्षणिकयोः–पं। १२ पुनरुपलम्भात्–पं। १३ एते तादात्म्यस्य इत्यधिकं पञ्जिकायामत्र दृश्यते निरर्थकत्वान्न स्थापितम्।

## न्यायकन्दली

ननु बाह्याभावे येयं [1]नीलाद्याकारा बुद्धिरुदेति तस्याः किं कारणम् ? यथोक्तम्–

अर्थबुद्धिस्तदाकारा सा [2]त्वाकारविशेषणा ।
सा बाह्यादन्यतो वेति विचारमिममर्हति ॥

अत्रापि वदन्ति–बाह्य[3]सद्भावे तस्याः किं कारणम् ? नीलादिरर्थं इति चेत् ? न तावदयं दृश्यतेऽर्थस्य सदातीन्द्रियत्वात् । कार्यवैचित्र्येण कल्पनीयश्चेत् ? दृश्यस्य समनन्तरप्रत्ययस्यैव शक्तिवैचित्र्यं कल्प्यताम्, येन स्वप्नज्ञानेऽप्याकारवैचित्र्यं घटते, नहि

[टि०] विज्ञानवाद्येवानुमानान्तरमाह [4]यद्येन वेदनेन इति:–यदिति ग्राह्यम् । विपक्षे बाधकमाह भेदे हि ज्ञानेन इति । वेद्यत्वाभावमेव स्पष्टयति तादात्म्यस्य इत्यादि । भेदाभ्युपगमे हि तादात्म्यासम्भवात् एवं भेदे सति[5]सम्बन्धाभावेन वेद्यत्वाभावं प्रासाध्य वेद्यत्वाभेदयोर्व्याप्तिं दृढयति भेदे नियमहेतोः इति । इदमस्य ग्राहकमिदमस्य ग्राह्यमिति नियमकारेण सम्बन्धेन वेद्यत्वं व्याप्तम् । ततो ग्राह्यगाहकयोर्भेदाभ्युपगमे सति स [6][सम्बन्धो निराकृत इति व्यापकस्य] सम्बन्धस्यानुपलब्ध्या वेद्यत्वं व्याप्यमपि भेदाद् व्यावृत्याऽभेदेऽवतिष्ठत इत्यर्थः ।

ननु घटमहं गृह्णामीत्यत्र वेद्यवेदकवित्तीनां भेदस्य प्रत्यक्षेणोप[7]लम्भादभेदसाधनं कालात्ययापदिष्ट[8]मित्याह यश्चायं ग्राह्यग्राहकेति :–भ्रान्तत्व चेदानीमेव बाह्यार्थस्य युक्त्या बाधितत्वात् । ननु द्विचन्द्रादिज्ञाने तिमिरादिदोषाद् भ्रान्तत्वं, नीलादिज्ञाने तु कथमित्याह [9]तत्राप्यनादिः इति । अद्वये इति–न विद्यते द्वयं द्वित्वं यत्र सत्यमार्गे ।

अत्रापि वदन्ति इति–[10]योगाचाराः सौत्रान्तिकान् प्रति वदन्तीति । [11]दृष्टस्य इति:–[12]दृष्टः स्वसंवेद्यत्वात् । नन्वेकमेवानेकाकारं किंवाऽनेकमेका[13]कारम् ? तत्राद्ये प्राह ज्ञानस्यैकत्वे इति । द्वितीये प्राह [14]प्रत्याकारं च इति ।

[पं०] ग्राह्यग्राहकसमितीनामिति (कं. १२६.१५) घटमहं गृह्णामीत्येवंरूपाणां ज्ञानानाम् । तत्रापीति (कं. १२६.१६) नीलादिज्ञाने । [15]अद्वये इति (कं. १२६.१६) द्वित्वरहिते सत्ये[क] इत्यर्थः । अर्थबुद्धिरिति (कं. १२६.१८) नीलादिज्ञानम् । तदाकारेति (कं. १२६.१८) तदाकारा सती । [16]स्वाकारविशेषिणीति (कं. १२६.१८) स्वाकारात् [चं]द्रानाकाम् व्यतिरेकिणा । बाह्यादिति (कं. १२६.१९) घटादेः । अन्यत इति (कं. १२६.१९) समनन्तरप्रत्ययात् ।

[कु०] कदाचित्सहोपलम्भदर्शनात्तद्–व्यवच्छित्तये नियमपदोपादानम् । तथा च कादाचित्कस्य सहोपलम्भस्य हेत्वर्थश्च व्यर्थविशेषणं स्यादित्यत आह तयोरसौ नियत एवेति (कं. १२६.५) व्यभिचारे हि विशेषणमर्थवत्त्वाच्कारकादाचित्कत्वयोः सोस्तीत्यर्थः । तदेतदाह [17]तयोः प्रत्येकमिति (कं. १२६.५) । मुख्यवृत्त्याऽनिष्टमाशङ्क्य गौणवृत्त्या परिहरति न चेति (कं. १२६.७) । सामर्थ्यसम्भवादिति (कं. १२६.९) सामर्थ्यं वासनाविशेषः । एवं ज्ञानस्य स्वयं

---

१ नीलाद्याकारवती–कं. १; कं. २ । २ चाकार–जे. ३ । ३ सद्भावेऽपि–कं. १; कं. २ । ४ येन वेदनेन–मु । ५ सम्बन्धत्वाभावेन–अ, ब, क; ६ [ ] एतच्चिह्नान्तर्गतः पाठः डपुस्तके नास्ति । ७ लम्भादसाधनं–अ, ब; ८ मित्याह तत्राप्यनादिरिति यश्चायं – अ; ९ तथाऽत्राप्यनादिः– मु. (१) पा. टि. । १० योचाराः–अ; ११ दृश्यस्य – मु. १२ दृष्टि – अ, ब; १३ काकारः – अ, ब, क । १४ प्राकारं – अ, ब; १५ द्वये – कं । १६ सा त्वाकारविशेषणा – कं । १७ क्षणयोः – कं ।

न्यायकन्दली

तत्र देशकालव्यवहितानामर्थानां सामर्थ्यम्, अविद्यमानत्वात्। नन्वेवं [1]चित्रप्रत्ययोऽपि न स्याज्ज्ञा[2]नस्यैकत्वे तदव्यतिरेकिणामप्येकत्वप्रसङ्गात्, प्रत्याकारं च ज्ञानभेदे ज्ञानानां प्रत्येकं स्वाकारमात्रनियतत्वात्, तेभ्यो [3]व्यतिरिक्तस्य च सर्वाकारग्राहकस्याभावात्।

[132] अत्र ब्रूमः—न तावच्चित्रं रूपं न प्रकाशते? संवित्तिविरोधात्। जडस्य च प्रकाशायोगः। तेनेदं [4]ज्ञानात्मकमेकमेव रूपम्, न [5]चाकारभेदाज् ज्ञानभेदः, चित्ररूपस्यैकस्याकारभेदाभावात्। यथा [6]नीलस्यैकस्यैको नीलस्वभाव आकार, तथा

[टि०] [132] **योगाचारः** समाधत्ते **अत्र ब्रूम** इति। नन्वेकत्रैव ज्ञाने स्थूले [7]कम्पाकम्पादिविरोधः इत्याह **कम्पाकम्पादीति**। बाह्ये तु स्थूले [8]नैवं कम्पाकम्पादिविरोधव्युदासः। तस्य सद्भावे यदनेकवृत्तीत्यादिबाधकोदयात्। केचिद् **योगाचाराः** अपरे तु **माध्यमिकाः**। येयमलीकता तदेव तत्त्वम्।

[पं०] **वदन्तीति** (कं. १२६.२०) योगाचारः सौत्रान्तिकान् प्रति। **तस्या** इति। (कं. १२६.२९) अर्थबुद्धेः। तस्या इत्यस्माच्च पुरः साकारस्य इति शेषः। ततश्च तस्याः साकारत्वे किं कारणमिति वाक्यं सिद्धां[तिनः]। **अर्थस्य** (कं. १२६.२१) परमाणुरूपस्य। **कार्यवैचित्र्येणेति** (कं. १२६.२१) घटादि वैचित्र्येण। [9]**दृष्टस्येति** (कं. १२६.२२) स्वासंवेद्यत्वात्। **समनन्तरप्रत्ययस्येति** (कं. १२६.२२) समो ज्ञानेन अव्यवहितत्वेन चानन्तरः प्रत्यय उत्तरज्ञानोत्पादकारणं पूर्वक्षणः समनन्तरप्रत्य समनन्तरप्रत्ययः, तस्य समनन्तरप्रत्ययस्य। **एवमिति** (कं. १२६.२४) समनन्तरप्रत्ययस्यैव शक्तिवैचित्र्यकल्पनायाम्। नन्वेकमेकाकारं किं वाऽनेकमेकाकारम्। तत्राद्येऽत्राह **ज्ञानस्यैकत्वे** इत्यादि (कं. १२६.२५)। द्वितीये **प्रत्यादि** (कं. १२६.२६)।

[132] **अत्र ब्रूम** इति (कं. १२७.१) वयं योगाचाराः। **जडस्य चेति** (कं. १२७.२) रूपं हि सर्वं जडम्। **इदमिति** (कं. १२७.२) चित्रं रूपम्। **तस्मिन्निति** (कं. १२७.४) चित्रे आकारे। [10]**अवयवीत्वेकः स्थूलो वा नोपपद्यते**

[कु०] प्रकाशतामवल(म्ब्य) विज्ञानार्थयोरभेदे सहोपलम्भनियमो हेतुः उक्तः। इदानीं तामेवावलम्ब्याह (अ)[11]**न्यतर(मिति)**। अत्रैवहि **तयेति** (कं. १२६.९)। [12]**वेद्यत्वमभेदेन व्याप्यत** इति (कं. १२६.१३) [एतेनेति] (कं. १२६.१४) साकारविज्ञानवादिनो व्यासार्थसाधनमाशङ्क्य परिहरति नन्वेवमिति (कं. १२६.२५)। किमयं [13]चित्र-प्रत्ययः प्रत्याकारं न भिद्यते वेति विकल्प्य क्रमेण दूषयति **ज्ञानस्यैकत्व** इति (कं. १२६.२५)।

[132] **यदि वा न प्रवर्तत एवेति** (कं. १२७.५) नोपपद्यत एवेत्यर्थः। न हि स्वयंप्रकाशवादे उत्पन्नस्य ज्ञानस्य आत्मभूते आकारे अप्रवृत्तिर्नाम। नन्वेवं तर्हि नीलपीतादय आकाराः चित्रप्रत्यये न सन्त्येत्याशङ्क्याङ्गीकारेण

१ विचित्र—कं. १; कं. २। २ स्यैकत्वेन—कं. १, कं. २। ३ व्यतिरिक्तस्य सर्वाकार—कं. १; कं. २। ४ ज्ञानात्मकमेव—कं. १, कं. २। ५ भेदेन—कं. १, कं. २। ६ नीलस्यैको—कं. १, कं. २। ७ कम्पादिविरोध—अ; ८ नैव—अ, ब, क; ९ दृश्यस्य—कं। १० नमुयव्यवयवी एकः स्थूलो नेपपते न्यूनावयववृत्तित्वेन इति पञ्जिकायामशुद्धः पाठः—सं.। ११ पाठोऽयं कं. इत्यत्र नास्ति। १२ वेद्यस्य वदनसदित्याप्यदिति इति पाठः ह. लि. पुस्तके अशुद्धो भाति—सं। १३ विचित्र इति कंपुस्तके।

## न्यायकन्दली

[1]चित्रस्यैकस्य चित्रस्वभाव [2]आकारः। तस्मिंश्चात्मभूते [3]ज्ञानं प्रवर्तमानं कृत्स्न एव प्रवर्तते, यदि वा न प्रवर्तत एव। न तु भागेन [4]प्रवर्तते, तस्य निर्भागत्वात्। ये त्वमी भागाः परस्परविविक्ताः प्रतिभान्ति, न ते चित्रं रूपमिति न काचिदनुपपत्तिः। स्थूलाकारोऽप्यनयैव दिशा समर्थनीयः। अवयवी त्वेकः स्थूलो वा नोपपद्यते, नानावयववृत्तित्वेन तस्य नानात्वापातात्। ज्ञानाकारस्त्वेकस्मिन् ज्ञाने वर्तमान एकः स्थूलो भवत्येव। कम्पाकम्पादिविरोधस्तु [5]संविद्विरोधात् पर्युदसनीय इति केचित्।

अपरे तु ज्ञानाकारस्याप्यनादिवासनावशेन प्रतिभासमानस्य विचाराक्षमत्वमलीकत्वमेव तत्त्वमाहुः। तथा च यः प्रत्ययः स बाह्यानालम्बनो यथा स्वप्नादिप्रत्ययः, [6]प्रत्ययश्चायं जाग्रतः स्तम्भादिप्रत्ययः, निरालम्बनता हि [7]प्रत्ययस्य तन्मात्रानुबन्धिनी

[टि०] ननु संवृत्तिमात्रेणापारमार्थिकेन [8]कथं पारमार्थिकस्यार्थस्य सिद्धिरित्याह **दृष्टा हि** इति **बाह्यार्थबाधाह** [9]**रेखादयोऽपि** इति। माध्यमिकः परिहरति सत्यं [10][सत्या इति।

[पं०] **नानावयववृत्तित्वेन तस्य नानात्वापातात्; ज्ञानाकारस्त्वेकस्मिन् ज्ञाने वर्तमान एकः स्थूलो भवतीति** (कं. १२७.८) चोद्यते तदकम्पकम्पादिभिर्विरोधः। अवयवी हि द(दे)शात् कम्पते न तु ज्ञानं कम्पते। अवयवी च जलहरण वाहदोहादिक्रियायामुपयुज्यते न तु ज्ञानम् इति परोत्पादितविरोधमाशङ्क्याह [11]**कम्पादिविरोधस्तु संविद्विरोधाद्व्युदसनीय इति केचिदित्यादि** (कं. १२७.१०)। **संविद् विरोधादिति** यदानेकमूर्ति तदाऽनेकं यथानेकभाजनगतं

[कु०] [12]**ये त्वमी** इति (कं. १२७.६) एवं चाकाराश्चित्रप्रत्ययोत्तरभाविज्ञानानामित्यनुसन्धेयम्। अनयैव दिशा ज्ञानाकारतया बाह्यवादिभिरप्येवमेव स्थूलाकारः समर्थनीयः। रूपादिस्वलक्षणान्तं परमसूक्ष्मत्वादित्याह **अवयवीति** (कं. १२७.८)। संविद्विरोधात्–कम्पते, न कम्पत इत्यादि प्रत्ययानां परस्परं भेदादित्यर्थः।

साकारविज्ञानवादिमतेन बाह्याभावं प्रसाध्य माध्यमिकमतेन ज्ञानाकारस्याप्यलीकत्वमाह **अपरे** त्विति (कं. १२७.१०)। **स बाह्यालम्बन** इति (कं. १२७.१२) विचाराक्षमालम्बन इत्यर्थः। दृष्टान्तेऽप्योलम्बनं विचारं

---

१ वैचित्र्यस्य–कं. १, कं. २। २ एकाकारः–कं. १, कं. २। ३ ज्ञानं कृत्स्न एव–जे. १; जे. २। ४ वर्तते –जे. १, जे. २। ५ संविद्विरोधो व्युदसनीय–कं. १, कं. २। ६ प्रत्ययश्च–जे. १, जे. २। ७ प्रत्ययत्वमात्रा –कं. १, कं. २। ८ द्वयं–ड; ९ रेखाद्वयो–अ; १० [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति। ११ कम्पाकम्पादिविरोधस्तु संविद्विरोधो व्युदयनीय इति केचित्–कं। १२ एत्वमा इति–ह. लि. पुस्तके।

न्यायकन्दली

स्वप्नादिषु दृष्टा, जाग्रतः प्रत्ययस्यापि प्रत्ययत्वमेव स्वभावः, स यदि निरालम्बनत्वं परित्यजति तदा स्वभावमेव परित्यजेत्। ननु सर्वप्रत्ययानामनालम्बनत्वे धर्मिहेतुदृष्टान्तादिप्रत्ययानामनालम्बनत्वम्, ततश्च [1]धर्मिहेतुत्वाद्यभावान्नानुमानप्रवृत्तिः। अथ ते सालम्बनास्तैरेवास्य हेतोर्व्यभिचारः? नैवम्, [2]तेषां परमार्थतो बहिरनालम्बनानां संवृत्तिमात्रेणानुमानप्रवृत्तिहेतुत्वात्। दृष्टा [3]ह्यविद्यातोऽपि विद्याप्राप्तिः, यथा लिप्यक्षरेभ्यो वर्णप्रतीतिः, वर्णप्रतिपादकरेखादयोऽपि स्वरूपेण सत्याः। सत्यं सत्याः, न तु [4]ते स्वरूपेण प्रतिपादकाः। ककारादिरूपाध्यारोपेण प्रतिपादकाः, तदेषां कार्यो[5]पयोगिरूपमसत्यमेवेति पूर्वपक्षसंक्षेपः।

[133] यत्तावदुक्तं ग्राह्यलक्षणायोगादिति न तदर्थाभाव[6]साधनमसामर्थ्यात्, ग्राह्यलक्षणाभावे ह्यर्थो ग्राह्यो न भवेन्न तु तस्यासद्भावः, ग्रहणाभावस्य पिशाचादिवत्

[टि०] [133] अथ स्वयं [7]विज्ञानवादिनं दूषयति यत्तावदुक्तम् इत्यादि। बाह्यार्थवादिना हि 'पूर्वं यद्ग्राह्यलक्षणरहितं तन्नास्ति यथा शशविषाणं ग्राह्यलक्षणं च] [8]'नीलादिकं' इति प्रमाणं सूचितम्, तच्च नाश्रयासिद्धं

[पं०] तालफलमिति। अवयविबाधकप्रमाणोदयादिति भावार्थः। केचिदिति ज्ञानवादिनो योगाचाराः। अपरे त्विति (कं. १२७.१०) स्वच्छसंविद्वादिनोऽसख्यातिवादिनो वा बौद्धविशेषाः। जाग्रतः प्रत्ययस्येति (कं. १२७.१४) जाग्रत्पुरुषसत्कस्य। संवृत्तिमात्रेणेति (कं. १२७.१८) अनिरूपितत्वाद्यभ्रितीति दप्रतीतिः? संवृत्तिर्म्मता। बाह्यार्थवादी पृच्छति द(ै[9]व)र्णप्रतिपादका (कं. १२७.१९) इत्यादि। सूरि उत्तरयति सत्यमित्यादिना (कं. १२७.२०) पूर्वपक्षः समर्थितः॥

[133] अथ स्वयं विज्ञानवादिनं श्रीधरो दूषयति यत्तावदुक्त (कं. १२७.२१)मित्यादिना। तस्येति (कं. १२७.२३) अर्थस्य। स्वात्ममात्रनियतमिति (कं. १२७.२६) त्वन्मते इति ज्ञेयम्। तदन्यस्येति (कं. १२७.२६) ज्ञानादन्यस्यार्थ-

[कु०] न क्षमते। न तावत्तत्सत् बाधात्, नाप्यसत् प्रतीतेः, नाप्युभयं विरोधादिति भावः। निरालम्बनता–विचाराक्षमालम्बनतेत्यर्थः। संवृत्तिमात्रेणेति (कं. १२७.१८) अनादिमिथ्यावासनं वृत्तिः। स्वेन रूपेण ज्ञानस्य संवरणात् चोदयति–[10]"वर्णप्रतिपादका इति (कं. १२७.१९)। परेषां रेखादेः सत्यत्वादिति भावः। परिहरति सत्यमिति (कं. १२७.२०) किञ्च ककारादिरूपाध्यारोपेणेति (कं. १२७.२०) यद्यप्यनया रेखयाऽयं वर्णो ज्ञाप्यत इति सङ्केतिता रेखा वर्णं प्रतिपादयति तथापि लौकिकानां प्रतीतिराशुतरभाविनी नैतावन्तं विचारमपेक्षत इति भावः।

१ धर्मिहेत्वा–कं. १, कं. २। २ तेषां बहिरनालम्बनानां–कं. १; कं. २। ३ ह्यविद्यातो विद्याप्राप्तिः–कं. १, कं. २। ४ तेन रूपेण–कं. १; कं. २। ५ पयोगित्वम्–कं. १; कं. २। ६ साधनसमर्थम्, ग्राह्यलक्षणो–कं. १; कं. २। ७ ज्ञानवादिनं–क; ८ सलादिकमिति–अ, ब; नीलादिकम्–ड; ९ वर्णप्रतिपादकं–कं। १० वर्णप्रतिपादक...कं।

## न्यायकन्दली

**स्वरूपविप्रकर्षेणाप्युपपत्तेः। ग्रहण[1]योग्यत्वे सत्यग्रहणादभावसिद्धिरिति चेत्? कथं पुनरस्य योग्यता संप्रधारिता? नहि तस्य ग्रहणं [2]क्वचिदवगतम्, अवगतं चेन्न ग्राह्यलक्षणायोगः। किञ्च, ग्राहकाधीनं ग्रहणम्, ग्राहकं च ज्ञानं स्वात्ममात्रनियतमित्येतावतैव तदन्यस्याग्राह्यता, ग्राह्याभावादेव चेदमग्रहणमिति साध्याविशिष्टम्। अपि चेदं भवान् पृष्टो व्याचष्टां का ज्ञानाकारस्य ग्राह्यता? नहि तस्यास्ति ज्ञानहेतुत्वं तदव्यतिरेकात्। नाप्याकाराधायकत्वम्, आकारद्वयाननुभवात्। न च [3]ज्ञानात्मकत्वमेव**

[टि०] प्रामाणिकाप्रामाणिकत्वाविवेकेन प्रतीतिसिद्धस्यैव पक्षस्य बौद्धैरभ्युपगमात्। अन्तस्तस्य ग्राह्यलक्षणत्वादिति हेतोः सन्दिग्धानैकान्तिकत्वमापादयन्नाह **तदर्थाभाव**[4]साधनमिति। वैशेषिकाणामन्यथासिद्धिरियं स्वभावविप्रकर्षेणाप्यग्राह्यत्वस्य सिद्धत्वात्। न ह्यग्राह्यत्वमात्रं हेतुः किन्तु ग्रहणयोग्यत्वे सति [5]अग्राह्यत्वमित्याह [6]**ग्रहणयोग्यत्वे** इति।

[पं०] स्येत्यर्थः। **साध्याविशिष्टमिति** (कं. १२७.२७) यथा नित्यः शब्दोऽनित्यत्वादित्यत्र पक्षवत् हेतुरप्यसिद्धस्तद्वदत्रापि। यथा ग्राहभावाख्यापक्षोऽसिद्धस्तथा हेतुरप्यसिद्धः तस्मात् सादृश्या विशिष्टाख्यं साधनाभासमेतदित्यर्थः। स(त्) **दव्यतिरेकादिति** (कं. १२८.१) ज्ञानाव्यतिरेकात्। **नाप्याकाराधायकत्वमिति** (कं. १२८.२) आकारेणाप्यपरो ज्ञाने आकार आधीयते इत्यपि नास्तीत्यर्थः। **आकारद्वयाननुभवादिति** (कं. १२८.२) आकारद्वयमाधाराधेयकलक्षणम्।

[कु०] [133] कृता च ज्ञानं निर्विषयमिति प्रतिज्ञा मम माता **वद्व्येति** (वंन्ध्येति) वद्धान्मानसविसंवादादुपेक्षणीया। तथाहि विषयविशेषज्ञानमुत्पिपादयिषुर्वाच्यमुपाददीति, विषयाभावे तदुपादानं निरुपपत्तिकम्, न च निर्विषयत्वज्ञानस्योत्पादनाय वाक्यविशेषोभिति साम्प्रतं ज्ञानस्य स्वगत-विशेषाभावेन ज्ञानं निर्विषयमिति च ज्ञानं सविषयमित्यस्यापि वाक्यस्य ज्ञानमात्रोत्पादनप्रसङ्गात्। किं च न वाक्यं सत्तया ज्ञानकारणं अ(न्य)थैतो ज्ञानुत्पत्तेः तस्माच्छ्रोत्रजन्यं ज्ञानं स विषयमित्यस्यापि ज्ञदु(यद्यु)पादत्ते यद्यपि तथापि हेतुदूषणमपि वक्तव्यमित्याह **यत्तावदिति** (कं. १२७.२१)। इह ग्राह्यलक्षणायोगो ग्रहणाभावाद्वा सम्बन्धाभावाद्वा? नाद्य इत्याह **न तदर्थाभावेति** (कं. १२७.२२)। अथ साध्याभावे साध्ये अनुपलब्धिमात्रमप्रयोजकमित्यर्थः। विशेषणमाशङ्कते [7]**ग्रहणयोग्ये सतीति** (कं. १२७.२३)। इह हि योग्यता कार्योपहितं स्वरूपं वा स[ह]कारिसाकल्यं वा? तदुभयमपि कार्येणैवंकोनेय तदभावेन सिद्ध्यति।

---

१ योग्ये–कं. १; कं. २। २ क्वचिदभूत्, भूतं–कं. १, कं. २। ३ ज्ञानात्मत्वमेव–जे. १, जे. २। ४ साधनसमर्थम् मु. साधनं–जे. १, जे. ३। ५ अग्राह्य चं–अ; ६ ग्रहणयोग्ये–अ, ब, मु. ग्रहणयोग्यत्वे–जे. १, जे ३। ७ ग्रहणायोग्यत्वे–इ. लि.।

## न्यायकन्दली

ग्राह्यत्वम्, सुषुप्तावस्थायां [1]ज्ञानात्मवदनुभूतस्यावश्यं ज्ञानसन्तानवदनुवर्तमानस्यापि ग्रहणाभावात् । अवभासमानत्वमेव तस्य ग्राह्यत्वमिति चेत् ? कोऽयमाकारस्यावभासः ? ज्ञानप्रतिबद्धहानादिव्यवहारयोग्यतापत्तिश्चेत् ? बाह्यस्यापि सैव योग्यता । तथा हि– नीलं पीतमेतदिति [2]संविदानाः । बाह्यमेवोपाददते जहत्यु[3]पेक्षन्ते वा, नान्तरमाकार-मित्यसिद्धो ग्राह्यलक्षणायोगः, कथमन्यस्योत्पत्त्यान्यस्य व्यवहारयोग्यतेति चेत् ? तस्य [4]स्वकारणसामग्रीनियमेन तद्विषयव्यवहारानुगुणस्वभावस्योत्पादनादिति यत्किञ्चिदेतत् ।

[टि०] पुनः प्रकारान्तरेणान्यथासिद्धिं दर्शयति **किञ्च ग्राहका[5]धीनम्** इति :– ज्ञानस्य तु आत्ममात्रनिष्ठत्वेन सतोऽपि [6]ज्ञानादन्यस्यार्थस्याग्राह्यतोपपद्यत इति ।

ननु नीलादिविषयं ज्ञानमुत्पद्यते व्यवह्रियते च बाह्यं वस्तु इति कथं घटते भेदादि[7]त्येतदाशङ्कते [8]**कथमन्यस्य** [इति]।

[पं०] [9]तस्येति (कं. १२८.२) आकारस्य । **अनुवर्तमानस्यापीति** (कं. १२८.३) आस्तां तावत्साक्षात्परिस्फुरत इति भावः । **अवभासमानत्वमे[व]तस्य ग्राह्यत्वमिति** (कं. १२८.४) यो यस्य संविद्यवभासते स तस्य विषय इति हि बौद्धा(रंग) । **सैवेति** (कं. १२८.५) योग्यता । **अन्यस्ये**(कं. १२८.७)ति ज्ञानस्य । **अन्यस्येति** (कं. १२८.७) अर्थस्य । **तस्येति** (कं. १२८.८) ज्ञानस्य । **तद्विषयेत्यादि** (कं. १२८.८) । तच्छाब्देन अर्थः ।

[कु०] तद्भावे च विशेष्यसिद्धो हेतुरित्याह **कथं पुनरिति** (कं. १२७.२३) । द्वितीयं दूषयति **किञ्चेति** (कं. १२७.२४) । अग्रहेण सम्बन्धाभावः । ग्राह्याभावात्–ग्रहणसम्बन्धाभावात् । **साध्याविशिष्टमिति** (कं. १२७.२६) द्वितीये पक्षे हीदं साध्यं ग्राह्येण न सम्बद्धमिति । तथा च स्वात्ममात्रनियतत्वात् हेतुः साध्यं न विशिष्यत इत्यर्थः । अथ स्वरूपासिद्धिं दर्शयितुं प्रतिबन्दीमुपन्यस्यति **अपि चेदमिति** (कं. १२७.२६) । न ह्यनाकारो ज्ञानहेतुस्तादात्म्यं च सुषुप्तिपर्यालोचनया अप्रयोजकमस्ति तथापि हानादिव्यवहारयोग्यतापत्तिलक्षणस्य तत्रावभासमानत्वस्योभयसाम्यादानर्थं परित्यज्य बाह्यार्थपक्षपाते किं कारणमिति शङ्का[10]मुपनुदान्न चोक्तमुपपादयति **तथा हि नीलमिति** (कं. १२८.५)। **यत्किञ्चिदेतदिति** (कं. १२८.९) यथा ज्ञानत्वाविशेषे किञ्चिन्नीलाकारं किञ्चित्पीताकारमिति नियमे स्वकारणसामग्री नियामिका एवं भो(य)दपि कस्यचिदुत्पत्तौ कस्यचिद्धानादियोग्यतापत्तिरिति भावः ।

---

१ ज्ञानात्मभूतस्य – कं. १, कं. २ । २ संवादिना – कं. १, कं. २ । ३ पेक्षते – कं. १, कं. २ । ४ स्वरूप– कं. १; कं. २ । ५ धीनाम्–अ; ६ ज्ञानादर्थन्य – अ, ब, क; ७ दित्येतदनुशङ्कते–अ; ८ शब्दमन्यस्य–ड; ९ प्रतीकमिदं कन्दल्यां नास्ति (कं. १२७.३) ज्ञानात्मभूतस्य तस्य इति स्यात् । १० अत्र किञ्चिद् भ्रष्टं भाति – अर्थो न स्पष्टः ।

न्यायकन्दली

**[134] एतेन वेद्यत्वमपि प्रत्युक्तम् । भेदेऽपि [1]ज्ञानस्य स्वकारणनियमादेव तस्योपपत्तेः, सन्दिग्धविपक्षव्यावृत्तिकत्वात् । यदपि जडस्य प्रकाशायोग इति, तदपि [2]प्रकाशात्मकत्वाभावाभिप्रायेण । सिद्धसाधनं संसर्गाभिप्रायेण निरुपपत्तिकम् । नहि जडस्य प्रकाशसंसर्गेण न भवितव्यमित्यस्ति राजाज्ञा, यथा छिदिक्रिया छेद्येन सम्बध्यते भिद्यते च, तथा ज्ञानक्रियापि [3]ज्ञेयेन सह संभन्त्स्यते भेत्स्यते च । सहोपलम्भनियमस्यापि विपक्षाद् व्यावृत्तिः सन्दिग्धा, ज्ञानस्य स्वपर[4]संवेदनतामात्रेणैव नीलतद्धियोर्युगपद्ग्रहणनियमस्योपपत्तेः । बाह्याभावाज्ज्ञानं परस्य संवेदकं न भवतीति चेत् ? बाह्याभावसिद्धौ हेतोर्विपक्षाद् व्यावृत्तिसिद्धिः, तत्सिद्धौ चास्य विपक्षाभावं प्रति हेतुत्वमित्यन्यो[5]न्यापेक्षिता ? अन्यतो बाह्याभावसिद्धावस्य हेतुत्वमिति चेत् तदेवास्तु किमनेन ? असिद्धश्च सहोपलम्भनियमो नीलमेतदिति बहिर्मुखतयार्थेऽनुभूयमाने तदानीमेवान्तरस्य तदनुभव[6]स्याननुभवात् ।**

[टि०] [134] [7]**बाह्याभावे सिद्ध** इति विपक्षात् बाह्यार्थात् । **तत्सिद्धौ च** इति विपक्षाव्यावृत्तिसिद्धावस्य हेतोः सन्दिग्धानैकान्तिकत्व[8]रहितस्य बाह्यार्थाभावं प्रति हेतुत्वम् । [9]**परप्रकाशकम्** इति प्रकाशकं प्रकाशरूपमित्यर्थः । तस्य स्वयमेव [10]नीलादिप्रकाशस्वरूपत्वात् ।

[पं०] [134] **वेद्यत्वमपि प्रत्युक्तमिति** (कं. १२८.९) अर्था धर्मिणः ज्ञानान्न व्यतिरिच्यन्ते तद्वेद्यत्वात् । यद्येन वेद्यते तत्ततो न भिन्नं ज्ञानस्य आत्मा । वेद्यन्ते च नीलादयस्तस्माज्ज्ञानादभिन्ना इत्येतत् पूर्वोक्तं प्रतिषिद्धमित्यर्थः । **भेदेऽपीति** (कं. १२८.९) अर्थान्यार्थक्येपि । **तस्येति** (कं. १२८.१०) वेद्यत्वस्य । **सन्दिग्धविपक्षव्यावृत्तिकत्वादिति** (कं. १२८.१०) संदिग्धा[द्] विपक्षाद् भेदाद्व्यावृत्तिर्यस्य स सन्दिग्धविपक्षव्यावृत्तिकः, तस्य भावः सन्दिग्धविपक्षव्यावृत्तिकत्वम्, तस्मात् । किमर्थस्य वे[द्य]त्वं ज्ञानेन अभेदात् ? किं वा स्वकारणसामग्रीत इति हि सन्देहोऽत्र मूलत इति भावना । **संसर्गाभिप्रायेणेति** (कं. १२८.११) ज्ञाने सम्बन्धाभिप्रायेण । **सहोपलम्भनियमस्यापीति** (कं. १२८.१४) अभेदसाधनाय हेतूक्तस्तस्य । **विपक्षादिति** (कं. १२८.१४) भेदात् । **सन्दिग्धेति** (कं. १२८.१४)

[कु०] [134] सामग्रीभेदप्रयुक्तस्वभावनियमाङ्गीकारनिरसनीयतया सहोपलम्भनियमं व्युत्क्रम्य वेद्यत्वहेतुमतिदेशेन दूषयति **एतेनेति** (कं. १२८.९) इदानीं सहोपलम्भनियमहेतुं तत्साधकमनूद्य दूषयति **यदपि जडस्येति** (कं. १२८.१०) । **ज्ञानस्य स्वपरसंवेदनतामात्रेणेति** (कं. १२८.१५) परमताभिप्रायेणोक्तं स्वमते स्वयंप्रकाशतानङ्गीकारात् । अत एव स्वमतमालम्ब्याह–**असिद्धश्चेति** (कं. १२८.१८) । ज्ञानस्य ज्ञेयेन सहोपलम्भः किमनुभवाद् व्यवस्थाप्यते अनुमानाद्वा ?

---

१ ज्ञानस्वभावकारणसामग्री–कं. १, कं. २ । २ प्रकाशाना–कं. १, कं. २ । ३ ज्ञेयेन सम्भत्स्यते–जे. १, जे. २ । ४ संवेद्य – कं. १, कं. २ । ५ न्यापेक्षित्वम्, तदेवास्तु – कं. १, कं. २ । ६ स्याननुभवात् – जे. १, जे. २ । ७ बाह्याभावसिद्धो – मु. ८ रहितस्या–अ, ब, क; ९ प्रकाशम् – मु. प्रकाशकम् – जे. १; जे. २ । १० प्रनीलादि – अ, ब, क ।

न्यायकन्दली

ज्ञानस्य स्वसंवेदनतासिद्धौ सहोपलम्भनियमसिद्धिरिति चेत् ? स्वसंवेदनसिद्धौ किं प्रमाणम् ? यत्प्र[1]काशकं तत्स्वप्रकाशे परानपेक्षं यथा प्रदीप इति चेत् ? प्रदीपस्य तद्देशवर्तितमोपनयने व्यापारः, स चानेन स्वयमेव कृत इति तदर्थं प्रदीपान्तरं नापेक्षते, वैयर्थ्यात् । [2]स्वप्रतीतौ तु चक्षुरादिकमपेक्षत एवेति साध्यविकलता दृष्टान्तस्य । अथ प्रकाशकत्वं ज्ञानत्वमभिप्रेतम् ? तस्मात् परानपेक्षा, तदानीमसाधारणो हेतुः ।

यच्चोक्तं यस्याव्यक्तः प्रकाशः तत्स्वयमव्यक्तं तथा पिहितं वस्त्विति, [3]तत्रापि पिहितस्याव्यक्तता अप्रकाशः, तत्स्वयमव्यक्तत्वात्किन्त्वभावादेवेति व्याप्त्यसिद्धिः । यच्च प्रत्ययत्वादिति तद[4]प्यधानम् दृष्टान्तासिद्धेः । स्वप्नादिप्रत्यया अपि समारोपितबाह्यालम्बना न [5]स्वात्ममात्रपर्यवसायिनः, जाग्रदवस्थोपयुक्तानामेवार्थानां संस्कारवशेन तथा प्रति-

[टि०] ननु [6]प्रकाशकं तावदत्र हेतुः [7]तदत्र किमिदं [8]प्रकाशकत्वम् ? किं व्यापारः ? किं वा प्रतिपत्तिः ? किं वा ज्ञानत्वम् ? [9]तत्राद्येऽन्यथासिद्धिमापादयति **प्रदीपस्य तद्देशेति** [10]स्वप्रकाशे स्वव्यापारे तमोपनयने इत्यर्थः । द्वितीये प्राह– [11]**स्वप्रतीतौ तु** इति–स्वप्रकाशे स्वप्रतीपत्ताविव्यर्थः । तृतीये प्राह–**अथ** [12]**प्रकाशकत्वमिति** । तस्मात् [13]प्रकाशकत्वात्

[पं०] सहोपलम्भनियमोऽपि भविष्यति, अभेदश्च न भविष्यति । **ज्ञानस्य स्वपरसंवेदनतामात्रेण(त)द्यनीलतद्धियोर्युगपद्ग्रहणनियमस्योपपत्तेरिति** (कं. १२८.१५) ज्ञानं हि स्वपरसंवेदनतामात्रेण नीलं गृह्णाति स्वसंवेदनतामात्रेण च नीलधियं, तदनयोः सहोपलम्भो नास्ति नत्वाभेद इति भावना । अनभ्युपगमेऽपि परं स्वसंवेदनात् स्वसंवेदनं विपक्ष इति कृत्वा एतदुक्तं **श्रीधरेणेति** द्रष्टव्यम् । **अत्र** गद्ये **स्वसंवेदनतामात्रेणैवेति** एवकारस्य व्यवच्छेदकत्वादभेदस्य व्यवच्छेदः । तेन स्वपरसंवेदनतामात्रेणैव न पुनरभेदेनेत्यर्थः सिद्धः । हेतोरिति (कं. १२८.१६) सहोपलम्भनियमस्य । **विपक्षादिति** (कं. १२८.१६) भेदात् । **अस्येति** (कं. १२८.१७) सहोपलम्भनियमस्य हेतोः । [14]**विपक्षाभावादिति** (कं. १२८.१७) अभेदः । [15]**अन्यत इति** विपक्षव्यावृत्तितोऽन्यस्मात् ऋतेऽपि । **तदेवेति** (कं. १२८.१८) अन्यत् ।

[कु०] नाद्य इत्याह **नीलमेतदिति** (कं. १२८.१८) । द्वितीयमाशङ्क्य दूषयति **ज्ञानस्येति** (कं. १२८.१९) । अत्र तत्स्वयंप्रकाशसाधनप्रसङ्गदूषणावसरे प्रसङ्गात् सन्दिग्धविपक्षव्यावृत्तित्वेन सहोपलम्भनियमो दूषितः, सम्प्रति तस्यैव स्वरूपासिद्धिप्रदर्शनाय प्रसङ्गविपर्ययो दूष्यते इति न क्रमव्यतिक्रमदोषः । [16]**यत्परप्रकाशकमित्यत्र** परप्रकाशकत्वं (परे)परानङ्गीकारादसिद्धं चक्षुरादौ व्यभिचारी च । प्रकाशमानत्वे सतीति विशेषणं चासिद्धमित्येतद्दूषणं स्पष्टमित्यपेक्षदृष्टान्तं दूषयति **प्रदीपस्येति** (कं. १२८.२१) । इह सजातीयानपेक्षत्वं प्रदीपस्य, आलोकजात्यापेक्षया वा ?

---

१ प्रकाशं – कं. १, कं. २ । २ प्रतिपत्तौ – कं. १, कं. २ । ३ तत्र – कं. १, कं. २ । ४ प्यसारम् – कं. १, कं. २ । ५ स्वांशपर्यवसायिनः – के. २ । ६ प्रकाशकत्वमत्र – अ; प्रकाशत्वं – ड; ७ तदत्र – अ; ८, १२ प्रकाशत्वम् – ड; ९ तत्राद्यथा – अ; १० स्वप्नप्रकाशे – अ, ११ स्वप्रतिपत्तौ – मु. स्वप्रतीतौ – जे. १, जे. ३ । १३ प्रकाशकत्वाज्ञान – अ, ब; १४ विपक्षभावं प्रति । १५ प्रतीकस्यास्य पाठः कन्दल्यां नोपलभ्यते – सं । १६ अत्र कन्दल्यां 'यत्प्रकाशम्' इति पाठः न चाशुद्धः (कं. १२८.२१) ।

न्यायकन्दली

**भासनात्, अन्यथा दृष्टश्रुतानुभूतेष्वर्थेषु तदुत्पत्तिनियमायोगात्। किञ्च, यदि बाह्यं नास्ति किमिदानीं नियताकारं प्रतीयते [1]नीलमेतदिति। विज्ञानाकारोऽयमिति चेन्न, [2]विज्ञानाद्बहिर्भूतस्य संवेदनात्। ज्ञानाकारत्वे त्वहं नीलमिति प्रतीतिः स्यान्न त्विदं नीलमिति। ज्ञानानां प्रत्येकमाकारभेदात् कस्यचिदहमिति [3]प्रतीभासः कस्यचिदिदं नीलमेतदिति चेत् न नीलाद्याकारवदहमित्याकारस्य व्यवस्थितत्वाभावात्। तथा च यदेकेनाहमिति प्रतीयते तदपरेण त्वमिति प्रतीयते, स्वयं स्वस्य संवेदनेऽहमिति [4]प्रतिभासते इति चेत्? किं वै परस्यापि संवेदनमस्ति? स्वरूपस्यापि भ्रान्त्या भेदप्रतीतिरिति चेत्? प्रत्यक्षेण प्रतीतो भेदो वास्तवो न कस्मात्? भ्रान्तं प्रत्यक्षमिति चेत्? यथोक्तम्—**

**[5]परिच्छेदान्तरं योऽयं भागो बहिरवस्थितः।**
**ज्ञानस्याभेदिनो भेदप्रतिभासो ह्युपप्लवः॥ इति।**

[**टि०**] ज्ञानमित्यर्थः। सपक्षा[6]द्दीपाद् विपक्षाच्च घटादेर्ज्ञानत्ववत्त्वस्य व्यावृत्तत्वात्। **किन्त्वभावादेव** इति :— प्रकाशस्याभावादेवेत्यर्थः।

**यच्च प्रत्ययत्वाद्** इति [7]सर्वे प्रत्यया निरालम्बना इत्यत्रोक्तम्। व्यवस्थितत्वा[8]भावमेव दर्शयति **तथा च** इत्यादि। सा **यदि बाह्येति** सा वासना यदि बाह्या सती अर्थक्रियाविशेषे निमित्तमिति। **तज्जननसमर्थक्षणेति** तस्य

[**पं०**] **अनेनेति** (कं. १२८.१८) सहोपलम्भनियमाख्यहेतुना। **तदनुभवस्येति** (कं. १२८.१९) नीलादिज्ञानस्य। **अपेक्षते एवेति** (कं. १२८.२३) अत्र प्रदीपः कर्ता। **साध्यविकलतेति** (कं. १२८.२३) साध्यं परानपेक्षत्वं तद्विकलतादृष्टान्तस्येति। ज्ञानं स्वप्रकाशं प्रकाशते प्रदीपवदिति दृष्टान्तीकृतस्य प्रदीपस्य। **असाधारणो हेतुरिति** (कं. १२८.२४) सपक्षविपक्षव्यावृत्तः पक्ष एवं वर्तमानत्वात्, शब्दानित्यत्वसिद्धौ श्रावणत्ववत्।

**अभावादेवेति** (कं. १२८.२६) प्रकाशस्याभावादेव। **व्याप्त्यसिद्धिरिति** (कं. १२८.२६) यथा किल पिहितस्य वस्तुनोऽव्यक्तता न प्रकाशस्याव्यक्तत्वात् किं तु प्रकाशस्याभावेद एवमेवार्थेऽपि यत्र ज्ञानस्याभावस्तत्राव्यक्तत्वं न तु यत्र ज्ञानं स्वसंविदितमपि वृत्तं तत्रापि अव्यक्तत्वं युज्यते। अतो न अव्यक्तप्रकाशत्वमित्यर्थः **यच्च प्रत्ययत्वादिति**

[**कु०**] नाद्य इत्याह **तद्देशवर्त्तीति** (कं. १२८.२१)। इह आलोकश्चक्षुषः सहकारी। तत्रा चावयवावयविभेदेन ग्राह्यग्राहकभेदाङ्गीकारा[दा]लोकविषयमपि ज्ञानमालोकान्तरसव्यपेक्षमेवेति भावः। द्वितीयं दूषयति [9]**स्वप्रतीतौ त्विति** (कं. १२८.२३)। किञ्च प्रदीपस्य ज्ञानकारणतया दृष्टान्तता, तस्मात् प्रकाशकत्वं ज्ञानकारण[त्व]मेव। न तु ज्ञानं, स्वविषयमेव ज्ञानं प्रतिकारणमित्यसिद्धश्च हेतुः। तत्परिहारायाशङ्कते **अथेति** (कं. १२८.२४)। स्वार्थे 'क'प्रत्यय इति भावः।

---

१ नीलपीतमेतदिति—जे. १, जे. २। २ ज्ञानाद्—कं. १, कं. २। ३ प्रतीतिः, कस्यचिदिदं नीलमिति?—कं. १, कं. २। ४ प्रतिभास इति चेत्—कं. १, कं. २। ५ परिच्छेदोन्तरं—जे. १, जे. २। ६ दीपादिपक्षाच्च—अ, ब; ७ सर्वे या—अ, ब; ८ भावामव—अ; ९ स्वप्रतिपत्तौ—कं।

### न्यायकन्दली

कुत एतत् ? अनुमानेना[1]भेदप्रसाधनादिति चेत् ? प्रत्यक्षस्य भ्रान्तत्वेनाबाधितविषयत्वादनुमानस्यात्मलाभः, लब्धात्मके चानुमाने प्रत्यक्षस्य भ्रान्तत्वमित्यन्योन्यापेक्षितादोषः । अस्तु वा [2]भेदविप्लवो नियतदेशाधिकरणप्रतीतिः, कुतः ? नहि तत्रायमारोपयितव्यो नान्यत्रेत्य[3]स्ति प्रति नियमहेतुः । वासना[4]नियमादारोपिते नियमः इति चेन्न, तस्या अपि तद्देशनियमकारणाभावात् । सति ह्यर्थसम्भवे यद्देशोऽर्थस्तद्देशानुभवस्तद्देशा च तत्पूर्विका वासना, बाह्याभावे तु तस्याः किंकृतो [5]देशनियमः ? अस्ति तावदारोपे नियमः न च कारणविशेषमन्तरेण कार्यविशेषो घटते, बाह्यश्चार्थो नास्ति । तेन वासनानामेव वैचित्र्यं तद्वैचित्र्यस्यार्थवत्तत्कारणानां वैचित्र्या[6]दित्यनादिरिति चेत् ?

[टि०] नीलादिप्रत्य[7][यस्य जनने समर्थो योऽसौ ज्ञानक्षण[8]सन्तानस्तस्य सर्वदा] सत्त्वात् । देशकालकारणस्वभावेति — एतेन प्रमाणमपि सूचितम्, विवादाध्यासितं [9]नीलादिज्ञानाद् व्यतिरिक्तम्, विरुद्धधर्माध्यस्तत्वात्, यथा घटात् पट इति । विरुद्धधर्मा[10]ध्यासश्च ज्ञानस्य [11]शरीरान्तः, अर्थस्य च बहिः, ज्ञानस्यापरकालेऽर्थस्य च पूर्वकाले वृत्तित्वात्, [12]ज्ञानस्यार्थविर्थस्य च स्वकारणेभ्य उत्पत्तेः, ज्ञानस्य [13]तु प्रकाशस्वभावत्वादर्थस्य तु जडरूपत्वादिति ।

॥ सङ्ख्या ॥

[पं०] (कं. १२८.२७) । सर्वप्रत्यया निरालम्बना इत्यत्रोक्तमासीत् । तदुत्पत्तिनियमायोगादिति (कं. १२९.२) स्वप्नादिप्रत्ययोत्पत्तिनियमासम्भवात् । नीलाद्याकारवदिति (कं. १२९.६) अयं व्यतिरेके दृष्टान्तः । स्वयं स्वस्य संवेदनेऽहमिति प्रतिभास इति (कं. १२९.७) । स्वमिति तु परापेक्षसि[द्धिरि]ति भावः । किं वै [14]परस्परस्यापि संवेदनमस्तीति (कं. १२९.८) । यदि हि परस्यापि संवेदनं न स्यात्तत्कथं स्वसंवेदनमित्युच्यते भवतेति भावः । [15]परिच्छेदान्तरं योऽयमित्यादि (कं. १२९.१०) श्लोकव्याख्या । परिच्छेदो ज्ञानलक्षणोऽतवर्तते यस्त्वयं भागो विकल्पाख्यो बहिर्घटादिरूपेणावस्थितः स परिच्छेदादन्य एव । एवं यो भेदस्य प्रतिभासः स सम्प्लवो मिथ्यैव ज्ञानस्याभेदत्वादिति श्लोकार्थः ।

[कु०] असिद्धोऽपि प्रसङ्ग इत्याह यच्चेति (कं. १२८.२४) । इति व्याप्त्यसिद्धिः; विपर्ययश्चेति शेषः । एवं तावद्ग्राह्यलक्षणायोगाद् वेद्यत्वात्सहोपलम्भनियमादित्यर्थस्य ज्ञानाव्यतिरेकहेतवो दूषिताः अतः परमलौकवाद्युपन्यस्तं प्रत्ययत्वादित्यनेन हेतु[ना] बाह्यालम्बनत्वे साध्ये सङ्क्रमय्य दूषयति यच्चेति (कं. १२८.२७) । दृष्टान्तासिद्धेरिति (कं. १२८.२७) असिद्धिः साध्यविकलता, तदेतदिह स्वप्नादीति । तथा प्रतिभासमानादिति (कं. १२९.१) असन्निहितानां सन्निहिततयेत्यर्थः । व्यवस्थितत्वाभावादिति (कं. १२९.६) प्रतिपत्तृभेदेऽपि समानत्वादित्यर्थः । न नावस्तवः कस्मादिति प्रमाणदूषणं विनेति शेषः ।

---

१ भेदसाधनात् — कं. १, कं. २ । २ भेदो — कं. १, कं. २ । ३ त्यस्ति नियमहेतुः — कं. १; कं. २ । ४ नियमात्तदारोपनियमः स्यादिति चेत् — कं. १; कं. २ । ५ देशनियमः ? न च — कं. १, कं. २ । ६ वैचित्र्यादनादि — जे. १, जे. २ । ७–९ नीलाद्येतदनन्तरं [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोरावृत्तः । ८ ज्ञानक्षणसन्तानक्षणसन्तान — ब; १० ध्यासाश्च — अ, ब; ११ शरीरन्तः — अ; १२ ज्ञानास्पदर्थस्य — अ, ज्ञानस्यार्थस्य — ब; १३ तु — ब पुस्तके नास्ति । १४ परस्यापि — कं । १५ परिच्छेदोन्तर — पं. ।

न्यायकन्दली

वासनावैचित्र्यं यदि बोधाकारादनन्यत् कस्तासां परस्परतो विशेषः ? अथान्यदर्थे कः प्रद्वेषः ? येन सर्वलोकप्रतीतिरपह्नूयते । केन चायमाकारो बहिरारोप्यते ? [1]ज्ञानेन इति चेत् ? किं तस्य स्वात्मन्याकारसंवित्तिरेव बहिरारोपस्तदन्यो वा ? आद्ये कल्पे सैव तस्य सम्यक्प्रतीतिः, सैव च मिथ्येत्यापतितम्, ज्ञानगतत्वेनाकारग्रहणस्य सत्यत्वात्, बाह्यतासंवित्तेश्चायथार्थत्वात् । अन्यत्वे [2]च तयोर्न क्रमेण भावः, तत्कारणस्य ज्ञानस्य क्षणिकत्वात् । न चैकस्य युगपत्सत्यत्वेन मिथ्यात्वेन च प्रतीतिसम्भवः । न च क्रमयौगपद्याभ्यामन्यः प्रकारोऽस्ति, यत्र वर्तमानं ज्ञानं स्वात्मन्याकारं गृह्णीयाद्बहिश्च [3]तमारोपयेत् ।

अपि च यदि ज्ञानाकारो नीलादिरर्थो यस्यैवायमाकारः स एव तं प्रतीयात्, न पुरुषान्तरं प्रतीयात् । प्रतीयते चायं बहुभिरेकः, सर्वेषां तदाभिमुख्येन युगपत्प्रवृत्तेः, [4]यस्त्वया दृष्टः स मयापीति प्रतिसन्धानात् । तस्मादर्थोऽयं न ज्ञानाकारः ।

[पं०] श्रीधरः पृच्छति कुत एतदिति (कं. १२९.११) । परः प्राह अनुमानेनेति (कं. १२९.११) सहोपलम्भनियमादित्यनेन । नियतदेशाधि[5]करणा प्रतीतिरिति (कं. १२९.१४) नीलोऽयमित्येवंरूपा । तत्रायमिति (कं. १२९.१४) अयं नीलादिरित्यर्थः । तत्पूर्विकेति (कं. १२९.१७) अनुभवपूर्विका । परः प्राह [6]अस्ति तावदित्यादि । [7]तद्वैचित्र्यंचार्थवत्तत्कारणानां वैचित्र्यादिति (कं. १२९.१९) यथा परस्य कारणवैचित्र्यादि(द)र्थवैचित्र्यं तथा वासनाकारणानां वैचित्र्याद्वासनावैचित्र्यमित्यर्थः । अनादिरिति (कं. १२९.१९) अत्रारोपनियमः कर्ता । श्रीधरः प्राह वासनावैचित्र्यमित्यादि (कं. १२९.१९) । अन्यदिति (कं. १२९.२०) अभिन्नम् । कस्तासां परस्परतो विशेष इति (कं. १२९.२०) बोधाकारस्यैकत्वादेकत्वमेव तासां स्यादित्यर्थः । अन्यत्वे तु तयोर्न क्रमेण भाव इति (कं. १२९.२४) तयोः स्वसंवित्तिबहिरारोपयोरन्यत्वे कक्षीक्रियमाणे क्रमेण भावो न घटते । अत्रार्थे हेतुमाह तत्कारणस्य (कं. १२९.२४)

[कु०] भेदस्य भ्रान्तत्वाङ्गीकारेण पूर्वप्रतिकूलतर्कस्यान्यथासिद्धिमङ्गीकृत्य प्रतिकूलतर्कान्तरमाह अस्तु वेति (कं. १२९.१३) । ननु बाह्यार्थवादिभिरपि शुक्तिकादेशे रजतारोपस्य नियमे कारणं वाच्यमतः आह सति हीति (कं. १२९.१६) । यद्दे[शो]ऽर्थ इति (कं. १२९.१६) [8]अर्थ्यते भ्रान्तत्वादिनियमित्वेनापेक्ष्यत इत्यर्थः । सादृश्यं तत्रात्र तस्मिन्नेव देशे [9]तद्दसा(शा)नुभावः [तद्देशानुभवः], तद्देशवासनासंस्कारस्य तद्देशत्वं कार्याभिमुख्यम्, बाह्यार्थापलापे तु सादृश्यमपि बहिर्नास्तीत्यारोपस्य देशनियमो नोपपद्यत इति भावः । कार्यानुसारिणि कारणवैचित्र्ये कल्पनीये बाह्यार्थपक्षपाते किं कारणमित्यत आह येनेति (कं. १२९.२१) । किञ्चेत्याह [10]केन पुनरिति (कं. १२९.२१) संवित्तिः तत्र प्रकाशनाया उत्पादः ।

---

१ ज्ञानेन चेत् –कं. १, कं. २ । २ तु–कं. १, कं. २ । ३ मारोपयति –कं. १, कं. २ । ४ योयस्त्वया–जे. २ । ५ धिकरण–कं । ६ प्रतीकमिदं कन्दल्यां नोपलभ्यते । ७ तद्वैचित्र्यस्य–कं । ८ अर्थ्यते–हृ. लि. । ९ हृ. लि. पुस्तकेऽशुद्धं भाति । १० 'पुनः' इति कं पुस्तके नास्ति ।

## न्यायकन्दली

ये तु ज्ञानाकारमप्यपह्नुवाना [1]अलीका एव नीलादयः प्रतिभासन्ते इत्याहुः, तेषां कारणनियमादुत्पत्तिनियमोऽर्थक्रियानियमश्च न प्राप्नोति, अर्थाभावेन किञ्चित् कस्यचित् कारणम्, सर्वं वा सर्वस्य, नार्थक्रियासंवादो न वा [2]विसंवाद इति विशेषाभावात्। यथोक्तं गुरुभिः--

आशामोदकतृप्ता ये ये चोपार्जितमोदकाः।
रसवीर्यविपाकादि तेषां तुल्यं प्रसज्यते ।। इति।

वासनाविशेषात तद्विशेषसिद्धिरिति चेत् ? सा यदि बाह्यार्थक्रियाविशेषहेतुः ? संज्ञाभेदमात्रम्, अर्थो वासनेति। अथ ज्ञानात्मिका ? अर्थाभावे हि तस्या विशेषो निर्निबन्धनो बोधमात्रस्योपादानस्य सर्वत्राविशेषात्, [3]बोधाकाराव्यतिरिक्तस्य च विशेषस्याभ्युपगमेऽर्थसद्भावाभ्युपगमप्रसङ्गादित्युक्तम्। न चास्मिन् पक्षे नीलादिप्रत्ययस्य कादाचित्कत्वं स्यात्, तज्जननसमर्थक्षणसन्तानस्य सर्वदानुवृत्तेः, अननुवृत्तौ वा कालान्तरेऽपि [4]तत्र प्रत्ययानुपपत्तिः, [5]स्वव्यतिरिक्तस्याचापेक्षणीयस्याभावात्। कारणपरिपाकस्य कादाचित्कत्वात् तत्कार्यस्य कादाचित्कत्वमिति चेत् ? कारणस्य [6]परिपाकः कार्यजननं प्रत्याभिमुख्यम्, सोऽपि स्वसंवेदनमात्राधीनो न कादाचित्को भवितुमर्हति। अस्ति चायं

[पं०] [इति]। बहिरारोपकारणस्य। ज्ञानस्य क्षणिकत्वादिति (कं. १२९.२५) अन्यत्वं हि भिन्नत्वं तच्च क्रमेणैव भवति, बहिरारोपकारणे च ज्ञाने क्षणिकत्वाद्विनष्टे कुतः क्रमेण [इति] भावः। नह्येकस्य क्रमो घटते इति भावना। तर्हि ज्ञानं बहिरारोपश्च युगपदेव भविष्यतः, नेत्याह न चैकस्येत्यादि (कं. १२९.२५)। तमिति (कं. १२९.२७) आकारम्। तमिति (कं. १२९.२८) नीलादि[क]मर्थम्। न पुरुषान्तरमिति (कं. १२९.२८) कर्तृपदमेतत्।

गुरुभिरिति (कं. १३०.५) कौमारिलमिश्रैः।

[कु०] येनेति येन प्रकारेण अन्यवं (अन्यत्व) ज्ञानाङ्गीकारे दूषणं तस्याप्यनङ्गीकारे का गतिरित्यत आह येत्विति (कं. १३०.२)। [7]नाप्यर्थक्रियासंवाद इति (कं. १३०.४) संवादाज्ज्ञानं प्रमाणं विसंवादादप्रमाण[मिति] नियमश्च न प्राप्नोतीत्यर्थः। आशामोदकेति (कं. १३०.६) उपार्जितस्याप्यलीकत्वादाशामोदकां न विशिष्यते इत्यर्थः।

---

१ व्यलीका – कं. १। २ विसंवादो – कं. १, कं. २। ३ बोधाकारस्य च व्यतिरिक्तस्य – कं. १, कं. २। ४ तत् – कं. १, कं. २। ५ स्वव्यतिरिक्तस्या – कं. १, कं. २। ६ परिपाकः कार्यः कार्यजननं – प्रति. कं. १, कं. २; कारणपरिपाकः कार्यजननं – प्रति. जे. २। ७ नार्थ – कं।

प्रशस्तपादभाष्यम्

[135] परिमाणं मान[1]व्यवहारकारणम्। तच्चतुर्विधम्–अणुमहद्दीर्घं ह्रस्वं [2]चेति। तत्र महद् द्विविधम्–नित्यमनित्यं च। नित्यमाकाशकालदिगात्मसु परममहत्त्वम्। अनित्यं त्र्यणुकादावेव।

न्यायकन्दली

कादाचित्कः प्रत्यक्षप्रतिभासः, स एव प्रतीतिविषयं देशकालकारणस्वभावनियतं बाह्यं वस्तु व्यवस्थापयंस्तदभावसाधनं बाधत इति कालात्ययापदिष्टत्वमपि हेतूनामित्युपरम्यत। समधिगता संख्या ॥

[135] सम्प्रति परिमाणनिरूपणार्थमाह–परिमाणं मानव्यवहारकारणमिति। मानव्यवहारोऽणु महद्दीर्घं ह्रस्वमित्यादिज्ञानं शब्दश्च, [3]तस्य कारणं परिमाणमित्यनेन प्रत्यक्षसिद्धस्यापि परिमाणस्य विप्रतिपन्नं प्रति कार्येण सत्तां दर्शयति। यथा तावज्ज्ञानस्य ज्ञेयप्रसाधकत्वं तथोक्तम्।

[टि०] [135] (॥ अथ परिमाणनिरूपणम् ॥)

**परिमाणम्** इति–अर्थविशेषणं मानव्यवहकार[4]कारणं परिमाणमिति लक्षणम्, [5]बुद्ध्यालोकादिव्यवच्छेदार्थ-

[पं०] **सा इति** (कं. १३०.८) वासना बाह्या सती। **उपादानस्येति** (कं. १३०.१०) कारणस्य। **अस्मिन्पक्षे इति** (कं. १३०.११) स्वच्छसंवित्पक्षे। **तत्प्रत्ययानुपपत्तिरिति** (कं. १३०.१३) कादाचित्कप्रत्ययानुपपत्तिः। **स्वव्यतिरिक्तस्येति** (कं. १३०.१३) स्वसत्तामात्रव्यतिरिक्तस्येत्यर्थः। **प्रतीतिविषयमिति** (कं. १३०.१७) प्रतीतेर्विषयम्। **तदभावसाधनमिति** (कं. १३०.१८) अत्र तच्छब्देन बाह्यार्थः। सङ्ख्यागुणविवरणं समर्थितम्।

× × × ×

[135] अथ परिमाणगुणविवरणम्।

**तथोक्तमिति** (कं. १३२.८) अनन्तर एव वादे।

[कु०] **सा यदि बाह्येति** (कं. १३०.८) भिन्नं पदत आगन्तुकसामग्र्यानुप्रदे(वे)?शात् कादाचित्कत्वं नीलादिप्रत्ययाना-मित्यत आह **स्वव्यतिरिक्तस्येति** (कं. १३०.१३)। बाह्यार्थे प्रत्यक्षं प्रमाणमुपदर्शयन् दूषणान्युपसंहरति **अस्ति बाह्यमिति** (कं. १३०.१६) ॥

[ इति सङ्ख्या ]

[135] ननु मानमियत्ता तद्व्यवहारकारणत्वं सङ्ख्यागुरुत्वयोरप्यस्ति तत्कथं नातिव्याप्तिरित्यत आह **मानव्यवहार** इति (कं. १३२.६)। अत्रैव मुख्यो मानव्यवहारः प्रसिद्ध इत्यर्थः। न तु प्रसिद्धलक्षणवैयर्थ्यमत आह **तस्य कारणमिति** (कं. १३२.६)। तथोक्तं–नि[रा]लम्बनत्वनिरासेन।

---

१ व्यवहरणम्–दे। २ च–दे। ३ तस्योत्पत्तिकारणं–जे. २। ४ कारण–अ, ब; ५ बुद्ध्वा–अ, ब।

न्यायकन्दली

शब्दस्य तु कथम् ? न ह्यसावर्थात्मा, अन्नाग्न्यसिशब्दोच्चारणे मुखस्य पूरणदाहपाटनप्रसङ्गात् । नाप्यर्थजः, कौष्ठ्यवायुकण्ठाद्यभिघातजत्वात् । अतदात्मनोऽतदुत्पन्नस्य प्रतिपादकत्वेऽतिप्रसङ्गः । अत्रोच्यते यदि कण्ठाद्यभिघातमात्रज एव शब्दो न वक्तुर्विवक्षामपि प्रतिपादयेत् तदुत्पत्त्यभावात् । तथा च वक्तुर्विवक्षामपि न सूचयेयुः शब्दा इति प्रमत्तगीतं स्यात् । पारम्पर्येण विवक्षापूर्वकत्वाच्छब्दस्य विवक्षाप्रतिपादकत्वमिति चेत् ? एवमर्थानुभवप्रतिपादकत्वमपि, विवक्षाया अर्थानुभवपूर्वकत्वात् । असत्यप्यर्थानुभवे विप्रलम्भकस्य तदर्थविवक्षाप्रतीतिरस्ति चेत् ? असत्यामपि तदर्थविवक्षायां भ्रान्तस्य तदर्थविषयं वाक्यमुपलब्धम् । तथाहुराचार्याः—

भ्रान्तस्यान्यविवक्षायामन्यद्वाक्यं हि दृश्यते । इति ।

नान्यविवक्षातोऽन्याभिधानस्य सम्भवः, अन्वयव्यतिरेकाभ्यां यद्यस्य कारणमवगतं तस्य तद्व्यभिचारे विश्वस्याकस्मिकत्वप्रसङ्गात्, अतो भ्रान्तस्याप्रतीयमानापि तदर्थ-

[टि०] [6]मर्थविशेषणमित्युक्तम् । [7]शब्दस्य तु कथम् इति शब्दस्यार्थेन सम्बन्धाभावादिति भावः । तमेव दर्शयति **न ह्यसौ** इति । **अतदात्मन** इति तटस्थस्य वृक्षादेरपि वह्निप्रतिपादकत्वं स्यात् । **एवमर्थानुभवेति** :—[8]पूर्वं ह्यर्थानुभवस्ततो वाचकस्मरणं ततो वक्तुमिच्छा, ततः प्रयत्न इति पारम्पर्येणानुभवस्यापि कारणत्वम् । **स्मरणकारणिका** इति स्मरणं [9]कारणं यस्याः सा तथा । [10]साक्षाद् अव्यवधानेनाहेत्यर्थः । **विवक्षामात्रेति** विवक्षाया दोहदाहादावनुपयोगात् ।

[पं०] **न वक्तुर्विवक्षामपि प्रतिपादयेदिति** (कं. १३२.११) वक्तुर्विवक्षामपि न ज्ञापयेत् । अथ वक्तुर्विवक्षां ज्ञापयति शब्दः यतः 'अयं पुमान् ककुदादिमदर्थविवक्षावान् गोशब्दोच्चारणकर्तृत्वादहमिव' इति प्रयोगः प्रवर्तते । **तदु[त्प]त्त्यभावादिति** (कं. १३२.१२) न हि शब्दो विवक्षात उत्पद्यते । **पारम्पर्येणेति** (कं. १३२.१३) प्रथमं हि विवक्षा, ततः कण्ठाद्यभिघातः, ततः शब्द इत्येवंरूपेण । **एवमिति** (कं. १३२.१४) पारम्पर्येण । **असत्यामपि तदर्थविवक्षायामिति** (कं. १३२.१५) वक्तुरिच्छां विनापीत्यर्थः । **भ्रान्तस्येति** (कं. १३२.१६) उन्मत्तादेः ।

[कु०] **शब्दस्य** त्विति (कं. १३२.८) कथं न कथञ्चिच्छब्दानामर्था(मर्थं) संस्पर्शित्वादिति भावः । **अतदात्मन** इति (कं. १३२.१०) न चैवंभूतानामपि चक्षुरादीनां प्रतिपादकत्वमाशङ्कनीयम्, अर्थादुत्पन्नं ज्ञानमेव तत्सारूप्यादर्थं प्रतिपादयति यतः शब्दस्यार्थकार्यत्वनिषेधः साक्षाद्वा परम्परया वा ? नाद्य इत्याह **कण्ठादीति** (कं. १३२.११) । द्वितीयमाशङ्क्य दूषयति **पारम्पर्येणेति** (कं. १३२.१३) । विवक्षाया अर्थानुभवव्यभिचारमाशङ्कते **असत्यपीति** (कं. १३२.१५) । ... मानो दोष इत्याह **असत्यामपीति** (कं. १३२.१५) ।

१ °पादकत्वे चातिप्रसङ्गात्–कं. १, कं. २ । २ तदयुक्तम्–कं. १, कं. २ । ३ विवक्षां सूचयेयुः–जे. १, जे. २ । ४ यथा–कं. १, कं. २ । ५ भिधानसम्भवः–कं. १, कं. २ । ६ 'अर्थविशेषणं' मु. पुस्तके नास्ति किन्तु –जे. १; जे. ३ इत्यत्रास्ति । ७ प्रतीकमिदं अबकपुस्तकेषु नास्ति । ८ ह्यर्थमनुभवंस्ततो–अ, ब, क । ९ स्मरणं यस्याः सा–अ, ब; १० 'साक्षात्' मु. पुस्तके नास्ति, किन्तु–जे. १; जे. ३ इत्यत्रास्ति ।

न्यायकन्दली

विवक्षा सहसोपजाता गच्छत्तृणसंस्पर्शज्ञानवदस्पष्टरूपा कार्येण कल्पनीयेति चेत्? विप्रलम्भकस्यापि विवक्षाविशेषेण तदर्थानुभवः कल्प्यताम्, असंविदितेऽर्थे तद्विषयस्य विवक्षाविशेषस्यायोगात्। तदानीं विप्रलम्भकस्य तदर्थानुभवो नास्तीति चेत्? मा स्म भूत्, स्मरणं तावद्विद्यते, विप्रलम्भको हि पूर्वानुभूतमेवार्थमन्यथाभूतमन्यथा कथयति। तत्रास्य तदर्थं विवक्षा साक्षात् स्मरणकारणिका भवन्ती पारम्पर्येण तदनुभवकारणिकेति नास्ति व्यभिचारः, मिथ्यानुभवपूर्विकाया अपि विवक्षायाः पारम्पर्येण सत्यानुभवपूर्वकत्वात्। अनुभवश्चार्थाव्यभिचारीति शब्दादर्थसिद्धिः। अन्यथा वाक्यश्रुतौ श्रोतुरर्थप्रतीत्यभावाद् विवक्षामात्रप्रतीतेश्चापुरुषार्थत्वाच्छाब्दो व्यवहार उच्छिद्येत, वादिप्रतिवादिनोश्च जयपराजयव्यवस्थानुपपत्तिः, विवक्षामात्रं प्रत्युभयोरपि भूतार्थवादित्वात्।

यच्चोक्तं द्रव्यादव्यतिरिक्तं परिमाणम्, द्रव्याग्रहे तद्बुद्ध्यभावादिति, तदसिद्धम्। दूराद् द्रव्यग्रहणेऽपि तत्परिमाणविशेषस्याग्रहणात्। अत एव महानप्यणुरिव भ्रान्त्या दृश्यते।

[टि०] **विवक्षामात्रं प्रति** इति :–उभयोरपि विवक्षायाः सत्यत्वात्। **यच्चोक्तम्** इति यद्ग्रहणे सति न गृह्यते तत्ततो न भिद्यते यथा वृक्षात् शिंशपा, न गृह्यते चागृह्यमाणे द्रव्ये परिमाणमिति **बौद्धः** प्रत्यवतिष्ठते। तत्रासिद्धिमेव स्फुटयति **दूराद् द्रव्यग्रहणेऽपि** इति :–यद्यप्यत्र द्रव्याग्रहणेऽपि परिमाणग्रहणं दर्शयितुमुचितं तथापि तादात्म्यादेकग्रहणेऽन्यतरस्याग्रहणं दर्शितम्। **अवयवसंस्थानानुपलम्भेऽपि** इति। यद्यवयवसंस्थानमुपलभ्येत तर्हि मनुष्यादिविशेषोऽप्युपलभ्येत।

[पं०] परः प्राह **नास्य विवक्षास** (कं. १३२.१७) इत्यादि। **विश्वस्याकस्मिकत्वप्रसङ्गादिति** (कं. १३२.१८) मृत्पिण्डादिकं विनापि घटाद्युत्पत्तिप्राप्तेरित्यर्थः। **कार्येणेति** (कं. १३२.२०) तथाविधवचनेन। **विवक्षामात्रप्रतीतेश्चापुरुषार्थत्वादिति** (कं. १३३.१) अर्थप्रतीतिरेव हि पुरुषार्थः। विवक्षामात्रं तु दोहवाहादावनुपयोगान्न पुरुषार्थः।

[कु०] प्रतिबंदी मोचनमाशङ्कते **नान्येति** (कं. १३२.१७)। **अप्रतीयमानाऽपि** (कं. १३२.१३) शब्दातिरिक्तलिङ्गेनेति शेषः। कार्येण वाक्यात्मके न्यायसमानन्यायतया परिहरति **विप्रलम्भकस्येति** (कं. १३२.२२) अस्त्वेवं विप्रलम्भकविवक्षया, न्वविवक्षायास्तु का गतिरत आह **मिथ्येति** (कं. १३२.२५)। विप[र्य]स्तस्यापि संसर्गमात्रे भ्रमः। पदार्थस्मृतिस्तु सत्यैवेति भावः। नन्वेवमप्यनुभवतामात्रं प्रतिपाद[ना]य पदार्थे किमायातमत आह **अनुभवश्चेति** (कं. १३२.२६)। वाक्यात्परम्परयार्थानुमानस्यानुकूलतर्कमाह **अन्यथेति** (कं. १३२.२६)। अपुरुषार्थत्वात् = प्रवृत्तिनिवृत्तियोग्यार्थविरहात्।

---

१ अन्यथा च – कं. १, कं २। २ विवक्षा स्मरणकारणिका–कं. १, कं. २। ३ °प्रतिवादिनोर्जय–क. १, कं. २।
४ न गृह्यमाणे द्रव्ये–अ, ब, क। ५ नान्य–कं, ब।

## न्यायकन्दली

एवं व्यवस्थिते परिमाणे तस्य भेदं कथयति–तच्चतुर्विधमिति। यत्न रूपेण चातुर्विध्यं तद्दर्शयति–अणु महद् दीर्घं ह्रस्वं चेति। चतुरस्रादिकं त्ववयवानां [1]संस्थानविशेषो न परिमाणान्तरम्। दीर्घत्वादयोऽपि तथा भवन्तु? न, अवयवसंस्थानानुपलम्भेऽपि दूराद्दीर्घादिप्रत्य[2]यस्य दर्शनात्। अपि च भोः! द्व्यणुकपरिमाणं तावदणु, महत्परिमाणोत्पत्तौ कारणाभावात्। तस्माच्च परमाणुपरिमाणमपकृष्टम्, कार्यपरिमाणात् कारणपरिमाणस्य हीनत्वदर्शनात्। ततश्च परमाणोः परिमाणं द्व्यणुकपरिमाणाद्भिन्नम्। एवं घटादीनां परिमाणादन्यदेव प्रकर्षपर्यन्तप्राप्तमाकाशादिपरिमाणम्, तथा दीर्घं ह्रस्वं चेति परिमाण[3]मष्टविधमेव, कुतश्चातुर्विध्यमित्याह–तत्रेति। तेषु [4]चतुर्विधेषु परिमाणेषु मध्ये महद् द्विविधं नित्यमनित्यं चेति। केषु [5]नित्यमित्याशङ्क्याह–नित्यमाकाशकालदिगात्मसु। तच्च परममह[6]त्त्वमित्युच्यते। अनित्यं महत्परिमाणं त्र्यणुकादावेव नाकाशादिष्वित्यर्थः।

[टि०] षड्विधमेव इति–यैराकाशे दीर्घत्वं [7]परमाणौ च ह्रस्वत्वं नाभ्युपगम्यते तदभिप्रायेणोक्तम्। स्वाभिप्रायेण तु आकाशदीर्घत्वस्य परमाणुह्रस्वत्वस्य च स्वीकारादष्ट(द्व्य)विधत्वं ज्ञेयम्।

[पं०] परवाक्यं **दीर्घत्वादयोऽपि तथा भवन्त्विति** (कं १३३.८)। सूरिवाक्यं नेत्यादि (कं. १३३.८)। अथ सूरिरेव शिष्यानामन्त्र्य कथयति **अपि भोः** (कं. १३३.९) इत्यादि। [8]**तस्मादिति** (कं. १३३.१०) द्व्यणुकपरिमाणात्। **षड्विधमेवेति** (कं. १३३.१३) परमाणौ परमाणुत्वम् १, द्व्यणुकेऽणुत्वम् २, घटादिषु महत्त्वम् ३, आकाशादिषु परममहत्त्वम् ४, दीर्घम् ५, ह्रस्वं ६ चेति षट्विधत्वम्। *अन्यथा परमशब्देन विशेषणयोगादिति। अन्यथा* संज्ञान्तरमेव कुर्यात्। न तु परमशब्देन विशिष्यादित्यर्थः।

[कु०] एवं शब्दस्यार्थसाधकत्वं प्रसाध्य परिमाणस्य द्रव्याद्व्यतिरेकेण सिद्धसाधनत्वमाशङ्कते **यच्चेति** (कं. १३३.३)। दूषयति **तदसिद्धमिति** (कं. १३३.४)। नैवमित्याशङ्क्य परिहरति–**अत एवेति** (कं. १३३.५)। संस्थानभेदो द्रव्यारम्भकसंयोगविशेष एव।

अवान्तरभेदेन प्रकाराधिक्यमाशङ्क्य भाष्येण परिहारयति–[9]**अयि भो** इति (कं. १३३.९)। कारणवर्त्तितया अणुपरिमाणस्य प्राथम्येऽपि प्रत्यक्षसिद्धतया महत्त्वस्य प्रथमं व्याख्यानमिति द्रष्टव्यम्। ननु महत्त्वाद्भिन्नं परम[मि]किमिति प्रयुक्तवानित्यत आह [10]**तत्परमिति** (कं. १३३.१५)। एवं शास्त्रप्रसिद्धिरित्यर्थः।

---

१ संस्थानभेदो–जे. १, जे. २। २ प्रत्ययदर्शनात्–जे. १, जे. २। ३ षड्विध–कं. १, जे. १, जे. २ अत्र कं. २ सम्पादकेन स्वबुद्ध्याऽष्टविधमेव इति पाठः कल्पितः सोऽर्थदृष्ट्या समीचीनोऽस्तीति स्वीकृतः–सं.। ४ चतुर्षु–कं. १, कं. २। ५ इत्याह–कं. १, कं. २। ६ परममहत्त्वमुच्यते–जे. १, जे. ३। ७ परिमाणौ–इ ८ तस्माच्च–कं। ९ अपि भोः–कं भाष्ये प्रतीकमिदं नास्ति। १० तच्च परम. कं।

## प्रशस्तपादभाष्यम्

[136] तथा चाण्वपि द्विविधम्–नित्यमनित्यं च। नित्यं परमाणुमनस्सु तत् पारिमाण्डल्यम्। अनित्यं द्व्यणुक एव। [1]कुवलामलकबिल्वादिषु महत्स्वपि तत्प्र[2]कर्षभावाभावमपेक्ष्य भाक्तो[3]ऽणुव्यवहारः।

## न्यायकन्दली

[136] यथा महद् द्विविधं तथाण्वपि द्विविधं नित्यमनित्यं च। उभयत्रापि चकारः प्रकारान्तरव्यवच्छेदार्थः। नित्यमणुपरिमाणं परमाणुमनःसु, उत्पत्तिविनाशकारणाभावात्। पारिमाण्डल्यमिति सर्वापकृष्टं [4]परिमाणम्। अनित्यमणुपरिमाणं द्व्यणुक एव नान्यत्रेत्यर्थः। एतेनैतदुक्तं भवति, अणुपरिमाणप्रभेद एव परमाणुपरिमाणं महत्परिमाणप्रभेदश्च परममहत्परिमाणम्, अन्यथा परमशब्देन विशेषणायोगात्। यत्खलु परिमाणं रूपसहायं स्वाश्रयं प्रत्यक्षयति तत्र महदिति व्यपदेशः, यच्च नो प्रत्यक्षयति तत्राण्विति व्यवहारः। न चैवं सति त्र्यणुकस्याप्यणुत्वप्रसक्तिः? तस्यापि प्रत्यक्षत्वात्, त्र्यणुकमस्मदादिप्रत्यक्षं बहुभिः समवायिकारणै[5]रारब्धत्वात्, [6]घटादिवत्। यस्य च [7]प्रत्यक्षस्य

[त्रि०] [136] परमाणु[8]मनस्सु इति :–परमाणुत्वस्य साधारणत्वेऽपि द्रव्यानारम्भकत्वेनासाधारणत्वान्मनसः पृथग् निर्देशः। त्र्यणुकमस्मदादि इति – अत्र वायुव्यवच्छेदार्थं विवादाध्या[9]सितपदं कार्यम्। वायुत्र्यणुकेन व्यभिचारवारणार्थमुद्भूत[10]रूपवत्त्वे सतीति हेतुर्विशेषणीयः। [11]आकाशस्य प्रत्यक्षेति – आकाशपरिमाणं महत् [12]द्व्यणुकव्याप्त्यधिकव्याप्तिकाश्रयाश्रितत्वात् घटादिपरिमाणवत्।

[पं०] [136] [13]प्रत्यक्षद्रव्यस्यावयवा (कं. १३३.२५) इति द्व्यणुकत्रयलक्षणाः। प्रत्यक्षहेतुत्वाभावेऽपीति (कं. १३३.२६) यत्खलु परिमाणं रूपसहायमित्यादि (कं. १३३.२१) वचनात् महत्त्वसाधनोऽयम्। प्रयोगमाह तदाश्रयस्य द्व्यणुकव्याप्तितोऽधिकव्याप्तिकत्वाद् घटादिपरिमाणवदिति (कं. १३३ २६)। तदाश्रयस्येति नभसः। शेषं सुगमम्। व्याप्तिरत्रैवं दर्शनीया– 'यद्यद् द्व्यणुकव्याप्तितोऽधिकं तत्तन्महद् यथा घटादि'।

[कु०] [136] सर्वापकृष्टमित्य(कं. १३३.१८)नेन सर्वतोभावे प्रवृत्तिं दर्शयति। पारिमाण्डल्यशब्दस्य पङ्कजादिशब्दवद्योगरूढितां दर्शयति। कथमेतेन प्रकाराधिक्यं परिहृतमित्यत आह एतेनेति (कं. १३३.१९)। ननु परस्परप्रकर्षनिकर्षापेक्षया महदणुव्यवहारः, तत्कथमिदं व्यवस्थेत्यत आह यत्खल्विति (कं. १३३.२१)। [14]बहुभिरारभ्यमाण-

१ कुवलया – कं. १, कं. २। २ प्रकर्षभाव – दे। ३ ऽणुत्व – कं. १, कं. २। ४ 'परिमाणम्' इति – जे. १, जे. २ पुस्तकयोर्नास्ति। ५ रारब्धमाणत्वात् – जे. २। ६ घटवत् – कं. १, कं. २। ७ प्रत्यक्षद्रव्यस्य – जे. १, जे. २। ८ मनःस्थिति – ब; ९ दाध्यासितं – अ, ब, क; १० रूपत्वे – ड; ११ आकाशपरिमाणस्य – मु. – जे. १, जे. ३। १२ महत् [द्व्यणुत्वैकार्थसमवेते दीर्घत्वह्रस्वत्वे प्रतिपादितव्याप्त्यधिकव्याप्तिकाश्रयत्वात्] अ; ब – पुस्तके [ ] एतच्चिह्नान्तर्गतः पाठः लिखित्वाऽप्यधिक इति सूचितम्। १३ प्रत्यक्षस्य – कं। १४ बहुभिः समवायिकारणैरारब्धत्वात् – कं।

## प्रशस्तपादभाष्यम्

दीर्घत्वह्रस्वत्वे [1]चोत्पाद्यमहदणुत्वैकार्थसमवेते। समिदिक्षुवंशादिष्वञ्जसा [2]दीर्घेष्वपि [3]तत्प्रकर्षभावाभावमपेक्ष्य भाक्तो [4]ह्रस्वत्वव्यवहारः।

अनित्यं चतुर्विधमपि संख्यापरिमाणप्रचययोनि।

## न्यायकन्दली

द्रव्यस्यावयवा न प्रत्यक्षास्तदेव त्र्यणुकम्। आकाशपरिमाणस्य तु प्रत्यक्षहेतुत्वाभावेऽपि महत्त्वमेव, तदाश्रयस्य द्वयणुकव्याप्तितोऽधिक[5]व्याप्तिकत्वात्, घटादिपरिमाणवत्।

अनित्यमणुपरिमाणं द्वयणुक एवेत्ययुक्तम्, [6]कुवलामलकबिल्वादिषु परस्परापेक्षयाणुव्यवहारदर्शनादत आह—[7]कुवलामलकबिल्वादिष्विति। बिल्वे यः प्रकर्षभावो महत्परिमाणातिशययोगित्वं तस्यामलकेऽभावमपेक्ष्याणुव्यवहारो भाक्तः। उभाभ्यां भज्यते इति भक्तिः सादृश्यम्, तस्यायमिति भाक्तः। सादृश्यमात्रनिबन्धनो गौण इत्यर्थः। एवमामलकपरिमाणातिशयाभावं कुवलेऽपेक्ष्याणुव्यवहारः। यत्र हि मुख्यमणुत्वं द्वयणुके तत्र महत्परिमाणस्याभावो दृष्टः। आमलकेऽपि यादृशं बिल्वे महत्परिमाणं तादृशं नास्तीत्येतावता साधर्म्येणोपचारप्रवृत्तिः।

[**टि०**] अथ स्वमतं प्रकाशयति अन्ये तु इति, ननु भाष्ये उत्पाद्यमहदणुत्वैकार्थसमवेते प्रतिपादिते न तु नित्यमहदणुत्वैकार्थसमवेते इत्यस्मिन्पक्षे भाष्यविरोधः? नैवम्, उत्पाद्ययोर्दीर्घत्वह्रस्वत्वयोस्तथानियमात्। अनुत्पाद्ययोरनुत्पाद्यमहदणुत्वैकार्थं [8]नियमाविरोध एवेति। **सर्वत्रैव** [9]**भाक्त** इति :— सर्वत्रेति परमाणुद्वयणुकादौ।

[**पं०**] परः प्राह—[10]**अनित्यादि** (कं. १३४.१)। [11]**कुवलामलकबिल्वादिष्विति** (कं. १३४.२) कुवलं बदरम्। **एतावता साधर्म्येणोप**[12]**चारवृत्तिरिति** (कं. १३४.८) अत एव भक्तिः सादृश्यमित्युक्तम्।

[**कु०**] त्वादिति (कं. १३३.२४) बहुत्ववदारब्धत्वादित्यर्थः। बहुत्ववत्त्वं च आरम्भकस्य समवायेन वा, एकार्थसमवायेन वा द्रष्टव्यमिति व्याख्येयम्। ततश्च 'द्वयणुकमस्मदादिप्रत्यक्षं रूपवत्त्वे सति द्वाभ्यामारभ्यमाणत्वाद्' द्वितन्तुकवदिति प्रतिबंदी निरस्तः स्यात्। बहुत्ववदारब्धस्योपाधित्वात्—द्वितन्तुकस्य च बहुत्वैकार्थसमवेतारब्धत्वेन बहुत्ववदारब्धत्वात्, बहुत्वे सतीति विशेषणीयो हेतुर्वा। त्र्यणुके व्यभिचारपरिहाराय द्वयणुकं व्याप्त्यधिकं [13]व्याप्तितोधिकव्याप्तिकत्वादिति द्वयणुकसंयोग्यधिकसंयोगित्वादित्यर्थः।

---

१ तूत्पाद्य—दे। २ दीर्घेऽपि—दे। ३ प्रकर्षाभावा—दे। ४ ह्रस्वव्यवहारः—जे। ५ °व्याप्तित्वात्—जे. १, जे. २। ६, ७ कुवलया—कं. १, कं. २ कि.। ८ नियमादिविरोध — अ, ब, क। ९ भक्त—अ; १० अनित्यमित्यादि — कं. १ कं २। ११ कुवल्य — कं; अशुद्धमेतत् — सं। १२ —°पचारप्रवृत्तिः — कं। १३ कन्दल्यामेवमस्ति।

प्रशस्तपादभाष्यम्

तत्रेश्वरबुद्धिमपेक्ष्योत्पन्ना परमाणुद्व्यणुकेषु बहुत्वसंख्या, तैरारब्धे कार्यद्रव्ये त्र्यणुकादिलक्षणे रूपाद्युत्पत्तिसमकालं महत्त्वं दीर्घत्वं च करोति।

द्विबहुभिर्म[1]हद्भिश्चारब्धे कार्यद्रव्ये कारणमहत्त्वान्येव महत्त्वमारभन्ते न बहुत्वम्। समानसंख्यैश्चारब्धेऽतिशयदर्शनात्।

न्यायकन्दली

दीर्घत्वह्रस्वत्वयोर्वि[2]षयं दर्शयति-दीर्घत्वह्र[3]स्वत्वे चेति। [4]महत्वं चाणुत्वं च महदणुत्वे, उत्पाद्ये च ते महदणुत्वे चेत्युत्पाद्यमहदणुत्वे, ताभ्यामेकस्मिन्नर्थे समवेते दीर्घत्वह्रस्वत्वे। यत्रोत्पाद्यं महत्त्वं त्र्यणुकादौ तत्रोत्पाद्यं दीर्घत्वम्, यत्र चोत्पाद्यमणुत्वं द्व्यणुके तत्रोत्पाद्यं ह्रस्वत्वमित्यर्थः। तत्र परमाणोः परिमण्डलत्वाद्ध्रस्वत्वाभावो [5]व्यापकत्वाच्चाकाशस्य दीर्घत्वाभाव इत्येके। अन्ये तु परमाणुपरममहद्व्यवहारवत् परमह्रस्वपरमदीर्घव्यवहारस्यापि लोके दर्शनात् परमाणुषु परमह्रस्वत्वं परमदीर्घत्वं चाकाशे इत्याहुः। दीर्घपरिमाणाधिकरणमाकाशं महत्परिमाणाश्रयत्वात् स्तम्भादिवत्। एवं ह्रस्वपरिमाणाश्रयः परमाणुः, अणुपरिमाणाश्रयत्वात्, द्व्यणुकवत्।

[टि०] [6]तत्रेश्वरबुद्धिमपेक्ष्य इति – यद्यपीश्वरबुद्धेरन्येऽप्येकगुणा विषयास्तथाप्यदृष्टस्य नियामकत्वादपेक्षाबुद्धिकत्वम्। [7]तत्र सङ्ख्यापि इति :-'अपि' शब्दोऽवधारणे।

[पं०] विशेषं दर्शयतीति (कं. १३४.९) विषयं दर्शयतीत्यपि पाठः। उत्पाद्ये इति (कं. १३४.१०) अनित्यत्वात्। ताभ्यामिति (कं. १३४.१०) तृतीयान्तं पदम्। परिमण्डलत्वादिति (कं. १३४.१३) परमाणोः परिमाणं परिमण्डलम्। इत्येके इति (कं. १३४.१३) व्योमशिवपादाः। अन्ये त्विति-(कं. १३४.१४) ग्रन्थकारमतम्। अत एवैतत्साधनाय प्रयोगः परमाणुषु परमह्रस्वत्वं परमदीर्घत्वं चाकाश इत्याहुरिति (कं. १३४.१५)। परमाणौ आकाशे च ह्रस्वत्व-दीर्घत्वे अनुत्पाद्ये इति ब्रुवन्तीत्यर्थः।

[कु०] प्रकर्षभावाभावस्योभाभ्यां भिद्यमानत्वं दर्शयति यत्र हीति (कं. १३४.६)। आहुरिति ब्रूम इत्यर्थः। प्रमाणोपन्यासात् किं नेष्यते इति मुख्यत इति शेषः।

---

१ महद्भिरारब्धे–जे. दे। २ विशेष–कं. १, कं. २। ३ °ह्रस्वत्वे इति। ४ महत्त्वाणुत्वं च–जे. १, जे. २; महच्चा–कं. १, कं. २। ५ व्यापकत्वादा–जे. १, जे. २। ६ प्रतीकमिदं तत्र सङ्ख्यापि इत्यस्मादनन्तरं सर्वेष्वपि पुस्तकेषु किन्तु तत्र तस्यासङ्गततया यथास्थानं स्थापितम्। ईश्वरबुद्ध्यपेक्षस्य इति मु. पुस्तके। ७ तत्रावयवसङ्ख्यापि मु, तत्र सङ्ख्यापि–जे. १, जे. ३।

न्यायकन्दली

यदि ह्रस्वत्वमुत्पाद्येनाणुत्वेनैकार्थसमवेतं कथमन्यत्र ह्रस्वत्वव्यवहारः ? तत्राह–समिदिक्षुवंशादिष्विति । समिच्चेक्षुश्च वंशाश्च समिदिक्षुवंशाः । एतेष्वञ्जसा परमार्थतो दीर्घेष्वपि [1]वंशे यः परिमाणप्रकर्षभावो दीर्घातिशययोगित्वं तस्याभावमिक्षावपेक्ष्य प्रतीत्य भाक्तो गौणो व्यवहारः, एवमिक्षोः प्रकर्षभावस्तस्याभावं समिध्यपेक्ष्य ह्रस्वव्यवहारः । यत्खलु परमार्थतो ह्रस्वं द्व्यणुकं तत्र दैर्घ्याभावः, इक्षावपि वंशस्य यादृशं दैर्घ्यं तादृशं नास्तीत्युपचारः । नन्वेतेषु वास्तव एव ह्रस्वत्वव्यवहारः किं नेष्यते ? नेष्यते, तेष्वेव परापेक्षया दीर्घव्यवहारदर्शनात् । न चैकस्य दीर्घत्वं ह्रस्वत्वं चोभयमपि वास्तवं युक्तम्, विरोधात् । अथ कस्माद् दीर्घव्यवहार एव गौणो न भवति ? न तस्योत्पत्ति[2]कारणसम्भवात् । सर्वत्रैव भाक्तो ह्रस्वव्यवहारो भवतु ? नैवम्, मुख्यभावे गौणस्यासम्भवात् ।

अथेदानीमुत्पाद्यस्य परिमाणस्य कारणनिरूपणार्थमाह–अनित्यं चतुर्विधमपीति । अनित्यं चतुर्विधमपि दीर्घं ह्रस्वं महद् [3]अणु चेति चतुर्विधं परिमाणम्, संख्यापरिमाणप्रचययोनि, संख्यापरिमाणप्रचयकारणकम् । संख्यायास्तावत्कारणत्वमाह–तत्रेति ।

[पं०] एकार्थसमवेतमिति (कं १३४.१८) एकार्थो द्व्यणुकलक्षणः । अन्यत्रेति (कं. १३४.१८) पदार्थान्तरे । अंजसेति (कं. १३४.१९) व्याख्येय पदं परमार्थत (कं. १३४.१९) इति व्याख्यानपदम् । तादृशं नास्तीत्युपचार इति (क. १३४.२३) सादृश्यं हि विना उपचारो न सम्भवति । नन्वेतेष्वित्यादि (कं. १३४.२३) परप्रश्नः । नेष्यते (कं. १३४.२४) इत्यादि उत्तरम् । तस्योत्पत्ति[4]कारणसम्भवादिति (कं. १३४.२६) तस्येति दीर्घस्योत्पत्तिकारणमस्ति कृतकत्वात् ह्रस्वस्योत्पत्तिकारणं नास्ति परमाणोर्नित्यत्वादित्यर्थः । परः प्राह सर्वत्रैवेत्यादि (कं. १३४.२६) ।

[कु०] उत्पाद्यस्येति (कं. १३४.२७) अनित्यशब्दोऽविनाभावेनोत्पत्तिं लक्षयतीति । परमाणुद्व्यणुकमित्युच्यत इति (कं. १३५.३) परमाणवो द्व्यणुकादिप्रक्रमेणैव कार्यमारभन्त इति दर्शयितुमिति शेषः । अत्र भाष्ये ईश्वरग्रहणं द्व्यणुकस्यास्मदाद्यतीन्द्रियत्वात् । यद्यपीश्वरबुद्धिः(द्धेः) सर्वविषयत्वात्त्रीण्येवैकत्वानि[स]माहृत्य न विषयीकरोति तथापि द्व्यणुकोत्पादकादृष्टसहकारितया त्रित्वोत्पत्त्यनुकूलापेक्षया बुद्धिः [स][5]म्भवत्येवेति भावः । गुरुत्वद्रवत्वयोर्विजातीयपतनस्पन्दनारम्भकत्वदर्शनाद्गुणमारभमाणानामित्युक्तं संयोगस्येति । अत्र विभाग आश्रयविनाशितया विरोधान्न महत्त्वकारणं शब्दबुद्ध्यादयस्तु प्रत्यासत्तेरिति द्रष्टव्यम् । ईश्वरबुद्ध्यपेक्षस्य त्रित्वस्येत्युपलक्षणम् । द्व्यणुकाणुत्वारम्भकपरमाणुद्वित्वस्याप्यदृष्टक्षयादेव विनाशः । आश्रयविनाशस्यासम्भवात् ।

---

१ तस्मिन् वंशे–जे. १, जे. २ । २ कारणासम्भवात्–कं. १, कं. २ । ३ अणुत्वं–जे. १, जे. २ । ४ कारणा–कं । ५ भवन्त्येव–ह. लि ।

## न्यायकन्दली

परमाणुभ्यामारब्धं द्व्यणुकं परमाणुद्व्यणुकमित्युच्यते। तेषु त्रिष्वेकैकगुणालम्बनामीश्वरबुद्धिमपेक्ष्योत्पन्ना या त्रित्वसंख्या [1]सा तैस्त्रिभिर्द्व्यणुकै[2]रारब्धे कार्यद्रव्ये त्र्यणुकलक्षणे रूपाद्युत्पत्तिसमकालमेव महत्त्वं दीर्घत्वं च करोति। तत्रेतिपदं महत्परिमाणकारण[3]निर्द्धारणार्थम्, त्र्यणुकादीत्यादिपदं चतुरणुकादिपरिग्रहार्थम्। कथं पुनरेष निश्चयः, त्र्यणुकादिपरिमाणस्य द्व्यणुकगता बहुत्वसंख्यैवासमवायिकारणमिति? अन्यस्यासम्भवात्। न तावद् द्व्यणुकवृत्तयो रूपरसगन्धस्पर्शैकत्वैकपृथक्त्वगुरुत्वद्रवत्वस्नेहास्तस्यासमवायिकारणम्, तेषां कारणवृत्तीनां कार्ये गुणमारभमाणानां समानजातीयगुणान्तरारम्भे एव सामर्थ्यदर्शनात्। द्व्यणुकाणुपरिमाणानां चारम्भकत्वे त्र्यणुकस्याणुत्वमेव स्यान्न महत्त्वम्, परिमाणात् समानजातीयस्यैव परिमाणस्योत्पत्त्यवगमात्। अस्ति चात्र महत्त्वम्, भूयोऽवयवारब्धत्वाद् घटादिवत्। न चासमवायिकारणं विना कार्यमुत्पद्यते, दृष्टश्चान्यत्रावयवसंख्याबाहुल्यात् समानपरिमाणारब्धयोः कार्ययोरेकत्र महत्त्वातिशयः। तेनात्र संख्याया एव कारणत्वं कल्प्यते। द्व्यणुकसंयोगाभ्यां [4]त्र्यणुके महत्त्वोत्पत्तिरिति चेन्न, संयोगस्य महत्त्वारम्भकत्वे द्व्यणुकेऽपि महत्त्वोपपत्तिः स्यात्, [5]यदि तु भूयसामवयवानां संयोगः कारणमित्युच्यते, प्राप्ताप्राप्तविवेकादवयवानां भूयस्त्वमेव कारणं समर्थितं स्यात्, ईश्वरबुद्ध्यपेक्षस्य त्रित्वस्य स्थितिहेत्वदृष्टक्षयाद्विनाशो न तु कदाचिदाश्रयविनाशादपि [6]विनाशः, न त्वपेक्षाबुद्धिविनाशाद् विनाशः ईश्वरबुद्धेर्नित्यत्वात्।

[पं०] तेष्विति (कं. १३५.४) द्व्यणुकेषु। **ईश्वरबुद्धिमपेक्ष्योत्पन्नेति** (कं. १३५.४) अपेक्षाबुद्धिजा सङ्ख्येति वचनात्। **कथं पुनरित्यादि** (कं. १३५.७) परप्रश्नः। **श्रीधरः** प्राह **अन्यस्यासम्भवादित्यादि** (कं. १३५.८) **तस्येति** (कं. १३५.९) महत्परिमाणस्य। **कारणवृत्तीनामिति** (कं. १३५.९) द्व्यणुकत्रयवृत्तीनाम्। **अस्ति चात्र महत्त्वमिति** (कं. १३५.१२) अत्र द्व्यणुके। **एकत्र महत्त्वातिशय** इति (कं. १३५.१४) यत्रावयवसङ्ख्याबाहुल्यम्। **द्व्यणुकसंयोगाभ्यामिति** (कं. १३५.१५) त्रिभिर्द्व्यणुकैर्हि संयोगद्वयं भवति अन्तरद्वयसंयोगद्वयदर्शनात् स्थापना ००० । [7]**द्व्यणुकेऽपि महत्त्वोत्पत्तिः स्यादिति** (कं. १३५.१५) तत्रापि परमाणुद्वयस्य संयोगात्। **कारणमिति** (कं. १३५.१६) महत्परिमाणस्य कारणमित्यर्थः। **प्राप्ताप्राप्तविवेकादवयवानां भूयस्त्वमेव कारणं समर्थितं स्यादिति** (कं. १३५.१६) **प्राप्ताप्राप्तविवेकादिति**–अन्वयव्यतिरेकविवेकात्। प्राप्ता अप्राप्ता वा भूयांसोऽवयवा महत्परिमाणस्य कारणं स्युर्भूयस्त्वं च सङ्ख्यैवेत्यर्थः। परत्वापरत्वद्विपृथक्त्वादीनि स्वकारणान्येवेति नात्र चिन्तितानि। **ईश्वरबुद्ध्यपेक्षस्य त्रित्वस्य स्थितिहेत्वदृष्टक्षयाद्विनाश** इति (कं. १३५.१७) अन्यत्र हि सङ्ख्याऽपेक्षाबुद्धेर्जायते तद्विनाशाद्विनश्यति। [8]**कदाचिदाश्रयविनाशादपि विनाश इति** (कं. १३५.१८) यत्र त्रयाणां द्व्यणुकानां मध्यादेकं द्वि त्रिण्यपि च विनश्यन्ति।

---

१ सा त्रिभि–कं. १, कं. २। २ आरब्ध–कं. १, कं. २। ३ निवारणार्थम्–कं. १, कं. २। ४ त्र्यणुके महत्त्वोत्पत्तिः स्यात्–कं. १, कं. २। ५ यदि–कं. १; कं. २। ६ विनाशः ईश्वरबुद्धेर्नित्यत्वात्–कं. १, कं. २, कि। ७ त्र्यणुके महत्त्वोत्पत्ति–कं। ८ न तु कदाचिदाश्रयविनाशादपि–कं।

## न्यायकन्दली

सम्प्रति महत्त्वान्महत्त्वोत्पत्तिमाह–द्विबहुभिर्महद्भिरिति । द्वौ च [1]बहवश्च द्विबहवः तैरारब्धे कार्यद्रव्ये कारणमहत्त्वान्येव महत्त्वमारभन्ते, यत्र द्वाभ्यां महद्भ्यामप्रचिताभ्यामारभ्यते द्रव्यं तत्रावयवमहत्त्वाभ्यामेव महत्त्वस्योत्पादो बहुत्वसंख्याप्रचययोरभावात् । [2]यत्र च बहुभिर्महद्भिरवयवैः कार्यमारभ्यते तत्रावयवमहत्त्वेभ्योऽवयविनि महत्त्वस्योत्पादो न बहुत्वसंख्यायाः, समानसंख्यैः स्थूलैः सूक्ष्मैश्चारब्धयोर्द्रव्ययोः स्थूलारब्धे महत्त्वातिशयदर्शनात् । संख्यायाः कारणत्वे हि कार्यविशेषो न स्यात्, तस्या अविशेषात् । यत्र तु समानपरिमाणैरवयवैरारब्धयोरवयवसंख्याबाहुल्यादेकत्र परिमाणातिशयो दृश्यते [3]तत्रावयवसंख्यापि कारणमे[4]ष्टव्या, अन्यथा कार्य[5]विशेषायोगः । यत्र समानसंख्यैः समानपरिमाणैश्च कार्यमारब्धम्, तत्र महत्त्वोत्पत्तावुभयोरपि कारणत्वम्, प्रत्येकमुभयोरपि सामर्थ्यदर्शनात्, तत्रान्यतरविशेषा[6]दर्शनादित्येके । अपरे तु परिमाणस्यैव कारणतामाहुः, समानजातीयात् कार्योत्पत्तिसम्भवे विजातीयकारणकल्पनानवकाशात् ।

[पं०] **महत्त्वादिति** (कं. १३५.१९) परिमाणादित्यर्थः । **अप्रचिताभ्यामिति** (कं. १३५.२१) प्रचयः शिथिलः संयोगविशेषस्तद्रहिताभ्यां निबिडसंयोगाभ्यामित्यर्थः । **बहुभिर्महद्भिरवयवैरिति** (कं. १३५.२२) अत्र अप्रचितैरिति दृश्यम् अधिकारात् । **बहुत्वसङ्ख्या[या]** इति (कं. १३५.२३) पञ्चम्यन्तं पदम् । **अविशेषादिति** (कं. १३५.२५) तुल्यत्वात् । [7]**तत्र सङ्ख्यापीति** (कं. १३५.२७) अत्र अपिः अवधारणे सङ्ख्यैवेत्यर्थः । **उभयोरपीति** (कं. १३५.२८) [8]संख्यापरिमाणयोः । **तत्रेति** (कं. १३६.१) द्रव्ये । **एके** इति (कं. १३६.१) **व्योमशिवाचार्याः** । **अपरे त्विति** (कं. १३६.२) वयं **कन्दलीकाराः** । **समानजातीयादिति** (कं. १३६.२) परिमाणात् । **विजातीयकारणकल्पनानवकाशादिति** (कं. १३६.३) विजातीयं कारणमत्र सङ्ख्या ।

[कु०] **तत्रावयवमहत्त्वेभ्य** इति (कं. १३५.२३) अवयवमहत्त्वेभ्योऽपीत्यर्थः । [9]**न बहुत्वसङ्ख्याया** इति (कं. १३५.२३) केवलाया इति शेषः । किं तर्हि ! समुच्चिताभ्यामित्यर्थः । तदेतत्कुत इत्याशङ्कां महत्त्वस्यापि सामर्थ्यावधारणेन निवारयति [10]**समसङ्ख्यैरिति सङ्ख्यायाः का[र]णत्व** इति (कं. १३५.२५) केवलाया इति पूर्ववच्छेषः । बहुत्वस्यापि सामर्थ्यमवधारयति **यत्र त्विति** (कं. १३५.२७) महत्त्वोत्पत्तौ महत्त्वविशेषोत्पत्ताविति शेषः । एके वयमित्यर्थः । सामान्याकारविशेषं प्रति प्रयोजकत्वसाम्ये सजातीयत्वे पक्षपातो निष्प्रमाण इति भावः ।

---

१ बहवश्च तैराब्धे – कं. १; कं. २ । २ यत्र बहुभि – जे. ३ । ३ तत्र सङ्ख्यापि – जे. १, जे. २ । ४ मेष्टव्यम् – जे. १, जे. २ । ५ विशेषायोगात् – जे. १, जे. २ । ६ विशेषानवधारणात् – जे. १, जे. २ । ७ तत्रावयवसङ्ख्यापि – कं । ८ 'संख्या' इति अपुस्तके नास्ति । ९ ननु – ह. लि । १० समानसङ्ख्यै – कं ।

प्रशस्तपादभाष्यम्

[137] प्रचयश्च तूलपिण्डयोर्वर्तमानः पिण्डारम्भकावयव[1]प्रशिथिलसंयोगानपेक्षमाण इतरेतरपिण्डावयवसंयोगापेक्षो वा द्वितूलके महत्त्वमारभते [2]न बहुत्वमहत्त्वानि, समानसंख्यापलपरिमाणैरारब्धेऽतिशयदर्शनात् ।

न्यायकन्दली

[137] [3]प्रचयस्य कारणत्वमाह–प्रचयश्चेति । प्रचय इति द्रव्यारम्भकः प्रशिथिलः संयोगविशेषः । स तु द्वितूलकद्रव्यारम्भकयोस्तूलपिण्डयोर्वर्तमानः प्रत्येकं पिण्डयोरारम्भकान् प्रशिथिलानवयवसंयोगानपेक्षमाण इतरेतरपिण्डयोरवयवानां परस्परसंयोगानपेक्षमाणो वा द्वितूलके महत्त्व[4]मारभते । यत्र पिण्डयोः संयोगः स्वयं प्रशिथिलस्तयोरारम्भकाश्चावयव[5]संयोगा अपि प्रशिथिलास्तत्र पिण्डाभ्यामारब्धे द्रव्ये निबिडावयवसंयोगारब्धपिण्डद्वयनिबिडसंयोगजनितद्रव्यापेक्षया महत्त्वातिशयदर्शनात्, पिण्डयोः प्रशिथिलः संयोगः पिण्डारम्भकप्रशिथिलसंयोगापेक्षो महत्त्वस्य कारणम् । यत्र तु पिण्डयोः

[टि०] [137-138] [6]गुणकर्मारम्भे तु सापेक्ष इति वचनादपेक्षणीयं दर्शयति प्रत्येकं पिण्डयोः इति । [7]अणुतमत्वप्रसक्तिः इति कारणसमानजातीयापेक्षया कार्यपरिमाणस्य सातिशयितादर्शनात् । परमाणुपरिमाणम् इत्यादि :–

[पं०] [137] द्वितूलकद्रव्यारम्भकयोरिति (कं. १३६.४) तूलशब्देन पिण्डः संयोगो गुणकर्मारम्भे सापेक्ष इति वचनादपेक्षणीयं दर्शयति प्रत्येकं पिण्डयोरित्यादि (कं. १३६.५) । संदर्भेण संयोग इति (कं. १३६.७) परस्परं संयोगः । तयोरिति (कं. १३६.७) पिण्डयोः । [8]स्वावयवसंयोगा इति (कं. १३६.७) मौलिक्याः पिण्डद्वयारम्भकाः । पिण्डारम्भकप्रशिथिलसंयोगापेक्ष इति (कं. १३६.१०) पिण्डप्रत्येकस्थप्रशिथिलसंयोगापेक्ष इत्यर्थः । पिण्डयोरारम्भकाश्च न प्रशिथिला इति (कं. १३६.१२) पिण्डयोः प्रत्येकस्थाश्च संयोगास्ते प्रशिथिला इत्यर्थः । एतावान् विशेषः पाश्चात्यपक्षादत्रेति द्रष्टव्यम् । महत्त्वस्येति (कं. १३६.१४) महत्परिमाणस्य ।

[कु०] [137] [9]प्रचयो हीति (कं. १३६.३) अत्र द्रव्यारम्भक इति [वि]शेषणं द्रव्यारम्भकरस्य समवायिकारणाभावेन परिमाणानारम्भकत्वात् । प्रत्येकमिति (कं. १३६.५) इदं च गुणकर्मस्वारब्धेषु सापेक्ष इति नियमादुक्तमनुसन्धेयम् । [10]यत्र पिण्डयोरिति (कं. १३६.७) पूर्वत्र प्रमाणोपदर्शनम् । यत्र त्वित्युत्तरत्र ।

---

१ प्रशिथिलसंयोगापेक्षमाणः – कि; प्रशिथिलसंयोगापेक्षः – जे. व्यो. ४७७; प्रशिथिलावयवसंयोगापेक्षः – दे । २ न महत्त्वानि – कि. । ३ प्रचयमाह – कं. १; कं. २, कि । ४ मारभ्यते – कं. १; कं. २ । ५ संयोगा प्रशिथिलाः – जे. १; जे. २ । ६ गुणः कर्म्मारम्भे – ड; ७ अणुमहत्त्व – अ, ब, क; ८ -अवयवसंयोगा – कं. । ९ प्रचयश्च – कं । १० अत्र – ह. लि. ।

### न्यायकन्दली

संयोगः प्रशिथिल इतरेतरपिण्डावयवानामितरेतरावयवैः संयोगा अपि प्रशिथिलाः, पिण्डयोरारम्भकाश्च न प्रशिथिलाः, तत्र पिण्डाभ्यामारब्धे द्रव्येऽत्यन्तनिबिडपरस्परावयवसंयोगपिण्डद्वयारब्धद्रव्यापेक्षया महत्त्वातिशयदर्शनात् पिण्डयोः प्रशिथिलः संयोग इतरेतरपिण्डावयवसंयोगापेक्षो महत्त्वस्य कारणमिति विवेकः ।

अथ कथं तत्र बहुत्वमहत्त्वयोरेव क्लृप्तसामर्थ्ययोः कारणत्वं नेष्यते ? तत्राह— न बहुत्वमहत्त्वानीति बहुत्वमहत्त्वानीति विषय[1]भेदापेक्षया बहुवचनम् । [2]यत्र यत्र प्रचयविशेषात् परिमाणविशेषप्रतीतिरस्ति न [3]तत्र तत्र बहुत्वं महत्त्वं च कारणमित्यर्थः । अत्रोपपत्तिः—समानसंख्यापलपरिमाणैरारब्धेऽतिशयदर्शनात् । संख्या च पलं च परिमाणं च संख्यापलपरिमाणानि समानानि संख्यापलपरिमाणानि येषां तै[4]रारब्धे कार्येऽतिशयदर्शनात् । यदि हि संख्यैव कारणं समानसंख्यैस्त्रिभिश्चतुर्भिर्वा प्रशिथिलसंयोगैर्निबिडसंयोगैश्चारब्धयोर्द्रव्ययोः प्रशिथिलसंयोगारब्धे निबिडसंयोगारब्धापेक्षया महत्त्वातिशयो

[टि०] न चात्र स्पर्शवद्-द्रव्यपरिमाणत्वादि[5]त्युपाधिः, अनारम्भकस्यान्त्यावयविपरिमाणस्यास्पर्शवद्द्रव्यपरिमाणत्वाभावेन साध्यव्यापकत्वाभावात् । ननु तथापि कार्यपरिमाणस्यासमवायिकारणत्वाभावस्योपाधित्वं भविष्यति ? नैवम्, विपक्षे

[पं०] **अथ कथं तत्र बहुत्व–महत्त्वयोरेव [6]प्रकृष्टसामर्थ्ययोः कारणत्वं नेष्यते** इति (कं. १३६.१५) अत्र वाक्ये कारणत्वं नेष्यते इत्यस्मात्पुरः किं तु प्रचयस्यैव कारणत्वमिष्यते इति वाक्यमध्याहार्यम् । बहुत्वं सङ्ख्या 'बहुगणं भेद' इति वचनात्, महत्त्वं च परिमाणम् । अत एवाह **समानसङ्ख्यापलेत्यादि** (कं. १३६.१८) । कारणमिति महत्परिमाणस्य हेतुरित्यर्थः । **यदि हि सङ्ख्यैव कारणम्** (कं. १३६.२०) इत्यस्मात्पुरस्तदेत्यध्याहार्यम् । **त्रिभिश्चतुर्भिर्वे**ति (कं. १३६.२०) कल्पनया पश्वादिभिरपि । **आरब्धयोरि**ति (कं. १३६.२१). आरब्धयोर्द्रव्ययोर्मध्यादित्यर्थः । **महत्त्वातिशयो न स्यादि**ति (कं. १३६.२२) अथवास्तीति भावः । **कारणसङ्ख्याया** इति (कं १३६.२२) अत्र कारणं संयोगाः ।

[कु०] अस्तु बहुत्वसमत्वादिकारणं महत्त्वं तु सदेव कथमकारणमत आह **अत्रोपपत्तिरि**ति (कं. १३६.१८) । समान-*सङ्ख्यैस्त्रि(कं. १३६.२०)भिरित्यनेन भाष्ये सङ्ख्याग्रहणं सत्यपि बहुत्वे प्रचयस्य सामर्थ्यावधारणाय कृतमिति* दर्शनात् प्रकरणाविरोधः । *द्वित्वकालापेक्षया समानमहत्त्वाभ्यामिति वक्तव्ये समानमहत्त्वैरिति वचनं प्रयत्नस्य (प्रचयस्य)*

---

१ प्रचयभेदा – कं. १; कं. २ । २ यत्र प्रचयविशेषात् –कं. १; कं. २ । ३ तत्र बहुत्वं महत्त्वं च न– कं. १; कं. २ । ४ रारब्धेऽतिशयदर्शनात – जे. १; जे. २ । ५ दित्युपाधेः – ड; ६ न महत्त्वम् – कं ।

## न्यायकन्दली

न स्यात्, कारणसंख्याया उभयत्रापि तुल्यत्वात् । तथा यदि महत्त्वमपि कारणं समानमहत्त्वैः प्रचितैरप्रचितैश्चारब्धयोर्द्रव्ययोरप्रचितारब्धापेक्षया प्रचितारब्धे परिमाणातिशयो न भवेत्, अस्ति च विशेषः, [1]तेनैवं तर्कयामो न संख्या कारणं [2]नापि महत्त्वमिति । [3]यत्र त्वप्रचितैरणुभिर्महद्भिश्च प्रचितैरारब्धयोर्द्रव्ययोः प्रचितैर्महद्भिरारब्धे महत्त्वातिशयदर्शनं तत्र महत्त्वप्रचययोः कारणत्वम् । यत्र प्रचितैः समानपरिमाणैर्बहुतर[4]संख्याकैरप्रचितैश्चाल्पसंख्याकैः रब्धयोर्द्रव्ययोर्बहुतरसंख्याकैः प्रचितैरारब्धेऽतिशयदर्शनम्, तत्र संख्याप्रचययोः कारणत्वम् । यत्राप्रचितैरणुभिरल्पसंख्यैरारब्धात् प्रचितबहुतरस्थूलारब्धे विशेषदर्शनम्, तत्र त्रयाणामेव बोद्धव्यम् । यस्तु मन्यते तुल्य[5]परिमेयेषु द्रव्येषु कारणगतानि पलानि परिमाणोत्पत्तौ कारणं न महत्परिमाणानि, तन्मते पलस्य कारणत्वमभ्युपगम्य प्रतिषेधः कृतः, स्वमते तु पलस्याकारणत्वात् ।

[ट्रि०] कार्यस्याण्[6]तमस्वप्रसक्तिरिति बाधकस्य प्रबलत्वात् । **यदि दीर्घत्वमहत्त्वयो[7]रभेद** इति दीर्घत्वातिशयस्यैव तथा व्यवहारकारणत्वे महत्तरमानीयतामित्येव प्रत्ययः स्यान्नतु [8]दीर्घमिति । **न विजातीययोः** इति ह्रस्वत्वदीर्घत्वजात्यपेक्षया

[पं०] **यदि हि महत्त्वमपि कारणमि**(कं. १३६.२३)त्यस्मात्पुरस्तदेत्यध्याहार्यम् । **प्रचितैरिति** (कं. १३६.२३) शिथिलैः । **अप्रचितैरिति** (कं. १३६.२३) निबिडैः । **न सङ्ख्या कारणं [9]नापि महत्त्वमिति** (कं. १३६.२५) किन्तु प्रचय एव कारणमित्यर्थः । **प्रचितैरिति** (कं. १३६.२६) शिथिलैः । **आरब्धयोर्द्रव्ययोरिति** (कं. १३६.२६) आरब्धयोर्द्रव्ययोर्मध्यात् । **महत्त्वप्रचययोः कारणत्वमिति** (कं. १३७.१) अत्र प्रचयमहत्त्वयोः कारणत्वमिति व्याख्येयं पूर्वत्र **प्रचितैर्महद्भि** (कं. १३६.२६)रिति भणनात् । एवमुत्तरत्रापि यथासम्भवं व्याख्येयम्, न तु यथासङ्ख्यमनुसर्तव्यम्, अत्र ग्रन्थे यथासङ्ख्यमर्यादायाः प्रायेणाभावात् । **त्रयाणामेव बोद्धव्यमिति** (कं. १३७.४) सङ्ख्यापरिमाणप्रचयानामेव कारणत्वं द्रष्टव्यमित्यर्थः । **स्वमते तु पलस्याकारणत्वादिति** (कं. १३७.६) स्वमते तु न प्रतिषेधः कृतः प्राप्तेरभावात् । प्राप्तिपूर्वो हि प्रतिषेध इति तात्पर्यार्थः ।

[कु०] सामर्थ्यावधारणं पर्यालोच्येति प्रकरणाविरोधः । तदेवं प्रत्येकसामर्थ्यावधारणे न कारणत्वं निश्चित्य समुच्चयेऽपि सामर्थ्यमवतारयति [य]त्र त्विति (कं. १३६.२५) [10]**स्वमतेन** त्विति (कं. १३७ ६) तथा सङ्ख्यापरिमाणप्रचययोनीत्यनेन विरोधप्रसङ्गादिति भावः ।

---

१ तेनैव – कं. १; कं. २ । २ ने – कं. १; कं. २ । ३ यत्र प्रचितैरणुभिर्महद्भिश्चारब्धयो – जे. १; जे. २ । ४ सङ्ख्याकैरल्पसङ्ख्याकै इति – जे. १; जे. २ पुस्तकयोः पाठः किन्त्वत्रार्थदृष्ट्या रप्रचितैश्चाल्पसङ्ख्याकैरिति भाव्यम् । 'अल्पसङ्ख्याकैः' इति – कं. १, कं. २ पुस्तकयोर्नास्ति । ५ तुला – कं. १; कं. २ । ६ तमसत्व – ड; ७ रभेदे – अ; ८ दीर्घत्व – अ, ब । ९ न महत्त्वम् – कं । १० स्वमते तु – कं ।

प्रशस्तपादभाष्यम्

[138] द्वित्वसंख्या चाण्वोर्वर्तमाना द्व्यणुकेऽणुत्वमारभते ।

महत्त्ववत् त्र्यणुकादौ कारण[1]बहुत्वमहत्त्वसमानजातीयप्रचयेभ्यो दीर्घत्वस्योत्पत्तिः ।

[2]अणुत्ववद् द्व्यणुके द्वित्वसंख्यातो ह्रस्वत्वस्योत्पत्तिः ।

न्यायकन्दली

[138] द्वित्वसंख्या चाण्वोर्वर्तमाना द्व्यणुकेऽणुत्वमारभते। यस्तु परमाणुपरिमाणाभ्यामेव द्व्यणुके परिमाणोत्पत्तिमिच्छति, तं प्रति द्व्यणुकस्याप्यणुतमत्वप्रसक्तिरिति पूर्विकैव युक्ति[3]रावर्तनीया । अधिकं चैतद् [4]यन्नित्यद्रव्यपरिमाणस्यानारम्भकत्वम् । परमाणुपरिमाणं [5]न कस्यचिदारम्भकं नित्यद्रव्यपरिमाणत्वात्, आकाशादिपरिमाणवत्, परमाणुपरिमाणत्वाद्वा मनःपरिमाणवत् ।

[टि०] विजातीयत्वम्, यथा विजातीययोरेकत्वद्वित्वयोर्नैकत्र विरोधस्तथा परिमाणयो[6]रप्यविरुद्धयोरेकत्रावस्थानं न दुष्यति । विरुद्धयो[7]स्तु नैकत्रावस्थानमिति । अस्मदादीनां तु भाक्तयोः इति :– प्रत्यक्षसिद्धस्तु अस्मदादीनां अणुत्वमहत्त्वयो[र्भेद] इति । केचिद् बौद्धाः । केवलेति :– अन्योन्यापेक्षामन्तरेण यावत् हस्तवितस्त्यादिपरिमाणं वस्त्रादेस्तदन्यापेक्षायामपि तदवस्थ[8]मेवेति ॥ परिमाणम् ॥

[पं०] [138] इदानीमणुत्वस्योत्पत्तिमाह द्वित्वसङ्ख्या चाण्वोरित्यादिना (कं. १३७.७) । द्व्यणुकस्याप्यणुतमत्वप्रसक्तिरिति (कं. १३७.८) कारणानुरूपत्वात्कार्यस्य । अधिकं चैतदिति (कं. १३७.९) अयं चापरो दोष इत्यर्थः । तमेव दोषं दर्शयति यन्नित्यद्रव्यपरिमाणस्यानारम्भकत्वमिति (कं. १३७.९) । कोऽर्थः ? यदि हि परमाणुपरिमाणाभ्यां द्व्यणुकपरिमाणमारभ्यते तदा परमाणुपरिमाणस्यारम्भकत्वं प्रसज्यते इत्यर्थः ।

[कु०] [138] पूर्विकैव युक्तिरिति (कं. १३७.९) कार्ये परिमाणमारभ्यमाणस्य सजातीयोत्कर्षहेतुतावगम्यते, तथा महदारब्धं महत्तरम्, एवमण्वो[रा]रब्धमणुतरं भवेदित्यर्थः । अधिकं चैतदिति (कं. १३७.९) अस्यैव तर्कस्यानुग्राह्यं प्रमाणमित्यर्थः । आकाशादिपरिमाणवदिति (कं. १३७.११) न च द्रव्याणा[मा]रम्भकत्वमुपाधिः अनुकूलस्य तर्कस्याभिहितत्वात् । व्यापकमहत्त्वस्य सङ्ख्याकारकत्वेऽभिहितः परिशेष इहापि द्रष्टव्यः । स चास्येति कार्यविशेषणं कारणविशेषसामर्थ्यावधारणं महत्त्वेन तुल्यमित्यर्थः ।

---

१ बहुत्वसमानजातीयेभ्य– जे. १; दे । २ अणुवत् – दे । ३ राश्रयणीया – जे. २ । ४ नित्यपरिमाणस्यानारम्भकत्वम् – जे. २ । ५ न भवति – कं. १, कं. २ । ६ परिमाणयोरेकत्रावस्थानं – अ, ब, क; ७ 'दीर्घत्वमहत्त्वयोः' इति अधिकः पाठः अबकपुस्तकेषु । ८ भवति – अ ।

## प्रशस्तपादभाष्यम्

अथ त्र्यणुकादिषु वर्त्तमानयोर्महत्त्वदीर्घत्वयोः परस्परतः को विशेषः ? [1]द्व्यणुकेषु चाणुत्वह्रस्वत्वयोरिति । तत्रास्ति महत्त्वदीर्घत्वयोः परस्परतो विशेषः, महत्सु दीर्घमानीयताम्, दीर्घेषु च महदानीयतामिति [2]विशिष्टव्यवहारदर्शनादिति । अणुत्वह्रस्वत्वयोस्तु परस्परतो विशेषस्तद्दर्शिनां प्रत्यक्ष इति । [3]एतच्चतुर्विधमपि परिमाणमुत्पाद्यमा[4]श्रयविनाशादेव विनश्यतीति ।

## न्यायकन्दली

दीर्घत्वस्योत्पत्तिमाह–महत्त्ववदिति । यथा महत्त्वस्य कारणबहुत्वात् समानजातीयात् कारणमहत्त्वात् [5]प्रचयाच्चोत्पत्तिरेवं दीर्घत्वस्यापि कारणबहुत्वात् प्रचयोत्पत्तिरिति सर्वमस्य महत्त्वेन सह तुल्यम् । द्व्यणुके ह्रस्वत्वस्यापि द्वित्वसंख्यैवासमवायिकारणमित्याह–अणुत्ववदिति । कथमेकस्मात् कारणात् कार्यभेदः ? अदृष्टविशेषस्य सहकारिणो भेदात् । महत्त्वविशेष एव दीर्घत्वम्, अणुत्वविशेष एव ह्रस्वत्वमिति मन्यमान आह–अथेति । समाधत्ते–तत्रास्तीति । यदि दीर्घमहत्त्वयोरभेदो दीर्घेषु महदानीयतामिति निर्धारणं न स्यादभेदात् । नहि भवति रूपवत्सु रूपवदानीयतामिति, अस्ति चेदं निर्धारणम् । तेन दीर्घत्वमहत्त्वयोर्भेदः कल्प्यते, परिमाणस्य व्याप्यवृत्तित्वादेकस्मिन् द्रव्ये परिमाणद्वयानुपपत्तिरिति चेन्न, विजातीययोरेकत्र वृत्त्यविरोधात्, अवान्तरजाति-

[पं०] **कारणबहुत्वादिति** (कं १३७.१२) अत्र कारणं सङ्ख्या । **ह्रस्वत्वस्यापीति** (कं. १३७.१४) न केवलमणुत्वस्य । परः प्राह **कथमित्यादि** (कं. १३७.१५) । **कार्यभेद** इति (कं. १३७.१५) अणुत्वह्रस्वत्वलक्षणकार्यभेदः । सूरिः प्राह **अदृष्टविशेषस्येत्यादि** (कं. १३७.१५) । परः प्राह **परिमाणस्येत्यादि** (कं. १३७.२०) । **परिमाणद्वयानुपपत्तिरिति** (कं. १३७.२०) परिमाणद्वयं दीर्घत्वमहत्त्वलक्षणम् । **विजातीययोरेकत्र वृत्त्यविरोधादिति** (कं. १३७.२१) सजातीययोस्त्वेकत्र वृत्तिर्न स्यादेव । न हि महत्त्वेन महत्त्वं परिमाणस्य व्याप्यवृत्तित्वादेकेनैव

[कु०] **कथमेकस्मादिति** (कं. १३७.१५) कारणभेदो हि कार्यभेदे प्रयोजक इति भावः । **अदृष्टेति** (कं. १३७.१५) कार्यभेदात् कारणभेदः कल्प्य इति भावः । **महत्त्वविशेष** इति (कं. १३७.१५) न सामान्यविशेषयोः समप्रधानतया परिगणनमुपपन्नमिति भावः । **अशक्यनिराकरण** इति (कं. १३७.२३) अन्यसाधर्म्यमात्रेण दृष्टनिराकरणेतिप्रसङ्ग इति भावः ।

१ द्व्यणुके–जे. । २ व्यवहारदर्शनात्–जे । ३ तत्–कं. १, कं. २ कि । ४ आधार–जे । ५ प्रचयोत्पत्तिरिति सर्वमस्य–कं. १, कं. २ ।

## न्यायकन्दली

भेदेऽपि नीलपीतयोरेकत्र समावेशो न दृष्ट इति चेत्? ययोर्न दृष्टस्त[1]योर्मा भूत्, दीर्घत्वमहत्त्वयोस्तु सहभावः सर्वलोकप्रतीतिसिद्धत्वादशक्यनिराकरणः।

द्व्यणुकवर्तिनोरणुत्वह्रस्वत्वयोस्तु भेदो योगिनां प्रत्यक्ष इत्याह–अणुत्वह्रस्वत्वयोस्त्वति। अस्मदादीनां तु भाक्तयोरणुत्वह्रस्वत्वयो[2]र्भेदे न तन्मुख्ययोरपि भेदानुमानम्। एतच्चतुर्विधमपि परिमाणमाश्रयविनाशादेव विनश्यति नान्यस्मादिति नियमः। उत्पाद्यग्रहणेन परमाणुपरमह्रस्वपरममहत्परमदीर्घव्यवच्छेदः। अणुत्वमहत्त्वयोः दीर्घत्वह्रस्वत्वयोश्च परस्परापेक्षाकृतत्वम्, [3]न तु स्वाभाविकत्वमिति चेत्? तत्र केवलावस्थायां हस्तवितस्त्यादिपरिमितस्य परिमाणस्य सापेक्षावस्थायामपि भेदानु[4]पलब्धेः, [5]उभयाभावप्रसङ्गाच्च। किमर्थं तर्ह्यपेक्षा? प्रत्येकमाश्रयग्रहणे गृहीतयोरेव परिमाणयोः प्रकर्षभावाभावप्रतीत्यर्था, ययोरधिगमादिदमस्माद्दीर्घमिदं ह्रस्वमिति व्यवहारः स्यात्।

[पं०] व्याप्तत्वादित्यर्थः। **अवान्तरजातिभेदेऽपि नीलपीतयोरेकत्र समावेशो न दृष्ट** इति चेदिति (कं. १३७.२१) अवान्तरजात्या भेदो विजातीयत्वं तस्मिन् सत्यपि अन्या हि नीलस्यावान्तरजातयोऽन्याश्च पीतस्य। एवमनयोर्भेदेऽपि नैकत्र समावेशो दृष्ट इति चोद्यार्थः। **ययोर्न[दृ]ष्टस्तयोर्माभूदिति** (कं १३७.२२) यथा ह्रस्वत्वदीर्घत्वयोरिति दृष्टान्तोऽत्र वाच्यः। **मुख्ययोरपीति** (कं. १३७.२५) द्व्यणुकगतयोः।

[6]**केचिदिति** बौद्धाः। **सापेक्षावस्थायामपीति** (कं. १३८.२) वाऽर्थेऽत्रापिः। केवलावस्थायां सापेक्षावस्थायां वेति सम्बन्धः। **भेदानुपलब्धेरिति** (कं. १३८.२) भेदोपलब्धिप्रसङ्गादित्यर्थः। **उभयाभावप्रसङ्गाच्चेति** (कं. १३८.२) अणुत्वापेक्षया महत्त्वं तदपेक्षया च तदित्येवमन्योन्याश्रयदोषादेकस्याप्यभाव इत्यर्थः। **किमर्थं तर्ह्यपेक्षेति** (कं. १३८.२) परप्रश्नः। **श्रीधरः** प्राह प्रत्येकमित्यादि (कं. १३८.२)। इति परिमाणगुणविवरणं समर्थितम्॥

[कु०] [7]**भेदानुमानम्** इति (कं. १३७.२५) भाक्तेः अणुत्वह्रस्वत्वे भिन्नभक्तत्वात् माणवके सिंहबृहस्पतित्ववत् परस्परापेक्षाकृतत्वमिति। ततश्चै[क]काला[विरुद्ध]न्यतराभावा[द्]? उभयाभाव इति न्यायान्न स्वाभाविकत्वं न पारमार्थिकत्वं किन्तु काल्पनिक[त्व]मित्यर्थः। [8]**उभयाभावप्रसङ्गाच्चेति** (कं. १३८.२) उभयोरपारमार्थिकत्वेऽपेक्षणीया तदपेक्षैव न स्यादिति भावः। **गृहीतयोरिति** (कं. १३८.३) अनपेक्षादशायामिति शेषः।

[ इति परिमाणम् ]

---

१ तयोः स – जे २। २ भेदे – कं. १; कं. २। ३ न स्वाभाविकत्वम् – जे. १; जे. २। ४ नुपपत्तेः – जे. १; जे. २। ५ उदयाभाव – कं. १; कं. २; जे, १, जे. २, जे. ३। ६ प्रतीकमिदं कन्दल्यां नास्ति – सं. (कं. १३८.१) चेत् इत्यस्य स्थाने केचिद् इति स्यात्। ७ भेदानुमान – ह. लि.। ८ उदयाभाव – कं.

### प्रशस्तपादभाष्यम्

[139] पृथक्त्वमपोद्धारव्यवहारकारणम् ।

तत्पुनरेकद्रव्यमनेकद्रव्यं च ।

तस्य तु नित्यत्वानित्यत्वनिष्पत्तयः संख्यया व्याख्याताः ।

एतावांस्तु विशेषः–एकत्वादिवदेकपृथक्त्वाद्यपरसामान्याभावः संख्यया तु विशिष्यते तद्विशिष्टव्यवहारदर्शनादिति ।

### न्यायकन्दली

[139] पृथक्त्वमपोद्धारव्यवहारकारणम् । अपोद्धारव्यवहार इदमस्मात् पृथगिति ज्ञानं व्यपदेशश्च, तस्य कारणं पृथक्त्वमिति । व्याख्यानं पूर्ववत् । इतरेतराभावनिमित्तोऽयं व्यवहार इति चेन्न प्रतिषेधस्य विधिप्रत्ययविषयत्वायोगात् । तत्पुनरेकद्रव्यमनेकद्रव्यं च । एकं द्रव्यमाश्रयो यस्य तदेकद्रव्यम्, अनेकं द्रव्यमाश्रयो यस्य तदनेकद्रव्यम्, पुनःशब्द

[139] ( ॥ अथ पृथक्त्वनिरूपणम् ॥ )

[टि०] ननु द्वित्वद्विपृथक्त्वयोर्भिन्न[1]भिन्नापेक्षाबुद्धिनिष्पाद्यत्वात् द्विपृथक्त्वकाले [2]द्वित्वाभावात् कथं [3]द्वित्वेन पृथक्त्वं विशिष्यते इत्याह [4]द्वयोर्वर्तमानम् इति । एतेन परमाणु इति नन्वणुत्वसामान्यात् परमाणुपरिमाणेऽपि द्व्यणुकवदणु-व्यपदेश एव स्यान्नतु परमाणु[5]व्यपदेशः । नैवम्, अणुत्वप्रकर्षात्तथा व्यपदेशोपपत्तेः ॥ पृथक्त्वम् ॥

। अथ पृथक्त्वगुणविवरणम् ।

[पं०] [139] इतरेतराभावनिमित्तोऽयं व्यवहार इति (कं १३८.११) य एव हि घटस्य पटेऽभावः स एव घटस्य पृथक्त्वम् । य एव च पटस्य घटेऽभावः स एव पटस्य पृथक्त्वम् । तस्मादलं पृथक्त्वलक्षणकल्पनयेति चोद्यार्थः । प्रतिषेधस्य विधिप्रत्ययविषयत्वायोगादिति (कं. १३८.१२) पृथक्त्वं हि विधिप्रत्ययविषयम् । इदमस्मात्पृथगिति यथा । अनेकं द्रव्यमाश्रयो यस्येति (कं. १३८.१३) द्विपृथक्त्वादौ द्रष्टव्यम् ।

[कु०] [139] अपोद्धारव्यवहारः–अवच्छिद्य निर्धारणं पञ्चम्या निर्धारणमित्यर्थः विधिप्रत्यययोगादिति (कं. १३८.१२) (न)न च पृथक्त्वादिशब्दानां प्रलयादिशब्दसाम्यम् अत उभयोपसृष्टवाक्यार्थे पदवचनात् इह तु तदभावात् । किञ्च पृथगन्यदित्यादिपदानामितरेतराभावार्थत्वे घटः पटो न भवतीत्यत्रापि 'अन्यारादितर' इति पञ्चमी स्यात् । अन्य इत्यर्थग्रहणादिति भावः । इह प्रत्ययहेतुत्वाच्च न समवायः । पृथक्त्वमस्मदादिप्रत्यक्षत्वाच्च न विशेषेष्यन्तर्भावः। एकद्रव्यस्यापि सम्भवात् [न]सामान्ये, अचलनात्मकत्वान्न कर्मणि निर्गुणत्वान्न द्रव्ये, परिशेषाद् गुणः । ततो

---

१ पृथक्त्वादिषु – कं. १; कं. २–पृथक्त्वादिसामान्या – कि । २ भिन्ना – अ, ब, क; ३ द्वित्वभावात् – अ, ब; ४ द्वित्वे पृथक्त्वं – अ, ब, क; ५ द्रव्ये – मु. जे. १ जै. ३ । ६ परिमाण – अ, ब ।

## न्यायकन्दली

एकद्रव्यवृत्तेः परिमाणात् पृथक्त्वस्यैकानेकद्रव्यवृत्तित्वविशेषावद्योतनार्थः। परिमाण[1]मेकद्रव्य[1]मेव पृथक्त्वं पुनरेकद्रव्यमनेकद्रव्यं चेति विशेषः।

तस्य तु नित्यानित्यत्वनिष्पत्तयः संख्यया व्याख्याताः। तस्य द्विविधस्यापि पृथक्त्वस्य नित्यत्वं चानित्यत्वं च निष्पत्तिश्च संख्यया व्याख्याता। यथैकद्रव्यैकत्वसंख्या परमाणुषु नित्या कार्ये [3]कारणगुणपूर्विका आश्रयविनाशाच्च नश्यति, तथैकद्रव्यमेकपृथक्त्वम्। यथा अनेकद्रव्या द्वित्वादिका संख्या अनेकगुणालम्बनाया अपेक्षाबुद्धेरुत्पद्यते तद्विनाशाच्च विनश्यति, [4]क्वचिच्चाश्रयविनाशाद्विनश्यति, तथानेकद्रव्यद्विपृथक्त्वादिकमपीत्यतिदेशार्थः। नित्यं चानित्यं च नित्यानित्ये, तयोर्भावो नित्यानित्यत्वमिति द्वन्द्वात् परं श्रवणात् त्वप्रत्ययस्य प्रत्येकमभिसम्बन्धः। अत्रापि वाक्ये तुशब्दो विशेषावद्योतनार्थः। तस्य नित्यत्वादयः संख्यया व्याख्याताः, न परिमाणस्येत्यर्थः।

[पं०] **यथैकद्रव्यैकत्वसङ्ख्येति** (कं. १३८.१८) एकद्रव्याश्रिता एकद्रव्या। **कार्ये** इति (कं. १३८.१८) द्व्यणुके। **तथैकद्रव्यमेव पृथक्त्वमिति** तथेति संख्यावत् एकद्रव्यपृथक्त्वमिति एकद्रव्याश्रितमेकपृथक्त्वम्। परमाणुषु नित्यं, कार्यद्व्यणुके कारणगुण[5]पूर्वकमाश्रयविनाशाच्च विनश्यतीति योज्यम् (कं. १३८.१८)। **अतिदेशार्थ** इति (कं. १३८.१८) अतिदेशाख्या तन्त्रयुक्तिः।

[6]**एकपृथक्त्वद्विपृथक्त्वादिकमपरसामान्यं नास्तीति** (कं. १३९.३) अयमत्र भावः किन्तु तदेव पृथक्त्वमेकद्व्यादिसङ्ख्यायां विशेष्यते? एतदेव विवक्षुः प्रश्नं कारयति **कथं तर्हीत्यादि** (कं. १३९.३)। [7]**स्मृत्युपनीतयेति** (द्र) द्वित्वगुणज्ञानस्य विनष्टत्वात् संस्कारस्य चोत्पन्नत्वात् स्मृतिप्रापितायां संस्कारो हि स्मृतिहेतुः। [8]**तद्विशेषादिति** (कं. १३९.६) सङ्ख्याविशेषात्। **अवान्तरव्यवहारविशेष** इति (कं. १३९.६) अवान्तरव्यवहार एकपृथक्त्वादयः। **पृथक्त्वसामान्यकृत** इति (कं. १३९.७) पृथक्त्वाख्यपरसामान्यकृत इत्यर्थः। **परमाणुत्वं सामान्यं प्रत्याख्येयमिति**

[कु०] गुणादिषु रूपाद्रसः पृथगित्यादयो व्यवहारा भाक्ताः। भक्तिश्च भेदानिबन्धना। न चैतेनैव सर्वत्र पृथग् पृथगिति व्यवहार इति शङ्कनीयं, स्वरूपस्यावधिसपक्षत्वात्। इतरेतराभावस्य प्रागेव निरासादित्यनुसन्धेयम्।

[9]**पृथक्त्वं पुनरिति**–(कं. १२८.१३)–नन्वेकद्र[व्य]योरेव पृथक्त्वे रूपादिभिर्द्वौ शुक्लावित्यादिव्यवहारः कस्मान्नेष्यते; अशक्यत्वात्। अशक्यत्वं चावधिभेदेन व्यवहारविषयभेदात्। एकपृथक्त्वस्य ह्याश्रयव्यतिरिक्तं सर्वमेवावधिः, द्विपृथक्त्वा[10]दयस्तु पुनरिति?

---

१ मेकद्रव्यम्–कं. १, कं. २। २ एकपृथक्त्वं–कं. १; कं. २। ३ कारणपूर्विका–जे. २। ४ क्वचिदाश्रय–जे. १; जे. २। ५ पूर्विका–कं। ६ एकपृथक्त्वादिकं–कं। ७ प्रतीकमिदं कन्दल्यां नास्ति। ८ तद्विशेषश्च–कं। ९ तत्पुनः–कं; भा। १० द्विपृथक्त्वादौयोस्ततोन्पुनमिति–ह. लि।

न्यायकन्दली

एवं संख्यया सह पृथक्त्वस्य साधर्म्यं प्रतिपाद्य वैधर्म्यं प्रतिपादयति–एतावांस्त्विति। संख्यायाः सकाशात् पृथक्त्वस्यैतावान् भेदो यथा संख्यात्वपरसामान्यापेक्षयैकत्वद्वित्वादिकमपरसामान्यमस्ति, तथा पृथक्त्वपरसामान्यापेक्षयैकपृथक्त्वद्विपृथक्त्वादिकमपरसामान्यं [1]नास्तीति। कथं तर्ह्यनेकेष्वेकपृथक्त्वादिष्ववान्तरप्रत्ययविशेषस्तत्राह–संख्यया तु विशिष्यते इति। अयमेकः पृथग् द्वाविमौ पृथगित्येकत्वादिसंख्याविशिष्टो व्यवहारः पृथक्त्वे दृश्यते। [2]तेनैकत्र द्रव्ये वर्तमानं पृथक्त्वमेकार्थसमवेतयै[3]कत्वसंख्यया विशिष्यते, द्वयोर्वर्तमानं द्वित्वसङ्ख्यया स्मृत्युपनीतया विशिष्यते तद्विशेषाच्चावान्तरव्यवहारविशेषः, अनुवृत्तिप्रत्ययश्च पृथक्त्वसामान्यकृत एवेत्यभिप्रायः। एतेन परमाणुपरिमाणेष्वपि परमाणुत्वं सामान्यं प्रत्याख्येयम्, परमशब्दविशेषितादेवाणुत्वसामान्याद् व्यवहारानुगमोपपत्तेः। अथ कस्मात् सर्वद्रव्यानुगतमेकमेव पृथक्त्वमेकत्वादिसंख्याविशेषणभेदात् प्रत्ययभेदहेतुरिति नेष्यते? नेष्यते, क्रमेणोपजायमानेषु द्रव्येषु सामान्यवद् गुणस्य समवायादर्शनात्। अथेदं सामान्यमेव भविष्यति? न, पिण्डान्तराननुसन्धाने सामान्यबुद्धिवत् पृथक्त्वबुद्धेरभावात्।

[पं०] (कं. १३९.८) अत्राणुत्वमेव सामान्यमित्यर्थः, केवलं परमशब्देन विशेष्यते इति द्रष्टव्यम्। नेष्यते इत्यादि (कं. १३९.१०) श्रीधरवाक्यम्। क्रमेणोपजायमानेषु द्रव्येषु सामान्यवद् गुणसमवा[या]दर्शनादिति (कं. १३९.१०) सामान्यं हि प्रथमक्षण एव द्रव्यं समवैति गुणास्तु द्वितीयक्षणे द्रव्ये समवयन्ति अतो गुणः पृथक्त्वमित्यर्थः। पिण्डान्तराननुसन्धाने इत्यादि (कं. १३९.१२) [4]सामान्ये पिण्डान्तरमनुसंधात्तेः इत्यादि–सामान्यं पिण्डान्तरानुसन्धायि पृथक्त्वं तु न तथा अतः कथं सामान्यमिदम्, अवान्तरजातिमत्त्वाभावादिति वाक्यार्थः। पिण्डान्तरानुसन्धाने इत्यतः पुरः सति इत्यध्याहार्यम्।

॥ इति पृथक्त्वगुणविवरणं समर्थितम् ॥

[कु०] एवं सङ्ख्ययेति (कं. १२८.२६) निष्पत्त्यतिदेशे तत्प्रयु(यु)क्तावान्तरजातिभेदः शङ्कां निवारयितुमित्यर्थः।

अपरसामान्यं नास्तीति (कं. १३९.३) तदङ्गीकारे द्वित्वादिना सह सङ्करः स्यादिति भावः। निमित्तविशेषमन्तरेणानुवृत्तिविशेषानुपपत्तेरिति भावः। एकत्वसङ्ख्यया विशिष्यत इति–(कं. १३९.६) उपलक्ष्यत इत्यर्थः। विशेष्यानधिकरणस्य विशेषणत्वायोगात्तद्विशेषाच्चेति आधारभेदः कृतः कोऽपि माधुर्यादिवज्जातिभेदोऽस्त्येवेति। स तु दिक्पृथक्त्वमित्यनेन साक्षाद्युज्यते। तथा च सति जातिसाङ्कर्यप्रसङ्गात्। इममेव विशेषं दर्शयितुं–मूल्य इत्युक्तम्। एतेनेति (कं. १३९.७) पृथिवीत्वादिभिर्जातिसाङ्कर्यप्रसङ्गेनेत्यर्थः। न पिण्डान्तरेति (कं. १३९.१२) सामान्यं हि विनावधिना निरूप्यते, पृथक्त्वमवधिनैव निरूप्यत इति सामान्याद्भिद्यत इत्यर्थः॥

[ इति पृथक्त्वम् ]

---

१ नास्ति–जे. १, जे. २। २ तत्रैकत्र–कं. १, कं. २। ३ °कत्वसङ्ख्यया विशिष्यते तद्विशेषश्च–कं. १, कं. २।
४ पुनरावृत्तमिव भाति।

### प्रशस्तपादभाष्यम्

[140-141] **संयोगः संयुक्तप्रत्ययनिमित्तम् ।**

**स च द्रव्यगुणकर्महेतुः ।**

**द्रव्यारम्भे निरपेक्षः तथा भवतीति, "सापेक्षेभ्यो [1]निरपेक्षेभ्यश्च" (१०-७) इति वचनात् ।**

**गुणकर्मारम्भे तु सापेक्षः, "संयुक्तसमवायादग्नेर्वैशेषिकम्" (१०-२-७) इति वचनात् ।**

### न्यायकन्दली

[140] **संयोगसद्भावनिरूपणार्थमाह – संयोगः संयुक्तप्रत्ययनिमित्तमिति । अस्ति तावदिदमनेन संयुक्तमिति प्रत्ययो लौकिकानाम्, न चास्य रूपादयो निमित्तं तत्प्रत्ययविलक्षणत्वात् । अतो यदस्य निमित्तं स संयोगः । नैरन्तर्यनिबन्धनोऽयं प्रत्यय इति चेत् ? किं द्रव्ययोः परस्परसंश्लेषो नैरन्तर्यम् ? अन्तराभावो वा ? [2]तत्राद्ये कल्पे न किञ्चिदतिरिक्तमुक्तं स्यात्; द्रव्ययोः परस्परोपसंश्लेष एव हि नः संयोगः । द्वितीये**

[टि०] [140] ( ॥ अथ संयोगनिरूपणम् ॥ )

**संयुक्तप्रत्ययनिमित्तम् इति**:–आत्ममनःसंयोगरूपादिव्युदासार्थं द्रव्यविशेषणं सदित्यध्याहार्यम् ।

**बौद्धमाशङ्कते नैरन्तर्येति । यदेव भवताम् इति**:–[3]कारणं कर्मादि । **देशान्तर**[4]**प्राप्तीति** तस्याः प्राप्तेः सकाशादित्यर्थः । **श्यामादिविनाशेति** [5]न ह्यसावग्निसंयोगः [6]पश्चाद्भाव्यमौष्ण्यमपेक्ष्यते, औष्ण्यसंयोगोत्पत्तेः प्रागपि सत्त्वात् ।

[पं०] [140] ॥ अथ संयोगगुणविवरणम् ॥

**तत्प्रत्ययविलक्षणत्वादिति** (कं. १४१.१६) संयुक्तप्रत्ययविलक्षणत्वात् । **बौद्धमुद्दिश्याह नैरन्तर्यनिबन्धोऽयं प्रत्यय इति** (कं. १४१.१६) **चेदिति । सान्तरयोरिति** (कं. १४१.१९) [7]**क्षीरनीरयोरिति**–क्षीरनीरयोः । **असंयुक्तयोः संयोगे कारणमिति** (कं. १४१.२०) कर्मादि । **किञ्चिदमिति** (कं. १४१.२१) इदं कारणं कर्तृभूतम् । **तस्याः को नामान्यः संयोग** इति (कं. १४२.१) तस्या **इति**–देशान्तरप्राप्तेः । पञ्चम्यन्तं पदमिदम् । देशान्तरप्राप्तितः कोऽन्यः संयोगः ! देशान्तरप्राप्तिरेव संयोग इत्यर्थः । **द्रव्यस्येति** (कं. १४२.२) पटादेः । **संयोग इति** (कं. १४२.४) तन्तूनां संयोगः ।

[कु०] [140] **संयोगेति** (कं. १४१.१४) संयोगसद्भावे प्रमाणमाहेत्यर्थः । अन्यथासिद्धमाशङ्कते **नैरन्तर्येति** (कं. १४१.१६) । विकल्प्य दूषयति **द्रव्ययोरिति** (कं. १४१.१७) । **अस्तु काममिति** (कं. १४१.२१) अत्रायं भावः–अन्तरशब्दवाच्या नामाकाशादिदेशानामभावस्तावत्कर्मणा न क्रियते अशक्यत्वात्; तस्मात्कोऽप्युपश्लेषोऽङ्गीकर्तव्य इति । **यदेवमिति** (कं. १४२.३) क्षणभङ्गनिराकरणा[द]स्तीह इुपा? उत्पत्तेरभावात् संयोगः स्वीकर्तव्य इति भावः ।

---

१ अनपेक्षेभ्यश्चेति – जे । २ आद्ये – कं. १, कं. २ । ३ कारणं कर्मादि इति अबपुस्तकयोर्नास्ति । ४ प्राप्नोति –अ; ५ तद्यसावग्नि०–अ, ब; ६ पाश्चाद्–अ, ब; ७ प्रतीकमिदं कन्दल्यां नास्ति; अत्र निरर्थकमिव भाति–सं ।

## न्यायकन्दली

कल्पे सान्तरयोरन्तराभावे संयोगादन्यः को हेतुरिति वाच्यम् । यदेव भवतामसंयुक्तयोः संयोगे कारणं तदेव नः सान्तरयोरन्तराभावे कारणमिति चेत् ? अस्तु कामं किञ्चिदर्द स्वाश्रयं देशान्तरं [1]प्रापयत् तदन्तराभावं करोति ? अप्रापयद्वा ? अप्राप्तिपक्षे [2]तावदन्तराभावो दुर्लभो पूर्वावष्टब्धे एव देशेऽ[3]वस्थानात् । देशान्तरप्राप्तिपक्षे तु तस्याः को नामान्यः संयोगो यः प्रतिषिध्यते ? अविरलदेशे [4]द्रव्ययोरुत्पादे संयोगव्यवहार इति चेत् ? न उत्पादमात्रे संयोगव्यवहारः, किन्त्वविरलदेशोत्पादे, यैवेयमुत्पाद्यमानयोरविरलदेशता स एव संयोगः ।

स च द्रव्यगुणकर्महेतुः । तन्तुसंयोगो द्रव्यस्य पटस्य हेतुः, आत्ममनःसंयोगो बुद्ध्यादीनां [5]गुणानां हेतुः । एवं भेर्याकाशसंयोगः शब्दस्य [6]गुणस्य हेतुः, प्रयत्नवदात्महस्तसंयोगो हस्तकर्मणो हेतुः, तथा वेगवद्वायुसंयोगस्तृणकर्मणो हेतुरित्यादिकमूह्यम् ।

[टि०] **धर्माद्यपेक्षत्वम्** इति :—नन्वदृष्टस्य सर्वोत्पत्तिमन्निमित्तत्वाद् धर्माद्यपेक्षत्वं [7]निरपेक्षस्य [8]पटादिद्रव्यारम्भकः संयोगस्याप्यस्तीति कथमत्र सापेक्षत्वम् ? कथं वा [9]पटसंयोगेऽपि निरपेक्षत्वम् ? सत्यम्, पटादौ हि तन्तुसंयोगपर्यन्तसामग्री[10]कारणत्वेनादृष्टमपेक्षणीयं, न पुनस्तन्तुसंयोगे उत्पन्ने सति पुनरन्यपटोत्पत्तिं प्रत्यपेक्षणीयम्, अन्त्यतन्तुसंयोगेऽवश्यं

[पं०] **स्वाश्रयमिति** (कं. १४२.९) तन्तुलक्षणम् । [11]**स्वनिमित्तकारणमिति** (कं. १४२.९) तुरिवेमादिकम् । **व्योमशिव**व्याख्यां दूषयति **न स्वयमनपेक्षार्थः पश्चाद्भाविनिमित्तान्तरं नापेक्षत इति** (कं. १४२.९) । यतः पश्चाद्भाविनिमित्तान्तरनिरपेक्षत्वं पाकजगुणारम्भेऽपि संयोगस्य वर्तते ततस्तेषामप्यारम्भः **व्योमशिव**व्याख्या सिद्ध्यति [इति] भावः । अमुमेवार्थं हेतुना स्पष्टयन्नाह **श्यामादीत्यादि** (कं. १४२.१०) अत्र गद्ये पाकजानां गुणानामप्यारम्भे

[कु०] **इत्यादिकमिति** (कं. १४२.७) अग्निसंयोगः पाकजादीनां, प्रचयः परिमाणस्येत्यादिग्रहणेन गृह्यते । इदं च यदि संयोगो न स्याद् द्रव्यादयो नोत्पद्येरन्नित्यनुकूलतर्कप्रदर्शनम् ।

ननु यदि संयोगो द्रव्यारम्भे निरपेक्षः स विनश्यवस्थानं (ने) तु संयोगोऽपि पटमारभते । अथ चरमभावि निमित्तान्तरमपेक्ष[ते] तर्हि श्यामादिनिवृत्त्युत्तरभावी वह्निसंयोगो रक्तादिगुणोत्पत्तौ निरपेक्षः स्यादत आह **द्रव्यारम्भ** इति (कं. १४२.८) । **अस्यायमर्थं** इति (कं. १४२.१५) व्याख्यानेन सूत्रकारानुमतिमात्रं प्रदर्श्यते ।

---

१ प्रापयदन्तराभावं – जे. १ । २ त्वन्तराभावो – जे. १, जे. २ । ३ व्यवस्थानात् – जे. २ । ४ द्रव्यस्यो – कं. १, कं. २ । ५ गुणानाम् । एवं – कं. १, कं. २ । ६ गुणस्यप्रयत्न – जे. १; शब्दगुणस्य – जे. ३ । ७ निरपेक्ष्यस्य – अ; ८ घटादि – ड; ९ घटपटसंयोगे निरपे...य पटसंयोगे निरपे.. ब; १० कारणधर्मो – अ, ब; ११ स्वनिमित्तं च – कं ।

## न्यायकन्दली

यथायं द्रव्यमारभते, यथा च गुणकर्मणी, तं प्रकारं दर्शयति–द्रव्यारम्भ इत्यादिना। द्रव्यस्यारम्भे कर्तव्ये संयोगः [1]स्वाश्रयं स्वस्य निमित्तकारणमन्तरेण नान्यदपेक्षते। न त्वयमनपेक्षार्थः पश्चाद्भावि निमित्तान्तरं नापेक्षत इति, श्यामादिविनाशानन्तरभाविनोऽन्त्यस्य परमाण्वग्निसंयोगस्य पाकजानां गुणानामपि आरम्भे निरपेक्षकारणत्वप्रसङ्गात्। कथमेतदवगतं त्वया यदयं द्रव्यारम्भे निरपेक्षः संयोग इति? तत्राह–"तथा भवतीति 'सापेक्षेभ्यो निरपेक्षेभ्यश्च' (१०-७) इति वचनात्, पटार्थमुपक्रियमाणेभ्यस्तन्तुभ्यो 'भविष्यति पटः' इति प्रत्ययो जायत इति पूर्वं प्रतिपाद्य सूत्रकारेणेतदुक्तम्"–तथा भवतीति सापेक्षेभ्यो निरपेक्षेभ्यश्चेति। अस्यायमर्थो यथोपक्रियमाणेभ्यो भविष्यति पट इति प्रत्ययस्तथा सापेक्षेभ्यो निरपेक्षेभ्यश्चेति भवतीति [2]वर्तमानप्रत्ययः, अन्यथा सापेक्षेभ्यो निरपेक्षेभ्यश्चेति भवतीति वर्तमानप्रत्ययो न स्यात्, यदा कतिचित्तन्तवः संयुक्ता वर्तन्ते कतिचिच्चासंयुक्तास्तदा तेभ्यो "भवति पट" इति प्रत्ययः

[टि०] [3]पटस्य उत्पत्तेः। बुद्धयादौ त्वात्म[4]मनःसंयोगोपनायकादृष्टव्यतिरिक्तमप्यदृष्टं बुद्धयुत्पत्तिं प्रत्यपेक्षणीयमस्ति; कदाचिदात्म[5]मनः संयोगे सत्यपि तस्या भावाद् बुद्धयनुत्पत्तिदर्शनात्। [6]धर्मादीत्यादिशब्दादिन्द्रियसंस्कारसुखसाधनादिग्रहणम्।

[पं०] निरपेक्षत्वं संयोगस्येत्यर्थः। यद्यपि औष्ण्याख्यनिमित्तान्तरं सापेक्षत्वं तत्रास्ति तथापि पश्चाद्भावित्वं तस्य नास्ति। अथ च द्रव्यारम्भ एव निरपेक्षत्वं संयोगस्येत्यर्थः। **निरपेक्षकारणत्वप्रसङ्गादिति** (कं. १४२.११) अथ च तत्र संयोगः सापेक्षकारणं त्व औष्ण्यापेक्षत्वादित्यर्थः। श्यामादीत्यादिगद्यस्य तु समुदितस्यायं भावः। न खल्वत्राप्यपेक्षणीयं उष्णस्पर्शलक्षणं पश्चाद्भवति किन्तु संयोगपूर्वकालमपि तदस्ति न चायं संयोगः पाकजरूपाद्युत्पत्तौ निरपेक्षः उष्णस्पर्शसापेक्षत्वात् तस्माद्व्योमशिवव्याख्यानं न किञ्चिदिति तात्पर्यम्। **संयुक्ता** इति (कं. १४२.१८) अनपेक्षाः। **असंयुक्ता** इति (कं. १४२.१८) सापेक्षाः।

[कु०] किन्तु प्रत्यक्षमेव प्रमाणं निरपेक्षये[दं] दर्शितमिति दर्शयति [7]**यस्पार्थिवपरमाण्विति** (कं. १४२.२३) इदमाप्योष्णतारतम्येन रक्तादितारतम्यदर्शनादनुमानं प्रमाणं दर्शितम्। [8]**धर्माद्यपेक्षत्वमिति** (कं. १४३.१) इन्द्रियसन्निकर्षाद्यपेक्षमित्यर्थः। ननु संयोगस्य द्रव्याद्यसमवायिकारणतया सिद्धिः। सा च द्रव्यसमवायिकारणत्वे[त]त् प्रत्यासत्त्या वक्तव्या। तदेव तदनुपपन्नं, विश्वस्य शून्योपादानत्वादिति शङ्कते **बीज**[9]**नाशेति** (कं. १४३.२) आनन्तर्यनियमो हि कारणत्वम्। स च मृत्पिण्डप्रध्वंसस्य प्रागभावस्य च साक्षात् प्रतीयते न तु मृत्पिण्डस्येति भावः। परिहरति–

---

१ स्वाश्रयं स्वनिमित्तं–कं. १, कं. २; स्वाश्रयस्वनिमित्त – जे. २। २ वर्तमानप्रत्ययः स्यात् यदा कतिचित्तन्तवः –जे. १, जे. २। ३ पटोत्पत्तेः–अ, ब, क; ४, ५ त्मनः–ब, क; ६ धर्मादित्यादि–अ; ७ तत्–कं। ८ धर्माद्यपेत–हृ. लि। ९ विनाश–कं।

न्यायकन्दली

स्यादित्यर्थः । अत्र सूत्रे वार्तमानिकप्रतीतिहेतुत्वेनाभिधीयमानेषु तन्तुषु संयुक्तेष्वेवानपेक्षशब्दप्रयोगात् संयोगो द्रव्यारम्भे निरपेक्ष इति प्रतीयते इति तात्पर्यम् ।

तुशब्देन पूर्वस्माद्विशेषं प्रतिपादयन्नाह–गुणकर्मारम्भे तु सापेक्षः । कुतो ज्ञातमित्यत आह–संयुक्तसमवायादिति । अग्नेर्वैशेषिकमित्यग्निगतमुष्णत्वं विवक्षितम् । तत्पार्थिवपरमाणुसंयुक्ते वह्नौ समवायात् परमाणौ रूपाद्युत्पत्तिकारणमित्यस्माद्वचनाद् गुणारम्भे परमाण्वग्निसंयोगस्योष्णस्पर्शसापेक्षत्वं प्रतीयते, अन्यथा वह्निसंयोगजेषु रूपादिषु वह्निस्पर्शस्य कारणत्वाभिधानायोगात्, बुद्ध्यारम्भे आत्ममनःसंयोगस्य [3]स्वाश्रयस्वनिमित्तकारणव्यतिरेकेणापि धर्माद्यपेक्षत्वमिति यथासंभवमप्यूह्यम्, [1]कर्मारम्भेऽपि संयोगस्य सापेक्षत्वं, वायुगतवेगापेक्षस्य तृणवायुसंयोगस्य तृणे कर्मारम्भकत्वात् । बीजविनाशानन्तरमङ्कुरस्योत्पत्तेर्मृत्पिण्डध्वंसानन्तरं घटस्योत्पादादभावादेव द्रव्यस्योत्पादो न संयोगादिति चेत् ? तदयुक्तम्, अवयवसंयोगविशेषेभ्यो द्रव्यस्योत्पत्तिदर्शनात्, [2]अभावस्य निरतिशयत्वे कार्यविशेषस्याकस्मिकत्वप्रसङ्गाच्च ।

[पं०] 'स्वाश्रयस्वनिमित्तकारणव्यतिरेकेणापीति (कं. १४२.२६) अत्र स्वाश्रयः आत्ममनोलक्षणः । स्वनिमित्तकारणं मनःकर्मरूपालोकादि । परः प्राह बीजविनाशानन्तर(कं. १४३.२)मित्यादि । अभावस्य निरतिशयत्वे कार्यविशेषस्याकस्मिकत्वप्रसङ्गाच्चेति (कं. १४३.४) विशेषाश्चातिशयास्ते च तुच्छरूपाभावे कथं घटन्ते ? कारणे च विशेषाभावे कुतस्ते कार्ये स्युरिति गमनिका ।

[कु०] तदयुक्तमिति (कं. १४३.३)। अभावस्यानन्तर्यमन्यथा सिद्धं मृत्पिण्डप्रध्वंसस्यानन्तर्यं पूर्वव्यूहनिवृत्तावेवोत्तरव्यूहस्योत्पत्तेः । प्रागभावस्य च सहकारितया न तूपादानतया; तथात्वे तदनादितया कार्यस्याप्यनादित्वप्रसङ्गात् । अत एव पाकजानां स्वप्रागभावसहकृतवह्निसंयोगकार्यतया तत्र [त]द्विशेषसम्भव इति भावः । विपक्षे बाधकमाह [अ]भावस्येति (कं. १४३.४)। अभावमात्रस्य कारणत्वे व्रीहियवबीजयोरभावस्य स्वारसिकविशेषाभावादङ्कुरयोः कस्यचिद्यवाङ्कुरस्य व्रीह्यङ्कुरत्वमिति [वि]शेषानुपपत्तेः, अनुवर्तमानानां तदवयवानामुत्तरव्यूहविशिष्टानामेव कारणत्वमपि (भवि)तव्यमिति भावः ।

---

१ कर्मारम्भेऽपि तृणे कर्मारम्भकवत् – कं. १, कं. २ ।   २ अभावनिर्विशेषत्वे – जे. २ ।   ३ स्वाश्रयस्य--कं ।

## न्यायकन्दली

[141] इदं त्विह निरूप्यते–किं सत्क्रियते ? असदेव वा ? सत्क्रियत इति सांख्याः। असदकरणात्, न ह्यसतो गगनकुसुमस्य सत्त्वं केनचिच्छक्यं कर्त्तुम्, सतश्च सत्कारणं युक्तमेव, तद्धर्मत्वात्। दृष्टं हि तिलेषु सत एव तैलस्य निष्पीडनेन करणम्। असतस्तु करणे न निदर्शनमस्ति। इतश्च सत्कार्यम्–उपादानग्रहणात्, उपादानानि कारणानि तेषां कार्येण ग्रहणं कार्यस्य तैः सह सम्बन्धः, [1]तस्मात्कार्यं सदेव, अविद्यमानस्य सम्बन्धाभावात्। असम्बद्धमेव कार्यं कारणैः क्रियत इति चेत्? न, सर्वसम्भवाभावात्, असम्बद्धत्वाविशेषे सर्वं सर्वस्माद्भवेत्। न चैवम्, तस्मात् कार्यं प्रागुत्पत्तेः कारणैः सह सम्बद्धम्। यथाहुः–

असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः।
असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥ इति।

[टि०] [141] **दृष्टं हि तिलेषु** इति :–एतावता ग्रन्थेनान्वयव्यतिरेकानुमानं सूचितम्, विवादाध्यासित[2]मुत्पत्तेः [3]प्राक् सत् उत्पद्यमानत्वात् [4]अन्वयेन यथा तैलं व्यतिरेकेण यथा गगनकुसुममिति। **उपादानानि इति** :–कार्यमुत्पत्तेः प्राक् [5]कारणेषु सत् सम्बध्यमानत्वात्, यथा तिलेषु तैलम्। तथा विवादाध्यासितं कारणैरुत्पत्तेः प्रागपि [6]सम्बद्ध क्रियमाणत्वाद् [7]तद्वदेति। [8]**सर्वसम्भवाभावादिति**– [9]तर्कत्वेनात्रोपात्तम्। साङ्ख्यमते [10]त्वयमपि हेतुः विवादाध्यासितं कार्यमुत्पत्तेः प्रागपि स्वकारणेष्वप्यस्ति, तस्मादेव जायमानत्वात् तैलवत्। **तस्य कारणात्प्रा[11]गपि** इति :–करणमत्रोत्पादनक्रिया। [12]**तस्माच्छक्तस्य** इति :– पूर्वत्रैव पक्षे तच्छक्यत्वादिति हेतौ। तद्वत् **कारणभावाद् इति** [13]तत्रैव पक्षे [14]तदात्मकत्वाद इति हेतुः।

[पं०] [141] **तद्धर्मत्वादिति** (कं. १४३.७) यतः कारणं सतो धर्मः। **सर्वं सर्वस्माद्भवेदिति** (कं. १४३.११) सर्वकार्यं स्यात् सर्वस्माद्भावादित्यर्थः। **यथाहुरिति** (कं. १४३.१२) साङ्ख्यमतमाश्रित्य भट्टाचार्याः। **असत्त्वादित्यादि** (कं. १४३.१३) श्लोकः। व्याख्याः कार्यस्यासत्वात्कारणैः सह न सम्बन्धः किन्तु सत्त्वादेव सम्बन्ध इति पूर्वार्धतात्पर्यार्थः। उत्तरार्द्धं सुगमम्।

[कु०] [141] ननु सत्कार्यनये अभावासहकृतोऽपि परिणतिविशेषः संयुक्तिप्रत्ययनिमित्त[ो]न वस्त्वन्तरमिति मतमुत्थापयति **इदं त्विति** (कं. १४३.५)। **असदकरणादिति** (कं. १४३.६) अत्रासदिति निरुपाख्या[न]मभिप्रेतं यदाह **गगनकुसुमस्येति** (कं. १४३.६) अत्र प्रयोगः–यत्कार्यम्, उत्पत्तेः प्रागपि सत्कार्यत्वात्तैलमिव तिल इति सत्कार्यम्; उपादानग्रहणादिप्रयोगश्च कार्यं प्रागुत्पत्तेः सत् कारणकारणसम्बन्धित्वात् उत्पन्न घट इव। हेत्वसिद्धिमाशङ्क्य परिहरति **असम्बद्धमेवेति** (कं. १४३.१९)।

---

१ तस्मात्तत्–कं. १, कं. २। २ मुत्पद्यते–ब; ३ प्रागसत–अ, ब, क; ४ अन्वयिन–अ; ५ कारणेऽप्यसत् –अ, ब; ६ सम्बद्धः –अ, ब; ७ त्वं द्व देवेति–अ, त्वदेयेति–क; ८ सर्वसम्भवाद्–अ; ९ तर्कत्वामात्रोपात्तम्–अ; १० स्वयमपि–ड; ११ प्रापि–ड; १२ तस्माच्छुक्लस्य–ड; १३ न तत्रैव; १४ तदात्मेकत्वात्–अ, ब।

न्यायकन्दली

अपि च शक्तस्य जनकत्वम्? अशक्तस्य वा? अशक्तस्य जनकत्वे तावदतिप्रसक्तिः। शक्तस्य जनकत्वे तु किमस्य शक्तिः सर्वत्र? क्वचिदेव वा? सर्वत्र चेत्? सैवातिव्याप्तिः। अथ क्वचिदेव? कथमसति तस्मिन् कारणस्य तत्र शक्तिर्नियतेति वक्तव्यम्, असतो विषयत्वायोगात्। तस्माच्छक्तस्य यच्छक्यं शक्तिविषयो योऽर्थः, तस्य करणात्प्रागपि शक्यं सदेव। इतोऽपि सत्कार्यम्—कारणभावात्, कारणस्वभावं कार्यमिति नान्योऽवयवी अवयवेभ्यस्तद्देशत्वात्। यत्तु यस्मादन्यन्न तत्तस्य देशो यथा गौरश्वस्येत्यादिभिः प्रमाणैः प्रतिपादितम्, कारणं च सत्, अतस्तदव्यतिरेकि कार्यमपि सदेवेति। तदेतदुक्तम्—

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यमिति॥

अत्रोच्यते, यदि करणव्यापारात् प्रागपि पटस्तन्तुषु सन्नेव, किमित्युपलब्धिकारणेषु सत्सु सत्यामपि जिज्ञासायां नोपलभ्यते? अनभिव्यक्तत्वादिति चेत्?

[टि०] कारणात्मकत्वस्यासिद्धिं निराचष्टे नान्योऽवयवी इति [1]तद्देशत्वाद् इति :— तेऽव[2]यवा [3]देशो यस्येति विग्रहः। यत्त्ववयवस्थानीयं गवादि यस्मादवयव[4]स्थानीयादश्वादेरनत्यन् (रन्यत्) [5]तत्पञ्चम्यन्तव्यपदेश्यमवयवस्थानीयमश्वादि तस्यावयवि[6]स्थानीयस्य गवादेर्देशो न भवतीति तात्पर्यार्थः। अत्र विवक्षावशादप्रधानस्यापि पञ्चम्यन्तस्यैव यत्तच्छब्दाभ्यां परामर्शः प्रधानस्यैव तु परामर्शे [7]व्यतिरेकस्य [8]वक्रत्वं स्यादिति। साङ्ख्योक्तहेतूनां प्रतिकूलतर्कमाह यदि कारणव्यापारेति। सदसत्स्वभावकं तु इति :—[9]वस्तुनः कालान्तरेऽपि स्वभाव[10]त्यागायोगादत्र स्वभावशब्दो

[पं०] तत्र शक्तिरिति (कं. १४३.१७) प्रतिनियते कार्ये शक्तिः। शक्यमिति (कं. १४३.१९) कार्यं घटादि। अवयवीति (कं. १४३.२०) पटादिः। अवयवेभ्य इति (कं. १४३.२०) तन्त्वादिभ्यः। तद्देशत्वादिति (कं. १४३.२०) अवयवदेशत्वात् तदेतदुक्तमिति (कं. १४३.२२) ईश्वरकृष्णेन साङ्ख्यसप्तत्याम्।

अत्रोच्यते इति (कं. १४३.२५) श्रीधरेण। तस्यैवानुपपत्तिश्चोदितेति (कं. १४४.१) कि(मि)त्युपलब्धिकारणेषु सत्सु सत्यामपि जिज्ञासायां नोपलभ्यते (कं. १४३.२६) इत्यनेन सन्दर्भेण पृष्टा इत्यर्थः। सर्वदेति (कं. १४४.५)

[कु०] अतिव्याप्तिरिति (कं. १४३.१७) कार्यविशेषनियमानुपपत्तिरित्यर्थः। [11]असतो विषयत्वायोगादिति (कं. १४३.१८) विषयत्वेऽसत्त्वव्याघात इत्यर्थः। तद्देशत्वादि[ति] (कं. १४३.२०) कदाचिदपि देशाविरहादित्यर्थः। इत्यादिभिरिति (कं. १४३.२१) त्रिकूलके देशवृत्तिरत्रानुपपत्त्यादिता कार्यान्तु ग्राह्याणि अन्वयव्यतिरेकसाधकानि प्रमाणानि, आदिग्रहणेन गृह्यन्ते। अस्तु कारणस्वभावं कार्यं ततः किमित्यत आह कारणं चेति (कं. १४३.२२)।

---

१ तदात्वाद् – अ; २ अत्रयवो – अ, ब, क; ३ देशो – ड; ४ स्थानीयादनन्यत् – अ, स्थानीयादेरन्यत् – ड; ५ पञ्चम्यन्तव्यपदेशाम् – ड; ६ स्थानीयस्य – अ, क; ७ ऽतिरेकस्य – अ, ८ वक्तृत्वं – अ, ब, क; ९ 'वस्तुतः' इति अबपुस्तकयोर्नास्ति; १० त्यागाद् योगा – अ, ब; ११ असति – पा. र. पु.।

### न्यायकन्दली

केयमनभिव्यक्तिः ? यद्युपलब्धेरभावस्तस्यैवानुपपत्तिश्चोदिता कथं तदेवोत्तरम् ? अथोपलब्धियोग्यस्यार्थक्रियानिर्वर्तनक्षमस्य रूपस्य विरहोऽनभिव्यक्तिः ? तदानीमसत्कार्यवादः, तथाभूतस्य रूपस्य [1]प्रागसतः पश्चाद्भावात् । अथ मतं पटस्य [2]चक्षुरादिवत्कुविन्दादिकारणव्यापारोऽप्युपलब्धिकारणं तस्याभावात् सतोऽप्यनुपलब्धि[3]रिति चेत् ? न, कारणव्यापारस्यापि सर्वदा तत्र सम्भवात्, व्यापारोऽपि पूर्वमनभिव्यक्तः सम्प्रति कारणैरभिव्यज्यमानो भावमुपलम्भयतीति चेत् ? अभिव्यक्तिरपि यद्यसती ? कथं तस्याः कारणम् ? सतीति चेद्भावो[4]पलम्भप्रसङ्गस्तदवस्थ एवेति कस्यचिदपूर्वस्य विशेषस्योपजननमन्तरेण प्रागनुपलब्धस्य पश्चादुपलम्भो दुर्घटः ।

यच्चोक्तम्—असदशक्यकरणं व्योमकुसुमवदिति, तत्र स्वभावभेदाद् असदेकस्वभावं गगनकुसुमम्, सदसत्स्वभावं तु घटादिकम् ? तत्पूर्वमसत् पश्चात्सद्भवति । कथं

**[टि०]** धर्मपर्यायः । स धर्मः सत्ता असद्धर्मोऽभावः । **असतोऽसम्बद्धस्य** इति :—असत्वादसम्बन्धः । **न सर्वत्र** इति :—सर्वत्र [5]मृत्पिण्डादावपि [6]पटात्मना किमिति [7]न भवति ? [8]**स नः** इति :—[9]स वस्तुस्वभावः । [10]**प्रधानात्मकत्वे** इति :—साङ्ख्यैः हि कार्यं प्रकृतितत्त्वकार्यमेवाभ्युपगम्यते । ततः कार्य[11]कारणयोस्तादात्म्येऽतीन्द्रियकारणात्मकत्वात्कार्यजातस्याप्यतीन्द्रियत्वप्रसङ्गः । वैशेषिकमते तु भेदाभ्युपगमात् द्व्यणुकस्याप्रत्यक्षत्वेऽपि तत्कार्यस्योद्भूत[12]रूपत्वादिसामग्रीवशात् प्रत्यक्षतोपपद्यते एव ।

**[पं०]** नित्यत्वादिति भावः । **तत्र सम्भवादिति** (कं. १४४.५) सत्कार्यवादित्वात्तव । **कथं तस्याः कारणमिति** (कं. १४४.७) असदकरणादिति वचनात् । [13]**भावोपलम्भस्तदवस्थ** इति (कं. १४४.७) कुवदव्यापाराभावोपलम्भप्रसङ्ग इत्यर्थः ।

**असदिति** (कं. १४४.९) अविद्यमानं वस्तु । **प्रागुत्पत्तेरिति** (कं. १४४.१२) उत्पत्तेः प्रागिति पदघटना । **तस्य धर्म** इति (कं. १४४.१३) पटस्य धर्मः । **अतिप्रसक्तिरिति** (कं. १४४.१६) तन्तुभ्यः कलमादेरपि भावप्रसङ्गात् । सामान्यद्वारक एव कार्यकारणभावलक्षणः सम्बन्धो निरूप्यते व्याप्यव्यापकभावश्च न तु व्यक्तिनिबन्धनः इत्येतद्दर्शयति **तन्तुजातीयस्य परजातीय एव सामर्थ्यादिति** (कं. १४४.१७) तन्तुजातीयस्येति कारणस्य ।

**[कु०]** उक्तानां प्रतिकूलतर्कमाह—**अत्रोच्यत** इति (कं. १४३.२५) । अस्यैव विपर्ययोऽसत्त्वसाधनं द्रष्टव्यं; प्रयोगस्तु 'कार्यमुत्पत्तेः प्राक् स्वकारणेष्वसत्, उपलब्धिकारणेषु सत्सु उपलभ्यमानत्वात् भूतलघटादिवदिति । [14]**तथा भूतस्येति** *(कं. १४४.३) तद्व्यतिरिक्ते कार्ये प्रमाणाभावादित्यर्थः ।*

---

*१ प्रागभावे – कं. १, कं. २ । २ चक्षुरादिवत्कारणव्यापारोऽपि – जे. २ । ३ रिति, न – कं. १, कं. २ ।*
४ पलम्भस्तदवस्थ – जे. १, जे. २ । ५ मृत्पिण्डावपि – अ, ब; ६ पदात्मना – ड; ७ 'न' अबपुस्तकयोर्नास्ति ।
८ से मु; स – जे. १, जे. ३ । ९ से – अ; १० प्रधानात्मत्वे – मु. जे. १, जे. ३ । ११ कारयो – अ, ब; १२ रूपत्वादि – ड ।
१३ भावोपलम्भप्रसङ्ग – कं. १, कं. २ । १४ तथाभूतनस्य – Ms.

न्यायकन्दली

सदसतोरेकत्र न विरोध इति चेत् ? कालभेदेन समावेशात् । प्रागुत्पत्तेः पटस्य धर्मिणोऽभावात् कथमसत्त्वं तस्य धर्म इति चेत् ? यादृशो यक्षस्तादृशो बलिः, सत्त्वमसतो धर्मो न स्यादसत्त्वं त्वसत एव युक्तम् । यदसत्पूर्वमासीत् तस्य कथं सत्त्वमिति चेत् ? कारणसामर्थ्यात्, अस्ति स कोऽपि महिमा तुर्यादीनां यदेतेषु सम्भूय व्याप्रियमाणेष्वसन्नेव [1]पटः संभवति । असतोऽसम्बद्धस्य जन्यत्वेऽतिप्रसक्तिरिति [2]चेन्न, तन्तुजातीयस्य पटजातीय एव सामर्थ्यात् । कुत एतत् ? त्वत्पक्षेऽपि कुत एतत् ? तन्तुष्वेव पटात्मता न सर्वत्रेति ? वस्तुस्वाभाव्यादिति चेत् ? सैवात्रापि भविष्यति । अत एव चोपादान[3]नियमोऽपि अन्वयव्यतिरेकाभ्यां तज्जातीय[4]नियमेन तज्जातीयस्य शक्त्यवधारणात् । यत्पुनरेतत् कार्यकारणयोरव्यतिरेकात् कारणावस्थानादेव कार्यस्याप्यवस्थानमिति, तदसिद्धमसिद्धेन साधितम्, कार्यकारणयोः स्वरूपशक्तिसंस्थानभेदस्य प्रत्यक्षसिद्धत्वात् । प्रधानात्मकविश्वस्यातीन्द्रियत्वप्रसङ्गाच्च । तद्देशत्वं तु तदाश्रितत्वमात्रनिबन्धनमेवेत्यलं वृद्धेष्वतिनिर्बन्धेन ।

[टि०] अथ शक्तस्य शक्यकरणादिति प्रस्तावतः [5]शक्तिं निराचिकीर्षुराह **एतत्तु विमृश्यताम्** इत्यादि:—आचार्या भट्टाः । **यदि दृष्टमेव** इति :— रूपं स्वरूपम् । [6]**सेयं दृष्टेति** सेयं मणिमन्त्रादिसान्निध्ये दाहानुत्पत्तिः पूर्वदाह[7]करणकाले दृष्टं [8]यद्रूपं तस्य वैगुण्य[म]सामर्थ्यं गमयन्ती समर्थायाः शक्तेरतीन्द्रियायाः सद्भावं कल्पयति । मण्यादिना यस्याः प्रतिबन्धे सत्यपि पूर्वदृष्टे दाहानुत्पत्तिरित्यर्थः । अर्थापत्तेरन्यथोपपत्तिं दर्शयति **न मन्त्रादौ इत्यादि** । **न नित्यानाम्**

[पं०] पटजातीयस्येति कार्यस्येत्यर्थः । **कारणावस्थानादेवेति** (कं. १४४.२०) कारणास्तित्वादेव **साधितमिति** (कं. १४४.२१) हे सांख्य त्वया । [9]**प्रधानात्मत्वे विश्वस्यातीन्द्रियत्वप्रसङ्गाच्चेति** (कं. १४४.२२) कारणात्मकं चेत्कार्यं तथा विश्वं कार्यं प्रधानं कारणम् । प्रधानं चातीन्द्रियं तत्कार्यस्य विश्वस्यातीन्द्रियत्वं प्रसज्जतीत्यर्थः । **तद्देशत्वमिति** (कं. १४४.२३) कारणदेशत्वम् अवयवदेशत्वमिति यावत् । **तदाश्रितत्वमात्रनिबन्धनमेवेति** (कं. १४४.२३) कारणाश्रितत्वमात्रहेतुकम् अवयवाश्रितत्वमात्रहेतुकमिति यावत् । **अलं वृद्धेष्वतिनिर्बंधनेनेति** (कं. १४४.२३) उपहासवाक्यमेतत् ।

*[कु०] प्रत्येकं दूषयितुमाह* ***यच्चोक्तमिति*** *(कं. १४४.९) ।* ***असदेकेति*** *(कं. १४४.१०) अरूपास्प[द]स्य दृष्टान्तत्वे तत्त्वव्याघात इत्यर्थः । असदेकस्वभावमिति स्वभावप्रतियोगितया प्रमाणासिद्धमित्यर्थः ।* ***कथमिति*** *(कं. १४४.११)* यदि भावयोर्विषयम् ।

---

1 *पटः सन् भवति* – जे. २ । 2 चेन्नैतत्– कं. १ कं. २ । 3 नियमः–कं. १, कं. २ । 4 नियमने–कं. १, कं. २ । 5 शक्ति– अ; 6 सेयमदृष्टे – मु. जे. १, जे. ३ । 7 कारण–अ, ब; 8 तद्रूपं – अ, ब; 9 प्रधानात्मके – कं. १, कं. २ ।

## न्यायकन्दली

एतत्तु विमृश्यतां केयं शक्तिरिति ? अतीन्द्रिया काचिदित्यार्याः । तदयुक्तम्, तस्याः सद्भावे प्रमाणाभावात् । अथ मन्यसे यथाभूतादेव वह्नेर्दाहोत्पत्तिरवगता तथाभूतादेव मन्त्रौषधिसन्निधाने सति न दृश्यते, यदि दृष्टमेव रूपं दाहस्य [1]कारणं तस्य समग्रस्य सम्भवाद् दाहानुत्पादो न स्यात् । अस्ति च तदनुत्पत्तिः, [2]सेयं दृष्टरूपस्य वैगुण्यं गमयन्ती हुतभुजि शक्तेरतीन्द्रियायाः सत्त्वं कल्पयति, यस्या मन्त्रादिनाभिभवो विनाशो वा क्रियते । यत्र प्रतीकारवशेन पुनः कार्योदयस्तत्राभिभवः, यत्र तु सर्वथैवानुत्पत्तिः कार्यस्य तत्र विनाशः । न चैतद्वाच्यम्—न मन्त्रो वह्निसंयुक्तो नापि तत्समवेतः कथं व्यधिकरणां शक्तिं विनाशयेत्, विनाशयति चेदतिप्रसङ्गः स्यादिति, [3]तदुद्देशेन प्राप्तत्वात् । यथैवा[4]सम्बद्धोऽप्यभिचारो यमुद्दिश्य क्रियते तमेव हिनस्ति न पुरुषान्तरम्, एवं यामेव व्यक्तिमभि[5]सन्धाय मन्त्रः प्रयुज्यते तस्या एव शक्तिं निरुणद्धि न सर्वासाम् । नाप्येतदुद्घोषणीयम्—यदि शक्तिर्द्रव्यात्मिका ? समवाय्यसमवायिकारण-

[**टि०**] इति । नित्यानां सन्ध्यावन्दनादीनाम् । **न तु नित्याकरणस्य** इति :—अस्यैव व्याख्यानं कारणप्रागभावस्येति । ननु यद्येकमेव कार्यमनेकस्मात् कारणादुत्पद्यते तदा प्रत्येकमेकस्य कार्यकरणकाले द्वितीयस्याकारणत्वदर्शनादहेतुकत्व-(दहेतुत्व)मेव स्यादत आह **दृष्टो ह्येकरूपस्यापि** इति :—स्फोटरूपतया चार्त्रैकरूपता अवान्तरभेदस्य तु सूक्ष्मस्य विद्यमानत्वात् ।

[**पं०**] उत्पत्तेः प्रागपि कारणे कारणं शक्तिरूपतयाऽस्तीति वादिनं साङ्ख्यमाशङ्क्य वैशेषिकः शक्तिममन्यमानः प्राह **एतत्तु विमृश्यतां केयं शक्तिरितीति** (कं. १४४.२४)। **अतीन्द्रिया काचिदित्याचार्या** इति (कं. १४४.२४)

शक्तयः सर्वभावानां कार्यार्थापत्तिगोचराः ।

इति वादिनो मीमांसका अतीन्द्रियां शक्तिं मन्यन्ते इत्यर्थः । **यदि दृष्टमेव रूपं दाहस्य कारणमित्य**(कं. १४४.२६)स्मात्पुरस्तदेत्यध्याहार्यम् । **दाहानुत्पाद** इति (कं. १४४.२७) स्फोटजननानुत्पादः । [7]**दृष्टरूपस्येति** (कं. १४४.२८) भास्वरतादेः । [8]**प्रतीकारवशेनेति** । उत्तम्भकमन्त्रादिना । **न मन्त्रो वह्निसंयुक्तो नापि समवेत** इति (कं. १४५.२) कोऽर्थः ? नात्र संयोगो नापि समवाय इत्यर्थः । **व्यधिकरणमिति** (कं. १४५.३) भिन्नाधारम् । शक्तिर्हि वह्नावस्ति न मन्त्रे । **अतिप्रसङ्गः स्यादिति** (कं. १४५.४) सर्वजगद्वर्तिनामपि वह्नीनां विनाशप्राप्तेः । **तदुद्देशेन** [9]**प्रयुक्तत्वादिति**

[**कु०**] विविनक्ति यत्रेति (कं. १४५.१) । परिहाराभासमाशङ्क्य परिहरति [10]**न तदुद्देशेति** (कं. १४५.४) । परिहाराभासान्तरमाशङ्क्य निराकरोति **नाप्येतदिति** (कं. १४५.६) । समस्य षडेव पदार्था इति । समयस्य विनाशप्रक्रियासमयस्य वेत्येवेत्यर्थः ।

---

१ कारणं स्यात्तस्य सम्भवाद्—कं. १, कं. २ । २ अदृष्टरूपस्य इति सर्वत्रपाठः किन्तु नरचन्द्रसूरिटिप्पणे 'दृष्टरूपस्य' इति मर्थानुसारी पाठः स चास्माभिः समीचीनत्वात्स्वीकृतः—सं । ३ न तदुद्देशेन प्रयुक्तस्वाभावात्—जे. १ । ४ सम्बद्धोऽभिचारो—जे. २ । ५ अभिध्याय—जे. २ । ६ कारण—अ, ब, ड; ७ अदृष्टरूपस्य—कं । ८ अप्रतीकारवशेन—अ । ९ प्राप्तत्वात्—कं । १० तदुद्देश—कं ।

न्यायकन्दली

योरन्यतरविनाशाद्विनश्येत् ? अथ गुणानतिरेकिणी ? तदाश्रयविनाशाद्विरोधिगुण-[1]प्रादुर्भावाद्वा विनश्येदिति, समवायस्यानभ्युपगमात् । यस्य यतो विनाशं प्रतीमस्तस्य तमेव विनाशहेतुं ब्रूमो न पुनरमुं त्वत्कृतं समयमभ्युपगच्छामः, प्रतीतिपराहतत्वात् । यदि चावश्यमभ्युपेयस्तदा द्रव्यगुणयोरेव विनाशं प्रत्यभ्युपगम्यतां यत्र परिदृष्टः, शक्तिः पुनरियं सादृश्यवत् पदार्थान्तरं प्रकारान्तरेणापि विनंक्ष्यति । कार्योत्पादानुत्पादाभ्यां वह्नावधिगता शक्तिः [2]कुत इयं सर्वभावेषु कल्प्यते इति [3]चेत् ? यत्किञ्चिदेतत्, एकत्र तस्याः कार्योत्पादानुगुणत्वेन [4]कल्पितायाः सर्वत्र तदुत्पत्त्यैवात्रानुमानात् ।

अत्रोच्यते—न मन्त्रादिसन्निधौ कार्यानुत्पत्तिरदृष्टं रूपमाक्षिपति । [5]यथान्वय-व्यतिरेकाभ्याम[6]वधृतसामर्थ्यो वह्निर्दाहस्य कारणम्, तथा प्रतिबन्धक[7]मन्त्रादिप्रागभावोऽपि कारणम् । स च मन्त्रादिप्रयोगे सति निवृत्त इति सामग्रीवैगुण्यादेव दाहस्यानुत्पत्तिर्न तु शक्तिवैकल्यात् । भावस्य भावरूपकारणनियतत्वदर्शनादभावकार्यत्वं नास्तीति चेत् ?

[पं०] (कं. १४५.४) वह्न्युद्देशेन मन्त्रस्य प्रयुक्तत्वादित्यर्थः । तदुद्देशेन प्राप्तत्वादित्यपि पाठः सोऽपि सुगमः । संयुक्त-समवायलक्षणः सम्बन्धोप्यत्रास्ति, यतो वह्निना संयुक्ते आकाशे मन्त्ररूपशब्दस्य समवायादिति सम्बन्धाभावोप्यसिद्ध इति । [8]इत्यप्यूह्यम् ? **अभिचार** इति (कं. १४५.४) मारणाद्यात्मकः । **व्यक्तिमिति** (कं. १४५.५) वह्निव्यक्तिम् । **समवाय्यसमवायिकारणयोरिति** (कं. १४५.७) समवायिकारणं वह्निः, असमवायिकारणं शक्तिवह्निसंयोगः । **गुणानतिरेकिणीति** (कं. १४५.८) स्पर्शनामनि गुणेऽन्तर्भावात् । **विरोधिगुणप्रादुर्भावाद्वा विनश्येदिति** (कं. १४५.८) यथा पाकजोत्पत्तौ श्यामादयः । **समयस्येति** (कं. १४५.९) त्वत्समयस्य । **त्वत्कृतमिति** (कं. १४५.१०) त्वया वैशेषिकेण कृतम् । **अभ्युपेय** इति (कं. १४५.११) त्वत्समयोऽङ्गीकर्तव्यः । **द्रव्यगुणयोरेव विनाशं प्रत्यभ्युपगम्यतामिति** (कं. १४५.११) द्रव्यगुणयोरेव विनाशं प्रति विनाशे हेतुरङ्गीक्रियतामित्यर्थः । **सादृश्यवदिति** (कं. १४५.१२) उपमानसाधनाय सादृश्यं नाम पदार्थो भाट्टैः कल्पते । **प्रकारान्तरेणापि विनंक्ष्यतीति** (कं. १४५.१२) पदार्था-न्तरत्वादेव मन्त्रादिना विनंक्ष्यतीत्यर्थः । [9]**तदुत्पत्ताविति** (कं. १४५.१४) कार्योत्पत्तौ । तदुत्पत्ताव[नु]मानादित्यत्र शक्तिः कल्प्यते इत्यनेन योगः ।

**अदृष्टं रूपमिति** (कं. १४५.१५) शक्तिलक्षणम् । **भावस्य भावरूपकारणनियतत्वदर्शनादिति** (कं. १४५.१८) दाहो भावः, स च भावरूपादेव कारणाद् भवितुमर्हति कथमभावात् ? । **अभावकार्यत्वं नास्तीति** (कं. १४५.१९) दाहोऽभावकार्यत्वं न प्राप्नोतीत्यर्थः । **नित्यानां कर्मणामिति** (कं. १४५.१९) देवपित्रतिथिभूतयज्ञा हि नित्यम-नुष्ठानं दर्शपौर्णमासाद्याश्रयनैमित्तिकम् । **अकरणाविति** (कं. १४५.१९) अभावरूपात् । **प्रत्यवायस्येति** (कं. १४५.२०)

[कु०] अर्थापत्तिमन्यथोपपत्त्या दूषयति **अत्रोच्यत** इति (कं. १४५.१५) । **प्रागिति** विशेषणम् । यत्र मन्त्रादिनाऽयं निर्विषीभावः सर्पादीनां तद्विषयं द्रष्टव्यम् । परमार्थस्तु कारणस्वरूपाविनाशक एव प्रतिबन्धकः । तज्जातीयसंसर्गा-भावोऽपि कारणमिति भावः । कारणत्वस्य भावैकनियतत्वान्नाभावः कारणमिति शङ्कते [10]**भावस्वरूपेति** (कं. १४५.१८) ।

---

१ प्रादुर्भावाद्धि—जे. २ । २ कुत एव—जे. १; कं. १, कं. २ । ३ चेत् एकत्र—कं. १; कं. २ । ४ अवधारितायाः—जे. १, जे. २ । ५ यथा हि—जे. १, जे. ३ । ६ अवधारित—जे. २ । ७ मन्त्रादेः—जे. १, जे. २ । ८ कन्दल्यां नास्ति । ९ तदुत्पत्त्यैव—कं । १० भावरूप—कं ।

न्यायकन्दली

**न, नित्यानां कर्मणामकरणात् प्रत्यवायस्योत्पादात्, अन्यथा नित्याकरणे प्रायश्चित्तानुष्ठानं न स्याद्वैयर्थ्यात्। नित्यानामकरणेऽन्यकरणात् प्रत्यवायो न तु नित्याकरणस्य करणप्रागभावस्य हेतुत्वमिति [1]चेत्? न, नित्याकरणस्यापि तद्भावभावित्वनियतस्य सहायत्वेन व्यापारात्। ननु यदि प्रतिबन्धकस्य प्रयोगे तदभावो निवृत्त इति दाहस्यानुत्पत्तिस्तदा प्रतिबन्धकप्रतिबन्धकेऽपि दाहो न स्यात्, तत्कारणस्य प्रागभावस्य निवृत्तत्वात्। दृश्यते च प्रतिबन्धकस्यापरेण मन्त्रादिना प्रतिबन्धे सति दाहः, तेन नाभावः कारणमित्य[2]वस्थिते च शक्तिः कारणम्। सा च प्राक्तनेन प्रतिबद्धा द्वितीयेनोत्तम्भितेति कल्पना अवकाशं लभते। तदप्यपेशलम्, दृष्टे सम्भवत्यदृष्टकल्पनानवकाशात्। कदाचित् प्रतिबन्धकमन्त्राद्यभावसहिता सामग्री कारणम्, कदाचिद् द्वितीय[3]मन्त्रादिसहिता कारणमित्यस्यां कल्पनायां को विरोधः? यदनुरोधाददृष्टमाश्रीयते। दृष्टो ह्येकरूपस्यापि कार्यस्य सामग्रीभेदः, यथा दारुनिर्मथनप्रभवो वह्निः सूर्यकान्तप्रभवश्चेति तर्कसिद्धान्तरहस्यम्। मीमांसासिद्धान्त[4]रहस्यं तु तत्त्वप्रबोधे कथितमस्माभिः।**

**[पं०]** दोषस्य। **अन्यकरणादिति** (कं. १४५.२१) स्त्रीसेवादिकरणात्। **नित्याकरणस्येति** (कं. १४५.२१) व्याख्येयं पदं **करणप्रागभावस्येति** (कं. १४५.२१) व्याख्यानं पदम्। **हेतुत्वमिति** (कं. १४५.२२) प्रत्यवायं प्रति। **तद्भावभावित्वनियतस्येति** (कं. १४५.२२) अन्यकरणभावभावित्वनियतस्य। **सहायत्वेन व्यापारादिति** (कं. १४५.२२) न ह्यन्यकरणेन प्रत्यवायः किन्तु नित्याकरणत्वे सति अन्यकरणं प्रत्यवायजनकम् अतः सहायत्वेन विशेषणत्वेनाभावस्यापि हेतुत्वमिति भावः। **तदभा[व]** इति (कं. १४५.२३) प्रतिबन्धकाभावः। **प्रतिबन्धकप्रतिबन्धेऽपीति** (कं. १४५.२४) दाहप्रतिबन्धकस्य स्तम्भकमन्त्रस्य उत्तम्भकमन्त्रेण प्रतिबन्धे सत्यपीत्यर्थः। **तत्कारणस्य प्रागभावस्य निवृत्तत्वादिति** (कं. १४५.२४) यदा प्रतिबन्धकस्य प्रयोगः कृतस्तदा प्रागभावस्तेषां निवृत्त इति दाहानुत्पादः प्रागभावस्य तत्कारणस्य निवृत्तत्वात्। पुनर्यदा उत्तम्भकमन्त्रादिना प्रतिबन्धकानां प्रतिबन्धः कृतस्तदापि दाहो न प्राप्नोति दाहकारणस्य निवृत्तत्वात् प्रागभावस्य प्रागेव निमित्तत्वात्। प्रागभावो हि अनादिः सान्तस्ततः सकृद्विनष्टः कथं पुनरु[त्प]द्यतामिति भावः। **प्रतिबन्धकस्येति** (कं. १४५.२५) दाहस्तम्भकस्य मन्त्रादेः। **अपरेणेति** (कं. १४५.२५) उत्तम्भकेन। [5]**द्वितीयमन्त्रसहितेति** (कं. १४६.१) उत्तम्भकमन्त्रसहिता। **अदृष्टमिति** (कं. १४६.२) शक्त्याख्यम्। **एकरूपस्यापीति** (कं. १४६.२) उभयत्रापि स्फोटजननात्।

**च शब्दोऽवधारणे इति** (कं. १४६.११) भिन्नक्रमश्चेत्यपि द्रष्टव्यम्।

**[कु०]**परिहरति नेति (कं. १४५.१९)। मा भू[त्] प्रत्यवाय इत्याह **अन्यथेति** (कं. १४५.२०)। [6]**न नित्या[7]करणस्येति** (कं. १४५.२१) अन्वयव्यतिरेकसाम्ये पक्षपातो निष्प्रमाण इत्यर्थः। न चानियतहेतुकत्व उत्तम्भकाभावविशिष्टस्यैव च मन्त्रादेः प्रतिबन्धकत्वादित्येवं सम्भवत्यपि परिहारे [8]कार्यंयातिभेदमामृत्यपि परिहरति **दृष्टोहीति** (कं. १४६.२)। अत[स्त]स्य शक्यस्य शक्यकरणादित्यसिद्धो हेतुरित्यर्थः।

---

१ चेत् नित्याकरणस्य – कं. १, कं. २। २ त्यवस्थितेयं – कं. १, कं. २; त्यवस्थिते शक्तिः कारणम् – जे. ३। ३ मन्त्रसहिता – जे. १, जे. २। ४ रहस्यं तत्त्वप्रबोधे – कं. १, कं. २। ५ द्वितीयादि – कं। ६ न तु – कं। ७ कारण – Ms.। ८ नार्थः स्पष्टः – सं।

## प्रशस्तपादभाष्यम्

**[142] अथ कथं लक्षणः? कतिविधश्चेति। अप्राप्तयोः प्राप्तिः संयोगः। स च त्रिविधः– अन्यतरकर्मजः, उभयकर्मजः, [1]संयोगजश्च संयोग इति।**

## न्यायकन्दली

**[142] संयोगः संयुक्तप्रत्ययनिमित्तमित्यवगतं तावत्, [2]किन्त्वस्य स्वरूपं भेदश्च न ज्ञायते तदर्थं [3]परिपृच्छति–अथ कथं लक्षणः कतिविधश्चेति। अथेति प्रश्नोपक्षेपे, कथंशब्दः किंशब्दार्थे, यथा को धर्मः कथं लक्षण इति। लक्षणशब्दश्च स्वरूपवचन इति किंस्वरूपः संयोगः? कतिविधश्चेति कतिप्रकार इत्यर्थः। लक्षणं कथयति–अप्राप्तयोः प्राप्तिः संयोगः। पूर्व[4]मप्राप्तयोर्द्रव्ययोः पश्चाद्या प्राप्तिः परस्परसंश्लेषः स संयोगः। अप्राप्तयोरिति समवायव्यवच्छेदार्थम्। इदानीं तस्य भेदं प्रतिपादयति–स च त्रिविध इति।**

**[टि०]** [142] **त्यक्तव्यं वा** इति :–[5]स्वाश्रये इति ज्ञेयम्, अन्यथा श्येनकर्मणोऽपि स्वावयवसंयोगविभाग[6]कारणत्वेन लक्षणत्यागवचनमनुपपन्नं स्यात्। **गुणाश्च गुणान्तरम्** इति बहव एव गुणा न त्वेकः संयोग आरम्भक इति भावः। [7]**तदश्रुतव्याख्यातृणाम्** इति :– अत्र च व्याख्याने परमाणुद्वयगतरूपयोर्बहुत्वाभावाद्द्व्यणुके रूपं न स्यात्। अत्र च

**[पं०]** [142] **विभूनामिति** (कं. १४६.१६) व्यापकद्रव्याणामाकाशादीनाम्। **कथमुक्तं क्रियावता निष्क्रियस्येतीति** (कं. १४६.१९) किन्तु सक्रियस्यापि भवतीति पराभिप्रायः। **विवक्षितसंयोगहेतुभूतकर्माभिप्रायेणेति** (कं. १४६.२०) विवक्षितसंयोगहेतुभूतं च कर्म पृष्टानुधाविन एवेत्यन्यकर्मजत्वम्। मन्दं गच्छतस्तु न संयोगहेतुभूतं कर्मेत्यर्थः।

**अवयवयोरिति** (कं. १४६.२२) चरणशिरसोः। **संयोगज इति** (कं. १४६.२२) अवयवसंयोगाज्जातम्। **केचिदिति** (कं. १४६.२३) **व्योमशिवादयः। त्यक्तव्यं वाऽवयविकर्मणः संयोगविभागयोरनपेक्षकारणं कर्मेति लक्षणमिति** (कं. १४६.२६) तच्चावयवि कर्मणि अयमत्र तात्पर्यार्थः संयोगविभागयोरनपेक्षं सत्कारणं कर्मेति कर्मलक्षणम्। तच्चावयवि कर्मणि न घटते तन्मते अवयवसंयोगजत्वादवयविसंयोगस्य। अतोऽवयवसंयोगापेक्षत्वान्नवयविकर्मणो नापेक्षकारणत्वम्।

**[कु०]** [142] **किन्त्वस्येति** (कं. १४६.४) प्रत्ययेन प्रत्येतव्यमात्रसिद्धेरवान्तरव्यावर्तकधर्माज्ञाने व्यावृत्तस्वरूपं दुर्ज्ञानमित्यर्थः। **कथं शब्दः किं शब्दार्थं** (कं. १४६.६) इति–विभक्तिप्रतिपत्तिरूपकव्युत्पन्न इत्यर्थः। लक्षण[8]शब्दः स्वरूपवचन इति कर्मणि ल्युडन्तः व्यावृत्तः स्वरूपवचन इत्यर्थः। अत एव व्यावृत्ते व्यावर्त्तकाधानतया **लक्षणं** कथयतीत्यनेनाविरोधः। **इदानीमिति** (कं. १४६.१०) विभागव्याख्यानं सुगमम्।

---

१ संयोगजश्च–कं. १, कं. २, दे: संयोगजश्चेति–कि। २ किन्तु तस्य–जे. ३। ३ पृच्छति–जे. १, जे. २। ४ मप्राप्तयोः पश्चात्–जे. २। ५ आश्रये–अ, ब, क; ६ करणत्वेन–अ, ब, क। ७ तवश्रुत–अ, ब; ८ शब्दश्च–कं।

## प्रशस्तपादभाष्यम्

तत्रान्यतरकर्मजः क्रियावता निष्क्रियस्य, यथा स्थाणोः श्येनेन, विभूनां च मूर्त्तैः। उभयकर्मजो विरुद्धदिक्क्रिययोः संनिपातः, यथा मल्लयोर्मेषयोर्वा ।

## न्यायकन्दली

चशब्दोऽवधारणे–संयोग[1]स्त्रिविध एव। त्रैविध्यमेव दर्शयति–अन्यतरकर्मज इत्यादिना। द्वयोः संयोगिनोर्मध्ये यदन्यतरद् द्रव्यं तत्र [2]यत्कर्म तदन्यतरकर्म तस्माज्जातोऽन्यतरकर्मजः। उभयोर्द्रव्ययोः कर्मणी उभयकर्मणी ताभ्यां जात उभयकर्मजः। [3]संयोगादपि संयोगो जायते ।

तत्रान्यतरकर्मजः। तत्र तेषां त्रयाणां मध्ये [4]क्रियावता द्रव्येण निष्क्रियस्य द्रव्यस्य संयोगोऽन्यतरकर्मजः। अस्योदाहरणम्–यथा स्थाणोः श्येनेन विभूनां च मूर्त्तैः। निष्क्रियस्य स्थाणोः क्रियावता श्येनेन सह संयोगः श्येनकर्मजः। एवमाकाशादीनां विभूनां निष्क्रियाणां क्रियावद्भिर्मूर्तैरसर्वगतद्रव्यपरिमाणैः मूर्तद्रव्यकर्मजः। नन्वेकस्य मन्दं गच्छतोऽपरेण तत्पृष्ठमनुधावतान्यतरकर्मजः संयोगो दृष्टः कथमुक्तं क्रियावता निष्क्रियस्येति? सत्यम्। निष्क्रियत्ववाचोयुक्तिस्तु विवक्षितसंयोगहेतुभूतकर्माभिप्रायेणेति मन्तव्यम् ।

[**टि०**] संयोगजे संयोगे जनयितव्ये गुणकर्मारम्भे तु सापेक्ष इति सूत्रकारप्रतिपादनात् [5]पूर्वः संयोगः स्वोत्पत्त्यनन्तरमदृष्टविशेषमपेक्षते पाकजगुणारम्भे वह्निसंयोगस्यौष्ण्यापेक्षस्यैव कारणत्वदर्शनात्। **परमाणूनां** [6]**त्र्यणुकादी इति**:– महतः कार्यद्रव्यस्य कार्यद्रव्यारब्धत्वनियमादिति पृथिव्यधिकारे दर्शितम् ।

[**पं०**] [7]**संयोगैः**(ग)**उत्पन्नमात्रस्य चिरोत्पन्नस्य** वेति (कं. १४७.६) उत्पन्नमात्रस्योदाहरणमिहैव वक्ष्यते। चिरोत्पन्नस्य तूदाहरणं विभागे वक्ष्यते ।

**तन्तुवीरणसंयोगादिति** (कं. १४७.१०) वीरणशब्देन कूर्चकमुच्यते। **निष्क्रियस्येति** (कं. १४७.११) अनेन कर्मजः संयोगोऽत्र नास्तीत्युक्तम्। 'वीरणसंयुक्तस्य तन्तोः' (कं. १४७.१०) इत्यत आरभ्य [प्रा]क्तनात्तन्तुवीरण-संयोगादेकस्माद्भवतीत्यन्तेन सन्दर्भेणोक्तस्यार्थ[स्य] स्पष्टतार्थं यन्त्रकमिदं द्रष्टव्यम्। **द्विकार्याकार्यगतश्चायमिति** (कं. १४७.१४)

[**कु०**] **असर्वगतेति** (कं. १४६.१८) परमाणुश्चिरोत्पन्नघटादिभिश्चेत्यर्थः। अचिरोत्पन्नस्य घटादेः कारणाकारणसंयोगजः कारणसंयोगपूर्वकः कार्याकार्यसंयोग इति विवेक्तव्यम् ।

**सक्रियस्येति** (कं. १४६.२३) चरण इव श्येनेऽपि क्रिया तावदस्त्येव। न च तया संयोगारम्भे कश्चिदन्तराय इति भावः ।

---

१ त्रिविधः–जे. १। २ यत्कर्म तस्माज्जातो–कं. १, कं. २। ३ संयोगाच्च–जे. १; जे. २। ४ क्रियावता निष्क्रियस्य–जे. २। ५ पूर्वसंयोगः–ह; ६ त्र्यणुकादीनि–अ, ब; ७ संयोगः–कं।

### प्रशस्तपादभाष्यम्

संयोगजस्तूत्पन्नमात्रस्य चिरोत्पन्नस्य वा [1]निष्क्रियस्य कारणसंयोगिभिरकारणैः कारणाकारणसंयोगपूर्वकः कार्याकार्यगतः संयोगः । स चैकस्माद् द्वाभ्यां बहुभ्यश्च भवति ।

एकस्मात्तावत् तन्तुवीरणसंयोगाद् द्वितन्तुकवीरणसंयोगः ।

### न्यायकन्दली

प्रथमं श्येनचरणस्थाणुशिरसोः संयोगः, तदनु स्थाणुश्येनावयविनोः । तत्रावयवयोः संयोगः कर्मजः, अवयविनोस्तु संयोगजः संयोग इति केचित् । तदप्यसारम्, [2]सक्रियस्यावयविनः [3]क्रियात एवावयव्यन्तरेण संयोगात् । यदि चैवं नेष्यते, अवयवानामपि स्वावयवापेक्षयावयवित्वेन सर्वत्रावयविषु कर्मजस्य संयोगस्योच्छेदः [4]स्यात्, तथा सति चावयविनि कर्माभावो वक्तव्यः, त्यक्तव्यं वावयविकर्मणः संयोगविभागयो[5]रनपेक्षकारणं [6]कर्मेति कर्मलक्षणमिति । दुरक्षरदुर्विदग्धानां युक्तिमाचार्यवचनं चोत्सृजतामन्धानामिव पदे पदे कियत् स्खलितं [7]उपदर्शयिष्यामः ।

[टि०] नन्वारभ्यारम्भकपक्षे विश्वस्यातीन्द्रियत्वमित्येव दूषणमस्ति तत्कथं पृथिव्यधिकारे दर्शितत्वादित्युक्तमत [8]आरभ्यारम्भकवादमुपदर्शयन् विश्वस्यातीन्द्रियत्वं च परिहरन्नाह [9]**अथ यदि परमाणव** इति ।

[पं०] अयं संयोगः । **अन्यस्यासम्भवादिति** (कं. १४७.१५) निष्क्रियस्येत्यनेन कर्मणो निषेधात् संयोगो हि संयोगस्यासमवायिकारणं प्रत्यासत्तौ स्यादतः प्रत्यासत्तिं दर्शयति [10]**प्रत्यासत्तिश्चात्रेत्यादि** (कं. १४७.१५) परः प्राह **संयोगस्यैकस्येत्यादि** (कं. १४७.१९) । [11]**गुणान्तरमारभन्त इति सूत्रविरोध** इति (कं. १४७.१९) अत्र सूत्रे गुणा इति बहुवचनात् बहव एव गुणाः खलु गुणान्तर[मार]भन्ते न त्वेको द्वौ इत्यर्थः सम्भवति । भवता तु संयोगस्य गुणस्यैकस्यापि संयोगाख्यगुणान्तरारम्भकत्वं प्रोच्यते तत्कथं न सूत्रविरोध इति पराभिप्रायः । सूरिराह **नेत्यादि**

[कु०] अवधिभेदेन दिग्द्वयस्य सहावस्थानसम्भवाद्दिशोः किं कृतो विरोध इत्यत आह **याभ्यामिति** (कं. १४७.२) । वीरण(णे) तयोरपि निमित्तकारणत्वात् कथं कारणाकारणसंयोगपूर्वकत्वं ताभ्यां द्वितन्तुकादिसंयोगस्येत्यतं अकारणेति तन्त्वन्तरमिति वीरणेनासंयुक्तमिति शेषः ।

सूत्रे बहुवचनं विवक्षितमिति भ्रान्तश्चोदयति **संयोगस्येति** (कं. १४७.१८) । परिहरति–**नेति** (कं. १४७.१९) । **तदभ्युतेति** (कं. १४७.२२) तन्मते परमाणुवृत्तिभ्यां गुणाभ्यां द्व्यणुके कस्यचिदपि गुणस्य नारम्भाद्द्व्यणुकस्य निर्गुणत्वप्रसक्तौ तन्मूलस्य त्र्यणुकादिकार्यप्रवाहस्य निर्गुणत्वप्रसक्तिरिति महानयं दोष इत्युपलम्भार्थः ।

---

१ अक्रियस्य – जे. व्यो (४८९) । २ सक्रियस्यावयविनः – जे. १, जे. २ । ३ क्रियावत – कं. १, कं. २ । ४ स्यादिति – कं. १, कं. २ । ५ रनपेक्ष – जे. ३ । ६ कर्मेति लक्षणम् – जे. १, जे. २, जे. ३ । ७ दर्शयिष्यामः – कं. १, कं. २ । ८ आरम्भवाद – अ, ब, क; ९ अथवा – मु. जे. १, जे. ३ । १० अत्र प्रत्यासत्तिश्चात्रेत्यातंतंवीदि–इति पाठोऽशुद्धः । शुद्धस्तु परिकल्प्य स्थापितः । ११ द्रव्याणि द्रव्यान्तरमारभते गुणाश्च गुणान्तरम् (वै. सू. १-१-१०) ।

## न्यायकन्दली

उभयकर्मजो विरुद्धदिक्क्रिययोः सन्निपातः । याभ्यां दिग्भ्यां द्वयोः [1]परस्परदेशमागच्छतोरन्योन्यप्रतीघातो भवति ते विरुद्धे दिशौ, यथा प्राचीप्रतीच्यौ दक्षिणोदीच्याविति । विरुद्धयोर्दिशोः क्रिया ययोर्द्रव्ययोस्ते विरुद्धदिक्क्रिये, तयोः सन्निपात उभयकर्मजः संयोगः, प्रत्येकमन्यत्र द्वयोरपि सामर्थ्यावधारणात् । यथा मल्लयोर्मेषयोर्वेत्युदाहरणम् ।

संयोगजस्तु संयोग उत्पन्नमात्रस्य चिरोत्पन्नस्य वा निष्क्रियस्य कारणसंयोगिभिरकारणैः कारणाकारणसंयोगपूर्वकः कार्याकार्यगतः । कारणशब्देनात्र समवायिकारणम[2]भिमतम्, अकारण[3]शब्देन च समवायिकारणादन्यदुच्यते । शेषमुदाहरणे व्यक्तीकरिष्यामः ।

स चैकस्माद् द्वाभ्यां बहुभ्यश्च भवति । [4]एकस्मात् तावत् तन्तुवीरणसंयोगाद् द्वितन्तुकवीरणसंयोगः । वीरणसंयुक्तस्य तन्तोस्तन्त्वन्तरेण संयोगादुत्पन्नमात्रस्य [5]द्वितन्तुकद्रव्यस्य निष्क्रियस्य समवायिकारणभूतैकतन्तुसंयोगिना वीरणेन संयोगः प्राक्तनात् तन्तुवीरणसंयोगादेकस्माद्भवति, स चायं [6]कारणाकारणसंयोगपूर्वकः कथ्यते, द्वितन्तुकस्य समवायिकारणं तन्तुरकारणं वीरणं तयोः संयोगेन जनितत्वात् । कार्याकार्यगतश्चायं

**[पं०]** (कं. १४७.२०)। [7]**समानजात्यारम्भकाणामेव गुणानामिति** (कं. १४७.२२) रूपादीनाम् । **अथ नियम इति** (कं. १४७.२३) बहव एवारभन्ते इत्येवंरूपः । **न सर्वेषामिति** (कं. १४७.२३) कोऽर्थः ?, संयोगस्त्वेकोऽप्यारभते । **इति समाधानमिति** (कं. १४७.२३) व्योमशिवेनोक्तम् । **अश्रुतव्याख्यातृणामिति** (कं. १४७.२३) अश्रुतमेव गुरुभ्यः स्वमनीषिकया ये व्याचक्षते[ते]षां **व्योमशिवादीनां** । **नास्माकमिति** (कं. १४७.२४) यतो **व्योमशिव**व्याख्यानेऽस्मिन् परमाणुद्वयगतरूपयोर्बहुत्वाभावात् ।

**तत्कारणसंयोगित्वादिति** (कं. १४७.२५) द्वितन्तुककारणं द्वौ तन्तू, ताभ्यां सह संयुक्तमाकाशम् । **न च तस्य संयोगस्य कारणान्तरमस्तीति** (कं. १४७.२६) किन्तु द्वितन्तुका[का]शसंयोगस्य तन्तुद्वयाकाशसंयोग एव कारणमित्यर्थः । **तस्योत्पत्तिरिति** (कं. १४८.१) द्वितन्तुकाकाशसंयोगस्योत्पत्तिः ।

**[कु०]** आकाशस्य द्वितन्तुकेन संयोगे प्रमाणमाह **आकाशं तावदिति** (कं. १४७.२४) । पटस्तु काया[यं]स्तन्त्वन्तरे च एतादृश्याः सहानवस्थिति--दर्शनात्स्वदेशेऽपि त्रितन्तुकस्थितिर्द्वितन्तुकं न विरुणद्धीत्यङ्गीकर्तव्यमेव एवमनङ्गीकारे तु सतोरेव समवाय्यसमवायिनो विप्लु[त]तन्तुकेऽस्याकारणको विनाशः कल्पनीयः स्यात् । न तृतीयतन्तुसंयोगस्य विनाशकारणत्वं, नो(त्त)दनाभिघातव्यतिरिक्तस्य संयोगस्योत्पादने(नं) प्रत्येव सामर्थ्यावधारणादिति भावः ।

---

१ परस्परमागच्छतो – कं. १; कं. २ । २ अभिप्रेतम् – जे. २; जे. ३ । ३ शब्देन समवायि – कं. १; कं. २ ।
४ एकस्मात्तन्तु – कं. १; कं. २ । ५ द्वितन्तुकस्य – जे. १; जे. २ । ६ कारणाकारणपूर्व – कं. १; कं. २ ।
७ समानजात्यारम्भकाणामयं नियमः – कं. ।

### प्रशस्तपादभाष्यम्

**द्वाभ्यां तन्त्वाकाशसंयोगाभ्या[1]मेको द्वितन्तुकाकाशसंयोगः । बहुभ्यश्च तन्तुतुरीसंयोगेभ्य [2]एकः पटतुरीसंयोगः ।**

### न्यायकन्दली

तन्तुकार्ये द्वितन्तुके तदकार्ये च वीरणे समवेतत्वात् संयोगस्य संयोगहेतुत्वमन्यस्यासम्भवात् परिशेषसिद्धम् । प्रत्यासत्तिश्चात्र कार्यैकार्थसमवायः, तन्तुवीरणसंयोगस्य द्वितन्तुकवीरणसंयोगेन कार्येण सहैकस्मिन्नर्थे वीरणे समवायात् । संयोगस्यैकस्य संयोगजनकत्वे गुणाश्च गुणान्तरमारभन्त इति सूत्रविरोधः ? न, सूत्रार्थापरिज्ञानात् । गुणानामपि गुणं प्रति कारणत्वमित्यनेन कथ्यते, न पुनरस्यायमर्थो बहव एव गुणा आरभन्ते, नैको न द्वावित्यवधारणस्याश्रवणात् । यत्पुनरत्र गुणाश्च गुणान्तरमारभन्त इति, कारणवृत्तीनां [3]समानजात्यारम्भकाणां गुणानामयं नियमो न सर्वेषामिति समाधानम्, तदश्रुतव्याख्यातॄणां प्रकृष्टधियामेव निर्वहति नास्माकम् ।

द्वाभ्यां तन्त्वाकाशसंयोगाभ्यां द्वितन्तुकाकाशसंयोग इति । आकाशं तावदुत्पन्नमात्रेण द्वितन्तुकेन समं संयुज्यते, तत्कारणसंयोगित्वात् द्वितन्तुककारणसंयुक्तवीरणवत् । न च तस्य संयोगस्य कारणान्तरमस्ति, अतो द्वितन्तुककारणयोस्तन्त्वो[4]राकाशसंयोगाभ्यामेव तस्योत्पत्तिः ।

बहुभ्यश्च तन्तुतुरीसंयोगेभ्य एकः पटतुरीसंयोगः, पटकारणानां तन्तूनां प्रत्येकं तुर्या [5]सह ये संयोगाः, तेभ्यो बहुभ्य एकः पटतुर्योः संयोगो जायते । [6]पटारम्भकत्वं च

[पं०] **न च मूर्तानां समानदेशतादोष** इति (कं. १४८.४) बहूनां द्वितन्तुवादीनां खण्डावयविनां समानदेशता न प्राप्नोतीत्यर्थः । [7]**अपरस्येति** (कं. १४८.६) अवयविनः । **तेष्विति** (कं. १४८.९) द्वितन्तुकादिषु । **दुर्घटमिवमिति** (कं. १४८.९) इदन् अल्पतरतमादिभावेन खण्डावयविग्रहणम् ।

[कु०] **अत एवेति** (कं. १४८.८) आरभ्यारम्भसाधकस्य प्रत्यक्षस्यानुकूलस्तर्कः । न चैवमन्त्यो यत्पदक्षीन ? द्वितन्तुकानुपलब्धिप्रसङ्गः, ईदृशसमानाद[दे]शस्याभ्युपगमेन तथारम्भस्याप्यविशेषात् । [8]**नष्टेष्विति** (कं. १४८.९) दुर्घटत्वमवस्थितसंयोगैः खण्डपटारम्भे अन्त्यावयविनाशापेक्षितया द्रव्यारम्भे निरपेक्ष इत्यनेन विरोधो थातात् । अवतिष्ठमाने तु द्वितन्तुकाद्यनुपलब्धिप्रसङ्गाच्च ।

१ द्वितन्तुकाकाशसंयोगः – जे. दे । द्वितन्त्वाकाश– कि । २ एकपटतुरी – कि । ३ समानजात्यारम्भकारणान्तं – कं. १, कं. २ । ४ रकारणाकाशसंयोगाभ्यामेव – जे. ३ । ५ सह संयोगः – कं. १; कं. २ । ६ पटारम्भकत्वं तु – कं. १; कं. २ । ७ परस्य – कं । ८ विनष्टेषु – कं ।

## न्यायकन्दली

तन्तूनां खण्डावयविद्रव्यारम्भपरम्परया। न च मूर्तानां समानदेशतादोषः, यावत्सु तन्तुष्वेकोऽवयवी वर्त्तते, तावत्स्वेवान्यूनानतिरिक्तेषु [1]अपरस्य समवायानभ्युपगमात्। द्वितन्तुकं द्वयोस्तन्त्वोः समवैति, त्रितन्तुकं तु तयोस्त[2]न्त्वन्तरे च तदधिकं द्रव्यं तेषु चेत्युत्तरोत्तरेषु कल्पनायां कुतः समानदेशत्वम्? अत एव च पटपाटिते तिष्ठति चाल्पतर-समादिभावभेदेन खण्डावयविग्रहणम्। तेषु विनष्टेषु तु यद्यारभ्यते पटो दुर्घटमिदम्।

नन्वेवं बालशरीरावयवा [3]अविनष्टे एव तस्मिन्नाहारावयवसहिताः शरीरान्तर-मारभेरन्? आरभन्ताम्? यदि पट इव खण्डावयविनां वृद्धशरीरे तिष्ठति विनाशिते वा पूर्वशरीराणामुपलम्भः सम्भवति? अथ [4]नास्ति, न तत्रायं विधिः, यथादर्शनं व्यवस्थापनात्। एतेनारभ्यारम्भकवादपक्षे परमाण्ववस्थितस्य जगतो ग्रहणं न स्यादित्यपि प्रत्युक्तम्, परमाणूनां त्र्यणुकादिकारणत्वाभावस्य पृथिव्यधिकारे दर्शितत्वात्। अथवा यदि परमाणवो द्व्यणुकमारभ्य तत्सहितास्त्र्यणुकमारभन्ते, त्र्यणुकसहि[5]ताश्च द्रव्यान्तरम्,

[पं०] **तस्मिन्निति** (कं. १४८.१०) बालशरीरे। **वृद्धशरीरे** इति (कं. १४८.११) वृद्धेः परिसमाप्तत्वात् पूर्णावयवित्वं दर्शयितुं वृद्धशरीरमुक्तम्। **अथ नास्तीति** (कं. १४८.१२) पूर्णशरीराणामुपलम्भः कर्ता। **अयं विधिरिति** (कं. १४८.१२) यदविनष्टेषु पूर्वावयविषु शरीरान्तरारम्भः। **आरभ्यारम्भकवादपक्ष इति** (कं. १४८.१२) आरम्भका अवयवाः, आरभ्या अवयविनः, अवयवाश्च परमाणवः। **परमाण्ववस्थितस्य जगतो ग्रहणं न स्यादिति** (कं. १४८.१३) परमाणूनामतीन्द्रियत्वात् परमाणुनिर्मितस्य जगतोऽतीन्द्रियत्वं प्राप्नोति इत्यर्थः। **परमाणूनां [6]त्र्यणुकादिकारणत्वाभावस्य पृथिव्यधिकारे दर्शितत्वादिति** (कं. १४८.१३) पृथिव्यधिकारे हि परमाणुभ्यां द्व्यणुकं त्रिभिर्द्व्यणुकैस्त्र्यणुकमारभ्यते इति प्रोक्तम्, अतः **कथमतीन्द्रियत्वप्रसङ्ग** इत्यर्थः। **तत्सहिता इति** (कं. १४८.१५) द्व्यणुकसहिता। **महत्त्वानेकद्रव्यवत्त्वरूपविशेषाणामिति** (कं. १४८.१६) रूपविशेष उद्भूतरूपता। महत्त्वानेक-द्रव्यवत्त्वं च रूपविशेषश्चेति द्वन्द्वः। **तेष्विति** (कं. १४८.१७) उपलब्धिकारणेषु। **अतीन्द्रियाश्रयत्वादतीन्द्रियत्वमिति**

[कु०] यथादर्शनं [7]**व्यवस्थानादिति** (कं. १४८.१२) शरीरस्य(स्या) पाकनिक्षिप्तकुम्भतुल्यतया विनाशकारणं सम्भवतीति भावः। **परमाणूनामिति**(कं. १४८.१३) महद्द्रव्यं कार्यैरेवारभ्यते इति द्रव्याधिकारे प्रदर्शितमिति भावः। परमाणूनां महदारम्भमभ्युपगम्यापि परिहरति [8]**अथ यदीति** (कं. १४८.१४)। अतीन्द्रियत्वे साध्ये अतीन्द्रियाश्रयत्वं त्र्यणुकादौ व्यभिचरतीत्यर्थः। द्व्यणुकारम्भ इति प्रार्थ्यते इत्यत आह **परमाणूनामिति** (कं. १४८.१९)। बहुत्वस्य कार्यसमवेतस्य महत्त्वारम्भकत्वमित्यर्थः।

---

१ परस्य–कं. १; कं. २। २ तन्त्वन्तरे चेत्यु...–कं. १; कं. २; तन्त्वन्तरे च एवं तदधिकं द्रव्यं तेषु तन्त्वन्तरे...–जे. १। ३ तस्मिन्नविनष्ट एव–जे. २, जे. ३। ४ न सम्भवत्युपलम्भः पूर्वशरीराणामित्यर्थः –टिप्पण–जे. ३। ५ सहितास्तु–कं. १; कं. २। ६ त्र्यणुकारणत्वाभावस्य इति पञ्जिकायामर्थदृष्ट्या अशुद्धः पाठः त्र्यणुकादि इति कन्दल्यां शुद्धं किन्तु तत्र कारणत्वभावस्येति अशुद्धम्। ७ व्यवस्थापनात्–कं। ८ अथवा–कं।

### प्रशस्तपादभाष्यम्

[143] एकस्माच्च द्वयोरुत्पत्तिः, कथम् ? यदा पार्थिवाप्ययोरण्वोः संयोगे सत्यन्येन पार्थिवेन पार्थिवस्य, [1]आप्येन चाप्यस्य युगपत्संयोगौ भवतस्तदा ताभ्यां संयोगाभ्यां पार्थिवाप्ये द्व्यणुके युगपदारभ्येते ।

ततो [2]यस्मिन्नेव काले द्व्यणुकयोः कारणगुणपूर्वक्रमेण रूपाद्युत्पत्तिस्तस्मिन्नेव काले इतरेतरकारणाकरणसंयोगादितरेतरकार्याकार्यगतौ संयोगौ युगपदुत्पद्येते ।

### न्यायकन्दली

तथापि कुतो विश्वस्याग्रहणम् ? महत्त्वानेकद्रव्यवत्त्वरूपविशेषाणामुपलब्धिकारणानां सम्भवात् । अथ सत्स्वपि तेष्वतीन्द्रियाश्रयत्वादतीन्द्रि[3]यत्वम्, एवं द्व्यणुकारब्धस्य त्र्यणुकस्यातीन्द्रियत्वे तत्पूर्वकस्य विश्वस्यातीन्द्रियत्वं त्वत्पक्षेऽपि दुर्निवारम् । तस्मान्नेयमत्रानुपपत्तिः । परमाणूनां त्र्यणुकानारम्भकत्वे पृथिव्यधिकारोक्तैव युक्ति[4]रनुगन्तव्या ।
[143] एकस्माच्च संयोगाद् [5]द्वयोः संयोगयोरुत्पत्तिः कथमित्यज्ञेन पृष्टः सन्नाह–यदेति । पार्थिवाप्ययोः परमाण्वोः संयोगे सत्यन्येन पार्थिवेन परमाणुना पार्थिवस्य परमाणो[6]रन्ये-

[टि०] [143] तयोः संयोगाद् इति विजातीयेन द्व्यणुकेनेति शेषः । न पुनरज इति :–नन्वेवमपि पक्षे किं संयोगमात्रं पक्षीकृत्य ? मूर्तयोर्वा [7]संयोगो ? अमूर्तयोर्वा ? तत्राद्ये अंशतः सिद्धसाधनमंशतः स्वाश्रयासिद्धिर्धर्मि-

[पं०] (कं. १८८.१७) अतीन्द्रियाः परमाणवस्ते आश्रयो यस्य तत् अतीन्द्रियाश्रयं तस्य भावोऽतीन्द्रियाश्रयत्वम् तस्माद् विश्वस्यातीन्द्रियत्वं प्राप्नोतीति परवाक्यम् । श्रीधरवाक्यम् एवमित्यादि (कं. १४८.१८) **विश्वस्यातीन्द्रियत्वं त्वत्पक्षेऽपि दुर्निवारमिति** (कं. १४८.१९) द्व्यणुकस्यापि परमाणुवदतीन्द्रियत्वादिति भावः ।

[143] **समान[8]जातीयस्य संयोगस्य द्रव्यान्तरोत्पत्तिहेतुत्वादिति** (कं. १४८.२४) पूर्वं हि पार्थिवाप्ययोः संयुक्तयोरपि नारम्भकत्वमासीत् विजातीयत्वादिति भावः । **पार्थिवाप्ययोः परमाण्वोः संयोगे सति** (कं. १४८.२१) इत्यत आरभ्य [9]**एकस्माच्च द्वयोरुत्पत्तिरि**(त्यन्ते)न (कं. १४८.२०) सन्दर्भेण योऽर्थः प्रतिपादितस्तस्य स्पष्टतार्थं यन्त्रकमिदमवधार्यम् ।

| | | |
|---|---|---|
| द्वा | १ | द्वा |
| | २ | |
| रू | | रू |
| पप | | पप |
| पा | १ | आ |

[कु०] [143] **पार्थिवाप्ययोरिति** (कं. १४९.२१) [स]जातीयतया द्रव्याणा[मा]रम्भं विवक्षति एवमन्येन पार्थिवेऽन्येनेत्यादिना । सजातीयतया द्रव्यारम्भं विवक्षति । पार्थिव इति पूरणीयम् इतरथा हेतोर्भागासिद्धिप्रसङ्गात् ।

१ अन्येन चाप्येन–कं. १; कं. २ । २ यस्मिन्–कं. १; कं. २ कि । ३ तीन्द्रियत्वमेव–कं. १; कं. २ । ४ रनुमन्तव्या–जे. १; रवगन्तव्या २ । जे. २; जे. ३ । ५ द्वयोरुत्पत्तिः–कं. १; कं. २; कं. ३ । ६ अन्येनाप्येनाप्यस्य–जे. १; जे. २ जे. ३ । ७ संयोऽमूर्तयो–अ; ८ °जातीयसंयोगस्य–कं । ९ एकस्माच्च संयोगाद्–कं ।

## प्रशस्तपादभाष्यम्

[1]किं कारणम् ? कारणसंयोगिना [2]ह्यकारणेन कार्यमवश्यं संयुज्यत इति न्यायः । अतः पार्थिवं द्व्यणुकं कारणसंयोगि[3]नाप्येनाणुना सम्बद्ध्यते । आप्यमपि [4]द्व्यणुकं कारणसंयोगिना पार्थिवेनेति ।

## न्यायकन्दली

नाप्येन चाप्यस्य परमाणोर्युगपत्संयोगौ भवतस्तदा ताभ्यां संयोगाभ्यां पार्थिवाप्ये द्व्यणुके युगपदारभ्येते । समानजातीयसंयोगस्य द्रव्यान्तरोत्पत्तिहेतुत्वात् । ततो यस्मिन्नेव काले पार्थिवाप्यद्व्यणुकयोः कारणगुणपूर्वक्रमेण रूपाद्युत्पत्तिः, तस्मिन्नेव काले इतरेतरकारणाकारणगतात् संयोगादितरेतरकार्याकार्यगतौ संयोगौ युगपदुत्पद्येते । इतरेतरे पार्थिवाप्ये द्व्यणुके, तयोः कारणाकारणे परस्परसंयुक्तौ पार्थिवाप्यपरमाणू, पार्थिवः परमाणुरितरस्य पार्थिवद्व्यणुकस्य कारणमितरस्याप्यस्य द्व्यणुकस्याकारणम् । एवमाप्यपरमाणुरितरस्याप्यद्व्यणुकस्य कारणमितरस्य पार्थिवद्व्यणुकस्याकारणम् । तयोः संयोगाद् इतरस्य पार्थिवपरमाणोर्यत्कार्यं पार्थिवं द्व्यणुकमकार्यश्चाप्यः परमाणुः, तयोः संयोगो भवति । एवमितरस्याप्यपरमाणोर्यत्कार्यमाप्यं द्व्यणुकमकार्यस्तु पार्थिवः परमाणुस्तयोरपि संयोगो भवतीत्येकस्माद् द्वयोरुत्पत्तिः ।

किं कारणम् ? पार्थिवाप्ययोर्द्व्यणुकयोर्विजातीयपरमाणुसंयोगे किं प्रमाणम् ? इति पृष्टः सन् प्रमाणमाह–[5]कारणसंयोगिनेति । पार्थिवपरमाणुराप्यद्व्यणुकेन सह

[टि०] ग्राहकप्रमाणबाधो वा । द्वितीये सिद्धसाधनम् । तृतीये आश्रयासिद्धिर्धर्मिग्राहकप्रमाणबाधश्चेति । तस्माद् विभूनां [6]परस्पर संयोगो नास्तीति पक्षः कार्यः । ननु परमाण्वाकाशयोरिति एतेन विवादाध्यासितः संयोगो कार्यो न भवति

[पं०] तत्कारणसंयोगित्वाविति (कं. १४९.१०) तस्य द्व्यणुकस्य कारणं परमाणुस्तत्संयोगित्वात् द्व्यणुकेनापि संयोगः संयुक्तसंयोग इत्यर्थः । परसंयुक्ततुरीवदिति (कं. १४९.१०) यथा तुरीस्तंतु(ल)क्षणकारणसंयुक्ता सती कार्येण परेणापि संयुज्यते । यतः कारणसंयोगिना कार्यं संयुज्यत इति (कं. १४९.११) कारणसंयुक्तत्वे कार्यमपि संयुज्यते

[कु०] अर्थप्राधान्याद्येवं प्रयोगः । यथाभाष्यं तु पार्थिवं द्व्यणुकमाप्येन परमाणुना संयुज्यते । प्राप्तं च द्व्यणुकं पार्थिवेन परमाणुना तदकार्यत्वे सति तत्संयोगिकार्यत्वात् । तुर्या पट इवेति द्रष्टव्यः उपसंहार इति न्यायसिद्धस्य प्रकृते योजनमित्यर्थः । अत्र च यद्येतौ संयोगौ न स्यातां कारणाभावाद् द्व्यणुकयोः परस्परसंयोगो न स्यादिति तर्कः । अत एव तत्कारणप्रश्नोत्तरे नासङ्गते ।

१ किं कारणसंयोगिना हि कार्यम्–दे । २ हि कार्यमवश्यं–जे । ३ अणुना–जे । ४ द्व्यणुकं पार्थिवेनेति–जे, व्यो.(४९२)दे । ५ तस्याप्यद्व्यणुकस्य कारणमाप्यपरमाणुस्तेन सह संयोगित्वात्–टिप्पण–जे. ३ । ६ परस्पर–अ, ब

### प्रशस्तपादभाष्यम्

अथ द्व्यणुकयोरितरेतरकारणाकारणसम्बद्धयोः कथं परस्परतः सम्बन्धः? तयोरपि संयोगजाभ्यां संयोगाभ्यां [1]सम्बन्ध इति।

[2]नास्त्यजः संयोगो नित्यपरिमण्डलवत्, पृथगनभिधानात्। यथा चतुर्विधं [3]परिमाणमुत्पाद्यमुक्त्वाह (वै. सू. ७-२-२६) "नित्यं परिमण्डलम्" इत्येवमन्यतरकर्मजादिसंयोगमुत्पाद्यमुक्त्वा पृथङ् नित्यं ब्रूयात्, न त्वेवमब्रवीत्, तस्मान्नास्त्यजः संयोगः।

### न्यायकन्दली

सम्बद्ध्यते, तत्कारणसंयोगित्वात् पटसंयुक्ततुरीवत्। एवमाप्यं परमाणुमपि पक्षीकृत्य वक्तव्यम्। यतः कारणसंयोगिना कार्यं संयुज्यते, अतः पार्थिवं द्व्यणुकं कारणसंयोगिनाप्येन परमाणुना सम्बध्यते, आप्यं च द्व्यणुकं तस्य कारणसंयोगिना पार्थिवपरमाणुनेत्युपसंहारः।

अथ पार्थिवाप्यद्व्यणुकयोरितरेतरकारणसम्बद्धयोः कथं सम्बन्धः? पार्थिवद्व्यणुकस्य स्वकीयाकारणेनाप्यद्व्यणुककारणेनाप्यपरमाणुना सम्बद्धस्याप्य[4]द्व्यणुकस्य च स्वकीयाकारणेन पार्थिवद्व्यणुककारणेन पार्थिवपरमाणुना सम्बद्धस्य कथं सम्बन्धः? इति पृच्छति। उत्तरमाह–तयोरपीति। पार्थिवद्व्यणुकस्याप्येन परमाणुना [5]यः संयोगजः संयोगो यश्चाप्यद्व्यणुकस्य पार्थिवपरमाणुना संयोगजः संयोगस्ताभ्यां पार्थिवाप्य[6]परमाणुद्वयसंयोगाभ्यां द्व्यणुकयोः परस्परसंयोगः। अत्रापि पूर्वोक्त एव न्यायः, कारणसंयोगिना अकारणेन संयोगि कार्यमिति।

[टि०] [7]अप्राप्तिपूर्वकत्वाभाव[8]प्राप्तित्वात् समवायवदिति प्रमाणं सूचितम्। अत्र च तात्पर्येण नित्य[9]प्राप्तित्वादित्यर्थे सति [10]साध्याविशिष्टतेति। तथा व्यापिनोऽपि इति :– "[11]विवादास्पदं संयोगः क्रियाजोऽप्राप्तिपूर्वकत्वात् श्येनस्थाणु-

[पं०] ।०००। अत्र प्रथमः परमाणुद्व्यणुकेन युक्तो यतस्तत्कारणेन मध्यबिन्दुतया कल्पितेन परमाणुना युक्तः; अतस्तत्कार्येण द्व्यणुकेनापि युक्तः। कारणसंयोगिनेति (कं. १४९.१२) कार्यं परमाणुलक्षणम्। तस्येति (कं. १४९.१३) आप्यद्व्यणुकस्य।

[कु०] संयोगोऽजो न भवतीति (कं. १४९.२४) संयोगजातिर्ननित्या अये(जे)ति व्याख्यानादुक्तसंयोगत्रितयापेक्षया न सिद्धसाधनम् पृथगनभिधानादिति हेतुर्नित्याश्रयतया अनभिधानादिति योजनीया तथा व्यापिनोपीति (कं. १५०.२)। अवयवात्मकप्रदेशाभावेप्युपाधिरूपदेशापेक्षया आकाशोऽपि प्रदेशवानिति भावः। ननूभयपक्षसमत्वादित्यनुपपन्नं

१ संयोग–कि। २ नाजः संयोगोऽस्ति–जे. व्यो. (४९२) जे। ३ परिमाणुमुक्त्वा–दे। ४ द्व्यणुकस्यापि–कं. १, कं. २। ५ यः संयोगः–जे. १, जे. २, जे. ३। ६ परमाणुसंयोगाभ्यां–कं. १; कं. २। ७ अत्रापि–अ, ब; ८, ९ व्याप्तित्वात्–अ; १० साध्यावशिष्टतेति–अ, ब, क; ११ विवादास्पदः–अ, ब, क;

## प्रशस्तपादभाष्यम्

परमाणुभिराकाशादीनां प्रदेशवृत्तिरन्यतरकर्मजः संयोगः। विभूनां तु परस्परतः संयोगो नास्ति, युतसिद्ध्यभावात्।

सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं [1]पृथगाश्रयाश्रयित्वं चेति।

## न्यायकन्दली

त्रिविध एव संयोग इत्युक्तम्। नित्यस्यापि संयोगस्य सम्भवादिति केचित्, तत्प्रतिषेधार्थमाह–नास्त्यजः संयोगः, परिमण्डलवत् पृथगनभिधानात्। सर्वज्ञेन महर्षिणा सर्वार्थोपदेशाय प्रवृत्तेन पृथगनभिधानात्, अजः संयोगो नास्ति, खपुष्पवत्। एतदेव विवृणोति–यथेत्यादिना। संयोगोऽजो न भवतीति प्रतिज्ञार्थो न पुनरजः संयोगो नास्तीति, आश्रयासिद्धत्वात्। ननु परमाण्वाकाशयोः संयोगो नित्य एव, तयोर्नित्यत्वादप्राप्त्यभावाच्च।

यत्पुनरयं कणादेन नोक्तः, तद् भ्रान्तेः पुरुषधर्मत्वात्, अत आह–[2]परमाणुभिराकाशादीनामिति। [3]यथा महतो न्यग्रोधस्य मूलाग्रावयवव्यापिन एकस्य मूलादग्रमग्रान्मूलं गच्छता पुरुषेण संयोगविभागावन्यतरकर्मजौ युगपत्प्रतीयेते, तथा व्यापिनोऽप्याकाशस्य परमाणुना सह संयोगविभागौ परमाणुकर्मजौ [4]भवतः, तयोरव्याप्यवृत्तित्वाविति न

[टि०] संयोगवदिति प्रमाणम्। अप्राप्तिपूर्वकत्वं च तत्र तथा प्रत्यय[5]भावादेवागतम। विभुद्वयसंयोगस्य नित्यत्वे युक्तिमुपसहरति [6]सदकारणवदिति सदिति प्रागभावव्यवच्छेदार्थम्, तस्य सत्तालिङ्गितत्वाभावात्। अतो [7]व्यापकाभावाद् इति :– एवं च संयोगस्य व्यापकानुपलब्धिप्रतिकूलतर्कबाधितत्वं दर्शितम्। यथेदं विभूनाम् इति अत्र च प्रतिपक्षानु-

[पं०] महर्षिणेति (कं. १४९.२२) कणादेन। संयोगोऽजो न भवतीति प्रतिज्ञार्थ इति (कं. १४९.२४) संयोग इति धर्मी, अजो न भवतीति साध्यो धर्मः इति भावना। आश्रयासिद्धत्वत्वादिति (कं. १४९.२५) नहि संयोगोऽपि नास्ति किन्त्वजत्वं नास्ति। अप्राप्त्यभावाच्चेति (कं. १४९.२६) सततं सम्बद्धत्वाच्चेत्यर्थः। सततं सम्बद्धत्वं च संयोगो न भवति। अप्राप्तयोः प्राप्तिः संयोग इति वचनादित्याशयः।

[कु०] मूर्तद्रव्यसंयोगेन संयोगाभावस्य स्थापितुमशक्यत्वादित्यत आह यथेदमिति (कं. १५०.१२)। उभयोर्वादिप्रतिवादिरभिमतसाधनाद् उभयपक्षसमत्वं न तु साध्यतद्विपर्ययसाधनादिति भावः। अन्यतरस्यासम्भवादिति (कं. १५०.१५) यस्य येन यदा संयोगस्तस्य तेन तदैव विरोधाद्विभागोऽनङ्गीकार इत्यर्थः।

---

१ युताश्रयसमवायित्वं चेति–जे. व्यो. (४९४) दे। २ आह आकाशादीनामिति–जे. १, जे. २, जे. ३ ३ यथा हि न्यग्रोधस्य–जे. ३। ४ संभवतः–जे. २। ५ भावादपगतम्–ड; ६ स च मु. सदकारणवद्–जे. १ जे. ३; ७ व्यापिका–अ, ब;

न्यायकन्दली

परमाण्वाकाशसंयोगस्य नित्यता । इदं तावदित्थं परिहृतम्, विभूनां परस्परतः संयोगे का प्रतिक्रिया? [1]न ह्यसावन्यतरकर्मजः, नाप्युभयकर्मजः, तेषां निष्क्रियत्वात् । नापि संयोगजः, कार्यस्य हि कारणसंयोगिना अकारणेन संयोगजः संयोगो भवति । न चायं विभूना[2]मुपपद्यते, नित्यत्वात् । अस्ति च तेषां संयोग आकाशममूर्तेनापि द्रव्येण समं संयुज्यते मूर्तद्रव्यसंयोगित्वात् [3]पटादिवदित्यनुमानात् [4]प्रतीतेः । [5]सदाकारणवन्नित्यं तस्मादनुपपन्नमिदम्, अजः संयोगो नास्तीति । तत्राह–विभूनामिति । यत्र युतसिद्धि[6]स्तत्रैव संयोगो दृष्टः । युतसिद्धिश्चाकाशादिषु नास्ति, अतो व्यापकाभावात् संयोगोऽपि तेषु न भवति । यच्च संयोगप्रतिपादकमनुमानमुक्तम्, तदसाधनम्, उभयपक्षसमत्वात् । यथेदं विभूनां संयोगं [7]प्रशस्ति, तथा ताभ्यामेव हेतुदृष्टान्ताभ्यां विभागमपि । अस्तु द्वयोरप्युपपत्तिः, प्रमाणेन तथाभावप्रतीतेरिति चेन्न, संयोगविभागयोरेकस्य [8]नित्यत्वेऽन्यतरस्यासम्भवादिति द्वयोरप्यसिद्धिः, परस्परप्रतिबन्धात् ।

अथ केयं युतसिद्धिर्यस्या अभावाद्विभूनां संयोगो न सिद्ध्यति? अत्राह–सा पुनरिति ।

[टि०] मानस्य विभागसाधनद्वारेण संयोगाभावसाधकत्वात्प्रकरणसमत्वम्, अनिष्टापादानत्वं वा । [9]द्विविधाप्याकाशादिषु इतिः– ननु यत्रैवंरूपयुतसिद्धिद्वयव्यावृत्त्या संयोगव्यावृत्ति[10]स्तत्र संयोगगतं कार्यत्वमपि प्रयोजकम्, अकार्ये तु संयोगे नैवं भविष्यति ? न वाच्यम्, अजसंयोग[11]साधकप्रमाणस्य विभागसाधकत्वेन बाधितत्वात् । ननु विभागस्य संयोगनाशकत्वात् पूर्वक्षणे विभागे सति द्वितीयक्षणे [12][संयोगनाशादेकत्र क्षणे] द्वयोरप्यवस्थानं प्राप्नोतीत्याह यद्यपि विभागकाल इति ॥ संयोगः ॥

[पं०] भ्रान्तेः पुरुषधर्मत्वादिति (कं. १४९.२६) भ्रान्तत्वादेव कणादेन नोक्त इत्यर्थः । एकस्येति (कं. १५०.१) अवयविनः । अन्यतरकर्मजौ इति (कं. १५०.२) अन्यतरपुरुषकर्मजौ । परमाणुकर्मजौ भवत इति (कं. १५०.३) अनेनैतदुक्तं भवति संयोगोऽप्यन्यतरकर्मजोऽयं संयोगः । तयोरिति (कं. १५०.३) संयोगविभागयोः । नित्यत्वादिति (कं. १५०.७) कारणाभावादित्यर्थः । अतो व्यापकाभावात्संयोगोऽपि तेषु न भवतीति (कं. १५०.११) संयोगो हि युतसिद्ध्या व्याप्तोऽस्ति ? नैव अग्निना च धर्म इत्यर्थः । यथेदमिति (कं. १५०.१२) इदं संयोगप्रतिपादकमनुमानम् ।

[कु०] [13]द्वयोर्द्रव्ययोरिति (कं. १५०.१७) व्यापकं तु लक्षणमप्राप्तयोर्विद्यमानत्वं युतसिद्धिरिति । तद्भेदकथनं तु भाष्यकारीयम् । व्यापकनिवृत्त्या [व्या]प्यनिवृत्तिं दर्शयितुमिदमेव प्रकारद्वयमप्राप्तयोर्विद्यमानताया एकं प्रकारान्तराभावादिति । ननु यद्येकार्थसमवेताद्विभागात् संयोगो विनश्यति तर्हि पटारम्भके कस्मिंश्चित्तन्तौ वर्तमानाद्धस्तादि-

१ न चासौ – जे. २ । २ मुत्पद्यते–जे. ३ । ३ पटवद – कं. १, कं. २; घटवद – जे. २ । ४ प्रतीतः – कं. १; कं. २ । ५ चाकारण – कं. १; कं. २ । ६ तत्र – जे. १ । ७ शास्ति – कं. १, कं. २ । ८ संयोगश्चेन्नित्यो विभागो न भवति, विभागश्चेन्नित्यः संयोगो न भवति – जे. ३ । ९ द्विधा – मु. जे. ३; द्विविधा – जे. १; १० तत्र – अ । ११ साधन – अ; १२ [ ] एतच्चिह्नान्तर्गतः पाठः अपुस्तके आवृत्तः । १३ द्वयोरन्यतरस्य – कं ।

प्रशस्तपादभाष्यम्

विनाशस्तु [1]सर्वस्य संयोगस्यैकार्थसमवेताद्विभागात्, क्वचिदाश्रयविनाशा[2]दपि । कथम्? [3]यदा तन्त्वोः संयोगे सत्यन्यतरतन्त्वारम्भके अंशौ कर्मोत्पद्यते, [4]तेन कर्मणा अंश्वन्तराद्विभागः क्रियते, विभागाच्च तन्त्वारम्भकसंयोगविनाशः, संयोगविनाशात्तन्तुविनाशः, [5]तद्विनाशे च [6]तदाश्रितस्य संयोगस्य विनाश इति ।।

न्यायकन्दली

द्वयोरन्यतरस्य वा पृथग्गमनं युतसिद्धिर्नित्यानाम्, द्वयोरन्य[7]तरस्य वा परस्परपरिहारेण [8]पृथगाश्रयाश्रयित्वं युतसिद्धिरनित्यानाम्। इयं [9]द्विविधाप्या[10]काशादिषु नास्तीत्यभिप्रायः।

विनाशस्तु सर्वस्य संयोगस्य एकार्थसमवेताद्विभागात् । अन्यतरकर्मजस्योभयकर्मजस्य संयोगजस्यैकार्थसमवेताद्विभागात । ययोर्द्रव्ययोः संयोगो वर्तते, तयोः परस्परं [11]विभागात् संयोगस्य विनाशः । यद्यपि विभागकाले संयोगो विद्यत एव, तथापि तयोः सहभावो न लक्ष्यते, विनाशस्याशुभावाद्विभागेन वा तदुपलम्भप्रतिबन्धात् । क्वचिदाश्रयविनाशादपि संयोगस्य विनाशः । कथम्? तन्त्वोः संयोगे सत्यन्यतरस्य[12] तन्त्वारम्भकेंऽशौ कर्मोत्पद्यते, कुतश्चित् कारणात् । तेन कर्मणा अंश्वन्तराद्विभागः क्रियते, विभागादंश्वोः संयोगविनाशात् तन्तुविनाश तदाश्रितस्य संयोगस्य विनाशः, उभयाश्रयस्य तस्यैका[13]श्रयावस्थानेऽनुपलम्भादिति ।।

[पं०] **ताभ्यामेव हेतुदृष्टान्ताभ्यां विभागमपीति** (कं. १५०.१३) तद्यथा आकाशादीनि व्यापकद्रव्याणि परस्परं विभज्यन्ते मूर्तद्रव्यसंयोगित्वाद् घटवत् । **संयोगविभागयोरेकस्य नित्यत्वेऽन्यतरस्यासम्भवादिति** (कं. १५०.१४) संयोगश्चेन्नित्यो विभागो न भवति विभागश्चेन्नित्यो न संयोग इति भावना ।

**नित्यानामिति** (कं. १५०.१७) परमाण्वादीनाम् । **अनित्यानामिति** (कं. १५०.१८) घटादीनाम् ।

**संयोगो विद्यत एवेति** (कं. १५०.२२) विनश्यदवस्थोऽस्त्येव संयोगः नास्ति चेदसन्तं संयोगं विभागो विनाशयति । **तदुपलम्भप्रतिबन्धादिति** (कं. १५०.२३) तच्छब्देन संयोगः । **अंशौ इति** (कं. १५०.२४) तन्त्ववयवभूते । **एकाश्रयावस्थानेऽनुपलम्भादिति** (कं. १५१.३) (द्वि)द्विष्ठो हि सम्बन्धः । ☉ । इति संयोगगुणविवरणं समर्थितम् ॥

[कु०] विभागात्तन्त्वन्तरसंयोगो विनश्येदित्यत आह **तयोरिति** (कं. १५०.२१) । ननु विभाग उत्पन्नः संयोगं विनाशयति तर्ह्युभयोः सहोपलम्भः स्यादित्यत आह **यद्यपीति** (कं. १५०.२१) ।

॥ इति संयोगनिरूपणम् ॥

**अनुपलम्भादिति** (कं. १५१.३) अनवस्थानादिति व्याख्येयम् । एवमप्यवस्थाने उभयाश्रयत्वव्याघात[प्र]सङ्ग इति ।

---

१ सर्वसंयोगस्य – दे । २ दिति–जे. दे । ३ यथा – कं. २ । ४ तेस अंश्वन्तराद – जे. । ५ तद्विनाशे तदाश्रितस्य – कं. १, कं. २, दे । ६ तदाश्रितस्य तन्त्वन्तर संयोगस्य – कं. १, कं. २, कि । ७ रन्यतस्य परस्पर– कं. १, कं. २ । ८ पृथगाश्रयाश्रयितत्वं – जे. २ । ९ द्विधापि – कं. १, कं. २ । १० आकाशादीनां – जे. २ । ११ विभागादस्य – कं. १, कं. २ । १२ न्यतरतन्त्वारम्भके – कं. १, कं. २; अन्यतरस्य तन्तोरारम्भके – जे. २, जे. ३ । १३ श्रयावस्थानेन – जे. २ ।

## प्रशस्तपादभाष्यम्

[144] **विभागो विभक्तप्रत्ययनिमित्तम् । शब्दविभागहेतुश्च ।**

प्राप्तिपूर्विकाऽप्राप्तिर्विभागः । स च [1]त्रिविधः–अन्यतरकर्मजः, उभयकर्मजः, विभागजश्च विभाग इति ।

तत्रान्यतरकर्मजोभयकर्मजौ संयोगवत् ।

विभागजस्तु द्विविधः–कारणविभागात्, कारणाकारणविभागाच्च ।

## न्यायकन्दली

[144] संयोगपूर्वकत्वाद्विभागस्य तदनन्तरं निरूपणार्थमाह – विभागो विभक्तप्रत्ययनिमित्तमिति । अत्रापि व्याख्यानं पूर्ववत् । संयोगाभावे [2]विभक्तप्रत्यय इति चेत् ? असति विभागे संयोगाभावस्य कस्मादुत्पादः ? [3]कर्मणा क्रियत इति चेत् ? न, कर्मणो गुणविनाशे सामर्थ्यादर्शनात् । [4]दृष्टं च गुणविनाशे गुणानां हेतुत्वम्, तेनात्रापि

[टि०] ( ।। अथ विभागनिरूपणम् ।। )

[144] **विभक्तप्रत्ययनिमित्तम्** इति :–आलोकादिव्यवच्छेदार्थमत्राप्यर्थविशेषणं सदिति ज्ञेयम् । **दृष्टं च गुणेति** शब्दबुद्ध्यादीनाम् । अवयवसंयोगानन्तरम् इति :– आरम्भकसंयोगानन्तरमित्यर्थः । [5]स्थितिर्नियम इति :–अन्यथा विकसत्क[6]मलकुड्मलादौ कमलपत्रद्वय[7]संयोगनाशहेतोर्विभागस्य कमलपत्रारम्भकसंयोगनाशकत्वमपि स्यात् ।

[पं०] [144] ।। अथ विभागविवरणं प्रस्तूयते ।।

**तदनन्तरं निरूपणार्थमाहेति** (कं. १५४.१६) संयोगादनन्तरं विभागस्य निरूपणार्थमाहेत्यर्थः । **अत्रापि व्याख्यानं पूर्ववदिति** (कं. १५४.१७) यथा संयोगः संयुक्तप्रत्ययनिमित्तमित्यत्र अस्ति तावदिदमनेन संयुक्तमिति प्रत्ययो लौकिको न चास्य रूपादयो निमित्तं संयुक्तप्रत्ययविलक्षणत्वात्, अतो यदस्य निमित्तं स संयोग इत्येव व्याख्या कृता; तथाऽत्रापि कार्या । तद्यथा अस्ति तावदिदमनेन विभक्तमिति प्रत्ययो लौकिको न चास्य रूपादयो निमित्तं विभक्तप्रत्ययविलक्षणत्वात्, अतो यदस्य निमित्तं स विभाग इति वाक्यार्थः । **दृष्टं च गुणविनाशे गुणानां हेतुत्वमिति** (कं. १५३.१९) यथा

[कु०] [144] [8]**तत्सामर्थ्यदर्शनादिति** (कं. १५४.१८) अयं भावः इह त्वन्वयव्यतिरेकाभ्यां संयोगविनाशस्य कर्म कारणमेषितव्यं तौ च कारणकारणातयाप्युपपद्यमानौ न नियतं कर्मणः संयोगविनाशकारणत्वं गमयितुमर्हतः । किञ्च कारणविनाशो वा समानाधिकरणो विरोधिधर्मो वा *विनाशकारणमेषितव्यम् । इतरथाऽतिप्रसङ्गात् ।* न च

१ त्रिविध एव – जे. व्यो. (४९८) । २ विभागव्यवहार – जे. २, जे. ३ । ३ कर्मणा क्रियते – कं. १; कं. २ । ४ यथाऽग्निसंयोगस्य पाकजरूपादिविनाशकत्वमिति – टिप्पण जे. ३ । ५ स्थितिनियम – मु. जे. १, ३ – स्थितिर्नियमः; ६ कमलादौ - अ; ७ संयोगानाश – अ, ब; ८ सामर्थ्या – कं ।

न्यायकन्दली

[1]गुणान्तरकल्पना । किञ्च संयोगाभावे[2]ऽसंयुक्ताविमाविति, प्रत्ययः स्यान्न विभक्ताविति, अभावस्य विधिमुखेन ग्रहणाभावात् । भाक्तः प्रत्ययोऽयमिति चेत् ? तर्हि विभागस्याप्रत्याख्यानम्, निष्प्रधानस्य भाक्तस्याभावात् ।

तस्य कार्यं दर्शयति–शब्दविभागहेतुश्चेति । न केवलं विभक्तप्रत्ययनिमित्तं शब्दविभागहे[3]तुश्चेति चार्थः । वंशदले पाट्यमाने योऽयमाद्यः शब्दः, स तावद् [4][5]गुणान्तरनिमित्तः, शब्दत्वात्, भेरीदण्डसंयोगजशब्दवत् । न चायं संयोगजः, तस्याभावात् । तस्माद्वंशदलविभागज एवायम्, तद्भावभावित्वात् । विभागस्य विभागहेतुत्वं चानन्तरं वक्ष्यामः ।

प्राप्तिपूर्विकाऽप्राप्तिरिति तस्य लक्षणकथनम् । अधर्म इति नञ् यथा धर्मविरोधिनि गुणान्तरे न तु धर्माभावे, तथा अप्राप्तिरिति नञ् प्राप्तिविरोधिनि गुणान्तरे, न तु प्राप्तेरभावे प्राप्तौ पूर्वस्थितायां याऽप्राप्तिः, प्राप्तिविरोधी गुणविशेषः, स विभाग इति

[पं०] शब्दबुद्ध्यादीनाम् । **गुणान्तरकल्पनेति** (कं. १५४.२०) विभागस्य गुणविशेषकल्पना । **भाक्तः प्रत्ययोऽयमिति** (कं. १५५.१) अयं विधिमुखेन विभक्तप्रत्यय औपचारिकः संयोगाभावस्यैव विधितया उपचरितत्वादिति भावः । भाक्तः प्रत्ययोऽयमिति चेदित्यस्मात्पुरस्तर्हीत्यध्याहार्यम् । **निष्प्रधानस्य भाक्तस्याभावादिति** (कं. १५५.१) मुख्यमर्थं विना औपचारिकोऽर्थो न भवतीत्यर्थः ।

**(स) तु[5] गुणान्तरनिमित्त** इति (कं. १५५.४) विभागा(ग)निमित्तः । **तस्याभावादिति** (कं. १५५.५) संयोगस्याभावात् ।

प्राप्तिपूर्विकेत्युक्तं तच्चर्चयति परः **किं प्राप्तेरित्यादिना** (कं. १५५.९) । सूरेरुत्तरम् **अवस्थितिमात्रमिति** (कं. १५५.१०) **ब्रूमहे** इति । *विभागात्पूर्वं प्राप्तिरस्तीति प्रथमपक्षं कक्षीकुर्मो न पुनः प्राप्तः सकाशाद्विभागो*

[कु०] हस्ततरोर्संयोगविनाशे स्वकारणविनाशः सम्भवति अङ्गुलि कर्म च व्यधिकरणं तस्मादङ्गुलिकर्मणा जनितेन हस्ततरुसंयोगो समानाधिकाराणि हस्ततरुसंयोगो विनाशयितव्यः । न चाङ्गुलिसंयोगविनाशे न नाश्यते कर्मजं हस्ततरुसंयोगं प्रति तस्याकारणत्वादिति ।

**तस्य कार्यमिति** (कं. १५५.२) लिङ्गतयेति शेषः । अत एवाह **न केवलमिति** (कं. १५५.२) । **वक्ष्याम इति** (कं. १५५.६) वक्ष्यतीत्यर्थः ।

---

१ विभागगुण(कल्पना) – टिप्पण – जे. ३ । २ ऽसंयुक्ताविति – जे. २ । ३ हेतुश्च – जे. १, जे. २, जे. ३ ।
४ शब्दव्यतिरिक्त – टिप्पण जे. ३ । ५ तावद् – कं., गुणान्तरमिति – ब ।

न्यायकन्दली

वाक्यार्थः। किं प्राप्तेः पूर्वावस्थानमात्रम्? किं वा विभागं प्रति हेतुत्वमप्यस्ति? अवस्थितिमात्रमिति ब्रूमहे, संयोगस्य विभागहेतुत्वेऽवयवसंयोगानन्तरमेव तद्विभागस्योत्पत्तौ द्रव्यानुत्पत्तिप्रसङ्गात्। कर्मसहकारी संयोगः कारणमिति चेत्? अन्वयव्यतिरेकावधृतसामर्थ्यं कर्मैव कारणमस्तु न संयोगः, तस्मिन् सत्यप्यभावात्। प्रध्वंसोत्पत्ताविव भावस्य। विभागोत्पत्तौ संयोगस्य पूर्वकालतानियमः, विभागस्य तद्विरोधिस्वभावत्वात्।

स च त्रिविध इति भेदकथनम्। अत्रापि चशब्दोऽवधारणे, त्रिविध एव। अन्यतरकर्मजो उभयकर्मजो विभागजश्च विभाग इति। तत्र तेषु मध्येऽन्यतरकर्मजोभयकर्मजौ संयोगवत्। यथा क्रियावता निष्क्रियस्य संयोगोऽन्यतरकर्मजस्तथा विभागोऽपि। यथोभयकर्मजः संयोगो मल्लयोर्मेषयोर्वा तथा विभागोऽपि।

विभागजस्तु द्विविध इति। तुशब्देनास्य पूर्वाभ्यां विशेषकथनम्। कारणयोर्विभागादेको विभागो भवति। अपरस्तु कारणाकारणयोर्विभागादिति द्वैविध्यम्।

[**पं०**]जायते इति द्वितीयपक्षमिति हृदयम्। संयोगस्य विभागं प्रति हेतुत्वं **प्रयुक्तं व्योमशिवेन** तद्दूषयति **संयो(गस्य)-विभागहेतुत्वे** (कं. १५५.११) इत्यादिना। **अवयवसंयोगानन्तरमेवेति** (कं. १५५.११) द्रव्यारम्भकाऽवयवसंयोगानन्तरमेवेत्यर्थः। **तस्मिन्निति** (कं. १५५.१३) संयोगे **प्रध्वंसोत्पत्तादिवेत्यादि** (कं. १५५.१३) यथा प्रध्वंसोत्पत्तौ भावस्य पूर्वकालता नियमोऽस्ति न हेतुत्वं तथा संयोगस्य विभागोत्पत्तौ पूर्वकालतानियमोऽस्ति न हेतुत्वमिति वाक्यार्थः।

[**कु०**] नन्वप्राप्तिः प्राप्त्यभावः, तस्य कथं गुणत्वमित्यत आह **अ[ध]र्म्म** इति (कं. १५५.६)। **यथेति** (कं. १५५.६)। **विभागं प्रति हेतुत्वमपीति** (कं. १५५.९) असमवायिकारणत्वमित्यर्थः। **अवस्थितिमात्रमेवेति** (कं. १५५.९) निमित्तत्वमात्रमित्यर्थः। **अवस्थितिमात्रमेवेति** (कं. १५५.९) निमित्तत्वमात्रमित्यर्थः। गुणकर्मस्वारब्धव्येषु सापेक्ष इति वचनात् कर्म्मसहकारिणोऽप्यसमवायित्वमविरुद्धमिति शङ्कृत **कर्मसहकारीति** (कं. १५५.१२)। **अन्वयव्यतिरेकेति** (कं. १५५.१२) अपेक्षणीयस्यासमवायिकारणत्वे सम्भवति तत् सहकृतस्यासमवायित्वकल्पनायां कल्पनागौरवं स्यादित्यर्थः। एवमसमवायित्वं निषिध्य निमित्त(वि)मात्रेण पूर्वकालभावित्वमिति दृष्टान्तेनोपपादयति **प्रध्वंसोत्पत्ताविति** (कं. १५५.१३)। '**तद्विरोधस्वभावत्वाद्** (कं. १५५.१४) इति अनेन संयोगस्य विभागोत्पत्तौ निमित्तत्वसिद्धये व्यतिरेकव्यभिचाराभावो दर्शितः।

१. विरोधि–कं।

### प्रशस्तपादभाष्यम्

[145] तत्र[1] कारणविभागात् तावत् [2]कार्याविष्टे कारणे कर्मोत्पन्नं यदा [3]तस्यावयवान्तराद्विभागं करोति न तदाकाशादि[4]देशात्, यदा त्वाकाशादिदेशाद्विभागं करोति न तदावयवान्तरादिति स्थितिः। अतोऽवयवकर्मावयवान्तरादेव विभागमारभते [5]विभागाच्च द्रव्यारम्भकसंयोगविनाशः।

### न्यायकन्दली

[145] [6]कारणविभागाच्च विभागः कथ्यते—कार्याविष्ट इत्यादिना। कार्येणाविष्टे व्याप्ते अवरुद्धे कारणे कर्मोत्पन्नं यदा तस्यावयवस्यावयवान्तराद् द्रव्यारम्भकसंयोगविनाशकं विभागं करोति, न तदा द्रव्यावरुद्धादाकाशादिदेशाद्विभागं करोति। यदा चाकाशादिदेशात् न तदावयवान्तरादिति [7]स्थितिर्नियमः। अतोऽवयवकर्मावयवान्तरादेव विभागमारभते। यत आकाशविभागकारणं कर्म अवयवान्तराद्विभागं न करोतीति नियमः, अतोऽवयवान्तरविभागारम्भकं कर्म अवयवान्तरादेव विभागं करोति, नाकाशादिदेशात्।

अयमभिसन्धिः—आकाशविभागकर्तृत्वं कर्मणो द्रव्यारम्भकसंयोगविरोधिविभागानारम्भकत्वेन व्याप्तम्, द्रव्यारम्भकसंयोगविरोधिविभागानारम्भकत्वविरुद्धं च द्रव्यारम्भकसंयोगविरोधिविभागोत्पादकत्वम्। अतो [8]यत्रेदमुपलभ्यते तत्र द्रव्यारम्भकसंयोग-

[टि०] [145] **कर्म्मापि निमित्तकारणम्** इति :– ननु तर्हि कर्मपदार्थोक्तं कर्मणोऽसमवायित्वमेवेति विरुद्धम्? नैवम्, अन्य[9]कार्यापेक्षया तत्प्रतिपादनात्। विभागजे तु विभागे पूर्वविभाग एवासमवायिकारणम्, कर्म तु निमित्त[10]कारणमिति। [11]**तेन चेदयम्** इति :– अयं विभागस्तेन कर्म्मणा।

[पं०] [145] **कार्येणेति** (कं. १५५.२०) वंशेन द्वितन्तुकपटेन वा। **कारण इति** (कं. १५५.२२) वंशमये तन्तौ वा। **कर्मेति** (कं. १५५.२२) कर्तृभूते।

**आकाशविभागकर्तृत्वमिति** (कं. १५६.१) विकसति कमले विरलीभवत्सु दलेषु। **द्रव्यारम्भकसंयोगविरोधि-**

[कु०] [145] **न तदेति** (कं. १५५.२३) कार्यविरोधेन कारणविरोधानुमानादित्यर्थः।

ननु कस्यचिदेव कर्म्मण उभयसूपविभागजननं प्रति सामर्थ्यं किमिति न कल्प्यत इत्यत आह – **अयमभिसन्धिरिति** (कं. १५६.१)। व्याप्तिबलात् सिद्ध्यन्तमर्थं परित्यज्यान्यथाकल्पनोऽतिप्रसङ्ग इत्यर्थः।

---

१ 'तत्र' इति जे. व्यो (४९१) पुस्तकयोर्नास्ति। २ कार्याविशिष्टे – दे। ३ 'तस्य' इति जे. व्यो (४९९) दे पुस्तकेषु नास्ति। ४ देशाद्विभागं करोति–दे। ५ ततो विभागाच्च – कं. १, कं. २, कि.। ६ कारणविभागाच्च – कं. १, कं. २। ७ स्थितिनियमः – कं. १, कं. २। ८ द्रव्यारम्भकसंयोगविरोधिविभागोत्पादकत्वं – टिप्पण – जे. ३। ९ कार्यापेक्षया प्रतिपादनात् – अ; कार्यापेक्षणात् प्रतिपादनात् – ब; १० करण – अ, ब; ११ ब्पुस्तके प्रतीकमिदं भ्रष्टम्।

प्रशस्तपादभाष्यम्

तस्मिन् विनष्टे कारणाभावात् कार्याभाव इत्यवयविविनाशः, [1]तदा कारणयोर्वर्तमानो विभागः कार्यविनाशविशिष्टं कालं स्वतन्त्रं वावयवमपेक्ष्य सक्रियस्यैवावयवस्य कार्यसंयुक्तादाकाशादिदेशाद्विभागमारभते न निष्क्रियस्य, कारणाभावादुत्तरसंयोगानुत्पत्तावनुपभोग्यत्वप्रसङ्गः ।

न्यायकन्दली

विरोधिविभागानुत्पादकत्वे निवर्तमाने तद्व्याप्तमाकाशविभागकर्तृत्वमपि निवर्तते । [2]यथा वह्निव्यावृत्तौ धूमव्यावृत्तिः ।

आकाशविभागकर्तृत्वस्य द्रव्यारम्भकसंयोगविरोधिविभागानारम्भकत्वस्य च सहभावमात्रं न व्याप्तिरिति चेत् ? न, व्यभिचारानुपलब्धेः । ययोः क्वचिद्व्यभिचारो दृश्यते तयोः सहभावमात्रम्, यथा वज्रे पार्थिवत्वलोहलेख्यत्वयोः सत्यपि पार्थिवत्वे काष्ठादिषु लोहलेख्यत्वात् । न तु व्योमविभागकर्तृत्वस्य [3]विशिष्टविभागानुत्पादकत्वस्य च व्यभिचारो दृश्यते । अदृश्यमानोऽपि [4]कदाचिदयं भविष्यतीत्याशङ्क्येत यद्यनयोः शिष्याचार्ययोरिवोपाधिकृतः सहभावः प्रतीयेत । न चैवमप्यस्ति, उपाधीनामनुपलम्भात् । यद्यप्रतीतव्यभिचारो निरुपाधिकः सहभावो न व्याप्तिहेतुरित्यग्निधूमयोरपि व्याप्तिर्न स्यादित्युच्छिन्नेदानीं जगत्यनुमानवार्ता ।

यद्यवयवकर्मणावयवान्तराद् विभागः क्रियते नाकाशादिदेशात्, ततः किं सिद्धम् ? तत्राह–विभागाच्च द्रव्यारम्भकसंयोगविनाशः । आकाशविभागकर्तृत्वे विशिष्टविभागानुत्पादाद् द्रव्यारम्भकसंयोगविनाशो न भवेदित्यर्थः ।

[पं०] विभागारम्भकत्वेनेति (कं. १५६.२) व्यापकेन । यत्रेदमिति (कं. १५६.४) इदं द्रव्यारम्भकसंयोगविरोधिविभागानुत्पादकत्वव्याप्तम् । यथा वह्निव्यावृत्तौ धूमव्यावृत्तिरिति (कं. १५६.५) वह्निर्व्यापको धूमस्तु व्याप्यः ।

आकाशविभागकर्तृत्वस्येति (कं. १५६.६) कर्मसक्तस्य । व्याप्तिरिति (कं. १५६.७) अविनाभावः । [5]विशिष्टभावानुत्पादकत्वस्येति (कं. १५६.१०) द्रव्यारंभकसंयोगविरोधित्वमिह विशिष्टत्वम् । अयमिति (कं. १५६.११) व्यभिचारः । उपाधिकृत इति (कं. १५६.११–१२) अध्ययनादिकारणकृतः ।

विशिष्टविभागानुत्पादादिति (कं. १५६.१६) द्रव्यारम्भकसंयोगविरोधिविभागानुत्पादादित्यर्थः ।

[कु०] ननु द्रव्यारम्भकसंयोगविरोधिविभागानारम्भकत्वस्याकाशविभागकर्तृत्वं प्रति व्यापक[त्वं]नास्तीति शङ्कते आकाशेति (कं. १५६.६) । इह व्याप्त्यभावो व्यभिचारस्य निश्चयाद्वा तच्छङ्कया वा ? नाद्य इत्याह नेति (कं. १५६.७) । द्वितीय इत्याह । दृश्यमानोऽपीति (कं १५६.११) । न चैवं संयोगेऽपि द्रष्टव्यारम्भकत्वानारम्भकत्वरूपे जातिभेद[6]दर्शनात्तत् कारणेऽपि जातिभेदः कल्पनीय इति वाच्यं, तस्य स्वाश्रयविशेषण[नै]व सामर्थ्यव्यवस्थितेः । तथाहि समवायिकारणे उत्पन्नं कर्म द्रव्यारम्भकसंयोगमारभते, अन्यं तु न[त]थेति ।

१ यदा–कं. २ । २ यथा च–जे. ३ । ३ द्रव्यारम्भकसंयोगविरोधिः–टिप्पण जे. ३ । ४ कदाचिद्–जे. २ ।
५ विशिष्टविभागानुत्पादकत्वस्य–कं । ६ दर्शनम्–M.S.; 'च' कं पुस्तके नास्ति ।

## न्यायकन्दली

संयोगविनाशे किं स्यादत आह–तस्मिन्निति । संयोगेऽसमवायिकारणे तस्मिन्नष्टे [1]कारणस्याभावात् कार्याभाव इति न्यायादवयविनो विनाशः । अवयविद्रव्ये नष्टे किं स्यादत आह–तदेति । द्रव्ये विनष्टे तत्कारणयोरवयवयोर्वर्तमानो विभागः कार्यविनाशेन विशिष्टं कालं स्वतन्त्रं वा अवयवमपेक्ष्य सक्रियस्यैवावयवस्य कार्यसंयुक्तादाकाशादिदेशाद् विभागमारभते । यावत् कार्यद्रव्यं न विनश्यति, तावदवयवस्य स्वातन्त्र्यम् । पृथग्देश-[2]गमनयोग्यता नास्तीत्य[3]वयविदेशाद् तद् विभागो न घटते, तदर्थमुक्तं कार्यविनाशविशिष्टं कालं स्वतन्त्रं [4]वावयवमपेक्ष्येति । कारणयोर्वर्तमानो विभागः सक्रियस्यैव विभागं करोतीत्यत्र को हेतुरिति चेत् ? अत आह–न, निष्क्रियस्य कारणाभावादिति । विभागाद् विभागोत्पत्तौ कर्मापि निमित्तकारणम्, [5]तस्याभावान्न निष्क्रियस्य विभागः । अत्रैवार्थे युक्त्यन्तरमाह–उत्तरसंयोगानुत्पत्तावनुपभोग्यत्वप्रसङ्ग इति । क्रिया हि प्राधान्येन उत्तर-संयोगार्थमुपजाता, देशान्तरप्राप्तेन द्रव्येण कस्यचित् पुरुषार्थस्य सम्पादनात् । तत्र यदि सक्रियस्यावयवस्य कार्यसंयुक्तादाका[6]शादिदेशाद्विभागो न भवति, तदा पूर्वसंयोगस्य

[पं०] द्रव्ये इति (कं. १५६.२०) द्वितन्तुकपटे । **कार्यविनाशेनेति** (कं. १५६.२०) द्वितन्तुकविनाशेन । **स्वतन्त्रमिति** (कं. १५६.२१) पश्चात्स्थितम् **सक्रियस्येति** (कं. १५६.२१) घटत्वतः । **कार्यसंयुक्तादिति** (कं. १५६.२१) द्वितन्तुकसंयुक्तात् । [7]अवयविदेशादिति (कं. १५६.२३) द्वितन्तुकदेशात् । **प्राधान्येनेति** (कं. १५६.२८) मुख्या वृत्त्या। **सेति** (कं. १५७.३) क्रिया । परः प्राह **अवयव[8]क्रियाया** इत्यादि (कं. १५७.४) **अव[यव]विभागसमकालमिति** (कं. १५७.५) द्रव्यारम्भकावयवविभागसमकालमित्यर्थः । विभागोत्पादकत्वं द्रव्यारम्भकावयवविभागसमकालमित्यर्थः । विभागोत्पादकत्वं द्रव्यारम्भकसंयोगविरोधिविभागानुत्पादत्वे इति व्यापके तद्व्याप्तमिति द्रव्यारम्भकसंयोगविरोधि ।

[कु०] **अवयवान्तराच्चेति** (कं. १५६.१४) द्रव्यारम्भकसंयोगप्रतिद्वन्द्विताभेव । **नाकाशादिदेशादिति** (कं. १५६.१५) देशसंयोगप्रतिद्वन्द्विनमिति व्याख्येयं, तथैव व्याप्तिदर्शनात् । ननु कारणविभाग एव कारणाकारणविभागमारभता-(रभता)मारब्धकर्म[णा] द्रव्यविनाशः किमर्थमपेक्ष्यत इत्यत आह **[या]वदिति** (कं. १५६.२२) । [9]**पृथ[ग्गम]न-योग्यता नास्तीति** (कं. १५६.२३) अवयवी हि स्वदेशेऽवयवं धारयति देशान्तरगतिं प्रतिबध्नाति [इ]ति उक्तं [10]धारणाकर्षणोपपत्तेरिति । तस्माद् द्रव्यविनाशोऽवश्यमपेक्षणीय इति भावः । फलाभेदेऽपि विकल्पो विपक्षाभेदो न द्रष्टव्यः । **विभागा[द्]विभागोत्पत्ताविति** (कं. १५६.२६) कारणविभागादिति द्रष्टव्यं चतुर्थादिषु कर्म्मणो व्यभिचारात्।

---

१ कारणाभावात्–जे. २ । २ गमने–कं. १, कं. २; पृथग्गमन–जे. २ । ३ अवयवदेशाद् विभागो–कं. १, कं. २, तद = अवयव–टिप्पण–जे. ३ । ४ वावयवमपेक्षते–कं. १, कं. २ । ५ तस्य = कर्मणः–टिप्पण–जे. १ । ६ आशाशदेशाद्–जे. २ । ७ अवयव–कं । ८ क्रिययोः–कं । ९ पृथग्देशमने–कं । १० पाठोऽयं कन्दल्यां नास्ति ।

प्रशस्तपादभाष्यम्

न तु तदवयवकर्माकाशादिदेशाद्विभागं करोति, [1]तदारम्भककालातीतत्वात् । [2]प्रदेशान्तरसंयोगं तु [3]करोत्येव, अकृतसंयोगस्य कर्मणः कालात्ययाभावादिति ।

न्यायकन्दली

प्रतिबन्धकस्यानिवृत्तेरुत्तरसंयोगानुत्पत्तौ सानुपभोग्या निष्प्रयोजना स्यात् । न चैतद्युक्तम् । तस्मात् सक्रियस्यैव विभाग [4]इति तात्पर्यम् । अवयवक्रिययोः अवयवविभागसमकालमाकाशादिविभागकर्तृत्वं नोपपद्यत इति ।

मा कार्षीदियं युगपद्विभागद्वयम्, क्रमकरणे तु को विरोधो येन विभागजनने दृष्टसामर्थ्यामिमां परित्यज्यादृष्टसामर्थ्यस्य विभागस्य विभागहेतुत्वमाश्रीयते ? इत्यत्राह –न तु तदवयवकर्माकाशादिदेशाद् विभागं करोति, तदारम्भककालातीतत्वात् । एवं हि कर्मणः स्वभावो यत् तदसमवायिकारणतया विभागमारभमाणं स्वोत्पत्त्यनन्तरक्षण एवारभते न क्षणान्तरे, स च तस्य विभागारम्भकालो द्वितीयभागोत्पत्तिकालेऽतीत इति न तस्मादस्योत्पत्तिः ।

नन्वेवमुत्तरसंयोगमपि कुतः करोति ? अनेकक्षणव्यवधानात्, अत आह – प्रदेशान्तरसंयोगं करोतीति । यथा कर्मणः स्वोत्पादानन्तरक्षणो विभागारम्भकालस्तथा

[पं] इयमिति (कं. १५७.६) अवयवक्रिया । क्रमकरणे तु को विरोध इति (कं. १५७.६) सैव क्रिया विभागद्वयमपि क्रमेण करोत्वित्यर्थः । इमामिति (कं. १५७.७) अवयवक्रियाम् । विभागहेतुत्वमिति (कं. १५७.७) द्वितीयविभागहेतुत्वम् । न तु तदवयवकर्माकाशादिदेशाद्विभागं करोतीति (कं. १५७.८) किन्तु विभाग एव करोतीति तात्पर्यार्थः । तदिति (कं. १५७.८) कर्म । स्वोत्पत्त्यनन्तरक्षण एवेति (कं. १५७.१०) स्वोत्पत्तिद्वितीयक्षणे । तस्येति (कं. १५७.१०) कर्मणः । द्वितीयविभागोत्पत्तिकालोऽनीत इति (कं. १५७.११) विभागारम्भकालोऽतीतः कर्मत्वस्य वेत्यर्थः । तस्मादिति (कं. १५७.११) कर्मण । अस्येति (कं. १५७.११) द्वितीयविभागस्य ।

अनेकक्षणव्यवधानादिति (कं. १५७ १२) क्षणद्वयव्यवस्थानात् प्रथमक्षणे हि कर्म, द्वितीयक्षणे कर्मतो विभागात् पूर्वसंयोगविनाशो द्वितीय विभाग इति यावत् । चतुर्थक्षणे उत्तरसंयोगोत्पत्तिः कर्मतः स्यादिति हि वः कल्पना ततो यदि कर्मणः सकाशाद्द्वितीयविभागस्याप्युत्पत्तिरेकक्षणव्यवधानात् कक्षीक्रियते किन्तु विभागादेव द्वितीयविभागोत्पत्तिः

[कु०] अत्रैवार्थ इति (कं. १५६.२७) उत्तरसंयोगपर्यन्तमवतिष्ठमानं तत्प्रतिबन्धकसंयोग विनाशकविभागोत्पत्तेः पूर्वभावितया कर्म्म निमित्तकारणमेषितव्यमिति भावः । [5]एवं हीति (कं. १५७.९) अत्र प्रयोगः विमतो विभागो न कर्मासमवायिकारणकस्तदुत्पत्त्यनन्तरमनुत्पद्यमानतो सति विभागत्वाद्, अत्र यदेवं न तदेवं य[था प्र]थमो विभागः ।

॥ इति प्रक्रमस्य प्रक्रान्तस्य समाप्तावित्यर्थः ॥

१ तदारम्भकालातीतत्वात् –कं. १, कं. २; कि । २ उत्तरसंयोगं – व्यो(५०३) । ३ करोति –जे. दे ।
४ इत्यर्थः –कं. १, कं. २ । ५ एष हि –कं ।

### प्रशस्तपादभाष्यम्

[146] कारणाकारणविभागादपि कथम्? यदा हस्ते कर्मोत्पन्नमवयवान्तराद्विभागमकुर्वदाकाशादिदेशेभ्यो विभागानारभ्य [1]प्रदेशान्तरे संयोगानारभते [2][तदा ते कारणाकारणविभागाः। कर्म यां दिशं प्रति कार्यारम्भाभिमुखं तामपेक्ष्य कार्याकार्यविभागानारभन्ते] तदनन्तरं कारणाकारणसंयोगाच्च कार्याकार्यसंयोगानिति।

### न्यायकन्दली

पूर्वसंयोगनिवृत्त्यनन्तरक्षणः प्रदेशान्तरसंयोगारम्भकालः, पूर्वदेशावस्थितस्य द्रव्यस्य देशान्तरप्राप्तेरसम्भवात्। तस्य च संयोगारम्भकालस्यात्ययोऽतिक्रमो न भूतः, तदानीं हि कालोऽयमतिक्रान्तः स्याद्यदि कर्मणा प्रदेशान्तरसंयोगः कृतो [3]भवेन्न त्वेवम्; तस्मादकृतसंयोगस्य कर्मणो यः संयोगारम्भकालस्तस्यात्ययाभावात् कर्म संयोगं करोति न विभागम्। [4]तेन चेदयं न कृतोऽ[5]न्यस्यासम्भवादसमवायिकारणेन विना च वस्तुनोऽनुत्पादादेकार्थसमवेतो विभागोऽस्य कारणमित्यवतिष्ठते। इतिशब्दः प्रक्रमसमाप्तौ।

[146] एवं कारणविभागपूर्वकं विभागं प्रतीत्य कारणाकारणविभागपूर्वकं विभागं प्रत्येतुमिच्छन् पृच्छति–कारणाकारणविभागादपि कथमिति। उत्तरमाह–यदेत्यादिना।

[टि०] [146] हस्तस्या[6]वयवान्तराद् इति:– [7]विभागं द्रव्यारम्भकसंयोगविरोधिनम्। [8]उत्पलपत्रशतेति विवादाध्यासिता सूचीक्रमेण भिनत्ति [9]सूचीत्वात् सम्प्रतिपन्नसूचीवदिति क्रमभेदानुमानम्। विभागाजनकत्वानुमानं तु

[पं०] कक्षीक्रियते तर्हि कर्मणः सकाशादुत्तरसंयोगोत्पत्तिः सुतरां भविष्यति क्षणद्वयव्यवधानादिति परप्रश्नभावार्थः। **पूर्वदेशावस्थितस्य द्रव्यस्य देशान्तरप्राप्तेरसम्भवादिति** (कं. १५७.१४) अतः पूर्वसंयोगनिवृत्तिरित्यर्थः। [10]**न चैवमिति** (कं. १५७.१७) किन्त्वारम्भमात्रमेवास्तीत्यर्थः। **अकृतसंयोगस्येति** (कं. १५७.१७) अकृतोत्तरसंयोगस्य। **संयोगमिति** (कं. १५७.१८) उत्तरसंयोगम्। **तेनेति** (कं. १५७.१८) कर्मणा। **अयमिति** (कं. १५७.१८) द्वितीयविभागः। **अन्यस्येति** (कं. १५७.१८) प्रथमविभागव्यतिरिक्तस्य। **एकार्थसमवेत इति** (कं. १५७.१९) द्वितन्तुकपटसमवेतः। **अस्येति** (कं. १५७.२०) आकाशविभागस्य।

[146] **एवं कारणविभागपूर्वकं विभागं प्रतीत्येति** (कं. १५७.२०) अस्मात्पुरः प्रतिपादितमिति अध्याहार्यम्। **अवयवान्तराद्विभागमिति** (कं. १५७.२३) द्रव्यारम्भकसंयोगविरोधिन[म्]। **विभागानिति** (कं. १५७.२४)

[कु०] [146] कार्याकार्यविभागोऽपि कुतो न कर्म्मज इत्यत आह **न चायमिति** (कं. १५८.२)।

१ प्रदेशान्तरसंयोगान्–दे। २ [ ] एतच्चिह्नान्तर्गतः पाठः 'द' पुस्तके नास्ति। ३ भवेन्न चैवम्–जे. १, जे. २, जे. ३। ४ तेन–कर्म्मणा, चेदयं–न कृतो–द्वितीय विभागः–अन्यस्य–पूर्वविभागव्यतिरिक्तस्य–टिप्पण–जे. ३। ५ अतोऽन्यस्यासम्भवाद्–जे. २। ६ वयेवोन्तराद्–अ, ब; ७ विभागद्रव्यारम्भकसंयोगविरोधे–अ, ब; ८ उपलभ्य–अ, ब; ९ सूचीत्वात् इत्येतदनन्तरं [ ] एतच्चिह्नान्तर्गतः पाठोऽधिकः अपुस्तके १० नत्वेकै–कं।

## न्यायकन्दली

हस्ते कुतश्चित् कारणात् कर्मोत्पन्नं तस्य हस्तस्यावयवान्तराद्विभागमकुर्वदाकाशादिदेशेभ्यो विभागानारभ्य प्रदेशान्तरैः सह यदा संयोगानारभते तदा ते कारणाकारणविभागाः शरीरकारणस्य हस्तस्याकारणानामाकाशादिदेशानां विभागाः। [1]कर्म यस्यां दिशि कार्यारम्भाभिमुखं कर्मणा यत्रोत्तरसंयोगो जनयितव्यः, तां दिशमपेक्ष्य, कार्याकार्यविभागान् [2]हस्तकार्यस्य शरीरस्याकार्याणामाकाशादिदेशानां विभागानारभन्ते। यतः कुड्यादिदेशाद्धस्त न विभागः, ततः [3]शरीरस्यापि विभागो दृश्यते। न चायं शरीरक्रियाकार्यः, तदानीं शरीरस्य निष्क्रियत्वात्। नापि हस्तक्रियाकार्यो भवितुमर्हति, व्यधिकरणस्य कर्मणो विभागहेतुत्वादर्शनात्। अतः कारणाकारणविभागस्तस्य कारणमिति कल्प्यते। आकाशादिरित्यादिपदं समस्तविभुद्रव्यावरोधार्थम्। अत एव विभागानिति बहुवचनम्, तद्विभागानां बहुत्वात्।

[टि०] विवादाध्यासितं कर्म 'शरीराकाशविभागा'[4]समवायिकारणं न भवति व्यधिकरणत्वात् [5][चैत्रमैत्रशरीरविभागजनकदेवदत्त[6]शरीरकर्मवदिति]।

[7]एकमेव इति :– वस्तुकर्मतापन्नं [8]किञ्चिज्ज्ञानं कर्तृ। अत्र हि केचित् टीकाकृत्प्रभृतयः फलस्य प्रवृत्तिनिवृत्ति-

[पं०] बहुवचनफलमुत्तरत्र वक्ष्यते। **शरीरकारणस्य हस्तस्येति** (कं. १५७.२५) अवयवा हि अवयविनः कारणं स्युः। **श[रो]रस्येति** (कं. १५७.२७) बहिवादेः। **न चायमिति** (कं. १५८.२) अयं शरीरस्य विभागः। **व्यधिकरणस्य कर्मणो विभागहेतुत्वादर्शनादिति** (कं. १५८.३) क्रिया हि हस्तगता विभागश्च शरीराधिकरणः, अतो हस्तक्रिया शरीरविभागस्य न हेतुरित्यर्थः। **कारणाकारणविभाग इति** (कं. १५८.४) कारणं हस्तः, अकारणमाकाशादयस्तेषां विभागः। **तस्येति** (कं. १५८.४) शरीरविभागस्य। **समस्तविभुद्रव्यावरोधार्थमिति** (कं. १५८.५) समस्तानामाकाशकालात्मदिशाख्यानां व्यापकद्रव्याणां संग्रहार्थमित्यर्थः।

**कार्यकारणभावाभिधानमिति** (कं. १५८.७) कारणकार्यभावाभिधानमित्यर्थः। कारणं हस्तः कार्यं शरीरम्। अवयवा हि अवयविनः कारणमिति भावना। **हस्तविभागकाले शरीरविभागोत्पत्तिकारणाभावादिति** (कं. १५८.८) हस्तविभागस्य हि कारणं कर्म शरीरविभागस्य तु न हस्तकर्म किन्तु हस्तविभाग एव।

[कु०] प्रत्यक्षजात्यैवानुमानबाध इति भ्रान्तश्चोदयति – **अनुमानगम्य इति** (कं. १५८.१०)। अनन्यथासिद्धत्वेनैव प्रत्यक्षं बाधकमित्यमुपर्थं? प्रतिबंधं कारयत्परिहरति **उत्पलपत्रेति** (कं. १५८.१२)। **प्रत्यक्षस्य चान्यथेति** (कं. १५८.१९) आशुभावित्वेनेत्यर्थः। अन्यथासिद्धिरनुमानदूषणं कथं प्रत्यक्षस्य स्यादित्यत आह **अत एवेति**(कं. १५८.१९)।

---

१ कर्म च – कं. १, कं. २। २ हस्तस्य – कं. १, कं. २। ३ शरीरं – रा. अ; ४ समवाय – अ, ब, क; ५ [ ] एतच्चिह्नान्तर्गतः पाठोऽधिकः अपुस्तके। ६ शरीरवद् – अ; ७ प्रतीकमिदं भ्रष्टं ड पुस्तके। ८ किं विज्ञानं – अ, ब, क।

## न्यायकन्दली

अत्राहुरेके–कुड्यादिदेशाद्धस्तशरीरविभागयोर्युगपद्भावप्रतीतेस्तयोः कार्यकारणभावाभिधानं प्रत्यक्षविरुद्धमिति। तदसङ्गतम्, हस्तविभागकाले शरीरविभागोत्पत्तिकारणाभावात्। न चासति कारणे कार्योत्पत्तिरस्ति, हस्तक्रिया च न कारणमित्युक्तम्। तस्मात्तयोर्युगपदभिमानो भ्रान्तः।

अनुमानगम्यः क्रमभावः, प्रत्यक्षसिद्धं च यौगपद्यम्, प्रत्यक्षे च परिपन्थिन्यनुमानस्योत्पत्तिरेव नास्ति, अबाधितविषयत्वाभावात्। कथं 'तदनुमानविरोधात् प्रत्यक्षस्य भ्रान्तत्वमिति चेत्? उत्पलपत्रशतव्यतिभेदेऽपि कुतोऽनुमानप्रवृत्तिः? प्रत्यक्षविरोधात्। अथ मन्यसे तत्र प्रत्यक्षविरोधादनुमानं नोदेति, यत्रानेन विषयस्य बाधो निश्चितः स्यात्। इह त्वसौ सन्दिग्धः, पत्रशतव्यतिभेदस्याशुभावित्वेनापि निमित्तेन यौगपद्यग्राहकस्य प्रत्यक्षस्य प्रवृत्तेः सम्भवात्। अस्ति च सर्वलोकप्रसिद्धम् 'अतिदृढमव्यवहिता सूचि

[टि०] व्यवहारस्य बाधः क्रियते इति मन्यन्ते केचिच्च विषयस्य शुक्तिकादेरारोपितस्य रजतज्ञानेनापहारः क्रियते इत्याह; तत्राह को बाध इति। ननु रजतेति :–ज्ञानान्तरे शुक्तिकाज्ञानरूपे उत्पन्नेऽपि न तदानीं रजतं गतमासीत्, शुक्तिकावस्थायां च रजतत्वं नास्त्येव प्रतिभागोचरः विज्ञाने इति तदपहार्यम्, साक्षाद् इति :–नेयं शुक्तिकेति साक्षादभावप्रति[2]पादनं रजतमिदमिति तु विरोधिप्रतिपादनद्वारेणेति। तस्य विषयापहारेति तस्य [3]फलापहारस्य।

[पं०] परवाक्यम् अनुमानगम्य (कं. १५८.१०) इत्यादि। तदनुरोधादिति (कं. १५८.११) अनुमानानुसारात्। उत्पलपत्रशतव्यतिभेदेऽपि कुतोऽनुमान[प्र]वृत्तिरिति (कं. १५८.११) विवादाध्यासिता सूची, क्रमेण भिनत्ति, सूचीत्वात्, सम्प्रतिपन्नसूचीवत् इति क्रमभेदानुमानम्। विभागाजनकत्वानुमानं तु विवादाध्यासितं कर्म, शरीराकाशविभागासमवायिकारणं न भवति व्यधिकरणत्वात्, चैत्रमैत्रविभागाजनकदेवदत्तशरीरवदिति द्रष्टव्यम्। प्रत्यक्षविरोधादिति (कं. १५८.१२) प्रत्यक्षेण विरोधात्। तत्र प्रत्यक्षविरोधादनुमानं नोदेतीति (कं. १५८.१२) [4]अस्य व्याख्या। अनेनेति (कं. १५८.१३) प्रत्यक्षेण। विषयस्येति (कं. १५८.१३) अनुमानविषयस्य। इहेति (कं. १५८.१३) उत्पलपत्रशतव्यतिभेदे। असौ सन्दिग्ध इति (कं. १५८.१४) अनुमानविषयबाधः सन्दिग्धः, सन्दिग्धे च हेतुवचनम्। भिनत्तीति (कं. १५८.१६) उत्पलानि कर्मभूतानि। न व्यवहितेति (कं. १५८.१६) न पत्रान्तरान्तरिता भिनत्तीत्यर्थः। क्रमेणैव भिनत्तीति यावत्।

[कु०] बाध एव कुत शयत आह इदं हीति (कं. १५८.२०) स्वविषयसंवादानुगृहीतमित्यर्थः। विषयस्य साहाय्यप्राप्त्येति (कं. १५८.२१) प्रवृत्तिसामर्थ्यानुमितप्रामाण्यमित्यर्थः। ननु प्रत्यक्षमूलेनानुमानेन कथं तस्य बाध इत्यत आह व्याप्तिग्राहकेति (कं. १५८.२२)। प्रमाणानामुपजीव्यत्वे सति विरोध एव बाधकत्वप्रयोजकः। न च यौगपद्यग्राहकं क्रमानुमानेनापजीव्यत इति रहस्यमिति दर्शयन्नाह वह्नाविति (कं. १५८.२४)। इहोष्णत्वनिषेधः साध्यधर्मप्रतियोगि-

---

१ तदनुरोधात्–कं. १, कं. २, जे. १, जे. २। २ खादनं–अ, ब; ३ फता–अ; ४ अत्र कास्याख्या–ब।

## न्यायकन्दली

भिनत्ति, न व्यवहितम्' इति व्याप्तिग्राहकं प्रमाणम्, अतस्तत्सामर्थ्यात् प्रत्यक्षे संभवत्यपि भवत्यनुमानस्योदय इति ।

एवं [1]चेदत्रापि व्यधिकरणा क्रिया विभागं न करोतीति व्याप्तिग्राहकस्य प्रमाणस्यातिदृढत्वात् प्रत्यक्षस्य चान्यथाप्युपपत्तेः सुस्थितं क्रमानुमानम् । अत एव [2]चानुमानेन प्रत्यक्षस्य बाधः । [3]इदं हि सविषयम् । निर्विषयं च प्रत्यक्षम्, आशुभावित्वमात्रेण प्रवृत्तेः । यच्च सविषयं तत्तथात्वेनावस्थितस्य विषयस्य साहाय्यप्राप्त्या [4]बलवत्, दुर्बलं च निर्विषयमसहायत्वात् । व्याप्तिग्राहकेणैव प्रत्यक्षेण हि [5]तद् बाधोदयादनुमानेन प्रत्यक्षस्य बाधः । तथा च दिङ्मोहादिष्वनुमानमेव बलवदिति मन्यन्ते वृद्धाः 'भवति वै

[टि०] विभागजविभागानन्तरेति संयोग[6]प्रकरणे हि उत्पन्नमात्रस्य [7]चिरोत्पन्नस्य वा [8]संयोगजः संयोगो [9]भवतीत्युक्तम् । उत्पन्नमात्रस्य च तत्रैव दर्शित इदानीं तु [10]मुखप्रतिपाद्य[11]त्वाच्चिरोत्पन्नस्य दर्शयति तस्याः स्वाश्रयस्य इति :- क्रिया हि [12]स्वाश्रयादन्यत्र देशान्तरं प्रापयति व्यधिकरणस्या[13]समवायकारणत्वाभावात् ।

[पं०] श्रीधरः प्राह एवं चेदित्यादि (कं. १५८.१८)। **व्यधिकरणा क्रिया विभागं न करोतीति** (कं. १५८.१८) हस्तगता क्रिया शरीरविभागं न करोतीत्यर्थः। **अन्यथापीति** (कं. १५८.१९) आशुभावित्वेनापि । **इदमिति** (कं. १५८.२०) अनुमानम् । **सविषयमिति** (कं. १५८.२०) क्रमभावाख्यस्य विषयस्य विद्यमानत्वात् । **आशुभावित्वमात्रेणेति** (कं. १५८.२०) अयमर्थेन केशोंडुकवत् । **तथात्वेनेति** (कं. १५८.२१) यथास्थितत्वेन । **असहायत्वादिति** (कं. १५८.२२) यथावस्थितविषयलक्षणसहायविरहात् । **व्याप्तिग्राहकेणैव प्रत्यक्षेण [14]तद्बाधोदयादनुमाने[न]प्रत्यक्षबाध इति** (कं. १५८.२२) अत्र तद्बाधोदयादिति भ्रान्तप्रत्यक्षबाधोदयात् । अयं समुदायार्थः अनुमानं बाधितुमुपस्थितं यत्प्रत्यक्षं तत्पूर्वोक्तेन व्याप्तिग्राहकेण प्रत्यक्षेण बाधितम् । व्याप्तिश्चानुमानजीविताम् । अतोऽनुमानेन प्रत्यक्षं बाध्यते। **तथा च दिङ्मोहादिष्वनुमानमेव बलवदिति** (कं. १५८.२३) प्रत्यक्षेण पूर्वादिप्रतिभासेऽपि सूर्यादिद्वारेणान्यथाऽनुमीयमानत्वात् ।

[कु०] ग्राहकं प्रत्यक्षमपेक्षते तच्च न बह्वावेवेति प्रत्यक्षानुमानयोर्विरोध इति भावः। **किमर्थमिति** (कं. १५९.१) यत्तु प्रत्यक्षं विभागयौगपद्यज्ञानमानुमानिकेन केन ज्ञानेन बाध्यत इत्युक्तं तत्र बाधो नाम विनाशः संस्कारान्तरेण वा सर्वेषां ज्ञानानां विनाशोऽपि बाध्यत्व(।) व्यवहारात्तदतिरिक्ते च बाधे प्रमाणं नास्तीति भावः। **समाने विषय इति**

---

१ चेदत्र–कं. १, कं. २ । २ चानेन–कं. १, कं. २; चात्रानेन–जे. १ । ३ इदं = अनुमानम् – टिप्पण – जे. ३ । ४ सबलं – कं. १; कं. २ । ५ बाधो यदनुमानेन – कं. १, कं. २ । तद् – प्रत्यक्षम् – जे. ३ । ६ प्रकरणे उत्पन्नमास्य – अ, ब; ७ विचारोत्पन्नस्य – अ, ब । ८ वा संयोगो – अ, ब, क; ९ भवतीति सूक्तम् – अ, ब; १० मुख – अ; ११ त्वाविचारोत्पन्नस्य – अ, ब; १२ स्वाश्रयदन्यदेशान्तरं – अ, ब, क; १३ समवायिकारणस्यासमवायिकारणत्वात् – अ, ब; १४ बाधो यदनुमानेन प्रत्यक्षस्य बाधः – कं; तद्बाधोदयादनुमानेन पा. ३. पु. ।

## न्यायकन्दली

प्रत्यक्षादप्यनुमानं बलीयः' इति वदन्तः । वह्नावुष्णत्वग्राहिणः प्रत्यक्षस्य तु [1]'नान्यथोपपत्तिरस्तीति तेनावधारिते विषयस्य बाधे नास्त्यनु[2]मानस्य प्रवृत्तिः । किमर्थं पुनर्ज्ञानयोर्बाध्यबाधकभावः [3]कल्प्यते, समाने विषये तयोर्विरोधात् । एकमेव तद्वस्तु किञ्चि[4]द्रजतमित्येवं बोधयति शुक्तिकेयमिति चापरम् । शुक्तिकात्वरजतत्वयोश्च नैकत्र संभवः, सर्वदा तयोः परस्परपरिहारेणावस्थानोपलम्भात् । अतो विषयविरोधात् तद्विज्ञानयोरपि विरोधे सति बाध्यबाधकभावकल्पनम् ।

को बाधः ? विषयापहारः । ननु रजतज्ञानावभासितो [5]धर्मी तावदुत्पन्नेऽपि ज्ञानान्तरे तदवस्थ एव प्रतिभाति, [6]रजतत्वं तु नास्त्येव, किमपह्रियते ? सम्बन्धवियोजनस्यापहारार्थत्वात् । विज्ञाने प्रतिभातं तदिति चेत् ? सत्यं प्रतिभातं न तु प्रतिभातं शक्यापहारम्, भूतत्वादेव । नहि प्रतिभासितोऽर्थोऽप्रतिभासितो भवति, वस्तुवृत्त्या रजतमविद्यमानमपि ज्ञानेन तत्र विद्यमानवदुपदर्शितम् । तस्य ज्ञानप्रसञ्जितस्य

[पं०] ननु यदि प्रत्यक्षादप्यनुमानं बलवदिति निश्चयः तर्हि अनुष्णाग्निः कृतकत्वाद् घटवदित्यनेनाप्यनुमानेन प्रत्यक्षं बाध्यतामित्यत्राह **वह्नावुष्णत्वे**त्यादि (कं. १५८.२४) **अन्यथे**ति (कं. १५८.२५) उष्णत्वं विना । **तेने**ति (कं. १५८.२५) प्रत्यक्षेण । **अवधारिते** (कं. १५८.२५) इति निश्चिते । **विषयस्ये**ति (कं. १५८.२५) अनुमानगोचरस्य । परः प्राह **किमर्थं पुनरि**त्यादि (कं. १५९.१) श्रीधरः प्राह **समाने विषये** (कं. १५९.२) इत्यादि । **तदि**ति (कं. १५९.२) ज्ञानम् कर्तृभूते च स्थितिकर्मतापन्नम् ।

इह केचिट्टीकाकारप्रभृतयः फला[प]हारं बाधं मन्यन्ते फलस्य प्रवृत्तिविषयस्यापहारः । केचिच्च विषयापहारं बाधं मन्यन्ते इति द्विधं पश्यन् परः पृच्छति **को बाध** इति (कं. १५९.५) । श्रीधरः प्राह **विषयापहार** इति (कं. १५९.५) । परः **नन्वि**त्यादि (कं. १५९.५) । **धर्मी**ति (कं. १५९.६) शुक्लभास्वररूपशुक्तिकारूपः ।

[कु०] (कं. १५९.२) । एकत्र धर्मिणि पूर्वज्ञातोपदर्शि[त](तु) धर्मविरुद्धधर्मोपदर्शनात् प्रत्यक्षवेद्योऽयं बाध इति भावः । **बाध्यबाधकभावकल्पनमि**ति (कं. १५९.५) प्रत्यक्षसिद्धत्वादङ्गीकर्तव्यमित्यर्थः ।

बाधकस्वरूपं पृच्छति **को बाध** इति (कं. १५९.५) । उत्तरं **विषयापहार** इति (कं. १५९.५) । नन्विदमुपपत्तिपराहतं विषयापहारस्यैव निर्वक्तुमशक्यत्वात् । तथाहि स किं धर्मिण एवापहारो धर्म्ममात्रस्यैव वा ? स च सम्बन्धविनाशो वा तदभावबोधनं वा ? नाद्य इत्याह **नन्वि**ति (कं. १५९.५) । द्वितीये नार्थ इत्याह **रजतत्वमि**ति (कं. १५९.६) । **सम्बन्धवियोजनस्ये**ति (कं. १५९.७) न वा सतः सम्बन्ध इति शेषः । द्वितीयेन द्वितीय इत्याह

---

१ उष्णत्वं विना – टिप्पण – जे. ३ । २ मांनप्रवृत्तिः – जे. ३ । ३ उच्यते – टिप्पण – जे. ३ । ४ ज्ञानं कर्तृ – टिप्पण – जे. ३ । ५ शुक्तिकालक्षणः – टिप्पण – जे. ३ । ६ रजतत्वं नास्त्येव – कं. १, कं. २; रजतं तु नास्त्येव – जे. ३ ।

## न्यायकन्दली

साक्षाद्विरोधि[1]प्रतिपादनद्वारेण चाभावप्रतिपादनमेव वियोजनमिति चेद्रजताभावे प्रतिपादिते रजतज्ञानस्य का क्षतिरभूत्? न [2]ह्यस्य रजतस्थितिकरणे व्यापारः, अपि त्वस्य प्रकाशने, तच्चानेन [3]जायमानेनैव कृतमिति पर्यवसितमिदं किं बाध्यते? रजताभावप्रतीतौ पूर्वोपजातस्य रजतज्ञानस्य अयथार्थतास्वरूपं प्रतीयते इत्येषा क्षतिरभूत्।

नन्वेवं [4]फलापहार एव बाधः, अयथार्थतावगमे सति ज्ञानस्य व्यवहाराङ्गत्वात्। [5]मैवम्। फलापहारस्य विषयापहारनान्तरीयकत्वात्। न तावज्ज्ञानस्य सर्वत्र फलनिष्ठता, तस्य पुरुषेच्छाधीनस्यानु[6]पजननेऽप्युपेक्षासंवित्तेः पर्यवसानात्। यत्रापि [7]फलार्थिता, तत्रापि फलस्य विषयप्रतिबद्धत्वाद्वि[8]षयस्य च ज्ञानप्रतिबद्धत्वाद्विषयापहार एव ज्ञानस्य बाधो न फलापहारः, तस्य विषयापहारनान्तरीयकत्वादिति कृतं ग्रन्थविस्तरेण संग्रहटीकायाम्।

[पं०] ज्ञानान्तरे इति (कं. १५९.६) शुक्तिकेयमित्येवंरूपे। श्रीधरवाक्यं विज्ञाने प्रतिभातं तदिति चेदिति (कं. १५९.७)। परवाक्यं सत्यमित्यादि (कं. १५९.८)। श्रीधर आशङ्कयते वस्तुवृत्त्येत्यादि (कं. १५९.९)। तस्येति (कं. १५९.१०) रजतस्य। साक्षादिति (कं. १५९.१०) यथा नेदं रजतम्। [9]विरोधिप्रतिपादनद्वारेणेति (कं. १५९.१०) यथा शुक्तिशकलमिदम्। परवाक्यं रजताभाव (कं. १५९.११) इत्यादि। अस्येति (कं. १५९.१२) मिथ्यात्वाभिमत रजतज्ञानस्य। उत्तरं रजताभावप्रतीतौ (कं. १५९.१३) इत्यादि।

परवाक्यं नन्वेव(कं. १५९.१४)मित्यादि। फलापहार एवेति (कं. १५९.१४) न तु विषयापहार इत्यर्थः। सूरिराह [10]नैवं फला[प]हारस्येत्यादि (कं. १५९.१५)। तस्येति (कं. १५९.१६) हानोपादानलक्षणस्य फलस्य। उपेक्षासंवित्तेरिति (कं. १५९.१७) हानोपादानपरिहारेण।

[कु०] वस्तुवृत्त्येति (कं. १५९.९)। [11]सा चायमनुक्तोपालम्भा। बाधो नाम पूर्व्वज्ञानस्यायथार्थप्रत्यय एवेति परिहरति रजताभावप्रतीताविति (कं. १५९.१३)।

बाधकार्यं बाधभ्रान्त्या चोदयति नन्वेवमिति (कं. १५९.१४)। विशेषणापहारनान्तरीयकत्वादिति भावः। कुतोऽयं निश्चय इत्यत आह न तावदिति (कं. १५९.१६)। नन्वेवमप्ययथार्थताप्रत्ययः फलापहारश्चोभयमपि यथादर्शनं

---

१ साक्षाद्विरोधिप्रतिपादनमेव–कं. १, कं. २। २ मिथ्यात्वाभिमतरजतज्ञानस्य–टिप्पण–जे. ३। ३ जायमानेन–कं. १, कं. २। ४ फलापहार एवायथार्थतावगमे–जे. १, जे. २, जे. ३। ५ नैवम्–जे. १, जे. २, जे. ३। ६ नुपजनेऽपि–जे. २। ७ फलार्थता–जे. २। ८ विषयस्य ज्ञान–कं. १, कं. २। ९ विरोधिप्रतिपादनमेव–कं। १० मैवम्–कं। ११ स बाध्य–MS

### प्रशस्तपादभाष्यम्

यदि कारणविभागानन्तरं कार्यविभागोत्पत्तिः, कारणसंयोगानन्तरं कार्यसंयोगोत्पत्तिः ।

### न्यायकन्दली

विभागजविभागानन्तरभावित्वात् पूर्वं [1]प्रतिज्ञातस्य [2]चिरोत्पन्नस्य च संयोगजसंयोगं प्रतिपादयति–तदनन्तरमिति । तस्माद्विभागजविभागादनन्तरं शरीरकारणस्य हस्तस्याकारणानामाकाशादिदेशानां [3]संयोगाः कर्मजाः हस्तकार्यस्य शरीरस्य निष्क्रियस्याकार्याणामाकाशादिदेशानां संयोगानारभन्ते न हस्तक्रिया, तस्याः स्वाश्रयस्य देशान्तरप्राप्तिहेतुत्वात् । इतिशब्दः प्रक्रमसमाप्तौ ।

अत्र चोदयति–यदीति । कारणस्य हस्तस्य विभागानन्तरं यदि कार्यस्य शरीरस्य विभागस्तथा कारणस्य संयोगानन्तरं कार्यस्य संयोगो न तत्समकालम् ।

[पं०] **पूर्वं प्रतिज्ञातमिति** (कं. १५९.२०) संयोगस्तूत्पन्नमात्रस्य चिरोत्पन्नस्य चेत्यनेन संयोगनिरूपणे प्रतिज्ञातम् । **चिरोत्पन्नस्येति** (कं. १५९.२१) शरीरावयविनः । **न हस्तक्रियेति** (कं. १५९.२४) हस्तक्रिया न आरभते इत्यर्थः । **स्वाश्रयस्येति** (कं. १५९.२४) हस्तस्य । स्वाश्रयस्येत्यस्मात्पुर एवेत्यध्याहार्यम् । ततश्च स्वाश्रयस्यैवेति सिद्धम् । **तस्याः स्वाश्रयस्य देशान्तरप्राप्तिहेतुत्वादिति** (कं. १५९.२४) अत्राऽयं वाक्यार्थः, क्रिया हि स्वाश्रयादन्यप्रदेशान्तरं प्रापयति व्यधिकरणस्यासमवायिकारणत्वाभावात् ।

[कु०] बाधलक्षणमस्ति इत्यत आह **यत्रापीति** (कं. १५९.१७) । व्यापकमेव लक्षणं वक्तव्यमित्यर्थः । **ज्ञानप्रतिबद्धत्वादिति** (कं. १५९.१८) ज्ञानस्य याथार्थ्यप्रतिबद्धत्वादित्यर्थः । विषयापहारः अयथार्थप्रत्यय एव ।

संयोगजसंयोगव्युत्पादने उत्पन्नमात्रस्येति प्रतिज्ञाय उत्पन्नमात्रस्यैव पटस्य वीरणादिभिः संयोगः प्रतिपादितः । चिरोत्पन्नस्य त्विह विभागप्रकरणे प्रतिपादनं कुत इति शङ्कामुपनयन्नेव सङ्गतिं करोति **विभागजविभागान्तरभावित्वादिति** (कं. १५९.२०) । परस्परसंयोगविभागयोग्यत्वं ततश्च समवायो विरुद्ध इत्यर्थः ।

---

१ प्रतिज्ञानं – कं. १, कं. २; पूर्वं प्रतिज्ञानं – जे. १; पूर्वंप्रतिज्ञातस्य – संयोगप्रकरणे – टिप्पण – जे. ३ ।
२ शरीरावयविनः – टिप्पण – जे. ३ । ३ संयोगात् कर्मजात् – कं. १; कं. २ ।

प्रशस्तपादभाष्यम्

[147] [1]नन्वेवमवयवावयविनोर्युतसिद्धिदोषप्रसङ्गः इति। न, युतसिद्ध्यपरिज्ञानात्। सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्व[2]मियन्तु नित्यानाम्, अनित्यानां तु [3]युतेष्वाश्रयेषु समवायो युतसिद्धिरिति।

न्यायकन्दली

[147] नन्वेवं सत्यवयवावयविनोर्युतसिद्धिः, पृथक्सिद्धिः परस्परस्वातन्त्र्यं स्यात्। एतदुक्तम्भवति। यदि हस्ताश्रितं शरीरं तदा हस्ते गच्छति तदपि सहैव गच्छेत्, तथा सति च संयोगविभागक्रमो न स्यात्, क्रमेण चेदनयोः संयोगविभागौ न तदा [4]हस्तस्य गमने शरीरस्य गमनमिति तस्य स्वातन्त्र्यप्रसक्तिः।

परिहरति–नेति। युतसिद्धिप्रसङ्ग इति न, कुतः? युतसिद्धेरपरिज्ञानात्। यादृशं युतसिद्धेर्लक्षणं तादृशं त्वया न ज्ञातमित्यर्थः। कीदृशं तस्या लक्षणं तत्राह–[5]सा पुनर्द्वयोरिति। द्वयोरेकस्य वा परस्परसंयोगविभागहेतुभूतकर्म[6]समवाययोग्यता युतसिद्धिः। द्वयोः परमाण्वोः पृथग्गमनमाकाशपरमाण्वोश्चान्यतरस्य पृथग्गमनमियं तु नित्यानाम्। तुशब्दोऽवधारणे, नित्यानामित्यस्मात्परो द्रष्टव्यः, नित्यानामेवेयं युतसिद्धिरित्यर्थः।

[टि०] [147] ननु [7]यथैव युक्त्या नित्यानित्ययोः पृथगाश्रयाश्रयित्वं युतासिद्धिराश्रीयते तथैव युक्त्या पथग्गमन-रूपापि युतसिद्धिः प्रसज्यते। न च साऽभीष्टेति व्याख्यानमेव पुरस्कृत्याह **यद्यप्यन्यतरस्य** इति।

[पं०] [147] **शरीरस्येति** (कं. १५९.२६) बाह्वादेः।

**एवं सतीति** (कं. १६०.१) संयोगविभागयोः समकालत्वाभावे सतीत्यर्थः। **तदाहस्ते गच्छंति तदपि सहैव गच्छेदिति** (कं. १६०.३) यथा तन्त्वाश्रितः परस्तन्तुषु गच्छत्सु सहैव गच्छति अवयवाश्रितो ह्यवयवी।

**द्वयोरेकस्य वा परस्परसंयोगविभागहेतुभूतकर्मसमवाययोग्यतायुतसिद्धिरिति** (कं. १६०.७) न चात्र हस्तशरीरयोः परस्परसंयोगविभागौ समवेतत्वात्। अप्राप्तानां प्राप्तिर्हि संयोगस्तद्विपरीतश्च विभागः। यौ चाऽनयोः संयोगविभागौ

[कु०] [147] **यादृशमिति** (कं. १६०.६) संयुक्तासंयुक्तत्वे च न परस्परसंयोगविभागयोग्यतामापादयता गुणगुण्यादिषु तथा निदर्शनादिति भावः। यथाश्रुतं भाष्यं परमाणुना सह [त]द्वृत्तीनां यदसिद्धं प्रतिपादयतीति तत्परिहारायोपस्कृत्य व्याचष्टे **परस्परसंयोगविभागेति** (कं. १६०.७)। **परस्परपरिहारेणान्यत्राश्रये** (कं. १६०.२१) इति प्रतियोग्यता-

१ नन्वेवं युतसिद्धि–जे. दे। २ इति तु–जे; इतीयं–व्यो. (५०५)। ३ युतेषु तु समवायो–जे.।
४. हस्तगमने–कं. १; कं. २। ५ सा द्वयोरिति–जे. १; जे. २; जे. ३। ६ समवायः–कं. १; कं. २।
७ य एव–अ, ब;

### न्यायकन्दली

अनित्यानां तु युतेष्वाश्रयेषु समवायो युतसिद्धिः । द्वयोरन्यतरस्य वा परस्परपरिहारेणान्यत्राश्रये समवायो युतसिद्धिरनित्यानां द्वयोः पृथगाश्रयाश्रयित्वं घटपटयोः । शकुन्याकाशयोश्चान्यतरस्य शकुनेः पृथगाश्रयाश्रयित्वम् । यद्यप्य[1]न्यतरस्य पृथग्गमनमप्यस्ति, तथापि तस्य पृथग्ग[2]मनस्य न ग्रहणं तस्य नित्यविषयत्वेन व्याख्यानात् ।

अनित्यानामपि पृथग्गमनमेव युतसिद्धिः किं नोच्यते ? [3]तत्राह–त्वगिन्द्रियशरीरयोः पृथग्गमनं नास्ति, युतेष्वाश्रयेषु समवायोऽस्तीति परस्परेण संयोगः सिद्धः । यदि त्वनित्यानामपि पृथग्गमनं युतसिद्धिरुच्यते, त्वगिन्द्रियशरीरयोः पृथग्गम[4]नाभावादयुतसिद्धता स्यात् । [5]ततश्च तयोः परस्परसंयोगो न [6]प्राप्नोति, तस्य [7]युतसिद्ध्यैव व्याप्तत्वात् । [8][संयोगश्च तयोः सम्बन्धः न समवायस्तद्विलक्षणत्वात्] तस्मादनित्यानां न पृथग्गमनं युतसिद्धिरित्यर्थः । आश्रयाभावादेव पृथगाश्रयाश्रयित्वं नित्येषु नास्ति । तेषां च पृथग्गतिमत्त्वात् परस्परसंयोगविभागौ सिद्धौ, तेनैषां पृथग्गमनमेव युतसिद्धिरित्यभिप्रायेणाह–[9]अण्वाकाशयोस्त्वाश्रयान्तराभावेऽप्यन्यतरस्य पृथग्गतिमत्त्वात् संयोग-

[पं०] तौ न परस्परं किन्त्वन्येनेत्याशयः । अन्यतरस्येति (कं. १६०.९) परमाणोरेव न त्वाकाशस्य, आकाशस्य व्या[प]कत्वेन पृथग्गमनासम्भवात् । द्वयोरन्यतरस्य वा परस्परपरिहारेणेत्यादि (कं. १६०.११) अत्राधमाम्नाय अयुतसिद्धत्वं तु द्वयोर्यथा ज्ञानात्मनोर्घटघटत्वयोर्वा । अन्यतरस्य यथा तन्तुपटान्तम् । पटो हि तन्तुष्वेव तन्तवस्तु पृथगपि स्युः । अन्यतरस्येति (कं. १६०.१३) शकुनेः ।

युतेष्वाश्रयेषु समवायोऽस्तीति (कं. १६०.१६) त्वगिन्द्रियं हि वायवीयं स्वाणुसमवेतम् । शरीरं तु पार्थिवे

[कु०] श्रयस्याश्रयान्तरे समवाय इति विवक्षितत्वान्न पटस्यावयवैः [10]सह[युत्]ता सिद्धिसं[यो]गो तद्विलक्षणत्वादिति–अवयवा[व]यविसम्बन्धित्वादित्यर्थः ।

---

१ अन्यतरस्य–शकुनेः–टिप्पण–जे. ३ । २ गमनस्य ग्रहणं–कं. १; कं. २ । ३ तदाह–कं. १; कं. २; अत्राह –जे. १ । ४ गमनाभावादप्य–जे. १; जे. २ । ५ ततश्चैतयोः–कं. १ । ६ प्राप्नोतीति–जे. १, जे. २, जे. ३। ७ युतसिद्धिव्याप्तत्वात्–जे. १, जे. २, जे. ३ । ८ [ ] एतच्चिह्नान्तर्गतः पाठः कं. १; कं. २ पुस्तकयोर्नास्ति । ९ अण्वाकाशयोराश्रया–जे. १, जे. २, जे. ३ । १० अत्र न स्पष्टोऽर्थः–सं ।

प्रशस्तपादभाष्यम्

त्वगिन्द्रियशरीरयोः पृथग्गतिमत्त्वं नास्ति, युतेष्वाश्रयेषु समवायोऽस्तीति परस्परेण संयोगः सिद्धः। अण्वाकाशयोस्त्वाश्रयान्तराभावेऽन्यतरस्य पृथग्गतिमत्त्वात् संयोगविभागौ सिद्धौ। तन्तुपटयोरनित्ययोराश्रयान्तराभावात् परस्परतः संयोगविभागाभाव इति। [1]दिगादीनां तु पृथग्गतिमत्त्वाभावादिति [2][परस्परेण संयोगविभागाभाव इति]।

न्यायकन्दली

विभागौ सिद्धाविति। पूर्वमसत्यपि पृथग्गतिमत्त्वे त्वगिन्द्रियशरीरयोः पृथगाश्रयाश्रयित्वे सति [3]संयोगविभागसंभवादनित्यानां [4]पृथगाश्रयाश्रयित्वं युतसिद्धिर्न पृथग्गमनमित्युक्तम्।

सम्प्रत्येनमेवार्थं समर्थयितुं तन्तुपटयोरन्यतरस्य पृथग[5]तिमत्त्वासंभवेऽपि पृथगाश्रयत्वाभावात् संयोगविभागाभावं दर्शयति–तन्तुपटयोरित्यादिना। विभूनां तु द्वयोरन्यतरस्य वा पृथग्गमनाभावान्न परस्परेण संयोगः, नापि विभागः, तस्य संयोगपूर्वकत्वात्। किं तु स्वरूपस्थितिमात्रमित्यहा–दिगादीनामिति। एतावता सन्दर्भेणैतदुपपादितम्, हस्ते गच्छति शरीरं न गच्छतीति, एतावता न युतसिद्धिः। यदि तु हस्तशरीरयोः [6]पृथगाश्रयाश्रयित्वं स्यात्, तदा भवेदनयो[7]र्युतसिद्धिः। तत्तु नास्ति, शरीरस्य हस्ते समवेतत्वात्।

[पं०] स्वाणुषु युतसिद्धिरुच्यते इत्यस्मात्पुरः 'तदा' इत्यध्याहार्यम्। परस्परसंयोग इति (कं. १६०.१९) युतसिद्धिव्याप्यः। तस्येति (कं. १६०.१८) संयोगस्य। आश्रयाभावादेवेति (कं. १६०.१०) नहि नित्यानां स्वव्यतिरिक्तः कश्चिदाश्रयोऽस्ति। [8]अन्येष्विति (कं. १६०.२०) परमाणुषु। आश्रयान्तरसभावेऽपीति (कं. १६०.२२) नित्यत्वात्। अन्य[त]रस्येति (कं. १६०.२२) अणोः। पूर्वमसत्यपीत्यादि (कं. १६०.२३) [9]पूर्वम् इत्युक्तमिति पदसंयोजना। अन्यतरस्येति (कं. १६०.२६) तन्तोः।

पृथग्गतिमत्त्वसम्भवेऽपीति (कं. १६०.२६) पृथग्गतिमत्त्वासम्भवेऽपीति च पाठः।

[कु०] [10]पूर्वं इति (कं. १६०.२३) पूर्वमन्वयोदाहरणमुक्तमिदानीं व्यतिरेकोदाहरणमुच्यते इत्यर्थः। विभूनामिति (कं. १६०.२७) नित्ययुतसिद्धेर्व्यतिरेकोदाहरणमाहेत्यर्थः। [आ]स्तामेते युतसिद्धी प्रकृते किमायातमत आह एतावतेति (कं. १६१.२)।

---

१ दिगादीनां पृथग्गति–जे। २ [ ] एतच्चिह्नान्तर्गतः पाठः जे. २ पुस्तकयोर्नास्ति। ३ संयोगसम्भवाद् –कं. १, कं. २। ४ पृथगाश्रितत्वं–जे. २। ५ गतिमत्त्वासम्भवेऽपि –कं. १, कं. २। अन्यतरपृथग्गतिमत्त्वसम्भवेऽपि –जे. २। ६ पृथगाश्रयाश्रितत्वं–जे. १, जे. २। ७ युतसिद्धता–कं. १, कं. २। ८ नित्येषु–कं। ९ पदं पूर्वं–द। १० पूर्व्वम्–कं।

## प्रशस्तपादभाष्यम्

[148] विनाशस्तु सर्वस्य विभागस्य क्षणिकत्वात्, उत्तर[1]संयोगावधिसद्भावात् क्षणिक इति। न तु संयोगवद्द्वयोरेव विभागस्तयोरेव संयोगाद्विनाशो भवति। [2]कस्मात्? संयुक्तप्रत्ययव[3]द्विभक्तप्रत्ययानुवृत्त्यभावात्। तस्मादुत्तरसंयोगावधिसद्भावात् [4]क्षणिक इति।

## न्यायकन्दली

[148] विनाशस्तु सर्वस्य विभागस्य, क्षणिकत्वात्। कर्मजस्य विभागजस्य च कारणवृत्तेः कारणाकारणवृत्तेश्च [5]विभागस्य सर्वस्य क्षणिकत्वमाशुतरविनाशित्वं कुतः सिद्धमित्यत्राह –उत्तरसंयोगावधिसद्भावादिति। उत्तरसंयोगोऽवधिः सीमा, तस्य सद्भावात् क्षणिको विभागः। किमुक्तं स्यान्न विभागो निरवधिः, किं त्वस्योत्तरसंयोगोऽवधिरस्ति, उत्तर-संयोगश्चानन्तरमेव जायते, तस्मादाशुविनाश्युत्तरसंयोगो विभागस्यावधिरित्येतदेव कुतस्तत्राह–न तु संयोगवदिति। यथा संयोगः स्वाश्रययोरेव परस्परविभागाद्विनश्यति, नैवं विभागः स्वाश्रययोरेव परस्परसंयोगाद्विनश्यति, किं तु स्वाश्रयस्यान्येनापि संयोगात्। तथाहि वृक्षस्य मूले पुरुषेण विभाग[6]स्तयोरेव परपस्परसंयोगाद्विनश्यति, पुरुषस्य

[टि०] [148-149] विनाशस्तु इति :– [7]क्षणिकत्वादिति ज्ञापको हेतुर्न तु कारकः। यथा संयोग इति :– [8]संयोगो हि द्वयोरेवाङ्गुल्योः परस्परविभागाद् विनश्यति न तु मिलितयोरेवाङ्गुल्योरन्यस्माद् वृक्षादेः सकाशाद् [9]यो

[पं०] [148] कर्मजस्येति (कं. १६१.५) अन्यतरकर्मजोभयकर्मजयोः सङ्ग्रहः। कारणवृत्तेरिति (कं. १६१.६) द्वितन्तुकपटसत्कस्य। कारणाकारणवृत्तेरिति (कं. १६१.६) हस्ताकाशसत्कस्य। स्वाश्रययोरेव परस्परसंयोगाविति (कं. १६१.१२) अत्र स्वाश्रययोरिति वृक्षपुरुषयोः। स्वाश्रयस्येति (१६१.१२) पुरुषस्य। अन्येनापीति (कं. १६१. १२) मूलव्यतिरिक्तसन्निहिततरप्रदेशान्तरेण आकाशकुड्यादिना वा। परपस्परसंयोगाद् विनश्यतीति (कं. १६१.१३) परस्परप्रदेशान्तरसंयोगादिति पाठान्तरम्। तत्र च श्री नरचन्द्रटिप्पनकव्याख्यानमनुरुध्यते। तदारम्भकस्येति

[कु०] [148] कर्म्म यस्येति कर्म्मणोऽवान्तरभेदस्याविवक्षितत्वादेकविधम्। आश्रयभेदादिपरत्रैविध्यमाह कारण-वृत्तेरिति (कं. १६१.६) न चतुर्विध एवेत्यनेन विरोधः, यत्राश्रयभेदस्यापि विवक्षितत्वात्कर्मभेदस्य च विवक्षितत्वात्। उत्पन्नस्य विभागस्य पूर्वसंयोगे विनष्टे उत्तरसंयोगेऽवधिः। एतावता विनाशस्याशुभावित्वं कुत इति शङ्कां तात्पर्य-प्रदर्शनेन निराकरोति किमुक्तमिति (कं. १६१.७)। अस्तु येनकेनचित् संयोगो विनाशकः तस्यैवानन्तरं अन्य कुत

१ –सद्भावात् न संयोगवद्–के. व्यो.; न तु संयोगवद्द्वयोर्विभागः–दे। २ कस्माद् इति जे पुस्तके नास्ति। ३ विभक्ता वृत्त्यप्रत्ययाभावात्–दे। ४ क्षणिक–जे. दे। ५ विभागजस्य च विभागस्य–जे. १। ६ तयोः परस्परं–कं. १, कं. २; तयोरेव परस्परं देशान्तरसंयोगाद्–जे. २। ७ वक्षणिकत्वादिति–अ, ब। ८ संयोगा हि–अ, ब; ९ योगविभक्त–अ, ब, योगविभाग–ब;

प्रशस्तपादभाष्यम्

**क्वचिच्चाश्रय[1]विनाशाद् विनश्यतीति । कथम् ? यदा द्वितन्तुककारणावयवे अंशौ कर्मोत्पन्नमंशवन्तराद्विभागमारभते तदैव तन्त्वन्तरेऽपि कर्मोत्पद्यते, विभागाच्च तन्त्वारम्भकसंयोगविनाशः, तन्तुकर्मणा तन्त्वन्तराद्विभागः क्रियत इत्येकः कालः ।**

**ततो यस्मिन्नेव काले विभागात् तन्तुसंयोगविनाशः, तस्मिन्नेव काले संयोगविनाशात् तन्तुविनाशस्तस्मिन् विनष्टे तदाश्रितस्य तन्त्वन्तरविभागस्य विनाश इति ।**

न्यायकन्दली

**प्रदेशान्तरसंयोगाद्वा । [2]एवं चेत्सिद्धमुत्तरसंयोगा[3]वधित्वं विभागस्य, तदारम्भकस्य कर्मणः स्वाश्रयस्य देशान्तरप्राप्तिमकृत्वा पर्यवसानाभावात् । नन्वेतदपि [4]साध्यसमं यत् संयोगमात्रेण विभागनिवृत्तिरिति ? तत्राह–संयुक्तप्रत्ययवदिति । यथा संयुक्तप्रत्ययश्चिरमनुवर्तते, नैवं स्वाश्रयस्य देशान्तरसंयोगे भूते विभक्तप्रत्ययानुवृत्ति[5]रस्ति । अतस्तस्य संयोगमात्रेणैव [6]निवृत्तिरिति । उपसंहरति–तस्मादिति ।**

**[7]क्वचिच्चाश्रयविनाशादपि विनाशः । कथमित्यस्य प्रश्नः । उत्तरम्–यदेति । द्वितन्तुककारणस्य तन्तोरवयवे अंशौ कर्मोत्पन्नमंश[8]न्तरान्तस्यांशोर्विभागमारभते यदा,**

[टि०] विभागस्तस्मादिति । विभागस्तु नैवमित्येव दर्शयति तथा हि वृक्षस्य इति :–वृक्षमूलावच्छिन्नेन वृक्षेण सह पुरुषक्रियया पुरुषस्य न तावत्संयोगोस्ति, ततः पुरुष[9]क्रियया [10]मूलप्रदेशावच्छिन्नाद् वृक्षाद् विभागं कृत्वा मूलसन्निहित-

[पं०] (कं. १६१.१५) विभागारम्भकस्य । स्वाश्रयस्येति (कं. १६१.१५) हस्तादेः । स्वाश्रयस्येति (कं. १६१.१७) विभागाश्रयस्य । संयोगमात्रेणैवेति (कं. १६१.१८) उत्तरसंयोगमात्रेणैव ।

तन्त्वन्तरेपीति (कं. १६१.२१) तस्मिन्नेवांशोरवयविनि तन्तौ इत्यर्थः । [11]न द्वितीयो विभागाच्चांशोस्तन्त्वारम्भकसंयोगविनाशो यदेति (कं. १६१.२१) विभा[गे]न हि जातेन संयोगो विनाश्यते । अत्र च तन्त्वारम्भकेति तन्तुशब्देन प्रथमतन्तुर्गृह्यते तन्तुकर्मणेति (कं. १६१.२२) प्रथमतन्तुकर्मणा । तन्त्वन्तरादिति (कं. १६१.२२) द्वितीयतन्तोः ।

[कु०] इत्याह तदारम्भकस्येति (कं. १६१.१४) । साध्यसममिति (कं. १६१.१५) साध्यमुत्तरसंयोगस्य विनाशकत्वं हेतुश्च स एवेत्यर्थः यथेति (कं. १६१.१६) नन्वित्यादिभाष्यमुत्तरसंयोगस्य विभागावधित्वे प्रत्यक्षं प्रमाणं दर्शयति । अतो न साध्याविशिष्टत्वं चोदनीयम् । प्रत्ययानुवृत्तिप्रसङ्गरूपश्च तर्कः प्रत्यक्षस्यैवानुग्राहक इत्यर्थः ।

---

१ विनाशादेव – कं. १, कं. २ कि । २ एवं च – जे. १ । ३ वधिकत्वम् – जे. १, जै. ३ । ४ साध्यसमं संयोगमात्रेण–कं. १, कं. २, जे. २, जे. ३ । ५ रप्यस्ति–जे. १ । ६ निवृत्तिः–कं. १, कं. २ । ७ क्वचिदाश्रय –कं. १, कं. २ । ८ अंशान्तरस्य – कं. १, कं. २ । ९ क्रिया – ब; १० मूलं – अ; ११ विभागाच्चांशोर्यस्तन्त्वारम्भक – कं ।

प्रशस्तपादभाष्यम्

[149] एवं तर्ह्युत्तरविभागानुत्पत्तिप्रसङ्गः, कारणविभागाभावात्। [1]ततः प्रदेशान्तरसंयोगवति संयोगाभाव इत्यतो विरोधि[2]गुणासम्भवात्, कर्मणः [3]कालान्तरावस्थायित्वं नित्यद्रव्यसम[4]वेतस्य च नित्यत्वमिति दोषः।

न्यायकन्दली

तदैव तन्त्वन्तरेऽपि कर्म, विभागाच्चांशोस्तन्त्वारम्भकसंयोगविनाशो यदा, तदा तन्तुकर्मणा तन्त्वन्तराद्विभागः क्रियत इत्येकः कालः।

ततो यस्मिन् काले विभागात् तन्त्वोः संयोगविनाशः, तस्मिन्नेव कालेऽ[5]श्वोः संयोगविनाशात् तदारब्धस्य तन्तोर्विनाशः, तस्मिंस्तन्तौ विनष्टे तदाश्रितस्य तन्त्वन्तरविभागस्य विनाशः, [6]तत्राऽऽश्रयविनाशः कारणमन्यस्य विनाशहेतोरभावात्।

[149] अत्र पुनः प्रत्यवतिष्ठते–[7]एवं तर्हीति। द्वितन्तुकविनाशसमकालमेव तन्तुविभागस्य [8]विनाशे उत्तरो विभागः सक्रियस्य तन्तोराकाशादिदेशेन समं विभागज[9]विभागो नोत्पद्यते, कारणस्य तन्त्वोर्विभागस्याभावात्। यद्युत्तरो विभागो न संवृत्तः ततः किं तत्राह–तत इति। तत उत्तरविभागानुत्पादात् प्राक्तनस्य तन्त्वाकाशसंयोगस्य प्रतिबन्धक[10]स्यानिवृत्तेः

[टि०] तरप्रदेशावच्छिन्नेनैव वृक्षेण सह संयोगः क्रियते। ततस्तेन संयोगेन मूलावच्छिन्नविभागो नाश्यते। यदि तु [11]दूरतरप्रदेशावच्छिन्नेन वृक्षेण [12]संयोगः क्रियते तदाकाशेनैव प्रथमं संयोगाद्वाकाशसंयोगेनैव विभागो नाशितः स्यान्न

[पं०] तत्संयोगविनाशादिति (कं. १६१.२४) अंश्वोः संयोगविनाशादित्यपि पाठान्तरम्। तदारब्धस्येति (कं. १६१.२५) अंश्वारब्धस्य। तन्तोरिति (कं. १६१.२५) एकतरस्य तन्तोः। तन्त्वन्तरविभागस्य विनाश इति (कं. १६१.२५) द्विष्ठो हि विभागः अत एक[त]रस्य तन्तोर्निर्मूलनाशे द्वितीयतन्तौ तिष्ठत्यपि न विभागसम्भवः निराधारत्वादित्यर्थः।

[149] उत्तरो विभाग इति (कं. १६२.३) व्याख्येयं पदम्, सक्रियस्य तन्तोराकाशादिदेशेन समं विभाग[ज]-विभाग (कं. १६२.३) इति व्याख्यानपदम्। आश्रयविनाश इति (कं. १६२.८) उद्धृतैकतन्तुलक्षणाश्रय[13]विनाशः। नित्यद्रव्यसमवेतस्य च नित्यत्वमिति (कं. १६२.८) परमाणुलक्षणनित्यद्रव्यसमवेतस्य च कर्मणो नित्यतां प्राप्नोतीत्यर्थः।

[कु०] [14]अन्यस्येति (कं. १६१.१९) आश्रयविनाशस्य गुणविनाशकविप्रतिपत्त्यभावात् प्रक्रियामात्रे प्रश्न इत्यर्थः। कार्यस्येति (कं. १६२.१) यदा विभागजो विभागो न जातः तदा न तन्तोः कार्यविरुद्धाकाशादिदेशसंयोगनाशः। न च तमन्तरेणोत्तरसंयोगनाशः। न च तमन्तरेणोत्तरसंयोग इत्यभिप्रायः।

---

१ ततश्च प्रदेशान्तरसंयोगभावादित्यतः–जे., संयोगभाव इत्यतः दे। २ गुणसम्भवात्–दे। ३ कर्मणश्चिरकालावस्थायित्वं–कं. १, कं. २। ४ समवेतस्य नित्यत्वम–दे। ५ अंशोः–जे. २। ६ तदा–कं. १, कं. २। ७ नन्वेवं तर्हीति–जे. १, जे. २, जे. ३। ८ विनाशः–कं. १, कं. २। ९ विभागे–कं. १, कं. २। १० स्यानिवृत्तेः प्रदेशान्तरेण–कं. १, कं. २। ११ इतर–ब, १२ संयोगसंयोगः–अ, ब; १३ विभागः–ब। १४ यत्नस्य–MS।

### प्रशस्तपादभाष्यम्

कथम्? [1]यदाप्यद्व्यणुकारम्भके परमाणौ कर्मोत्पन्नमण्वन्तराद् विभागं करोति, तदैवाण्वन्तरेऽपि कर्म। ततो यस्मिन्नेव काले विभागाद् द्रव्यारम्भकसंयोगविनाशः, [2]तदै[3]वाण्वन्तरकर्मणा द्व्यणुकाण्वोर्विभागः [4]क्रियते। ततो यस्मिन्नेव काले विभागाद् [5]द्व्यणुकाणुसंयोगस्य विनाशः, तस्मिन्नेव काले संयोगविनाशाद् [6]द्व्यणुकस्य विनाशः। तस्मिन् विनष्टे तदाश्रितस्य द्व्यणुकाणुविभागस्य विनाशः। ततश्च विरोधिगुणा[7]सम्भवान्नित्यद्रव्यसमवेतकर्मणो नित्यत्वमिति।

### न्यायकन्दली

सक्रियस्य तन्तोः प्रदेशान्तरेण सह संयोगो न भवति, अतः कारणाद्विरोधिनो गुणस्योत्तरसंयोगस्याभावात् कर्मणः कालान्तरावस्थायित्वं स्यात्, यावदाश्रयविनाशो विनाशहेतुर्नोपनिपतति — नित्यद्रव्यसमवे[8]तस्य च नित्यत्वमिति दोषः।

कथमिति [9]प्रश्नः। उत्तरमाह — यदेति। आप्यद्व्यणुकस्यारम्भके परमाणौ कर्मोत्पन्नमण्वन्तराद्विभागं करोति यदा, तदैव द्व्यणुकसंयोगिन्यनारम्भकपरमाण्वन्तरेऽपि कर्म। ततो [10][यस्मिन्काले परमाण्वोर्विभागा द्रव्यारम्भकसंयोगस्य विनाशस्तदैवाणुकर्मणा द्व्यणुकाण्वोविभागः। ततो यस्मिन्नेव काले द्व्यणुकाण्वोर्विभागाद् द्व्यणुकाण्वोः संयोगस्यविनाशः] तस्मिन्नेव काले परमाण्वोः संयोगविनाशात् तदारब्धस्य द्व्यणुकस्य विनाशः,

[टि०] वृक्षसंयोगेनेति। **पुरुषस्य** इति :— प्रदेशान्तरेण वृक्षप्रदेशव्यतिरिक्तेनाकाशकुड्यादिप्रदेशेनेत्यर्थः। **नन्वेतदपि साध्यसमम्** इति :— एतच्छब्दाभिधेयमेव दर्शयति संयोगमात्रेण विभागनिवृत्तिरिति ॥ विभागः ॥

[पं०] **उत्तरमाहेति** (कं. १६२.९) नित्यद्रव्यसमवेतस्य च कर्मणो नित्यत्वं प्रसज्यते इति पूर्वपक्षवादी स्वयमेव स्वोक्तं विवृणोतीत्यर्थः। **अण्वन्तराद्विभागं करोति यदेति** (कं. १६२.१०) अण्वन्तराद्विभागं कर्तुमारभते यदेत्यर्थः। **अनारम्भकपरमाण्वन्तरे इति** (कं. १६२.११) तृतीयपरमाणौ। [11]**परमाण्वोरिति** (कं. १६२)। [12]**अणुकर्मणेति** (कं. १६२) अनारम्भकस्य तृतीयपरमाणोः कर्मणा। [13]**द्व्यणुकाण्वोर्विभाग इति** (कं. १६२) द्व्यणुकाण्वोरवयविभूतयोर्विभागः कृत इत्यर्थः। अवयवविभागाद्धि अवयविविभाग इत्याशयः। [14]**द्व्यणुकाण्वोरिति** (कं. १६२) द्व्यणुकावयवि-

[कु०] [149] [15]**पर इति** (कं. १६२.२) कार्यकारणभावमसहमानो नास्तिक इत्यर्थः। सुगमे प्रक्रिये।

न च कर्मान्तरजनितेन विभागेन प्रतिबन्धकसंयोगनिवृत्त्या परिहरणीयमेतत्, कर्मवति कर्म्मान्तरोत्पादविरोधा-

---

१ यदा द्व्यणुकारम्भके–जे.; –रम्भक–कं. १, कं. २। २ तत्रैव–दे। ३ अणुकर्मणा–जे. व्यो. (५०८); दे। ४ 'क्रियते' इति 'जे' पुस्तके नास्ति। ५ द्व्यणुकसंयोगस्य–कि। ६ द्व्यणुकविनाशः–दे। ७ सम्भवात्कर्मणोनित्यत्वमिति–जे. दे। ८ समवेतस्य नित्यत्वमिति–कं. १, कं. २। ९ प्रश्ने–जे. २। १० [ ] एतच्चिह्नान्तर्गतः पाठः कं. १, कं. २, पुस्तकयोर्नास्ति। ११ पाठोऽयं–कं. १, कं. २ पुस्तके नास्ति–जे. १, जे. २, जे. ३ इत्यत्रास्ति। १२ अयमपि तथा–सं। १३ अयमपि तथैव–सं। १४ ११, १२, १३ पाठवत् अयमपि तथा–सं। १५ पुनः–कं।

प्रशस्तपादभाष्यम्

[1]तन्त्वंशवन्तरविभागाद्विभाग इत्यदोषः। आश्रयविनाशात्तन्त्वोरेव विभागो विनष्टो [2]न तन्त्वंशवन्तरविभाग इति। एतस्मादुत्तरो विभागो [3]जायते, अङ्गुल्याकाशविभागाच्छरीराकाशविभागवत्, [4]तस्मिंश्च कर्म संयोगं कृत्वा विनश्यतीत्यदोषः।

न्यायकन्दली

तस्मिन् द्व्यणुके विनष्टे तदाश्रितस्य द्व्यणुकाणुविभागस्य विनाशः, ततो विभागस्य कारणस्याभावात् [5]परमाणोराकाशदेशविभागानुत्पादे पूर्वसंयोगानिवृत्तावुत्तरसंयोगस्य विरोधिगुणस्य विनाशहेतोरसम्भवान्नित्यपरमाणुसमवेतस्य कर्मणो नित्यत्वं स्यात्।

पूर्वोक्तं तावत्परिहरति–तन्त्वंशवन्तरविभागाद्विभाग इत्यदोषः।

कार्याविष्टे कारणे कर्मोत्पन्नमवयवान्तरेण समं [6]स्वाश्रयस्य विभागं कुर्वदाकाशादिदेशाद्विभागं न करोतीति नियमः, आकाशादिदेशविभागकर्तृत्वस्य विशिष्टविभागानारम्भकत्वेन व्याप्तत्वात्। अवयवान्तरस्यावयवेन स्वाश्रयसंयोगिना समं तु करोत्येव, विरोधाभावात्। अतो द्वितन्तुककारणे तन्तौ कर्मोत्पन्नं तन्त्वन्तराद्विभागसमकालं तदंशुनापि तन्तुसंयुक्तेन समं विभागमारभते। स च विभागस्त[7]न्तोरंशोश्चावस्थानादवस्थित इत्याह–आश्रयविनाशात्तन्त्वोरेव विभागो विनष्टः, तन्त्वंशवन्तरविभागस्त्ववस्थित इति।

किमतो यद्येवमित्यत आह–एतस्मादिति। अङ्गुल्याकाशविभागाच्छरीराकाशविभागवत्। यथा कर्मजादङ्गुल्याकाशविभागाच्छरीराकाशविभागः, एवं कर्मजादंशुतन्तु-

[पं०] सत्कयोरण्वोः। [8]संयोगस्येति (कं. १६२) द्रव्यारम्भकस्य। परमाणुसंयोगविनाशाविति (कं. १६२.१२) परमाण्वोः संयोगविनाशादित्यर्थः।

पूर्वोक्तमिति (कं. १६२.१६) कर्मणः कालान्तरावस्थायित्वदोषम्। परिहरतीति (कं. १६२.१६) भाष्यकारः।

कार्याविष्ट इति (कं. १६२.१६) द्वितन्तुकपटाविष्टे। कारणे इति (कं. १६२.१७) तन्तौ। अवयवान्तरेणेति (कं. १६२.१७) द्वितीयतन्तुना। स्वाश्रयस्येति (कं. १६२.१७) तन्तोः। विशिष्टविभागानारम्भकत्वेनेति (कं. १६२.१९) द्रव्यारम्भकसंयोगविनाशकविभागानारम्भकत्वेनेति। अवयवान्तरस्यावयवेनेति (कं. १६२.२०) द्वितीयतन्तोः सत्केनावयवेन अंशुना। स्वाश्रयसंयोगिनेति (कं. १६२.२०) विभज्यमानकर्माश्रयतन्तुसंयोगिनेत्यर्थः। करोत्येवेति (कं. १६२.२१) कर्मकर्तृभूतं विभागं करोत्येवेत्यर्थः।

[कु०] नुपलम्भादिति। आरम्यारम्भकवादे यथा तन्त्वोः संयोग आरम्भकस्तथा तन्त्वंशुसंयोगोऽपि। ततश्च तद्विभागोऽपि तन्तुविभागवद् द्रव्यारम्भकसंयोगप्रतिद्वन्द्वी भवत्येवेति भावः। ननु अङ्गुल्याकाशविभागादित्यादिदृष्टान्तो विषयः,

१ तन्त्वन्तर–दे। २ न तु–दे। ३ सञ्जायते–जे. दे। ४ तस्मिन्नेव काले–कं. १, कं. २ कि। ५ परमाण्वोः–जे. १। ६ स्वाश्रयविभागं–जे. २। ७ तन्त्वंशोरवस्थानात्–जे. १, जे. २, जे. ३। ८ पूर्ववत्–सं।

## प्रशस्तपादभाष्यम्

अथवा अंश्वन्तरविभागोत्पत्तिसमकालं [1]तस्मिन्नेव तन्तौ कर्मोत्पद्यते, ततोऽ[2]श्वन्तरविभागात् तन्त्वारम्भकसंयोगविनाशः, तन्तुकर्मणा [3]च तन्त्वन्तराद्विभागः क्रियते इत्येकः कालः। ततः संयोगविनाशात् तन्तुविनाशः, तद्विनाशाच्च तदाश्रितयोर्विभागकर्मणोर्युगपद्वि[4]नाशः।

## न्यायकन्दली

विभागात् तन्त्वाकाशविभाग इत्युदाहरणार्थः। हस्ताकाशविभागाच्छरीराकाशविभागो युक्तो न त्वङ्गुल्याकाशविभागात्, अङ्गुलेः शरीरं प्रत्यकारणत्वादिति चेत्? हस्तोऽपि बाहोराश्रयो न शरीरस्य, कुतस्तद्वि[5]भागादपि शरीरविभागः। अथ समस्तावयवव्यापित्वाच्छरीरस्य हस्तोऽप्याश्रयः, एवमङ्गुल्यप्याश्रयो हस्ताङ्गुल्याद्यवयवसमुदाये शरीरप्रत्यभिज्ञानात्। तस्मिंस्तन्त्वाकाशविभागे जाते पूर्वसंयोगस्य प्रतिबन्धकस्य निवृत्तौ तन्तुसमवेतं कर्मोत्तरसंयोगं कृत्वा ततो विनश्यतीत्याह–तस्मिन्निति।

प्रकारान्तरेणाप्याश्रयविनाशाद्विनाशं कथयति–अथवेति। अंश्वन्तरविभागोत्पत्तिसमकालं तस्मिन्नेव तन्तौ विभज्यमानावयवे कर्मोत्पद्यते, ततो विभागात् तन्त्वारम्भकस्यांशुसंयोगस्य विनाशः, तन्तुकर्मणा च तस्य तन्तोस्तन्त्वन्तराद्विभाग इत्येकः कालः। ततस् [6]तदनन्तरं संयोगस्य विनाशात् तदारब्धस्य तन्तोर्विनाशः, तद्विनाशाच्च तदाश्रितयोर्विभागकर्मणोर्युगपद्विनाशः। यच्च नित्यसमवेतस्य नित्यत्वमिति चोदितम्, तत्र प्रतिसमाधानं नोक्तम्, तस्यात्यन्तमसङ्गतार्थत्वात्। कार्याविष्टे हि कारणे कर्मोत्पन्नमव-

[पं०] व्योमशिवाभिप्रायमाशङ्कमानः प्राह हस्ताकाशविभागादित्यादि (कं. १६३.१) अङ्गुलेः शरीरं प्रत्यकारणत्वादिति (कं. १६३.२) कारणविभागाद्धि कार्यविभागः, कारणमवयवाः, कार्यमवयवी। बाहोराश्रय इति (कं. १६३.२) बाहोः कारणमित्यर्थः तद्विभागादपीति (कं. १६३.३) हस्त[7]विभागादपीति–हस्तविभागादपि। श्रीधरः प्राह एवमित्यादि (कं. १६२.२५)।

तदनन्तरमिति (कं. १६३.१०) विभागानन्तरम्। [8]संयोगविनाशादिति। अंशुसंयोगविनाशादिति ([9]अंशुसंयोगविनाशात्) तदारब्धस्य (कं. १६३.११) अंश्वारब्धस्य। तदाश्रितयोः (कं. १६३.११) तन्त्वाश्रितयोः। नोक्तमिति

[कु०] आरभ्यारम्भकवादे अंशुतन्तुविभागस्य कारणविभागत्वात्। अङ्गुल्याकाशविभागस्य कारणकारणविभागत्वादित्यत आह हस्ताकाशेति (कं. १६३.१)। अङ्गीकुर्वन् परिहरति हस्तोऽपीति (कं. १६३.२)। प्रमाणमाह हस्ताङ्गुलीति (कं. १६३.४)।

---

१ तस्मिन्नेव काले–दे। २ अंशुविभागात्–व्यो.(५१०) जे। ३ च विभागः क्रियते–जे., दे। ४ विनाश इति–दे। ५ तद्विभागादपि शरीरविभागादपि–कं. १, कं. २। ६ तदनन्तरं–कं. १, कं. २। ७ हस्तविभागादपीति कन्दल्यां नास्ति। ८ संयोगस्य–कं। ९ पुनरावृत्तं भाति–सं।

प्रशस्तपादभाष्यम्

तन्तुवीरणयोर्वा संयोगे सति द्रव्यानुत्पत्तौ पूर्वोक्तेन विधानेनाश्रयविनाशसंयोगाभ्यां तन्तुवीरणविभागविनाश इति ।

न्यायकन्दली

यवान्तरविभागसमकालमाकाशादिदेशेन समं विभागं न [1]करोतीति, आकाशादिविभागकर्तृत्वस्य द्रव्यारम्भकसंयोगविरोधिविभागोत्पादकत्वस्य च विरोधात् । अनारम्भके तु द्व्यणुकसंयोगिनि परमाणौ कर्म द्व्यणुकविभागसमकालं तस्याकाशदेशेन समं विभागं करोत्येव, ततो विभागाच्च परमाणोराकाशसंयोगनिवृत्तावुत्तरसंयोगे सति तदाश्रितस्य कर्मणो विनाशो भवत्येव ।

समानजातीयसंयोगे सति द्रव्योत्पत्तावाश्रयविनाशाद्विभागकर्मणोर्विनाशः कथितः, सम्प्रति विजातीयसंयोगे द्रव्यानुत्पत्तौ संयोगाश्रयविनाशाभ्यां विभागविनाशं कथयति— तन्तुवीरणयोर्वा संयोगे [2]सति द्रव्यानुत्पत्तौ पूर्वोक्तेन विधानेनेति । [3]तन्त्वारम्भकांशौ कर्मोत्पत्तिसमकालं [4]वीरणेऽपि कर्म, ततोऽशुक्रियया अंश्वन्तराद्विभागो वीरणकर्मणा च तस्य विभज्यमानावयवेन तन्तुना आकाशदेशेन च समं विभागः क्रियते, ततोऽशुविभागादंशुसंयोगविनाशो वीरणविभागाच्च तन्तुवीरणसंयोगस्याकाशवीरणसंयोगस्य च विनाशः, ततोऽशुसंयोगविनाशात् तन्तुविनाशो वीरणस्य चोत्तर[5]संयोगस्ततं उत्तरसंयोगाश्रयविनाशाभ्यां तन्तुवीरणविभागस्य विनाश इति प्रक्रिया ।।

[पं०] (कं. १६३.१३) भाष्ये । भाष्ये प्रतिसमाधानं नोक्तम् । वृत्तिकारस्तु स्वयं कथयति **कार्याविष्टे ह्येत्यादिना** (कं. १६३.१३) **कार्याविष्ट इति** (कं. १६३.१३) द्व्यणुकाविष्टे । **कारणे** इति (कं. १६३.१३) अणौ । **अवयवान्तरविभागसमकालमिति** (कं. १६३.१४) द्वितीयपरमाणुविभागसमकालम् । **अनारम्भके** इति (कं. १६३.१६) द्वितीयाणौ । **तस्येति** (कं. १६३.१७) अनारम्भकस्य तृतीयपरमाणोः । **परमाणोरिति** (कं. १६३.१७) अनारम्भकस्य ।

तस्येति (कं. १६३.२३) अंशोः । **उत्तरसंयोग** इति (कं. १६४.१) उत्तराकाशसंयोगः । **उत्तरसंयोगाश्रयविनाशाभ्यामिति** (कं. १६४.१) उत्तरसंयोगतन्तुविनाशाभ्यामित्यर्थः ।

।। इति विभागगुणविवरणं समर्थितम् ।।

[कु०] **विभागकर्म्मणोर्युगपद्विनाश** इति (कं. १६३.११) न च कर्म्मणोऽनुपभोग्यत्वदोषः, तदुत्पादनशक्ते शम्यैवोपभोगत्वात् **समं विभागः क्रियते** इति उभयोरपि द्रव्यारम्भकसंयोगाप्रतिद्वंद्वित्वादित्यर्थः । **तन्तुसंयोगे विनाशः** तन्त्वारम्भकसंयोगविनाश इत्यर्थः ।

[ इति विभागः ]

---

१ करोति आकाशा—कं. १, कं. २। २ सति पूर्वोक्तेन—जे. १, जे. २, जे. ३। ३ तन्त्वारम्भकांशी—कं. १, कं. २। ४ वीरणं कर्म—कं. १, कं. २। ५ संयोगोऽत—कं. १, कं. २; तत आश्रयविनाशसंयोगाभ्याम्—कं. १; उत्तरसंयोगाश्रयविनाशाभ्याम्—जे. ३।

प्रशस्तपादभाष्यम्

[150] परत्वमपरत्वं च परापराभिधानप्रत्ययनिमित्तम् ।

[1]तद् द्विविधं दिक्कृतं कालकृतं च । तत्र दिक्कृतं [2]दिग्विशेषप्रत्यायकम् कालकृतं [3]च वयोभेदप्रत्यायकम् ।

न्यायकन्दली

[150] परत्वमपरत्वं च परापराभिधानप्रत्ययनिमित्तमिति । परमित्यभिधानस्य प्रत्ययस्य च निमित्तं परत्वम् । अपरमित्यभिधानप्रत्यययोर्निमित्तमपरत्वमिति कार्येण सत्तां प्रतिपादयति ।

यद्यप्याकाशं कण्ठाद्याकाशसंयोगादिकं च परापराभिधानयोः कारणं भवति, यद्यप्यात्ममनःसंयोगादिकं च परापरप्रतीतिकारणं स्यात्, तथापि निमित्तान्तरसिद्धिः, विशिष्टप्रत्ययस्य असाधारण[4]कारणमन्तरेणोत्पत्त्यभावात् । एकत्र द्वयोरुपन्यासस्तयोरितरेतरसापेक्षत्वात् ।

'तद् द्विविधम्' 'तत्' परत्वमपरत्वं च 'द्विविधम्' द्विप्रकारमिति भेदनिरूपणम् । किंकृतस्तयोर्भेद इत्याशङ्क्य कारणभेदाद्भेदमाह–दिक्कृतं कालकृतं चेति । दिक्पिण्डसंयोगकृतं दिक्कृतम् । कालपिण्डसंयोगकृतं कालकृतम् । अनयोर्भेदः कुतः प्रत्येतव्यः ?

[टि०] ( ।। अथ परत्वापरत्वनिरूपणम् ।। )

[150 to 153] विशिष्टप्रत्ययस्य इति :–एतेन विशेषणं सत् परापराभिधानप्रत्ययनिमित्तमिति सूचितम् । द्रिक् प्रदेशस्य परत्वं नास्तीत्याह [5]संयोगभूयस्त्ववता इति । वर्तमानकालयोः इति :–यत्र त्वतीतस्यापि स्मरणा-

[पं०] [150] अथ परत्वापरत्वयोर्गुणयोर्विवरणं प्रस्तूयते परत्वमपरत्वं चेत्यादि (कं. १६७.१३) । अभिधानस्येति (कं. १६७.१३) व्यपदेशस्य ।

आकाशमिति (कं. १६७.१५) समवायिकारणम् । कण्ठाद्याकाशसंयोगादिकमिति (कं. १६७.१५) असमवायि-

[कु०] [150] साधारणनिमित्तत्वेन सिद्धसाधनमाशङ्क्य परिहरति यद्यपीति (कं. १६७.१५) । न च संयुक्तसंयोगाल्पीयस्त्वभूयस्त्वाभ्यां सिद्धसाधनम्, परत्वाधारापेक्षया संयोगभूयस्त्वाल्पत्ववत्यपि प्रमातरि परापरप्रत्ययोरनुत्पादात्, इतरेतराश्रयमवधिमपेक्ष्योत्पत्तेरिति भावः । दिक्कालयोः सर्वोत्पत्तिमन्निमित्तकारणतया कथमेतयोरयं विशेष इत्यत आह दिक्पिण्डेति (कं. १६७.२०) । असमवायिकारणाधारकृतो विशेष इत्यर्थः । असमवायिकारणाधारस्व-

१ तत्तु–क. १; कं. २, कि । २ देशविशेष–जे; व्यो. (५१५) दे । ३ तु–दे । ४ कारणविशेष–कं. १; कं. २ । ५ संयोगभूयस्त्ववति–ड;

प्रशस्तपादभाष्यम्

तत्र दिक्कृतस्योत्पत्तिरभिधीयते । कथम्? एकस्यां दिश्यवस्थितयोः पिण्डयोः संयुक्तसंयोगबह्वल्पभावे सत्येकस्य द्रष्टुः सन्निकृष्टमवधिं कृत्वा एतस्माद्विप्रकृष्टोऽयमिति परत्वा[1]धारेऽसन्निकृष्टा बुद्धिरुत्पद्यते । [2]ततस्तामपेक्ष्य परेण दिक्प्रदेशेन [3]संयोगात् परत्वयोत्पत्तिः । [4]विप्रकृष्टं चावधिं [5]कृत्वा इतरस्मिन् सन्निकृष्टा बुद्धिरुत्पद्यते । [6]ततस्तामपेक्ष्यापरेण दिक्प्रदेशेन संयोगादपरत्वस्योत्पत्तिः ।

न्यायकन्दली

कार्यभेदादित्याह–दिक्कृतं दिग्विशेषप्रत्यायकं कालकृतं तु दयोर्भेदप्रत्यायकम् । दिक्कृतं परत्वं देशविप्रकृष्टत्वं [7]प्रत्याययतीति, अपरत्वं च देशसन्निकृष्टत्वम् । कालकृतं तु परत्वं पिण्डस्य कालविप्रकृष्टत्वं प्रतिपादयति, अपरत्वं च कालसन्निकृष्टत्वमिति विशेषः ।

तत्र तयोर्दिक्कृतकालकृतयोर्मध्ये दिक्कृतस्योत्पत्तिरभिधीयते । कथमिति प्रश्ने सत्युत्तरमाह–एकस्यामिति । पूर्वापर[8]दिश्यवस्थितयोः पिण्डयोः परापरप्रत्ययौ न [9]सम्भवतः, तदर्थमेकस्यां दिश्यवस्थितयोरित्युक्तम् । एकस्यां दिशि प्राच्यां वा प्रतीच्यां वाऽवस्थितयोः पिण्डयोर्मध्ये एकस्य द्रष्टुः संयुक्तेन भूदेशेन सहापरस्य प्रदेशस्य संयोगः,

[पं०] कारणम् । यद्यप्यात्ममनःसंयोगादिकं च परापर[10]प्रतीतिकारणं स्यादिति (कं. १६७.१६) प्रत्ययस्य समवायिकारणमात्मा, आत्ममनःसंयोगाः [अ]समवायिकारणम् । निमित्तान्तरसिद्धिरिति (कं. १६७.१७) निमित्तान्तरं च परत्वापरत्वलक्षणम् । एकत्रेति (कं. १६७.१८) एकस्मिन् प्रकरणे । द्वयोरिति (कं. १६७.१८) परत्वापरत्वगुणयोः ।

[कु०] साम्येऽपि समवायिकारणनियमः कारणनियमः, कारणस्वभावात् । यथा मनःसंयोगजापि बुद्धिरात्मन्येव न मनसि । परत्वापरत्वयोर्दिक्कालस्वरूपप्रत्यायकत्वं दिक्कालप्रकरण एवोक्तम् । इह तु आश्रययोर्देशावस्थाविशेषप्रत्ययत्वमभिप्रेतमिति व्याचष्टे दिक्कृतं परत्वमिति (कं. १६७.२३) ।

प्रश्न इति (कं. १६८.३) । मूर्तगुणौ परत्वापरत्वे दिशः कारणत्वं जिज्ञासमानस्येति शेषः । प्रत्युत्तरमिति (कं. १६८.३) विदिताभिसन्धेरिति शेषः । संयोगादसमवायिकारणादिति (कं. १६८.४) अन्न्य(न्य)गुणयोरपि परत्वापरत्वयोरसमवायिकारणसंयोगाधारतया उपाध्यवच्छिन्ना दिगपि कारणमित्यर्थः ।

---

१ परत्वाधारे बुद्धिरुत्पद्यते–जे. व्यो. (५१५) । २ तामपेक्ष्य–जे. व्यो. (५१५) । ३ योगात्–जे. पुस्तके सर्वत्र संयोगात् इत्यस्य स्थाने दृश्यते । ४ तथा विप्रकृष्टं–कं. १, कं. २ । ५ कृत्वा इत्यनन्तरं 'एतस्मात्सन्निकृष्टोऽयमित्यपरत्वाधारे' इत्यधिकं–कं. १, कं. २, कि. पुस्तकेषु । ६ तामपेक्ष्य–जे. । ७ प्रत्याययति–कं. १, कं. २ । ८ दिगवस्थितयोः–जे. १; दिग्व्यवस्थितयोः–कं. १, कं. २ । ९ भवतः–जे. १, जे. २ । १० प्रतीतिकारणं अपुस्तके भ्रष्टमिव भाति ।

## न्यायकन्दली

तेनापि सममपरस्येति संयुक्तसंयोगानां बहुत्वे अल्पत्वे च [1]सत्यल्पसंयोगवन्तं पिण्डं सन्निकृष्टमवधिं कृत्वैतस्मात् पिण्डाद्विप्रकृष्टोऽयमिति संयोगभूयस्त्ववति भविष्यतः परत्वस्याधारे पिण्डे विप्रकृष्टा बुद्धिरुदेति। ततो विप्रकृष्टबुद्ध्युत्पत्त्यनन्तरं तां विप्रकृष्टां बुद्धिमपेक्ष्य परेण संयोगभूयस्त्ववता दिक्प्रदेशेन संयोगादसमवायिकारणाद्विप्रकृष्टे पिण्डे समवायिकारणभूते परत्वस्योत्पत्तिः। द्रष्टुः स्वशरीरापेक्षया संयुक्तसंयोगभूयस्त्ववन्तं विप्रकृष्टं चावधिं कृत्वेतरस्मिन् संयुक्तसंयोगाल्पीयस्त्ववति सन्निकृष्टा बुद्धिरुदेति। [3]तां सन्निकृष्टां बुद्धिं निमित्तकारणीकृत्यापरेण संयुक्तसंयोगाल्पीयस्त्वविशिष्टेन दिक्प्रदेशेन सह संयोगादसमवायिकारणात् सन्निकृष्टे पिण्डे समवायिकारणे परत्वस्योत्पत्तिः।

सन्निकृष्टविप्रकृष्टबुद्ध्योः [4]परस्परापेक्षत्वादुभयाभावप्रसङ्ग इति चेत्? न, अनभ्युपगमात्। न सन्निकृष्टोऽयमित्येवं [5]प्रतीत्यैव तदपेक्षया विप्रकृष्टबुद्धिः, नापि विप्रकृष्टोऽयमिति प्रतीत्यैव तदपेक्षया सन्निकृष्टबुद्ध्युदयः, किन्तु संयोगाल्पीयस्त्वसहचरितं पिण्डं प्रतीत्यैव तदपेक्षया संयोगभूयस्त्ववति विप्रकृष्टबुद्धिः। एवं संयोगभूयस्त्वसहचरितं पिण्डं प्रतीत्यैव तदपेक्षया संयोगाल्पीयस्त्ववति सन्निकृष्टबुद्ध्युत्पत्तिरिति न [6]परस्परापेक्षत्वमनयोः।

[टि०] रूढस्यावधित्वं[7] तत्रापि स्मृतेर्वर्तमानत्वात्तदारूढस्यापि [8]वर्तमानत्वादिति। तयोः [9]प्रतिक्षणेति तयोः युवस्थविरदेहयोः [10]प्रतिदिनं [11]विनाशित्वादिति भावः। अपेक्षाबुद्धिसमकालमेव इतिः–अत्रापि भविष्यत्परत्वाधारेत्यर्थः। तदानीमेव सामान्यबुद्धेः इति। सामान्यबुद्धेः सकाशात् तस्यापेक्षाबुद्धिविनाशस्य ॥ [12]परत्वापरत्वे ॥

[पं०] [13]विप्रकृष्टं पिण्डं चावधिं कृत्वेति (कं. १६८.१२) चकारो व्यवहितक्रमः। प्रकृष्टं च पिण्डमवधिं कृत्वेत्यर्थः। परस्परापेक्षित्वादिति (कं. १६८.१५) इतरे(तरा)श्रयदोषादित्यर्थः। तदपेक्षयेति (कं. १६८.१६) पिण्डापेक्षया।

[कु०] अनभ्युपगमादिति (कं. १६८.१६) सन्निकृष्टविप्रकृष्टबुद्ध्योः कदाचित्कस्यचिदुत्पत्तेर्न परस्पराश्रयदोषः इति भावः। द्वयोरेकस्मिन् वेति (कं. १६८.२३) न ह्यसतः समवायित्वमवधित्वं च सम्भवतीति भावः।

तत इति पञ्चम्यर्थग्रहणे परत्वसामान्यबुद्धेर्हेतुता प्रतीयते। न च विनाशकारणसन्निधिव्यतिरेके नान्यविनश्यता ततश्चात्माश्रयदोष इत्यत आह तत इति (कं. १६९.११)। सप्तम्यर्थं (कं. १६९.११) इति।

---

१ सत्यल्पपिण्ड – जे. १; बहुत्वे सत्यल्पसंयोग– कं. १, कं. २। २ विप्रकृष्टां बुद्धि– कं. १, कं. २। ३ तदा तां – जे. १। ४ परस्परापेक्षित्व– कं. १, कं. २। ५ प्रतीत्य – जे. १। ६ परस्परापेक्षित्व – कं. १; कं. २। ७ वधित्वं तत्त्वात्तत्रापि – अ; ८ वर्तमानत्वादवधित्वं स्पष्टमित्यर्थः। ९ प्रतिक्षणं मु. – जे. १; जे. ३; १० प्रतिदिन – ब, क; ११ विनाशत्वा – अ, ब, क; १२ परत्वे – अ; १३ विप्रकृष्टं चावधिं कृत्वा – कं।

## प्रशस्तपादभाष्यम्

[151] कालकृतयोरपि कथम् ? वर्तमानकालयोरनियतदिग्देशसंयुक्तयोर्युवस्थविरयो रूढश्मश्रुकार्कश्यवलिपलितादिसान्निध्ये सत्येकस्य द्रष्टुर्युवानमवधिं कृत्वा स्थविरे विप्रकृष्टा बुद्धिरुत्पद्यते । ततस्तामपेक्ष्य परेण कालप्रदेशेन संयोगात् परत्वस्योत्पत्तिः, स्थविरं चावधिं कृत्वा यूनि सन्निकृष्टा बुद्धिरुत्पद्यते । ततस्तामपेक्ष्यापरेण कालप्रदेशेन संयोगादपरत्वस्योत्पत्तिरिति ।

## न्यायकन्दली

[151] <u>कालकृतयोरपि कथम्</u> ? दिक्कृतयोस्तावत्परत्वापरत्वयोरुत्पत्तिः कथिता, कालकृतयोरपि तयोरुत्पत्तिः कथमिति प्रश्नः । समाधानं <u>वर्तमानकालयोरिति</u> । द्वयोरेकस्मिन् वा पिण्डेऽविद्यमाने परत्वापरत्वे न भवतः, तदर्थं <u>वर्तमानकालयोरित्युक्तम्</u> । अनियतदिग्देशयोरित्येकदिश्यवस्थितयो[1]रन्यदिगवस्थितयोर्वा युवस्थविरयो रूढश्मश्रु च वलिश्च पलितं च तेषां कालविप्रकर्षलिङ्गानां सान्निध्ये सत्येकस्य द्रष्टुर्युवानं रूढश्मश्रु-कार्कश्याद्यभावानुमि[2]तमल्पोत्पत्तिकालमवधिं कृत्वा रूढश्मश्रुवलिपलितादिमति स्थविरे विप्रकृष्टा बुद्धिरुत्पद्यते, [3]तामपेक्ष्य परेणादित्यपरिवर्तनभूयस्त्ववता कालप्रदेशेन संयोगादसमवायिकारणात् तस्मिन्नेव स्थविरे परत्वस्योत्पत्तिः, स्थविरं चावधिं कृत्वा यूनि सन्निकृष्टा बुद्धिरुत्पद्यते, तां बुद्धिमपेक्ष्यापरेणाल्पादित्यपरिवर्तनोपलक्षितेन कालप्रदेशेन संयोगादपरत्वस्योत्पत्तिः । युवस्थविरशरीरयोः कालसंयोगाल्पीयस्त्वभूयस्त्वे शरीर-सन्तानापेक्षया, न तु [4]व्यक्तिविषयत्वेन, तयोः प्रतिक्षणं विनाशात् ।

[पं०] [151] द्वयोरिति (कं. १६८.२३) द्वयोः पिण्डयोरविद्यमानयोरित्यर्थः । व्यक्तिविषयत्वेनेति (कं. १६९.५) न पुनः प्रतिक्षणोत्पद्यमानशरीरव्यक्तिविषयत्वेनेत्यर्थः । तयोः प्रतिक्षणं विनाशादिति (कं. १६९.५) सर्वव्यक्तिषु नियतं क्षणेऽन्यत्वमिति वचनात् ।

[कु०] [151 to 153] अपेक्षाबुद्धेरपि तदानीमेव विनाशादिति (कं. १७०.३) यत् परं तद्विप्रकृष्टं (तद्) यदपरं तत्सन्निकृष्टमिति व्याप्तेर्व्यापकनिवृत्तौ च व्याप्यनिवृत्तावश्यंभावित्वादपेक्षाबुद्धिविनाशस्य च पूर्वकालभावित्व-विरहात् संयोगविनाशस्यैव परत्वविनाशकारणत्वमेषितव्यमिति भावः । तदेतं समवाय्यसमवायिनिमित्तविनाशानां प्रत्येकं परत्वं चिन्तितम्; द्वयोर्द्वयोस्त्रयाणां च समुच्चयस्य परत्वविनाशकारणप्रक्रियातिरोहितार्थः ।

[ इति परत्वापरत्वनिरूपणम् ]

---

१ भिन्न–कं. १; कं. २ । २ नुमिताल्पोत्पत्तिका–जे. १, जे. २, जे. ३ । ३ तां बुद्धिमपेक्ष्य–कं. १, कं. २ । ४ ननु व्यक्ति०–ब ।

प्रशस्तपादभाष्यम्

विनाशस्त्वपेक्षाबुद्धिसंयोगद्रव्यविनाशात् ।

अपेक्षाबुद्धिविनाशात्तावदुत्पन्ने परत्वे [1]यस्मिन्नेव काले सामान्य[2]बुद्धिरुत्पन्ना भवति, ततोऽपेक्षाबुद्धेर्विनश्यत्ता, [3]सामान्यज्ञानतत्सम्बन्धेभ्यः परत्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः । ततोऽपेक्षाबुद्धेर्विनाशो गुणबुद्धेश्चोत्पत्तिः, ततोऽपेक्षाबुद्धिविनाशाद् गुणस्य विनश्यत्ता, [4]गुणज्ञानतत्सम्बन्धेभ्यो, द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः । ततो द्रव्यबुद्धेरुत्पत्तिर्गुणस्य [5]विनाश इति ।

न्यायकन्दली

कृतकस्यावश्यं विनाशः, स च निर्हेतुको न भवतीति परत्वापरत्वयोर्विनाशहेतुमाह —विनाशस्त्विति । परत्वापरत्वयोर्विनाशोऽपेक्षाबुद्धिविनाशात्, [6]संयोगविनाशात्, द्रव्यविनाशात्, द्रव्यापेक्षाबुद्ध्योर्वि[7]नाशात्, द्रव्यसंयोगयोर्विनाशात्, संयोगापेक्षाबुद्ध्योर्विनाशात्, अपेक्षाबुद्धिसंयोगद्रव्याणां विनाशादिति सप्तविधो विनाशक्रमः ।

(१) अपेक्षाबुद्धिविनाशात तावद्विनाशः कथ्यते । उत्पन्ने परत्वे यस्मिन्नेव काले परत्वसामान्ये बुद्धिरुत्पन्ना भवति । तत इति सप्तम्यर्थे सार्वविभक्तिक[8]स्तसिलिति तसिल् । [9]एतस्मिन्नेव कालेऽपेक्षाबुद्धेर्विनश्यत्ता विनाशकारण[10]सान्निध्यम् स्यात् । [11]सामान्यज्ञानतत्सम्बन्धेभ्यः परत्वसामान्यं च, परत्वसामान्यज्ञानं च, परत्वगुणसम्बन्धश्च, तेभ्यः परत्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः । परत्वसामान्यज्ञानमेवापेक्षाबुद्धिविनाशकारणम्, गुणबुद्धेश्चोत्पत्तिकारणम्, अतस्तदुत्पाद एवापेक्षाबुद्धेर्विनश्यत्ता गुणबुद्धेश्चोत्पद्यमानता स्यात् । ततः क्षणान्तरेऽपेक्षाबुद्धेर्विनाशः परत्वगुणबुद्धेश्चोत्पादः । ततस्तस्मादपेक्षाबुद्धिविनाशाद् गुणस्य विनश्यत्ता । गुणश्च गुणज्ञानं च तत्सम्बन्धश्च तेभ्यो द्रव्यबुद्धेरुत्पद्य-

[पं०] विनाशकारणसान्निध्यमिति (कं. १६९.१२) विनाशकारण परत्वसामान्यबुद्धिलक्षणम्—तस्य सान्निध्यमित्यर्थः । परत्वगुणसम्बन्धश्चेति (कं. १६९.१५) चैत्रादिपुरुषपिण्डेन सहेति द्रष्टव्यम् । तदुत्पाद एवापेक्षाबुद्धेर्विनश्यत्तेति (कं. १६९.१७) तदुत्पादो गुणबुद्ध्युत्पादः । गुणज्ञानमिति (कं. १६९.१९) परत्वगुणज्ञानम् । तत्सम्बन्ध इति (कं. १६९.१९) गुणज्ञानस्य पिण्डेन सह सम्बन्धः ।

---

१ यस्मिन्—कं. १, कं. २, कि । २ सामान्य—कं. १, कं. २, कि । ३ कन्दल्यां व्योमवत्यां च दृश्यमानपाठानुसारेण अत्र 'सामान्यतज्ज्ञानतत्सम्बन्धेभ्य' इत्यपि पाठः स्यादिति भाति । ४ गुणतज्ज्ञान—कन्दल्यां व्योमवत्यां च । ५ विनाशः—जे । ६ सयोगस्य —जे. १, जे. ३ । ७ विनाशात्, अपेक्षाबुद्धिसंयोगयोर्विनाशात् द्रव्यसंयोगयोर्विनाशात्—जे. १, जे. २, जे. ३ । ८ तसिरिति तसिः—जे. १, जे. २, जे. ३ । ९ तस्मिन्नेव—जे. १, जे. ३; तस्मिन् काले—जे. २ । १० सान्निध्यम्—कं. १, कं. २ । ११ सामान्यतज्ज्ञान—कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

संयोगविनाशादपि कथम्? अपेक्षाबुद्धिसमकालमेव परत्वाधारे कर्मोत्पद्यते। तेन कर्मणा दिक्पिण्डविभागः क्रियते। [1]अपेक्षाबुद्धितः परत्वस्योत्पत्तिरित्येकः कालः। ततः सामान्यबुद्धेरुत्पत्तिः, दिक्पिण्डसंयोगस्य च विनाशः, ततो यस्मिन् काले [2]परत्वगुणबुद्धिरुत्पद्यते तस्मिन्नेव काले दिक्पिण्ड[3]संयोगविनाशाद् गुणस्य विनाशः।

द्रव्यविनाशादपि कथम्? परत्वाधारावयवे कर्मोत्पन्नं [4]यस्मिन् कालेऽवयवान्तराद्विभागं करोति तस्मिन्नेव कालेऽपेक्षाबुद्धिरुत्पद्यते, [5]ततो विभागाद्यस्मिन्नेव काले संयोगविनाशः, तस्मिन्नेव काले परत्वमुत्पद्यते, ततः संयोगविनाशाद् [6]द्रव्यविनाशः, [7]द्रव्यनाशाच्च तदाश्रितस्य गुणस्य विनाशः।

न्यायकन्दली

मानतेत्येकः कालः। अपेक्षाबुद्धिविनाशो गुणविनाशस्य कारणम्, गुणबुद्धिश्च द्रव्यबुद्धेः कारणम्, अपेक्षाबुद्धिविनाशगुणबुद्ध्युत्पादौ च युगपत् स्याताम्, अतो गुणस्य विनश्यत्ता द्रव्यबुद्धेश्चोत्पद्यमानतापि युगपत् स्यात्। ततः परत्वविशिष्टद्रव्यबुद्धेरुत्पादः परत्वगुणस्य च विनाशः।

संयोगविनाशादपि कथं परत्वापरत्वयोर्विनाश इति प्रश्ने कृते सत्याह— अपेक्षाबुद्धिसमकालमेव परत्वस्याधारे पिण्डे कर्मोत्पद्यते, क्षणान्तरे तेन कर्मणा दिशः [8]परत्वाधारस्य च पिण्डस्य विभागः क्रियते, अपेक्षा[9]बुद्धेश्च परत्वस्योत्पत्तिरित्येकः कालः। तत उत्पन्ने परत्वे परत्वसामान्यबुद्धेरुत्पत्तिः दिक्पिण्डसंयोगस्य च विभागाद्विनाश इत्येकः कालः। ततो [10]यस्मिन् काले सामान्यज्ञानाद् गुणबुद्धिरुत्पद्यते तस्मिन्नेव काले दिक्पिण्डसंयोगविनाशात् परत्वस्य विनाशो नापेक्षाबुद्धिविनाशात्, अपेक्षाबुद्धेरपि तदानीमेव विनाशात्।

[पं०] भविष्यतः परत्वस्याधारो द्रव्यमिति (कं. १७०.४) द्वितन्तुकलक्षणम्। ततः संयोगविनाशाद्द्रव्यविनाश इति (कं. १७०.७) अतः पुरः सामान्यबुद्धेश्चोत्पत्तिरिति शेषः। तदाश्रितस्य [गु]णस्येति (कं. १७०.८) परत्वस्य। तदानीमेवेति (कं. १७०.८) गुणविनाशसमकालम्। परत्वसामान्यज्ञानादपेक्षाबुद्धेर्विनाश इति (कं. १७०.८) नित्यत्वात्सामान्यस्य। अनयोर्न हेतुत्वं सहभावित्वादिति (कं. १७०.९) अनयोरपेक्षाबुद्धिसंयोगविनाशयोः परत्वविनाशं प्रति न हेतुत्वं सहभावित्वात्। तर्हि कस्य हेतुत्वम्? द्रव्यविनाशस्येवेति परमार्थः।

---

१ 'अपेक्षाबुद्धितः' इति–जे. व्यो. (५१८) दे पुस्तकेषु नास्ति। २ गुणबुद्धि–कं. १, कं. २, कि। ३ संयोगस्य –जे. (व्यो. ५१८)। ४ यस्मिन्नेव–कं. १, कं. २ कि। ५ विभागाद्–जे. व्यो. (५१८) दे। ६ द्रव्यविनाशः सामान्यबुद्धेरुत्पत्तिः जे. (व्यो. ५१९) दे। ७ तद्विनाशाच्च –कं. १, कं. २, कि। ८ परत्वाधारपिण्डस्य च –कं. १, कं. २। ९ बुद्धिस्तु–जे. १। १० यस्मिन्नेव –कं. १, कं. २।

प्रशस्तपादभाष्यम्

[152] द्रव्यापेक्षाबुद्ध्योर्युगपद्विनाशादपि कथम् ? यदा परत्वाधारावयवे कर्मोत्पद्यते तदैवापेक्षाबुद्धिरुत्पद्यते कर्मणा चावयवान्तराद्विभागः क्रियते, परत्वस्योत्पत्तिरित्येकः कालः। ततो यस्मिन्नेव [1]कालेऽवयवविभागाद् द्रव्यारम्भकसंयोगविनाशस्तस्मिन्नेव काले सामान्यबुद्धिरुत्पद्यते तदनन्तरं संयोगविनाशाद् द्रव्यविनाशः, सामान्यबुद्धेश्चापेक्षाबुद्धिविनाश इत्येकः कालः। ततो द्रव्यापेक्षा[2]बुद्ध्योर्विनाशात् परत्वस्य विनाशः।

न्यायकन्दली

द्रव्यविनाशादपि कथं विनाश इत्याह–परत्वाधारावयव इति। भविष्यतः परत्वस्याधारो द्रव्यम्, तस्यावयवे कर्मोत्पन्नं यदाऽवयवान्तराद्विभागं करोति, तस्मिन्नेव कालेऽपेक्षाबुद्धिरुत्पद्यते, ततो विभागाद्यस्मिन्नेव काले द्रव्यारम्भकसंयोगविनाशः तस्मिन्नेव कालेऽपेक्षाबुद्धेः परत्वमुत्पद्यते। ततः संयोगविनाशाद् द्रव्यविनाशः। ततो द्रव्यविनाशात् तदाश्रितस्य गुणस्य विनाशः। तदानीमेव परत्वसामान्यज्ञानादपेक्षाबुद्धेर्विनाशः, आश्रयविनाशाच्च दिक्पिण्डसंयोगविनाश इत्यनयोर्न हेतुत्वं सहभावित्वात्।

[152] द्रव्यापेक्षाबुद्ध्योर्युगपद्विनाशादपि कथम्। यदैव परत्वाधारावयवे कर्मोत्पद्यते तदैवापेक्षाबुद्धिरुत्पद्यते, कर्मणा चावयवान्तराद्विभागः क्रियते, परत्वस्योत्पत्तिरित्येकः कालः। ततो [3]यस्मिन् कालेऽवयवविभागाद् द्रव्यारम्भकसंयोगविनाशः, तस्मिन्नेव काले परत्वसामान्यज्ञानमुत्पद्यते। तदनन्तरं संयोगविनाशाद् द्रव्यविनाशः, सामान्यबुद्धेश्चापेक्षाबुद्धेरपि विनाश इत्येकः कालः। ततो द्रव्यापेक्षाबुद्ध्योर्विनाशात् परत्वस्य विनाशः, प्रत्येकमन्यत्रोभयोरपि विनाशं प्रति कारणत्वप्रतीतेः। इह चान्यतरविशेषानवधारणादुभयोरपि विनाशं प्रति कारणत्वम्।

[प०] [152] परत्वाधारावयवे इति (कं. १७०.१०) परत्वस्याधारो द्वितन्तुकादिस्तस्यावयवौ। विनाशं प्रति कारणत्वप्रतीतेरिति (कं. १७०.१६) अत्र 'विनाशम्' इति परत्वविनाशम्।

[कु०]

विद्याविद्ये यस्य सेवामसेवां
चानुस्यातां जन्मभाजक्रमेण।
तस्मै श्लाघे नित्यविद्याविलास–
[4]श्री सोमैणां कावतंसावधाम्ने॥

---

१ काले विभागाद् –जे, व्यो(५१९) दे। २ बुद्धिविनाशात् –जे, दे। ३ यस्मिन्नेव काले – कं १, कं. २। ४ इदं कर्तुर्गुरोर्नाम ?–सं।

प्रशस्तपादभाष्यम्

[153] द्रव्यसंयोगविनाशादपि कथम् ? यदा [1]परत्वाधारावयवे कर्मोत्पन्नमवयवान्तराद्विभागं करोति तस्मिन्नेव काले पिण्डकर्मापेक्षाबुद्ध्योर्युगपदुत्पत्तिः, ततो यस्मिन्नेव काले परत्वस्योत्पत्तिस्तस्मिन्नेव काले विभागाद् द्रव्यारम्भकसंयोगविनाशः, [2]पिण्डकर्मणा च दिक्पिण्डविभागः क्रियत इत्येकः कालः। ततो यस्मिन्नेव काले सामान्यबुद्धिरुत्पद्यते, [3]तस्मिन्नेव काले द्रव्यारम्भकसंयोगविनाशात् पिण्डविनाशः, विनाशाच्च पिण्डसंयोगविनाशः, ततो गुणबुद्धिसमकालं [4]पिण्डसंयोगयोर्विनाशात् परत्वस्य विनाशः।

संयोगापेक्षाबुद्ध्योर्युगपद्विनाशादपि कथम् ? यदा परत्वमुत्पद्यते [5]तदैव परत्वाधारे कर्म, ततो यस्मिन्नेव काले परत्व[6]सामान्यज्ञानमुत्पद्यते, तस्मिन्नेव काले [7]पिण्डकर्मणा दिक्पिण्डविभागः क्रियते, ततः सामान्यबुद्धितोऽपेक्षाबुद्धिविनाशः, विभागाच्च दिक्पिण्डसंयोगविनाश इत्येकः कालः। ततः संयोगापेक्षाबुद्धिविनाशात् परत्वस्य विनाशः।

न्यायकन्दली

[153] द्रव्यसंयोगविनाशादपीत्यादि। [8]द्रव्यसंयोगविनाशादपि कथं विनाशः ? यदा परत्वाधारावयवे कर्मोत्पन्नमवयवान्तराद्विभागं करोति, तस्मिन्नेव काले पिण्डकर्मापेक्षाबुद्ध्योर्युगपदुत्पत्तिः, [9]ततो यस्मिन्नेव काले परत्वस्योत्पत्तिस्त[10]स्मिन्नेव कालेऽवयवविभागाद् द्रव्यारम्भकसंयोगविनाशः, पिण्डकर्मणा च [11]दिशः पिण्डस्य च विभागः क्रियत इत्येकः कालः। ततो यस्मिन्नेव काले सामान्यबुद्धिरुत्पद्यते तस्मिन्नेव काले द्रव्यारम्भकसंयोगविनाशात् पिण्डविनाशः, दिक्[12]पिण्डविभागाच्च दिक्पिण्डसंयोगविनाशः, ततो गुणबुद्धिसमकालं पिण्डदिक्पिण्डसंयोगविनाशात् परत्वस्य विनाशः। अपेक्षाबुद्धिविनाशस्तु न कारणम्, तदानीमेव सामान्यबुद्धेस्तस्य [13]भावात्।

[पं०] [153] [14]द्रव्यावयव इति (कं १७०.१९) परत्वाधारस्य द्रव्यस्य द्वितन्तुकपरादेरवयवे। पिण्डकर्मापेक्षाबुद्ध्योरिति (कं. १७० २०) परत्वाधारपिण्डकर्मणश्च अपेक्षाबुद्धेश्चेत्यर्थः। [15]यस्मिन् काले परत्वस्योत्पत्तिरिति (कं. १७०.२०) अवयवान्तराद्विभागकाले इति द्रष्टव्यम्। सामान्यबुद्धिरुत्पद्यते इति (कं. १७०.२२) परत्वबुद्धिरुत्पद्यते। [16]पिण्डसंयोगयोरिति = पिण्डश्च संयोगश्च पिण्डसंयोगौ तयोः पिण्डसंयोगयोः। अपेक्षाबुद्धिविनाशस्तु पुनः परत्वविनाशस्य

१ द्रव्यावयवे – दे। २ पिण्डकर्मणा दिक्पिण्डस्य च – कं. १, कं. २, कि। ३ तत्समानकालं संयोगविनाशात् – जे; तत्समकालं संयोगविनाशात् – व्यो (५१९) दे। ४ पिण्डदिक्पिण्डसंयोग – कं. १, कं. २, कि। ५ तदा – कं. १, कं. २ कि। ६ सामान्यबुद्धि – कं. १, कं. २। ७ पिण्डविभागः क्रियते – दे। ८ द्रव्यस्य संयोगस्य च विनाशादपि कथं विनाशः ? यदा द्रव्यावयवे – जे. १, जे. २, जे. ३। ९ यस्मिन्नेव – कं. १, कं. २। १० तस्मिन्काल – जे. २, जे. ३। ११ दिक्पिण्डस्य – कं १, कं २। १२ पिण्डविनाशाच्च पिण्डसंयोगविनाशः – कं. १; कं. २, कि। १३ सम्भवात् – क. १; कं. २। १४ परत्वाधारावयवे – कं। १५ यस्मिन्नेव – कं। १६ प्रतीकमिदं कन्दल्यां नास्ति – स।

प्रशस्तपादभाष्यम्

त्रयाणां समवाय्यसमवायि[1]निमित्तकारणानां युगपद् विनाशादपि कथम् ? यदापेक्षाबुद्धिरुत्पद्यते [2]तदैव पिण्डावयवेऽपि कर्म, ततो यस्मिन्नेव [3]काले कर्मणाऽवयवान्तराद्विभागः [4]क्रियते परत्वस्य चोत्पत्तिस्तस्मिन्नेव काले पिण्डेऽपि कर्म, [5]ततोऽवयवविभागात् पिण्डारम्भकसंयोगविनाशः, पिण्डकर्मणा च दिक्पिण्डविभागः क्रियते, सामान्यबुद्धेश्चोत्पत्तिरित्येकः कालः। ततः संयोगविनाशात् पिण्डविनाशः, विभागाच्च दिक्पिण्डसंयोगविनाशः, सामान्यज्ञानादपेक्षाबुद्धेर्विनाश इत्येतत् सर्वं युगपत्त्रयाणां समवाय्यसमवायिनिमित्तकारणानां विनाशात् परत्वस्य विनाश इति ॥

न्यायकन्दली

संयोगापेक्षाबुद्ध्योर्युगपद्विनाशादपि कथम्। यदा परत्वमुत्पद्यते [6]तदैव परत्वस्याधारे द्रव्ये कर्म, ततो [7]यस्मिन् काले [8]परत्वसामान्यज्ञानमुत्पद्यते परत्वस्याधारे, तस्मिन्नेव काले [9]पिण्डकर्मणा दिक्पिण्डविभागः क्रियते। ततः सामान्यज्ञानादपेक्षाबुद्धिविनाशो दिक्पिण्डविभागाच्च दिक्पिण्डसंयोगविनाश इत्येकः कालः। ततः संयोगापेक्षाबुद्धिविनाशात् परत्वस्य विनाशः। द्रव्यविनाशस्तु तदानीं नास्त्येवेति न तस्य हेतुत्वम्।

त्रयाणां समवाय्यसमवायिनिमित्त[10]कारणानां युगपद् विनाशादपि कथम् ? समवायि चासमवायि च निमित्तं च समवाय्यसमवायिनिमित्तानि, [11]तानि च कारणानि चेति समवाय्यसमवायिनिमित्तकारणानि द्रव्यसंयोगापेक्षाज्ञानानि, तेषां त्रयाणां युगपद्विनाशात् कथं परत्वस्य विनाश इति प्रश्ने कृते [12]सत्युत्तरमाह—यदेति। [13][यदाऽपेक्षाबुद्धिरुत्पद्यते

[पं०] न कारणमित्यर्थः। सामान्यबुद्धेरिति (कं. १७१.२) सामान्यबुद्धेः सकाशात्। तस्येति (कं. १७१.२) अपेक्षाबुद्धिविनाशस्य।

द्रव्यविनाशस्तु तदानीं नास्त्येवेति (कं. १७१.७) अवयवविभागाभावादिति भावः।

समवाय्यसमवायिनिमित्तकारणानि द्रव्यसंयोगापेक्षाज्ञानानीति (कं. १७१.१०) समवायिकारणं चैत्रमैत्रादिद्रव्यम्। असमवायिकारणं दिक्कालसंयोगः, निमित्तकारणमपेक्षाबुद्धिरित्यर्थः। [14]कर्मणेति पिण्डावयवकर्मणा। [15]पिण्डेऽपि कर्मेति

१ निमित्तानां—जे. व्यो(५२०) दे। २ तदा पिण्डावयवे कर्म—कं. १, कं. २; पिण्डावयवे कर्म—कि। ३ कालेऽवयवान्तराद्—जे. दे. व्यो (५२०)। ४ क्रियतेऽपेक्षाबुद्धेः—कं. १, कं. २। ५ ततो विभागात्—दे। ६ तदा—कं १, कं. २। ७ यस्मिन्नेव—कं. १, कं. २। ८ परत्वसामान्यबुद्धि—कं. १; कं. २। ९ बुद्धितो—कं. १, कं. २,। १० कारणानां विनाशादपि—कं. १, कं. २। ११ तान्येव—जे. १, जे. ३। १२ प्रत्युत्तर—कं. १, कं. २। १३ [ ] एतच्चिह्नान्तर्गतः पाठः कं. १, कं. २ पुस्तकयोर्नास्ति।

प्रशस्तपादभाष्यम्

[154] **बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः।**

**सा चानेकप्रकारा, अर्थानन्त्यात्प्रत्यर्थनियतत्वाच्च।**

न्यायकन्दली

तदैव पिण्डावयवेऽपि कर्म, ततो यस्मिन्नेव काले कर्मणाऽवयवान्तराद्विभागः क्रियते अपेक्षाबुद्धेश्च परत्वस्योत्पत्तिः तस्मिन्नेव काले पिण्डेपिकर्म। ततोऽवयवविभागात्पिण्डारम्भकसंयोगविनाशः, पिण्डकर्मणा च दिक्पिण्डविभागः क्रियते सामान्यबुद्धेश्चोत्पत्तिरित्येकः कालः। तदाऽऽरम्भकसंयोगविनाशात्पिण्डविनाशः, विभागाच्च दिक्पिण्डसंयोगविनाशः, सामान्यज्ञानाच्चापेक्षाबुद्धेर्विनाश] इत्येतत् सर्वं युगपद्भवति कारणयौगपद्यात्, ततश्च त्रयाणां समवाय्यसमवायिनिमित्तकारणानां विनाशात् परत्वस्य विनाश इति। परत्वस्य विनाश इत्युपलक्षणमिदम्। अपरत्वस्याप्ययमेव विनाशक्रमो [1]दर्शयितव्यः। [154] बुद्धिजे परत्वापरत्वे इति समर्थिते। अथ केयं बुद्धिरित्याह–[2]बुद्धिरित्यादि।

प्रधानस्य विकारो महदाख्यमन्तःकरणं चित्तापरपर्यायं बुद्धिः। [3]बुद्धेरिन्द्रियप्रणालिकया बाह्यविषयोपरक्तायास्तदाकारोपसंग्रहवती सत्त्वगुणाश्रया वृत्तिर्ज्ञानम्, प्राप्तविषयाकारोपग्रहायां बुद्धौ प्रतिबिम्बितायाश्चेतनाशक्तेस्तद्वृत्त्यनुकार उपलब्धिः।

[टि०] (॥ अथ बुद्धिनिरूपणम् ॥)

[154] [4]**बुद्धिरुपलब्धिः** इति एते पर्यायाः यद्विषयत्वेन रूढाः सा बुद्धिरिति पर्याय[5]लिङ्गकमनुमानं सूचितम्। [6]**प्रधानस्य विकार** इति साङ्ख्यमते हि प्रकृतिर्नाम प्रधानापरपर्यायं सर्वोत्पत्तिमत्कारणं प्रथमं [7]तत्त्वमभ्युपगच्छन्ति।

[पं०] पिण्डे परत्वाधारे। [8]**सामान्यबुद्धेरिति** परत्वबुद्धेः। [9]**तदारम्भकसंयोगविनाशादिति** पिण्डारम्भकसंयोगविनाशात्। [10]**विभागादिति** पिण्डविभागात्। इति परत्वापरत्व गुणविवरणम्॥

[154] अथ बुद्धिगुणे **बुद्धिजे** इति (कं. १७१.१७) अपेक्षाबुद्धिजे। [11]**इन्द्रियप्रणालिकयेति** (कं. १७१.१८) इन्द्रियद्वारेण। **तदाकारो**[12]**पग्रहवतीति** (कं. १७१.१९) विषयाकारोपसंग्रहवती। **सत्त्वगुणाश्रयेति** (कं. १७१.१९)

[कु०] [154] उद्देशक्रमानुसारेणैव बुद्धेः परत्वापरत्वानन्तर्ये सिद्धादेवागतो हेतुमद्भावोऽपि क्रमं प्रयोजयन्नपेक्षामर्हतीत्यभिप्रायवानाह–**बुद्धिजे** इति (कं. १७१.१७)।

---

१ दर्शयितव्यः। मङ्गलं महाश्रीः। शुभं भवतु लेखकपाठकश्रोतॄणाम् – जे. १। २ बुद्धिरूपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः – जे. १, जे. २, जे. ३। ३ बुद्धीन्द्रिय – कं. १, कं. २। ४ प्रतीकमिदं मु. पुस्तके नास्ति किन्तु – जे. १, जे. ३ इत्यत्रास्ति। ५ लिङ्गिक – अ, ब, क; ६ प्रधानस्य – अ, ब; ७ वस्त्व – ड; १४, १५, ८, ९, १० प्रतिकानि मूलकन्दल्यां नोपलभ्यन्ते; भाष्ये तु इमानि सर्वाणि प्रतीकानि सन्ति – सं। द्रष्टव्यानि प्र. भा. ५ १६७ पं. ४, ५, ७, ९ पं. १, २, ३ इत्यत्र तु संति। ११ बुद्धीन्द्रियप्रणालिकया – कं। १२ पग्रहवती – कं. १, कं २।

## न्यायकन्दली

तथा चाह स्म भगवान् पतञ्जलिः–"अपरिणामिनी हि भोक्तृशक्तिरप्रतिसङ्क्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुभवतीति" इति। भोक्तृशक्तिरिति चितिशक्ति-[1]रुच्यते, सा चात्मैव। परिणामिन्यर्थे इति बुद्धितत्त्वे प्रतिसङ्क्रान्तेवेति प्रतिबिम्बितेवेत्यर्थः। तद्वृत्तिमनुभवति बुद्धौ प्रतिबिम्बिता सती बुद्धिच्छायापत्त्या बुद्धिवृत्त्य[2]नुकारिणी-भवतीत्यर्थः। बुद्धेर्विषयः सुखाद्याकारः प्रत्ययः। तथा चाह–स एव भगवान् "शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति, अनुपश्यन्नतदात्मापि तदात्मक इव [3]प्रत्ययवभासते" इति।

एतत् सांख्यमतं निराकर्तुमाह–बुद्धिरित्यादि।

यस्या अमी पर्यायशब्दाः सा बुद्धिः। या पुनरियं प्रक्रियोपदर्शिता सा प्रतीत्य-भावादेव पराणुद्यते। विषयहानोपादानानुगुणमुत्पादव्ययधर्मकमेकम्, तदधिकरणं चापरम्, यस्य तदुत्पादात् प्रवृत्तिनिवृत्ती स्याताम्, इत्युभयं [4]प्रत्यात्ममनुभूयते, न प्रकारान्तरम्। या चास्या बुद्धेर्वृत्तिः सा किं बुद्धेरन्याऽनन्या वा? न तावदन्या, वृत्ति-

[टि०] [5]तद्विकारो महत्तत्त्वं, तस्य चान्तःकरणं चित्तं चेति पर्यायौ तद्विकार(रो)[ऽहङ्कार] तत्त्वम्। ततः पञ्च-तन्मात्राणि, [6]स्पर्शनादीनि पञ्चबुद्धीन्द्रियाणि, वाक्पाण्यादीनि पञ्च कर्मेन्द्रियाणि मनश्चेति। अत एव महदहङ्कार-सहितैर्बुद्धिकर्मेन्द्रियैस्त्रयोदशेन्द्रियाण्यु[7]पपद्यन्ते। ज्ञाननिरूपणमन्तरेणोपलब्धिर्निरूपयितु न शक्यत इति प्रथममेव

[पं०] सत्त्वस्य प्रकाशकत्वात् 'सत्त्वं लघु प्रकाशकम्' इति वचनात्। **तद्वृत्त्यनुकार** इति (कं. १७१.२०) बुद्धिवृत्त्यनुकारः। अपरिणामिनीत्यादि पातञ्जलसूत्रं व्याचष्टे **भोक्तृशक्ति**(कं. १७१.२२)रित्यादिना। **प्रतिबिम्बितेवेति** (कं. १७१.२४) अपरिणामित्वादिवशब्दप्रयोगात्। [त]द्वृत्तिमिति (कं. १७१.२४) बुद्धितत्त्ववृत्तिम्। **स एवेति** (कं. १७२.१) **पतञ्जलिः**। **बौद्धमिति** (कं. १७२.२) बुद्धेर्भवम्।

**पराणुद्यत** इति (कं. १७२.५) क्षिप्यते। यदीयं साङ्ख्योक्ता प्रक्रिया प्रतीत्यभावात् पराणुद्यते तर्हि किमनुभूयते इत्याह **विषयेत्यादि** (कं. १७२.५)। **एकमिति** (कं. १७२.६) ज्ञानम्। **अपरमिति** (कं. १७२.६) आत्मरूपम्।

[कु०] वैधर्म्यप्रतिपादनावसरे पर्यायपाठः किमर्थ इत्यत आह **प्रधानस्येति** (कं. १७१.१८)

[8]**इत्येतत् साङ्ख्यमतं निराकर्तुमिति** (कं. १७२.३)। पर्यायत्वेऽर्थभेदानुपपत्तेरित्यर्थः। प्रतीत्यभावः कथमित्य-(तीत्य)त आह–**विषयहानेति** (कं. १७२.५)। **त्रिचतुरादिप्रत्ययो दुर्लभ** इति (कं. १७२.९) वृत्तीनामभिन्नप्रवृत्ति-

१ रिष्यते–जे. १। २ नुकारवती–जे. १, जे. २, जे. ३। ३ प्रतिभासते–जे. १, जे. ३। ४ प्रत्यात्मकम् –जे. २, जे. ३। ५ तद्विकारमहत्वं–अ, ब, क; ६ स्पर्शादीनि–अ, स्पर्शदीनानि–ब, ७ पपद्यते–ड, ८ एतत्।

### न्यायकन्दली

वृत्तिमतोरैकान्तिकतादात्म्याभ्युपगमात्। अथानन्या, तदा बुद्धेरेकत्वे [1]विषयाकारवतीनां तद्वृत्तीनामप्येकत्वात् त्रिचतुरादिप्रत्ययो दुर्लभः, परस्परविलक्षणाकारसंवेदनाभावाद् बुद्ध्यारूढाकारमात्रवेदित्वाच्च पुरुषस्य। यथोक्तम्–'बुद्धेः प्रतिसंवेदी पुरुष' इति। वृत्तीनां वा नानात्वे बुद्धेरपि नानात्वादेकत्वव्याघात [2]इत्यादिकं दूषणमूह्यम्।

बुद्धेर्भेदं निरूपयति–सा चानेकप्रकारेति। अत्र कारणमाह–अर्थानन्त्यादिति। यदि नामार्थस्य विषय[3]स्यानन्तत्वं बुद्धेरनेकविधत्वे किमायातम्? तत्राह–प्रत्यर्थनियतत्वाच्चेति। प्रत्यर्थं प्रतिविषयमस्मदादिबुद्धयो नियताः, अर्थाश्चानन्ता इति प्रत्येकं [4]तत्र नियता बुद्धयोऽप्यनन्ताः। [5]यदपि क्वचिदनेकार्थविषयमेकं विज्ञानं तदपि तावदर्थनियतत्वात्तदर्थाद्विज्ञानान्तराद्विलक्षणमेवेत्यदोषः।

[टि०] ज्ञानं निरूपयति [6]बुद्धिरिन्द्रियेति [7]बुद्धेः [8]'विषयाकारपरिणतेन्द्रियाकारपरिणताया विषयाकारोपग्रहवती वृत्तिर्व्यापारः परिणाम इत्यर्थः। वृत्तीनामनेकत्वात्तदाकारो[9]पग्रहवतीति विशेषणम्। चेतनाशक्तेः इति। चेतनेव शक्तिरात्मेत्यर्थः। [10]प्रतिबिम्बतेव इति–सा ह्यप्रतिसङ्क्रमा अप्रतिबिम्बा परं तद्वदवभासते। ननु बुद्धिर्माज्ञासीत् पुरुषस्तु ज्ञास्यतीत्याह बुद्ध्यारूढाकारेतिः–स्वातन्त्र्येणावे[11]दित्वात्। ननु किंशुकाशोकचम्पकाद्यालम्बनमेकमेव समूहज्ञानम[12]स्तीत्याह [13]यद्यपि क्वचिद् इति। तावत्स्वेवार्थेषु नियतत्वात्।

[पं०] तदुत्पादादिति (कं. १७२.६) ज्ञानोत्पादात्। साङ्ख्यमतं दूषयति या चास्या (कं. १७२.७) इत्यादिना। [वृत्ति]-वृत्तिमतोरैकान्तिकतादात्म्याभ्युपगमादिति (कं. १७२.८) साङ्ख्यैर्वृत्तिवृत्तिमतोः सर्वथा तादात्म्यमभ्युपगम्यते इत्यर्थः। एकत्वव्याघात इति (कं. १७२.१२) भवन्मतोक्तस्य बुद्ध्येकत्वस्य विरोधः।

[14]क्वचिदनेकार्थविषयमेकं ज्ञानमिति (कं. १७२.१७) यथाऽशोककिंशुकचम्पकादिद्रुमसमूहरूपं वनज्ञानम्। अतावदर्थादिति (कं. १७२.१८) अतावदर्थात्। विज्ञानान्तरादिति (कं. १७२.१८) एकवस्तुविषयाज्ज्ञानात्।

[कु०] महदात्मतया परस्परतो भेदाभावत् पुरुषस्य भेद इत्यनुकारो दुर्लभ इत्यर्थः। [15]इत्यादिकमिति (कं. १७२.१२) प्रकृतेः परिणामिस्वभावत्वं तत्परिणामे वा कर्तुरेव भोगे मोक्षानुपपत्तिः। अपरिणामित्वे संसारानुपपत्ति इत्यादिकं प्रक्रियादूषणमादिग्रहणेन सङ्गृह्यते।

प्रत्येकं तत्र [16]नियता बुद्धयोऽप्यनन्ता इति (कं. १७२.१७) अर्थभेदा इयन्तः, बुद्धिभेदो मानसप्रत्यक्षसिद्ध इत्यर्थः।

---

१ तदाकारवतीनां – जे. १। २ इत्यादि – कं. १, कं. २। ३ स्यानन्त्यं – जे. १ जे. ३। ४ तत्र बुद्धयोः – कं. १, कं. २। ५ यदि क्वचिदनेक – कं. १, कं. २। ६ बुद्धीन्द्रियाणि मु. बुद्धेः – जे. १, जे. ३। ७ बुद्धि – अ, ब, क; ८ परिणतेन्द्रियाकार इत्यावृत्तम् अपुस्तके; ९ तदकार – ड; १० प्रतिबिम्बि च इति – अ, ब; ११ वेदितत्वात् – अ, ब, क; १२ समस्ती – ड; १३ यदि – मु.; यद्यपि – अ, ब; यदपि – जे. १, जे. ३; १४ क्वचिदनेकविषये – कं। १५ इत्यादि – कं। १६ 'नियता' कं पुस्तके नास्ति।

प्रशस्तपादभाष्यम्

[155-156-157] तस्याः सत्यप्यनेकविधत्वे समासतो द्वे[1] विधे–विद्या चाविद्या चेति।

तत्राविद्या चतुर्विधा–संशयविपर्ययानध्यवसायस्वप्नलक्षणा।

संशयस्तावत् प्रसिद्धानेकविशेषयोः [2]सादृश्यमात्रदर्शनादुभयविशेषानुस्मरणादधर्माच्च [3]किंस्विदित्युभयावलम्बी विमर्शः [4]संशयः।

न्यायकन्दली

[155] बुद्धेर्विषयभेदेन सत्यपि भेदे संक्षेपतो द्वैविध्यमाह–तस्या इति। निःसन्दिग्धाबाधिताध्यवसायात्मिका प्रतीतिर्विद्या, तद्विपरीता चाविद्येति। [5]अर्थप्रतिपादनमात्रस्य विवक्षितत्वात् पश्चादुद्दिष्टामप्यविद्यां प्रथमं कथयति–तत्रेति। तयोर्विद्याविद्ययोर्मध्ये अविद्या चतुर्विधा चतुष्प्रकारा संशयविपर्ययानध्यवसायस्वप्न[6]लक्षणा।

नन्वविद्या चतुर्विधेति परिसंख्यानानुपपत्तिः, [7]ऊहस्य तर्कज्ञानस्यापि सम्भवात्। अनुभूयते ह्यन्तरा संशयं निर्णयं च तर्कः। तथाहि–उत्पत्तिधर्मक आत्मेत्येके। अनुत्पत्ति-

[टि०]  [ ॥ बुद्धिप्रकरणे सामान्यतो विद्याऽविद्याभेदनिरूपणम् ॥ ]

[155] निःसन्दिग्धेति :–संशयविपर्ययानध्यवसायानां क्रमेण व्यवच्छेदः। [8]अयथार्थस्य स्वप्नज्ञानस्याप्येतावतैव व्यवच्छेदः [9]यथार्थं तु विद्यैवेति :–एतेन यथार्थज्ञानं विद्या अयथार्थमविद्येति लक्षणे सूचिते। यावच्चाव्यतिरेकित्व-

[पं०] [155] उत्पत्तिधर्मक इति (कं. १७३.३) ज्ञानक्षणानामुत्पत्त्यनिरोधकत्वात्। अनेकशरीरादि[सं]योगलक्षण (कं. १७३.५) इत्यत्र आदिशब्दादिन्द्रियादिपरिग्रहः। संसार इति परलोक इत्यर्थः। भवितव्यमिति (कं. १७३.७) इत्येवंरूपस्तर्कः।

[कु०] [155] ननु यद्यनन्ता बुद्धयस्तर्हि तद्भेदो [10]दुर्वत? (दुर्लभ?) इति शङ्कामपनयन् भाष्यमवतारयति बुद्धेरिति (कं. १७२.२२)। [11]संक्षेपत इति (कं. १७२.२३)। धर्मान्तरोपसङ्ग्रहेणेत्यर्थः। अबाधितेत्य[त्र](त्रा)बाधितविपर्ययस्वप्नयोर्व्यवच्छेदः। व्यवसायात्मकपदेनोहानध्यवसाययोः। अत्र प्रतिपादनमात्रस्येति (कं. १७२.२५) संसारहेतुभूताविद्यानिवृत्तये शास्त्रं विद्यामुत्पादयति तदुत्पादनं च निवर्त्यं ज्ञानान्तरमेव कर्तव्यमित्यस्यार्थस्य प्रतिपादनं विवक्षितमिति भावः।

ननु भवतूहः संशये निर्णये वाऽन्तर्भविष्यतीत्यत आह अनुभूयते हीति (कं. १७३.२)। न तावदयं संशयः, कोटिद्वयानुल्लेखात्; न च निर्णय एवमेवेत्यनुदयात्। तथात्वे वा प्रमाणान्तरं नोपदिश्येतेति भावः। एतदेव दर्शयितु-

१ द्विविधा–जे.। २ विशेषादर्शनादुभयविशेषानुस्मरणाद्–जे.। ३ किं स्यादिति–जे.। ४ संशय इति–दे। ५ अत्र–कं. १, कं. २। ६ स्वभावा–जे. १, जे. २। ७ ऊहज्ञानस्यापि–जे. १, जे. २, जे. ३। ८ अयथार्थस्वप्नज्ञानस्य – अ, ब, क; ९ प्रतीकमिदं मु. पुस्तके नास्ति। १० अस्पष्टोऽर्थः। ११ संक्षेप–MS।

न्यायकन्दली

धर्मक इत्यपरे। ततो विप्रतिपत्तेः किंस्विदयमुत्पत्तिधर्मा आहोस्विदेवं न भवतीति संशये [1]विचारात्मकस्तर्कः प्रवर्तते। यद्ययमुत्पत्तिधर्मकः तदेकस्यानेकशरीरादि[2]संयोगलक्षणः संसारस्तदत्यन्तविमोक्षलक्षणश्चापवर्गो [3]नोपपद्यते। अनुत्पत्तिधर्मके तु ज्ञातरि स्यातां संसारापवर्गावित्यनुत्पत्तिधर्मकेणानेन भवितव्यमिति।

किमस्य सम्भावनाप्रत्ययस्य प्रयोजनम्? तत्त्वज्ञानमेव, प्रतिपक्षनिश्चयवत्प्रतिपक्ष-संशयेऽपि हि हेतोरप्रवृत्तिरेव, वस्तुनो द्वैरूप्याभावात्। यथाहुर्भट्टमिश्राः—

यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते।
विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबलम्॥ इति।

[टि०] मित्यादि:–[4]अस्य हेतोर्विपक्षेऽव्यतिरेकित्वमनिवृत्तिरित्यर्थः। प्रमाणस्य[5]करणत्वेन इति–इति कर्तव्यतासाहायक-सम्पतिविशेषः। [6]न प्रसङ्गो हेतुः इति प्रसङ्गो हेतुर्न भवति आश्रयासिद्धिस्वरूपासिद्धयादिदोषात्। यदा द्वयस्य सत्त्वमुपलम्भेन [7]व्याप्तमिति व्याप्त्यस्वीकारेणानिष्टव्यापकप्रसञ्जनमत्र हेतुर्न भवति। विवादाध्यासितो घटोऽस्मदा-द्युपलम्भविषयो दर्शनयोग्यः, उपलम्भ[8]कारणसद्भावे सत्त्वादिति। (अत्र ह्यसति घटे सत्त्वेन प्रसञ्जिते वास्तवं सत्त्वप्रसिद्धमेव)।

[पं०] परः पृच्छति किमस्येत्यादि (कं. १७३.७)। सम्भावनाप्रत्ययस्येति (कं. १७३.७) ऊहस्य सूरेः पुनरुत्तरं तत्त्वज्ञानमेवेति (कं. १७३.८) प्रतिपक्षनिश्चये सति हेतोरप्रवृत्तिः। द्वैरूप्याभावादिति (कं. १७३.९) संशये हि द्वैरूप्यं भवति। यावच्चेत्यादि (कं. १७३.१०) श्लोके विपक्षस्य अव्यतिरेकित्वमिति पदसम्बन्धः। अव्यतिरेकित्वमिति (कं. १७३.१०) [9]अनिवृत्तिरव्यावृत्तिरिति यावत्।

[कु०] मुदाहरति तथाहीति (कं. १७३.२)। एवं तावत्प्रत्यक्षसिद्धंत्र(?)हो विधान्तरेष्वनन्तभंवन् सर्वोर्थोपदेश-प्रवृत्तेनाचार्येणोपदेष्टव्य इति सिद्धेऽपि प्रसङ्गावस्य प्रयोजनं प्रश्नपूर्वकं व्युत्पादयति [10]किमस्येदमिति (कं. १७३.३)।

ननु प्रमाणकार्ये तत्त्वज्ञाने कोऽस्योपयोग इत्यत आह प्रतिपक्षेति (कं. १७३.८)। विपक्ष[11]संशयामुच्छेदहेतोरप्रवृत्तौ, अभियुक्तवाक्यं यावच्चेति (कं. १७३.१०)। विपक्षस्य साध्यविपर्ययस्य, अव्यतिरिक्तत्वं सम्भवो यावच्छक्यते तावद्धेतोर्गमनिका बलम् साध्यसाध्यसाध(ना)य प्रवृत्तिः कुत इत्यर्थः।

---

१ सम्भावनात्मकः – जे. १, जे. ३। २ योग – जे. १। ३ नोत्पद्येते। ४ अस्यतो – अ; ५ करणस्य कारणत्वेन–अ; ६ प्रसङ्गहेतु–अ, ब, क; ७ व्याप्तव्याप्य–अ; ८ करणसद्भावे च–ड; ९ निवृत्ति०–ब। १० किंस्विदय–कं। ११ प्रशसायार–?

न्यायकन्दली

अनेन तूत्पत्तिधर्मकत्वं व्युदस्यानुत्पत्तिधर्मकत्वं [1]सम्भावयता विषये विवेचिते सत्यसत्प्रतिपक्षत्वादनुमानं प्रवर्तते इति विषयविवेचनद्वारेण प्रमाणानुग्राहकतया तर्कस्तत्त्वज्ञानाय घटते, प्रमाणस्य करणत्वेनेतिकर्तव्यतास्थानीयतर्कसहायस्यैव स्वकार्ये पर्यवसानात्। नह्यनपेक्षितदृढमुष्टिनिपीडितो जालमकरपञ्जरोदरे विलुठन्नपि कठोरधारः कुठारः प्रतितिष्ठति [2]अनिष्ठुरस्यापि काष्ठस्य [3]छेदाय। तथा चोक्तम्--

नहि तत्करणं लोके वेदे वा किञ्चिदीदृशम्।
इतिकर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता।। इति।

यदि पुनरेवं तर्को नेष्यते परस्यानिष्टापादनरूपः प्रसङ्गोऽपि नाभ्युपगन्तव्यः स्यात्? स हि तर्कादनतिरिच्यमानात्मा, अस्ति च वैशेषिकाणामपि प्रसङ्गः, न प्रसङ्गो हेतुराश्रयासिद्धतादिदोषात्।

[पं०] अनेनेति (कं. १७३.१२) तर्केण। इतिकर्तव्यतेति (कं. १७३.१४) इतिकर्तव्यता [4]कुठारेण दृढमुष्टिनिपीडनादिकव्यापारः। प्रतितिष्ठतीति (कं. १७३.१६) प्रभवति।

वैशेषिकाणामपीति (कं. १७३.२१) न केवलं सौगतानाम्। [5]न च प्रसङ्गो हेतुरिति (कं. १७३.२२) प्रसङ्गो यथा 'सामान्यमनेकं प्राप्नोति, अनेकवृत्तित्वात् अनेकभाजनगततालफलवत्' इति बौद्धोक्ते वैशेषिकः प्राह यत्सामान्यमनेकवृत्तित्वस्याश्रयस्त्वया कथ्यते, तत्तावत् प्रतीत[म]प्रतीतं वा? प्रतीतं चेत् क्षणो वादः, अप्रतीतं चेदाश्रयासिद्धिः एवमाश्रयासिद्धिसम्भवात् अयं प्रसङ्गो हेतुर्न भवति किन्तु तर्कात्मैव तस्माद्भो वैशेषिक कथं प्रसङ्गम्, अङ्गीकरोषि न तर्कमिति परस्याशयः।

[कु०] असत्प्रतिपक्षत्वादिति (कं. १७३.१३) प्रतिपक्षसंशयोच्छेदादित्यर्थः। ननु निश्चयादेव संशयव्युच्छेदः। तत्र निश्चये प्रमाणंसामर्थं(र्थ्यं)? समर्थं वा उभयथापि तर्कस्यानुपयोग इत्यत आह प्रमाणस्येति (कं. १७३.१४)। सत्यं समर्थं तच्च सामर्थ्यं तर्कसहकृतस्यैवेति भावः। [7]नैवमिति तर्कव्यदान्तासापेक्षत्वं प्रमाणस्यैव। किन्तु कारणमात्रस्येत्याह [8]नहि तदिति।

तर्कानङ्गीकारे प्रसङ्गहेतुः किमिति नाभ्युपगन्तव्य इत्यत आह स हीति (कं. १७३.२१) ननु यदि प्रसङ्गहेतुस्तर्कात्मा[न]तिरिच्यते तर्हि किं भवतामपि सोऽभिमतः येन तर्कमङ्गीकुर्वन्तीत्यत आह अस्ति चेति (कं. १७३.२१)।

---

१ सम्भावयिता—कं. १, कं. २। २ निष्ठुरस्यापि—कं. १, कं. २। ३ छिदायै—जे. १, जे. २, जे. ३। ४ कुठारादिव्यापारेण। ५ न प्रसङ्गो—कं. १, कं. २। ६ सिद्ध्युपलम्भयो—कं। ७, ८ इमे प्रतीके मु. कं पुस्तके नस्तः।

## न्यायकन्दली

[156] अत्रोच्यते–किं परपक्षाभावप्रतीतिस्तर्कः? किं वा स्वपक्षसम्भावना? आद्ये [1]पक्षे प्रमाणमेवेदम्, ज्ञातुरनित्यत्वे संसारापवर्गयोरसंभव इति ज्ञानं यद्यप्रमाणम्, नास्माद्विपक्षाभावसिद्धिः, [2]अप्रमाणेन कस्यचिदर्थस्य सिद्धेरयोगादि[3]त्यत्रानुमानस्याप्रवृत्तिरेव विषयविवेकाभावात्। अथ सिद्ध्यत्यस्माद्विपक्षाभावस्तदा प्रमाणमिदं प्रत्यक्षादिषु कस्मिंश्चिद[4]न्तर्भविष्यति, तद्व्यतिरेकेणान्यस्य प्रतीतिसाधनाभावादित्यकामेनाभ्युपगन्तव्यम्। प्रसङ्गोऽपि विरोधोद्भावनम्, तच्च कस्यचिद् बलीयसो विपरीतप्रमाणस्योपदर्शनम्। कस्तत्र विपरीतात् प्रमाणात् तदुपदर्शकाच्च वचनादन्यस्तर्कः?

[टि०] [156] परपक्षाभावेति प्रतीतिः [5]फलरूपा तर्कस्तस्याः [6]करणं प्रमाणमपि तर्कः। [7]अनुमानस्याप्रवृत्तिः इति–अनुमानस्योत्तरकालभाविन 'आत्माऽनुत्पत्तिधर्मकः निरवयवत्वादाकाशवद्' इत्येतस्य। [8]तद्व्यतिरेकेणेति प्रत्यक्षादिप्रमाणव्यतिरिक्तं ह्यबाधितानुभवरूपप्रतीतिसाधनं नास्ति। नन्वयमप्रमाणरूपोऽतिप्रसङ्गरूपः सन् प्रमाण[9]मनुगृह्णातीत्याह प्रसङ्गोऽपि इति। अनुजानात्ययम् इति विपक्षनिषेधेनैक[10]कोटीच्छाप्राबल्यमनुज्ञा। [11]सिद्धान्तबाधाह न योग्यता इति:–योग्यता ह्यवधारयत्येवेति। ननु यदि योग्यतामवधारयति ततः किमित्याशङ्क्य प्रमाणत्वं दर्शयन्नाह यत्र

[पं०] [156] अत्रोच्यते इति (कं. १७३.२२) श्रीधरेण। प्रमाणमेवेदमिति (कं. १७३.२३) इदं तर्कज्ञानम्। अनित्यत्वे इति (कं. १७३.२३) उत्पत्तिधर्मकत्वे। कस्यचिदर्थस्य सिद्धेरिति (कं. १७३.२४) विपक्षाभावसिद्धेः अनुमानस्येति विषयविवेकोत्तरकालीनस्य विषयविवेकाभावादिति (कं. १७३.२५) विषये हि विवेचिते सति अनुमानं [प्र]वर्तते। तद्व्यतिरेकेणेति (कं. १७४.१) प्रत्यक्षादिव्यतिरेकेण। अकामेनापीति (कं. १७४.१) अनिच्छतापि।

अथ स्वपक्षसम्भावनात्मकः प्रत्ययस्तर्कं (कं. १७४.३) इत्यतः पुरस्तदेत्यध्याहार्यम्। अस्योत्पत्तौ (कं. १७४.४) इत्यत्र अस्य तर्कस्य। न तावत्स्वपक्षसाधकं प्रमाणम् (कं. १७४.४) इत्यत्र तावत्स्वपक्षसाधकं प्रमाणं न कारणमिति

[कु०] [156] अत्रोच्यत इति (कं. १७३.२२) सत्यमस्त्येव तर्कः तस्योक्तास्तु विधास्वन्तर्भाव उच्यते इत्यर्थः। अनायं विवेकः, ऊहस्य तावत्कारणमभ्युगममात्रसिद्धो हेतुस्वरूपं च भवेदित्येवमविद्यमानस्यानिष्टस्य ज्ञानम्। एवं चाहार्यारोपतया ऊहो न विपर्यय एव स वा(ह)[ऽवि]द्यासु परिगणित एव। तस्मान्न पृथगुपदेष्टव्य इति स्थिते आचार्यस्तर्कफलस्य प्रमाणानुग्रहस्य तर्कादभेदमनुग्राह्यानुग्राहकयोश्चाभेदं विवक्षात् प्रमाणेऽन्तर्भावयति किं परपक्षाभावेति (कं. १७३.२२)। यद्यप्यनियतकोटिजिज्ञासोत्पाद[न]मेव मुख्यं फलं तथाप्यानन्तर्यादनियतकोटिजिज्ञासाभ्युदासोऽपि फलमेवेति विकल्पो नानुपपन्नः। संसारापवर्गयोरसम्भव इति (कं. १७३.२३) ज्ञानमिति–तयोरसम्भवाज्ज्ञातुरनित्यत्वं जिज्ञासायोग्यं न भवतीति ज्ञानं तच्च प्रमाकरणोपकारकतया तदंशत्वात्तत्रान्तर्भवतीत्यर्थः। [12]प्रत्यक्षाविति (कं.

---

१ कल्पे–जे. १, जे. २, जे. ३। २ अप्रमाणात्–जे. १, जे. ३। ३ दित्यत्रास्य–कं. १, कं. २। ४ दनुप्रविशति–जे. १, जे. २, जे. ३। ५ फलरूपा–अ, ब; ६ कारणं–अ, ब, क; ७ अस्याप्रवृत्तिः मु; अनुमानस्याप्रवृत्तिः (३) पा. टि. जे. १, जे. ३। ८ तस्य–अ, ब; ९ मनुगृह्णती–अ; १० कोटीष्टा प्रारब्ध–अ, ब, क; ११ सिद्धंत–अ; १२ प्रत्यक्षादिषु–कं।

### न्यायकन्दली

अथ स्वपक्षसम्भावनात्मकः प्रत्ययस्तर्कः? अस्योत्पत्तौ किं कारणम्? न तावत्स्वपक्ष[1]साधकं प्रमाणम्, तस्याप्रवृत्तेः। तर्केण विवेचिते विषये स्वपक्षसाधकं प्रवर्तते। तदेव यदि तस्य कारणम्, सुव्यक्तमन्योन्याश्रयत्वम्।

विपक्षाभावे प्रतीते स्वपक्षसम्भावनोपजायत इति विपक्षाभावप्रतीतिरस्य कारणमिति चेत्? तर्हि विपक्षा[2]भावप्रतीतिलिङ्गकमनुमानमेवैतत्, परस्परविरुद्धयोरेकप्रतिषेधस्येतरविधिनान्तरीयकत्वात्। भवत्येवं यदि विषयमवधारयत्येवमेवेदमिति।

[टि०] [3]**विपक्षाभाव** इति अन्वयव्यतिरेकदर्शी प्रमाता। एतदनुत्पत्तिधर्मकत्वम्। [4]**सिद्ध्युपलम्भयोः** इति – विधिनिषेधयोरित्यर्थः। ननु [5]सम्भावनात्मकस्य तर्कस्य योग्यतामन्तरेणाप्यनुत्पत्तिधर्मकत्वसाधनस्य [6]विषयविवेककरणेनैवोपयोगोऽस्तीत्येतदाशङ्क्याह **विषयविवेकस्यापि** इति – प्राणिनां संसारापवर्गप्रतिपादकमागमादिकं भवदभ्युपगत सम्भावनाज्ञानजनकं यद् बाधकं प्रमाणं [7]तेनैव [8]विषयविवेकः सिद्ध इति किमन्तर्गडुना सम्भावनामात्रेणेति भावः।

॥ विद्याऽविद्या सामान्यतो भेदनिरूपणम् ॥

[पं०] पदघटना। **तस्याप्रवृत्तेरिति** (कं. १७४.४) तस्या प्रमाणस्याद्यापि अप्रवर्तनादित्यर्थः। **तदेवेति** (कं. १७४.५) स्वपक्षसाधनम्। **सुव्यक्तमन्योन्याश्रयत्वमिति** (कं. १७४.५) तर्केण विवेचिते विषये स्वपक्षसाधनं प्रवर्तते। स्वपक्षसाधनाच्च तर्क इती[तरे]तराश्रयदोषप्रसङ्गः।

**अस्येति** (कं. १७४.७) तर्कस्य। **अनुमानमेवैतद्** (कं. १७४.७) एतत्तर्कज्ञानम्। **एकप्रतिषेधस्येति** (कं. १७४.८) विपक्षनिषेधस्य। **इतरविधि नान्तरीयकत्वादिति** (कं. १७४.८) सपक्षविधानाविनाभावित्वात्। परवाक्यं **भवत्येवम्** (कं. १७४.८) इत्यादि। **अवधारयतीति** (कं. १७४.८) अत्र तर्कः कर्ता। **एवमेवेदम्** (कं. १७४.९) इत्यस्मात् पुरः किन्तु इत्यध्याहार्यम्। **अनुजानातीति** (कं. १७४.९) विपक्षनिषेधेन एककोटीस्थाप्राबल्यमुत्पादयति इत्यर्थः। सूरिवाक्यं **न योग्यतावधारणादित्यादि** (कं. १७४.११)। अन्यतरपक्षोपपत्तिरिति (कं. १७४.१२) सपक्षोपपत्तिः।

[कु०] १७३.२६) यत्परपक्षाभावग्राहक प्रत्यक्षमनुमानं वा तदुपकारस्तत्फलं तत्रैवोपकार्येऽन्तर्भवतीत्यर्थः। अमुं च ये प्रमाणानुग्राहकस्तर्क इति वदन्ति तान् प्रति; ये तु प्रसङ्गं स्वतंत्रसाधनं वदन्ति तान्प्रति कथमन्तर्भाव इत्यत आह **प्रसङ्गोऽपीति** (कं. १७४.१)। **विपरीतप्रमाणस्योपदर्शनमिति** (कं. १७४.२) विपरीतप्रमाणोपदित्सोत्पादनमिति तच्च तदुपकारकतया तत्रान्तर्भवतीत्यर्थः।

**अथेति** (कं. १७४.३)। स्वाक्षनियतायाः जिज्ञासाया उत्पादनमित्यर्थः। स्वपक्ष[9]सम्भावना या कारणान्तराभावेन तर्कफलत्वं दर्शयति [10]**तस्योत्पत्ताविति** (कं. १७४.४)। **सुव्यक्तमिति** (कं. १७४.५) प्रमाणस्योपदर्शनमिति विपरीतप्रमाणत्वाकारणत्वान्योन्याश्रयत्वात्तर्कफलस्य सतस्तनुप्रवेशोऽन्याय्य इत्यर्थः।

---

१ साधनं – जे. १, जे. २, जे. ३। २ भावलिङ्गक – कं. १, कं. २। ३ विपक्षोऽभाव – अ, ब। ४ सिद्धपालम्भयोः – ड। ५ सम्भवना – ड। ६ साधनस्य विवेककरणे – अ। ७ तेनैव विवेकः – अ, ब, क। ८ साधनस्य विवेककरणे – अ। ९ सम्भनीवा–MS; सम्भावना–कं.। १० अस्योत्पत्तौ – कं.।

५२

न्यायकन्दली

अनुजानात्ययमेकतरधर्मं न त्ववधारयति । न चायं संशयोऽपि, उभयकोटिसंस्पर्शाभावात् । किन्तु संशयात् प्रच्युतो निर्णयं चाप्राप्तः सम्भावनाप्रत्ययोऽन्य एव । तथा च लोके वक्तारो भवन्ति–[1]एवमहं तर्कयामीति । न, योग्यतावधारणाद्यत्र विपक्षाभावस्तत्रान्यतरपक्षोपपत्तिः, यत्र तु तस्य सम्भवस्त[2]त्रानुपपत्तिरित्यन्वयव्यतिरेकदर्शी विपक्षाभावं प्रतिपद्यमानः सम्भावयत्ययमनुत्पत्तिधर्मको भविष्यतीत्यस्मिन्नर्थे प्रमाणमेतत्प्रतिपादनाय योग्योऽयमर्थ इति प्रमाणयोग्यतां विषयस्याध्यवस्यतीति अनुमानमेव । इत्थमेव च प्रमाणमनुगृह्णाति, योग्यताप्रतीतेः प्रमाणप्रवृत्तिहेतुत्वात् । अन्यथा पुनरिदं सम्भावनामात्रमनर्थकमेव, स्वयमप्रमाणस्य सिद्ध्युपलम्भयोरनङ्गत्वाद्विषयविवेकस्यापि विपक्षाभावं प्रतिपादयता बाधकप्रमाणेनैव कृतत्वात् ।

[पं०] **तस्येति** (कं. १७४.१३) विपक्षस्य । **अन्वयोव्यतिरेकदर्शीति** (कं. १७४.१३) तर्कः । **एतत्प्रतिपादनायेति** (कं. १७४.१४) अनुत्पत्तिधर्मकत्वकथनाय । **प्रमाणमनुगृह्णातीति** (कं. १७४.१५) अत्र तर्कः कर्ता, प्रमाणमिति भविष्यदनुमानम् । **योग्यताप्रतीतेः प्रमाण[प्र]वृत्तिहेतुत्वादिति** (कं. १७४.१६) तर्कात् योग्यताप्रतीतिस्ततश्च प्रमाणप्रवृत्तिः । [3]**सिद्ध्युपालम्भयोरिति** (कं. १७४.१७) विधिनिषेधयोः । न तु सम्भावनात्मकस्य तर्कस्य योग्यतावधारणमन्तरेणापि अनुत्पत्तिधर्मकत्वसाधनस्य विवेककरणेनैवोपयोगोऽस्तीत्येतदाशङ्क्याह – **विषयेत्यादि** (कं. १७४.१७) । प्राणिनां संसारापवर्गप्रतिपादकमागमादिकं भवदभ्युपगतसम्भावनाज्ञानजनकं यद्बाधकं प्रमाणं तेनैव विषयविवेकः सिद्धः । तस्मादयोग्यताऽवधारणमात्रफलस्तर्को न विषयविवेकफल इति वाक्यार्थः ।

[कु०] **विपक्षाभाव[4]लिङ्ग इति** (कं. १७४.७) तत्साध्यस्य विपक्षोच्छेदस्य कार्यभूता स्वपक्षजिज्ञासा तर्कस्यैव फलमित्यर्थः । अनुग्रहस्यानुग्राह्यापेक्षयोक्तमन्तर्भावमजानानश्चोदयति **भवत्येवमिति** (कं. १७४.८) । उक्तं स्मारयन् परिहरति **योग्यतावधारणादिति** (कं. १७४.११) । न मया तर्कस्य मुख्यं प्रमाणमुक्तं कितूपकार्योपकारकद्योतयोरभेदविवक्षयेति भावः । **अस्मिन्नर्थ इति** (कं १७४.१४) अस्मिन्नर्थे प्रमाणानुग्राह[क]प्रमाणं कारण तर्क इत्यर्थः । **अनुमान[मे]वेति** (कं. १७४.१५) विच्छिन्नविपक्षे (छ)स्वस्य स्वपक्षजिज्ञासैव प्रमाणमनुगृह्णातीत्यर्थः । **अन्यथेति** (कं. १७४.१६) अनुभवानङ्गीकार इत्यर्थः । प्रमाणानुग्रहस्तर्कस्य कार्यं न भवति किन्तु विषयविवेक इत्यत अविवेकविषयस्यापीति **बाधकप्रमाणेनैव कृतत्वादिति** (कं. १७४.१८) तस्यापि तर्ककार्यत्वादनुग्रहं प्रत्यङ्गत्वाच्चेति भावः ।

[ इति तर्कः ]

---

१ एतदहं – जे. २ । २ तत्रानुत्पत्तिः – जे. ३ । ३ सिद्ध्युपलम्भयो – कं । ४ लिङ्गक – कं; प्रतीतिलिङ्गक – पा. ह. पु. ।

न्यायकन्दली

[157] अन्ये तु संशयप्रभेद एव, तर्कोऽनवधारणात्मकत्वादित्याहुः ।

संशयस्तावत् । तावच्छब्दः क्रमार्थः । संशयस्तावत् कथ्यते इत्यर्थः । प्रसिद्धानेकविशेषयोरिति । प्रसिद्धाः पूर्वं प्रतीता अनेकविशेषा असाधारणधर्मा वक्रकोटरादयः शिरःपाण्यादयश्च ययोः स्थाणुपुरुषयोस्तयोः सादृश्यमात्रस्य साधारणधर्ममात्रस्य क्वचिदेकत्र धर्मिणि दर्शनाद् उभयोः स्थाणुपुरुषयोर्विशेषाणां वक्रकोटरादीनां शिरःपाण्यादीनां च [1]पूर्वप्रतीतानां स्मरणादधर्माच्च [2]किंस्विदिति उभयावलम्बी विमर्शः संशयः। किं स्थाणुः? किं वा पुरुषः ? इति [3]अनवस्थितोभयरूपेणोभयविशेषसंस्पर्शी विमर्शो विरुद्धार्थविमर्शो ज्ञानविशेषः संशयः ।

सादृश्यमात्रदर्शनादिति । मात्रग्रहणसामर्थ्याद्विशेषाणामनुपलम्भो गम्यते । दर्शनशब्द उपलब्धिवचनो न प्रत्यक्षप्रतीतिवचनोऽनुमेयस्यापि सामान्यस्य संशयहेतुत्वात् ।

[टि०] [157] ।। अथ बुद्धिनिरूपणप्रकरणेऽविद्याप्रभेदनिरूपणे संशयनिरूपणम् ।।

[4]वक्रकोटरादीनाम् इति – वक्रकोटरशिरःपाण्यादि[5]स्मरणे च तदविनाभूतयोः स्थाणुत्वपुरुषत्वसामान्ययोरपि स्मरणादिति ज्ञेयम् । अनुमेयस्यापि इति – विषाणमात्रदर्शनात् ज्ञानान्तरिते पशौ । ननु सादृश्यदर्शनाव[6]धारणे विशेष-

[पं०] [157] साधारणधर्ममात्रस्येति (कं. १७५.१२) ऊर्ध्वत्वस्य ।

अनुमेयस्यापि सामान्यस्य संशयहेतुत्वादिति (कं. १७५.१७) यदि दर्शनमवलोकनमेव [7]ध्यायते तदाऽनुमेयस्य सामान्यस्य संशयहेतुत्वं न स्यात् किन्तु साक्षात्क्रियमाणस्यैव सामान्यस्य संशयहेतुत्वं स्यात् । दृश्यते चानुमेदस्यापि सामान्यस्य संशयहेतुत्वम्, यथा विषाणमात्रदर्शनाद् ज्ञाटान्तरिते पशौ । एतावता सामान्यधर्मो दृष्टश्चानुमितश्च संशयमुत्पादयता उपलब्ध्यर्थतयाऽत्र दर्शने व्याख्याते । उभयोरपि ग्रहणमिति तत्त्वम् । न तु सादृश्यदर्शनावधारणे विशेषधर्मवद्धर्मिणोऽपिदर्शनं नाभ्युपेयमित्याह सादृश्योपलम्भेत्यादि (कं. १७५.१७) [8]तस्यानुपलम्भे (कं. १७५.१७) इत्यत्र तस्य धर्मिणः । सादृश्ये (कं. १७५.१६) इति ऊर्ध्वतादौ । नानेकार्थसमवेतं सादृश्यमिति (कं. १७५.१७) सादृश्येऽनुवृत्तिहेतुरपि नानेकार्थं समवेतं न सामान्यतुल्यमित्यर्थः । अस्पर्शवत्त्वस्येत्यादि (कं. १७५.१८) अत्राणुत्वमहत्त्वसंशयदर्शनादिति । आकाशसाधारणस्यास्पर्शवत्त्वस्य प्रतीत्या महत्त्वसंशयः, अन्तःकरणसाधारणस्यास्पर्शवत्त्वस्य

[कु०] [157] अन्ये त्विति (कं. १७४.१८) (ते) कोटिद्वयस्पर्शविरहो दोषः प्रागेवोक्त इति भावः ।

धर्म्यनुपलम्भे धर्म्मो मोपलभि तया[था]पि धर्म्युपलम्भस्य संशयकारणं कुतोऽत आह संशयोऽपीति (कं. १७५.१९)। सादृश्यमिति (कं. १७४.२०) एतादृशस्य सादृश्यस्य संशयकारणत्वमुदाहरणे स्पष्टयति–अस्पर्शवत्वस्येति (कं. १७५.२१)।

---

१ पूर्वं प्रतीतानां–कं. १, कं. २ । २ किं स्यादिति–जे. १, जे. २, जे. ३ । ३ अनवस्थितेन रूपेणोभय–जे. १; जे. २ । ४ प्रतीकमिदं अबपुस्तकयोर्नास्ति । ५ स्मरणाच्च – अ, ब, क । ६ धारणा – अ, ब । ७ व्याख्यायते – ब । ८ अस्यानु– कं ।

## न्यायकन्दली

**सादृश्योपलम्भाभिधानाद्धर्म्युपलम्भोऽपि लभ्यते। [1]तस्यानुपलम्भे तद्धर्मस्य सादृश्यस्योपलम्भाभावात् [2]संशयोऽपि च धर्मिण्येव न सादृश्ये, तस्य निश्चितत्वात्। सादृश्यमिति च [3]साधारणधर्ममात्रं कथ्यते नानेकार्थसमवेतं सादृश्यम् अस्पर्शवत्त्वस्य स्पर्शाभावस्याकाशान्तःकरण[4] साधारणस्य प्रतीत्यात्मन्यणुत्वमहत्त्वसंशयदर्शनात्।**

**तदयं संक्षेपार्थः—यदायं प्रतिपत्तोभयसाधारणं धर्मं क्वचिदेकत्र धर्मिण्युपलभते, कुतश्चिन्निमित्तात् तस्य धर्मिणो विशेषं नोपलभते, पूर्वप्रतीतयोः स्मरति विरुद्धविशेषयोः, न चोभयोरेकत्र सम्भावयति सद्भावम्, विरुद्धत्वात्। नाप्यभावं तदविनाभूतस्य साधारणधर्मस्य दर्शनात्। तदास्य साधारणधर्मविषयत्वेनावधारिते धर्मिणि विशेषविषयत्वेनानवधारणात्मकः प्रत्ययः संशयो भवति।**

[टि०] धर्मवत् धर्मिणोऽपि दर्शनं नाभ्युपेयमित्याह सादृश्योपलम्भाभि[5]धानाद् इति। **विरुद्धविशेषयोः** इति :—[6]विशेषयोः स्थाणुत्वपुरुषत्वयोः। **अयं हि सामान्यविशिष्टेति** :—[7]उर्ध्वत्वसामान्यविशिष्टधर्म्युपलम्भेन धर्मविशेषाणां **वक्रकोटर**-शिरःपाण्यादीनां योऽनुपलम्भस्तत्सहकारिणा विरुद्धयोरुभयोर्विशेषयोः स्थाणुत्वपुरुषयोर्यत्स्मरणं तेन च सहकारिणेति।

[पं०] प्रतीत्याऽणुत्वसंशयः—इति यथासङ्ख्यं योज्यम्। अस्य वाक्यस्यायं भावः, यदि ह्यनेकार्थसमवेतं सामान्यमत्र गृह्यते ततोऽस्पर्शवत्त्वस्य संशयहेतुत्वं न स्यात्, अस्पर्शवत्त्वस्य स्पर्शाभावरूपतयाऽनेकार्थसमवेतसामान्यरूपत्वाभावात्। अत एव स्पर्शाभावस्य एतेन पर्यायशब्देन विवृतमिति।

**कुतश्चिन्निमित्तादिति** (कं. १७५.२०) [ति]मिरान्धकारादेः। **विरुद्धविशेषयोरिति** (कं. १७५.२१) स्थाणुत्वपुरुषत्वयोः **तदास्येति** (कं. १७५.२२) अस्य प्रमातुः।

परवाक्यं **नन्ववधारणात्मक** (कं. १७६.२) इत्यादि। [8]**विप्रतिषिद्ध** इति यत्र द्वौ प्रसङ्गावन्यत्र चरितार्थौ एकस्मिन् प्राप्नुतः स तुल्यबलयोर्विरोधो विप्रतिषेधः। श्रीधरवाक्यं **नोभयस्यापि सम्भवात्** (कं. १७६.३) इति। नेति भोः परमैवं वादीः, प्रत्ययश्चानवधारणात्मकश्चेति विप्रतिषिद्धमिति; उभयस्यापि प्रत्ययत्वस्यानवधारणात्मकत्वस्य

[कु०] नन्वत्र संशयस्य किं लक्षणं [9]कियांश्चांश कारणोपन्यास इति जिज्ञासुं प्रत्याह—[10]**तदयमिति**। विमर्शः संशय इति लक्षणं परिशिष्टं कारणोपन्यासः, स्वरूपोपन्यासश्चेत्यर्थः।

नन्वत एव विरोधात्प्रत्ययभेदोऽस्तीत्यत आह—**दृष्टं हीति** (कं. १७६.६)।

प्रत्ययैक्यानङ्गीकारे वा शब्देन प्रत्ययाकारनिर्देशो नोपपद्यते। तथाहीह स्थाणुपुरुषयोः स्मरणमात्रं पुरोवर्त्तिन-

---

१ अस्या – कं. १, कं. २। २ संशयोऽपि धर्मिण्येव – कं. १, कं. २। ३ साधारणं – जे. ३। ४ गतस्य – कं. १, कं. २। ५ –धानाति – अ। ६ विशेषणयोः 'ड'पुस्तके नास्ति। ७ उर्ध्वत्वं सामान्यं – अ, ब, क। ८ इदं प्रतीकं मु. कन्दल्यां नास्ति तत्र तु प्रतिषिद्धम् (१७५.२) इति पाठः। ९ क्रियात्वांशः – MS। १० तदिमिति – MS; तदयं – कं।

न्यायकन्दली

नन्वनवधारणात्मकः प्रत्ययश्चेति [1]विप्रतिषिद्धम् । इदं हि प्रत्ययस्य प्रत्ययत्वं यद्विषयमवधारयति । न, उभयस्यापि सम्भवात् । अयं हि सामान्यविशिष्टधर्म्युपलम्भेन धर्मविशेषानुपलम्भविरुद्धोभयविशेषस्मरणसहकारिणा [2]जन्यमानोऽयमिति सामान्यविशिष्टं धर्मिणमवधारयन् स्थाणुर्वापुरुषो वेति विशेषमनवधारयन्ननवधारणात्मकः प्रत्ययश्च स्यात् । दृष्टं हि यत्र [3]विलक्षणा सामग्री तत्र कार्यमपि विलक्षणमेव, यथा [4]प्रत्यभिज्ञानम् ।

संशयोऽप्यविद्या, सा चानिष्टा पुरुषस्येत्यधर्मकार्यत्वं तस्य दर्शितम् । अधर्माच्चेति । सामान्यं दृष्ट्वा यदेकं विशेषमनुस्मृत्य [5]विशेषान्तरमनुस्मरति तदा सामान्यदर्शनस्य विनष्टत्वात् संशयहेतुत्वानुपपत्तिरिति चेन्न, उभयविशेषविषयाभ्यां संस्काराभ्यां युगपत्प्रबुद्धाभ्यामुभयविशेषविषयैकस्मरणजननात्, तत्काले च विनश्यदवस्थस्य सामान्यज्ञानस्य सम्भवात् ।

[टि०] **सामान्यं दृष्ट्वा यदा** इति–संशयो हि उर्ध्वताविशिष्टसाधारणधर्मिज्ञानस्थाणुत्वपुरुषत्वस्मरणेभ्यो जायते त्रयाणां च ज्ञानानामविनश्यदवस्थानामेकदासम्भवाभावात्कथं संशयजनकत्वम् ? यदा[6] हि स्थाणुत्वस्मरणं तदा सामान्यज्ञानस्य [7]विनश्यत्तासद्भावात् यदा च पुरुषत्वज्ञानं तदा सामान्यज्ञानस्य [8]विनष्टत्वादिति ।

[पं०] च घटनात् इत्यर्थः । **सामान्यविशिष्टधर्म्युपलम्भेन** (कं. १७६.३) इत्यत्र सामान्यमूर्ध्वताख्यं, सादृश्यम् । **धर्मविशेषेत्यादि** (क. १७६.४) धर्मविशेषाणां वक्रकोटरशिरःपाण्यादीनां योऽनुपलम्भस्तत्सहकारिणा विरुद्धयोरुभयोर्विशेषयोः स्थाणुत्वपुरुषत्वयोर्यत्स्मरणं तेन च सहकारिणेत्यर्थः । **यथा प्रत्यभिज्ञानमिति** (कं. १७६.७) प्रत्यभिज्ञानं हि अतीतवर्तमानविषयत्वादिलक्षणम् ।

परवाक्यं **सामान्यं दृष्ट्वेत्यादि** (कं. १७६.८) । **एकं विशेषमिति** (कं. १७६.८) पुरुषविशेषम् । [9]**विशेषान्तरमिति** (कं. १७६.९) स्थाणुविशेषम । अस्य च वाक्यस्यायं भावः=संशयो हि ऊर्ध्वताविशिष्टसाधारणधर्मिज्ञानस्थाणुपुरुषत्वस्मरणे जायते त्रयाणां च ज्ञानानामविनश्यदवस्थानामेकयाऽसम्भवात्कथं संशयजनकत्वम् । यथा स्थाणुत्वस्मरणं तदा सामान्यज्ञानस्य विनश्यतासद्भावात्, यदा च पुरुषत्वज्ञानं तदा सामान्यज्ञानस्य विनष्टत्वादिति श्रीधरवाक्यं **नोभयेत्यादि** (कं. १७६.१०) ।

[कु०] श्चोपलब्धिरित्यङ्गीकारे स्थाणुपुरुषविषयेयमनेका स्मृतिः प्रतिविषयं भिन्ना अभिन्ना वा ? आद्ये स्थाणुपुरुषादित्याकारः स्यात्, द्वितीये तु स्थाणुश्च पुरुषश्चेति विद्यते सा चानिष्टेति । अन्यथा तद्धयानार्थं विशेषजिज्ञासानुपपत्तेः स्मृत्योर्विशेषविषययोः क्रमेणोत्पत्तिं मन्यमानस्य चोद्यं **सामान्यं दृष्ट्वेति** (कं. १७६.८) । एकैव विशेषद्वयविषया स्मृतिरिति मन्यमानस्य परिहारः **नेति** (कं. १७६.११) । द्वैविध्येनैव सङ्गृहीत इति ।

---

१ प्रतिषिद्धम्–कं. १; कं. २ । २ जन्यमान इति–कं. १; कं. २ । ३ विलक्षणसामग्री–कं. १; कं. २ । ४ प्रत्यभिज्ञा ज्ञानम्–जे. २ । ५ विशेष–क. १; कं. २ । ६ तदा–ड । ७ स्याविनश्यन्त–अ, ब । ८ विश्वरत्वात्–अ, ब; विनश्वरत्वात्–क । ९ विशेषम्–कं ।

## प्रशस्तपादभाष्यम्

[158] स च द्विविधः–अन्तर्बहिश्च ।

अन्तस्तावद् आदेशिकस्य सम्यङ् मिथ्या चोद्दिश्य पुनरादिशतस्त्रिषु कालेषु संशयो भवति–'किन्नु सम्यङ मिथ्या वा' इति ।

## न्यायकन्दली

[158] स च द्विविध इति भेदकथनम् । केन रूपेणेत्यत आह–अन्तर्बहिश्चेति । यः समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्ते[4]रुपलब्ध्यव्यवस्थातोऽनुपलब्ध्यव्यवस्थातश्च समानतान्त्रिकैः पञ्चविधः संशयो दर्शितः, [5]स सर्वो द्वैविध्येनैव संगृहीतः ।

अन्तस्तावद् [3-4]आदेशकस्येति । [5]आदेशको ज्योतिर्वित्, तेनैकदा किञ्चिद् ग्रह-सञ्चारादिनिमित्तमुपलभ्यादिष्टं [6]एवममुकेत्राभूद्वर्त्तते भविष्यति चेति, तत्तथैव तदा संवृत्तम् । अन्यदादिष्टं तद्वितथमभूत् । पुनरिदानीं तस्योत्पन्नं तथाभूतमेव निमित्तं दृष्ट्वादिशतोऽन्तः स्वज्ञाने संशयो भवति यदेतन्मम नैमित्तिकं ज्ञानमभूत तत्किं सत्यमसत्यं वेति ।

[टि०] [158] यः समानधर्मेति समानधर्मोपपत्तेर्यथा [6][स्थाणुर्वा पुरुषो[6]वेति असाधारण[6]धर्मोपपत्तेर्यथा] आकाश-विशेषगुणत्वात् शब्दो नित्यो वा स्यादनित्यो वेति । [9]केषांचिद् भौतिकान्यन्येषां चाभौतिकानीति विप्रतिपत्तेर्यथा

[पं०] [158] समानधर्मोपपत्तेरिति (कं. १७६.१३) यथा स्थाणुर्वा पुरुषो वेति । अनेकधर्मोपपत्तेरिति (क. १७६.१३) यथा आकाशविशेषगुणत्वाच्छब्दो नित्यो वा स्यात् कृतकत्वादनित्यो वेति २ । विप्रतिपत्तेरिति (कं. १७६.१३) यथा केषांचिन्मते भौतिकानि, अन्येषां चाभौतिकानीति, ततः किमिन्द्रियाणि भौतिकान्यभौतिकानि वा ३ । उपलब्ध्य व्यवस्थात इति (कं. १७६.१३) यथा तडागादौ सन् मृगतृष्णादौ चासज्जलमुपलभ्यते, तस्मात्किं सद् असद्वा जलमुप-लभ्यते ४ । अनुपलब्ध्यव्यवस्थात इति (कं. १७६.१४) यथा किं विद्यमानोऽविद्यमानो वा पिशाचो नोपलभ्यत इति ५ । समानतान्त्रिकैरिति (कं. १७६.१४) नैयायिकैः । ज्ञानविषयोऽन्तःसंशयोऽन्यविषयस्तु बहिः संशयः ।

[कु०] [158] सर्वोऽपि संशयः समानधर्मोपपत्तेरेव तत्र यथाऽन्तर्बहिरित्यान्तर्गणिको भेदः समानधर्ममनुरुद्धधैव तद्वदन्योऽपि पराभिमतो भेदः समानधर्ममनुरुद्धयैव । न तु तत्प्रतिरोधेन तत्र तावदनेकान्यथैर्निरूपयिष्यते(न्म) । विप्रतिपत्तिस्तु परस्परोपमर्देन प्रत्तिपत्तितद्विषयत्वं हि इ[न्द्रि]यभौतिकत्वयोः समानो धर्म्मः । एवं सतश्च(I)-

४ रुपलब्ध्यनुपलब्ध्यव्यवस्थात – जे. १ । ५ स समस्तोऽपि – जे. १ । ३–४ आदेशिक – कं. १; कं. २ । ५ किञ्चिदिष्टमनिष्टं वाश्रा – कं. १; कं. २ । ६ [ ] व्यत्ययेन दर्शितानुसारं पाठः अपुस्तके आवृत्तः । ९ क्वाचिद् अ, डपुस्तके पदमिमं नास्ति ।

प्रशस्तपादभाष्यम्

[1]बहिर्द्विविधः–[2]प्रत्यक्षविषये चाप्रत्यक्षविषये च ।

तत्राप्रत्यक्षविषये तावत् साधारणलिङ्गदर्शनादुभयविशेषानुस्मरणादधर्माच्च संशयो भवति । यथाऽटव्यां विषाणमात्रदर्शनाद् गौर्गवयो वेति ।

प्रत्यक्षविषयेऽपि स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यदर्शनात् वक्रादिविशेषानुपलब्धितः स्थाणुत्वादिसामान्यविशेषानभिव्यक्तावुभयविशेषानुस्मरणादुभयत्रा[3]कृष्यमाणस्यात्मनः प्रत्ययो दोलायते–किं नु खल्वयं स्थाणुः स्यात् पुरुषो वेति ।

न्यायकन्दली

बहिर्द्विविधः–प्रत्यक्षविषये, [4]चाप्रत्यक्षविषये चेति ।

तत्र तयोर्मध्येऽप्रत्यक्षविषये तावत् साधारणलिङ्गदर्शनादुभयविशेषानुस्मरणादधर्माच्च संशयो भवति । यथाऽटव्यां विषाणमात्रदर्शनाद् गौर्गवयो वेति । [5]झाटान्तरितस्य पिण्डस्याप्रत्यक्षस्य सामान्येन विषाणमात्रदर्शनानुमितस्य संशयविषयत्वादप्रत्यक्षविषयोऽयं संशयः ।

प्रत्यक्षविषयेऽपि कथयति–स्थाणुपुरुषयोरित्यादिना । स्थाणुपुरुषयोः सम्बन्धिनी योर्ध्वता तन्मात्रस्य प्रत्यक्षविषये पुरोवर्तिनि धर्मिणि दर्शनात् । वक्रादिविशेषानुपलब्धित इत्यादि[6]पदेन शिरःपाण्यादिपरिग्रहः । वक्रकोटरादेः स्थाणुधर्मस्य शिरः[7]पाण्यादेश्च विशेषस्य पुरुषधर्मस्यानुपलब्धितः । स्थाणुत्वादिसामान्यविशेषानभिव्यक्तावित्यादिपदेन

[टि०] किमिन्द्रियाणि [8]भौतिकानि अभौतिकानि वेति । उपलब्धेर्यथा किं [9][सदसद्वा जलमुपलभ्यते । अनुपलब्धेर्यथा] किं विद्यमानोऽविद्यमानो [10]वा पिशाचो नोपलभ्यते इति । अन्तस्तावद् इतिः– ज्ञानविषयोऽन्तःसंशयः ज्ञेयविषयस्तु बहिरिति ॥ संशयः ॥

[पं०] तत्रार्द्यं व्याचष्टे अन्तस्तावदित्यादिना (कं. १७६.१५) ।

बहिःसंशयं तु बहिर्द्विविध (क. १७६.१९) इत्यादिना । [11]झाटान्तरितस्येति (कं १७६.२२) वृक्षव्यवहितस्य ।

[कु०] सतश्चोदकस्योपलब्धिरपि समाना । एवमयोग्यस्य पिशाचादेरनुपलब्धिः सतश्चासतश्च साधारणी न स्यात् । सर्वोऽपि संशय एकविध एवेत्यभिप्रायेण द्वैविध्यं प्रदर्शितं भाष्यकृतेति भावः ।

---

१ बहिरपि–कि । २ प्रत्यक्षे–दे । ३ आश्लिष्यमाण–दे । ४ अप्रत्यक्षविषये च–क. १, कं. २; चाप्रत्यक्षविषये–जे. १, जे. २ । ५ वाटा–कं. १. कं. २ । ६ शब्देन–दे. २, जे. ३ । ७ पाण्यादेर्विशेषस्य–कं. १; कं. २ । ८ भौतिन्य–अ, ब; ९ [ ] एतच्चिह्नान्तर्गतो पाठः अबपुस्तकयोर्नास्ति । १० वा अपुस्तके नास्ति । ११ वारान्तरितस्य–मू. कं ।

प्रशस्तपादभाष्यम्

[159] विपर्ययोऽपि प्रत्यक्षानुमानविषय एव भवति ।

न्यायकन्दली

पुरुषत्वाद्य[1]वरोधः। वक्रकोटरादयः स्थाणुत्वाभिव्यक्तिहेतवः, शिरःपाण्यादयः पुरुषत्वाभिव्यक्तिहेतवः, तेषामनुपलम्भात् । स्थाणुत्वपुरुषत्वयोरनभिव्यक्तौ सत्यामुभयोः स्थाणुपुरुषयोः प्रत्येकमुपलब्धानां विशेषाणामनुस्मरणादुभयत्राकृष्यमाणस्य उभयत्र स्थाणौ पुरुषे वाकृष्यमाणस्य प्रतिपत्तुर्यदोर्ध्वतादर्शनात् स्थाणुरयमिति निश्चेतुमिच्छति तदा पुरुषविशेषानुस्मरणेन पुरुषे समाकृष्यत [2][यदा पुरुषोऽयमिति निश्चेतुमिच्छति तदा स्थाणुविशेषानुस्मरणेन स्थाणावाकृष्यत] इत्युभयत्राकृष्यमाणः, अत एवास्य प्रत्ययो [3]दोलायते, नैकत्र नियमेनावतिष्ठते । दोलासाधर्म्यमनवस्थितरूपत्वमेव प्रत्ययस्य दर्शयति –किन्नु खल्वयं स्थाणुः स्यात् पुरुषो वेति ।

[159] संशयानन्तरं विपर्ययं निरूपयति–विपर्ययोऽपि प्रत्यक्षानुमानविषय एव भवतीति। संशयस्तावत् प्रत्यक्षानुमानविषय एव भवतीति विपर्ययोऽपि तद्विषये भवतीत्यपिशब्दार्थः ।

[टि०] [159] ॥ अथाऽविद्याप्रभेदनिरूपणे विपर्ययनिरूपणम् ॥

गवाश्वावित्यत्र [4]समाहाराभावश्चिन्त्यः । अयथार्थालोचनाद् इति :–अयथार्थालोचनादित्यत्र भावप्राधान्ये

[पं०] पुरुषविशेषानुस्मरणेनेति (कं. १७७.५) पुरुषसत्कविशेषानुस्मृत्या । [5]स्थाणुविशेषाऽनुस्मरणेनेति–स्थाणुसत्कविशेषानुस्मृत्या ॥

× × × ×

[159] प्रमाणान्तराभावादिति (कं. १७८.४) वैशेषिकाणां मते । गवाश्वौ इति (कं. १७८.६) अत्र समाहारैकत्वं प्राप्नोति अतश्चिन्त्यमेतल्लाक्षणिकैः ।

[कु०] [6]उभयत आकृष्यमाणस्येति (कं. १७७.४) भाष्यकारेण वैचित्र्यप्रतिपाद[न]परमित्यतस्तदेवं वैचित्र्यं प्रतिपादयति उभयत्र स्थाणौ पुरुषे वेति (कं. १७७.४) नत्वत्रेच्छादिकं परमार्थप्रतीतिविरोधात् । उभयविशेषविषयस्मरणाकारणजननादि पूर्वोक्तेन विरोधेन प्रसङ्गाच्च । [ इति संशयः ]

[159] प्रत्यक्षानुमानव्यतिरेकेणेति (कं. १७८.३) अन्यथाख्यातिनये विपर्ययस्य सालम्बनत्वादप्रामाणिकस्य च नालम्बनत्वायोगादिति भावः । इह भाष्ये प्रसिद्धानेकविशेषयोरिति पदमारोप्य विशेषस्य पूर्वमप्रतीतावारोपो

१ द्यविरोधः–जे. ३ । २ [ ] एतच्चिह्नान्तर्गतः पाठः कं. १, कं. २ पुस्तकयोर्नास्ति । ३ दोलायतेतरां–जे. १ । ४ समाहारभाव–अ, ब । ५ प्रतीकमिदं मु. कन्दल्यां नास्ति–सं । ६ उभयत्र–कं ।

### प्रशस्तपादभाष्यम्

**प्रत्यक्षविषये तावत् प्रसिद्धानेकविशेषयोः पित्तकफानिलोपहतेन्द्रियस्यायथार्थालोचनाद् असन्निहित[1]विषयज्ञानजसंस्कारापेक्षादात्ममनसोः संयोगादधर्माच्चातस्मिंस्तदिति प्रत्ययो विपर्ययः। यथा गव्येवाश्व इति।**

### न्यायकन्दली

प्रत्यक्षानुमानविषय एव भवतीति प्रत्यक्षानुमानव्यतिरेकेण प्रमाणान्तराभावात्। प्रत्यक्षविषये तावत् प्रसिद्धानेक[2]विशेषयोरिति प्रसिद्धाः पूर्वं प्रतीता अनेके विशेषाः सास्नादयः केसरादयश्च ययोस्तौ प्रसिद्धानेकविशेषौ गवाश्वौ तयोर्मध्ये योऽतस्मिन्ननश्वे गवि तदिति प्रत्ययोऽश्व इति प्रत्ययः स विपर्ययः।

ननु [3]यदा गवि गोत्वसास्नादयश्च विशेषाः परिगृह्यन्ते तदा विपर्ययो न भवति, भवति चेदस्यानुपरमप्रसङ्गस्तत्राह–अयथार्थालोचनादिति। अयथार्थालोचनं यथार्थालोचनस्याभावो यथासावर्थो गौः सास्नादिमांस्तथाग्रहणाभाव इति यावत्। तस्मादतस्मिंस्तदिति प्रत्ययो भवतीति। अनेन विशेषानुपलम्भस्य कारणत्वमुक्तम्। सन्निहिते

[टि०] भ्रान्तिज्ञानात् भ्रान्तिरुत्पद्यते इत्यर्थो न [4]घटते इत्यभावप्राधान्येन व्याख्यातं यथार्थालोचनाभावादिति। गुरुभिः इति–भट्टाचार्यैरित्यर्थः

[पं०] **अयार्थालोचनाद्** (कं. १७८.९) इत्यत्र भावप्राधान्ये भ्रान्तिज्ञानाद्भ्रान्तिरुत्पद्यते [5]इत्यर्थः, न 'घट' इत्यभावप्राधान्येन व्याख्यातं यथार्थाभावालोचनाभावादिति मर्मः।

अत्यश्च [6]**सादृश्यविशिष्टमिति** (कं. १७८.२०) अश्वसादृश्यविशिष्टम्। **सांशत्वादिति** (कं. १७८.२०) सामान्यांशे। गोत्वं विशेषांशः सादृश्यविशिष्टः पिण्डस्ततः सहांशाभ्यां वर्तते इति सांशं, तस्य भावः सांशत्वं, तस्मात्सांशत्वादिति समासः। **गुरुभिरिति** (कं. १७८.२४) भाट्टैः। **असन्निहितमिति** (कं. १७८.२५) संस्कारस्यासन्निहितविषयत्वात्। **अनधिकरणमिति** (कं. १७८.२५) न हि गोपिण्डेऽधिकरणेऽश्वत्वमस्ति। **विपरीतख्याति**[7]**रपीति**

[कु०] न भवतीति प्रतिपादनपरम्। आरोपविषयस्य विशेषप्रतीतिर[8]तन्त्रमेव इतरथा नालिकेरद्वीपवासिनोऽङ्गारप्रतीतौ कुत्रचिद् विपर्ययानुत्पत्तिप्रसङ्गात्। द्विवचनं तु व्यत्यासेनापि। विपर्ययं सम्भावयितुमारोप्यप्रसिद्धेश्च फल तद्विषयः संस्कारः तस्य च फलमनन्तरमेव वक्ष्यति।

[10]**अयथार्थालोचनादिति** (कं. १७८.९) न पदं विपर्ययोत्पत्तिकाले विषयविशेषाः प्रसिद्धेः कारणत्वं प्रतिपादयितुमित्यमुमर्थं शङ्कापूर्वकं व्याचष्टे ननु [11]**यदेति** (कं. १७८.७)। लिङः पूर्वपदसम्बन्ध[:]तमं[तं] निवारयति [अ] **यथार्थालोचनस्याभाव** इति (कं. १७८.९)। तथा च नात्मश्रयदोष इति भावः।

---

१ विषयजसंस्कारा – दे। २ विशेषयोरपि – कं. १, कं. २। ३ यदि – कं. १, कं. २। ४ घटे – अ। ५ इत्यर्थः इति 'अ' पुस्तके नास्ति। ६ गोसादृश्य विशिष्ट–कं. सादृश्यवि–ब। ७ मु. कन्दल्याम् 'अपि' नास्ति। ८ असतो वा–कं। ९ रनन्तरमेव – इति पाठः स्यात्–सं। १० भाष्यप्रतीकमिदम्–सं। ११ यदि–कं।

न्यायकन्दली

पिण्डे गोत्वस्याग्रहणे को हेतुः को वा हेतुरसन्निहितस्याश्वत्वस्य प्रतीतावित्याह पित्तकफानिलोपहतेन्द्रियस्येति। पित्तं च कफश्चानिलश्च तैरुपहतं दूषितमिन्द्रियं यस्य तस्यायं विपर्यय इति। वातपित्तश्लेष्मादिदोषाणामसन्निहितप्रतिभासे सन्निहितार्थाप्रतिभासे च सामर्थ्यं समर्थितम्। यदि दोषसामर्थ्यादेवासन्निहितं प्रतिभाति सर्वं सर्वत्र [1]अवभासेत, नियमहेतोरभावा[2]दत आह–असन्निहितविषयज्ञानजसंस्कारापेक्षादात्ममनसोः संयोगादिति।

असन्निहितो विषयोऽश्वादिस्ततः [3]पूर्वमुत्पन्नाज्ज्ञानाज्जातो यः संस्कारस्तमपेक्षमाणादात्ममनसोः संयोगाद्विपर्यय इति। अयमस्यार्थः–गोपिण्ड[4]संयुक्तमिन्द्रियं गोत्वमगृह्णदपि तं पिण्डं [5]सादृश्यविशिष्टं गृह्णाति, सांशत्वाद्वस्तुनः। तेन च सादृश्यग्रहणेनाश्वविषयः संस्कारः प्रबोध्यते। स च प्रबुद्धोऽश्वस्मृतिजनने प्राप्ते मनोदोषादिन्द्रियसंयुक्ते [6]गव्यनव एव सादृश्यानुरोधादनुभवाकारामश्वप्रतीतिं करोति, अतो न सर्वस्य

[टि०] नन्वतीतस्य पित्रादेः [7]केशोण्डुकादेर्वा प्रतिभासोऽसत्ख्यातिरेव, नान्यथाख्यातिरित्याह योऽपि निरधिष्ठान इति। यद्यत्यन्तासतः। खरविषाणप्रायस्य ख्यातिः [8]स्यात्तदाऽसत्ख्यातिः स्यादित्यभिप्रायः। यथा [9]पीते शङ्खे इति–अत्रापि

[पं०] (कं. १७८.२७) न केवलं भ्रान्तिरित्याख्येति, विपरीतख्यातिरित्यप्युच्यत इत्यर्थः। अत एवेति (कं. १७८.२७) इन्द्रियजत्वादेव नत्वतीतस्य पित्रादेः केशोड्डुकादेर्वा प्रतिभासोऽसत्ख्यातिरेव न विपरीतख्यातिरित्याशङ्क्याह योपीत्यादि (कं. १७९.१)। निरधिष्ठान इति (कं. १७९.१) निराश्रयो भ्रान्तचक्षुषः केशोण्डुकादौ। स्वरूपविपरीतेनेति (कं. १७९.२) सत्यकेशादिविपरीते। न त्वसत्ख्यातिरिति (कं. १७९.३) यदात्यन्तासतः षष्टभूतप्रायस्य ख्यातिः स्यात्तदा असत्ख्याति स्यादित्यभिप्रायः। अत एवाह स्वरूपतोऽर्थस्य सम्भवादिति (कं. १७९.३)। अर्थस्य केशादेः। [*]असताऽवभासनायोगादिति (कं. १७९.३) असतोऽत्यन्तमविद्यमानस्य। खरविषाणादेः। मनोदोषमात्रानु

[कु०] ननु यदि दोषः सन्निहितग्रहणं प्रतिबध्नाति तर्हि धर्म्यंपि कथं गृह्यतेत्यत आह–सांशत्वादिति (कं. १७८.२१)। धर्मधर्मिणोर्भेदाद्दोषस्य च शक्तिवैचित्र्यात् सन्निहितेष्वपि कस्यचिदेव ग्रहणं प्रतिबध्यत इति भावः। अत एवेति (कं. १७८.२३) दोषस्य विपरीतकार्यजननं प्रति सामर्थ्यादित्यर्थः। अनधिकरणमिन्द्रियसम्बन्धानधिकरणम्। अन्वयव्यतिरेकावधृतकारणपरित्यागेऽतिप्रसङ्गमाह व्याप्रियमाण इति (कं. १७८.२६)। यदि ग[गोः] सन्नेवाश्वः प्रतीयते तथा च सत्ख्यात्यङ्गीकारः कृत इत्यत आह–विपरीतख्यातिरिति (कं. १७८.२७)। आरोप्यविषयस्यारोप्यात्मना सत्त्वं को नामाङ्गीकरोतीति। योऽपीति (कं. १७९.१) यद्यपि नास्त्येवासौ विपर्ययः योऽधिष्ठानं संस्कारं तदु(व)द्-

१ प्रतिभासेत – कं. १, कं. २, जे. ३। २ दित्यत्राह – कं. १, कं. २। ३ पूर्वोत्पन्ना – कं. १, कं. २। ४ प्रयुक्त जे. १। ५ गोसादृश्य–कं. १, कं. २। ६ गव्यश्व–जे। ७ केशोण्डुकादेर्वा – अ, ब, क; ८ स्यादसत्ख्यातिरसत्ख्याति – ब, क। ९ शङ्खे पीत – मु. जे. १, जे. ३;

## न्यायकन्दली

सर्वत्रावभासः, सादृश्यसंस्कारयोः प्रतिनियमहेतुत्वात् । अत एव चेयं गुरुभिरिन्द्रियजा भ्रान्तिरुच्यते । एवं हीन्द्रियजा न स्याद्यदीयं संस्कारैकसामर्थ्यादसन्निहितमनधिकरण-मश्वत्वमात्रमेव गृह्णीयान्निरुद्धेन्द्रियव्यापारस्य [1]च भवेत्, व्याप्रियमाणे चक्षुषि तत्संयुक्तमेव तु गोपिण्डमश्वात्मना गृह्णती [2]यदीयमन्द्रियजा, का तर्हीन्द्रियजा भविष्यति विपरीत[3]ख्यातिरप्यत एवान्यस्यान्याकारेण प्रतिभासनाद् । योऽपि [4]निरधिष्ठानो विपर्ययस्तत्राप्यवर्तमानोऽर्थः स्वरूपविपरीतेन वर्तमानाकारेण प्रतीयत इति विपरीतख्यातिरेव न त्वसत्ख्यातिः, स्वरूपतोऽर्थस्य सम्भवाद[5]सतश्चावभासनायोगात् । यत्र सदृशमर्थमधिष्ठाय विपर्ययः प्रवर्तते, तत्र सादृश्यं कारणम्, निरधिष्ठाने तु विभ्रमे मनोदोषमात्रानुबन्धिनि नास्य सम्भवः, यथा हि कामातुरस्येतस्ततो भाविनि [6]स्त्रीनिर्भासे विज्ञाने । संस्कारोपि तत्रैव कारणं यत्र सविकल्पको भ्रमः, निर्विकल्पके त्विन्द्रियदोषस्यैव सामर्थ्यं तद्भावभावित्वात् । यथा शङ्खे पीतज्ञानोत्पत्तौ ।

[टि०] सोल्लेखत्वे सविकल्पकत्वमेवेति । ननु [7]नयनगोलकनीलिमैवायं भ्रान्त्याऽवभासते नाकाशरूपमित्यत्र किं प्रमाणमित्याह [8]अत्र च तद्गुणेति ।

[पं०] **बन्धिनीति**–एतेनेन्द्रियजत्वमपास्तम् । नास्य संभव इति अत्रास्येति–**सादृश्यसंस्कारोपीति** (कं. १७९.६) न केवलं सादृश्यम् । **सविकल्पके** इति (कं. १७९.६) सोल्लेखः तदिदमिति । **इन्द्रियदोषस्यैवेति** (कं. १७९.७) न पुनः सादृश्यसंस्कारयोः । एकविषयत्सादृश्याभावात् पूर्वानुभवाभावात्संस्कारााभावः । निर्विकल्पके उदाहरणमाह **यथा शङ्खे-पीतज्ञानोत्पत्ताविति** (कं. १७९ ७) अत्रायं भावः यदा शंखं धवलमपीन्द्रियदोषात्पीतं जानाति तदा तज्ज्ञानं निर्विकल्पकं तच्चेन्द्रियदोषजमेव । परमत्रापि तदिदमिति सोल्लेखत्वे सविकल्पकमेव ज्ञानम् । तत्र तु संस्कारसादृश्य एव कारणमिति भाव्यम् ।

[कु०] **बोधकसादृश्यं** च नापेक्षते । तथा सत्यतस्मिंस्तदिति लक्षणव्याघातप्रसङ्गात् । कामिन्याद्यां (आ)रोप्येष्वन्ततो गत्वा आलोकमण्डलस्याधिष्ठानत्वात् । (य)[द्]यांस्तु विशेषः–अस्ति कामादिदोषाणां स कोऽपि महिमा यत् पदार्थत्वादिनापि कियत्येव सादृश्येन संस्कारानुद्बोधयितुमीशे इति विपर्ययत्वानुमानम् । पीतः शङ्ख इत्यत्रापि संसर्गारोपे अगृह्यमाणे नयनरश्मिवर्तिनि पित्ते वर्तमानस्य गृह्यमाणस्य पीतिम्नस्तेनैवाभिभूतधवलिम्नः शङ्खस्य च केवलस्य गृह्यमाणस्य संसृष्टाभ्यां विरिविल्पपीतिमभ्यामगृह्यमाणासम्बन्धत्वमेव सादृश्यं संस्कारमुद्बोधयतीति परीक्षकमर्यादा । तथापि लौकिकप्रसिद्धिमनुसृत्य निरधिष्ठानवाचायुक्तिराचार्येण कृतेत्यविरोधः ।

---

१ वा–कं. १, कं. २ । २ यदीय' नेन्द्रियजा–कं. १, कं. २ । यद्यनिन्द्रियजा–जे. १ । ३ ख्यातिः, अत एवान्यस्यान्यारोपेण । ४ निरधिष्ठाने–कं. १; कं. २ । ५ असतो वा–कं. १; कं. २ । असतोऽव–जे. ३ । ६ निर्भासि–जे. १, जे. २ । ७ नयनयत–अ, ब, क । ८ तत्र च–अ, ब, क ।

प्रशस्तपादभाष्यम्

असत्यपि प्रत्यक्षे प्रत्यक्षाभिमानो भवति, यथा व्यपगत घनपटलमचलजलनिधि-सदृशमम्बरमञ्जनचूर्णपुञ्जशामं शार्वरं तम इति ।

न्यायकन्दली

विपर्ययस्योदाहरणान्तरमाह—असत्यपि प्रत्यक्षे प्रत्यक्षाभिमान इत्यादिना गगना-वलोकनकुतूहलादूर्ध्वमनुप्रेषिता नयनरश्मयो दूरगमनान्मन्दवेगाः प्रतिमुखैः सूर्यरश्मि-भिरतिप्रबलवेगैराहताः प्रतिनिवर्तमानाः [1]स्वगोलकस्य गुणं देशान्तरे निरालम्बं नीलिमानमा[2]भासयन्तो जलधरपटलनिर्मुक्तनिस्तरङ्गमहोदधिकल्पमम्बरमिति प्रत्यक्षमिव रूपज्ञानमप्रत्यक्षे नभसि जनयन्ति । स्वगोलकगुणं व्योमाधिकरणत्वेनेन्द्रियमाभासयतीत्यत्र तद्गुणानुविधानेन प्रतीतिनियमः प्रमाणम् । तथाहि—कामलाऽधिष्ठितेन्द्रियाधिष्ठानो विद्रुतकलधौतरस[3]विलिप्तमिवान्तरिक्षमीक्षते । कफाधिकतया धवलगोलको रजतसच्छायं पश्यति । शर्वर्यां भवं शार्वरं तमो[4]ऽञ्जनचूर्णपुञ्ज इव श्याममिति केवलज्ञानमत्यन्त-तेजोऽभावे सति सर्वत्रारोऽपितरूपमात्रविषयमप्रत्यक्षमपि प्रत्यक्षमिव पश्यति ।

[पं०] स्वगोलकगुणमिति (कं. १७९.१३) नीलिमानम् । इन्द्रियमिति (कं. १७९.१३) चक्षुः कर्तृभूतया ननु नयनगोलकनीलिमैवायं भ्रान्त्याऽयते नाकाशरूपमित्यत्र किं प्रमाणमित्यत्राह अत्र तद्गुणानुविधानेनेति (कं. १७९.१३) तस्य नयनगोलकस्य गुणो नीलिमा तस्यानुविधानेन । अनुकरणेन नयनगोलकतुल्यनीलिम्नेत्यर्थः । कामलाधिष्ठितेन्द्रिया-धिष्ठान (कं. १७९.१४) इति । कामलाख्यरोगाक्रान्तनयनगोलकः । आरोपितरूपमात्रविषयमिति (कं. १७९.१७) इह वैशेषिकस्येदं मतम् न तमो नाम किमपि द्रव्यभूतं वस्त्वस्ति, केवलं निशि अत्यन्ततेजोऽभावे सति अन्यत्र कोकिलकाकोलकव्यलकालिन्द्यादिषु दृष्टं नीलं रूपमात्रम् अन्धकारशतया आरोपयति व्यवहरति च तम इदम् इति ततश्चायमत्रसमासः । आरोपितं कोकिलादिभ्य उपचरितं यद्रूपं नीलाख्यं तदेव विषयो यस्य तदारोपितमात्रविषयम् । अदृश्यद्रव्यपदार्थस्यादौ प्रागपि विवृतं नवैवद्रव्याणीति सूत्रे इति न भूयः प्रपञ्च्यते ।

[कु०] विपर्ययस्योदाहरणान्तरमिति (कं. १७९.८) प्रत्यक्षानुमानव्यतिरेकेणापि विपर्ययस्य विषयत्वसम्भावनां निवारयितुमिति शेषः । इहैवं हि सम्भाव्यते निर्मेघे व्योम्नि नीलारोपस्तावत् सर्वजनप्रसिद्धो नापह्नवमर्हति । अयं च न प्रत्यक्षविषयः, नीरूपत्वादाकाशस्याप्रत्यक्षत्वात् । आलोकसहायेन चक्षुषा अप्रत्यक्षे धर्मिणि नीलारोपानुप-पत्तेरिति । सेयं सम्भावनाऽनेनोदाहरणान्तरेण निवर्त्यते, आरोपितप्रत्यक्षविषयत्वोपपादनात् । तथा ह्यालोकमण्डले गतिमदप्रतिबन्धादिना सादृश्येनारोपिते अत एव प्रत्यक्षीभूते गगने नीलिमारो[पो] दृष्टो ह्यतीन्द्रियस्याप्यैन्द्रियकतया समारोपो येन केनचित्सादृश्येन यथा देवदत्तोऽयं विद्वानिति ।

१ स्वगोलकस्य देशान्तरे– जे. १, जे. २, जे. ३ । २ अवभासयन्तः – जे. ३ । ३ विलुप्त – कं. १, कं. २ ।
४ ऽञ्जनपुञ्ज– कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

[160-161] अनुमानविषयेऽपि बाष्पादिभिर्धूमाभिमतैर्वह्न्यनुमानम्, [1]गवयविषाणदर्शनाच्च गौरिति ।

त्रयीदर्शनविपरीतेषु शाक्यादिदर्शनेष्विदं श्रेय इति मिथ्याप्रत्ययः [2]विपर्ययः । शरीरेन्द्रियमनःस्वात्माभिमानः, [3]कृतकेषु [4]नित्यत्वदर्शनम्, कारणवैकल्ये कार्योत्पत्तिज्ञानम्, हितमुपदिशत्स्वहितमिति ज्ञानम्, अहितमुपदिशत्सु हितमिति ज्ञानम् ।

न्यायकन्दली

[160] अनुमानविषयेऽपि बाष्पादिभिर्बाष्पधूलिपताकादिभिर्धूमाभिमतैर्धूम इति ज्ञातैरनग्निके देशेऽग्न्यनुमानम् । तथा गवयविषाणदर्शनाद् गौरिति ज्ञानमनुमानविपर्ययः ।

अत्यन्तदुर्दर्शनाभ्यासाच्च विपर्ययो भवतीत्याह–त्रयीदर्शनविपरीतेष्विति । त्रयाणां वेदानामृग्यजुःसाम्नां समाहारः त्रयी, अथर्ववेदस्तु त्रय्येकदेश एव । दृश्यते स्वर्गापवर्गसाधनभूतोऽर्थोऽनयेति दर्शनम्, त्रय्येव दर्शनं त्रयीदर्शनम्, तद्विपरीतेषु शाक्यादिदर्शनेषु

[टि०] [160] दृश्यते स्वर्गेति–अत्रानयेति [5]तात्पर्यं पर्यवसितं दर्शितम्, [6]अनेनेति तु कर्तव्यम्, अन्यथा स्त्रीत्वं [7]स्यात् ।

[8]अत्रैके इति :–एके प्राभाकराः । विवादास्पदं विपर्ययज्ञानं विपर्ययरूपं न भवति, तद्रूपतायां कारणशून्यत्वाद् यथा स्तम्भो विषाणं न भवति इति [9][प्रमाणम् । यदि रजतज्ञानम् इति]–एतेन विवादास्पदं ज्ञानं पुरोवर्तिवस्तुविषयं रजतार्थिनो नियमेन तत्र प्रवर्तकत्वात् [10]समीचीनरजतज्ञानवद् इति प्रमाणं सूचितम् । वृक्षसामान्यज्ञानेनापि दूरस्थः

[पं०] [160] धूलिपताकेति (कं. १७९.१८) धूलिलेखा ।

शाक्येति बौद्धस्याख्या । [11]भिन्नाकेति नास्तिकव्याख्या ; निर्ग्रन्थेति जैनस्याख्या । संसारमोचकेति (कं. १७९.२३) सुखिनो न हन्तव्याः; दुःखिनो जीवा हन्तव्यास्तद्घाते नास्ति पापं प्रत्युत दुःखमोक्षणात्तेषूपकारः कृतो भवति ततश्च धर्म इति उपदिशन्ति ते संसारमोचका उच्यन्ते । आदिशब्दाद्वैशेषिकदर्शनविपरीतसर्वदर्शनपरिग्रहः । शरीरेन्द्रिय-

[कु०] [160] तृतीयमुदाहरणं तमो वादे व्युत्पादि बाष्पादिभिरिति (कं. १७९.१८) । हेत्वाभासश्च हेतुत्व प्र[क्र]मेणानुमितिविपर्यये भवतीत्यर्थः ।

---

१ गवयदर्शनाच्च – कं. २; गवये विषाणमात्रदर्शनाच्च – पा. द. पु. । २ विपर्यय इति 'जे' पुस्तके नास्ति । ३ कृतके – कि । ४ नित्यदर्शनम् – जे । ५ तात्पर्यं दर्शितं–अ, ब; तात्पर्यं पर्यवसितं दर्शितं–ड । ६ अनेयेति कर्तव्यम् – अ, ब । ७ स्यात् अ. ब पुस्तकयोर्नास्ति । ८ केचिद् मु. अत्रैके – जे. १, जे. ३ । ९ [ ] एतच्चिह्नान्तर्गतः पाठः अ, ब पुस्तकयोर्नास्ति । १० स्तम्भवद् – अ. ब । ११ भिन्नक–कं. १, कं. २ ।

## न्यायकन्दली

शाक्यभिक्षकनिर्ग्रन्थकसंसारमोच[1]कादिशास्त्रेष्विदं श्रेय [2]इतीदं यदुपदिशन्ति तत्प्रमाणमिति ज्ञानं मिथ्याप्रत्ययः, तेषु कैश्चिदेवोपगृहीतेषु सर्वेषां वर्णाश्रमिणां विगानात्प्रमाणविरोधाच्च। तथा शरीरेन्द्रियमनःस्वात्माभिमानो विपर्ययस्तेभ्यो व्यतिरिक्तस्य ज्ञातुः प्रतिपादनात्। कृतकेषु वेदेषु नित्यत्वाभिमानो विपर्ययो मीमांसकानाम्। कारणवैकल्ये धर्माधर्मयोरभावे कार्योत्पत्तिज्ञानं सुखदुःखादिवैचित्र्यज्ञानं [3]विपर्ययो लोकायतिकानाम्। प्राणिनो न हिंसितव्या मलपङ्कादिकमशुचि न धारयितव्यमित्यादिकं हितमुपदिशत्सु वेदवृद्धेषु अहितमिति विज्ञानं प्राणिहिंसा परो धर्मो मलपङ्कादिधारणमेव [4]श्रेयः इत्यहितमुपदिशत्सु क्षपणकसंसारमोचकादिषु हितमिति [5]ज्ञानं तच्छिष्याणां विपर्ययः।

[टि०] शिशपायाँ प्रवर्तते न तु ज्ञानं शिशपाविषयमिति तद् व्यवच्छेदार्थं नियमेनेत्युक्तम्। [6]वृक्षसामान्यज्ञानं हि न निश्चयेन प्रवर्तयति किन्तु सन्देहादिति। तत्रानयोः इति:—गृह्यमाणस्मर्यमाणयोश्चाकचैक्यं सादृश्यं ग्रहणस्मरणयोस्तु [7]चाकचैक्यविशिष्टविषयतासादृश्यम्। [8]बाधककारणेति :— बाधकानां कारणदोषाणां चेत्यर्थः। ये तु शुक्तिकायामिति ये जरद्वेदान्तिनः॥ विपर्ययः॥

[पं०] मनस्स्विति (कं. १८०.१) शरीरेन्द्रियचित्तेषु। कारणवैकल्ये इति (कं. १८०.२) व्याख्येयपदं। धर्माधर्मयोरभाव इति (कं. १८०.३) व्याख्यानपदम्। कार्योत्पत्तिज्ञानमिति व्याख्येयपदम्। सुखदुःखादिवैचित्र्यज्ञानमिति व्याख्येयपदं प्राणिहिंसापरो धर्म इति (कं. १८०.५) संसारमोचकापेक्षम्। मलपङ्कादिधारणमेवाभ्यय इति क्षपणकापेक्षम्।

[कु०] अत्यन्तेति (कं. १७९-२०) अयमप्यनुमितिविपर्यय एव। शब्दस्याप्यनुमानान्तर्भावस्य वक्ष्यमाणत्वात्। कथमिदं विपर्यय इत्यत आह—तेष्विति (कं. १७९.२५)। हितमुपदिशत्सु वेदवृद्धेष्विति (कं. १८०.५)। लिङ्गे लिङ्गाभासभ्रमकृतो हितेऽहितत्व इत्यर्थः। अहितमुपदिशत्स्विति (कं. १८०.६) अहितं हितमित्युपदिशत्स्वित्यर्थः।

---

१ कादिषु—जे. ३। २ इतीदं यदुपदिशति—जे. १; इति यदुपदिशन्ति—कं. १, कं. २। ३ तच्छिष्याणां विपर्ययो लौकायतिकानाम्—कं. १, कं. २। ४ श्रेयस--कं. १, कं. २। ५ विज्ञानं—कं. १, कं. २। ६ वृक्षस्य सामान्यं—अ, वृक्षस्य सामान्यज्ञानं—ब, क। ७ वाचकचैक्य—ड। ८ बाधकारणेति मु. बाधककारणेति—जे. १, जे. ३।

न्यायकन्दली

[161] [1]अत्रैके वदन्ति–विपर्ययो नास्ति, कारणाभावात्। तदभावश्चेन्द्रियाणां यथार्थज्ञानजननस्वभावत्वात्। दोषवशादयथार्थमपि ज्ञानमिन्द्रियाणि जनयन्तीति चेन्न, [2]शक्तिमात्रविघातहेतुत्वाद्दोषाणाम्। [3]शुक्तिसंयुक्तमिन्द्रियं दोषोपहतशक्तिकं शुक्तिकात्वं न गृह्णाति, न त्वसन्निहितं रजतं प्रकाशयति दोषाणां संस्कारकत्वप्रसङ्गात्। यदि चाप्रत्यक्षमपि चक्षुरध्यक्षयति? सर्वस्य सर्ववित्त्वं केन [4]वार्यते? इदं रजतमिति ज्ञानस्य शुक्तिकालम्बनमि[5]ति च संविद्विरुद्धम्। यस्यां हि संविदि योऽर्थोऽ[6]वभासते स तस्या आलम्बनम्। रजतज्ञाने च रजतं प्रतिभाति, न शुक्तिका। न चागृहीतरजतस्य शुक्तौ तद्भ्रमः। तस्मादिदमिति शुक्तिकाविषयोऽनुभवो [7]रजतमिति च सदृशावबोधप्रबोधितसंस्कारमात्रजं दोषकृतं तदित्यंशप्रमोषं रजतस्मरणमिति द्वे इमे संवित्ती भिन्नविषये।

अत्रोच्यते–यदि रजतज्ञानं न शुक्तिकाविषयं किं त्वेषा रजतस्मृतिः, तदा

[पं०] [161] अत्रैके इति (कं. १८०.७) एके प्राभाकराः। तदभाव इति (कं. १८०.८) कारणाभावः। संस्कारकत्वप्रसङ्गादिति (कं. १८०.११) पूर्वं हि शुक्तिकाग्रहण एव सामर्थ्यमासीद् दोषैस्तु रजतग्रहणसामर्थ्यं कृतमिति संस्कारकत्वम्। अप्रत्यक्षमपि (कं. १८०.१२) इति रजतादिकर्मभूतम्। चक्षुरिति (कं. १८०.१२) कर्तृभूतम्। संविद्विरुद्धमिति (कं. १८०.१३) अनुभवविरुद्धम्। दोषकृतं तदित्यंशप्रमोषमिति (कं. १८०.१६) दोषैः कृतस्तदित्यंशस्य स्मरणकार्यस्य प्रमोषो यत्र तत्। तथाहि स्मरणे हि तदित्युल्लेखः स्यात् अत्र च इदमिति। अत इदमिति शुक्तिकालम्बनं रजतमिति तु स्मरणम्।

अत्रोच्यते इति (क. १८०.१७) श्रीधरेण। तस्मिञ्ज्ञाने इति (कं. १८०.१८) तस्मिन् ज्ञाने सतीति व्याख्येयम्। साधारणं रूपमिति (कं. १८०.२०) चाकचिक्यादि। [8]गृहीतिरूपतामात्रमिति–ग्रहणरूपतामात्रम्। सादृश्यादिति

[कु०] [1 1] ननु यदि विपर्ययो नाम कोऽपि प्रत्य[यः] स्यात्तदाऽविद्यायाश्चातुर्विध्यं भवेत्। स एव कारणतः स्वरूपतश्च नोपपद्यत इति वदतोऽख्यातिवादिन उत्थापयति [9]अत्रैक इति (कं. १८०.७)। इन्द्रियाणां यथार्थेति (कं. १८०.८) इतरथा तेभ्यो यथार्थज्ञानं कदाचिदपि न जायेतेति भावः। दोषाणां संस्कारकत्वेति (कं. १८०.११) तथा गुणत्वेन दोषत्वव्याघात इत्यर्थः। एतेन गुणसहायस्येन्द्रियस्य यथार्थानुभवजनकत्वं न स्वाभाविकमिति परास्तम्। स्वतोऽसत्याशक्तेर्गुणसहाय[य]णेऽपि कर्तुमशक्यत्वात्। यद्येवं रजतस्य तत्र तदानीमशक्यत्वात् कथमिदं रजतमिति ज्ञानस्योत्पत्तिरित्यत आह न चागृहीत इति (कं. १८०.१४)।

स्मृतेरनुभवदेश इति (कं. १८०.१९) स्वकारणसंस्कारहेतुभूतानुभवविषयदेश इत्यर्थः। स्यादेतत्, यदि ज्ञानात्प्रवृत्तिस्तदा तदनुभवप्रदेशे प्रवर्त्तेत, न चैवमास्माकीनोऽभ्युपगम इति परमतमाशङ्कते अथेति (कं. १८०.१९)।

---

१ अत्र केचिद्–कं. १, कं. २। २ शक्तिव्याघातमात्र–जे. १; शक्तिविघातमात्र–कं. १, कं. २; शक्तिमात्रव्याघात–जे. २। ३ शुक्तिसम्प्रयुक्तम्–जे. १। ४ वार्येत–कं. १, कं. २। ५ इति हि–कं. १, कं. २। ६ आभासते–जे. १। ७ रजतमिति–कं. १, कं. २। ८ प्रतीकमिदं मु. कं. इत्यत्र नास्ति। ९ अत्र केचिद्–कं।

## न्यायकन्दली

तस्मिन्ज्ञाने रजतार्थी पूर्वानुभूते एव रजते [1]प्रवर्तेत न शुक्तिकायाम्, स्मृतेरनुभवदेशे प्रवर्तकत्वात्। अथ मन्यसे–इन्द्रियेण [2]रजतस्य साधारणं रूपं शुक्तिकायां गृहीतम्, न शुक्तिकात्वं विशेषः, रजतस्मरणेन च तदित्युल्लेख[3]शून्येगृहीतिरूपतामात्रं बिभ्रताऽनिर्धारितदिग्देशं रजतमात्रमुपस्थापितम्, तत्रानयोर्गृह्यमाणस्मर्यमाणयोर्ग्रहणस्मरणयोश्च सादृश्याद्विशेषाग्रहणाच्च विवेकमनवधारयन् शुक्तिकादेशे प्रवर्तते, सामानाधिकरण्यं शुक्तिकारजतयोरध्यवस्यति रजतमेतदिति। तदप्ययुक्तम्, अविवेकस्याप्यग्रहणात्। रजताभेदग्रहो हि रजतार्थिनः शुक्तिकायां प्रवृत्तिकारणं न सादृश्यम्, भेदग्रहणं च ततो निवृत्तिकारणम्, तदुभयोरभावान्न प्रवर्त्तते न निवर्त्तेत इति स्यात्, न तु नियमेन प्रवर्त्तते, विशेषाभावात्। एवं सामानाधिकरण्यमपि न स्यादभेदाग्रहणस्यापि वैयधिकरण्यहेतोः सम्भवात्। तथा च प्रवृत्त्युत्तरकालीनो नेदं रजतमिति बाधकप्रत्ययोऽपि न घटते, शुक्तिकारजतयोर्भेदो न गृहीतो न तु तादात्म्यमध्यवसितं येनेदं प्रतिषिध्यते,

[पं०] (कं. १८०.२२) गृह्यमाणस्य चाकचिक्यादेः, साधारणरूपस्य स्मर्यमाणस्य च रजतस्य सादृश्यात्। सादृश्यं चेदं गृह्यमाणेऽपि तदित्युल्लेखो न तथापि स्मर्यमाणेऽपि नास्ति तदित्यंशस्य दोषैर्मुषितत्वात्। **विशेषाग्रहणाच्चेति** (कं. १८०.२२) शुक्तिकालक्षणविशेषाग्रहणाच्च। **अविवेकस्याप्यग्रहणादिति** (कं. १८०.२४) अविवेके हि गृहीते संविद्द्वयं न घटते। भवन्मते तु अविवेकग्रहणमपि न सिद्धयतीत्यर्थः। अविवेकस्याप्यग्रहणादित्यस्मात्पुरः 'तथा च सति' इत्यध्याहर्यम् तत इत्युक्तेः। **इति स्यादिति** (कं. १८०.२६) इति प्राप्नोति। न तु **नियमेन प्रवर्तते** इति (कं. १८०.२६) अत्र स्यादिति सम्बध्यते। ततश्च प्रवर्तते वेति न स्यादित्यर्थः। **अभेदाग्रहस्येति** (कं. १८१.१) भेदग्रहणस्य। **बाधकप्रत्ययोऽपि न घटते** (कं. १८१.३) इत्यस्मात्पुरा यत इत्यध्याहार्यम्। [4]**भेदो न गृहीत** इति (कं. १८१.३) काक्वा व्याख्येयम्। **अभेदाग्रहणादतद्व्यवहारप्रवृत्तेरपि सम्भवादिति** (कं. १८१.५) यथा भेदाग्रहणेन शुक्तौ

[टि०] साधारणं रूपं शुक्तिकाया इदमिति धर्मिमात्रमित्यर्थः। **सादृश्यादिति** (कं. १८०.२२) सम्यग्रजतसामान्यविशेषाभ्यां गृह्यमाणस्मर्यमाणयोस्तद् ग्रहणाभ्यां च ग्रहणस्मरणयोः सादृश्यम्, अन्यतरस्यापि तदित्यंशविरहः अध्यवस्यति अवहरतीत्यर्थः। **अविवेकस्यापीति** (कं. १८०.२४) यथा निवृत्तिकारणस्य भेदग्रहणस्याभावान्न निवृत्तिः, तथा प्रवृत्तिकारणस्याविवेकग्रहणस्याभावान्न [प्र]वृत्तिरपि स्यादित्यर्थः। तदेव विभजते [5]**रजतावभेदेति** (कं. १८०.२४) सम्यग् रजते रजतादभेदेति सम्यग्रजतार्थिनः प्रवृत्तौ रजतादिभेदग्रहकारणमवगतं शुक्तिकायामपि तदेव वक्तव्यम्। इतरथा प्रवृत्तेरनियतहेतुकत्वप्रसङ्गादित्यर्थः। न च सम्यग्रजतेऽपि भेदाग्रह एव प्रवृत्तिकारणम्, अतो नानियतहेतुकत्वमिति वाच्यम्। यथाख्यातिना ये रजतपुरोवर्तिनोरभेदग्रहणमरज[त]वर्तिनोरभेदग्रहणेन व्याप्तं तथा तवापी नेज्ये? रजतभेदाग्रहवदरजतभेदाग्रहोऽप्यङ्गीकर्तव्यः; इतरथा विपरीतख्यात्यापत्तेः। तथा च पूर्वोक्तदोषानतिवृत्तिः। न केवल प्रवृत्त्यनुपपत्तिर्दूषण, बाधकानुपपत्तिश्चेत्याह–**रजतव्यवहारस्येति** (कं. १८१.४)। न तादात्म्यं प्रतिषिध्यते,

---

१ प्रवर्तते–जे. १। २ रजतसाधारणं–जे. १, जे. २। ३ शून्येनाऽनिर्धारित–कं. १, कं. २। ४ भेदे–कं। ५ रजताभेद–कं।

न्यायकन्दली

भेदाग्रहणप्रसञ्जितस्य शुक्तिकायां रजतव्यवहारस्यायं प्रतिषेध इति चेन्न, अभेदाग्रहणादतद्व्यवहारप्रवृत्तेरपि सम्भवात्। अस्ति च शुक्तिकादेशे रजतार्थिनः प्रवृत्तिः, अस्ति च सामानाधिकरण्यप्रत्ययो रजतमेतदिति, अस्ति च बाधकप्रत्यय इदन्ताधिकरणस्य रजतात्मता[1]निषेधपरः। तेनावगच्छामः [2]शुक्तिसंयुक्तेनेन्द्रियेण दोषसहकारिणा रजतसंस्कारसचिवेन सादृश्यमनुरुन्धता शुक्तिकाविषयो रजताध्यवसायः कृतः।

यच्चेदमुक्तं शुक्तिकालम्बनत्वमनुभवविरुद्धमिति, तदसारम्। इदन्तया नियतदेशाधिकरणस्य [3]चाकचिक्यविशिष्टस्य शुक्तिकाशकलस्यापि प्रतिभासनात्। हानादिव्यवहारयोग्यता चालम्बनार्थः, स चात्रैव सम्भवति। योऽपि भेदाग्रहाच्छुक्तौ रजतव्यवहारप्रवृत्तिमिच्छति, तेनापि विपर्ययोऽङ्गीकृतः, अतस्मिंस्तदिति व्यवहारप्रवृत्तेरेव विपर्ययत्वात्। यच्च शक्ति[4]व्याघातमात्रहेतुत्वं दोषाणा[5]मिति, तदपि न किञ्चित्, वातादिदोषदुष्टानां धातूनां रोगान्तरजननोपलम्भात्। सर्वस्य सर्वविरुद्धं च

[पं०] रजतव्यवहारः प्रसज्यते एवमभेदाग्रहणेनारजतव्यवहारप्रवृत्तिरपि सम्भवति। रजतव्यवहारोऽपि हि भेदाग्रहणेन प्रसञ्जितः। तद्विपरीतेऽभेदाग्रहणे अरजतव्यवहारः स्यात् इति भावः। **इदन्ताधिकरणस्येति** (कं. १८१.७) शुक्तिरूपस्य।

[6]**स चात्रैवेति** (कं. १८१.१२) अत्रैव शुक्तिशकले। ननु ज्ञानं रजतविषयं जातं तच्चार्थे व्यभिचरितम् अर्थस्य शुक्तित्वात्। तस्मादत्र ज्ञानस्यार्थव्यभिचारित्वे दृष्टे सर्वेष्वपि ज्ञानेष्वविश्वास एवेति पराभिप्रायमाशङ्क्याह **न च ज्ञानस्येत्यादि** (कं. १८१.१६) **बाधककारणदोषाणामित्यादि** (कं. १८१.१७) बाधकानि यानि यानि प्रमाणानि तेषां कारण[दो]षाणां च इन्द्रियगततिमिरादीनामनुपलम्भादेव यत्राभावः सिद्धः तत्र। **तद्व्याप्तस्येति** (कं. १८१.१७) दोषव्याप्तस्य। व्याप्यस्य विषयो यस्याऽभावेऽवगत एव व्यापकं हि निवर्तमानं व्याप्यमादाय निवर्तते व्यापका

[कु०] अप्रसक्तत्वादित्यभिप्रायः। न, **अभेदाग्रहणादिति** (कं. १८१.५) यथा भेदाग्रहणादिदं रजतमित्यस्य व्यवहारस्य प्रसक्तिः, एवमभेदस्याप्यग्रहणान्नेदं रजतमिति व्यवहारोऽयं सिद्ध एव। किं प्रमाणान्तरेण बाधकेनेत्यर्थः।

तदेवमेभिस्तर्करेतानि सूचितानि। विमतं शुक्तिकाशकलं रजतज्ञानविषयम्, [7]अव्यवधानेन रजतार्थिप्रवृत्तिविषयत्वात्, सम्प्रतिपन्नरजतवदिति रजत एव समानाधिकरणपदान्तरवाच्यत्वात् सम्यग्रजतं नेदं रजतमिति बाधकप्रत्ययविषयत्वाद्यद्बाध्यज्ञानस्य विषयः नासौ बाधकज्ञानस्य, यथा घट इति व्यतिरेकी। एतेषां स्वरूपासिद्धिं परिहरति **अस्ति चेति** (कं. १८१.७)।

**यच्चेदमिति** (कं. १८१.१०) अनेन हीनं प्रत्यनुमानं विवक्षितम्। रजतज्ञानं न शुक्तिकालम्बनं रजतज्ञानात् सम्प्रतिपन्नरजतज्ञानवदिति। अस्य कालात्ययापदिष्टत्वमाह–**इदन्तयेति** (कं. १८१.११)। ननूभयोरपि प्रतिभासमानत्वाविशेषे शुक्तिकाशकलमेवालम्बनमिति कुतो विनिगमनेत्यत आह **हानादीति** (कं. १८१.१२)। **व्यवहारप्रवृत्तेरेव**

१ निषेधकरूपः–जे. ३। २ शुक्तिसम्प्रयुक्तेन–जे. १। ३ चाकचाक्य–जे. १; चाकचक्य–जे. २; चाकचैक्य–जे. ३। ४ व्याघातहेतुत्वं–कं. १, कं. २। ५ मपि–जे. १। ६ स–कं। ७ अन्ययं–MS।

न्यायकन्दली

दोषाणां शक्तिनियमादेव पराहतम्। न च ज्ञानस्यार्थव्यभिचारे सर्वत्रानाश्वासः, यत्नेनान्विष्यमाणानां [1]बाधककारणदोषाणामनुपलम्भादभावसिद्धौ तद्व्याप्तस्य विपर्ययस्याभावावगमादेव विश्वासोपपत्तेः।

विपर्ययानभ्युपगमे च द्विचन्द्रज्ञानस्य का गतिः? दोषव्यतिभिन्नानां चक्षूरश्म्यवयवानां च पृथङ्‌ निर्गत्य [2]पतितानां चन्द्रमसि जनितस्य ज्ञानद्वयस्यायं द्वित्वावभास इति चेन्न, ज्ञानधर्मस्य चक्षुषा ग्रहणाभावात्। ज्ञानधर्मो ज्ञेयगतत्वेन गृह्यमाणो ज्ञेयग्राहकेणैवेन्द्रियेण गृह्यत इत्यभ्युपगमे तु भ्रान्तिः समर्थिता स्यात्, अन्यधर्मस्यान्यत्र ग्रहणात्। इत्यलमतिप्रकोपितैः श्रोत्रियद्विजन्मभिरित्युपरम्यते।

ये तु शुक्तिकायां रजतप्रतीतावलौकिकं रजतं वस्तुभूतमेव प्रतीयत इति वदन्तो विपर्ययाभावं समर्थयन्ति, तेषामस्मिञ्ज्ञाने प्रवृत्तिर्न स्यादलौकिकस्यार्थक्रियाहेतुत्वानवगमात्।

[पं०] बाधककारणदोषाः, व्याप्यस्तु विपर्ययो व्यापकेषु बाधककारणदोषेषु निवर्तमानेषु व्याप्यो विपर्ययोऽपि निवृत्तो, विपर्ययनिवृत्तौ च ज्ञाने विश्वासः सिद्ध्यति। शुक्तौ रजतज्ञाने तु बाधककारणदोषाश्च सन्तीति वाक्यार्थः।

**दोषव्यतिभिन्नानामिति** (कं. १८१.१९) दोषमिश्रितानाम्। **जनितस्येति** (कं. १८१.२०) चक्षुरश्म्यवयवैरेवोत्पादितस्य। **ज्ञानधर्मस्येति** (कं. १८१.२१) द्वित्वावभासस्य। **ज्ञेयगतत्वेनेति** (कं. १८१.२२) चन्द्रगतत्वेन। **भ्रान्तिः समर्थिता स्यादिति** (कं. १८१.२३) यथा पीतप्रतिभासो ज्ञानस्य धर्मो ज्ञेये शङ्खे गृह्यमाणे भ्रान्तिरूपः। **अन्यधर्मस्येति** (कं. १८१.२३) ज्ञानधर्मस्य। **अन्यत्रेति** (कं. १८१.२३) ज्ञेये चन्द्रे। अलमित्या (कं. १८१.२३) द्युपहासवाक्यम्। **श्रोत्रियद्विजन्मभिरिति** (कं. १८१.२३) भाट्टैः। श्रोत्रियद्विजन्मानो हि शापानुग्रहसमर्था भवन्तीति न प्रकोपनीया इत्युपहासः।

**ये त्विति** (कं. १८१.२४) जरद्वेदान्तिनः।

......... ......... .........

[कु०] **विपर्ययत्वादिति** (कं. १८१.१४) तदवाच्ये तद्वाच्यत्वज्ञानमपि विपर्यय इत्यर्थः। **वातादीति** (कं. १८१.१५) औत्सर्गिककार्यप्रतिबन्धने कार्यान्तरजनकत्वेन दोषाणां न गुणत्वं, गुणानामौत्सर्गिककार्यातिशयकारणत्वादिति भावः। **यत्नेनेति** (कं. १८१.१७) व्यापकनिवृत्त्या व्याप्यनिवृत्तिरित्यर्थः।

**विपर्ययानभ्युपगम** इति (कं. १८१.१९) नहीदं रजतमितिवत्तादात्म्यारोपः येन भेदाग्रहोऽतिवाहकः स्यादित्यभिप्रायः।

अनिर्वचनीयख्यातिवादिन[मु]त्थाप्य दूषयति **ये त्विति** (कं. १८१.२४) **अलौकिकस्यार्थक्रियायोगादिति** (कं. १८१.२६) इहालौकिकं नाम विचारासहमुच्यते, तस्य तथैव प्रतीतौ प्रवृत्त्यनुपपत्तिः। लौकिकत्वेन परिस्फुरणे विपरीतख्यात्यापत्तिः। एतेनासत्ख्यातिः–स्वाकारबाह्यज्योतिमपि (तीरूपि) निरस्ते। असतः स्वाकारस्य चाऽसत्तया स्वाकारतया च परिस्फुरणे प्रवृत्त्यनुपपत्तेः। सत्तया बाह्यतया परिस्फुरणेऽन्यथाख्यात्यापत्तेरिति॥

[इति विपर्ययः]

१ बाधकारण–कं. १, कं. २। २ पततां–जे. १। ३ रूपस्य–ब। ४ °स्यार्थक्रियाहेतुत्वानवगमात्–कं।

### प्रशस्तपादभाष्यम्

[162] अनध्यवसायोऽपि प्रत्यक्षानुमानविषय एव सञ्जायते । तत्र प्रत्यक्षविषये तावत् प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा व्यासङ्गा[1]दनर्थित्वाद्वा किमित्यालोचनमात्रमनध्यवसायः । यथा वाहीकस्य पनसादिष्वनध्यवसायो भवति । [2]तत्र सत्ताद्रव्यत्वपृथिवीत्ववृक्षत्व [3]रूपवत्त्वादिशाखाद्यपेक्षोऽ[4]ध्यवसाय एव । पनसत्वमपि पनसेष्वनुवृत्तमाम्रादिभ्यो व्यावृत्तं प्रत्यक्षमेव, केवलं तूपदेशाभावाद्विशेषसंज्ञाप्रतिपत्तिर्न भवति ।

### न्यायकन्दली

[162] अनध्यवसायोऽपि प्रत्यक्षानुमानविषये सञ्जायते । प्रत्यक्षानुमानविषये विपर्ययस्तावद्भवति, अनध्यवसायोऽपि भवतीत्यपिशब्दार्थः । प्रत्यक्षविषये तावदनुमानविषये क्रमेणानध्यवसायो वक्तव्य इत्यभिप्रायेण क्रमवाचिनं तावच्छब्दमाह—प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा [5]व्यासङ्गादनर्थित्वाद्वा किमित्यालोचनमात्रमनध्यवसायः । प्रसिद्धाश्च ते अर्थाश्च प्रसिद्धार्थाः, येऽर्थाः पूर्वं ज्ञातास्तेषु व्यासङ्गादन्यत्रासक्तचित्तत्वाद्विशेषप्र[6]तीत्यनर्थित्वाद्वा किमित्यालोचनमात्रम् । [7]गतेऽपि प्रसिद्धे राजनि कोप्यनेन पथा गत इति ज्ञानमात्रमनवधारितविशेषमनध्यवसायः । अप्रसिद्धेष्वपरिज्ञानादेवानध्यवसायो यथा

[टि०] [162] (॥ अथ अविद्याभेदनिरूपणे अनध्यवसायनिरूपणम् ॥)

**उभयविशेषानुस्मरणाद्** इति—एतेन उपलब्धानुपलब्धविशेषविषयं ज्ञानमनध्यवसायः उपलब्धविशेषविषयं तु संशय इति । तथाऽस्पृष्टानेककोटिकमनवधारणात्मकं ज्ञानमनध्यवसायः अनवस्थितानेककोटिकं ज्ञानं संशय इति लक्षणे सूचिते ।

(॥ इति अनध्यवसायनिरूपणम् ॥)

[पं०] [162] **क्रमेणेति** (कं १८२.१४) प्रत्यक्ष[8]भणनानन्तरं निर्विकल्पकप्रत्यक्षमेवेत्यतः पुरस्तार्हि अनध्यवसायत्वं कुत इत्याह **केवलमित्यादि** (कं. १८२.२३)।

[कु०] [162] **अनवधारितविशेषमिति** (कं. १८२.१८) अनिश्चयात्मकज्ञानविषयीकृतोऽत्र विग्रहः । तदनेन लक्षणमुक्तम् । अत्र चानवधारितपदेन निश्चयाद् व्यावृत्तिः । शेषस्यैकत्वविवक्षया संशयादिति । व्यासङ्गो नार्थिना च प्रसिद्धेष्वनध्यवसायकारणमुक्तमप्रसिद्धेषु किमित्यत आह—**अप्रसिद्धेष्विति** (कं. १८२.१९) । [9]वाल्हिक[वाहीक] इत्यस्याप्रसिद्धपनसावलक्षणतां दर्शयति [10]**उदग्देशेति** (कं. १८२.२०) । **विशेषसञ्ज्ञाप्रतिपत्तिर्न भवतीति** (कं. १८३.१) विशेषसञ्ज्ञानिश्चयो न भवतीत्यर्थः । एतदेवाह—**पनसशब्देति** (कं. १८३.१) ।

---

१ ताडपत्रीय कन्दल्यनुसारी पाठोऽयम्—पा. १.७ पु. इत्यत्रापि । २ तत्र हि—दे । ३ रूपादि—दे । ४ ऽध्यवसायो भवति—कं. १, कं. २ कि । ५ व्यासङ्गादर्थित्वाद्—कं. १, कं. २ । ६ त्यर्थित्वाद्—कं. १, कं. २ । ७ गते—कं १, कं २ । ८ प्रत्यक्षविषयभणना० —ब । ९ वाहीक—कं । १० दक्ष—कं ।

### प्रशस्तपादभाष्यम्

अनुमानविषयेऽपि नारिकेलद्वीपवासिनः सास्नामात्रदर्शनात् को नु खल्वयं प्राणी स्यादित्यनध्यवसायो भवति ।

### न्यायकन्दली

वाहीकस्य पनसादिष्वनध्यवसायो भवति, [1]टक्कदेशोद्भवस्य पनसादिष्वनध्यवसाय इत्यर्थः । [2]तत्रापि पनसे सत्त्वद्रव्यत्वपृथिवीत्ववृक्षत्व[3]रूपत्वादिशाखाद्यपेक्षोऽध्यवसाय एव, [4]द्रव्यमेतत्पार्थिवोऽयं वृक्षोयं रूपादिमान् शाखादिमांश्चेत्यवधारणात् । पनसत्वमपि पनसेऽनुवृत्तमाम्रादिभ्यो व्यावृत्तं निर्विकल्पकप्रत्यक्षमेव । केवलं त्वस्य पनसशब्दो नामधेयमित्युपदेशाभावाद्विशेषसंज्ञाप्रतिपत्तिर्न भवति पनसशब्दवाच्योऽयमिति प्रतिपत्तिर्न भवति, किन्तु किमप्यस्य नामधेयं भविष्यतीत्येतावन्मात्रप्रतीतिः स्यात् । सेयं सञ्ज्ञाविशेषानवधारणात्मिका प्रतीतिरनध्यवसायः ।

अनुमानविषयेऽपि [5]नालिकेरद्वीपवासिनः सास्नामात्रदर्शनात् को नु खल्वत्र प्रदेशे प्राणी स्यादित्यनध्यवसायः । [6]नालिकेरद्वीपे गवामभावात् तत्रत्यो लोकोऽप्रसिद्धगोजातीयः, तस्य देशान्तरमागतस्य वने सास्नामात्रदर्शनात् सामान्येन पिण्डमात्रमनुमाय

[पं०] तत्रेति (कं. १८३.७) पिण्डमात्रे । परवाक्यं नन्वयमित्यादि (कं. १८३.९) । श्रीधरवाक्यं नेति (कं. १८३.९) । कारणभेदमाह उभयेत्यादिना (कं. १८३.१०) । [7]अप्रतीतविशेषविषयत्वेनेत्यादि (कं. १८३.१०) संशयो हि प्रतीतविशेषविषय एव स्यात् अस्य त्वनध्यवसायस्य प्रसिद्धार्थेषु प्रतीतिविशेषविषयत्वम्, अप्रतीतविशेषविषयत्वमपि दृष्टं तस्मादनध्यवसायः संशयात्पृथगिति भावः । स्वरूपभेदमाह तथानवस्थितोभयेत्यादि (कं. १८३.११) ।

× × × × ×

[कु०] सास्नामात्रदर्शनात् [8][सामान्येन]पिण्डमात्रमनुमायेति (कं. १८३.४) चेष्टाविशेषेण प्राण्यवयवत्वमनुमायावयवेनावयविनमनुमाय तस्यैवावयवस्य पूर्वप्रसिद्धप्रामाण्यसम्बन्धितया को नु खल्वयं प्राणीत्यनध्यवसायं करोतीत्यर्थः । ज्ञानस्य कथमनध्यवसायत्वमत आह – [9]अध्यवसायादिति (कं. १८३.८) । प्रतीते विशेषे तेन तस्य स्मरणं नास्तीत्यर्थः । व्यवहारानङ्गत्वादिति (कं. १८३.१२) हानादिव्यवहारानङ्गत्वादित्यर्थः । न तु ज्ञानसामान्यस्य विशेषजिज्ञासामात्रमनध्यवसायः इच्छायाः स्वविषयज्ञानपूर्वकत्वनियमादिति ।

[ इत्यनध्यवसायः ]

---

१ टक्कदेशोद्भवस्य–जे. १ । भवति इति जे. १, जे. २, जे. ३ इति पुस्तकेषु नास्ति । २ तत्र हि–जे. १, जे. २, जे. ३ । ३ रूपादि – जे. १, जे. २, जे. ३ । ४ द्रव्यमेव तत् – जे. १ । ५–६ नारिकेल – कं. १; कं. २ । ७ प्रतीति– कं. १; कं. २ । ८ कन्दल्यामिदं पदमस्ति – सं । ९ अध्यवसायविशेषावधारणज्ञानात् – कं ।

प्रशस्तपादभाष्यम्

[163] [1]उपरतेन्द्रियग्रामस्य प्रलीनमनस्कस्येन्द्रियद्वारेणैव यदनुभवनं मानसं तत् स्वप्नज्ञानम् ।

कथम् ? यदा बुद्धिपूर्वादात्मनः शरीरव्यापारादहनि [2]खिन्नास्य प्राणिनो निशि विश्रामार्थमाहारपरिणामार्थं वादृष्टकारितप्रयत्नापेक्षादात्मान्तः[3]करणसंयोगात् मनसि

न्यायकन्दली

तत्र जातिविशेषविषयत्वेन को नु खल्वत्र प्राणी स्यादित्यनवधारणात्मकं ज्ञानमनध्यवसायः, [4]अध्यवसायादविशेषावधारणज्ञानादन्यदिति व्युत्पत्त्या । नन्वयं संशय एव, अनवधारणात्मकत्वात् । न, कारणभेदात्, स्वरूपभेदाच्च । किञ्च, उभयविशेषानुस्मरणात् संशयो न त्वनध्यवसायः, प्रतीतिविशेषविषयत्वेनाप्यस्य [5]सम्भवात् । तथानवस्थितोभयकोटिसंस्पर्शी संशयो न त्वयमिति भेदः । विद्या त्वयं न भवति, व्यवहारानङ्गत्वादिति ।

[163] स्वप्ननिरूपणार्थमाह–उपरतेन्द्रियग्रामस्येत्यादि । उपरतः स्वविषयग्रहणाद्विरत इन्द्रियग्रामो यस्य असावुपरतेन्द्रियग्रामः । प्रकर्षेण सर्वात्मना लीनं मनो यस्यासौ प्रलीनमनस्क इति । तस्योपरतेन्द्रियग्रामस्य प्रलीनमनस्कस्येन्द्रियद्वारेण यदनुभवनं पूर्वाधिगमा[6]नपेक्षं परिच्छेदस्वभावं मानसं मनोमात्रप्रभवं तत् स्वप्नज्ञानम् ।

[टि०] [163-164]     (।। अथ अविद्याभेदनिरूपणे स्वप्ननिरूपणम् ।।)

सैव चिन्तासन्ततिः इति–[7]चित्तसन्तत्याकारः साक्षादिवार्थाविभासो जायते इत्यर्थः । चित्तसन्ततेस्तु क्षणिकत्वेन [8]परिणामवादानभ्युपगमेन [9]तथा चात्र प्रत्यक्षाकाररूपताया अयोगादिति ।। स्वप्नः ।।

(।। इति बुद्धिप्रकरणे अविद्यानिरूपणम् ।।)

[पं०] [163] आत्मनः शरीरेत्यादि (कं. १८४.२१) [10]गद्ये रसादिभावेन परिणामार्थं च निश्चलं मनस्तिष्ठतीत्येवं

[कु०] [163] स्वप्ननिरूपणार्थमिति (कं. १८४.१६) निरूप्यतेऽनेनेति निरूप[ण]लक्षणं तदर्थमित्यर्थः । अत्र चोपरतेन्द्रियग्रामस्येत्यनेन विद्याविपर्ययसंशयानध्यवसायेभ्यो व्यवच्छेदः । अनुभवनमित्यनेन स्मृतः । प्रलीनमनस्कस्येन्द्रियव्यापारो परमहेतुः । इन्द्रियद्वारे[11]णैवेति (कं. १८४.१९) कदाचिदिह शय्यायामहं सन्निविष्टोऽभूवमिति यथार्थस्यापि स्वप्नज्ञानस्य इन्द्रियद्वारतया अयथार्थत्वादविद्यात्वं दर्शयितुम्–अहनीति (कं. १८५.१)। जागरावस्थोप-

१ तत्र हि उपरते...दे । २ खिन्नानां प्राणिनां–कं. १, कं. २ । ३ करणसम्बन्धात्–कं. १, कं. २ । ४ वसायविशेष–कं. १; कं. २ । ५ भावात्–जे. १ । ६ नपेक्ष्यम्–जे. १ । ७ चित्सन्तत्याकारः–अ, ब; ८ परिणामे–अ, ब; ९ तथात्र–अ, ब; १० भावेन–ब । ११ एव–कन्दल्यां नास्ति ।

### प्रशस्तपादभाष्यम्

क्रियाप्र[1]बन्धादन्तर्हृदये निरिन्द्रिये आत्मप्रदेशे [2]यदा निश्चलं मनस्तिष्ठति, तदा प्रलीन-मनस्क इत्याख्यायते। प्रलीने च तस्मिन्नुपरतेन्द्रियग्रामो भवति, तस्यामवस्थायां प्रबन्धेन प्राणापानसन्तानप्रवृ[3]त्तावात्ममनःसंयोगविशेषात् स्वापाख्यात् संस्काराच्चेन्द्रियद्वारेणैवा-सत्सु विषयेषु प्रत्यक्षाकारं स्वप्नज्ञानमुत्पद्यते।

### न्यायकन्दली

यदा यथा पुरुषस्य मनः प्रलीयते इन्द्रियाणि च विरमन्ति तद्दर्शयति—कथमित्या-दिना। आत्मनः शरीरव्यापाराद् [4]गमनागमनादिलक्षणाद् बुद्धिपूर्वादह्नि खिन्नस्य परिश्रान्तस्य प्राणिनो निशि रात्रौ विश्रामार्थं श्रमोपशमार्थं भुक्तपीतस्याहारस्य रसादि-भावेन परिणामार्थं चादृष्टेन कारितं प्रयत्नम[5]पेक्षमाणादात्मान्तःकरणसंयोगान्मनसि यः क्रियाप्रबन्धः क्रियासन्तानो जातस्तस्मादन्तर्हृदये निरिन्द्रिये बाह्येन्द्रियसम्बन्धशून्ये आत्मप्रदेशे निश्चलं मनस्तिष्ठति यदा, तदा पुरुषः प्रलीनमनस्क इत्याख्यायते। प्रलीने च तस्मिन् मनस्युपरतेन्द्रियग्रामो भवति, अन्तःकरणानधिष्ठितानामिन्द्रि-याणां विषयग्रहणाभावात्। तस्यां प्रलीन[6]मनस्काऽवस्थायां प्रबन्धेन बाहुल्येन प्राणापानवायु[7]सन्तानस्य निर्गमप्रवेशलक्षणायां प्रवृत्तौ सम्भवन्त्यामात्ममनः[8]संयोगात् स्वापाख्यात् स्वाप इति नामधेयात् संस्काराच्च पूर्वानुभूतविषयादसत्सु देशकालव्यव-हितेषु विषयेषु प्रत्यक्षाकारमपरोक्षसंवेदनाकारं स्वप्नज्ञानमुत्पद्यते।

[पं०] पदसम्बन्धः। अत्रैव गद्ये निरिन्द्रिय (कं. १८५.४) इति व्याख्येयपदम्, बाह्येन्द्रियसम्बन्धशून्ये (कं. १८५.४) इति व्याख्यानपदम्। प्राणापानवायुसन्तानस्येति (कं. १८५.८) उच्छ्वास निःश्वास एव न प्रवाहः स्यात्तदा।

[कु०] लक्षणम्। निशीति (कं. १८५.१) शयनोपलक्षणम्। उपरतेन्द्रिय[10]ग्रामो [11]न भवती[ति] (कं. १८५.६) स्वकार्यानुत्पाद एवेन्द्रियाणामु[प]रतिः। एतदेवाह अन्तःकरणेति (क. १८५.६)। प्राणापानसन्तानस्य प्राणापान-क्रियासन्तान एव तद्वति वायावुपचर्यते। प्राणापानप्रवृत्तिप्रतिपादनं च आहारस्य रसादिपरिणा[मा]य जाठरास्याग्ने-रूर्ध्वज्वलनं प्रतिपादयितुम्। [12]असत्स्वेतद्देशकालव्यवहितेष्विति (कं. १८५.९) विष[13]विषय[प]देनात्यन्तासतः शशविषाणादेर्व्यभिचारं निवर्तयति। अथाप्ययथार्थत्वादविद्यात्वमस्य स्फुटं द्रष्टव्यम्।

---

१ सम्बन्धात्—दे। २ 'यदा'—कं. १, कं. २ दे पुस्तकेषु नास्ति। ३ प्रवृत्तादात्म—दे। ४ गमनागमनादह्नि—कं. १, कं. २। ५ मपेक्ष्यमाणा—जे. १। ६ मनोऽवस्थायां—कं. १; कं. २। ७ सन्तान—कं. १, कं. २। ८ संयोगात् स्वाप इति—जे. १। ९ सन्ताननिगम्—कं। १० ग्राम्यो—Ms.। ११ 'न'—कन्दल्यां नास्ति। १२ असत्सु देशकाल—कं। १३ अत्र पूर्वानुभूतविषय इति पाठन सन्दर्भदृष्ट्या भाव्यमिति भाति—सं।

### प्रशस्तपादभाष्यम्

[164] [1]तत्तु त्रिविधम्–संस्कारपाटवाद्धातुदोषाददृष्टाच्च ।

तत्र संस्कारपाटवात् तावत् कामी क्रुद्धो वा यदा यमर्थमादृतश्चिन्तयन् स्वपिति, तदा सैव चिन्तासन्ततिः प्रत्यक्षाकारा सञ्जायते ।

धातुदोषाद्वातप्रकृतिर्वातदूषितो वा आकाश[3]गमनादीनि पश्यति । पित्तप्रकृतिः पित्तदूषितो वाग्निप्रवेशकनक[4]पर्वतादीनि पश्यति । श्लेष्मप्रकृतिः श्लेष्मदूषितो वा सरित्समुद्र[5]प्रतरणहिमपर्वतादीन् पश्यति ।

### न्यायकन्दली

[164] तत्तु त्रिविधम् । कुत [6]इत्यत्राह–संस्कारपाटवाद्धातुदोषाददृष्टाच्चेति ।

संस्कारपाटवात् तावत् कामी क्रुद्धो वा यदा यमर्थं प्रियतमां शत्रुं वादृतोऽ[7]नन्यमनाश्चिन्तयन् स्वपिति, तदा सैव [8]चिन्तासन्ततिः संस्कारातिशयात् प्रत्यक्षाकारा साक्षादर्थविभासिनी सञ्जायते ।

शरीरधारणाद्धातवो वसासृङ्मांसमेदोमज्जास्थिशुक्रात्मानः, तेषां दोषाद् वातादिदूषितत्वाद्विपर्ययो भवतीत्याह–वातप्रकृतिर्यदि वा कुतश्चिन्निमित्तादुपचितेन वातेन दूषितः स्वात्मन आकाशगमनमितस्ततो धावनमित्यादिकं पश्यति । पित्तप्रकृतिः पित्तदूषितो वा अग्निप्रवेशकनकपर्वताभ्युदितार्कमण्डलादिकं पश्यति । श्लेष्मप्रकृतिः श्लेष्मदूषितो वा सरित्समुद्रप्रतरणहिमपर्वतादीन् पश्यति ।

[पं०] [164] सैव चिन्तासन्तति(कं. १८५.१३)रित्यादि । चित्तसन्तत्याकारः साक्षादिवार्थभासे जायते इत्यर्थः ।

कुतश्चिन्निमित्तादिति (कं. १८५.१६) चिन्ताभयजागरलङ्घनादौ । अनेन वातस्यागन्तुकतां लक्षयति । पित्तदूषित इति (कं. १८५.१७) शुंठीमरिचादितीक्ष्णद्रव्यसेवा क्रोधादिवशोद्भूतागन्तुकपित्तप्लावितः । श्लेष्मदूषित

[कु०] [164] तदा सैवेति (कं. १८५.१३) तज्जनितसंस्कारकार्यः कोऽपि प्रत्ययविशेषः । कार्यकारणयोरभेदोपचारा[त्] सैवेत्युच्यते । यदाह संस्कारातिशयादिति (कं. १८५.१५) । तेषां दोषादिति (कं. १८५.१४) दोषविशेषस्य स्वप्नविशेषहेतुत्वमागमसिद्धं द्रष्टव्यम् । स्वयमनुभूतेषु [10]परत्र प्रसिद्धेष्विति (कं. १८५.१९) केवलं परसम्बन्धितया पूर्वं प्रसिद्धेष्वित्यर्थः । संस्कारधर्माभ्यामिति (कं. १८५.२१) । तृतीयस्या विधाया संस्कारस्यापि

---

१ 'तत्तु त्रिविधम्' इति दे पुस्तके नास्ति ।  २ तदु–कं. १, कं. २ ।  ३ गमनादीन्–कं. १, कं. २, कि ।  ४ पर्वतादीन्–कं. १, कं. २ कि ।  ५ प्रतरणादीनि–दे ।  ६ इत्याह–संस्कारपाटवादिति–कं. १, कं. २ ।  ७ नुमन्यमानश्चिन्तयन्–कं. १, कं. २ ।  ८ चिन्तासन्ततिः स्मृतिसन्ततिः–कं. १, कं. २ ।  ९ यदा–जे. १ ।  १० परत्रा–कं ।

प्रशस्तपादभाष्यम्

यत्स्वयमनुभूतेष्वननुभूतेषु वा प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा यच्छुभावेदकं गजारोहणच्छत्रलाभादि, तत्सर्वं संस्कारधर्माभ्यां भवति। विपरीतं च तैलाभ्यञ्जनखरोष्ट्रारोहणादि तत्सर्वमधर्मसंस्काराभ्यां भवति। अत्यन्ताप्रसिद्धाऽर्थेष्वदृष्टादेवेति।

स्वप्नान्तिकं यद्यप्युपरतेन्द्रियग्रामस्य भवति, तथाप्यतीतस्य ज्ञानप्रबन्धस्य प्रत्यवेक्षणात् स्मृतिरेवेति भवत्येषा चतुर्विधाऽविद्येति।

न्यायकन्दली

स्वयमनुभूतेषु परत्राप्रसिद्धेषु स्वयमननुभूतेषु परत्र प्रसिद्धेषु स्वयमनुभूतेषु वा परत्राप्रसिद्धेषु सत्सु यद्गजारोहणच्छत्रलाभादिकं शुभावेदकं स्वप्ने दृश्यते, तत्सर्वं संस्कारधर्माभ्यां भवति। शुभावेदकविपरीतं तैलाभ्यञ्जनखरोष्ट्रारोहणाद्यधर्मसंस्काराभ्यां भवति। अत्यन्ताप्रसिद्धेषु स्वतः परतश्चाप्रतीतेषु चन्द्रादित्यभक्षणादिषु ज्ञानं तददृष्टादेव, अननुभूतेषु संस्काराभावात्। यद्यपि संस्कारपाटवाद्धातुदोषाददृष्टाद्वा समारोपितबाह्यस्वरूपः स्वप्नप्रत्ययो भवन्नतस्मिंस्तदिति भावाद्विपर्ययः, तथाप्यवस्थाविशेषभावित्वात् पृथगुक्तः। कदाचित् स्वप्नदृष्टस्यार्थस्य स्वप्नावस्थायामेव प्रतिसन्धानं भवति–अयं मया दृष्ट इति, तच्च पूर्वानुभूतस्य स्वप्नस्यान्तेऽवसाने भवतीति स्वप्नान्तिकमुच्यते। तदप्युपरतेन्द्रियग्रामस्य भावात् स्वप्नज्ञानमिति कस्यचिदाशङ्कामपनेतुमाह–स्वप्नान्तिकं यद्यप्युपरतेन्द्रियग्रामस्य भवति, तथाप्यतीतस्य पूर्वानुभूतस्य स्वप्नज्ञानप्रबन्धस्य प्रत्यवेक्षणादनुसन्धानात् स्मृतिरेवेति। उपसंहरति–भवत्येषा चतुर्विधाऽविद्येति।

[पं०] (कं. १८५.१८) इति शीताभ्रशर्करादिमधुरद्रव्यसेवाऽजीर्णवासरस्वप्नादिप्रोच्छलितागन्तुकश्लेष्मविह्वलः। अवस्थाविशेषभावित्वादिति (कं. १८५.२५) अवस्थाविशेषः सुप्तावस्था। अयमिति (कं. १८६.१) अयं।

[कु०] कारणत्वं ब्रुवाणः संस्कारादीनां यथासम्भवं सम्भवादन्यतमातिशयविवक्षया विधात्रययुक्तिं दर्शयति [अ]ननुभूतेष्विति (कं. १८५.२३) यद्यपि पदार्थविषयसंस्कारोऽत्रा(व्य)ध्यवस्त्येव तथापि संसर्गाभिप्रायेणैतदुक्तम्। तथाप्यवस्थाविशेषादिति (कं. १८५.२५) आरोपितत्वम[य]थार्थत्वं सर्वाविद्यासाधारणं तस्मिन् सत्येव कुतश्चिद्व्यावर्तकादवान्तरभेदोऽपीत्यर्थः। स्वप्नलक्षणेऽनुभवनपदमुक्तं तस्य व्यवच्छेदप्रदर्शकतया तदुपरितनं भाष्यमवतार्य व्याचष्टे कदाचिदिति (कं. १८५.२६)। तच्चेति (कं. १८६.१) अनेन स्व[प्ना]न्तिकपदस्यावयवार्थं दर्शयन् स्वप्नकार्यतया स्मृतित्वं प्रदर्शयति।

[ इति स्वप्ननिरूपणम् ]

१ मनुभूतेषु, प्रसिद्धेषु वा–दे। २ गजारोहणं–दे। ३ रोहणाद्यधर्मं–दे। ४ प्रसिद्धेषु–दे। ५ स्वयमननुभूतेषु वा परत्रप्रसिद्धेषु यद्–कं. १, कं. २, स्वयमनुभूतेषु स्वयमननुभूतेषु वा परत्रप्रसिद्धेषु परत्राप्रसिद्धेषु वा–जे. १, स्वयमनुभूतेषु परत्राप्रसिद्धेषु, स्वयमनुभूतेषु च परत्राप्रसिद्धेषु च–जे. २। ६ अनुसम्बन्धात्–जे. २। ७ विशेषभावित्वात्–कं।

### प्रशस्तपादभाष्यम्

[165] विद्यापि चतुर्विधा–प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा ।

तत्राक्षमक्षं प्रतीत्योत्पद्यत इति प्रत्यक्षम् । अक्षाणीन्द्रियाणि, घ्राणरसनचक्षु-स्त्वक्छ्रोत्र[1]मनांसि षट् ।

### न्यायकन्दली

[165] सम्प्रति विद्यां विभजते–[2]विद्यापि चतुर्विधेति । न केवलमविद्या चतुर्विधा, विद्यापि चतुर्विधेति । [3]प्रत्यक्षे लैङ्गिकस्मृत्यार्षलक्षणा प्रत्यक्षस्मृत्यार्षस्वभावा । आदौ प्रत्यक्षस्य निर्देशः कारणत्वात्, तदनन्तरमनुमानस्य तत्पूर्वकत्वात्, तदनन्तरं स्मृतेः प्रत्यक्षानुमितेष्वर्थेषु भावात्, लौकिकप्रमाणान्ते संकीर्तनमार्षस्य लोकोत्तराणां पुरुषाणां तद्भावात् ।

[4]प्रत्यक्षस्य लक्षणं तावत्कथयति–तत्राक्षमक्षं प्रतीत्योत्पद्यत इति प्रत्यक्षमिति ।

[टि०] ॥ अथ बुद्धिप्रकरणे विद्याभेदनिरूपणे प्रत्यक्षनिरूपणम् ॥

[165] तत्पूर्वकत्वाद् इति–अनुमितानुमानेऽपि पारम्पर्येण प्रत्यक्षपूर्वकत्वमेव । कुतस्तेषु प्रसक्तिः इति । एतेनेन्द्रि[5]यजं ज्ञानं प्रत्यक्षमितीश्वरप्रत्यक्षादन्यस्य प्रत्यक्षस्य लक्षणं सूचितम् । यत्तु श्रोत्रादिभिरिन्द्रियैरात्मविषयमनुमानमपि जन्यते तथापि [6]नासा [नादः इ] विन्द्रियरूपतया किन्तु लिङ्गरूपतयेति । [7]ज्ञानपदेन च सुखदुःखादीनां

[पं०] [165] कारणत्वादिति (कं. १८६.९) प्रत्यक्षं ह्यनुमानस्य कारणम् । तत्पूर्वकत्वादिति (कं. १८६.१०) प्रत्यक्षजन्यत्वात् ।

[कु०] [165] आदौ प्रत्यक्षस्येति (कं. १८६.९) प्रमाणान्तरनैरपेक्ष्यादिति शेषः ।

अक्षमक्षेति वीप्सादर्शदव्ययीभावशङ्कया प्रत्यक्षा बुद्धिः प्रत्यक्षः प्रत्य[य] इति स्त्रीलिङ्गानुपपत्तिशङ्कामर्थं प्रतिपादनपरत्वेनोपनयन् कारणोपन्या[स]स्य लक्षणत्वानुपपत्तिं परिहरति कारणविशेषजत्वमपीति (कं. १८८.४) । अत एवेति (कं. १८८.६) लक्षणस्य प्रवृत्तिनिमित्तत्वादेव । सुखदुःखसंस्काराणामिति (कं. १८८.७) संस्कारस्येन्द्रियज्जत्वं मनःकार्यतया द्रष्टव्यम् । सुखादयश्चेति (कं. १८८.८) एतेनेन्द्रियरूपादय इच्छादयव्यतिरिक्ता इति द्रष्टव्यम् । कारणव्युत्पत्त्या अव्याप्तिमाशङ्कते [8]अर्थं[व]मिति (कं. १८८.९) । परिहरति सत्यमिति (कं. १८८.१०) । भावलक्षणत्वादस्य वाक्यस्येत्यर्थः ।

---

१ मनांसि–दे । २ विद्यापीति–कं. १, कं. २ । ३ प्रत्यक्षेति–कं. १, कं. २ । ४ प्रत्यक्षलक्षणं कथयति–जे. १, प्रत्यक्षस्य लक्षणं कथयति–जे. २ । ५ न्द्रियजे–अ, ब, क; ६ नासौ इति न शुद्धं नपुंसके पाठः शुद्धः । ७ ज्ञानपदेश–ड; ८ यद्येवम्–कं ।

### न्यायकन्दली

अक्षमक्षं प्रतीत्य प्राप्य यदुत्पद्यते तत्प्रत्यक्षं प्रमाणमिति । कारणविशेषजत्वमपि कार्यस्य समानासमानजातीयव्यवच्छेदसमर्थत्वाल्लक्षणं भवति । यथा यवबीजप्रभवत्वं यवाङ्कुरस्य, अत एव यवाङ्कुर इति व्यपदिश्यते । सुखदुःखसंस्काराणामपीन्द्रियजत्वात् प्रत्यक्षप्रमाणत्वप्रसङ्ग इति चेन्न, बुद्ध्यधिकारेण विशेषितत्वात् । अक्षमक्षं प्रतीत्य या बुद्धिरुत्पद्यते तत् प्रत्यक्षम् । सुखादयश्च न बुद्धिस्वभावाः कुतस्तेषु प्रसक्तिः ? यद्येवं सन्निकर्षस्य प्रामाण्यं न लभ्यते ? सत्यम् । इतो वाक्यान्न लभ्यते, यदि तु करणव्युत्पत्त्या तस्यापि प्रामाण्यमभिमतम्, परिच्छेदहेतुत्वात् । संशयविपर्ययव्युदासो विद्यानिरूपणस्य प्रकृतत्वात् ।

अक्षं प्रतीत्य यदुत्पद्यते तत् प्रत्यक्षमित्युक्तेऽ[1]तिप्रसिद्धत्वाद्घ्राह्येन्द्रियजमेव प्रत्यक्षमिति कस्यचिद् भ्रान्तिः स्यात्, तन्निवृत्त्यर्थमक्षमक्षमिति वीप्सा [2]सकलेन्द्रियावबोधार्था कृता । कुगतिप्रादय इति प्रादिसमासः । प्रतिगतमक्षं प्रत्यक्षमित्यनेनास्याभिधेयलिङ्गता, प्रत्यक्षं ज्ञानं प्रत्यक्षा बुद्धिः प्रत्यक्षः प्रत्यय [3]इति च । अक्षशब्दस्य बहुष्वर्थेषु निरूढत्वाद्विशिनष्टि–अक्षाणीन्द्रियाणि । तानि च सांख्यैरेकादशविधान्युक्तानि, तन्निवृत्त्यर्थं परिसख्यां करोति–घ्राणरसनचक्षुस्त्वक्छ्रोत्रमनांसीति ।

[टि०] व्युदासः । इदं हि प्रत्यक्षप्रमाया लक्षणं दर्शितम् । परन्तु प्रमाण(प्रमा)करणलक्षणाभिप्रायेणैवंविधे लक्षणे सतीन्द्रियार्थ [4]सन्निकर्षस्य प्रामाण्यं न सिद्ध्यतीति (परः) प्राह यद्येवम् इति [5]इत्थं वीप्सया अर्थनिर्देशस्य फलं [6]व्युत्पाद्य कर्तव्यं समासं कथयति [7]कुगतिप्रादय इति च इति । [8]तद्धि द्रव्यादिषु इति :– स्मृतिर्ह्यसन्निहितेऽपि द्रव्यादावुत्पद्यते,

[पं०] कारणेत्यादि (कं. १८८.४) कारणविशेष इह इन्द्रियाणि ग्राह्याणि । पदयोजना चैवम्–कारणविशेषजत्वमपि कार्यस्य लक्षणं भवतीति । सुखदुःखसंस्काराणामपीति (कं. १८८.७) सुखं च दुःखं च भावनाख्यः संस्कारश्च सुखदुःखसंस्कारास्तेषाम् । सन्निकर्षस्येति (कं. १८८.९) अनन्तरमेव वक्ष्यमाणस्वरूपस्य । प्रामाण्यं न लभ्यते इति (कं. १८८.९) जडत्वेन बुद्धिस्वभावत्वाभावात् । यदित्विति (कं. १८८.१०) यदि परम् । करणव्युत्पत्त्येति (कं. १८८.१०) बुद्ध्यतेऽनया बुद्धिः संनिकर्षः करणत्वात् । तस्यापीति (कं. १८८.१०) सन्निकर्षस्य परिच्छेदहेतुत्वादिति (कं. १८८.११) पदार्थावबोधे साधकतमत्वात् । साधकतमं हि करणमभिधीयते ।

[कु०] [9]प्रसिद्धाविति (कं. १८८.१२) (मे) अनुमेयत्वाविशेषेऽपि चक्षुरादीनां प्रवृत्तिर्बाह्योपलब्ध्यनुमेयत्वात् । यद्यक्षमक्ष[मि]ति भाष्ये न विग्रहं [भाष्येण विग्रहः] तर्हि कोऽस्य समास इत्यत आह कुगतीति (कं. १८८.१४) न च परवल्लिङ्गतया तत्पुरुषस्य प्रत्यक्षा बुद्धिरिति स्त्रीलिङ्गता [ए]व स्यादिति वाच्यं द्विगु प्राप्तापन्नालम् । एवं गतिसमासेषु परवल्लिङ्गतया प्रतिषेधो वक्तव्य इति कात्यायनस्मरणात् । अत्र च गतिग्रहं [हः] प्रादीनुपलक्षयति ।

१ सति प्रसिद्धत्वात्–जे. १ । २ समस्तेन्द्रियावरोधार्था–कं. १, कं. २ । ३ इति–कं. १, कं. २ । ४ सन्निकर्षप्रामाण्यं–अ, ब, क; ५ इष्टं–अ, ब, क; ६ श्रुताद्य–अ, ब, क; ७ प्रादय मु. कुगतिप्रादय–जे. १, जे. ३ । ८ तद्धि शब्दोऽवधारणे तत्प्रत्यक्षं द्रव्यादिषु मु., तद्धि द्रव्यादिषु–जे. १, जे. ३ । ९ अतिप्रसिद्धत्वात्–कं ।

### प्रशस्तपादभाष्यम्

**तद्धि द्रव्यादिषु पदार्थेषूत्पद्यते ।**

### न्यायकन्दली

अक्षजं [1]विज्ञानं प्रत्यक्षमित्युक्ते स्मृतिरपि प्रत्यक्षा [2]स्यात्, अतस्तामसद्विषयां [3]व्युदसितुं [4]प्रत्यक्षस्य विषयं निर्दिशति–[5]तद्धि द्रव्यादिषु पदार्थेषु उत्पद्यत इति । हिशब्दो ऽवधारणे । तत् प्रत्यक्षं द्रव्यादिष्वेव द्रव्यगुणकर्मसामान्येष्वेवोत्पद्यते, न विशेषसमवाययोरित्यर्थः । द्रव्यस्य प्राधान्यात्प्रथमं [6]तत्र प्रत्यक्षोत्पत्तिमाह–द्रव्ये तावदिति । तावच्छब्दः क्रमार्थः । महति [7]द्रव्ये त्रिविधे पृथिव्यप्तेजोलक्षणे प्रत्यक्षं भवति, कुतः कारणादित्यत्राह –अनेकद्रव्यवत्त्वादिति । अनेकद्रव्यवत्त्वं भूयोऽवयवाश्रितत्वम् । रूपस्य प्रकाश उद्भव-

[टि०] प्रत्यक्षं तु सन्निहित एवेति भावः । अनेक[8]द्रव्यवत्त्वम् इति–अत्रानेकशब्दो बहुत्वार्थः [9]तेन द्व्यणुकव्यवच्छेदः । सन्निकर्षोऽत्र संयोगोऽभिहितः तेन संयुक्तसमवायादिसन्निकर्षापेक्षया न पञ्चकादिसन्निकर्षः । ननु यद्महत्तदनेकद्रव्यं, व्यवच्छेद्याभावाद्, द्वयोरुपादानं [10]व्यर्थम्, अत आह अवयवभूयस्त्वे इतिः–महत्त्वं प्रति अवयभू[11]यस्त्वस्यापि [12]कारणत्वं दर्शयितुमिति भावः ।

[पं०] **समस्तेन्द्रियावरोधार्थं** इति (कं. १८८.१४) अन्ते मनसोऽपि ग्रहणम् । **प्रादिसमास** इति (कं. १८८.१४) तत्पुरुषसमासः । अव्ययीभावे हि क्लीबत्वमेव स्यात् ।

**एकादशविधानीति** (कं. १८८.१७) पञ्चघ्राणादीनि बुद्धीन्द्रियाणि पायूपस्थवचःपाणिपादाः पञ्च कर्मेन्द्रियाणि मनश्चेति । **स्मृतिरपि प्रत्यक्षा स्यादिति** (कं. १८८.१८) प्रत्यक्षा प्राप्नोति स्मृतेर्मनोजत्वात् । **असद्विषयामिति** (कं. १८८.१९) अतीतार्थविषयत्वात् । [13]**तत्रेति** = द्रव्ये । **उद्भवसमाख्यात** इति (कं. १८८.२४) उद्भव इति

[कु०] **तं निवृत्त्यर्थमिति** (कं. १८८.१७) विभागस्य न्यूनाधिकसङ्ख्या व्यवच्छेदकतयाऽधिकसङ्ख्यानिवृत्तिरिति । इन्द्रियलक्षणपर्यालोचनया च वागादीनामनिन्द्रियत्वम् । तच्च शरीरसंयुक्तमतीन्द्रियं साक्षात्कारत्वप्रतीतिसाधनमिति । न चाहंकारविशेषविकार इन्द्रियमिति लक्षणम्; अहङ्कारादि प्रया[मा]यां प्रमाणाभावात् । न च भोगसाधनमिन्द्रियं शरीरादिष्वतिव्याप्तेः । एवं न्यूनसङ्ख्याव्युदासेन पञ्चेन्द्रियवादिनो बौद्धा निरस्ता वेदितव्याः । षष्ठं हि मन इन्द्रियं द्रव्यप्रकरणे श्रुत्यादिस्मृतिरपि प्रत्यक्षा स्यादिति मानसोऽप्यपेक्षेषु परिगणनादित्यर्थः (मनसोऽप्यक्षेषु) । **असद्विषयां** [14]**व्युदसितुमिति** (कं. १८८.१९) अक्षजत्वं हि अपरोक्षत्वाज्जातिमुपलक्षयितुमुक्तम् । सा च सन्निहितवर्तमानविषयास्वेव

---

१ ज्ञानं–जे. १, जे. २ । २ प्राप्नोति–जे. १, जे. २ । ३ दर्शयितुं–कं. १, कं. २ । ४ प्रत्यक्षविषयं–कं. १, कं. २ । ५ तद्धीति–कं १, कं. २; तद्धि द्रव्यादिषु विषयेषु–जे. ३ । ६ तत्प्रत्यक्षोत्पत्ति–कं. १, कं. २ । ७ द्रव्ये–कं. १; कं. २ । ८ द्रव्यत्वम्–अ, ब । ९ तत–अ । १० अथ–अ, ब । ११ भूयस्तस्यापि –अ, ब । १२ कारणं–अ, ब, क । १३ प्रतीकमिदं कन्दल्यां नास्ति । १४ दर्शयितुम्–कं ।

प्रशस्तपादभाष्यम्

[166 to 170] द्रव्ये तावद् [1]द्विविधे महत्यनेकद्रव्यवत्त्वोद्भूतरूपप्रकाशचतुष्टयसन्नि-

न्यायकन्दली

समाख्यातो रूपस्य धर्मः, यदभावाद्वारिस्थे तेजसि प्रत्यक्षाभावः। चतुष्टय[2]सन्निकर्षादात्मनो मनसा संयोगो मनस इन्द्रियेण इन्द्रियस्यार्थेनैतस्मात् कारणकलापाद्धर्मादिसामग्र्ये च सति धर्माधर्मदिक्कालादीनां समग्राणां भावे सति प्रत्यक्षं स्यात्। परमाणौ द्व्यणुके च प्रत्यक्षाभावान्महतीत्युक्तम्। अवयवभूयस्त्वप्रकर्षाप्रकर्षाभ्यामवयविनि स्फुटत्वास्फुटत्वाति[3]शयानतिशयदर्शनादनेकद्रव्यवत्त्वं कारणम्। सत्यपि महत्त्वेऽनेकद्रव्यवत्त्वे च वायोरनुपलम्भाद्रूपप्रकाशो हेतुः। सर्वस्यैव ज्ञानस्य सुखदुःखादिहेतुत्वाद्दे[4]शकालानियमेनोत्पादाच्च धर्माधर्मदिक्कालजन्यत्वम्। अन्तरेणात्ममनःसंयोगं मनइन्द्रियसंयोगमिन्द्रियार्थसंयोगं च प्रत्यक्षाभावाच्चतुष्टयसन्निकर्षः [5]कारणम्।

[166] इन्द्रियार्थसन्निकर्षस्य हेतुत्वे सामान्योपलम्भवद्विशेषोपलम्भस्यावश्यंभावितया

[पं०] समाख्यात उद्भवसञ्ज्ञ इत्यर्थः। [6]वारि स्थिते तेजसि प्रत्यक्षाभाव इति (कं. १८८.२५) तप्तपयःस्थिते पावके स्फोटजननादिनाऽनुमीयमाने प्रत्यक्षप्रमाणस्याऽप्रवृत्तिरिति भावः। महतीति (कं. १८९.२) त्र्यणुकादौ। रूपप्रकाश इति (कं. १८९.४) उद्भूतरूपता। चतुष्टयसन्निकर्ष इति (कं. १८९.७) संयोगानां त्रित्वेऽपि संयोगिनामात्ममन इन्द्रियार्थानां चतुष्ट्वात्।

[166] इन्द्रियार्थेत्यादि (कं. १८९.७) गद्ये सामान्योपलम्भवदिति सामान्यम् ऊर्ध्वत्वशुक्लत्वादि।

[कु०] ज्ञानव्यक्तिषु समवैतीति भावः। विषयं निर्दिशति-सम्बद्धं वर्तमानं चेति शेषः। अत्रापि किमविशेषेण नेत्याह (किं विशेषणेन) हि शब्दोऽव[7]धारणमिति (कं. १८८.२०)। द्रव्यस्य प्राधान्यादिति (कं. १८८.२१) प्राधान्यं च द्रव्यस्य गुणादीनामिन्द्रियसम्बन्धस्य द्रव्येन्द्रियसम्बन्धपूर्वकत्वम् (त्वः) अनेकद्रव्यव(द्)त्वं। भूयोवयवाश्रितत्वमिति (कं. १८८.२४) बहुव्रीहेर्मतुप आश्रयणादवय[व्य]वयवानामनेक(द) द्रव्यावयवानेकद्रव्यत्वेन भवितव्यम्। ईदृशमेव भूयोऽव्ययाश्रितत्वं विवक्षितं। परमाणौ द्व्यणुके चेति (कं. १८९.२) विषयनिर्देशोऽयं महतीत्युक्तम्। ननु कारणत्वेन अनेकद्रव्यवत्त्वादि[ति] कारणवर्गा[त्] पृथङ्निर्देशात् तारतम्यानुविधानं चानेकद्रव्यवत्वतारतम्यानुविधानादन्यथासिद्धं तदेवाह-अवयवभूयस्त्वेति (कं. १८९.२)। धर्माधर्मदिक्कालजन्यत्वमि[ति] (कं. १८९.५) आलोके मनः समाधौ च सति प्रत्ययस्य भावात्तयोरपि सङ्ग्रह इति भावः।

---

१ द्विविधे—कं. १, कं. २, कि। २ सन्निकर्षः—जे. १, जे. २, जे. ३। ३ तिशयदर्शनात्—जे. २। ४ देशकालादि—कं. १, कं. २। ५ कारणमिन्द्रियार्थसन्निकर्षः कारणम्—जे. १। ६ वारिस्थे—मु. कं। ७ वधारणे—कं।

### प्रशस्तपादभाष्यम्

**कर्षाद् धर्मादिसामग्र्ये च स्वरूपालोचनमात्रम्, सामान्यविशेषद्रव्यगुणकर्मविशेषणापेक्षा[1]दात्ममनःसन्निकर्षात् प्रत्यक्षमुत्पद्यते, सद् द्रव्यं पृथिवी विषाणी शुक्लो गौर्गच्छतीति ।**

### न्यायकन्दली

**संशयविपर्ययानुत्पत्तिरिति चेन्न, अनियमात् । सामान्यं हि बहुविषयत्वात् स्वाश्रयस्य चक्षुःसन्निकर्षमात्रेणोपलभ्यते, विशेषस्तु स्वल्पविषयत्वात् [2]स्वाश्रयस्य तदवयवानां च भूयसां चक्षुरवयविना भूयोभिश्च तदवयवैः सह सन्निकर्षमपेक्षत इति न सहोपलम्भनियमः, सामग्रीभेदात् । अत एव दूरादव्यक्तग्रहणम्, गच्छतश्चक्षूरश्मेरन्तराले [3]विशीर्णानामवयवान्तराणामर्थप्राप्त्यभावात् ।**

[टि०] [166-167] ननु शब्दरूपविकल्पमन्तरेण प्रवृत्तिर्न कुत्रापि दृष्टेत्यत आह **शब्दव्युत्पत्तीति । व्यक्त्यन्तरदर्शने** इति :–उल्लेखशून्यं प्रतिसन्धानमित्यर्थः । **सामान्यविशेषेति**–सामान्यं सत्ताद्रव्यत्वादि विशेषः, [4]पृथिवीत्वादि स्वलक्षणं व्यक्तिः ।

[पं०] **विशेषोपलम्भस्येति** (कं. १८९.८) विशेषा वक्रकोटरादयः । [5]**अवश्यंभावभावादिति** (कं. १८९.८) अवश्यंभावेन भावात् । **संशयविपर्ययानुत्पत्तिरिति** (कं. १८९.८) अत्रायं भावः– इन्द्रियार्थसन्निकर्ष एव यदि हेतुस्तदा यथा सामान्योपलम्भस्तथा विशेषोपलम्भोऽपि स्याद् अर्थगतत्वाविशेषात् । विशेषोपलम्भे च कुतः संशयविपर्ययौ ? **अनियमादिति** (कं. १८९.९) सामान्योपलम्भे सति वि[शे]षोपलम्भेनाप्यवश्यं भवितव्यमिति नियमो नास्तीत्यर्थः । **सामान्यमिति** (कं. १८९.९) ऊर्ध्वत्वादि । **स्वाश्रयस्येति** (कं. १८९.९) स्थाण्वादेः । **विशेषस्त्वित्यादि** (कं. १८९.१०) विशेषः पुनः स्वाश्रयस्य स्थाण्वादेश्चक्षुरवयविना सह सन्निकर्षमपेक्षते तथा भूयसां बहूनां तदवयवानां स्वाश्रयभूतस्थाण्वाद्यवयवानां भूयोभिर्बहुभिस्तदवयवैश्चक्षुरवयवैश्च सह सन्निकर्षमपेक्षते स्वल्पविषयत्वात् । कोऽर्थो यथा स्थाण्वादिभिः सह चक्षुरश्म्यं स्थाण्वाद्यवयवैश्च बहुभिः सहस्रचक्षुरश्म्यवयवा बहवः संयुज्यन्ते तदा विशेषोपलम्भः स्यादित्यर्थः । **सहोपलम्भनियम इति** (कं. १८९.११) सामान्यविशेषयोर्युगपदुपलम्भनिश्चयः ।

[कु०] [166] चतुष्टयसन्निकर्षः संयोगः – तस्मात्संयुक्तसमवायादीनां सन्निकर्षान्तराणां कारणत्वमविरुद्धमेव । सन्निकर्षस्य कारणत्वानुमाने प्रतिकूलमाशङ्कते **इन्द्रियार्थेति** (कं. १८९.७) । परिहरति **नेति** (कं. १८९.८) । **[अ]नियमादिति** (कं. १८९.९) यदिन्द्रियं सन्निकृष्टं तत्सर्वमुपलभ्यते इति न नियम्यत इत्यर्थः ।

---

१ आत्मनः–दे । २ स्वाश्रयस्य च–कं. १, कं. २ । ३ प्रकीर्णानामवयवाना–कं. १, कं. २ । ४ पृथिवीत्यादि – अ, ब, क । ५ अवश्यं भावितया–मु. कं ।

## न्यायकन्दली

[167] केचित् सविकल्पकमेवैकं प्रत्यक्ष[1]माचक्षते, व्यवसायात्मकत्वेन सर्वस्य व्यवहारयोग्यत्वात्, शब्दव्युत्पत्तिरहितानामपि तिरश्चामर्थविकल्पात् प्रवृत्तेः, तान् प्रत्याह– स्वरूपालोचनमात्रमिति । स्वरूपस्यालोचनमात्रं विकल्परहितं [2]ग्रहणमात्रमिति यावत् प्रत्यक्षम् प्रत्यक्ष । यदि हि वस्तुस्वरूपस्य निर्विकल्पकेन ग्रहणं नेष्यते, तदा तद्वाचकशब्दस्य स्मृत्यभावात् सविकल्पकमपि न स्यात् । अतः सविकल्पकमिच्छता निर्विकल्पकमप्येषितव्यम्, तच्च न सामान्यमात्रं गृह्णाति, भेदस्यापि प्रतिभासनात् । नापि स्वलक्षणमात्रम्, सामान्याकारस्य संवेदनात्, व्यक्त्यन्तरदर्शने प्रतिसन्धानाच्च । किन्तु सामान्यं विशेषं चोभयमपि गृह्णाति, यदि परमिदं सामान्यमयं विशेष इत्येवं विविच्य न प्रत्येति वस्त्वन्तरानुसन्धानविरहात् । पिण्डान्तरानुवृत्तिग्रहणाद्धि सामान्यं [3]विविच्यते,

[पं०] [167] केचिदिति (कं. १८९.१३) वैयाकरणाः । सर्वस्येति (कं. १८९.१४) प्रमातुः । अर्थविकल्पादिति (कं. १८९.१५) अर्थविकल्पादेवेत्यर्थः । तद्वाचक[4]शब्दस्मृत्यभावादिति (कं. १८९.१७) स्वरूपवाचकशब्दस्मरण[णा]भावात् । सविकल्पकमपि न स्यादिति (कं. १८९.१८) शब्दस्मरणसहकृतस्येन्द्रियार्थसन्निकर्षस्य विकल्पजनकत्वात् । तच्चेति (कं. १८९.१९) निर्विकल्पकम् । भेदस्यापीति (कं. १८९.१९) इतरविषयेभ्यो विशेषस्य । स्वलक्षणमात्रमिति (कं. १८९.२०) विविक्तक्षणक्षयिपरमाणुलक्षणम् । प्रतिसन्धानाच्चे(कं. १८९.२१)त्यत्र निर्विकल्पकाभिकारा

[कु०] [167] व्यवसायात्मकत्वेनेति (कं. १८९.१४) अभिलापसंसर्गयोग्यत्वेनेत्यर्थः । एतेनेदमभिप्रेतं; सर्वं हि ज्ञानमनुव्यवसायनिश्चितसद्भावम् । अनुव्यवसायश्च विषयावच्छेदेन रूपज्ञानं रसज्ञानमिति । विषयश्च नाम[धे]यार्थ-(र्थि)नः नियमेन तत्सामानाधिकरण्येन प्रतीयमानत्वात् । यद्यदात्मकं न भवति न तं(तद्)तेन नियतं सामानाधिकरण्यमनुभवत् प्र[थ]यति यथा गौरश्वो नेति नियमाच्च नामधेयैस्तादात्म्यं तदा तं निमित्तभूतैः सुतरां तादात्म्यमेव । न चासता असम्बद्धेन वा निमित्तसम्बन्धः । ततश्च सर्वदा सर्वथा नामजात्याद्युल्लेखेनैव विषयाः परिस्फुरन्तीति न कदाचिन्निर्विकल्पकं सम्भवतीति । नन्वेतदनुपपन्नं भागासिद्धेस्त्यित आह शब्दव्युत्पत्तिरहितानामिति (कं १८९.१४) । [5]अर्थविकल्पादिति (कं. १८९.१५) प्राग्भवीयशब्दवासनावशां(शात्)तिरश्चामपि नामाद्युल्लेखेनैव ज्ञानमुत्पद्यते इति भावः । [6]यच्चावयुक्तमिति–नियमेन सामानाधिकरण्येनैताव[त्] प्रतीयमानत्वादिति त[त] सत्या(*) भागासिद्धिरव्युत्पन्नेष[त्तेश्च] शब्दानामर्थपरत्वस्वभावतया वाचकत्वेनोपाधिनैव सामानाधिकरण्यप्रतीतिरन्यथासिद्धा यथा गौर्वाहीक इत्यत्र गोगुणा उपलक्षणत्वेनोपाधिना वाहीकसामानाधिकरण्यमनुभवन्ति । नैतावता वाहीकस्य गोगुणतादात्म्यम् । यत्त्वननुव्यवसायनिर्विकल्पकसद्भावे प्रमाणं नास्तीति तत्राह [7]प्रत्यक्ष(कं. १८९.१६)[मिति] । अनुव्यवसायाभावेऽपि नामधेयस्मृतिहेतुसंस्कारोद्बोधेन कार्येण निर्विकल्पकमनुमेयमिति भावः । एवं प्रसाधितस्य निर्विकल्पस्य विषयं विविनक्ति तच्च नेति (कं. १८९.१९) । व्यक्त्यन्तरदर्शन इति (कं. १८९.२०) निर्विकल्पकेन काञ्चिद्व्यक्तिं गृहीत्वा

---

१ माचक्षते न निर्विकल्पकं – जे. १ । २ प्रत्यक्षमात्रमिति यावत् – कं. १, कं. २; ग्रहणमिति प्रत्यक्षं – जे. १ । ३ गृह्यते–जे. ३ । ४ शब्दस्य–कं । ५ अथ–Ms । ६ प्रतीकमिदं कन्दल्यां नास्ति–स । ७ प्रत्यक्षमात्रं–कं ।

## न्यायकन्दली

व्यावृत्तिग्रहणाद्विशेषोऽयमिति विवेकः। निर्विकल्पकदशायां च पिण्डान्तरानुसन्धानाभावात् सामान्यविशेषयोरनुवृत्तिव्यावृत्ती धर्मौ न गृह्येते, तयोरग्रहणान्न[1] विविच्य ग्रहणम्, स्वरूपग्रहणं तु भवत्येव तस्यान्यानपेक्षत्वात्। अत एव निर्विकल्पेन सामान्यविशेषस्वलक्षणानां न विशेषणविशेष्यभावावगमः[2], तस्य भेदावगतिपूर्वकत्वान्नि[3]र्विकल्पकं च सामान्यादीनां परस्परभेदानध्यवसायात्। [4]ततः परं तु सविकल्पकं सामान्यविशेषरूपतां प्रत्येति पिण्डान्तरमनुसन्दधानस्यात्मनोऽनुवृत्तिव्यावृत्ती धर्मौ प्रतिपद्यमानस्येन्द्रियद्वारेण तथाभूतप्रतीत्युपपत्तेः।

[168] सौगताः पुनरेवमाहुः—स्वलक्षणान्वयव्यतिरेकानुविधायिप्रतिभासं निर्विकल्पकं वस्तुन्यभ्रान्तम्, अतस्तदेव प्रत्यक्षं न सविकल्पकम्, तस्य वासनाधीनजन्मनो वस्त्व-

[टि०] [168] सौगताः पुनः इति—स्वविकल्पकमर्थे प्रमाणं न भवति तदजन्यत्वात् [5]शुक्तिकायां रजतज्ञानवदिति

[पं०] दुल्लेखशून्यं प्रतिसन्धानं ग्राह्यम्। उल्लेखशेषखेरितं (शेखरितं) हि प्रतिसंधानं सविकल्पकमेव दृष्टम्। न प्रत्येतीति (कं. १८९.२२) निर्विकल्पकं कर्तृ। **स्वरूपग्रहणमिति** (कं. १८९.२६) अस्तित्वग्रहणम्। **सामान्यविशेषस्वलक्षणानामिति** (कं. १८९.२६) सामान्यं सत्ता द्रव्यत्वादि १ विशेषः पृथिवीत्वादि २ स्वलक्षणं व्यक्तिः ३ इति त्रयाणाम्। [6]**विशेष्यविशेषणभावानुगम इति** (कं. १९०.१) विशेष्यभावो विशेषस्वलक्षणयोः विशेषणभावस्तु सामान्यस्येति द्रष्टव्यम्। **सामान्यादीनामिति** (कं. १९०.२) सामान्यविशेषस्वलक्षणानाम्। **तथाभूतप्रतीत्युपपत्तेरिति** (कं. १९०.४) सामान्यविशेषरूपप्रतीतिसम्भवात्।

[168] **न सविकल्पकमिति** (कं. १९०.६) अत्र साधनमाहुः सौगताः सविकल्पकमर्थे प्रमाणं न भवति तदनन्यत्वात् शुक्तिकायां रजतज्ञानवत्। **वस्त्वनुरोधिप्रतिभासस्येति** (कं. १९०.७) पूर्वदृष्टतत्कालदृष्टयोरैक्याध्य-

[कु०] व्यस्वयन्तरं सविकल्पकेन गृह्णन् प्रतिसन्धत्ते तज्जातीयमिति। तदिदं प्रतिसन्धानं पूर्वं निर्विकल्पकेन सामान्यग्रहणेन सङ्क्षेतेति भावः। यद्युभयं गृह्णाति तर्हि सविकल्पकात्कोऽस्य विशेष इत्यत आह **यदि परमिति** (कं. १८९.२१)। **अनुवृत्तिव्या[7]वृत्तिधर्माविति** (कं. १८९.२५) अनुवृत्तिव्यावृत्तिरूपा(पो) विवेको विषयभूतो यथासङ्ख्यं सामान्यविशेषयोः धर्मावित्यर्थः। **अन्यानपेक्षत्वादिति** (कं. १८९.२६) इन्द्रियसन्निकर्षमात्रापेक्षितादित्यर्थः। उक्तमर्थं वैधर्म्यदृष्टान्तेन स्पष्टयति **अतःपरमिति** (कं. १९०.२)। तदयं प्रमाणार्थः—निर्विकल्पकं विशेषणविशेष्यभावं नावगाहते अननुसंहितपिण्डान्तरस्य (।) जायमानत्वात्, यत्पुनर्विशेषणविशेष्यावगाहि तदनुसंहितपिण्डान्तरस्यैव भवति यथा सविकल्पकमिति व्यतिरेकी।

[168] **स्वलक्षणान्वयेति** (कं. १९०.५) स्वलक्षणस्यैवार्थक्रियासमर्थत्वात् तस्मादुत्पन्नमित्यर्थः। **वासनाधीनजन्मन इति** (कं. १९०.६) सामान्यादीनां सर्वेषामवस्तुतया सर्वसामर्थ्यविरहिणां विकल्पं प्रति कारणत्वानुपपत्ते-

---

१ अग्रहणात्तु – जे. ३। २ भावानगमः – कं. १, कं. २; जे. ३। ३ र्विकल्पकेन च – कं. १, कं. २। ४ अतःपरं – कं. १, कं. २। ५ शुक्तिकया – अ, ब। ६ विशेषणविशेष्य – कं। ७ व्यावृत्ती धर्मौ – कं।

न्यायकन्दली

ननुरोधिप्रतिभासस्य केशादिविज्ञानवद्वस्तुनि भ्रान्तत्वादिति। तेषां मतं [1]निराकुर्वन् सविकल्पकस्यापि प्रत्यक्षतामाह—[2]सामान्यविशेषद्रव्यगुणकर्म विशेषणापेक्षादात्ममनसोः सन्निकर्षादिति। सामान्यं च विशेषश्च द्रव्यं च गुणश्च कर्म च सामान्यविशेषद्रव्यगुणकर्माणि, सामान्यविशेषद्रव्यगुणकर्माण्येव विशेषणानि सामान्यविशेषद्रव्यगुणकर्मविशेषणानि, तान्यपेक्षते य आत्ममनःसन्निकर्षः, तस्मात् सद्द्रव्यमिति सामान्यविशिष्टम्, पृथिवीति [3]पृथिवीत्वविशेषणविशिष्टम्, विषाणीति द्रव्यविशिष्टम्, शुक्लो गौरिति गुणविशिष्टम्, गच्छतीति कर्मविशिष्टं प्रत्यक्षं स्यात्। चतुष्टयसन्निकर्षादित्यनेनैवात्ममनःसंयोगे लब्धे पुनरस्योपादानं पूर्वस्मान्निर्विकल्पकप्रक्रमादिदं प्रक्रमान्तरमित्यवद्योतनार्थम्।

[टि०] प्रमाणम्। पूर्वदृष्टतत्कालदृष्टयोरैक्याध्यवसायात्पूर्वदृष्टस्य च तदानीमभावाद् [4]वस्त्वननु [रोधित्वम्। सर्वं च सविकल्पकं निर्विकल्पकं च स्वपरावभासकं बौद्धमते तत्र निर्विकल्पकमुभयत्रापि प्रमाणं तच्चार्थापेक्षयैन्द्रियकं [5]स्वापेक्षया] तु स्वसंवेदनम्। सविकल्पकं त्वर्थे एव न प्रमाणं स्वस्मिंस्तु स्वसंवेदनं [6]प्रमाणमेवेत्यर्थः। [7]एवं प्रामाण्यं निषिध्यते इति। **विकल्पोऽवस्त्विति** – अवस्तुनिर्भासोऽवस्तुभूतसामान्याकारस्य प्रतिभासनात् सामान्याकारप्रवृत्तस्य स्वलक्षण-

[पं०] वसा[या]त् पूर्वदृष्टस्य च तदानीमभावात् वस्त्वननुरोधित्वम्। **केशादिविज्ञानवदिति** (कं. १९०.७) आकाशकेशादिज्ञानवत्।

**श्रीधरो वक्ति सविकल्पकमित्यादि** (कं. १९०.१५) **कथमुच्यते इति** (कं. १९०.१५) आह सौगता भवद्भिः। इदमेव स्वोक्तमुपपादयति **प्रतीयते हीत्यादिना** (कं. १९०.१६)। **विच्छिन्न** इति (कं. १९०.१६) पृथग् रूपः। परवाक्यम् **अनर्थजेत्यादि** (कं. १९०.१७)। **वस्तुनिर्भासादिति** (कं. १९०.१८) अवस्तुभूतस्य सामान्याकारस्य प्रतिभासनात्। [8]**असंवादादिति** (कं. १९०.१८) सामान्याकारप्रवृत्तस्य स्वलक्षणप्राप्तेरसंवादः।

सूरिवाक्यं **नेति** (कं. १९०.१८)। **अर्थानुभवजन्मे** (कं. १९०.१९) त्यागार्थो निर्विकल्पकः। **मणिप्रभायां मणिबुद्धिवदिति** (कं. १९०.२०) यथा कुञ्चिकाविवरदृष्टमणिप्रभायां मणिभ्रान्त्या प्रवृत्तो मणिं प्राप्नोति तथा

[कु०] वासनापरिपाक एव विकल्पस्य कारणमिति भावः। [9]**वस्त्वननुरोधिन इति** (कं. १९०.७) तदुत्पत्तिव्यतिरेकेण विषयत्वस्य निर्वक्तुमशक्यत्वादिति भावः।

**तान्यपेक्षत इति** (कं. १९०.११) तेषां तत्र वस्तुतस्तस्योपपादितत्वादुपपादयिष्यमाणत्वाद्विषयस्य च तदुत्पत्तिव्यतिरेकेणैव सङ्ख्यायामुपपादितत्वाच्चेति भावः।

---

१ निराकर्तुं – कं. १; कं. २; जे. ३। २ सामान्येत्यादि – कं. १; कं. २। ३ पृथिवीत्वविशिष्टम्। ४ वस्तु ननु – ड; [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति। ५ स्तापेक्षया। ६ प्रमाणमिवेत्यर्थः – अ, ब, क। ७ एव – ड। ८ विसंवादाद् – कं। ९ वस्त्वनुरोधि – कं।

## न्यायकन्दली

सविकल्पकमर्थे न प्रमाणमिति कथमुच्यते ? प्रतीयते हि घटोऽयमिति [1]विज्ञाने विच्छिन्नः कम्बुग्रीवात्मा सर्वतो व्यावृत्तः पदार्थः । अनर्थजप्रतिभासो विकल्पस्तस्मादर्थाध्यवसायो भ्रान्त इति चेत् ? यथोक्तम्—

"विकल्पो वस्तुनिर्भासाद्विसंवादादुपप्लवः" इति ॥

न, प्रवृत्तौ संवादात् । [2]अर्थानुभवजन्मा विकल्पोऽर्थात्मतयारोपितस्वप्रतिभासः स्वलक्षणस्वप्रतिभासयोर्भेदं तिरोधाय स्वलक्षणदेशे पुरुषं प्रवर्तयति संवादयति च, मणिप्रभायां मणिबुद्धिवत्पारम्पर्येणार्थप्रतिबन्धादर्थप्राप्तेरिति चेत् ? यदि विकल्पो वस्तु न संस्पृशति, कथं तदात्मतया स्वप्रतिभासमारोपयेत् ? नह्यप्रतीते [3]मरुमरीचिनिचये तद्धिकरणो जलसमारोपो दृष्टः ।

अथ प्रत्यक्षपृष्ठभावी विकल्पः [4]कारणव्यापारमुपाददानोऽर्थक्रियासमर्थं वस्तु साक्षात्करोति, अन्यथार्थक्रियार्थिनो विकल्पतः प्रवृत्त्ययोगात् । यथाह—"ततोऽपि

[टि०] प्राप्तेरसंवादः । **मणिप्रभायाम्** इति—यथा कुञ्चिकाविवरपरिदृष्टमणिप्रभायां मणिभ्रान्तया प्रवृत्तो मणिं प्राप्नोति तथा स्वलक्षणान्निर्विकल्पकं तस्मात्सविकल्पकं तस्माच्च [5]प्रवृत्तः पारम्पर्येणा[6]न्यविषयीकृतमर्थं [7]प्राप्नोतीत्यर्थः । [8]**कारणव्यापारम्** इति कारणं निर्विकल्पकं तस्य व्यापारः प्रतिभासकारिता । **एवं तर्हि वस्तुनि** इति—विवादाध्यासितमर्थे

[पं०] स्वलक्षणान्निर्विकल्पकभ्रान्त्या सविकल्पकम् । तस्माच्च प्रवृत्तपारम्पर्येण निर्विकल्पकविषयीकृतमेवार्थं प्राप्नोतीत्यर्थः । **वस्त्विति** (कं. १९०.२१) स्वलक्षणम् । **कथं तदात्मतयेति** (कं. १९०.२२) वस्त्वात्मतया कथं स्वप्रतिभासमारोपयेदित्यर्थः । यो हि यत्र स्पृशत्यपि तस्य तेन सह तादात्म्यं कथं श्रद्धेयमिति भावः ।

**प्रत्यक्षपृष्ठभावीति** (कं. १९०.२३) निर्विकल्पकत्वात्पश्चाद्भावी । **कारणव्यापारमिति** (कं. १९०.२३) कारणस्य निर्विकल्पस्य व्यापारं प्रतिभासकारितालक्षणम् । **ततोऽपीति** (कं. १९०.२५) प्रत्यक्षपृष्ठभाविनः । सूरिवाक्यम् **एवं तर्हीत्यादि** (कं. १९०.२५) । **तत्राविसंवादप्रतीतिहेतुत्वादिति** (कं. १९०.२६) हेतुः । निर्विकल्पक-

[कु०] तदेवं स्वमते सविकल्पकस्य प्राभाण्यं प्रसाध्य परमतं दूषयितुं पृच्छति [9]**सविकल्पक** इति (कं. १९०.१५) । निर्भासादप्रमाण्यमितीमां (मितियं) शङ्कामपनुदति **प्रतीयत हीति** (कं. १९०.१६) । विषयीभवति ह्यवच्छिन्नः परत्वेनैव (प)घटादिभ्यो व्यवच्छिन्नः कम्बुग्रीव आकृतिविशेषेण व्यावृत्तो व्यक्त्यन्तरेभ्यः । उक्तमजानानस्य परमतमाशङ्कते [10]**अनर्थजप्रतिभासाद्धि स** (कं. १९०.१७) इति । सविकल्पकस्यानुवृत्तिगोचरत्वेन क्षणिकत्वादिसाधकप्रमाणविरोधादित्यर्थः । दूषयति **नेति** (कं. १९०.१८) । विकल्पेनार्थं निश्चित्य प्रवर्तमानस्य तदर्थप्राप्त्या संवादेनासंवादोऽसिद्ध

---

१ ज्ञाने—कं. १; कं. २; जे. ३ । २ अथा—कं. १; कं. २; जे. ३ । ३ मरीचिनिचये—जे. १, जे. २, जे. ३ । ४ करण—कं. १, कं. २ । ५ प्रवृत्तेः—अ, ब । ६ णानन्य—अ, ब, क । ७ प्राप्नोति अर्थः—अ, ब । ८ करण—कं । ९ संविकल्पकम्—कं । १० अनर्थजप्रतिभासो विकल्प ... ।

## न्यायकन्दली

विकल्पाद्वस्तुन्येव प्रवृत्तिः" [1]इति । एवं तर्हि वस्तुनि प्रमाणम्, तत्राविसंवादिप्रतीतिहेतुत्वात् । अथ मन्यसे यः [2]क्षणः प्रत्यक्षेण गृह्यते नासौ विकल्पेनाध्यवसीयते, यश्च विकल्पेनाध्यवसीयते, न स प्रवृत्त्या लभ्यत इति क्षणापेक्षया न संवादः, तेषां क्षणिकत्वात् । किन्तु यादृशः [3]क्षणः प्रत्यक्षेण गृह्यते तादृशो विकल्पेनाध्यवसीयते, यादृशश्च विकल्पेनाध्यवसीयते तादृशश्च प्रवृत्त्या लभ्यत इत्यनाकलितक्षणभेदस्यातद्व्यावृत्तवस्तुमात्रापेक्षया संवादः । [4]तत्र च विकल्पो गृहीतग्राहित्वादप्रमाणम्, तथाभूतस्यार्थस्य प्रत्यक्षेणैव गृहीतत्वात् । लिङ्गजस्तु विकल्पः प्रमाणान्तराप्राप्तस्वलक्षणप्रापकतया प्रमाणमिति ।

तदप्यसारम्, नहि क्षणस्यान्यव्यावृत्तिरभावरूपान्यव्यावृत्त्यपेक्षया वा तस्यारोपितं साधारणं रूपमवस्तुभूतं प्रत्यक्षेण गृह्यते, हेतुत्वस्य ग्राह्यलक्षणत्वादवस्तुनश्च समस्तार्थ-

[टि०] प्रमाणं तत्राविसंवादिप्रतीतिहेतुत्वाद् निर्विकल्पकवदिति प्रमाणम् । अन्यत्रार्थेऽविसंवादिप्रतीतिहेतुत्वेपि अन्यत्रार्थे प्रामाण्याभावात्तत्रेत्युक्तम् । न चार्थप्रतीतिहेतुत्वं सविकल्पकस्यासिद्धम्, अन्वयव्यतिरेकाभ्यां तथावधारणात् । ननु तर्ह्यनुमितिज्ञानमपि सविकल्पकत्वादप्रमाणं स्यादत आह लिङ्गजस्तु विकल्पा इति ।

[पं०] वदिति दृष्टान्तोऽप्यत्रानुक्तेप्यूह्यः । तेषामिति (कं. १९१.१) क्षणानाम् । प्रत्यक्षेणेति (कं. १९१.२) निर्विकल्पकेन । अनाकलितक्षणभेदस्येति (कं. १९१.३) विकल्पस्य । अतद्व्यावृत्तमात्रापेक्षया संवाद इति (कं. १९१.३) अन्यव्यावृत्तिमात्रेण निर्विकल्पकविकल्पाध्यवसायप्रवृत्तीनां तुल्यत्वात् । प्रत्यक्षेणैव गृहीतत्वाद् (कं. १९१.५) इति प्रत्यक्षेण = निर्विकल्पकेन, अत एव समाघ्राता कुतो विषयैकता इत्युत्तरत्र वक्ष्यति । प्रमाणान्तराप्राप्तस्वलक्षणप्रापकतया प्रमाणमिति (कं. १९१.५) पर्वतादि नियतदेशाधिकरणे साध्यगणकत्वेन यदगृहीतग्राहित्वं तेन लिङ्गजो विकल्पः प्रमाणमित्यर्थः ।

न हि क्षणस्यान्यव्यावृत्तिरभावरूपेति (कं. १९१.६) विकल्पग्राह्याऽन्यव्यावृत्तिरभावरूपा, अतः सा प्रत्यक्षेण न हि गृह्यते इति योगः । तस्येति (कं. १९१.७) क्षणस्य । हेतुत्वस्य ग्राह्यलक्षणत्वादिति (कं. १९१.७) प्रत्यक्षस्य

[कु०] इत्यर्थः । अस्य संवादस्यान्यथासिद्धिमाशङ्कते अथेति (कं. १९०.१९) । आद्य प्रमाणत्वाङ्गीकारः स्पष्ट इति । द्वितीयं दूषयति यदीति (कं. १९०.२१) ।

मा भूत् स्वविषयेऽर्थारोपः स्वात्मन्येवासेस्त्विति शङ्कते अथेति (कं. १९०.२३) । दूषयति एवं तर्हीति (कं. १९०.२५) । अविसंवादिप्रतीतिहेतुत्वादिति (कं. १९०.२६) प्रत्यक्षपृष्ठभाविनियमेन तद्विषयस्य साक्षात्कारित्वनियमादित्यर्थः । क्षणभङ्गेन संवादबाधमाशङ्कते अथ मन्यसे इति (कं. १९०.२६) । यदि संवादो नास्ति कथं लौकिकानां संवादः प्रतीयत इत्यत आह [4]अत्र चेति (कं. १९१.४) । अन्यापोहेन सहागृहीतभेदमनुभवगृहीतमेव क्षणं

---

१ इत्यादि–जे. १, जे. २, जे. ३ । २ क्षणप्रत्यक्षण–कं. १, कं. २; जे. २, जे. ३ । ३ क्षणप्रत्यक्षेण–जे. १
४ तत्र च–क ।

न्यायकन्दली

क्रियाविरहात् । क्षणस्तु [1]परमार्थःसन्नर्थक्रियासमर्थत्वात् प्रत्यक्षस्य विषयः, स च विकल्पका[2]लाननुपातीत्युक्तम्, कुतो विषयैकता ? अस्तु वा विकल्पप्रत्यक्षयोरनिरूपितरूपः कश्चिदेकः प्रवृत्तिसंवादयोग्यो विषयः, तथापि विकल्पः प्रमाणत्वं नातिवर्त्तते, धारावाहिकबुद्धिवदर्थपरिच्छेदे पूर्वानिपेक्षत्वात्, अध्यवसितप्रापणयोग्यत्वाच्च । प्रमाणत्वे चावस्थिते प्रत्यक्षमेव स्याल्लिङ्गाद्यभावादर्थेन्द्रियान्वयव्यतिरेकानुविधायित्वाच्च ।

यत्पुनरयमर्थजो भवन्नपि निर्विकल्पकवदिन्द्रियापातमात्रेण न भवति, तदिन्द्रियार्थसहकारिणो वाचकशब्दस्मरणस्याभावात् । स्मृत्यनन्तरभावी विकल्पः स्मृतिज एव नेन्द्रियार्थजः, तयोः स्मृत्या व्यवहितत्वादिति चेत् ? किं भोः सहकारी भावस्य स्वरूपशक्तिं तिरोधत्ते ? क्षित्युदकतिरोहितस्य बीजस्याङ्कुरजननं प्रति का वार्त्ता ? शब्दस्मरणेनेन्द्रियार्थयोः क उपकारो येनेदं तयोः सहकारि भवतीति चेत् ? यथा

[टि०] भिन्नविषयत्वेन गृहीतग्राहितां विकल्पस्य निराचष्टे न हि क्षणस्य इति:–क्षणसम्बन्धिनी [3]याऽन्यव्यावृत्तिः सा तावत्प्रत्यक्षेण न गृह्यते इति सम्बन्धः । धारावाहिकस्य इति धारावाहिकज्ञानानि विषये एकस्मिन्नेव सातत्येन प्रवर्तन्ते, प्रमाणं च बौद्धैरभ्युपगम्यते इति । पुनर्बौद्धमाशङ्कते स्मृत्यनन्तरभावी इति :– विकल्प इन्द्रियार्थजो न भवति, स्मृत्यनन्तरं जायमानत्वाद् लैङ्गिक[4]ज्ञानवदिति प्रमाणम् । नन्वत्र इन्द्रियार्थनैरपेक्ष्येण स्मृत्यनन्तरभावित्वम्, इन्द्रियार्थसापेक्षत्वेन वा ? आद्ये तावदसिद्धिः, इन्द्रियार्थव्यतिरेकेण साक्षाद् विकल्पस्यानुत्पत्तेः । द्वितीये प्राह किं भोः इत्यादि । शक्तितिरोधानाभ्युपगमे दूषणमाह क्षित्युदकेति ।

[पं०] योऽस जनकोऽर्थः स एव हि प्रत्यक्षग्राह्यः । [5]एकवस्तुनश्चेति (कं. १९१.८) एकमभावरूपत्वादवस्तु, द्वितीयमारोपितत्वात् । अनिरूपितरूप इति (कं. १९१.१०) विचारासह इति तात्पर्यम् । कश्चिदेक इति (कं. १९१.१०) अपोहः । अध्यवसितप्रापणयोग्यत्वाच्चेति (कं. १९१.१२) अध्यवसितार्थप्रापणयोग्यं हि प्रमाणम् ।

तदिन्द्रियार्थसहकारिणो वाचकशब्दस्मरणस्याभावादिति (कं. १९१.१४) इन्द्रियार्थसन्निकर्षस्य हि सङ्केतसहकृतस्यैव विकल्पजनकत्वम् । परवाक्यं स्मृत्यनन्तरेत्यादि (कं. १९१.१६) । सूरिवाक्यं किं भोः (कं. १९१.१७) इत्यादि । सहकारीति (कं. १९१.१७) वाचकस्मरणरूपोऽत्राह्यः । भावस्येति (कं. १९१.१७) अत्र इन्द्रियार्थ-

[कु०] विषयीकुर्वन्ननुवादकतया न प्रमाणमित्यर्थः । अपोहविषयेऽपि किं विकल्पो लिङ्गजवत परम्परयाऽर्थप्रापकत्वा[त्] प्रमाणं भविष्यतीत्यत आह लिङ्गजस्त्विति (कं. १९१.५) । अनुवृत्त[त्ति] सिद्धये ह्यन्यव्यावृत्तिः कल्प्यते सा च न क्षमा[णा]त्मिका तत्कुतो गृहीतग्रहीतृत्वं विकल्पस्येत्यभिप्रायेण दूषयति तदपीति (कं. १९१.६) । अप्रामाण्ये साध्ये गृहीतग्राहित्वस्य हेतोर्व्यभिचारित्वं दर्शयितुं प्रत्यक्षविकल्पयोरेकविषयत्वमङ्गीकृत्याह अस्तु [6]वेति (कं. १९१.१०) । ननु यद्ययं विकल्पोऽर्थेन्द्रियसन्निकर्षजः स्यात्तदनन्तरमेवोत्पद्येत निर्विकल्पकवदित्यत आह यत्पुनरिति (कं. १९१.१३) ।

१ परमार्थसन्–कं. १; कं. २; जे. १; जे. ३ । २ कालाननुपपाती–जे. १ । ३ याऽन्यथावृत्तिः–अ, ब । ४ ज्ञानकदिति–अ, ब । ५ अवस्तुनश्च–कं, ब । ६ वेति–कं ।

न्यायकन्दली

विकल्पः स्वोत्पत्तावर्थेन्द्रिययोरन्वयव्यतिरेकावनुकरोति, तथा स्मृतेरपि। [1]तत्रेन्द्रियार्थयोरयमेव स्मरणेनोपकारो यदेतौ केवलौ कार्यमकुर्वन्तौ स्मृतिसहकारिलाभात् कुरुतः। स्वरूपातिशयानाधायिनो न सहकारिण इति क्षणभङ्गप्रतिषेधावसरे प्रतिषिद्धम्।

[169] स्यादेतत्–कल्पनारहितं प्रत्यक्षम्। कल्पनाज्ञानं तु सविकल्पकं तस्मादर्थे न प्रमाणमिति।

अथ केयं कल्पना? शब्दसंयोजनात्मिका प्रतीतिरेका, अर्थसंयोजनात्मिका चापरा [2]विशिष्टग्राहिण्यर्थप्रतीतिः कल्पना। तदयुक्तम्, विकल्पानुपपत्तेः। शब्दसंयोजनात्मिका प्रतीतिः किमर्थे शब्दं संयोजयति? किं वा स्वयं शब्देन संयुज्यते? यदि तावदर्थे शब्दं संयोजयति? [3]तत्रापि किं शब्दात्मकमर्थं करोति? किं वा शब्दाकारोपरक्तं गृह्णाति? आहोस्विच्छब्देन व्यपदिशति?

[टि०] [169] **कल्पनारहितम्** इति "प्रत्यक्षं कल्पनापोढमभ्रान्तम्" इति लक्षणाभ्युपगमादिति भावः। सिद्धान्तवाद्याह–**अथ केयं कल्पना** इति:–डित्थादौ केवलशब्दसंयोजनात्मिका, तत्र जात्यामर्थानां योजनाभावात्। [4]विषाणी शुक्लो गौर्गच्छतीत्यादौ तु विषाणादिद्रव्यगुणक्रियारूपाणामर्थानां तद्वाचकानां च शब्दानां संयोजनादुभया[5]त्मिकेत्यपि

[पं०] सन्निकर्षस्येति ग्राह्यम्। **तथा स्मृतेरपीति** (कं. १९१.२०) वाचकः स्मृतेरप्यन्वयव्यतिरेकावनुविधत्ते। [6]**वस्तुस्वरूपातिशयानाधायिनो न सहकारिण इति** (कं. १९१.२२) वस्तुस्वरूपेण येऽतिशयानादधते न स्मृतिश्च तस्य तस्य तमाधत्ते प्रागसमर्थयोरिन्द्रियार्थयोः स्वोत्पत्तिकार्यजननसामर्थ्यकरणात् इत्यर्थः।

[169] परवाक्यं **स्यादेतदित्यादि** (कं. १११.२३)। **कल्पनाज्ञानं त्विति** (कं. १९१.२३) काक्वा व्याख्येयम्।

सूरिवाक्यम् – **अथ केयमित्यादि** (कं. १९१.२४)। **शब्दसंयोजनाऽपि केति** (कं. १९१.२४) डित्थादौ केवलशब्दसंयोजनात्मिका तत्र जात्याद्यर्थानां योजनाऽभावात्। **अर्थसंयोजनात्मिकेति** (कं. १९१.२५) भिन्ना? केवलार्थसंयोजनात्मिका विषाणी शुक्लो गौर्गच्छतीत्यादौ तु विषाणिद्रव्यगुणक्रियारूपाणामर्थानां तद्वाचकानां च शब्दानां संयोजनादुभयात्मिकेत्यनुक्तमपि ज्ञेयम्। अर्थसंयोजनात्मिका चापरेत्यतः पुरः उभयत्रापीत्यध्याहार्या। **विकल्पानुपपत्तेरिति** (कं. १९१.२६) विकल्पैरघटनात्। **किं शब्दात्मकमर्थमित्यादि** (क. १९२.१) विकल्पत्रयेऽपि प्रतीतिः कर्त्री अर्थः कर्म।

[कु०] [169] **स्यादेतदिति** (कं. १९१.२२) यदिन्द्रियार्थसन्निकर्षोत्पन्नमित्येतल्लक्षणं स्यात् तदा सविकल्पकस्य प्रत्यक्षत्वं स्यात्। न चैतल्लक्षणमित्यर्थः।

**पृच्छति अथेति** (कं. १९१.२३)। उत्तरं **शब्देति** (कं. १९१.२३)। **अर्थेति** (कं. १९१.२४) जात्यादीनामर्थत्वमस्मत्प्रसिद्धा।

---

१ ततश्चेन्द्रियार्थ – कं. १, कं. २। २ विशिष्टग्राहिणी कल्पना– कं. १, कं. २; विशिष्टग्राहिणी प्रतीतिः – जे. १, विशिष्टग्राहिकाऽर्थप्रतीतिः – जे. २। ३ अत्रापि – जे. ३। ४ पविषाणी – ड। ५ त्मिकतेत्यपि – अ, ब, क। ६ 'वस्तु' इति कं पुस्तके नास्ति।

न्यायकन्दली

न तावत्प्रतीतिरर्थं शब्दात्मकं करोति, अर्थस्य निर्विकल्पकगृहीतेनैव स्वरूपेण विकल्पज्ञानेऽपि प्रतिभासनाद्, अर्थक्रियाकरणाच्च। अन्यथा व्युत्पन्नाव्युत्पन्नयोर्युगपदे[1]कार्थव्यवसायायोगात्।

अथ शब्दाकारोपरक्तमर्थं गृह्णाति? तदप्ययुक्तम्, अप्रतीतेः। निर्विकल्पकज्ञानेनार्थे गृहीते प्रागनुभूतस्तद्वाचकः शब्दः स्मर्यते, प्रतियोगिदर्शनात्। स्मृत्या रूढश्चासौ [2]तटस्थ एवार्थं परिच्छिनत्ति, न तु स्फटिक इव नीलोपरक्तः शब्दाकारोपरक्तोऽर्थो गृह्यते, शब्दस्याचाक्षुषत्वात्, केवलस्यैवार्थस्येदन्तया निर्विकल्पकवत् प्रतिभासनाच्च। न च वाचके स्मर्यमाणे वाच्यस्य काचित् स्वरूपक्षतिरस्ति, येनायं सत्यपीन्द्रिय[3]संयोगे प्रत्यक्षतां न लभते। यथोक्तम्–

[टि०] ज्ञेयम्, तिरश्चान्तु केवलार्थसंयोजनिकेति। **अर्थक्रिया [4]करणाच्च** इति:–अन्यथा घटकार्यामर्थक्रियां न कुर्यात्, शब्दकार्यमिव कुर्यात्। [5]**अन्यथा व्युत्पन्नेति**:–व्युत्पन्नस्य हि शब्दाध्यवसायः स्याद् अव्युत्पन्नस्य [6]त्वर्थाध्यवसाय इति भिन्नाध्यवसायता स्यात्। **प्रतियोगिदर्श[7]नाद्** इति:–प्रतियोगी प्रतिसम्बद्धी सञ्ज्ञीत्यर्थः। [8]**स्मृत्यारूढश्च** इति असौ

[पं०] **निर्विकल्पकगृहीतेनैव स्वरूपेणेति** (कं. १९२.३) येनैव स्वरूपेण निर्विकल्पकेन अर्थो गृहीतस्तेनैव स्वरूपेण। विकल्पज्ञाने प्रतिभासते ततः कथं प्रतीतिरर्थं शब्दात्मकं करोति? निर्विकल्पकेन हि [9]अशब्दात्मकोऽर्थो गृहीतोऽतः प्रतीतिरपि तादृगेव प्रतिभासः(से) प्राप्नोतीत्यर्थः। **अर्थक्रियाकरणाच्चेति** (कं. १९२.३) यदि हि प्रतीत्यार्थः शब्दात्मकः कृतस्तदा शब्दाकारेव क्रिया तेन क्रियते न घटादिसाध्येत्यर्थः। **अन्यथेत्यादि** (कं. १९२.४) यदि प्रतीत्या अर्थस्य शब्दात्मकत्वं क्रियते तदा। **व्युत्पन्नाव्युत्पन्नयोरिति** (कं. १९२.४) गृहीतागृहीतसङ्केतयोः। **युगपदेका[10]र्थाऽध्यवसायायोगाविति** (कं. १९२.४) कोऽर्थः। गृहीतसङ्केतयोर्भिन्नाध्यवसायता स्यात्, व्युत्पन्नशब्दाध्यवसायः स्यात्। अव्युत्पन्नस्य तु अर्थाध्यवसायः स्यादित्यर्थः।

**प्रतियोगिदर्शनादिति** (कं. १९२.६) प्रतियोगी संज्ञीवाच्य इति यावत्। **असाविति** (कं. १९२.६) शब्दस्मृत्या रूढत्वेन विप्रकृष्टत्वाद् अदसशब्दप्रयोगः। 'अदसस्तु विप्रकृष्ट' इति वचनात्। **तटस्थ एवेति** (कं. १९२.७) वक्तुमुखस्थ एव। **परिच्छिनत्तीति** (कं. १९२.७) अभिलषतीत्यर्थः। **शब्दस्याचाक्षुषत्वादिति** (कं. १९२.८) यदि शब्दाकारोपरक्तोऽर्थो गृह्यते तदाऽर्थवच्छब्दस्यापि ग्रहणाच्चाक्षुषत्वं प्रा[प्नो]ति। **केवलस्यैवेति** (कं. १९२.८)

[कु०] **निर्विकल्पकगृहीतेनेति** (कं. १९२.३) शब्दात्मकत्वविरहेणेत्यर्थः। **अर्थक्रियाकरणाच्चेति** (कं. १९२.३) निर्विकल्पके[न] गृहीतेनैवेति चकारेणानुकृष्यते। **अन्यथेति** (कं. १९२.४) यदि शब्दात्मतया प्रतीयमानामेवार्थक्रियां कुर्यात् स्तनंधयः स्तनंपीत्वा न तृप्येदित्यर्थः।

---

१ देकार्थाध्यवसाय–पं। २ तदर्थे–कं. १, फं. २। ३ सम्प्रयोगे–जे. २। ४ करणत्वेति–अ, ब। ५ प्रतीकमिदं अ पुस्तके भ्रष्टम्। ६ हेत्वर्थाध्यवसाय–अ, ब, क। ७ दर्शनादि–ब। ८ स्मृत्यारूढस्य–अ, ब, क। ९ शब्दात्मको। १० देकार्थाविसाय–कं. १, कं. २; जे. १, जे. २, जे. ३।

न्यायकन्दली

संज्ञा हि स्मर्यमाणापि प्रत्यक्षत्वं न बाधते ।
संज्ञिनः सा तटस्था हि न रूपा[1]च्छादनक्षमा ।। इति ।

प्रतीतिः शब्देन [2]संसृष्टार्थं व्यपदिशतीत्यपि न सुप्रतीतम् । आत्मा हि चेतनः प्रतिसन्धानादिसामर्थ्यात् सङ्केतकालानुभूतं वाचकशब्दं स्मृत्वा तेनार्थं व्यपदिशति । घटोऽयमिति न प्रतीतिः, तस्याः प्रतिसन्धानादिसामर्थ्याभावात् । एवं तावत्प्रतीतिर्न शब्दं संयोजयति ।

नापि स्वयं शब्देन संयुज्यते, ज्ञानस्य तदव्यतिरिक्तस्य चाकारस्य क्षणिकत्वेनासाधारणतया चाशक्यसङ्केतयोः शब्देन संस्रष्टुमयोग्यत्वात्, विषयवाचिना शब्देन

[टि०] शब्द इत्यर्थः । [3]अथ तृतीयं वि[4]कल्पं निराचष्टे [5][प्रतीतिः [6]शब्देनार्थं व्यपदिशति इत्यादि :—एवं प्रथमं विकल्पं विकल्पत्रयेण दूषयित्वोपसंहरति एवं तावत्प्रतीतिः इति । अथ द्वितीयं मूलविकल्पं निराचष्टे] [7]नापि स्वयं शब्देन

[पं०] शब्दरहितस्य निर्विकल्पकवदिति (कं. १९२.८) निर्विकल्पके इव । प्रतिभासनादित्यत्र (कं. १९२.९) सविकल्पके इति शेयम् । यदि परं वाचकवद्वाच्यस्याप्यप्रत्यक्षं भविष्यतीत्याशङ्क्याह न च वाचके (कं. १९२.९) इत्यादि । येनाऽयमिति (कं. १९२.९) अयं [वा]च्योऽर्थः । सञ्ज्ञा हीत्यादि (कं. १९२.११) श्लोके 'सञ्ज्ञा हि स्मर्यमाणाऽपि सञ्ज्ञिनोऽर्थस्य प्रत्यक्षत्वं न बाधते' इति पदघटना ।

न प्रतीतिरिति (कं. १९२.१५) प्रतीतिः कल्पनापरपर्याया । अथ घटोऽयमिति न व्यपदिश्यतीत्यर्थः । तस्याः प्रतिसन्धानादिसामर्थ्याभावादिति (कं. १९२.१५) पूर्वं हि निर्विकल्पके न सम्यगनुभवस्ततः सदृशपदार्थान्तरदर्शनात्संस्कारोद्बोधस्ततः सङ्केतस्मृतिस्ततो वाचकशब्दद्वारा सविकल्पकोत्पत्तिः, अतः कुतः प्रतीमः प्रतिसन्धानादिसामर्थ्यमिति भावः । न शब्दं [8]योजयतीति (कं. १९२.१६) न शब्दमर्थे योजयतीति द्रष्टव्यम् ।

संयुज्यते (कं. १९२.१६) इत्यत्र प्रतीतिः कर्त्री । ज्ञानस्येति (कं. १९२.१६) प्रतीतेः । असाधारणे हि सङ्केतः प्रवर्तते । अशक्यसङ्केतयोरिति (कं. १९२.१७) ज्ञानज्ञानगताकारयोर्बोधाकारयोरित्यर्थः । विषयवाचिनेति (कं. १९२.१८) ग्राह्यवाचिना । विषयिण इति (कं. १९२.१८) ग्राहकस्य । व्यापदेशाभावाच्चेति (कं. १९२.१८) न हि भवति घटोज्ञानमिति । स चार्थः [9]शब्दे न संसृज्यते व्यपदिश्यते चेति (कं. १९२.१९) काक्वा व्याख्येयम् ।

[कु०] [10]तटस्थेति (कं. १९२.११) कारणग्रहणमित्यर्थः । ताटस्थ्यविप्रतिपद्यमानं प्रत्यनुव्यवसायं प्रमाणमाह केवलस्येति (कं. १९२.८) । गृहीतसङ्केतस्येति । शब्दस्यायं विषय इत्यनुव्यवसायस्तटस्थमपि शब्दमवेक्ष्य विषयभावमापद्यमानस्य कथमिन्द्रियत्वमिति शङ्कां निरस्यति न च वा[च]क इति (कं. १९२.९) । न रूपाच्छादनक्षमेति (कं. १९२.१२) इन्द्रि[य]जन्यज्ञानं प्रतिबध्नातीत्यर्थः ।

तृतीयं पक्षं दूषयति प्रतीतिरिति (कं. १९२.१३) । एवं प्रथमं त्रेधा विकल्प्य दूषयित्वा तदुपसंहारपूर्वकं द्वितीयं दूषयति एवं तावदिति (कं. १९२.१५) ।

---

१ च्छादकक्षमा—जे. २ । २ शब्देनार्थं—जे. १; जे. २ । ३ अष्ट—अ, ब; ४ कल्पं—अ, ब । ५ [ ] एतच्चिह्नान्तर्गतः पाठः अ.बपुस्तकयोर्नास्ति । ६ शब्देन संसृष्टार्थं मु. शब्देनार्थं—जे. १, जे. ३ । ७ स्वयं शब्देन—क; नापि स्वयं शब्देति—अ । ८ संयोजयति—कं. १ । ९ संसृज्य शब्देन व्यपदिश्यते—कं. १ । १० तटस्थ इति—MS ।

न्यायकन्दली

विषयिणो विज्ञानस्य व्यपदेशाभावाच्च । अथ मन्यसे विकल्पः शब्दसंसृष्टार्थविषयः, स चार्थः संसृज्य शब्देन संसृज्यते व्यपदिश्यते च । (यत्र शब्दस्य सङ्केतः) तत्र च शब्दस्य सङ्केतो यदक्षणिकं साधारणं च, न च स्वलक्षणं स्वलक्षणविषयो वा बोधो बोधविषयश्चाकारः साधारणोऽक्षणिकश्च भवति । बोधाकारस्य बाह्यत्वमपि बोधाकारादनन्यदसाधारणमेव । सामान्यं च वस्तुभूतं नास्ति, विचारासहत्वात् । तस्मात् प्रत्येकं विकल्पैर्बाह्यत्वेनारोपितेषु स्वाकारेषु परस्परभेदानध्यवसायादन्यव्यावृत्ततयैकत्वे समारोपिते शब्दस्य सङ्केत इति प्रमाणबलादायातमवर्जनीयम् । तत्र चालीके

[टि०] इति । अत्र हेतुमाह ज्ञानस्य तदव्यतिरिक्तस्य च इति । यदि ज्ञानज्ञानाकारयो [विषयभूतयोः शब्दस्य सङ्केतः कर्तुं शक्यते] तर्हि ज्ञानज्ञानाकारयोः सम्बन्धः स्यान्न चैवमस्ति तयोः क्षणविनश्वरत्वात् केनापि सह सारूप्याभावाच्च ।

ननु स्वलक्षणतद्विषयबोधबोधाकाराणामस्त्वसाधारणत्वं क्षणिकत्वं च अन्तर्वर्तमानस्य तु बोधाकारस्य बहिरारोपितस्य साधारणत्वाक्षणिकत्वे भविष्यत इत्यत आह **बोधाकारस्य** इति ।

[पं०] **यद् क्षणिकं साधारणं चेति** (कं. १९२.२०) विकल्पितान्यव्यावृत्तिरूपम् । बौद्धानां हि मते घटादावर्थे अघटव्यावृत्त्यादिरूपमेव सामान्यमङ्गीक्रियते, तच्च परिकल्पितत्वादेवाक्षणिकम् अनुवृत्तिप्रत्ययहेतुत्वाच्च साधारणमित्यर्थः । **क्षणिकश्च भवतीति** (कं. १९२.२२) अत्रायं भावार्थः । स्वलक्षणादीनां त्रयाणां साधारणत्वाक्षणिकत्वाभावान्न शब्दसङ्केतः । ननु स्वलक्षणतद्विषयबोधबोधाकाराणामस्त्वसाधारणत्वं क्षणिकत्वं च, अन्तर्वर्तमानस्य तु बोधाकार[स्य] बहिरारोपितस्य साधारणत्वाक्षणिकत्वे भविष्यत इत्याशङ्क्याह **बोधाकारस्येत्यादि** (कं. १९२.२२) । **बोधाकाराबनन्यदिति** (कं. १९२.२२) तस्यैव बहिरारोपात् । न तु सामान्यं भविष्यति शब्दसङ्केतयोग्यं तस्य साधारणत्वादक्षणिकत्वाच्चेत्याशङ्क्याह **सामान्यं चेत्यादि** (कं. १९२.२३) । **बाह्यत्वेनेति** (कं. १९२.२३) स्थूलादित्वेन । **अन्यव्यावृत्ततयैकत्वे समारोपिते शब्दस्य सङ्केत** (कं. १९२.२४) इत्यत्र अन्यव्यावृत्ततया समारोपिते उपचरिते एकत्वे शब्दस्य सङ्केत इति पदघटना । **तत्र चेति** (कं. १९२.२५) बाह्यत्वेनारोपिते स्वाकारे । **तस्यामित्यादि** (कं. १९३.१) श्लोकव्याख्या–तस्यां कल्पनायां यद्बाह्यं रूपं घटादि आभाति–प्रतिभासते । किं विशिष्टया भाति ? एकमिव ? वि[भ]क्तपरमाणुमात्रत्वेऽपि स्थूलाकारप्रतिभासात् । पुनः किं विशिष्टम् ? बाह्यं रूपमाभाति !

[कु०] प्रकारान्तरेण नामयोजनमाशङ्कते **अथ मन्यस इति** (कं. १९२.१९) । अस्तु शब्दस्य संसृष्टगोचरत्वं कथमेतावता विकस्य कल्पनात्वमिति तस्यां कारणान्तरस्य कल्पनायां बाह्यमिव–एकमिव–अन्यतो व्यावृत्तमिव रूपमाभाति । न तु परमार्थं वस्तु तस्मा[त्] निरतत्वपरिज्ञानम् अलीकज्ञानं विभावना कल्पनेत्यर्थः ।

---

१ ज्ञानस्य तद्व्यतिरिक्तस्य – कं. १; कं. २ । २ संसृष्टार्थ – जे. १ ३ शब्देन व्यपदिश्यते च – कं. १; कं. २ । ४ प्रमाणबलायातम् – जे. १; जे. २; जे. ३ । ५ [ ] एतच्चिह्नान्तर्गतः पाठः अब पुस्तकयोर्नास्ति, भूतयोः सङ्केतः–क । ६ तदा सम्बन्धः स्यान्नैवम् इत्यावृत्तं 'ड' पुस्तके । ७ केनापि सारूप्या – अ । ८ अतद् – अ । ९ बोधाकारस्य च–अ, ब, क । १० क्षणिकत्वे न–अ, ब, क ।

न्यायकन्दली

शब्दसंसर्गवति विकल्पः प्रवर्तमानोऽसन्तमर्थं विकल्पयतीति कल्पनाज्ञानमिति । यथोक्तम्–

तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः ।
व्यावृत्तमिव निस्तत्त्वं परीक्षानङ्गभावतः ।। इति ।

[170] अत्रोच्यते–यदि सामान्यस्य वस्तुभूतस्याभावात् तद्विशिष्टग्राहिता कल्पनात्वम्, तर्ह्यसदर्थतैव कल्पनात्वं न [1]शब्दसंसृष्टग्राहिता । तत्र यदि शक्ष्यामः प्रमाणेन सामान्यमुपपादयितुं तदा सत्यपि शब्दसंसृष्टग्राहकत्वे तद्विषयं विकल्पज्ञानमिन्द्रियार्थजत्वात् प्रत्यक्षमेव स्यात् । यदपरोक्षावभासि तत्प्रत्यक्षं यथा निर्विकल्पकम्, अपरोक्षावभासि च विकल्पज्ञानम् । इह ज्ञानानां परोक्षत्वमनिन्द्रियार्थजत्वेन व्याप्तं यथानुमाने, अनिन्द्रियार्थजत्वविरुद्धं चेन्द्रियार्थजत्वं तद्भावभावित्वान्निर्विकल्पकज्ञाने प्रतीयत इति व्यापकविरुद्धोपलब्धिः । विपक्षे यत्स्मृतिपूर्वकं तदप्रत्यक्षं यथानुमानज्ञानम्, स्मृतिपूर्वकं च सविकल्पकज्ञानमिति प्रतिपक्षानुमानमप्यस्तीति चेत्? प्रत्यक्षत्वं [2]यदि न क्वचिदवगतम्?

[टि०] [170] **तस्यां यद्रूपम्** इति तस्यां विकल्पबुद्धौ निस्तत्त्वं तत्त्वान्निर्गतमपारमार्थिकमित्यर्थः । **बौद्ध**[3]रीत्यैवानुमानयति [4]**यदपरोक्षेति**–समीचीनं सदिति सम्यग्ज्ञानप्रस्तावात्कर्तव्यम् अन्यथा विपर्ययादीनामपि प्रत्यक्षप्रमाणता स्यात् । **व्यापकविरुद्धोपलब्धि**: इति :–प्रतिषेध्यस्य परोक्षत्वस्य यद् व्यापकमनिन्द्रियार्थजत्वं तस्य यद्विरुद्धमिन्द्रियार्थजत्वं तस्यो[5]पलब्धिः । **इन्द्रियार्थतद्भावेति**–एवंविधस्यैव सर्वत्र हेतुत्वात् प्रथमं सामान्येन तद्भावभावित्वादित्यत्र तच्छब्दप्रयोगः पश्चादिन्द्रियार्थयोस्तद्भाव इति[6] विशेषशब्दप्रयोगः ।

[पं०] अन्यतोव्यावृत्तमिति परमार्थतो हि अन्यतो व्यावृत्तं रूपं निर्विकल्पकग्राह्येषु परमाणुष्वेव दृष्टं परं कल्पनायामपि बाह्यं रूपं घटादिपटादिभ्यो व्यावृत्तं प्रतिभासते तन् निस्तत्वमपारमार्थिकमित्यवसेयम् । कुतः ? परीक्षाऽनङ्गभावतः परीक्षासरत्वादि[ति] तात्पर्यम् ।

[170] **अत्रोच्यते** इति (कं. १९३.३) श्रीधरेण । **असदर्थतैवेति** (कं. १९३.४) सामान्यस्य तव मतेऽसत्वात् । **तद्विषयमिति** (कं. १९३.६) सामान्यविषयम । **तद्भावभावित्वादिति** (कं. १९३.९) इन्द्रियार्थानांन्तरीयकत्वात् । **व्यापकविरुद्धोपलब्धिरिति** (कं. १९३.९) प्रतिषेध्यमप्रत्यक्षत्वं तस्य व्यापकमनिन्द्रियार्थजत्वं तस्य विरुद्धमिन्द्रियार्थ-

[कु०] [170] शब्दसंसृष्टगोचरत्वस्य कलनात्वं प्रत्येव प्रयोजकं दर्शयन् परिहरति **अत्रोच्यत** इति (कं. १९३.३) । विकल्पस्य प्रत्यक्षत्वे परमतमनुसृत्य प्रयोगमाह **यदपरोक्षावभासीति** (कं. १९३.६) । प्रतिबन्धप्रसिद्धये प्रसङ्गमाह [7]**इह ज्ञानानामिति** (कं. १९३.७) । [8]इन्द्रियार्थजत्वेनेन्द्रियसन्निकर्षकारणत्वेनेत्यर्थः । नन्वनुमेयादनुमेयं [9]जायते किं तर्हि ? लिङ्गात् । **व्यापकविरुधोपलब्धिरिति** (कं. १९३.९) अप्रत्यक्षस्य व्यापकमनिन्द्रियकार्यत्वं तस्योपलब्धि

१ शब्दसंसृष्टार्थग्राहिता – कं. १, कं. २, जे. ३ । २ यदि क्वचिदवगतम् –कं. १; कं. २; जे. ३ । ३ रीत्येव– अ, ब । ४ यदि – ड । ५ पलब्धिम् – अ, ब । ६ इति शब्दप्रयोगः – अ, ब । ७ य – MS । ८ अनिन्द्रियार्थजत्वेन – कं । ९ जातये – MS ।

न्यायकन्दली

तदा सविकल्पके तस्य न प्रतिषेधः, [1]प्राप्तिपूर्वकत्वात्प्रतिषेधस्य। अथ निर्विकल्पके प्रतीतम्? [2]तत् कथं प्रतीतम्? इन्द्रियार्थतद्भावभावित्वानुमानेनेति चेत्? तर्हि प्रत्यक्ष[3]त्वप्रसाधकस्य तद्भावभावित्वानुमानस्य प्रामाण्याभ्युपगमे सति [4]प्रत्यक्षत्वप्रतिषेधकानुमानं प्रवृत्तं तद्विपरीतवृत्ति अश्रावणः शब्द इतिवत्तेनैव बाध्यते। एवं तावच्छब्दसंयोजनात्मिका प्रतीतिः कल्पना न भवतीति।

अर्थसंयोजनात्मकापि विशिष्टग्राहिणी न कल्पना, विशेषणस्य विशेष्यस्य च तयोः सम्बन्धस्य च व्यवच्छेद्यव्यवच्छेदकभावस्य वास्तवत्वात्। [5]अर्थावग्रहो विज्ञानम्, तदर्थेन्द्रियसन्निकर्षाद्यथाभूतोऽर्थस्तथोपजायते, न त्वर्थे विचार्य प्रवर्त्तते। विशिष्टज्ञानं तु विचार इति। इदं विशेषणमिदं विशेष्यमयमनयोः सम्बन्ध एषा च लोकस्थितिः।

[टि०] अश्रावण इति :– यथा शब्दस्य श्रवणग्राह्यतया अन्वयव्यतिरेकानुमितयाऽश्रावणत्वानुमानं बाध्यते [6][एवं तद्भावभावित्वानुमितया [7]प्रत्यक्षतयाऽप्रत्यक्षतासाधनं बाध्यते] इति न सत्प्रत्यक्षता (सत्प्रतिपक्षता)। श्रवणग्राह्यतावधारणस्य चानुमानगम्यत्वमेव शब्दस्यैव प्रत्यक्षत्वात्। **विरम्य व्यापारे** इति :–शब्दबुद्धिकर्मणां पुनर्व्यापाराभावात्। द्व्यणुकव्यवच्छेदार्थं [8]बहुवचनम्।

[पं०] जत्वं, तस्योपलब्धिः। व्यतिरेकानुमानं **प्रत्यक्षत्वप्रसाधकस्येति** (कं. १९३.१३) निर्विकल्पकं प्रति। **प्रत्यक्षत्वप्रतिषेधकानुमानमिति** (कं. १९३.१४) निर्विकल्पकमिति। **तद्विपरीतवृत्तीति** (कं. १९३.१४) प्रत्यक्षत्वप्रतिषेधविपरीतवृत्ति। **अश्रावणः शब्द इतिवदिति** (कं. १९३.१४) यथा अश्रावणः शब्द इत्यस्य प्रयोगस्य विपरीतवृत्तित्वम्, अस्यैव शब्दस्य श्रूयमाणत्वेन श्रावणत्वस्यैव साधनात् तथा तद्भावभावित्वं विकल्पस्य प्रत्यक्षतां साधयति इन्द्रियार्थजत्वात्।

**वास्तवत्वादिति** (कं. १९३.१७) वास्तवत्वे च कुत[:] कल्पना। परवाक्यम्–[9]**अर्थावग्रहः विज्ञानमित्यादि** (कं. १९३.१८)। अर्थावग्रह इति अर्थस्यावगममात्रम्। **तदिति** (कं. १९३.१८) विज्ञानम्। **यथाभूत इति** (कं. १९३.१९) विशिष्टतारहितः। **प्रवर्तते इति** (कं. १९३.२०) विज्ञानं कर्तृ। **विशिष्टज्ञानमिति** (कं. १९३.२०)

[कु०] स्तद्विरुद्धमनिन्द्रिय(मिन्द्रिय)कार्यत्वं व्यावर्तयतीति तद्व्याप्यमपि प्रत्यक्षत्वं व्यावर्तयतीत्यर्थः। **तद्विपरीतवृत्तीति** (कं. १९३.१५) निर्विकल्पकप्रत्यक्षत्व(।)साधकं यदिन्द्रियभावभावित्वानुमानं तद्विशेषाभावात् सविकल्पकेऽपि प्रत्यक्षत्वं साधयति। ततश्चोपजीव्यप्रमाणविरोधात्कालात्ययापदिष्टं निषेधानुमानमित्यर्थः। प्रथमकल्पनाप्रकारदूषणमुपसंहृत्य द्वितीयं दूषयति **एवं तावदिति** (कं. १९३.१६)।

---

१ विधि – जे. १; जे. २। २ तत्कथम्? – जे. १; जे. २। ३ प्रत्यक्षत्वसाधक – जे. १; जे. २। ४ प्रत्यक्षप्रतिषेधका – जे. १; जे. २। ५ अर्थावग्रहं – कं. १; कं. २। ६ [ ] एतच्चिह्नान्तर्गतः पाठः अपुस्तके नास्ति। ७ प्रत्यक्षया – ब, क। ८ बहुवचनम् – अ। ९ अर्थावग्रहं विज्ञानम् – कं. १।

## न्यायकन्दली

दण्डी पुरुषो न तु पुरुषी दण्ड इति विचार्य च प्रत्येकमेतानि पश्चादेकीकृत्य गृह्णाति दण्डी पुरुष इति। यद्यर्थस्य विशिष्टता वास्तवी प्रथममेव विशिष्टज्ञानं [1]जायेत। न भवति चेत्? नास्य [2]स्वरूपतो विशिष्टता किं तूपाधिकृतेति विशिष्टताज्ञानं कल्पनेति चेत्? [3]दुरूहमिदमायुष्मता, आत्मा हि प्रत्येकं विशेषणादीन् गृहीत्वाताननुसन्दधान इन्द्रियेणार्थस्य विशिष्टतां प्रत्येति न ज्ञानमचेतनम्, तस्य प्रतिसन्धानाशक्तेः, विरम्य व्यापाराभावाच्च। अर्थो विशेषणसम्बन्धाद्विशिष्ट एव, विशेषणादिग्रहणस्य सहकारिणोऽभावात्। प्रथममिन्द्रियेण न तथा गृह्यते, गृहीतेषु विशेषणादिषु गृह्यत इत्यर्थेन्द्रियजं तावद्विशिष्टज्ञानम्। यदि विशिष्टज्ञानत्वादेवापराधात् प्रत्यक्षं न भवति, दुःसमाधेयमित्युपरम्यते।

[पं०] कल्पनाज्ञानम्। गृह्णातीत्य (कं. १९३.२२) स्मात्पुरः कश्चिमिति पदमध्याहार्यम्। कथं दण्डीपुरुष इति। दण्डीपुरुष इत्यस्मात्पुरो यत् इत्यध्याहार्यम्। वास्तवी (कं. १९३.२३) त्यतःपुरस्तदेत्यध्याहारः। नास्येति (कं. १९३.२३) अस्यार्थस्य। स्वरूपत इति (कं. १९३.२३) अनौपाधिकी। श्रीधरवाक्यं [4]दुरूह (कं. १९३.२४) मित्यादि। दु[रू]हमित्यस्य स्थाने दुरुत्तरमिति पाठान्तरं तदपि सुष्ठु। विशेषणादीनिति (कं. १९३.२५) नागृहीतविशेषणा विशिष्टा बुद्धिरिति प्रथमं विशेषणम्। ज्ञानमिति (कं. १९३.२६) कर्तृभूतम्। अचेतनमिति (कं. १९३.२६) वैशेषिकमते। प्रतिसन्धानाशक्तेरिति (कं. १९३.२६) विशेषणविशेष्यादिसम्बन्धावधारणेऽसमर्थत्वात्। [5]विरम्य व्यापाराभावाच्चेति (कं. १९३.२६) शब्दबुद्धिकर्मणां पुनर्व्यापाराभावात्। विशिष्ट एव (कं. १९३.२७) इत्यस्मात्पुरः किन्त्वित्यध्याहार्यम्।

[कु०] अवच्छित्तिरेतद्व्यावृत्तिः कर्मगतत्वेन निरूप्यमाणा व्यवच्छेद्यत्वं, कारणगतत्वेन निरूप्यमाणा व्यवच्छेदकत्वम्; अत एवैकवचनविरोधाज्ज्ञानव्यतिरिक्तं प्रतिसन्धातारमपश्यन् शङ्कते [6]अर्थावग्रह इति (कं. १९३.१९)। प्रथममेव प्रथमाक्षसन्नि[7]पातानन्तरमेव उपाधिवासनापरिपाकविशेषः। तत्कृतत्वाद्विशिष्टज्ञानं कल्प्यत इत्यर्थः। आत्मप्रकरणोक्तं प्रतिरिक्तत्वमनाकलयतः शङ्केति सूचयन् सोपहासमाह [8]दुरुत्तरमिति (कं. १९३.२४)। दुरुत्तरं दुःखेनोत्तरितव्यम्। यदुक्तं विशिष्टस्य पारमार्थिकत्वे प्रथमत एव विशिष्टज्ञानमुत्पद्येतेति तत्राह अर्थो विशेषणसम्बन्धादिति (कं. १९३.२७)। नन्वनुमानादिषु गृहीतव्याप्तिकस्याप्रत्यक्षत्वसाधकस्य विशिष्टस्य विषयत्वहेतोरनिन्द्रियजत्वमुपाधिं दर्शयन्नुपसंहरति अर्थेन्द्रियजं तावदिति (कं. १९४.२)।

---

१ जायते – जे. १। २ स्वरूपविशिष्टता – जे. १। ३ दुरूहित – कं. १, कं. २; दुरुदार – जे. ३।
४ दुरूहित – कं. १। ५ पञ्जिकायां 'चिरस्य' इति पाठः सोऽर्थदृष्ट्या न साधुः। ६ अर्थावग्रहम् – कं।
७ अत्र 'उपातान्तरमेव' इति पुनरावृत्तं हस्तलिखित पुस्तके – सं। ८ दुरूहितम् – कं।

### प्रशस्तपादभाष्यम्

[171] रूपरसगन्धस्पर्शेष्वनेकद्रव्यसमवायात् स्वगतविशेषात् स्वाश्रयसन्निकर्षान्नियतेन्द्रियनिमित्त[1]मुत्पद्यते ।

शब्दस्य त्रयसन्निकर्षाच्छ्रोत्रसमवेतस्य तेनैवोपलब्धिः ।

### न्यायकन्दली

[171] रूपादिषु प्रत्यक्षोत्पत्तिकारणमाह–[2]रूपरसगन्धस्पर्शेष्विति । अनेकेष्ववयवेषु समवेतं द्रव्यमनेकद्रव्यम्, तत्र समवायात् । स्वगतो विशेषो रूपे रूपत्वं रसे रसत्वं गन्धे गन्धत्वं स्पर्शे स्पर्शत्वं तस्मात् । स्वाश्रयसन्निकर्षाद्रूपादीनां य आश्रयस्तस्य ग्राहकैरिन्द्रियैः सन्निकर्षान्नियतेन्द्रियनिमित्तं चक्षुर्निमित्तं रूपे, रसननिमित्तं रसे, घ्राणनिमित्तं गन्धे, त्वगिन्द्रियनिमित्तं स्पर्शे ज्ञानमुत्पद्यते । स्वगतविशेषाणां हेतुत्वाद्रूपादिष्विन्द्रियव्यवस्था, अन्यथा परिप्लवः स्याद्विशेषाभावात् । शब्दस्य त्रयसन्निकर्षाच्छ्रोत्रसमवेतस्य तेनैवोपलब्धिः ।

त्रयसन्निकर्षादिति आत्ममनइन्द्रियाणां सन्निकर्षो [3]दर्शितः । इन्द्रियार्थसन्निकर्षः श्रोत्रसमवेतस्येत्यनेनोक्तः । तेनैवोपलब्धिरिति श्रोत्रेणैवोपलब्धिरित्यर्थः ।

[टि०] [171] अनेकेषु इति [4]प्राभाकराः प्रत्यवतिष्ठन्ते कर्म[5]प्रत्यक्षम् इति :–[6]स संयोगविभागानुमितेति :– [7]विवादाध्यासितौ संयोगविभागौ [8]असमवायिकारण[9]पूर्वौ भावरूपकार्यत्वाद् घटवत् । [10]तरुमृगस्य इति तरुमृगः शाखा-

[पं०] [171] अनेकेष्विति (कं. १९४.४) द्व्यणुकव्यवच्छेदार्थं बहुवचनम् । आश्रय इति (कं. १९४.६) घटादिः । [11]रूपादिग्राहकै (कं. १९३.६)रित्यत्र रूपादि इति पदं नास्ति पाठान्तरे । चक्षुर्निमितं रूपे इति (कं. १९४.७) रूपे चक्षुर्निमितं ज्ञानमुत्पद्यत इति योगः । स्वगतविशेषाणामिति (कं. १९४.८) रूपत्वादीनाम् । तेनैवोपलब्धिरिति (कं. १९४.१०) रूपरसगन्धस्य वस्तुनि समवेताश्चक्षुरादिभिर्गृह्यन्ते शब्दस्तु श्रोत्रसमवेत एव श्रोत्रेणोपलभ्यते इत्यर्थः ।

इन्द्रियार्थसन्निकर्ष (कं. १९४.११) इत्यत्र अथ शब्देन शब्द उच्यते ।

प्राभाकराः प्राहुः कर्मप्रत्यक्ष (कं. १९४.१३) मित्यादि । संयोगविभागानुमितक्रियालम्बन (कं. १९४.१५) इत्यत्र क्रियाशब्देन कर्म लक्ष्यते । विवादाध्यासितौ संयोगविभागौ असमवायिकारणभूतकर्मपूर्वौ भावरूपकार्यत्वात् घटवत् । श्रीधरवाक्यं तवसारमिति (कं. १९४.१५) । उभयवृत्तित्वादिति (कं. १९४.१६) द्विष्टत्वात् । [12]अनवरत-

[कु०] [171] अनेकेष्विति (कं. १९४.४) बहुवचनेन द्व्यणुकरूपस्य प्रत्यक्षत्वं निवारयति रूपे रूपत्वमिति (कं. १९४.५) । उद्भवसमाख्यातोऽपि स्वगतो विशेषो द्रष्टव्यः ।

---

१ मुत्पद्यते ज्ञानम् – दे । २ रूपरसेत्यादि – कं. १, कं. २ । ३ दर्शित इति – जे. १, जे. २ । ४ प्राभाकरा – अ । ५ प्रत्यक्षम् – अ । ६ 'स' अबपुस्तकयोर्नास्ति । ७ विभागा – ड । ८ असमवाय – अ, ब, क । ९ कारपूर्वो – ड । १० तरुण – अ । ११ ग्राहकैः – कं. १ । १२ अनारत – कं. १ ।

### प्रशस्तपादभाष्यम्

**संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेह[1]द्रवत्ववेगकर्मणां प्रत्यक्षद्रव्यसमवायाच्चक्षुःस्पर्शनाभ्यां ग्रहणम् ।**

### न्यायकन्दली

**संख्यादीनां कर्मान्तानां प्रत्यक्षद्रव्यसमवेतानामाश्रयवच्चक्षुःस्पर्शनाभ्यां ग्रहणम् । कर्मप्रत्यक्षमिति न मृष्यामहे, गच्छति द्रव्ये संयोगविभागातिरिक्तपदार्थान्तरानुपलब्धेः । यस्त्वयं चलतीति प्रत्ययः स संयोगविभागानुमितक्रियालम्बन इति । तदसारम्, यदि कर्माप्रत्यक्षं विभागसंयोगाभ्यामनुमीयते तदा विभागसंयोगयोरुभयवृत्तित्वादाश्रयान्तरेऽपि कर्मानुमीयेत । न च मूलादग्रमग्राच्च मूलं गच्छति शाखामृगे तरा[2]वप्यन्यतरसंयोगविभागाधिकरणे चलतीति प्रत्यय [3]उदयते । यदि मतं योऽयं तरुमृगस्याकाशादिनापि संयोगस्तस्य तरुसमवेतात् कर्मणो निष्पत्त्यनवकल्पनान्न तरौ कर्मानुमानमिति कल्प्यताम्? तर्हि देशान्तरसंयोगार्थं तरुमृगेऽपि कर्मान्तरम्, तरौ तु कर्मकल्पना न निवर्त्तत एव ।**

[टि०] मृगः । **यदधिकरणम्** इति :–[4]कारणमसमवायिकारणं न तु [5]निमित्तकारणम् अधिकरणानामपि विषयाणां ज्ञानसुखादिहेतुत्वात् । **तस्यार्थापत्तिवद्** इति :–यथा[6]ऽन्यथोपपत्त्याऽर्थापत्तिः परिभूयते न तथाऽनुमानमिति । एतच्च पराभिप्रायेणोक्तम्, [7]स्वाभिप्रायेण त्वर्थापत्तेरप्यनुमानत्वात् । [8]**न चेदम्** इति :–इदमनुमानम् ॥

॥ इति अयोगिप्रत्यक्षनिरूपणम् ॥

[पं०] **संयोगविभागाधिकरणे** (कं. १९४.१७) इत्यस्य स्थाने अन्यतरसंयोगविभागाधिकरणे इति पाठान्तरं दृश्यते, तदपि सुष्ठु । **चलतीति प्रत्यय [9]उदयते** (कं. १९४.१८) इति कोऽर्थः? किन्तु शाखामृगे एव चलतीति प्रत्ययो न तरौ इत्यर्थः । **तरुमृगस्येति** (कं. १९४.१८) कपेः । **आकाशादिनापीति** (कं. १९४.१८) आदि शब्दाद्दिक्कालात्मग्रहः । न केवलं वृक्षेण आकाशः, दिक्कालात्मभिरपि इत्यर्थः । [10]**तस्येति** (कं. १९४.१९) तरुसमवेतात्कर्मणः सकाशात् ? आकाशादिसंयोगस्य [11]न निष्पत्तिः किंतु तत्संयोगाविति । संयोगजः संयोगस्तस्मान्न तरौ कर्मानुमीयते केवलं कपौ कर्मानुमीयते इति वाक्यार्थः । **यदि मतमित्यादि** परवाक्यमुद्दिश्य श्रीधरः प्राह **कल्पना** (कं. १९४.२०) मित्यादि । **देशान्तरसंयोगार्थम्** (कं. १९४.२०) आकाशादिसंयोगार्थम् । **तरौ त्विति** (कं. १९४.२०) तरावपीत्यर्थः । **कार्यमिति** (कं. १९४.२१) संयोगविभागौ । **तदधिकरणं कारणमित्युत्सर्गं** (कं. १९४.२१) इत्यत्र कारणमिति

[कु०] ननु गच्छति द्रव्ये गतिः प्रतीयते तत्कुतोऽमर्षं इत्यत आह **गच्छति द्रव्य** इति (कं. १९४.१३) । ननु यदेयं प्रतीतिः संयोगविभागविषया तर्हि संयुज्यते विभज्यते इति कुतो न व्यपदिश्यत इत्यत आह **यस्त्वयमिति** (कं. १९४.१४) । अनुमितेनापि विषयेणानुमापकं व्यपदिश्यते यथा चलन्त्यां पताकायां वायुर्वातीति भावः । **तदसारमिति** (कं. १९४.१५)

---

१ वेगद्रवत्व – दे । २ वप्यनारत – कं. १, कं. २; अनवरत इति पाठः – जे. १; अनातरतेति पाठान्तरं – जे. ३ । ३ उदीयते – जे. १, जे. २, जे. ३ । ४ कारणं समवायि – अ; कारणमसमवाय – ड । ५ नुमित्त – अ । ६ ऽयथो – अ, ब । ७ स्वाभिप्रायेण – अ । ८ न चैद – अ । ९ उदीय इति पञ्जिकायां पाठः स च न साधुः । १० तस्येत्यादि – ब । ११ तु – अ ।

न्यायकन्दली

यदधिकरणं कार्यं तदधिकरणं कारणमित्युत्सर्गस्तस्यैकत्र व्यभिचारेऽन्यत्र क आश्वासः? शाखामृगसमवेतेन कर्मणा कल्पितेन शाखामृगस्य तरुणा देशान्तरेणापि समं संयोगविभागयोरुत्पत्तेरुभयकर्मकल्पनानुपयोग इति चेन्नैवम्, प्रतिबद्धं हि लिङ्गं यत्रोपलभ्यते तत्र प्रतिबन्धकमुपस्थापयतीत्येतावत्येवानुमानस्य सामग्री। तस्यार्थापत्तिवदन्यथोपपत्त्या कः परिभवः? न चेदं पुरुष इव चेतनं यत्प्रयोजनानुरोधात् प्रवर्तते। यदि [1]त्वेकस्य [2]व्योमप्रदेशस्य [3]संयोगविभागाः क्रियानुमितिहेतवः कल्प्यन्ते? न शक्यं कल्पयितुम्, अतीन्द्रियव्योमाश्रयाणां विभागसंयोगानामप्रत्यक्षत्वात्। भूगोलकप्रदेशविभागसंयोगसन्तानानुमेयत्वे गच्छतो वियति विहङ्गमस्य कर्म दुरधिगमं स्यात्। वियद्वितितालोकनिवहविभागसंयोगप्रवाहो यदि तस्य लिङ्गमिष्यते? अनिच्छतोऽप्यन्धकारे वायुदोषादेकस्मादुपजातावयवकम्पस्य भुजाग्रं मे कम्पते [4]भ्रूश्चलतीत्यदृष्टाकृष्टान्तःकरणाधिष्ठितत्वगिन्द्रियजा कर्मबुद्धिरनिबन्धना स्यात्। रात्रौ महामेघान्धकारे क्षणमात्रस्थायिन्यां विद्युति चलतीति प्रत्ययस्य का गतिः?

[पं०] असमवायिकारणभूतं कर्म। [5]अत्रैवमाशयः संयोगविभागौ हि तरौ वर्तेते अतः कर्मणाऽपि तरौ भाव्यमेव। देशान्तरेणेति (कं. १९४.२३) आकाशादिना। उभयकर्मेति (कं. १९४.२३) कपितरुगतत्वेन। लिङ्गमिति (कं. १९४.२४) अत्र संयोगविभागलक्षणं प्रतिबन्धकमिति कर्मलक्षणम्। [6]इत्येवानुमानसामग्रीति (कं. १९४.२५) यथा यत्र धूम उपलभ्यते तत्राग्निमुपस्थापयति। तस्यार्थापत्तिवदन्यथोपपत्त्या (कं. १९४.२५) ऽर्थापत्तिरभिभूते न तथाऽनुमानमभिभूयते। पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र पीनत्वस्य वातादिवशादप्यु[प]पत्तेरन्यथोपपत्तिः। तथापि चार्थापत्तिः परिभूयते नैवमनुमानमित्यर्थः। न चेदमिति (कं. १९४.२६) इदमनुमानम्। एकस्येति (कं. १९४.२७) कपेरेव। अप्रत्यक्षत्वादिति (कं. १९५.१) न च विभागसंयोगौ अप्रत्यक्षौ सन्तौ लिङ्गं भवितुमर्हतः प्रत्यक्षस्यैव लिङ्गत्वात्। भूगोलकप्रदेशविभाग[7]संयोगत्वानुमेयत्वे (कं. १९५.१) कर्मण इति षष्ठ्यन्तं पदं द्रष्टव्यम्। [8]क्षणमात्रावस्थायिन्या (कं. १९५.६) मित्यनेन आलोकप्रवाहाभाव उक्तः। चलतीति (कं. १९५.६) इत्यत्र कीटकादि कर्तृ।

[9]तत्संयुक्तसमवायादिति (कं. १९५.७) मनःसंयुक्तात्मसमवायात्।

[कु०] अत्र यद्यनुमितं कर्म चलतीति प्रत्ययस्य विषयः तर्हि देशाद्देशान्तरप्राप्त्यानुमितेन कर्मणा सवितर्यपि चलतीति प्रत्ययः स्यात्। अथ तत्र गगनदेशान्तरस्याप्रत्यक्षतया तत्प्राप्तिरप्र[त्य]क्षा तर्हि नभसि सञ्चरति खद्योतेऽपि चलतीति प्रत्ययो न स्यात्। स्वप्रभावयवसंयोगविभागाभ्यां कर्मानुमानं सवितर्यपि समानं, नुद्यनोदकयोरिव प्रभाप्रभावतोः संयोगविभागौ

---

१ एकस्य = शाखामृगस्य – जे. ३। २ व्योमप्रदेश – जे. ३। ३ विभागसंयोगाः – जे. १, जे. २, जे. ३। ४ भ्रूश्चलतीत्यदृष्टान्तःकरणा – कं. १, कं. २; बाहुश्चलतीत्यदृष्टान्तःकरणा – जे. २; जे. ३। ५ अत्रैवमाशयः – इति पञ्जिकायां पाठः स तु न समीचीनो भाति। ६ एतावत्येव – कं. १। ७ संयोगसन्तानानुमेयत्वे – कं. १। ८ क्षणमात्रस्थायिन्याम् – कं. १। ९ संयुक्तसमवायात् – कं. १।

### प्रशस्तपादभाष्यम्

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां द्वयोरात्ममनसोः [1]सन्निकर्षादुपलब्धिः ।

भावद्रव्यत्वगुणत्वकर्मत्वादीनामुपलभ्याधारसमवेतानामाश्रयग्राहकैरिन्द्रियैर्ग्रहणमित्येतदस्मदादीनां प्रत्यक्षम् ।

### न्यायकन्दली

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां द्वयोरात्ममनसोः संयोगादुपलब्धिः [2]बुद्धीत्यादि । आत्मसमवेतानां [3]तत्संयुक्तसमवायाद् ग्रहणम् ।

[4]भावद्रव्यगुणकर्मत्वादीनामुपलभ्याधारसमवेतानामाश्रयग्राहकैरिन्द्रियैर्ग्रहणम् । सत्ताद्रव्यत्वादीनां सामान्यानामाश्रयो येनेन्द्रियेण गृह्यते तेनैव तानि गृह्यन्ते । तत्र संयोगाद् द्रव्यग्रहणम्, संयुक्तसमवायाद् गुणादिप्रतीतिः, संयुक्तसमवेतसमवायाद् गुणत्वा-[6]विज्ञानम्, समवायाच्छब्दग्रहणम्, समवेतसमवायाच्छब्दत्वग्रहणम्, सम्बद्धविशेषणतया चाभावग्रहणमिति षोढा सन्निकर्षः । यत्संयुक्तसमवेतविशेषणत्वेन रूपे रसाद्यभावग्रहणम्, [5]या च संयुक्तसमवेतविशेषणविशेषणत्वेन रूपत्वे रसत्वाद्यभावप्रतीतिः, यश्च समवेत-

[पं०] संयोगाविति (कं. १९५.९) इन्द्रियसंयोगात् । द्रव्यग्रहणमिति (कं. १९५.९) आश्रयग्रहणम् ।१। संयुक्तसमवायाद्गुणादिप्रतीतिरिति (कं. १९५.९) इन्द्रियसंयुक्तो घटादिः सूत्रसमवेता गुणादयः ।२। संयुक्तसमवेतसमवायाद्'गुणादिज्ञानमिति (कं. १९५.९) इन्द्रियसंयुक्तो घटादिः सूत्रसमवेता गुणादयस्तत्र समवेतं गुणत्वम् ।३। समवायाच्छब्दग्रहणमिति (कं. १९५.१०) श्रोत्रे समवेतं शब्दं गृह्णाति ।४। समवेतसमवायाच्छब्दत्वग्रहणमिति (कं. १९५.१०) श्रोत्रभावापन्नाकाशे समवेतः शब्दस्तत्र च समवेतं शब्दत्वम् ।५। सम्बद्धविशेषणतया चाभावग्रहणमिति (कं. १९५.१०) सम्बद्धस्येन्द्रियसन्निकृष्टस्य भूतलादेर्विशेषणतयाऽभावग्रहणं यथा 'अघटं भूतलम्' ।६। यत्संयुक्तसमवेतविशेषणत्वेन रूपे रसाद्यभावग्रहणमिति (कं. १९५.११) इन्द्रियसंयुक्तो घटादिस्तत्र समवेतं रूपं तस्य विशेषणं रसाद्यभावः ।१। 'यावत्संयुक्तसमवेतसमवेत'विशेषणरूपत्वेन रसत्वाद्यभावप्रतीतिरिति (कं. १९५.१२) इन्द्रियसंयुक्तो घटादिस्तत्र समवेता रूपादयः रूपे च समवेतं रूपत्वं तस्य विशेषणं रसत्वाद्यभावः ।२। यश्च समवेतविशेषणतया ककारे खकाराद्यभावावगम इति (कं. १९५.१३) श्रोत्रसमवेतस्य ककारादेः शब्दस्य विशेषणतया लिपिरूपसुरूपेणैव गतार्थः ।३। यच्च समवेत[सपवेत]विशेषणतया गत्वे खत्वाद्यभाव'ग्रहणमिति (कं. १९५.१४) श्रोत्रे समवेतो गकारस्तत्र समवेतं गत्वं तस्य विशेषणं खत्वाद्यभावः ।४।

[कु०] न प्रतीयेते इति चेत्, न तत्र द्रव्यस्याविनष्टस्याचलचक्षुषोपलब्धस्यानुपलम्भेन देशान्तरप्राप्तिमनुमाय चलतीति प्रत्ययः सवितर्यपि किं न स्यादित्यतिप्रसङ्गस्य प्रद्योतनाय धर्मं प्रचिनोति तद्धर्मसहायस्तमर्थं प्रद्योतयतीत्यन्वय ।

---

१ संयोगा – कं. १, कं. २ । २ बुद्धीत्यादि – कं. १, कं. २ । ३ संयुक्त – कं. १, कं. २ । ४ भावेति – कं. १, कं. २ । ५ य च्च । ६ गुणत्वादि – कं. १, अत्र 'इन्द्रियसंयुक्ते घटादि सूत्रसमवेता गुणादय संयुक्तसमवायाद् गुणज्ञानम्' इति पुनरावृत्तम् । ७ यच्च । ८ विशेषणत्वेन । ९ संवेदनम् ।

प्रशस्तपादभाष्यम्

[172] अस्मद्विशिष्टानां तु योगिनां युक्तानां योगजधर्मानुगृहीतेन मनसा स्वात्मान्तराकाशदिक्कालपरमाणु[1]वायुमनस्सु [2]तत्समवेतगुणकर्मसामान्यविशेषेषु समवाये चावितथं स्वरूपदर्शनमुत्पद्यते । वियुक्तानां पुनश्चतुष्टयसन्निकर्षाद्योगजधर्मानुग्रहसामर्थ्यात् सूक्ष्मव्यवहितविप्रकृष्टेषु प्रत्यक्षमुत्पद्यते ।

न्यायकन्दली

विशेषणतया ककारे खकाराद्यभावावगमः, [3]यच्च समवेत[4]समवेतविशेषणतया गत्वे खत्वाद्यभावसंवेदनं तत्सर्वं सम्बद्धविशेषणभावेन [5]संगृहीतम् ।

अपरे तु सर्वत्र यथासम्भवं संयोगसमवाययोरेव हेतुत्वादवान्तरसम्बन्धकल्पनां नेच्छन्ति, ईदृशो हि तेषां भावानां स्वभावो यदेषामन्यसन्निकर्षादेव ग्रहणम् । अतिप्रसङ्गश्च नास्ति, स्वाश्रयप्रत्यासत्तेर्नियामकत्वात् ।

उपसंहरति–[6]एतदस्मदादीनां प्रत्यक्षमिति । अस्मदादीनामयोगिनामित्यर्थः ।

[172] योगिप्रत्यक्षमाह–अस्मद्विशिष्टानां त्विति । योगः समाधिः । स द्विविधः–सम्प्रज्ञातोऽसम्प्रज्ञातश्च । सम्प्रज्ञातो धारकेण प्रयत्नेन क्वचिदात्मप्रदेशे वशीकृतस्य मनसस्तत्त्व-

[टि०] [172–173] ( ।। अथ योगिप्रत्यक्षनिरूपणम् ।। )

[7]अभ्युत्थान इति–अनुच्छेद्यः । विपरीतरूपेति गौरोऽहमिति प्रत्ययो मिथ्यैव आत्मनो गौरत्वाभावात् ।

[पं०] अपरे त्विति (कं. १९५.१५) नैयायिकाः । अन्यसन्निकर्षादेव ग्रहणमिति (कं. १९५.१७) आश्रये समवेतं रूपं तत्र समवेतं रूपत्वमित्यादि ज्ञेयम् । ननु यदि संयोगसमवाययोरेव हेतुत्वादवान्तरकल्पना नेष्यते तर्हि यथा भूतलेन संयुक्तो घटोऽस्ति तथा पटादयोऽपि सन्ति, यथा च घटे रूपं समवेतं तथा रसादयोऽपि समवेताः सन्ति । यदि च संयोगसमवायमात्रादेवावान्तरसम्बन्धरहितात् तत्पदार्थानां ग्रहणं तदा घटवत् पटादयोऽपि रूपवद्रसादयोऽपि ग्राह्याः स्युः संयोगसमवाययोरविशेषादित्यत्राशङ्कयाह अतिप्रसङ्गश्च नास्तीति (कं. १९५.१७) स्वाश्रयप्रत्यासत्तेर्नियामकत्वादिति (कं. १९५.१७) यत्र भूतले घटोऽस्ति तत्र घट एव लभ्यते न पटस्तथा रूपे रूपत्वमेव रसे रसत्वमेवेत्याद्यूह्यम् ।

[172] [8]अभ्युत्थान इति (कं. १९५.२२) अनुच्छेदाः । आत्मन्येव परिणामादिति (कं. १९५.२४) आत्मसमत्वात् ।

[कु०] [172] [9]अप्रक्षीणमलावरणानामिति (कं. १९६.१) सम्प्रज्ञातयोगदशायां तादृशधर्मस्याभावान्न मलावरणप्रक्षय इत्यर्थः ।

१ वायुपरमाणु–दे । २ तत्समवेतेषु च–दे । ३ यश्च–कं. १; कं. २ । ४ समवाय–जे. १ । ५ गृहीतम्–जे. १, जे. २ । ६ अस्मदादीनामिति–जे. १, जे. २ । ७ निरभ्युत्थानात् मु; अभ्युत्थान–जे. १, जे. ३ । ८ अभ्युत्थानात्–कं. १ । ९ अप्रक्षीरमलाचरणानाम्–MS. ।

न्यायकन्दली

बुभुत्सा[1]विशिष्टेनात्मना संयोगः । असम्प्रज्ञातश्च वशीकृतस्य मनसो निरभिसन्धिर्निर[2]भ्युत्थानः क्वचिदात्मप्रदेशे संयोगः । तत्रायमुत्तरो मुमुक्षूणामविद्यासंस्कारविलयार्थमन्त्ये जन्मनि परिपच्यते, न धर्ममुपचिनोति, अभिसन्धिसहकारिविरहात् । नापि बाह्यं विषयमभिमुखीकरोति, आत्मन्येव परिणामात् । पूर्वस्तु योगोऽभिसन्धिसहायः प्रतनोति धर्मम् । यदर्थं तत्त्वबुभुत्साविशिष्टश्च तदर्थमुद्द्योतयति, इति तेन योगेन योगिनः च्युतयोगा अपि योग्यतया योगिन उच्यन्ते । न च तेषामप्रक्षीणमलावरणानां तदानीमतीन्द्रियार्थदर्शनमस्त्यत आह–युक्तानामिति ।

युक्तानां समाध्यवस्थितानां योगजधर्मानुगृहीतेन मनसा स्वात्मनि, स्वात्मान्तरेषु [3]स्वात्मन आत्मान्तरेषु परकीयेषु, आकाशे दिशि [4]काले वायौ [5]परमाणुषु मनस्सु तत्समवेतेषु गुणादिषु समवाये चावितथमविपर्यस्तं स्वरूपदर्शनं भवति । अस्मदादिभिरात्मा सर्वदैवाहं ममेति कर्तृत्वस्वामित्वरूपसंभिन्नः प्रतीयते, उभयं चैतच्छरीराद्युपाधिकृतं रूपं न स्वाभाविकमत एवाहं [6]ममेति प्रत्ययो मिथ्यादृष्टिरिति गीयते, सर्वप्र[6]वादेषु विपरीत-

[टि०] अथोच्यत इति मीमांसकैरिति शेषः । अनव[7]धारितव्याप्तिकम् इति–प्राणित्वादनुमानमित्यर्थः । ननु केनातिशयेनास्य [8]कारणस्य साधकतमत्वमित्याह साधकतमत्वं च इति । सामान्यविशेषज्ञानेति निर्विकल्पकोत्पत्ताविर्त्यर्थः ।

[पं०] कर्तृत्वस्वामित्वेति (कं. १९६.६) अहमिति कर्तृत्वं ममेति स्वामित्वम् । विपरीतरूपग्राहकत्वादिति (कं. १९६.८) गौरोऽहमिति प्रत्ययो मिथ्या आत्मनो गौरत्वाभावात् । तत्त्वज्ञानसंवर्तकधर्माधानक्रमेण (कं. १९६.११) इत्यत्र संवर्तक इति प्रवर्तकः । [9]परात्मादि तत्त्वप्रवाहानुगुण इति (कं. १९६.१३) अत्र परात्मेति परकीय आत्मा । तेष्विति (कं. १९६.१५) परात्मादिषु । सम्बद्धविशेषणेत्यादि (कं. १९६.१६) मनस्यसम्बद्धा ये घटादयस्ते, सहसम्बद्धा रूपादयस्तेषां विशेषणभूतौ द्वौ द्रव्यसम्बद्धौ एकः समवायोऽन्योऽभाव इत्यर्थः । इतरत्रेति (कं. १९६.१८) योगिप्रत्यक्षे ।

[कु०] योगजधर्मानुगृहीते[ने]ति (कं. १९६.२) मलावरणप्रक्षया[त्] सामर्थ्येऽपि प्रक्रममात्रजनिते युक्तमनःसहकारी भवत्येवेति भावः । परकीयेष्विति (कं १९६.४) लोकप्रसिद्ध्या देहेन्द्रियसङ्घातेषु परत्वाद्यारोपेण 'छः' शैविकप्रत्ययो द्रष्टव्यः । अविपर्यस्तत्वे हेतु[:] स्वरूपदर्शनमिति (कं. १९४.५) । नन्वस्मदादीनामप्यहंप्रत्ययः स्वात्मविषयः कदाचिद्भवत्येव तत्कथं स्वात्मदर्शनं योगिप्रत्यक्षतयोपन्यस्तमित्यत आह–अस्मदादिभिरिति (कं. १९६.५) । उभयमपीति (कं. १९६.६) शरीराभिसम्बन्धस्यानाद्यविद्यामार्जितत्वात्तत्त्वज्ञानविरहादस्वाभाविकत्वमुभयस्यापि । न तु वेदान्ति-

१ विशिष्ट आत्मना – जे. २; जे. ३ । २ भ्युत्थानात् – कं. १, कं. २ । ३ 'स्वात्मन आत्मान्तरेषु' इति – जे. १, जे. २, जे. ३ पुस्तकेषु नास्ति । ४ काले च – जे. ३ । ५ परमाणुमनस्सु – कं. १, कं. २; जे. २, जे. ३ । ६ वादिषु – जे. २ । ७ धारिक – अ. ब । ८ करणस्य – अ, ब, क । ९ परात्मादितत्त्वज्ञानानुगुणः – कं. १ । कं. २ पुनरावृत्तिमिवाभाति ।

न्यायकन्दली

रूपग्राहकत्वात्। स्वाभाविकं तु यदस्य स्वरूपं तद्योगिभिरा[1]लोच्यते, यदा हि योगी वेदान्तप्रवेदितमात्मस्वरूपमहं तत्त्वतो[2]ऽजानीयामित्यभिसन्धानाद्बहिरिन्द्रियेभ्यो मनः प्रत्याहृत्य क्वचिदात्मदेशे नियम्यैकाग्रतयात्मान[3]चिन्तनप्रवाहमभ्यस्यति, तदास्य तत्त्वज्ञानसंवर्तकधर्माधानक्रमेणाहङ्कारममकारविनिर्मुक्तमात्मतत्त्वं स्फुटीभवति। यदा तु परात्माकाश[4]कालादिबुभुत्सया तदनुचिन्तनप्रवाहमभ्यस्यति, तदास्य परात्मादितत्त्वज्ञानानुगुणोऽचिन्त्यप्रभावो धर्मः [5]प्रचीयते, तद्बलाच्चान्तःकरणं बहिः शरीरान्निर्गत्य परात्मादिभिः [6]संयुज्यते। [7]तेषु संयोगात्, संयुक्तसमवायात्तद्गुणादिषु, संयुक्तसमवेतसमवाया[8]गुणत्वादिषु, सम्बद्धविशेषणभावेन समवायाभावयोर्ज्ञानं जनयति। दृष्टं तावत् समाहितेन मनसाऽभ्यस्यमानस्य विद्याशिल्पादेरज्ञातस्यापि ज्ञानम्। तदितरत्रानुमानम्। [9]आत्माकाशादिष्वभ्यासप्रचयस्तत्त्वज्ञानहेतुः, विशिष्टाभ्यासत्वात् विद्याशिल्पाद्यभ्यासवत्। तथा बुद्धेस्तारतम्यं क्वचिन्निरतिशयं सातिशयत्वात् परिमाणतारतम्यवत्।

ननु सन्ताप्यमानस्योदकस्यौष्ण्ये तारतम्यमस्ति, न च तस्य सर्वातिशायी वह्निरूपतापत्तिलक्षणः प्रकर्षो दृश्यते। नापि लङ्घनाभ्यासस्य क्वचिद्विश्रान्तिरवगता,

[टि०] नन्विन्द्रियमपि तत्र [10]व्याप्रियते एव तत्कथं शब्दस्यैव साधकतमत्वाद् इत्यवधारणमत आह [11]इन्द्रियस्यापि इति। तस्य शब्दस्य सहकारि, तस्य व्यवच्छेदार्थमुक्तम[12]व्यपदेश्यमिति। नन्विदं ज्ञानं यद्यैन्द्रियकं तदा तस्य प्रत्यक्षत्वादेव व्यवच्छेदो व्यर्थः। अथ शब्दजन्यं तदा इन्द्रियार्थोपप(त्प)न्नम्, इत्यनेनापि व्यवच्छेदः सिद्धो व्यर्थमव्यपदेश्यग्रहणम्,

[पं०] भट्टः पूर्वपक्षयति नन्वित्यादि (कं. १९६.२०) कलधौतस्येति (कं. १९७.१) हेम्नः। पुटपाकप्रबन्धाहितेति (कं. १९७.१) ? जलवधारण्यैकच्छगणरक्षामृगादिसान्त्वत्यारोपिता। न चोदकतापस्ये स्थिर आश्रय इति (कं. १९७.१) उदकस्य परिक्षयास्थिताश्रयाभावः। स्वाश्रये इति (कं. १९७.३) लङ्घने। स्थिराश्रय इति लङ्घने। स्थिराश्रयेति (कं. १९७.६) स्थिरो नित्य आत्माऽऽश्रयो यस्याः। तस्या इति (कं. १९७.७) बुद्धेः।

[कु०] तत्कालवनिकत्वात् यदाह विपरीतरूपग्राहकत्वादिति (कं. १९६.८) [वि]परीतरूपादिग्राहकत्वं शरीरादिसम्बन्धस्य स्वाभाविकतया ग्राहकत्वं कथमालोचयत इत्यत आह–यदाहीति (कं. १९६.९)। क्वचिदात्मप्रदेश इति (कं. १९६.१०) विषयत्वोपभोजकचक्षुरादीन्द्रियसम्बन्धविषयिणि पुण्डरीकावच्छिन्न इत्यर्थः। [13]बहिर्निर्गत्येति (कं. १९६.१४) तदिन्द्रियमन्तरिक्षया परमात्मादिभिरस्थितद्गुणसंविज्ञानो बहुव्रीहिः। स्वस्थानस्थितस्यापि व्यापकसंयोगसम्भवात्। तदेवं योगिप्रत्यक्षस्य रूपं कारणं चाभिधाय तत्सद्भावेऽनुमानं दर्शयितुं व्याप्तिमाह दृष्टमिति (कं. १९६.१७)।

१ लोचयते–कं. १, कं. २। २ अनुजानीयाम्–कं. १, कं. २; जानीय–जे. २। ३ चिन्तनमभ्यस्यति–कं. १, कं. २। ४ कालदिगादि–जे. १। ५ उप–कं. १, कं. २। ६ सम्प्रयुज्यते–जे. १। ७ तेषां–जे. १। ८ तद्गुणत्वादिषु–कं. १, कं. २। ९ आत्मादिषु–जे. १। १० व्याप्रियत–ड। ११ इन्द्रियाण्यपि मु. (३) पा. टि। १२ व्यपदेश–अ, ब, क। १३ बहिः शरीरान्निर्गत्य–कं।

## न्यायकन्दली

न सोऽस्ति पुरुषो यः समुत्प्लवेन भुवनत्रयं लङ्घयति । उच्यते—यः स्थिराश्रयो धर्मः स्वाश्रये च विशेषमारभते [1]सोऽभ्यासक्रमेण प्रकर्षपर्यन्तमासादयति । यथा कलधौतस्य पुटपाकप्रबन्धाहिता [2]विशुद्धिः परां रक्तसारताम् । न चोदकतापस्य स्थिर आश्रयो यत्रायमभ्यस्यमानः परां काष्ठां गच्छेत्, अत्यन्ततापे सत्युदकपरिक्षयात् । नापि लङ्घनाभ्यासस्य स्वाश्रये विशेषाधायकत्वमस्ति, निरन्वयविनष्टे पूर्वलङ्घने लङ्घनान्तरस्य बलान्तरात् प्रयत्नान्त[3]रावपूर्ववदुत्पत्तेः । अत एव त्रिचतुरोत्प्ल[4]वपरिश्रान्तस्य लङ्घनं पूर्वस्मादपचीयते, सामर्थ्यपरिक्षयात् । बुद्धिस्तु स्थिराश्रया स्वाश्रये विशेषमाधत्ते, प्रथममगृहीतार्थस्य पुनः पुनरभ्यस्यमानस्य ग्रहणदर्शनात् । तस्याः पूर्वपूर्वाभ्यासाहिताधिकाधिकोत्तरोत्तरविशेषाधानक्रमेण दीर्घकालादरनैरन्तर्येण सेवितायाः योगजधर्मानुग्रहसमासादितशक्तेः प्रकर्षपर्यन्तप्राप्तिर्नानुपपत्तिमती ।

[टि०] उतोभयजन्यं, तदसिद्धमसम्भवात्, श्रोत्रव्यापृतस्य मनसश्चक्षुः सम्बन्धाभावेन चक्षुषो व्यापाराभावात्, चक्षुर्व्यापृतस्य [5]च तदैव श्रोत्रसम्बन्धाभावेन शब्दग्रहणाभावात् । नैवम्, मनस आशुसञ्चारित्वेनोभयजन्यत्वोपपत्तेः ।

( ।। इति योगिप्रत्यक्षनिरूपणम् ।। ) ।। प्रत्यक्षम् ।।

[पं०] **यत्पुनरत्रोक्तमिति** (कं. १९७.९) मीमांसकैरिति ज्ञेयम् । **पुरुषविशेषश्च परस्यासिद्ध** (कं. १९७.११) इत्यत्र परस्येति तव । इहायं भावः, तव मते तावत्पुरुषविशेषः सर्वज्ञाख्योऽसिद्धः । तथा च सति प्राणित्वादि[ति हे]तोराश्रयासिद्धता नाम दोषः । **धर्मिग्राहक प्रमाणविरुद्धमनुमानमिति** (क. १९७.११) यदि त्वन्मते पुरुषविशेषः सिद्धः स तावत् केनापि प्रमाणेन गृहीतः सन् सिद्धो भविष्यति । येन च प्रमाणेन धर्मी पुरुषविशेषस्त्वया गृहीतस्तेनैव प्रमाणेन 'प्राणित्वादिति' अनुमानं विरुद्धमित्यर्थः ।

**अथोच्यते** इति (कं. १९७.१२) हे भट्ट त्वया । **तद[6]भ्युपगमसिद्धैरेवेति** (कं. १९७.१३) परप्रतिज्ञानिष्पन्नैरेव ।

[कु०] अस्त्वभ्यासस्यातिशयाधायकत्वं सोऽतिशयः साक्षात्काररूप इति कुतोऽपसितमित्यत आह **तवेति** (कं १९६.१९) । **क्वचिन्निरतिशयमिति** (कं. १९६.२०) उत्कर्षपरम्परा क्वचिद्विश्रान्तेत्यर्थः ज्ञानोत्कर्षविश्रमस्तु साक्षात्कार एव ।

यदाहुः सेयं प्रमितिः प्रत्यक्षपरेति व्यभिचारणाशङ्कते **नन्विति** (कं. १९६.२०) । परिहरति **उच्यते** इति (कं १९६.२३) । विशेषणीयो हेतुराधायमानसंस्कारहेतु[:] स्थिराश्रयवर्त्तित्वे सतीति । **कलधौतस्येति** (कं. १९७.१) तस्य तैजसत्वादत्यन्ताग्निसंयोगे(त्वं)प्यविनश्वरत्वेन स्थिरत्वम् ।

प्रतिपक्षमाशङ्क्य परिहरति **यत्पुनरिति** (कं. १९७.९) ।

---

१ सोऽभ्यासः—कं. १, कं. २ । २ शुद्धिः—कं. १, कं. २ । ३ दष्य – कं. १, कं. २ । ४ प्लवंग—जे. ३ । ५ वा – अ, ब । ६ भ्युपगमासिधैरेव – पञ्जिका अ, ब ।

न्यायकन्दली

यत्पुनरत्रोक्तम्, [1]योगिनोऽस्मदाद्यतीन्द्रियार्थद्रष्टारो न भवन्ति प्राणित्वात् अस्मदादिवत्। तद्यदि पुरुषमात्रं पक्षीकृत्योक्तं तदा सिद्धसाधनम्, पुरुषविशेषश्च परस्यासिद्धः, सिद्धश्चेद्धर्मिग्राहकप्रमाणविरुद्धमनुमानम्।

अथोच्यते–प्रसङ्गसाधनमिदम्, प्रसङ्गसाधनं च न स्वपक्षसाधनायोपादीयते, किन्तु परस्यानिष्टापादनार्थम्। परानिष्टं च तदभ्युपगमसिद्धैरेव [2]धर्म्यादिभिः शक्यमापादयितुम्। तत्र प्रमाणेन स्वप्रतीतिरनपेक्षणीया, नह्येवं परः प्रत्यवस्थातुमर्हति 'तवासिद्धा [3]धर्म्यादयो नाहं स्वसिद्धेष्वपि तेषु प्रतिपद्ये' इति।

अत्र ब्रूमः–किं प्रसङ्गसाधनमनुमानं तदन्यद्वा? यद्यन्यत् क्वाप्युक्तलक्षणेषु प्रमाणेष्वन्तर्भावो वर्णनीयः, वक्तव्यं वा लक्षणान्तरम्। यदि त्वनुमानमेव, तदा स्वप्रतीतिपूर्वकमेव प्रवर्त्तते, स्वनिश्चयवदन्येषां निश्चयोत्पिपादयिषया सर्वस्य परार्थानुमानस्य प्रवृत्तेः। अन्यथा गगनकमलं सुरभि कमलत्वात् क्रीडासरः कमलवदित्यस्यापि प्रतिपादका[4]भ्युपगमादसिद्धाश्रयस्य प्रामाण्योपपत्तिः। सन्दिग्धव्याप्तयश्च प्राणित्वादयः।

[पं०] प्रमाणेनेति (कं १९७.१४) कर्तृभूतेन। पर इति (कं. १९७.१४) वैशेषिकः। तवेति (कं. १९७ १५) मीमांसकस्य। नाह(कं. १९७.१५)मित्यादि। स्वप्रतीतेष्वपि धर्म्यादिषु नाहं प्रतिपत्तिं करोमीत्यर्थः।

स्वप्रतीतिपूर्वकमेवेति (कं. १९७.१८) स्वयं निश्चित्यैव परार्थमनुमानमुच्चार्यते। 'प्रतिपादकाभ्युपगमादिति (कं. १९७.२०) प्रयोक्तुरभ्युपगमात्। 'असिद्धाश्रयस्येति (कं. १९७.२०) असिद्ध आश्रयो गगनकमल[ल]क्षणो यस्या सौरभस्य। प्राणित्वादय इति (कं. १९७.२१) हेतवः। तयोरिति (कं. १९७.२२) सर्वज्ञत्वप्राणित्वादिकयोः।

[कु०] यद्यपि तर्कस्याप्याश्रयासिद्धिः विपर्ययापर्यवसानं च दूषणमेव तथापि वैभवाद् विकल्प्य दूषयति किमिति (कं. १९७.१६)। अन्यथेति (कं. १९७.१९) स्वनिश्चयानपेक्षानुमानप्रवृत्तावित्यर्थः। वस्तुतो मीमांसकं प्रत्येवं प्रतिवंदि[दी]ति ग्राह्यप्राकट्यं नास्ति अप्रतीयमाणत्वादिति पक्षानुमानस्यानुकूलतर्कविरहादप्रयोजकत्वमाशङ्कते °सन्दिग्धविपक्षव्यावृत्तयश्चेति (कं. १९७.२१)। न हि तयोरिति (कं. १९७.२२) प्रकृता[पा]दीग्राहकं? *[प्र]तीक्षिते[तः] स हि विरोधाभावात् परस्परधर्मिपरिहारेण प्रतीतयोरेकत्रोपसंह्रियमाणयोर्भवति यथोष्णत्वशी-*तत्वयोः। न च सर्वज्ञत्वं क्वचित्प्रमितमित्यर्थः। तदेवाह सर्वज्ञताया इति (कं. १९७.२३)। सहभावस्त्विति

१ योगिनोऽतीन्द्रियार्थ – कं. १, कं. २। २ धर्मादिभिः – कं. १, कं. २। ३ धर्मादयो – कं. १; कं. २। ४ भ्युपगत – कं. १, कं. २; भ्युपगम – जे. १, जे. २। ५ प्रतिपादकाभ्युपगत – कं। ६ सिद्धाश्रयस्य – कं। ७ सन्दिग्धव्याप्तयश्च–कं।

## न्यायकन्दली

[1]यदि हि विवादाध्यासितस्य पुरुषधौरेयस्य प्राणित्वादिकमपि भवेत् सर्वज्ञत्वमपि स्यात्, कैवात्रानुपपत्तिः ? नहि तयोः कश्चिद्विरोधः प्रतीक्षितः, सर्वज्ञताया प्रमाणान्तरागोचरत्वात्। प्राणित्वादेरसर्वज्ञतया सहभावस्तु सन्दिग्धः, किमस्मदादीनां प्राणित्वाद्यनुबन्धिनीयमसर्वज्ञता ? किं वा सर्वज्ञानकारणत्वेनावगतस्य योगजधर्मस्याभावकृतेति न शक्यते निर्धारयितुम्। अतोऽनवधारितव्याप्तिकं प्राणित्वादिकम्, न तदनुमानसमर्थम्। अतीन्द्रियज्ञानकारणं योगजो धर्म इति न सिद्धम्, कुतस्तदभावादस्मदादीनामसर्वज्ञताशङ्क्येत, अस्माकं तावत्सिद्धं तेनेदमाशङ्क्यते ततश्च नोभयसिद्धा व्याप्तिः, कुतोऽनुमानम्?

युक्तानां प्रत्यक्षं व्याख्याय वियुक्तानां व्याचष्टे–वियुक्तानां पुनरिति। अत्यन्तयोगाभ्यासोपचितधर्मातिशया असमाध्यवस्थिता अपि येऽतीन्द्रियं पश्यन्ति ते वियुक्ताः, तेषामभिमुखीभूतनिखिलविषयग्रामाणामप्रतिहत[2]करणगणानां चतुष्टयसन्निकर्षादात्ममनइन्द्रियार्थसन्निकर्षाद्योगजधर्मानु[3]ग्रहः सहकारिता तत्सामर्थ्यात् सूक्ष्मेषु मनःपरमाणुप्रभृतिषु व्यवहितेषु नागभुवनादिषु विप्रकृष्टेषु ब्रह्मभुवनादिषु प्रत्यक्षमुत्पद्यते ज्ञानम्।

[पं०] **प्रतीक्षित** इति (कं. १९७.२३) प्रतीतः। **प्रमाणान्तरागोचरत्वादिति** (कं. १९७.२३) अनुमानातिरिक्तप्रमाणान्तराविषयत्वात्। विरोधो हि द्विष्ठस्ततो द्वयोरपि प्रमाणप्रतीतयोरेव विरोधस्तत्र प्राणित्वं प्रतीतं, सर्वज्ञता तु न प्रतीता, प्रमाणान्तरागोचरत्वादित्याशयः। **तदनुमानसमर्थमिति** (कं. १९८.१) असर्वज्ञतानुमाने क्षमम। परोऽनवधारितव्याप्तिकत्वं निरस्यन्नाह **अतीन्द्रियेत्यादि** (कं. १९८.२) **न** [4]**सिद्धे** (कं. १९८.२) इत्यस्मात्पुरस्तस्मादिति पदमध्याहार्यम्। श्रीधरः प्राह **अस्माकमित्यादि** (कं. १९८.३)। **अनुमानमिति** (क. १९८.४) प्राणित्वादिरूपम्।

**असमाध्यवस्थिता** इति (कं. १९८.५) समाधौ न अवस्थिता इति व्याख्येयम्।

[कु०] (कं. १९७.२४) अविनाभाव इत्यर्थः। ननूपाधिना तच्छङ्कया वा कथमविनाभावसन्देह इत्यत आह **किमस्मदादीनामिति** (कं. १९७.२४)। शङ्कते **अतीन्द्रियेति** (कं. १९८.२)। **अस्माकं तावदिति** (कं. १९८.३) योगजधर्मविरहेण प्राणित्वेन सहचरितमसर्वज्ञत्वम्; ततश्च नोभयोः प्राणित्वयोगजधर्मविरहयोः परस्परोपाधित्वशङ्कया व्याप्तिः सिद्धा। अथवाऽस्माकं पुराणप्रामाण्यवादिनां योगजो धर्मो हि, अतीन्द्रियज्ञानकारणमिति सिद्धम्।

ननु यदि वियुक्ता[नां] वियुक्तो योगः। ते कथमतीन्द्रियार्थान् पश्येयुरित्यत आह **अत्यन्तेति** (कं. १९८.५)। चतुष्टयसन्निकर्षादित्युपलक्षणं; यथाविषयं त्रयसन्निकर्षाद् द्वयसन्निकर्षादित्यपि द्रष्टव्यम्।

---

१ यदि–कं. १, कं. २। २ हतकारणगणानां–कं. १, कं. २; हतकरणानां–जे. १, जे. २। ३ नुग्रहसहकारितात्–कं. १, कं. २। ४ सिद्धम्–कं. १, ब।

### प्रशस्तपादभाष्यम्

[173] तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं [1]प्रत्यक्षं प्रमाणम्, प्रमेया द्रव्यादयः पदार्थाः, प्रमातात्मा, प्रमितिर्द्रव्यादिविषयं ज्ञानम् ।

### न्यायकन्दली

[173] एवं तावद्व्याख्यातं प्रत्यक्षं सम्प्रति [2]प्रमाणफलं विभजते–तत्र सामान्यविशेषेषु स्वरूपालोचमात्रं प्रत्यक्षमिति । सामान्यं सत्ता, द्रव्यत्वगुणत्वकर्मत्वादिकं विशेषा व्यक्तयः, तेषु स्वरूपालोचनमात्रं स्वरूपग्रहणमात्रं विकल्परहितं प्रमाणम्, प्रमायां साधकतमत्वात् । साधकतमत्वं च तस्मिन् सति [3]प्रमित्सोः प्रमा भवत्येवेत्यतिशयः, प्रमातरि प्रमेये च सति प्रमा भवति न तु भवत्येव, प्रमाणे तु निर्विकल्पके विशेषणज्ञानादिलक्षणे विशेष्यज्ञानादिलक्षणा प्रमा भवत्येवेत्यतिशयः । प्रमेया द्रव्यादयः पदार्थाः, द्रव्यादयश्चत्वारः पदार्थाः प्रमेयाः प्रमितिविषयाः प्रमितौ जातायां तेषु हानादिव्यवहारः प्रवर्त्तत इत्यर्थः । प्रमाता आत्मा [4]बोधाश्रयत्वात् । प्रमितिर्द्रव्यादिविषयं ज्ञानम्, यदा निर्विकल्पकं सामान्यविशेषज्ञानं प्रमाणम्, तदा द्रव्यादिविषयं विशिष्टं ज्ञानं प्रमितिरित्यर्थः ।

[पं०] [173] **प्रमायामिति** (कं. १९८.१३) फले । **अतिशय** इति (कं. १९८.१४) अतिशये हि 'तमट्' प्रत्ययः । **विशेषणज्ञानादिलक्षणे** (कं. १९८.१५) इति–सामान्यविशेषज्ञानलक्षणे । **विशेष्येति** (कं. १९८.१५) विकल्पस्य व्याख्या । **निर्विकल्पकमिति** (कं. १९८.१८) सामान्यविशेषज्ञानमिति च पर्यायशब्दौ । **विशिष्टं ज्ञानं प्रमितिरिति** (कं. १९८.१९) विकल्पज्ञानं फलमित्यर्थः ।

[कु०] [173] **सम्प्रति [5]प्रमाणं [फलं] विभजते** इति (कं. १९८.१०) ननु समानतन्त्रे [6]'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति प्रत्यक्षशब्दोऽनुमानादिपदसमभिव्याहारात् प्रमाकरणविशेषे प्रयुक्तः । इह तु बुद्धावेव प्रयुज्यते तत्कुतो न विरोध इति शङ्कां निराकर्तुमिति शेषः । प्रमाणफलविभागेन हि परकीयः प्रत्यक्षशब्दप्रयोगो भोक्तुः प्रत्यक्षफलके करणे इति प्रदर्शनाद्विरोधपरिहारः । ननु साधकत्वाविशेषे कस्यचित्कथं तमर्थोऽतिशय इष्यत आह–**साधकतमत्वं चेति** (कं. १९८.१४) प्रमाया अयोगव्यवच्छेदोऽतिशयः । प्रमाणस्य साधकान्तराणां त्वन्ययोगव्यवच्छेदमात्रमित्यर्थः । **प्रमितिविषया** इति (कं. १९८.१८) सविषयस्याकर्त्रधिष्ठितस्यैव करणत्वात्तन्निरूपणप्रसङ्गागतं प्रमातृप्रमेयनिरूपणमिति पृथक् प्रयोजकत्वं नोक्तं भवति । न च निर्विकल्पकोत्पत्ते[:] प्राक्तत्स्वरू[पे]ण भूतं ज्ञानमस्तीति भावः ।

---

१ प्रत्यक्षप्रमाणम् – दे । २ प्रमाणं – जे. १, जे. २, जे. ३ । ३ प्रमित्सोर्भवत्येव– प्रमाभवत्येव – जे. ३ ।
४ प्रबोधा – जे. १ । ५ प्रमाणफलं – कं । ६ प्रत्यक्षानुमानोपमानत इति पुनरावृत्त ह. लि. पुस्तके ।

प्रशस्तपादभाष्यम्

सामान्यविशेषज्ञानोत्पत्तावविभक्तमालोचनमात्रं 'प्रत्यक्षं प्रमाणम्, 'न तस्मिन् प्रमाणान्तरमस्ति, अफलरूपत्वात् ।

न्यायकन्दली

ननु' निर्विकल्पकं सामान्यविशेषज्ञानमपि प्रमारूपमर्थप्रतीतिरूपत्वात्, तदा 'तदुत्पत्तौ किं प्रमाणमित्यत आह सामान्यविशेषज्ञानोत्पत्तावविभक्तमालोचनमात्रं प्रत्यक्षम् । आलोच्यतेऽनेनेत्यालोचन'मिन्द्रियार्थसन्निकर्षस्तन्मात्रम् । अविभक्तं केवलं ज्ञानानपेक्षमिति यावत् । सामान्यविशेषज्ञानोत्पत्तौ प्रमाणम्, विशेष्यज्ञानोत्पत्तावपीन्द्रियार्थसन्निकर्षः प्रमाणं भवत्येव प्रमाहेतुत्वात्, किन्तु विशेषणज्ञानसहकारितया न केवलः, सामान्यविशेषज्ञानोत्पत्तौ तु ज्ञानानपेक्षः केवल एवेत्यभिप्रायः । सन्निकर्षमात्रमिह प्रमाणं न ज्ञानमित्यत्रोपपत्तिमाह–न तस्मिन्निति । सामान्यविशेषज्ञाने नान्यत्प्रमाणं ज्ञानरूपमस्ति सामान्यविशेषज्ञानस्याफलरूपत्वात् ज्ञानफलत्वाभावात् । विशेष्यज्ञानं हि विशेषणज्ञानस्य फलम्, विशेषणज्ञानं न ज्ञानान्तरफलम्, अनवस्थाप्रसङ्गात् । अतो विशेषणज्ञाने

[पं०] परः प्राह 'नन्वित्यादि (कं. १९८.२०) । निर्विकल्पकमिति (कं. १९८.२०) 'सामान्यविशेषज्ञानमिति (कं. १९८.२०) च पर्यायिशब्दौ । प्रमारूपमिति (कं. १९८.२०) फलरूपम् । तदुत्पत्ताविति (कं. १९८.२१) निर्विकल्पकोत्पत्तौ । 'किं प्रमाणमिति (कं. १९८.२१) न हि प्रमाणमन्तरेण फलं भवति । सामान्यविशेषज्ञानोत्पत्ताविति (कं. १९८.२२) निर्विकल्पकोत्पत्तौ । विशेष्यज्ञानोत्पत्ताविति (कं. १९८.२३) सविकल्पकज्ञानोत्पतौ । विशेषणज्ञानसहकारितयेति (कं. १९८.२४) नागृहीतविशेषणाविशेष्यबुद्धिरिति प्रथमं विशेषणज्ञानम् । न केवल इति (कं. १९८.२४) अत्र सन्निकर्षः कर्ता । सामान्यविशेषज्ञानोत्पत्ताविति (कं. १९८.२४) निर्विकल्पकोत्पत्तौ । सन्निकर्षमात्रमिति (कं. १९८.२५) जडस्वरूपम् । न ज्ञानमिति (कं. १९९.१) ज्ञानं विशेष्यज्ञानम् । सामान्यविशेषज्ञाने इति (कं. १९९.१) निर्विकल्पकज्ञाने । नान्यत्प्रमाणं ज्ञानरूपमस्तीति (कं. १९९.१) किन्तु सन्निकर्षं

[कु०] (अथवेति कं १९९.७) भाष्यस्थो निपातसमुदायः । अयं च प्रमाकरणवाचकस्य प्रत्यक्षशब्दस्य विषय(स्य) इत्यर्थः । शब्दाजन्यमिति (कं. १९९.१०) शब्देन करणेनाजन्यमित्यर्थः । ननु विपर्ययस्यैव(व)[वि]तथत्वात्कथं संशयस्य व्युदास इत्यत आह 'संशयोऽपीति (कं. १९९.१०) । ननु शब्दाकारणकं ज्ञानं प्रत्यक्षसामान्यलक्षणानुवृत्त्यैव व्यवच्छिन्नं तत्किमर्थं[म]व्यपदेश्यपदमित्यत आह–अव्युत्पन्नस्येति (कं. १९९.१२) । अस्ति शब्दकरणकं अस्य शब्दस्यायमर्थं इत्येकदेशाच्छब्दार्थसम्बन्धज्ञान[मि]न्द्रियस्यापि व्यापा(रु)[रात्] ततः प्रत्यक्षसामान्यलक्षणानुवृत्त्यापि न तद्व्यवच्छिन्नमित्यर्थः । ननु यदि तत्राक्षमपि कारणं किमर्थं तद्व्यवच्छिद्यत इत्यत आह–न चेति (कं. १९९.१४) ।

---

१ प्रत्यक्ष–दे । २ अस्मिन्नान्यात्–कं १, कं. २; कि । ३ यदा–कं. १, कं. २ । ४ तदुत्पत्तावविभक्त–कं. १, कं. २ । ५ मिन्द्रियसन्निकर्षः–जे. १ । ६ यदा–कं. १ । ७ पुनरावृत्तमिव भाति–सं । ८ अत्र तदुत्पत्तौ किं प्रमाणमत आह सामान्यविशेषज्ञानोत्पत्तावविभक्तमालोचनमात्रम्–पा. इ. पुस्तके पाठः न तु–कं. १ इत्यत्र–सं । ९ संशयो हि–कं ।

## प्रशस्तपादभाष्यम्

अथवा सर्वेषु पदार्थेषु चतुष्टयसन्निकर्षादवितथमव्यपदेश्यं यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षं प्रमाणम्, प्रमेया द्रव्यादयः पदार्थाः, प्रमातात्मा प्रमितिर्गुणदोषमाध्यस्थ्यदर्शनमिति ।

## न्यायकन्दली

इन्द्रियार्थसन्निकर्षमात्रमेव प्रमाणमित्यर्थः । यदा निर्विकल्पकं सामान्यविशेषज्ञानं फलं तदेन्द्रियार्थसन्निकर्षः प्रमाणम्, यदा विशेष्यज्ञानं फलं तदा सामान्यविशेषालोचनं प्रमाणमित्युक्तं तावत् ।

सम्प्रति हानादिबुद्धीनां फलत्वे विशेष्यज्ञानं प्रमाणमित्याह–अथवेति । सर्वेषु पदार्थेषु चतुष्टयसन्निकर्षात् चतुष्टयग्रहणमुदाहरणार्थम् । द्वयसन्निकर्षात् त्रयसन्निकर्षादवितथं संशयविपर्ययरहितमव्यपदेश्यं व्यपदेशे भवं व्यपदेश्यं न व्यपदेश्यमव्यपदेश्यं शब्दाजन्यं यद्विज्ञानं जायते तत्प्रत्यक्षं प्रमाणम् । संशयो ह्यनवस्थितोभयधर्मतया पदार्थमुपदर्श्य [1]अवस्थितैकधर्माणं धर्मिणं प्रापयत् यथाध्यवसायं वितथ एवेत्यवितथपदेन [2]व्युदस्यते ।

[पं०] एव प्रमाणमस्तीत्यर्थः । ज्ञानफलत्वाभावादिति (कं. १९९.२) सामान्यविशेषज्ञानं निर्विकल्पकापरपर्यायं ज्ञानस्य फलं न भवति किन्तु जडरूपस्य सन्निकर्षस्यैव फलमित्यर्थः । न [3]ज्ञानान्तरस्य फलं (कं. १९९.३) न, किन्त्वज्ञानरूपस्य सन्निकर्षस्यैव फलमित्यर्थः । विशेषणज्ञाने इति (कं. १९९.४) निर्विकल्पके । यदा निर्विकल्पकमित्यादि (कं. १९९.५) अत्रायं क्रमः सन्निकर्षः प्रमाणं, तत्फलं निर्विकल्पकम् । तदपि विशेष्यज्ञानापेक्षया प्रमाणम्, ततो विशेष्यज्ञानं फलम्, तदपि हानादिबुद्ध्यपेक्षया प्रमाणं, हानादिबुद्धयः फलम् ।

द्वयसन्निकर्षादिति (कं. १९९.८) बुद्धिसुखादीनां द्वयोरात्ममनसोः संयोगादुपलब्धिः । त्रयसन्निकर्षादिति (कं. १९९.९) आत्म[म]नःश्रोत्रेन्द्रियलक्षणत्रयसन्निकर्षाच्छब्दस्य ग्रहणम् । शब्दाजन्यमिति (कं. १९९.१०) शब्दानपेक्षम् । ऋषिव्युत्पादात् [4]यथाध्यवसायं वितथ इति (कं. १९९.११) यथाऽध्यवसायस्तथा न प्रापयतीत्यर्थः । अक्षमपीति (कं. १९९.१३) न केवलं शब्दश्रवणम् । अन्यथेति (कं. १९९.१४) अक्षव्यापाराभावे । अनन्तरभाविन इति (कं. १९९.१४) अव्यवहितस्य । [5]तत्सहकारिमात्रत्वादिति (कं. १९९.१५) शब्दसहकारिमात्रत्वात् ।

[कु०] नन्वक्षमपि कारणमित्युक्त्वा शब्द अयोगव्यवच्छेदः किंरूप[:]? [व्यप] देशकरणकरणकं ज्ञानं प्रत्यक्षसामान्यलक्षणानुवृत्त्यैव व्यवच्छिन्नमित्येतावदवशिष्यते । ततस्तद्व्यवच्छित्तिरव्यपदेश्यपदेन भाष्यकृता सूचितेति भावः ।

ननु [नि]र्विकल्पकानन्तरमुदकमेतदिति विशिष्टज्ञानं; ततो यदुदकजातीयं तत्सुखसाधनमिति व्याप्तिस्मरणं; ततस्तथाभूतं चैतदिति लिङ्गपरामर्शः । अनन्तरं तस्मात्सुखसाधनमेवेत्यनुमितिः । एवं सुखसाधनत्वेन लिङ्गेनोपादेयत्वानुमितिरित्यनेन क्रमेण भवद्गुणादिदर्शनं कथं प्रत्यक्षफलमित्यत आह पदार्थस्वरूपबोध इति (कं. १९९.१९) । व्याख्येयं सामान्याक्रोडीकारेणैव गृहीताया व्याप्तेस्तथा स्मर्तव्यत्वात् ।

---

१ व्यवस्थितैकधर्माणं प्रापयति, अन्यथाध्यवसायो – कं. १; कं. २ । २ व्युदस्यन्ति – कं. १; कं. २ । ३ ज्ञानान्तरफलं – कं. १, ब । ४ अन्यथाध्यवसायवितथ – कं. १ । ५ तत्सहकारिता – कं. १ ।

न्यायकन्दली

अव्युत्पन्नस्य सन्निहितेऽर्थे व्याप्रियमाणे चक्षुषि शब्दश्रवणानन्तरं यद्गौरिति ज्ञानं [1]जायते तत्राक्षमपि कारणम्, अन्यथा रेखोपरेखादिविशेषप्रतीत्ययोगात् [2]। न च तत् प्रत्यक्षम्, अनन्तरभाविनः शब्दस्यैव तदुत्पत्तौ साधकतमत्वादिन्द्रियस्यापि तत्सहकारिता-मात्रत्वात् । तथापि पृष्टो व्यपदिशति—अनेन [3]समाख्यातम्, न पुनरेवमभिधत्ते—प्रत्यक्षो मया प्रतीतं गौरयमिति तस्य व्यवच्छेदार्थमुक्तमव्यपदेश्यमिति ।

प्रमितिर्गुणदोषमाध्यस्थ्यदर्शनम् । गुणदर्शनमुपादेयत्वज्ञानम्, दोषदर्शनं हेयत्व-ज्ञानम्, माध्यस्थ्यदर्शनं न हेयं [4]नोपादेयमिति ज्ञानं प्रमितिः, पदार्थस्वरूप[5]बोधे सत्युपकारादिस्मरणात् । सुखसाधनत्वादिविनिश्चये सत्यु[6]पादेयादिज्ञानं भवत् पदार्थ-स्वरूप[7]बोधस्यैव फलं भवति, सुखस्मरणादीनामवान्तरव्यापारत्वात् । यथोक्तम्—

"अन्तराले तु यस्तत्र व्यापारः कारकस्य सः" इति ।

अन्ये त्वेवमाहुः—यदर्थस्य सुखसाधनत्वज्ञानं तद् गुणदर्शनम्, उपादेयत्वज्ञानमपि तदेव । यद् दुःखसाधनत्वज्ञानं तद्दोषदर्शनं हेयत्वज्ञानमपि तदेव । यच्च न सुखसाधनं

[पं०] अवान्तरव्यापारत्वादिति (कं. १९९.२१) सुखस्मरणादयो प्रमाणस्यावान्तरव्यापारा इत्यर्थः । व्यापार इति (कं. १९९.२२) सुखस्मरणादिः । कारकस्येति (कं. १९९.२२) कारणरूपस्य प्रमाणस्य । गुणदर्शनमिति (कं. १९९.२३) उपकारादिदर्शनम् । अन्ये त्वेवमाहुरित्यादिना यन्मतं दर्शितम्, अत्र मते अवान्तरव्यापारा न सन्ति । प्रत्यक्षस्य फलमिति (कं. २००.३) नानुमानस्य फलमित्यर्थः ।

[कु०] अयं चाभिसन्धिः—परीक्षकपर्यालोचनया व्याप्तिस्मृत्यवान्तरव्यापारवत् सविकल्पकस्येदं वीदयजातीयमिति लिङ्गपरामर्शः फलम् । अतः परं सुखसाधनमेतत्तस्मादुपादेयमित्यनुमितिस्तथापि लौकिकबुद्धिमनुसृत्य भाष्यकारः सविकल्पकप्रत्यक्षफलमुक्तवानिति तमेव क्रमाग्रहणनिमित्तं लौकिकमनुमितेः प्रत्यक्षताभिमानं मतान्तरोपदर्शनव्याजेन स्पष्टीकरोति अन्ये त्विति (कं. १९९.२२) । यथा सुखसाधनत्वादुपादेयमित्यस्या अनुमितेः सुखसाधन[। नु]मित्या सहाभेदाभिमानोऽन्येषां क्रमाग्रहणकृतस्तद्वद(न)नुमितिद्वयस्य प्रत्यक्षफलेन तज्जातीयत्वलिङ्गपरामर्शेन सह लौकिकानां भवं नाभेदाभिमान(') केन वार्येत इति भावः । विद्यमानः क्रमः केन न गृह्यत इत्यत आह सर्वं चैतदिति (कं. २००.१)। क्रमाग्रहणेऽभ्यासपाटवं निमित्तमित्यर्थः। अननुसंहितलिङ्गस्येति (कं. २००.२) लिङ्गानुसन्धानं विवेकेनापश्यत इत्यर्थः । अपरोक्षावभासितया (कं. २००.२) अपरोक्षत्वेनाभिमन्यमानतया ।

दर्शनशब्द इति (कं. २००.५) पश्यार्थैश्चानालोचन इति पाणिनिस्मृतेर्दृशिः ज्ञानमात्रेऽपि वर्तते इत्येतदुक्तं संशयविपर्ययस्मृतीनामिति (कं. २००.८)। यद्यपि संशयविपर्ययौ न लिङ्गदर्शनाज्जायेते तज्जनकस्य वक्ष्यमाणलिङ्ग-

१ उत्पद्यते–जे. १, जे. २ । २ परेखादिविशेषप्रतीत्यभावात्–जे. १, जे. २ । ३ ममाख्यातम्–जे. २, जे. ३ । ४ नोपादेयमिति प्रमितिः–जे. १ । ५ प्रबोधे–जे. १, जे. २ । ६ त्युपादानादि–जे. १, जे. २ । ७ प्रबोधस्यैव –जे. १; जे. २; जे. ३ ।

प्रशस्तपादभाष्यम्

[174] लिङ्गदर्शनात् सञ्जायमानं लैङ्गिकम् ।

न्यायकन्दली

न च दुःखसाधनमेतदिति ज्ञानं तन्मा[1]ध्यस्थ्यदर्शनमुपेक्षाज्ञानमपि तदेव । सर्वं चैतदभ्यासपाटवोपेतस्य व्याप्तिस्मरणमनपेक्षमाणस्य वस्तुस्वरूपग्रहणमात्रादेवाननुसंहितलिङ्गस्यापरोक्षावभासितयोत्पादादभ्यासपाटवसहकारिणः प्रत्यक्षस्य फलमिति ।

[174] [2]लिङ्गदर्शनात् सञ्जायमानं लैङ्गिकम् । दर्शनशब्द उपलब्धिवचनो न चाक्षुषप्रतीतिवचनः, अनुमितानुमानस्यापि सम्भवात् । लिङ्गदर्शनाल्लिङ्गविषयः संस्कारो जायते किन्त्वस्य न परिग्रहः, बुद्ध्यधिकारेण विशेषितत्वात् । संशब्देन सम्यगर्थवाचिना संशयविपर्ययस्मृतीनां व्युदासः । लिङ्गस्य दर्शनाज्ज्ञानात् सम्यग् जायमानं लैङ्गिकमिति वाक्यार्थः । तस्य च ज्ञानस्य सम्यग्जा[3]तीयस्य यथार्थपरिच्छेदकतयोत्पादः, सर्वधियां यथार्थपरिच्छेदकत्वस्य कुलधर्मत्वात् । संशयविपर्ययौ तावद्यथासावर्थो न [4]तथा तत्परिच्छिन्तः । स्मृतिरप्यर्थपरिच्छेदिका न भवति, अनुभवपारतन्त्र्यादिति

[टि०] [174-175] ( ।। अथ विद्याभेदनिरूपणे अनुमाननिरूपणम् ।। )

अनुमितानुमानस्य इति :—श्रोत्रादिभिः शब्दाद्युपलब्ध्यनुमितैरात्मानुमानम् । [5]प्रतिपिपादयिषितेति एतत्परापेक्षमुक्तम्, स्वापेक्षं तु जिज्ञासितधर्मविशिष्टो धर्म्मीति ज्ञेयम् ।

[पं०] [174] अनुमिताऽनुमानस्यापि सम्भवादिति (कं. २००.६) रचनात्वेनानुमितं कार्यत्वं भूधरादीनां बुद्धिमत्पूर्वकत्वं किल साधयति । न चात्र चाक्षुषत्वम् । अथवा शब्दाद्युपलब्ध्यनुमितिरिन्द्रियैरात्मानुमानम् । बुद्ध्यधिकारेण विशेषितत्वादिति (कं. २००.७) संस्कारो न लैङ्गिकं प्रमाणं बुद्धित्वाभावात् । तस्य च ज्ञानस्य

[कु०] लक्षणविरहात्तथापि स्मृतिव्युदासाय क्रियमाणः संशब्दो मन्दबुद्धीन् प्रति तावपि व्युदस्यतीति भावः । ननु जन्मक्रियाविशेषणेन संशब्देन कथं संशयादिव्युदासः ? तेषामपि जन्म समधिगतमेवेत्यत आह [6]तस्य ज्ञानस्येति (कं. २००.९) । कारकधर्मो यथार्थत्वं क्रियायामुपचर्यत इत्यर्थः । ननु सर्वज्ञानात्यसम्यंचं च यथाहुः ज्ञानं चेत्सत्यमेवैतदित्यत आह—सर्वधियामिति (कं. २००.१०) (अ)कुलधर्मत्वादिति (कं. २००.११) यथार्थत्वस्य ज्ञानत्वप्रयुक्तत्वाभावादित्यर्थः ।

[174-175] लिङ्गस्य लक्षणमाहेति (कं. २००.१७) लिङ्गविशेषस्येति द्रष्टव्यम् । सामान्यलक्षणस्वे दोषमभिधायान्यदेव हि सामान्यलक्षणं न चक्षति । अनुमेयपदस्य साध्यधर्मपरतां शङ्कां निवारयति अनुमेयः प्रतिपिपा-

१ न हेयमित्यारभ्य सुखस्मरणादीनामिति पर्यन्तः पाठः लेखकदोषवशाद् — कं. १; कं. २ पुस्तकयोः आवृत्तः । २ लिङ्गस्य — जे. ३ । ३ जन्यस्य — जे. १, जे. २, जे. ३ । ४ तथा न परिच्छिन्तः — जे. १, जे. २; न तथा परिच्छिन्तः — कं. १, कं. २ । ५ प्रतिपादयिषित — अ, ब । ६ तस्य च — कं ।

### प्रशस्तपादभाष्यम्

[175] लिङ्गं पुनः–

यदनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥

### न्यायकन्दली

वक्ष्यामः। अन्ये तु विद्याधिकारेण संशयविपर्ययौ व्युदस्यन्ति। अनर्थजायाश्च स्मृतेर्व्युदासार्थं 'तद्धि द्रव्यादिषु पदार्थेषूत्पद्यते' इत्यावर्त्तयन्ति। तदयुक्तम्, वाक्यलभ्येऽर्थे प्रकरणस्यानपेक्षणात्, अनर्थजत्वात्, स्मृतिव्युदासे चातीतानागतविषयस्य लैङ्गिकज्ञानस्यापि व्युदासप्रसङ्गात्।

[175] लिङ्गस्य लक्षणमाह–लिङ्गं पुनरिति। अनुमेयः प्रतिपिपादयिषितधर्मविशिष्टो धर्मी, तेन यत् सम्बद्धं तस्मिन् वर्तत इत्यर्थः। यथा विपक्षैकदेशे वर्तमान[1]मपि लिङ्गं विपक्षवृत्ति भवति, एवं पक्षैकदेशे वर्तमानमनुमेयेन सम्बद्धमेव। ततश्चतुर्विधाः परमाणवोऽनित्या गन्धवत्त्वादित्यस्यापि भागासिद्धस्य हेतुत्वं प्राप्नोतीति चेत्? [2]न, वैधर्म्यात्।

[टि०] नन्वनुमेयेन सम्बद्धमित्यत्र सर्वस्मिन्नित्यभणनाद् भागासिद्धस्यापि हेतुत्वं स्यादित्याशङ्कते यथा [3]विपक्षैकदेशेति। यः साध्यसाधनव्यावृत्तिविषय इति :–ननु यदि साधनव्यावृत्तिविषयो विपक्षः तदा विपक्षे वर्तमानो हेतुरनैकान्तिक इति [4]न घटेत, हेत्वाधारस्य विपक्षत्वाभावात् विपक्षत्वे च तत्र हेतोर्वृ[5]त्त्यभावादिति। नैवम्, प्रस्तुतस्य सम्यग्‌हेत्वभिप्रायेणेदमुक्तम्, सम्यग्धेतोः साध्यसाधनव्यावृत्ते विपक्षे वृत्त्यभावात्, विपक्षस्तु साध्यविपरीतधर्मैवेति। किन्तु

[पं०] सम्य[6]ग्जन्मेत्यत्र (कं. २००.९) काक्वा व्याख्या। अनुभवपारतन्त्र्यादिति (कं. २००.१२) अर्थजन्यत्वात्। अन्ये त्विति (कं. २००.१२) व्योमशिवप्रायाः। अतीतानागतविषयस्येति (कं. २००.१५) अभूद् वृष्टिस्तथाविधनदीपूरदर्शनात्। भविष्यति वृष्टिस्तथाविधमेघोन्नत्यन्यथानुपपत्तेः। व्युदासप्रसङ्गादिति (कं. २००.१६) तस्याप्यनर्थजत्वात्।

[175] [7]अनुमेय इति (कं. २००.२३) व्याख्येयपदम्। प्रतिपिपादयिषितधर्मविशिष्टो धर्मीति व्याख्यानपदम्। परवाक्यं यथेत्यादि (कं. २००.२४)। चतुर्विधा इति (कं. २००.२५) पार्थिवाप्यतैजसवायवीयभेदात्। भागासिद्धस्येति (कं. २०१.१) पार्थिवानामेव गन्धवत्त्वाद् भागे आप्यादित्रयेऽसिद्धं गन्धवत्त्वाख्यं लिङ्गम्। श्रीधरवाक्यं नेत्यादि (कं. २०१.२)। वैधर्म्यादिति (कं. २०१.२) दृष्टान्तदार्ष्टान्तिकवैधर्म्यात्। वैधर्म्यमेवोपपादयति

[कु०] दयिषितेति (कं. २००.२३)। अनेन पक्षत्वं दर्शितम्। समुदायस्य पक्षत्वमवलम्ब्य भागासिद्धेति न व्याप्तिमाशङ्कते यथेति (कं. २००.२४)। समुदायिन एव पक्षाः, एवं सति भागासिद्धोऽपि स्वरूपासिद्ध एवेत्यभिप्रायवान् परिहरति नेति (कं. २०१.२)। वैधर्म्यं दृष्टान्तस्य वैधर्म्यात्। '[8]स न समुदितेभ्य इति (कं. २०१.३) न समुदायादित्यर्थः। किन्तु चतुर्ष्वपि इति (कं. २०१.५) न प्रत्येकमिति शेषः। समुदितानामिति (कं. २०१.६) न पुनः प्रत्येकमित्यर्थः।

---

१ मपि च–कं. १; कं. २। २ नैवं–जे. १, जे. २। ३ विपक्षैकदेश–मु. जे. १, जे. ३। ४ इति घटेत–अ, ब। ५ व्यावृत्त्यभावादिति–अ, ब, क। ६ जानीयस्य–कं. १। ७ मनुमेयमिति पञ्जिका–अ, ब। ८ कन्दल्यां 'स'नास्ति।

न्यायकन्दली

य: साध्यसाधनव्यावृत्तिविषयोऽर्थः स विपक्षः। साध्यसाधनयोर्व्यावृत्तिर्न समुदितेभ्यः, किन्तु प्रत्येकमेव सम्भवतीति प्रत्येकमेव विपक्षता। पक्षस्तु स भवति यत्र वादिना साध्यो धर्मः प्रतिपादयितुमिष्यते। न च वादिना पार्थिवपरमाणावेकस्मिन्ननित्यत्वं प्रतिपादयितुमिष्यते, किन्तु चतुर्ष्वपि परमाणुष्विति समुदितानामेव पक्षत्वे स्थितेऽसिद्धवद्भागासिद्धस्यापि व्युदासः, अनुमेयसम्बन्धाभावात्। प्रसिद्धं च तदन्वित इति। तदिति योग्यत्वात् साध्यधर्मः परामृश्यते। तदन्विते साध्यधर्मान्विते [10]'सपक्षे प्रसिद्धं परिज्ञातमिति विरुद्धासाधारणयोर्व्यवच्छेदः। तदभावे च नास्त्येवेति। अत्रापि तदिति साध्यधर्मस्यैव परामर्शः, तस्य साध्यधर्मस्याभावे नास्त्येव न पुनरेकदेशेऽस्त्यपीत्यनैकान्तिकव्यवच्छेदः। तल्लिङ्गमनुमापकम् अनुमेयस्य ज्ञापकम्।

[टि०] **प्रत्येकमेव** इति:–[2]ये हि साध्यसाधनव्यावृत्तिविषयास्ते प्रत्येकं विपक्षा: तेषा[3]मेकैकोऽपि विपक्षो न पुनः [4]समुदितः समुदाय: सः, पक्षस्तु यावान् शब्देनोल्लिखितस्तावति सर्वस्मिन्नपि समुदाये लिङ्गमन्वेष्यम्। **न पुनरेक[5]देशेऽप्यस्ति** इति :–नन्विदानीमेवैकैकस्यापि पृथक् विपक्षत्वं प्रतिपादितम्, तत 'एव' कारेणान्तरेणापि विपक्षैकदेशवृत्तेरपि विपक्षवृत्तित्वाद्धेतुत्वाभाव: सिद्ध एव किमर्थमेवकार:? नैवम्, यत्र विपक्षैकदेशे नास्ति तावतांशेन हेतुत्वप्रसङ्गात्, अत्र च [6]एवकारकरणेन सपक्षैकदेशवृत्तेरपि हेतुत्वम्, अन्यथा सर्ववाक्यानामवधारणपरत्वा[7]त्तस्य हेतुत्वं न स्यात्।

[पं०] **य: साध्येत्यादिना** (कं. २०१.२)। **समुदितेभ्य** इति (कं. २०१.३) समुदितेभ्योऽर्थेभ्यो न साध्यसाधनयोर्व्यावृत्तिरित्यर्थः। **किन्तु प्रत्येकमेव सम्भवतीति** (कं. २०१.३) यथा अनित्य: शब्दः कृतकत्वाद घटवत्। यदनित्यं न भवति तत्कृतकमपि न भवति यथा व्योम। एवं व्योम्ना व्यावृत्ते साध्यसाधने। एवं दिक्कालादिष्वपि प्रत्येकं व्यावृत्ते। **सपक्षे [8]च प्रसिद्धमिति** (कं. २०१.८) न केवलमनुमेयेन सम्बद्धं [9][सपक्षे च प्रसिद्धम्। **विरुद्धासाधारणयोर्व्यवच्छेद** इति (कं. २०१.९) विरुद्धो हि विपक्षे एव भवति, असाधारणस्तु न सपक्षे नापि विपक्षे भवति]।

[कु०] **असिद्धवदिति** (कं. २०१.६) एकव्यक्तिपक्षीकरण इति शेषः। **भागासिद्धस्यापीति** (कं. २०१.६) प्रयोगलाघवायानेकव्यक्तिपक्षीकरण इति शेषः। **योग्यत्वादिति** (कं. २०१.८) सपक्षे सत्त्वप्रतिपादनस्य प्रकृतपक्षपरामर्शेऽनुपपत्तिरयोग्यता। व्यक्तिद्वाराऽन्वयस्य दुर्निश्चयत्वमभिप्रेत्य व्याचष्टे [10]**साध्यधर्मसमानेति** (कं. २०१.८)। **प्रसिद्धं परिज्ञातमिति** (कं. २०१.९) अनेनान्वयो ज्ञात एव। लिङ्गलक्षणमिति। दर्शयति **तदभावे च नास्त्येवेति** (कं. २०१.९)। वक्ष्यमाणावधारणपर्यालोचनया तदन्वित[त्वं] क्वचिदप्रसिद्धं चेति क्वाचित्कप्रसिद्धिमत्वादित्वम्। च शब्दः सपक्षैकदेशवृत्तेरपि हेतुत्वं दर्शयतीति द्रष्टव्यम्। **अभावेति** (कं. २०१.१०) विपक्षे। अनेन व्यतिरेकेऽपि निश्चितं लिङ्गलक्षणमिति द्रष्टव्यम्।

---

१ सपक्षे च–जे. १, जे. २, जे. ३। २ य हि–अ। ३ मेकैकी न पुनः–अ; मेकैको विपक्षो न पुनः–ब, क। ४ समुदितु:–ब। ५ देशेऽस्त्यपि मु. देशेऽप्यस्ति–जे. १, जे. ३। ६ एवकारणेन–अ, ब। ७ तस्यैव हेतुत्वं–अ, ब। ८ 'च'–कं. १ पुस्तके नास्ति। ९ [ ] एतच्चिह्नान्तर्गतो पाठो 'ब' पुस्तके नास्ति। १० साध्यधर्मान्विते–कं।

प्रशस्तपादभाष्यम्

[176-177] विपरीतमतो यत् स्यादेकेन द्वितयेन वा।
विरुद्धासिद्धसन्दिग्धमलिङ्गं [1]काश्यपोऽब्रवीत् ॥

यदनुमेयेनार्थेन देशविशेषे कालविशेषे वा सहचरितमनुमेयधर्मान्विते चान्यत्र सर्वस्मिन्नेकदेशे वा प्रसिद्धमनुमेयविपरीते च सर्वस्मिन् प्रमाणतोऽसदेव, तदप्रसिद्धार्थस्यानुमापकं लिङ्गं भवतीति।

न्यायकन्दली

[176] लिङ्गं व्याख्याय लिङ्गाभासं व्याचष्टे–विपरीतमतो यत् स्यादिति। अत उक्तलक्षणाल्लिङ्गाद्यदेकेन [2]द्वितयेन वा लिङ्गलक्षणेन विपरीतं रहितं विरुद्धमसिद्धं सन्दिग्धं तत् कश्यपात्मजोऽलिङ्गमनुमेयाप्रतिपादकमब्रवीत्। असिद्धमनुमेये नास्ति, अनैकान्तिकं विपक्षाद[3]व्यावृत्तमित्यनयोरेकेन लिङ्गलक्षणेन विपरीतत्वम्। विरुद्धं सपक्षे नास्ति, विपक्षादव्यावृत्तमिति [4]तस्य द्वितयेन लिङ्गलक्षणेन रहितत्वम्।

यदनुमेयेन सम्बद्धमिति श्लोकार्थं विवृणोति–यदनुमेयेनेति। अनुमेयेनार्थेन साध्य-

[टि०] [176] देश[5]विशेषे इति :–कश्मीरेषु वाटिकारक्षणं स्वर्ण[6]शा(श)लाकोद्मे, प्रातर्जयनान्दीनिनादो नृपतिप्रबोधे लिङ्गमिति। यत्रेदं नास्ति इति :– इदं साध्यं यत्र नास्ति, तत्रेदं साधनमपि नास्ति यथा वाजिविषाणे इति प्रमाणासिद्ध एव वचनमात्रेणापि दृष्टान्ते व्यावृत्तिः प्रतीयते इत्यर्थः। प्रमाणशून्यस्य इति मशकवर्तेरपि लिङ्गतां

[पं०] [176] एकेनेति (कं. २०१.१३) एकेन लिङ्गलक्षणेन रहितौ असिद्धानैकान्तिकौ, द्वितीयेन लिङ्गलक्षणेन रहितस्तु विरुद्धः। अनुमेयाप्रतिपादकमिति (कं. २०१.१४) आभासत्वात्। असिद्धमनुमेये नास्तीति (कं. २०१.१५) अपक्षधर्मोऽसिद्ध इति वचनात्। अनयोरिति (कं. २०१.१६) असिद्धानैकान्तिकयोः। सपक्षे इति (कं. २०१.१६) महानसादौ।

एकदेशे वेति (कं. २०१.२४) सपक्षैकदेशे वा प्रसिद्धं, यथा 'अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात्'। प्रयत्नानन्तरीयः पक्षो, घटादिः सपक्षः, तत्र सर्वत्र विद्यतेऽनित्यत्वम्। अप्रयत्नानन्तरीयकः पक्षोऽस्य विद्युद् आकाशादि-

[कु०] [176] लिङ्गं व्याख्यायेति (कं. २०१.१२) लिङ्गलक्षणराहित्येन लिङ्गाभासनिश्चयो वा लिङ्गनिश्चयो वेति विकल्पप्रदर्शनार्थमिति शेषः। अनुमेयाप्रतिपादकमिति (कं. २०१.१४) अनुमेयाप्रतिपत्त्यननुकूलमित्यर्थः।

ननु देशकालविशेषावप्रयोजकौ अन्यथा महानसादिदेशविशेषस्य प्रातरादिकालविशेषस्य वाऽभावे धूमस्यागमकत्वप्रसङ्गात्। अत आह यावति देश इति (कं. २०२.१)। क्वचिदप्रयोजकत्वो[त्वे]वि(ति) देशकालविशेषयोः

१ कश्यपो–दे। २ द्वितयेन–कं. १, कं. २; द्वितयेन च जे. ३। ३ अव्यावृत्तमनयो–जे. १; जे. २। ४ अस्य–जे. १। ५ विशेष–अ, ब, क। ६ शिल्पकोद्गमे–अ, ब; स्वर्णशिकोद्गमे–क।

न्यायकन्दली

धर्मिणा सह यद्देशविशेषे कालविशेषे वा [1]सहचरितं [2]सम्बद्धम्, अनुमेयधर्मान्विते चान्यत्र सपक्षे सर्वस्मिन्नेकदेशे वा प्रसिद्धं प्रमाणेन प्रतीतम्, अनुमेयविपरीते च साध्यव्यावृत्तिविषये चार्थे सर्वस्मिन् प्रमाणतोऽसदेव [3]तदप्रसिद्धार्थस्य साध्य[4]धर्मिण्यप्रतीतस्यार्थस्य साध्यधर्मस्यानुमापकं लिङ्गं भवति। यावति देशे काले वा दृष्टान्तधर्मिणि लिङ्गस्य साध्यधर्मेणाविनाभावो [5]निर्दशितस्तावत्येव देशे काले वा साध्यधर्मिणि प्रतीयमानस्य [6]गमकत्वमिति प्रतिपादनार्थमुक्तम्–<u>देशविशेषे कालविशेषे वा सहचरितमिति</u>। सर्वसपक्षव्यापकवत् सपक्षैकदेशवृत्तेरपि हेतुत्वार्थं <u>सर्वस्मिन्नेकदेशे वा प्रसिद्धमित्युक्तम्</u>। [7]समस्तविपक्षव्यापकवद्विपक्षैकदेशवृत्तेरप्यहेतुत्वावद्योतनार्थं <u>सर्वस्मिन्नसदेवेति</u> पदम्।

केचित् प्रवादुका एवं वदन्ति–नावश्यं प्रमाणसिद्धो वैधर्म्यदृष्टान्त एव [8]एष्टव्यः, 'यत्रेदं नास्ति तत्रेदमपि नास्ति' इति वचनादपि साध्यव्यावृत्त्या साधन[9]व्यावृत्तिप्रतीतिसम्भवात्। तथा च तेषां ग्रन्थः–

[**टि०**] स्यात् धूमस्यापि वा लिङ्गाभावता स्यात्। **अत्राह** इति कश्चिद् **बौद्धः**। यथा **नित्यः शब्दः** इतिः–एतच्च ग्रन्थरीत्योक्तम् वादकाले तु शब्दो नित्य इति प्रथमं धर्मनिर्देशः कार्यः, अन्यथाऽवयवविपर्यासो [10]नाम निग्रहस्थानं स्यात्। नित्यानां व्योमादीनामनित्यानां घटादीनां यौ धर्मावकृतकत्वकृतकत्वे तयोः। [11][**एवं कालात्ययापदिष्टोऽपि** इति–

[**पं०**] विपक्षः। तत्रैकदेशे विद्युदादौ विद्यतेऽनित्यत्वं नाकाशादौ। एते प्रयत्नानन्तरीयकत्वादयो हेतवः सपक्षैकदेशप्रसिद्धा अपि सम्यग्घेतव इत्यर्थः। **अनुमेय-विपरीते चेति** (कं. २०१.२४) व्याख्येयं पदे, **साध्यव्यावृत्तिविषये चेति** (कं. २०१.२५) व्याख्यानपदे। **अर्थे** इति (कं. २०१.२५) विपक्षे। **तावत्येव देशे काले चेति** (कं. २०२.२) नहि पर्वते धूम उपलभ्यमानो देशान्तरस्थदहनं गमयति किन्तु पर्वतस्थमेव। नापि मध्याह्ने धूमो रात्रिसत्कवह्नेर्गमकः किन्तु मध्याह्नसत्कस्य। दृष्टान्ते तथैव दर्शनात् महानसादौ हि यत्रैव यदैव च धूमस्तत्रैव तदैव चाग्निमनुमापयति। **सपक्षैकदेशवृत्तेरिति** (कं. २०२.४) प्रयत्नानन्तरीयकत्वादेः। **विपक्षैकदेशवृत्तेरिति** (कं. २०२.५) यथा च 'अयं पिण्डो गोविषाणित्वात्' अयं हि सपक्षव्यापकः सर्वगोपिण्डेषु वृत्तेः, विपक्षे च महिषादौ वर्त्तते नाश्वादौ।

**केचिदिति** (कं. २०२.६) बौद्धाः। **नावश्यं** [12]**प्रमाणसिद्ध** इति (कं. २०२.६) बौद्धान्तं हि शब्दानित्यत्वे साध्ये व्यतिरेके [13]गगनम्। तच्च तेषां न प्रमाणसिद्धम्। **यत्रेदमिति** (कं. २०२.७) अत्र 'इदम्' अनित्यत्वम्।

[**कु०**] क्वचित्प्रयोजकत्वादेवमुक्तमिति भावः। अनयोश्चोदाहरणम्–एवं सर्वत्र देशकालाविनाभूतमितरस्य लिङ्गमित्येतद्भाष्यव्याख्यानावसरे वक्ष्यति। अयं तेषामाशयः, व्यावृत्तेस्तुच्छत्वं तादृशेनाप्यधिकरणेन निरूपणं सम्भवतीति वैधर्म्यदृष्टान्ते वैधर्म्योदाहरणे अवश्यं प्रामाणिक आश्रयो नेषितव्यः।

---

१ सहचरितं च–जे. १, जे. २। २ सम्बद्धमिति–जे. ३। ३ तदप्रसिद्धस्य–जे. १, जे. २, जे. ३। ४ धर्मिणो –कं. १; कं. २। ५ निरूपितः–जे. १, जे. २, जे. ३। ६ गमक–कं. १; कं. २। ७ सर्व–जे. ३। ८ द्रष्टव्यः–कं. १; कं. २। ९ व्यावृत्तिसम्भवात्–जे. १, जे. २। १० मामं–अ। ११ [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति। १२ प्रमाणसिद्धौ–कं. १। १३ गमनम्–ब।

न्यायकन्दली

तस्माद्वैधर्म्यदृष्टा[1]न्तेऽनेष्टोऽवश्यमिहाश्रयः ।
तदभावेऽपि तन्नेति वचनादपि तद्गतेः ।। इति ।

तन्निवृत्त्यर्थं प्रमाणत इति । साध्यविपरीते यत् प्रमाणतोऽस[2]त्तल्लिङ्गं न तु वाङ्मात्रेणेत्यर्थः । प्रमाणशून्यस्य वचनमात्रस्य सर्वत्र सम्भवे हेतुहेत्वाभासव्यवस्थानुपपत्ति[3]प्रसङ्गः । अतिव्यापकमिदं लिङ्गलक्षणम्, प्रकरणसमे कालात्ययापदिष्टे च भावादिति चेत् ?

अत्राह कश्चित्–प्रकरणसमकालात्ययापदिष्टावनैकान्तिक एवान्तर्भवतः, संदिग्धविपक्षे साध्यधर्मिणि प्रकरणसमस्य भावान्निश्चितविपक्षे च कालात्ययापदिष्टस्य [4]प्रवृत्तेः । तथा च प्रकरणसमः 'यतः प्रकरणचिन्ता स निर्णयार्थम[5]पदिष्टः प्रकरणसमः' [6]प्रक्रियेते प्रस्तूयेते इति प्रकरणे पक्षप्रतिपक्षौ, तयोश्चिन्ता विचारः, सा यत्कृता स निर्णयार्थम-

[हि०] साध्यस्यानुष्णत्वस्य विपरीतेनोष्णत्वेनाक्रान्तत्वात् पक्षीकृत एव वह्निर्विपक्षस्तत्र वर्तमान एकस्मिन्नन्ते नियतो न भवतीत्यनैकान्तिक इत्यर्थः ।] [7]एवं कालात्ययापदिष्टेऽपि इति वह्निरनुष्णः इत्यत्र हि भौमानलेन्धनत्वादिविशेषाविवक्षया तेजोऽवयवी पक्षीकृतः, तेन सौरालोकोऽपि पक्षान्तर्भूत एव न तु विपक्ष इति न तावदस्य हेतोर्विपक्षवृत्तित्वम् ।

[पं०] इदमपीति (कं. २०२.७) कृतकत्वादि । तस्मादित्यादि श्लोकः (कं. २०२.९)। व्याख्या–यस्मात्कारणाद् यत्रेदं नास्ति तत्रेदमपि नास्तीति वचनादपि साध्यव्यावृत्त्या साधनव्यावृत्तिप्रतीतिसंभवस्तस्मात्कारणादिह वैध्यर्म्य[8]दृष्टान्ते आश्रयो गगनादिरवश्यं निश्चितेन दृष्टः वैधर्म्यदृष्टान्ते अवश्यमाश्रयेण भवितव्यमिति निश्चयो नास्ति तत्त्वसदपि हि गगनं दृष्टान्ततया प्रयोज्यमित्यर्थः । न चाश्रयमन्तरेण कथं वैधर्म्यविगमः ? उच्यते – तदभावेऽपि [9]तदपि न (कं. २०२.१०) इति वचनादपि वैधर्म्यविगमादिति श्लोकार्थः । एकदेशीयः प्राह अतिव्यापकमित्यादि (कं. २०२.१३) । भावादिति (कं. २०२.१४) तत्रापि भाष्यसक्तश्लोकलक्षणभावादित्यर्थः ।

अत्राह कश्चिदिति (कं. २०२.१४) अत्रोत्तरमाह बौद्ध इत्यर्थः । सन्दिग्धविपक्षे इति (कं. २०२.१५) सन्दिग्धो विपक्षो यत्रेति समासः । साध्यधर्मिणीति (कं. २०२.१५) शब्दादौ । सा इति (कं. २०२.१८) चिन्ता ।

[कु०] साध्यविपरीत इति (कं. २०२.११) अभावस्यापि भावात्तुल्ययोगक्षेमतया प्रमाणगम्यत्वे न तुच्छत्वम् । तथा च यत्रेदं तत्रेदमिति यथा सपक्षः प्रामाणिक इष्यते तथा व्यतिरेकनिरूपणे प्रामाणिक एव दृष्टान्त एषितव्यः । इतरथा सपक्षस्य प्रामाणिकस्य स्वीकारप्रसङ्गादिति भावः । [10]अस्त्येवमपीत्यत आह प्रमाणशून्यस्येति (कं. २०२.१२) । कल्पिते विपक्षे व्यावृत्तिकल्पनावदनुवृत्तेरपि कल्पितया हेतोरपि हेत्वाभासत्वप्रसङ्गात् । एवं कल्पिते सपक्षेऽनुवृत्तिकल्पनया असाधारणस्यापि हेतुत्वप्रसङ्गादिति भावः । नन्विति–व्यापकमिति । तथा चाबाधितविषयत्वासत्प्रतिपक्षत्वे अपि रूपे इति भावः । अनैकान्तिक एवेति (कं. २०२.१४) ततश्च तदभावेऽपि न नास्त्येवेत्यनेनैव प्रकरणसमकाला-

---

१ दृष्टान्तोऽनिष्टो–कं. १; कं. २ । २ असल्लिङ्गम्–कं. १; कं. २ । ३ प्रसङ्गात्–जे. १, जे. २, जे. ३ । ४ वृत्तेः–कं. १; कं. २ । ५ उपदिष्टः–कं. १; कं. २ । ६ प्रक्रियते प्रस्तूयते इति प्रकरणं–कं. १; कं. २ । ७ पदिष्टोऽपि–ब, क । ८ दृष्टान्तो–कं. १ । ९ तन्न–कं. १ । १० अस्त्येवमित्यारभ्य...हेतुत्वप्रसङ्गात् इति पर्यन्तोभागः पुनरावृत्तः हस्तलिखितपुस्तके–सं ।

न्यायकन्दली

[1]पविष्ट उभयपक्षसाम्यान्न प्रकरण[2]समोऽन्यतरपक्षनिर्णयाय कल्पते। यथा नित्यः शब्दोऽनित्यधर्मानुपलब्धेः, [3][अनित्यः शब्दो नित्यधर्मानुलब्धेरिति] शब्दे नित्यानित्यधर्मयोरनुपलम्भान्नित्यानित्यत्वसंशये सति तद्विचारोऽभूत्, अन्यतरधर्मग्रहणे तत्त्वनिश्चयाद्विचारस्याप्रवृत्तेः। तत्रानित्यधर्मानुपलम्भो [4]नित्यत्वविनिश्चयार्थमुपदिष्टः, नित्यधर्मानुपलम्भोऽनित्यत्वविनिश्चयार्थमुपदिष्टः, नित्यधर्मानुपलम्भं प्रतिपक्षमनतिवर्तमानो न निर्णयाय कल्पते तत्प्रतिबन्धात्। स चायं संभवत्प्रतिपक्षे धर्मिणि वर्तमान एकस्मिन्नन्ते नियतो न भवतीत्यनैकान्तिकः। एवं कालात्ययापदिष्टोऽप्यनैकान्तिकः, प्रत्यक्षनिश्चितोष्णत्वे वह्नौ विपक्षे [5]कृतकत्वस्य भावात्।

[6]एतदयुक्तम्। यदि पक्षव्यापकत्वे सति सपक्षे सद्भावो [7]विपक्षाच्च तस्य व्यावृत्तिरित्येतावतैव हेतोर्गमकत्वम्, तदास्तु नाम साध्यधर्मिणि प्रतिपक्षसम्भावना तथापि

[टि०] अवयवि[8]नश्च पक्षीकृतत्वात् परमाण्वव्यापकत्वेऽपि न भागासिद्धिरिति पक्षधर्मत्व[9]मप्यस्ति सपक्षे च घटादौ सत्त्वात् सपक्षसत्त्वमप्यस्तीति कृतकस्य त्रैरूप्यम्।

सिद्धान्तवाद्याह – पक्षो नाम साध्यपर्याय इति बलवत्प्र[10]माणानिश्चिततुल्यबलप्र[11]माणासम्भवि प्रतिपक्षो जिज्ञासितधर्म[12]विशिष्टो हि पक्षः साधनमर्हति। अत्र कालात्ययापदिष्टे बलवत्प्रमाणनिश्चितप्रतिपक्षत्वान्न प्रति[13]पक्षत्वम्।

[पं०] नित्यः शब्द इति (कं. २०२.१९) शब्दो नित्य इति पक्षो दृष्टव्यः। प्रथमं हि धर्मिनिर्देशः कार्यस्तदनु धर्मनिर्देशः कार्योऽन्यथा अवयवविपर्यासो नाम निग्रहस्थानमापतति। अनित्यः शब्द इति (कं. २०२.१९) अत्रापि शब्दोऽनित्य इति पक्षो द्रष्टव्योऽन्यथाऽवयवविपर्यासाख्यनिग्रहस्थानप्रसङ्गात्। अनुपलम्भाविति (कं. २०२.२०) युगपदनुपलम्भनात्। तत्त्वनिश्चयाद्विचारस्याप्रवृत्तेरिति (कं. २०२.२१) ([14]संदेतोरिमि) संदिग्धे हि हेतुः प्रयुज्यते। अनतिवर्तमान इति (कं. २०२.२३) अनतिक्रामन्। तत्प्रतिबन्धादिति (कं. २०२.२४) तेन प्रतिपक्षेण प्रतिक्षेपात्। एकस्मिन्नन्ते इति (कं. २०२.२५) एकस्मिन्नंशे नित्यत्वेऽनित्यत्वे वा। वह्नौ विपक्षे कृतकत्वस्य भावादिति (कं. २०२.२६) 'अनुष्णो वह्निः कृतकत्वाद् घटवत्' अस्य हि प्रत्यक्षनिश्चितोष्णत्वे वह्निर्विपक्षस्तत्र कृतकस्य भावादनैकान्तिकः।

[कु०] त्ययापदिष्टयोरतिव्याप्तेः परिहृतत्वादिति भावः। सन्दिग्धविपक्ष इति (कं. २०२.१५) बलवता प्रमाणेन साध्यविपर्ययस्य ग्रहणाद्विपक्षत्वेन निश्चित इत्यर्थः। तत्र प्रकरणसमस्य सन्दिग्धविपक्षवृत्तितयाऽनैकान्तिकत्वं समानतन्त्रे तल्लक्षणव्याख्यानेन दर्शयति तथा चेति (कं. २०२.१६)। एतावतेति (कं. २०३.२) यदि त्रैरूप्यमित्यर्थः।

---

१ उपदिष्टः–कं. १; कं. २। २ साम्ये–कं. १; कं. २। ३ [ ] एतच्चिह्नान्तर्गतः पाठः जे. १, जे. २ जे. ३ पुस्तकेषु नास्ति। ४ नित्यत्वविनिश्चयार्थमपदिष्टः नित्यत्वधर्मानुपलम्भं – जे. १, जे. २, जे. ३। ५ कृतकस्य – जे. १; जे. २। ६ एतदप्ययुक्तम्–जे. १; जे. २। ७ विपक्षाच्च व्यावृत्ति – कं. १, कं. २। ८ न स्व – अ। ९ विपक्ष – ड। १० त्वस्या – अ, ब, क। ११–१२ प्रमाण – अ, ब, क। १३ शिष्टो – अ। १४ पक्षत्वं तेतः प्रकरणसमे – अ, ब; पक्षत्वां करणे – ड। १५ निरर्थकमिव भाति। इदं पुनरावृत्तं सकृदस्माभिर्गृहीतम्।

## न्यायकन्दली

**प्रकरणसमेन स्वसामर्थ्यात् साध्यं साधयितव्यमेव । अथ न शक्नोति साधयितुं प्रतिपक्षसंशयाक्रान्तत्वात् ? न तर्हि त्रैरूप्यमात्रेण [1]गमकत्वमिति असत्प्रतिपक्षत्वमपि रूपान्तरमास्थेयम्, सति प्रतिपक्षे हेतुत्वाभावादसति तद्भावात् । एवं कालात्ययापदिष्टेऽपि वाच्यम् । यदि त्रैरूप्यमात्रेण लिङ्गत्वं कृतकत्वाद्वह्नावनुष्णत्वमस्त्येवेति कथमनैकान्तिकत्वम् ? अथ सत्यपि कृतकत्वे वह्नावनुष्णत्वं न भवति [2]प्रत्यक्षेणैवोष्णताप्रतीतेः, तदा प्रत्यक्षाविरोधे सति प्रतिपादनं न तद्विरोध इत्यबाधितविषयत्वमपि रूपान्तरमनुसरणीयम् । तस्मादन्यथोच्यते, पक्षो नाम साध्यपर्यायः, साध्यं च तद्भवति यत्साधनमर्हति, सम्भाव्यमानप्रतिपक्षश्चार्थो न साधनमर्हति, वस्तुनो द्वैरूप्याभावादित्ययमपक्षधर्म एव । तथा प्रत्यक्षादिविरुद्धोऽपि पक्षो न भवति, रूपान्तरेण सिद्धस्य रूपान्तरेण साधनानर्हत्वात् । अतः प्रकरणसमकालात्यया[3]पदिष्टावपक्षधर्मावुभौ 'यदनुमेयेन सम्बद्धम्' [4]इत्यनेनैव पराहतौ, अनुमेयाभासाश्रयत्वात् ।**

[**टि०**] प्रकरणसमे [5]तु तुल्यबलप्रमाणसम्भवितप्रतिपक्षत्वान्न पक्षतां, ततः पक्षलक्षणाभावात् तत्र च वर्तमानो हेतुराश्रयासिद्ध इत्यभिप्रायः। [6]नैयायिकैस्तु [7]विपरीतार्थनिश्चायकम्, विपरीतार्थसम्भावकं प्रमाणमुपजीव्य पक्षधर्मताया अभावो [8]वैशेषिकैस्तावदभ्युपगम्यते [9]इत्यत उपजीव्यमेव बाधितविषयत्वं सत्प्रतिपक्षत्वं च [10]मुख्यतया दोषोऽङ्गीक्रियते इति ।

[**पं०**] अथ श्रीधरः प्राह **एतदयुक्तमिति** (कं. २०३.१) । एतत् प्रकरणसमकालात्ययापदिष्टयोरनैकान्तिकत्वप्रतिपादनमयुक्तमित्यर्थः । **पक्षव्यापकत्वे** इति (कं. २०३.१) पक्षधर्मत्वे । **साधयितव्यमेवेति** (कं. २०३.३) गमकत्वेनाभिमतस्य पक्षधर्मत्वादित्रयस्याविकल्पनात् । **असत्प्रतिपक्षत्वमपि रूपान्तरमास्थेयमिति** (कं. २०३.५) नैयायिकानां मते हेतुः पञ्चरूपः पक्षधर्मत्वम् १, सपक्षे सत्वं २, विपक्षे चासत्वं ३, असत्प्रतिपक्षत्वं ४, अबाधितप्रत्ययत्वं ५ चेति । **तद्भावादिति** (कं. २०३.६) हेतुत्वभावात् । **वह्नावनुष्णत्वमस्त्येवेति** (कं. २०३.७) त्रैरूप्यभावात् । **प्रतिपादनमिति** (कं. २०३.९) गमकत्वम् । **न तद्विरोध** इति (कं. २०३.९) न प्रत्यक्षविरोधे । **रूपान्तरमिति** (कं. २०३.९) हेतोः सत्कम् । **अपक्षधर्म एवेति** (कं. २०३.१२) असिद्धः । रूपान्तरेण उष्णत्वेन । **रूपान्तरेणेति** (कं. २०३.१३) अनुष्णत्वेन । **अनुमेयाभासाश्रयत्वादिति** (कं. २०३.१४) पक्षभासाश्रितत्वात् ।

[**कु०**] **सति प्रतिपक्ष** इति (कं. २०३.५) अन्वयव्यतिरेकाभ्यां त्रैरूप्यवदसत्प्रतिपक्षत्वस्यापि लिङ्गरूपत्वादित्यर्थः । **एवं कालात्यया[11]पदिष्टोऽपीति** (कं. २०३.६) अननुसन्धानेन विपक्षत्वहेतुनैव साध्यावस्थात्तदनुसन्धाने तु तेनैव दूषितस्य दूषणान्तरं मृतमारणकल्पमित्यर्थः । **तस्मादन्यथेति** (कं. २०३.१०) यस्मात्तदभावे च नास्त्येवेत्यनेन दुर्वचनं तयोरनुपजीवनेनैकान्तिकत्वमपि सुवचम् । मृतमारणन्यायश्चाप्युभयत्रापि तुल्यस्तथापि प्रथमरूपप्रतिपत्यवसरे रूपान्तरप्रतिपत्तेरभिसम्भवत्याः परित्यागे न कारणमस्तीति भावः ।

सामान्यलक्षणत्वमभिप्रेत्य शङ्कते ।

---

१ गमकत्वम्—जे. १; जे. २ । २ प्रत्यक्षेणो—कं. १, कं. २ । ३ पदिष्टावुभौ—कं. १, कं. २; पदिष्टावपक्षधर्मावितौ—जे. १; जे. २ । ४ इत्यन्तेनैव निराकृतौ—कं. १; कं. २ । ५ 'तु' अबपुस्तकयोर्नास्ति । ६ अत्र—नैयायिकैस्तु विपरीतार्थनिश्चायकं प्रमाणमुपजीव्य यत्र पक्षधर्मतायाः अभावो वैशेषिकैस्तावद् अभ्युपगम्यते (तत्र) उपजीव्यमेव बाधितविषयत्वं सत्प्रतिपक्षत्वं च मुख्यतया दोषोऽङ्गीक्रियते इत्यन्वयः । ७ विपरीतार्थः—अ । ८ शेषिकैः—अ । ९ इत्यत्र—अ, ब । १० —मुख्यतया—अ, ब । ११ °पदिष्टेऽपि—कं ।

### न्यायकन्दली

[177] नन्वेवमप्यलक्षणमिदमव्यापकत्वात् । त्रिविधो हि हेतुः—अन्वयी, व्यतिरेकी, अन्वयव्यतिरेकी चेति । तत्रान्वयी विशेषोऽभिधेयः प्रमेयत्वात् सामान्यवत् । अस्य हि पक्षादन्यः सर्व एव सदसत्प्रभेदः सपक्षः, प्रमातृमात्रस्य [1]प्रमाणमात्रापेक्षयाऽनभिधेयस्याप्रमेयस्याभावात् । यश्च पुरुषमात्रस्यानभिधेयोऽप्रमेयश्च स वाजिविषाणवदसन्नेव, न [2]वाऽसन् सपक्षो विपक्षो वा स स्यान्निःस्वभावत्वात् । यश्च [3]सन् स सर्वः सपक्ष एवेति तदभावे च नास्त्येवेत्यव्यापकं लक्षणम् । [4]व्यतिरेकाभावाच्चागमकमेव तदिति चेन्न, अन्वयाव्यभिचारात् । अन्यस्य सद्भावादन्यस्य [5]सिद्धिरित्यत्रान्वयः कारणम्, तस्य तु व्यभिचारप्रतीतिरपवादिका । अस्ति तावत् प्रमेयत्वाभिधेयत्वयोरन्वयः सर्वत्र प्रमेयेऽभिधेय[6]त्वस्य दर्शनात् । न च व्यभिचारो दृष्टो नापि शङ्कामारोहति, यं यं व्यतिरेक-

[टि०] [177] मीमांसका हि सङ्केतविषयत्वाद्गोत्वादिसामान्यमेव शब्दाभिधेयमाहुर्न तु गोपिण्डादिव्यक्तिविशेषमिति । ततस्तान्प्रति गोपिण्डरूपस्य विशेषस्य शब्दाभिधेयत्वं साधयितुमुक्तं विशेषोऽभिधेय इति । यश्च [7]पुरुषमात्रस्य इति पुंजात्यालिङ्गि तस्येत्यर्थः । [8]अथ पर एवाचार्योत्तरमाशङ्कते व्यतिरेकाभावात् इति । ननु यद्यन्यस्य सद्भावाद्

[पं०] [177] परवाक्यं नन्वेवमित्यादि (कं. २०३.१५) । सदसत्प्रभेद इति (कं. २०३.१७) सत्प्रभेदो घटादिः अ[स]त्प्रभेदस्तु प्रागभावप्रध्वंसाभावेतरेतराभावरूपोऽत्र ग्राह्यः । नात्यन्ताभावरूपः, अत्यन्तासतो हि वाजिविषाणादेर्न क्वापि सपक्षत्वं नापि विपक्षत्वं दृष्टम् । प्रमातृमात्रस्येति (कं २०३.१७) एकस्य कस्यचित्प्रमातुर्भवेदप्यनभिधेयः सन् अप्रमेयः कश्चित्पदार्थः, तन्निवृत्त्यर्थमाह प्रमातृमात्रस्य । प्रमातृसामान्यस्य पुंजात्यालिङ्गितस्येत्यर्थः । प्रमाणमात्रापेक्षयेति (कं. २०३.१८) प्रमाणसामान्यमुद्दिश्य । अनभिधेयस्येति (कं. २०३.१८) साध्याभावस्य । अप्रमेयस्येति (कं. २०३.१८) साधनाभावस्य । अव्यापकं लक्षणमिति (कं. २०३.२०) तदभावो हि साध्यधर्माभावः स चात्र नास्ति सपक्षत्वात्सर्वस्य अव्यापकम् । पर एवाचार्यमाशङ्कते व्यतिरेकाभावादित्यादि (कं. २०३.२१) [9]एतदिति (कं. २०३.२१) साधनम् । अन्वयाव्यभिचारादिति (कं. २०३.२१) अन्वयस्याविसंवादात् । अन्यस्येति

[कु०] [177] नन्वेवमपीति (कं. २०३.१५) । अभावादिति (कं. २०३.१८) निरूपाख्यत्वादित्यर्थः । विधिनिषेधव्यवहाराविषयत्वादित्यर्थः । तदभावे च नास्त्येवेत्यव्यापकमिति (कं. २०३.२०) एतच्च सम्मिलितमव्यापकमित्यर्थः । अन्वयाव्यभिचारादिति (कं. २०३.२१) अव्यभिचारो हि गमकत्वे कारणम् । अन्वयव्यतिरेकौ तु केवलं तन्निश्चयोपायावित्यर्थः । ननु यद्य[भिधेय]त्वमात्रेण तर्हि प्रमेयत्वमैत्रतनयत्वाभ्यामनित्यत्वस्यामते अपि गम्ये जातामित्यत आह अन्यस्य सद्भावादिति (कं. २०३.२२) । व्यभिचारप्रतीतिरपवादिकेति (कं. २०३.२२) तच्छंका चेति शेषः ।

---

१ प्रमाणमात्रस्यैवापेक्षया—जे. १; जे. २ । २ वा सपक्षो—कं. १; कं. २ । ३ सत्—कं. १, कं. २; यस्तु सत् जे. १ । ४ व्यतिरेकाभावात्—कं. १, कं. २ । ५ सिद्धिरत्रान्वयः—जे. १ । ६ त्वदर्शनात्—जे. १ । ७ मात्रश्च—अ, ब । ८ अर्थ—ड । ९ तद्—कं. १ ।

## न्यायकन्दली

विषयं बुद्धिगोचरीकरोति परस्य च वक्तुमिच्छति तस्य सर्वस्य प्रमेयत्वाभिधेयत्व[1]प्राप्तेः । न चास्ति विशेषो विपक्षे सत्यव्यभिचारः कारणं न विपक्षाभावादिति । तेन प्रमेयत्वमभिधेयत्वं गमयति । व्यतिरेकी च सात्मकं जीवच्छरीरं प्राणादिमत्त्वादिति । अस्य पक्षादन्यः सर्व एव विपक्षः, तथापि हेतुत्वं विपर्ययसम्बन्धाव्यभिचारात् । घटादिषु प्राणादिमत्त्वेन निरात्मकत्वस्य व्याप्तिरपगता, अप्राणादिमत्त्वस्य च जीवच्छरीरे निवृत्तिः प्रतीयते । तत्प्रतीत्या [2]तद् व्याप्तस्य निरात्मकत्वस्य निवृत्त्यनुमानम् ।

अथ मन्यसे योऽर्थो नावगतस्तद्व्यतिरेकोऽपि न शक्यते प्रत्येतुम्, प्रतिषेधस्य विधिविषयत्वात् । आत्मा च न क्वचिदवगतः, कथं तस्य घटादिभ्यो व्यावृत्तिप्रतीतिरिति । तदयुक्तम् । परस्य तावत् समस्तवस्तुविषयं नैरात्म्यमिच्छतो घटादिभ्यः

[टि०] अन्यथासिद्धिस्तर्हि स्थाल्यादिसद्भावेऽपि वह्नि[3]सिद्धिः स्याद् अत आह तस्य तु व्यभिचारप्रतीतिः इति । अपवादिका बाधिकेत्यर्थः । न चास्ति इति । विशेषो वक्ष्यमाणलक्षणः । [4]तमेव दर्शयति विपक्षे सति इत्यादि ।

[5]सात्मकम् इति :—एतावता ग्रन्थेन केवलान्वयिनि त्रैरूप्याभावा[द]स्याव्यापकत्वं प्रतिपाद्य केवलान्वयव्यतिरेकिण्यपि परस्तद्दर्शयति व्यतिरेकी च इत्यादि । अत्र च बौद्ध[6]चार्वाकादीनामात्मप्रतीत्यभावादप्रसिद्धविशेषणः पक्षः

[पं०] (कं. २०३.२२) धूमस्य । अन्यस्य सिद्धिरिति (कं. २०३.२२) अग्नेः सिद्धिः । ननु यदन्यस्य सद्भावादन्यस्य सिद्धिस्तर्हि स्थाल्यादिसद्भावेपि वह्निसिद्धिः स्यादित्यत आह तस्य त्वित्यादि (कं. २०३.२२) । अपवादिकेति (कं. २०३.२३) बाधिका । शङ्कामिति (कं. २०३.२४) संदेहं नापि । शङ्कामारोहतीत्यस्मात्पुरो यत इत्यध्याहार्यम् । बुद्धिगोचरीकरोतीति (कं. २०३.२५) प्रमेयत्वपरामर्शः । परस्य च वक्तुमिच्छतीति (कं. २०३.२५) अभिधेयत्वपरामर्शः । प्रमेयत्वाभिधेयत्वप्राप्तेरिति (कं. २०३.२५) अभिधेयत्वप्राप्तेरित्यर्थः । अव्यभिचार इति (कं. २०३.२६) अन्वयस्येति द्रष्टव्यम् । प्रमेयत्वमिति (कं. २०४.१) कर्तृभूतम् । सर्व एवेति (कं. २०४.२) घटादिः । विपर्ययसम्बन्धाव्यभिचारादिति (कं. २०४.३) विपर्ययेण व्यतिरेकेण स च यः सम्बन्धो व्याप्तिस्तदव्यभिचारात् । [7]अप्राणादिमत्त्वेन निरात्मकत्वस्य व्याप्तिरवगतेति (कं. २०४.३) अप्राणादिमत्त्वं व्यापकं निरात्मकत्वं व्याप्यं व्यतिरेकिणि । अप्राणादिमत्त्वस्य च जीवच्छरीरे निवृत्तिः प्रतीयते इति (कं. २०४.४) व्यापकं हि निवर्तमानं व्याप्यमपि निवर्तयति ।

[कु०] व्यतिरेकविषयमिति (कं. २०३.२४) विपक्षमित्यर्थबुद्ध्या गोचरीकरणम् । प्रमेयत्वप्राप्तौ हेतुर्वक्तुमिच्छाऽभिधेयत्वप्राप्तौ तथाप्यव्यभिचारो गमकत्वे कारणमिति शङ्कामपनयति न चास्ति विशेष इति (कं. २०३.२६) । विपर्ययसम्बन्धाव्यभिचारादिति (कं. २०४.३) साध्यसाधनयोर्विपर्ययौ निरात्मकत्वाप्राणादिमत्त्वे तयोर्न प्रकरणसमकालात्ययापदिष्टयोरतिव्याप्तिः परिहृता अन्यथा, अन्येनानुमेयेन सम्बन्ध[द]मित्यनेनातिव्याप्तिपरिहार उच्यत इत्यर्थः । यद्यपि कालात्ययापदिष्टप्रकरणसमयोरनुपजीवने सपक्षधर्मत्वमपि सम्बुद्धौ व्यतिरेकव्याप्तिः तस्या अव्यभिचारात् । निवृत्त्यनुमानमिति (कं. २०४,५) व्यापकनिवृत्तौ व्याप्यनिवृत्तेरवश्यंभावित्वादित्यर्थः ।

---

१ व्याप्तेः-जे. १ । २ व्याप्तस्य—कं. १, कं. २ । ३ सिद्धि स्यात्—अ, ब । ४ तामेव—अ । ५ स सात्मकम्—अ, ब । ६ चार्वादीना—अ । ७ अप्रमाणादि—अ पुस्तके; तत्तु न शुद्धम्-सं ।

### न्यायकन्दली

सिद्धैवात्मव्यावृत्तिः। स्वस्यापि जीवच्छरीरेष्वेवात्मनो बुद्ध्यादिभिः कार्यैः सह कार्यकारणभावे सिद्धे घटादिभ्यो बुद्ध्यादिव्यावृत्त्या तदुत्पादनसमर्थस्य विशिष्टात्मसम्बन्धस्याभावसिद्धिः। यथा धूमाभावे क्वचित्तदुत्पादनयोग्यस्य वह्नेरभावसिद्धिः। यद्येवमात्मापि जीवच्छरीरेषु सिद्ध एव, सम्बन्धिप्रतीतिमन्तरेण सम्बन्धप्रतीते[1]रसम्भावात्। ततश्च [2]व्यतिरेक्यनुमानवैयर्थ्यम्, निष्पादितक्रिये कर्मणि साधनस्य [3]साधनन्यायातिपातात्। नैवम्, स्वसिद्धस्यात्मनः परं प्रत्यसिद्धस्य साध्यत्वात्। न चान्वयाव्यभिचारः प्रतिपादको न व्यतिरेकाव्यभिचार इत्यस्ति नियमहेतुः। तस्माद्व्यतिरेकिणोऽपि हेतुत्वात् तेन प्रसिद्धं च तदन्विते इत्यव्यापकम्। अत्रैके समानतन्त्रप्रसिद्धया केवलान्वयिनः केवलव्यतिरेकिणश्च परिग्रह इति वदन्ति। अपरे तु व्यस्तसमस्तं लक्षणं [4]वर्णयन्ति।

[टि०] तस्मान्नेदं निरात्मकमिति कार्यम्। न चात्राप्यात्मप्रतीतिमन्तरेण निरात्मकप्रतीत्यभावे तन्निबोधोऽपि कथं शक्य इति वाच्यम्।. निरात्मकत्वस्य लोष्टादौ परस्य प्रतीतत्वात्। न च [5]सपक्षविपक्षव्यावृत्तेन [6]गन्धवत्त्वस्येवास्याप्यसाधारणत्वात्। अस्या तु सपक्षेऽविद्यमाने तत्रावर्तमानत्वात्। ननु तर्हि प्रत्येकसमुदायाभ्यामव्यापकमिदं लक्षणमित्याह साध्यसाधनत्वमिति।

[पं०] केवलव्यतिरेकिवादी उत्तरयति तदयुक्तमिति (कं. २०४.७)। परस्येति (कं. २०४.७) बौद्धस्य। नैरात्म्यमिच्छत इति (कं. २०४.८) सर्वे भावा निरात्मान इति वचनात्। स्वस्यापीति (कं. २०४.९) वादिनोऽपि। तदुत्पादनसमर्थस्येति (कं. २०४.१०) बुद्ध्यादिजननक्षमस्य। क्वचिदिति (कं. २०४.११) पर्वतादौ। तदुत्पादनयोग्यस्येति (कं. २०४.११) धूमजननक्षमस्य अप्रदीप्तार्द्रेन्धनस्येत्यर्थः। परवाक्यं यद्येवमित्यादि (कं. २०४.१२)। आत्माऽपि जीवच्छरीरेषु सिद्ध एवेति (कं. २०४.१३) ततश्चान्वय एव सिद्धः किं व्यतिरेकिणेत्यभिप्रायः। सम्बन्धिप्रतीतिमिति (कं. २०४.१३) सम्बन्धिनोऽत्र बुद्ध्यादय आत्मा च। सम्बन्धप्रतीतेरिति (कं. २०४.१३) कार्यकारणभावप्रतीतेः। व्यतिरेकिवादी प्राह नैवमिति (२०४.१४) व्यतिरेक्यनुमानं युक्तमेवेत्यर्थः। प्रसिद्धं [च] तदन्वित (कं.

[कु०] अथेति (कं. २०४.५) अन्यस्याव्याप्यभूताया निवृत्तेरप्रतीतौ कथं व्याप्तिनिश्चय इत्यर्थः। आत्मनोऽप्रतीतौ घटादौ तन्निवृत्तिर्न प्रतीयत इति किं नैरात्म्यवादी वदेत्? किं वा स्वदूष्यः? नाद्य इत्याह परस्य तावदिति (कं. २०४.७)। अन्यथापसिद्धान्तप्रयोगादित्यर्थः। न द्वितीय इत्याह स्वस्यापीति (कं. २०४.९)। [7]विशिष्टस्यात्मसम्बन्धस्य (कं. २०४.१०) अष्टद्रव्यातिरिक्तद्रव्यसम्बन्धस्येत्यर्थः। तदुत्पादनयोग्यस्येति (कं. २०४.११) आर्द्रेन्धनवत इत्यर्थः। स्वसिद्धस्येति (कं. २०४.१४) स्वयं तावन्'मम शरीरं' 'ममेन्द्रियाणि' तेन बुद्धिरिति बुद्धीन्द्रियशरीरसङ्घात परिहारेणाष्टद्रव्यातिरिक्त एव सिद्धः। स एव परं प्रति केवलव्यतिरेकिणा साध्यत इत्यर्थः। (अ)[8]प्रसिद्धेति

---

१ रसम्भवात्–कं. १; कं. २। २ व्यतिरेकानुमान–जे. १; जे. ३। ३ साधनत्वाति–जे. १; जे ३। ४ वदन्ति–कं. १, कं. २। ५ स्वपक्ष–ड। ६ गन्धत्वस्ये वा–अ, ब। ७ विशिष्टात्म...कं। ८ अत्र कन्दल्यां 'प्रसिद्धया' इति प्रतीकं स्यात् तच्च मुद्रितकन्दल्यां नास्ति अतः टीकाकारस्य पुस्तकेऽयं पाठः स्यात् मुद्रितकन्दल्यां तु समानतन्त्रप्रसिद्धया इत्येव पाठः–सं।

प्रशस्तपादभाष्यम्

[178] यत्तु यथोक्तात् त्रिरूपाल्लिङ्गादेकेन धर्मेण द्वाभ्यां वा विपरीतं तदनुमेयस्याधिगमे लिङ्गं न [1]भवतीति। एतदेवाह सूत्रकारः–"अप्रसिद्धोऽनपदेशोऽसन् [2]सन्दिग्धश्चानपदेशः" (अ. ३ आ. १ सू. १५) इति।

न्यायकन्दली

अनुमेयेन सम्बद्धं प्रसिद्धं च तदन्वित इति अन्वयिनो लक्षणम्। अनुमेयेन सम्बद्धं तद्विपरीते च नास्त्येवेति व्यतिरेकिण इति। समस्तं लक्षणमन्वयव्यतिरेकिण इति। साध्यसाधनत्वं [3]सामान्यलक्षणं त्रयाणाम्। यथा प्रमाणानां यथार्थपरिच्छेदकत्वं सामान्यलक्षणम्।

[178] विपरीतमतो यत् स्यादिति द्वितीयश्लोकस्यार्थं विवृणोति–[4][यत्तु यथोक्तात्त्रिरूपाल्लिङ्गादेकेन धर्मेण द्वाभ्यां वा धर्माभ्यां विपरीतं तदनुमेयस्याधिगमे लिङ्गं न भवतीत्येतदेवाह सूत्रकारः "अप्रसिद्धोऽनपदेशोऽसत सन्दिग्धश्च"।] अनपदेश इति। अपदेशो हेतुर्न [5]भवतीत्यपदेशोऽत्यनपदेशोऽहेतुरित्यर्थः। अप्रसिद्ध इति विरुद्धासाधारणयोः परिग्रहः, तयोः साध्यधर्मेण सह प्रसिद्ध्यभावादहेतुत्वम्। असन्नित्यसिद्धस्यावरोधः,

[टि०] [178–179] साध्यधर्मेण इति :–सपक्षे प्रसिद्ध्यभावादित्यर्थः। [6]अन्यध्यवसाय इति :–[7]सविकल्पकं

[पं०] २०४.१७) इत्यव्यापकमित्यत्र अन्वयव्यतिरेकीति तृतीयो हेतुरुभयसम्मतत्वाच्चर्चितः। अथ श्रीधरवाक्यं [8]तत्रैके (कं. २०४.१७) इत्यादि। एके व्योमशिवा...दयः। समानतन्त्रप्रसिद्ध्येति (कं. २०४.१८) न्यायशास्त्रप्रसिद्धया। अपरे त्विति (कं. २०४.१९) वयं कन्दलीकाराः। [साध्य]साधनत्वमिति (कं. २०४.२१) साध्याव्यभिचारित्वम्।

[178] विपरीतमिति (कं. २०४.२३) रहितम्। प्रसिद्ध्यभावादिति (कं. २०५.३) व्याप्त[प्तेर]भावात्। सपक्षे इति (कं. २०५.३) घटे। साध्यधर्मेणेति (कं. २०५.३) अनित्यत्वेन। धर्मिणि वृत्त्यभावादहेतुरिति (कं. २०५.४) यथा। अनित्यः शब्दः चाक्षुषत्वाद् घटवत्; चाक्षुषत्वं च सपक्षे घटेऽस्ति न धर्मिणि शब्दे। अत एवासिद्धनामहेत्वाभासः। उभयथादृष्टत्वादहेतुरिति (कं. २०५.६) प्रमेयत्वादिः। अनित्यः शब्दः प्रमेयत्वात् प्रमेयत्व हि नित्यानित्यादिकयोः साधारणत्वादनैकान्तिकं किं घटवत् प्रमेयत्वादनित्यः शब्द आहोस्वित् आकाशवत् प्रमेयत्वान्नित्यः।

[कु०] समानतन्त्रप्रसिद्धयेत्यर्थः। अपरे त्विति (कं. २०४.१८) वाक्यभेदेनेति शेषः। साध्यसाधनत्वमिति (कं. २०४ २१) समानतन्त्रप्रसिद्धया।

[178] किं साध्यधर्मेति (कं. २०५.५) साध्यधर्ममुपस्थाप्य किं तेन सह चरिष्यति उत तद्विपरीतं धर्ममुपस्थाप्य साध्येन सह रहितो भविष्यतीत्येवमाकारस्य सन्देहस्य विषयो भवतीत्यर्थः। [9]उभयथा परिदृष्टत्वात् [इति] (कं. २०५.६) (अ)[स]पक्षे विपक्षे चेति शेषः।

---

१ भवतीत्याह–दे। २ सन्दिग्धश्च–कं. १, कं. २; कि। ३ सामान्यं–जे. ३। ४ [ ] एतच्चिह्नान्तर्गतः पाठः कं. १, कं. २ पुस्तकयोर्नास्ति। ५ भवतीत्यनपदेशा–कं. १, कं. २। ६ अन्यध्यवसाय अ, प्रतीकमिदं मु पुस्तके नास्ति किन्तु तत्रैव (८) अष्टमे पादटिप्पणे इ पुस्तकस्थं दर्शितम्–जे. १, जे. २, जे. ३ इत्यत्र नास्ति। ७ सविकल्पक–अ, ब, क। ८ अत्रैके–कं. १, ब। ९ उभयथा दृष्टत्वात्–कं।

### प्रशस्तपादभाष्यम्

[179 to 181] विधिस्तु यत्र धूमस्तत्राग्निर[1]ग्न्यभावे धूमोऽपि न भवतीत्येवं प्रसिद्धसमयस्यासन्दिग्धधूमदर्शनात् साहचर्यानु[2]स्मरणात् तदनन्तरमग्न्यध्यवसायो भवतीति ।

### न्यायकन्दली

स हि सपक्षे साध्यधर्मेण सह प्रसिद्धोऽपि धर्मिणि वृत्त्यभावादहेतुः । सन्दिग्धश्चेत्यनैकान्तिकाभिधानम् । स हि धर्मिणि दृश्यमानः किं साध्यधर्मसहचरितः किं वा तद्रहित इति सन्दिग्धो भवति, न पुनरेकं धर्ममुपस्थापयितुं शक्नोति । उभयथा दृष्टत्वादहेतुः । [179] इदमनेनाविनाभूतमिति ज्ञानं यस्य नास्ति तं प्रति धर्मिणि धर्मस्यान्वयव्यतिरेकवतोऽपि लिङ्गत्वं न विद्यते, तदर्थमविनाभावस्मरणमनुमेयप्रती[3]तावुपाय इति दर्शयति–विधिस्त्विति ।

विधिस्तु अनुमेयप्रतीतिप्रकारस्तु, यत्र धूमस्तत्राग्निरग्न्यभावे धूमो न भवतीति ।

[टि०] ज्ञानमित्यर्थः । नन्वेवं द्वितीय इतिः–धूमवांश्चायमित्येवं रूपं [4]पक्षतावच्छेदकविशिष्ट [5]धूमज्ञानं व्याप्तिस्मरणात्पूर्वं यद् धूमदर्शनं तदपेक्षया द्वितीयमिति द्वितीयलिङ्गपरामर्शः । व्याप्तिग्रहणकालसञ्जातधूमज्ञाना[6]पेक्षया त्वस्यापि ज्ञानस्य तृतीयत्वं [7]ग्रन्थान्तरे सम्मतमिति । न च स्मृत्यनन्तरभावित्वाद् इति स्मृतिर्व्याप्तिस्मरणम् । ननु तर्हि धूमवांश्चायमित्युल्लिखितस्योपनयस्य वैयर्थ्यमित्याह नाप्युपनयेति :–अवयवान्तरैर्हेतुः दृष्टान्तादिभिः । [8]ननु परार्थानुमानेऽप्युप-

[पं०] [179] यस्येति (कं. २०५.७) प्रमातुः ।

द्वितीय इति (कं. २०६.१२) प्रथमं धूमवत्त्वादित्युक्त्वा द्वितीयवेलायां यः क्रियते बोद्धस्य पक्षधर्मता स्वस्य तु

[कु०] [179] 'प्रसिद्ध च तदन्विते' तदभावे प्रमाणतोऽसन्नेवेति सपक्षे सत्त्वस्य विपक्षाद्व्यावृत्तेश्च ज्ञानमनुमानाङ्गम् । ननु तयोः सत्तामात्रमित्युक्तं, सोऽयं नियमः कुत इति शङ्कानिवर्तकतया भाष्यमवतारयति इदमनेनेति (कं. २०५.७) । अथवाऽन्वयव्यतिरेकप्रसिद्धेरेवाविनाभावनिश्चयोपायता न पुनः कार्यकारणभावादेरित्येतत् कुत इति शङ्कानिराकरणपरतया भाष्यावतारणमित्यवगन्तव्यम् । तत्रोदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनय इति; समानतन्त्रे व्याप्तिस्मृतिसहितस्यैव पक्षधर्मस्य प्रतिपादकं वचनमुप[नय] इति लक्षणात् ।

व्याप्तिस्मृते[:] उत्तरकालभाविलिङ्गपरामर्शोऽनुमितिसाधनमिति प्रतीयते इत्यभिप्रायवांश्चोदयति नन्वेवमिति (कं. २०६.१२) । उदाहरणापेक्ष इति पदमुप[नय]स्योदाहरणानन्तर्यमात्रपरं न तु व्याप्तिस्मृते[:]उत्तरकालमेत[त्]

---

१ रग्नरभावे – दे । २ नुस्मरणादनन्तरम् – दे । ३ तावनुमानाङ्गमिति – कं. १; कं. २ । ४ पर्वता – ड ।
५ धूमवद्ज्ञानं – अ, ब । ६ पेक्षत्वस्यापि – अ, ब; पेक्षत्वेस्यापि – क । ७ ग्रन्थान्तरेण – अ, ब ।
८ ननुमानेष्वुपनय – अ, ब ।

## न्यायकन्दली

एवं प्रसिद्धसमयस्य प्रसिद्धाविनाभावस्य पुरुषस्यासन्दिग्धधूमदर्शनाद्धूम एवायं न बाष्पादिकमिति ज्ञानात् साहचर्यानुस्मरणाद्यत्र धूमस्तत्राग्निरित्येव[1]मनुस्मरणादग्न्यध्यवसायो भवति, तदनन्तरमग्न्यनुमानं भवति। नन्वेवं द्वितीयो लिङ्गपरामर्शो न लभ्यते ? मालभ्भि, नहि नस्तेन प्रयोजनम्, लिङ्गदर्शनव्याप्तिस्मरणाभ्यामेवानुमेयप्रतीत्युपपत्तेः। न च स्मृत्यनन्तरभावित्वादनुमेयप्रतीतिरनियतदिग्देशा स्यात् ? लिङ्गदर्शनस्य नियामकत्वात्। नाप्युपनयवैयर्थ्यम्, अवयवान्तरैरप्रतिपादितस्य पक्षधर्मत्वस्य प्रतिपादनार्थं परार्थानुमाने तस्योपन्यासात्।

[टि०] नयनमन्तरेणापि स्वार्थानुमानवत् लिङ्गदर्शनमात्रेणैव पक्षधर्मतानिश्चयो [2]भविष्यति ? नैवम्. परं प्रत्यवैयधिकरण्यनिश्चयस्योपनयमन्तरेणाप्रदर्शनात्। स्वयं तु प्रत्यक्षादिनैव दर्शनात्। एतावता ग्रन्थेन स्वार्थानुमाने त्र्यवयवत्वं परार्थानुमाने च [3]पञ्चावयवत्वमनुमानस्य दर्शितम्।

[पं०] धूमश्चात्रेत्युपनयरूपः। **स्मृत्यनन्तरभावित्वादिति** (कं. २०६.१४) स्मृतिर्व्याप्तिस्मरणम्। **नियामकत्वादिति** (कं. २०६.१५) यत्रैव हि लिङ्गं दृष्टं तत्रैव लिङ्गी प्रतीयते। **अप्रतिपादितस्येति** (कं. २०६.१६) अज्ञापितस्य। **तस्येति** (कं. २०६.१६) उपनयस्य।

[कु०] पक्षधर्मतानुसन्धानमवश्यंभावीति प्रतिपादनपरमित्यभिप्रायवान् परिहरति—**न हि नस्तेनेति** (कं. २०६.१३)। इह हि व्याप्तिस्मृतिसहितस्य पक्षधर्मतानुसन्धानस्यानुमितिसाधनत्वमित्यत्राविवादो वादिनाम्। [इ]तरत्र यदि व्याप्तिस्मृतेः पूर्वकालभावेऽपि पक्षधर्मतानुसन्धानं विनश्यदवस्थं यदि व्याप्तिस्मृत्या सहावतिष्ठेत तदा कीदृशो दोषः ? न च पूर्वकालभाविनो लिङ्गदर्शनस्य विषयनाशान्नाशः (ज्ञा[न]नाशान्नाशः) ज्ञानानां विषयनाश्यत्वानभ्युपगमात्। स्मृत्यानुमानेऽपि लिङ्गस्मृतिपूर्वकमेव व्याप्तिस्मरणमित्यविरोधः इति भावः। **लिङ्गदर्शनस्येति** (कं. २०६.१५) लिङ्गं हि व्याप्तिस्मृतेः पूर्वमेव दृश्यत इत्यभिप्रायः। **अवयवान्तर इति** (कं. २०६.१५) विप्रतिपन्नस्य प्रतिज्ञाहेतुपौर्वापर्यानुसन्धानबलेन सम्भवन्त्याः पक्षधर्मताप्रतीतेर्वादिना सन्दिह्यमानत्वात् परं प्रत्युपनयोऽपि पक्षधर्मतां प्रतिपादयन्नानर्थ इति भावः।

---

१ मनुस्मरणात्तदनन्तर—कं. १; कं. २; मनुस्मरणादग्न्यध्यवसाय भवति। अग्न्यनुमानं भवति—जे. १; जे. ३।
२ भविष्यतीति—अ, ब। ३ पञ्चावत्वमनुमानस्य—अ, ब।

## न्यायकन्दली

[180] अपि भोः! कोऽयमविनाभावो नाम? अव्यभिचारः। स कस्माद्भवति?

तादात्म्यतदुत्पत्तिभ्यामिति सौगताः। यादृच्छिकः सम्बन्धो यथैव भवति, न भवत्यपि, तथा च नियमहेतो[1]रभावः। तत्र यदि नाम सपक्षे दर्शनमदर्शनं च विपक्षे, तथाप्यव्यभिचारो न शक्यते [2]ज्ञातुम्, विपक्षवृत्तिशङ्काया अनिवारणात्। तदुत्पत्तिविनिश्चये तु शङ्का निवार्यते, कारणेन विना कार्यस्यात्मलाभासंभवात्। तदुत्पत्तिविनिश्चयोऽपि [3]कार्यहेतोः पञ्चप्रत्यक्षोपलम्भानुपलम्भसाधनः। कार्यस्योत्पत्तेः प्रागनुपलम्भः, कारणोपलम्भे सत्युपलम्भः, उपलब्धस्य पश्चात् कारणानुपलम्भादनुपलम्भ इति कार्यस्य द्वावनुप[4]लम्भावेक उपलम्भः, कारणस्य चोपलम्भानुपलम्भाविति। एवमुपलम्भानुपलम्भैः पञ्चभिः सत्येवाग्नौ धूमस्य भावोऽसत्यभाव इति निश्चीयते।

[टि०] [180] पञ्चकमेव स्फुटं विवृणोति **कार्यस्योत्पत्तेः** इति। उत्पत्तिपूर्वं धूमस्यानुपलम्भः–१, वह्नेस्तूपलम्भानुपलम्भौ धूमानुपलम्भकाले नोपयुक्ताविति नादृतौ। ततो वह्न्यादिकारणोपलम्भः–२, ततो धूमोपलम्भः–३, ततो वह्न्याद्यनुपलम्भः–४, ततो धूमानुपलम्भः–५ इति पञ्चकम्।

[पं०] [180] '[5]अपि भोः' (कं. २०६.१७) इत्यादि प्रश्नः। अव्यभिचार (कं. २०६.१७) इत्युत्तरम्। **स कस्माद्भवति** (कं. २०६.१७) इति प्रश्नः। उत्तरं **तादात्म्ये** (कं. २०६.१७) त्यादि। **यथैव भवति न भवत्यपि** [6](न) **तथेति** (कं. २०६.१८) भवति च न भवति चेत्यर्थः। [7]**कार्यहेतोरिति** (कं. २०६.२२) धूमस्य। **पञ्च[8]प्रत्यक्षानुपलम्भसाधन** इति (कं. २०६.२२) बौद्धमते हि धूमधीः १, वह्निविज्ञानम् २, धूमज्ञानम् ३, अधीस्तयोः प्रत्यक्षानुपलम्भाभ्यामिति पञ्चभिरन्वयः। इत्येवं द्वौ उपलम्भौ त्रयश्चानुपलम्भाः। प्रत्यक्षमुपलम्भाश्चेति एक एवार्थः। ततश्च प्रत्यक्षे द्वे, अनुपलम्भास्त्रयः समुदिताः पञ्च। पञ्च च ते प्रत्यक्षानुपलम्भाश्च पञ्चप्रत्यक्षानुपलम्भास्ते[सा]धनानि कारणानि यस्य स पञ्चप्रत्यक्षानुपलम्भसाधन। तथाहि **कार्यस्योत्पत्तेः प्रागनुपलम्भ** इति (कं. २०६.२३) धूमधीः ? **कारणोपलम्भे सति उपलम्भे** इति (कं. २०६.२३) वह्निज्ञानं २, धूमज्ञानं च ३, उपलब्धस्य पश्चात्कारणानुपलम्भादनुपलम्भ इति वह्न्यज्ञानम् ४, धूमाज्ञानं च ५। **कार्यस्येति** (कं. २०७.१) धूमस्य। **द्वावनुपलम्भाविति** (कं. २०७.१)

[कु०] [180] इह यत्र धूमस्तत्राग्निरग्न्यभावे तु न क्वचिद्धूम इति भाष्ये अन्वयव्यतिरेकाभ्यां प्रसिद्धिरित्युक्तम्। तत्र विप्रतिपद्यमाना[न्](श) सौगतानुत्थापयितुं पृच्छति **अपि भो** इति (कं. २०६.१७)। **स कस्मादिति** (कं. २०६.१७) निश्चित इति शेषः। उच्छीयति **तादात्म्येति** (कं. २०६.१७) **यादृच्छिकः सम्बन्ध** इति (कं. २०६.१८) काकतालीयं साहचर्यमित्यर्थः। न त्वस्ति नियमहेतुरन्वयव्यतिरेकदर्शनमित्यत आह **तत्र यदीति** (कं. २०६.१९)। ननु त्वन्मतेऽपि व्यभिचारशङ्का तदवस्थेत्यत आह **तदुत्पत्तीति** (कं. २०६.२१)। ननु कार्यकारणभावोऽप्यन्वयव्यतिरेकाभ्यामृते कुत इत्यत आह–तदुत्पत्ती[ति] (कं. २०६.२२)। **कारणस्य चोपलम्भानुपलम्भाविति** (कं. २०७.१)

---

१ रभावात्–जे. १, जे. २, जे. ३। २ प्रत्येतुं–जे. १, जे. २। ३ कार्यहेतुः–कं. १, कं. २। ४ एकश्चोपलम्भः –जे. ३। ५ असि भा इति अ पुस्तके तत्तु न शुद्धम्–सं। ६ न कं. १ पुस्तके नास्ति स भागोऽशुद्धः। यथैव भवति, भवत्यपि न तथेति – ब। ७ कार्यहेतुः – कं. १। ८ प्रत्यक्षोपलम्भानुपलम्भसाधन – कं. १।

न्यायकन्दली

**कार्यस्यैतदेव कार्यत्वं यत् तस्मिन् सत्येव भावोऽसत्यभाव इति तादात्म्यप्रतीत्याप्य-विनाभावो निश्चीयते। [1]भावस्य स्वभावव्यभिचारे, निःस्वभावत्वप्रसङ्गात्।**

**तादात्म्यनिश्चयो विपक्षे [2]बाधकप्रमाणवृत्त्या सिद्धयति। अप्रवृत्ते तु बाधके शतशः सहभावदर्शनेऽपि कदाचिदेतद्विपक्षे स्यादिति शङ्कायाः को [3]निवारयिता?**

**तदुक्तम्—**

**कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।**
**अविनाभावनियमोऽदर्शनान्न [4]न दर्शनात्॥ इति।**

**कार्यकारण[5]भावान्नियामकात् स्वभावाद्वा नियामकादविना[6]भावस्य नियमः, न सपक्षे दर्शनाद्विपक्षे चादर्शनादिति।**

[**टि०**] **तादात्म्यनिश्रयो**[7]**ऽपि** इति :—वृक्षोत्पादकसामग्र्यन्तर्भूता शिंशपोत्पादिका सामग्री [8]शिंशपाजनिका, बीजं हि [9]सामान्यवृक्षोत्पादकसामग्रीं क्षितिसलिलादिकमपेक्ष्य स्वकार्यं जनयति। तस्माद् वृक्षोत्पादकसामग्रीरूप [10][व्यापकनिवृत्त्या शिंशपोत्पादकसामग्रीरूप] व्याप्यनिवृत्तिरिति बाधकं प्रमाणम्। **पार्थिवत्वादेः** इति न हि यथा धूमो वह्निगमक एवं

[**पं०**] धूमादी(धी)रधस्तयोः। **एक उपलम्भ** इति (कं. २०७.१) धूमज्ञानम्। [11]**कारणस्योपलम्भानुपलम्भादिति** (कं. २०७.१) वह्निज्ञानम् अधीस्तयोः।

**तादात्म्यनिश्रयो विपक्षे** [12]**बाधकप्रमाणप्रवृत्त्या सिध्यतीति** (कं. २०७.५) वृक्षोत्पादकसामग्र्यन्तर्भूता शिंशपोत्पादिका सामग्री। शिंशपाबीजं हि सामान्यं वृक्षोत्पादिकासामग्रीं क्षितिसलिलादिकामपेक्ष्य स्वकार्यं जनयति। तस्माद् वृक्षोत्पादकसामग्रीरूपव्यापकनिवृत्या शिंशपोत्पादकसामग्रीरूपव्याप्यनिवृत्तिरिति बाधकं प्रमाणम्। **बाधके** इति (कं. २०७.६) विपक्षे विषये। **नियामकादिति** (कं. २०७.८–१०) विपर्यये साधनप्रवृत्तिनिवारकात्।

[**कु०**] धूमोत्पत्तौ नियमेन वह्नेरुपलम्भः। वह्निमन्तरेण धूमस्यानुपलम्भ इति। **सत्येवेति** (कं. २०७.२) वह्निर्धूमस्य कारणमिति निश्चीयते इत्यर्थः। नन्वेवं पञ्चभिरपि प्रत्यक्षैर्नियतस्य वह्नेः कारणत्वं निश्चीयतां कारणान्तराभावस्तु कुतो निश्चेयः यतः शङ्का निवर्तेत इत्यत आह [13]**कार्यस्यापीति** (कं. २०७.३)। यथा नियतस्य वह्नेः पञ्चभिः प्रत्यक्षैः कारणत्वं गम्यते तथा नियतावधिमतस्तदेककार्यत्वमित्यर्थः। **विपक्षे** [14]**बाधकेति** (कं. २०७.५) यदि शिंशपा वृक्षात्मिका न स्यात्तत्तत्सामग्रीमतिपतन्ती तदन्तर्भूतायाः स्वसामग्र्या अतिपातेन स्वयमेव न स्यादिति बाधकं प्रमाणं सम्भवत्येव। ततस्तादात्म्यनिश्चयो भवत्येव। तदभावे हि संशय इत्यर्थः। नन्वेवं विपक्षे बाधकप्रवृत्तावन्वय-व्यतिरेकाभ्यामप्यविनाभावो निश्चेष्यते इत्यत आह [15]**दर्शने हीति** (कं. २०७.६) न हि तत्र तादात्म्यतदुत्पत्तिवत्किञ्चि-न्निबन्धमेकमस्ति येन शङ्का निवर्त्स्यतीति भावः।

---

१ भावस्य न स्वभावव्यभिचारः—कं. १; कं. २। २ बाधकस्य प्रमाणप्रवृत्त्या—कं. १; कं. २। ३ निवारयितुं प्रभवति—कं. १; कं. २। ४ तु—कं. १; कं. २। ५ भावाद्वा—जे. १, जे. २। ६ भावनियमः—कं. १, कं. २। ७ निश्रयः मु. जे. १, जे. २, जे. ३। ८ शिंशिपा—अ, ब, क। ९ वृक्षोत्पादकसामग्रीं—क; वृक्षोत्पादकसामग्री—अ, ब। १० [ ] एतच्चिह्नान्तर्गतः पाठः अपुस्तके नास्ति। ११ कारणस्य च—कं. १। १२ बाधकस्य—कं. १। १३ कार्यस्य—कं. 'अपि' न विद्यते। १४ बाधकस्य—कं। १५ सहभावदर्शने—कं।

न्यायकन्दली

**अत्रोच्यते– किं यत्र तादात्म्यतदुत्पत्ती तत्राव्यभिचारः ? किं वा यत्राव्यभिचारस्तत्र तादात्म्यतदुत्पत्ती ? न तावदाद्यः कल्पः, सत्यपि तदुत्पादे धूमधर्मस्य पार्थिवत्वादेरग्निव्यभिचारात्। सत्यपि तादात्म्ये वृक्षत्वस्य [1]शिंशपाव्यभिचारात्। अथ यत्राव्यभिचारस्तत्र तादात्म्यतदुत्पत्ती, तर्ह्यव्य[2]भिचारे सिद्धे तयोर्गम[3]कत्वम्। एवं चेत्, अव्यभिचार एवास्तु गमकः, किं तादात्म्यतदुत्पत्तिभ्याम् ? कार्यमपि हि न कार्यमित्येव गमयतीति, नापि स्वभावः स्वभाव इति, किन्तु; तदव्यभिचारीति, अव्यभिचार एव गमकत्वे कारणं न तादात्म्यतदुत्पत्ती, व्यभिचारात्। न चैवमुपपत्तिमारोहति धूमो [4]वह्निना क्रियते न पार्थिवत्वादयस्तद्धर्मा इति, वस्तुनो निर्भागत्वात्। नाप्येतदुपलब्धं शिंशपा वृक्षात्मिका न वृक्षः शिंशपात्मकः, धवखदिरादिसाधारणत्वादिति, तयोरभेदात्।**

[**टि०**] तदव्यतिरिक्तं पार्थिवत्वमपि तस्य घटादावपि सत्त्वात्। वह्निजन्यस्य भस्मनोऽपि च वह्न्यगमकत्वात् कार्यहेतो[5]र्व्यभिचारिता ज्ञेया। [6]**यदि च धवादिं साधारणी** इति :– निर्भागत्वं धर्मधर्मिणोर्बौद्धाभिप्रायेणोक्तम्। ननु यद् वृक्षत्वं शिंशपात्मकं तं शिंशपां न व्यभिचरत्येव ? नैवम्, तत्र व्याप्तेरग्रहणात्। **तस्या भेदाश्रयत्वाद्** इति तस्या गम्यगमकभावव्यवस्थायाः।

[**पं०**] **अत्रोच्यते** इति (कं. २०७.११) श्रीधरेण। **तदुत्पाद** इति (कं. २०७.१३) तस्मादग्नेरुत्पादे। **धूमधर्मस्य पार्थिवत्वादेरग्निव्यभिचारादिति** (कं. २०७.१३) वैशेषिकमते खलु अग्नेरुत्पन्नो धूमः पार्थिवोऽस्तु न पार्थिवः किन्तु तैजसः। ततश्चायमर्थः हे बौद्ध यदि तदुत्पत्तिसम्बन्धेन सद्धेतोरव्यभिचारित्वं स्यात् तदा यथा धूमोऽग्निं गमयति तथा धूमाव्यतिरिक्तं पार्थिवत्वमपि गमयेत्। न चैवं दृष्टम्। न हि यथा धूमो वह्निं गमयति एवं तदव्यतिरिक्तं पार्थिवत्वमपि तस्य घटादावपि सत्त्वात्। वह्निजन्यस्य भस्मनोऽपि वह्न्यगमकत्वात् कार्यहेतोर्व्यभिचारिता उपपाद्या। **शिंशपात्व[7]व्यभिचारात्** (कं. २०७.१४) इति – आम्रत्वादेरपि घटनात्। [8]**गमकाङ्गत्वमिति** (कं. २०७.१५)

[**कु०**] **यत्रेति** (कं. २०७.११) इह कार्यकारणभावात्तावत् तादात्म्याद्वा। अविनाभावनियम इति वाक्ये तदुत्पत्तेस्तादात्म्यस्य च गमकत्वमविनाभावस्य गम्यत्वं प्रतीयते। (अ) तत्र यच्छब्देन प्रथमनिर्देशो गमकस्यैव [त]च्छब्देन चरमनिर्देशो गम्यस्यैवेति। द्वितीयविकल्पो नोपपद्यते इति न चोदनीयं, यस्मादियं व्यवस्थाऽन्वयव्यतिरेकावसेयाऽविनाभाववादिनामस्माकमेव शोभते न परेषाम्। ते हि तादात्म्यतदुत्पत्तिस्वभावतयैवाविनाभावं मन्यन्ते; तयोरविनाभावकार्यत्वायोगा[त्]। ततश्च यथाऽविनाभावतायाः स्वभाव एवं ते अपि तस्य स्वभाव एवेति तादात्म्यस्य गमकाङ्गत्वे परस्परं गम्यगमकभावस्य वर्जनीयत्वात्। **धूमधर्मस्येति** (कं. २०७.१३) परमते धर्मधर्मिणोरभेदाद्यदा धूमस्य वह्न्याद्यर्थत्वं तद्धर्मस्यापि पार्थिवत्वस्यापि तत्कार्यत्वमिति वक्ष्यति। [त]तश्च तस्य वह्निव्यभिचारादविनाभावो

---

१ विशेषाद्–कं. १, कं. २; शिंशपात्व–जे. १। २ भिचारसत्त्वे–कं. १, कं. २। ३ गमकाङ्गत्वम्–जे. २, जे. ३। ४ वह्निकृतः–जे. २। ५ व्यभिचरितो ज्ञेयो–अ, ब। ६ यदि धवादि मु; यदि च धवादि–जे. ३; यदि च धवखदिरादि–जे. १, जे. २। ७ व्यभिचारात्–कं. १; शिंशपाव्यभिचारात्–पा. ३, पु। ८ गमकत्वम्–कं. १।

## न्यायकन्दली

[1]यदि च धवादिसाधारणी वृक्षता न शिंशपात्वम्, तदा नानयोरे[2]कत्वं स्वभाव-भेदस्य भेदलक्षणत्वात्। अभेदे तु यथा वृक्षत्वं सर्ववृक्षसाधारणं तथा शिंशपात्वमपि स्यात्। न च तादात्म्ये गम्यगमकभावे व्यवस्था युक्ता, तस्याभेदाश्रयत्वात्। यदि शिंशपात्वे गृह्यमाणे वृक्षत्वमगृहीतम्, क्व तादात्म्यम्? गृहीतं चेत्? (तत्) क्वानुमानम्?

[टि०] तस्माद् दृष्टस्य इति:– भावस्य वृक्षादेः पदार्थस्य गुणो धर्मः [3]शिंशपात्वादिः कल्पना[4]कृतस्यैव धर्मधर्मीभावस्य बौद्धैरभ्युपगमात्। प्रमाणैरनुमानैरित्यर्थः।

[5]यदि परम् इति गृहीतेष्वपि [6]धर्मेषु यत्र विकल्पो जातस्तत्र प्रमाणतासद्भावाद् अभेदे गम्यगमकभावो न स्यादिति पूर्वमुक्तं तत्परिहरति गम्यगमकभावश्च इति तस्य स्वलक्षणस्य [7]सपक्षेऽन्वयाभावात्।

[पं०] हेत्वङ्गत्वम्। तदव्यभिचारीति (कं. २०७.१८) साध्याव्यभिचारी ([8]इति साध्याव्यभिचारी)। न चैवमिति (कं. २०७.१९) अत्र एवमिति धूमो वह्निना (कं. २०७.१९) इत्यादिनाऽनन्तरमेव वक्ष्यमाणं वाक्यम्। वस्तुनो निर्भाग-त्वादिति (कं. २०७.२०) हे बौद्ध तव मते। बौद्धमाशङ्कते नाप्येतदि (कं. २०७.२०) त्यादि। तयोरभेदादिति (कं. २०७.२१) अभेदे च सति उभयोरप्युभयात्मकत्वमेव।

वृक्षतेति (कं. २०७.२२) वृक्षतैव। न च तादात्म्ये [9]गमकताव्यवस्था युक्तेति (कं. २०७.२४) [10][सम्बन्धस्य द्विष्ठत्वात्, तादात्म्ये च द्वयोरसम्भवात्। [11]तस्या इति (कं. २०७.२४) गम्यगमकभावव्यवस्थायाः।] वृक्षत्वमगृहीत (कं. २०७.२५)मित्यस्मात्पुरस्तद्धीत्यध्याहार्यम्। क्वानुमानमिति (कं. २०७.२५) अनुमानं हि वृक्षत्वग्रहणाय प्रवर्तते यथा वृक्षोऽयं शिंशपात्वादिति। शिंशपात्वे गृह्यमाणे च वृक्षत्वे गृहीते क्वानुमानमस्तीत्याशयः।

[कु०] न तदुत्पत्तिस्वभाव इति भावः। सत्यपीति (कं. २०७.१४) नह्यस्ति सम्भवः शिंशपा वृक्षात्मिका वृक्षो न शिंशपात्मक इति च, वक्ष्यति तथाऽतश्च वृक्षस्य शिंशपाव्यभिचारे अविनाभावस्तादात्म्यस्वभावोऽपि न भवतीत्यर्थः। ननु नाऽव्यभिचारमात्रं गम[क]ताङ्गं किन्तु तन्निरूपिते तादात्म्यतदुत्पत्ती एवेत्यत आह कार्यमपि हीति (कं. २०७.१६)। ते हि न केवलं स्वसिद्ध्यर्थम[व्य]भिचारमपेक्षते किन्तु साध्यसाधनार्थमपि। ततश्च तेनैव साध्यसिद्धौ सम्भवत्यां तदनुसरणं व्यर्थमित्यर्थः। व्यभिचारादिति (कं. २०७.१८) सतीत्या? मपि ताभ्यामनुमानानुदयादित्यर्थः।

तदा नानयोरिति (कं. २०७.२२) साधारण्यासाधारण्याभ्यां भेदे तादात्म्यस्य दूरोत्सारणाच्छिंशपावृक्षानुमानमपि न सम्भवतीत्यर्थः। स्वभावभेदस्येति (कं. २०७.२२) अतादात्म्यस्य व्यावर्तकधर्मलक्षणत्वादित्यर्थः। किञ्चेत्याह– न चेति (कं. २०७.२४)। अनुमाने च न तादात्म्यं तादात्म्ये च नानुमानमिति प्रदर्शयन्नुक्तं विवृणोति यदीति (कं. २०७.२५)।

---

१ यदि धवादि–कं. १, कं. २; यदि च धवखादिरादि–जे. १, जे. २। २ ऐक्यं–जे. १, जे. २। ३ शिंशपत्वादि – अ; शिशपात्वादि – ब। ४ कृकृतस्य – अ, ब। ५ यदेवम् – मु। ६ धर्म्मिषु – अ, ब। ७ स्वपक्षे – अ, ब। ८ पुनरावृत्तं भाति। ९ गम्यगमकाभावे व्यवस्था युक्ता – कं. १, ब। १० [ ] एतच्चिह्नान्तर्गतो पाठो ब पुस्तके नास्ति। ११ तस्य – कं. १।

न्यायकन्दली

अथोच्यते–यथावस्थितो धर्मी शिंशपात्वं वृक्षत्वं च त्रयमेकात्मकमेव, तत्र धर्मिणि गृह्यमाणे शिंशपात्ववत् वृक्षत्वमपि गृहीतमेव। यथोक्तम्–

तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः।
भागः कोऽन्यो न दृष्टः स्याद्यः प्रमाणैः परीक्ष्यते ॥ इति।

[1]यदि परं शिंशपाविकल्पो जातो न वृक्षविकल्पः, स वृक्षशब्दस्मृत्यभावापराधात् शिंशपाशब्दसंस्कारप्रबोधजन्मना शिंशपाविकल्पेन चाशिंशपाव्यावृत्तिपर्यवसितेन नावृक्षव्यावृत्तिरुपनीयते, सर्वविकल्पानां पर्यायत्वप्रसङ्गात्। गम्यगमक[2]भावश्च व्यावृत्त्यो[3]रनयोर्न वस्तुनः तस्यान्वयाभावात्। अवृक्षव्यावृत्त्यशिंशपाव्यावृत्ती च परस्परं भिन्ने, व्यावर्त्यभेदात्। अतो यथोक्तदोषानुपपत्तिरिति। अहो पूर्वापरानुसन्धाने परं कौशलं पण्डितानाम्?

[टि०] अवृक्षव्यावृत्तिः इति अवृक्षव्यावृत्त्या लोष्टादयो व्यावर्तनीयाः अशिंशपाव्यावृत्त्या च धवादय इति व्यावर्त्ययोर्भेदः। ननु यदि [4]सपक्षे वृक्षत्वं शिंशपात्वं चाभिन्नमुपलब्धं तर्हि पक्षे किं साध्यं तस्य प्रतीतत्वात्? नैवम्, यस्तावत्सर्वत्रसपक्षे [5]उच्चैः शिंशपा दृष्टवान् तत उच्चत्वं वृक्षशब्दप्रवृत्तिनिमित्तं जानाति न शिंशपात्वं ततो ह्रस्वां [6]शिंशपां दृष्ट्वा [7]वृक्षत्वं न व्यवहरति [8]तं प्रति शिंशपात्वाद् वृक्षव्यवहारः [9]साध्यते इति सिद्धान्तवाद्याह [10]अहो पूर्वपरेति।

[पं०] अथोच्यते इति (कं. २०७.२६) हे बौद्ध त्वया। धर्मीति (कं. २०७.२६) योऽयमिति शब्देन व्यपदिश्यते। भावस्येति (कं. २०८.३) धर्मिणो वृक्षादेः। गुण इति (कं. २०८.३) धर्मः शिंशपात्वादिः। भागः कोऽन्यो न दृष्टः स्यादिति (कं. २०८.४) [11]कल्पनात् तत्तस्यैव धर्मधर्मिभावस्य बौद्धैरभ्युपगमात्। प्रमाणैरिति (कं. २०८.४) अनुमानैः।

[12]यदि परमिति (कं. २०८.५) किन्तु। शिंशपाविकल्पो जातो न वृक्षविकल्प इति (कं. २०८.५) गृहीतेष्वपि हि धर्मेषु यत्र विकल्पो जातस्तत्र प्रमाणतासद्भावः। शिंशपाशब्दसंस्कारप्रबोधजन्मनेति (कं २०८.६) विकल्पा शब्दयोनय इति वचनात्। पर्यायत्वप्रसङ्गादिति (कं. २०८.७) यदि हि शिंशपाविकल्पेन वृक्षविकल्पोऽपि गृह्यते तदा सर्वविकल्पानां पर्यायत्वं प्रसक्तं यथा घटविकल्पने कुटकुम्भकलशादिविकल्पाः पर्यायत्वाद् गृह्यन्ते। अभेदे गम्यगमकभावो न स्यादिति यत्पूर्वमुक्तं तत्परिहरति गम्यगमकेत्यादिना (कं. २०८.८)। तस्येति (कं. २०८.८) स्वलक्षणस्य। अन्वयाभावादिति (कं. २०८.८) क्षणिकत्वेन सपक्षेऽन्वयाभावात्। व्यावर्त्यभेदादिति (कं. २०८.९) अवृक्षाशिंशपा-

[कु०] पारमार्थिकधर्म्यभेदाद्व्यावृत्त्योस्तादात्म्यं, विकल्पगोचरायास्तु भेदाद् गम्यगमकभाव इत्युभयमुपपादयितुमाशङ्कते अथेति (कं. २०७.२६)। भावस्य धर्मिणो गुणः धर्मः परीक्षते भेदेन गृह्यते। अन्यथा व्यावृत्त्यपर्यवसाने अन्वयाभावादिति क्षणिकत्वादित्यर्थः।

किं पूर्वं किमपरमित्यत आह तादात्म्यमिति (कं. २०८.११)। इन्द्रजालं पूर्वापरवाक्यसन्दर्भेण मोहनम्। वृक्ष[13]शिंशपायास्तादात्म्यादिति (कं. २०८.१२) व्यावृत्तिद्वयाधारस्य धर्मिणोर्भेदाभावा[द]भेदादित्यर्थः। तदात्म-

१ यदेवं–कं. १; कं. २। २ भावस्तु–जे. १; जे. २। ३ रेव नानयो–कं. १; कं. २। ४ सपक्षत्वं शिंशपात्वं–अ, ब। ५ सपक्षे शिंशपा दृष्ट्वान्–अ। ६ शंशपा–अ। ७ वृक्षत्वेन–अ, ब, क। ८ त्वं–अ, ब। ९ साध्य इति–ब। १० अहो पूर्वापर–अ। ११ कल्पनाकृतस्यैव–ब। १२ यदेदं–कं. १। १३ °शिंशपयोस्तादात्म्यम्–कं।

## न्यायकन्दली

तादात्म्यमनुमानबीजम्, साध्यसाधनभूतयोर्व्यावृत्त्योः परस्परं भेद इति किमिदमिन्द्रजालम् ? वृक्षशिंशपयोस्तादात्म्यं तदात्मतया [1]चाध्यवस्थितयोरवृक्षव्यावृत्त्यशिंशपाव्यावृत्त्योःसत्यपि भेदे यथाध्यवसायं तादात्म्यमिति चेत् ? सिद्धे तादात्म्ये सत्यशिंशपाव्यावृत्त्या धर्मिण्यवृक्षव्यावृत्तिरध्यवसेया, तत्राध्यवसि[2]तायां चावृक्षव्यावृत्तौ यथाध्यवसायं तादात्म्यसिद्धिरित्यन्योन्याश्रयदोषः । व्याप्तिग्रहणवेलायामेकात्मतयाध्यवसितयोर्व्यावृत्त्योस्ता[3]दात्म्यसिद्धमिति चेत् ? तथा[4]प्यनयोरभेदः काल्पनिकः । यद्यनुमानं कल्पनासमारोपेणापि [5]प्रवर्त्तेत, न कश्चिदहेतुर्नाम । प्रमेयत्वानित्यत्वयोरप्येकात्मतयाध्यवसितयोर्यथाध्यवसायं तादात्म्यसंभवात् । विपक्षव्यावृत्त्यभावात् प्रमेयत्वस्यानित्यत्वेन सह तादात्म्याभाव इति चेत् ? सत्यम्, वास्तवं तादात्म्यं नास्ति, कल्पनासमारोपितं [6]तावदस्त्येव तदेवानुमानोदयबान्धवं समर्थितवन्तो यूयमिति विपक्षादव्यावृत्तिरसत्समा ।

[टि०] **बौद्धमाशङ्कते** [7]**वृक्षशिंशपयोः** इति :– व्यावृत्त्योर्भेदेऽपि तदाधारयोर्वृक्षशिंशपयोरभेदाद् व्यावृत्त्योरप्यभेदा[8]ध्यवसायः कल्प्यत इति भावः । **बौद्धमाशङ्कते–व्याप्तिग्रहणवेलायाम्** इति :– [9]दृष्टान्ते एव तादात्म्यं सिद्धम्, न तु पक्षे इति नेतरेतराश्रयः [10]तथापि इति :–भिन्नयोर्व्यावृत्त्योरभिन्नाभ्यां वृक्षत्वशिंशपात्वाभ्यां तादात्म्याध्यवसायादभेदस्य

[पं०] रूपयाव्यावर्तयोर्भेदात् । अवृक्षव्यावृत्ता हि लोष्टादयो व्यावर्तनीया, अशिंशाव्यावृत्त्या च धवादयो व्यावर्तनीयाः । श्रीधरः प्राह अहो इत्यादि (कं. २०८.१०) । **बौद्धमुपालभते तादात्म्यमित्यादि** (कं. २०८.११)। **वृक्षशिंशपयोरित्यादि** (कं. २०८.१२) व्यावृत्त्योर्भेदेऽपि तदाधारयोर्वृक्षशिंशपयोरभेदात् । व्यावृत्त्योरपि भेदोऽध्यवसीयते इति पिण्डार्थः । **यथाध्यवसायं तादात्म्यमिति** (कं. २०८.१३) भेदेऽपि तदात्मकत्वाध्यवसायानुरोधेन तादात्म्यम् । **सिद्धे तादात्म्ये** इति (कं. २०८.१४) व्यावृत्त्याः । **अशिंशपाव्यावृत्त्येति** (कं. २०८.१४) हेतुभूतया । **तत्रेति** (कं. २०८.१५) धर्मिणोः । **अध्यवसितायामिति** (कं. २०८.१५) विकल्पितायाम् । **व्याप्तिग्रहणे** (क. २०८.१६)त्यादि । व्याप्तिरिति यो यः शिंशपा स स वृक्षः । अत्र च गद्ये दृष्टान्ते एव तादात्म्यं सिद्धम् । न तु पक्षे इति नेतराश्रय इति बौद्धाशयः । काल्पनिकत्वमिति भिन्नयोर्व्यावृत्त्योरभिन्नाभ्यां वृक्षत्वशिंशपात्वाभ्यां तादात्म्याध्यवसायादभेदस्य काल्पनिकत्वम् ।

[कु०] **तयो**[11](र)**ध्यवसितयोरिति** (कं. २०८ १२) तद्भेदाग्रहात्तत्त्वेन गृहीतयोरित्यर्थः । **सिद्ध इति** (कं. २०८.१४) धर्मिभेदाग्रहात्तत्त्वेनाध्यवसायोऽनुमानमेवं तदपेक्षं च तादात्म्यमित्यन्योन्याश्रयदोष इत्यर्थः । **व्याप्तिग्रहणवेलायामिति** (कं. २०८.१६) ईदृशस्य तादात्म्यस्य तदात्म्यतयाऽध्यवसायस्य च बीजाङ्कुरवदनादित्वादन्योन्याश्रयत्वं न दोषायेति शङ्कार्थः । [12]**तथापीति** (कं २०८.१७) व्यावृत्त्योर्धर्म्यात्मतयाध्यवसायकल्पनात्तत्सिद्धयोरभेदस्तादात्म्यं काल्पनिकमित्यर्थः । **प्रमेयानित्यत्वयोरिति** (कं. २०८.१८) ननु सर्वं क्षणिकमिति वदतः सौगतस्य मानिष्टमेतदिति

---

१ च व्यवस्थितयो–कं. १; कं. २ । २ तायामवृक्ष–कं. १; कं. २ । ३ तादात्म्यसिद्धिरिति चेत्–कं. १; कं. २ ४ तथाध्यवसितयो – कं. १; कं. २ । ५ प्रवर्तते – जे. १, जे. २, जे. ३ । ६ त्वस्त्येव – जे. १; जे. २ । ७ शिंपयोः – अ । ८ ध्यवसायः कल्पते – अ; ध्यवसीयते कल्प्यते – ह । ९ दृष्टान्त – अ, ब, क । १० तथा – मु. तथापि – जे. १, जे. २, जे. ३ । ११ व्यवस्थितयो – कं । १२ तथा – कं. 'अपि' नास्ति ।

## न्यायकन्दली

अपि च [1]तादात्म्यस्य तदुत्पादस्य च यस्य प्रतीतिर्विपक्षे हेत्वभावप्रतीत्या, तदभावप्रतीतिरपि दृश्यानुपलब्धेः, अनुपलब्धिश्चानु[2]मानान्तर्भूतत्वात् स्वसाध्येन विपक्षे हेत्वभावेन सह तादात्म्यप्रतीत्या तदुत्पादप्रतीत्या वा प्रवर्तते, तस्या अपि स्वसाध्येन तादात्म्यतदुत्पादनिश्चयो विपक्षे दृश्यभावप्रतीत्या, तदभावप्रतीतिश्चानुपलब्ध्यन्तरसापेक्षा, यावान् प्रतिषेधः स [3]सर्वोऽप्यनुपलब्धिविषय इत्यभ्युपगमात् । ततश्चानवस्थापाताद् व्यतिरेकासिद्धौ तादात्म्यतदुत्पादासिद्धेर्न स्वभावः कार्यं वा हेतुः । किञ्च तादात्म्यत[4]दुत्पत्त्योरभावेऽपि कृत्तिकोदयरोहि[5]ण्यस्तङ्गमनयोर्गम्यगमकभावः प्रतीयते । तस्मात् कार्यकारणभावाद्वा नियमः स्वभावाद्वेत्यनालोचिताभिधानम् ।

[टि०] काल्पनिकत्वम् । तदेवानुमानोदयेति कल्पना[6]समारोपितं तादात्म्यमेवानुमानकारणं समर्थितं [7]बौद्धैरित्यतः कारणात्तदेव [8]मुख्यम् । विपक्षव्यावृत्तिस्तु सत्यप्यसत्कल्पैवेति । ततः शब्दोऽनित्यः प्रमेयत्वाद् इत्यपि साधनं स्यात् । अथ बौद्धं प्रत्यनवस्थामापादयिष्यन्नाह अपि च तादात्म्य[9]स्य इति । तदभावेति:– बौद्धमते हि दृश्यानुपलब्धेरेव सर्वस्याप्यभावस्य निश्चयो न तु प्रत्यक्षादिति ।

[पं०] अध्यवसा[यो] हि तव, स ते काल्पनिकः । काल्पनिक (कं. २०८.१७) इत्यतः पुरः 'ततश्च' इत्याध्याहारः । [10]प्रवर्तते (कं. २०८.१८) इत्यस्मात्पुरः तदेत्यध्याहार्यम् । तदेवेति (कं. २०८.२१) कल्पनासमारोपितम् । [11]विपक्षाद्व्यावृत्तिरसत्समेति (कं. २०८.२२) कल्पनासु सत्यप्यसन्कल्पैवेति । ततश्च शब्दोऽनित्यः प्रमेयत्वादित्यपि साधने स्यादित्यर्थः ।

अथ बौद्धं प्रत्यनवस्थां साधयिष्यन्नाह अपि चेत्यादिना (कं. २०८.२२) । तदभावप्रतीतिरिति (कं. २०८.२३) हेत्वभावप्रतीतिः । दृश्यानुपलब्धेरिति (कं. २०८.२३) उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः । बौद्धमते हि दृश्यानुपलब्धेरेव सर्वस्याभावस्य निश्चयो न तु प्रत्यक्षात् । तस्या इति (कं. २०८.२५) अनुपलब्धेः । स्वसाध्येनेति (कं. २०८.२५) विपक्षे हेत्वभावप्रतीतिलक्षणेन । [12]कृत्तिकोदयरोहिण्यासत्योरिति (कं. २०९.४) कृत्तिकोदयरोहिण्युदयप्रत्यासत्योः ।

[कु०] चेत्, न, तस्यापि कल्पनादोषविषयतया प्रमेयस्यासतो नित्यत्वात् । इतरथा असञ्जाता क्षणिका इति सत्त्वस्य ततो व्यतिरेकनिरूपणायोगात् । असत्समा सर्वत्र सुलभत्वादनस्थेया । एवं तादात्म्यतदुत्पत्ती प्रत्येकं दूषयित्वा समस्य दूषयति अपि चेति (कं. २०८.२२) । अनुपलब्धिश्चेति (कं. २०८.२४) 'यन्नोपलभ्यते तन्नास्ति इदं च नोपलभ्यते' इत्यनुमानेन प्राक्तनहेतोर्विपक्षाद् व्यावृत्तिसिद्धिः । एवमस्यापि हेतोरनुपलब्ध्यन्तरेण विपक्षाद्व्यावृत्तिसिद्धिरित्यनवस्था परेषाम् । अस्माकं तु विपक्षे जलादौ धूमादिलिङ्गाभावस्य प्रत्यक्षेणैव सिद्धे नानवस्थेति भावः । पूर्वं यन्नाव्यभिचार-स्तन्न व) तादात्म्यतदुत्पत्ती इति द्वितीयः पक्षः । सिद्धेनाभ्यां [व्य]भिचारेण तादात्म्यानुपपत्तिरिति । तदुत्पत्तिसाधने प्रयोजनाभावेन दूषितः । सम्प्रति तेन तेन साध्ये व्यभिचारादित्याह किञ्चेति (कं. २०९.४) । न च यदव्यभिचारिता [त]त्कारणमिति व्याप्त्या तदुत्पत्तिरेव न स्यात्, कार्यकारणभावस्य भेदाधिष्ठानत्वात्तादात्म्योऽनुपपत्तिरिति चेत् कृत्तिकोदयो भविष्यतो रोहिण्युदयस्य कार्यं इत्यपि न सम्भवत्येव तत्कथं तयोरपि कार्यकारणभावः स्यात्? पूर्वकालभाविन एव कारणत्वात् उत्तरकालभाविन एव च कार्यत्वात् । किञ्च अविनाभावस्य तादात्म्यतदुत्पत्तिलक्षणत्वे प्रत्येकं भागासिद्धिः, समुदायस्य च स्वरूपासिद्धिरित्यपि द्रष्टव्यम् ।

---

१ तादात्म्ये तदुत्पादे – कं. १, कं. २ । २ मानभूतत्वात् – कं १, कं २ । ३ सर्वोऽनु – जे. १, जे. २, जे. ३ । ४ तदुत्पादयो – जे. ३ । ५ ण्यासत्योः – जे. १, जे. २; ण्यासन्त्योः – जे. ३ । ६ समारोपितं – अ, ब, क । ७ बौद्ध – अ । ८ मु – अ । ९ तादात्म्ये मु. तादात्म्यस्य – जे. १, जे. २, जे. ३ । १० प्रवर्तेत – कं. १ । ११ विपक्षव्यावृत्तिसित्सनेति – पं. अ, ब । १२ कृत्तिकोदयरोहिण्यास्तङ्गमनयोः – कं. १ ।

## न्यायकन्दली

[181] स्वभावेन हि कस्यचित् केनचित् सह सम्बन्धो नियतो निरुपाधिकत्वात्, उपाधिकृतो हि सम्बन्धः [1]तदपगमान् निवर्तते न स्वाभाविकः। यदि धूमस्योपाधिकृतो वह्निसम्बन्धः? उपाधय उपलब्धाः स्युः, शिष्याचार्ययोरिव प्रत्यासत्तावध्ययनम्। नहि वह्निधूमयोरसकृदुपलभ्यमानयोस्तदुपाधीनामनुपलम्भे किञ्चिद् बीजमस्ति। न चोपलभ्यमानस्य नियमेनानुपलभ्या भवन्त्युपाधयः, ते हि यदि स्वरूपमात्रानुबन्धिनस्तथाप्यव्यभिचारसिद्धिः, तत्कृतस्यापि सम्बन्धस्य यावद्द्रव्यभावित्वात्। [2]अथागन्तुकाः? तत्कारणान्यपि प्रतीयेरन्। उपाधयस्तत्कारणानि च सर्वाण्यतीन्द्रियाणीति [3]गुर्वीयं

[टि०] [181] किञ्चिद् [4]बीजम् इति असत्त्वमेवानुपलम्भबीजमित्यर्थः। [5]ते हि यदि इति यदि ते उपाधयो धूमस्य स्वरूपमात्रप्रतिबद्धा धूमस्वरूपेणाविनाभूतास्तर्हि न तैर्व्यभिचारः। यदि हि धूमादन्यत्रापि तेषूपाधिषु सत्सु [6]तत्रापि

[पं०] [181] अनौपाधिकः सम्बन्धो व्याप्तिरित्यमृष्यमाणं सौगतं वैशेषिको ब्रूते **स्वभावेन हीत्यादि** (कं. २०९.६)। **उपाधिकृत** इति (कं. २०९.७) कारणकृतः। [7]**तदपगमनादिति** (कं. २०९.७) उपाधिगमनात्। **नहीत्यादि** (कं. २०९.९) गद्ये तदुपाधीनामनुपलम्भके न हि किञ्चिद्बीजमस्ति इति पदघटना। असत्वमेव तद्बीजमित्यभिप्रायः। **स्वरूपमात्रानुबन्ध(न्धि)न** इति (कं. २०९.११) स्वाभाविकाः। तथा **व्यभिचारसिद्धिरिति** (कं. २०९.११) सञ्ज्ञाभेद एव केवलमित्यर्थः। **तत्कृतस्यापीति** (कं. २०९.१२) स्वरूपमात्रानुबन्ध्युपाधिकृतस्यापि। **तत्कारणान्यपीति** (कं. २०९.१२) आगन्तुकोपाधिकारणान्यपि। भूयोऽपि बौद्धमेव प्रत्याह **उपाधय इत्यादि** (कं. २०९.१३)।

[कु०] [181] ननु यदि तादात्म्यतदुत्पत्तिभ्यामविनाभावो न नियम्यते तर्हि दर्शनाभ्यामपि **कथमसौ नियम्यते**? तयोः सतोरपि कालान्तरे देशान्तरे वा व्यभिचारशङ्कया दुर्निवारत्वादित्यत आह–[8]**स्वभावेपि** [इति] (कं. २०९.६)। यथा भवत्पक्षे बाधकबलेनैव कार्यस्य कारणातिपाते आकस्मिकत्वप्रसङ्गः, स्वभावातिपाते निःस्वभावत्वप्रसङ्ग इत्येवं साध्यसिद्धिरेवमस्मत्पक्षेऽपि। यस्य येन व्याप्तौ स्वभावो हेतुः तस्य तदतिपाते स्वभावातिपातः स्यादिति विपक्षे बाधकेन व्यभिचारशङ्कानिवृत्तिरि[ति] भावः। ननु [9]सम्बन्धस्य स्वाभाविकत्वं कुतः प्रत्येतव्यमित्यत आह **उपाधिकृतो हीति** (कं. २०९.७)। इह भूयादर्शनेषु प्रवर्तमानेषु प्रमेयत्वामित्यत्वयोरित्यत्र स्फुटो व्यभिचारः, तत्र तत एवानुमानाप्रवृत्तिः। यत्र त्वस्फुटस्यासत्त्वमैत्रतनयत्वयोरिव तत्रानुमानप्रवृत्तौ व्यभिचारशङ्का कर्तव्या। तत्रापि प्रयोजकान्तरसम्भावनयैव सा भवेत्, निश्चयेन वा? [न तु] ([10]तं तु) तदवधूय तस्या सति सर्वलोकयात्रोच्छेदप्रसङ्गात् अन्ततो [11]भोजनादावपि मरणादिसाधनत्वशङ्कया प्रवृत्तिर्न स्यात्। निर्बीजायाः शङ्काया सर्वत्र सुलभत्वात् ततश्च सदृष्टयोर्व्यभिचारशङ्कायामुपाधिः। कारणतन्निवृत्तौ विनिश्चितायां सम्बन्धस्य स्वाभाविकत्वनिश्चयः सुलभ इति भावः।

---

१ पगमार्थं–कं. १, कं. २। २ अथागन्तवः–कं. १; कं. २, जे. २। ३ गुर्वीकल्पना–जे. १, जे. २, जे. ३। ४ बीजमस्ति – ड। ५ तटि – अ, ब। ६ तत्रापि च वह्निः–अ, ब, क। ७ तदपगमार्थं–कं. १। ८ स्वभावेन हि–कं। ९ संधसी–MS.। १० MS.। ११ भाजतावावपि–MS.

न्यायकन्दली

कल्पना। यस्य चोपाधयो न सन्ति स धूमः कदाचित् स्वतन्त्रोऽप्युपलभ्येत, [1]यथार्द्रेन्धनोपाधिकृतधूमसम्बन्धो वह्निः शुष्केन्धनकृताधिपत्यो विधूमः प्रत्यवमृश्यते। न च तथा [2]सविदन्तरे धूमः कदाचिन्निरग्निराभाति। तस्मादुपलब्धिलक्षणप्राप्तानामुपाधीनामनुपलम्भादभावप्रतीतौ उपलब्धानां [3]देशकालेन्धनावस्थाविशेषाणां पुनः पुनर्दर्शनेषु व्यभिचारादहेतुत्वनिश्चये सति निखिलदेशकालादि[4]विशेषादिप्रहाणेनोपाध्यभावोपलब्धिभूयः। सहभावदर्शनजसंस्कारसहकारिणा निरस्तप्रति[5]पक्षाशङ्केन चरमप्रत्यक्षेण धूमसामान्यस्याग्निसामान्येन स्वभावमात्राधीनं सहभावं [6]निश्चिन्वान इदमनेन नियतमिति नियमं निश्चिनोति।

[टि०] वह्निः स्यात्तदा धूमस्य व्यभिचारिता स्यादिति भावः। [7]**दर्शनेषु व्यभिचाराद्** इति :– अहेतुत्वं धूमं प्रत्युपाधीना[8]मकारणत्वम्। **चरमप्रत्यक्षेण** इति – अविनाभाव[9]निश्चयेनेत्यर्थः। **सोऽध्यवसीयत** इति :– सोऽविनाभावः।

[पं०] [10]गुर्वीकल्पनेति (कं. २०९.१४) असत्कल्पनैव तवेयमिति भावः। द्वयोः सम्बन्धस्तावदुपाधिकृतो यस्य च न सन्त्युपाधयः स स्वतन्त्रोऽप्युपलभ्येत यथा वह्निरित्येवमर्थम्। सप्रपञ्चं वक्ष्यन्नाह यस्य चोपाधयो न सन्ती (कं. २०९.१४) त्यादिना। **स्वतन्त्र** इति (कं. २०९.१४) निरग्निः। **शुष्केन्धनकृताधिपत्य** इति (कं. २०९.१५) शुष्केन्धनसाहाय्यः। **संविदन्तरे** इति (कं. २०९.१६) स्वतन्त्राग्निग्राहकज्ञानादन्यस्मिन् ज्ञानान्तरे। **उपलब्धानां दिश्([11]देश)कालेन्धनावस्थाविशेषाणां पुनः पुनर्दर्शनेषु व्यभिचारादिति** (कं. २०९.१८) यत्र हि देशे काले वा तथाविधेन विशेषेण मन्त्राद्यप्रतिबद्धावस्थाविशेषेण वा एकदा धूमो दृष्टो न तत्रैवान्यदापि दृश्यते सामग्रीपरावर्तेन व्यभिचारदर्शनादित्यर्थः। **उपाध्यभावोपलब्धि[12]श्च भूयः सहभावदर्शनजसंस्कारसहकारिणेति** (कं. २०९.१९) उपाध्यभावोपलब्धिश्च भूयः सहभावदर्शनं च ताभ्यां जातो यः संस्कारः तत्सहकारिणा। **निरस्तप्रतिपक्षाशङ्केनेति** (कं. २०९.२०) धूमोऽपि भविष्यति

[कु०] उपाधिश्च प्रमाणपथमवतीर्ण एव शङ्कनीयः, अन्यथाऽतिप्रसङ्गात्। तल्लक्षणं च व्याप्याभिमतमव्याप्नुवद् व्यापकाभिमतं च व्याप्नुवंस्ततश्च व्याप्यमान इति। तत धूमव्यापके आर्द्रेन्धनसंयो[गे]ऽतिव्याप्तिनिरासाय प्रथमं विशेषणम्। तस्य चानुपाधित्वं धूमेनैव साध्यत्वात्। महानसादौ व्यभिचारं निराकर्तुं द्वितीयं विशेषणम्। तस्य सुपाधित्वे मठादौ वह्निर्न स्यात्। अ[थ] पर्वतत्वादावतिव्याप्तिं परिहर्तुं तृतीयं विशेषणम्। तस्य तूपाधित्वे जला[दा]वपि वह्निः स्यात्। अयं च सम्भवद्विपक्षेऽन्वयव्यतिरेकिणि, व्यतिरेकिणि च, न तु केवलान्वयिनि तस्य विपक्षासम्भवेन तद्वृत्तिरूपस्य व्यभिचारशङ्काबीजस्योपाधेः दुःशङ्कत्वात् तत्र च केवलव्यतिरेकिणि साध्यस्यातिव्याप्तौ साध्यव्यावृत्तिः उपाधित्वेन शङ्कनीया। अन्वयव्यतिरेकिणि तु साध्ये प्रयोजकान्तरमित्येवं स्थिते उपाधयः प्रत्यक्षयोग्या एवाशङ्केरन् विपरीता वा! नाद्य इत्याह **यदिधूमस्येति** (कं. २०९.८)। योग्यानुपलम्भचोदिताः। अबाधितानां च देशकालादीनामनन्तरमेव लक्षणहानिर्वक्ष्यते इति भावः। योग्यानुपलब्धेरनुकूलं तर्कमाह **नहीति** (कं. २०९.९)।

---

१ यथेन्धनो–कं. १, कं. २। २ समिदन्तरे–जे. १। ३ देशकालावस्थाविशेषाणां–जे. १; शेषकालेन्धनावस्थाविशेषाणां–कं. १, कं. २। ४ विशेषाध्याहारेण न उपाध्यभावोपलब्धिदोषः–कं. १, कं. २; विशेषादिविप्रहाणेनोपाध्यभावोपलब्धिभूयं–जे. १। ५ पक्षशङ्केन–कं. १, कं. २। ६ निश्चित्य–कं. १; कं. २। ७ तेषु–अ, ब, क। ८ मकारण–अ ९ निश्चायके–ड। १० गुर्वीयं–कं. १। ११ शेष–कं. १। १२ ब्धिदोषः–कं।

### न्यायकन्दली

**यद्यपि प्रथमदर्शनेऽपि सहभावो गृहीतः, तथापि न नियमग्रहणम्। नहि [1]सहभावमात्रं नियमः, अपि तु निरुपाधिकं सहभावः। निरुपाधिकत्वं च तस्य भूयोदर्शना[2]भ्यासावसेयमित्यन्तेन भूयः सहभावग्रहणबलभुवा सविकल्पकप्रत्यक्षेण सोऽध्यवसीयत इति। एतेन [3]प्रत्यक्षस्य विद्यमानविषयत्वादतीतानागतासु व्यक्तिषु कथं नियमग्रहणमिति प्रत्युक्तम्। नहि विशेषनिष्ठं व्याप्तिग्रहणमाचक्ष्महे। विशेषहान्या सामान्येन व्याप्तिग्रहणे तु सर्वत्रैव निर्विशङ्कः प्रत्ययः, तस्य सर्वत्रैकरूपत्वात्। किं व्यक्तयो व्याप्ताव[4]प्रविष्टा एव? को वै ब्रूते न [5]प्रविष्टा इति। किन्तु सामान्यरूपतया, न विशेषरूपेण। अत एव धूमसंवित्त्या वह्निमात्रमेवानुसन्दधानस्तमनुधावति, न विशेषमाद्रियते। यदि तु सामान्येन**

[टि०] **तद्भावसन्देहाद्** इति कार्यकारणभावसन्देहादित्यर्थः। [6]**किञ्च भवताम्** इति धूमसामान्यमग्निसामान्यं द्वेऽपि न [7][प्रत्यक्षग्राह्ये तुच्छरूपत्वत्] नापि कार्यकारणभूते इत्यर्थः। **व्यक्तयस्तादृश्य** इति प्रत्यक्षग्राह्याः कार्यकारणभूताश्च

[पं०] वह्निरपि न भविष्यतीति प्रतिपक्षाशङ्का। **चरमप्रत्यक्षेणेति** (कं. २०९.२१) अविनाभावनिश्चायकेनेत्यर्थः। [8]**निश्चिन्वन्निति** (कं. २०९.२१) प्रमाता। **इदमिति** (कं. २०९.२२) धूमाख्यं वस्तु। **अनेनेति** (कं. २०९.२२) अग्निना।

**प्रथमदर्शनेऽपीति** (कं. २०९.२२) प्रथमवेलायां धूमाग्न्योर्दर्शनेऽपि। **नियम** इति (कं. २०९.२३) अविनाभावः। **भूयोदर्शनाभ्या[9]सावसेयमिति** (कं. २०९.२४) अत्र भूयो बारंवारम्। **स इति** (कं. २०९.२५) अविनाभावः। **नियमग्रहणमिति** (कं. २१०.१) अविनाभावग्रहणम्। **इतीति** (कं. २१०.१) सौगतोक्तम्। **विशेषहान्येति** (कं. २१०.१) विशेषपरित्यागेन। **तस्येति** (कं. २१०.२) सामान्यस्य। परः पृच्छति **किं व्यक्तय** (कं. २१०.३) इत्यादि। **श्रीधरः** प्राह **को वै** (कं. २१०.३) इत्यादि। **अनुसंदधान** इति (कं. २१०.४) प्रमाता। [10]**तमिति** (कं. २१०.५) वह्निसामान्यम्। **विशेषमिति** (कं. २१०.५) तार्णपार्णादिकम्। [11]**निष्प्रामाणिकेति** (कं. २१०.६)

[कु०] द्वितीयं पक्षं दूषयति **न चेति** (कं. २०९.१०) अयोग्या हि उभयाव्यापका धूममात्रव्यापकाश्च लक्षणहानेरनुपाधयः। वह्निमात्रव्यापकाश्च नित्या अनित्या वा? नाद्य इत्याह **तेहि यदि स्वरूपेति** (कं. २०९.११) नित्या हि वह्निमात्रव्यापकास्तत् परमाणव एव। तदयं प्रयो(या)[गः]– धूमस्य वह्निसाहचर्यमनुपाधिकम्,अप्रमीयमाणोपाधिकत्वात्, यस्य यत्साहचर्यं सोपाधिकं तदुपाधिमत्तया प्रतीयते। तथा न साहचर्यमौपाधिकतयेति व्यतिरेकी। अस्यानुकूलं तर्कमाह **यस्य चेति** (कं. २०९.१४)। सुग्रहत्वायोक्तमुपसंहरन् स्वाभाविकसम्बन्धे ग्रहणे सति कर्तव्यतां प्रमाणमाह **तस्मादिति** (कं. २०९.१६)। **[अ]हेतुत्वनिश्चये सतीति** (कं. २०९.१९) **अनुपाधित्वनिश्चये सतीत्यर्थं** ननु मा भूवत् देशकालावस्था उपाधयः, तद्विशिष्टस्तु धूम उपाधिरस्तु तेन धूममात्रप्रयोजकमित्यत आह **निखिलेति** (कं. २०९.१९)। तद्विशिष्टाऽपि साध्याव्यापकत्वादनुपाधिरित्यर्थः। **चरमप्रत्यक्षेणेति** (कं. २०९.२१) दृढतरं प्रत्यक्षमुपलक्षयति। स्मृतिहेतुसंस्कारोत्पादनक्षमेणेत्यर्थः।

---

१ सहभावमात्रान्नियमः, अपि तु निरुपाधिकसहभावात्–कं. १, कं. २। २ भ्यासावशेषमित्यतो–कं. १, कं. २। ३ प्रत्यक्षे उपलब्ध–कं. १, कं. २। ४–५ प्रतिष्ठा–जे. १। ६ किञ्च न–ड। ७ [ ] एतच्चिह्नान्तर्गतः पाठः अब पुस्तकयोर्नास्ति। ८ निश्चित्य–कं. १। ९ भ्यासावशेषम्–कं. १। १० तम्–कं. १। ११ निष्प्रामाणिकैः–कं. १।

## न्यायकन्दली

**सर्वत्र निश्चितेऽपि नियमे [1]निष्प्रामाणिकैवाशङ्का क्रियते, तदा त्वत्पक्षेऽपि प्रत्यक्षेण दृष्टासु वह्निधूमव्यक्तिषु गृहीतेऽपि कार्यकारणभावे देशकाल[2]व्यवहितासु तद्भाव-सन्देहाद[3]नुमानाप्रवृत्ति को निवारयति ?**

**अथोच्यते – भूयोदर्शनेन कार्यकारणभावो निर्द्धार्यते, सकृद्दर्शनेन तदुपाधिजत्व-शङ्काया [4]अनिवर्तनात् । भूयोदर्शनं च सामान्यविषयम्, क्षणिकानां व्यक्तीनां पुनः पुनर्दर्शनाभावात् । तेनानग्निव्यावृत्तस्याधूमव्यावृत्तस्य च सामान्यविषयः कार्यकारणभाव एकत्र निश्चीयमानः सर्वत्र विनिश्चितो भवति, सामान्यस्यैकत्वादिति चेत् ?**

[**टि०**] सन्ति परं ता अपि सर्वा अतीतानागताः [5]प्रत्यक्षाः तासां क्षणक्षीणत्वात् । **परस्परमनन्वितत्वाद् इति**–व्यक्तेः स्वात्ममात्रनिष्ठत्वेन सपक्षेऽन्वयाभावात् । **तत् किं विषय** इति प्रत्यक्षनिश्चये यस्य [6]तदुत्पादनिश्चयस्य को विषय इति न [7]विघ्नः सामान्यस्यावस्तुत्वात् व्यक्तीनां च क्षणिकत्वादित्यर्थः ।

[**पं०**] अवास्तवी । **आशङ्केति** (कं. २१०.६) विपक्षशङ्का । **वह्निधूमव्यक्तिष्विति** (कं. २१०.६) महानसादि-सम्बन्धिनीषु । **देशकाल[8]व्यवहितास्विति** (कं. २१०.७) देशान्तरस्थासु अतीतानागतासु च । **तद्भावसन्देहादिति** (कं. २१०.७) कार्यकारणभावसन्देहात् ।

**अथोच्यते** इति (कं. २१०.८) हे बौद्ध त्वया । तदुपाधिजत्वशङ्काया (कं. २१०.९) इत्यत्र तच्छब्देन कार्यकारणभावो ग्राह्यः । ततश्च तस्य कार्यकारणभावस्य या उपाधिजत्वशङ्का तस्या इति विग्रहः । **सामान्यविषयमिति** (कं. २१०.९) इह अन्यव्यावृत्तिलक्षणोऽपोहः सामान्यमुच्यते बौद्धमताधिकारात् । बौद्धो हि नित्यानेकमनेकवृत्ति सामान्यं न मन्यते । किं तत्सामान्यमित्याह **तेनेत्यादि** (कं. २१०.१०) । **अनग्निव्यावृत्तस्येति** (कं. २१०.१०) अग्नेः । **अधूमव्यावृत्तस्येति** (कं. २१०.१०) धूमस्य । श्रीधरः प्राह **अस्माभिरपीत्यादि** (कं. २१०.१२) । **इत्थमेवेति** (कं. २१०.१२) सामान्येनैव । **प्रत्यक्षागोचरौ** [9]**नेति** (कं. २१०.१३) अपि त्वनुमानगोचरौ । **सामान्ये इति** (कं. २१०.१३)

[**कु०**] ननु यदि वह्निसाहचर्यनियमो धूमस्य स्वभावानुबन्धी धर्मः तर्हि वह्नेरुष्णत्वमिव प्रथमत एव ग्रहणेऽस्य ग्रहणं स्यात्, तत्किं भूयोदर्शनैरित्यत आह **यद्यपीति** (कं. २०९.२२) । सन्त्येव हि केचित् स्वाभाविका अपि धर्मादर्शनाभ्यासा वा (स या) यथा रत्नत्वादय इति भावः । **सविकल्पकप्रत्यक्षेणेति** (कं. २०९.२५) पूर्वंपरप्रत्यक्षेणेति । पूर्ववत् परप्रत्ययजन[कं] प्रमाणमुपलक्षयति । सम्बन्धिनो द्वयोरपि प्रत्यक्षत्वे प्रत्यक्षमेव सम्बन्धेऽपि प्रमाणम् । उभयोरन्यतरस्य वाऽतीन्द्रियत्वेऽनुमानमेव । वनस्पत्यो वायु(:), तत्परमाणवोश्च सम्बन्धः । यथेति द्रष्टव्यम् ।

ननु भूयसामपि ज्ञानानां कतिपयविषयत्वाज्जनितसंस्कारः स इदमपि चरमप्रमाणम्, न स व्यक्तिविषयमिति शंका, धूमसामान्यस्येत्यादि स्वोक्तं...निरस्यति य(था) तेनेत्यादि । रूपत्वादित्यं तेन । ननु यदि सामान्ययोरेवा-वि[ना]भावो, तर्हि साध्यत्वमपि सामान्येव स्यात्, ततश्च सिद्धत्वमित्याशयेन पृच्छति **किं व्यक्तय इति** (कं. २१०.३) । सामान्ययोर्व्याप्तिग्रहो नापि व्यक्तीनां किन्तु क्रोडीकृतव्यक्तिविषयया व्याप्त्या कथं देशकालविशिष्टसाध्यसिद्धिरिति

---

१ निष्प्रामाणिकैराशङ्का – कं. १; कं. २ ।　२ व्यवहितात् – कं. १; कं. २ ।　३ सन्देहादत्रा – कं. १, कं. २ ।
४ अनिवारणात् – जे. १, जे. २ ।　५ प्रत्यक्षः – अ, ब ।　६ तदुत्पादनिश्चयस्य इति ड पुस्तके नास्ति ।
७ विघ्नः – अ, ब ।　८ व्यवहितात् – कं. १ ।　९ 'न' इति कं. १ अपुस्तकेऽत्र नास्ति – सं ।

## न्यायकन्दली

अस्माभिरपीत्थमेव सर्वत्र निश्चीयमानो नियमः किं भवद्भ्यो न रोचते ? किञ्च, भवता प्रत्यक्षागोचरः सामान्येन कार्यकारणभावः, अनुभवतोऽवस्तुत्वाद्, व्यक्तयस्तादृश्यः। [1]तास्तु सर्वानप्रत्यक्षेण गृह्यन्ते। न चातीता[2]नागतानां व्यक्तीनां मनसा संकलनमिति न्याय्यम्, मनसो [3]बहिरर्थेषु [4]स्वातन्त्र्येऽन्धबधिराद्यभावप्रसङ्गात्। दृष्टासु व्यक्तिषु कार्यकारण[5]भावाध्यवसाये च दृष्टासु नानुमानोदयस्तदन्यत्वात्। नापि व्यक्तीनां साध्यसाधनभावो युक्तः, परस्परमनन्वितत्वात्। न च तासामेकेन सामान्येनोपग्रहः, वस्त्ववस्तुनोः सम्बन्धाभावात्, असम्बद्धस्योपग्राहकत्वे चातिप्रसङ्गात्। तत्किंविषयः प्रत्यक्षसाधनस्तदुत्पादविनिश्चयः, यस्मादनुमानप्रवृत्तिरिति न विद्मः।

[पं०] अग्निसामान्यं धूमसामान्यं चेति द्वे। अनुभवत इति (कं. २१०.१४) सामान्ये कर्तृणी। अवस्तुत्वादिति (कं. २१०.१४) सौगतानां हि सामान्यमवस्तु। अथ सदृशव्यक्तिष्विव कार्यकारणभाव इत्यत्राह व्यक्तयस्तादृश्य इति (कं. २१०.१४) कोऽर्थः ? केवलं प्रत्यक्षगोचरा व्यक्तयो घटादयः। तादृश्य इति असाधारणाः। कार्यकारणभावानुभाविकी वर्त्तेते इत्यर्थः। [6]सर्वा इति (कं. २१०.१४) अतीतानागतलक्षणाः। व्यक्तीनामि(कं. २१०.१५)त्यतः पुराऽगृहीता[ना]-मित्यध्याहार्यम्। मनसो बहिःस्थे स्वातन्त्र्ये इति (कं. २१०.१५) यदि बाह्यमर्थं घटादिकं गृहीत्वा अगृहीत्वा वा मनः शङ्कापयतीत्यर्थः। तदन्यत्वादिति (कं. २१०.१७) दृष्टव्यक्तिभ्योऽन्यत्वात्। वस्त्ववस्तुनोरिति (कं. २१०.१८) व्यक्तिसामान्ययोः। उपन्यासमुपसंहरति तत्किंविषय (कं. २१०.१९) इत्यादि। किं विषय इति सामान्यस्यावस्तुत्वाद् व्यक्तीनां च क्षणिकत्वान्निराश्रय इत्यर्थः। प्रत्यक्षसाधन इति (कं. २१०.२०) प्रत्यक्षविनिश्चयः।

[कु०] न वाच्यम्। पक्षधर्मतासहकारिबलाद्विशेषसिद्धेः। इदं च सामान्यविषयत्वं व्याप्तिग्रहणस्याभूत्। परेणापि अतीतानागतव्यभिचारशङ्काकर्त्रा[त]थेति दर्शयति–यदित्यादिना। नरोऽवरेत्यंतेन पूर्वमपि च तादात्म्यं स्यादित्यादिना विपक्षे हेत्वभावस्यानुपलब्धिः, लिङ्गावसेयत्वे एषामनवस्था दर्शिता। संप्रति व्यावृत्तिरूपसामान्यद्वाराऽस्माकमिवे-तेषामपि प्रत्यक्षेनैव प्रतिबन्धग्रहो भविष्यतीति निरस्य किं चेति मनसा संकलनमिति (कं. २१०.१५)। समनंतर-प्रत्ययेनादृष्टव्यक्तिष्वेवानुमानं भविष्यतीत्यत आह [7]व्यक्तीनामपीति (कं. २१०.१७)। परस्परमनन्वितत्वादिति (कं. २१०.१७) व्याप्तिग्रहणवेलायं(यां?)[यं] दृष्ट्वाऽनुमितिक(का)लेनावतिष्टंत इति भावः। अश्रुतव्यक्तिव्यावृत्त्या क्रोडीकृतानां कार्यकारणभावावधारणमित्यत आह– न चेति (कं. २१०.१८) वस्त्ववस्तुनोरिति (कं. २१०.१९)। अतद्व्यावृत्तेः व्यक्तलक्षणात्मकत्वे सत्त्वं स्यात्। तद्व्यक्तलक्षणस्य वाऽसत्त्वमित्यभिप्रायः। अतिप्रसङ्गादिति (कं. २२०.२०)। अवह्निव्यावृत्त्या रासभस्याप्युपग्रहेऽधूमव्यावृत्त्या सोऽप्यनुमीयेतेति भावः। किं विषयप्रत्यक्ष-साधनेति (कं. २२०.२१)। किंशब्द आक्षेपे, जातिव्यक्तिविषययोरपाकरणान्न केनापि प्रत्यक्षेण तदुत्पत्तिनिश्चय-संभवतीत्यर्थः।

---

१ तासु सर्वाणि प्रत्यक्षेण गृह्यन्ते – कं. १, कं. २; ताश्च सर्वाः प्रत्यक्षेण न गृह्यन्ते – जे. १। २ नागतव्यक्तीनां – जे. १, जे. २। ३ बहिरर्थे– कं. १, कं. २, जे. ३। ४ स्वातन्त्र्येणाप्रवृत्तः –जे. १, जे. २। ५ भावोऽध्यवसायश्च –कं. १, कं. २। ६ सर्वाणि–कं. १; सर्वान्–पा. इ.पु.। ७ व्यक्तीनां–कं.।

### प्रशस्तपादभाष्यम्

[182] एवं सर्वत्र देशकालाविनाभूतमितरस्य लिङ्गम् ।

शास्त्रे च कार्यादिग्रहणं निदर्शनार्थं कृतं नावधारणार्थम्, कस्मात् ? व्यतिरेकदर्शनात् । तद्यथा अध्वर्युरों श्रावयन् व्यवहितस्य होतुर्लिङ्गम्, चन्द्रोदयः समुद्रवृद्धेः कुमुदविकासस्य च शरदि जलप्रसादोऽगस्त्योदयस्येति । एवमादि तत्सर्वमस्येदमिति (वै. सू. ९-२-१) सम्बन्धमात्रवचनात् सिद्धम् ।

### न्यायकन्दली

[182] एवं देशकालाविनाभूतमित[1]रस्य साध्यधर्मस्य लिङ्गम्, यथा धूमो वह्नेर्लिङ्गम्। एवं देशाविनाभूतं कालाविनाभूतं चेतरस्य साध्यधर्मस्य लिङ्गम् । यथा काश्मीरेषु सुवर्णभाण्डागारिकपुरुषैर्यववाटिकासंरक्षणं यवनालेषु हेमाङ्कुरोद्भेदस्य लिङ्गम् । कालाविनाभूतं यथा प्राग्ज्योतिषाधिपतेर्वेश्मनि [2]जयनान्दीनिनादो नृपतिप्रबोधस्य लिङ्गम् ।

[टि०] [182] यथा कश्मीरेषु इति [3]विवादाध्यासिताः यवाः सम्प्रति सुवर्ण[4]शलाकोद्भेदवन्तः भाण्डागारिकपुरुषै रक्ष्यमाणत्वात् प्राग्वर्षय[5]ववत् । प्राग्ज्योतिषाधिपतेः इति कामरूपदेशाधिपस्य । विवादा[6]ध्यस्तः कालः एतद्देशाधिपनृपप्रबोधशाली नान्दीनि नादोपलक्षितप्रातःकालत्वात् [7]प्राग्दिवसप्रातःकालवदिति । अध्वर्युः इति विवादाध्यस्तोऽध्वर्युः

[पं०] [182] यवनालेषु हेमाङ्कुरोद्भेदस्य लिङ्गमिति (कं. २१०.२३) किल कश्मीरेषु यदा भवन्ति तन्नालेषु च सुवर्णाङ्कुरोद्भेदो भवति । यदा च तेषां राजनियुक्तसुवर्णभाण्डागारिकपुरुषा रक्षणं कुर्वन्ति तदा ज्ञायते जातो हेमाङ्कुरोद्भेदः । प्राग्ज्योतिषोधिपतिरिति (कं. २१०.२४) कामरूपनरेन्द्रस्य ।

[कु०] [182] ननु यदि स्वाभाविकसम्बन्धग्रहो देशकालावस्थाविशेषग्रहणेनैव तर्हि तदन्तरभाव्यनुमानं क्वापि न स्यादिति शङ्का प्रसिद्धतया उभयस्य तन्निराकारणभाष्यं व्याख्यातुं पठति – एवं देशकालेति (कं. २२०.२१) । व्यभिचारिणो हि देशादयरूपा व्यभिचारिणस्तु गमका एवेति भावः । देशाविनाभूतमिति (कं. २२२) । देशवैशिष्ट्येनाविनाभूतमित्यर्थः । एवमितरत्रापि – यथा काश्मीरेष्वतिप्रयोगः – एतानि यवबीजानि हेमांकुरकारीणि कश्मीरेषूप्यमान एव वीक्षया तं संप्रति यत्नवदिति सुवर्णभांडागारिकसंरक्षणस्य लिङ्गत्वमनुग्राहकतर्कप्रदर्शनायोक्तं यदि कश्मिरे यववाटिकायां हेमांकुराः न भवेयुः सुवर्णभांडागारिकाः तान् न रक्षेयुरिति हि तर्कः ८ प्राग्ज्योतिषेति (कं. २१०.२४) अख्यात्या एवममुमिम[मि]ति, इदं नृपतिर्वेश्म, इदानीं प्रबुध्यमाननृपतिः, किं प्रातःक्रियमने... [गा!]यनादीनि नीदध्यात् पूर्वदिनप्रातरुपलब्धेः तद्वेश्मवदिति तदेवमव्यभिचारिदेशाद्यं स(...)व्यापिस्वाभाविक एव सम्बन्धोऽनुमानांगनककार्यकारणभावादिकमिति समर्थितम् ।

---

१ इतरस्य लिङ्गम्– कं. १, कं. २ ।  २ प्रातर्गायनादीनि – कं. १, कं. २ ।  ३ निवादा – अ, ब ।  ४ शिलाका – अ, ब, क ।  ५ यवत् – अ, ब ।  ६ ध्यवस्ततः – अ, ब ।  ७ प्राग्दिवसः – अ, ब ।

## न्यायकन्दली

यदि देशकालाविनाभावमात्रेण गमकत्वं ननु सूत्रविरोधः? अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकमिति, तत्राह–शास्त्रे कार्यादिग्रहणं निदर्शनार्थं कृतं नावधारणार्थमिति। अस्येदमिति सूत्रे कार्यादीनामुपादानं लिङ्गनिदर्शनार्थं कृतम्, न त्वेतावन्त्येव लिङ्गानीत्यवधारणार्थम्। कथमेतदित्याह–कस्मादिति। उत्तरमाह–व्यतिरेकदर्शनादिति। कार्यादिव्यतिरेकेणाप्यनुमानदर्शनाद् [1]नावधारणार्थम् सूत्रम्। [2]यत्र कार्यादीनां व्यतिरेकस्तद्दर्शयति–यथाध्वर्युरों श्रावयन् व्यवहितस्य होतुर्लिङ्गमिति। अध्वर्युर्होतारमोम् इत्येवं श्रावयति नान्यमित्येवं यस्य पूर्वमवगतिरभूत्तस्य ओं इति श्रावयन्तमध्वर्युं प्रतीत्य कुड्यादिव्यवहिते होतरि अनुमानं होताप्यत्रास्तीति। न चाध्वर्युः होतुः कार्यं न कारणं न [3]संयो (गी) न च विरो (धी) न समवा (यी) चेति व्यतिरेकः।

[टि०] कुड्यादिव्यवहितहोतृसहितओंश्रावण[4]युक्तैवंविधाध्वर्युत्वात् पूर्वदृष्टाध्वर्युवदिति। न चायं समुद्रवृद्धेः कारणम् इति–तुल्यकालभावित्वाच्च। शरदि जलेति अयं जलप्रसादोऽगस्त्योदयसूचकः एतत्कालावच्छिन्नजलप्रसादत्वात् सम्प्रतिपन्नजलप्रसादवत्।

[पं०] गमकत्व (कं.२१०.२५) मित्यस्मात् पुरस्तदेत्यध्याहार्यम्। ननु सूत्रविरोध (कं. २१०.२५) इत्युक्तम्। अतः काणादसूत्रमेव दर्शयति [5]अस्येदं कारणमित्यादि (कं. २१०.२५)। व्याख्या अस्य वस्तुन इदं कारणमिति लै[ङ्गिकम्] अनुमानं भवति। कार्यात्कारणानुमानं भवतीत्यर्थः यथा भविष्यति वृष्टिविशिष्टमेघदर्शनात् १। तथा अस्येदं कार्यमिति लैङ्गिकं भवति कार्यात् कारणानुमानं भवतीत्यर्थः यथा अभूद्वृष्टिर्विशिष्टनदीपूरदर्शनात् एवम् अग्निरत्र धूमात्, अस्तीह चैतन्यं प्राणादिमत्वात् २ अस्येदं संयोगीति लैङ्गिकं भवति; एकस्मात् संयोगिनः सकाशात् द्वितीयोऽपि संयोगी अनुमीयते इत्यर्थः। यदा भविष्यतीह परिसरे रामोऽपि लक्ष्मणदर्शनात्। एवं भविष्यतीह नभसि अभ्रादिपिहिता द्वितीया पुनर्वसुतारका एकतरदर्शनात् ३। अस्येदं विरोधीति अनुमानं भवति। स्वसन्निधानेन इतरस्य प्रतिषेधो

[कु०] केचिदस्येदमित्यादिसूत्रार्थमन्यथागृहीत्वा चोदयन्ति–यदीति (कं. २१०.२५) इदं सूत्रमेवं व्याचक्षते–अस्येदमिति (कं. २११.२)। यदद्वयं कार्यमित्येवमादिभिः प्रत्येकं सम्बध्यते तत्र कार्याद् धूमात् कारणस्य वह्नेरनुमानं, कारणाच्चेत्तन्तुसंयोगात्कार्यस्य पटस्यानुमानमिति कार्यकारणभावोऽनुमानाङ्गमिति पदम्। कार्यकारणपदाभ्यां दर्शनसंयोगसमवायिविरोधात्। यत्र यः सम्बन्धः परिशिष्टो त्रिभिःपादे(दैं)रनुपमानांगतया दर्शितः। तत्र विषाणो न गवादेरनुमानम्।

संयोगस्योदाहरणं–वारिणि प्रतीयमानेनोत्पलस्पर्शेन तेभ्योऽनुमानं, समवायस्य विस्फूर्यदक्षिणाव्यवहितस्योत्पला[नु]मानं विरोधस्येति चतुर्विध एव संबंधोऽनुमानांगमित्यवधारणार्थमेतत्सूत्रमितरथा स्वा(स्वा)भाविकसम्बन्धस्यैवानुमानांगत्वे कार्यादिपदं वैय्यर्थ्यमि(व्यर्थमि?)ति एवं च विरोधः।

---

१ नावधारणार्थम् – कं. १; कं. २। २ तत्र यत्र – कं. १। ३ संयोगे–न च विरोधे न समवाये – कं. १। ४ युक्तस्यैवं–अ, ब, क। ५ अस्येदं कार्यं – कं. १।

### न्यायकन्दली

उदाहरणान्तरमाह–चन्द्रोदयः समुद्रवृद्धेरित्यादि। यदा चन्द्र उदेति तदा समुद्रो वर्द्धते कुमुदानि च विकसन्तीति नियमो येनावगतः, तस्य चन्द्रोदयः समुद्रवृद्धेः कुमुदविकासस्य च लिङ्गं स्यात्। न च चन्द्रोदयः समुद्रवृद्धिकुमुदविकासयोः [1]कार्यम्। उदयो हि चन्द्रस्य विशिष्टदेशसंयोगः, स च चन्द्रक्रियाकार्यः, न समुद्रवृद्ध्यादिनिमित्तः। न चायं समुद्रवृद्धेः कारणं नापि कुमुदविकासस्य, [2]उत्कल्लोललक्षणाया वृद्धेः, पत्राणां परस्परविभागलक्षणस्य च विकासस्य तत्कालसन्निहितकारणाधीनकर्मजन्यत्वादित्यादि वाच्यम्। शरदि जलप्रसादोऽगस्त्योदयस्य। [3]जलस्य प्रसादो वैमल्यम्, तच्छरदि प्रतीयमानमगस्त्योदयस्य लिङ्गम् [4]न कालान्तरे, व्यभिचारात्।

कार्यादिव्यतिरिक्तमपि यदि लिङ्गमस्ति तर्हि [5]न्यूनं सूत्रं सर्वलिङ्गानामनवरोधादत आह–एवमादि तत् सर्वमस्येदमिति सम्बन्धमात्रवचनात् सिद्धमिति।

[पं०] विरोधः अनुपलब्ध्यापरनामा। स च चतुर्धा स्वभावकारणकार्यव्यापकभेदात्। विरोधोऽस्यास्तीति विरोधी तस्मात् अभावोऽनुमीयते इत्यर्थः। स्वभावविरोधिनोऽभावानुमानं यथा नास्त्यत्र घटो द्रष्टुं योग्यस्यानुपलब्धेः। कारणविरोधेनाभावानुमानं यथा नाऽत्र धूमोऽग्न्यभावात्। कार्यविरोधिनोऽभावानुमानं यथा नात्र प्रतिबद्धसामर्थ्यानि धूमकारणानि धूमाभावात्। व्यापकविरोधिनोऽभावानुमानं यथा नात्र शिंशपावृक्षाभावात् ४। अस्येदं समवायीति लैङ्गिकमनुमानं भवति, समवायिनः सकाशात्समवायिनोऽनुमानं भवतीत्यर्थः, यथा रूपाद्रसानुमानं रसाद्वा रूपानुमानम् ५ इति सूत्रार्थः। **अध्वर्युमिति** (कं. २११.८) यजुर्वेदविदम्।

**विशिष्टदेशसंयोग इति** (कं. २११.१३) नभोदेशसंयोगः। **कारणाधीने** (कं. २११.१६) त्यत्र कारणानि वातादीनि। **कालान्तरे** इति (कं. २११.१८) ऋत्वन्तरे।

[कु०] तदेतद्यायं परिहर्तुं भाष्यमवतारयति। तत्र आदौ **आहेति** (कं. २११.३)। **कार्यादिव्यतिरेकेणापीति** (कं. (कं. २११.४)। अवधारणार्थत्वे न स्यादिति भावः। **न्यान्यमिति** (कं. २११.७) नासति होतर्यध्वर्युराश्रावयेति वाचमुच्चारयतीत्यर्थः। प्रयोगस्त्वयं–अध्वर्युः संनिहितहोतृमान्, अध्वर्युत्वे सत्यासूचयेति प्रयुञ्जानत्वात्। पूर्वाय–... काले आश्रावयेति प्रयुञ्जानेन न व्यभिचारः। **तत्कालसंनिहितेति** अवयवक्रियाहेतुर्हि नोदनादिः। न चासावप्राप्तेन चन्द्रोदयेन क्रियत इत्यर्थः। जलप्रसादो=वैमल्यमिति नाप्राप्तेन अगस्त्येन क्रियत इति भावः। इदं च कालाविनाभूतमित्याह–**शरदीति** (कं. २११.१७) पूर्वयोरुदाहरणयोरस्मिन्प्राप्ते कार्यत्वमपि संभवेदित्यपरितोषादिदमुदाहरणं द्रष्टव्यम्। नोदाहरणमादरणीयमित्याजानानस्य शंकामुपगम्यस्य भाष्येण निराकरोति। **कार्यादीति** (कं. २११.१८)। तथा च सिद्धान्ते अस्येदमित्यनुमानांगसम्बन्धप्रतिपादनं परिशिष्टमुदाहरणार्थमिति सूत्रार्थः।

---

१ कार्यः–जे. १, जे. २। २ त्कल्लोलता–जे. १, जे. २। ३ प्रसादो वैशद्यम्–कं. १, कं. २। ४ कालान्तरे व्यभिचारात्–जे. १, जे. २। ५ नूनं तत्र–कं. १, कं. २।

न्यायकन्दली

अध्वर्युरोंश्रा[1]वयन्नेवमादि यदविनाभूतं लिङ्गं तत्सर्वमस्येदमितिपदेन सम्बन्धमात्रवचनात् सिद्धं परिगृहीतम्। अर्थान्तरमर्थान्तरस्य लिङ्गमिति न युज्यते [2]भवति चेदतिप्रसक्तिः स्यादिति पर्यनुयोगमाशङ्क्येदमुक्तं सूत्रकारेणास्येदमिति। लिङ्गमित्यन्यत्वाविशेषेऽप्यस्य साध्यस्येदं सम्बन्धीति कृत्वा अस्येदं लिङ्गं न सर्वस्येति सामान्येन सम्बन्धिमात्रस्य लिङ्गत्वप्रतिपादनात्। यद्यस्य देशकालाद्यविनाभूतं तत्तस्य लिङ्गमित्युक्तम्, तदेव हि तस्य [3]यद्यस्याव्यभिचारि, यद्येन व्यभिचारि न तत् तस्य, अन्यत्रापि भावात्। अपि भोः! किमस्येदं कार्यमिति न [4]सम्बन्धः, नेति ब्रूमहे, कार्यादिग्रहणं तर्हि किमर्थम्? निदर्शनार्थमित्युक्तम्। अवश्यं हि शिष्यस्योदाहरणनिष्ठं कृत्वा किमप्यव्यभिचारि लिङ्गं दर्शनीयमिति सूत्रे कार्यादिकमुदाहृतम्। [5]न त्वेतावन्त्येव लिङ्गानीत्यर्थः।

[पं०] परः प्रवदति **कार्यादीति** (कं. २११.१८) **अनवरोधादिति** (कं. २११.१९) असङ्ग्रहात्। **अर्थान्तरमिति** (कं. २११.२२) अध्वर्यो[रों] श्रावणादि। **अर्थान्तरस्येति** (कं. २११.२२) होत्रादेः। **न सर्वस्येति** (कं. २११.२४) स्थाने न सर्वमिति पाठः क्वचिद्दृश्यते सोऽपि नानुचितः। **तदेवेति** (कं. २११.२६) लिङ्गम्। **तस्येति** (कं. २११.२६) साध्यस्य। **तत्तस्येति** (कं. २११.२७) तल्लिङ्गं तस्य साध्यस्य गमकं न भवतीत्यर्थः। परः पृच्छति **अपि भो** इत्यादि (कं. २११.२७) श्रीधरवाक्यं [6]ओमिति ब्रूमहे इति (कं. २११.२८) न भवति सम्बन्ध इति ब्रूमहे इत्यर्थः। ओमिति ब्रूमहे इत्यस्य स्थाने नेति ब्रूमहे इत्यपि पाठः सोऽतिसुगमः। परः पृच्छति कायादीत्यादि (कं. २११.२८) उत्तरं **निदर्शनार्थं** (कं. २११.२८) मित्यादि।

[कु०] ननु सम्बन्धमनुमानांगमित्येतत्कुत इत्यत आह–**अर्थान्तरमिति** (कं. २११.२३)। ...प्रसंगनिवृत्तये सम्बन्धोऽनुमानांगम्। असौ स्वाभाविक एव। तथेति कुतोऽवसितमत आह **सामान्येन** इति (कं. २११.२६)। उक्तं प्रशस्तदेवेन। वक्ता प्रशस्तदेवः सूत्रकारस्येतदभिमतमिति कुतोऽवसीयत इत्यत आह–**तदेव हीति** (कं. २११.२७)। लक्षावरोधाच्छास्त्रप्रवृत्तिः न चो(चौ)पाधिकः सम्बन्धोऽनुमानांगमतस्तन्निवृत्तये अस्यैवेदमिति सावधारणमेतद्वाक्यमित्यर्थः। उक्तं विस्मृत्य शङ्कते–[7]अयि भो इति (कं. २११.२७)। उक्तं स्मारयन्परिहरति–**नेति** (कं. २११.२८)। **ब्रूमह इति** (कं. २११.२९) **निदर्शनमिति** (कं. २११.३०) **किमर्थमिति** (कं. २११.३०) अत आह **अवश्यमिति** (कं. २११.३०)।

---

१ श्रावयतीत्येवमादिपदा–कं. १; कं. २। २ भवति प्रसक्तिः–कं. १; इति प्रसक्तिः–कं. २। ३ यद्यस्याव्यभिचारित्वेन व्यभिचारि न तत्–कं. १; तस्य अव्यभिचारि यः पुनः व्यभिचारि न तत्–जे. १; यद्यस्याव्यभिचारि न तत्–जे. २। ४ न सम्बध्नातीति ब्रूमहे–कं. १, कं. २; न सम्बन्धः ओमिति ब्रूमहे–जे. १। ५ न तावन्त्येव–कं. १, कं. २; न तु तान्येव–जे. १, जे. २। ६ ओम् इति कं. १ पुस्तके नास्ति–सं। ७ अपि–कं।

प्रशस्तपादभाष्यम्

[183] तत्तु द्विविधम्–दृष्टं सामान्यतोदृष्टं च ।

तत्र दृष्टं प्रसिद्ध[1]साध्ययोर्जात्यभेदेऽनुमानम् । यथा गव्येव [2]सास्नामुपलभ्य देशान्तरेऽपि सास्नामात्रदर्शनाद् [3]गवि प्रतिपत्तिः ।

प्रसिद्धसाध्ययोरत्यन्तजातिभेदे लिङ्गा[4]नुमेयधर्मसामान्यानुवृत्तितोऽनुमानं सामान्यतोदृष्टम् । यथा कर्षकवणिग्राज[5]पुरुषाणां प्रवृत्तेः फलवत्त्वमुपलभ्य वर्णाश्रमिणामपि दृष्टं प्रयोजन[6]मनुद्दिश्य प्रवर्तमानानां फलानुमानमिति ।

न्यायकन्दली

[183] भेदं कथयति–तत्तु द्विविधं दृष्टं सामान्यतो दृष्टं चेति । [7]तुशब्दोऽवधारणार्थः । तदनुमानं द्विविधमेव दृष्टमेकमपरं सामान्यतोदृष्टम् ।

तत्र तयोर्मध्ये दृष्टं प्रसिद्धसाध्ययोर्जात्यभेदेऽनुमानम् । प्रसिद्धं यत्पूर्वं लिङ्गेन सह दृष्टं साध्यं यत् सम्प्रत्यनुमेयं तयोरत्यन्तजात्यभेदे सति यदनुमानं तद् दृष्टम् ।

[टि०] [183-184] प्रसिद्धं यत्पूर्वमिति सपक्षे इत्यर्थः । लिङ्गं चानुमेयधर्मश्च इति– अत्रानुमेयशब्देन धर्मविशिष्टो [8]धर्मी गृह्यते ततः साध्यधर्मोऽनुमेयधर्मः । अनयो[9]रत्यन्तम् इति–अनयोः दृष्टान्तीकृतसमस्तफलसाध्यफलयोः । ननु समानविषययोरेव करणक्रियाभावो दृष्टो न भिन्नविषययोः । न हि न्यग्रोधबद्धप्रहारः कुठारो धवध्वंसाय धावति ।

[पं०] [183-184] देशान्तरे इति (कं. २१२.७) वनादौ ।

[कु०] [183] च शब्दोऽवधारणार्थं इति समानतन्त्रे पूर्ववच्छेषं सामान्यतोदृष्टम् । चेत्युक्तानां तिसृणां विधानामनयोरेव विधायोर्यथासंभवम्, तद्भावादित्यर्थः । तयोरत्यन्तजात्यभेदे सतीति सामान्यतोदृष्टस्यापि दर्शनविषयत्वे समाने पुनर्दृष्टमिति ग्रहणात् ब्राह्मणपरिव्राजकन्याये नायं विशेषः सिद्ध्यतीति भावः । पूर्वं गोत्वजातिविशिष्टायामिति (कं. २१२.७) । यद्यपि पूर्वदृष्टा पित्रादिव्यक्तिरपि संप्रति कुड्यादिव्यवहितात् ध्वनिविशेषेण लिङ्गेनानुमीयत एव, तथाप्यनुमानव्यपदेशकसामान्यविशेषस्य व्याप्तिग्रहणविषयत्वेऽपि ज(त)दनुमानम्, तदपि दृष्टमेवेति दर्शयितुं भाष्ये सास्नया गवानुमानं उद(दा)हृतम् । न चार्वाग्भागदश(र्श)ने वृक्षस्येव सास्नामात्रदर्शने गोरपि प्रत्यक्षत्वात् सिद्धसाधनमिति वाच्यम्, कतिपयावयवदर्शनेऽपि अवयविग्रहणस्य यथादर्शनं कार्यैकनेयत्वात् । यत्किञ्चिदवयवग्रहणेऽपि तद्दर्शनं संभवत्येवेति भावः ।

---

१ साध्ययोरत्यन्त – कं. १, कं. २ कि । २ सास्नामात्र – कं. १, कं. २, कि । ३ लिङ्गविप्रतिपत्तिः–दे । ४ नुमेये–दे । ५ पुरुषाणां च – कं. १, कं. २, कि । ६ मुपदिश्य वर्तमानानां–दे । ७ चशब्दो – कं. १, कं. २ । ८ धर्म्ये – अ, ब । ९ रत्यन्त – मु. जे. १, जे. २, जे. ३ ।

## न्यायकन्दली

यथा गव्येव सास्नामात्रमुपलभ्य देशान्तरे गवि प्रतिपत्तिः। पूर्वं गोत्वजातिविशिष्टायामेव[1] गोव्यक्तौ सास्नोपलब्ध्या सम्प्रत्यपि गोत्वजातिविशिष्टाया एव गोव्यक्तेरनुमानमत्यन्त-[2]जात्यभेदे। इदं च दृष्टमित्याख्यायते।

सास्नामात्रदर्शनाद्वनान्तरे यदनुमीयते गोत्वसामान्यं तस्य स्वलक्षणं पूर्वं नगरे दृष्टमिति कृत्वा प्रसिद्धसाध्ययोरत्यन्तजातिभेदे लिङ्गानुमेयधर्मसामान्यानुवृत्तितोऽनुमानं सामान्यतोदृष्टम्। प्रसिद्धं लिङ्गेन सह प्रतीतं साध्यमनुमेयं तयोरत्यन्तजातिभेदे सति, लिङ्गं चानुमेयधर्मश्च लिङ्गानुमेयधर्मौ, तयोः सामान्ये लिङ्गानुमेयधर्मसामान्ये तयोरनुवृत्तिः लिङ्गानुमेयधर्मसामान्यानुवृत्तिः, ततो लिङ्गसामान्यस्य साध्यसामान्येन सहाविनाभावाद् यदनुमानं तत् सामान्यतोदृष्टम्। यथा कर्षकवणिग्राजपुरुषाणां प्रवृत्तेः फलत्वमुपलभ्य वर्णाश्रमिणामपि दृष्टं प्रयोजनमनुद्दिश्य प्रवर्तमानानां फलानुमानम्। कर्षकादिप्रवृत्तेः फलं दृष्ट्वा वर्णाश्रमिणां प्रवृत्तेरपि फलानुमानम्, कर्षकस्य प्रवृत्तेः फलं शस्यादिकम्, वणिजो राजपुरुषस्य च प्रवृत्तेः फलं काञ्चनमणिमुक्तावाजिवारणादिकम्, वर्णाश्रमिणां च प्रवृत्तेः फलं स्वर्गादिकमित्यनयोरत्यन्तजातिभेदः। अनुमानोदयस्तु प्रवृत्तित्वसामान्यस्य फलवत्त्वसामान्येनाविनाभावात्। अत एव चेदं सामान्यतोदृष्टमुच्यते, सामान्येन नियमदर्शनात्।

[पं०] **दृष्टमिति** (कं. २१२.१६) आजीविकालक्षणम्। **अनयोरिति** (कं. २१२.२०) फलयोः। **नियमदर्शनादिति** (कं. २१२.२१) अविनाभावदर्शनात्।

[कु०] **इदं चेति** (कं. २१२.९)। च शब्दोऽनुक्तसमुच्चयै(यै)कव्यक्तिविषयं चेत्यर्थः। तच्चास्माभिः प्रागेव प्रतिपादितम्। **तस्य स्वलक्षणमिति** (कं. २१२.१०)। गोत्वस्यापि सामान्यशब्दाभिधेयत्वे साम्येऽपि सामान्यतोदृष्टात् भेदं दर्शयितुमुपचारः। **साध्यसामान्येनेति** (कं. २१२.१५) अनुमानव्यपदेशकेन फलत्वादिसामान्येनेत्यर्थः। उदाहरिष्यमानं हि स्वर्गा(र्गादिभ्यः)द्व्यपदिश्यते। [3]**स्वर्गानुमानमिति** (कं. २१२.१९) ततश्च यत्रानुमानव्यपदेशिका जातिर्भिद्यते व्याप्तिग्रहणविषयभूता जातिविशेषा तूभयोरन्या। पक्षेऽन्याजातिर्व्याप्तेः प्रयोजिका, तत्सामान्यतोदृष्टमित्यवगंतव्यम्। तमेव व्यपदेशकजातिभेदमुदाहरणे दर्शयति–**कर्षकस्येति** (कं. २१२.१८)। व्याप्तेः प्रयोजिकां जातिं दर्शयति–[4]**अनुमानोदयमिति** (कं. २१२.२०)। व्यपदेशिकाया जातेर्व्याप्तिग्रहणविषयत्वं दर्शयति – **यः पुनरिति** (कं. २१२.२२)।

---

१ विषिष्टायामेव – कं. १, कं. २। २ जात्यभेद – कं. १; जे. १, जे. २, जे. ३। ३ स्वर्गादिकं – कं। ४ मोदयः – कं।

प्रशस्तपादभाष्यम्

**[184] तत्र लिङ्गदर्शनं प्रमाणं प्रमितिरग्निज्ञानम् । अथवाग्निज्ञानमेव प्रमाणं प्रमितिरग्नौ गुणदोषमाध्यस्थ्यदर्शनमित्येतत् [1]स्वनिश्चितार्थमनुमानम् ।**

न्यायकन्दली

यः पुनरत्रानुमेयः स्वर्गादिलक्षणः फलविशेषो नैतज्जातीयस्य फलस्य नियमो दृष्टो वर्णाश्रमिणां प्रवृत्तेरपि जीविकामात्रमेव प्रयोजनमिति बार्हस्पत्याः, तदर्थमाह–दृष्टं प्रयोजनमनुद्दिश्येति । सन्त्येव तथाविधाः पुरुषा ये खलु दृष्टनिस्पृहा वानप्रस्थादिकं व्रतमाचरन्ति; तेषां प्रवृत्तेरिदं फलानुमानमिति न [2]सिद्धसाध्यतेत्यर्थः ।

[184] प्रमाणशब्दः करणव्युत्पत्तिसिद्धो न फलं विना पर्यवस्यति, अतः प्रमाणफलविभागं दर्शयति–तत्र लिङ्गदर्शनं प्रमाणमिति । तत्रानुमाने लिङ्गज्ञानं प्रमाणं प्रमीयतेऽनेनेति व्युत्पत्त्या, प्रमितिः प्रमाणस्य फलमग्निज्ञानम् । यद्यपि लिङ्गलिङ्गिज्ञानयोरुत्पत्त्यपेक्षया विषयभेदस्तथापि लिङ्गज्ञानस्यापि लिङ्गिनि ज्ञानोत्पत्तौ व्यापाराल्लिङ्गिविषयत्वम्,

[टि॰] अत्र तु लिङ्गज्ञानस्य लिङ्गं विषयः लिङ्गिज्ञानस्य तु लिङ्गीति द्वयोरपि ज्ञानयोर्भिन्नविषयत्वात् करणक्रियाभावो न सम्भवतीत्याह यद्यपि [3]लिङ्गं लिङ्गीति:–ज्ञानद्वयस्याप्येकत्रैव लिङ्गिनिर्व्यापारात् ।

( ॥ इत्यनुमाननिरूपणम् ॥ )

[पं॰] एतज्जातीयस्ये(कं. २१२.२२)ति–स्वर्गादिजातीयस्य । [4]बार्ह[स्प]त्या इति (कं. २१२.२४) नास्तिकाः । प्रवृत्तेरिति (कं. २१२.२५) प्रवर्तनात् । [5]न सिद्धसाध्यतेति (कं. २१३.१) वर्णाश्रमिणां प्रवृत्तिः जीविकामात्रफलत्वमिति नास्तिकोक्तं नास्माकं सिद्धमित्यर्थः । ननु समानविषययोरेव करणक्रियाभावो दृष्टो न भिन्नविषययोः न हि न्यग्रोधबद्धप्रहारः कुठारो धवध्वंसाय धावति ।

[कु॰] बार्हस्पत्याः–चार्वाकाः । सन्त्येव हीति (कं. २१२.२४) ये ह्युपनतमपि सुखसाधनं परित्यज्य, कृच्छ्रचान्द्रायणादिदुःखसाधनमेवमुपादश्ते न तेषां जीविकालिप्सेति भावः ।

[184] ननु विद्याप्रभेदस्य लैंगिकया बुद्धेर्व्याख्याख्यानावसरे प्रमाणफलविभागस्य कः(को)प्रस्ताव इत्यत आह–प्रमाणशब्द इति (कं. २१३.१) । लैंगिकी बुद्धिः बुद्ध्यन्तरालिङ्गात्मना कारणेनैव भिद्यते । अतस्तन्निरूपणमपि युक्तमेव । करणत्वं च फलनिरूपणेनैव निरूपणीयम् । अतः फलमपि प्रमाणाद्विलक्षणं निरूपणीयमिति भावः ।

१ स्वनिश्चयार्थं – व्यो. (५७६) । २ सिद्धः साध्यत इत्यर्थः–कं. १; कं. २ । ३ यद्यपि लिङ्गि–अ, ब । ४ अत्र पादटिप्पणे कं. १ अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् । बुद्धपौरुषहीनानां जीविकेति बृहस्पतिः ।' इत्यादि बार्हस्पत्यं सूत्रं सर्वदर्शनसंग्रहादत्राभाणकत्वेनोद्धृतम्–कं. १ सम्पादकः । ५ न सिद्धः साध्यते–कं. १

६३

## प्रशस्तपादभाष्यम्

**[185] शब्दादीनामप्यनुमानेऽन्तर्भावः, समानविधित्वात् । यथा प्रसिद्ध[1]समयस्य लिङ्ग-दर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेवं शब्दादिभ्योऽपीति ।**

## न्यायकन्दली

**ततश्च प्रमाणफलयोर्न व्यधिकरणत्वम् । प्रकारान्तरमाह–अथवेति । अग्निज्ञानं प्रमाणम्, प्रमितिः प्रमाणस्य फलम् । अग्नौ गुणदोषमाध्यस्थ्यदर्शनम् गुणदर्शनं सुखसाधनमेतदिति ज्ञानम्, दोषदर्शनं दुःखसाधनत्वज्ञानम्, माध्यस्थ्यदर्शनं सुखदुःखसाधनत्वाभावज्ञानम्, अग्निज्ञाने सति तथाप्रती[2]त्युत्पादात् ।**

**एतत् स्वनिश्चितार्थमनुमानम् । निश्चितमिति भावे निष्ठा, स्वनिश्चितार्थं स्वनिश्चयार्थमेतदनुमानमित्यर्थः ।**

**[185] शब्दादीन्यपि प्रमाणान्तराणि सङ्गिरन्ते [3]प्रवादिनः, तानि कस्मादिह नोक्तानि ? इति पर्यनुयोगमाशङ्क्य तेषामत्रैवान्त[4]र्भावात् पृथगनभिधानमित्याह–शब्दादीनामपीति ।**

[टि०] ( ।। अथ विद्याभेदनिरूपणे शब्दादीनां प्रमाणान्तराणामनुमानेऽन्तर्भावनिरूपणम् ।। )

[185] अथ शब्दादीनामन्तर्भावः ।। ननु शब्दादीनामप्यनुमानेऽन्तर्भाव इति भाष्ये । यदि शब्दादीन्यनुमानत्वे

[पं०] अत्र लिङ्गज्ञानस्य लिङ्गं विषयो लिङ्गज्ञानस्य तु लिङ्गीति द्वयोरपि ज्ञानयोर्भिन्नविषयत्वात्करणक्रियाभावो न सम्भवति इत्याशङ्क्याह–'यद्यपी[ति] (कं. २१३.४) । लिङ्गज्ञानस्यापीति (कं. २१३.५) लिङ्गज्ञानस्येत्यादि–लिङ्ग एवेत्यर्थः ? ।।

× × × ×

[कु०] **तत्रानुमान इति** (कं. २१३.३) । तस्यां लैंगिक्यां बुद्धौ प्रमाणं करणमित्यर्थः । प्रमीयतेऽनेनेति व्याख्येयम् । पदान्तरलब्धे विशेषवाची शब्दः सामान्ये वर्तते । यथा गवामसि गोपतिरेक इति–अत्र हि गवामेकपतिरसीत्यर्थः ।

ननु करणफलभावो विषयभेदे न संगच्छते । न ह्यग्निसंभवः खादिरविषयस्तत्फलं छिदापनविषयेत्यत (य इत्यत) आह–**यद्यपीति** (कं. २१३.४) । **व्यापारात् लिंगलिङ्गिविषयत्वमिति** (कं. २१३.५) व्यापारविषयो हि करण-प्रयोजयन् तस्य मुख्यविषयः । नित्यानुबंधी तं प्रति स्वकार्यफलाभावे साधकतमत्वाभावादित्यर्थः ।

**प्रकारान्तरमिति** (कं. २१३.७) । नेदृशो विषयभेदः, करणफलभावं विहंति कारणशब्दाश्च निमित्तसमवेशात् प्रवर्तंत इति दर्शयितुमिति शेषः ।

ननु निश्चितस्य कथमनुमानम्, सिद्धसाधनत्वादित्यत आह – **निश्चितमिति । भावे निष्ठेति ।**

---

१ समयस्यासन्दिग्ध–कं. १; कं. २, कि. । २ प्रतीत्युदयात्–जे. १ । ३ वादिनः–कं. १, कं. २ । ४ भावाश्च पृथग–कं. १, कं. २ । ५ यद्यपि लिंगेत्यादि–ब ।

न्यायकन्दली

शब्दादीनां[1]मनुमानेऽन्तर्भावोऽनुमानाव्यतिरेकित्वम् । समानविधित्वात् समानप्रवृत्तिप्रकारत्वात् । यथा व्याप्तिग्रहणबलेनानुमानं प्रवर्तते, तथा शब्दादयोऽपीत्यर्थः । शब्दोऽनुमानं व्याप्तिबलेनार्थप्रतिपादकत्वाद्धूमवत् । समानविधित्वमेव दर्शयति–यथेति । प्रसिद्धः समयोऽविनाभावो यस्य पुरुषस्य तस्य लिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यां, [2]लिङ्गदर्शनम् च, यत्र धूमस्तत्राग्निरित्येवं भूतायाः प्रसिद्धेरनुस्मरणं च । ताभ्यां यथाऽतीन्द्रियेऽर्थे भवत्यनुमानं तथा शब्दादिभ्योऽपीति । तावद्धि शब्दो नार्थं प्रतिपादयति यावदयमस्याव्यभिचारीत्येवं नावगम्यते, ज्ञाते त्वव्यभिचारे प्रतिपादयन् धूम इव [3]लिङ्गं स्यात् ।

अत्राह कश्चित्–अनुमाने साध्यधर्मविशिष्टो धर्मी प्रतीयते, शब्दादर्थानुमाने

[टि॰] न सिद्धानि कथमनु[4]मानेऽन्तर्भावोऽनुमानत्वादेव, अथानुमानान्यत्वेन सिद्धानि तथापि कथमन्तर्भावोऽन्यत्वेन सिद्धत्वादित्यन्तर्भावशब्दमन्यथा व्याचष्टे अन्तर्भावोऽनुमाना[5]व्यतिरेक इति । अत्राह कश्चिद् इति शब्दप्रमाणान्तरवादी व्योमशिवादिः । अनुमाने सर्वत्र तावत्पर्वतादिको धर्म्मी प्रतीयते साध्यं च वह्निमत्वादिकम् । [6]अप्रतीतस्य साध्यत्वाभावाच्छब्दाच्च पूर्वमर्थस्याप्रतीतत्वात् । अर्थवत्त्वं चेद् इति विवादाध्यासितः शब्दः अर्थवान् शब्दत्वादित्युल्लेखेन । तत्प्रतीत्या तु इति [7]आप्तोक्तत्वप्रतीत्येत्यर्थः ।

[पं॰] [185] अयमिति (कं. २१४.४) शब्दः । अस्येति (कं. २१४.४) अर्थस्य ।

[कु॰] [185] स्थानानि(!) तस्मादिह नोक्तानीति, तत्कानीति–तत्कार्यबुद्धयः कस्मान्नोक्तानीत्यर्थः । कार्ये कारणोपचारात् । एवमुत्तरत्रापि प्रमाणान्तर्भावः प्रमाणानामेव वेदितव्यः । बुद्ध्यधिकारे मुख्यव्यावृत्त्या प्रमाणानामप्रसक्तेः । समानप्रवृत्तिप्रकारत्वादिति । प्रवृत्तिप्रकारो लक्षणमनुमानस्योक्तमनुमेयेन संबद्धमित्यादिना, तेन समानमेतेषां लक्षणं यस्मादित्यर्थः । तदेतदाह–यथा व्याप्तिग्रहणबलेनेति ।

शब्दोऽनुमानमिति । शब्दादीनीति प्रमाणान्यनुमानानीति व्याख्येयम् । इतरथा शब्दादिभ्योऽपीत्यागामिभाष्येण विरोधप्रसंगात् । अनुमानमित्युद्योगे प्रसिद्धसमयस्येति षष्ठीकर्मणि वा कर्तरि चेति संदिह्यते । अतः कर्तर्येवेति निर्णेतुमन्यपदार्थं विशिनष्टि । पुरुषायेति । एवं हि प्रसिद्धिः–कार्यं स्मरणं संगच्छेतेति । एवं शब्दादीनामनुमानान्तर्भावे साधारणो हेतुर्व्याप्तिबलेनार्थप्रतिपादकत्वमुक्तं (पादकः उक्तः?) । तस्य शब्देऽसिद्धिमाशंक्य परिहरति–तावद्धीति । यावदयमस्येति । अयं गवादिशब्दो अस्य ककुदादिमतोऽर्थस्याव्यभिचारीनियमेन वाचक इत्येवं संकेतो यावन्न गृह्यते–न स्मर्यते इत्यर्थः । ज्ञाने त्वव्यभि[चारिणि]गृहीते स्मृते वा संकेत इत्यर्थः ।

---

१ मप्यनुमाने–जे. १; जे. २ । २ लिङ्गदर्शनम्–कं. १; कं. २ । ३ लिङ्गमेव–जे. १; जे. २; जे. ३ । ४ मानोऽन्तर्भावो–अ. ब । ५ व्यतिरेकित्वम्–मु. जे. १, जे. २, जे. ३ । ६ अप्रतीतेः–अ, ब, क; अप्रतीतस्याप्रतीतेः–ड । ७ आप्तोक्तत्वं–अ ।

न्यायकन्दली

**को धर्मी ? न तावदर्थः, तस्य तदानीमप्रतीयमानत्वात् । शब्दो धर्मीति चेत् ? किमस्य साध्यम् ? अर्थवत्त्वं चेत् ? न पर्वतादेरिव वह्न्यादिना शब्दस्यार्थेन सह संयोगसमवायादिलक्षणः कश्चित् सम्बन्धो निरूप्यते, येनायमर्थविशिष्टः साधनीयः । प्रतिपाद्यप्रतिपादकभाव एव हि तयोः सम्बन्धः, सोऽर्थप्रतीत्युत्तरकालीनो नार्थप्रतिपादनात् पूर्वं सम्भवति । [1]नचाग्निधूमयोरिव शब्दार्थयोरस्त्यविनाभावनियमः, देशकालव्यभिचारात्; तद्व्यभिचारश्चासत्यपि युधिष्ठिरे कलौ युधिष्ठिरशब्द[2]प्रयोगात्, असत्यामपि लङ्कायां जम्बुद्वीपे लङ्काशब्दश्रवणात् । तस्मादनुमानसामग्री[3]वैलक्षण्याच्छब्दो नानुमानम् ।**

[टि०] **अथाचार्यः** पराभ्युपगते चेष्टारूपेऽनुमानेऽपि शब्देन सह तुल्यदोषतां दर्शयति **यदूर्ध्वीकृतायाम्** इत्यादि । **क्रयविक्रयव्यवहार** इत्यादि – [4]विवादास्पदं वणिक् दशसंख्याप्रति[5]पादनाभिप्रायवान्, तथाविधाङ्गुलीन्यासयुक्तत्वान्मद्वदित्यनुमानम् । **स्वसन्ताने** इति **बौद्धैः** सह साम्याद् बौद्धाभिप्रायेण स्वसन्ताने आत्मन्येवेत्यर्थः । **शब्दादपि कथम्** इति शब्दाद् पृथक्प्रमाणत्वेनाभ्युपगतात् । [6]चौरादिशब्दस्यार्थाभिप्रायव्यभिचारेण निरुपाधिसम्बन्धाभावात्कथमभिप्राय[7]गमकत्वमित्याह **यस्तु सत्यपि लिङ्गत्वे** इति । शब्दप्रमाणान्तरवाद्याह **शब्दस्यार्थप्रति[8]पादकत्वमेव** इति ।

[पं०] **अत्राह कश्चिदिति** (कं. २१४.६) कश्चिद्व्योमशिवादिः । व्योमशिवेनापि यतः शब्दस्यानुमानान्तर्भावो निषिद्धः । **अप्रतीयमानत्वादिति** (कं. २१४.७) अप्रतीयमानश्च धर्मी न भवति । **येनायमिति** (कं. २१४.९) अयं शब्दः । **प्रतिपाद्यप्रतिपादकभाव** इति (कं. २१४.१०) वाच्यवाचकभावः । [9]**स चेति** (कं. २१४.१०) स सम्बन्धः । अथ धूमोऽपि देशविशेषवह्निं व्यभिचरति तत्राह **न धूमो वह्नि**मित्यादि (कं. २१४.१४) ।

[कु०] **तदानीमप्रतीयमानत्वा**दिति । प्रतीयमानत्वे त्वनुमानवैयर्थ्यादिति भावः । इह शब्दस्यार्थविशिष्टत्वं, विशेषणविशेष्यभावश्च सर्वत्र सम्बन्धान्तरपूर्वक एव घटाभावादीनां भूतलादेराहार्यप्रतियोगिसंयोगादिरूपसम्बन्धपूर्वकत्वदर्शनात् । भावे हि संयोगादिरूपो [रूपसम्बन्धो ? ]ऽन्यत्राद्यः – इत्याह– **न पर्वतादेरिवेति** । न द्वितीय इत्याह– **प्रतिपाद्यप्रतिपादकभाव एवेति** । संकेतो नाविनाभाव इत्याह– **न चाग्निधूमयोरिति** । न केवलं व्यभिचारसंकेतो नाविनाभावः, अनियतार्थत्वाच्चेत्याह–**इतोऽपीति** । न हि दाक्षिणात्यप्रयुक्तस्य चौरशब्दस्य तस्करेणाश्रय... नापि आर्यावर्तवासिप्रयुक्तभक्तेनाश्रय इत्यर्थः ।

तदेवमन्वयव्यतिरेकाभावेऽप्यर्थप्रतीतिहेतुत्वाननुमानं शब्द इत्युक्तम् ।

इदानीमाप्तोपदेश शब्द इति लक्षणभेदाच्च नानुमानमित्याह **यदीति** । तत्रार्थरूपसाध्यस्य **विशिष्टस्य धर्मिणो** भा[वा]च्छब्दस्यानुमानबहिर्भाव इति यदुक्तं तत्समानन्यायेन परिहर्तुं प्रतिबंदीमाह – **यदूर्ध्वीकृतायामिति** । प्रतिबंदीमोचनमाशंकते – **क्रयविक्रयेति** । तदेतत्समानमित्याह – **शब्दस्यापीति** । प्रथमं विवक्षागम्यत इत्यन्वयशंकापूर्वपृथक् प्रमाणवादिनोऽव्याप्तोक्तत्वानुसरणं समानमित्याह – **अर्थाभावेऽपीति** । समानमित्येतेन न च वाच्यं पृथक् प्रमाणवादिनो

१ नाप्य – कं. १, कं. २ ।   २ योगात् – जे. १ ।   ३ वैधर्म्यात् – जे. ३ ।   ४ विवादास्पदः – अ, ब, क । ५ पादनोभिप्रायवान् – अ, ब ।   ६ वारादि–अ, ब ।   ७ गमकत्वाम्–अ ।   ८ प्रतिपादन मु. प्रतिपादकत्व (४) पा. टि. – जे. १, जे. २, जे. ३ ।   ९ स – कं. १ ।

न्यायकन्दली

[1]इतोऽपि शब्दो नानुमानं देशविशेषे स्वार्थव्यभिचारात्। न धूमो वह्नि क्वचिद्व्यभिचरति, शब्दस्तु स्वार्थं व्यभिचरति। तथा हि चौर इति भक्ताभिधानं दाक्षिणात्यानाम्, आर्यावर्तनिवासिनां तु तस्कराभिधानम्।

यदि च शब्दोऽनुमानं त्रैरूप्यप्रतीत्याऽस्य प्रामाण्यनिश्चयः स्यात्, नाप्तोक्तत्व-प्रतीत्या; तत्प्रतीत्या तु निश्चीयमाने [2]प्रामाण्येऽनुमानाद्व्यतिरिच्यत एव। वैधर्म्यात्।

अत्रोच्यते—यदूर्ध्वीकृतायां तर्जन्यां देशकालव्यवहितेष्वर्थेषु दशसंख्यानुमानं न तत्र [3]दशसंख्या धर्मिणी, अप्रतीयमानत्वात्। नापि तर्जनीविन्यासो धर्मी, तस्य [4]प्रतिपाद्यमानया दशसंख्यया सह सम्बन्धान्तराभावेन तद्विशिष्टप्रतिपादनायोगात्। नाप्यनयोरेकदेशता, नाप्येककालत्वम् कथमनुमानप्रवृत्तिः? क्रयविक्रयव्यवहारे वणिजां तथाविधतर्जनी-

[टि०] विवक्षाप्रतिपादनद्वारेणार्थप्रतिपादकत्वाद् गौणवृत्तित्वम्। सिद्धान्तवाद्याह [5]**नैकस्य शब्दस्य** इति—स्वाभाविके हि सम्बन्धेऽभ्युपगम्यमाने येनैवार्थेन शब्दस्य निरुपाधिः सम्बन्धस्तत्रैव तस्य प्रयोगः स्यान्न पुनर्ना[7]नाविधेष्विति। सिद्धान्तवाद्याह **न तुल्य एव तावद्** इति। अनेकार्थेषु च शब्देषु न सर्वैरर्थैः सहानौपाधिकः सम्बन्धो घटत इति।

[पं०] **यदि शब्दोऽनुमा[न]मिति** (कं. २१४.१६) अतः पुरस्तादित्यध्याहार्यम्। **तत्प्रतीत्येति** (कं. २१४.१८) आप्तोक्तत्वात् प्रतीत्या।

अथ श्रीधरः पराभ्युपगते चेष्टारूपेऽनुमानेऽपि शब्देन सह तुल्यदोषतां दर्शयन्नाह **अत्रोच्यते** (कं. २१४.१९) इत्यादि। **ऊर्ध्वीकृतायां तर्जन्यामिति** (कं. २१४.१९) ज्ञानं हस्तमध्यास्विति ज्ञेयम्। **अप्रतीयमानत्वादिति** (कं. २१४.२०) अप्रतीयमानश्च धर्मी न भवति। **सम्बन्धान्तराभावेनेति** (कं. २१४.२१) प्रतिपाद्यतिरिक्तसम्बन्धाभावेन। **तद्विशिष्ट-प्रतिपादनायोगादिति** (कं. २१४.२१) दशसङ्ख्याविशिष्टत्वं हि क्रियादिवस्तूनामेव न तर्जनीविन्यासस्येति भावः।

[कु०] नाप्तोक्तादपि शब्दार्थप्रतीतिर्भवत्येव, प्रामाण्यायाप्तोक्तत्वमनुसृयते। अन्यथाऽनाप्तवाक्यानंतरं प्रवृत्त्यनुपपत्तेरिति विवक्षायामप्यस्य न्यायस्य तुल्यत्वात्। साऽपि हि स(त)स्याऽविच्छेदकमर्थं गमयत्येव। प्रामाण्याय चाप्तत्वं विवक्षितु-मनुसराम इति सुवचत्वात्।

अथ मतं—पृथक् प्रमाणं भवतु। शब्दोऽर्थप्रतिपादनाय स्वज्ञानमात्रमपेक्षते। तच्चाप्तोक्तस्यापि संगच्छते। लिङ्गत्वेन चाश्रीयमाणा विवक्षा साध्यताव्यभिचारज्ञानमप्यपेक्षते। तस्मादनाप्तविवक्षायामविवक्षायामर्थव्यभिचारो दूषणमिति। मा एवम्। अस्यापि न्यायस्य शब्देऽपि समानत्वात्। न हि शब्दोऽपि स्वरूपज्ञानमात्रेणार्थं प्रत्याययति। तथा सत्य—त्यन्नस्याप्यर्थप्रतीतिप्रसंगात्।

संगतिग्रहणं स्वरूपज्ञानमित्येतावन्मात्र अपेक्षत इति चेत्, न। क, ख, ग, घ, टेति सिद्धमातृकापाठे गृहीत-संगतिकस्य खगेत्यनेन पक्षिसम्बन्धिप्रतीतिप्रसंगात्। तत्र तद्विवक्षाभावान्नेति चेत्, तर्हि विवक्षान्तर्भाव्येव शब्दस्यार्थ-

१ देशविशेषेऽर्थ—कं १, कं. २। २ प्रामाण्यो—जै. ३। ३ संख्या—कं. १, कं. २। ४ मानतया—कं. १; कं. २। ५ न शब्दस्यैकस्य मु. ६ तु—ड। ७ नाविधिष्वति—अ, ब; नानाविधिष्विति—क।

न्यायकन्दली

**विन्यासस्य दशसंख्याप्रतिपादनाभिप्रायाव्यभिचारोपलम्भात्। कर्त्तुस्तत्प्रतिपादनाभिप्रायावगतिमुखेनास्य दशसंख्याप्रतीतिहेतुत्वमिति चेत्? शब्दस्याप्येवमेव। प्रथमं गोशब्दादुच्चारिताद्वक्तुः ककुदादिमदर्थविवक्षा गम्यते, स्वसन्ताने गोशब्दोच्चारणस्य पदार्थविवक्षापूर्वकत्वोपलम्भात्। तदर्थविवक्षया चार्थानुमानम्। अयं चात्र प्रयोगः— पुरुषो धर्मी ककुदादिमदर्थविवक्षावान्, गोशब्दोच्चारणकर्तृत्वादहमिवेति। अर्थाभावेऽप्यनाप्तानां विवक्षोपलब्धेर्न विवक्षातोऽर्थसिद्धिरिति चेत्? शब्दादपि कथं तत्सिद्धिः? भ्रान्त्या विप्रलम्भधिया वार्थशून्यस्य शब्दस्य प्रयोगात्। आप्तोक्ताच्छब्दादर्थप्रतीतिरिति चेत्? आप्ताभिप्रायादेवार्थस्याधिगतिरिति [1]समानम्।**

[टि०] **उभयत्र दत्तपदेति** शब्दाधारत्वाद् वाच्यनिष्ठत्वाच्चोभयत्र शब्दे [2]वाच्ये च दत्तपदा। **ज्ञापकत्वाद्धि इति** चक्षुरादयस्त्वज्ञाता अपि ज्ञापका [3]भवन्ति तथैवान्वयव्यतिरेकदर्शनात्। **शब्दस्य हि निजम् इति** — **वैशेषिकभट्टमते** सामान्यं, **प्रभाकरमते तु** स्वरूपमेवेति। **विशिष्टा चानुपूर्वी** इति। नदीवनेत्याद्यक्षरक्रम आनुपूर्वी विपर्यये [4]दीननवेत्यर्थान्तरप्रतीतेः। [5]**तस्मादेव च** इति निजमेकं द्वितीयमागन्तुकमिति सामर्थ्यद्वयमन्यथा सामर्थ्यत्रयं स्यात्।

[पं०] **भाष्येककालत्वम्** (कं. २१४.२२) इत्यतः पुरः इतीति अध्याहार्यम्। परः प्राह **कथमित्यादि** (कं. २१४.२२)। **कर्तुरिति** (कं. २१४.२४) अङ्गुलीविन्यासकर्तुः। **तत्प्रतिपादनाभिप्रायाऽवगतिमुखेन** (कं. २१४.२४) इत्यत्र तच्छब्देन दशसङ्ख्या। **अस्येति** (कं. २१४.२४) अङ्गुलीविन्यासस्य। **स्वसन्ताने इति** (कं. २१५.१) वक्तुविवक्षां सूचयेयुः शब्दा इति। **बोद्धं** सह साम्यात् स्वसन्तानेश्चात्मनेत्यर्थः। **तदर्थेति** (कं. २१५.१) ककुदादिमदर्थस्य व्याख्या। **अर्थानुमानमिति** (कं. २१५.२) गोलक्षणार्थानुमानम्। **अनाप्तानामिति** (कं. २१५.६) [वि]प्रलम्भकानाम्।

**अस्मादिति** (कं. २१५.१०) शब्दात्।

[कु०] प्रतिपादकत्वमकामेनाप्यभ्युपगंतव्यम्। तथा चोरयोरव्याप्तत्वानुसरणं समानम। एवं चानाप्तशब्दे शब्दत्वाध्यारोपादर्थविवक्षा भवतीति वदताऽर्थविवक्षायामलिंगे लिंगत्वाध्यारोपाल्लिंगत्वभ्रम इत्यपि समानमिति अन्वयव्यतिरेकाभावेऽप्यर्थप्रतीतिहेतुः। शब्दोऽनुमानाद्भिद्यत इति यदुक्तं तत्राह — **यस्त्विति**। यदि शब्दोऽर्थे साक्षाल्लिङ्गमुच्यते तदा भवेद्देशकालविशेषयोरव्यभिचारः। नत्वेवं किन्तु विवक्षां मध्येकृत्य(त्वा) लिंगमुच्यते। अर्थविवक्षां चाप्रोक्तः शब्दः कदाचिन्न व्यभिचरतीत्याह — **शब्दस्त्विति**। न च दाक्षिणात्यप्रयुक्तचोरशब्दस्य तस्करान्वयाभावो दोषायेत्याह— **अत एवेति**। असन्नप्यर्थो विषयतया विवक्षामवच्छिन्नत्तीति स्वात्मसिद्धम्। ननु तावन्तरेण शब्दमेवावच्छेतुमीश्वे इति प्रश्नोत्तराभ्यां दर्शयति। **शब्दस्येति**। मीमांसकमतमाशंकते — **शब्दार्थयोरिति**। नियतार्थप्रतीतिरूपकार्यान्यथानुपपत्त्या कल्प्यमान इति शेषः।

---

१ पक्षव्रे: — जे. १। २ समानार्थः — कं. १; कं. २। ३ वाच्येव — ड। ४ सम्भवन्ति — अ। ५ नयनित्य — ड। ६ तस्मादेव मु.; तस्मादेवच — जे. १, जे. २, जे. ३।

न्यायकन्दली

यस्तु सत्यपि लिङ्गत्वे देशविशेषे शब्दस्यार्थ(स्य) व्यभिचारो न धूमस्य, तत्रैष न्यायः। धूमः स्वाभाविकेन सम्बन्धेनाग्नेर्लिङ्गम्। शब्दस्तु चेष्टावत् पुरुषेच्छाकृतेन सङ्केतेन प्रवर्तमानो यत्र यत्रार्थे पुरुषेण सङ्केत्यते तस्य तस्यैवार्थस्य [1]विवक्षाधिगतिद्वारेण लिङ्गम्। अत एवास्मादाप्तप्रयुक्तत्वानुसारेण चेष्टात इवार्थनिश्चयः सातत्योर्ध्वगत्यादिधर्मविशिष्टस्यैव धूमस्याप्तोक्तस्यैव शब्दस्यार्थाव्यभिचारसम्भवात्।

शब्दस्यार्थ[2]प्रतिपादकत्वमेव मुख्यया वृत्त्या किं न कल्प्यते? सम्बन्धाभावात्, असम्बद्धस्य गमकत्वे चातिप्रसङ्गात्। [3]शब्दार्थयोरस्ति स्वाभाविकः सम्बन्ध इति चेत्? [न] शब्दस्यैकस्य देशभेदेन नानार्थेषु प्रयोगात्। यत्रायमार्यैः प्रयुज्यते तत्रास्य वाचकत्वम्, इतरत्र सङ्केतानुरोधात् प्रवृत्तस्य लिङ्गत्वमिति चेत्? न, तुल्य एव तावच्चौर[4]शब्दस्तस्करे भक्ते च प्रतीतिकरः, तत्रास्य तस्करे वाचकत्वं भक्ते च लिङ्गत्वमिति नास्ति विशेषहेतुः।

[पं०] परः पृच्छति शब्दस्येत्यादि (कं. २१५.१२)। मुख्यया वृत्त्येति (कं. २१५.११) आप्तोक्तत्वं विनापीत्यर्थः। विवक्षाप्रतिपादनद्वारेणार्थप्रतिपादकत्वाद्धि गौणी वृत्तिः। श्रीधरः प्राह सम्बन्धाभावादिति (कं. २१५.१३)। एकस्य शब्दस्य देशभेदेन ना[ना]र्थेषु प्रयोगादिति (कं. २१५.१४) स्वाभाविकसम्बन्धे हि सति एकस्य शब्दस्य नानार्थेषु प्रयोगो न घटते इति हृदयम्। यत्रेति (कं. २१५.१४) [रा]चौरादौ। अयमिति (कं. २१५.१४) शब्दः। इतरत्रेति (कं. २१५.१५) भक्तादौ दाक्षिणात्यादिषु। नास्ति विशेषहेतुरिति (कं. २१५.१७) किन्तूभयत्रापि लिङ्गत्वमेवेत्यर्थः। उभयाभिमतेति (कं. २१५.१८) भक्तवृत्तेर्लिङ्गत्वमुभयाभिमतम्। [5]उभयत्रेति (कं. ५१७.८) शब्देऽर्थे च यतः शब्दं वाचकत्वेनापेक्षतेऽर्थं च वाच्यत्वेन। भवद्भिरिति (कं. २१५.२०) मीमांसकैः। परवाक्यं

[कु०] अर्थापत्तेरसिद्धिमाशङ्कस्ये(यै)कस्येति। न चैकस्मिन्परस्परविरोधिकार्यद्वयानुकूलशक्तिद्वयमाशङ्कनीयम्, प्रमाणविरोधादिति भावः।

ननु शिष्टयोरभेदादयमदोष इत्यभिप्रायेण शङ्कते–यत्रायमिति। प्रमाणविरुद्धेऽयं भेदः कल्प्यत इत्याशयेन परिहरति – तुल्य एव तावदिति (कं. २१५)। भक्ते प्रयुज्यमानश्चोरशब्दस्तस्करप्रयुज्यमानान्नातो भिद्यते। तत्रामानुशिष्टत्वादिति। प्रयोगे हेतुः कालात्ययापदिष्टो, वर्णानामैकरूप्यादानुपूर्व्यास्त्वेकजातीयत्वस्य प्रत्यक्षेण ग्रहणात्। प्रवृत्तिप्रकारभेदश्चासिद्धः। उभयत्रापि संकेतमात्रबलेन प्रवृत्तेरनुशासनं तु केवलमदृष्टा(ष्टम्)। यथा शास्त्रतो नियम इति। अत्र चाहुः–यो हवा अवि(न्वि)तार्षेयछन्दः प्रकृतिप्रत्ययविभागानभिज्ञः स स्वानुत्वं च छंति गर्तयापद्यते प्रमीयते पापीयान् भवतीति विज्ञायत इति। ततश्च प्रत्यवायपरिहाराय व्याकरणमध्येयमिति गम्यते। अर्थप्रतीतेस्तु संकेत एवोपाय इति स्थितप्रयोगमाह – आर्याणामपीति। वाचकत्वान्यथानुपपत्तिरूपामर्थापत्तिं दूषयितुमपक्रमते

१ विवक्षावगति–कं. १; कं. २। २ प्रतिपादन–कं. १; कं. २। ३ अस्ति स्वाभाविकः–कं. १; कं. २। ४ चौरशब्दात्तस्करे भक्ते च प्रतीतिप्रकारः–जे. १, जे. २, जे. ३। ५ प्रतीकमिदं कं. १ पुस्तके नास्ति–सं.। कं. २ पुस्तके नास्ति।

न्यायकन्दली

आर्याणामपि चौरशब्दादर्थप्रतीतिः लिङ्गपूर्विका, चौरशब्दजनितप्रतिपत्तित्वात्[1], उभयाभिमतदाक्षिणात्यप्रयुज्यमानचौरशब्दजनितप्रतिपत्तिवत्[2]। न च स्वाभाविकसम्बन्धसद्भावे प्रमाणमस्ति। शब्दस्य वाच्यनिष्ठा स्वाभाविकी [3]वाचिकाशक्तिरेवोभयत्र वत्तपदत्वात् सम्बन्ध इत्युच्यते [4]भवद्भिः। [5]यथोक्तम्–"शक्तिरेव हि सम्बन्धः" इति। शब्दशक्तेश्च स्वभावादेव वाच्यनिष्ठत्वे व्युत्पन्नवदव्युत्पन्नोऽपि शब्दादर्थं प्रतीयात्, शब्दस्यार्थस्य तयोः सम्बन्धस्य च संभवात्। ज्ञातः सम्बन्धोऽर्थप्रत्ययहेतुर्न सत्तामात्रेणेति चेत्? [6]यथोक्तम्।

[पं०] ज्ञात[:]सम्बन्ध इत्यादि (कं. २१५.२२) ज्ञातः सम्बन्धोऽर्थप्रत्ययहेतुः अव्युत्पन्नस्य तु न ज्ञातोऽयं ततः कथमर्थप्रत्ययहेतुः स्यादिति भावः।

ज्ञापकत्वाद्धि सम्बन्ध (कं. २१६.१) इति श्लोकः। व्याख्या हि पुनरर्थः स च भिन्नक्रमः सम्बन्ध इत्यस्मात्परो योज्यः। ततश्चायमर्थः सिद्धः। चक्षुरादयः खल्वज्ञाता अपि ज्ञापका भवन्ति, तथैवान्वयव्यतिरेकदर्शनात्। सम्बन्धः पुनर्ज्ञापकत्वादेव हेतोः। स्वात्मज्ञानमिति (कं. २१६.१) स्वात्मनः स्वस्वरूपस्य ज्ञानमपेक्षते, अज्ञानः सम्बन्धोऽर्थज्ञापको भवतीत्यभिप्रायः। एतदेवोत्तरार्द्धे स्पष्टयति तेन (कं. २१६.२) कारणेन। असाविति (कं. २१६.२) सम्बन्धः। अगृहीत इति (कं. २१३.२) [7]अज्ञातः सन् न प्रकाशको नार्थप्रकाशक इति।

[कु०] न चेति १ – दूषणाया अर्थापत्तेः प्रकारमाह – शब्दस्येति – वाचकत्वान्यथानुपपत्त्या हि कल्प्यमाना वाचकशक्तिर्वाचके आधारे वाच्ये च विषये उभयत्र दत्तपदत्वाद्वाच्यवाचकः स्वाभाविकः सम्बन्ध इति भवद्भिः मीमांसकैरुच्यत इत्यर्थः।

[8]यथोक्तमिति (कं. २१५) भवतामभियुक्तैरिति शेषः। अस्त्वेवं ततः किमित्यत आह – शब्दशक्तेश्च इति (कं. २१५) – अत्र च गूढाभिसन्धिः। तमजानन्नपरोनिष्टापत्तिमाशंकते – ज्ञातः सम्बन्ध इति (कं. २१५)। अभियुक्तवाक्ये ज्ञापकत्वादिति – हेतुरनिंद्रियसम्बन्धत्वे सतीति विशेषणीयः। अन्यथा तद्व्यभिचारः स्यात्। सिद्धान्ती स्वाभिसंधिमुद्घाटयितुकामो गुडजिह्विकान्यायेन पृच्छति कीदृशं तस्येति (कं. २१६)। छान्दसस्योत्तरं शङ्कते अस्य शब्दस्येति (कं. २१६)। पुनः सुहृद्भावेन पृच्छति– कस्मादिति (कं. २१६)। पुनरपि श्रोत्रियस्योत्तरमाशंकते– वृद्धव्यवहारादिति (कं. २१६) अवसरमधिगम्य सिद्धान्ती स्वाभिसन्धिमुद्घाटयति – तदेवेति (कं. २१६) तत्रश्च (च) संस्कारो यो ज्ञाप्यमानात् संकते(केत)मात्राद्वाचकत्वे संभ[व]ति। तदन्यथानुपपत्तिरूपार्थापत्तेः परिक्षयं

१ प्रतीतित्वात् – जे. १; जे. २, जे. ३। २ प्रतीतिवत् – जे. १; जे. २; जे. ३। ३ वाचक – कं. १, कं. २। ४ तत्रभवद्भिः – जे. ३। ५ तथा चोक्तम् – कं. १; कं. २। ६ यथाहुः – कं. १, कं. २। ७ ज्ञात – ब। ८ तथा चोक्तं – कं।

**न्यायकन्दली**

**ज्ञापकत्वाद्धि सम्बन्धः स्वात्मज्ञानमपेक्षते ।**
**तेनासौ विद्यमानोऽपि नागृहीतः [1]प्रकाशकः ॥ इति ।**

**कीदृशं तस्य सम्बन्धस्य ज्ञानम् ? अस्य शब्दस्यायमर्थो वाच्य इत्येवंभूतमिति चेत् ? तत्कस्माद्भवति ? वृद्धव्यवहारादिति चेत् ? [2]एतदेवाभिधानाभिधेयालम्बनज्ञानं परस्परं व्यवहरद्भिर्वृद्धैः पार्श्वस्थस्य बालकस्य क्रियमाणं सङ्केतो व्युत्पत्तिरिति चाभिधीयमानं संस्कारद्वारेणार्थप्रतीतिकारणमस्तु, किं सम्बन्धान्तरेण ? शब्दस्य हि निजं सामर्थ्यं शब्दत्वम्, [3]आगन्तुकं नु सामर्थ्यं सङ्केतो विशिष्टा चानुपूर्वी । [4]तस्मादेव च सामर्थ्यद्वितयात् तदर्थ[5]प्रत्ययोपपत्तेः, सम्बन्धान्तरकल्पनावैयर्थ्यम्, दृष्टात् कार्योपपत्तावदृष्टकल्पनानवकाशात् ।**

[पं०] श्रीधरः **कीदृशमित्यादि** (कं. २१६.३) श्रीधरः प्राह **तत्कस्माद्भवतीति** (कं. २१६.४) तत्सम्बन्धज्ञानम् । **सम्बन्धान्तरेणेति** (कं. २१६.७) शक्त्याख्येन वाच्यवाचकभावेन । **शब्दत्वमिति** (कं. २१६.७) शब्दत्वं वैशेषिक-भाट्टमते सामान्यं प्रभाकरमते तु स्वरूपमेव । **विशिष्टा चानुपूर्वीति** (कं. २१६.८) 'घट' इति न पुनः 'टघ' इति 'पट' इति न तु 'टप' इति ।

[कु०] कृत्य(?)भिसंधिः । सुग्रहत्वाय तमेवाभिसंधिमुद्घाटयन् स्थितामन्यथैवोपपत्तिमेव विशदयति – **शब्दस्येति** – शं(सं)केतग्र[ह]स्य साफल्ये यत्नात् । शक्तिकल्पनायां कल्पनागौरवं च दोष इत्यनुसन्धेयम् । तदेतत्पदार्थे न मानं चिंतितम् । वाक्यार्थे तु एते पदार्था विवक्षितसंसर्गाः । योग्यत्वे सं[स]र्गतयाविवक्षितत्वात् । यथाऽस्मद्विवक्षितपदार्था इति । अत्र योग्यत्वं प्रमा[ण]बाधविरहः ।

प्रमाणबाधश्च द्वेधा । सार्वकालिकस्तत्कालिकश्चेति । तत्राद्यो यथाऽग्निना सिञ्चेदिति । द्वितीयो यथाऽयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतीति । अत्र प्रथमावगतं पुत्रं प्रति गुणीभूतस्य चरमावय[व]गतेन पुरुषेणान्वयः प्रमाणबाधितः । आसन्नताग्रहणं तु चैत्रः पयसामेको रथे यात्योदनं भुक्त इत्यत्र व्यभिचारनिवृत्तये आकांक्षानुसंसर्गावगमप्र(प्रा)गभाव-रूपासत्तया कारणमिति न तया हेतुर्विशेषणीयः । न हि तस्याः संसर्गावगमात्प्रा[क्] ज्ञानं संभवति । प्रतियोगिनम-विरूप्याभावस्य दुर्निरूप्यत्वात् । जिज्ञासा त्वप्रतियोगिकैव । इतरथा स्वापवादवाक्येषु संसर्गावगमानुदयप्रसंगात् । तदेवं यथार्थे संसर्गे लैंगिक्येव प्रतीतिः । ये तु पदार्थास्स्मरयन्तीति वदन्ति तेषां संकेतसमयवर्तिनोऽर्थस्य व्यवहार-कालात्ययापदिष्टमव्यवहारकालवर्त्तिनश्चाननुभूयस्त्वादेवास्मरणमित्यलं विस्तरेण ।

---

१ प्रकाशते – कं. १ । २ तदेव – जे. १, जे. २ । ३ आगन्तुकं – जे. १, जे. २; आगन्तुकं च – कं. १, कं. २ । ४ तस्मादेव – कं. १, कं. २ । ५ प्रत्ययोपपत्तिः – कं. १, कं. २ ।

## प्रशस्तपादभाष्यम्

[186-187] **'श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तृप्रामाण्यापेक्षः, तद्वचनादाम्नायप्रामाण्यम्' (वै. अ. १ आ. १ सू. ३) "लिङ्गाच्चानित्यः" (वै. सू. २-२-३२) "बुद्धिपूर्वा वाक्यकृतिर्वेदे" (वै. अ. ६ आ. १ सू. १) "बुद्धिपूर्वो ददातिः" (वै. अ. ६ आ. १ सू. ३) इत्युक्तत्वात् ।**

## न्यायकन्दली

[186] ननु यदि [1]वक्तृद्वारेण शब्दोऽर्थाविबोधकः, तदा वेदवाक्यादर्थप्रत्ययो न घटते, वक्तुरभावादत आह—<u>श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तृप्रामाण्यापेक्ष</u> इति । न केवलं लौकिक आम्नायः, श्रुतिस्मृतिलक्षणोऽप्याम्नायो वक्तुः प्रामाण्यमपेक्ष्य प्रत्यायकः । शब्दो वक्त्रधीनदोषः, न त्वयमसुरभिगन्धवत् स्वभावत एव दुष्टः । यथोक्तम्—

> शब्दे [2]कारणवर्णादिर्दोषा वक्तृनराश्रयाः ।
> नहि स्वभावतः शब्दो दुष्टोऽसुरभिगन्धवत् ॥

[**टि०**] [186] **न केवलम्** इति आम्नायतेऽभ्यस्यते इत्याम्नाय उपदेशः । अथ मीमांसको वेदपौरुषयवादिनमुत्थापयति [3]**शब्दे वक्त्रधीनो दोष** इत्यादि । [4]**शब्दे कारणे**त्यादि करणानि स्पृष्टतादीनि, वर्णा उरःप्रभृतिस्थाननिष्पन्नाः तद्दोषा स्पृष्टस्येषत्स्पृ[5]ष्टतया तालव्यस्य दन्त्यत्वेनोच्चारणमित्यादयः । **अनागतावेक्षणन्यायेन** इति सिंहावलोकनन्यायेनेत्यर्थः ।

[**पं०**] [186] [6]**वक्तृद्वारेणेति** (कं. २१६.१०) वृद्धव्यवहारभणनात् । परवाक्यं '**शब्दो**' इत्यादि (कं. २१६.११) । **न त्वयमिति** (कं. २१६.११) अयं शब्दः । [7]**करणवर्णादोषा** इति (कं. २१६.१२) करणानि स्पृष्टतादीनि, वर्णा उरःप्रभृतिस्थाननिष्पन्नाः, तद्दोषाः स्पृष्टस्येषत्स्पृष्टत्वेन तालव्यस्य दन्त्यत्वेनोच्चारणमित्यादयः ।

[8]**अत्राहेति** (कं. २१६.१६) सूत्रकारः कर्ता । व्याख्या **अनागतावेक्षणन्यायेनेति** (कं. २१६.१७) सिंहावलोकितन्यायेन । **न चास्मद्बुद्धिभ्यो लिङ्गमृषेरिति** (कं. २१६.१७) सूत्रे (वै. सू. ६-१-२) इत्यत्र सूत्रे **काणादसूत्रे** ।

[**कु०**] [186] ननु यदि वक्तृद्वारेणेति शब्दो विवक्षावच्छेदकतयार्थमनुमापयतीत्युक्तं विवक्षा च वक्तृधर्म इत्यर्थः— **वक्तृप्रामाण्यमपेक्षेति** वक्तृप्रामाण्यमाप्तत्वम्, तद्विशेषणतया अपेक्ष(क्षा) श्रुतिस्मृती अर्थं बोधयत इत्यर्थः, उत्तरं भाष्यमवतारयितुमाप्तोक्तत्वस्य विरुद्धत्वमाशंकते **शब्द इति** (कं. २१६)— न यद्याप्तोक्तत्वं तर्हि कुतो वेदप्रामाण्यमित्यत आह **नित्यत्वेति** (कं. २१६) ।

---

१ वक्तुर्विवक्षाद्वारेण—जे. ३ । २ कारणवर्णादि—कं. १, कं. २ । ३ शब्दो वक्त्रधीनदोषो मु. । ४ प्रतीकमिदं अबपुस्तकयोर्नास्ति । ५ सृष्टतया—अ । ६ वक्तुर्विवक्षाद्वारेण—पा. ३ पु. । ७ कारणवर्णादिदोषा—कं. १ ब । ८ तत्राह—कं. १ ।

### न्यायकन्दली

नित्यत्वे वेदस्य वक्तुरभावाद् दोषाणामनवकाशे सति निराशङ्कं प्रामाण्यं सिद्ध्यति, पौरुषेयत्वे तु निर्विचिकित्सं प्रामाण्यं न लभ्यते, कदाचित् पुरुषाणां [1]रागद्वेषादिभिरयथार्थस्यापि वाक्यस्य दर्शनात्। तत्राह–"तद्वचनादाम्नायस्य प्रामाण्यम्" इति। तदित्यनागतावेक्षण[2]न्यायेन "न चास्मद्बुद्धिभ्यो लिङ्गमृषेः" (वै. सू. ६-१-२) इति सूत्रे प्रतिपादितस्यास्मद्विशिष्टस्य वक्तुः परामर्शः, तद्वचनात् तेन विशिष्टेन पुरुषेण प्रणयनादाम्नायस्य वेदस्य प्रामाण्यम्।

अयमभिसन्धिः–दोषाभावप्रयुक्तं प्रामाण्यं न नित्यत्वप्रयुक्तम्, सत्यपि नित्यत्वे श्रोत्रमनसोरागन्तुक[3]दोषैः क्वचिदप्रामाण्यात्। असत्यपि नित्यत्वे प्रमृष्टदोषाणां चक्षुरादीनां प्रामाण्यात्। दोषाश्च पुरुषविशेषे नैव सन्तीत्युपपादितम्। तेन[4] तत्प्रयुक्तस्याम्नायस्य

[टि०] [5]न चास्मद् इति अस्यार्थः, परैर्हि ईश्वरबुद्धिरनित्याऽवेदार्थविषया च, [6]बुद्धित्वादस्मदादिबुद्धिवदिति प्रत्यवस्थीयते स्वर्गकामो [7]यजेतेत्यादि[8]वेदवाक्यार्थान्तं स्वर्गादीनामप्रत्यक्ष[9]त्वादस्मदादिबुद्धीनामवेदार्थविषयत्वं च नासिद्धमिति, इति प्रत्यवस्थाने सूत्रकृतोक्तं [10]न चास्मदिति। [11]अस्मद्बुद्धिभ्योऽस्मद्बुद्धिदृष्टान्तेन ऋषेरीश्वरस्य [12]बुद्धिलिङ्गं न

[पं०] परैर्हि 'ईश्वरबुद्धिरनित्या अवेदार्थविषया च बुद्धित्वात् अस्मदादिबुद्धिवत्' इति प्रत्यवस्थीयते। 'स्वर्गकामो यजेतेत्यादिवेदवाक्यार्थानां च स्वर्गादीनामप्रत्यक्षत्वादस्मदादिबुद्धीनामवेदार्थविषयत्वं च नासिद्धमिति प्रत्यवस्थाने सूत्रकृतोक्त ना चास्मदबुद्धिभ्यो लिङ्गमृषे'। अस्मद्बुद्धिभ्योऽस्मद्बुद्धिदृष्टान्तेन न ऋषेरीश्वरस्य बुद्धिलिङ्गं न भवति। लिङ्ग्यते साध्यते इति लिङ्गं साध्यं तद्रूपा न भवति. अनित्या अवेदार्थविषया न सिध्यतीति यावत्। ईश्वरस्य लोकोत्तरत्वात् इति सूत्रार्थः।

[कु०] ननु वक्तुः सूत्रकारविरोधस्य कः प्रतिकार इत्यत आह **अयमभिसन्धिरिति** (कं. २१६)। नन्वन्वयव्यतिरेकाभ्यां दोषाभाव एव प्रयोजको न तु नित्यत्वमित्यर्थः। तर्हि वेदस्य प्रमाणे प्रणेतृदोषाभावः कुतो निश्चीयते। अत आह **दोषाश्चेति** (कं. २१६)। प्रतिपादितमीश्वरवादे। कथं प्रतिपादितमित्यत आह– **न हीति** (कं. २१६) **यथार्थदृष्टेति** (कं. २१६) अनेन ज्ञानविपर्ययौ निरस्तौ। **प्रक्षीणदोष[रागद्वेष]** इति (कं. २१६)– अनेन रागद्वेषोन्मादादयः। **कृपावानिति** (कं. २१७) अनेन स्वप्रयोजनाभावेऽपि प्रवृत्तिसंभवादर्शितानुपवेशाय **प्रवृत्त** इति (कं. २१७)। अनेन स्वाभाविकनित्यप्रयत्नयोगादौदासीन्यप[द]मानस्तम्। निश्चितदोषाभावपुरुषपूर्वकत्वव्याप्येन सामान्येन प्रामाण्यं वेदस्य प्रश्नपूर्वकं सतर्कं दर्शयति **पुरुषविशेषेत्यादिना** (कं. २१७)। **प्रत्यक्षवदिति** (प्रत्यक्षादिकमिति?) (कं. २१७)।

---

१ रागादिभिः – जे. १, जे. २। २ न्यायेन अस्मद् – कं. १, कं. २; न्यायेन चास्मद् – जे. २। ३ दोषेण – जे. १, जे. २, जे. ३। ४ तेनैतत्प्रोक्तस्य – कं. १; कं. २। ५ प्रतीकमिदं मु. पुस्तके नास्ति निर्दिष्टायां पङ्क्तौ अस्मद्' इति पदमस्ति – जे. २, जे. ३ इत्यत्रास्ति। ६ 'बुद्धित्वाद' इति अबपुस्तकयोर्नास्ति। ७ यतेत्यादि – अ, ब। ८ वाक्यानां – अ, ब, क। ९ त्वास्मदादि – ड। १० न चास्माति – अ, ब। ११ अस्म – ड। १२ बृद्धे – अ, ब, क।

न्यायकन्दली

सत्यपि पौरुषेयत्वे प्रामाण्यम् । नहि यथार्थद्रष्टा प्रक्षीणरागद्वेषः कृपावानुपदेशाय प्रवृत्तोऽयथार्थमुपदिशतीति शङ्कामारोहति ।

[1]पुरुषविशेषप्रणीतो वेद इति कुत एषा प्रतीतिरिति? सर्वैर्वर्णाश्रमिभिरविगानेन तदर्थपरिग्रहात् । यत्किञ्चनपुरुषप्रणीतत्वे तु वेदस्य बुद्धादिवाक्यवन्न सर्वेषां परीक्षकाणामविगानेन तदर्थानुष्ठानं स्यात्, कस्यचिदप्रामाण्यावबोधेन विसंवादप्रतीतेरपि सम्भवात् । यत्र च सर्वेषां संवादनियमस्तत्प्रमाणमेव, यथा प्रत्यक्षादिकम् । प्रमाणं वेदः सर्वेषामविसंवादि[2]ज्ञानजनकत्वात् प्रत्यक्षवत् । यत्तु दृष्टार्थेषु कर्मस्वनुष्ठानात् क्वचित्फलादर्शनं न तदस्य प्रामाण्यं प्रतिक्षिपति, सामग्रीवैगुण्यनिबन्धनत्वात् । तन्निबन्धनत्वं च यथावत्सामग्रीसम्भवे सति फलदर्शनात् ।

[टि०] भवति, लिङ्ग्यते इति लिङ्गं साध्यं [3]तद्रूपा न भवति, अनित्याऽवेदार्थविषया च न सिद्ध्यतीत्यर्थः । ईश्वरबुद्धेरप्रतीतावाश्रयासिद्धेः प्रतीतौ [4]तु धर्मिग्राहकप्रमाणबाधादिति ज्ञेयम् । दोषाश्च इति उपपादितमीश्वरसिद्धौ । य तु दृष्टार्थेषु [5]कारीरीप्रभृतिषु इति [6]दृष्टचाद्यर्थेष्वित्यर्थः । [7]आप्तोक्तत्वमाम्नायस्य इति आम्नायोऽपौरुषेयः अस्मर्यमाणकर्तृकत्वाद् गगनवदिति । अत्र च कालिदासादि[8]व्यतिरिक्तस्वतन्त्रपुरुषविश्रान्त्यभावोऽपौरुषेयत्वं साध्यते तेन न

[पं०] सत्यपि नित्यत्वे [9]श्रोत्रमनसोरिति (कं. २१६.२०) श्रोत्रेन्द्रियस्य नभो रूपत्वान्नित्यत्वं मनसस्तु नित्यत्वं प्रतीतमेव । आगन्तुकदोषैरिति (कं. २१६.२०) वातपित्तकफमृद्यमूर्च्छादिजनितैर्बाधिर्यभ्रान्तत्वादिभिः । तत्र बाधिर्यं श्रोत्रेन्द्रियस्य, भ्रान्त्यादयस्तु मनसा इत्यवसेयम् । उपपादितमिति (कं. २१६.२१) ईश्वरसिद्धौ प्राक् ।

सौगतादिः पृच्छति पुरुषविशेष इत्यादि (कं. २१७.१) श्रीधरः सर्वैरित्यादि (कं. २१७.२) तदर्थपरिग्रहादिति (कं. २१७.२) वेदार्थस्वीकारात् । यत्किञ्चनपुरुष[10]कृतत्वे इति (कं. २१७.३) प्राकृतपुरुषकृतत्वे ।

[कु०] एतेनात्र प्रमाणं वेदः, अनृतत्वादिप्रलंभकवाक्यवदिति प्रतिपक्षमाशंकते यदिति (कं. २१७) चित्रमायायाक्षतपशुकाम इति दृष्टार्थं कर्म चोद्यते, न च तदिष्टचनन्तरं पशव उपलभ्यन्ते । सर्वत्र तस्मादनृतत्वमित्यर्थः ।

तदेतदन्यथासिद्धया दूषयति तदस्येति (कं. २१७) प्रामाण्यमंगीकृत्याप्तोक्तत्वानुमाने प्रतिपक्षमाशंक्य भाष्यमवतारयति–आप्तोक्तत्वमिति (–त्वादिति) (कं. २१७) । भाष्ये च शब्दानुपलब्धिकारणाभावेऽपि पूर्वमुपलब्धस्यानुपलम्भेन प्रत्यक्षेणानित्यत्वसिद्धिं समुच्चिनोतीति द्रष्टव्यम् । ततश्च वक्ष्यमाणमनुमानं प्र[त्य]क्षसंवादि, परकीयानुमानापेक्षया व(ब)लीयद्(दि)ति सिद्धं भवति । परकीयं तु कर्तुरस्मरणादकर्तृकत्वानुमानं दूषयिष्यत इति भावः । इह यदि

---

१ अथ पुरुष–कं. १; कं. २ । २ ज्ञानहेतुत्वात्–कं. १, कं. २; जे. १, जे. २ । ३ तद्रूपो–ब, तद्रूप नैव –अ । ४ 'तु' अबक पुस्तकेषु नास्ति । ५ य तु दृष्टार्थेषु मु. जे. १, जे. २, जे. ३; कारीरीप्रभृतिषु इति नास्ति । ६ दृष्टद्यर्थे–ड । ७ आप्तोरुक्त –अ, ब; आप्तोक्तत्वाद् मु. आप्तोक्तत्वम् (१) पा. टि. जे. १, जे. २, जे. ३ । ८ व्यतिरिक्तः स्वपुरुष – अ, ब; वाक्यं व्यतिरिक्त–ड । ९ सूत्रमनसो–अ । १० प्रणीतत्वे – कं. १ ।

## न्यायकन्दली

[1]आप्तोक्तत्वमाम्नायस्येति न युक्तम्, तदर्थानुष्ठानकालेऽभियुक्तैरनुष्ठातृभिः स्मृत्ययोग्यस्य कर्तुरस्मरणादभावसिद्धेरत आह–लिङ्गाच्चानित्य इति । तद्वचनादाम्नाय-प्रामाण्यमित्यत्रोक्तमाम्नायपदं प्रकृतत्वादिह सम्बध्यते, लिङ्गादाम्नायोऽनित्यो गम्यत इत्यर्थः । लिङ्गमुपन्यस्यति–बुद्धिपूर्वा वाक्यकृतिर्वेद इति । [2]वेदे वाक्यकृतिर्वाक्यरचना बुद्धिपूर्विका वाक्यरचनात्वात् लौकिकवाक्यरचनावत् ।

लिङ्गान्तरमाह–बुद्धिपूर्वो ददातिरित्युक्तत्वात् । वेदे ददातिशब्दो बुद्धिपूर्वको ददातिरित्युक्तत्वाल्लौकिकददातिशब्दवत् ।

[[टि०] प्रत्यक्षबाधः, अन्यथा तु वेदवाक्यानामप्यु[3]पाध्यायेन शिष्यं प्रति प्रतिपादनात् पौरुषेयत्वं प्रत्यक्षगृहीतं स्यात् । **बुद्धिपूर्वा वाक्यकृतिः** इत्यनेन परानुमानस्य सत्प्रतिपक्षत्वं दर्शितम् । ननु **मीमांसकैः** शब्दस्य नित्यत्वाभ्युपगमा-लौकिकमपि वाक्यं न पौरुषेयं तत्कथं दृष्टान्तसिद्धिः ? नैवम्, अकारादिस्वरूपेणैव शब्दा नित्या, आनुपूर्वी तु [4]वर्णक्रमरूपा लौकिके वाक्ये नूतनैव क्रियते इत्यभ्युपगमात् । वेदवाक्ये त्वानुपूर्व्यपि परैरपौरुषेया(यी) अभ्युपगम्यते इति सिद्धसाधनतापि न भवति । **प्रजापतिर्वा** [5]**इदमेकम्** इति :– इदमेकमासीदिति [6]सामान्येनोक्त्वा ततो विशेष उक्तः

[पं०] **कस्यचिदिति** (कं. २१७.४) परीक्षकस्य । **सर्वेषामिति** (कं. २१७.५) श्रोतृणाम् । **दृष्टार्थेष्विति** (कं. २१७.६) कारीरीप्रभृतिषु । **तदस्येति** (कं. २१७.७) अस्य वेदस्य । **सामग्रीवैगुण्यनिबन्धनत्वाद्** (कं. २१७.७) इत्यत्र फलादर्शनस्येति पदं योज्यम् ।

परवाक्यं [7]**आप्तोक्तत्वमाम्नायस्येति न युक्तमित्यादि** (कं. २१७.८) । **तदर्थानुष्ठानकाले** इति (कं. २१७.९) अन्यत्र [8]हि निष्पादी तदुपदेष्टा पित्रादिः स्मर्यते । **अभावसिद्धेरिति** (कं. २१७.१०) कर्तुरभावसिद्धेः । **अनित्य** इति (कं. २१७.१०) सकर्तृकः ।

[कु०] कृत्युच्चारणं तर्हि अस्मदाद्युच्चारणं बुद्धिपूर्वकं त्वसाध्यं स्या[द]धम्यात् । ततश्च सिद्धसाधनमाशंक्याह–**वेदवाक्यस्य कृत्त(त्तौति)** (कं. २१७) – वेदवाक्यातिरचनानामर्थज्ञानपूर्वकं प्राग(?)सत्या एव पदानुपूर्व्याः करणां (णम्) । व(वे)**दे ददाति शब्द** इति (कं. २१७)–तस्याहु(द्वि?)त्रीत्वेदा(ता?)न्प्रददौ इत्येवमादिर्वेदकर्मका ददातिशब्दो बुद्धिपूर्वरचनापूर्वकः । अकर्तृत्वे हि सर्वसाधारणतया कः कस्मै दद्यादिति भावः ।

ननु गुरुमंत्रं ददातीतिवदुपदेशे दानोपचारोऽयमिति चेत्, न । असति बाधके मुख्यार्थपरित्यागायोगात् । ननूक्तं बाधकमस्मर्यंककर्तृत्वादित्यत आह **यच्चेदमिति** (कं. २१७) – एतेन वेदार्थानुसन्धानविरहिणामस्मरणं

१ आप्तोक्तत्वादा – कं. १; कं. २ । २ वाक्यस्य कृतिर्वेद इति, वाक्यस्य कृति– कं. १, कं. २ । ३ पाधेयेन–अ । ४ क्षमरूपा – अ, ब । ५ इदमेक मु. जे. १, जे. २, जे. ३ । ६ सामान्योनोक्तवा तोता – अ, ब । ७ आप्तोक्तत्वादाम्नायस्य – कं । ८ 'हि' ब पुस्तके नास्ति ।

## न्यायकन्दली

यच्चेदमस्मर्यमाणकर्तृकत्वादिति तदसिद्धम्, "प्रजापतिर्वा इदमेक आसीन्नाहरासीन्न रात्रिरासीत् स तपोऽतप्यत तस्मात् तपसस्तपनाच् चत्वारो वेदा अजायन्त" इत्याम्नायेनैव कर्तृस्मरणात्, जीर्णकूपादिभिर्व्यभिचाराच्च। तदेवमनित्यत्वे वेदस्य सिद्धे पुरुषवचसां द्वैतोपलम्भात् प्रामाण्यसन्देहे सति दृष्टे विषये कदाचिदर्थसन्देहात् प्रवृत्तिर्भवत्यपि, अदृष्टे तु विषये पचुरवित्तव्ययशरीरायाससाध्ये तावद् प्रेक्षावान्न प्रवर्तते, यावत् तद्विषयस्य वाक्यस्य प्रामाण्यं नावधारयति। दृष्टं च लोके वचसः प्रामाण्यं वक्तृगुणावगतिपूर्वकम्, तेन वेदेऽपि तथैव प्रामाण्यान्निर्विचिकित्समनुष्ठानं स्यात्।

[टि०] प्रजापतिर्वेति। वाऽवधारणे प्रजापतिरेवैक आसीदि[3]त्यर्थः। [4]तपनादिति कर्तरि 'अनः'। **जीर्णकूपेति** एतद् व्यवच्छेदार्थं सम्प्रदायाविच्छेदे सतीति [5]विशेषितेऽपि **वैशेषिकैः** स्वर्गप्रलयाभ्युपगमात् [6]अन्यतरासिद्धविशेषणता स्यात्। **पुरुषेति** द्वैतं [7]प्रामाण्यमप्रामाण्यं च।

**तेन वेदेऽपि** कारीर्यादि दृष्टफलवाक्यानां साद्गुण्ये व्यभिचाराभावदर्शनाददृष्टफलानामपि वाक्यानां प्रयोक्तुराप्तत्वमवधार्यते।

[पं०] **प्रजापतिर्वेति** (कं. २१७.१६) वा शब्द एवार्थे प्रजापति[रे]वेत्यर्थः। **स तप इति** (कं. २१७.१७) स प्रजापतिः। तपस्तपनादिति कर्तर्यनः। **द्वैतोपलम्भादिति** (कं. २१७.१९) प्रामाण्यमप्रामाण्यमिति द्वैतम्। **अदृष्टे इति** (कं. २१७.२०) स्वर्गमुक्त्यादौ। **प्रचुरवित्तव्ययेति** (कं. २१७.२०) धूमसामग्र्यापेक्षम्। **शरीरायासेति** (कं. २१७.२०) अर्चिमार्गापेक्षम्। **तद्विषयवाक्यस्येति** (कं. २१७.२१) अदृष्टविषयवाक्यस्य। **वेदेऽपि तथैव प्रामाण्यादिति** (कं. २१७.२२) पुत्रेष्टिकारीर्यादिदृष्टफलविषयवाक्यानां साद्गुण्ये व्यभिचाराऽभावदर्शनात् स्वर्गापवर्गाद्यदृष्टफलविषयाणामपि वाक्यानां प्रयोक्तुराप्तत्वमवधार्यते इत्यर्थः।

[कु०] तद्विषयसंस्काराभावप्रयुक्तम्। ननु कर्तृभावप्रयुक्तं न वेदमर्थवादत्वादप्रमाणमर्थवादस्यापि प्रमाणान्तरविरोधिनः प्रमाणत्वात्। साधिता च सिद्धार्थपरता विनोदवाक्यानाम्। न च शरीरिण ईश्वरस्येच्छा न(?) करणाभावात्, कथं वेदानां प्रणष्टि(ष्ट)त्वमिति वाच्यम्। शरीरान्वयव्यतिरेकवति कार्ये तत्फलभोग्यदृष्टोर[न्य]च्छरीरसंवाद्यपीष्यते। परमेश्वरस्य केवलं तु भोगायतनं शरीरं नेष्यते। भोगित्वात्कर्तृत्वस्य च नित्यत्वात्। पूर्वं महाजनपरिग्रहेण संवादेनाप्रोक्तत्वं प्रसाधितम्। तदेवं तु मन्त्रायुर्वेदवत् फलसंवादेनापि सुबोधमित्याह – **तदेवमिति** (कं. २१७)। पृष्टं च लोक इति व्याप्ति दर्शयन् प्रयोगं सूचयति–स च द्रष्टव्यः। स्वर्गकामो यजेतेत्यादिवाक्यं गु(?)दत्प्रणेष्टकम्, वेदत्वात्, चित्रावाक्यवदिति।

---

१ तपसश्चत्वारो – कं. १; कं. २। २ तद्विषय–कं. १; तद्विषये – कं. २। ३ आसीदिति–अ, ब। ४ तपनादिति प्रतीकं अ पुस्तके नास्ति। ५ विशेषितेति – ब। ६ अन्यतरशिसि – अ, ब। ७ प्रामाण्यप्रामाण्य – अ, ब।

## न्यायकन्दली

[187] अत्रैके वदन्ति–नाप्तोक्तत्वनिबन्धनं वचसः प्रामाण्यम्, सर्वप्रमाणानां स्वत एव प्रामाण्यादिति। ते इदं प्रष्टव्याः, प्रामाण्यमेव तावत् किमुच्यते? [1]किमर्थाव्यभिचारः? किं वा यथार्थपरिच्छेदकत्वम्? न तावदर्थाव्यभिचारः, सत्यपि वह्निनियतत्वे [2]धूमस्य कुतश्चिन्निमित्तादनुत्पादिताग्निज्ञानस्य प्रामाण्याभावात्, नीलपीतादिषु प्रत्येकं व्यभिचारेऽपि चक्षुषो यथार्थज्ञानजनकत्वेनैव प्रामाण्यात्।

अथ यथार्थपरिच्छेदकत्वं प्रामाण्यम्? तत् किं स्वतो ज्ञायते? स्वतो वा जायते? किं वा स्वतो व्याप्रियते? यदि तावज्ज्ञानेन स्वप्रामाण्यं स्वयमेव ज्ञायेत, यथार्थपरिच्छेदकमहमस्मीति। [3]न प्रमाणे यथार्थमिदमयथार्थं वेति संशयः कदाचिदपि

[टि०] [187] अत्रैके इति स्वतःप्रामाण्यवादिनो जैन[4]भाट्टबौद्धादयः। भाट्टादयो हि ज्ञानमेव प्रमाणमाह वैशेषिकास्तु ज्ञानं धूमचक्षुरादिकमज्ञानं च प्रमाणमाहुरित्यज्ञानरूपप्रमाणाभिप्रायेणाह **प्रामाण्यमेव तावद्** इत्यादि। अर्थाव्यभिचारेण प्रामाण्यस्यान्वयव्यतिरेकाभावप्रतिपिपादयि[5]षया सत्यपि अव्यभिचारे प्रामाण्याभावं दर्शयति **सत्यपि वह्नीति**। निमित्ताद् जिज्ञासादेः। व्यभिचारे सत्यपि प्रामाण्यं दर्शयति **नीलपीतादिषु** इति। [6]**चक्षुरादिषु** इतिः– चक्षुरादिना हि [7]कदाचिन्नीलं कदाचित्पीतं कदाचिच्च [8]सङ्खयादिकमिति व्यभिचारः। अव्यभिचारे तु तुल्यकालं सर्वार्थप्रकाशनं स्यात्।

[पं०] [187] **अत्रैके** इति (कं. २१७.२३) एके भाट्टबौद्धादयः। **अर्थाव्यभिचार** इति (कं. २१७.२५) अर्थाविनाभावः। **कुतश्चिन्निमित्तादिति** (कं. २१७.२६) अनाभोग-अव्युत्पन्नत्वेत्यादेः। **प्रामाण्याभावादिति** (कं. २१८.१) प्रामाण्याभावप्रसङ्गादित्यर्थः **नीलपीतादिषु प्रत्येकं व्यभिचारेऽपीत्यादि** (कं. २१८.१) व्यभिचारे अविनाभावाभावे।

इदमत्र हृदयम्–एकमेवेदं चक्षुः नीलं पीतं च गृह्णाति इति चक्षुषो व्यभिचारः एकत्रैवार्थप्रतिबन्धाभावात् परं यथार्थपरिच्छेदकत्वेन प्रामाण्यम्।

**यथार्थपरिच्छेदकमहमस्मी**(कं. २१८.४)त्यस्मात्पुरः तदेत्यध्याहार्यम्। **विपर्ययज्ञाने** इति (कं. २१८.५) विपर्ययज्ञाने सति। परः प्राह **अथेत्यादि** (कं. २१८.६) सूरिवाक्यं **तर्हीत्यादि** (कं. २१८.७)। **तत्परिच्छेदायेति**

[कु०] [187] अत्राप्रसिद्धविशेषणत्वशंकानिदानं स्वतःप्रामाण्यमाक्षेप्तुं समाक्षिपति **अत्रैके वदन्ति** [इति] (कं. २१७)। प्रामाण्यशब्दप्रवृत्तिनिमित्तं लक्षणमतस्तद्विकल्पयति–**इदमिति** (कं. २१७)। अत्राद्यं धूमे चक्षुषि च यथासंख्यमव्याप्त्यतिव्याप्तिभ्यां दूषयति–**न तावदिति** (कं. २१७)। द्वितीयं युक्तमेव। स चोपाधिविशेषः।

---

१ अर्थाव्यभिचारः–जे. ३। २ धूमस्य प्रमत्तस्य–कं. १; कं. २। ३ न तर्हि–कं. १; कं. २। ४ भट्ट–अ, ब। ५ यिषयसेव्यव्यभिचारे–अ, ब। ६ प्रतीकमिदं मु. पुस्तके–जे. १, जे. २, जे. ३ इत्यत्र च नास्ति किन्तु तत्रैव पङ्क्तौ 'चक्षुष' इति पाठः, चक्षुरादि–अ। ७ कदान्नीलं–अ, ब। ८ शङ्खादिक–अ, ब, क।

न्यायकन्दली

स्यात्, विपर्ययज्ञाने च प्रवृत्तिर्न भवेत्। अथ स्वात्मनि क्रियाविरोधादात्मानमगृह्णद्बुद्धिज्ञानमात्मनो यथार्थपरिच्छेदकत्वं न गृह्णाति, तर्हि तत्परिच्छेदाय परमपेक्षितव्यम्, प्रमाणेन विना प्रमेयप्रतीतेरभावात्। [1]प्रमाणस्यापि [2]प्रमीयमानदशायां प्रमेयत्वादिति परतः प्रामाण्यमेव। परेण प्रामाण्ये [3]ज्ञायमाने तस्यापि प्रामाण्यमपरेण ज्ञेयं तस्याप्यन्येनेत्यनवस्थेति चेत्? नानवस्था, सर्वत्र प्रामाण्ये जिज्ञासाभावात्। प्रमाणं हि स्वोत्पत्त्यैवार्थं परिच्छिनत्ति न ज्ञातप्रामाण्यम्, तेन त्वर्थे परिच्छिन्नेऽपि यत्र कुतश्चिन्निमित्तात् प्रमाणमिदमप्रमाणं वेति संशये जाते विषयसन्देहात् पुरुषस्याप्रवृत्तिः, तत्रास्य प्रवृत्त्यर्थं [4]कारणान्तरात् प्रामाण्यजिज्ञासा भवति, अनवधारिते प्रामाण्ये संशयानुच्छेदात्। यत्र पुनरत्यन्ताभ्यासपाटवादखिलविशेषग्रहणाद्वा प्रमृष्टसन्देहकलङ्क-

[टि०] **तर्हि्क स्वतो ज्ञायत** इति भट्टाभिप्रायेण यस्मादेव [5][ज्ञाततादेर्ज्ञानं ज्ञायते तस्मादेव] स्वकीयात्प्रामाण्यमपि ज्ञायते इत्यत्र 'स्व'शब्द आत्मीयवचनः। बौद्धप्रभाकरमते तु ज्ञानस्य स्वसंवेदनत्वाभ्युपगमात् [6]स्वस्मादात्मन एव ज्ञायते इत्यत्र 'स्व'शब्द आत्मवचनः। **विपर्ययज्ञाने च** [7]**प्रवृत्तिः** इति:– विपर्ययरूपताया गृहीतत्वात्प्रवृत्त्यभावः। **अथ स्वात्मनि** इति कुठाराद् वृक्षे छिदिक्रिया दृष्टा न स्वात्मन्येवेति। **तर्हि तत् परिच्छेदाय** इति:– ज्ञानपरिच्छेदाये-

[पं०] (कं. २१८.७) **प्रामाण्यपरिज्ञानाय**। **परमिति** (कं. २१८ ७) ज्ञानान्तरम्। ननु प्रमाणस्य प्रमेयत्वं कुतो येनेदमुच्यते **प्रमाणेन विना प्रमेयप्रतीतेरभाव** इति (कं. २१८.७)। तत्राह [8]**प्रमाणस्यापीत्यादि** (कं. २१८.८)। **परतःप्रामाण्यमेवेति** (कं. २१८.९) एवकारो भिन्नक्रमः, स चैवं योग्यः; परत एव प्रामाण्यम्। **तस्यापीति** (कं. २१८.९) अपरस्यापि। **न ज्ञातप्रामाण्यमिति** (कं. २१८.११) ज्ञातप्रामाण्यमेव प्रमाणमर्थं परिच्छिनत्त्येवं निश्चयो नास्तीत्यर्थः। तर्हि किमर्थं ज्ञानान्तरमपेक्षते इत्यत्राह **तेनत्वर्थे** (कं. २१८.११) इत्यादि। **कुतश्चिन्निमित्तादिति** (कं. २१८.१२) अभ्यासपाटवाभावात् अखिलविशेषाग्रहणाद्वा। **विषयसन्देहादिति** (कं. २१८.१२) विषये एव सन्देहो न पुनर्ज्ञानम्। [9]**कारणान्तरादिति** (कं. २१८.१३) ज्ञानान्तरात्। [10]**अखिलविशेषग्रहः ग्रहणादिति** (कं. २१८.१४) सामीप्यादिना।

[कु०] ननु ज्ञानत्वेन सह परापरभावाज्जातिः, तथाहि यदि ज्ञानत्वं, परमज्ञाने चक्षुषि प्रामाण्यं न स्यात्, अथ प्रमाणत्वं, परमप्रमाणे संशयादौ ज्ञानत्वं न स्यात्, तस्मादव्यभिचार्यनुभवकरणत्वं प्रामाण्यमिति स्थिते तस्य स्वतस्त्वं दूषयितुं विकल्पयति **तत्किमिति** (कं. २१८)।

---

१ प्रामाण्यस्यापि – कं. १, कं. २; जे. ३। २ प्रतीयमान – जे. २, जे. ३। ३ ज्ञायमाने परेण प्रामाण्यं ज्ञेयम् – कं. १; कं. २। ४ करणा – कं. १; कं. २। ५ [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति। ६ स्वस्माद्वात्मन – अ, ब, क। ७ वृत्ति – अ। ८ प्रामाण्यस्यापि – कं. १। ९ करणान्तरात् – कं. १। १० अखिलविशेषग्रहणात् – कं. १।

## न्यायकन्दली

लेखमेव प्रमाणमुदेति, तत्र तदुत्पत्त्यवार्थनिश्चये प्रमातुर्निराकाङ्क्षत्वात् [1]प्रामाण्यप्रतिपित्सैव नास्तीति न प्रमाणान्तरानुसरणम्। यस्तु तत्रापि ज्ञानस्योभयथा दर्शनेन सन्देहमारोपयति स न शक्नोत्यारोपयितुम्, तदर्थनिश्चयेनैव पराहतत्वात्। यथाह मण्डनो ब्रह्मसिद्धौ–

"[2]अनाश्वासो हि विज्ञाने ज्ञानेनैवापबाध्यते" इति।

यदि प्रवृत्त्यर्थं प्रामाण्यं [3]जिज्ञास्यते? यत्रानवधारितप्रामाण्यस्यैवार्थसंशयात् प्रवृत्तिरभूत् तत्रार्थप्राप्तिपरितुष्टस्य प्रामाण्ये जिज्ञासा नास्ति, कथं प्रवृत्तिसामर्थ्यात् प्रमाणस्यार्थवत्त्वावधारणम्? न तत्रापि कर्षकस्येव बीजपरीक्षार्थं प्रामाण्यपरीक्षार्थमेव [4]प्रवृत्त-

[टि०] त्यर्थः। यस्तु तत्रापि ज्ञानस्य इति :–दृढे हि ज्ञाने स्थाणुपुरुषज्ञानवदानुभविकस्तावत्सन्देहो [5]नास्त्येव। किञ्चिज्ज्ञानं प्रमाणं दृष्टं किञ्चिच्चाप्रमाणमित्युभयथा दर्शनात्तु यः पुरुष आहार्यसन्देहमारोपयिष्यति [6]सोऽप्यशक्तः [7]दृढे ज्ञाने सन्देहज्ञानस्य कस्याप्यनुदयाद् उत्पादे चातिप्रसङ्गात्।

[8]यदाह मण्डन इति :–तेनैव ज्ञानेन सुनिश्चितेनातिशयवताऽनाश्वासो बाध्यते इति मण्डनाचार्यो ब्रह्मसिद्धिग्रन्थे प्राह। यदि परं प्रवृत्त्यर्थम् इति :– [9]एवमेव तावत्सर्वेष्वपि ज्ञानेषु जिज्ञासा नास्ति यस्मात्तु ज्ञानादर्थे प्रवर्तेत तस्यैव सर्वथा प्रामाण्यमवधारयितुं जिज्ञासा भवतीति प्रमाणान्तरैरजिज्ञासितप्रामाण्यैरेव प्रवर्तकस्य [10]ज्ञानस्य प्रामाण्यमवधार्यत इति भावः।

[पं०] न प्रमाणान्तरानुसरण(कं. २१८.१६)मित्यत्र प्रमाणान्तरमर्थनिर्भासादि। तत्रापीति (कं. २१८.१७) प्रमृष्टसन्देहकलङ्केपि प्रमाणे। उभयथा दर्शनेनेति (कं. २१८.१७) सत्यासत्यत्वदर्शनेन। आरोपयितु(कं. २१८.१७)मित्यत्र सन्देहमिति कर्मपदम्। ज्ञानेनैवेति (कं. २१८.१९) सुनिश्चितेनातिशयेन।

परवाक्यं यदी(कं. २१८.१९)त्यादि। [11]जिज्ञास्यते (कं. २१८.१९) इत्यस्मात्पुरस्तदेत्यध्याहार्यम्। कथं प्रवृत्तिसामर्थ्यादित्यादि (कं. २१८.२१) प्रवृत्तिसामर्थ्यादिति कोऽर्थः? संगता–अर्थेन समर्था–अर्थाव्यभिचारिणी प्रवृत्तिस्तस्या भावः सामर्थ्यम्। प्रवृत्तेः सामर्थ्यः प्रवृत्तिसामर्थ्यः तस्मादिति समासः। प्रमाणतोऽर्थप्रतिपत्तौ 'प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्' इति न्यायभाष्यवचनाऽवष्टम्भेन प्रवृत्तिसामर्थ्यात् प्रमाणस्यार्थवत्ताऽवधारणं

[कु०] तत्राद्य दूषयति यदि तावदिति (कं. २१८)–उत्पद्यमानेन ज्ञानेन स्वप्रामाण्यग्रहे सति तदप्रामाण्यसंशयो तस्य विशेषाग्रहणकारणत्वादिति भावः। विपर्ययज्ञाने चेति (कं. २१८)–समानन्यायतया तेनापि स्वकीयस्याप्रामाण्यस्य ग्रहणादिति भावः।

---

१ प्रतिपित्स्यैव – कं. १, कं. २; अप्रामाण्यप्रमित्यैव – जे. ३। २ अनाश्वासो ज्ञायमाने–कं. १, कं. २। ३ विजिज्ञास्यते–कं. १; कं. २। ४ प्रवृत्तिरस्यास्त्येव–कं. १; कं. २। ५ नास्त्य च–अ, ब। ६ सोणशक्तो – अ, ब। ७ दृष्टे ज्ञानसन्देहस्य – अ, ब, क। ८ यथाह – मु. जे. १, जे. २, जे. ३। ९ एवमेवतावय्य-पर्वेष्वपि–अ। १० प्रवर्तकस्य प्रामाण्यमवधार्यते – अ, ब। ११ विजिज्ञास्यते–कं. १।

### न्यायकन्दली

स्यास्त्येवं [1]तर्दथिता ज्ञाने। [2]यस्य तु प्रामाण्यसन्देहादर्थे [3]सन्दिहानस्यार्थग्रहणार्थमेव प्रवृत्तिर्जाता, तस्यार्थप्राप्तिचरितार्थस्यानभिसंहितमपि प्रामाण्यावधारणं वस्तुसामर्थ्याद्भवति, प्रवृत्तिसामर्थ्यस्य प्रामाण्याव्यभिचारात्। तदेवं तावत् प्रामाण्यं स्वतो न ज्ञायते। नापि स्वतो जायते। यदि ज्ञानमुत्पद्य पश्चात् स्वात्मनि यथार्थपरिच्छेदकत्वं जनयति, प्रतिपद्येमहि तस्य स्वतः प्रमाणताम्। यथार्थावबोधस्वभावस्यैव तस्य [4]स्वीय कारणादुत्पत्तिं पश्यन्तः परापेक्षमेव तस्य [5]प्रामाण्यं मन्यामहे।

अथ मन्यसे प्रमाणं स्वयमेव [6]स्वस्य प्रामाण्यं जनयतीति स्वतः प्रमाणत्वं न ब्रूमः, अपि तु ज्ञानं प्रामाण्योत्पादाय स्वोत्पादककारणकलापादन्यन्नापेक्षत इति स्वतः

[टि०] ननु मुक्त्यादौ बहुतरायाससाध्ये प्रमाणान्तरावधारित[7]प्रामाण्यादेव ज्ञानात्प्रवृत्तिर्भवतु जलादौ पुनः [8]सुखप्राप्येऽर्थे प्रमाणान्तरैरनवधारितप्रामाण्यादेव [9]ज्ञानमात्रात् प्रवृत्तिर्दृश्यते इति कुतः परतः प्रामाण्यम्? नैवम्, तत्रापि प्रवृत्तिसामर्थ्यादेव [10]प्रामाण्यमवधार्यते न स्वतः अत उक्तं "प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्।" अत्र च संगता अर्थेन समर्थाऽर्थाव्यभिचारिणी प्रवृत्तिस्तस्याभावस्तस्माद् इत्येवमाक्षेपपरिहारावत्रानु[11]क्तावपि द्रष्टव्यौ।

अथ परः प्रवृत्तिसामर्थ्यादपि प्रमाणताममृष्यन्नाह यत्रानवधारित[12]प्रामाण्यस्य इति। यदि ज्ञानमुत्पद्य इति

[पं०] यद्भवद्भिरुच्यते तदयुतामिति वाक्यार्थः। अथ श्रीधरः प्राह न तत्रापीत्यादि (कं. २१८.२१)। **तदर्थितेति** (कं. २१८.२२) प्रामाण्यज्ञानार्थिता। **प्रवृत्तिसामर्थ्यस्येति** (कं. २१८.२४) सामर्थ्यं संगतार्थत्वमेवाव्यभिचारित्वमित्यर्थः। ततश्च प्रवृत्तेः सामर्थ्यं [13]प्रवृत्तिसामर्थ्यं तस्येति विग्रहः। **स्वतो न ज्ञायते** इति (कं. २१८.२५) किन्तु परतः। **यदि ज्ञानम्** (कं. २१९.१) इत्यादि वाक्यस्यायं भावार्थः। स्वस्माज् ज्ञानस्वरूपादेव ज्ञानस्य प्रामाण्यं जायते इत्ययमर्थस्तदा घटते यदा ज्ञानं पूर्वमुत्पद्य पश्चात्स्वयमेव स्वात्मनि यथार्थं परिच्छेदकत्वं प्रामाण्यमुत्पादयति, न पुनरेवमनुभूयते। **जनयती**(कं. २१९.१)त्यतः पुरस्तदेति पदमध्याहार्यम्। **प्रमाणता**(कं. २१९.२)मित्यतः पुरः किन्त्वित्यध्याहार्यम्। **यथार्थावबोधस्वभावस्यैवे**त्यतः (कं. २१९.२) पुरः पुनरिति पदमध्याहार्यम्। **तस्येति** (कं. २१९.२) ज्ञानस्य। [14]**स्वीयकारणादुत्पत्तिमिति** (कं. २१९.३) स्वीयात्कारणादुत्पत्तिर्दृश्यते न तु स्वज्ञानस्वरूपादित्यर्थः। **परापेक्षमेवेति** (कं. २१९.३) कारणमपि हि परम्।

[कु०] अयं च न्यायः,—साधारणग्राहकादेव स्वप्रामाण्यग्रहेऽपि समान इत्याशये परस्याकौशलं शंकते **अथ स्वात्मनीति** (कं. २१८)—घटकुद्या(ऽयां) प्रभातमिति न्यायेनोत्तरमाह न चेति(?) समानन्यायतया तेनापि स्वकीयं प्रामाण्यं परतो ज्ञायते। अनभ्यस्तदशायां सांशयिकत्वात्, अप्रामाण्यवदिति।

---

१ तदर्पिता—कं. १, कं. २; जे. ३। २ यस्य—कं. १, कं. २। ३ सन्देहस्तस्यार्थग्रहणार्थमेव प्रवृत्तस्यार्थप्राप्ति चरितार्थस्य—जे. ३। ४ कारणा—कं. १; कं. २। ५ तस्य प्रामाण्यं—कं. १; कं. २। ६ स्वकीयं—कं. १; कं. २। ७ प्रामाण्यात् ज्ञानात्—ह। ८ सुखप्राप्ये—अ, ब। ९ ज्ञानमात्रात्—अ, ब, क। १० प्रामाण्यमवधार्यते—अ। ११ नुक्तामपि—अ, ब। १२ प्रामाण्यति—अ, ब। १३ प्रवृत्तिसामर्थ्यं प्रवृत्तिसामर्थ्यं—पञ्जिकायां पुनरावृत्तम्—सं.। १४ 'कारणादुत्पत्ति'—कं. १।

न्यायकन्दली

प्रामाण्यम्। एतदप्यसत्। यदि ह्यन्यूनानतिरिक्तज्ञानोत्पादिकैव सामग्री प्रामाण्ये कारणम्, विपर्ययज्ञानं कुतः? यथार्थज्ञानजननं कारणानां स्वभावः, स यदा दोषैः प्रच्याव्यते तदा तान्ययथार्थज्ञानं जनयन्ति, यदा तु स्वभावप्रच्युतिहेतवो दोषा न भवन्ति, तदा तेषां यथार्थज्ञानजननमेव स्वभावो व्यवतिष्ठत इति चेत्? तत् किं वक्तृज्ञानमात्रादेव तत्पूर्वके वाक्ये यथार्थतोत्पादः? [1]नन्वेवं सति सर्वमेव वाक्यमवितथं स्यात्। अथ प्रमाणज्ञानाद्वाक्ये [2]यथार्थतोत्पादः? न तर्हि कारणस्वरूपमात्रात् प्रामाण्यमपि तु तद्गुणात्। शब्दस्य कारणमर्थज्ञानम्, तस्य गुणो यथार्थत्वम्। अयथार्थत्वं च दोषः। [3]तत्र यथार्थताया वाक्यप्रामाण्यहेतुत्वे कारणगुणादेव तस्य प्रामाण्यम्, न स्वरूपमात्रात्।

[टि०] स्वतः स्वस्माद् ज्ञानस्व[4]रूपादेव ज्ञानस्य प्रामाण्यं जायते इत्ययमर्थस्तदा घटते यदा ज्ञानं पूर्वमुत्पद्य पश्चात्स्वयमेव स्वात्मनि यथार्थपरिच्छेदकत्वं प्रामाण्यमुत्पादयति न पुनरेवमनुभूयते इति दर्शयति **यथार्थावबोधस्वभावस्यैव** इति.–स्वीयात्कारणादुत्पत्तिर्दृश्यते न तु स्वस्मात् ज्ञानस्वरूपादित्यर्थः। अथ परमाशङ्कते [5]**यथार्थज्ञानजननमिति** एतेन दोषाणामपि यथार्थज्ञानजननलक्षणकारणस्वभावप्रच्यावनद्वारेण मिथ्याज्ञानोत्पत्तौ सहकारित्वात् अप्रामाण्यं परत उत्पद्यते प्रामाण्यं तु ज्ञानसामग्रीत एवेति पर[6]सिद्धान्तो दर्शितः। अथ गुणानामपि प्रामाण्योत्पत्तौ कारणत्वं सिषाधयिषु[7]र्दृष्टान्तार्थं वाक्यस्य यथार्थतां प्रतिपादयति **तत्किं** [8]**वक्तृज्ञानेति**। अथ **प्रमाणेति** वक्तृसम्बन्धिनो ज्ञानमात्रादेव [9]तावन्न तत्पूर्वकस्य

[पं०] [10]**प्रामाण्ये कारण** (कं. २१९.७)मित्यस्मात्पुरस्तर्हि इत्यध्याहार्यम्। परवाक्यं **यथार्थेत्यादि** (कं. २१९.७)। **तत्किमिति** (कं. २१९.१०) काक्वा व्याख्येयम्। **वक्तृज्ञान**[11]**मात्रत्वादिति** (कं. २१९.१०) वक्तुः सम्बन्धि यज्ज्ञानं [12]केवलमस्मादित्यर्थः। **प्रमाणज्ञानादिति** (कं. २१९.११) प्रमाणभूतज्ञानात्। **तद्गुणादिति** (कं. २१९.१२) कारणात्। एतदेव स्पष्टयति **शब्दस्य कारण**(कं. २१९.१२)मित्यादिना। **तद्गुणादिति** (क. २१९.१२) अर्थज्ञानगुणात्। **ज्ञानान्तराणामिति** (कं. २१९.१५) प्रत्यक्षादीनाम्। **शब्दाधीनप्रमाणज्ञानवदिति** (कं. २१९.१६) शब्दगतप्रमाणज्ञान[व]दित्यर्थः।

**कारणगुणस्येति** (कं. २१९.१७) कारणयथार्थत्वस्य। **दोषप्रतिबन्धादिति** (कं. २१९.१८) दोषबाधनात्।

[कु०] अस्य प्रतिकूलतर्कतयाऽनवस्थामाशंकते **परेण प्रामाण्ये इति** (कं. २१८)–अन्वयव्यतिरेकाभ्यां जिज्ञासायाः प्रामाण्यज्ञानं प्रति कारणत्वं दर्शयन् परिहरति [13]**नानेनानवस्थेति** (कं. २१८)। जिज्ञासायाः सार्वत्रृ(त्रि)कत्वमाशकते **यस्तु तत्रापीति** (कं. २१८)। परिहरति **स न शक्नोतीति** (कं. २१८)। **तदर्थनिश्चयेनेति** (कं. २१८)–इदं प्रामाण्यं सांशयिकप्रामाण्यं प्रमाणत्वादित्यस्यातथात्वेन निश्चायकत्वानुपपत्तेरिति भावः।

---

१ एवं–कं. १; कं. २। २ तदुत्पादः–जे. १, जे. २। ३ तत्र ज्ञाने–जे. १। ४ स्वरूपादिदेव–अ। ५ अयथार्थ–अ, ब। ६ सिद्धं तो–अ, ब। ७ दृष्टान्तार्थवाक्यस्य–अ, ब। ८ वक्तिज्ञानेति–अ, ब। ९ तावत्तत्पूर्वकस्य–अ, ब, क। १० प्रामाण्यकारणं–कं. १; अत्र पञ्जिकाकृता 'पुरः' तर्हि इत्यध्याहार्यम् इति सूचितं तत्तु न सम्यक्, अर्थदृष्ट्या पश्चात् 'तर्हि' इत्यध्याहार्यम्। एवं तर्हि विपर्ययज्ञानं कुतः? इति प्रश्नः संगतो भवति–सं.। ११ मात्रादिति–कं. १; १२ केवलास्यादित्यर्थः–पं.। १३ नानवस्था–कं.।

न्यायकन्दली

शब्दस्य च गुणात् प्रामाण्ये ज्ञानान्तराणामपि तथैव स्यात्। विवादाध्यासितानि विज्ञानानि कारणगुणाधीनप्रामाण्यानि प्रमाणज्ञानत्वाच्छब्दाधीनप्रमाणज्ञानवत्।

शब्देऽपि कारणगुणस्य दोषाभावे व्यापारो न प्रामाण्योत्पत्ताविति चेत्? न, गुणेन दोषप्रतिबन्धाद् दोषकार्यस्यायथार्थत्वस्योत्पत्तिर्मा भूत्, यथार्थत्वोत्पादस्तु कुतः? कारणाभावे हि [1]कार्याभावो न तु विपरीतस्य [2]कार्यस्य भावः। ज्ञानस्वरूपमात्रादिति चेत्? न, तस्याविशेषात्। अर्थसम्बन्धो हि ज्ञानस्य विशेषः, स चेद्दोषप्रतिबन्धमात्रोपक्षीणत्वाद्यथार्थतोत्पत्तावनङ्गम्, स्वरूपस्याविशेषाद् नार्थविशेषनियतं वाक्यं स्यादविशेषाद्विशेषसिद्धेरभावात्। अथ यदर्थविषयं ज्ञानं तदर्थविषयमेव [3]तद् वाक्यं जनयतीति, तदा ज्ञानस्य यथार्थतैव वाक्यस्य यथार्थताहेतुः, न बोधरूपतामात्रमित्यायातं तस्य

[टि०] वाक्यस्य प्रामाण्यावधारणं मिथ्यार्थस्य वाक्यस्य सर्वथाऽभावप्रसङ्गात्। तस्मात्प्रमाणभूतवक्तृज्ञानपूर्वकं यद्वाक्यं तस्यैव प्रामाण्यमिति यथार्थत्वस्य वक्तृज्ञानगुणस्यापि कारणत्वं सिद्धमिति भावः। कारणगुणाधीनत्वस्य दृष्टान्तेऽसिद्धिमाशङ्कते शब्देऽपि कारणगुणस्येति। अत्र च दृष्टान्तः [4]साध्यविकलत्वाद् विपक्षः तत्र हेतोर्गमनाद् [5]विरुद्धो हेत्वाभासः। अर्थसम्बन्धो हि इति–[6]बोधमात्रे हि ज्ञानस्य [7]स्वरूपं प्रतिनियतार्थसम्बन्धश्च विशेषः। स यदि विशेषः प्रतिनियतार्थसम्बन्धलक्षणो गुणो दोषप्रतिबन्धमात्रमेव करोति अन्यत्र तु प्रामाण्योत्पत्त्यादावकिञ्चित्करस्तदा स्वरूपमात्रस्य ज्ञानरूपता[8]मात्रस्याविशिष्टत्वात् [9]तत्पूर्वके वाक्ये इदं घटनियतमिदं पटनियतमित्यर्थविशेषनियमो न

[पं०] [10]यथार्थतोत्पादस्तु कुत इति (कं. २१९.१८) यथार्थोत्पादस्तु भवन्मते कुतः सिध्यतीत्यर्थः। विपरीतस्येति (कं. २१९.१९) यथार्थत्वस्य। ज्ञानस्वरूपमात्रादिति (कं. २१९.१९) ज्ञानस्य स्वरूपादेव केवलाद्यथार्थतोत्पादो न तु गुणादिति भावः। श्रीधरः प्राह न तस्याविशेषादिति (कं. २१९.२०) ज्ञानस्वरूपमात्रं यथार्थत्वेऽयथार्थत्वे वा विशिष्टम्, बोधमात्रं हि ज्ञानस्य स्वरूपं प्रतिनियतार्थसम्बन्धश्च विशेष्यः। स यदि विशेषः प्रतिनियतार्थसम्बन्धलक्षणो दोषप्रतिबन्धमात्रमेव करोति अन्यत्र प्रमाणोत्पत्यादावकिञ्चित्करस्तदा स्वरूपमात्रस्य ज्ञानस्वरूपतामात्रस्याऽविशिष्टत्वात्तत्पूर्वके वाक्ये 'इदं घटनियतम्', 'इदं पटनियतं' इत्यविशेषनियमो न स्यात्। कारणगताद् बोधरूपत्वमात्र लक्षणादविशेषादर्थविशेषनियमलक्षणाया विशेषसिद्धेरभावात, कारणगतविशेषस्यैव कार्यविशेषहेतुत्वादिति भावः। तस्या विशेषादिति यदुक्तं तदेव विवृणोति अर्थसम्बन्धो हि (कं. २१९.२०) इत्यादिना। विशेष इति (कं. २१९.२०) गुणः। अर्थविशेषनियतमिति (कं. २१९.२२) इदमेनेत्येव [11]नियमितार्थप्रतिबद्धम्। [12]तदवाक्यं जनयती (कं. २१९.२३)

[कु०] अस्त्वेवं जिज्ञासायां प्रामाण्यग्रहणादनवस्थाभावः। तत्र प्रामाण्यग्राहकस्य प्रवृत्तिसामर्थ्यलिंगस्य व्याप्तिग्रहणं न संभवतीत्याशयेन चोदयति यदे(दी)ति भाष्यमवतारयितुम्।

---

१ कार्यस्याभावो–जे. १, जे. २। २ भावः–कं. १; कं. २। ३ वाक्यं–कं. १; क. २। ४ साधनविकलत्वाद् –अ, ब, क। ५ विरुद्धा हेत्वाभासाः–अ, ब। ६ बोधमात्रे–अ, ब। ७ स्वरूपे–अ, ब। ८ मात्रस्य विशिष्टत्वात्–क। ९ पूर्ववाक्ये–अ, ब, क। १० यथार्थत्वो–कं. १। ११ नियतार्थप्रसिद्धम्–ब। १२ वाक्यं जनयति–कं. १।

न्यायकन्दली

**गुणादेव प्रामाण्यम् । अस्तु वा गुणस्य दोषाभावे व्यापारस्तथापि परतः प्रामाण्यं न हीयते, तदुत्पत्तौ सर्वत्र कारणस्वभावव्यतिरिक्तस्य दोषाभावस्याप्यन्वयव्यतिरेकाभ्यां सामर्थ्यावधारणात् । [1]दोषाभावाद्विपर्ययाभावः, प्रामाण्यं त्विन्द्रियादिस्वरूपमात्राधीनमिति चेत्? दोषैः प्रामाण्योत्पत्तिः प्रतिबध्यते, विपर्ययः पुनरिन्द्रियादिस्वरूपा[2]धीन एवेति कस्मान्न कल्प्यते? दोषान्वयव्यतिरेकानुविधायित्वाद्विपर्ययस्य नैवं कल्पनेति चेत्? प्रामाण्यस्यापि दोषाभावान्वयव्यतिरेकानुविधायित्वदर्शनान्न तत्कल्पनेति समानम् । नहि तदस्ति प्रमाणं यद्दोषाणां प्रागभावं प्रध्वंसाभावं नापेक्षते ।**

**एवं [3]प्रवृत्त्यादिकार्यजननव्यापारोऽपि प्रमाणस्य परत एव न स्वरूपमात्राधीनः, उपकारापकारादिसापेक्षस्य प्रवृत्त्यादिकार्यजनकत्वादित्येषा दिक् ।**

[**टि०**] स्यात् कारणगताद् बोधरूपतामात्रलक्षणाद[4]विशेषा[दर्थविशेषनियमलक्षणाया]विशेषसिद्धेरभावात् कारणगतविशेषस्यैव कार्यविशेषहेतुत्वादिति भावः । **दोषैः प्रामाण्योत्पत्तिः** इति अप्रामाण्यमपि स्वतः किन्न कल्प्यते इति भावः । **न हि तदस्ति प्रमाणम्** इति ननु भावरूपकारणापेक्षया स्वतो जायत इत्युच्यते [5]तदत्रास्त्येवेति । नैवम्, अभावरूपाणामपि दोषाणां सम्भवात्तेषामभावस्य भावरूपत्वात् ।

अथ तृतीयं विकल्पं निराचष्टे [6]**एवं व्यापारोऽपि** इति—प्रामाण्यं स्वतो व्याप्रियते इति [7]तृतीयस्य विकल्पस्यायमर्थः, प्रमाणमुत्पन्नं सत् कारणानपेक्षं प्रमातुः प्रवृत्तिनिवृत्त्यादिकं व्यापारं जनयतीति तन्नास्ति, अस्मृतयस्तू[8]पकारापकारस्य ज्ञानमात्रादेवाप्रवृत्तेरुपकारापकारस्मरणस्य ज्ञानातिरिक्तस्य व्यापारेणापे[9]क्षणीयत्वात् । अनुमाने तु प्रमा ज्ञानमात्रहेत्वतिरिक्तहेतुजन्या, कार्यत्वे सति ज्ञान[10]विशेषत्वात् अप्रमावत् । अत्र ईश्वरज्ञानव्यवच्छेदार्थं कार्यत्वे सतीत्युक्तम् । तथा प्रामाण्यं परतो ज्ञायतेऽनभ्यासदशायां सांशयिकत्वाद् अप्रमाणवत् ॥ इति शब्दान्तर्भावः ॥

[**पं०**] त्यत्र तदिति ज्ञानम् । **तस्येति** (कं. २१९.२४) वाक्यस्य । **गुणादेवेति** (क. २१९.२४) याथार्थ्यादेव । **दोषाभावे** इति (कं. २१९.२४) दोषाभावे एव । **परतः प्रामाण्यं न हीयते** इति (कं. २१९.२५) दोषाभावस्यैव परत्वात् । **परवाक्यं दोषाभावादित्यादि** (कं. २२०.२) । ज्ञानस्याप्रामाण्यमपि स्वतः किन्न कल्प्यते इति परं प्रति चोदयन्नाह **दोषैः प्रामाण्योत्पत्तिः प्रतिबध्यते** (कं. २२०.३) इत्यादि । यापि प्रामाण्योत्पत्तिः प्रतिहन्यते न तु विपर्ययः क्रियते, विपर्ययः पुनरिन्द्रियमनस्स्वरूपाधीन एवेति कस्मान्न कल्प्यते इति वाक्यार्थः । [11]**न तत्कल्पनेति** (कं. २२०.४) इन्द्रियादिस्वरूपमात्राधीनत्वकल्पना न प्रामाण्यस्याभिमतेत्यर्थः । **यद्दोषाणां प्रागभावं प्रध्वंसाभावं नापेक्षते** (कं. २२०.६) इति दोषेष्वनुपगतेषूपगतेषु वा प्रामाण्यमिति भावः ।

'किं वा स्वतो व्याप्रियते' इत्येतं तृतीयविकल्प चर्चयति [12]**एवं व्यापारोपीत्यादिना** (कं. २२०.७) । परत एवेति यदुक्तं किं तत्परमित्याह **उपकारेत्यादि** (कं. २२०.८) । **प्रवृत्यादीति** (कं. २२०.८) उपकारस्मरणे प्रवृत्तिः अपकारस्मरणे निवृत्तिः । [13]प्रयुक्त इति प्रेरितः ।

---

१ दोषाभावाच्च—जे. ३ । २ धीन इति—कं. १; कं. २; जे. ३ । ३ एवं व्यापारोपि—जे. १, जे. २, जे. ३ । ४ लक्षणादर्थविशेषः—क; [ ] एतच्चिह्नान्तर्गतः पाठः अ, ब,पुस्तकयोर्नास्ति । ५ तदत्राप्यस्त्येव —अ, ब; तदत्रास्त्येव—क । ६ एवं प्रवृत्यादिकार्यजननव्यापारोऽपि मु. एवं व्यापारोऽपि—जे. १, जे. २, जे. ३ । ७ तृतीय—अ, ब, क । ८ स्तूपकारोपकारस्य—क । ९ पक्षणीयत्वात्— अ, ब । १० विशेषात्—अ, ब । ११ नैवं कल्पना —कं. १ । १२ एवं प्रवृत्त्यादिकार्यजननव्यापारोऽपि—कं. १ । १३ प्रतीकमिदं कं. १ पुस्तके नास्ति ।

## प्रशस्तपादभाष्यम्

**[188] प्रसिद्धाभिनयस्य चेष्टया प्रतिपत्तिदर्शनात् तदप्यनुमानमेव ।**

## न्यायकन्दली

**[188] हस्तस्या[1]वाङमुखाकुञ्चनादाह्वानं प्रतीयते, पराङमुखो[2]त्क्षेपणाच्च विसर्जनप्रतीतिर्भवति, एतत्प्रमाणान्तरमिच्छन्ति केचित् । तान् प्रत्याह–प्रसिद्धाभिनयस्येति । कराकुञ्चनादिलक्षणोऽभिनयोऽनेनाभिप्रायेण क्रियत इत्येवं यत्पुरुषस्य प्रसिद्धोऽभिनयः, तस्य चेष्टया करविन्यासेनाह्वानविसर्जनादिप्रतीतिर्दृश्यते नान्यस्य, अतस्तदपि चेष्टया ज्ञानमनुमानमेव ।**

[टि०] ( ।। अथ चेष्टान्तर्भावनिरूपणम् ।। )

[188] [3]**चेष्टाऽनुमानमेव** इति:–इयं चेष्टा एवंविधार्थाव्यभिचारिणी, [4]एवं समये एवंविधपुरुषेण क्रियमाणचेष्टात्वाद्, [5]मदीयचेष्टावत्; अथवा विधादाध्यासितः पुमान् आवर्जनविसर्जनाभिप्रायवान्, एवंविधाकुञ्जनादिमत्त्वात् यथाऽहमिति ।। चेष्टान्तर्भावः ।।

[पं०] [188-189] **गवा** इति (कं. २२०.२३) व्याख्येयपदं **गोसारूप्येण** (कं. २२०.२३) इति व्याख्यानपदम् ।

**पूर्वमीमांसका** इति (कं. २२०.२६) ।

[कु०] [188] चेष्टायाः पृथक् प्रमाणमाशंकते **हस्तस्येति** (कं. २२०)–यदाभिमुख्येन हस्ताकुञ्चनं क्रियते तत्कृतिव्याप्यमाकुञ्चनं तदभिगमनविधेयतया प्रतीयते, [त]दाभिमुखेन हस्तस्य पराङ्मुखात् क्षेपणं क्रियते, तत्कृतिव्याप्यमुत्क्षेपणं कर्त्रपेक्षया दूरदेशगमनं च तथा प्रतीयते । तदेतादृशहस्तकर्मतादृशमर्थविशेषं प्रतिपादनप्रमाणम् । न चेन्द्रियसंबन्धाभावादनुमानम् । अतः पृत(थ)गेतत्प्रमाणमित्यर्थः ।

**कराकुञ्चनादीति** (कं. २२०) यत्र चेष्टायां संकेतविशेषणार्थप्रतिपत्तिः, सा शब्द इवाभिप्रायावच्छेदकमनुमापयतीत्यनुमानमेव । एवं च प्रयोगः–अयं पुरुषो मम स्वसमीपदेशप्राप्ति विधेयतया विप्रैति, मदाभिमुख्येन विशिष्टांगुलिविन्यासवत्त्वात् । यो यदाभिमुख्येन विशिष्टांगुलिन्यासवान् तस्य स्वसमीपदेशप्राप्ति विधत्ते । यथाऽहम् । एवं विसर्जनेऽपि द्रष्टव्यमित्यर्थः ।

---

१ अधोमुखा–जे. १ । २ उत्क्षेपाच्च –जे. १, जे. २, जे. ३ । ३ चेष्टया ज्ञानमनुमानमेव मु. ४ एवंविधा–अ, ब । ५ चेष्टात्ववित् चेष्टावत्– अ, ब ।

प्रशस्तपादभाष्यम्

[189] आप्तेना[1]प्रसिद्धस्य गवयस्य गवा गवयप्रतिपादनादुपमानमाप्तवचनमेव ।

न्यायकन्दली

[189] उपमानस्यानुमानेऽन्तर्भावं कुर्वन्नाह—आप्तेना[2]प्रसिद्धस्य गवयस्य गवा गवयप्रतिपादनादुपमानमाप्तवचनमेव । आप्तिः साक्षादर्थस्य प्राप्तिः यथार्थोपलम्भः, तया वर्त्तते इत्याप्तः साक्षात्कृतधर्मा [3]यथादृष्टस्यार्थस्य चिख्यापयिषया [4]प्रयुक्तोपदेष्टा, तेनाप्तेन वनेचरेण विदितगवयेना[5]प्रसिद्धगवयस्याज्ञातगवयस्य नागरिकस्य कीदृग्गवय इति पृच्छतो गवा गोसारूप्येण गवयस्य प्रतिपादनादुपमानं यथा गौर्गवयस्तथेति वाक्यमाप्तवचनमेव, वक्तृप्रामाण्यादेव [6]तत्रार्थप्रतीतेः । आप्तवचनं चानुमानम् । तस्मादुपमानमप्यनुमानाव्यतिरिक्तमित्यभिप्रायः ।

[टि०] ( ॥ अथ उपमानान्तर्भावनिरूपणम् ॥ )

[189] आप्तिः साक्षाद् इति साक्षादिति द्रढतरप्रमाणोपलक्षणार्थं तेनानुमानेऽप्यर्थप्राप्तिराप्तिः साऽस्यास्तीति [7]अभ्राद्यच् ।

जरन्मीमांसकमतोपमानमुपदर्श्यान्तर्भावयति [8]ये तावत्पूर्वेति । [9]येऽपि शबरस्वामीति—[9]एतेषां मते गवये सारूप्यदर्शनं करणं [10]स्वकीयगोसादृश्यं(श्य) [11]विषयस्तद् विज्ञानं प्रमाणफलम् । ननु सादृश्यं संयोग[12]वदुभयनिष्ठं नैकस्यां गवि दृष्टायां गवयाग्रहणे गृहीतमिति कथं तस्य स्मरणमित्यत आह सादृश्यं हि इति यथा सामान्यं सर्वासु

[पं०] [सा]दृश्यं हीत्यादि (कं. २२१.२) एकैकव्यक्ति ग्रहणाधीनं सादृश्यं संयोगस्तु उभयसम्बन्धि ग्रहणाधीन इति वाक्यार्थः । प्रत्येकव्यक्तिसमाप्तिमेव स्पष्टयति गोपिण्डस्येत्या(कं. २२१.४)दिना । अदर्शनेऽपीति (कं. २२१.४) न हि तदा दृष्टा वने गोपिण्डं पश्यन्नस्ति एकैकत्रे[ति] (कं. २२१.६) प्रतिव्यक्तिप्रतिगोपिण्डलक्षणे । तदिति (कं. २२१.७) सादृश्यम् ।

[कु०] [189] इह केचिद्यथा गौस्तथा गवय इति वनेचरवाक्याद् गवयस्य गवा यत्सादृश्यं प्रतीयते तदेवोपमानस्य विषय इति मत्वा तत्प्रतीतिकरणं वनेचरवचनमेवोपमानमित्याचक्षते । तच्च प्रागुक्तन्यायेनानुमानान्तर्गतमित्येवंपरतया भाष्यमवतार्य व्याचष्टे—उपमानस्येत्यादिनाऽनुमानमेवेत्यन्तेन । अत्र गोसारूप्येणेति (कं. २२०) प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया । सादृश्यस्य स्वज्ञानं प्रति अनुपपत्तेः । येत्विति (?) । अस्मिन् सादृ(श्यो)पमाने वनेचरवाक्यभावात्तद्द्वारेणानुमानान्तर्भावो दुर्वचन इति भावः । तदिदं प्रमाणमेव न भवति । ततोऽन्तर्भावः चिन्तनीय इत्याह तदपीति (कं. २२१) ।

---

१ –प्रसिद्धगवयस्य–दे । २ प्रसिद्धगवयस्स – जे. १, जे. २, जे. ३ । ३ यथार्थ – कं. १, कं. २ । ४ प्रयोक्ता – कं. १, कं. २ । ५ प्रसिद्धगवयस्य नागरिकस्य – जे. १, जे. २ । ६ तथा प्रतीतेः – कं. १, कं. २; अथ प्रतीतेः – जे. १; जे. २ । ७ अभ्राद्य च–अ, ब । ८ ये – अ, ब, क । ९ एषां – अ, ब, क । १० स्वकीयं–अ, ब, क । ११ विषयविज्ञानं–अ, ब, क । १२ तदुभयनिष्ठं – अ, ब, क ।

न्यायकन्दली

**ये तावत् पूर्वमीमांसका वनेचरवचनमेवोपमानमाहुः, तेषामिदमनुमानमेव ।**

**[1]येऽपि शबरस्वामिशिष्या अनुभूतस्य गोपिण्डस्य वने गवयदर्शनात् स्मृत्यारूढायां गवि 'मदीया गौरनेन सदृशी' इति सारूप्यज्ञानमुपमानमाचक्षते, तदपि स्मरणमेव । सादृश्यं हि सामान्यवत् प्रत्येकं व्यक्तिसमाप्तं न संयोगवदुभयत्र व्यासज्य वर्तते, गोपिण्डस्यादर्शनेऽपि वने गवयव्यक्तौ गोसदृशोऽयमिति प्रतीत्युत्पादात् । यथोक्तं मीमांसागुरुभिः—**

**सामान्यवच्च सादृश्यमेकैकत्र समाप्यते ।**
**प्रतियोगिन्यदृष्टेऽपि यस्मात् तदुपलभ्यते ।। इति ।**

[टि०] व्यक्तिषु [2]वर्तते तथा सादृश्यमपीति तस्मात्प्रत्येकं व्यक्तिसमाप्तिः । [3][एकैकव्यक्तिग्रहणाधीनं ग्रहणमर्थो ज्ञेयः । संयोगेप्युभयत्र व्यासक्तिरुभयसम्बन्धिग्रहणाधीनं ग्रहणमित्यर्थो व्याख्येयः ।] [4]एकैकव्यक्तिसमाप्तिमेव स्पष्टयति **गोपिण्डस्य** इति–[5]तदानीं वने गोरभावाददर्शनम् । [6]**तथापि स्वाश्रयसन्निकर्षे**ति–प्रतीतिर्जाता [7]केवलं तु न विकल्पितेति भावः । यदि त्वेकैकव्यक्तिनिष्टं न गृह्यते तदा बाधकमाह **यदि गवि पुरा** इत्यादि । [8]**सदृशदर्शनाभिव्यक्ते**ति – गवा सदृशो गवयस्तस्य दर्शनेना[9]भिव्यक्तीकृतो यः संस्कारस्तज्जन्या ।

[पं०] **स्वाश्रयेत्यादि** (कं. २२१.९) स्वाश्रयो गोपिण्डः । **प्रतियोग्यन्तराग्रहणा**दिति (कं. २२१.१०) यदपेक्षया ह्रस्वत्वं दीर्घत्वं च तत्प्रतियोग्यन्तरम् । **स्वाश्रयप्रत्यासत्तिमात्रेण** (कं. २२१.१०) इत्यत्र स्वाश्रयः परिमाणाश्रयः । **स्वरूपतो ग्रहणमिति** (कं. २२१.११) पुनरिदं दीर्घमिदं ह्रस्वमिति ग्रहणं प्रतियोगिनस्तदानीम् व्याप्यग्रहणात् ।

यदि त्वेकैकव्यक्तिनिष्ठं सादृश्यं न गृह्यते तदाबाधकमाह – **यदीत्यादि** (कं. २२१.१३) । **इन्द्रियापातमात्रेणे**ति (कं. २२१.१६) अनेन निर्विकल्पं सूचयति । **न गृहीत**(कं. २२१.१३)मित्यत. पुरस्तदेत्यध्याहार्यम् । **सम्प्रत्यपि गवये न गृह्यते** (कं. २२१.१३) इत्यतः पुर[स्त]येत्यध्याहार्यम् । **अविशेषा**दिति (कं. २२१.१५) गोसदृशं यदि न गृहीतं तदा अग्रहणाविशेषात्महिषाश्वादिस्मरणमपि कुतो न भवतीत्यर्थः । परवाक्यं **यावता**मित्यादि (कं. २२१.१५)। अत्र **प्रत्येक**मिति (कं. २२१.१७) एकैकमवयवं प्रति । **आश्रयग्रहणे**नेति (कं. २२१.१७) गोपिण्डग्रहणेन । आश्रय-ग्रहणेन प्रत्येकं गृहीतानीत्येवं पदघटना । [10]**गृहीतानी**त्यस्मात्पुरस्तदेत्यध्याहार्यम् । **न प्रमाणान्तरमिति** (कं. २२१.१९) न उपमानाख्यं प्रमाणमित्यर्थः । ननु निर्विकल्पकेन गृहीतं कथं स्मर्यते इत्याह–**दृष्टा चे**(कं. २२१.१९)त्यादि ।

[कु०] ननूभयनिरूपणाधीननिरूपणस्य सादृश्यस्य पूर्वमननुभवात्कथमिदं स्मरणमित्यत आह–**सादृश्यं ही**ति (कं. २२१) संयोगिवदेकत्रापरिसमाप्तौ हि उभयनिरूपणाधीननिरूपणत्वमित्यर्थः । नत्वेतदेव । कुत इत्यत आह–**गोपिण्डस्ये**ति (कं. २२१)–न हि व्यासज्यवृत्तिः संयोगादिभिरन्यतरादर्शने प्रतीयत इत्यर्थः । उक्तमर्थं परकीयाभियुक्तवाक्येन दृढयति – **यथोक्त**मिति (कं. २२१) ।

१ ये च–अं. १ । २ वर्ततीति–अ । ३ [ ] एतच्चिह्नान्तर्गतः पाठः अबक पुस्तकेषु नास्ति । ४ प्रत्येक–ड । ५ इदानीं च ते गोरभाव...अ, ब । ६ यदापि–अ, ब, क । ७ केवलं–अ। ८ सदृशदर्शनेनाभिव्यक्तेति–ब । ९ नाभिव्यक्ती–अ । १० 'गृहीतानि' इति कं. १ पुस्तके नास्ति ।

न्यायकन्दली

प्रत्येकं परिसमाप्त[1]त्वेऽपि [2]सादृश्यस्य यद्यपि गवयग्रहणाभावाद् [3]गवयसदृशोऽयमिति। गवि पूर्वं प्रतीतिर्नासीत्, तथापि स्वाश्रयसन्निकर्षमात्रभाविनी सादृश्यप्रतीति[4]रुदितैव। यथा प्रतियोग्यन्तराग्रहणात् तस्मादिदं दीर्घमिदं ह्रस्वमिति [5]प्रत्ययाभावेऽपि स्वाश्रयप्रत्यासत्तिमात्रेण परिमाणस्य स्वरूपतो ग्रहणम्। कथमन्यथा देशान्तरगतः प्रतियोगिनं गृहीत्वा अस्मात् तद्दीर्घं ह्रस्वमिति चाध्य[6]वस्यति।

यदि गवि पुरा सादृश्यमिन्द्रियापातमात्रेण न गृहीतम्? सम्प्रत्यपि गवये न [7]गृह्यते, गवयदर्शनादेव गव्येव च स्मरणमित्युभयनियमो न स्यादविशेषात्। यावतां खुरलाङ्गूलित्वादिसामान्यानां गवि ग्रहणम्, तावतामेव गवयेऽपि ग्रहणात् स्मरणनियम

[**टि०**] ननु [8]निर्विकल्पेन गृहीतं कथं स्मर्यते इत्याह **दृष्टा च** इति – गोत्वव्युत्पत्तिरहितोऽप्येकं गोत्वं दृष्ट्वाऽन्यस्यां गवि गोत्वमिदमिति सञ्ज्ञामजानन्नपि तदेवात्रापि विद्यते इति जानात्येव।

अथ **नैयायिक**मतमुपदर्श्य दूषयिष्यन्नाह **येऽपि श्रुतातिदेशे**त्यादि – प्रसिद्धस्यातिक्रमेण देशनं कथनमतिदेशः प्रसिद्धेनाप्रसिद्धस्य निरूपणम्। एतन्मते ह्यकृतसमयसञ्ज्ञासमभिव्याहृतवाक्यार्थस्मरणसध्रीचीनं गवयपिण्डस्थसादृश्य[9]ज्ञानं प्रमायां करणम्। अस्यार्थः गवयोऽयमित्यकृत[10]सङ्केता या सञ्ज्ञा तयाऽभिव्याहृतं यद् वाक्यं यथा गौस्तथा

[**पं०**] **येऽपीति** (कं. २२१.२१) नैयायिकाः। **श्रुतातिदेशवाक्यस्येति** (कं. २२१.२१) प्रसिद्धेन अप्रसिद्धस्य साधनमतिदेशः। **यथा** [11]**गौस्तथा गवय** इति (कं. २२१.२३) श्रुतमतिदेशवाक्यं येन सः तस्य। **सञ्ज्ञासञ्ज्ञीति** (कं. २२१.२३) गवयेति सञ्ज्ञा सञ्ज्ञी तु गवयपिण्डः। **तज्जनिता चे**(कं. २२१.२३)त्यादि। तज्जनिता च बुद्धिरागम इति पदघटना।

[**कु०**] नन्विदं प्रत्यक्षविरुद्धमित्यत आह – **प्रत्येकमिति** (कं. २२१)। अपेक्षण(?)यान्तराभावात् सविकल्पकाभावेनानुपलम्भभ्रमोऽयं सत्यमेव निर्विकल्पोपलम्भ इत्यर्थः। सविकल्पककारणं दर्शयन् दृष्टान्तमाह – **यथा प्रतियोगीति** (कं. २२१)। एवमनंगीकारे व्यवहितायां गवि गवयसादृश्यं दुर्ज्ञानमेवेत्यत आह – **यदि गवीति** (कं. २२१), **उभयनियमो न स्यादिति** (कं. २२१)। उभयोरपि सहाग्रहणे परस्परसादृश्यं नावेक्षतेत्यर्थः। अनुपलब्धगवये न गव्युपलभ्यमानायां प्रतियोगिस्मरणाभावात् सादृश्यं न गृहीतम्। संप्रति तु गोसम्बन्ध्यवयवसामान्यदर्शनात् प्रतियोगिन्यायाया गोस्मरणमिति विशेष इति शंकते – **यावतामिति** (क. २२१)। एवं तर्हि अवयवसामान्यव्यतिरेकेण सादृश्यकल्पनायां कल्पनागौरवमित्याशयवान्परिहरति भूयोवयवेति (कं. २२१)। एवं पूर्वमेव गृहीतं सारूप्यं तत्स्मृतिश्च, सामग्रीभावादिति दर्शयन्नुपसंहरति **तस्मादिति** (कं. २२१)।

---

१ त्वे च – जे. १, जे. २, जे. ३। २ सादृश्यं – कं. १, कं. २। ३ गवयसदृश इति – कं. १, कं. २। ४ उचितैव–कं. १; कं. २। ५ प्रतीत्य–कं. १; कं. २। ६ अध्यवस्येत् – जे. ३; व्यवस्यति – कं. १; कं. २। ७ गृह्यते – कं. १; कं. २; जे. १, जे. २। ८ विकल्पेन–अ, ब; निर्विकल्पकेन–ड। ९ ज्ञानप्रमायां – अ, ब। १० सङ्केतायां सञ्ज्ञा तया – अ; सङ्केतया सञ्ज्ञा तया – ब। ११ गौगवयस्तया – कं. १।

न्यायकन्दली

इति चेत्? भूयोऽवयवसामान्यान्येवोभयवृत्तित्वात् सादृश्यम्। तानि चेत् प्रत्येकमा[1]श्रयग्रहणेन गृहीतानि गृह्यन्ते, गृहीतमेव सादृश्यम्। तस्माद् गवयग्रहणे सत्यसन्निहितगोपिण्डावलम्बिनी सादृश्यप्रतीतिः सदृशदर्शनाभिव्यक्तसंस्कारजन्या स्मृतिरेव, न प्रमाणान्तरम्। दृष्टा च निर्विकल्पकगृहीतस्यापि स्मृतिविषयता, अभ्युपपन्नेनैकपिण्डग्रहणे प्रथममविकल्पितस्य सामान्यस्य पिण्डान्तरग्रहणे प्रत्यभिज्ञानात्।

येऽपि श्रुतातिदेशवाक्यस्य गवय[2]दर्शिनो गोसादृश्यप्रतीत्या 'अस्य गवयशब्दो नामधेयम्' इति संज्ञासंज्ञिसम्बन्धप्रतीतिमुपमानमिच्छन्ति, तेषामपि यथा गौर्गवयस्तथेति वाक्यं तज्जनता च 'लोके यः खलु गवय इति श्रूयते स गोसदृशः' इति बुद्धिरागम एव।

[टि०] गवय इत्येवंरूपं तदर्थस्मरण[3]सहितं तत्सदृशोऽयमिति ज्ञानं प्रमायां करणमिति। सञ्ज्ञासञ्ज्ञासम्बन्धो विषयस्तज्ज्ञानं तु फलमिति। प्रथमं तावद् वाक्यश्रवणकाल एव [4]गवयेऽप्रत्यक्षे सञ्ज्ञासञ्ज्ञासम्बन्धज्ञान[5]लक्षणायाः प्रमायाः करणं वाक्यं तदर्थश्चेति द्वयमप्यन्तर्भावयति तेषामपि यथा इति। शब्दस्यागमत्वं मुख्यं तदर्थस्य तु गौणमिति।

[6]अथ सञ्ज्ञासञ्ज्ञि[7]सम्बन्धज्ञानरूपं फलमपि नोपमानमिति दर्शयति यदपि गोसदृशस्य इति। तत्र तच्छब्दप्रयोगाद् इति–गोसदृशो गवयशब्दवाच्य इति पक्षस्तत्र गो(गवय)शब्दप्रयोगादिति हेतुः। सामान्येन ज्ञानमनुमानमेव

[पं०] अत्र वाक्यस्यागमत्वं मुख्यं तदर्थस्य तु गौणम् इति दृष्टव्यम्। तत्रेति (कं. २२१.२५) गवये। तच्छब्दप्रयोगादिति (कं. २२१.२५) गवयशब्दप्रयोगात्। सामान्येन ज्ञानमनुमानमेवेति (कं. २२२.२) अत्र सामान्येनेति कोऽर्थः? अयं स इति प्रत्यक्षेणानुपदर्शितविषयमित्यर्थः। अनुमानं हि सामान्यविषयमेव न विशेषविषयं धूमवत्त्वेन हि वह्निसामान्यं साध्यत न तु तस्य तापादयो विशेषाः। त्रैलोक्यव्यावृत्तपिण्ड[8]प्रतीतिरिति (कं. २२२.३) असाधारणपिण्डप्रतीतिः। तद्गतत्वेनेति (कं. २२२.४) गवयपिण्डगतत्वेन। तदपीत्यादि (कं. २२२.४) गद्ये तदपि

[कु०] नन्विदं संख्यायां समूहालंबनस्यैव ज्ञानस्य संस्कारकारणत्वोक्तया विरुद्धयत अत आह दृष्टा चेति (कं. २२१)। क्वचिदेवमपि कार्यानुसारात्कल्पनीयं इतरथा कार्यस्याकस्मिकत्वप्रसंगादित्यर्थः।

संप्रति नेष्टाधिकोपमानं शंकते येऽपीति (कं. २२१) अत्र वनेचरवाक्यश्रवणानन्तरं गवयस्य गवा सादृश्यज्ञानमेकम्, विपिनं गतस्य प्रत्यक्षेण द्वितीयम्। तेनैवातद्व्यावृत्त्यगवयपिंडज्ञानं तन्निमित्तकसज्ञानमिति। तत्र चरमं फलं परिशिष्टयम् चतुष्टयं मिलितं करणमिति परस्य सिद्धान्तश्चरमस्य लैंगिकत्वप्रतिपादनेनैव यद्यपि निरस्तः तथापि दृष्टान्ततया पूर्वेषां यथायथं करणभेदमुत्कीर्तयनन्तर्भावयति तेषामिति (कं. २२१)। तत्र प्रथमस्य सादृश्यज्ञानस्य वनेचरवाक्यं करणमित्याह यथा गौरिति (कं. २२१)। संज्ञासंज्ञिसम्बन्धप्रतिपत्ते लैंगिकमाह यदपीति (कं. २२१) तदप्यनुमानमिति (कं. २२१)। (मिथासो?) स्फूट विमतो गोसदृशो गवय सदृश (?) वाच्य इति प्रतिज्ञायाः दर्शितप्रायत्वाद् हेत्वादींश्चतुरावयवानाह तत्रेति ( ? )। सिंहावलोकनन्यायेनोदाहरणस्थमविगा(गा)नेनेति (कं. २२१) हेतोर्विशेषणमनुसंगमीयम्। तच्चाविगानं वनेचरस्याप्तत्वमिति निश्चेयं दृष्टव्यम्। तच्चाप्तप्रय[य]पुन्यमानगवयशब्दविषयत्वादिति हेत्वर्थं इति न वैय्यधिकरणम्। सामान्येन ज्ञानमिति गवांतरसादृश्यवति

१ माश्रयग्रहणे गृहीतानि–जे. १; आश्रयग्रहणेन गृह्यन्ते। २ दर्शने–कं. १; कं. २। ३ सहितं–अ, ब। ४ येऽप्रत्यक्षे–अ, ब, क। ५ लक्षणायाः करण–अ; लक्षणायाः प्रभायाः करण–ब, क। ६ अथा–अ, ब, क। ७ सम्बन्धरूपं–अ, ब, क। ८ बुद्धिः–कं. १।

न्यायकन्दली

यदपि गोसदृशस्य गवयशब्दवाच्यत्वज्ञानं तदप्यनुमानम्, तत्र तच्छब्दप्रयोगात् । यः खलु शब्दो यत्राभियुक्तैरविगानेन प्रयुज्यते स तस्य वाचकः । प्रयुज्यते चारण्य[1]कैरविगानेन गोसदृशे गवयशब्द इति । तस्मात् सोऽपि गवयशब्दवाच्य एवेति सामान्येन ज्ञानमनुमानमेव । प्रत्यक्षे गवये सादृश्यज्ञानं त्रैलोक्यव्यावृत्त[2]पिण्डबुद्धिरपि प्रत्यक्षफलम् । यच्च तद्गतत्वेन संज्ञासंज्ञिसम्बन्धानुसन्धानम्, तदपि सादृश्यग्रहणाभिव्यक्तपूर्वोपजातसामान्यप्रवृत्तगोसदृशगवयशब्दवाच्यत्वज्ञानजनितसंस्कारजत्वादेकत्रोपजातसामान्यविषयसङ्केतज्ञानसंस्कारकृततज्जातीयपिण्डान्तरविषयतच्छब्दवाच्यत्वानुसन्धानवत् स्मरणमेव । एवं हि तदायमनुसन्धत्ते 'अस्यैव तन्मया 'पूर्वमेत[3]च्छब्दवाच्यत्वमवगतम्' इत्युपमानाभावः ।

[टि०] इति–सामान्येनेति अयं स इति प्रत्यक्षेणानुपदर्शितसञ्ज्ञाविषयमित्यर्थः । एवमप्रत्यक्षे[4]गवयेऽन्तर्भावमुद्भाव्येदानीं प्रत्यक्षे गवये उपदेशसहकृतं गोसादृश्यज्ञानं सञ्ज्ञासञ्ज्ञिसम्बन्धलक्षणायाः प्रमायाः करणं नोपमानं भवतीति दर्शयति प्रत्यक्षे गवये सादृश्येति :– त्रैलोक्यव्यावृत्तोऽयम[5]साधारणः पिण्ड इति सञ्ज्ञोल्लेखादर्वाङ्मतिर्भवतीत्येतदपि विकल्प्य दूषितम् । अथ प्रत्यक्षे गवये तत्पिण्डविशेषनिष्ठतया सञ्ज्ञासञ्ज्ञि[6]सम्बन्धज्ञानं [7]फलरूपमन्तर्भावयति यच्च तद्गतत्वेन इति–तदपि स्मरणमेवेति सम्बन्धः । [8]अत्र दृष्टान्त एकत्रोप[9]जातसामान्यविषयेति ॥ उपमानान्तर्भावः ॥

[पं०] सादृश्यग्रहणाभिव्यक्तपूर्वोपजातसामान्यप्रवृत्तगोसदृशगवयशब्दवाच्यत्वज्ञानजनितसंस्कारजत्वात्स्मरणमेवेति पदयोजना । अत्रैव च पूर्वोपजातसामान्येति (कं. २२२.५) सामान्यं खुरलाङ्गूलत्वादि । गोसदृशगवयशब्दज्ञानेति (कं. २२२.५) गोसदृशस्य यद्गवयशब्दवाच्यत्वज्ञानमिति समासः । एकत्रोपजातसामान्ये (कं. २२२.६)त्यादि । अत्र सामान्यं गोसामान्यम् । एकत्रोपजातसामान्येत्यादिग्रंथ योऽर्थः सोऽप्युत्पन्नमेकपिण्डग्रहणेत्यादिना (कं. २२१.२०) प्रागुक्तो द्रष्टव्यः । तच्छब्द इति (कं. २२२.८) गोशब्दः । अयमिति (कं. २२२.७) [अ]स्यनागरकः । अस्यैवेति (कं. २२२.८) गवयपिण्डस्यैव ।

[कु०] गवि वनेचरवाक्यश्रवणसमनन्तरं गवयशब्दवाच्यत्वप्रतीत्यनुदयात्सदृश्य(श)तोपलक्षणत्वे निश्चिते पशुविशेषसादृश्योपलक्षणान्यथानुपपत्त्या वा कवदृतयादि (?) वैलक्षण्येन व्युत्पत्त्या वा पशुविशेषवाचकत्वनिश्चयात्पशुत्वावान्तरसामान्यस्य निमित्ततया क्रोडीकारोऽप्यस्मिन्ननुमानेऽर्थसिद्ध इति भावः ।

प्रत्यक्षे गवय इति इन्द्रियसंबद्धे गवय इत्यर्थः । पिण्डबुद्धिरपीत्यपिशब्देन गवयत्वबुद्धिः, समुच्चीयते । तन्वित्ति ( ! )–[इ]दानीं प्रत्यक्षीकृतगवयत्वे तन्निमित्तयाऽयमसौ गवयशब्दवाच्य इति ताव[त्]संज्ञासंज्ञिसम्बन्धज्ञानम् । कथं तत्र तच्छब्दप्रयोगरूपलिंगकार्यमित्यत आह यच्च तदिति (कं. २२१) । सत्यमिदानीमयमसौ गवय इति ज्ञानं भवत्येव किंतु सा[तद]प्रमाणं भवति । स्मरणरूपत्वात् । स्मरणत्वं च संस्कारजत्वात् । अतः संस्कारोद्बोधकं निर्दिष्टं–सादृश्यग्रहणेति (कं. २२१) । यैस्तु पूर्वागसादृश्यं न ज्ञातं न च शब्दप्रवृत्तिनिमित्तं सादृश्यं, तावद्गुणावयवकर्मसामान्यात्मकं, तस्य तद्वदभिधायिशब्दप्रवृत्तिनिमित्तत्वशंकायां गुणादीनां तद्वत्तासहाभेदप्रसंगात्सप्तमस्य भावरूपस्य सादृश्यशब्दवाच्यस्य प्रमाणबाधायाः प्रागेव दर्शितत्वात् । इत्युपमानान्तर्भावः ।

---

१ ण्यकेना – कं. १; कं. २ ।   २ पिण्डप्रतीतिरपि – जे. १, जे. २ ।   ३ पूर्वमेव तच्छब्द – कं. १; कं. २ ।
४ गवे–ड ।   ५ मसाधारणं–ड ।   ६ सम्बन्धाज्ञानं–अ, ब, क ।   ७ फलं–अ, ब ।   ८ अदृष्टान्त–अ, ब ।
९ ज्ञात–अ, ब, क ।

प्रशस्तपादभाष्यम्

[190-191] दर्शनार्था[1]दर्थापत्तिर्विरोध्येव, श्रवणादनुमितानुमानम् ।

न्यायकन्दली

[190] दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यर्थान्तरकल्प[2]नेत्यर्थापत्तिः । श्रुतग्रहणस्य पृथगभिधानसाफल्यमुपपादयता परेणार्थापत्तिरुभयथोपपादिता दृष्टार्थापत्तिः, श्रुतार्थापत्तिश्च ।

यत्रार्थोऽन्यथानुपपद्यमानोऽर्थान्तरं गमयति, सा दृष्टार्थापत्तिः । यथा जीवति चैत्रो गृहे नास्तीत्यत्राभावप्रमाणेन गृहे चैत्रस्याभावः प्रतीतो जीवतीतिश्रुतेश्च तत्र सम्भवोऽपि प्रतीयते, जीवतो गृहावस्थानोपलम्भात् । न [3]चैकस्य चैत्रादेः युगपदेकत्र भावाभावसम्भवः, तयोः [4]सहानवस्थानविरोधात् । तदयमभावः प्रतीयमानो जीवतीति श्रवणान्नोपप[5]द्यते । अनुपपद्यमानश्च यस्मिन् सति उपपद्यते तत्कल्पयति । जीवतो गृहाभावोऽन्यथा नोपपद्यते । यद्ययं बहिर्न भवतीति जीवतीत्यनेन सह विरोध

[टि०] [190] ( ।। अथ अर्थापत्तिप्रमाणान्तर्भावनिरूपणम् ।। )

**न चैकस्य युगपदेकत्र** इति एकस्य द्रव्यस्येति ज्ञेयं तेन प्रदेशवृत्तेः संयोगस्यैकत्रैवावयविनि भावाभाव[6]सम्भवेऽपि न विरोधः । **सावकाशनिरवकाशयोः** इति बहि[7]र्गृहे च सावकाश जीवतः सत्वप्रतिपादकं शब्दरूपं प्रमाणं गृहादन्यत्रा-

[पं०] [190] **परेणेति** (कं. २२२.१०) मीमांसकेन ।

**तत्रेति** (कं. २२२.१३) गृहे । **विरोध एवेति** (कं. २२२.१७) विरोधे सत्येवेत्यर्थः । **तस्येति** (कं. २२२.१७) अभावस्य । **अनुपपत्तिरिति** (कं. २२२.१७) यः किल जीवति स कथं गृहे न भवति ?। **सावकाशनिरवकाशयोः प्रमाणयोरिति** (कं. २२२.१९) जीवन्प्रतिपादकागमे गृहासत्वप्रतिपादके [प्र]माणमित्यर्थः । **विरोधे सतीति** (कं. २२२.१९) **एकविषययोर्हि** सावकाशानवकाशयोः प्रमाणयोर्विरोधो भवति । **अनुपपत्तिमुखेनेति** (कं. २२२.१९)

[कु०] [190] अर्थापत्त्यन्तर्भावपरं भाष्यमवतारयितुं परेषामर्थापत्तिलक्षणं पुरतो व्याचष्टे **अर्थापत्तिरिति** (कं. २२२)। **दृष्टा श्रुतेति** (कं. २२२) अत्र दृष्टशब्दस्य चाक्षुषज्ञानविषयपरत्वे इन्द्रियान्तरगृहीतस्यानुमितस्य वा ग्रहणप्रसंगा[त्] ज्ञानमात्रविषयपरत्वमप्युक्तम् । तत्र च शब्दगृहीतस्यापि तत एव सिद्धेः शि(श्रु)तग्रहणस्य वैयर्थ्यमित्यत आह **श्रुतग्रहणस्येति** (कं. २२२) गृह्यत इति ग्रहणं श्रुतपदम् । तस्य पृथगभिधानं पृथगुच्चारणम् । ततश्च ब्राह्मणपरिव्राजकन्यायेनाधीयत आह श्रुतार्थापत्तेः कोऽपि विशेषोऽभिमत इत्यभिसंधिना उभयतोऽपि [प्रति]पादिताऽर्थापत्तिरिति भावः। तमेव विशेषं दर्शयति **यत्रार्थं इति** (कं. २२२)–शब्द इति शेषः । एवमर्थान्तरमित्यत्रापि शब्दान्तरमिति द्रष्टव्यम् ।

१ अर्थापत्तिस्तदप्यनुमानमेव । विरोधिन्यैव शब्दश्रवणादनुमितानुमानमेव इति व्या. (५९०–९) सम्मतभाष्यपाठो भाति, दर्शनार्थापत्ति–दे । २ कल्पनार्थापत्तिः– कं. १, कं. २ । ३ चैकस्य युगपदे–कं. १, कं. २; जे. १, जे. २ । ४ सहावस्थान–कं. १, कं. २ । ५ 'यद्ययं बहिर्न भवतीति' इत्यधिकं–कं. १; कं. २ पुस्तकयोः । ६ संभवे–अ, ब । ७ गृहे क्व–अ ।

न्यायकन्दली

एव तस्यानुपपत्तिः। सा चैत्रस्य बहिर्भावे प्रतीते निवर्तते। चैत्रो जीवति गृहे च नास्ति बहिःसद्भावादिति सावकाशनिरवकाशयोः प्रमाणयोर्विरोधे सति निरवकाशस्यानुपपत्तिमुखेन सावकाशस्य विषयान्तरोपपादनात् तयोरविरो[6]धापादनमर्थापत्तिः। या पुनर्देशादिनियतस्य सम्बन्धिनो दर्शनात् सम्बन्धस्मरणद्वारेण सम्बन्ध्यन्तरप्रतीतिः सानुमानमित्यनयोर्भेदो ज्ञानोदयप्रकारभेदात्।

यथोक्तम्—

अन्वयाधीनजन्मत्वमनुमाने व्यवस्थितम्।
अर्थापत्तिरियं त्वन्या व्यतिरेकप्रवर्तिनी ॥ इति।

[2]तथा श्रुतार्थापत्तिरपि यत्रानुपपद्यमानः शब्दः शब्दान्तरं कल्पयति, यथा 'पीनो दिवा न भुङ्क्ते' इति वाक्याद् रात्रौ भुङ्क्त इति [3]वाक्यकल्पना।

[टि०] नवकाशं गृहासत्वप्रतिपादकभाव प्रमाणमिति। [4]अथ धूमादयोऽपि वह्निं विनाऽनुपपद्यमाना वह्न्यादिकं गमयन्तीत्यनुमानमप्यर्थापत्तिरेवेति सिद्धान्तवादिनमाशङ्क्य परः प्राह [5]**या पुनर्देशादीति**। **व्यतिरेकप्रवर्तनीति भट्टमते**

[पं०] न हि जीवतो गृहाभाव उपपद्यते। **सावकाशस्येति** (कं. २२२.२०) जीवत्सावस्य। **विषयान्तरोपपादनादिति** (कं. २२२.२०) अत्र विषयान्तरं बहिर्लक्षणं ज्ञेयम्। **तयोर'विरोधापादनमिति** (कं. २२२.२०) भिन्नविषयतयाऽविरोधः। जीवत्यावस्य हि बहिःसद्भावो विषयः। अभावस्य तु गृहासत्वविषयः। **देशादिनियतस्येति** (कं. २२२.२१) पर्वतादिनियतस्य। **सम्बन्धि न** इति (कं. २२२.२१) धूमादेः। **सम्बन्धस्मरणद्वारेणेति** (कं. २२२.२१) **सम्बन्धः** कार्यकारणभावादिलक्षणः। **सम्बन्ध्यन्तरप्रतीति**रिति (कं. २२२.२१) अत्र सम्बन्ध्यन्तरं वह्निप्रकृतिकम्। **अनयोरिति** (कं. २२२.२२) अनुमानार्थापत्त्योः।

**व्यतिरेकप्रवर्तितीति** (कं. २२२.२४) भट्टमते हि केवलव्यतिरेकी हेतुः पूर्वोक्तस्वरूपार्थापत्तिरेवेति। ततो यत्रान्वयमुखेन प्रवृत्तिस्तत्र तु व्यतिरेक एव तत्रार्थापत्तिः। **पीन** इति (कं. २२२.२६) देवदत्तादिः कर्ता।

[कु०] ननु जीवंश्चैत्रेत्यादेर्वाक्यादियमपि श्रुतार्थापत्तिरेवेत्यत आह – **अत्राभावप्रमाणेनेति** (कं. २२२) – नायं परोक्तवाक्यानुवादः किन्तु स्वयमेव विमर्शप्रकार इत्यर्थः। **जीवतीति** (कं. २२२) **श्रुतेश्चेति** (कं. २२२)–जीवनस्य प्रमाणान्तरसिद्धत्वादित्यर्थः। ननु प्रमाणसिद्धैकानामनुपपत्तिः अत आह **न चैकत्रेति(स्येति)**। ननु विरोधस्तर्ह्यन्यतरद्बाध्यतामित्यत आह **तदयमिति** (कं. २२२)–उभयोरुपजीव्योपजीवकभावाभावेन तुल्यबलत्वात्बाध्यबाधक भाव इति भावः। तर्हि परस्परप्रतिघातादुभयोरप्यसाध्यध(त्व) (धकत्व?)मित्यत आह–**अनुपपद्यमानश्चेति**

---

१ धसाधन–कं. १; कं. २। २ श्रुतार्थापत्तिरपि–कं. १, कं. २; जे. १, जे. २। ३ वाक्यैकदेश–कं. १, कं. २। ४ अध–अ। ५ यो पुनर्देशाद्–अ। ६ रविरोधसाधन–कं. १।

## न्यायकन्दली

तत्र दृष्टार्थापत्तिं तावदनुमानेऽन्तर्भावयति – [1]दर्शनार्थादर्थापत्तिविरोध्येऽवेति । दृश्यत इति दर्शनम्, दर्शनं च तदर्थश्चेति दर्शनार्थः पञ्चभिः [2]प्रमाणैरेवावगतोऽर्थः । तस्माद्दर्शनार्थादर्थान्तरस्यापत्तिरर्थान्तरस्या[3]वगतिर्विरोध्यनुमानमेव । यस्य यथा नियमस्तस्य तथैव लिङ्गत्वम्, इह तु प्रमाणान्तरविरुद्ध एवार्थोऽर्थान्तराविनाभूत इति विरोध्येव लिङ्गम् ।|

अयमभिप्रायः–गृहाभावो यद्यनुपपत्तिमात्रेण बहिर्भावं कल्पयति, नियमहेतोरभावाद् [4]अर्थान्तरमपि कल्पयेत् । स्वोपपत्तये गृहाभावोऽर्थान्तरं कल्पयति, अन्यस्मिन् कल्पिते च न तस्योपपत्तिरिति चेत् ? बहिर्भावे सति तस्योपपत्ति[5]रित्यपि केन कथितम् ? वयं तु ब्रूमो बहिर्भावेऽपि सति गृहाभावस्यानुपपत्तिरेव । दृष्टमेतद् [6]यदव्यापकं

[टि०] [7]केवलव्यतिरेकी हेतुरर्थापत्तिरेवेति । पञ्चभिः प्रमाणैः इति–[8]अर्थापत्तेरेवाद्यापि साध्यमानत्वात्प्रत्यक्षानुमानोपमानशब्दाभावापेक्षया पञ्चभिरित्युक्तम् । [9]अथाविनाभाव एव बहिः सद्भावे गमक इति [10]प्रतिपिपादयिषुराह अयमभिप्राय इत्यादि । बहिर्भावस्य [11]गृहाभावोपपत्तौ गमकताप्रतिपिपादयिषया परः प्राह [12]दृष्टमेतद् यद्व्यापकम् इति । [13]यद्येवम्

[पं०] पञ्चभिरिति (कं. २२३.३) अर्थापत्तेरद्यापि साध्यमानत्वात् पञ्चभिरित्युक्तं यावता षड्भिरिति वक्तुं युक्तमासीत् । अवगतोऽर्थ इति (कं. २२३.३) अर्थो जीवनम् । अर्थान्तरस्येति (कं. २२३.४) बहिर्भावस्य । यस्य यथानियमस्तस्य तथैव लिङ्गत्वमिति (कं. २२३.५) अत्र च विरोधित्वेन लिङ्गत्वमित्यभिप्रायः । प्रमाणान्तरविरुद्ध इति (कं. २२३.५) प्रमाणान्तरं जीवनाभिधायक आगमः । अर्थ इति (कं. २२३.६) गृहे अभावः । अर्थान्तराविनाभूत इति (कं. २२३.६) अर्थान्तरं बहिर्भावलक्षणम् ।

अन्यस्मिन्नि[ति] (कं. २२३.८) मरणे । तस्येति (कं. २२३.७) तच्छब्देन स्वोपपत्तये (कं. २२३.८) इत्यत्र गृहीतस्य 'स्व'शब्दस्य परामर्शः । तस्येति (कं. २२३.९) गृहाभावस्य । गृहाभावस्यानुपपत्तिरिति (कं. २२३.१०)

[कु०] (कं. २२२) – अन्यतरविषयसंकोचकल्पनया उभयोरपि साधकत्वे संभवति । तदभावकल्पनमन्याय्यमित्यर्थः । तदेवोभयोः साधकत्वम् । अनुमानस्य विषयसंकोचं दर्शयति जीवत इति (कं. २२२)–एवं चास्यानुमानाद्बहिर्भाव इत्याह चैत्रो जीवतीति (कं. २२२)–एवं च प्रयोगः ।– अर्थापत्तिर्नानुमानम् । व्याप्तिपक्षधर्मतयोरननुसंधानेऽपि स्वार्थप्रतीतिहेतुत्वात् । प्रत्यक्षवदिति व्यतिरेकप्रवर्तिनीति अनुमानसामग्री व्यतिरेकेऽपि प्रवर्तिनीत्यर्थः ।

ननु पीनत्वमर्थापत्त्या भोजनमप्यर्थमेव कल्पयतीतीयमपि दृष्टाऽर्थापत्तिरेवेत्यत आह रात्रौ भुङ्क्त इति (कं. २२२)–वाक्य[एकदेश]कल्पनेति (कं. २२२)–अपेक्षणीयम् । रात्रिभोजनवाक्याभावे पूर्वं वाक्यमप्रत्यायकमिति भावः । पञ्चभिरिति (कं. २२३)–परमतेनोक्तम्, तत्राप्युपग्रहे चैत्राभावस्य षष्ठप्रमाणत्वात् । ननु कथमिदं

---

१ दर्शनार्थापत्ति – जे. १, जे. २, जे. ३ । २ प्रमाणैरगतोऽर्थः – कं. १; कं. २ । ३ वगतिर्विरोध्येव विरोध्य – कं. १; कं. २; जे. १ । ४ अर्थान्तरमपि – जे. १ । ५ रिति केन तत्कथितम् – कं. १; कं. २ । ६ अव्यापकं – कं. १; कं. २ । ७ केवलव्यतिरेकीति – ड । ८ अर्थापत्तेरद्यापि – ड । ९ अर्थविना – ड । १० प्रतिपादयिषु – अ, ब । ११ स्य हाभावो॰ – ड । १२ दृष्टमेतद् व्यापकम् – मु. । १३ नत्वेवम् मु. यद्येवम् – जे. १ जे. २, जे. ३ ।

न्यायकन्दली

द्रव्यमेकत्रास्ति तदन्यत्र नास्तीति । यथा प्राचीप्रतीच्योरेकत्रोपलभ्यमानः सविताऽन्यत्र न भवतीति, इदं दर्शनबलेनै[1]वावधार्यते जीवतो गृहाभावो बहिर्भावे सत्युपपद्यते नान्यथेति । [2]यद्येवमन्वयावगतिपूर्विकैव तथोपपत्त्यवगतिः ? तथा सति चार्थापत्तिरनुमानमेव, अन्वयाधीनजन्मत्वात् । यत्तु विरोधे सति प्रवर्तत इति तद्वैधर्म्यमात्रम् । तथा चात्र प्रयोगः–देवदत्तो बहिरस्ति, जीवन[3]सम्बन्धित्वे सति [4]गेहेऽनुपलभ्यमानत्वात्, अहमिवेति ।

श्रुतार्थापत्तिमन्तर्भावयति–श्रवणादनुमितानुमानमिति । पीनो दिवा न भुङ्क्ते इति वाक्यश्रवणाद्रात्रिभोजनकल्पना 'अनुमितानुमानम्' । लिङ्गभूतेन वाक्येनानुमितात् पीनत्वात् तत्कारणस्य रात्रिभोजनस्यानुमानात् ।

[टि०] इति–[5]जीवतो गृहाभावोपपत्तिस्तथोपपत्तिः । नन्वर्थापत्तेः प्रमाणद्वयविरुद्धेऽर्थे प्रवृत्तिरनुमानाद्वैधर्म्यं तत्कथमस्या [6]विधर्मणोऽनुमानत्वमित्याह यत्तु विरोधे सति इति – परो हि जीवन्गृहे नास्तीति [7][शब्द श्रवणात् बहिरस्तीति] वाक्यप्रतीतिमर्थापत्तिफलमाह । सिद्धान्तवादी तु वाक्येनानुपपद्यमानेन बहिरस्तीति वाक्यं नाक्षिप्यते [8]किन्तु वाक्येन वाक्यान्तरनिरपेक्षेणैव स्वार्थे प्रतिपादिते तदर्थोऽनुपपद्यमानो बहिः सत्त्वमर्थ[9]मनुमापयति न तु बहिरस्तीति शब्दमाक्षिपतीति प्रतिपिपादयिषया प्राह अर्थाप्रतिपादकत्वम् इत्यादि ।

[पं०] चैत्रो हि जीवति ततश्च गृहेपि भवति बहिरपि भवत्विति भावना । अथ भट्टः प्राह दृष्टमेतदित्यादि (कं. २२३.१०) श्रीधरः प्राह [10]यद्येवमित्यादि (कं. २२३.१३) । तथोपपत्त्यवगतिरिति (कं. २२३.१३) जीवतो गृहाभावोपपत्ति–स्तथोपपत्तिः । ननु भो जीवनग्राहि प्रत्यक्षं गृहाभावग्राहि अभावप्रमाणं एवंरूपं प्रमाणद्वये विरुद्धेऽर्थे प्रवर्तमानादर्थापत्तेरनुमानाद्वैधर्म्यं दृश्यते तत्कथमस्याविधर्मणोऽनुमानत्वमित्याशङ्क्याह यत्तु विरोधे (कं. २२३.१४) इत्यादि । प्रवर्तते (कं. २२३.१५) इत्यत्रार्थापत्तिः कर्त्री । वैधर्म्यमात्रमिति (कं. २२३.१५) इह चतुर्विंशतिर्जातिदोषाः इति नाम्ना प्रसिद्धानि दूषणाभासानि, तेष्वेकं वैधर्म्यं नाम; तच्चैवम् 'अनित्यः शब्दः कृतकत्वाद् घटवद्' इत्यत्र प्रयोगे कश्चिदाह 'नित्यः शब्दो निरवयवत्वाद् अनित्यं हि सावयवं दृष्टं घटादीति । न चास्ति विशेषहेतु ।

[कु०] विरोध्यनुमानमित्यत आह–गृहाभाव इति (कं. २२३) । स्वदर्शनश्रद्धाजाड्येन सम्बन्धान्तरं वक्तुमशक्नुवन्तं प्रति स्वयमेव तदाह चयं त्विति (कं. २२३) । यदव्यापकद्रव्यमेकत्रास्तीति (कं. २२३) बहिः सर्गे गृहाभावो न विरुध्यत इति प्रदर्शनायोक्तं व्याप्तिस्तु व्यत्यये न द्रष्टव्या । ततः किमित्यत आह – यद्येवमिति(!) अन्वयाधीनजन्मत्वादिति (कं. २२३)–अनेन पूर्वपक्षहेतोर्विशेषणासिद्धिर्दर्शिता । नन्वेवं तर्हि लिंगलिंगिनोः परस्परानुकूल्यात्कथमेतद्विरोध्यनुमानमिति शंकामपनयन्नेवानु[माना]वांतरभेदो नानुमानबाह्य इति दर्शयति यत्त्विति (कं. २२३) । नन्वेवमस्तु व्याप्तिः पक्षधर्मता कीदृशा इति शंकां निराकुर्वन्प्रयोगमाह तथा चात्रेति (कं. २२३) । ननु न्यूने(न)वाक्येन कथं

---

१ एवावधार्यते–जे. २, जे. ३ । २ नत्वे–कं. १; कं. २ । ३ सम्बन्धत्वे–जे. १ । ४ गृहे–कं. १; कं. २ । ५ जीवितो–अ, ब । ६ धर्मणो–अ, ब । ७ [ ] एतच्चिह्नान्तर्गतः पाठः अ ब पुस्तकयोर्नास्ति, शब्दाश्रवणात्–कं । ८ विन्दतु–अ । ९ मनुभावयति–अ, ब । १० नत्वेव–कं. १ ।

## न्यायकन्दली

इदमत्राकूतम्–अर्थप्रतिपादकत्वं प्रमाणस्यानुपपत्तिः । 'दिवा न भुङ्क्ते' इति वाक्यं च स्वार्थं बोधयत्येव, का तस्या[1]नुपपन्नता ? पीनत्वं भोजनकार्यं दिवाभोजने सति [2]तन् नोपपद्यते, कारणाभावात् । तदनुपपत्तौ च वाक्यमप्यनुपपन्नम्, अनन्वितार्थत्वादिति चेत् ? तर्ह्यर्थानुपपत्तिर्वाक्यस्यानुपपन्नत्वमर्थोपपत्तिश्चोपपन्नत्वम्, न त्वस्य [3]स्वरूपेणोपपत्त्यनुपपत्ती । दिवा न भुञ्जानस्य पीनत्वलक्षणश्चार्थो भोजनकार्यत्वाद्रात्रिभोजन[4]रूपेणार्थेनोपपद्यते, न रात्रिभोजनवाक्येनेत्यर्थस्यानुपपत्त्या तस्य तद्वाक्यस्य चोपपत्तिहेतुरर्थ एवार्थनीयो न वाक्यम्, अनुपपादकत्वात् । [5]अर्थ्यमानश्चार्थोऽर्थेनैवावगम्यते, दिवा भोजनरहितस्य पीनत्वस्य रात्रिभोजनकार्यत्वाव्यभिचारादिति नास्त्यर्थापत्तिः शब्दगोचरा ।

[**टि०**] परमाशङ्कते **पीनत्वं भोजनेत्यादि** । [5]**अर्थ्यमानश्चार्थ** इति :– अर्थ्यमानः [6]साध्यो रात्रिभोजनलक्षणोऽर्थः अर्थेन. दिवाभोजनरहितस्य पीनत्वलक्षणेन गम्यतेऽनुमीयते इत्यर्थः । पुनर्भेदमाशङ्कते **अथ मतमर्थ** इति तदुपपत्त्याऽर्थोपपत्त्या तस्यार्थस्य वाचको यः शब्दस्तस्य । **प्रमाणान्तरावगतस्य** इति प्रमाणान्तरं प्रत्यक्षादि तेन [7]शाब्देनार्थेन । [8]**तस्मिन् सति** इति कलापादिग्राहके प्रत्यक्षे सति । **अन्यथा दिवावाक्यपदेति** [9]रात्रिभोजनरूपस्येत्यर्थरूपस्येत्यर्थः । **न ताभ्याम्** इति

[**पं०**] घटसाधर्म्यात्कृतकत्वादनित्यः शब्दो न पुनस्तद्वैधर्म्यान्निरवयवत्वान्नित्य इति । एतच्च वैधर्म्योद्भावनं दूषणाभासमात्रं न दूषणं कृतकत्वस्य सम्यग्धेतोः साध्यसाधनक्षमत्वात् तथाऽन्वयोऽपि । यत्प्रमाणद्वयेविरुद्धेऽर्थेर्थोपत्तेः प्रवर्तनायानुमानतो वैधर्म्यं प्रतिपादितं न जातिदोषमात्रम् अनुमानस्य दूषणत्वात् इति भावार्थः । एतदेव दूढयति **तथा चात्र प्रयोग** (कं. २२३.१५) इत्यादिना ।

**तत्कारणस्येति** (कं. २२३.१९) पीनत्वकारणस्य ।

परः प्राह **पीनत्व**(कं. २२३.२१)मित्यादि । **तदिति** (कं. २२३.२२) पीनत्वम् । **तदनुपपत्ताविति** (कं. २२३.२२) पीतत्वानुपपत्तौ । श्रीधरः प्राह **तर्हीत्यादि** (कं. २२३.२२) । **अस्येति** (कं. २२३.२३) वाक्यस्य । **अर्थस्येति** (कं. २२३.२५) पीनत्वरूपस्य । [10]**तस्येति** (कं. २२३.२५) अर्थस्य । **अर्थ एवेति** (कं. २२४.१) रात्रीभोजनरूपः । **अनुपपादकत्वादिति** (कं. २२४.१) अनुपपत्तिहेतुत्वात् । **अर्थ इति** (कं. २२४.२) रात्रिभोजनरूपः । **अर्थेनेति** (कं. २२४.२) पीनत्वेन । **नास्त्यार्थापत्तिः शब्दगोचरेति** (कं. २२४.३) कित्वर्थगोचरेति भावः ।

[**कु०**] पीनत्वं प्रतिपाद्यते येन तत्स्वकारणं रात्रिभोजनमनुमापयेदित्यत आह–**इदमत्रेति** (कं. २२३)–वाक्यं हि तदा न्यूनं भवेत् यदि कल्प्यमानं वाक्यशेषमन्तरेण श्रूयमाणानां यदा नामन्वयो न स्यात्, इह चास्त्यन्वयः । पीनकर्तृकभोजनाभावस्य रात्रौ भुङ्क्त इत्यश्रवणेऽपि कालविशेषसम्बन्धप्रतीतिरित्यर्थः । प्रमाणान्तरगम्यस्यार्थस्यान्वयानुपयोगमज्ञानतः परस्य मतमाशंकते = पीनत्वमाशंकते **पीनत्वमिति** (कं. २२३)–शंकितुरभिप्रायं दर्शयन्नुत्तरमाह **तर्ह्यर्थेति** (कं. २२३)–अर्थस्येति, एवं तर्ह्यर्थधर्मानुपपत्तिर्भवता शब्दाध्यारोपितेरित्यर्थः । प्रमाणान्तरगम्यस्यार्थस्य शब्दस्य रात्रिभोजनवाक्या-

---

१ नुपपद्यमानता–जे. १, जे. २ । २ नोपपद्यते–कं. १; कं. २ । ३ स्वरूपेण–जे. १, जे. २ । ४ उपपद्यमान–कं. १; कं. २ । ५ अर्थमानस्वार्थ–अ, ब । ६ साध्यो–अ, ब, क । ७ शब्देन–अ । ८ तस्मि सति कलावादि–अ; तस्मि सतीति विकल्पादि–ब । ९ भोजनस्येत्यर्थः–अ, ब; रात्रिभोजनरूपस्येत्यर्थः–क । १० अर्थस्य इति अ पुस्तके न दृश्यते ।

न्यायकन्दली

अथ मतम्—अर्थोऽर्थेनैवोपपद्यत इति तदुपपत्त्यैव तच्छब्दस्याप्युपपन्नता, किन्तु शाब्दोऽर्थः शाब्देनैवार्थेनोपपद्यते, प्रमाणान्तरावगतस्य तेन सहान्वयाभावात्। नहि पचतीत्युक्ते क्रियायाः कर्मणा विनानुपपत्तिः पच्यमानस्य कलायस्य [1]प्रत्यक्षेण दर्शनादुपशाम्यति, तस्मिन् सत्यपि किं पचतीत्याकाङ्क्षाया अनिवृत्तेः। शब्दोपनीते तु कर्मणि निर्विचिकित्सः प्रत्ययो भवति 'शाकं [2]पचति कलायं पचति' इति। 'पीनो दिवा न भुङ्क्ते' इत्यपि वाक्यार्थानुपपत्तिरियम्, तस्मा[3]दस्याः शाब्देनैवार्थेनोपशान्तिर्भविष्यतीति प्रथममर्थापत्त्या रात्रिभोजनप्रतिपादकं वाक्यमेव [4]प्रार्थनीयम्, अन्यथा दिवावाक्यपदार्थैः सह रात्रिभोजनस्यान्वयाभावात्। वाक्यविषये चार्थापत्तिपर्यवसाने रात्रिभोजन[5]मर्थो नार्थापत्ति-

[टि०] ताभ्यां दिवाभोजनवाक्यतदर्थाभ्यां तदुपस्थापनं रात्रिभोजनवाक्योपस्थापनम्। प्रत्यासत्तिं कार्यकारणभावरूपामभ्युपगमद्वारेण प्रतिपाद्याधुना **भट्टः** स्वमतेनैवाह **न [6]चार्थपत्तौ** इति:—अनुमानवदिति व्यतिरेकदृष्टान्तः। [7]**न चार्थेनार्थ एवायम्** इत्यादि—अर्थेन दिवाभोजना[8]भावे सति पीनत्वेन स्वापेक्षया द्वितीयो रात्रिभोजनलक्षणोऽर्थ एव गम्यते न तु तत्प्रतिपादकं वाक्यमपीति न वाच्यं किन्तु वाक्यमपि गम्यते इति भावः। विशेषणद्वारेण कारणमाह **तत्तिरोहित** इति—

[पं०] प्राभाकरमाक्षिपन्नाह **अथ मतम्** (कं. २२४.३) इत्यादिना। **तदुपपत्त्येति** (कं. २२३.४) अर्थोपपत्त्या। **तच्छब्दस्येति** (कं. २२४.४) अर्थवाचकशब्दस्य। **शाब्देनेति** (कं. २२४.४) रात्रौ भुङ्क्ते इति वाक्येन। प्रमाणान्तरावगतस्य (कं. २२३.५) इत्यत्र प्रमाणान्तरं प्रत्यक्षादि। **तेनेति** (कं. २२४.५) शाब्देन। **कर्मणेति** (कं. २२३.६) व्याप्येन। **अनुपपत्तिरिति** (कं. २२४.६) कर्तृपदं [9]**तद्वोपशाम्यतीत्य**(कं. २२४.६)नेन क्रियापदं न योज्यम्। **पच्यमानस्येति** (कं. २२४.६) स्थाल्यां राध्यमानस्य निवृत्तस्येत्यर्थः। **तस्मिन्निति** (कं. २२४.७) कलयादिग्राहके प्रत्यक्षे। **कर्मणीति** (कं. २२४.८) व्याप्ये। **इत्यपीति** (कं. २२४.९) इति उक्ते सत्यमीत्यर्थः। **शाब्देनेति** (कं. २२४.९) शब्दाभिधा येन। **अर्थेनेति** (कं. २२४.१०) रात्रिभोजनेन। **उपशान्तिरिति** (कं. २२४.१०) [10]निराकांक्षता। [11]**वाक्यमेव प्रार्थनीयमिति** (कं. २२४.१०) कोऽर्थः प्रथमं वाक्यमेव प्रार्थनीयं ततो कोऽर्थोपि प्रार्थनीय इत्यर्थः। **रात्रिभोजनस्येति** (कं. २२४.११) अर्थस्य। [12]**अर्थोपपत्तिविषयतामेतीति** (कं. २२४.१२) किन्तु वाक्यमेवार्थापत्तिविषयतामेतीति अर्थः।

[कु०] भावेऽपि स्वार्थं बोधयितुमुपपन्न एवेति भावः। अस्त्वेवं रात्रि[भोजन]वाक्याभावेऽपि पीनस्यादिभोजनाभावप्रतीतिः। तेन पीनत्वेनार्थेन कल्प्यमानोऽर्थ एव। ननु वाक्यमिति कुतो विनिगमनेत्यत आह—दिवाऽ(न)भुञ्जानस्येति (कं.२२३) **तद्वाक्यस्येति** (कं. २२३)। परमार्थतस्तु तस्य स्वार्थप्रतिपादक-प्रागेवोपपन्नत्वमुक्तम्। कल्पनयोभयोरर्थत्व(वं) संहरति— **अर्थमानश्चेति** (उपपद्यमानश्चेति) (कं. २२४)। व्याप्तिमाह **दिवाभोजनेति** (कं. २२४)। एते षष्ट्यौ

---

१ प्रत्यक्षेणोप—कं. १; कं. २। २ पचतीति—जे. ३। ३ दस्यापि — कं. १; कं. २। ४ अर्थनीयम् — कं. १; कं. २। ५ मर्थेनार्थोप नार्थापत्ति — जे. २। ६ चार्थोपत्ताविति — अ, ब। ७ न चार्थो एवाय — अ, ब। ८ भोजनभावे — अ, ब, क। ९ प्रत्यक्षेणोपशाम्यति — कं. १। १० सकाङ्क्षत — अ। ११ वाक्यमेवार्थनीयम् — कं. १। १२ अर्थापत्ति — कं. १।

न्यायकन्दली

विषयतामेति, तस्य वाक्यादेवावगमात्। न चैतद्वाच्यम्, दिवावाक्यस्य तदर्थस्य वा रात्रिवाक्येन सह प्रत्यासत्त्यभावान्न ताभ्यां तदुपस्थापनमिति, अर्थप्रत्यासत्तिद्वारेण वाक्यस्यापि प्रत्यासन्नत्वात्। न चार्थापत्तावनुमानवत् प्रत्यासत्तिरपेक्षते[1], तस्या अनुपपत्तिमात्रेणैव प्रवृत्तेः। तदुक्तम्—

न चार्थेनार्थ एवायं द्वितीयो गम्यते पुनः।
सविकल्पकविज्ञानग्राह्यत्वात्तत्तिरोहितः॥
शब्दान्तराण्यबुद्ध्वा[2] सा नार्थमेवावगच्छति।
तेनैषा प्रथमं तावन्नियतं वाक्यगोचरा।
वाक्यमेव तु वाक्यार्थं गतत्वाद् गमयिष्यति॥ इति।

[टि०] अर्थो हि रजनीभोजनरूपः सविकल्पकज्ञान[3]ग्राह्यः ततस्तेन विकल्पेन रात्रौ भुङ्क्त इत्येवंरूपेण वाक्येन [4]तिरोहितः विकल्पस्य वाक्योल्लेखरूपत्वात्। [5]शब्दान्तराणि इति—सेत्यर्थापत्तिः। वाक्यमेव इति वाक्यं रात्रौ भुङ्क्त इत्येवं रूपम्। गतत्वाद् इति प्रमाणेनार्थापत्तिरूपेण प्रतीतत्वादित्यर्थः।

[पं०] ताभ्यामिति (कं. २२४.१४) दिवावाक्यतदर्थाभ्याम्। तदुप[स्थाप]नमिति (कं. २२४.१४) रात्रिवाक्योपस्थानम्। अर्थप्रत्यासत्तिद्वारेणे(कं. २२४.१४)त्यभिगमार्थो रात्रिभोजनरूपः। वाक्यस्येति (कं. २२४.१४) रात्रौ भुङ्क्ते इत्यस्य। अनुमानवदिति (कं. २२४.१५) वैधर्म्यदृष्टान्तः। तस्या इति (कं. २२४.१५) अर्थापत्तेः। न चार्थेनेत्यादि (कं. २२४.१७) श्लोकः। व्याख्या अर्थः—पीनत्वं, तदिन्द्रियापातमात्रग्राह्यत्वान्निर्विकल्पकग्राह्यम्। रात्रिभोजनरूपस्त्वर्थः सविकल्पकज्ञानग्राह्यः इत्यतस्तेन वाक्येन तिरोहितः। वाक्यं हि सविकल्पकज्ञाने प्रतर्तते। अतो वाक्यतिरोहितस्यार्थस्य ग्रहणात्प्रथमं शब्दविषयत्वमेवार्थापत्तेस्ततोऽर्थविषयत्वम्। [6]सा इति अर्थापत्तिः। गतत्वादिति (कं. २२४.२१) बुद्धत्वात्।

[कु०] व्यधिकरणे। एवं श्रुतार्थापत्तेः दृष्टार्थापत्तावन्तर्भावमुपपादितमपि स्वग्रन्थविरोधादश्रद्दधानस्य मतमाशंकते अथ मतमिति (कं २२४)।

नन्वनन्वितेन वाक्येनार्थस्य प्रतिपादनत्वात्कथं तत्करोति वाक्यस्य प्रत्यासत्तिरिति परितुष्यन्नाह न चार्थापत्त्येति (कं. २२४)—सविकल्पकविज्ञानव्यतिरेकेण ग्राह्यत्वादित्यत्र ज्ञानव्यतिरेकेण ग्रहणं चिन्त्यम्। तत्तिरोहितमिति ज्ञानस्य प्राकट्यानुमेयत्वादिति शेषः। गृह्णातु तत्सविकल्पकं विज्ञानमेवेत्यत आह शब्दान्तराणीति (कं. २२४) एवेति (कं. २२४)—अर्थापत्तिपरामर्शात्स्त्रीलिङ्गनिर्देशः। अवगच्छतीति (कं. २२४)— गत[त्वा]दिति (कं. २२४) ष्वान्तर्भावित[व]ण्योऽर्थः।

१ अपेक्ष्यते—जे. १, जे. ३। २ बुद्ध्वाऽसामर्थ्यं—कं. १, कं. २ पुस्तकसंपादकेन कल्पितः पाठः ताडपत्रपाठलाभावश्यको यतः सोऽर्थानुसारी—सं.। ३ ग्राह्यतस्तेन—अ, ब। ४ तुरोहितो—अ, ब। ५ शब्दान्तरापि—अ, ब। ६ प्रतीकमिदं कं. १ पुस्तके नास्ति।

## न्यायकन्दली

[191] अत्रोच्यते–पदानि वाक्यार्थप्रतिपादनाय प्रयुज्यन्ते । तानि प्रत्येकं पदार्थ[1]संसर्गात्मकं वाक्यार्थं प्रतिपादयितुमशक्नुवन्त्यपर्यवसितव्यापारत्वाद् एकार्थकारीणि पदान्तराण्यपेक्षन्ते । यत्र पुनरमीभिर्वाक्यार्थः प्रतिपादितः, तत्रैषां शब्दान्तरापेक्षा नास्त्येव, स्वव्यापारस्य कृतत्वात् । [2]यस्तैः प्रतिपादितोऽर्थः स नोपपद्यत इति चेत् ? [3]नोपपादि, नह्यर्थस्याविरोधो[4]पपादनमपि शब्दस्य व्यापारः, किन्तु प्रतिपादनम् । तच्चानेनासन्निहितेऽपि रात्रिवाक्ये कृतमेव । प्रतीयते हि दिवाऽभोजनवाक्यात् पीनस्याभोजनम्, निःसन्दिग्धाऽभ्रान्ता [5]चेयं प्रतीतिः, अन्यथार्थापत्तेरपि प्रवृत्त्यभावात् । [6]निश्चितस्यैव हि पीनस्य दिवाऽभोजनप्रमाणसिद्धस्यानुपपत्तिर्न युक्तेति तदुप[7]पादनार्थमर्थ्यते, सन्दिग्धे विपरीतत्वेन चावधारिते [8]त्वस्मिन् कस्योपपत्तयेऽर्थान्तरकल्पना स्यात् ? न चार्थयोः

[टि०] [191] एकार्थकारीणि इति :–एकोऽर्थो वाक्यार्थप्रतिपत्तिलक्षणः । यत्र पुनः इति :–अमीभिः पदैरित्यर्थः । मिथ्यात्वाज्ञानसंशयभेदात्त्रिविधमप्यप्रामाण्यं दिवाभोजनवाक्ये निराचष्टे प्रतीयते हि इत्यादि । ननु पीनत्वभोजनाभावयोः [9]परस्परविरोधाद् रजनीभोजनवाक्यं विना कथमयं[10]प्रतीतिः सम्भवतीत्याह न चार्थयोः इति प्रतीतिरनुभवसिद्धा नाप्रतीतिर्भवति । अनुमितानुमानमिति दिवाभोजनवाक्या तदर्थानुमानं ततोऽपि रात्रिभोजनलक्षणस्यार्थ[11]स्यानुमानमिति, तथा च प्रयोगः देवदत्तो रात्रिभोजनवान् रसायनाद्यकृतपीनत्वे सति दिवाऽभुञ्जानत्वाद् अहमिवेति । अर्थापत्तिः ॥

[पं०] [191] अत्रोच्यते इति (कं. २२४.२२) श्रीधरेण । [12]स्वव्यापारस्य कृतत्वादिति (कं. २२४.२५) इदमुक्तं भवति–'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्येतैरेव पदैरर्थः प्रतिपादितो 'रात्रौ भुङ्क्ते' इति । शब्दान्तरेण किं साध्यं ? पर आह यस्तैरित्यादि (कं. २२४.२५) तैरिति 'दिवा भुङ्क्ते । इत्येभिः पदैर्योऽर्थः पीनत्वलक्षण उक्तः स । रात्रौ भुङ्क्ते इति वाक्यं साक्षादुक्तं विना न (दिवा न) भुङ्क्ते घटत इति वाक्यार्थः । श्रीधरः प्राह [13]नोपपादीत्यादि (कं. २२४.२५) । अर्थापत्तेरपीति (कं. २२५.३) त्वदिष्टायाः । विपरीतत्वेन [14]वा अवधारित इति (कं. २२५.४)

[कु०] [191] अत्रोच्यत इति (कं. २२४) प्रमाणान्तरापनीतार्थनिरपेक्षेण दिवा भुङ्क्त इति वाक्यं स्वार्थं बोधयत्येवेति पूर्वं यदुक्तं तदेवानुकूलतर्कसहितमुच्यत इत्यर्थः । किं तर्हि शब्दस्यानुपपत्तिः क्वापि नास्तीत्यत आह–पदानीति (कं. २२४)– एकार्थकारीणीति (कं. २२४) – एकोऽर्थः – संसर्गप्रतीतिः । पुनरपि परस्य प्राचीमेव(?) भ्रान्तिमाशङ्कते – यस्तैरिति (कं. २२४) । यु(उ)क्तं स्मारयन्परिहरति नो(नो)पपादीति (कं. २२४) – कथं कृतमित्यत्र प्रत्यक्षं प्रमाणमाह–प्रतीयत इति (कं. २२५) सामग्र्यभावे ज्ञातोऽयं प्रत्ययः संशयो वाऽस्तु विपर्ययो वेत्यत

---

१ संस्पर्शा – कं. १; कं. २ । २ यस्तैरुपपादितो – कं. १; कं. २ । ३ नोपपादि – कं. १; कं. २ । ४ धापादनम् – जे. ३ । ५ चात्रे – कं. १; कं. २ । ६ निश्चितस्यैव – कं. १, कं. २ । ७ पपादन – कं. १, कं. २; जे. ३ । ८ तस्मिन्–कं. १, कं. २, जे. ३ । ९ परस्पराविरोधाद्–अ । १० प्रतीतिरित्याह–अ, ब, क । ११ स्यानुमितिः–अ, ब, क । १२ स्वव्यापारकृतकत्वादिति–ब । १३ नोपपादि–कं. १ । १४ चावधारिते–कं. १ ।

प्रशस्तपादभाष्यम्

[192] सम्भवोऽप्यविनाभावित्वादनुमानमेव ।

न्यायकन्दली

परस्परविरोध इति तयोः प्रतीतिरप्रतीतिर्भवति । तस्मादर्थप्रतीत्यैवोपपन्नः शब्दो न शब्दान्तरमपेक्षते, [1]कर्तव्यान्तराभावात् । अर्थ एव तु तेनाभिहितोऽर्थान्तरेण विनानुपपद्यमानः प्रतीत्यनुसारेण स्वोपपत्तये तत् [2]मृगयतीति सुव्याहृतं शब्दश्रवणादनुमितानुमानमिति ।

[192] शतं सहस्रे सम्भवतीति सम्भवाख्यात् प्रमाणान्तरात् [3]सहस्रे शतज्ञानमिति केचित् । तन्निरासार्थमाह–सम्भवोऽप्यविनाभावित्वादनुमानमेव । सहस्रं शतेनाविनाभूतम्, तत्पूर्वकत्वात् । तेन सहस्राच्छतज्ञानमनुमानमेव ।

[टि०] [192] ( ॥ अथ सम्भवप्रमाणान्तर्भावनिरूपणम् ॥ )

[4]सहस्रं शतेन इति सहस्रं शतेनास्ति प्रसिद्ध[5]सहस्रवदिति दृष्टान्तः । अथवा विवा[6]दास्पदसहस्रः [7]शतवान् शतापेक्षयाधिकपरिमाणत्वात् प्रसिद्धसहस्रवदिति ॥ सम्भवः ॥

[पं०] वातादिजत्वेन वा अवधारिते । [8]अस्मिन्निति (कं. २२५.५) पीनत्वे । अर्थयोरिति (कं. २२५.५) पीनत्वदिवाऽभोजनयोः । कर्तव्यान्तराभावादिति (कं. २२५.७) अर्थप्रतीतिव्यतिरिक्तकर्तव्याभावात् । [9]तदिति अर्थान्तरं भोजनरूपम् । मृगयती (कं. २२५.८) त्यत्रात्मनेपदाभावः आत्मनेपदमनित्यमिति वचनात् ।

त[10]त्पूर्वकत्वादिति (कं. २२५.१३) शतपूर्वकत्वात् । [11]तस्येति–ज्ञानस्य ।

[192-93] योऽपीति (कं. २२५.१९) मीमांसकः । प्रमाणमिति (कं. २२५.१९) प्रत्यक्षादिभ्यः पृथक् षष्ठं प्रमाणमित्यर्थः । स्वरूपविप्रकृष्टस्येति (कं. २२५.२०) पिशाचादेः । ज्ञानकारणेष्विति (कं. २२५.२०) रूपालोकमनस्कारादिषु । निरतिशयत्वादिति (कं. २२५.२२) निर्विशेषत्वात् । नायमिति (कं. २२५.२३) अयं

[कु०] आह–निःसंदिग्धेति (कं. २२५) कोटिद्वयानुल्लेखादबाधा वेति शेषः । अनुकूलं तर्कमाह–अन्यथेति (कं. २२५) । कथं प्रकृत्यभाव इत्यत आह–निश्चितस्यैव हीति (कं. २२५)–न चार्थयोरिति (कं. २२५)–विरोधिनोरप्रतीतौ निरधिकरणो विरोधो न प्रतीयत इति भावः । कर्तव्यान्तराभावित्वादित्यर्थः ।

[192] प्रयोगस्तु–सहस्रसंख्या स्वतो न्यूनसंख्याधारेषूत्पद्यते, ततोऽधिकसंख्यात्वात्, एकत्वाधारभूतेषूत्पद्यमानद्वित्वादिवदिति ज्ञानं ज्ञेयस्य कार्यमिति ।

१ कर्तव्यता – कं. १, कं. २ । २ मृगयतीत्यव्याहृतम् – कं. १, कं. २ । ३ सहस्रेण – कं. १, कं. २ । ४ प्रतीकमिदं अबकपुस्तकेषु नास्ति । ५ सहस्रा – अ । ६ वास्पदं – अ । ७ शतधान् – अ, ब । ८ तस्मिन् – कं. १ । ९ प्रतीकमिदं नास्ति कं. १ पुस्तके । १० पूर्वकत्वात्–अ । ११ प्रतीकमिदं कं. १ पुस्तके नास्ति ।

प्रशस्तपादभाष्यम्

[193 to 196] अभावोऽप्यनुमानमेव, यथोत्पन्नं कार्यं कारणसद्भावे लिङ्गम्, एवमनुत्पन्नं कार्यं कारणासद्भावे लिङ्गम् ।

न्यायकन्दली

[193] प्रमेयाभावप्रतीतौ भावग्राहकप्रत्यक्षादिपञ्चप्रमाणानुत्पत्तिरभावाख्यं प्रमाणान्तरं कैश्चिदिष्टम् । तद्व्युदस्यति–अभावोऽप्यनुमानमेव । कथ[1]मित्यत्राह–यथोत्पन्नं कार्यं कारणसद्भावे लिङ्गम् एवमनुत्पन्नं कार्यं कारणासद्भावे लिङ्गम् । [2][ज्ञानं ज्ञेयस्य कार्यं तस्याभावो ज्ञेयाभावस्य लिङ्गं यथा कार्यं कारणस्य लिङ्गम् ।]

योऽप्यभावं प्रमाणमिच्छति, तस्यापि न ज्ञानानुत्पादमात्रात् प्रमेयाभावज्ञानम्, स्वरूपविप्रकृष्टस्यापि वस्तुनोऽभावप्रतीतिप्रसङ्गात् । किन्तु ज्ञानकारणेषु सत्सु ज्ञानयोग्यस्य वस्तुनो ज्ञानानुत्पादोऽभावावगमनिमित्तम् । न चायोग्यानुपलम्भाद्योग्यानुपलम्भस्य कश्चित् स्वरूपतो विशेषः, अभावस्य निरतिशयत्वात् । तेन नायं स्वशक्त्यैवेन्द्रियवद् बोधकः, किन्तु योग्यानुपलम्भो ज्ञेयाभावं न व्यभिचरति । अयोग्यानुपलम्भस्तु व्यभिचरति, सत्यपि ज्ञेये तस्य सम्भवात्, एतावता विशेषेण योग्यानुपलम्भः प्रतिपादको नापरः । एवं सत्यभावो लिङ्गमेव स्यादविनाभावग्रहणसापेक्षत्वात् । तदनपेक्षत्वे त्वविशेषेण [3]सर्वस्यैवाभावस्याबोधकत्वमिति दुर्निवारः प्रसङ्गः ।

[टि०] [193-194] ( ॥ अथ अभावप्रमाणान्तर्भावनिरूपणम् ॥ )

[4]कारणासद्भावे इति [5]सामग्र्यसद्भावे इत्यर्थः । तेन धूमा[6]भावस्याङ्गाररूपवह्न्यभावागमकत्वेऽपि न दोषः ।

[पं०] योग्यानुपलम्भः । प्रतिपादके (कं. २२६.१) इति लिङ्गहेतुरिति यावत् । नापर (कं. २२६.२) इत्यत्र अपरशब्देन योग्यानुपलम्भः । अभावो लिङ्गमेव स्यादिति (कं. २२६.२) अत्र अभावो योग्यानुपलम्भः । तदनपेक्षत्वे इति (कं. २२६.३) अविनाभावग्रहणानपेक्षत्वे । [7]सर्वस्यैवाभावस्य बोधकत्वमिति (कं. २२६.४) अत्र कर्मणि षष्ठी ।

[कु०] [193] यद्यप्यनुत्पन्नं घटादिकार्यमपि स्वप्रागभावावच्छेदकतया निरूप्यमाणं स्वसामग्र्यभावमनुमापयत्येव, तथापि पराभिमतमेव देवकुलचैत्र(त्रा)भावलिंगतया ज्ञानप्रागभावोदाहरणं द्रष्टव्यम् । एतच्चाग्रे स्पष्टीभविष्यति ।

ननु व्याप्तिग्रहणमनपेक्ष्य प्रवर्तमानस्य कथं लिंगत्वमत आह–योऽपीति (कं. २२५)–स्वरूपविप्रकृष्टस्यापीति (कं. २२५)–तदितरसामग्र्यामसत्यामपीत्यपि शब्दार्थः । अत एवाह ज्ञानकारणेषु सत्स्वपीति (कं. २२५) ।

---

१ मित्यत–कं १, कं २ । २ [ ] एतच्चिह्नान्तर्गतः पाठः कं. १, कं. २ पुस्तकयोर्नास्ति । ३ तस्याभावस्याभावबोधकत्वमिति दुर्निवारणप्रसङ्गः–कं. १, कं. २ । ४ कारणसद्भावे–अ, ब, क । ५ सद्भावसद्भावेत्यर्थः–ड । ६ धूमाभावस्याप्यङ्गार–अ, ब, क। ७ तस्याभावस्याभावबोधकत्वम्–कं. १ ।

## न्यायकन्दली

अपि चेन्द्रियसन्निकर्षादुपलभ्यमाने भूतलेऽभावज्ञानमपि भवति 'अघटं भूतलम्' इति, तत्र भूतलस्येवाभावस्यापि प्रत्यक्षता किं नेष्यते ? भावांशेनैवेन्द्रियस्य सम्बधः, योग्यत्वादिति चेत् ? नेदमनुपपादितं सिध्यति । कार्यगम्या हि योग्यता, यथेन्द्रियान्वयव्यतिरेकानुविधायि कार्यं भावे दृश्यते, तद्वदभावेऽपीति भाववदभावोऽपि इन्द्रियग्रहणयोग्य एव । कार्यदर्शनादेव चास्येन्द्रियसम्बन्धोऽपि कश्चित् कल्पयिष्यते ।

अथ मतम्–निरधिकरणो न कस्यचिदभावः प्रतीयते, देशादिनियमेन प्रवृत्तिनिवृत्तिदर्शनात् । यदधिकरणश्चायं प्रतीयते तस्य प्रतीताविन्द्रियव्यापारो [1]नाभावग्रहणे, इन्द्रियव्यापारोपरमेऽप्यभावप्रतीतिदर्शनात् । तथाहि–कश्चित् स्वरूपेण देवकुलादिकं प्रतीत्य स्थाना[2]न्तरं गतो देवकुले देवदत्तोऽस्ति नास्तीति केनचित् पृष्टः तदानीमेव ज्ञातजिज्ञासो [3]नास्तीति प्रत्येति प्रतीत्य च व्याहरति नास्तीति । न च पूर्वमेव

[टि०] [4]ज्ञानं ज्ञेयस्य कार्यमिति ज्ञेयकार्यत्वं प्रत्यक्षज्ञानापेक्षयोक्तं, शब्दज्ञानस्य भूतभविष्यद्विषयस्यापि सम्भवात्, तयोश्चाविद्यमानयोर्नियमप्राक्कालभावाभावेन साक्षाज्जनकत्वा[5]भावात् ।

[पं०] योग्यानुपलम्भस्येत्यध्याहारः । ततश्चायमर्थः । यदि योग्यानुपलम्भोऽविनाभावग्रहणमन्तरेण प्रवर्तते तदा अविशेषेण घटाभावमिव पटाभावमपि ज्ञापयेत् अत एवाह [6]दुर्निवारः प्रसङ्ग इति (कं. २२६.४) ।

नेवमिति (कं. २२६.७) इदं योग्यत्वम् । कार्यमिति (कं. २२६.८) ज्ञानम् । अस्येति (कं. २२६.९) [7]अभावस्य । इन्द्रियसम्बन्धोऽपि कश्चिदिति (कं. २२६.९) सम्बन्धविशेषणीभावाख्यः । इन्द्रियेण हि सम्बद्धं घटादि तस्य विशेषणम् अभावः, यथा 'अघटं भूतम्' एष सम्बन्धविशेषणीभावसम्बन्धः ।

निरधिकरण इति (कं. २२६.१०) भूतलाद्याश्रयनिरपेक्षः । कस्यचिदिति (कं. २२६.१०) घटादेः । प्रवृत्तिनिवृत्तिदर्शनादिति (कं. २२६.११) यत्र हि घटाभावः प्रतीयते तत्र देशेऽस्खलितचङ्क्रामणादिका प्रवृत्तिः

[कु०] अभावागमनिमित्तमिति (कं. २२५) अभावज्ञाननिमित्तमित्यर्थः । अस्त्वेवं ततः किमित्यत आह न चेति (कं. २२५) निरतिशयत्वादिति (कं. २२५) ज्ञानोत्पत्तौपयिका(?)तिशयाभावादित्यर्थः । तर्हि कोऽतिशय इत्यत आह किंत्विति (कं. २२५) –अव्यभिचारग्रहणमेवातिशय इत्यर्थः । उपसंहरति एवं सतीति (कं. २२६) –अनुकूलतर्कमाह तदनपेक्षत्व इति (कं. २२६) सर्वस्येति (?) अयोग्यानुपलम्भस्येत्यर्थः । भाष्ये विद्यादनुमानमेवेत्युपलक्षणम् । इन्द्रियव्यापारानुविधानात्प्रत्यक्षमप्यभावज्ञानमस्तीत्याह अपि चेति (कं. २२६) । परस्य सिद्धान्तमाशङ्कते भावांशेनैवेति (कं. २२६) ।

---

१ नास्य ग्रहणे–जे. २ । २ न्तरगतो–कं. १, कं. २ । ३ नास्तीति प्रतीत्याभावं व्यवहरति –कं. १, कं. २ ।
४ प्रतीकमिदं मु. पुस्तके नास्ति किन्तु तत्रैव (६) पादटिप्पणे–जे. १; जे. २, जे. ३, इत्यत्रास्ति ।
५ भावरपात्–क । ६ दुर्निवारण–कं. १ । ७ भावस्य–ब ।

## न्यायकन्दली

देवकुलग्रहणसमये देवदत्ताभावो निर्विकल्पेन गृहीतः, सम्प्रति [1]स्मर्यते इति वाच्यम्, युक्तं घटादीनामिन्द्रियसन्निकर्षान्निर्विकल्पेन ग्रहणम्, तेषां स्वरूपस्य परानपेक्षत्वात् । अभावस्य तु प्रतिषेधस्वभावस्य स्वरूपमेव यस्यायं प्रतिषेधः [2]तदधीनम् । अतस्तत्प्रतिषेधतामन्तरेण तदभावस्य स्वरूपान्तराभावात् । तत्रास्य प्रतियोगिस्वरूपनिरूपणमन्तरेण निरूपणमशक्यम् । अयमेव हि भावाभावयोर्विशेषो यदेकस्य विधिरूपतया ग्रहणम् अपरस्य [3]त्वन्यप्रतिषेधमुखेन । यदाह न्यायवार्त्तिककारः–"स्वतन्त्रपरतन्त्रोपलब्ध्यनुपलब्धिकारणभावाच्च विशेषः, [4]सत् खलु प्रमाणस्यालम्बनं स्वतन्त्रम्, असत्तु परतन्त्रमन्यप्रतिषेधमुखेनेति" । यदि त्वभावस्यापि स्वातन्त्र्येण ग्रहणं तदा भावादविशेषः [5]स्यात् । अतो नास्त्यभावस्य निर्विकल्पकेन ग्रहणम् ।

[टि०] योऽपि इति :–[6]मीमांसकाः प्रमाणमनुमानादतिरिक्तमित्यर्थः । **कार्यदर्शनादेव** इतिः–कार्यं ज्ञानमिन्द्रिय[7]सम्बन्धः संयुक्तविशेषणतासमवेतविशेषणतादिः । [8]**स्वतन्त्रपरतन्त्रेति** तत्रैव ग्रन्थे पूर्वं भावाभावयोर्विशेषप्रतिपादने [9]हेतून्

[पं०] क्रियतेऽन्यत्र निवृत्तिः । तस्येति (कं. २२६.१२) भूतलादेः । [10]**गत इति** (क. २२६.१३) गतः सन् । **न चेत्यादि गद्ये न च** (कं. २२६.१५) **इति वाच्यम्** (कं. २२६.१६) एवं पदसम्बधः । **तेषामिति** (कं. २२६.१७) घटादीनाम् । **स्वरूपमेवेति** (कं. २२६.१८) स्वरूपमपीत्यर्थः । **यस्येति** (कं. २२६.१८) घटादेः । **तदधीनमिति** (कं. २२६.१८) घटाद्यधीनम् । **तदभावस्येति** (कं २२६.१९) घटाद्यभावस्य । **तत्रेति** (कं. २२६.१९) एवं सतीत्यर्थः । **अस्येति** (कं. २२६.१९) अभावस्य । **प्रतियोगीति** (कं. २२६.१९) घटादिः । **न्यायवार्त्तिककार इति** (कं. २२६.२१) उद्योतकराचार्यः । अविशेषः (कं. २२६.२३) [इति] प्राप्तोतीत्यर्थः । **निर्विकल्पकेनेति** (कं. २२६.२४) इन्द्रियापात प्रत्यक्षेण ।

[कु०] ननु संयोगसमवायविरहिणो भावस्य कथमिन्द्रियग्रहणयोग्यत्वमत आह **कार्यदर्शनादिति** (कं. २२६) **कश्चिदिति** – विशेषणविशेष्यभावनामा [क]श्चित्संश्लेष इत्यर्थः । अत्र प्रयोगः–विमतं घटाभावज्ञानमिन्द्रियकार्यम्, तदन्वयव्यतिरेकानुविधायित्वाद्भूतलज्ञानवदिति । हेतोरन्यथासिद्धिमाशंकते – **अथ मतमिति** (कं. २२६) । पौरस्त्य ज्ञानप्रागभावस्य लिंगतयोदाहरणस्य फलं दर्शयितुं तदनुसारि परकीयाभावप्रमाणं दृष्टान्तेनोदाहरति **तथा हीति** (कं. २२६) । सिद्धान्तिनः परिहाराभासमाशंक्य दूषयति **न चेति** (कं. २२६) – **प्रतिषेध[स्वभावस्य स्व]रूपमेवेति** (कं. २२६)–प्रतिषेध एव स्वरूपमित्यन्वयः । **तत्रास्येति** (कं. २२६) । ततश्च प्रतियोगिविशिष्टस्य ग्रहणान्निर्विकल्पकं न संभवतीत्यर्थः ।

---

१ स्मर्यमाण – कं. १; कं. २ । २ स्यात्तदधीनम् – कं. १, कं. २ । ३ तु पर – जे. १, जे. २; अन्य – जे. ३ । ४ सत्तु–कं. १, कं. २ । ५ स्यादिति–जे. १, जे. २ । ६ योऽपि इति योपीति मीमांसकः–अ, ब । ७ सम्बन्ध-सम्बन्धः – क । ८ स्वतन्त्रपरतन्त्रतेति – अ, ब, क । ९ हेतुनिरूप्य – अ, ब । १० स्थानान्तरगत – कं. १ ।

न्यायकन्दली

यदपि [1]विकल्पितं किं देवदत्तसंकीर्णस्य देवकुलस्य पूर्वं प्रतीतिरासीत् ? तद्विविक्तस्य वा ? [2]संकीर्णग्रहणे तावत् केवलस्य न स्मरणम् । विविक्तग्रहणे [3]चाभावो गृहीत एव पश्चात् स्मर्यत इति प्राप्तम् । तदप्यसारम्, देवदत्तभावाभावयोरग्रहणेऽपि देवकुलस्य स्वरूपेण ग्रहणात् । तस्मान्न पूर्वमभावग्रहणम्, तदभावान्न स्मृतिः, न च तदानीं प्रमाणान्तरमुपलभ्यते । तस्मा[4]द्व्यवहिते प्रतियोगिनि स्मृत्यारूढेऽभावग्रहणाय प्रत्यक्षादिप्रमाणपञ्चकव्यावृत्तिरेव प्रमाणम् ।

एकत्र चाभावस्याभावपरिच्छेद्यत्वे सिद्धेऽन्यत्रापि तेनैव सेत्स्यतीति सिद्धमभावस्य प्रमाणान्तरत्वम् ।

अत्रोच्यते—देशान्तरं गतः केनचित्पृष्टो देवकुले देवदत्तस्य[5]दानीन्तनानुपलम्भेनेदानीन्तनाभावं प्रत्येति 'इदानीं नास्ति' इति ? किं वा प्राक्तनानुपलम्भेन प्राक्तनाभावं

[टि०] निरूप्य [6]पुनर्हेत्वन्तरं [7]सूचितं स्वतन्त्रेत्यादि । भावो हि स्वतन्त्रो[8]पलब्धौ कारणं भवति, अभावस्तु परतन्त्रानुपलब्धौ । अत्रानुपलब्धिः प्रतिषेधमुखेनोपलम्भः ।

[पं०] **विकल्पितमिति** (कं. २२६.२५) क्वचिच्छास्त्रे । **देवदत्तसङ्कीर्णस्येति** (कं. २२६.२५) देवदत्तसंयुक्तस्य । **केवलस्य न स्मर[ण]मिति** (कं. २२६.२६) यदा गृहीतं हि स्मर्यते । **गृहीत एवेति** (कं. २२६.२७) इन्द्रियापातमात्रजेन निर्विकल्पकेन पूर्वमेवधारित एव । **तदानीमिति** (कं. २२७.२) देवकुलस्य स्वरूपग्रहणावसरे । **प्रमाणान्तरमिति** (कं. २२७.२) येनाभावो गृह्यते । **प्रतियोगिनीति** (कं. २२७.३) देवकुल ।

**अभावस्येति** (कं. २२७.४) प्रमेयाभावस्य । **अभावपरिच्छेद्यत्वे इति** (कं. २२७.९) अभावप्रमाणनिश्चयत्वे । **अत्रोच्यते** इति । **अथ मत** (कं. २२६.१०) मित्यारभ्य यत्परेणोक्तं तत्र श्रीधरेण प्रतिविधीयते इत्यर्थः ।

द्वितीयं विकल्पं निरस्यति **प्राक्तनाभावे**त्यादि (कं २२७.९) । नेदानीमनुवर्तते (कं. २२७.१०) बुद्धीनां विनाश(शि)त्वात् । **अवस्थान्तरप्राप्ते** (कं. २२७.१०) रिति पूर्वावस्थाऽपरावस्था चेति अवस्थाद्वयम् ।

**इति राद्धान्त इति** (कं. २२७.१३) इति सिद्धान्तो मीमांसकस्य ।

[कु०] न्यायवार्तिककार = आचार्योद्योतकरः । दूषणोद्धारमाशंक्य दूषयति **यदपीति** (कं. २२६) परिहाराभासदूषणमुपसंहरति **तस्मात्(न्न)पूर्वमिति** (कं. २२६) पूर्वपक्षमुपसंहरति **तस्माद् व्यवहित इति** (कं. २२७) नन्वस्त(तु) देवकुलचैत्राभावे अभावः प्रमाणं देशान्तरगतस्य तदानीं तद्देशवर्तिनो घटाभावः प्रत्यक्षो भविष्यति, इन्द्रियव्यापारसंभवादित्यत आह **एकत्रेति** (कं. २२७) । स चाऽयं न्यायः—इह भूतले घटाभावोऽभावग्राह्यः, अभावत्वात्, देशान्तरगतस्य देवकुलचैत्राभाववदिति । तत्र ग्राहकमभावं कालभेदेन द्वेधा विकल्पयति—**देशान्तरमिति** (कं. २२७) गतस्यायं विकल्पो द्रष्टव्यः । आद्यं दूषयति—**इदानींतनेति** (कं. २२७)—अत्रेदानींतनाभावे ग्राह्ये कालबाधोऽपि

१ विकल्पितं देवदत्त...—जे. ३ । २ सङ्कीर्णस्य—जे. २ । ३ वा—कं १, कं. २ । ४ व्यवहितेऽपि—कं. १, कं. २ । ५ स्येदानीन्तनाभावेनानुपलम्भेन—जे. १ । ६ निरूप्यहेत्वन्तरं—अ, ब, ड । ७ समच्चितं—ड । ८ पलब्धो—अ ।

न्यायकन्दली

देवकुलग्रहणसमये नासीदिति? इदानीन्तनानुपलब्धिस्तावद्योग्यानुपलब्धिर्न भवति, देशव्यवधानात्। सम्प्रत्य[1]भावोऽपि तत्र देवदत्तस्य सन्दिग्धः, आगमनस्यापि सम्भवात्। प्राक्तनाभावपरिच्छेदयोग्या [2]तु प्राक्तनानुपलब्धिर्नेदानीमनुवर्तते, अवस्थान्तरप्राप्तेः। न चाविद्यमाना [3]प्रतीतिकारणं भवितुमर्हति।

नापि स्मृत्यारूढा व्याप्रियते, पूर्वमसंविदितत्वात्। नह्यनुपलब्धिः प्रमाणान्तरसंवेद्या, अभावरूपत्वात्। अनुपलब्ध्यन्तरापेक्षायां चानवस्था स्यात्। तस्मादियमगृहीतैवेन्द्रियवदर्थपरिच्छेदिकेति राद्धान्तः, तथा सति कुतस्तस्याः स्मरणम्? अनुभवाभावात्।

अथ मतम्—देवकुले देवदत्तानुपलम्भो देवदत्तोपलम्भेन [4]निवर्त्यते, न च देशान्तरगतस्य तदुपलम्भो जातः, तस्मादस्त्येव तदनुपलम्भः। यदि स्ववस्थान्तरमापन्नः, न चावस्थाभेदे वस्तुभेद इति। अस्तु तर्हि तावदिहैवम्। यत्र तु पूर्वं प्रतियोगिस्मरणाभावाद्वस्त्वभावो न गृहीतः, पश्चात् कालान्तरे वस्तुग्रहणादिहेदानीं नासीदिति प्राक्तनाभावज्ञानम्, तत्र कः प्रतीकारः? [5]निवृत्तो हि तद्वस्त्वनुपलम्भस्तस्योपलम्भेन। न चानुपलम्भः [6]पूर्वमासीदिति सम्प्रत्यविद्यमानोऽपि प्रतीतिहेतुः, प्रनष्टेन्द्रियस्यापि

[पं०] देशान्तरगतस्येति (कं. २२७.१५) प्रमातुः। [7]तदुपलम्भ इति (कं. २२७.१६) देवदत्तोपलम्भः। यदि त्विति (कं. २२७.१६) यदि परम्। अवस्थान्तरमिति (कं. २२७.१६) तदा तस्तोऽद्यतन इत्येवं रूपम्। श्रीधरः प्राह अस्तु तर्हीत्यादि (कं २२७.१६)। प्रतियोगिस्मरणाभावादिति (कं. २२७.१७) देवकुलस्मरणाभावात्। वस्त्वभाव इति (कं. २२७.१७) देवदत्ताभावः। तस्येति (कं. २२७.१९) वस्तुनः। [त]स्योपलम्भेन (कं. २२७.१९) इत्यस्मात्पुरा किंन्विवत्यध्याहार्यम्। प्रतीतिहेतुरिति (कं. २२७.२०) देवदत्ताभावप्रतीतिहेतुः। भट्टः प्राह अद्यतने

[कु०] द्रष्टव्यः। द्वितीयं दूषयति—प्राक्तनेति (कं. २२७)—अवस्थान्तरप्राप्तेरिति (कं. २२७) एतत्कालविशिष्टस्य तदानींतनत्वं नास्त्येवेत्यर्थः। प्रमाणान्तरसंवेद्येति (कं. २२७)—प्रत्यक्षाद्यन्यतरसंवेद्येत्यर्थः। कुत इत्यत आह—अभावरूपत्वादिति (कं. २२७)—अनवस्थेति (कं. २२७) अनुपलब्धिग्राहके यत्षष्ठं प्रमाणं तदप्यनुपलब्धिरूपत्वादन्येन षष्ठेन वेद्यमेवं तदाप्यन्येनेत्यतिप्रसंगादित्यर्थः। न च देशान्तरगतस्येति (कं. २२७) स्मरणाभावादिति शेषः। इहावच्छेदानामसहकारिकालभेदस्ततश्च तद्भेदादपि कार्याभावो युक्त एव। तथाप्यंगीकृत्य दूषणान्तरमाह अस्तु तावदिति (कं. २२७)—तथाऽवस्थाभेदः कार्यं व्याहन्ति। तथा निवृत्तिमप्याह—निष्पतीत्याशयत्वाच्छंकते—अद्यतनेनैवेति (कं. २२७) न प्राक्तने सति धर्मिणि कालभेदः कार्यभेदायोपयुज्यते। निवर्तमानं तु धर्मिणि न धारयितुं शक्नोतीति भावः।

---

१ त्यभावो देवदत्तस्य—कं. १, कं. २। २ च—जे. १, जे. २। ३ प्रतीतिः—जे. १, जे. २। ४ विनि—कं. १, कं. २; निवर्तते—जे. ३। ५ निवर्तंतो—जे. ३। ६ पूर्वं नासीदिति—जे. ३। ७ तदनुपलम्भ—कं १।

न्यायकन्दली

विषयग्रहणप्रसङ्गात्। अद्यतनेन व [1]तूपलम्भेन चाद्यतनानुपलम्भस्तस्य निवर्तितः, प्राक्तनानुपलम्भस्त्ववस्त्येव। तेन प्राक्कालीनाभावपरिच्छेदयोग्येन प्राक्तनाभावः परिच्छिद्यत इति चेत्? अहो पाण्डित्यम्? अहो [2]नैपुण्यम्? अनुपलम्भ उपलम्भप्रागभावः, स च वस्तूत्पत्त्यवधिरेक एव न प्राक्तनाद्यतनकालभेदेन भिद्यते, तत्राद्यतनानुपलम्भो निवृत्तः, प्राक्तनो न निवृत्त इति कः कुशाग्रीयबुद्धेरन्य इममतिसूक्ष्मविवेकमवगाहते। तस्मादभावोऽभावेनैव परिच्छिद्यत इति न बुद्ध्यामहे।

कथं तर्हि स्वरूपमात्रं गृहीत्वा स्थाना[3]न्तरं गतस्य स्मर्यमाणे प्रतियोगिन्यभावप्रतीतिः? अनुमानात्, यो हि [4]यस्मिन् प्रतियोगिनि स्मर्यमाणे स्मृतियोग्यः सत्यामपि सुस्मूर्षायां न स्मर्यते, स तस्य ग्रहणकाले [5]नासीदिति। यथा केवले प्रदेशे स्मर्यमाणे तत्र प्राक्प्रतीतो घटोऽस्मर्यमाणः। न च [6]स्मर्यते देवकुले स्मर्यमाणे सत्यामपि सुस्मूर्षायां स्मृतियोग्योऽपि देवदत्तः। तस्मात् सोऽपि देवकुलग्रहणसमये नासीदिति स्मृत्यभावा[7]दनु-

[पं०] नेत्यादि (कं. २२७.२१)। तेनेति (कं. २२७.२२) प्राक्तनानुपलम्भेन। **प्राक्कालीनाभावपरिच्छेदयोग्येनेति** (कं.२२७.२२) प्राक्कालीनाभावसमर्थेन। **कः कुशाग्रीयबुद्धे** (कं. २२७.२५) रित्यादिः विपरीतलक्षणया उपहासः। **अभावोऽभावेनैव परिच्छिद्येत इति न बुद्ध्यामहे** इति (कं. २२७.२१) कोऽर्थ ? किन्त्वभावोनुमानैव परिच्छिद्यते वक्ष्यमाणयुक्त्येत्यर्थः।

परः पृच्छति **कथमित्यादि** (कं २२७.२६)। **स्वरूपमात्रमिति** (कं २२७.२६) देवकुलसत्कम्। [8]**गतस्येति** (कं. २२७.२६) प्रमातुः। **प्रतियोगिनीति** (कं २२७.२७) देवकुले। **अभावप्रतीतिरिति** (कं. २२७.२७) **देवदत्ताभावप्रतीतिः**। श्रीधर उत्तरयति (कं २२७.२७) **अनुमा[ना]दिति** अनुमानमेवाह **यो हीति** (कं. २२७.२७)। यो देवदत्तः। [9]प्रतियोगिनीति (कं. २२७.२७) देवकुल। **तस्येति** (कं. २२८.१) प्रमातुः। **स्मृत्यभावादिति**

[कु०] ननु यदि देशान्तरगतेन देवकुलचैत्राभावो नाभावेन परिच्छिद्यते नापीन्द्रियेण, असंन्निकृष्टत्वात्, नापि स्मृत्या, निर्विक[ल्पक]स्यापि निरासेन, संस्काराभावात्। न च न परिछिद्यते नासीदिति व्यवहारदर्शनात्किमत्र कर्तव्यमिति सौहार्देन पृच्छति–**किं (कथं) तर्हीति** (कं. २२७)। उत्तरं स्वरूपमात्रमिति व्याप्तिमाह **यो हीति** (कं. २२७)–उपनयमाह **न स्मर्यते देवकुल** इति (कं. २२८)–वि(नि)गमनमाह **तस्मादिति** (कं. २२८)–एतदनुसारेण प्रतिज्ञाहेतू बहिरेव द्रष्टव्यौ। एवं च प्रयोगनिष्कर्षः–देवकुलं तदानीं चैत्राभाववत्, स्मरणयोग्ये सुस्मूर्षिते तस्मिन्नस्मर्यमाणे स्मर्यमाणत्वात्। अस्तु प्रदेशश्चैत्रवान् प्रति[योगि]प्रागनुभूतः संस्मरणयोग्ये सुस्मूर्षिते तस्मिन्नस्मर्यमाणे न

१ तूपलम्भेन–कं. १; कं. २; वस्तूपलम्भेनानुप–जे. ३। २ नैपुण्यम्–जे. २। ३ न्तरगतस्य–कं. १ कं. २, जे. ३। ४ यस्मिन् स्मर्यमाणे–कं. १ कं. २। ५ नासीत्–जे. १, जे. २। ६ स्मर्यते च–जे. १; जे. २। ७ स्मृत्यभावानुमानम्–जे. ३। ८ स्थानान्तरगतस्य–कं. १। ९ पुस्तके प्रतीकमिदं नास्ति।

न्यायकन्दली

मानम् । सहोपलब्धयोरपि वस्तुनोः संस्कारपाटवादिविरहादेकस्यास्मरणपरस्य स्मरणं दृष्टम्, यथाधीतस्य श्लोकस्यैकस्य पदान्तरास्मरणेऽपि पदान्तरस्मरणम् । तत्र कथमेकस्य स्मरणे परस्यास्मरणात् अभावानुमानमनैकान्तिकत्वादिति चेत् ? सहस्थितयोरपि पदार्थयोः कदाचित् कारणानुरोधादेक उपलभ्यते नापरः, तत्रापि कथं भूतलोपलम्भादनुपलभ्यमानस्य घटस्याभावसिद्धिः ?

[194] अथ मतम् – एकज्ञानसंसर्गिणोरेकोपलम्भेऽपरस्यानुपलम्भोऽभावसाधनं न सर्वः । येन [1]विज्ञानेन प्रदेशो गृह्यते तेनैव तत्संयोगी घटोऽपि गृह्यते, [2]या च प्रदेशग्रहणे सामग्री सैव घटस्यापि सामग्री । यदि प्रदेशे घटोऽभविष्यत् सोऽपि प्रदेशे ज्ञायमाने [3]व्यज्ञास्यत, तत्तुल्यसामग्रीकत्वात् । न ज्ञायते च, तस्मान्नास्त्येव, तदनुपलम्भस्य प्रकारान्तरेणासम्भवादिति । यद्येवमस्माकमप्येकज्ञानसंसर्गिणोरेकस्मरणमभावसाधनम् । [4]या देवकुल-

[टि०] पुनरपि परो नैयायिकग्रन्थविकल्पितमाशङ्क्य निराचष्टे यद्यपि इत्यादि । तस्माद् व्यवहिते इति :– प्रतियोगिनि प्रतिसम्बन्धिनि देवकुलादौ । एकत्र च इति देवकुलादौ देवदत्ताभावस्य प्रमेयस्य प्रमाणपञ्चकाभावरूपप्रमाण[1]परिच्छेद्यतेत्यर्थम् । अनुमानन्तु 'विवादाध्यस्तोऽभावोऽभावप्रमाणग्राह्योऽभावत्वाद् देवकुले चैत्राभाववदिति ।' अवस्थान्तरप्राप्ते इति–अतद्देशत्वम[2]तदकालत्वं चावस्थान्तरम् । न च इति :– अविद्यमाना[3]ऽनुपलब्धिः । पूर्वमसंविदितत्वाद् इति :– पूर्वं हि देवकुलेऽनुपलब्धिः स्वरूपसत्तामात्रैव सञ्जाता न पुनः [4]संविदतेति । असंविदितत्वमेव ग्राहकप्रमाणा[5]भावाद् दर्शयति

[पं०] (कं. २२८.४) देवदत्तस्मृतेरभावात् । पर आह सहोपलब्धयो (क. २२८.४) रित्यादि । एकस्येति (कं. २२८.७) देवकुलस्य । परस्येति (कं. २२८.७) देवदत्तस्य । कारणानुरोधादिति (कं २२८.८) कारणमत्र विधानादि ।

[194] श्रीधरः प्राह यद्येवमित्यादि (कं. २२८.१४) तदस्मरणस्येति (कं. २२८.१९) देवदत्तास्मरणस्य । नास्त्यनुपपत्ति (कं २२८.२१) रित्यत उपन्यासस्तावदनुपलभ्यमानं उद्दिश्योक्तः ।

[कु०] स्मर्यते यत्राचैत्रस्यैव गृहप्रदेश इति व्यतिरेकी स्मरणाभावे संस्कारपाटवाभाव उपाधिरिति दर्श[यि]त्वा-[व्य]भिचारमाशंकते सहोपलब्धयोरपीति (कं. २२८) । समानन्यायतया परिहर्तुं प्रतिबन्धीमाह सहस्थितयोरपीति (कं. २२८) षष्ठप्रमाणस्वीकारेऽपीति शेषः ।

[194] परस्यानुकूलं तर्कं प्रतिबन्धीमोचनाय शंकते अथ मतमिति (कं. २२८) । स्वमतेऽपि तमेव तर्कं योजयति – यद्येवमिति (कं. २२८) । संस्कारपाटवाभावमुपाधिमसिद्धिकुर्वन् ग्रहणसामर्थ्यभेदमाह – या च देवकुलस्येति (कं. २२८) । उपाधिमुद्धृत्य व्यभिचारमुद्धरति – श्लोकस्य त्विति (कं. २२८) – नास्त्यनुपपत्तिरिति (कं. २२८) । संस्कारपाटवभेदात्सा(स)हस्मरणयोग्यत्वे विशेषणं विपक्षे न वर्तते । अतः कुतो व्यभिचार इत्यर्थः ।

---

१ हि ज्ञानेन – कं. १, कं. २, जे. २; ज्ञानेन – जे. ३ । २ यैव – कं. १ । – कं. १ । ३ विज्ञास्येत – कं. १, कं. २, जे. १ । ४ यैव – कं. १; कं. २, जे. ३ । १ परिच्छेद्यते इत्यर्थः – अ, ब, परिच्छेद्यते इत्यर्थः – ड । २ मत्कालत्वं – अ । ३ मानो – अ, ब । ४ संविदि – अ, ब, संविदिति – क । ५ प्रमाणाभाव – अ ।

न्यायकन्दली

ग्रहणसामग्री [1]सा देवदत्तस्यापि तत्संयुक्तस्य ग्रहणसामग्री, [2]या च देवकुलस्य स्मरणसामग्री [3]सा देवदत्तस्यापि स्मृतिसामग्री, तदेकज्ञानसंसर्गित्वात् यदि देवकुलग्रहणकाले देवदत्तोऽभविष्यत् सोऽपि देवकुले स्मर्यमाणे अस्मरिष्यत्, तत्तुल्यसामग्रीत्वात् । न च स्मर्यते, तस्मा[4]न्नासीदेव, तदस्मरणस्य प्रकारान्तरेणासम्भवादिति समानम् । श्लोकस्य तु पदान्युच्चारणानुरोधात् क्रमेण पठ्यन्ते, नैकज्ञानसंसर्गीणि । तेषु यत्र तु [5]पटुतरः संस्कारो जातस्तत् स्मर्यते, नापरमिति नास्त्यनुपपत्तिः ।

एवमुपलभ्यमानस्यापि वस्तुनो यत् प्राक्तनाभावज्ञानं प्रागिदमिह नासीदिति ज्ञानम्, तदपि प्रतियोगिनः प्राक्तनास्तित्वे स्मर्यमाणे तत्सत्तास्मृत्यभावादनुमानम् ।

ये तु स्मृत्यभावमप्यभावं प्रमाणमाचक्षते तेषाम् "अभावोऽपि प्रमाणाभावः" इति भाष्यविरोधः, "प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते" इत्यादिवार्त्तिकविरोधश्चेत्यलं बहुना ।

[पं०] **न ह्यनुपलब्धिः** इत्यादि । **राद्धान्त** इति मीमांसकानामिति शेषः । **यत्र तु पूर्वमिति** प्रतियोगिनो देव[6]कुलादेरस्मरणात् [7]केवलं भूतदर्शने देवकुलाद्यभावो न गृहीतः । अथ प्रतिपादिग्रहणाभिप्रायेण परं [8]प्रत्याह **सहस्थितयोरपि** इति :- कारणात्पि[9]धानादेः । [10]**तदपि प्रतियोगिन** इति :- प्रतिसम्बन्धिनो भूतलस्येत्यर्थः । तत्सत्ता पूर्वमविद्यमानस्य वस्तुनः सत्ता । **तेषामभावोऽपि प्रमाणेति**—स्मृतेरप्रमाणत्वात्तदभावस्य [11]प्रमाणाभावत्वानुपपत्तेरिति भावः ।

इदानीं **यत्र तु** [12]पूर्वमित्यादिना (कं. २२८.२०) प्रागुक्तमुपलभ्यमानपक्षमनुमानतया स्थापयिष्यन्नाह **एवमुपलभ्यमानस्येत्यादि** (कं. २२८.२१) **प्रतियोगिन इति** (कं. २२८.२३) देवकुलस्य । **तत्सत्तेति** (कं. २२८.२३) देवदत्तसत्ता ।

**अभावोऽपि प्रमाणाभाव इति भाष्यविरोध इति** (कं. २२८.२४) स्मृतिर्हि न प्रमाणम् इति कथं तदभावेऽभावप्रमाणम्, प्रमाणाभावस्यापि भावप्रमाणत्वात् ।

[कु०] उक्तं प्रकारमन्यत्रादिशति – **एवमिति** (कं. २२८) – **प्राक्तनास्तित्व इति** (कं. २२८) पूर्वकालसंबंध इत्यर्थः । **स्मर्यमाण इति** (कं. २२८) सुस्मूर्षित इत्यर्थः । **तत्सत्तास्मृत्यभावादिति** (कं. २२८) तत्कालसंबंधस्मृत्यभावादित्यर्थः ।

नन्व[य]मपीह भूतले घटाभावो न प्रत्यक्षः अभावत्वात् देशान्तरगतस्य देवकुलस्य चैत्राभाववदित्यस्य का गतिरिति चेत्, न । अप्रत्यक्षत्वे इन्द्रियव्यापारविलोपस्योपाधित्वात् । इह चेन्द्रियव्यापारस्यानन्यथासिद्धत्वात् । न चाधिकरणग्रहणायेन्द्रियव्यापार इति वक्तव्यम्, अंधस्य त्वगुपनीते श्यामे घटे न रक्तरूपाभावप्रतीतिप्रसंगात् । अस्माकं तु यथाकथंचिद्गृहीतेऽधिकरणप्रतियोगिग्राहकमिन्द्रियग्राह्याभाववादिनां न किञ्चिदनिष्टमित्यभिप्रायेणोप[सं]हरति –**इत्यलं बहुनेति** (कं. पृ. २२८) ।

---

१ सैव – जे. ३ । २ या – जे. १, येव – जे. ३ । ३ सैव – जे. ३ । ४ नासीद् देवदत्तः – कं. १, कं. २ । ५ बहुतरः – कं. १, कं. २ । ६ देवकुलादे देवकुलाद स्मरणात् – अ, ब । ७ केवल – ड । ८ स्मृत्याह – अ, ब । ९ त्रिधानादौ – अ । १० 'तदपि' इति अब पुस्तकयोर्नास्ति । ११ प्रमाणभावत्वा – अ, ब । १२ 'पूर्वम्' इति कं. १ पुस्तके नास्ति ।

न्यायकन्दली

[195] ये पुनरेवमाहुः – अभावरूपस्य प्रमेयस्याभावान्न साध्वी तस्य प्रमाणचिन्तेति । त इदं प्रष्टव्याः, नास्तीति संविदः किमालम्बनम् ? यदि न किञ्चित् ? दत्तः स्वहस्तो निरालम्बनं विज्ञानमिच्छतां महायानिकानाम् । अथ भूतलमालम्बनम् ? कण्टकादिमत्यपि भूतले कण्टको नास्तीति संवित्तिः, तत्पूर्वकश्च निःशङ्कं गमनागमनलक्षणो व्यापारो दुर्निवारः । केवलभूतलविषयं 'नास्तीति' संवेदनम्, कण्टकसद्भावे च कैवल्यं निवृत्तमिति प्रतिपत्तिप्रवृत्त्योरभाव इति चेत् ? कि[1] कैवल्यं भूतलस्य स्वरूपमेव ? किमुत धर्मान्तरम् ? स्वरूपं तावत् कण्टकादिसंवेदनेऽप्यपरावृत्तमिति स एव प्रतिपत्तिप्रवृत्त्योरविरामो दोषः । धर्मान्तरपक्षे च तत्त्वान्तरसिद्धिः ।

अथ मन्यसे भाव एवैकाकी सद्वितीयश्चेति [2]द्वयीमवस्थामनुभवति । तत्रैकाकी भावः स्वरूपमात्रमिति केवल इति चोच्यते, तादृशस्य तस्य दृश्ये प्रतियोगिनि घटादौ

[टि०] [195] दत्तः स्वहस्त इति तत्पक्षाङ्गीकाराद् बाहु[3]दानेन ते स्खलन्तो रक्षिता इत्यर्थः । महायानिका माध्यमिकबौद्धाः । धर्मान्तरेति :– [4]कण्टकवत्त्वधर्मापेक्षया धर्मान्तरं तत्पक्षे तत्त्वान्तरस्याभावस्य [5]सिद्धिरित्यभिप्रायः ।

[पं०] [195] ये पुनरिति (कं. २२८.२६) प्राभाकराः । ते हि पञ्चप्रमाणवादिनोऽभावं प्रमाणं न मन्यन्ते न साध्वी (कं. २२८.२६) त्यादि । प्रमेयाभावे हि कुतः प्रमाणमित्यर्थः । दत्तः स्वहस्त इति (कं. २२९.२) तत्पक्षाभ्युपगमात् । महायानिकानामिति (कं. २२९.२) विज्ञानवादिनां माध्यमिकबौद्धानाम् । अथ भूतलमालम्बनम् (कं. २२९.२) इत्यस्मात्पुरस्तदेत्यध्याहार्यम् । संवित्ति(कं. २२९.३)रित्यस्मात्पुरः स्यादित्यध्याहार्यम् । परवाक्यं केवलेत्यादि (कं. २२९.४) । प्रतिपत्तिप्रवृत्त्योरिति (कं. २२९.५) प्रतिपत्तिर्नास्तीतिरूपा संवित् । प्रवृत्तिस्तु निश्शङ्कगमनादिका । धर्मान्तरमिति (कं. २२९.६) कण्टकवत्त्वधर्मापेक्षया धर्मान्तरं कैवल्यम् । तत्त्वान्तरसिद्धिरिति (कं. २२९.८) अभावसिद्धिः ।

तादृशस्येति (कं. २२९.९) एकाकिनः । तस्येति (कं. २२९.१०) भावस्य । दृश्ये इति (कं. २२९.१०) उपलब्धिलक्षणप्राप्ते । तादृशस्येत्यादि गद्ये (कं. २२९.९) तादृशस्य तस्योपलब्धिरिति पदयोजना । [6]अनुपलब्धि-

[कु०] [195] एवं भेदान्प्रत्यभावाख्यस्य प्रमाणस्य यथासंभवं प्रत्यक्षानुमानयोरंतर्भावमुक्त्वा प्रमेये विवदमानान्प्राभाकरानुत्थापयति ये पुनरिति (कं. २२८) नास्तीति (कं. २२९) संविदः किमालम्बनमिति (कं. २२९) किं नारूपे (स्वरूप)मेव वा भूतलं केवलं भूतलं वा भेदा एकाकिभूतलं वेति प्रश्नार्थः । आद्यं दूषयति यदि नेति (कं. २२९) द्वितीयं दूषयति–अथ भूतलमिति (कं. २२९) – न हि कंटकवद्भूतलमित्यर्थः । तृतीयमाशङ्कते केवलेति (कं. २२९) द्वितीयस्मादिति शेषमाह कण्टकादीति (कं. २२९) । विकल्प्य दूषयति किं भूतलस्येति (कं. २२९) । तत्त्वान्तरसिद्धिरिति (कं. २२९) । तथा चाभावः केवलमिति संज्ञामात्रं भिद्यत इत्यर्थः । चतुर्थमुत्थापयति अथ मन्यस

१ ननु किं – कं. १, कं. २; न कैवल्यं – जे. २, जे. ३ । २ द्वितीयम् – जे. २, जे. ३ । ३ दाने – अ । ४ कण्टकत्व – अ, ब, क । ५ सिद्धिरित्यभिप्रायः – अ, ब । ६ उपलब्धिर्घटाद्यभावं – कं. १ ।

न्यायकन्दली

जिघृक्षिते [1]सत्युपलब्धिर्घटाद्यभावव्यवहारं प्रवर्तयतीति ।

अत्रापि ब्रूमः—घटादे[2]रभावं भूतलं च व्यतिरेक्यैकाकिशब्दस्यार्थः कः समर्थितो भवद्भिर्यो हि नास्तीति प्रतिषेधधिय आलम्बनम् ? नहि विषयवैलक्षण्यमन्तरेण विलक्षणाया बुद्धेरस्त्युदयः, नापि व्यवहारभेदस्य [3]संभवः । स्वाभाविकं यदेकत्वं भावस्य तदेवैकाकित्वमिति चेत् ? किमेकत्वं प्रतियोगिरहितत्वम् ? एकत्वसंख्या वा ? एकत्वसंख्या तावद्यावदाश्रयभाविनी भावस्य सद्वितीयावस्थायामप्यनुवर्तते । अथ प्रतियोगिरहितत्वं स्वाभाविकमेकत्वमुच्यते, सिद्धं प्रमेयान्तरम् ।

नन्वभाववादिनोऽपि भूतलग्रहणमभावप्रतीतिकारणम्, अप्रतीते भूतले तत्राभावप्रतीतेरयोगात् । तत्र न तावत् कण्टकादिसहितभूतलोपलम्भात् कण्टको नास्तीति [4]प्रतीतिः । अभावविशिष्टभूतलग्रहणस्याभावप्रतीतिहेतुत्वे [5]चाभावग्रहणात् तदभावविशिष्टभूतल-

[टि०] अत्रापि ब्रूम इति:—घटाद्यभावं विशेषणत्वेन भूतलं च विशेष्यत्वेन मुक्त्वेत्यर्थः । परः प्राह नन्वभाववादिनोऽपि इति :—अभावग्रहणादभावविशिष्टेति कण्टकसहितस्य भूतलस्याभावप्रतीतावकारणत्वात् ज्ञातकण्टकाभावस्यैवाभावज्ञाने कारणत्वादात्माश्रयो दोषः । अर्थाभावव्यतिरिक्ता अर्थसद्भावयुक्तापि स्यादत उक्तं प्रतियोगिसंसर्गव्यतिरेकिणि इति ।

[पं०] घटाद्यभावव्यवहारं प्रवर्तयतीति (कं. २२९.१०) न पुनरभावाख्यं प्रमेयान्तरमस्तीत्यर्थः ।

ब्रूम इति (कं. २२९.११) [6]वयं कन्दलीकाराः । घटादेर[7]भावमिति (कं. २२९.११) विशेषणत्वेन । भूतलं चेति (कं. २२९.११) विशेष्यत्वेन । [8]विलक्षणाया इति (कं. २२९.१३) उपस्तीति बुद्ध्यपेक्षया नास्तीति वैलक्षण्यम् । नापि व्यवहारभेदस्यासम्भव (कं २२९.१३) इति अत्र विषयवैलक्षण्यमन्तरेणेति योगः । ततोऽयमर्थो विषयवैलक्षण्यमन्तरेण व्यवहारभेदस्यापि सम्भवो नास्ति । प्रतिषेधे हि नास्तीति व्यवहारः, पूर्वं तु अस्तीति व्यवहारः । सद्वितीयावस्था[या]मिति (कं. २२९.१६) कण्टकत्वदशायाम् । प्रतियोगिरहितत्वमिति (कं. २२९.१६) कण्टकरहितत्वम् । प्रमेयान्तरमिति (कं. २२९.१७) अभावः ।

[कु०] इति (कं. २२९)। तृतीयस्माद्विशेषं दर्शयितुमेकाकि शब्दं निर्ब्रुवाणकादाचित्क[त्व]ाभावव्यवहारसामग्रीमुत्पादयति—तत्रैकाकीति (कं. २२९) असहाये ह्येकाकिनी(नि)जन्यः शिष्यते । असहायत्वं च सहायप्रतियोगितया तद्बुद्धिमपेक्षत इति भावः । निरुक्तिमात्रमतिरिच्यते तेनार्थं इत्यभिप्रायवान्परिहरति अत्रापीति (कं. २२९) ।

ननु निरुक्तिमात्रभेदेऽपि बुद्धिर्भिद्यते यथा वृत्तिवाक्ययोः वृत्तौ हि संसृष्टं प्रधानं प्रतीयते । वाक्ये तु प्रधानोपसर्जनयोः संसर्गमात्रमिति इह च केवलं भूतलमिति वाक्यं तृतीयः पक्षः । चतुर्थस्त्वेकाकीति वृत्तिरिति महान्भेदम्(:) इत्यत आह न हीति (कं. २२९) भेदतां शाब्दी प्रवृत्तिः । सा व्यवहारभेदानुपयोगिनी न हि राज्ञः पुरुषमानयेति चोदितस्तु ततोऽभिसंभवतीत्यर्थः । स्वाभाविकश्चेति (कं चेति) (कं. २२९) । ततश्च विषयभेदोऽपि भविष्यति ।

---

१ अनुपलब्धि—पं. । २ रभावाद्—कं. १, कं. २ । ३ सद्भावः—जे. १ । ४ प्रतीतिरस्ति—जे. १ । ५ चाभावग्रहणे तदभावग्रहणे तदभावविशिष्टभूतलग्रहणम्, तदभावविशिष्टाद्—कं. १, कं. २; चाभावग्रहणादभावविशिष्टभूतलग्रहणम् । अभावविशिष्टभूतलग्रहणाच्चाभावग्रहणम्—जे. ३; चाभावग्रहे तदभावविशिष्टभूतलग्रहणमभावविशिष्टभूतलग्रहणाच्चाभावग्रहणम्—जे. २ । ६ वयं—इति बपुस्तके नास्ति । ७ रभावाद्—कं. १ । ८ विलक्षणया—पं. ।

## न्यायकन्दली

**ग्रहणम्, अभावविशिष्टभूतलग्रहणाच्चाभावग्रहणमिति स्वयमेव स्वस्य कारणम[1]भ्युपगतं स्यात्। तस्मादभावव्यतिरिक्ता प्रतियोगिसंसर्गव्यतिरेकिणी भूतलस्य त्वयापि काचिदेकाकित्वावस्था[2]नुपगन्तव्या, यस्याः प्रतीतावभावप्रतीतिः स्यात्, सैवास्माकं नास्तीति व्यवहारं प्रवर्तयतीति। तदप्ययुक्तम्, भूतलस्वरूपग्रहणस्यैवाभावप्रतीतिहेतुत्वात्। न च सद्वितीयग्रहणेऽप्येतत्प्रतीतिप्रसङ्गः, [3]भूतलग्रहणवदभावेन्द्रियसन्निकर्षोऽप्यभावग्रहणसामग्री, [4]कण्टकादिसद्भावे तदभावो नास्तीति विषयेन्द्रियसन्निकर्षाभावात् सत्यपि भूतलग्रहणे नाभावप्रतीतिः, नहि चक्षुरालोकादिकमुपलम्भकारणमस्तीति यद्यत्र नास्ति तदपि तत्र प्रतीयते। तदेवं सिद्धोऽभावः।**

[टि०] **विषयेन्द्रियसन्निकर्षाभावाद्** इति– विषयोऽभावरूपः। **सिद्धोऽभाव** इतिः– विवादास्पदमघटं भूतलमिति ज्ञानं विशेषणज्ञानकृतं विशिष्टज्ञानत्वात् सघटभूतलमिति [5]ज्ञानवत्। अथवा अघटं भूतलमिति शब्दो भूतलातिरिक्तार्थविषयो भूतलातिरिक्तशब्दत्वात् सघटं भूतलमिति शब्दवत्।

[पं०] पुनः प्रभाकरश्चोदयति **नन्वित्यादि** (कं. २२९.१७)। **अभाववादिनोऽपीति** (कं. २२९.१७) वैशेषिकादेर्भट्टस्य वा। **स्व[य]मेव स्वस्य कारणमिति** (कं. २२९.२१) **स्वात्मनि** क्रियाविरोधदोष इत्यर्थः। **अभावेन** अभावग्रहणात् **अभावव्यतिरिक्तेति** (कं. २२९.२२) उक्तेऽपि संशयः, अर्थाभावव्यतिरिक्ता, अर्थसद्भावयुक्तापि स्यात् अत उक्तं **प्रतियोगिसंसर्गेत्यादि** (कं. २२९–२२)। **त्वयाऽपीति** (कं. २२९–२३) हे अभाववादिन्। **सैवेति** (कं. २२९–२४) एकाकित्वावस्था। **एतत्प्रतीतिप्रसङ्ग** इति (कं. २२९-२५) अभावप्रतीतिप्रसङ्गः। **अभावेन्द्रियसन्निकर्षोऽपीति** (कं. २२९–२६) यथेन्द्रियान्वयव्यतिरेकानुविधायि कार्यं भावे दृश्यते तद्वदभावेऽपीति भणनात्। **तदभावो नास्तीति** (कं. २३०.१) अभावेन्द्रियसन्निकर्षो नास्तीत्यर्थः। **विषयेन्द्रियसन्निकर्षाभावादिति** (कं. २३०.१) अत्र विषयोऽभावः। **सत्यपि भूतलग्रहणे** इति (कं. २३०–१) कण्टकवत्त्वेन। सद्वितीयावस्थायामिति द्रष्टव्यम्। [6]**यदिति** (कं. २३०–२) घटादि। **सिद्धोऽभाव** इति (कं. २३०–३) अत्र साधनमुच्यते "विवादास्पदं भूतलमिति ज्ञानं विशेषणज्ञानकृतं, विशिष्टत्वात्, सघटं भूतलमिति ज्ञानवत्"। अथवा अघटं भूतलमिति भूशब्दो भूतलातिरिक्तार्थविषयो भूतलातिरिक्तशब्दत्वात् सघटं भूतलमिति शब्दवत् इत्यभावसिद्धिः।

[कु०] तस्य विधिविषयत्वादिलीहैकत्वमित्येकाकिपर्यायादेकशब्दाद्वा भावप्रत्ययः संख्यावाचिनो वा द्वितीये विषयभेदसिद्धिः। प्रथमे तदभीष्टसिद्धिरित्याशयात्वा विकल्प्य दूषयति **किमेकत्वमिति** (कं. २२९) प्रतिबन्ध्याऽभावव्यतिरिक्तां तद्व्यवहारसामग्रीं साधयितुमाह **नन्विति** (कं. २२९) **स्वयमेवेति** (कं. २२९)। स्वव्यावृत्तप्रतीतेश्च परस्परं कार्यकारणभावादन्योन्याश्रयत्वमित्यर्थः। **प्रतियोगिसंसर्गिव्यतिरेकिणीति** (कं. २२९)। घटाभावप्रसंगपरिहारायैतद्विशेषणम्। यद्यप्ययं विकल्पो भावविलोपायापि प्रभवति तथाहि घटो घटवति वर्तते। तदभाववति वा आद्येन चात्माश्रयत्वं च द्वितीये विरोधः। तस्माद् घटः न क्वचिदपि वर्तत इति सुवचमेव। तथापि सुकुत्तयैव तदभिधाय स्वपक्षनिर्वाहमाह **तदप्ययुक्तमिति** (कं. २२९) **भूतलोपलंभ(ग्रहण)वदिति** (कं. २२९)। प्रत्यक्षज्ञानविषयस्यापि सामग्र्यनुप्रवेशादिति भावः। अत एव भावप्रतीतिं दृष्टान्तीकरोतीति **तर्हि(न हि)** [7]**चक्षुरादीति** (कं. २३०)।

---

१ मिभ्युपगतं–जे. १, जे. २, जे. ३। २ कित्वावस्थानुमन्तव्या–जे. १; भ्युपगन्तव्या–कं. १, कं. २। ३ भूतलोपलम्भवत्–जे. १, जे. २। ४ कण्टकातिभावे च–जे. १; जे. २। ५ ज्ञानवति – अ, ब, ज्ञानं–ड। ६ यदि। ७ चक्षुरालोकादि–कं.।

### न्यायकन्दली

**[196] स च [1]चतुर्धा रूढः–प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावश्चेति ।**

**प्रागुत्पत्तेः कारणेषु कार्यस्याभावः प्रागभावः, [2][तत्र प्राक् कार्योत्पत्तेः पूर्वमभावो विशेषस्य प्रागभावः] । स चानादिरप्यनित्यः, कार्योत्पादेन तस्य विनाशात्, अविनाशे च कार्यस्योत्पत्त्यभावात् । कः प्रागभावस्य विनाशः ? वस्तूत्पाद एव। निवृत्ते वस्तुनि प्रागभावोपलब्धिप्रसङ्ग इति चेत् ? वस्तुवद्वस्त्ववयवानामप्यारब्धकार्याणां प्रागभावविनाशलक्षणत्वात् ।**

**उत्पन्नस्य स्वरूपप्रच्युतिः प्रध्वंसाभावः । स चोत्पत्तिमानप्यविनाशी, भावस्य पुनरनुपलम्भात् । प्रागभूतस्य पश्चाद्भाव उत्पादः, प्रध्वंसस्य कः प्रागभावः ? यस्यार्थस्य यः प्रध्वंसः तस्यार्थस्य स्वरूपस्थितिरेव तत्प्रध्वंसस्य प्रागभावः । यथा वस्तूत्पत्तिरेव तत्प्रागभावस्य विनाशः, तथा प्रध्वंसोत्पत्तिरेव तत्प्रागभावस्य विनाशः ।**

[**टि०**] [196] ननु 'नासतो विद्यते भावो नाभावो विद्यते सतः ।' इति वस्तूत्पादविनाशानभ्युपगमात् कौतस्त्यौ प्रागभाव[4]प्रध्वंसाभावाविति प्रत्यवतिष्ठन्ते तत्राह **यवसद्भूतं तस्य कथम्** इति । [5]**अत्यन्ताभाव** इति असतः कालत्रयेऽपीति

[**पं०**] [196] परः पृच्छति **कः प्रागभावस्ये**त्यादि (कं. २३०.६) । श्रीधरः **वस्तूत्पाद एवे**ति (कं. २३०.७) **वस्तुवदि**ति (कं. २३०.८) घटवत् । **वस्त्ववयवानामि**ति (कं. २३०.८) कपालादीनाम् ।

**उत्पत्तिमानि**ति (कं. २३०.९) श्रुत्वा परः प्राह–**प्रागभूतस्ये**त्यादि (कं. २३०.१०) श्रीधरः **यस्यार्थस्ये**-(कं. २३०.११)त्यादि । **तत्प्रागभावस्ये**ति (कं. २३० १२) वस्तुप्रागभावस्य । [6]**तत्प्रागभावस्ये**ति (कं. २३०.१२) प्रध्वंसप्रागभावस्य ।

[**कु०**] [196] **कारणेषु कार्यस्याभाव** इति (कं. २३०) । ननु तदानीं भावे उत्पन्नस्य तस्य कथं स्मृतिविषयताऽस्मर्यमाणे च तस्मिन्प्रतियोगिनि तत्प्रागभावः कथं प्रत्येतव्य इति चेत्, न । तस्यापि पूर्वदृष्टघटत्वजात्याक्रान्ततया बुद्धावारोहात् । इतरथा घटं करिष्यामीत्यादि व्यवहारविलोपप्रसक्ते **कार्योत्पादेन तस्य विनाशादि**ति (कं. २३०) । यद्यप्युत्पद्यमानं कार्यमेव प्रागभावस्य प्रध्वंसः, तथापि तस्य कार्योत्पत्तिरुपचारादभावो भावं निवर्तयतीति च दृष्टव्या(यम्) । **अविनाशे चे**ति (कं. २३०)–तं निवृत्तिरूपस्य इत्यर्थः । तथा चायं संक्षेपः–प्रागभावो भावकालेनानुवर्तते भावस्य तन्निवृत्तिरूपत्वादिति गूढाभिसन्धिः । पृच्छति **कः प्रागभावस्ये**ति (कं. २३०)–सुकुमारमुत्तरं–**वस्तूत्पाद एवे**ति (कं. २३०) । अभिसन्धिमुद्घाटयति **निवृत्ते वस्तुनी**ति (कं. २३०) **स्वा(वस्त्व)यवानामपी**ति (कं. २३०) प्रध्वंसस्यापीत्यर्थः । इतरथा तेषामपि विनाशे प्रागभावोन्मज्जनप्रसक्तेः । **स चोत्पत्तिमानपी**ति (कं. २३०) इ(अ)वधिमानपीत्यर्थः । स्वकारणसमवायलक्षणाया उत्पत्तेरभावात् । एवमविनाशीत्युत्तरावह्य(!)रहित इत्यर्थः । सत्ताभिव्यंजकस्वरूपप्रच्युतेरशंकनीयत्वात् । अत्र प्रमाणमाह **भावस्ये**ति (कं. २३०) । उत्पत्तेरौपचारिकत्वमजानानः पृच्छति प्राग-

१ चतुर्व्यूहः–कं. १, कं. २; चतुर्धाव्यूह–जे. २ । २ [ ] एतच्चिह्नान्तर्गतः पाठः–जे. १, जे. २, जे. ३ । पुस्तकेषु नास्ति । ४ प्रध्वंसाभावाविध्वंसाभावादिति–अ । ५ अभ्यन्ताभाव–अ । ६ 'अ' पुस्तके 'तत्प्रागभावस्य' इति पाठः लेखकप्रमादाद् भ्रष्टः ।

न्यायकन्दली

यदसद्भूतं तस्य [1]कथं सद्भावो यच्च सद्भूतं तस्य कथमभाव इत्यपरिचोद्यम्, कारणसामर्थ्यस्यापर्यनुयोज्यत्वात् ।

गव्यश्वाभावोऽश्वे च गोरभाव इतरेतराभावः । स च सर्वत्रैको [2]नित्यः एकपिण्डविनाशेऽपि सामान्यवत् पिण्डान्तरे प्रत्यभिज्ञानात् । [3]यथा च सामान्यमदृष्टवशादुपजायमानेनैव पिण्डेन सह सम्बद्धचते, [4]नित्ये च स्वभावसिद्धम्, तथेतरेतराभावोऽपि । इयांस्तु विशेषः—पिण्डग्रहणमात्रेण सामान्यग्रहणम्, [5]इतरेतराभावग्रहणं तु प्रतियोगिसापेक्षम्, पररूपनिरूपणीयत्वात् ।

अत्यन्ताभावो यदसतः प्रतिषेध इति । इतरेतराभाव एवात्यन्ताभाव इति चेत् ? अहो राजमार्ग एव भ्रमः ? इतरेतराभावो हि स्वरूपसिद्धयोरेव गवाश्वयोरितरेतरात्मता-

[**टि०**] शेषः । असद्भूतस्यैव **बुद्धावारोपितस्य** इति मस्तकमात्रस्य विषाणमात्रस्य च कार्यकारणभावः प्रतीतः शशमस्तकादावारोप्य निषिध्यते, अतः प्रतियोगिनिरूपणाधीननिरूपणीयत्वमिति ॥ अभावः ॥

[**पं०**] 'नाऽसतो विद्यते भावो, नाभावो विद्यते सत' इति वस्तुत्वादविनाशाऽनभ्युपगमात् कुतस्त्यौ प्रागभावप्रध्वंसाभावादिति पृच्छन्तं साङ्ख्यमाक्षिपन्नाह **यदसद्भूत**मित्यादिना (कं. २३०.१३)

**नित्येति** (कं. २३०.१५) आत्मादौ ।

**असत** इति (कं. २३०.१९) कालत्रयेऽप्यविद्यमानस्य खरविषाणादेः ।

[**कु०**] **भूतस्येति** (कं. २३०) उपचारं दर्शयन्नुत्तरमाह **यस्येति** (कं. २३०) सा एवोत्पत्तिः पारमार्थिकी । प्रध्वंसस्य तु पूर्वावधिसद्भावमात्रेणौपचारिकीत्यर्थः । न केवलं प्रध्वंसस्योत्पत्तिरौपचारिकी, अपि तु प्रागभावस्य विनाशोऽपि तथेति दर्शयस्यभावोत्तरावधित्वं व्याचष्टे **यथेति** (कं. २३०)—नाऽसतो विद्यते भावो नाभावो विद्यते सत इति वदतां सांख्यानां मतमपन्यस्य दूषयति **यदसदिति** (कं. २३०) ।

ननु यद्यसत उत्पत्तिः, शिलाशकलादंकुरः कस्मान्न जायत इत्यत आह **कारणसामर्थ्यस्येति** (कं. २३०) **स च सर्वत्रैक इति** (कं. २३०) समवायनिरूपके भेदाद्भेदेन व्यवह्रियत इति भावः । **यदसतः प्रतिषेध** इति तत्कार्यतया वा जिज्ञासितस्यैवेत्यर्थः । एवमिह भूतले घटो नास्तीत्येषोऽप्यत्यंताभावत्वेन संगृहीतो भवति । ननु **सात्मत्वमप्यसदेव** कस्मान्न तन्निषेधोऽप्यत्यंताभाव इति शंकते **इतरेतराभाव इति** (कं. २३०)—एवकारो भिन्नक्रमोऽत्यंताभाव इत्यनन्तरं द्रष्टव्यः । परिहरति **अहो इति** (कं. २३०) **इतरेतरात्मताप्रतिषेध इति** (कं. २३०) इतरेतरात्मतया प्रतिषिध्यते । नन्वितरस्मिन्नितरतात्मत्वं अद्यैवमपि स्यात् । रूपस्य चात्यन्ताभाव वायावेति भावः । **देशकालानवच्छिन्नाधिकरणा-**

१ कथमभाव इति न परिचोद्यम्—कं. १; कं. २ । २ नित्य एव — कं. १; कं. २ । ३ यथा सामान्य — कं. १; कं. २ । ४ नित्यत्वं — कं. १; कं. २ । ५ अभावग्रहणं तु—जे. १, जे. २, जे. ३ ।

### प्रशस्तपादभाष्यम्

[197] [1]तथैवैतिह्यमप्यवितथमाप्तोपदेश एवेति ।

### न्यायकन्दली

प्रतिषेधः । अत्यन्ताभावे तु सर्वथा असद्भूतस्यैव बुद्धावारोपितस्य देश[2]कालानवच्छिन्नः प्रतिषेधः । यथा षट्पदार्थेभ्यो नान्यत्प्रमेयमस्तीति । यदि चात्यन्ताभावो नेष्यते, षडेव पदार्था [3]इत्ययं नियमो दुर्घटः स्यात् ।

[197] ऐतिह्यमप्यवितथमाप्तोपदेश एव[4]'इति ह' इति निपातसमुदाय उपदेशपारम्पर्ये वर्तते, तत्रायं स्वार्थिकः ष्यञ् प्रत्ययः, ऐतिह्यमिति ।

वितथमैतिह्यं तावत् प्रमाणमेव न भवति । अवितथमा[4]प्तवचनमेव । आप्तोपदेशश्चानुमानम् । तस्मादवितथमैतिह्यमनुमानान्न व्यतिरिच्यते इत्यभिप्रायः ।

[टि०] [197] (।। अथ ऐतिह्यप्रमाणान्तर्भावनिरूपणम् ।।)

ऐतिह्यम् इति इह [5]वटे यक्ष [6]इत्यज्ञातवक्तृकं वाक्यमैतिह्यम् । ।। ऐतिह्यम् ।।

(।। इति अनुमाने शब्दादीनां प्रमाणान्तर्भावनिरूपणम् ।। स्वार्थानुमानं समाप्तम् ।।)

[पं०] [197-98] प्रतिपादनमिति (कं. २३१.८) ज्ञापनम् । तत्प्रतिपत्तिजनन[7]समर्थ इति (कं. २३१.११) लिङ्गप्रतिपत्तिजननक्षमः । रूपेष्विति (कं. २३१.१२) प्रतिज्ञादिषु । प्रतिपादयतीत्यत्र (कं. २३१.१३) वाक्यं कर्तृ । तत्प्रतिपादितादिति (कं. २३१.१३) पञ्चावयववाक्यप्रतिपादितात् । तस्येति (कं. २३१.१४) अनुमानस्य ।

[कु०] वच्छिन्न इत्यर्थः । न हि रूपाभावाधिकरणत्वं प्रति वायोर्देशभेदः कालभेदो वा प्रयोजको भवति । तथा सति कस्यापि कदाचिद्रूपत्वप्रसंगात् । उपलक्षणं चैतत् । देशकालावच्छिन्नाधिकरणोप्यत्यंताभावो भवत्येव । यथेहेदानीं घटो नास्ति, यथा च संग्रामस्थले जयं(य)वानन्यो भूपो नास्तीति । यथा षट्पदार्थेभ्यो इदमुदाहरणमेवं व्याख्येयम् । अवान्तरभेदं विहाय भावेषु सप्तत्वसंख्या नास्तीति । अन्यथा प्रतीत्यप्रतीतिभ्यां निषेधव्याघातादियमेव च व्यावृत्तिरेवकारा इत्याह यदि चेति (कं. २३०) ।

[197] उपदेशपारंपर्यमिति (कं. २३०) अनेन शृंगग्राहिकया कस्याचिदुपदेष्टुः प्रसिद्ध्यभावं दर्शयति । ततश्चानिर्दिष्टप्रवक्तृकं प्रवादपारंपर्यमैतिह्यमिति लक्षणमुचितम् । अवितथमैतिह्यमात्रमुपदेश एवेति प्रमाणभूतवाक्यत्वात्पित्रादिवाक्यवदिति शेषः ।

---

१ तथैतिह्यमपि–दे । २ कालावच्छिन्नः–जे. १, जे. २ । ३ इत्यत्र–जे. ३ । ४ माप्तोपदेश–कं. १; कं. २ । ५ वये–अ, ब । ६ इत्यन्यात – अ । ७ समर्थं पञ्चवाक्य–कं १ ।

### प्रशस्तपादभाष्यम्

[198 to 200] पञ्चावयवेन वाक्येन स्वनिश्चितार्थप्रतिपादनं परार्थानु[1]मानम्। पञ्चावयवेनैव वाक्येन संशयितवि[2]परीताव्युत्पन्नानां परेषां स्वनिश्चितार्थप्रतिपादनं परार्थानुमानं विज्ञेयम्।

### न्यायकन्दली

[198] परार्थानुमानव्युत्पादनार्थमाह–पञ्चावयवेन वाक्येन स्वनिश्चितार्थप्रतिपादनं [3]परार्थानुमानमिति। प्रतिपादनीयस्यार्थस्य यावति शब्दसमूहे प्रतीतिः पर्यवस्यति, तस्य पञ्चभागाः समूहापेक्षयावयवा इत्युच्यन्ते। स्वयं [4]साध्यानन्तरीयकत्वेन निश्चितोऽर्थः स्वनिश्चितार्थः, साध्याविनाभूतं लिङ्गम्। तस्य पञ्चावयवेन वाक्येन प्रतिपादनं तत्प्रतिपत्तिजननसमर्थपञ्चावयववाक्यप्रयोगः परार्थानुमानम्। पञ्चावयवं हि वाक्यं यावत्सु रूपेषु लिङ्गस्य साध्याविनाभावः परिसमाप्यते तावद्रूपं लिङ्गं प्रतिपादयति।

[टि०] [198] (॥ अथ परार्थानुमाननिरूपणम् ॥)
[5]तस्य च पञ्च इति:–ननु [6]द्रव्यसमवायिकारणमवयवः, तत्कथं पक्षादिशब्दानामवयवत्वमित्याह समूहापेक्षया इति। [7]न तु वाक्यमेव इति:–अयं हि साध्याविनाभूतमिदं लिङ्गमित्यस्यार्थस्य प्रतिपादकमिति मन्यते। तस्य इति:–साध्यस्येत्यर्थः।

[पं०] अपरे त्विति (कं. २३१.१५) प्राभाकराः। यत्परः शब्दः [स]शब्दार्थ इति (कं. २३१.१६) यथा कम्बुग्रीवादिमदर्थपरो घट शब्द इति स एव कम्बुग्रीवादिमानर्थो घटशब्दस्यार्थः। साध्यपरमिति (कं. २३१.१६) साध्यनिष्ठम्। तत्प्रतिपादनार्थमिति (कं. २३१.१६) साध्यप्रतिपादनार्थम्। [8]तस्येति (कं. २३१.१६) वाक्यस्य।

[कु०] [198] ननु स्वनिश्चयार्थमनुमानमित्युक्तं तर्हि कथं परो बोध्यः, तदबोधने वा किं शास्त्रस्य प्रयोजनमिति शंकानिरासपरतया भाष्यमवतारयति परार्थानुमानेति (कं. २३१)। नन्ववयवो नाम समवायिकारणविशेषः यथा तन्तवः पटस्यावयवा इति; समवायिकारणत्वं च द्रव्यकर्म तत्कथं गुणानामुपपद्यत इत्यत आह प्रतिपादनीयस्येति (कं. २३१)। अनेनावयवसाम्यादवयवत्वं प्रतिज्ञादीनाम्, अवयवसाम्यं च वक्तूनामेककार्यकरत्वम्। यथा एवं पटं कुर्वन्तो बहवस्तन्तवोऽवयवाः। एवं विवक्षितार्थप्रत्ययं कुर्वंतप्रतिज्ञादयः समुदायस्य वाक्यस्यावयवा समुदायिन इत्यर्थः। ननु वर्णानामाशुतरविनाशिनामपि वर्णानामेकस्मृतिसमारुढानामेककार्यकरत्वासंभवादेतदेव भाष्यवाक्यं कुतः तदेकदैव च वाक्यलक्षणं पूर्वपदस्मृतिनिचयसहितान्त्यपदस्मृतिसंकेतं स्मृत्यनुगृहीताप्रतिसंधीयमाना विशेषप्रतिपत्तिर्वाक्यमित्यन्त्यपदानुभवमित्यसंभाविलक्षणमुक्तम्। वर्णसमुदायपदस्य एकानुभवगोचरत्वासंभवात्। अनुभूयंते तु प्रत्येकं वर्णाः(नाम्)।

---

१ मानं विज्ञेयम् – दे। २ पर्यस्ता – कं. १, कं. २, कि.। ३ परार्थमनुमान – जे. १, जे. २। ४ साध्या – कं. १; कं. २। ५ तस्य पञ्च मु, तस्य च पञ्च – जे १, २, ३। ६ द्रव्यसमवायः कारणं समवायस्तत्कथं–अ, द्रव्यसमवायकारणं समवायस्तत्कथं – ब, द्रव्यसमवायकारणमवयवस्तत्कथं – क। ७ न वाक्यमेव मु. न तु वाक्यमेव – जे. १, २, ३। ८ अस्य – कं १।

### न्यायकन्दली

**तत्प्रतिपादिताच्च लिङ्गात् साध्यसिद्धिः। [1]न तु वाक्यमेव साध्यं [2]बोधयति, तस्य शाब्दत्वप्रसङ्गात्। तस्मादविनाभूतलिङ्गाभिधायकवाक्यप्रयोग एव परार्थानुमानमुच्यते।**

**अपरे तु यत्परः शब्दः स शब्दार्थः, वाक्यं च साध्यपरम्, तत्प्रतिपादनार्थमस्य प्रयोगात्। लिङ्गप्रतिपादनं त्ववान्तरव्यापारः, वचनमात्रेण विप्रतिपन्नस्य साध्य[3]प्रतीतेरभावादिति वदन्त एवं व्याचक्षते—स्वनिश्चि[4]तोर्थः साध्यः, तस्य लिङ्गप्रति[5]पादनमेवावान्तरव्यापारीकृत्य पञ्चावयवेन वाक्येन प्रतिपादनं तत्प्रतिपादकवाक्यप्रयोगः परार्थानुमानमिति।**

[टि०] [6]**द्व्यवयवेति बौद्धा** हि [7]यत्सत्तत्क्षणिकं यथा घट इति व्याप्तिः, संश्च विवादास्पदीभूतो भावः इति पक्षधर्मतेत्यवयवद्वित्वं मन्यन्ते।

**मीमांसकास्तु** शब्दो नित्य इति पक्षः, श्रावणत्वाद् इति हेतुः, शब्दत्ववद् इति दृष्टान्तश्चेत्यवयवत्रयमङ्गीकुर्वते।

[पं०] **विप्रतिपन्नस्य साध्यप्रतीतेरभावादिति** (कं. २३१.१७) साध्यभणनमात्रेण विप्रतिपन्नस्य प्रतिपत्तिर्नोपपद्यतेऽतो लिङ्गप्रतिपादनरूपोऽवान्तरव्यापार इत्यर्थः। **तस्य लिङ्गे**(कं. २३१.१८)त्यादि गद्ये तस्य पञ्चावयवेन वाक्येन प्रतिपादनमिति योगः।

[कु०] न चैते प्रत्येकं पदं न च पूर्ववर्णस्मृतिनिचयसहितस्यान्त्यवर्णानुभवस्य विषयपदामिति युक्तम्। स्मृतीनां च क्रमवत्संस्कारकार्यत्वं नासहभावाद्विनश्यदविनश्यदवस्थयोरूपान्त्ये वर्णानुभयोश्च न पदं विषयः। पूर्ववर्णसहितयोरेव तयोः पदत्वात्। पूर्ववर्णानुभवानां च तत्काले विनाशात्। न च पूर्ववर्णानुभवजनितसंस्कारसहकारिणोऽन्त्यवर्णं श्रवणादेव लब्धजन्मनः प्रत्ययस्यैकस्यापादितस्मृत्यनुभवरूपवैचित्र्यस्य सदसद्वर्णावगाहिनो विषयभावमापन्नवर्णैकार्थप्रतीतिहेतुत्वादेकं पदमिति वाच्यम्। संबन्धसंवेदनाहितसंस्कारोद्बोधसमयजन्मना स्वजन्मना स्वजनितेन संस्कारेण संबन्धस्मृत्युत्पत्तिसमये विनाशात्पदार्थविबोधकत्वानुपपत्तेः। तस्मात्स्मर्यमाणा एकार्थप्रत्ययेनैककार्यावच्छिन्ना वर्णा एकं पदम्। एवं पदान्यप्येकस्मृतिसमारूढानि चेद्वाक्यार्थः(र्थं) बोधयन्ति दशदाडिमानि षडपूपा इत्येवमादीनि क(कु)तो वाक्यार्थं निबोधयन्तीत्यत उक्तं **प्रतिसंधीयमानेति** (कं. ?) प्रतिसंधानं प्रतिपदं संधनम्। तच्च स्वार्थद्वारेणाकांक्षायोग्यतासन्निध्यधीनम्। न चैतद्दशदाडिमानीति वाक्ये समस्तीति। न ततो वाक्यार्थबोधः। तद्वदेवं भूतलस्य वाक्यस्य पञ्चमार्गैकदेशावान्तरवाक्यान्वय वा उच्यते इत्यत एव वाक्यार्थप्रतीतेरन्यथानुपपत्तेः। तदन्यथानुपपत्त्या कल्पितस्य वाक्यस्फोटस्य निरंशतया तस्यानुपपत्तिरित्यपि निरस्तम्। न च गोरित्येकं पदमिति प्रत्यक्षेणैव स्फोटसिद्धिः शंकनीया। नियतानुपूर्वके नियतसंख्यकवर्णापेक्षया संकेतस्य ग्रहणादेकार्थप्रतीत्यवच्छिन्नतयाऽन्यथासिद्धिः।

ननु प्रतिपादनं प्रतिपद्यमानं प्रयोजकव्यापारः, स कथमनुमितिकरणमित्यत आह—**तत्प्रतिपत्तीति** (कं. २३१) वाक्यप्रयोगः—प्रयुज्यमानं वाक्यमनुमानस्य वाचकत्वादनुमानमित्युपचर्यते भाष्ये तु कारकव्यापाराभिधानमुपचारे हेतुसम्बन्धं दर्शयितुमित्यर्थः। तदेतदाह **परार्थानुमानं हीति** (कं. २३१) तस्य **शाब्दत्वप्रसंगादिति** (कं. २३१)

१ न वाक्य – कं. १, कं. २। २ साधयेति – जे. १। ३ प्रतीत्यभावात् – जे. १, जे. २। ४ तार्थः– कं. १; कं. २। ५ पादनमवान्तर– जे. १, जे. २, जे. ३। ६ द्वयवयवम् मु.। ७ यद्यत् – अ, ब; यत्सत्तत्–क।

न्यायकन्दली

स्वोक्तं विवृणोति – [1]पञ्चावयवेनैवेत्यादिना। द्वयवयवमेव वाक्यमित्येके। त्र्यवयवमित्यपरे। तत्प्रतिषेधार्थमेवकारकरणम्–पञ्चावयवेनैवेति। प्रतिपाद्येऽर्थे यस्य संशयोऽस्ति स संशयितः, यस्य विपर्ययज्ञानं स विपरीतः, यस्य न संशयो न विपर्ययः [2]किन्त्वज्ञानमात्रं सोऽव्युत्पन्नः, त्रयोऽपि ते प्रतिपादनार्हाः, तत्त्वप्रतीतिविरहात्।

[199] यो यानि पदानि समुदितानि प्रयुङ्क्ते, स तत्पदार्थसंसर्गप्रतिपादनाभिप्रायवानिति सामान्येन स्वात्मनि नियमे प्रतीते पश्चात् पदसमूहप्रयोगाद्वक्तुस्तत्पदार्थसंसर्गप्रतिपादनाभिप्रायावगतिद्वारेण पदेभ्यो वाक्यार्थानुमानं न तु पदार्थेभ्यस्तत्प्रतीतिः। नहि पदार्थो

[टि०] [199] यो यानि पदानि इतिः–आप्तत्वे सति तत्पदोच्चारकत्वाद् इति हेतुः। ननु यथा पदैः पदार्थः प्रतिपाद्यते तथा [3]पदार्थे वाक्यार्थप्रतिपादिका शक्तिरपि क्रियते इत्यत आह–नापि वाक्यार्थेति शब्दरूपस्य हि [4]प्रमाणस्य पदार्थरूप-

[पं०] द्व्यवयवमिति (कं. २३१.२०) व्याप्तिः पक्षधर्मता चेति द्वावयवौ यस्य तत्। एके (कं. २३१.२१) इति सौगताः। त्र्यवयवमिति (कं. २३१.२१) पक्षहेतुदृष्टान्ताख्यस्त्रयोऽवयवा यस्य तत्। अपरे इति (कं. २३१.२१) मीमांसकाः।

[199] द्वितीयव्याख्यानवादिमतमाश्रित्याह यो यानी(कं. २३१.२४)त्यादि। तत्पदार्थसंसर्ग (कं. २३१.२५) त्यत्र संसर्गोऽन्वयः। [5]तत्पदार्थसंसर्गप्रतिपादनाभिप्रायवान् (कं. २३१.२५) इति पक्षः। अत्र चाप्तत्वे सति तत्पदोच्चारकत्वादिति हेतुः साक्षादनुक्तो द्रष्टव्यः। स्वात्मनि नियमे (कं. २३१.२५) यथाऽहमित्यविनाभावो

[कु०] आप्तोक्तो हि शब्दः प्रतीतिहेतुः, पंचावयवस्य वाक्यस्याप्रयोक्तत्वेन प्रतिज्ञयैव सिद्धेः हेत्वाद्यवयववैयर्थ्यप्रसंगादित्यर्थः। ननु ज्ञापकोपदेशाद्भवतु ज्ञाप्यज्ञानं शाब्दम्, तर्हि वृक्षमभिसंविद्यते विद्युदित्यत्र विद्युज्ज्ञानमपि शाब्दं ज्ञानमित्यतः पक्षान्तरमाह – अपर इति (कं. २३१)।

ननु लिंगलिंगिनोऽनुभयोरपि प्रतिपाद्यत्वे वाक्यभेद स्यादित्यत आह लिंगप्रतिपादनं त्विति (कं. २३१) न व्याप्तेश्च साक्षादेव साध्यम्। किमिति न प्रतिपादयतीत्यत आह – वचनमात्रेणेति (कं. २३१)। पौनरुक्त्यं परिहरन्भाष्यमवतारयति–स्वोक्तमिति (कं. २३१) पञ्चमित्युक्तेः प्रयोजनं कथितम्। अधिकारिप्रदर्शनं च विवरणार्थः।

नन्वसुसंदिग्धोऽधिकारी, संदिग्धे न्यायः प्रवर्तते इत्युक्तत्वादितरयोस्तु कथं अधिकारः, प्रत्युत विपर्यस्तः प्रतिकूलमेव साधनं प्रयुङ्क्तेऽव्युत्पन्नः सूक्ष्ममपि न जानाति पदाना[म]र्थेषु संगतिग्रहणस्याभावादिति चेत्, न अभिप्रायानवबोधात्। अयमत्र अभिप्रायः, विपर्यस्तस्य जल्पवितंडाभ्यामहंकारे मलिने सांशयिकस्य सतः कारणिकेन प्रतिपाद्यं कर्तव्यम्। अव्युत्पन्नस्यापि व्युत्पत्तिमादौ कृत्वा यथाकथंचित्संशयं व्यापाद्य पश्चात्प्रतिपादनं कर्तव्यमिति। अत एवाह त्रयोऽप्येते (त्रयोऽपि ते) इति (कं. २३१)।

[199] उत्तरं प्रकरणं यद्यपि नास्माकमभिप्रायः। लिंगतया शब्दप्रमाणमिति वदतामनुप्रयोगि, तथापि परकीयसिद्धान्तमनुसृत्य किञ्चिन्निरूपयति यो य(या)नीति (कं. २३१)–अत एवोक्तं मीमांसकानामिति (कं. २३२)।

---

१ पञ्चावयवेन वाक्येनेत्यादिना – जे. १, जे. २। २ किन्तु स्वज्ञान – कं. १; कं. २, किन्तु ज्ञान – जे. ३। ३ पदार्थैः - अ, ब, क। ४ प्रेमाणस्य – अ, प्रामाणस्य – ब। ५ सत् – पञ्जिका।

### न्यायकन्दली

नाम [1]प्रमाणमस्ति मीमांसकानाम् । नापि वाक्यार्थप्रतिपादनाय पदैः प्रत्येकमभिधीयमानानां पदार्थानां वाक्यार्थप्रतिपादनशक्तिराविर्भवति, प्रमेयप्रतीतिमात्रव्यापारस्य प्रमाणस्य प्रमेयशक्त्याधायकत्वाभावात् । तस्मात् पदार्था वाक्यार्थं प्रतिपादयन्तो लिङ्गत्वेन वा प्रतिपादयेयुरन्यथानुपपत्त्या वा, उभयथाऽप्यशाब्दो वाक्यार्थः स्यात् ।

ननु किं पदानि प्रत्येकमेकैकमर्थं प्रतिपादयन्ति वाक्यार्थस्य लिङ्गम् ? किं वा परस्परान्वितं स्वार्थं [2]बोधयन्ति ? अत्रैके तावदाहुः—व्युत्पत्त्यपेक्षया पदानामर्थप्रतिपादनम् । व्युत्पत्तिश्च गामानय गां बधानेत्यादिषु वृद्धव्यवहारेषु [3]क्रियान्विते कारके, कारकान्वितायां [4]च क्रियायाम्, न स्वरूपमात्रे । अतः परस्परान्विता एव पदार्थाः पदैः प्रतिपाद्यन्त इति ।

**[टि०]** प्रमेय[5]प्रतीतावेव व्यापारो न पुनः [6]पदार्थरूपे [7]प्रमेये वाक्यार्थप्रतिपादनशक्त्याधा[8]यकत्वेऽपीत्यर्थः । अथ तन्मतमेवोपसंहरति तस्मात्पदार्था इति :—लिङ्गत्वेन तावद् विवादाध्यासिताः पदार्थाः परस्परसंसर्गवन्त [9]आकाङ्क्षादिमत्त्वे सति आप्तप्रणीतपदार्थत्वात् सम्प्रतिपन्नैकपदार्थवद् इति । अन्यथानुपपत्त्या तु आकाङ्क्षादिमत्त्वे सत्याप्तोक्तपदार्थत्वं [10]परस्परसंसर्गमन्तरेणानु[11]पपद्यमानं संसर्गमाक्षिपतीति । इत्येवं पदार्थस्य वाक्यार्थप्रतिपादने पृथक्प्रमाणत्वं निराकृत्य [12]अनुमानार्थापत्तित्वेऽपि दूषणमाह **उभयथाप्यशाब्द** इति ।

**[पं०]** **न हि पदार्थो नाम[13]प्रमाणमस्ति मीमांसकाना** (कं. २३२.१) मिति—किन्तु पदान्येव वाक्यार्थं प्रतिपादयन्ति । वैशेषिका हि पदार्थेभ्यो वाक्यार्थप्रतीतिमिच्छन्ति, मीमांसकास्तु पदेभ्य इति भावार्थः । **प्रमेयप्रतीत्यत्र** (कं. २३२.३) प्रमेयः पदार्थः । **प्रमाणस्येति** (कं. २३२.४) पदलक्षणस्य । मीमांसका वैशेषिकं पृच्छन्ति **तस्मात् पदार्था** (कं. २३२.४) इत्यादि । **लिङ्गत्वेनेति** (कं. २३२.५) अग्निधूमादौ । **अन्यथानुपपत्त्येति** (कं. २३२.५) चन्द्रोदयः समुद्रवृद्ध्यादौ । **अशाब्द** इति (कं. २३२.५) आर्थ एवेत्यर्थः ।

**[कु०]** ननु यथा स्वरूपेण प्रमाणस्यापि धूमस्य लिंगतयाऽनुसंधीयमानावस्थायां प्रमाणत्वं तथा पदार्थानामपि पदैः प्रतिपाद्यमानानां प्रमाणत्वं भविष्यतीत्यत आह **नापीति** (कं. २३२) भवेदप्येवं यथा व्याप्तिपक्षधर्मतानुसंधानं धूमस्येतिकर्तव्यता । एवं पदैः प्रतिपादनमपि यदि पदार्थानामिष्टि(ति)कर्तव्यता न स्यात्, न चैवं पदकार्यस्य ज्ञानस्य पदार्थस्वरूपमात्रविषयत्वादतीन्द्रियायाश्च शक्तेरनङ्गीकारादित्यर्थः । यद्यपि योग्यान्वितपदार्थावच्छिन्नविवक्षानुमानेऽपि न काचिद्दर्शनजातिरस्माकं तथाप्युपपत्तिरनुसर्तव्येति विचारमारभमाणस्तत्पूर्वाङ्गं संशयमाह—**ननु किमिति** (कं. २३२)

---

१ प्रमाणान्तर—कं. १; कं. २। २ प्रतिबोधयन्ति—जे. १। ३ क्रियान्वितेषु कारकेषु—कं. १, कं. २। ४ वा—कं. १, कं. २। ५ प्रतीवेव—अ। ६ पदार्थरूप—अ, ब। ७ प्रमेय—अ, ब, क। ८ धायकेऽपीत्यर्थः—अ, ब। ९ आकाङ्क्षामत्वे—अ। १० परस्य संसर्ग—अ, ब। ११ नुपद्यमानं—अ, ब। १२ आनुमनोऽर्थापत्ति—अ, ब। १३ प्रमाणान्तर—कं. १।

न्यायकन्दली

अत्र निरूप्यते—यदि गामानये[1]त्यादिवाक्ये गामिति पदेनैवानयेत्यर्थान्वितः स्वार्थोऽभिहितस्तदानयेतिपदं व्यर्थम्, उक्तार्थत्वात्। आनयेतिपदेनानयनार्थेऽभिहिते सत्यानयेत्यर्थान्वितः स्वार्थो गोपदेनाभिधीयते, तेनानयेति पदस्य न वैयर्थ्यमिति चेत्? तर्ह्यानयेति पदं केवलं स्वार्थमात्रमाचक्षाणमनन्विताभिधायि प्राप्तम्। यथा चेदमनन्वितार्थं तथा पदान्तरमपि स्यादिति दत्तजलाञ्जलिरन्विताभिधानवादः। [2]अथानयेति पदेनापि पूर्वपदाभिहितेनार्थेनान्वितः स्वार्थोऽभिधीयते, तदा यावत् पूर्वपदं स्वार्थं नाभिधत्ते तावदुत्तरपदस्य पूर्वपदार्थान्वितस्वार्थाभिधानं नास्ति। यावच्चोत्तरपदं स्वार्थं नाभिधत्ते, तावत् पूर्वपदस्योत्तरपदार्थान्वितस्वार्थप्रतिपादनं न भवतीत्यन्योन्याश्रयत्वम्। अथ मन्यसे—प्रथमं पदानि केवलं पदार्थं स्मारयन्ति, पश्चादितरेतरस्मारितेनार्थेनान्वितं स्वार्थमभिदधतीति, ततो नेतरेतराश्रयत्वम्। तदप्यसारम्, सर्वदैव हि पदान्यन्वितेन [3]स्वार्थेन सह गृहीतसाहचर्याणि नानन्वितं केवलं पदार्थमात्रं स्मारयितुमीशते, यथानुभवं स्मरणस्य प्रवृत्तेः। वृद्धव्यवहारेष्वन्वयव्यतिरेकाभ्यां गोशब्दस्य ककुदादिमदर्थे नियमो गृहीतो न

[टि०] अत्रैके तावद् इति :—अन्विताभिधानवादिनः प्राभाकराः—इत्यर्थः। तेषां प्रत्येकम् इति :—कदाचित्करणत्वं कदाचित्कर्मत्वमिति व्यभिचारः। तन्मतमभ्युपगम्य [4]साम्यमापादयति एवं तर्हि इति। [5]अथ गोपिण्डस्मरणवत् कारणादिस्मरणमपि प्रसञ्जयिष्यन्नाह न च स्मरणम् इत्यादि। साहचर्यनियमोऽवि[6]नाभावं स्पष्टयति तद्धि इति :—

[पं०] अथ श्रीधरो मीमांसकं पृच्छति ननु किं पदानि (कं. २३२.६) इत्यादि। प्रत्येकमेकैकमर्थं प्रतिपादयन्ति वाक्यार्थस्य लिङ्गमिति (कं. २३२.६) अत्र प्रतिपादयन्तीति जसन्तं पदम्। प्रतिपादयन्ति [7]सन्तीत्यर्थः। अनेन च वाक्येनाभिहितान्वयवादिमतः सूचा(चितः)। [8]किं चेति—अनेनाभिधानवादं प्रतिक्षिपन्नभिहितान्वयवादं तु स्वीकुर्वन् श्रीधरः प्राह—अत्र निरूप्यते इति—अत्रान्विताभिधानवादे विचारः क्रियते इत्यर्थः। परः प्राह—आनयेत्यादि। स्वार्थेति—गोत्वम्। पूर्वपदाभिहितेनेति अत्र पूर्वपदं गामिति। अर्थेनेति [9]...... अनुभवं स्मरणस्य प्रवृत्तेरिति अनुभवश्चान्वितानामेव ... इति भावः। परवाक्यं वृद्ध इत्यादि। गोशब्दस्य ककुदादिमदर्थे नियमो गृहीत इति अन्वितत्वे सत्यपि गोशब्दस्य ककुदादिमत्येवार्थेऽविनाभावो निश्चित इत्यर्थः। न क्रियाकरणाविष्विति आनयनबन्धनादिषु

[कु०] पूर्वपक्षमाह अत्रैक इति (कं. २३२)—सिद्धान्तमाह अत्र निरूप्यत इति (कं. २३२)। सम्बन्धप्रतीतिः सम्बन्धिप्रतीतिं विना नोपपद्यते। तत्रान्वितार्थमपि दधत्पदं सम्बन्धिनमपि किं स्वयमेव बोधयति, पदान्तरप्रत्यायितेन वान्वितं स्वार्थमात्रम्। नाद्य इत्याह यदीति (कं. २३२)। द्वितीयमुत्थाप्य दूषयति आनयेति (कं. २३२) पदेनेति (कं. २३२) यथा चेति (कं. २३२)। गामिति पदमन्विताभिधायिपदत्वादानयेति पदवदित्यन्विताभिधायि किमपि न स्यादित्यर्थः।

---

१ नयेति—वाक्ये—जे. १, जे. २। २ यदा—कं. १; कं. २। ३ पदार्थेन—कं. १; कं. २; पदार्थेनैव—जे. ३। ४ समापादयति—अ, साम्यसमापादयति—ब। ५ अथा—अ, ब। ६ विभाव—अ। ७ अतः पराणि कानिचित्पत्राणि—'अ' पुस्तके नोपलभ्यन्ते। ८ किंवा—कं. ९ अत्र ब पुस्तके एका पङ्क्तिः नष्टा।

### न्यायकन्दली

क्रियाकरणादिष्विति तेषां प्रत्येकं व्यभिचारेऽपि गोशब्दस्य प्रयोगदर्शनात् । तेनायं गोशब्दः श्रूयमाणोऽभ्यासपाटवादव्यभिचरितसाहचर्यं ककुदादिमदर्थमात्रं स्मारयति, न क्रियाकरणादीनीति चेत्? एवं तर्हि यस्य शब्दस्य यत्रार्थे साहचर्यनियमो गृह्यते तत्रैव तस्याभिधायकत्वं नान्यत्रेत्य*नन्वितार्थाभिधानेऽपि समानम् । न च स्मरणमनुमानवत् साहचर्यनियममपेक्ष्य प्रवर्तत इत्यपि सुप्रतीतम्, तद्धि संस्कारमात्रनिबन्धनं प्रतियोगिमात्रदर्शनादपि भवति । तथाहि – धूमदर्शनादग्निरिव रसवत्याविप्रवेशोऽपि स्मर्यते, तद्यदि गोशब्दः सहभावप्रतीतिमात्रेणैव गोपिण्डं स्मारयति, गोपिण्डप्रतियोगिनोऽपि पदार्थान् कदाचित् स्मारयेत् । नियमेन तु गोपिण्डमेव स्मारयंस्तद्विषयं वाचकत्वमेवावलम्बते, तथासत्येव नियमसम्भवात् । किञ्च यथा वाक्ये पदानामन्विताभिधानं तथा पदेऽपि प्रकृतिप्रत्यययोरन्विताभिधानमिच्छन्ति भवन्तः, ताभ्यां चेत् परस्परान्वितः स्वार्थोऽभिहितः कस्तदन्यः पदार्थो यः पदेन पश्चात् स्मर्यते? तदेतदास्तां नग्नाटकपक्षपतितं वचः ।

[टि०] तत्स्मरणं, प्रतियोगी प्रतिसम्बंधि(धी) धूमा[2]दिर्गोपिण्डादि [:] च, तन्मात्रदर्शनादविनाभावाभावेपीत्यर्थः । **तदेतद्** इति :– नग्नाटा मङ्गल[3]पाठकानुचरास्तत्पक्षपातितमसद्भूतार्थत्वात् ।

[पं०] पुनरविनाभावो न गृहीत इत्यर्थः । **व्यभिचारेऽपीति** कदाचित् करणत्वं कदाचित्कार्यत्वमित्यादि व्यभिचारः । **यत्रार्थे इति** =गवादौ । **अनन्विताभिधानेऽपीति** अभिहितान्वयवादे । **अनुमानवदिति** व्यतिरेकिदृष्टान्तः । **प्रतियोगिमात्रदर्शनादिति** आनयनादिक्रिया प्रतियोगिनो गवादेरेव दर्शनात् । **सहभाव प्रतीतिमात्रेणेति** न तु वाचकत्वेनेत्यभिप्रायः । **पदार्थानिति**–आनयनादीन् । **तथासत्येवेति** वाचकत्वेसत्येव न तु स्मारकत्वे । पदार्थानां केवलं पदार्थस्मारणं पुनः दूषयति **यथा वाक्ये** – इत्यादिना **नग्न[ना]टकपक्षपतितमिति** नग्ननाटकामंगलपाठकानुचरास्तत्पक्षपतितमसंगतार्थत्वादनियतपक्षग्राहीत्यर्थः ।

परवाक्यं–**अस्त्वेवमित्यादि** । **एवमिति**–अभिहितान्वयवादिमतेन । **प्रत्यक्षवाचकस्येति**–घटः क्वेति पृष्टे प्रत्यक्षोऽयमित्युत्तरस्य प्रत्यक्षवाचकत्वम् । **ज्ञानहेतोरिति** लिंगात् । **वचनस्य परार्थत्वादिति**–अस्यार्थः(!)अर्थेत्यध्याहार्यम् ।

[कु०] **अन्योन्याश्रयत्वमिति** (कं. २३२) एवं चाभिधानमेव स्यादिति भावः । **सर्वत्रैवेति** (कं. २३२) भवत्पक्ष इति शेषः । शंकते **वृद्धव्यवहारेष्विति** (कं. २३२) बहुवचनेन नैकस्मिन्व्यवहारे शक्तिग्रह इति दर्शयति । परिहरति **एवं तर्हीति** (कं. २३२) प्रतिपादिकैः स्वार्थानां विभक्तिश्च शक्तीनां स्मरणे सति पश्चात्संसर्गरूपवाक्यार्थबोधं विहाय नान्विताभिधानं पश्याम इत्यर्थः । नियतसाहचर्यं स्मरन्तीति यदुक्तं तदपि नेत्याह **न चेति** (कं. २३३) न च पदानां स्मरणमेव व्यापार इत्याह **तद्यदीति**(कं. २३३) । एवं पदानामन्विताभिधाने प्रसंज्ञितं दोषं प्रकृतिप्रत्ययोरतिदिशति **किं चेति** (कं. २३३) ।

---

* नन्विताभिधानेऽपि – कं. १, कं. २; जे. २, जे. ३ । २ धूमादिर्गोपिण्डादि च – अ । ३ पावका – अ ।

न्यायकन्दली

[200] प्रकृतमनुसरामः । अस्त्वेवं पदानामर्थप्रतिपादनम्, इदं तु न सङ्गच्छते 'परार्थ-मनुमानमिति । लिङ्गं तज्जनितं वा ज्ञानमनुमानम् । न च लिङ्गस्य ज्ञानस्य च परार्थत्वम् । अनुमानवाचकस्य शब्दस्य परार्थत्वादनुमानं परार्थमुच्येत चेत् प्रत्यक्ष-वाचकस्यापि शब्दस्य परार्थत्वात् प्रत्यक्षमपि परार्थमुच्येत ? तदुक्तम्—

ज्ञानाद्वा ज्ञानहेतोर्वा नान्यस्यास्त्यनुमानता ।
तयोश्च न परार्थत्वं प्रसिद्धं लोकवेदयोः ॥
वचनस्य परार्थत्वादनुमानपरार्थता ।
प्रत्यक्षस्यापि पारार्थ्यं तद्द्वारं किं न कल्प्यते ॥ इति ।

अत्र समाधिः—न शब्दस्य परार्थत्वात् तद्वाच्यमनुमानपरार्थमिति वदामः, अपि तु यत् परार्थं पञ्चावयवं वाक्यं तल्लिङ्गप्रतीतिद्वारेणानुमितिहेतुत्वादनुमानमिति ब्रूमः । नन्वेवमपि लिङ्गप्रतिपादकस्य प्रत्यक्षस्यानुमानतोपचारप्रसङ्गः ? न प्रसङ्गस्तत्र लौकिकशब्दप्रयोगाभावात् ।

[टि०] [200] इदं तु [न] सङ्गच्छत इति :—इदं वक्ष्यमाणम् । न च लिङ्गस्य इति :—धूमादेर्धूमादिज्ञानस्य च परार्थत्वं नास्ति धूमस्य ज्ञानद्वारेणोपयोगात्, ज्ञानस्य च प्रमातृनिष्ठत्वात् । परं आचार्योत्तरमाशङ्कते अनुमानवाच-कस्य इति साध्याविनाभूतलिङ्गप्रतिपादकानामवयवानां परार्थत्वादनुमानेऽपि परार्थमुपलर्यते इति भावः । प्रत्यक्ष-वाचकस्य इति घटः क्वास्तीति पृष्टे प्रत्यक्षोऽयमित्युत्तरस्य प्रत्यक्षवाचकत्वम् । नन्वेवमपि इति येन प्रत्यक्षेण धूमादि गृह्यते तस्यापि पारम्पर्येणानुमानकारणत्वात् । उत्तरं लौकिकेति आरोपे हि सति निमित्तानुसरणं न तु निमित्त-मस्तीत्यारोपो न खलु यथा माणवके पाचकत्वारोपस्तथा पाचकेऽपि माणवकत्वारोप इति भावः ।

( ॥ इति परार्थानुमाननिरूपणम् ॥ )

[पं०] [200] अनुमानपरार्थतेति—अस्मात्पुरस्तादध्याहार्यम् (!) । प्रत्यक्षस्यापि पारार्थ्यमिति—पश्य मृगो धावती-त्यादौ । तद्द्वारमिति वचनपरार्थत्वद्वारायातम् । लिंगप्रतिपादकस्येति लिंगगमकस्य । लौकिकशब्देति—अत्र लोक. प्रामाणिकलोके द्रष्टव्यः ।

[कु०] [200] इह यदनुमानं तत्परार्थमित्युच्यते इति विपर्यस्त आक्षिपति इदं त्विति (कं. २३३) । अनुमानं हि किं परार्थशब्देन मुख्यया वृत्त्योच्यते, उपचारेण वा । नाद्य इत्याह— लिङ्गं तज्जनितं वेति (कं. २३३) न द्वितीय इत्याह—अनुमानवाचकस्येति (कं. २३३) प्रत्यक्षवाचकस्येति (कं. २३३) । इह घटे किं प्रमाणमिति प्रश्ने सति किमत्र पृच्छ्यते चक्षुरेव प्रमाणमिति प्रतिपादितम् । प्रत्यक्षमपि परार्थमुच्यतामित्यर्थज्ञानहेतोरिति ज्ञानविषय(या)न्व-याल्लिगादित्यर्थः ।

---

१ परार्था—कं. १; कं. २ । २ मुच्यते—कं. १; कं. २, जे. ३ । ३ प्रतिसमाधिः—जे. १, जे. २ । ४ तद्द्वारमनुमानपारार्थ्यं—कं. १; कं. २ । ५ तावतार—कं. १; कं. २ । ६ परावर्तत्वं—अ, ब । ७ निष्ठितत्वात् —अ, ब, क । ८ वाचस्य—अ, ब, ९ इत्यर्थः—ड । १० नुसरणं ननुसरणं मित्तमस्ती—अ । ११ माणवकेऽपि माणवकत्वारोप इति भावः—अ, ब, क ।

### प्रशस्तपादभाष्यम्

[201] **अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः ।**

**तत्रानुमेयोद्देशोऽविरोधी प्रतिज्ञा । [1]प्रतिपिपादयिषितधर्मविशिष्टस्य धर्मिणोपदेशविषयमापा[2]दनार्थमुद्देशमात्रं प्रतिज्ञा, यथा द्रव्यं वायुरिति ।**

### न्यायकन्दली

[201] पञ्चावयवं वाक्यमित्युक्तम् । के पुनस्ते [3]पञ्चावयवाः? तत्राह–अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः । पुनःशब्दो वाक्यालङ्कारे ।

तत्र तेषां मध्येऽनुमेयोद्देशोऽविरोधी प्रतिज्ञा । एतत् स्वयमेव विवृणोति – प्रतिपिपादयिषितेत्यादिना । प्रतिपादयितुमिष्टो यो धर्मस्तेन विशिष्टो धर्मो अनुमेयः पक्ष इति कथ्यते । तस्य यदुद्देशमात्रं सङ्कीर्तनमात्रं साधनरहितं सा प्रतिज्ञेति । यथोपदिशन्ति सन्त :—

"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता" इति ।

[टि०] ( ।। अथ परार्थानुमानाङ्गपञ्चावयवनिरूपणे प्रतिज्ञानिरूपणम् ।। )

[201] **शक्तस्य सूचकम्** इति – हेतुवचनं साध्यसिद्धिं प्रत्यशक्तमपि साध्यसिद्धौ शक्तस्य धूमाद्यर्थस्य सूचकं बौद्धमते शब्दाना[4]मर्थसूचकत्वादिति । धूमशब्देन हि धूमरूपोऽर्थः सूच्यते–अर्थेन च साध्यं साध्यते इति हेतुप्रतिपादकः

[पं०] [201–202] **सन्त** इति भाट्टाः । **तस्या** इति पञ्चम्यन्तं पदम् । **शक्तस्येत्यादि** श्लोकः । व्याख्या–हेतुवचोरि[ति] धूमादित्यादिरूपं हेतुवचनं साध्यसिद्धं प्रति स्वयमशक्तमपि स च साध्यसिद्धौ शक्तस्य धूमाद्यर्थस्य सूचकम् । एतावता हेतुवचनस्य परम्परया साध्यसाधनक्षमत्वं प्रतिपादितं पूर्वार्धे । उत्तरार्धे तु **पारम्पर्येण नाप्यलमिति ।**

[कु०] परार्थमनुमानमित्यनयोः पदयोः मुख्यवृत्तौ सामानाधिकरण्यं नारोहतीयं भ्रान्तिविषयमुपचारं निषेधन्स्वाभिमतं च यत्परार्थमनुमानमित्यौपचारिकं सामानाधिकरण्यं दर्शयन्समाधत्ते **अत्र समाधिरिति** (कं. २३३) अत्राप्युपचारेऽतिप्रसंगं चोदयति । प्रयोजनाभावे लौकिक एव प्रचारः सोढ्य इत्याशयेन परिहरति **न प्रसंग इति** (कं. २३३) ।

[201] **पुनः शब्दो वाक्यालंकार इति** (कं. २३४)–विभागस्य न्यूनाधिकसंख्याव्यवच्छेदपरतया शब्दरूपाणां जिज्ञासादीनामवयवत्वनिरासावधीरणार्थं पुनः शब्दो न भवतीत्यर्थः । वाक्यस्य वाऽलंकारो वाच्यभेदप्रतिपादनं यथा यज्ञदत्तो भुङ्क्ते, देवदत्तः पुनरधीते इति । **स्वयमेव इति** (कं. २३४) – प्रत्याम्नायादौ व्यभिचारपरिहारायेति शेषः **शक्य(क्त)स्य सूचकमिति** (कं. २३४) – साधनं हि साध्येन विना अपर्यवस्यते तदाक्षिपतीत्यर्थः । नन्वाक्षिप्तो विषयीभविष्यतीत्यत आह – **न(?) खल्विति** (कं. २३४) । अयं पर्वतोऽग्निमान्नवेति संशयानं प्रति धूमवत्त्वादित्यु-

---

१ प्रतिपादयिष्यतः–दे । २ मापादयितुं–कं. १, कं. २; कि. । ३ अवयवाः–जे. १, जे. २ । ४ मर्थासूचकत्वादिति–अ, ब ।

न्यायकन्दली

यदि हेतुरहितमुद्देशमात्रं प्रतिज्ञा [1]नैतस्याः साध्यसिद्धिरस्तीति असाधनाङ्गत्वान्न प्रयोगमर्हति। यथा वदन्ति तथागता :—

शक्तस्य सूचकं हेतुर्वचोऽशक्तमपि स्वयम्।
साध्याभिधानात् पक्षोक्तिः पारम्पर्येण नाप्यलम्॥ इति।

[2]अत्राह—अपदेशविषय[3]मापादनार्थमिति। अपदेशो हेतुस्तस्य विषयमाश्रयमापादयितुं प्रतिपादयितुं [4]प्रतिज्ञा। खलु यत्र क्वचन साध्यसाधनाय हेतुः प्रयुज्यते, तस्य सिद्धत्वात्, अपि [5]तर्हि कस्मिंश्चिद्धर्मिणि प्रतिनियते, तस्मिन्ननुपश्यस्यमाने निराश्रयो हेतुर्न प्रवर्तेत। तस्याप्रवृत्तौ न साध्यसिद्धिरतः प्रतिज्ञया धर्मिग्राहकं प्रमाणमुपदर्शयन्त्या हेतोराश्रयो धर्मो सन्निधाप्यते, इत्याश्रयोपदर्शनद्वारेण हेतुं प्रवर्तयन्ती प्रतिज्ञा साध्यसिद्धेरङ्गम्। तथा च न्यायभाष्यम्—"असत्यां प्रतिज्ञायाम[6]नाश्रया हेत्वादयो न प्रवर्तेरम्" इति।

[टि०] शब्दः पारम्पर्येण साध्यसिद्धौ शक्तः पक्षोक्तिस्तु साध्यमर्थमभिधत्ते। स चार्थः स्वयमसिद्धः साध्यत्वादेवेति पारम्पर्येणापि पक्षप्रति[7]पादकवचनं साध्यसिद्धौ न समर्थम्। न [8]तु प्रतिपादयिषितेन इति किन्तु प्रतिपन्नधर्मविशिष्ट इति वाच्यम्। प्रतीतस्यैव विशेषणत्वादिति। तत्त्वोपप्लववादिनो ह्यनुमानमपमानयन्ति यदुतानुमाने [9]तावत्पक्षस्य पक्षता[10]मवास्तवीं साधयितुमुपक्रान्तो हि पक्षः न च पर्वतः साधयितुमुपक्रान्तः सिद्धत्वात्। वह्निमात्रं तु असिद्धत्वा-

[पं०] अत्र पारम्पर्येणापि साध्यसिद्धौ न समर्था। कुतः? साध्याभिधानात्। पक्षो हि साध्यमग्निमभिधत्ते। न पुनः सिद्धं धूमं साध्यं च गमकं व्यभिचारादिति पारम्पर्येणापि साध्यसिद्धौ समर्था न भवतीति श्लोकार्थः। आश्रयमिति = पर्वतादिकम्। तस्येति = हेतोः। अपि त्विति। [11]किन्तु साधनसामर्थ्यमिति उपनयः। अप्रतीतस्येति = धर्मस्य।

[कु०] च्यमानमनपेक्षिताच्च वा(?)नादिमाणं स्वार्थमपि न प्रतिपादयति। चक्षुमानै(?)प्रति नाद्यप्रशंसावत्। तत्कुतोऽयं पर्वतोऽग्निमानिति वचनमाक्षिपेत्। स्वार्थप्रतिपादनावान्तरकार्यत्वनियमादुपपादकाक्षेपस्येति भावः। आश्रयोपदर्शन-द्वारेणापेक्षितनिर्देशेन हेतोर्जिज्ञासामुत्पादय(य)ति—श्रोतुरवधानं कुर्वतीत्यर्थः। उपनयादेवेति (कं. २३५) — उदाहरणान्तर उपन्यस्यमानतया उदाहरणसुसाध्यविशिष्टो हेतोराश्रय उपनयेन प्रतिपाद्यत इत्यर्थः। सत्यमेतत्, यदि प्रतिज्ञामन्तरेणोपनयप्रवृत्तेः वचनमस्तीत्याशयेन परिहरति नेति (कं. २३५) — कुतो न प्रवृत्तिरित्यत आह उपनयो हीति (कं. २३५)।

---

१ नैव तस्याः—कं. १; कं. २। २ तत्राह—कं. १, कं. २। ३ मापादयितुं—कं. १; कं. २। ४ अत्र कं. २ संपादकेन कल्पितः पाठः यथार्थत्वात् स्वीकृतः—सं.। ५ तु—कं. १, कं. २। ६ निराश्रया—जे. १, जे. २। ७ पादकं—ड। ८ न तु प्रतिपादयिषितेनेति—अ, ब, ड; प्रतिपादयिषितेन—मु. ९ तावत्पक्षता—अ, ब। १० न वास्तवी—ड। ११ किन्तु—...... तदनु साधनसामर्थ्यम्—कं।

न्यायकन्दली

उपनयादेव हेतोराश्रयः प्रतीयत इति चेन्न, असति प्रतिज्ञावचने तस्याप्रवृत्तेः। [1]उपनयो हि साधनस्य पक्षधर्मतालक्षणं सामर्थ्यमुपदर्शयति। [2]न च प्रत्येतुः प्रथममेव साधनं प्रत्याकाङ्क्षा, किन्तु साध्ये, तस्य प्रधानत्वात्। आकाङ्क्षिते साध्ये [3]तत्सिद्धयङ्गं साधनं पश्चादाकांक्ष्यते, तदनु साधनसामर्थ्यमिति प्रथमं साध्यवचनमेवोपतिष्ठते, न पुनरग्रत एव साधनसामर्थ्यमुच्यते, तस्य तदानीमनपेक्षितत्वात्।

प्रतिपिपादयिषितेन धर्मेण विशिष्टो धर्मीति विप्रतिषिद्धमिदम्, [4]अप्रतीतस्याविशेषकत्वादिति चेत्? सत्यम्, अप्रतीतं विशेषणं न भवति, प्रतीतस्तु साध्यो धर्मः [5]स इदानीं पक्षे विप्रतिपन्नं प्रति ज्ञापनाय धर्मिविशेषणतया प्रतिज्ञायते। अत [6]एव च

[टि०] त्साधयितुमुपक्रान्तमतस्तस्यैव वास्तवी पक्षता, तदाधारत्वात्तु पर्वतस्यौपचारिकीत्ति। अत [7]एव हेतोः पक्षधर्मताऽपि न वास्तवी, तथाहि 'अनित्यः शब्दः कृतकत्वाद्' इत्यत्र साध्यत्वादनित्यत्वस्यैव वास्तवी पक्षता तस्य च धर्मः कृतकत्वं न भवति, यस्य च शब्दस्य कृतकत्वं धर्मस्तस्य प[9]क्षतौपचारिकीति न हेतोर्वास्तवी [8]पक्षधर्मताऽपि भवतीत्याशङ्क्याह **अत एव धर्मिणः [9]पक्ष(धर्म)ता** इत्यादि।

[पं०] **अविशेषकत्वादिति** न हि अप्रतीतं विशेषणं भवितुमर्हति। **सपक्षे इति** महानसादि। **धर्मिणः पक्षता वास्तवी इति** ज्ञातव्ये पक्षधर्मत्वे पक्षो धर्म्यभिधीयते इति वचनात्। **तस्येति**=पर्वतादेः। **प्रतिपाद्यधर्मेत्यादि** प्रतिपाद्ये धर्मे वह्निमत्त्वादिः। [10]**पच्यमानत्वसंभवादिति** व्यक्तीक्रियमाणत्वघटनात्। **अनित्यत्वं साध्यते इति** अस्मात्पुरस्तादित्यध्याहार्यम्।

[कु०] ननु यदि प्रधानत्वात्साध्यमेवाकांक्षितं तर्हि ततोऽन्यत्र साधके किमिति प्रवर्तत इत्यत आह – **आकांक्षित इति** (कं. २३५) – अनेन प्रकारेणापि सिसाधयिषितधर्मविशेष्यहेत्वाश्रयः उपनयमेऽसमर्थमि(र्थः इ)ति द्र(ष्ट)व्यम। तदव्यवहितमप्युपयुज्यते। अव्यवहितमेव वा। आद्ये आंतरालिकबाधव्याकुलितो नांजसा व्यवहितः स्यात्। द्वितीये व(त्व)नुज्ञायां वर्तामहे वयमप्यव्यवधानेन विवादविषयमुपनीयसाधनमभिधानीयमिति वदामः। न चाव्यवहितं प्रकरणं प्रतिज्ञेति **चोच्यते इति** (कं. २३५)–कुतः तस्याः साध्यानंगता। ननु प्रमितमेव विशेषणं प्रतीतिरेव विशेष्यबुद्धिप्रयोजिका, न तु प्रमितिः, इतरथा संशयविपर्ययौ दत्तजलाञ्जल(लौ) स्याताम्। इह च प्रतिवादिनि आप्तत्वसंदे[हेऽ]पि वादिवचनाद्विशेषण प्रतीयत एवेत्याशयेन परिहरति **सत्यमिति** (कं. २३५)। किं च प्रमितस्यैव विशेषणत्वे पक्षस्य च दुर्वचत्वादनुमानप्रवृत्तिरेव न स्यादित्याह – **अत एवेति** (कं. २३५) **अप्रसिद्धस्येति** (कं. २३५) अनिश्चितस्येत्यर्थः।

---

१ उपनयः – कं. १; कं. २। २ न प्रत्येतु – कं. १; कं. २। ३ तत्सिद्धयर्थं पश्चात्साधनमाकाङ्क्षते – कं. १, कं. २; तत्सिद्धयङ्गं साधनं पश्चादाकाङ्क्षति – जे. १ जे. २। ४ प्रतीतस्य विशेषकत्वात् – जे. १, जे. २। ५ सपक्षे – कं. १; कं. २। ६ एव धर्मिणः – कं. १, कं. २; जे. ३। ७ पक्षधर्मता – अ, ब, क। ८ पक्षधर्मतापि न भवती – अ, ब, क। ९ पक्षता – मु. जे. १, २, ३। १० इदं प्रतीकं कं – पुस्तके नास्ति।

न्यायकन्दली

धर्मिणः पक्षता वास्तवी, तस्य स्वरूपेण सिद्धस्यापि प्रतिपाद्यधर्मविशिष्टत्वेनाप्रसिद्धस्य तेन रूपेण [1]आपाद्यमानत्वसम्भवात् । पक्षधर्मतापि हेतोरित्थमेव, यदि केवलमेवानित्यत्वं साध्येत, भवेच्छब्दधर्मस्य कृतकत्वस्यापक्षधर्मता, शब्दे एव [2]त्वनित्ये साध्ये नायं दोषः । यथाहुराचार्याः—

स एव चोभयात्मायं गम्यो गमक एव च ।
असिद्धेनैकदेशेन गम्यः [3]सिद्धेन बोधकः ॥ इति ।

[4]प्रतिज्ञाया उदाहरणमाह—द्रव्यं वायुरिति । यो वायुं प्रतिपद्यमानोऽपि तस्य द्रव्यत्वं न प्रतिपद्यते, तं प्रति साधयितुमिष्टेन द्रव्यत्वेन विशिष्टस्य वायोरभिधानं प्रतिज्ञा क्रियते—द्रव्यं वायुरिति ।

[टि०] असिद्धेनैकदेशेन इति [5]असिद्धेनानित्यत्वेन स शब्दो गम्यः साध्यः सिद्धेन तु कृतकत्वांशेन साधक इत्यर्थः ।

[पं०] आचार्याः इति–भाट्टाः । स एवेति = धर्मी । अयमिति = शब्दादिः । स एवायं उभयात्मा भवतीति योगः । एकदेशेनेति अनित्यतादिना साध्यधर्मेण सिद्धेनेति कृतकत्वादिना साधनधर्मेण । बोधक इति गमक इत्येतावन्मात्रमुच्यते इत्यस्मात्पुरस्तादध्याहार्यम् । नानुमानिकी इति किन्तु प्रत्यक्षेत्यर्थः । प्रत्यक्षप्रतीतस्येति–उष्णत्वस्य । तेनैवेति = प्रत्यक्षेण । तस्मिन्निति = प्रत्यक्षे । तत्प्रतीत्यवरुद्धे इति उष्णत्वप्रतीतिव्याप्ते ।

[कु०] ननु यत्सिसाधयिषितं तदेवाहृत्य साध्यताम्, किं तद्विशिष्टोपन्यासेनेत्यत आह – पक्षधर्मतेति (कं. २३६) उपयोगिनीति भावः ।

यो वायुमिति (कं. २३५) स्पर्शशब्दधृतिकंपैः कार्यैः कारणतया मातुमिम[म]नुमानो[नम्]पि । यो द्रव्यत्वं न प्रतिपद्येत्, तं प्रति सिसाधयिषितद्रव्यत्वविशिष्टवायुनिर्देशः – प्रतिज्ञा क्रियत इत्यर्थः । नन्वविरोधीत्यत्र विरोधानां बाधोऽभिप्रेतः । स च बलवता प्रमाणेन साध्यविपर्ययग्रहणरूपः, अतस्तद्विषयस्य कथं साध्यतेत्यत आह बाधिनेति (कं. २३५) चित्रत्वात्पुरुषाभिसंधीनां क्वचिदेवमपि संभवेदित्यर्थः ।

---

१ पद्य – जे. १, जे. २, जे. ३ । २ अनित्यत्वे साध्ये – जे. १ । ३ सिद्धो न – कं. १; कं. २ । ४ प्रतिज्ञायाम् – जे. १, जे. २ । ५ असिद्धेनापि शब्दो गम्यः – अ, ब, क ।

प्रशस्तपादभाष्यम्

[202] अविरोधिग्रहणात् प्रत्यक्षानुमानाभ्युपगत[1]स्वशास्त्रस्ववचनविरोधिनो निरस्ता भवन्ति । यथाऽनुष्णोऽग्निरिति प्रत्यक्षविरोधी, घनमम्बरमित्यनुमानविरोधी, [2][ ब्राह्मणेन सुरा पेयेत्यागमविरोधी ] [3]वैशेषिकस्य प्रागुत्पत्तेः सत्कार्यमिति ब्रुवतः स्वशास्त्रविरोधी, न शब्दोऽर्थप्रत्यायक इति स्ववचनविरोधी ।

न्यायकन्दली

[202] अविरोधिग्रहणस्य तात्पर्यं कथयति – अविरोधिग्रहणात् प्रत्यक्षानुमानाभ्यु[4]पगतस्वशास्त्रस्ववचनविरोधिनो निरस्ता भवन्तीति । वादिना साधयितुमभिप्रेतोऽर्थः साध्य इत्युच्यते । प्रत्यक्षादिविरुद्धोऽपि कदाचिदनेन भ्रमात् साधयितुमिष्यते, तद्यद्यविशेषेणानुमेयोद्देशः प्रतिज्ञेत्येतावन्मात्रमुच्यते, प्रत्यक्षादिविरुद्धमपि वचनं प्रतिज्ञा स्यात् । न चेयं प्रतिज्ञा, तदर्थस्य साधयितुमशक्यत्वात्, अतोऽविरोधिग्रहणं कृतम् । न विद्यते प्रत्यक्षादि विरोधो यस्यानुमेयोद्देशस्य असावप्रत्यक्षादिविरोधस्तस्य वचनं प्रतिज्ञा, [5]यस्य तु

[टि०] [202] [6]अविरोधिग्रहणस्य इति :- अ[7]नुमेयोद्देशोऽविरोधी प्रतिज्ञेति भाष्ये । यथाऽनुष्णोऽग्निः इति :- अत्राग्निस्तेजोऽवयवीत्यर्थः । तेन कृतकत्वं [8]पक्षैकदेशेऽसिद्धं न भवति तेजः पर[9]माणूनामपक्षत्वात् । वैपरीत्यपरिच्छेदे

[पं०] वैपरीत्यपरिच्छेदे इति......निश्चये सति । परस्येति = अनुमानस्य । मूले इति = संशये । पूर्वेण विषयो हृत इति– कोऽर्थः ? प्रथमप्रवृत्तेनाध्यक्षेणानुमानस्य विषयो हृत इत्यर्थः । परवाक्यं बाधाविनेत्यादि अविनाभावं हि विना हेतुरेव न युज्यते, अविनाभूतश्च बाध्यते कथमिति चोद्यार्थः । कृतकत्वाविरस्यैवेति अत्र हि त्रैरूप्यं सदपि बाधितम् ।

[कु०] [202] ननु नाविरुणद्धीति –विरोधीति व्याख्यानेऽनुष्णोऽयमग्निरितीयमपि प्रतिज्ञा स्यात्, न हीयं प्रत्यक्षम्, विरुणद्धिक्षाला(?)भेदवतीत्यादिकं सा च प्रतिज्ञा न स्यादित्यत आह– न विद्यत इति (कं. २३५) ।

ननु प्रतिपादयिषया पक्षवचनं प्रतिज्ञा साध्यानिर्देशः प्रतिज्ञेति समानतन्त्रलक्षणपर्यालोचनयाऽनुष्णोऽग्निरितीयं प्रतिज्ञैव कस्मान्न स्यादित्यत आह किमनेनेति (कं. २३५) यत्साधनमर्हतीति[ति] (कं. २३५) अर्हकृत्य (?)चेत्यनुशासनप्रामाण्यादित्यर्थः । स एव पक्ष इति (कं. २३५)–पक्षलक्ष्येऽपि साध्यधर्मविशिष्ट इतिकृत्य चोपादानादिति भावः । ननु प्रमाणत्वे समाने उक्तोऽन्यतरस्य बाधकत्वं नियमेनेत्यत आह – अनुष्ण इति (कं. २३६) – अभावस्य प्रतियोगिनिरूपणमन्तरेण दुर्निरूपत्वान्निषेधकेन प्रतियोगिग्राहकमवश्यमुपजीव्यम् । ततश्चोपजीव्यविशेषान्निषेधप्रतिज्ञा नोदेतीति भावः । ननु प्रतीयतां कामं प्रतियोगी तत्प्रत्ययायकं प्रमाणमिति कुत इत्यत आह प्रत्यक्षप्रतीतस्य इति

---

१ शास्त्रस्ववचन–दे । २ [ ] एतच्चिह्नान्तर्गतः पाठः व्यो. भाष्ये नास्ति । ३ वैशेषिकस्य सत्कार्यम् – कं. १; कं. २; कि । ४ गतशास्त्रस्यवचन – जे. १, जे. २, जे. ३ । ५ यस्य तद्विरोधो – कं. १; कं. २ । ६ अविरोध – अ, ब, क । ७ अनुमेयोद्देशाविरोधी प्रतिज्ञे तु – ब । ८ पक्षैकदेशे न भवति – अ । ९ परमाणूनां पक्षत्वात् – अ, ब ।

न्यायकन्दली

तद्विरोधोऽस्ति न सा प्रतिज्ञेत्यर्थः। किमनेनोक्तं भवति ? न वाद्यभि[1]प्रायव्याप्तिमात्रेण साध्यता, किं तु यत् साधनमर्हति तत् साध्यम्, स [2]एव च पक्षस्तदितरः पक्षाभास इति।

प्रत्यक्षादिविरोधोदाहरणं यथा—अनुष्णोऽग्निरिति। अनुष्ण इत्युष्णस्पर्शप्रतिषेधोऽयम्। अवगतं च प्रतिषिध्यते नानवगतम्। न चोष्णत्वस्य वह्नेरन्यत्रोपलम्भसम्भवः, वह्नावपि तस्य प्रतीतिर्नानुमानिकी, प्रत्यक्षाभावे अनुमा[3]नस्याप्रवृत्तेः। प्रत्यक्षप्रतीतस्य च प्रतिषेधे प्रत्यक्षप्रामाण्याभ्युपगमेन प्रवर्तमानं प्रतिषेधानुमानं तद्विपरीत[4]वृत्ति तेनैव बाध्यते, विषयापहारात्। को विषय[5]स्यापहारः ? तद्विपरीतार्थप्रवेदनम्, तस्मिन् सत्यनुमानस्य किं भवति ? उत्पत्त्यभावः, प्रथमप्रवृत्तेनाबाधितविषयप्रत्यक्षेण वह्नेरुष्णत्वे प्रतिपादिते तत्प्रतीत्यवरुद्धे च तस्यानुष्णत्वप्रतीतिर्न भवति। हेतोरप्ययमेव बाधो यदयमनुष्णत्वप्रतिपादनाय प्रयुक्तः तत्प्रतीतिं न करोति, प्रत्यक्षविरोधात्। यथोक्तम्—

वैपरीत्य[6]परिच्छेदे नावकाशः परस्य तु।
मूले तस्य ह्यनुत्पन्ने पूर्वेण विषयो हृतः॥ इति।

[टि०] इत्यादि:—साध्य[7]स्यानुष्णत्वस्य यद्वैपरीत्य[8]मुष्णत्वरूपं तस्य प्रत्यक्षेण परिच्छेदे परस्यानुमानस्यावकाशो नास्ति। अत्र हेतुमाह मूले तस्य इति:—तस्यानुमानस्य मूले संशयेऽनुत्पन्ने पूर्वेण प्रत्यक्षेण विषयोऽनुमानप्रवृत्त्याधारो

[पं०] तदीमिति—तदानुमितिपदविभागः...... इत्यनेनाकारलोपसंहिता। परवाक्यं—प्रत्यक्षविरोध इत्यादि। श्रीधरवाक्यं—न पक्षस्येत्यादि। कर्मण इति – अनुमेयस्याग्नेः। स्वविषये इति – अनित्यत्वादौ। तस्य सामर्थ्यादिति यद्ययं हेतुः दुष्टः स्यात्तदा न कदाचिदपि साध्यं साधयेदिति भावः। साधयति चायमन्यत्र शब्दादौ साध्यम्। कर्मकरणयोरप्यस्ति

[कु०] (कं. २३६)। क्वचिदपि प्रयोगिनः प्रमाणसिद्धत्वानभ्युपगमे वाजिविषाणस्येव (?) प्रतिषेधोऽपि न संगच्छेतेति भावः। प्रतिषेधानुमानमिति (कं. २३६) प्रतिषेधप्रतिज्ञेत्यर्थः।

ननु बाधो नाम विनाशो वोत्पत्तिप्रतिबन्धो वा। नाद्यः। प्रतिज्ञायाः शब्दरूपत्वात्। शब्दविनाशे च कारणादन्यदेव क्षतेः। न द्वितीयः। कारणान्यनुपमृद्योत्पत्तेर्निष्प्रतिबन्धत्वात्। कारणानि—आदीनि प्रत्यक्षेणोपमृद्यंत इत्यत आह विषयापहारादिति (कं. २३६) स्वविषयप्रत्यायनमात्रव्यापारस्य कथमन्यविषयापहर्तृत्वमित्याशयेन पृच्छति। (कं. २३६) उत्तरं तद्विपरीतेति (कं. २३६)। ननु किमेतावदित्यभिप्रायेण पृच्छति तस्मिन्निति (कं. २३६) उत्तरमुत्पत्त्यभाव इति (कं. २३६) नन्वेनमेव कुत इत्यत आह प्रथमेति (कं. २३६) तत्प्रतीत्यवरुद्ध इति (कं. २३६)—प्रमिताविरहेणोपन्यस्यमानप्रतिज्ञावाक्यं नावधारयतीति भावः।

---

१ प्रायमात्रेण—कं. १; कं. २। २ एव पक्ष—कं. १; कं. २। ३ स्याप्यप्रवृत्तेः—जे. ३। ४ वर्ति—जे. २। ५ विषयापहारः—जे. १, जे. २। ६ परिछिन्ने—जे. १। ७ साध्यस्याणुत्वस्य—अ, ब। ८ यद्वैपरीत्यं मुष्णत्वरूपं—अ, ब, क।

न्यायकन्दली

बाधाविनाभावयोर्विरोधादविनाभूतस्य बाधानुपपत्तिरिति चेत् यदि त्रैरूप्यमविनाभावोऽभिमतः तदास्त्येवाविनाभूतस्य बाधः, यथानुष्णोऽग्निः कृतकत्वादित्यस्यैव। अथाबाधितविषयत्वे सति त्रैरूप्यमविनाभाव इत्यभिप्रायेणोच्यते—अविनाभूतस्य नास्ति बाधेति, तदोमित्युच्यते। किन्त्वबाधितविषयत्वमेव रूपं कथयितुं प्रत्यक्षाद्यविरोधिग्रहणं[1] कृतम्।

प्रत्यक्षविरोधः किं पक्षस्य दोषः? किं वा हेतोः? न पक्षस्य, धर्मिणस्तादवस्थ्यात्[2]। नापि हेतोः, स्वविषये तस्य सामर्थ्यात्, विषयान्तरे सर्वस्यैवासामर्थ्यात्। किन्तु प्रतिपादयितुरिदं दूषणम्, योऽविषये साधनं प्रयुङ्क्ते। यदि प्रतिज्ञातार्थप्रतीतियोग्यताविरहस्तत्प्रतिपादनयोग्यताविरहश्च[3] दूषणमभिमतम्? तदा कर्मकरणयोरप्यस्ति दोषः।

[टि०] हृतः। जिज्ञासितो ह्यनुमानस्य विषयो जिज्ञासा न संशये भवति, संशयश्च प्रमाणनिर्णितेऽर्थे स्यात्, ततः प्रत्यक्षपरिच्छिन्ने उष्णत्वे संशयाभावात् जिज्ञासाया अभावे[4]ऽनुमानप्रवृत्तिर्न भवतीति भावः। [5]कर्मणस्तादवस्थ्याद् इति कर्मणः। साध्यस्येत्यर्थः। [[6]तदा कर्मकरणयोः इति :- साध्यसाधनयोरित्यर्थः] ॥ (इति प्रतिज्ञा) ॥

[पं०] [इति] कर्मेति प्रतिज्ञा, करणमिति हेतुरुच्यते। अत्र कर्मणो दोषः प्रतिज्ञातार्थप्रतीतियोग्यताविरहः करणस्य तु दोषः तत्प्रतिपादनयोग्यताविरहः। प्रतिज्ञातार्थप्रत्यानयनसामर्थ्याभाव इति यावत्। करणं हि हेतुरूपं प्रतिज्ञातार्थप्रतीतिं करोति। तां चेन्न करोति तर्हि प्रतिज्ञार्थप्रत्यानयनसामर्थ्याभावाख्य एव तस्य दोष इति भावना। दृष्टान्तग्राहक-

[कु०] ननु समानतंत्रे कालात्ययापदिष्ट इति हेतुरनेनैव दुष्ट इत्युच्यते तत्कथमविरोध इत्यत आह हेतोरपीति (कं. २३६) प्रत्यक्षविरोधादिति (कं. २३६) प्रत्यक्षेणानुष्णत्वप्रमीतविरोधादित्यर्थः। कतरदनयोर्यथार्थं इत्यत्राभिप्रयुक्तवाक्यं प्रतिज्ञादूषणस्य छायस्त्वे प्रमाणयति त(य)थोक्तमिति (कं. २३६) मूले। प्रज्ञाबाधेऽनुत्पन्ने पूर्वेणोपजीव्येन विषयोद्धृतविपर्ययपरिच्छेदात्प्रमितज्ञानविष(य)त इत्यर्थः।

ननु साध्यवति सलिले तद्विपर्ययवर्तिवह्नौ च दृश्यमानं कृतकत्वं संदिग्धहेत्वाभासो भविष्यति, किमर्थं पृथग्विरोधचिन्तेत्याशयवानाशंकते बाधेति (कं. २३६) तत्किं विपक्षदर्शनात्संदिग्धता पक्षेऽपि वा साध्यविपर्ययवति। नाद्य इत्याह यदीति(कं. २३६) न हि कृतकत्वस्य वह्निं विहाय क्वचिदनुष्णत्वव्यवहार इत्यर्थः। न द्वितीय इत्याह अथ बाधितेति (कं. २३६) एवं तर्हि बाधकमुपजीव्यसंदिग्धत्वोद्भावनं मृतमारणकल्पमित्यभिप्रायवानुपसंहरति

१ द्यविरोधीत्युक्तम्—जे. ३। २ कर्मणः—जे. १, जे. २, जे. ३। ३ प्रतिपादनम् योग्यता—कं. १; कं. २। ४ अभावो—अ, ब, क। ५ धर्मिण मु., कर्मण—जे. १, जे. २, जे. ३। ६ [ ] एतच्चिह्नान्तर्गतः पाठः अबपुस्तकयोर्नास्ति।

न्यायकन्दली

घनमम्बरमित्यनुमानविरोधी । येन प्रमाणेनाकाशमवगतं तेनै[1]वाकाशस्य नित्यत्वं निरवयवत्वं च प्रतिपादितम्, अतो निबिडावयवमम्बरमिति प्रतिज्ञा धर्मिग्राहकानुमानविरुद्धा ।

ब्राह्मणेन सुरा पेयेत्यागमविरोधी । [2]ब्राह्मणस्य पानार्हा सुरा पीता पापसाधनं न भवतीति प्रतिज्ञार्थः । अत्र क्षीरमुदाहरणम्, क्षीरस्य च पापसाधनत्वाभावः श्रुतिस्मृत्यागमैकसमधिगम्यः । येनैवागमेन क्षीरपानस्य पापसाधनत्वाभावः प्रतिपादितः, तेनैव सुरापानस्य पापसाधनत्वं प्रतिपादितमिति ब्राह्मणेन सुरा पेयेति प्रतिज्ञाया दृष्टान्तग्राहकप्रमाणविरोधः ।

[3]वैशेषिकस्य प्रागुत्पत्तेः सत्कार्यमिति ब्रुवतः स्वशास्त्रविरोधी । वैशेषिको हि वैशेषिकशास्त्रप्रामाण्याभ्युपगमेन वादादिषु प्रवर्तते । तस्य 'प्रागुत्पादात् सत् कार्यम्' इति ब्रुवतः प्रतिज्ञायाः [4]स्वशास्त्रेण विरोधः, [5]वैशेषिकशास्त्रे 'असदुत्पद्यते' इति प्रतिपादनात् ।

[पं०] प्रमाणविरोध इति दृष्टान्तग्राहकेण क्षीरस्यापापसाधनत्वप्रतिपादकेनागमलक्षणेन प्रमाणे न विरोधः । एतदर्थं इति शब्देनार्थं प्रतिपादयतीत्यस्यार्थस्य प्रतिपादनार्थम् । परवाक्यं प्रत्यक्षेत्यादि । तद्भावभावित्वानुमानसमधिगम्यमिति शब्दोऽर्थप्रत्यायकस्तद्भावभावित्वात् । अर्थप्रत्ययभावे हि शब्दप्रवृत्तिः ।

[कु०] तत्किन्त्विति (कं. २३६) दूष्यं विविनक्ति प्रत्यक्षेति (कं. २३६) धर्मिणस्तावदस्यादिति (कं. २३६) यदि वह्निः स्वयं······ इदमुषेत् तदा भवेत्स बाधः । नत्वेवं तस्याचेतनत्वादित्यर्थः । स्वविषय इति (कं. २३६) न हि कृतकत्वं स्वयमेवानुपलब्ध्यं सिसाधयिषितं त्यर्थः । किं त्विति (कं २३६) मुख्यया वृत्त्या वादिन एवेत्यर्थः । यदि प्रतिज्ञार्थे गौण्या वृत्त्या पक्षे हेतुश्च दूष्यः गुणस्तु वादिदोषलिङ्गता(तया) प्रयोगविकीर्षया हि कर्त्रा दूष्य इत्यर्थः ।

नन्वाकाशस्याद्यत्वे किमनुमानम्, कथं वा तेनायत्वानुमानबाध इत्यत आह येनेति (कं. २३६) । अपि शिष्टं हि लिङ्गशब्दे भिन्नमेव गगनं गमयति स्वाभेदगमनीयान्तरी(रि)कतया नित्यत्वं निरवयत्वं च गमयत्येवेति भावः ।

ननु सुराया अपेयत्वं पाषाणं वदनव्यवहार्यतया वाऽव्य[व्य]वहार्यत्वेऽपि नोदकादिवत्स्वाद्यतया यदुभयथापि न शास्त्रविरोध इत्यत आह ब्राह्मणस्येति (कं. २३६) पानार्हेत्यनिषिद्धपानेत्यर्थः । अद्य साधने न भवतीति निषेधानुमितप्रत्यवायसाधनं न भवतीत्यर्थः । ननु सुरा पेयेति प्रतिज्ञावता वराकेणागमः प्रमाणतयाऽभ्युपगम्य इति

---

१ वास्य – जे १, जे. २ ।  २ ब्राह्मणस्य सुरा – कं. १; कं. २ ।  ३ वंशषिकस्यापि – कं. १; कं. २ ।
४ शास्त्रेण – कं. १; कं. २ ।  ५ तच्छास्त्रे – जे. ३ ।

## न्यायकन्दली

शब्दो नार्थप्रत्यायक इति स्ववचनविरोधी । यदि शब्दस्यार्थप्रत्यायकत्वं नास्ति, तदा 'शब्दो नार्थं प्रतिपादयति' इत्यस्यार्थस्य प्रतिपादनाय शब्दप्रयोगोऽनुपपन्नः । अथ तदर्थं शब्दः प्रयुज्यते ? तदभ्युपगतं शब्दस्यार्थप्रत्यायकत्वमिति प्रतिज्ञायाः स्ववचनविरोधः ।

प्रत्यक्षानुमानावगतवस्तुतत्त्वाख्यानं शास्त्रम् । तद्विरोधः प्रत्यक्षानुमानविरोध एव, तथा तद्भावभावित्वानुमानसमधिगम्यं शब्दस्यार्थप्रत्यायकत्वं प्रतिषेधयतोऽनुमानविरुद्धैव प्रतिज्ञा, कस्मात् स्वशास्त्रस्ववचनविरोधयोः पृथगभिधानम् ? अत्रोच्यते—प्रमाणाभासमूलमपि शास्त्रं भवति यथा शाक्यादीनाम्, अत्र बौद्धस्य 'सर्वमक्षणिकम्' इति प्रतिजानतः स्वशास्त्रविरोध एव, न प्रमाणविरोधः । स्ववचनम् अपि कदाचिदप्रमाणमूलमपि स्यात्, अतस्तद्विरोधो न प्रमाणविरोधः, किन्तु स्ववचनविरोध एव ।

[कु०] कुतोऽवसीयत इत्यत आह—अत्र **क्षीरमिति** (कं. २३६) आगमप्रामाण्यानभ्युपगमे क्षीरस्य दृष्टान्तस्य साध्यविकलता स्यादिति भावः ।

प्रागुत्पत्तेः कार्यं सदिति ब्रुवाणो वैशेषिके शास्त्रे प्रमाणीत्वकारीति कुतोऽयं निर्णय इत्यत आह **वैशेषिकेति** (कं. २३७) वादि(द)प्रारंभे वादिभ्यां प्रतितन्त्रसिद्धान्तः स्वीकर्तव्यः इतरथा निराश्रयो वादो दुष्कर इति भावः । ननु शब्दो नार्थप्रत्यायक इति प्रतिजानानो न कश्चिशब्दोऽर्थप्रत्यायक इति ब्रवीति तत्कथं स्ववचनविरोध इत्यत आह **यदि शब्दस्येति** (कं. २३७) अनुसन्धत्त इति शेषः । ततश्च शब्दस्यार्थप्रत्यायकत्वमभिसंदधानस्य स्वभिसंहित प्रतिपिपादयिषितया शब्दमेव युञ्जानस्य वाङ्मनसयोर्विसंवादः । अप्रयुञ्जानस्य स्वाभिसंहितस्य प्रतिपादनमशक्यमिति भावः । तृतीयचतुर्थयोरुदाहरणयोः पौनरुक्त्यमाशंकते—**प्रत्यक्षानुमानेति** (कं. २३७) यद्यपि शास्त्रमप्यनुमानमेव शब्दस्य पृथक्प्रमाणत्वनिषेधात्, तथापि न तावन्मात्रेणोदाहरणपौनरुक्त्यम्, किन्तु तन्मूलप्रमाणापेक्षयेत्यत आह **तद्भावभावित्वेति** (कं. २३७) – **अनुमान[सम]धिगम्यमिति** (कं. २३७) । प्रतिपादितमेतत् पुरुषो धर्मी इत्यादिना । तत्राभ्युपगतस्वशास्त्रविरोधोदाहरणस्य पौनरुक्त्यं परिहरति **प्रमाणाभासमूलमपीति** (कं. २३७) । स्ववचनविरोधोदाहरणस्य पौनरुक्त्यं परिहरति **स्ववचनमपीति** (कं. २३७) ।

---

१ तदर्थः – कं. १; कं. २ । २ –र्थप्रतिपादक – कं. १; कं. २ । ३ तत्त्वान्वाख्यानं – कं. १; कं. २ । ४ स्वशास्त्रवचन – कं. १; कं. २ । ५ भवति शाक्यादीनाम् – कं. १; कं. २ ।

## प्रशस्तपादभाष्यम्

[203] लिङ्गवचनमपदेशः। यदनुमेयेन सहचरितं तत्समान[1]जातीये च सर्वत्र सामान्येन प्रसिद्धं तद्विपरीते च सर्वस्मिन्नसदेव तल्लिङ्गमुक्तम्, तस्य वचनमपदेशः। यथा क्रियावत्त्वाद् गुणवत्त्वा'च्च' (वै. सू. २-१-१३) इति। तथा च तदनुमेयेऽस्ति तत्समानजातीये च सर्वस्मिन् गुणवत्त्व[2]मसर्वस्मिन् [3]क्रियावत्त्वम् अस्ति। उभयमप्येतद-द्रव्ये नास्त्येव। तस्मात् तस्य वचनमपदेश इति सिद्धम्।

## न्यायकन्दली

[203] लिङ्गवचनमपदेशः। अस्यार्थं कथयति – यदनुमेयेनेत्यादिना। तत्सुगमम्। उदाहरणमाह – 'क्रियावत्त्वाद् गुणवत्त्वाच्च' (वै. सू. २-१-१३) इति। द्रव्यं वायुरिति [4]प्रतिज्ञायां क्रियावत्त्वादिति क्रियावत्त्वस्य लिङ्गस्य वचनमपदेशः, तस्यामेव प्रतिज्ञायां गुणवत्त्वस्य लिङ्गस्य गुणवत्त्वादिति वचनमपदेशः, [5]उभयोरुपन्यासः सपक्षैकदेशवृत्तेः सपक्षव्यापकस्य च हेतुत्वप्रदर्शनार्थः। यदुक्तं लिङ्गलक्षणं तत् क्रियावत्त्वस्य गुणवत्त्वस्य चास्तीत्याह – तथा च तदिति। तद् गुणवत्त्वमनुमेयेऽस्ति तत्समानजातीये सपक्षे द्रव्ये सर्वस्मिन्नस्ति, असर्वस्मिन् सपक्षैकदेशे मूर्तद्रव्यमात्रे क्रियावत्त्वमस्ति, उभयमप्येतत्

[टि०] [203 to 206]　　(॥ अथ हेतुहेत्वाभासनिरूपणम् ॥)

[6]'सावयवत्वं च (न?) वादिनः' इति :– जैनानपेक्षयेदमुक्तं तन्मते शब्दस्य पौद्गलिकत्वात्। पर एव संशय-

[पं०] [203] सपक्षव्यापकस्य च हेतुत्वप्रदर्शना[7]र्थमिति – क्रियावत्त्वं हि हेतुरनन्तरमेव वक्ष्यमाणया युक्त्या सपक्षैकदेशवृत्तिरतस्तद्ग्रहणादन्येऽपि प्रयत्नान्तरीयकत्वादयः सपक्षैकदेशवृत्तयो हेतवो हेतुत्वेन दर्शिताः। प्रयत्नान्तरीयकत्वस्य तु सपक्षैकदेशवृत्तित्वमेवं द्रष्टव्यम् – अनित्यः शब्दः, प्रयत्नान्तरीयकत्वात्'। प्रयत्नान्तरीयकत्वं हि अनित्येषु घटादिषु दृष्टम्। अनित्येष्वपि विद्युदादिषु न दृष्टम्। अतः सपक्षैकदेशवृत्तिः। तथा गुणवत्त्वं हेतुरनंतरमेव वक्ष्यमाणया युक्त्या सपक्षव्यापकोऽतस्तद्ग्रहणादन्येऽपि कृतकत्वादयः सपक्षव्यापका हेतवो हेतुत्वेन दर्शिता इति

[कु०] [203] **सुगममिति** (कं. २३७) लिंगलक्षणव्याख्यानावसरे व्याख्यातत्वादिति शेषः। **क्रियावत्त्वादिति** (कं. २३७) असंभवव्यावृत्तेति शेषः। **उ(अ)पदेश इति** (कं. २३८) **हेतुरिति** (कं. २३८)।

समानतंत्रप्रसिद्धिहेतु(त्व)देशपदं व्याचक्षाणस्तत्र स्वसाधनत्व[व्या]ख्या एकमिति विशेषणमिह द्रष्टव्यमिति सूचयति **अपदेशलक्षणकथनेनेति** (कं. २४०) – विशेषविधेः शेषनिषेधपरत्वादिति भावः। लिंगवचनमपदेश इत्युक्तेऽलिंगवचनस्यानपदेशत्वं सिद्धम्। अलिंगलक्षणेन रहितं येन वा लिंगलक्षणेन रहितमित्युक्तं तत्र विवेकमाह – **अनुमेयेनेति** (कं. २४०)।

---

१ जातीये सर्वत्र – कं. १, कं. २, कि.; जातीये च सर्वत्र च व्यो. (६०३)। २ सर्वस्मिन् – दे। ३ क्रियावत्त्वम् उभय – कं. १, कं. २, कि। ४ प्रतिज्ञायाः – कं. १, कं. २। ५ तयो – कं. १; कं. २। ६ सावयत्व – अ, ब। ७ –प्रदर्शनार्थः – कं।

प्रशस्तपादभाष्यम्

[204] एतेनासिद्धविरुद्धसन्दिग्धानध्यवसितवचनानामनपदेशत्वमुक्तं भवति ।

तत्रासिद्धश्चतुर्विधः – उभयासिद्धः अन्यतरासिद्धः, तद्भावासिद्धः, अनुमेयासिद्धश्चेति । तत्रोभयासिद्ध उभयोर्वादिप्रतिवादिनोरसिद्धः, यथाऽनित्यः शब्दः सावयवत्वादिति । [1]अन्यतरासिद्धो यथा – अनित्यः शब्दः कार्यत्वादिति । तद्भावासिद्धो यथा धूमभावेनाग्न्यधिगतौ कर्त्तव्यायामुपन्यस्यमानो बाष्पो [2]धूमभावेनासिद्ध इति । अनुमेयासिद्धो यथा [3]पार्थिवं तमः कृष्णरूपवत्त्वादिति ।

न्यायकन्दली

क्रियावत्त्वं गुणवत्त्वं चाद्रव्ये विपक्षे नास्त्येव, तस्योभयस्य वचनं क्रियावत्त्वाद् गुणवत्त्वादित्येवं रूपमपदेश इति हेतुरिति सिद्धं व्यवस्थितं निर्दोषत्वात् ।

[204] एतेन अपदेशलक्षणकथनेन अर्थादसिद्धविरुद्धसन्दिग्धानध्यवसितवचनानामनपदेशत्वमुक्तं भवति । अनुमेयेन सहचरितमित्यनेनासिद्धवचनस्यानपदेशत्वमुक्तम् । तत्समानजातीये च प्रसिद्धमित्यनेन विरुद्धानध्यवसितवचनयोरनपदेशत्वम् । तद्विपरीते नास्त्येवेत्यनेन सन्दिग्धवचनस्यानपदेशत्वमिति विवेकः ।

[टि०] जनकत्वेन विरुद्धाव्यभिचारिणः प्रकरणसमाद् भेदमाह [4]अयमेव हि इत्यादि [5]विरुद्धाव्यभिचारी हि संशयं प्रत्युत उत्पादयति हेतुद्वयस्य सद्भावात्; यथा किञ्चिदौषधं पूर्वरोगं तावन्न शमयति किन्तु प्रत्युत रोगान्तरमुत्पादयति, प्रकरणसमे तु जिज्ञासितोऽर्थः संशयं निवर्तयितुमेव न [6]शक्नोति न पुनः करोति । नित्यानित्यधर्मानुपलब्ध्या हि शब्दे

[पं०] वाक्यार्थः । समानजातीये इति वायुसमानजातीये । मूर्तद्रव्यमात्रे क्रियावत्त्वमस्तीति न पुनरमूर्तद्रव्ये आकाशदिगादौ इति भावः । अद्रव्ये इति = गुणकर्मादौ ।

[204] अनपदेशत्वमिति = अहेतुत्वम् । विरुद्धानध्यवसितवचनयोरनपदेशत्वमिति-विरुद्धो हि विपक्ष एव भवति । अनध्यवसितः त्वसाधारण उच्यते । तस्य च कुतः सपक्षे प्रसिद्धिः । स हि न सपक्षे, न विपक्षे वर्तते । यथा 'अनित्यः शब्दः, श्रावणत्वात् ।' शब्दधर्मिणं विहाय श्रावणत्वं न क्वापि सपक्षे न च विपक्षे वर्तते ।

[कु०] [204] असिद्धं कथयतीति (कं. २४०) अवान्तरभेदेनेति शेषः । न वादिन इति (कं. २४०)–नैयायिकस्य वैशेषिकस्य वा न यथाऽवयवत्वं सिद्धे सिद्धम्, ताभ्यामनुगुणतया शाब्दस्य स्वीकारात् । नापि प्रतिवादिन इति (कं. २४०) भाट्टस्य प्राभाकरस्य वा न शब्दे सावयवत्वं सिद्धम् । भाट्टेन नित्यद्रव्यतया प्राभाकरेण नित्यगुणतया

१ अन्यन्तरासिद्धोऽनित्यः – दे । २ 'धूमभावेनासिद्ध' इति दे पुस्तके नास्ति । ३ पार्थिवं द्रव्यं–कं. १, कं. २, कि । ४ अयमेव च – मु., जे. १, जे. २, जे. ३ । ५ विरुद्धव्यभिचारी – अ, ब । ६ शक्नोति – अ ।

न्यायकन्दली

एषामसिद्धविरुद्धसन्दिग्धानध्यवसितानां मध्ये असिद्धं कथयति–तत्रासिद्धश्चतुर्विध [1]उभयासिद्धोऽन्यतरासिद्धस्तद्भावासिद्धोऽनुमेयासिद्ध इति ।

तत्रोभयासिद्धः उभयोर्वादिप्रतिवादिनोरसिद्धः, यथाऽनित्यः शब्दः सावयवत्वादिति शब्दे सावयवत्वं न वादिनो नापि प्रतिवादिनः सिद्धमित्युभयासिद्धः ।

अन्यतरासिद्धः कार्यत्वादनित्यः शब्द इति । यद्यपि शब्दे वस्तुतः कार्यत्वमस्ति, तथापि विप्रतिपन्नस्य मीमांसक[2]स्यासिद्धमिति । अन्यतरासिद्धं साध्यं न साधयति यावन्न प्रसाध्यते ।

तद्भावासिद्धो यथा धूमभावेना[3]ग्न्यधिगतौ कर्त्तव्यायामुपन्यस्यमानो बाष्पो धूमभावेन [4]धूमस्वरूपेणासिद्धस्तद्भावासिद्ध इत्युच्यते ।

अनुमेयासिद्धो यथा पार्थिवं तमः [5]कृष्णरूपवत्त्वात् । तमो नाम द्रव्यान्तरं नास्ति, आरोपितस्य कार्ष्ण्यमात्रस्य प्रतीतेः, अतस्तमोद्रव्यं पार्थिवं कृष्णरूपवत्त्वादित्यनुमेया-

[टि०] नित्यादिरूपजिज्ञ सितधर्मं[6]निश्चय एव नोत्पद्यते न पुनः [7]संशयः प्रत्युत जन्यते, यथा केनचिदौषधेन रोगो न निवर्त्यते प्रत्युत [रोगान्तरं न] जन्यते तस्मात् संशयहेतुत्वात् विरुद्धाऽव्यभिचारी पृथगेवायं न पुन[8]र्निश्चयाहेतुत्वादन-ध्यवसित इति भावः । अथ भाष्यकार एवानध्य[9]वसितत्वमस्यापादयिष्यन्न साधारणत्वमापादयति नन्वयमसाधारण इति :– ननु क्रियावत्त्व(वत्त्वा)स्पर्शवत्वे प्रत्येकं संशयहेतुः समुदिते वा ? तत्राद्ये [10]पक्षे प्राह क्रियावत्त्वास्पर्शवत्त्वे इति ।

[पं०] नापि प्रतिवादिन इति – जैनाना[म]पेक्षयेदमुक्तम् । अन्यथा शब्दो पौज(द्र)लिकत्वात्सावयव एव । आरोपितस्येति [11]काकोल(लू)कादिषु दृष्टम् । कार्ष्ण्यं सर्वतः प्र… भावे सति अन्धकारतया उपचरित प्रमाता(?) । ननु द्रव्यभूतं तमो नानेत्याशयादारोपितस्येत्यूचे अनुमेयासिद्धमिति – व्याख्येयपदम् । आश्रयासिद्धमिति व्याख्यानपदम । आहिताग्न्यादीति आहिताग्न्यादयो हि पूर्वनिपाते विकल्प्यन्ते । आश्रयासिद्धिरप्युभयथेति अन्यतरोभयभेदादाश्रया-

[कु०] स्वीकारात् । साध्यं न साधयतीति (कं. २४०) स्वयमेव परामृश्यमानस्य लिंगस्यानुमितिकरणत्वादिति भावः । असिद्धेरिति (द्ध इति) (कं. २४०) संदेहादित्यर्थः । इतरथा तत्त्वेनोपन्यासानुपपत्तेः ।

ननु तमो धर्मी प्रतीयत एव तत्कथमिदमसिद्धमित्यत आह तमो नामेति (कं. २४०) किं तमो द्रव्यतया

१ उभयासिद्ध इत्यादि – कं. १, कं. २ । २ स्यासिद्धम् – कं. १, कं. २ । ३ नाग्न्यधिगतौ, अग्न्यधिगतौ – जे. २, जे. ३ । ४ रूपेण – जे. १; धूमरूपेण – जे. ३ । ५ रूपत्वात् – जे. १, जे. २, जे. ३ । ६ नित्वयैप-चनोत्पाद्यते – अ, ब । ७ प्रत्युत संशयः – ड । ८ निश्चयहेतु – अ, ब, क । ९ वस्थित – अ, ब, क । १० पक्षेपक्षे – अ, ब । ११ अतः परः कश्चित् पाठो छिन्नप्रायः एव 'ब' पुस्तके ।

न्यायकन्दली

सिद्धमाश्रयासिद्धम् । अनुमेयमसिद्धं यस्येत्यसिद्धानुमेयमिति [1]प्राप्तावाहिताग्न्यादित्वान्निष्ठायाः पूर्वनिपातः ।

यथा हेतुरन्यतरासिद्ध उभयासिद्धो वा भवति, एवमाश्रयासिद्धिरप्युभयथा । [2]यथा च हेतुर्वादिप्रतिवादिनोः प्रत्येकं समुदितयोर्वा अज्ञानात् सन्देहाद्विपर्ययाद्वा असिद्धो भवति, तथाश्रयोऽपि। यथा च हेतुः कश्चिद्वादिनोऽज्ञाना[3]सिद्धः प्रतिवादिनो सन्दिग्धासिद्ध इति । यद्वा वादिनोऽज्ञानासिद्धः, यदि वा प्रतिवादिनो विपर्ययासिद्धः । यद्वा वादिनः सन्देहासिद्धः प्रतिवादिनोऽज्ञानासिद्धः । यद्वा विपर्ययासिद्धो भवति वादिनः, प्रतिवादिनः सन्देहासिद्धः । एवमाश्रयोऽपीति योजनीयम् । विशेषणासिद्धादयः, अन्यतरासिद्धोभयासिद्धेष्वेवा[4]न्तर्भवन्तीति पृथङ्नोक्ताः ।

[टि०] द्वितीयपक्षे प्राह [5]सन्निपातश्च तयोः इति:–क्रियावत्त्व[6]सहितमस्पर्शवत्त्वं सपक्षविपक्षव्यावृत्तत्वादसाधारणम् । अत्र दृष्टान्तो यथाऽचाक्षुषत्वेति । शब्दरसगन्धस्पर्शबुद्ध्यादयो गुणाः, आत्मान्यत्वे सामान्यवत्त्वे अचाक्षुषत्वे सति प्रत्यक्षत्वात् इत्यत्र केवल प्रत्यक्षत्वं घटादिद्रव्येष्वस्त्यस्ति [7]केवलं चाचाक्षुषत्वमाकाशादिष्वप्यस्ति । समुदितं तु पक्षादन्यत्र नास्त्येवेत्यसाधारणत्वम् । अत्र चात्मान्यत्वे सतीत्यनेन मनःप्रत्यक्षस्यात्मनः सामान्यवत्त्वे सतीत्यनेन रसत्वादिसामान्यानां व्यवच्छेदः । असाधारणत्वे प्रतिपादितेऽपि परोऽनध्यवसितत्वममृष्यमाणः प्राह यद्यपि विरुद्धेति संशयहेतुत्वात् सन्दिग्ध एव स्या[8]न्नत्वनध्यवसित इति भावः । असाधारणस्य तु इति विपक्षादेव केवलाद् व्यावृत्तिरित्येवमेकस्मिन्ने[9]वान्ते

[पं०] सिद्धिरपि द्विधेत्यर्थः । अत्र चोदाहरणद्वये दर्शिते शिष्यस्य निःशंका प्रतीतिर्भवति । तत्तु वयं संप्रदायाभावान्न जानीमः । प्रत्येकमिति – अन्यतरासिद्धौ दर्शितः । समुदितयोरिति उभयासिद्धो दर्शितः तथाश्रयोऽपीति हेतोराश्रयोऽनुमेयं(यः) इत्यर्थः । आश्रयोऽपीत्यारभ्य पृथङ्नोक्ता–इत्येतद्वाक्यं यावदक्षरार्थो सुगमः । भावार्थस्तूदाहरणैर्ज्ञायते । तानि तु वयं संप्रदायाभावान्न विद्मः इति नादिशामः ।

[कु०] प्रतीयते गुणतया[वा]? नाद्य इत्याह द्रव्यान्तरं नास्तीति (कं. २४०) । द्वितीये त्वाश्रयासिद्धिश्चेत्याह आरोपितस्येति (कं. २४०) एवमाश्रयासिद्धिरपीति (कं. २४०) ।

तत्रान्यतराश्रयासिद्धं यथा शृंगत्वात्वाद्गोशृंगवदिति । विशेषणासिद्धादय इति (कं. २४०) आद्यग्रहणाद्विशेषासिद्धव्यधिकरणासिद्धादयो गृह्यंते ।

---

१ प्राप्ते वाहिता–जे. १, जे. २; प्राप्ते आहिता–जे. ३ । २ यथा च हेतोः–कं. १, कं. २; यथा हेतुः –जे. १, जे. २ । ३ दसन्दिग्धः–कं. १, कं. २ । ४ न्तर्भूतत्वात्–जे. ३ । ५ सन्निपातश्चायोः–अ, ब । ६ सहितस्पर्शवत्त्वं–अ, ब । ७ केवलं चाक्षुषत्व–अ, ब । ८ न त्वध्यवसित –अ, ब । ९ वन्ते – अ ।

प्रशस्तपादभाष्यम्

[205] यो ह्यनुमेयेऽविद्यमानोऽपि तत्समान[1]जातीये च सर्वस्मिन्नास्ति तद्विपरीते चास्ति स विपरीतसाधनाद्विरुद्धः, यथा यस्माद्विषाणी तस्मादश्व इति ।

न्यायकन्दली

[205] विरुद्धं हेत्वाभासं कथयति—यो [2]ह्यनुमेये विद्यमानोऽपि तत्समानजातीये च सर्वस्मिन्नास्ति तद्विपरीते चास्ति स विपरीतसाधनत्वाद्विरुद्ध इति । यदा कश्चिद्वनान्तरिते गोपिण्डे विषाणमुपलभ्य 'अयं पिण्डोऽश्वो विषाणित्वात्' इति साधयति, तदा विषाणित्वमश्वजातीये पिण्डान्तरेऽविद्यमानमश्वविपरीते गवि [3]महिषादौ च विपक्षे विद्यमानं व्याप्तिबलेनाश्वत्वविरुद्धमनश्वत्वं साधयदभिमतसाध्यवि[4]परीतप्रसाधनाद्विरुद्धमित्युच्यते । इदं विपक्षैकदेशवृत्तेर्विरुद्धस्योदाहरणम्, विषाणित्वस्य सर्वत्रानश्वे स्तम्भादावसम्भवात् । समस्तविपक्षव्यापकस्य विरुद्धस्योदाहरणं नित्यः शब्दः कृतकत्वादिति द्रष्टव्यम् ।

[टि०] नियता न भवति किन्तु [5]सपक्षाद्विपक्षाच्चेति । पर एव स्वपक्षं दृढयति यदाहुः इति:—यस्तु गन्धवत्त्वादिः तयोः सपक्षविपक्षयोरभावो व्यावृत्तिस्तन्मुखेन द्वारेण संशयहेतुः । ननु सपक्षविपक्ष[6]व्यावृत्तत्वेनोभया[7]भावनिश्चय एव स्यात्र संशय इत्याह द्वयासत्त्वविरोधाच्च [इति]:—द्वयोर्नित्यानित्ययो[8]रसत्त्वमेकत्र धर्मिणि विरुद्धप्रकारान्तराभावादिति भावः ।

[पं०] [205] सर्वस्मिन्नास्तीति विपक्षे एव भावाद्विरुद्ध इति वचनात् । पिण्डान्तरे इति—अश्वान्तरवेसरादौ । विपक्षैकदेशवृत्तेरिति अनश्वे महिषगवादौ अस्ति विषाणित्वम् । अनश्वे स्तम्भादौ नास्ति । अतो विपक्षैकदेशवृत्ति । कृतकत्वादिति द्रष्टव्यमिति—अनित्यानां सर्वेषां कृतकत्वात् । परव्यापारापेक्षाभावस्वभावनिष्पत्तौ कृतकः ।

[कु०] [205] विरुद्धं कथयतीति (कं. २४०) लक्षणेनेति शेषः । वनान्तरितेति (कं. २४०) बोधया (बोधेन ?) सह सांकर्यं परिहर्तुमिदं विशेषणम् । तेषामिति (कं. ?) द्रष्टॄणामित्यर्थः । दर्शना[दिति] (कं. २४१) ।

---

१ जातीये सर्व—कं. १; कं. २ । २ ह्यनुमेय इति—कं. १, कं. २ । ३ महिष्यादौ—कं. १; कं. २ । ४ विपरीतसाध—कं. १; कं. २ । ५ सपक्षाच्चेति—अ, ब, क । ६ व्यावृत्ति—अ, ब, क । ७ भावी—अ, ब । ८ रसत्त्वमेकत्वमेकत्र—अ, ब, क । ९ प्रतीकमिदं कं. पुस्तके नास्ति ।

## प्रशस्तपादभाष्यम्

[206] यस्तु सन्ननुमेये तत्समानासमानजातीययोः साधारणः सन्नेव स सन्देहजनकत्वात् सन्दिग्धः, यथा यस्माद्विषाणी तस्माद् गौरिति ।

एकस्मिंश्च द्वयोर्हेत्वोर्यथोक्तलक्षणयोर्विरुद्धयोः [1]सन्निपाते सति संशयदर्शनादयमन्यः सन्दिग्ध इति केचित् । यथा [2]मूर्तत्वामूर्तत्वं प्रति मनसः क्रियावत्त्वास्पर्शवत्त्वयोरिति ।

## न्यायकन्दली

[206] यस्तु सन्ननुमेये धर्मिणि, तत्समानजातीययोः सपक्षविपक्षयोः, साधारणः स सन्देहजनकत्वात् सन्दिग्धः । यथा यस्माद्विषाणी तस्माद् गौरिति । यदायं पिण्डो गौर्विषाणित्वादिति साध्यते, तदा विषाणित्वं गवि महिषे च दर्शनात् सन्देहमापादयन् सन्दिग्धो हेत्वाभासः स्यात् । अयं सपक्षव्यापको विपक्षैकदेशवृत्तिरनैकान्तिकः । सपक्षविपक्षयोर्व्यापको नित्यः शब्दः प्रमेयत्वादिति । सपक्षविपक्षैकदेशवृत्तिः नित्यमाकाशममूर्तत्वादिति । सपक्षैकदेशवृत्तिर्विपक्षव्यापको द्रव्यं शब्दो निरवयवत्वादिति । समानासमानजातीययोः साधारण इति यत् साधारणपदं तस्य विवरणं सन्नेवेति ।

यथैको धर्मः सपक्षविपक्षयोर्दर्शनाद्धर्मिणि सन्देहं कुर्वन् सन्दिग्धो हेत्वाभासः स्यात्, एवमेकस्मिन् धर्मिणि द्वयोर्हेत्वोस्तुल्यबलयोर्विरुद्धार्थप्रसाधकयोः सन्निपाते सति [3]संशयदर्शनादयं विरुद्धद्वयसन्निपातोऽन्यः सन्दिग्धो हेत्वाभास इति कैश्चिदुक्तम्, तद्दूषयितुमुपन्यस्यति – एकस्मिंश्चेति । तस्योदाहरणमाह – यथा मूर्तत्वामूर्तत्वं प्रति मनसः क्रियावत्त्वास्पर्शवत्त्वयोरिति । मूर्तं मनः क्रियावत्त्वाच्छरादिवत्, अमूर्तं मनोऽस्पर्शवत्त्वा-

[टि०] विभागजत्वमेव व्याचष्टे विभागजविभागेति विभागज[4]विभागोऽसमवायिकारणं यस्येति विग्रहः । विभागाद्विः य. शब्द उत्पद्यते तस्याकाशं समवायि[5]कारणमसमवायिकारणं तु [6]विभागजो विभागः, तस्याकाशेऽपि समवेतत्वात्,

[पं०] [206] [7]सपक्ष[विपक्ष]व्यापक इति – अत्र सपक्षा गावः । विपक्षैकदेशवृत्तिरिति विपक्षा महिषाश्वादयः । सपक्षविपक्षैकदेशवृत्तिः नित्यमाकाशममूर्तत्वादिति नियतद्रव्यपरिमाणं मूर्तः साध्यस्यास्तीति । मूर्तः अभ्रादित्वात् ।

[कु०] [206] सन्देहमापादयन्संदिग्धेति (कं. २४१) सपक्षविपक्षैकदेशवृत्तिरिति (कं. २४१) अमूर्तत्वं हि

१ सन्निपाते संशय–व्यो. (६०७–८) । २ मूर्तामूर्तत्वं – कं. प्रा. ४ पु. व्यो. (६०८) पाठोऽयं समीचीनो भाति ।
३ संशयस्य – जे. १, जे. २ । ४ विभागे – अ, ब । ५ कारणसमवायिकारणं – अ, ब । ६ विभागजे – अ, ब ।
७ सपक्षविपक्षयोर्व्यापिक – कं ।

### प्रशस्तपादभाष्यम्

नन्वयमसाधारण एवाचा[1]क्षुषप्रत्यक्षत्ववत् संहतयोरन्यतरपक्षासम्भवात्। ततश्चानध्यवसित इति वक्ष्यामः।

### न्यायकन्दली

दा[2]काशवदिति विरुद्धार्थप्रसाधकयोः क्रियावत्त्वास्पर्शवत्त्वयोर्हेत्वोः सन्निपाते मनसो मूर्त्तत्वामूर्त्तत्वं प्रति संशयः, न ह्यत्रोभयोरपि साधकत्वम्, वस्तुनो द्वयात्मकत्वासम्भवात्। नापि परस्परविरोधादुभयोरप्यसाधकत्वम् [3]मूर्तामूर्तत्वव्यतिरेकेण प्रकारान्तराभावात्। न चान्यतरस्य हेतो[4]विशेषोऽवगम्यते येनैकपक्षावधारणं स्यात्। अतः क्रियावत्त्वास्पर्शवत्त्वाभ्यां मनसि संशयो भवति किं[5] मूर्तं किं वामूर्तमिति। अयमेव च विरुद्धाव्यभिचारिणः प्रकरणसमाद्भेदो यदयं संशयं करोति, प्रकरणसमस्तु सन्दिग्धेऽर्थे प्रयुज्यमानः संशयं न [6]निवर्तयति।

नन्वयमसाधारण एव, [7]अचाक्षुषप्रत्यक्षत्ववत् संहतयोरन्यतरपक्षासम्भवादिति। क्रियावत्त्वास्पर्शवत्त्वे प्रत्येकं न तावत् संशयं जनयतः, निर्णयहेतुत्वात्। सन्निपातश्च तयोरयमसाधारण एव, संहतयोस्तयोर्मनोव्यतिरेकेणान्यतरपक्षे सपक्षे विपक्षे वाऽसम्भवात्, यथाऽचाक्षुषत्वप्रत्यक्षत्वयोः प्रत्येकं गुणव्यभिचारेऽपि समुदितयोर्गुणव्यतिरेकेणान्यत्रासम्भवः। [8]यद्यपि विरुद्धाव्यभिचारिधर्मद्वयोपनिपातोऽसा[9]धारणो धर्मः, तथापि संशय-

[टि०] [10]समवायिकारणे समवायरूपप्रत्यासत्तिसम्भवात् विभागजविभागा[11]समवायिकारणत्वाच्छब्दो नित्यो वा स्यादनित्यो वेति सन्देहः।

[पं०] अप्रत्यये रूपसिद्धिः। न मूर्तोऽमूर्तः। तस्य भावोऽमूर्तत्वम्। तस्मादमूर्तत्वात्। अत्र वाक्ये इयं भावना–नित्ययोरपि परमाणुमनसोमूर्तत्वादात्मादीनां चामूर्तत्वात् सपक्षैकदेशवृत्तित्वमनित्यानामपि बुद्ध्यादीनाममूर्तत्वात्।

[कु०] सपक्षैकदेशे बुद्ध्यादौ वर्तते घटादौ च न वर्तत इत्यर्थः। विपक्षैकदेशे आत्मादौ वर्तते, परमाणौ च [न] वर्तते

---

१ चाक्षुषत्व–कं. १, कं. २, कि। २ काशादि–कं. १; कं. २। ३ मूर्ता – कं. १; कं. २। ४ तिषयो गम्यते – जे. १; विशेषो गम्यते–जे. २, जे. ३। ५ किं मूर्तं वा – जे. २। ६ निवर्तयतीति–कं. १; कं. २। ७ अचाक्षुषत्व – कं. १; कं. २। ८ यदि–जे. १। ९ ऽसाधारणः –जे. १। १० समवाय–क। ११ समवायि–अ, ब, क।

न्यायकन्दली

हेतुत्वमेव। व्यतिरेकिणो हि विपक्षादेवैकस्माद् व्यावृत्तिर्नियता, तेन पक्षे निर्णयहेतुत्वम्। असाधारणस्य तु व्यावृत्तिरनैकान्तिकी, विपक्षादिव सपक्षादपि तस्याः सम्भवात्। तत्र यदि गन्धवत्त्वमनित्यव्यावृत्तत्वान्नित्यत्वं साधयति, नित्यादपि गगनाद् व्यावृत्तेरनित्यत्वमपि साधयेत्? न चास्त्युभयोः सिद्धिः, वस्तुनो द्वैरूप्याभावात्। नाप्युभयोरसिद्धिः, प्रकारान्तराभावात्। अतो गन्धवत्त्वात् पृथिव्यां संशयो भवति किमियं नित्या? किं वानित्या? इति। यथाहुर्भट्टमिश्राः–

यत्रासाधारणो धर्मस्तदभावमुखेन तु।
द्वयासत्त्वविरोधाच्च स नः संशयकारणम्॥

यच्चाह न्यायवार्त्तिककारः–विभागजत्वं विभागजविभागासमवायिकारणकत्वं नर्ते शब्दात् सम्भवतीति सर्वतो व्यावृत्तेः संशयहेतुरिति।

अत्राह–ततश्चानध्यवसित इति वक्ष्याम इति। विरुद्धयोः सन्निपातोऽसाधारणोऽसाधारणत्वाच्चानध्यवसितोऽयमिति वक्ष्यामः। किमुक्तं स्यात्? असाधारणो धर्मोऽध्यवसायं न करोति न पुनः संशयं करोतीति वक्ष्याम इत्यर्थः।

[पं०] घटादीनां च मूर्तत्वाद्विपक्षैकदेशवृत्तित्वहेतोरमूर्तद्रव्यस्य। निरवयवत्वादिति द्रव्यत्वेऽपि परमाणौ निरवयवत्वम्, पृथिव्यादीनां सावयवत्वमिति सपक्षैकदेशवृत्तिता। विपक्षव्यापकत्वं तु अद्रव्याणां गुणकर्मादीनां सर्वेषामपि, निरवयवत्वादिति भावना।

[कु०] द्वयोः हेत्वोः तुल्यबलयोरिति विशेषग्रहणात्। तुल्यबलत्वं चाभिमानिकं द्रष्टव्यम्। मूर्तत्वं चामूर्तत्वं च इति स द्वन्द्वः। विभागैकवद्भवतीत्येकवचनम्।

१ असाधारणस्य व्यावृत्ति–जे. १। २ यदा–कं. १; कं. २। ३ मतः–कं. १, कं. २। ४ व्यावृत्तितः–जे. १, जे. २। ५ वक्ष्यामः–जे. ३। ६ ऽध्यवसायं न करोतीति वक्ष्याम इत्यर्थः–कं. १ कं. २; ऽध्यवसायं करोति न तु संशयं करोतीति वक्ष्याम इत्यर्थः–जे. १, जे. २।

प्रशस्तपादभाष्यम्

[207] ननु शास्त्रे तत्र तत्रोभयथा दर्शनं संशयकारणमपदिश्यत इति, न संशयो विषयद्वैतदर्शनात्, संशयोत्पत्तौ विषयद्वैतदर्शनमेव निमित्तम्, तुल्यबलत्वे च तयोः 'परस्परं विरोधान्निर्णयानुत्पादकत्वं स्यान्न' तु संशयहेतुत्वम्, न च तयोस्तुल्य'बलवत्त्वमस्ति, अन्यतरस्यानुमेयोद्देशस्यागमबाधितत्वादयं तु विरुद्धभेद एव।

न्यायकन्दली

[207] विरुद्धाव्यभिचारिणः 'संशयहेतुत्वाभावे प्रतिपादिते शास्त्रविरोधं चोदयति। 'ननु च शास्त्रे तत्र तत्रोभयथा दर्शनं संशयकारणमादिश्यते इति उभयथा दर्शनम्। उभाभ्यां विरुद्धधर्माभ्यां सहैकस्य धर्मिणो दर्शनं संशयकारणमिति शास्त्रे तत्र तत्र स्थाने कथितम् 'दृष्टं च दृष्टवद् दृष्ट्वा' संशयो भवति (वै. अ. २ आ. २ सू. १८)। अमूर्तत्वेन सहात्मनि दृष्टमस्पर्शवत्त्वं यथा मनसि 'दृश्यते, तथा मूर्तत्वेन सह परमाणौ दृष्टं क्रियावत्त्वमपि दृश्यते, अतोऽमूर्तत्वेन सह दृष्टमस्पर्शवत्त्वमिव मूर्तत्वेन सह दृष्टं क्रियावत्त्वमपि दृष्ट्वा संशयो भवति किं मनो मूर्त्तम्? किमुतामूर्त्तम्? इति।

[टि०] [207] संशयजनकत्वं प्रकारान्तरेणापि निराचष्टे 'न च विरुद्धा'व्यभिचारी इति। प्रयोगाभावमेव दर्शयति यदि तावद् इत्यादि। पुनः पराभि''प्रायमाशङ्कते विरुद्धं प्रत्यनुमानम् इत्यादि। सिद्धान्तवाद्याह ''यदि द्वितीयवद् इति।

[पं०] [207] अन्यः संदिग्धः विरुद्धाव्यभिचारिसंज्ञः। विरुद्धाव्यभिचारिण इति प्रस्तुतस्यैव हेत्वाभासस्य संज्ञान्तरम्। विरुद्धाव्यभिचारिणः संशयहेतुत्वे भाष्यकारो दूषणं व्याजहार नन्वयमसाधारण एवेत्यादिना। मनोव्यतिरेकेणेति–अस्पर्शवत्त्वं क्रियावत्त्वं च द्वयमसंहतं मनस्येवास्ते। अस्पर्शवत्त्वं हि आत्मादावपि द्रष्टव्यम्, क्रियावत्त्वं मूर्तद्रव्येष्वपि। प्रत्येकं गुणव्यभिचारेऽपीति प्रत्येति(क)मचाक्षुषत्वप्रत्यक्षत्वयोर्द्रव्येऽपि वर्तमानत्वात् केवलेषु गुणेष्वेव वृत्तिर्नास्तीत्यर्थः। समुदितयोर्गुणव्यतिरेकेणान्यत्रासंभव इति को भावः? अचाक्षुषत्वप्रत्यक्षत्वे संहते द्वेऽप्येते गुणेष्वेव

[कु०] [207] ननु व्याप्तयोर्निश्चायकत्वात्कथं संशयहेतुत्वमुक्तमित्यत आह न ह्यत्रोभयोरिति (कं. २४१) वस्तुनो द्वयात्मकत्वासंभवादिति (कं. २४१) प्रतिकूलतर्कपराहतेर्व्याप्तिसंदेहादित्यर्थः। नन्वेवमपि स्वसाध्ययोरनुपस्थापनात्कथं संशयहेतुत्वात्संदिग्धत्वम्, विरुद्धाव्यभिचारिणः, तर्हि प्रकरणसमोऽपि संदिग्धः स्यात्, सोऽपि प्रकारेण चिन्तां प्रवर्तयन्संशयकरोत्येवेत्यत आह–अयमेव चेति (कं. २४१)–प्रकरणसमस्त्विति (कं. २४१) समुदितौ हि परस्परविरोधितौ संशयं कुरुतः, तयोरन्यतमस्तु प्रकरणसमः। प्रतिपक्षबद्धतया न निर्णयं करोतीत्येतावता भास इत्यर्थः।

---

१ दर्शनं कारणं–कं. १, कं. २; किं। २ परस्पर–कं. १, कं. २; किं। ३ न संशय–दे। ४ बलत्व–दे। ५ हेत्वभावे–कं. १, कं. २। ६ नन्विति। उभयथा दर्शनमिति–कं. १; कं. २। ७ वर्तते–जे. १, जे. २। ८ न तु–मु. जे. १, जे. २, जे. ३। ९ विरुद्धव्यभिचारी–अ। १० प्राये–अ। ११ यद्–अ, ब, क।

न्यायकन्दली

'यथादृष्टमयथादृष्टमुभयथा दृष्टत्वात् संशयः' (अ. २ आ. २ सू. १९)। यथा येन धर्मेण मूर्तत्वाव्यभिचारिणा क्रियावत्त्वेन समं 'दृष्टम्' मनस्तस्मात् 'अयथादृष्टम्' अमूर्तत्वाव्यभिचारिणा स्पर्शवत्त्वेन समं दृष्टम्, अतः 'उभयथा दृष्टत्वात्' संशयः किं क्रियावत्त्वान्मूर्त्तं मनः? उतास्पर्शवत्त्वादमूर्त्तम्? इति सूत्रार्थः। तेन विरुद्धाव्यभिचारिणः संशयहेतुत्वं निराकुर्वतः शास्त्रविरोधः।

एतत् परिहरति–न संशयः, विषयद्वैतदर्शनादिति। यत् त्वयोक्तं शास्त्रविरोध इति तन्न, यस्मात् संशयो विषयद्वैतदर्शनाद् भवति। एतदेव विवृणोति–संशयोत्पत्तौ विषयद्वैतदर्शनं कारणमिति। यादृशे धर्मिण्यूर्ध्वस्वभावे संशयो जायते 'स्थाणुर्वा पुरुषो वा' इति, तादृशस्य विषयस्य पूर्वं द्वैतदर्शनमुभयथादर्शनं स्थाणुत्वपुरुषत्वाभ्यां सह दर्शनं संशयकारणम्, न त्वेकस्य धर्मिणो विरुद्धधर्मद्वयसन्निपातस्तस्य कारणम्, तस्मान्नायं सूत्रार्थो यद्विरुद्धाव्यभिचारिधर्मद्वयोपनिपातात् संशय इत्यभिप्रायः।

[टि०] 'यन्मूर्ता(र्तत्वा)मूर्तत्वाभ्याम् इति :– यद्वस्तुत्वं तयोर्मूर्तत्वामूर्तत्वयोः। किन्तु विरुद्धप्रभेद एव इति आगमविरुद्ध इत्यर्थः।

[पं०] नान्यत्र। ततश्चैवमनुमानं प्रवर्तते–'सुखादयो गुणाः, अचाक्षुषत्वे सति प्रत्यक्षत्वात्।' अत्रैव च 'गुणव्यतिरेकेणेति अत्र गुणाः स्पर्शरसगन्धशब्दबुद्ध्यादयो वाच्याः, न तु रूपम्, तस्य चक्षुषत्वे सति प्रत्यक्षत्वात्। प्रकृते तस्यानुपयोगादिति भावः।

परवाक्यं यद्यपीत्यादि। व्यतिरेकिणो हीत्यादि–अयं च व्यतिरेकी न भवति, किन्त्वसाधारणः। स च सपक्षविपक्षव्यावृत्तत्वात्संशयहेतुरेवेति पराभिप्रायः। पक्षे निर्णयहेतुत्वमिति 'सात्मकं जीवच्छरीरम्, प्राणादिमत्त्वात्।

[कु०] परिहारभाष्यं व्याख्यातुं प्रवर्तते नन्विति (कं. २४१) ननु प्रत्येकं रूपसंपन्नयोः कथमसाधारणत्वमित्यत आह–क्रियावत्त्वास्पर्शवत्त्व इति (कं. २४१)। यथाऽचाक्षुषत्व इति (कं. २४२) गन्धादयो द्रव्यम्, सामान्यत्वे सत्यचाक्षुषप्रत्यक्षत्वादित्यस्मिन्प्रयोगेऽसाधारणत्वं द्रष्टव्यम्।

न त्वसाधारणत्वं संशयहेतुत्वाभावे साध्ये विरुद्धमिति शक्यते भाष्यमवतारयितुम्–यदि(द्यपि). विरुद्धेति (कं. २४२) यद्यसाधारणसंशयहेतुः तर्हि केवलव्यतिरेक्यपि तथा स्यादसाधारणत्वाविशेषादित्यत आह–व्यतिरेकिण इति (कं. २४२) एत(क)स्मादिति (कं. २४२) सपक्षादपि तस्या[पा]दत्वादिति शेषः। न हि सर्वमनित्यम्, सत्त्वादित्यस्य तथा भावः संभवति।

१ यन्मूर्तत्वा–मु. जे. ३; यन्मूर्तत्वामूर्ताभ्याम्–जे. १; यन्मूर्तामूर्ताभ्याम्–जे. २। २ इदं प्रतीकं–कं. पुस्तके नास्ति।

न्यायकन्दली

तथा च दृष्टं च दृष्टवद्दृष्ट्वेत्यस्यायमर्थः—[1]दृष्टमेव पदार्थं स्थाणुं वा पुरुषं वा, 'दृष्टवद्' दृष्टाभ्यां स्थाणुपुरुषान्तराभ्यां तुल्यं वर्त्तमानं दृष्टम्, स्थाणुपुरुषान्तरसमानमिति यावत्, देशान्तरे कालान्तरे वा पुनर्दृष्ट्वा कुतश्चिन्निमित्ताद्विशेषानुपलम्भे सति संशयो [2]भवतीति। दृष्टं चेति चशब्देन पूर्वमदृष्टमपि पदार्थं दृष्टवद् दृष्टाभ्यां स्थाणुपुरुषान्तराभ्यां समानं दृष्ट्वा संशय इत्यर्थः।

सूत्रान्तरं च यथादृष्टमयथादृष्टमुभयथादृष्टमित्येकधर्मविशेषानुस्मरणकृतं संशयं दर्शयति। पूर्वदृष्टमेव पुरुषं 'यथादृष्टम्' येन येनावस्थाविशेषेण दृष्टं मुण्डं जटिलं वा, तस्मादयथादृष्टमन्येनान्येनावस्थाभेदेन दृष्टम्, कालान्तरे दृष्ट्वा, अवस्था[3]विशेषमपश्यतः स्मरत[4]श्चैवं तस्यैव प्राक्तनी[5]मनवस्थितामुभयीमवस्थां किमयमिदानीं मुण्डः किं वा जटिल इति संशयः स्यादिति सूत्रार्थः।

न तु विरुद्धाव्यभिचारी संशयहेतुः, प्रयोगाभावात्। यदि तावदाद्यस्य हेतोर्यथोक्तलक्षणत्वमवगतं तदा तस्माद्योऽर्थोऽवधारितः स तथैवेति न द्वितीयस्य प्रयोगः, प्रतिपत्तिबाधितत्वात्। अथायं यथोक्तलक्षणो न भवति, तदानीमयमेव दोषो वाच्यः, किं

[पं०] यस्सात्मकं न भवति तत्प्राणादिमदपि न भवति यथा घट' इति विपक्षादेव व्यावृत्तिर्व्यतिरेकिणः। **अनैकान्तिको** [इति] संशयहेतुरित्यर्थः। **तस्या इति** व्यावृत्तेः। **गन्धवत्त्वमिति** 'नित्या पृथिवी, गन्धवत्त्वा'दित्यनुमाने। **अनित्यव्यावृत्तत्वादिति**—अनेन विपक्षव्यावृत्तिं दर्शयति। नित्यत्वं साधयतीत्यस्मात्पुरस्तादध्याहार्यम्। **नित्यादपि गगनादिति**—अनेन गगनस्य नित्यत्वेन सपक्षं दर्शयति। **उभयोरिति** = नित्यत्वानित्यत्वयोः।

[कु०] नन्वसाधारणो धर्मो विरुद्धाभ्यां सहादृश्यमानतस्तत्स्मृत्यहेतुत्वे कथं तत्र संशयं कुर्यादित्यत आह **तत्र यदीति** (कं. २४२)—यथा साधारणो धर्मोऽन्वयविशेषे न विशेषो स्मारयति, एवमसाधारणोऽपि व्यतिरेकमुखेन विशेषो स्मारयत्येवेत्यर्थः। नन्वस्त्यध्यवसितत्वमसाधारणस्य, संशयहेतुत्वात्स दिग्धत्वमपि भविष्यति, दृश्यते हि निमित्त[स]मवायात्संज्ञासमावेश इत्यत आह **किमुक्तमिति** (कं. २४२) **चोदयतीति** (कं. २४२) सूत्रार्थमन्यथागृहीतमभिप्रायेणेति शेषः। **विरुद्धधर्माभ्यामिति** (कं. २४२) विरुद्धधर्मोपनायकाभ्यामित्यर्थः। कुतः सूत्रे कथितमित्यत आह **दृष्टं चेति** (कं. २४२)। पूर्वपक्षाभिप्रायेण सूत्रं योजयति **अमूर्तत्वेनेति** (कं. २४२) '**भाष्ये तत्र तत्रेति** (कं. भा. २३९) श्रुत्या वीप्साया विषयं दर्शयितुं सूत्रान्तरं पठित्वा पूर्वपक्षानुसारेण व्याचष्टे **यथादृष्टमिति** (कं. २४२) समानधर्मसंशयकारणत्वं दर्शयति—**तत्रेति** (कं. २४३)। विवरणभाष्यतात्पर्यमुपदर्शयन्व्याचष्टे **यादृश इति** (कं २४३)

१ पूर्वमेव दृष्टम्—कं. १; कं. २। २ भवति—कं. १; कं. २। ३ भेद—जे. १; जे. २। ४ स्मरतश्च तस्यैव—जे. १, जे. २, जे. ३। ५ मव—कं. १ कं. २। ६ शास्त्रे—कं।

## न्यायकन्दली

प्रत्यनुमानेन ? विरुद्धं प्रत्यनुमानं न व्यभिचरति, नातिवर्तत इति विरुद्धाव्यभिचारी प्रथमो हेतुस्तस्यायमेव दोषो यद्विपरीतानु[1]मानसम्भवः । द्वितीयेन प्रतिपक्षे [2]स्थाप्यमाने [3]प्रथमस्य साध्यसाधकत्वाभावादिति चेत् ? यदि द्वितीयवत् प्रथममप्यनुमानलक्षणोपपन्नम्, न प्रथमस्यासाधकत्वम् । तदसाधकत्वेऽन्यत्राप्यनुमाने क आश्वासः ? वस्तुनो द्वैरूप्याभावादसाधकत्वमिति चेत् ? वस्तु द्विरूपं न भवतीति केनैतदुक्तम् ? यथा हि प्रमाणमर्थं गमयति, तदेव हि तस्य तत्त्वम् ।

अथैकं वस्तूभयात्मकं न भवतीति सुदृढप्रमाणावसितोऽयमर्थो न शक्यतेऽन्यथा कर्तुम्, तर्हि तयोस्तुल्य[4]बलवत्ता नास्त्येव, एकस्य यथार्थत्वादिति, कुतः संशयः ? यद्यपि वस्तुवृत्त्या द्वयोर्यथार्थता नास्ति, तथाप्यन्यतरस्य विशेषानुपलम्भेन भवेत् तुल्यबलत्वाभिमान इति चेदस्त्वेवम्, तथापि तुल्यबलत्वाद्यथोत्तरेणाद्यं प्रतिबध्यते,

[पं०] [5]यस्त्वित्यादिश्लोकः । व्याख्या—द्वितीयपादान्ते तु अप्यर्थे भिन्नक्रमश्च । स इत्यस्मात्परो योज्यः । ततोऽयमर्थः सिद्धः । यच्चासाधारणो धर्मो गन्धवत्त्वादिः सोऽपि कोऽर्थः ? असाधारणोऽपि न साधारण एवेत्यर्थः । नोऽस्माकं संशयकारणम् । कथं संशयकारणम ? तदभावमुखेन सपक्षविपक्षाभावद्वारेणैवेत्यर्थः । तथा द्वयासत्त्वविरोधादिति मिथो विरुद्धधर्मद्वयस्य नित्यत्वानित्यत्वादिरूपस्यैकस्मिन् पृथिव्यादौ असत्त्वविरोधात् । चकारात्सत्त्वविरोधाच्चासाधारणो धर्मः संशयहेतुरिति श्लोकार्थः । अयं च श्लोकः यदि गन्धवत्त्वमनित्यव्यावृत्तत्वादित्यादिना सन्दर्भेण प्रतिपादितस्यार्थस्य संग्राहक इति द्रष्टव्यः ।

[कु०] अस्या[थम]र्थं इति (कं. २४३) अक्षरार्थं इत्यर्थः । स्थाणुं पुरुषं वेति स्थाणुजातीयं चेत्यर्थः । इतरथा स्थाणुपुरुषान्तरसमानमित्यनेन विरोधप्रसंगात् । अदृष्टमपीति (कं. २४३) अदृष्टजातीयमपीत्यर्थः ।

ननु यदि समानधर्मस्यैव संशयकारणत्वं तर्हि द्वितीयं सूत्रं किमर्थमित्यत आह सूत्रान्तर चेति (कं. २४३) एकधर्मीति (कं. २४३) एकस्य धर्मिणो यो विशेषो मुण्डत्वजटिलत्वे तयोरनुस्मरणकृतमित्यर्थः । यद्यपि द्वयोरवस्थयोरेकपुरुष आश्रयः समानो दृश्यमानसंशयहेतुः, तथापि संशयविषयभेदप्रदर्शनाय सूत्रान्तरमिति भावः । अक्षरार्थं व्याचष्टे पूर्वं दृष्टमेवेति (कं. २४३) तस्मादयथादृष्टमिति (कं. २४३) तस्मात्पूर्वावस्थाविशेषादयथावस्थान्तरत्वाद् दृष्टमित्यर्थः । कालान्तरे दृष्ट्वेत्यध्याहारः । उभयथाद्रष्टुमित्यस्य विवरणं स्मरतश्च प्राक्तनीमवस्थायिनीमवस्थामिति संशयवेलायामवस्थाद्वयानुभवस्याप्यनुपपत्तेरेवं विवरणम् । अनन्तरं भाष्यमभिप्रायदर्शनपूर्वमवतारयति [6]न च विरुद्धेति (कं. २४३) अ(?)प्रयोगाभावादिति (कं. २४३) शेषः । प्रतिपत्तिबाधित्वादिति (कं. २४३) स्वयमेव प्रमाणेन मूर्तत्वं प्रतिपद्य-

१ प्रत्यनुमान—जे. ३ । २ उपस्था—कं. १; कं. २, जे. ३ । ३ कथमस्य—जे. १, जे. २, जे. ३ । ४ बलत्वं—कं. १; कं. २ । ५ यच्च—कं. । ६ तु—कं. ।

न्यायकन्दली

तथाद्येनाप्युत्तरं प्रतिबध्यत इति [1]परस्परप्रतिबन्धादुभयोः स्वसाध्यसाध[2]कत्वं न स्यात्, न तु संशयकर्तृत्वम्, विशेषानुपलम्भमात्रेण विरुद्धोभयविशेषोपस्थानाभावादित्याह – [3]तुल्यबलत्वे च तयोः परस्परं विरोधान्निर्णयानुत्पादकत्वं स्यान्न तु संशयहेतुत्वमिति ।

ननु यद्वस्तु तन्मूर्तं भवत्यमूर्तं वा, न मूर्तामूर्ताभ्यां प्रकारान्तरमुपलब्धम्, अतो मनसि मूर्त्तत्वामूर्त्तत्वयोरनुपलम्भेऽपि द्वयोरभावं द्वयोरपि [4]भावमसम्भावयतो भवत्येवान्यतरपक्षे [5]संशयः । सत्यं भवत्येव, न तु विरुद्धाव्यभिचारिधर्मद्वयसन्निपातात्, किन्तु वस्तुत्वात् । यन्मूर्तत्वामूर्तत्वाभ्यां दृष्टसाहचर्यं मनसि प्रतीयमानं स्मृतिद्वारेण तयोरुपस्थापनं करोति ।

[6]तुल्यबलत्वमभ्युपगम्य विरुद्धाव्यभिचारिणः संशयहेतुत्वं निरस्तम्, [7]न त्वनयोस्तुल्यबलत्वमस्ति, अन्यतरस्यानुमेयोद्देशस्य 'अमूर्तं मनः' इत्यस्यागमेन तदभावादणु मनः (अ. ७ भा. १ सू. २३) इति सूत्रेण बाधितत्वात् । अथैवं सूत्रमप्रमाणम्, व्यापकमेव मनः, तदा मनःसद्भावे न किञ्चित् प्रमाणमस्तीत्यमूर्त्तं मनः अस्पर्शत्वादिति हेतुराश्रयासिद्धः ।

[पं०] न्यायवार्तिककार इति – उद्योतकराचार्यः । विभागजविभागासमवायिकारणत्वमिति – विभागजविभागोऽसमवायिकारण यस्येति समासः विभागजमिति व्याख्येयपदम्, विभागजविभागासमवायिकारणत्वमिति व्याख्यानपदं ज्ञेयम् । सर्वत इति सपक्षाद्विपक्षाच्च । अत्राहेति भाष्यकारः । [8]कर्त्रा प्रतिपादिते इति भाष्यकारेण । नोदयतीति = परः । कणादसूत्रं दर्शयति दृष्टं च दृष्टवद् दृष्टवा संशयो भवतीत्येतत् । दृष्टमिति । दृष्टं सक्रियावत्त्वमपि दृश्यते इति – अत्र मनसीति योज्यम् । पुनः द्वितीयं सूत्रं दर्शयति– 'यथादृष्टमयथादृष्टमुभयथादृष्टत्वात्' संशय इत्येतत् ।

[कु०] मानस्य तद्विरोधमूर्तत्वजिज्ञासाभावादित्यर्थः । न भवतीति (कं. २४३) अवगतमिति शेषः । प्रत्यनुमानमोग एवावगतदोषोद्भावमित्यथ म(ना)यं दोष इत्यत आह द्वितीयेनेति (कं. २४३) ।

ननु न तावत्प्रत्यनुमानमात्रं न दोषः, तथा सति प्रथमेनैव प्रत्यनुमानेन दुष्टस्य द्वितीयस्य प्रयोगानुपपत्तिप्रसंगात्, ततो त्व(त्वा)दे(दा)[वि]व दूषणं वक्तव्यम्, नो चेद् दुष्टसेव [इत्यभि]प्रायेणाह यदि द्वितीयवदिति (कं. २४३) । सत्यं प्रत्यनुमानमात्रं न दोषः, किन्तु प्रत्यनुमानेन वस्तुद्वैरूप्यलक्षणपरि(प्रति)कूलतर्कपराहतिः सूच्यते इति शंकते वस्तुन इति (कं. २४३) – किं वस्तुनो द्वैरूप्यं स्वरूपेणैवानिष्टं प्रमाणविरोधाद्वा ? नाद्य इत्याह द्विरूपवस्तु (वस्तु द्विरूपं) न [इति] (कं. २४३) । द्वितीयेन दूषणान्तरमवश्यंभावि, इतरथा प्रमाणविरोधस्यैवानुपपत्तेरित्याह अथेति (कं. २४३) । विशेषानुपलम्भमात्रेणेति (कं. २४४) विशेषानुपलम्भमात्रकार्येण प्रतिरोधेनेत्यर्थः । अनुप-

---

१ परस्परं–कं. १; कं. २ । २ साधकत्वं स्यात्– जे. १, जे. २, जे. ३ । ३ तुल्यबलत्वे चेति – कं. १; कं. २ । ४ भावं सम्भावयतो – जे. २ । ५ स संशयः – कं. १; कं. २ । ६ तुल्यबलवत्व – जे. १ । ७ ननु तयोः – जे. १, जे. २ । ८ कर्ता–इति कं. पुस्तके नास्ति ।

न्यायकन्दली

अथ युगपज्ज्ञानानुत्पत्त्या सिद्धं मनस्तद् धर्मिग्राहकप्रमाणबाधितो युगपज्ज्ञानानुत्पत्तेर्मनसोऽणुपरिमाणत्वे सति सम्भवात् व्यापकत्वे मनसो युगपत्समस्तेन्द्रियसम्बन्धाद्युगपदेव ज्ञानानि प्रसज्यन्ते ।

अनुमेयोद्देशस्यागमविरोधः किं दूषणमत आह—अयं तु विरुद्धभेद एव । अयमागमविरुद्धोऽनुमेयोद्देशोऽविरोधी प्रतिज्ञेत्यविरोधिग्रहणेन निवर्तितानां प्रत्यक्षादिविरुद्धानां प्रतिज्ञाभासानां प्रभेद एव, नायं सन्दिग्धो हेत्वाभासः । किन्तु विरुद्धप्रभेद एवेति तुशब्दार्थः ।

[पं०] सूत्रद्वयमिदं द्वितीयाध्याये । तस्मादिति मूर्तत्वात् व्यभिचारक्रियावत्त्वदर्शनात् । निराकुर्वत इति-प्रशस्तपादभाष्ये इति ज्ञेयम् । शास्त्रविरोध इति – कणादसूत्रविरोधः । एतत्परिहरतीत्यत्र भाष्यकारः कर्ता । तस्येति = संशयस्य । कुतश्चिन्निमित्तादिति–दूरत्वान्धकारादिना । पूर्वमदृष्टमपीति–प्राग् हि पूर्वदृष्टमेवेत्युक्तम् । सूत्रान्तरं चेति–एतत्कर्तृपदं संशयं दर्शयति – इत्याभ्यां कर्मक्रियाभ्यां सम्बन्धनीयम् । अनवस्थितामुभयीमवस्थामिति – मुण्डताजटिलते हि परावर्तिन्यौ । प्रयोगाभावादित्युक्त्वा प्रयोगाभावमेव दर्शयति – यदि तावदित्यादिना । अयमिति – अयमद्यः । अयमेवेति यथोक्तलक्षणाभावः ।

[कु०] लम्भेऽपीति (कं. २४४) अनुपस्थानेपीत्यर्थः । अन्यतरपक्ष इति (कं. २४४) अन्यतरपक्षोपमर्दनादन्यतरपक्षज्ञानरूपसंशय इत्यर्थः । वस्तुत्वादिति (कं. २४४) समानधर्मरूपादित्यर्थः । एतदेवाह यन्मूर्तत्वामूर्तत्वाभ्यामिति (कं. २४४)। वृत्तं कीर्तनभाष्यमवतारयति तुल्यबलवत्त्वमिति (कं. २४४) भाष्यकारोक्त आगमविरोधः प्रस्तुतविरुद्धाव्यभिचार्यभिप्रायेति दर्शयन्सूत्रं पठति तदभावादिति (कं. २४४) । परमार्थतस्तु अन्यतरस्य दोषवत्ताया उपलक्षणमेतद्द्रष्टव्यम् । अप्रमाणीकृतकरणादस्य प्रतिवादिनः कथमयमागम इत्यत आह य(अ)येवमिति (कं. २४४) ।

प्रकारान्तरेणाश्रयसिद्धमाशंकते अथेति (कं. २४४) धर्मिग्राहकप्रमाणबाधित इति युगपज्ज्ञानानुत्पत्ति हि मनः साधयंती(यति) । स्वोपपादकतयाऽणुत्वमन्तर्भाव्येव साधयतीत्यर्थः । तदेतदाह व्यापकत्व इति (कं. २४४) किं दूषणमिति (कं. २४४) कतमं दूषणमित्यर्थः ।

---

१ इति– कं. १, कं. २ । २ विरोधः–जे. १, जे. २ ।

### प्रशस्तपादभाष्यम्

[208] [1]यश्चानुमेये विद्यमानस्तत्समानासमानजातीययोर[2]सन्नेव [3]सोऽन्यतरत्रासिद्धोऽनध्यवसायहेतुत्वादनध्यवसितः, यथा सत्कार्यमुत्पत्तेरिति। अयमप्रसिद्धोऽनपदेश (वै. सू. ३-१-१५) इति वचना[4]दवरुद्धः।

### न्यायकन्दली

[208] अनध्यवसित इत्यसाधारणो हेत्वाभासः कथ्यते। तं व्युत्पादयति—यश्चानुमेये विद्यमानस्तत्स[5]मानासमानजातीययोरसन्नेव सोऽन्यतरत्रासिद्धोऽनध्यवसायहेतुत्वादनध्यवसितः, यथा सत्कार्यमुत्पत्तेरिति। सर्वं कार्यमुत्पादात् पूर्वमपि सदिति [6]साध्ये, उत्पत्तेरिति हेतुः सांख्यानाम्। सति सपक्षे व्योमादावसति विपक्षे गगनकुसुमादावभावान्नैकतर[7]पक्षाध्यवसायं करोति। विशिष्टार्थक्रियाजननयोग्येन रूपेण पूर्वमनभिव्यक्तस्य पश्चादभिव्यक्तिरेवोत्पत्तिरिति सांख्याः, तेन तेषामुत्पत्तेरिति हेतोर्न स्वतोऽसिद्धता।

अयमनध्यवसितो हेत्वाभासः केन वचनेन सूत्रकृता संगृहीत [8]इत्याह—अयमप्रसिद्धोऽनपदे[9]श (अ. ३ आ. १ सू. १५) इति वचनादवरुद्ध इति। अनैकान्तिकवद-

[टि०] [208] श्रोत्रग्रहणो योऽर्थः इति—श्रोत्रग्रहणः शब्द इत्येतावल्लक्षणं शब्दत्वेऽपि [10]गतत्वादतिव्याप्तकमत [11]उक्तमर्थं इति। [12]वैशेषिकाणां ह्यर्थशब्देन द्रव्यगुणकर्म्मणामभिधानं तेन श्रोत्रग्रहणो गुणः शब्दः इत्यर्थः। विरुद्धोभयेति

[पं०] [208] [तथै[13]] वेति (कं. २४३.१९) यथोक्तलक्षणाभावः। परः प्राह विरुद्धमित्यादि (कं. २४३.२१)। श्रीधरः प्राह यदि द्वितीयवदि(कं. २४३.२४)त्यादि। तदसाधकत्वे (कं. २४३.२५) इति, प्रथमस्यासाधकत्वे। अन्यत्रापीति (कं. २४३.२५) द्वितीयेऽपि। असाधकत्व(कं. २४३.२४)मित्यत्र प्रथमानुमानस्येति योज्यम्। यथा हीत्यादि (कं. २४३.२६) येनैव रूपेण प्रमाणं कर्तृ अर्थं गमयति तदेव तस्यार्थस्य रूपं ततश्च वैरूप्याभाव इति वाक्यार्थः।

परवाक्यं—अर्थकमित्यादि (कं. २४३.२७)। श्रीधरः प्राह तर्हि(कं. २४४.१)त्यादि। विशेषोपस्थापनाभावादिति (कं. २४४.६) संशयो हि विरुद्धोभयविशेषोपस्थापने सति भवति।

[कु०] [208] अनन्तरं भाष्यसंगतिमाह अनध्यवसित इति (कं. २४४) अक्षपादमतेऽसाधारणो हेत्वाभासोऽस्मन्मतेऽनध्यवसित इति कथ्यत इत्यर्थः। भाष्ये समानासमानजातीययोरसंनिति पक्षमात्रवृत्तित्वापरम्।

---

१ यश्च सन्ननुमेये–व्यो.(६१०)। २ रसन्नेव च–व्यो.(६१०)। ३ अन्यतरा–कं. १, कं. २ कि.। ४ वचनादेव रुद्धः—दे। ५ तत्समानासमानजातीययोरित्यादि। ६ साध्यते—कं. १, कं. २। ७ पक्षावसायं—जे. २। ८ इत्यत्राह—जे. ३। ९ नपदेश इति–कं. १, कं. २। १० गतत्वादमूर्तत्वादति–अ। ११ उक्तसमर्थं—अ, ब। १२ विशेषिकाणां—अ, ब। १३ अत्र पूर्वाणि पत्राणि (पञ्जिकायाः) नोपलभ्यन्ते।

प्रशस्तपादभाष्यम्

ननु चायं विशेषः संशयहेतुरभिहितः शास्त्रे तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वादिति (अ. २ आ. २ सू. २२) न अन्यार्थत्वात् शब्दे विशेषदर्शनात् संशयानुत्पत्तिरित्युक्ते नायं द्रव्यादीनामन्यतमस्य विशेषः स्याच्छ्रावणत्वं किन्तु सामान्यमेव सम्पद्यते, कस्मात् ? तुल्यजातीयेष्वर्थान्तरभूतेषु द्रव्यादिभेदानामेकैकशो विशेषस्योभयथा दृष्टत्वादित्युक्ते, न संशयकारणम् । अन्यथा षट्स्वपि पदार्थेषु संशयप्रसङ्गात् । तस्मात् सामान्यप्रत्यक्षादेव संशय इति ।

न्यायकन्दली

साधारणो धर्मः संशयं करोति, तेनास्य 'सन्दिग्धश्चानपदेशः' इत्यनेन संग्रहो युक्तो न पुनरप्रसिद्धवचनेनेत्यभिप्रायेणाह – ननु चायं संशयहेतुरभिहितः शास्त्रे तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वादिति । तुल्यजातीयेष्वर्थान्तरभूतेष्विति पञ्चम्यर्थे सप्तमी । पदार्थानां विशेषस्तुल्यजातीयेभ्यो अर्थान्तरभूतेभ्यो भवति । यथा पृथिव्यां गन्धवत्त्वं विशेषो द्रव्यान्तरेभ्योऽपि स्याद् गुणकर्मभ्यश्च भवति । शब्दे च श्रावणत्वं विशेषो दृश्यते तत् किं शब्दस्य रूपादिभ्यः सजातीयेभ्योऽयं विशेषः ? किं वा विजातीयेभ्यः ? यदि शब्दो गुणस्तदा रूपादिभ्यः सजातीयेभ्यो विशेषोऽयम्,

[टि०] विरुद्धस्य स्थाणुपुरुषरूपस्य द्वयस्य स्मरणे संशयो भवति । उभयस्मृतिश्च तदा भवति यदा उर्ध्वतादिलक्षणः साधारणो धर्मो विशेषेण स्थाणुपुरुषरूपेण सह दृष्टो भवति नान्यथा । तस्मादेतदपि श्रावणत्वादिपृथिवीत्वादि-

[पं०] यदिति (कं. २४४.७) वस्तुत्वम् । तयोरिति (कं. २४४.११) मूर्तत्वामूर्तयोः ।

निरस्तमिति (कं २४४.१२) भाष्यकारेण । तदभावादणु मन (कं. २४४.१३). वै. सू. (७-१-३०) इति सप्तमाध्याये सूत्रम् । कोऽर्थः ? तस्यापि कृतस्य विभवस्य व्यापकत्वस्याभावात् मनोण्विति पक्षः । व्यापकं हि आकाशादि द्रव्यम् अणु न [भ]वति । अव्यापकं च मनस्तस्मादण्विति सूत्रस्यार्थः । धर्मिग्राहकप्रमाणबाधित (कं. २४४.१६) इत्यत्र हेतुरिति पूर्वतो योज्यम् । धर्मिणस्तस्य ग्राहकम् अस्तित्वप्रतिपादकं यत्प्रमाणं युगपज्ज्ञानानुत्पत्त्याख्यं लिङ्गं तेनैव बाधितो 'अस्पर्शवत्वाद्' इति हेतुरिति परमार्थः ।

[कु०] ननु समानासमानजातीययोः सत्त्वनिरूपणाय प्रायं न हि शशविषाणे सत्त्वं निरूपयि[तु] शक्यते, विपक्ष गगनकुसुमादाविति तु वचनम्, तत्र सत्त्वनिरूपणाभावाभिप्रायं द्रष्टव्यम् । ननु प्रागमि(?) सतः केयमुत्पत्तिस्ततश्चासिद्ध्यैव हेतोः दूषयिते कमर्थं दूषणान्तरं निर्दिश्यत इत्याह विशिष्टार्थेति (कं २४४) । अभिप्रायं दर्शयन्भाष्यमत्र-

---

१ ननु चायं संशय–दे । २ भूतेषु च–व्यो. (६१०) दे । ३ उक्तम्–कं. १, कं. २, कि । ४ प्रत्यया–कं. १, कं. २ कि । ५ ननु चेति–कं. १, कं. २ । ६ तुल्यजातीयेभ्यो भवति अर्थान्तरभूतेभ्यश्च भवति–कं. १, कं. २; जै. ३; तुल्यजातीयेभ्योऽर्थान्तरभूतेभ्यश्च भवति–जे. २ । ७ समान–कं. १; कं. २ । ८ पुरुषस्य द्वयस्य–अ, ब, क । ९ पुरुषस्वरूपेण – भ, ब ।

न्यायकन्दली

अथ द्रव्यं कर्म वा ? तदा विजातीयेभ्य इति शब्दे श्रावणत्वाद् द्रव्यं गुणः कर्मेति संशय इति पूर्वपक्षवादिना सूत्रविरोधे दर्शिते सत्याह – नान्यार्थत्वादिति। नायं सूत्रार्थो यदसाधारणो धर्मः संशयहेतुरिति, किन्त्वस्यान्य एवार्थः। तमेवार्थं दर्शयति – शब्दे विशेषदर्शनादित्यादिना। श्रोत्रग्रहणो [1]योऽर्थः स शब्द इति प्रतिपाद्य। तस्मिन् द्रव्यं गुणः कर्मेति संशयः (वै. सू. २-२-२५) इत्यभिहितं सूत्रकारेण। तस्यायमर्थः – तस्मिन् श्रोत्रग्रहणेऽर्थे संशयः किं द्रव्यं किं वा गुणः किमुत कर्मेति।

[टि०] रूपाद्यविवक्षया विशेषत्वरूपेणैव संशयहेतुः। यत्पुनः इति – असाधारणं श्रावणत्वलक्षणम्। विशेषस्य = पृथिव्यादेरित्यर्थः।

॥ इति हेतुः॥ (॥ इति हेतु–हेत्वाभासनिरूपणम् ॥)

[पं०] किमिति (कं. २४४.१९) किं नामकम्। [2]विरुद्धप्रभेद एवेति (कं. २४४.२१) आगमविरुद्धाख्यः।

तत्समानासमानजातीययोरिति (कं. २४४.२३) सपक्षविपक्षयोः। अभावादिति (कं. २४४.२५) उभयथा-व्युत्पत्तेरभावात्। न त्वसिद्ध एवायमित्याह विशिष्टार्थेत्यादि (कं. २४४.२६)। स्वत इति (कं. २४४.२७) साङ्ख्यमतापेक्षया।

[3]अवरुद्ध इति (कं. २४५.१) संगृहीतः। अवरुद्ध इत्यस्मात्पुरो ननु इति अध्याहार्यम्। आहेति (कं. २४५.१) परीभूय भाष्यकृदाहेत्यर्थः। [4]शास्त्रे इति कणादसूत्रे। अर्थान्तरभूतेभ्य इति (कं. २४५.५) विजातीयेभ्यः। विशेष इति (कं. २४५.७) व्यावृत्तिः। विजातीयेभ्य इति (कं. २४५.७) द्रव्यकर्मभ्यः। विजातीयेभ्य इति (कं. २४५.९) गुणेभ्यः। श्रावणत्वादिति (कं २४५.९) श्रवणग्राह्यत्वात्। आहेति (कं. २४५.१०) भाष्यकृत्। श्रोत्रग्रहण इति (कं. २४५.१२) श्रोत्रेण ग्रहणं यस्यासौ श्रोत्रग्रहणः। श्रोत्रग्रहणो योऽर्थः स शब्द (वै. सू. २-२-२४) इति कणादसूत्रम्। 'तस्मिन् द्रव्यं गुणः कर्मेति संशयः' (कं. २४४.१३) (वै. सू. २-२-२५) एतदपि कणादसूत्रम्। अभिहितमिति (कं. २४४.१३) द्वितीयाध्याये।

[कु०] तारयति अनैकान्तिकेति (कं. २४५)। ननु विशेषो नाम असाधारणो धर्मः, स कथं तुल्यजातीयेष्वर्थान्तरभूतेषु च स्यादित्यत आह तुल्यजातीयेष्विति (कं. २४५)। पञ्चम्यर्थे सप्तमीति छन्दो च सूत्राणि भवन्ति, छन्दसि च व्यत्ययो दर्शित इत्यर्थः।

किं वा विजातीयेभ्य इति (कं. २४५)। यथा गन्धवत्त्वं रूपादिभ्यो विजातीयेभ्य विशेषीत्, एवं श्रावणत्व-मपि स्यात्। ततश्च शब्दो रूपादीनां सजातीयो विजातीयो वेति संशय इत्यर्थः। ततश्च किं फलमित्यत आह – यदीति (कं. २४५) श्रोत्रग्राह्यमेवेति (?) अन्यस्यावचनादस्येव प्रत्यासन्नत्वादिति भावः। परस्य द्रव्यगुणकर्मणां मध्य इति द्रष्टव्यतया वा गुणतया वा कर्मतया वा सन्देहविषयीभवता शब्दस्य श्रावणत्वं विशेषतया सन्देहं न करोतीत्यर्थः।

१ योऽर्थः शब्दः – जे. २। २ विरुद्धभेद – कं. १, कं. २। ३ संगृहीतः – कं. १। ४ प्रतीकमिदं कं. १ पुस्तके नास्ति।

न्यायकन्दली

अत्र परेणोक्तम्—श्रोत्रग्रहणे शब्दे संशयं वदता त्वया श्रोत्रग्राह्यत्वमेव संशयकारणत्वमुक्तम्। श्रोत्रग्राह्यत्वं च विशेषः, तस्य दर्शनात् संशयानुपपत्तिः। विरुद्धोभयस्मृतिपूर्वको हि संशयः, स्मृतिश्च नासाधारणधर्मदर्शनाद्भवति, तस्य केनचिद्विशेषेण सहानुपलम्भा[1]दिति परेणोक्ते सति सूत्रकारेण प्रतिविहितमेतत्, नायं द्रव्यादीनामन्यतमस्य विशेषः श्रावणत्वम्, द्रव्यगुणकर्मणां मध्येऽन्यतमस्य द्रव्यस्य गुणस्य कर्मणो वा श्रावणत्वं विशेषो न भवति, किन्तु तेषां सामान्यमेवेदं सम्पद्यते, कस्मात्? तुल्यजातीयेष्वर्थान्तरभूतेषु च द्रव्यादिभेदानामे[2]कैकशो विशेषस्योभयथा दृष्टत्वादित्युक्तम्। भिद्यन्ते इति भेदाः, द्रव्यादय एव भेदा द्रव्यादिभेदा द्रव्यगुणकर्माणि, तेषां मध्ये एकैकस्य द्रव्यस्य गुणस्य कर्मणो वा तुल्यजातीयेभ्योऽर्थान्तरभूतेभ्यो विशेष 'उभयथा दृष्टः'। पृथिव्याः [3]परजातीयेभ्यो विशेषः पृथिवीत्वं द्रव्यत्वेन सह दृष्टम्? रूपस्य विशेषो रूपत्वं गुणत्वेन सह दृष्टम्, उत्क्षेपणस्य विशेष उत्क्षेपणत्वं कर्मत्वेन सह दृष्टम्। शब्दस्यापि श्रावणत्वं [4]विशेषः गुणत्वेन सह दृष्टं तस्मादेतदपि विशेषत्वेन रूपेण द्रव्यादीनां सामान्यमेव। ततश्चास्य तेन रूपेण संशयहेतुत्वं युक्तम्। यत् पुनरसाधारणं रूपं न तत् संशयकारणम्,

[पं०] यत्परेणोक्तं तद्दर्शयति **श्रोत्रग्रहणे** (कं. २४४.१५) इत्यादि। **त्वयेति** (कं. २४४.१५) हे सूत्रकार। **स्मृतिश्चेति** (कं. २४५.१७) विरुद्धोभयधर्मस्मृतः। **नासाधारणधर्मदर्शनाद्भवतीति** (कं. २४५.१७) साधारणधर्मदर्शनादेव हि स्मृतिः। **तस्येति** (कं. २४५.१७) असाधारणधर्मस्य। **केनचिदिति** (कं. २४५.१७) सजातीयेन विजातीयेन वा। **नायं द्रव्यादीनामन्यतमस्य विशेषः श्रावणत्वमिति** (कं. २४५.१८) [5]कणादसूत्रम्। **किन्तु तेषां सामान्यमेवेदं सम्पद्यते** इति (कं. २४५.२०) तेषामिति द्रव्यगुणकर्मणाम्। सामान्यमेवेति साधारणमेव। इदमिति श्रावणत्वम्। अत्राऽयं तात्पर्यार्थः—श्रावणत्वं श्रावणत्वेन न संशयहेतुः किन्तु विशेषत्वेन रूपेण विशेषत्वं च साधारणमेव।

[कु०] भेदस्य करणसाधनत्वे विशेष्यप्रतिसम्बन्धानुपपत्तेः कर्मसाध[न]तां व्याचष्टे **भिद्यन्त इति** (कं. २४५) **उभयथा दृष्ट इति** (कं. २४५) उपलक्षणमेतत्। अनियमेन द्रष्टव्यत्वादिसहचरितो दृष्ट इत्यर्थः। विशेषत्वेनैकेनोपाधिनाक्रांतो धर्मः समा[ना]दीनां दृष्ट इति भावः।

ननु विशेषः समानधर्मतया संशयकारणमिति सूत्रस्यार्थमुक्त्वा तस्यैव विशेषस्य संशयकरणत्वनिषेधो नोपपद्यत इत्यत आह **अत्युनरिति** (?) सुब्व्यत्यस्य प्रयोजनमाह **तुल्यजातीयेभ्य इति** (कं. २४६) **द्रव्यादिभूतानामिति** (कं. २४६) द्रव्यादिजातीयानामर्थान्तरभूतानां च द्रव्यादिभेदानां विशेषापेक्षयाऽपादानामा[म]पि दर्शनापेक्षया दृष्टशब्देऽपि

---

१ एवं परेणोक्ते—जे. १, जे. २, जे. ३। २ एकशः—जे. १, जे. २। ३ स्वसमान—कं. १; कं. २। ४ विशेषः तस्मादेतदपि—जे. १ जे. २; विशेषः गुणत्वेन तस्मादेतदपि—कं. १; कं. २। ५ नायमित्यादि कणादसूत्रपाठे नोपलभ्यते—सं.।

## न्यायकन्दली

विशेषस्मारकत्वाभावावित्याह—न संशयकारणमिति। तुल्यजातीयेभ्योऽर्थान्तरभूतेभ्यश्चेति वक्तव्ये सूत्रे सप्तम्यभिधानादेषोऽप्यर्थो गम्यते। शब्दे श्रावणत्वविशेषदर्शनाद् द्रव्यं गुणः कर्मेति संशयः। द्रव्यादिभेदानामेकैकशो विशेषस्य तुल्यजातीयेषु सपक्षेष्वर्थान्तरभूतेषु विपक्षेषु दर्शनादिति। किमुक्तं स्यात्? विशेषो द्रव्ये गुणे कर्मणि च दृष्टः। शब्दे च श्रावणत्वं विशेषो दृश्यते, तस्माद्विशेषत्वाद् द्रव्यादिविषयः संशयः। [1]यदि चासाधारणमपि रूपं संशयकारणम्, तदा षट्स्वपि पदार्थेषु [2]संशयप्रसङ्गः? सर्वेषामेव तेषामसाधारण-धर्मयोगित्वात्, ततश्च संशयस्याविरामप्रसङ्ग इत्याह—[3]अन्यथा षट्स्वपि पदार्थेषु संशयप्रसङ्गादिति। उपसंहरति—तस्मादिति। साधारणो धर्मो विरुद्धविशेषाभ्यां सह दृष्टसाहचर्यः, तयोः स्मरणं शक्नोति कारयितुमतस्तद्दर्शनादेव संशयो भवति, नासाधारण-धर्मदर्शनादित्युपसंहारार्थः।

[पं०] अथ परः पृच्छति कस्मादिति (कं. २४५.२१)। अत्रोत्तरं तुल्यजातीयेष्वर्थान्तरभूतेषु च द्रव्यादि[4]भेदानामे[कै]कशो विशेषस्योभयथा दृष्टत्वादि(कं. २४५.२१)त्यन्तम् कणादसूत्रम् (वै. सू. २-२-१६) उक्तम् (कं. २४५.२२) इति सूत्रे। अर्थान्तरभूतेभ्य (कं. २४५.२४) इत्यत्र चकारं विनापि समुच्चयो गम्यः। [5]स्वपरजातीयेभ्य (कं. २४५.२४) इति स्वजातीया अबादयः, परजातीया गुणादयः। द्रव्यत्वेनेति (कं. २४५.२५) द्रव्यत्वं साधारणम्। सामान्यमेवेति (कं. २४६.१) साधारणमेव। तेन रूपेणेति (कं. २४६.२) विशेषत्वेन। दर्शनादिति (कं. २४६.६) पृथिव्याः स्वपरजातीयेभ्यो विशेषः पृथिवीत्वमित्युक्तरीत्या। साधारणो धर्म इति (कं. २४६.११) विशेषत्वाख्यः। तयोरिति (कं. २४६.१२) विरुद्धविशेषयोः।

[कु०] श्रावणत्वं विशेषो दृश्यते सः। किं पृथिव्यादयस्तुल्यजातीयाः, किं वा रूपादयः किं वोत्क्षेपणादयः इति संशय इत्यर्थः। यद्यसाधारणमपीति (कं. २४६) समानधर्मतयाऽननुसंधीयमानध(ध)र्मतयाऽपीति शेषः। अविरामप्रसंग इति (कं. २४६) असाधारणधर्मस्याविरामादित्यर्थः।

ननु समानधर्मतयाऽनुसंधीयमानोऽपि विशेषो न विरमत्येव तत्कथं भवता एवमपि संशयविराम इत्यत आह साधारणधर्म इति (कं. २४६) यावद्गुणत्वसाधकविशेषं न पश्यति तावदेव हि श्रावणत्वं समानधर्मतयानुसंधीयमानं विरुद्धविशेषं स्मारयितुमिष्ट[मि]ति भावः। सामान्यप्रत्ययाविति च भाष्यं (कं. २३५) विशेषस्यापि सामान्यतया प्रत्यक्षीकरणादेव संशय इति व्याख्यायेम्।

---

१ यद्य – जे. १, जे. २, जे. ३। २ संशयः स्यात् – जे. १, जे. २, जे. ३। ३ अन्यथेति – कं १, कं. २। ४ 'एकैकशः' इति पदं सूत्रपाठे नास्ति। ५ स्वसमान – कं. १।

### प्रशस्तपादभाष्यम्

[209] द्विविधं निदर्शनं साधर्म्येण वैधर्म्येण च । तत्रानुमेयसामान्येन लिङ्गसामान्यस्यानुविधानदर्शनं साधर्म्यनिदर्शनम् । [1]तद्यथा यत् क्रियावत् तद् द्रव्यं दृष्टं यथा शर इति । अनुमेयविपर्यये च लिङ्गस्याभावदर्शनं [2]वैधर्म्यनिदर्शनम्, तद्यथा [3]यदद्रव्यं तत् क्रियावन्न भवति यथा सत्तेति ।

### न्यायकन्दली

[209] निदर्शनस्वरूपनिरूपणार्थमाह – द्विविधं निदर्शनं साधर्म्येण वैधर्म्येण चेति । साध्यसाधनयोरनुगमो निदर्श्यते येन वचनेन तद्वचनं साधर्म्यनिदर्शनम्, साध्यव्यावृत्त्या साधनव्यावृत्तिर्येन वचनेन निदर्श्यते तद्वैधर्म्यनिदर्शनमिति भेदः । तत्र तयोर्मध्ये [4]साधर्म्यनिदर्शनं कथयति – तत्रानुमेयेत्यादिना । तद्व्यक्तमेव । वैधर्म्यनिदर्शनं कथयति – अनुमेयविपर्यय इत्यादिना । तदपि व्यक्तमेव ।

[**टि०**] [209-210] [5]**व्यभिचारिण्यपि** इति – [6]विषमव्याप्तिके धूमादा(वह्न्यादा)वित्यर्थः । तद्रूपस्य व्यापकरूपस्येत्यर्थः । **व्यापकगृहीतस्त** इति :– यद्यपि वस्तुतः परमार्थतः कृतकत्वानित्यत्वादौ व्याप्यो हेतुर्व्यापकत्वेन [7]साध्यत्वेन गृहीतो यदनित्यं तत्कृतकमपीति समव्याप्तिकत्वात् परमाधिक्येऽपि यत्र धूमस्तत्र वह्निरिति धूमव्यापकवह्निरूपव्याप्या[8]भावेऽप्यविरुद्धो धूममन्तरेणापि वह्नेः सद्भावात् । ततो [9]धूमलक्षणं व्याप्यं न प्रतिपादयेत् ।

[**पं०**] [209-210] [10]**अप्रतिपन्नस्येति** (कं. २४८.१) पुंसः । **अननुगत** इति (कं. २४८.२) अनन्वयः । **तदेकनियता व्याप्तिरिति** (कं. २४८.४) व्यापकं **तदतन्निष्ठं व्याप्तं तन्निष्ठमेव चेति** वचनात् । **व्यापकस्येति** (कं. २४८.५) अग्नेः । **व्याप्यव्यभिचारादिति** (कं. २४८.५) व्याप्यो धूमः । **व्यभिचारिण्यपीति** (कं. २४८.७) विषमव्याप्तिके हेतौ धूमानुमाने इति यावत् । **तद्रूपस्येति** (कं. २४८.८) व्यापकरूपस्य व्याप्यरहितस्य ।

[**कु०**] [209] [11]**निदर्शनस्येति** (कं. २४६) दृश्यते साध्यसाधनयोर्व्याप्तिरनेन वचनेनेत्यवयवार्थानुसारेण प्रसिद्धसामान्यलक्षणस्येति शेषः । व्याख्यालाघवाय लक्षणभाष्यार्थमाकृष्य विभागोद्देशस्यावयवार्थं दर्शयति **साध्यसाधनयोरिति** (कं. २४६)–**अर्थादिति**(!) विशेषणानां व्यावृत्त्यर्थत्वादित्यर्थः ।

---

१ 'तद्यथा' इति व्यो. प्रतीके नास्ति 'दे' इत्यत्रापि नास्ति–(व्यो. ६१३)। २ वैधर्म्यस्य – दे । ३ यदनन्यं – दे । ४ साधर्म्यनिदर्शनमाह – तत्रानुमेय इत्यादिना – जे. १, जे. २ । ५ व्यभिचारिणापि–अ, ब । ६ विषमव्याप्तधूमाया – अ, ब । ७ व्यापकत्वेन गृहीतो – अ, ब, क । ८ भाऽपि वेविरुद्धो – अ, ब, क । ९ व्याप्यं धूमलक्षणं व्याप्यत्वं – ड । १० अप्रतिपन्नसाध्यसाधनयोः – कं. १ । ११ निदर्शनस्वरूपम – कं ।

### प्रशस्तपादभाष्यम्

[210] अनेन निदर्शनाभासा निरस्ता भवन्ति । तद्यथा–नित्यः शब्दोऽमूर्त्तत्वात्, यदमूर्त्तं दृष्टं तन्नित्यम्, यथा परमाणुर्यथा कर्म यथा स्थाली यथा तमः अम्बरवदिति, यद् द्रव्यं तत् क्रियावद् दृष्टमिति च लिङ्गानुमेयोभयाश्रयासिद्धाननुगतविपरीतानुगताः साधर्म्यनिदर्शनाभासाः ।

### न्यायकन्दली

[210] अनेन निदर्शनाभासा निरस्ता भवन्ति । अनिदर्शनान्यपि केनचित् साधर्म्येण निदर्शनवदाभासन्त [1]इति निदर्शनाभासाः निदर्शनसदृशाः, अनेन निदर्शन[2]लक्षणकथनेनार्थान्निरस्ता भवन्ति, तल्लक्षणरहितत्वात् । यावन्निदर्शनाभासानां स्वरूपं न ज्ञायते, तावत् तेषां स्ववाक्ये वर्जनं परवाक्ये चोपालम्भो न शक्यते कर्तुम्, अतस्तेषां स्वरूपं [3]कथयति – यथा नित्यः शब्दोऽमूर्तत्वात्, यदमूर्तं तन्नित्यं दृष्टम्, यथा परमाणुः, यथा कर्म, यथा स्थाली, यथा तमोऽम्बरवत् यद्द्रव्यं तत् क्रियावद्दृष्टमिति च लिङ्गानुमेयोभयाश्रयासिद्धाननुगतविपरीतानुगताः साधर्म्यनिदर्शनाभासाः । नित्यः शब्दोऽमूर्तत्वात्, यथा परमाणुरिति लिङ्गासिद्धो निदर्शनाभासः परमाणोरमूर्तत्वाभावात् यथा कर्मेत्यनुमेयासिद्धः, कर्मणो नित्यत्वाभावात् । यथा स्थालीत्युभयासिद्धः, न स्थाल्यां साध्यं

[पं०] गुरव इति (कं. २४८.८) भट्टाः । व्यापकत्वेत्यादि (कं. २४८.९) । इहानुमानं द्विधा, समव्याप्तिकं विषमव्याप्तिकं च । तत्र समव्याप्तिकं यथा 'अनित्यः शब्दः कृतकत्वात् घटवत् अत्र यथा अनित्यत्वेन कृतकत्वं व्याप्तं तथा कृतकत्वेनानित्यत्वमपि व्याप्तमिति पक्षहेतोः समव्याप्तिकत्वम् । विषमव्याप्तिकं यथा 'अग्निमानयं पर्वतो धूमवत्त्वात् महानसवत्' अत्र पक्षहेत्वोः परस्परं समव्याप्तिर्नास्ति व्यभिचारात् । धूमं विनापि क्वचिदग्निर्दृष्टो धूमस्त्वग्निं विना क्वचिन्न भवत्येवेति विषमव्याप्तिकत्वम् । एवमुभयथाऽनुमाने दृश्यमाने व्याप्तिर्व्याप्यमुखेन कर्तव्या व्यापकमुखेन [4]वा ? इति शिष्यप्रश्ने सति व्याप्यमुखेनैव व्याप्तिः कर्तव्या न तु व्यापकमुखेनेत्येतत्प्रतिपादयति । यथा – यद्यपि समव्याप्तिके

[कु०] [210] स्वरूपमिति (कं. २४७) अवान्तरभेदमुदाहरणं चेत्यर्थः । लिङ्गासिद्ध इति (कं. २४७) असिद्धलिङ्गसाधनविकल इत्यर्थः । एवमनुमेयासिद्ध इत्यादावपि । परमार्थ[त] इति (कं. २४७) आरोपितनीलरूपस्य तमस्त्वेन प्रतिपादितत्वादित्यर्थः ।

नन्वेवं नित्यत्वामूर्तत्वयोरनुगतिरस्त्येव तत्कथम(मि)यमननुगत इत्यत आह यद्यपीति (कं. २४७) अनुगतिरनुगतं न विद्यते । अनुगतमभिधेयतया तस्मिन्वचनविशेषे सोऽननुगत उदाहरणाभास इत्यर्थः । विपरीतानुगत इति (कं. २४८) अभिधानगतं विपरीतत्वमनुगत उपचर्यते । ननु व्याप्यस्यैव प्रथममभिधानं कर्तव्यमित्येतदुक्त इत्यत आह

---

१ इति निदर्शनसदृशाः – कं. १, कं. २ ।   २ लक्षणेनार्था – कं. १, कं. २ ।   ३ दर्शयति – जे. १, जे. २ ।
४ ब पुस्तके अतः पराणि पत्राणि न सन्ति । अत्रपर्यन्तमेव तत्पुस्तकम् ।

न्यायकन्दली

नित्यत्वमस्ति, नापि साधनममूर्तत्वम् । यथा तम इत्याश्रयासिद्धः । परमार्थतस्तमो नाम न किञ्चिदस्ति, क्व साध्यसाधनयोर्व्याप्तिः कथ्यते ? अम्बरवदित्य[1]ननुगतोऽयं निदर्शनाभासः । यद्यप्यम्बरे नित्यत्वममूर्त्तत्वमुभयमप्यस्ति, तथापि यदमूर्तं तन्नित्यमेवं न ब्रूते, किन्त्वम्बरवदित्येतावन्मात्रमाह । न चैतस्माद्वचनाद[2]प्रपन्नस्य साध्यसाधनयोरम्बरे सद्भावप्रतीतिरस्ति, तस्मादननुगतोऽयं निदर्शनाभासः । यद्द्रव्यं तत् क्रियावद्दृष्टमिति विपरीतानुगतः, द्रव्यं वायुः क्रियावत्त्वादित्यत्रापि व्याप्यं क्रियावत्त्वं व्यापकं च द्रव्यत्वम् । [3]यच्च व्याप्यं तदेकनियता व्याप्तिर्न संयोगवदुभयत्र व्यासज्यते, व्यापकस्य व्याप्यव्यभिचारात् । यत्रापि समव्याप्तिके कृतकत्वानित्यत्वादौ व्याप्यस्यापि व्यापकत्वमस्ति, तत्रापि व्याप्यत्वरूपं [4]समाश्रितैव व्याप्तिर्न व्यापकत्व[5]रूपाश्रया, व्यभिचारिण्यपि [6]तद्रूपस्य सम्भवात् ।

यथोपदिशन्ति गुरवः—

व्यापकत्वगृहीतस्तु व्याप्यो यद्यपि वस्तुतः ।
आधिक्येऽप्यविरुद्धत्वाद्व्याप्यं न प्रतिपादयेत् ।। इति ।

[पं०] कृतकत्वानित्यत्वादौ अनुमाने वस्तुतः परमार्थतो यो हेतुर्व्यापकत्वेन पक्षत्वेन गृहीतो निश्चितः, 'तु' शब्दः भिन्नक्रमत्वात् स तु व्यापको व्याप्यं न प्रतिपादयेत् व्याप्यस्तु व्यापकं प्रतिपादयत्येव । ननु, व्यापको व्याप्यं न प्रतिपादयेत् व्याप्यस्तु व्याप्यं प्रतिपादयत्येवेति कथमुच्यते ! यावता व्यापकोऽपि व्याप्यं प्रतिपादयन् दृश्यते कृतकत्वानित्यत्वादौ अनुमाने इति परवचनमुद्दिश्याह आधिक्येऽप्यविरुद्धत्वादिति (कं. २४८.१०) आधि[क्य]शब्देन विषमव्याप्तिकं वह्न्याद्यनुमानम् उच्यते ततश्चायमर्थः—विषयव्याप्तिकेऽपि वह्न्यनुमाने यथा विरोधो न भवति तथा वक्तव्यम् । एवमुक्तं भवति समव्याप्तिकानुमानेषु व्यापकमुखेन व्याप्यमुखेन वा व्याप्ति दर्शयतां नास्ति विरोधः, विषमव्याप्तिकानुमाने तु व्याप्यमुखेनैव व्याप्ति दर्शयतां नास्ति विरोधः, व्यापकमुखेन तु व्याप्ति दर्शयतां विरोधः अग्नेर्धूमं विनाऽपि दर्शनात् । तस्मात्समव्याप्तिकेषु विषमव्याप्तिकेषु वा अनुमानेषु व्या[प्य]मुखाद् व्याप्तिर्दर्शनीया न तु व्यापकमुखेनेति । यथा(यं) यत्र धूमस्तत्राग्निः, यत्कृतकं तदनित्यमिति ।

[कु०] द्रव्यं वायुरिति (कं. २४८) तदेकनियतेति (कं. २४८) एकधाऽनुवाच्यत्वेऽपि कर्तृकर्मव्यापारौ परस्परं भिद्यते । तत्र च कर्मव्यापार एव गमकत्वे प्रयोजकः । ततश्चानुमानोपयोगिनी व्याप्तिः कर्मण एवेति भावः । व्याप्यत्वनिरूप[ण] समाश्रितैवेति व्याप्यत्वरूपेण समाश्रितानुमातृभिरपेक्षितेति भावः । व्याप्यं न प्रतिपादयेदिति (कं. २४८) व्यापकत्व-

१ ननुगतो – जे. १, जे. २, जे. ३ । २ दप्रतिपन्नसाध्य – कं. १, कं. २ । ३ यत्तु – जे. १ । ४ समाश्रित्यैव – कं. १; कं. २ । ५ रूपाश्रयत्वात् – कं. १, कं. २ । ६ तद्रूपस्यापि सम्भवात् – कं. १, कं. २; तद्रूपस्य भावात् – जे. १, जे. २ ।

### प्रशस्तपादभाष्यम्

[211] यदनित्यं तन्मूर्तं दृष्टम्, यथा कर्म यथा परमाणुर्यथाकाशं यथा [1]तमः, घटवत्, यन्निष्क्रियं तदद्रव्यञ्चेति लिङ्गानुमेयोभयाव्यावृत्ताश्रयासिद्धाव्यावृत्तविपरीतव्यावृत्ता वैधर्म्यनिदर्शनाभासा इति ॥

### न्यायकन्दली

अतो व्याप्तिर्व्याप्यगतत्वेन दर्शनीया यत् क्रियावत् तद्द्रव्यमिति । न व्यापकगतत्वेन तत्र तस्या अभावात्, अतो विपरीतानुगतोऽयम् । लिङ्गं चानुमेयं चोभयं चाश्रयश्च लिङ्गानुमेयोभयाश्रयाः, तेऽसिद्धा येषां ते लिङ्गानुमेयोभयाश्रयासिद्धाः, लिङ्गानुमेयोभयाश्रयासिद्धाश्चाननु[2]गताश्च विपरीतानुगताश्चेति योजना ।

[211] वैधर्म्यनिदर्शनाभासान् कथयति—यदनित्यमित्यादिना । नित्यः शब्दोऽमूर्त्तत्वाद् यदनित्यं तन्मूर्त्तं यथा कर्मेति लिङ्गाव्यावृत्तो वैधर्म्यनिदर्शनाभासः, कर्मणो [3]मूर्तत्वाभावात् । यथा परमाणुरित्यनुमेयाव्यावृत्तः, अनुमेयं नित्यत्वं परमाणो[4]र्न व्यावृत्तम् । यथाकाशमित्युभयव्यावृत्तः, नाकाशादमूर्तत्वं नापि नित्यत्वं व्यावृत्तम् । यथा तम

[टि०] [211] [5]नियमस्त्वनियन्तृत्वे इति :—व्याप्यव्यापकत्वे [6]साध्यसाधकत्वे चेत्यर्थः ॥

( ॥ इति निदर्शन-निदर्शनाभासनिरूपणम् ॥ )

[पं०] व्याप्य[7]गतेनेति (कं. २४८.११) यत्र धूमस्तत्र तत्र वह्निरित्येव । न तु व्यापक[8]गतेनेति (कं. २४८.११) यत्र यत्राग्निस्तत्र धूम इति व्याप्तिर्न दर्शनीयेत्यर्थः । तत्रेति (कं. २४८.१२) व्यापके । विपरीतानुगत इति (कं. २४८.१२) विपरीतान्वयाख्यः ।

[211] अव्यावृत्त इति (कं. २४८.२०) अप्रदर्शितव्यावृत्तिः । [9]अप्रतिपन्नस्येति (कं. २४८.२२) पुंसः । यथा साध्यं व्यापकं साधनं व्याप्यमिति (कं. २४८.२३) अन्वयज्ञेयम् । तथा साध्याभावो व्याप्यः साधनाभावश्च व्यापक इति (कं. २४८.२४) व्यतिरेकज्ञेयम् । यदाहुः,

[कु०] रूपेणेति शेषः । व्याप्यगतत्वेन दर्शनीयेति (कं. २४८) प्रथममिति शेषः । साध्यार्थिना साधनस्यैव प्रथममाकांक्षितत्वात्किमाश्रितत्वात्किं आश्रये [इ]ति निषेधस्यापि पारमार्थिकेनैवाधिकरणेन निरूपणीयत्वे प्रसाधितमिति भावः ।

---

१ तमः तथा घटवत्, यन्निष्क्रियं तदद्रव्यं दृष्टमिति—दे । २ ननुगतश्च विपरीतानुगतश्चेति—जे. १, जे. २, जे. ३ । ३ मूर्त्यं—कं. १, कं. २; जे. २, जे. ३ । ४ रव्यावृत्तम्—कं. १; कं. २ । ५ नियमत्र—अ, ब । ६ साध्यसाधकत्वे इति अबपुस्तकयोर्नास्ति । ७, ८ गतत्वेन—कं. १ । ९ विप्रतिपन्नस्य—कं. १ ।

न्यायकन्दली

इत्याश्रयासिद्धः। परमार्थतस्तु तम एव नास्ति, किमाश्रया साध्यसाधनयोर्व्यावृत्तिः स्यात्। घटवदित्यव्यावृत्तः। यद्यपि घटे साध्यसाधनयोरस्ति व्यावृत्तिः, तथापि यदनित्यं तन्मूर्तमित्येवं न वदति, न च तथानभिधाने साध्यसाधनयोर्व्यावृत्तिप्रतिपत्तिर्वि[1]प्रतिपन्नस्य भवति, अतोऽयमव्यावृत्तः। यन्निष्क्रियं तदद्रव्यमिति विपरीतव्यावृत्तः। यथा साध्यं व्यापकं साधनं व्याप्यम्, तथा साध्याभावो व्याप्यः साधनाभावश्च व्यापकः।

यथोक्तम् —

नियम्यत्वनियन्तृत्वे भावयोर्यादृशे मते।
विपरीते प्रतीयेते ते एव तदभावयोः॥ इति।

तत्र द्रव्यं वायुः क्रियावत्त्वादित्यत्र विपर्ययव्याप्तिप्रदर्शनार्थं यदद्रव्यं तदक्रियमिति वाच्यम्, [2]अयं तु न तथा ब्रूते, किन्त्वेवमाह—यन्निष्क्रियं तदद्रव्यमिति। एवं च न व्याप्तिरस्ति, आकाशस्य क्रियारहितत्वेऽपि द्रव्यत्वात्, तस्माद् द्विपरीतव्यावृत्तोऽयं वैधर्म्यनिदर्शनाभासः। लिङ्गं चानुमेयं चोभयं च लिङ्गानुमेयोभयानि तान्यव्यावृत्तानि येषां ते तथोक्ताः। आश्रयोऽसिद्धो यस्य स आश्रयासिद्धः, लिङ्गानुमेयोभयाव्यावृत्तश्चाश्रयासिद्धश्च अव्यावृत्तश्च विपरीतव्यावृत्तश्चेति व्याख्या।

[पं०] साध्यं व्यापकमित्याहुः, साधनं व्याप्यमुच्यते।

प्रयोगेऽन्वयवत्येवं व्यतिरेके विपर्ययः॥ इति॥ व्याप्यव्यापकत्वे। [तद]भावयोरिति (कं. २४८.२६) साध्या[भाव]साधनाभावयोः।

विपर्ययव्याप्तिप्रदर्शनार्थमिति (कं. २४८.२७) व्यतिरेकव्याप्तिप्रदर्शनार्थम्। विपरीतव्यावृत्त इति (कं. २४९.३) विपरीतव्यतिरेकी।

[कु०] [211] ननु प्रकरणव्युत्पन्नस्य निदर्शनस्य वाक्यात्मकस्य साध्यसाधनाद्यकरणत्वं नोपपद्यते निदर्शन इति (कं. २४९)। अनुसंधानशब्दस्यार्थं व्याचष्टे दृष्टस्य इति (कं. २४९) – उदाहरणे साध्ये न संघटितसाधनस्य पश्चात्पक्षे संघटनमनुसंधानमित्यर्थः।

१ अप्रतिपन्नस्य-जे. १, जे. २। २ अयं न तथा-जे. १, जे. २; अयं च न तथा – जे. ३।

## प्रशस्तपादभाष्यम्

**[212] निदर्शनेऽनुमेयसामान्येन सह दृष्टस्य लिङ्गसामान्यमनुमेयेऽन्वानयनमनुसन्धानम्। [1]अनुमेयधर्ममात्रत्वेनाभिहितं लिङ्गसामान्यमनुपलब्धशक्तिकं निदर्शने साध्यधर्मसामान्येन सह दृष्टम[2]नुमेये येन वचनेनानुसन्धीयते तदनुसन्धानम्। तथा च वायुः क्रियावानिति। अनुमेयाभावे च तस्यासत्त्वमुपलभ्य न च तथा वायुर्निष्क्रिय इति।**

## न्यायकन्दली

**[212] निदर्शनेऽनुमेयसामान्येन सह दृष्टस्य लिङ्गसामान्यस्यानुमेयेऽन्वानयनमनुसन्धानम्। निदर्श्यते निश्चिता साध्यसाधनयोर्व्याप्तिरस्मिन्निति निदर्शनं दृष्टान्तः, तस्मिन्ननुमेय[3]सामान्येन साध्यसामान्येन सह दृष्टस्य प्रतीतस्य लिङ्गसामान्यस्यानुमेये साध्यधर्मिण्यन्वानयनं सद्भावोपदर्शनं येन वचनेन क्रियते तदनुसन्धानम्। दृष्टान्ते साध्याविनाभूतत्वेन दर्शितं लिङ्गं पक्षेऽनुसन्धीयते प्रतिपाद्यते, अनेनेति व्युत्पत्त्या। एतदेव स्वोक्तं विवृणोति—अनुमेयधर्ममात्रत्वेनाभिहितं लिङ्गसामान्यमिति। प्रतिज्ञानन्तरं हेतुवचनेन लिङ्गं वस्तुव्यावृत्त्यानुमेयेऽस्तीत्येतावन्मात्रतया हेतुत्वेनाभिहितः, न तु धर्मिणि तस्य सद्भावः कथित इत्यभिप्रायः। लिङ्गस्य साध्यप्रतिपादने शक्तिरन्वयव्यतिरेकौ पक्षधर्मता च, सा पूर्वं प्रतिज्ञाहेतुवचनाभ्यां तस्य नावगतेत्यनुपलब्धशक्तिकं निदर्शने साध्यधर्मसामान्येन सह दृष्टमनुमेये येन वचनेनानुसन्धीयते तदनुसन्धानमिति।**

[टि०] ( ॥ अथ अनुसन्धाननिरूपणम् ॥ )

[212] [4]**एक[स्य] शब्दस्य** इति :—एकस्य हेतुस्वरूप[5]प्रतिपादकस्य शब्दस्य उभयार्थवाचकत्वस्य[6]हेतुस्वरूपपक्षधर्मतालक्षणार्थद्वयवाचकत्वस्याभावात् ॥ ( ॥ इत्यनुसन्धाननिरूपणम् ॥ )

[पं०] [212] [7]**पक्षधर्मता चेति** (कं. २४९.२२) इति शक्तिः। **सह दृष्टमिति** (कं. २४९.२४) साधनम्। **इदमिति** (कं. २४९.२६) वह्निमत्त्वादिः।

[कु०] [212] **विवृणोतीति** (कं. २४९) हेतुत्ववचनेन पौनरुक्त्यपरिहारायेति शेषः। **वस्तुव्यावृत्त्याऽनुमेयेऽस्तीति** (कं. २४९) अनुपाख्ये व्यावृत्त्या साध्ये सति अनुमातव्ये सति साधनमस्तीति एतावन्मात्रं प्रतिपादितं न तु पक्षधर्मत्वेनेत्यर्थः।

---

१ अनुमेये—दे। २ अनुमेयेन येन वचनेनानुसन्धानं—दे। ३ मेयसामान्येन सह—कं. १; कं. २। ४ एकस्य—मु. जे. १, २, ३। ५ प्रत्यतिपादकस्य—अ। ६ हेतुहेतुस्वरूप—क। ७ अत्र "पक्षधर्मता च सेति सेति शक्तिः" इति पाठेन भाव्यमिति भाति—सं।

न्यायकन्दली

अयमत्राभिसन्धिः – परार्थः शब्दो यथा यथा परस्य [1]जिज्ञासोदयते तथा तथा प्रयुज्यते, प्रत्येतुश्च साध्येऽभिहिते साधने भवत्याकाङ्क्षा – कुत इदं [2]सिद्धयति इति। न तु साधनस्य [3]सामर्थ्ये, स्वरूपावगतिपूर्वकत्वात् सामर्थ्यजिज्ञासायाः। साधने चाकाङ्क्षिते प्रयुज्यमानं हेतुवचनं हेतुस्वरूपमात्रं कथयति, न तस्य पक्षधर्मताम्, एकस्य शब्दस्यो[4]भयार्थवाचकत्वाभावात्। विज्ञाते हेतौ कथमस्य हेतुत्वमिति सामर्थ्यजिज्ञासायां साध्यप्रतीतेरविनाभावप्रतीतिनान्तरीयकत्वाद्व्याप्तिवचनेनाविनाभावे कथिते सत्यवधारितसामर्थ्यस्य हेतोः पक्षे पश्चात् सम्भवो जिज्ञास्यत इत्युदाहरणानन्तरं पक्षधर्मतावगमार्थमुपगन्तव्य उपनयः, हेतुत्वाभिधानसामर्थ्यादेव पक्षधर्मत्वं प्रतीयते, व्यधिकरणस्यासाधकत्वादिति चेत्? तदभिधानसामर्थ्याद्व्याप्तिरपि लप्स्यते, अनन्वितस्य हेतुत्वाभावादित्युदाहरणमपि न वाच्यम्। असाधारणस्यापि भ्रान्त्या हेतुत्वाभिधानोपपत्तेर्न तस्मादेकान्तेनान्वयप्रतीतिरस्तीत्युदाहरणेन व्याप्तिरुपदर्श्यत इति चेद्? धर्मिण्यविद्यमानस्यापि भ्रमेण हेतुत्वाभिधानोपलम्भान्न ततः पक्षधर्मतासिद्धिरस्तीत्युदाहरणस्थस्य लिङ्गस्य पक्षेऽस्तित्व-

[पं०] **न तु साधनस्य सामर्थ्ये** (कं. २४९.२६) इत्यत्र **भवत्याकाङ्क्षेति** (कं. २४९.२६) सम्बन्धनीयम्। **एकस्येति** (कं. २५०.२) हेतोः। **उभयार्थवाचकत्वाभावादिति** (कं. २५०.३) स्वरूपमात्रं पक्षधर्मता चेत्युभयम्। **उपगन्तव्य** इति (कं. २५०.६) पक्षः कार्यः। बौद्धः प्राह **हेतुत्वेत्यादि** (कं. २५०.६)। **व्यधिकरणस्यासाधकत्वादिति** (कं. २५०.७) अपक्षधर्मत्वे वैयधिकरण्यं, काकस्य कार्ण्यं, धवलः प्रासाद इतिवत्। **तदभिधानसामर्थ्यादिति** (कं. २५०.७) हेतुत्वाभिधानसामर्थ्यात्। **अनन्वितस्येति** (कं. २५०.८) अकृतव्याप्तिकस्य। परः प्राह **असाधारणस्यापी** (कं. २५०.९)-त्यादि। **तस्मादिति** (कं. २५०.९) हेतोः। **धर्मिण्यविद्यमानस्यापीति** (कं. २५०.१०) शब्दे चाक्षुषवत्। परः

[कु०] ननु यदि साधनमभिहितम्, किमतः परमन्वेषणीयमित्याशंक्य भाष्यशेषमवतारयति **लिंगस्येति** (कं. २४९) **सेति** (कं. २४९) शक्तिः परामृश्यते। ननु लिंगलक्षणपर्यालोचनयाऽपदेशेनैवान्वयव्यतिरेकपदाधर्मतया लक्ष्यंत इत्यत आह **अयमत्रेति** (कं. २४९) लक्षणजिज्ञासाऽपि लक्ष्यावगमाव्याप्याश्रया नोत्पद्यत इति भावः। ननु तेनैवापदेशेन जिज्ञासामनुसृत्य व्यापारान्तरेण सामर्थ्यप्रतिपादनैको विरोध इत्याह **एकस्येति** (कं. २५०) अन्याय्यश्चानेकार्थ इति न्यायादिति भावः। नन्वेवं सति शक्तिप्रतिपादिकत्वसाम्या उदाहरणोपनययोः क्रमनियमः किंकृत इत्यत आह **विज्ञात इति** (कं २५०) साधनस्य साध्यप्रयोजकत्वे निश्चिते पश्चाद्धर्मविशेषसम्बन्धजिज्ञासा भवतीति भावः। हेतुत्वेऽभिधाना वेति इतरथा पञ्चमी न स्यादिति भावः। सामान्येन परिहर्तुं प्रतिबंधीमाह **तदभिधानेति** (कं २५०)। प्रतिबन्धीमोचनमाशंकते **असाधारणस्येति** (कं. २५०) समः समाधीरित्याह **न धर्मी अस्तीति** (?)।

---

१ जिज्ञासोपजायते – जे. ३। २ सिद्धयति – कं. १; कं. २। ३ सामर्थ्यम् – कं. १; कं. २। ४ भयथा – जे. २।

## न्यायकन्दली

निश्चयार्थमुपनयो वाच्यः। असिद्धस्य भ्रमादुपनयोऽपि दृश्यते कथं तस्मादपि पक्षधर्मतासिद्धिरिति चेत्? असिद्धाविनाभावस्यापि भ्रान्त्या व्याप्तिवचनं दृश्यते कथं तस्मादन्वयसिद्धिः? उदाहरणे व्याप्तिग्राहकप्रमाणानुसारेणान्वयनिश्चयो न [1]वाङ्मात्रेण, तस्य सर्वत्राविशेषादिति चेत्? उपनयेऽपि पक्षधर्मता[2]ग्राहिप्रमाणानुसारादेव तद्धर्मतानिश्चयो न वचन[3]मात्रात्। हेत्वभिधानान्यथानुपपत्त्यैव पक्षधर्मताग्राहिप्रमाणानुसारो भवतीति चेत्? तदन्यथानुपपत्त्यैव व्याप्तिग्राहकप्रमाणानुसारो भविष्यति। हेतुवचनस्यान्यार्थत्वान्न तदुपनयनसामर्थ्यमस्तीति तदुपस्थापनमुदाहरणेन क्रियत इति चेत्? इहापि सैव [4]रीतिरनुगम्यताम्, अलमन्यथा सम्भावितेन।

अस्तु तर्ह्युपनयः, व्यर्थं हेतुवचनम्? न, असति हेतुवचने साधनस्वरूपानवबोधात्, तत्सामर्थ्यजिज्ञासाया अनुपपत्तौ उदाहरणादिवचनानां प्रवृत्त्यभावात्। तथा च न्यायभाष्यम्—'असति हेतौ कस्य साधनभावः प्रदर्श्यते' इति।

[पं०] **असिद्धस्ये**(कं. २५०.१२)त्यादि। **तस्मादिति** (कं. २५०.१३) दृष्टान्तात्। परः **उदाहरणे** (कं. २५०.१४) इत्यादि। न [5]**वाङ्मात्रेणेति** (कं. २५०.१५) कोऽर्थः, तस्माद् व्याप्तिर्दर्शनीयेत्यर्थः। परः **हेत्वि**त्यादि (कं. २५०.१६)। अत्र किमुपनयेनेति पराशयः। सूरिवाक्यं **तदन्यथेत्यादि** (कं. २५०.१७)। अत्र किं व्याप्तोऽस्तीति सूरेराशयः। परः **हेत्वि**(कं. २५०.१८)त्यादि। **अन्यार्थत्वादिति** (कं. २५०.१८) साध्यसाधनार्थत्वात्। **तदुपनयनसामर्थ्यमिति** (कं. २५०.१८) प्रमाणोपनयनसामर्थ्यम्।

परः **अस्तु** (कं. २५०.२०) इत्यादि। सूरि**र्न**(कं. २५०.२१)त्यादि। **तत्सामर्थ्यजिज्ञासाया** इति (कं. २५०.२१) साधनसामर्थ्यजिज्ञासायाः।

[कु०] ननु भ्रान्त्यापि वचनसंभवे उपनयाङ्गीकारेऽपि विनाभिमतसिद्धिरिति शंकते **असिद्धस्येति** (कं. २५०) प्रतिबंध्या मोचनशंकान्यायसामा[न्या]त्प्रतिपादनं च सुगमम्। शंकते **हेत्वभिधानेति** (कं. २५०) प्रतिबन्धीमाह **तदन्यथेति** (कं. २५०) तन्मोचनमाशंकते **हेतुवचनस्येति** (कं. २५०)। अत्र प्रमाणद्वयविरोधाभावादर्थापत्तिर्नावतरतीति भावः। समः समाधिरित्याह **इहापीति** (कं. २५०)। शंकते **अस्तु तर्हीति** (कं. २५०) लिंगस्य पक्षधर्मतां प्रतिपादयनुपनयो नांतरायकतया तत्स्वरूप[म]पि प्रतिपादयत्येवेति भावः। परिहरति **नेति** (कं. २५०) स्वरूपं ज्ञात्वैव कथमस्य सामर्थ्यमिति जिज्ञासत इति भावः। निश्चयो न भूतः वादिनः आप्तत्वसंदेहादिति भावः।

---

१ वचनमात्रेण—कं. १; कं. २। २ ग्राहक—कं. १; कं. २। ३ मात्रत्वात्—कं. १; कं. २। ४ नीति—जे. ३। ५ वचनमात्रेण—कं. १।

प्रशस्तपादभाष्यम्

[213-214] अनुमेयत्वेनोद्दिष्टे चानिश्चिते च [1]परेषां निश्चयापादनार्थं प्रतिज्ञायाः [2]पुनर्वचनं प्रत्याम्नायः। [3]प्रतिपाद्यत्वेनोद्दिष्टे चानिश्चिते च परेषां [4]हेत्वादिभिरवयवैराहितशक्तीनां परिसमाप्तेन वाक्येन निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः, तस्माद् द्रव्यमेवेति ।

न्यायकन्दली

[213] [5]अनुसन्धानस्याकारं दर्शयति तथा च वायुः क्रियावानिति। वैधर्म्यानुसन्धानमाह– अनुमेयाभावेऽन्यतरस्यासत्त्वमुपलभ्याभिधत्ते न च तथा वायुर्निष्क्रिय इति ।

प्रत्याम्नायं व्याचष्टे – [6]अनुमेयत्वेनोद्दिष्टे चानिश्चिते च परेषां पुनर्निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नाय इति । प्रतिज्ञावचनेन पक्षे अनुमेयत्वेन प्रतिपाद्यत्वेनोद्दिष्टे साध्यधर्मेऽनिश्चिते तस्यैव साध्यधर्मिणि [7]प्रत्याम्नायं प्रत्यावृत्त्याभिधानं येन वचनेन क्रियते तत्प्रत्याम्नायः। अभिहितस्य पुनरभिधानं किमर्थमत आह–परेषां निश्चयापादनार्थमिति । प्रथमं साध्यमभिहितं न तु तन्निश्चितम्, प्रतिज्ञामात्रेण साध्यसिद्धेरभावात् । तस्योपदर्शिते हेतौ, कथिते च [8]हेतोः सामर्थ्ये, निश्चयः प्रत्याम्नायेन क्रियत

[टि०]　　( ॥ अथ प्रत्याम्नायनिरूपणम् ॥ )

[213 to 215] असति प्रत्याम्नाय इति :– एकमर्थं ग्रन्थकृन्मतेन समस्तरूपोपपन्नं लिङ्गमन्यमते तु साध्यमिति । [9]वस्तुं प्रति इति पदार्थं लक्ष्यीकृत्येत्यर्थः ।

[पं०] [213] [10]परेषां पुनरित्यत्र गद्ये (कं. २५२.) पुनर्वचनमिति योगः। तस्यैवेति (कं. २५२.६) साध्यधर्मस्य । प्रत्याम्नायेनेति (कं. २५२.१०) निगमनेन । तेषामिति (कं. २५२.१२) परेषाम् ।

एकमर्थमिति (२५२.१७) एकमर्थं ग्रन्थकारमते समस्तरूपोपपन्नं लिङ्गम् । यत्पर: [11]शब्दः सशब्दार्थं इत्यादि । वादिमते तु साध्यम् एतस्मिन्निति (कं. २५२.१८) प्रत्याम्नाये । शक्नुवन्तीति (कं. २५२.१८) अत्र अवयवाः प्रतिपादयितुमिति योगः ।

[कु०] [213] स्वतंत्रत्वादिति (कं. २५२) आकांक्षासन्निधिमत्वेपि योग्यतया ज्ञानाभावेनान्वयज्ञाभावादिति भावः । सति स्थिति (कं. २५२) सिद्धो सत्यारंभो नियमायेति न्यायात् । साध्यविपर्ययजिज्ञासाविच्छेदे सति योग्यतानु-

१ परेषां पुन–दे । २ वचनं–दे । ३ अनुमेये प्रतिपाद्यत्वे–व्यो. (६१६) । ४ हेत्वादिभिराहित–व्यो. (६१६) । ५ अनुसन्धानस्योदाहरणमाह – तथा चेति । वैधर्म्यानुसन्धानं दर्शयति – अनुमेयाभावे चेति – कं. १; कं. २ । ६ अनुमेयत्वेनोद्दिष्टे इति–कं. १; कं. २ । ७ प्रत्याम्नायः–कं. १; कं. २ । ८ हेतुसामर्थ्यनिश्चयः–जे. १, जे. २ । ९ वस्तुपदार्थं–अ, ब, क । १० निर्दिष्टं गद्य–कं. १ पुस्तके नोपलभ्यते । ११ प्रतीकमिदं कं. १ पुस्तके नास्ति ।

### प्रशस्तपादभाष्यम्

न ह्येतस्मिन्नसति [1]पूर्वेषामवयवानां समस्तानां व्यस्तानां वा तदर्थवाचकत्वमस्ति, गम्यमानार्थत्वादिति चेन्न, अतिप्रसङ्गात् । तथाहि प्रतिज्ञानन्तरं हेतुमात्राभिधानं कर्तव्यम्, विदुषामन्वयव्यतिरेक[2]स्मरणात् तदर्थावगतिर्भविष्यतीति तस्मादत्रैवार्थपरिसमाप्तिः ।

### न्यायकन्दली

इत्यस्य साफल्यम् । एतदेव दर्शयति – प्रतिपाद्यत्वेनोद्दिष्ट इत्यादिना । प्रथमं वचनमात्रेण परेषां साध्यनिश्चयो न भूतः; तेषां हेतूदाहरणोपनयैरवयवैर्हेतोस्त्रैरूप्ये दर्शिते सञ्जातानुमेयप्रतिपत्तिसामर्थ्यानां प्रत्याम्नाये कृते [3]'परिसमाप्तेन' वाक्येन परिपूर्णेन 'वाक्येन' निश्चयो जायत इत्येतदर्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः प्रवर्त्तते, तस्योदाहरणम् – तस्माद् द्रव्यमेवेति ।

हेत्वादिभिरवयवैरेव साध्यं निश्चीयते किं प्रत्याम्नायेन ? इत्यत आह – न ह्येतस्मिन्नसतीति । प्रतिज्ञादयोऽवयवाः प्रत्येकं स्वार्थमात्रेण पर्यवसायिनोऽसति प्रत्याम्नाये नैकमर्थं [4]प्रतिपादयितुमीशते, स्वतन्त्रत्वात् । सति त्वेतस्मि[5]न्नेतदर्थाकाङ्क्षोपगृहीताः अङ्गाङ्गिभावमुपगच्छन्तः शक्नुवन्तीति युक्तः प्रत्याम्नायः ।

पुनश्चोदयति गम्यमानार्थ[6]त्वादिति ।

[पं०] गम्यमानार्थत्वादिति (कं. २५२.१९) [7]चेदिति भाष्यमेतत् । तस्येति (कं. २५२.२५) लिङ्गस्य । बहिर्व्याप्तिपक्षधर्मतामात्रमिति (कं. २५२.२६) बहिर्व्याप्तिदृष्टान्तवचनम् । तस्मिन्निति (कं. २५२.२६) उभयरूपे सामर्थ्ये । [8]तदुभयमिति (कं. २५३.) बहिर्व्याप्तिपक्षधर्मतात्वलक्षणमबाधितविषयत्वाऽसत्प्रतिपक्षत्वलक्षणं चेति तदुभयम् । उपसंहृतेऽपि साधने (कं २५३.२) इत्यनेनोपनय उक्तः । प्रख्यापितसामर्थ्यमिति (कं. २५३.५) उपनयनस्यो[दी]रितसाध्यसाधनशक्तिकमित्यर्थः । साधनमिति (कं. २५३.५) कर्तृभूतम् । अस्येति (कं. २५३ ६) प्रत्याम्नायस्य ।

प्रतिपन्नमिति (कं. २५३.८) पुमांसम् । दुरुन्नेयत्वादिति (कं. २५३ १०) पाठस्थाने [9]'दुरन्वयत्वादित्यपि पाठः क्वचिद्दृश्यते, तत्र दुरुन्नेयत्वाद् दुर्लक्ष्यत्वादित्यर्थः । तच्छक्त्यनुरोधादिति (क २५३.१०) प्रतिपाद्यशक्त्यनुरोधात् । विचित्रशक्ति[म]त्वादिति (कं. २५१.११) कोऽपि हि कियदपि परिच्छिनत्ति । [10]सि ।

[कु०] सन्धानपूर्वकं नियतैककोटिजिज्ञासा । एतदु[आ]कांक्षोद्यतनया चाकांक्षया वाक्यानां परस्परं प्राधाना(न्या)-पसर्पणभावमानाकुलः प्रतिसन्दधानः प्रतिपत्त्वासंसर्गरूपमेकमर्थमवगच्छतीति भावः ।

---

१ परेषां – कं. १; कं. २, कि । २ दर्शनात् अथाधिगति – व्यो. (६१७) । ३ परिसमाप्तेन परिपूर्णेन – कं. १: कं. २ । ४ प्रत्याययितुं–कं. १; कं. २ । ५ न्नाकाङ्क्षो – कं. १; कं. २ । ६ दिति – कं. १; कं. २ । ७ चेद् कं. १ पुस्तके कन्दल्यां नास्ति – भाष्ये तु अस्ति । ८ प्रतीकमिदं–कं. १ पुस्तके नोपलभ्यते । ९ पा. १।२।४. पु । १० इत ऊर्ध्वं पत्राणि नोपलभ्यन्ते ।

## न्यायकन्दली

[214] अयमभिप्रायः स्वार्थानुमाने यैव प्रतिपत्तिसामग्री, सैव परार्थानुमानेऽपि । इयांस्तु विशेषः, स्वप्रतीतावियं स्वयमनुसन्धीयते, परप्रतीतौ च परेण बोध्यते । स्वयं च लिङ्गसामर्थ्यादर्थोऽवगम्यते, परस्यापि तदेव गमकम् । वाक्यं तु लिङ्गोपक्षेपमात्रे चरितार्थम् । प्रतिपादितं च हेत्वादिभिरवयवैः पक्षधर्मतान्वयव्यतिरेकोपपन्नं लिङ्गम् । तावतैव च तस्मादर्थावगतिसम्भवात् कृतं निगमनेनेति । समाधत्ते – नातिप्रसङ्गादिति । वाक्यं लिङ्गसामर्थ्यमेव बोधयति न साध्यम् । किं तु तस्य सामर्थ्यं बहिर्व्याप्तिपक्षधर्मतामात्रम्, सत्यपि तस्मिन् प्रकरणसमकालात्ययापदिष्टयोरसाधकत्वात्, अपि त्वबाधितविषयत्वमसत्प्रतिपक्षत्वमपि सामर्थ्यम् । [1]तदुभयं यावत्प्रमाणेन न प्रतिपाद्यते, तावत्प्रतिपक्ष[2]सम्भवाशङ्कया अनिवर्तनात् । धर्मिण्युपसंहृतेऽपि साधने साध्यप्रतीतेरयोग [3]इति विपरीतप्रमाणाभावप्रतिपादनार्थं निगमनमनेन विपरीतप्रमाणाभावग्राहकं प्रमाणमुपदर्श्यते । तदभावे प्रतिपादिते, प्रकरणसमकालात्ययापदिष्टत्वाभावे निश्चिते, प्रख्यापितसामर्थ्यं साधनं साध्यं समर्थयतीति प्रत्याम्नायोपयोगः । तत्र यदनुक्तमपि [4]सामर्थ्यमर्थादवगम्यत इत्यस्य प्रतिक्षेपः क्रियते, तदोदाहरणादिकमपि प्रतिक्षेप्तव्यम् । प्रतिज्ञानन्तरं हेत्वभिधाने कृते विदुषां स्वयमेवान्वयव्यतिरेकस्मरणादर्थावगतिसम्भवात् ।

एतदुक्तं भवति । न प्रतिपन्नं प्रति परार्थानुमानम्, वैयर्थ्यात् । न च प्रतिपाद्यस्य किय[5]त्यंशे प्रतिपत्तिरस्ति, कियति नास्तीति शक्यमवगन्तुम्, परचित्तवृत्ते[6]र्दुरुन्नेयत्वात् ।

[कु०] [214] ननु प्रत्याम्नायप्र(व्य?)तिरेकेणा(ण)योग्यतासन्धानाभावात्संसर्गस्य कथं गम्यमानत्वमित्यत आह अयमभिप्राय इति (कं. २५२) ।

ननु स्वार्थानुमानेऽपि योग्यतानुसंधानमंगं भविष्यतीत्यत आह स्वयं चेति (कं. २५२) योग्यता हि धर्मः, न च स्वार्थानुमाने शब्दोऽस्तीत्यर्थः । लिङ्गोपक्षेपमात्रेति (कं. २५२) लिङ्गप्रतिपादनमात्र इत्यर्थः । ननु तत्रैव प्रत्याम्नायोपयोजयत इत्यत आह प्रतिपादितं चेति (कं. २५२) हेत्वादिभिरित्युपलक्षणं प्रतिज्ञादिभिश्चतुर्भिरित्यर्थः । सत्यं वाक्यमिति भवता या स्वार्थानुमानसामर्थ्यंगीकृता तामेव लिङ्गं बोधयतीत्यर्थः । ननु चतुर्भिरेवावयवैस्तस्यावबोधितत्वात्कि निगमनेनारंस्यत इत्यत आह किं त्विति (कं. २५२) सत्यपि तस्मिन्निति (कं. २५२) स्वार्थानुमानेऽपीति शेषः ।

---

१ तत्सद्भावो – कं. १; कं. २ । २ भावशङ्कया – जे. १, जे. २; सम्भवशङ्कया – जे. ३ । ३ इति विपरीतप्रमाणाभावग्राहकं – कं. १, कं. २ । ४ सामर्थ्यं जायते – जे. १, जे. २ । ५ त्यङ्गे – कं. १, कं. २ । ६ दुर्ज्ञेयत्वात् – जे. १; दुरन्वयात् – जे. २, जे. ३ ।

### न्यायकन्दली

नापि तच्छक्त्यनुरोधाद्वाक्यकल्पना युक्ता, प्रतिपत्तॄणां विचित्र[1]शक्तिकत्वात् । तस्मात् परं बोधयता यावता हेतोः साधकत्वं वस्तुवृत्त्योपपद्यते तावानर्थो वचनेन प्रतिपादनीयः, न प्रतिपत्तृविशेषानुरोधेन वर्तितव्यम् ।

यथोक्तम् –

वस्तु प्रत्यभिधातव्यं सिद्धार्थो न [2]नरान् प्रति ।
को हि विप्रतिप[3]न्नार्थास्त[4]द्बुद्धीरनुधावति ।।

उपसंहरति – तस्मादत्रैवार्थपरिसमाप्तिरिति । यस्मान्निगमने सति हेतोः समग्रं सामर्थ्यं प्रतीयते तस्मादत्रैव निगमने अर्थस्य साध्यस्य परिसमाप्तिः प्रतीतिपर्यवसानम् ।

यद्वैवं योजना, यस्मान्निगमनमन्तरेण विपरीतप्रमाणाभावो [5]नावगम्यते, तस्मादेत[6]स्मिन्नेवार्थस्य सम्यग्हेतु सामर्थ्यस्य परिसमाप्तिः पर्यवसानमिति ।

प्रत्येकमुक्तमेवावयवानां [7]रूपमेकत्र संहृत्य प्रश्नपूर्वकं कथयति – कथमित्यादिना । किं शब्दो नित्यः किं वा अनित्य[8] इत्यन्यतरधर्मजिज्ञासायां प्रतिज्ञावचनेनानिश्चितेनानित्यत्वमात्रेण विशिष्टः शब्दः कथ्यते "अनित्यः शब्दः' इति ।

[कु०] नन्वबाधितविषयत्वासत्प्रतिपक्षत्वयोरनुमितिसामग्र्यन्तर्भावः कुत इत्यत आह **उभयमपीति** (?) । सिद्धान्तभाष्यं योजयति **तत्रेति** (कं. २५३) । नन्वबाधितविषयत्वासत्प्रतिपक्षत्वे वदत्(?) सपक्षे सत्वादेरपि कथं गम्यमानत्वमित्यत आह **प्रतिज्ञान्तरमिति** (कं. २५३) समभिव्याहारान्यथानुपपत्तेरित्यर्थः । **विदुषामिति** (कं. २५३) अनेनाविदुषां चेत् बाधितविषयत्वादिकमपि वचनो(नमु)पनेयमिति सूचयति । ननु यदि न विद्वान् यं चाद्यवाक्यप्रयोगस्य विषयः तस्य विद्वत्त्वादेव, अविद्वानपि पदपदार्थसंगतिग्रहण(णा?)भावान्न विषयस्तर्हि कोऽस्य विषय इत्यत आह – **एतदुक्तं भवतीति** (कं. २५३) **न च प्रतिपाद्यस्येति** (कं. २५३) अनेन गृहीतसंगतिक एव लिङ्गसामर्थ्याज्ञानमात्रेण यं चाद्यवाक्यप्रयोगविषय इति सूचयति । ननु यथा कथंचिदिङ्गितादिना परचित्तवृत्ते(र)नुनयो भविष्यतीत्यत आह **नापीति** (कं. २५३) प्रतिपत्तॄणामन्यथासिद्धेङ्गितत्वादित्यर्थः । **वस्तुवृत्त्येति** (कं. २५३) प्रतिपाद्यमात्रसाधारणेनेति शेषः । **न नरान्प्रतीति** (कं. २५३) [प्रति]पत्तिविशेषापेक्षया वाक्यस्य न्यूनाधिकभावो न कर्तव्य इति भावः ।

**प्रत्येकमुक्तमेवेति** (कं. २५३) शिष्यबुद्धिवैशद्यायेति शेषः । **अन्यतरधर्मजिज्ञासायामिति** (कं. २५३) नियतहेतोरभावादनियतकोटिकायां जिज्ञासायामित्यर्थः ।

---

१ शक्तिमत्त्वात्–कं. १; कं. २ । २ परान्–कं. १, कं. २ । ३ पन्नाया–कं १, कं. २, कं. ३ । ४ तद्बुद्धे–कं. १, कं. २; तद्बुद्धीरनुधावति इति – जे. १ । ५ न गम्यते – जे. १, जे. २, जे. ३ । ६ अस्मिन्नेवार्थस्य – जे. १ । ७ अथ – जे. १ । ८ अनित्य इति – कं. १, कं. २ । ९ परान्प्रति – कं. १ ।

## प्रशस्तपादभाष्यम्

[215-216] कथम् ? अनित्यः शब्द इत्यनेनानिश्चितानित्यत्वमात्रविशिष्टः शब्दः कथ्यते । प्रयत्नानन्तरीयकत्वादित्यने[1]नानित्यत्वसाधनधर्ममात्रमभिधीयते । 'इह यत् प्रयत्नानन्तरीयकं तदनित्यं दृष्टम् यथा घट' इत्यनेन साध्यसामान्येन [2]साधनसामान्यस्यानुगममात्रमुच्यते । नित्यमप्रयत्नानन्तरीयकं दृष्टम् यथाकाशमित्यनेन [3]साध्याभावेन साधनस्यासत्त्वं प्रदर्श्यते । तथा च प्रयत्नानन्तरीयकः [4]शब्दो दृष्टो न च तथाकाशवदप्रयत्नानन्तरीयकः शब्द इत्यन्वयव्यतिरेकाभ्यां दृष्टसामर्थ्यस्य [5]साधनसामान्यस्य शब्देऽनुसन्धानं गम्यते । तस्मादनित्यः शब्द इत्यनेनानित्य एव शब्द [6]इति प्रतिपिपादयिषितार्थपरिसमाप्तिर्गम्यते ।

## न्यायकन्दली

[215] [7]तत्र को हेतुरित्यपेक्षायां प्रयत्नानन्तरीयकत्वात् पूर्वमसतः प्रयत्नानन्तरमुपलभ्यमानत्वादिति हेतुवचनेनानित्य[8]त्वस्य साधनधर्ममात्रमभिधीयते । [9]मात्रग्रहणेन पक्षधर्मताया अन्वयव्यतिरेकयोश्चानभिधानं दर्शयति । अवगतसाधनस्य कथमिदं साध्यं गमयतीति साधनसामर्थ्यापेक्षायामिह जगति यत् प्रयत्नानन्तरीयकं तदनित्यं दृष्टमित्युदाहरणेन साध्यसामान्येन साधनसामान्यस्यानुगममात्रं करोति न तु स्वरूपान्तरमिति मात्रशब्दार्थः । नित्यमप्रयत्नानन्तरीयकमिति वैधर्म्यनिदर्शनेन साध्याभावे साधनाभावः प्रदर्श्यते – यत् प्रयत्नानन्तरीयकं तदनित्यमिति । दृष्टमेतत्, किं तु शब्दे तदस्ति नवेति जिज्ञासायां तथा च प्रयत्नानन्तरीयकः शब्द इति, यथा घटः प्रयत्नानन्तरीयकः, तथा

[कु॰] [215] ननु यदि प्रयत्नानंतरीयकत्वं प्रयत्नकार्यं ह्यन्यथासिद्धमित्यत आह पूर्वमसत इति (कं. २५३)। न तु स्वरूपान्तर इति (कं. २५४) पक्षधर्मतात्मकमित्यर्थः । शब्दे धर्मिण्यनुसन्धानमिति (कं. २५४) साकल्येन सम्बन्ध इत्यर्थः ।" अतोऽवगम्यत इति (कं. २५४) अनेन पौनरुक्त्यम् । प्रत्याम्नायस्य संगतिमाह यथा तावदि(यदि)ति (कं. २५४) उपजीव्येन बलवता प्रमाणेन बाधादित्यर्थः । कदाचिदप्रयत्नानंतरीयकः शब्दोऽनित्यो भवेदित्यवश्यं शंकया भाव्यम् । न्यायेनैति नियामकमवश्यतामिति न्यायेनेति शेषः । ननु तस्मादनित्यः शब्द इति प्रत्याम्नायवर्तिना तच्छब्देन यदि प्रकृतो हेतुः परामृश्यते न कश्चिदिति [आ]शयः स्यात्तस्य प्रयत्नान्तरीयकत्वादित्यनेन हेतुवचनेनैव दिष्टत्वादित्यत आह यस्मादिति (कं. २५४) तदापि साध्यविपर्ययग्राहकं प्रमाणं वादिप्रतिवादिनोश्चेतसि विपरिवर्तत एव । इतरथा वादिप्रवृत्त्यनुपपत्तेः न च तदेव तस्मादित्यनेन परामृष्टुं शक्यते विरोधात्तस्मात्तन्निषेधो योग्यतया परामर्शनीय

१ साधर्म्यवैधर्म्यमात्रम् – दे । २ सामान्यस्य – दे । ३ साध्याभावे – दे । ४ शब्दो न च तथाऽप्रयत्नानन्तरीयकः – दे । ५ साधनस्य – दे । ६ इत्यपि प्रतिपादयिष्यता – दे । ७ तदनुकृतो – जे. १ । ८ अनित्यत्वसाधन – कं. १; कं. २ । ९ मात्रग्रहणेन हेतोः – जे. १ ।

### प्रशस्तपादभाष्यम्

तस्मात् पञ्चावयवेनैव वाक्येन परेषां स्वनिश्चितार्थप्रतिपादनं क्रियते, इत्येतत्परार्थानुमानं सिद्धमिति ।

### न्यायकन्दली

शब्दोऽपि प्रयत्नानन्तरीयकः । [1]न च तथाकाशवदप्रयत्नानन्तरीयक इत्यनुसन्धानेनान्वयव्यतिरेकाभ्यां दृष्टसामर्थ्यस्य दृष्टाविनाभावस्य प्रयत्नानन्तरीयकत्वस्य शब्दे धर्मिण्यनुसन्धान[2]मवस्थानं गम्यते । यथा यत् कृतकं तदनुष्णं दृष्टं घट इति सत्यपि बहिर्व्याप्ति[3]सम्भवेऽपि कदाचित् कृतकस्तेजोऽवयवी अनुष्णो न भवति, प्रमाणविरोधात् । तथा यत् प्रयत्नानन्तरीयकं तदनित्यमिति बहिर्व्याप्तिसम्भवे कदाचित् प्रयत्नानन्तरीयकः शब्दोऽनित्यो न भवेदिति विपक्षा[4]शङ्कायां हेतोरसाधकत्वे तस्मादनित्यः शब्द इति प्रत्याम्नायः, यस्मान्नित्यत्वप्रतिपादकं प्रमाणं नास्ति तस्मा[5]च्छब्दोऽनित्यो नित्यो न भवतीत्यर्थः । अनेनान्यव्यावृत्तिवाचिना विपरीतप्रमाणाभावग्राहकं प्रमाण[6]मुपस्थाप्य तदभावे प्रतिपादिते [7]विपर्ययशङ्कानिवृत्तौ दर्शिताविनाभावाद्धेतोर्धर्मिण्युपसंहृताद् व्याप्तिग्राहकप्रमाणबलेन निर्विचिकित्सः साध्यं प्रत्येति, नापरं किञ्चि[8]दपेक्षत इत्यनेन प्रत्याम्नायेनानित्य एव शब्द इति प्रतिपिपादयिषितस्यार्थस्य परिसमाप्तिर्निश्चयो गम्यते ।

[कु०] इत्यभिप्रायेण प्रत्याम्नायतात्पर्यं व्याचष्टे – अनेनेति (कं. २५४) । विपरीतप्रमाणाभावग्राहकं प्रमाणमित्यत्र तर्कद्वितीयेन प्रमाणशब्देनोच्यते प्रमाणांगत्वात्तदनेन यदि नित्यं स्यात्, प्रयत्नानन्तरीयको न भवेदिति विपक्षेऽनिष्टापत्तिमुपस्थाप्य प्रत्याम्नाय प्रकृतसाधनसामर्थ्यैकविषयिणा(णीं) जिज्ञासां प्रमातुर्जनयतीत्युक्तं भवति ।

नन्वेवं यदि समस्तमेव पंचावयवं वाक्यं समर्थसाध[न]मेव प्रतिपादयति तर्हि साध्यप्रतीतिः कुत इत्यत आह दर्शिताविनाभावादिति (कं. २५४) बाधकप्रमाणाभावेन तदेकनियतपक्षेतरत्वोपाधिशंकाया अनवकाशात्व्याप्तिसंकोचत्वाभावेन पक्षधर्मतासहायव्याप्तिग्राहकं प्रमाणं पक्षे साध्यमुपस्थापयतीति भावः । तदेवमुपक्रमे स्वनिश्चितार्थशब्दस्य लिंगपरतायां भाष्यं योजितम् । इदानीं तस्यैव साध्यधर्मपरत्वे निगमनस्यापि साध्यपरत्वं वक्तव्यम् । तच्च दुर्वचनम्, तत्सूचनीयस्य तस्य साधनं प्रत्येवांगभावादित्यत आह साध्ये(व्यम)पि [इति] (कं. २५४) । यद्यपि तेषामप्यवयवानां साधनसामर्थ्यस्य व्याप्तेः प्रतिपादनमवान्तरव्यापारो यथा तद्वदस्याप्यबाधितविषयत्वासत्प्रतिपक्षत्वरूपसामर्थ्यप्रतिपादनमवान्तरव्यापार इति सुवचनमेव, तथापि श्रूयमाणार्थानुसारेण साध्यपरत्वव्याख्यानं धार्यत इति भावः ।

१ न चाकाश – कं. १; कं. २ । २ मुपस्थापनं – कं. १; कं. २ । ३ सम्भवे कृतक – कं. १; कं. २ । ४ विपक्षशङ्कायां – जे. १, जे. ३ । ५ च्छब्दो नित्यो न – कं. १; कं. २ । ६ मुपस्थाप्यते, उपस्थापिते च तदभावे – कं. १; कं. २ । ७ विपरीत – कं. १; कं. २ । ८ दपेक्ष्यते – कं. १; कं. २ ।

## न्यायकन्दली

साध्यवाक्यार्थवादिनस्तु निगमनस्येत्थमर्थवत्त्वं समर्थयन्ति – अन्यदेव घटस्य कृतकत्वमन्यच्छब्दस्य, तत्र यदि नाम घटस्य कृतकत्वमनित्यत्वेन व्याप्तं किमेतावता शब्दगतेनापि तथा [1]भवितव्यम् ? इति व्यामुह्यतो दर्शितयोरपि लिङ्गस्य पक्षधर्मत्वाविनाभावयोः साध्यप्रतीत्यभावे सति निगमनेन तस्मादिति सर्वनाम्ना सामान्येन प्रवृत्तव्याप्तिग्राहकं प्रमाणमनुस्मार्य शब्दे अनित्यत्वं प्रतिपाद्यते, यस्माद्यत् कृतकं तदनित्यमिति सामान्येन प्रतीतं न विशेषतः, तस्मात् कृतकत्वेनानित्यः शब्द इति। एतस्मिन् पक्षे च प्रकरणसमकालात्ययापदिष्टत्वाभावः पक्ष[2]वचनेनैवोपदर्श्यते असत्प्रतिपक्षत्वाबाधितविषयत्वयोः पक्षलक्षणत्वात् ।

अपरे तु तस्मादिति त्रैरूप्यमेव परामृशन्ति 'यस्माद्यत् कृतकं तदनित्यं दृष्टम्, यस्मात् कृतकः शब्दः, यस्माच्च प्रतिपक्षबाधयोरसम्भवस्तस्मात् कृतकत्वादनित्यः शब्दः' इति ।

उपसंहरति – तस्मादिति । यस्मात् पञ्चस्वेवावयवेषु समग्रस्य साधनसामर्थ्यस्य प्रतीतौ साध्यप्रतीतिः पर्यवस्यति, नापरं किञ्चिदपेक्षते, तस्मात् पञ्चावयवेनैवान्यूनाधिकेन वाक्येन [3]स्वनिश्चितस्यार्थस्य प्रतिपादनं क्रियत इति कृत्वा एतत्पञ्चावयवं वाक्यं परार्थानुमानमिति सिद्धं व्यवस्थितम् ।

[कु०] अन्यदेवेति (कं. २५४) – यद्यपि प्रागसतः सत्तासम्बन्धकार्यत्वमेव तथाप्युपाधिभेदगमः कस्यचित्स्यं[भ]वेदिति भावः। तदिदमुक्तं व्यामुग्धस्येति सामान्येन प्रवृत्तव्याप्तिग्राहकप्रमाणमनुस्मार्येति (कं. २५४) अनेन प्रत्याम्नायस्य भेदभ्रमनिवारकत्वं दर्शयति ।

ननु पक्षवचनस्य कथं कालात्ययापदिष्टत्वाद्यभावो स्यादित्यत आह [अ]सत्प्रतिपक्ष[त्वे]ति (कं. २५४) धर्मविशिष्टो हि पक्षो न च बाधयोः विषय [उप]पद्यते–जिज्ञास्यते-इति भावः। उभयपक्षसाधारण्येन मतान्तरमनुस्मृत्य प्रत्याम्नाय व्याचष्टे अपरे त्विति (कं. २५४) त्रैरूप्यमिति (कं. २५४) यां (यं) च रूपोपलक्षणमतः यस्माच्च प्रतिपक्षबाधयोरसम्भव इति (कं. २५४) अनेन विरोधः उपलक्षणस्य फलम्, तयोः प्रागुक्तपक्षधर्मतान्तर्भावः सू[च]यन्नुपसंहरति। परार्थानुमानव्याख्यानमिति शेषः।

---

१ भाव्यमिति व्यामुह्यत उपदर्शितयोरपि – जे. १, व्यामुह्यते – जे. ३। २ वचनेनैव प्रदर्श्यते – जे. १। ३ सुनिश्चिता – जे. १, जे. २।

### न्यायकन्दली

[216] ये तु प्रत्यक्षमेवैकं प्रमाणमिच्छन्तो नानुमानं प्रमाणमिति वदन्ति, ते इदं प्रष्टव्याः, किमेकमेव प्रत्यक्षं स्वलक्षणं प्रमाणं यत्स्वरूपं प्रतीयते[1] ? किं वा सर्वमेव ? न तावदेकमेव प्रमाणम्, अपरस्य तत्तुल्यसामग्रीकस्याप्रामाण्यकारणाभावात् । अथातीतमनागतं च पुरुषान्तरवर्ति सर्वमेव प्रत्यक्षं स्वलक्षणं प्रमाणम् ? कथमिदं [2]निश्चीयते ? प्रतीयमानप्रमाणव्यक्तिसजातीयत्वादिति चेत् ? अङ्गीकृतं स्वभावानुमानस्य प्रामाण्यम् ।

एवमनुमानप्रमाणत्वमपि विकल्प्य वाच्यम् । कश्च [2]प्रत्यक्षमेवैकं प्रमाणमिति प्रतिपाद्यते? न तावत् स्वात्मैव, प्रतिपादकत्वात् । परश्चेत् ? स किं प्रतिपन्नः प्रतिपाद्यते? विप्रतिपन्नो वा ? [3]न तावत् प्रतिपन्नः प्रतिपाद्यो प्रतिपन्नस्य प्रतिपादनवैयर्थ्यात् । विप्रतिपन्नश्चेत् ? पुरुषान्तरगता विप्रतिपत्तिश्च न [4]प्रत्यक्षेण गम्यते । वचनलिङ्गेनानुमीयते चेत् ? सिद्धं कार्यानुमानस्य प्रामाण्यम् ।

[5]अनुमानमप्रमाणमिति केन प्रमाणेन साध्यते[6] ? प्रत्यक्षं विधिविषयम्, न कस्यचित्प्रतिषेधे प्रभवति । अनुपलब्ध्या तदव[6]गम्यते चेत् ? तर्ह्यनुपलब्धिलिङ्गकमनुमानं स्यात् । तथा चोक्तं सौगतैः –

प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः ।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ॥ इति ।

[टि०] [216] ये[7]तु प्रत्यक्षम् इति :– ये चार्वाका इत्यर्थः । एवमनुमानेति न तावदनुमानं स्वरूपेणाप्रमाणं किन्त्वनुमानाभा[8]सदृष्टान्तात्, तथा [9]चानुमानसिद्धिः । पुरुषान्तरगता इति :– विरुद्धा[10]प्रतिपत्तिर्ज्ञानं विप्रतिपत्तिः । [11]प्रमाणान्तरसामान्येति :– विवादाध्यस्तं परकीयमतीतानागतं वा प्रत्यक्षं[12] प्रमाणं, प्रत्यक्षत्वाद् इदानींतनप्रत्यक्षवत्

[कु०] [216] तदेवमधिकसंख्याव्यवच्छेदेन प्रमाणद्वयं व्याख्यातम् । संप्रति न्यूनसंख्याव्यवच्छेत्तुं परमतमाशंकते ये त्विति (कं. २५५) अनुमानस्य प्रामाण्यमापादयितुं विकल्पयति इदमिति (कं. २५५) । अंगीकृतमिति (कं. २५५) यत्प्रत्यक्षं तत्प्रमाणम्, विमतं च प्रत्यक्षमित्येव । स्वलक्षणान्तरस्य प्रामाण्यांगीकारादित्यर्थः । एवमनुमानप्रमाणत्वमपीति (कं. २५५) यदेकानुमानाभास स्वलक्षणमप्रमाणतया गृह्यते किं तदेवाप्रमाणमुत तज्जातीयमनुमानाभासान्तरमपीत्येवं विकल्प्य प्रागुक्तमेव दूषणं वक्तव्यमित्यर्थः । पुरुषान्तरगता विप्रतिपत्तिरित्युपलक्षणमेतत् ।

---

१ प्रतीयते – जे. १ । २ प्रत्यक्ष प्रमाणं – कं. १; कं. २; प्रमाणमिति – जे. २, जे. ३ । ३ न प्रतिपन्नः प्रतिपन्नस्य प्रतिपादनवैयर्थ्यात – कं. १, कं. २; न तावत् प्रतिपन्नः प्रतिपाद्यो वैयर्थ्यात् – जे. १; न प्रतिपन्नः प्रतिपाद्यो वैयर्थ्यात् – जे. ३; न प्रतिपन्नः प्रतिपाद्यते वैयर्थ्यात् – । ४ प्रत्यक्षतोऽवगम्यते – जे. १, जे. २ । ५ अनुमानं प्रमाण – कं. १; (न) अनुमानं प्रमाण – कं. २ । ६ साध्यते – जे. १; गम्यते – कं. १, कं. २ । ७ यस्तु तु – अ । ८ भासे – अ, ब, क । ९ चानुमानसिद्धिः – अ, ब, क । १० प्रतिपत्तिज्ञानं – अ, ब, क । ११ प्रमाणेत्तर – मु. जे. १, जे. २, जे. ३ । १२ प्रत्यक्षं स्वा... अ, ब, क ।

## प्रशस्तपादभाष्यम्

[217] विशेषदर्शनजमवधारणज्ञानं संशयविरोधी निर्णयः ।

एतदेव [1]प्रत्यक्षमनुमानं वा । यद् विशेषदर्शनात् संशयविरोध्युत्पद्यते स [2]प्रत्यक्ष-निर्णयः । [3]यथा स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यालोचनाद्विशेषेष्वप्रत्यक्षेषूभयविशेषानु-

## न्यायकन्दली

प्रमाण[4]तदभावसामान्यव्यव[5]स्थापनात्, परबुद्धेरधिगमात्, कस्यचिदर्थस्य प्रतिषेधाच्च प्रत्यक्षात् प्रमाणान्तरस्य स्वभावकार्यानुपलब्धिलि[6]ङ्गस्यानुमानस्य सद्भाव इति वार्त्तिकार्थ इति ।

[217] निर्णयं केचित् प्रत्यक्षानुमानाभ्यां [7]प्रमाणान्तरमिच्छन्ति, तान् प्रत्याह – विशेषदर्शनजमित्यादि । यत्र विशेषानुपलम्भात् संशयः संजातः, तत्र विशेषदर्शनाज्जायमानमवधारणज्ञानं निर्णयः । स च संशयविरोधी, तस्मिन्नुपजायमाने संशयस्योच्छेदात् । यथाह मण्डनो विभ्रमविवेके –

[टि०] इत्यनुमानात्प्रत्यक्षप्रामाण्यम् । तथा विवादाध्यासितमनुमानं (न) प्रमाण[8]मनुमानत्वाद्, गगनकमलं सुरभि कमलत्वात् [9]क्रीडासरःकमलवदित्यनु[10]मानवदनु[11]मानस्याप्रमाणत्वम्, ततः [12]प्रमाणाप्रमाणव्यवस्थात एव सिद्धमनुमानम् ।

( ।। इति प्रत्याम्नायनिरूपणम् ।। )

( ।। इति बुद्ध्यधिकारे विद्याभेदनिरूपणेऽनुमाननिरूपणम् ।। )

( ।। अथ बुद्ध्यधिकारे विद्याभेदनिरूपणे निर्णयनिरूपणम् ।। )

[217-218] **निर्णयं केचिद्** इति :– [13]प्रामाणान्तरं प्रमित्यन्तरमित्यर्थः । **विभ्रमविवेक** इति :– एवमभिधाने [14]स्वग्रन्थे । **यद्यपि सर्वमेव** इति :– [15]निश्चयोऽत्र यथार्थो ज्ञेयः तेन [16]मरुमरीचिकादिज्ञानव्यवच्छेदः ।। [17]स्मृतिः ।।

( ।। इति निर्णयनिरूपणम् ।। )

[कु०] संप्रतिपत्तिरपीति द्रष्टव्यम् । तदज्ञाने संप्रतिपन्नपरित्यागात्प्रमाणतदाभाससामान्यावस्थानादिति प्रमाणानां तदाभासानां च प्रत्येकमेकजातीयत्वावस्थानादित्यर्थः । तदेतद्बौद्धमतेन चार्वाकनिराकरणम् ।

---

१ प्रत्यक्षानुमानं – दे । २ निर्णय – दे । ३ यत्र – दे । ४ तदाभास – जे. १ । ५ व्यवस्थानात् – जे. २, जे. ३ । ६ लिङ्गकस्य । – जे. १, जे. ३ । ७ प्रमान्तरं – जे. १ । ८ मनुमानाद् – अ, ब । ९ क्रीडारसः – अ, ब । १० मानादनु – क; मानादमान – अ, ब । ११ मानस्य प्रामाणत्वम् – अ, ब । १२ प्रामाणप्रमाण – अ, ब । १३ प्रमाणेतर – मु. जे. १, २, ३ । १४ स्वग्रन्थ – अ । १५ निर्णयोऽत्र – अ, ब, क । १६ मरुमरीचिकादि – अ । १७ स्मृतिविषये न किञ्चिदपि टिप्पनम् अतो निर्णयस्य स्मृतेश्च समाप्तिरत्रैव ज्ञेया ।

## प्रशस्तपादभाष्यम्

स्मरणात्, किमयं स्थाणुर्वा पुरुषो वेति संशयोत्पत्तौ शिरःपाण्यादिदर्शनात् पुरुष एवायमित्यवधारणज्ञानं प्रत्यक्षनिर्णयः। विषाणमात्रदर्शनाद् गौर्गवयो वेति संशयोत्पत्तौ सास्नामात्रदर्शनाद् गौरेवायमित्यवधारणज्ञानमनुमाननिर्णय इति।

[218] लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पटुाभ्यासादर-प्रत्ययजनिताच्च संस्काराद् दृष्टश्रुतानुभूतेष्वर्थेषु शेषानु[1]व्यवसायेच्छानुस्मरणद्वेषहेतु-रतीतविषया स्मृतिरिति।

## न्यायकन्दली

निश्चिते न खलु स्थाणावूर्ध्वत्वेन [2]विशेरते। विशेरते इति संशेरत इत्यर्थः। यद्यपि सर्वमेव निश्चयात्मकं ज्ञानं निर्णयः, तथापि संशयोत्तरकाल[3]भाविनो निर्णयत्वेन प्रसिद्धिप्राबल्यात् संशयविरोधीत्युक्तम्–स्वोक्तं संग्रहवाक्यं विवृण्वन्निर्णयस्य प्रत्यक्षानु-मानयोरन्तर्भावं [4]दर्शयति–एतदेव प्रत्यक्षमनुमानं यद्विशेषदर्शनात् संशयविरोध्युत्पद्यते स निर्णय इति। प्रत्यक्षविषये यदवधारणात्मकं ज्ञानं स प्रत्यक्षनिर्णयः। यच्चानुमान-विषयेऽवधारणज्ञानं सोऽनुमाननिर्णय इति उपरितनेन ग्रन्थसन्दर्भेण कथयति।

[218] स्मृतिलक्षणां विद्यामाचष्टे– [5]लिङ्गदर्शनेच्छेत्यादिना। लिङ्गदर्शनं [6]चेच्छा चा-नुस्मरणं च। आदिशब्देन न्यायसूत्रोक्तानि प्रणिधानादीनि [7]गृह्यन्ते, तान्यपेक्षमाणादात्म-मनसोः संयोगविशेषादिति स्मृतिकारणकथनम्। आत्ममनःसंयोगस्य च लिङ्गदर्शनादि-सहकारितैव विशेषः, केवलादस्मात्स्मरणा[8]नुत्पत्तेः। [9]लिङ्गदर्शनादिवत् संस्कारोऽपि

[कु०] [217] ननु वध्यघातकभावरूपो विरोधः सर्वज्ञानसाधारण एव न व्यतिरेकेण तु बाध्यबाधकभावः संशयनिर्णययोः कीदृश इत्यत आह तस्मिन्नुपजायमानसंशयोच्छेदावविति (कं. २५६) पुनरुत्पत्तेरित्यर्थः। अत्रैवाभियुक्तः वाक्यमाह यथा आहेति (कं. २५६) निश्चिते निर्णये सतीत्यर्थः। प्रसिद्धिप्राबल्यादिति (कं. २५६)। यथोक्तं विमृश्य पक्षाभ्यामर्थावधारणं निर्णय इति संशयनिर्णययोः विरोधः न गवाश्वादिवदितरेतराभाववत्त्वं बाध्यबाधकभाव इति दर्शयन्नित्यर्थः।

---

१ नुव्यवसायस्मरणेच्छा – व्यो. (६२०)। २ विशेरत इति – कं. १; कं. २। ३ भावित्वेन – कं. १; क. २। ४ दर्शयति – जे. १। ५ लिङ्गदर्शनेत्यादिना – जे. १, जे. २, जे. ३। ६ चेच्छानुस्मरणं – कं. १; कं. २। ७ संगृह्यन्ते – कं. १; कं. २। ८ नुपपत्तेः – जे. २। ९ दर्शनवत् – कं. १; कं. २।

## न्यायकन्दली

स्मृतेर्निमित्तकारणमित्याह – पट्वाभ्यासादरप्रत्ययज[1]निताच्च संस्कारादिति पटुप्रत्ययः स्फुटतरप्रत्ययस्तस्मात् संस्कारो जायते। तेन गच्छत्तृणसंस्पर्शज्ञानात् क्वचित् पटुप्रत्ययोत्पादेऽपि ग्रहणयोग्यः संस्कारो [2]न भवति। [3]यथा सकृत् पठितेऽनुवाके। तेन गृहीतस्यावृत्त्या पुनःपुनर्ग्रहणलक्षणोऽभ्यासः संस्कारकारणम्, तस्मिन् सत्यनुवाकस्य ग्रहणदर्शनात्। [4]क्वचिदत्यन्ताश्चर्यकरे वस्तुनि सकृदुपलब्धेऽपि कालान्तरे स्मृतिदर्शनादादरग्रहणमपि संस्कारनिमित्तम्। दृष्टश्रुतानुभूतेष्विति विषय[5]सङ्कीर्तनम्।

दृष्टेष्विति [6]प्रत्यक्षप्रतीतेषु श्रुतेष्विति शब्दावगतेषु [7]अनुभूतेष्वित्यनुमितेष्वित्यर्थः। शेषानुव्यवसायेच्छास्मरणद्वेषहेतुरिति कार्यनिरूपणम्। शिष्यत परिशिष्यते इति 'शेषः'। 'अनु' पश्चाद्व्यवसितिः अनु[8]व्यवसायः। शेषश्चासावनुव्यवसा[9]यश्च शेषानुव्यवसायः, प्रथमोपजातलिङ्गज्ञानापेक्षया तदनन्तरभाव्यनुमेयज्ञानम्, तस्य हेतुर्व्याप्तिस्मरणम्। सुखसाधनत्वस्मृतिरिच्छाहेतुः। प्रथमपदस्मृतिर्द्वितीयपदानुस्मरणहेतुः। दुःखसाधकस्मरणं द्वेषहेतुः। [10]तदित्येवं स्मृतेराकारः, तत्र चार्थस्यातीतत्वं पूर्वानुभूतत्वं प्रतीयत इत्यतीतविषया स्मृतिः। अत एव न प्रमाणम्, तस्याः पूर्वानुभवविषयत्वोपदर्शनेनार्थं निश्चिन्वत्या अर्थपरिच्छेदे पूर्वानुभवपारतन्त्र्यात्। अनुमानज्ञानं तूत्पत्तौ परापेक्षं [11]स्वविषयपरिच्छेदे स्वतन्त्रमेव, स्मृतिरिव। तस्मात् पूर्वानुभवानुसन्धानेनार्थप्रतीत्यभावात्। यथाहुस्तन्त्रटीकायां सर्वोत्तर[12]धियो गुरवः –

[कु०] [218] समासान्तरशंकानिवृत्यर्थं द्वन्द्वं व्याचष्टे लिंगदर्शनं चेति (कं. २५६) लिंगदर्शनं वह्न्यादिलिंगस्य धूमादेर्दर्शनमिच्छानुस्मरणमनुक्रमवतामन्यतमस्य स्मरणम्। नन्वात्मनः संयोगस्य सर्वदाऽन्यतरक्रियाजन्यत्वेन न विशेषः संभवतीत्यत आह आत्ममनःसंयोगस्येति (कं. २५७) परप्रत्ययविषयोद्बोधातिशयकृतं प्रत्ययपाटवं ग्रहणदर्शनादिति। पुनरुच्चारणोपयोगिस्मरणदर्शनादित्यर्थः। अत्यन्ताश्चर्यंतरे वस्तुनीति (कं. २५७) अ(औ)त्सुक्यविशेषण दर्शनीय इत्यर्थः। विषयसंकीर्तनमिति (कं. २५७) कारणभेदवद्विषयभेदोऽपि वैधर्म्यमिति दर्शयितुमित्यर्थः।

नन्वतीतविषयत्वमनुमानस्याप्यस्ति तत्कथं स्मृतेरेव वैधर्म्यमित्यत आह तत्र चेति (कं. २५७) अत एव न प्रमाणं न प्रमेत्यर्थः। ननु यदि ज्ञानान्तरसापेक्षतया स्मृतिर्न प्रमातर्यनुमितिरपि तथा स्यादित्यत आह – अनुमानज्ञानमिति (कं. २५७)। स्मृतिरिवेति (कं. २५७) स्वविषयपरिच्छेदे पूर्वानुभवापेक्षणात्।

---

१ जनितात् संस्काराज्जायते – कं. १; कं. २। २ न – जे. १, जे. २, जे. ३। ३ यथा साक्षात् – कं. १; कं. २। ४ क्वचिच्चात्यन्ताश्चर्यंतरे वस्तुनि सकृदुपलब्धे – कं. १, कं. २; क्वचिदत्यन्त – जे. ३। ५ सङ्कीर्तनं कृतम् – कं. १, कं. २। ६ प्रत्यक्षीकृतेषु – कं. १, कं. २। ७ अनुभूतेष्वनु – कं. १, कं. २। ८ व्यवसायः – कं. १, कं. २। ९ श्चेति – कं. १, कं. २। १० तदित्येव – कं. १, कं. २। ११ स्वविषये – कं. १; कं. २। १२ बुद्धयो – कं. १, कं. २; जे. १।

प्रशस्तपादभाष्यम्

[219] [1]आम्नायविधातृणामृषीणामतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगाद् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते । तत् तु प्रस्तारेण देवर्षीणाम्, कदाचिदेव लौकिकानां यथा कन्यका ब्रवीति 'श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयति' इति ।

न्यायकन्दली

पूर्वविज्ञानविषयं विज्ञानं स्मृतिरिष्यते ।
पूर्वज्ञानाद्विना तस्याः प्रामाण्यं नावगम्यते ॥ इति । यथा चेदमाहुः कारिकायाम्–
तत्र यत् पूर्वविज्ञानं तस्य प्रामाण्यमिष्यते ।
तदुपस्थानमात्रेण [2]स्मृतेः स्याच्चरितार्थता ॥ इति ।

ये त्वनर्थजत्वात् स्मृतेरप्रामाण्यमाहुः, तेषामतीतानागतविषयस्यानु[3]मानस्याप्रामाण्यं स्यादिति दूषणम् ।

[219] आर्षं व्याचष्टे – आम्नायविधातृणामिति । आम्नायो वेदस्तस्य विधातारः कर्तारो ये ऋषयस्तेषामतीतेष्वनागतेषु वर्तमानेष्व[4]तीन्द्रियेष्विन्द्रियपथातीतेषु धर्माधर्मदिक्कालप्रभृतिषु ग्रन्थोपनिबद्धेष्वागमप्रतिपादितेष्वनुपनिबद्धेष्वागमाप्रतिपादितेषु चात्ममनसोः संयोगाद्यत् प्रातिभं ज्ञानं [5]यथात्मनिवेदनं यथान्यस्वरूपसंवेदनं संशयविपर्ययरहितं

( ॥ अथ बुद्ध्यधिकारे विद्याभेदनिरूपणे आर्षनिरूपणम् ॥ )

[टि०]

[219] योगि[6]प्रत्यक्षे योगजो धर्मः सहकारी आर्षे तु नायं कुमारिकाणां योगजधर्माभावाद् इति द्वयोर्विशेषः ॥ आर्षम् ॥

( ॥ इति बुद्ध्यधिकारः समाप्तः ॥ )

[कु०] {219} तस्य विधातारः कर्तार इति (कं. २५८) तस्य विभागादिकर्तारः व्यासादय ईश्वरस्यैव प्रणेतृत्वाङ्गीकारादतिशयाधानमपि करोतीत्यर्थः । यथा द्वयं तैलेन कुर्वतीति (!) । आगमाप्रतिपादितेष्विति (कं. २५८) येषां–[एवं वक्तृका?]दीनां केवलमाचारायैवानुष्ठानां तान्यागमाप्रतिपादितान्याचक्षते विद्वांस इति (कं. २५८) ।

---

१ आम्नायविधातृणामतीता–दे । २ स्मृतेश्च–कं. १, कं. २ । ३ मस्य प्रामाण्यं–जे. १ । ४ तीन्द्रियेष्वर्थेष्विन्द्रियपथातीतेषु–जे. २, जे. ३; तीन्द्रियेषु–कं. १, कं. २ । ५ यथार्थनिवेदनं यथा स्वरूपसंवेदनं–कं. १, कं. २ । ६ प्रत्यक्षो–ब ।

## प्रशस्तपादभाष्यम्

सिद्धदर्शनं न ज्ञानान्तरम् [1]कस्मात् ? अञ्जनपादलेपखड्गगुलिकादिसिद्धानां दृश्यद्रष्टॄणां सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु यद्दर्शनं तत्प्रत्यक्षमेव। अथ दिव्यान्तरिक्षभौमानां प्राणिनां ग्रहनक्षत्रसञ्चारा[2]दिनिमित्तं धर्माधर्मविपाकदर्शनमिष्टम्, तदप्यनुमानमेव। अथ लिङ्गानपेक्षं [3]धर्मादिषु दर्शनमिष्टं तदपि प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूतमित्येवं बुद्धिरिति।

## न्यायकन्दली

ज्ञानमुत्पद्यते तदार्षमित्याचक्षते विद्वांसः। इन्द्रियलिङ्गाद्यभावे [4]यदर्थप्रतिभानं सा प्रतिभा, प्रतिभैव प्रातिभमित्युच्यते [5]विद्वद्भिः। तस्योत्पत्तिरनुपपन्ना कारणाभावा[6]दित्यनुयोगे सति इदमुक्तम् धर्मविशेषादिति। विशिष्यते इति विशेषो धर्म एव विशेषो धर्मविशेषः [7]तपःसमाधिजः प्रकृष्टो धर्मस्तस्मात् प्रतिभोदयः। [8]तत्तु प्रातिभं प्रस्तारेण बाहुल्येन देवर्षीणां भवति, कदाचिदेव [9]लौकिकानाम्। यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति। न चेदं संशयः, उभयकोटिसंस्पर्शाभावात्। न च विपर्ययः, संवादादतः प्रमाणमेव।

[कु०] आर्षज्ञानसद्भावे प्रमाणं सूचयति – इदमिति (कं. २५८) एवं वक्तृकाद्यनुष्ठानं स्वाभिमतसाक्षात्कारिपुरुष-वर्तित्वं शिष्टाचारत्वाज्ज्योतिष्टोमवत्, यद्वा पुराणव्यवहारप्रसिद्धिर्वा प्रमाणं प्रतिभैव प्रातिभमिति प्रतिज्ञातस्यात्। यदि प्रकृष्टधर्मसहितात्ममनःसंयोगजमार्षं ज्ञानं तर्हि युक्तावस्थादयोगिप्रत्यक्षान्तर्भावः स्यादित्यत आह कदाचिदेव लौकिकानामिति (कं. २५८) न हि लौकिकानां युक्तावस्था संभवति, प्रकृष्टसुधर्मकार्यदर्शनात्कल्पाया अपि कल्प्यत इति भावः। अतः प्रमाणमेवेत्यर्थाव्यभिचार्यनुभवत्वादिति भावः। न च वाच्यं परोक्षत्वेऽनुमानान्तर्भावः, अपरोक्षत्वे प्रत्यक्षान्तर्भाव इति। पक्षद्वयव्यापकमिन्द्रियलिंगव्यावृत्त्या तत्त्वव्यावृत्तेः। तत्प्रत्यक्षत्वमेवेत्यंजनादिसहकृतस्यैवा-लोचनस्य रश्मेर्व्यवहितविप्रकृष्टप्राप्तिरेव कल्प्यताम्, कल्पनालाघवायेति भावः। यथोक्तं लौकिकैरपीति खलु मणिमंत्रौषधीनां प्रभाव इति ग्रहसंचारादीनां लिंगत्वादिति बृहस्पत्यादिवचनाल्लिंगत्वावगतेरित्यर्थः। शेषमति-रोहितार्थम्।

व्याख्याविख्यातकीर्तिः कुलिशकमलल्लू (मुडु ?) पतिर्बुद्धिमिच्छन्
स्पष्टे मार्गे मनोज्ञे मतिमदधिपतिः श्रीधराचार्यदृष्टे।

---

१ कथय – सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु सिद्धानां द्रष्टॄणां दृश्यानामञ्जनपादलेपखड्गगुलिकादिसिद्धानां दर्शनं प्रत्यक्षमेव – दे। २ निमित्तमुपलभ्य – व्यो. (६२३)। ३ धर्माधर्मादिषु – व्यो. (६२३), धर्मादिषु – दे। ४ यदर्थप्रतिभासनं – जे. २। ५ तत्र भवद्भिः – जे. २, जै. ३; – कं. १; कं. २। ६ दित्यनुपयोगे – कं. १। ७ विद्यातपः – कं. १; कं. २। ८ तत्तु प्रस्तारेण – कं. १; कं. २। ९ मपि – कं. १; कं. २।

प्रशस्तपादभाष्यम्

[220] अनुग्रहलक्षणं सुखम् । स्रगाद्यभिप्रेतविषयसान्निध्ये सतीष्टोपलब्धीन्द्रियार्थसन्निकर्षाद् धर्माद्यपेक्षादात्ममनसोः संयोगादनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्यते तत् सुखम् । अतीतेषु विषयेषु स्मृतिजम् । अनागतेषु सङ्कल्पजम् । यत्तु विदुषामसत्सु विषयान्[1]स्मरणेच्छासङ्कल्पेष्वाविर्भवति तद्विद्याशमसन्तोषधर्मविशेषनिमित्तमिति ॥

न्यायकन्दली

सिद्धदर्शनमपि विद्यान्तरमिति केचिदिच्छन्ति तन्निवृत्त्यर्थमाह--सिद्धदर्शनं न ज्ञानान्तरम् । एतदेवोपपादयति--कस्मादित्यादिना । [2]प्रश्नपूर्वकमञ्जनपादलेपादिसिद्धानां दृश्यानां दर्शनयोग्यानां स्वरूपवतां पदार्थानां द्रष्टारो ये ते 'सिद्धाः' उच्यन्ते । तेषां दृश्यद्रष्टृणामञ्जनादिसिद्धानां सूक्ष्मेषु व्यवहितेषु विप्र[3]कृष्टेषु चार्थेषु यद्दर्शनमिन्द्रियाधीनानुभवस्तत्प्रत्यक्षमेव । अथ दिव्यान्तरिक्षभौमानां प्राणिनां ग्रहनक्षत्रसञ्चारनिमित्तं धर्माधर्मविपाकदर्शनं [4]सिद्धदर्शनमिष्टं तदप्यनुमानमेव, ग्रहसञ्चारादीनां लिङ्गत्वात् । अथ लिङ्गानपेक्षं धर्मादिषु [5]दर्शनमिष्टं सिद्धानां तत्प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूतम् । यदि धर्मादिदर्शनमिन्द्रियजं तदा प्रत्यक्षम् । अथेन्द्रियानपेक्षं तदार्षमित्यर्थः । उपसंहरति–एवं बुद्धिरिति । एवमनन्तरो[6]क्तग्रन्थक्रमेण । बुद्धिर्व्याख्यातेत्यर्थः । इतिशब्दः परिसमाप्तिं सूचयति ।

( ॥ अथ गुणग्रन्थे सुखनिरूपणम् ॥ )

[टि०]

[220-221] [7]अनुग्रह(हः) सुखविषयम् इति :- [8]अत्र भाव[9]प्रधानोऽनुग्रह-शब्दः ॥ सुखम् ॥

[कु०] बुध्यध्वं तां बुद्धेदा(?)भवदभिलषितप्राप्तये तत्प्रदिष्टान्

भोगान्भाकुत्कमां(र्मा)न्यैः कुमतिकलुषितैर्वमं(वर्त्मा!)भिनिष्यमा(म)र्यान् ॥

इति बुद्धिप्रकरणम् ॥

---

१ नुस्मरणसङ्कल्पेषु–दे । २ प्रयत्न–कं. १; कं. २ । ३ विप्रकृष्टेषु यद्दर्शन–कं. १; कं. २ । ४ सिद्धस्थान–कं. १; कं. २ । ५ मिष्टं तत्–कं. १; कं. २ । ६ यतेन क्रमेण बुद्धिरिति बुद्धिर्व्याख्यातेत्यर्थः–कं. १, कं. २; एवमनन्तरोक्तेन क्रमेण बुद्धिर्व्याख्यायातेत्यर्थः–जे. २, जे. ३ । ७ अनुग्रहः –मु. जे. १, २, ३ । ८ अत्र–अ, ब । ९ प्रभावो –अ, ब, क ।

प्रशस्तपादभाष्यम्

[221] उपघातलक्षणं दुःखम् । विषाद्यनभिप्रेतविषयसान्निध्ये सत्यनिष्टोपलब्धीन्द्रियार्थसन्निकर्षादधर्माद्यपेक्षादात्ममनसोः संयोगाद्यदमर्षोपघातदैन्यनिमित्तमुत्पद्यते तद् दुःखम् । अतीतेषु सर्पव्याघ्रचौरादिषु स्मृतिजम् । अनागतेषु सङ्कल्पजमिति ।

न्यायकन्दली

[221] बुद्धिकार्यत्वात् सुखं[1] बुद्ध्यनन्तरं व्याचष्टे—अनुग्रहलक्षणं सुखमिति । अनुगृह्यतेऽनेनेत्यनुग्रहः, अनुग्रहलक्षणमनुग्रहस्वभावमित्यर्थः । सुखं ह्यनुकूलस्वभावतया स्वविषयमनुभवं कुर्वन् [2]पुरुषमनुगृह्णाति । एतदेव व्याचष्टे—स्रगादीति । स्रक्चन्दनवनितादयो येऽभिप्रेता विषयास्तेषां [3]सान्निध्ये सन्निकर्षे सतीष्टोपलब्धीन्द्रियार्थसन्निकर्षाद्धर्माद्यपेक्षाद्यदुत्पद्यते तत् सुखम् । इन्द्रिय[4]सन्निहितेऽप्यभिमतेऽर्थे विषयान्तरव्यासक्तस्य सुखानुत्पादादिष्टोपलब्धेः कारणत्वं गम्यते । वियुक्तस्य सुखाभावाद्विषयसन्निकर्षस्यापि कारणत्वावगमः । [5]धर्मादीत्यादिपदेन स्वस्थतादिपरिग्रहः । अनुग्रहाभिष्वङ्गनयनादिप्रसाद[6]जनकमिति कार्योपवर्णनम् । अनुग्रहः सुखविषयं संवेदनम् । अभिष्वङ्गः अनुरागः, नयनादिप्रसादो वैमल्यम् । आदिशब्दान्मुखप्रसादस्य ग्रहणम् । एतेषां सुखं जनकम् । सुखेनोत्पन्नेन स्वानुभवो जन्यते, स एवात्मनोऽनुग्रहः, सुखे चोपजाते मुखादीनां प्रसन्नता स्यात् । सुख[7]साधनेष्वनुरागः सुखाद्भवति । अतीतेषु स्मृतिजम् अतीतेषु सुखसाधनेष्वनुभूतेषु सुखं पूर्वानुस्मरणाद्भवति [8]अनागतेष्विदं मे भविष्यतीति सङ्कल्पाज्जायते । यत्तु विदुषामात्मज्ञानवतामसत्सु विषयानुस्मरणसङ्कल्पेष्वसति विषयेऽसति चानुस्मरणे असति च सङ्कल्पे [9]चाविर्भवति, तद्विद्याशमसन्तोषधर्मविशेषनिमित्तमिति । विद्या आत्मज्ञानम्, शमो जितेन्द्रियत्वम्, सन्तोषो देहस्थितिहेतुमात्रातिरिक्तानभिकाङ्क्षित्वम्, धर्मविशेषः प्रकृष्टो धर्मो निवर्तकलक्षणः, एतच्चतुष्टयनिमित्तम् ।

ये तु दुःखाभावमेव सुखमाहुस्तेषामानन्दा[10]त्मतानुभवविरोधः, हितमाप्स्यामि, अहितं हास्यामीति प्रवृत्तिद्वैविध्यानुपपत्तिश्च ।

---

१ बुद्धेरनन्तरं—जे. ३ । २ पुरुषान्तर—कं. १, कं. २ । ३ सान्निध्ये सति—कं. १, कं. २ । ४ सन्निहिते—कं. १, कं. २; जे. २, जे. ३ । ५ धर्मादि—जे. १ । ६ जनन—जे. १ । ७ साधने—जे. ३ । ८ अनागतेषु सङ्कल्पजमिदं मे भविष्यति भवत्विदमिति—जे. १ । ९ यदाविर्भवति—जे. १ । १० त्मना—कं. १; कं. २ ।

प्रशस्तपादभाष्यम्

[222] स्वार्थं परार्थं वाऽप्राप्तप्रार्थनेच्छा । सा चात्ममनसोः संयोगात् सुखाद्यपेक्षात् स्मृत्यपेक्षाद्वोत्पद्यते । प्रयत्नस्मृतिधर्माधर्महेतुः । कामोऽभिलाषः, रागः सङ्कल्पः, कारुण्यम् वैराग्यमुपधा भाव इत्येवमादय इच्छाभेदाः ।

न्यायकन्दली

सुखप्रत्यनीकतया तदनन्तरं दुःखं व्याचष्टे–उपघातलक्षणं दुःखम् । उपहन्यतेऽनेनेत्युपघातः, उपघातलक्षणम् उपघातस्वभावम् । दुःखमुपजातं प्रतिकूलस्वभावतया स्वात्मविषयमनुभवं कुर्वदात्मानमुपहन्ति । एतद्विवृणोति–[1]अनिष्टोपलब्धीत्यादिना । अमर्षोऽसहिष्णुता द्वेष इति यावत् । उपघातो दुःखानुभवः, दैन्यं विच्छायता, तेषां निमित्तम् । दुःखे सति तदनुभवलक्षण [2]आत्मोपघातः स्यात् । अतीतेषु सर्पादिषु स्मृतिजम्, अनागतेषु सङ्कल्पजमिति [3]सुखवद्व्याख्यानम् ।

[222] स्वार्थं परार्थं वाऽप्राप्तप्रार्थनेच्छा । अप्राप्तस्य वस्तुनः स्वार्थं प्रति या प्रार्थना इदं मे भूयादिति, परार्थं [4]वा या प्रार्थना अस्येदं भवत्विति सेच्छा । सा चात्ममनसोः संयोगात् [5]सुखाद्यपेक्षात् स्मृत्यपेक्षाद्वोत्पद्यते । अनागते सुखसाधने वस्तुनीच्छा उपजायते, तदुत्पत्तौ च तद्विषयसाध्यं सुखमनागतमपि बुद्धिसिद्धत्वान्निमित्तकारणम् । [6]यथाह न्यायवार्त्तिककारः–"फलस्य प्रयोजकत्वात्" इति । अतिक्रान्ते सुखहेताविच्छोत्पत्तेः स्मृतिः कारणम् । प्रयत्नस्मृतिधर्माधर्महेतुः । उपादानेच्छातस्तदनुगुणः प्रयत्नो भवति, स्मरणेच्छातः स्मरणम्, विहितेषु ज्योतिष्टोमादिषु फलेच्छया प्रवृत्तस्य धर्मो [7]जायते । प्रतिषिद्धेषु रागात् प्रवृत्तस्याधर्मः । कामादयोऽपि सन्ति ते कस्मान्नोक्ताः? अत आह– काम इत्यादि ।

( ॥ अथ गुणग्रन्थे इच्छानिरूपणम् ॥ )

[टि०]

[222 to 227] [8]फलस्य [9]प्रयोजकत्वाद् इति स्वर्गादिसुखं ज्योतिष्टोमादौ प्रयोजयति ॥ इच्छा ॥

१ विषादीत्यादिना–जे. १ । २ आत्मन उपघातः – जे. ३ । ३ पूर्वं – कं. १; कं. २ । ४ वा प्रार्थना – कं. १, कं. २ । ५ सुखापेक्षात् – जे. २ । ६ यदाह – कं. १; कं. २ । ७ उपजायते – जे. १ । ८ फलस्य – अ, ब । ९ प्रयोजनत्वाद् – अ, ब, क ।

### प्रशस्तपादभाष्यम्

मैथुनेच्छा कामः । [1]अभ्यवहारेच्छाभिलाषः । पुनः पुनर्विषयानुरञ्जनेच्छा रागः । अनासन्नक्रियेच्छा सङ्कल्पः । स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा कारुण्यम् । दोषदर्शनाद्विषयत्यागेच्छा वैराग्यम् । परवञ्चनेच्छा उपधा । अन्तर्निगूढेच्छा भावः । चिकीर्षाजिहीर्षेत्यादिक्रियाभेदादिच्छाभेदा भवन्ति ।

[223] प्रज्वलनात्मको द्वेषः । यस्मिन् सति प्रज्वलितमिवात्मानं मन्यते स द्वेषः । स चात्ममनसोः संयोगाद् दुःखापेक्षात् स्मृत्यपेक्षाद्वोत्पद्यते । यत्नस्मृतिधर्माधर्मस्मृतिहेतुः । क्रोधो द्रोहो मन्युरक्षमाऽमर्ष इति द्वेषभेदाः ॥

### न्यायकन्दली

कामादय इच्छाप्रभेदाः, न तत्त्वान्तरमिति यदुक्तं तदेव दर्शयति– मैथुनेच्छा काम इति । निरुपपदः कामशब्दो मैथुनेच्छायामेव प्रवर्तते, अन्यत्र तस्य पदान्तरसमभिव्याहारात् [2]प्रवृत्तिः, यथा स्वर्गकामो यजेत इति । अभ्यवहारेच्छा अभिलाषः । अभ्यवहारो भोजनम्, तत्रेच्छा अभिलाषः । पुनः पुनर्विषयानुरञ्जनेच्छा रागः । पुनर्विषयाणां भोगेच्छा राग इत्यर्थः । अनासन्नक्रियेच्छा सङ्कल्पः । अनागतस्यार्थस्य करणेच्छा सङ्कल्पः । स्वार्थमनपेक्ष्य परदुःख[3]प्रहाणेच्छा कारुण्यम् । [4]स्वार्थं स्वप्रयोजनं किमप्यनभिसन्धाय या परदुःखप्रहाणे अपनयने इच्छा सा कारुण्यम् । दोषदर्शनाद् दुःखहेतु[5]त्वावगमाद् विषयाणां [6]परित्यागेच्छा वैराग्यम् । परवञ्चनेच्छा परप्रतारणेच्छा उपधा । अन्तर्निगूढेच्छा लिङ्गैराविर्भाविता येच्छा सा भावः । चिकीर्षा जिहीर्षा इत्यादिक्रियाभेदादिच्छाभेदा भवन्ति । करणेच्छा चिकीर्षा, हरणेच्छा [7]जिहीर्षा, गमनेच्छा जिगमिषेत्येवमादय इच्छाभेदाः क्रियाभेदाद्भवन्ति ।

[223] प्रज्वलनात्मको द्वेषः । एतद्विवृणोति–यस्मिन् सतीत्यादिना । तद्व्यक्तम् । स चात्ममनसोः संयोगाद् दुःखापेक्षात् स्मृत्यपेक्षाद् वोत्पद्यते । [[8]सन्निहिते दुःखहेतावनुभूयमाने तत्साध्ये दुःखे द्वेषो दुःखादुत्पद्यते] । अतीते दुःखहेतौ तज्जदुःखस्मृतिजो द्वेषः ।

---

१ अभ्यवहरणेच्छा–व्यो, (६२६)– दे । २ वृत्तिः – जे. १ । ३ प्रहरणेच्छा–जे. २ । ४ स्वार्थप्रयोजनं – कं. १; कं. २ । ५ त्वावगमे – कं. १; कं. २ । ६ परित्यागे इच्छा – कं. १; कं. २ । ७ जिहीर्षा इत्येवमादयः – जे. १ । ८ [ ] एतच्चिह्नान्तर्गतः पाठः कं. १, कं. २ पुस्तकयोर्नास्ति ।

## प्रशस्तपादभाष्यम्

[224] प्रयत्नः संरम्भ उत्साह इति पर्यायाः । स द्विविधः जीवनपूर्वकः, इच्छाद्वेषपूर्वकश्च ।

तत्र जीवनपूर्वकः सुप्तस्य प्राणापानसन्तानप्रेरकः, प्रबोधकाले चान्तःकरणस्येन्द्रियान्तरप्राप्तिहेतुः । अस्य जीवनपूर्वकस्यात्ममनसोः संयोगाद्धर्माधर्मापेक्षादुत्पत्तिः ।

इतरस्तु हिताहितप्राप्तिपरिहारसमर्थस्य [1]व्यापारस्य हेतुः शरीर[2]विधारकश्च । स चात्ममनसोः संयोगादिच्छापेक्षाद् द्वेषापेक्षाद्वोत्पद्यते ॥

## न्यायकन्दली

प्रयत्नधर्माधर्मस्मृतिहेतुः । एनमहं हन्मीति प्रयत्नो द्वेषात्, वेदार्थविप्लवकारिषु द्वेषाद्धर्मः, तदर्थपरिपालनपरेषु द्वेषादधर्मः । स्मृतिरपि द्वेषा[3]दुपजायते, यो यं द्वेष्टि स तं सततं स्मरति । क्रोधो द्रोहो मन्युरक्षमाऽमर्ष इति द्वेषभेदाः । शरीरेन्द्रियादिविकारहेतुः क्षणमात्रभावी द्वेषः क्रोधः । अलक्षितविकारश्चिरा[4]नुबद्धापकारावसानो द्वेषो द्रोहः । अपकृतस्य प्रत्यपकारासमर्थस्यान्तर्निगूढो द्वेषो मन्युः । परगुणद्वेषोऽक्षमा । स्वगुणपरिभवसमुत्थो द्वेषोऽमर्षः ।

[224] प्रयत्नः संरम्भ उत्साह इति पर्यायाः । स द्विविधो जीवनपूर्वक [5]इच्छाद्वेषपूर्वकश्चेति । सदेहस्यात्मनो विपच्यमानकर्माशयसहितस्य मनसा [6]सह संयोगः सम्बन्धो जीवनम्, तत्पूर्वकः प्रयत्नः कामर्थक्रियां करोति इत्यत आह—

तत्र जीवनपूर्वक इति । सुप्तस्य प्राणापानक्रिया [7]प्रयत्नकार्या प्राणापानक्रियात्वात्, जाग्रतः प्राणापानक्रियावत् क्रियात्वात् । न च तदानीमिच्छाद्वेषौ प्रयत्नहेतू सम्भवतः, तस्माज्जीवनपूर्वक एव प्रयत्नः प्राणापानप्रेरको गम्यते । न केवलं [8]जीवनपूर्वकः प्रयत्नः प्राणापानप्रेरकः, किन्तु प्रबोधकालेऽन्तःकरणस्येन्द्रियान्तरप्राप्तिहेतुश्च । विषयोपलम्भानुमितान्तःकरणेन्द्रियसंयोगः प्रयत्नपूर्वकान्तःकरणक्रियाजन्यः, अन्तःकरणेन्द्रियसंयोगत्वात्, जागरान्तःकरणेन्द्रियसंयोगवदिति प्रयत्नपूर्वकतासिद्धिः । अस्य जीवनपूर्वकस्यात्ममनसोः संयोगाद्धर्माधर्मापेक्षादुत्पत्तिः, धर्माधर्मापेक्ष आत्ममनसोः संयोगो जीवनम्, तस्मादस्योत्पत्तिरित्यर्थः ।

१ व्यायामस्य – दे । २ विधायक – दे । ३ विजायते – जे. ३ । ४ नुबद्धोऽपकाराव – जे. १, जे. २, जे. ३ । ५ इत्यादि – कं. १, कं. २ । ६ सह सम्बन्धो – जे. १; सह योगः सम्बन्धो – जे. २ । ७ प्रयत्नकार्या–क्रियात्वात् – कं. १, कं. २ । ८ जीवनपूर्वक एव – कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

[225] गुरुत्वं जलभूम्योः पतनकर्मकारणम् । अप्रत्यक्षं पतनकर्मानुमेयं संयोगप्रयत्नसंस्कारविरोधि । तस्य चाबादिपरमाणुरूपादिवन्नित्यानित्यत्वनिष्पत्तयः ।

न्यायकन्दली

इतरस्तु इच्छाद्वेषपूर्वकस्तु हिताहितप्राप्तिपरिहारसमर्थस्य [3]व्यापारस्य हेतुः शरीरविधारकश्च । गुरुत्वे सत्य[4]पततः शरीरस्येच्छापूर्वकः प्रयत्नो विधारकः । स चात्ममनसोः संयोगादिच्छाद्वेषापेक्षादुत्पद्यते । हितसाधनो[5]पादाने प्रयत्न इच्छापूर्वकः, दुःखसाधनपरित्यागे प्रयत्नो द्वेषपूर्वकः ।

[225] गुरुत्वं जलभूम्योरित्याश्रयकथनम् । पतनकर्मकारणमिति तस्य कार्यनिरूपणम् । अप्रत्यक्षमिति स्वभावोपवर्णनम्, न केनचिदिन्द्रियेण गुरुत्वं गृह्यत इत्यर्थः ।

ये तु त्वगिन्द्रियग्राह्यं गुरुत्वमाहुः, तेषामधःस्थितस्य द्रव्यस्य स्पर्शोपलम्भवद् गुरुत्वोपलम्भप्रसङ्गः, त्वगिन्द्रियस्यार्थोपलम्भे [6]स्वसन्निकर्षव्यतिरेकेणान्यापेक्षासम्भवात् । यत्तूपरिस्थितस्य गुरुत्वं प्रतीयते, तद्धस्तादीनामधोगमनानुमानात् । अतीन्द्रियं चेत् कथमस्य प्रतीतिः ? इत्यत आह–[7]पतनकर्मानुमेयमिति । यदवयविद्रव्यस्य पतनं तेन यदेकार्थसमवेतासमवायि[8]कारणमनुमीयते तदेव हि नो गुरुत्वम् । एतेनैतत् प्रत्युक्तं यदुक्तमपरैः– "अवयविगुरुत्वकार्यस्यावनतिविशेषस्यानुपलम्भादवयविनि गुरुत्वाभावः" इति, अवयविनः पतनाभावप्रसङ्गात् । [9]अथावयवानां गुरुत्वादेव तस्य पतनम् ? तदावयवानामपि स्वावयवापेक्षयाऽवयवित्वात् । पतनमिति सर्वत्र कार्ये तदुच्छेदः । अथ व्यधिकरणेभ्यः [10]स्वावयवगुरुत्वेभ्योऽवयवानां पतनासम्भवात् तेषु गुरुत्वं कल्प्यते, तदा अवयविन्यपि कल्पनीयम्, न्यायस्य समानत्वात् । यत् पुनरवयविगुरुत्वस्य कार्यातिरेको

१ अस्य च – कं. १, कं. २, कि । २ पूर्वकश्च – कं. १, कं. २; पूर्वकः – जे. १ । ३ व्यायामस्य–व्यापारस्य– कं. १, कं. २; भाष्ये–दे पुस्तके व्यायामस्य इत्यस्य स्थाने व्यापारस्य इति पाठः –सं. । ४ सत्यापततः – जे. २, जे. ३ । ५ पादानेषु – कं. १, कं. २; जे. २ । ६ तत्सन्निकर्ष – जे. १ । ७ पतनानुमेयमिति – जे. १, जे. २, जे. ३ । ८ कारणं तदेव – कं. १; कं. २ । ९ अथावयवगुरुत्वादेवास्य – जे. १, वयवगुरुत्वादेव तस्य–जे. ३, वयवानां गुरुत्वादेवास्य – जे. २ । १० स्वावयवगुरुत्वात् – कं. १, कं. २; जे. २, जे. ३ ।

### प्रशस्तपादभाष्यम्

[226] द्रवत्वं स्यन्दनकर्मकारणम् । त्रिद्रव्यवृत्ति । तत्तु द्विविधम् । [1]सांसिद्धिकम्, नैमित्तिकं च । सांसिद्धिकमपां विशेषगुणः । नैमित्तिकं पृथिवीतेजसोः सामान्यगुणः ।

### न्यायकन्दली

न गृह्यते, तदवयवावयविगुरुत्वभेदस्याल्पान्तरत्वात् । यथा महति द्रव्ये उन्मीयमाने तत्पतितसूक्ष्मद्रव्यान्तरगुरुत्व[2]कार्यान्तराग्रहणम् ।

संयोगप्रयत्नसंस्कारविरोधि । गुरुत्वस्य संयोगेन प्रयत्नेन वेगाख्येन च संस्कारेण सह विरोधो विद्यते, तैः प्रतिबद्धस्य स्वकार्याकरणात् । तथा च दोलारूढस्य संयोगेन [3]प्रतिबन्धादपतनम्, प्रयत्नेन प्रति[4]बन्धादपतनं च शरीरस्य, वेगेन [5]प्रतिबन्धादपतनं बहिः क्षिप्तस्य शरशलाकादेः ।

[6]तस्य चाबादिपरमाणुरूपादिवन्नित्यानित्यत्वनिष्पत्तयः । यथाप्यपरमाणुरूपादयो नित्यास्तथा पार्थिवाप्यपरमाणुष्वपि गुरुत्वम् । यथा चाबादिकार्यद्रव्ये कारणगुणपूर्वप्रक्रमेण रूपादयो जायन्ते, आश्रयविनाशाच्च विनश्यन्ति, तथा गुरुत्वमपि ।

[226] द्रवत्वं स्यन्दनकर्मकारणम् । यत् स्यन्दन[7]कर्मकारणं तद् द्रवत्वमित्यर्थः । त्रिद्रव्यवृत्ति पृथिव्युदकज्वलनवृत्तीत्यर्थः । तत्तु द्विविधमिति । गुरुत्वमेकविधं द्रवत्वं तु द्विविधमिति तुशब्दार्थः । नैमित्तिकं सांसिद्धिकं च । [8]निमित्तं वह्निसंयोगः, तस्येदं कार्यमिति नैमित्तिकम् । [9]सांसिद्धिकं स्वभावसिद्धम् वह्निसंयोगानपेक्षमिति यावत् । सांसिद्धिकमपां विशेषगुणः, अन्यत्राभावात् । नैमित्तिकं पृथिवीतेजसोः सामान्यगुणः, [10]साधारणगुणत्वात् ।

सांसिद्धिकस्य द्रवत्वस्य गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः । यथा नित्यद्रव्यसमवेतं गुरुत्वं नित्यम्, अनित्यद्रव्यसमवेतं च कार्यकारणगुणपूर्वकमाश्रयविनाशाद्वि[11]नश्यतीति तथा सांसिद्धिकं द्रवत्वमपि ।

---

१ नैमितिकं सांसिद्धिकं च तत्र–दे । २ कार्याग्रहणम् – कं. १, कं. २; जे. २, जे. ३ । ३, ४, ५ कं. १ पुस्तके सर्वत्र प्रतिबद्धत्वाद् इति पाठः । ६ अस्य च – कं. १, कं. २ । ७ कर्मणः–जे. १, जे. २ जे. ३ । ८ निमित्तं च–कं. १, कं. २ । ९ सांसिद्धिकं च–कं. १, कं. २; जे. २, जे. ३ । १० साधारणत्वात्–कं. १; कं २; जे. ३ । ११ विनाशि–जे. १, जे. २ ।

प्रशस्तपादभाष्यम्

सांसिद्धिकस्य गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः । सङ्घातदर्शनात् सांसिद्धिक[1]द्रवत्वमयुक्तमिति चेन्न, दिव्येन तेजसा संयुक्तानामाप्यानां परमाणूनां परस्परं संयोगो द्रव्यारम्भकः सङ्घाताख्यः, तेन परमाणुद्रवत्वप्रतिबन्धात् कार्ये हिमकरकादौ द्रवत्वानुत्पत्तिः ।

नैमित्तिकं च पृथिवीतेजसोरग्निसंयोगजम् । कथम् ? [2]सर्पिर्जतुमधूच्छिष्टादीनां कारणेषु परमाणुष्वग्निसंयोगाद्वेगापेक्षात् कर्मोत्पत्तौ तज्जेभ्यो विभागेभ्यो द्रव्यारम्भकसंयोगविनाशात् कार्यद्रव्यनिवृत्तावग्निसंयोगादौष्ण्यापेक्षात् स्वतन्त्रेषु परमाणुषु

न्यायकन्दली

अत्र चोदयति—सङ्घातदर्शनात् सांसिद्धिकद्रवत्वमयुक्तमिति चेत् आप्यस्य हिमक[3]रकादेर्द्रव्यस्य सङ्घातदर्शनात् काठिन्यदर्शनादपां स्वभावसिद्धं द्रवत्वमित्ययुक्तम् । समाधत्ते—दिव्येनेति । [4]सर्वत्रोदके स्वभावसिद्धस्य द्रवत्वस्योपलम्भादपां स्वभावसिद्धमेव द्रवत्वं तावन्निश्चितम् । [5]यत्र तु हिमकरकादौ कार्ये द्रवत्वानुत्पत्तिस्तत्र दिव्येन तेजसा [6]संयुक्तानामाप्यपरमाणूनां परस्परसंयोगो द्रव्यारम्भकः सङ्घाताख्यः, तेन हिमकरकारम्भकाणां परमाणूनां द्रवत्वप्र[7]तिबन्धात् । तेजःसंयोगेन परमाणूनां द्रवत्वं प्रतिबद्धमित्यन्यत्रा[8]प्यद्रव्यस्य लवणस्य वह्निसंयोगेन द्रवत्वप्रतिबन्धदर्शनादनुमितम् । [9]लवणस्या[10]प्यत्वमपि हिमकरकादिवत्कालान्तरेण द्रवीभावदर्शनादवगतम् । विलयनं तु हिमकरकादेर्भौमाग्निसंयोगात् यद्विलयनं कठिनद्रव्यस्य, तद्वह्निसंयोगादवगतम् यथा सुवर्णादीनाम् । हिमकरकादिविलयनमपि विलयनमेव । तस्मादिहापि दृष्टसामर्थ्यो वह्निसंयोग एव निमित्तमाश्रीयते ।

सांसिद्धिकं द्रवत्वं व्याख्याय [11]नैमित्तिकं द्रवत्वं व्याचष्टे—नैमित्तिकं पृथिवीतेजसोरग्निसंयोगजमिति । कथमित्यनेन पृष्टः सन्नुपपादयति—सर्पिरित्यादिना । सर्पिर्जतुमधूच्छिष्टानां पार्थिवानां कारणेषु परमाणुष्वग्निसंयोगात्[12]कर्मोत्पत्तौ सत्यां कर्मजेभ्यो

---

१ सांसिद्धिकमयुक्तम् —कं. १, कं. २, किं । २ सर्पिरादीनां—व्यो (६३२)। ३ करकादिद्रव्यस्य—जे. १, जे २, जे. ३ । ४ सर्वत्रोदकस्य द्रवत्वस्वभावस्योपलम्भादपां स्वाभाविकमेव—जे. ३ । ५ यत्तु—जे. १ । ६ सम्बद्धानां—कं. १, कं. २ । ७ प्रतिबन्धनात्—जे. १. । ८ प्यलवणस्य—जे. १, जे. ३ । ९ लवणलक्षणस्य—जे. ३ । १० आप्यद्रव्यत्वमपि—जे. १ । ११ नैमित्तिकं व्याचष्टे—कं. १, कं २; जे. १ । १२ क्रियोत्पत्तौ—कं १, कं. २; जे. ३ ।

प्रशस्तपादभाष्यम्

द्रवत्वमुत्पद्यते, ततस्तेषु भोगिनामदृष्टापेक्षादात्माणुसंयोगात् कर्मोत्पत्तौ तज्जेभ्यः संयोगेभ्यो द्व्यणुकादिप्रक्रमेण कार्यद्रव्यमुत्पद्यते, तस्मिंश्च रूपाद्युत्पत्तिसमकालं कारण[1]गुणप्रक्रमेण द्रवत्वमुत्पद्यत इति ।

[227] स्नेहोऽपां विशेषगुणः । संग्रहमृजादिहेतुः । अस्यापि गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः ।

[228] संस्कारस्त्रिविधः– वेगो भावना स्थितिस्थापकश्च । तत्र वेगो मूर्तिमत्सु पञ्चसु द्रव्येषु निमित्तविशेषापेक्षात् कर्मणो जायते नियतदिक्क्रियाप्रबन्धहेतुः स्पर्शवद्द्रव्यसंयोगविशेषविरोधी क्वचित्कारणगुणपूर्वक्रमेणोत्पद्यते ।

न्यायकन्दली

विभागेभ्यः सर्पिराद्यारम्भकसंयोगविनाशात् सर्पिरादिद्रव्यनिवृत्तौ सत्यां स्वतन्त्रेषु परमाणुषु वह्निसंयोगाद् द्रवत्वमुत्पद्यते । तदनन्तरमुत्पन्नद्रवत्वेषु परमाणुषु भोगिनामदृष्टापेक्षादात्मपरमाणुसंयोगात् क्रियोत्पत्तौ सत्यां कर्मजेभ्यः परमाणूनां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण कार्यद्रव्ये जाते रूपाद्युत्पत्तिकाले एव कारणद्रवत्वेभ्यो द्रवत्वमुत्पद्यते । हिमकरकादिविलयनेऽप्येवमेव [2]क्रमः ।

[227] स्नेहोऽपां विशेषगुणः संग्रहमृजादिहेतुः । संग्रहः परस्परम[3]संयुक्तानां सक्त्वादीनां पिण्डीभावप्राप्तिहेतुः संयोगविशेषः । मृजा कायस्योद्वर्तनादिकृता वि[4]शुद्धिः । आदिशब्दान्मृदुत्वं च, तेषां हे[5]तुः स्नेहः । अस्यापि गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः । गुरुत्वं च परमाणुषु नित्यम्, कार्ये च कारणगुणपूर्वकमाश्रयविनाशाद्वि[6]नाशि, तथा स्नेहोपीति ।

( ।। अथ गुणग्रन्थे संस्कारनिरूपणम् ।। )

---

१ गुणपूर्वक्रमेण – व्यो (६३२) । २ न्यायः – कं. १, कं. २ । ३ मयुक्तानां – कं. १, कं. २ । वियुक्तानां – जे. ३ । ४ शुद्धिः – कं. १, कं. २ । ५ हेतुः स्नेहस्यापि – कं. १, कं. २ । ६ विनश्यति – जे. १ ।

न्यायकन्दली

[228] संस्कारस्त्रिविधो वेगो भावनास्थि[1]तस्थापकश्चेति । तत्र वेगो मूर्तिमत्सु पञ्चद्रव्येषु निमित्तविशेषापेक्षात् कर्मणो जायते । पञ्चसु द्रव्येषु पृथिव्यप्तेजोवायुमनस्सु कर्म वेगं करोति नान्यत्र, स्वयमभावात् । नोदनाभिघातादिनिमित्तविशेषापेक्षं न केवलम्, मन्दगतौ वेगाभावात् । नियतदिक्क्रियाप्रबन्धहेतुः । यद्दिगाभिमुख्येन क्रियया वेगो जन्यते तद्दिगभिमुखस्यैव क्रियासन्तानस्य हेतुरित्यर्थः । [2]स्पर्शवद्द्रव्यसंयोगविशेषविरोधी । विशिष्टेन स्पर्शवद्द्रव्यसंयोगेनात्यन्तनिबिडावयववृत्तिना वेगो विनाश्यते, यः स्वयंविशिष्टः । मन्दस्तु वेगः स्पर्शवद्द्रव्यसंयोगमात्रेण विनश्यति, यथातिदूरं गतस्येषोस्तिमितवायुप्रतिबद्धस्य । [3]क्वचित्कारणगुणपूर्वप्रक्रमेणोत्पद्यते । बाहुल्येन तावद्वेगः कर्मजः, क्वचिद्वेगवदवयवारब्धे जलावयविनि कारणवेगेभ्योऽपि जायते ।

---

१ स्थिति-कं. १, कं. २ । २ स्पर्शवदिति-कं. १, कं. २ । ३ क्वचिदिति - कं. १, कं. २ ।

### प्रशस्तपादभाष्यम्

[229 to 230] भावनासंज्ञकस्त्वात्मगुणो [1]दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञान[2]हेतुर्भवति ज्ञानमदबुःखादिविरोधी, पट्वभ्यासादरप्रत्ययजः, पटु[3]प्रत्ययापेक्षादात्ममनसोः [4]संयोगादाश्चर्येऽर्थे पटुः [5]संस्कारो जायते । यथा दाक्षिणात्यस्योष्ट्रदर्शनादिति ।

विद्याशिल्पव्यायामादिष्वभ्यस्यमानेषु तस्मिन्नेवार्थे पूर्वपूर्वसंस्कारमपेक्षमाणादुत्तरोत्तरस्मात् प्रत्ययादात्ममनसोः [6]संयोगात् संस्कारातिशयो जायते ।

### न्यायकन्दली

[229] [7]भावनासञ्ज्ञकस्त्वात्मगुणः । भावनासंज्ञकस्तु संस्कार [8]आत्मगुणः । [9]दृष्टश्रुतानुभूतेष्विति । दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतेः प्रत्यभिज्ञानस्य च हेतुरिति तस्य कार्यकथनम् । दृष्टश्रुतानुभूतेष्विति विपर्ययावगतोऽप्यर्थो बोद्धव्यः, तत्रापि स्मृतिदर्शनात् । [10]ज्ञानमदबुःखादिविरोधी । प्रतिपक्षज्ञानेन संस्कारो विनाश्यते । द्यूतादिव्यसनापन्नस्य पूर्वाधीतविस्मरणात् । मदेनापि संस्कारस्य विनाशः, सुरामत्तस्य पूर्वस्मृतिवि[11]लोपात् । मरणादिबुःखादपि संस्कारो विनश्यति, जन्मान्तरानुभूतस्मरणाभावात् । आदिशब्देन सुखादिपरिग्रहः, भोगासक्तस्य कुपितस्य वा पूर्ववृत्तस्मृत्यभावात् । पट्व[12]भ्यासादरप्रत्ययजः । पटुप्रत्ययादभ्यासप्रत्ययादादरप्रत्ययाच्च संस्कारो जायते । पटुप्रत्ययापेक्षादा[13]त्ममनसोः संयोगविशेषादाश्चर्येऽर्थे पटुः संस्कारो जायते । [14]यथा दाक्षिणात्यस्योष्ट्रदर्शनादिति । उष्ट्रो दाक्षिणात्यस्यात्यन्ताननुभूताकारत्वादाश्चर्यभूतोऽर्थः । तद्दर्शनात् तस्य पटुः संस्कारो जायते, कालान्तरेऽप्युष्ट्रानुभवस्मृतिजननात् । अभ्यासप्रत्ययजं संस्कारं दर्शयति–[15]विद्याशिल्पव्यायामादिष्वित्यादिना । विद्या शास्त्रागमादिका, शिल्पं पत्त्रभङ्गादिक्रिया, व्यायाम आयुधादिश्रमः, तेष्वभ्यस्यमानेषु तस्मिन्नेवार्थे पूर्वगृहीते ।

[टि०] [228 to 232] अथ स्फोटवादी स्फोट[16]प्रतिद्वन्द्विनं नित्यशब्दवादिनं मीमांसकमाशङ्कते नित्यत्वाद्वर्णानाम् इति । [17]तथापि तेषाम् इति ज्ञानानां क्षणिकत्वात् ।

---

१ दृष्टः–दे । २ हेतुर्ज्ञान–दे । ३ प्रत्ययापेक्षादाश्चर्येऽर्थे–दे । ४ संयोगविशेषात्–पा. ५. पु. २ । ५ संस्कारातिशयो–कं. १, कं. २ । ६ संयोगाच्च–दे । ७ भावनेत्यादि–कं. १, कं. २ । ८ आत्मनो गुणः –जे. १ । ९ प्रतीकमिदं–जे. १, जे. २, जे. ३. पुस्तकेषु नास्ति । १० ज्ञानेति–कं १, कं. २ । ११ लोपात्–कं. १, कं. २ । १२ पट्वभ्यासेति–कं. १, कं. २ । १३ त्ममनःसंयोगात् जे–१ । १४ यथेति–कं. १, कं. २ । १५ विद्याशिल्पेत्यादि–कं. १, कं. २ । १६ प्रसिद्धद्विन –अ, ब । १७ तथापि न तेषाम् – मु ।

न्यायकन्दली

[1]पूर्वपूर्वसंस्कारमपेक्षमाणादात्ममनसोः संयोगात् संस्कारातिशयो जायते यः सुचिरमनुवर्तते, स्फुटतरं च स्मरणं करोति । न ह्याद्यानुभव एव संस्कारविशेषमाधत्ते, प्रथमं तदर्थस्मरणाभावात् । नाप्युत्तर [2]एव तस्य हेतुः, पूर्वाभ्यासवैयर्थ्यात् । तस्मात् पूर्वसंस्कारापेक्षोत्तरोत्तरानु[3]भवाहिताधिकाधिकसंस्कारोत्पत्तिक्रमेणोपान्त्यसंस्कारापेक्षादन्त्यानुभवात् तदुत्पत्तिः ।

[230] इदं त्विह निरूप्यते । विद्यायामभ्यस्यमानायां किं तदर्थो वाक्येन प्रतिपाद्यते ? किं वा स्फोटेन ? कुतः संशयः ? विप्रतिपत्तेः । एके वदन्ति स्फोटोऽर्थं प्रतिपादयतीति । अपरे त्वाहुर्वाक्यं प्रत्यायकमिति । अतो युक्तः संशयः । किं तावत्प्राप्तम् ? स्फोटोऽर्थप्रत्यायक इति । यदि हि वर्णानतिरिक्तं पदम्, पदानतिरिक्तं च वाक्यम्, तदार्थप्रत्यय एव न स्यादिति । तथाहि न वर्णाः प्रत्येकमर्थविषयां धियमाविर्भावयन्ति, शेषवर्णवैयर्थ्यात् । समुदायश्च तेषां न सम्भवति, अन्त्यवर्णग्रहणसमये पूर्वेषामसम्भवात् । नित्यत्वाद्वर्णानामस्ति समुदाय इति चेत् ? तथापि न तेषां प्रतीतिरनुवर्तते, अप्रतीयमानानां च प्रत्यायकत्वे [4]सर्वदार्थप्रतीतिप्रसङ्गः । नहि प्रतीत्य अप्रतीयमानानां सर्वथा अप्रतीयमानानां च कश्चिद्विशेषः । पूर्वावगता वर्णाः स्मृत्यारूढाः प्रतीतिहेतव इति चेत् ? यदि हि स्मृतिरपि क्रमभाविनी ? तदा नास्ति [5]वर्णवत् साहित्यम्, तृतीयवर्णग्रहणकाले प्रथमवर्णस्मृतिविलोपात्, युगपदुत्पादस्तु स्मृतीनामनाशङ्कनीय एव, ज्ञानयौगपद्यप्रतिषेधात् ।

अथ प्रथम[6]माद्ये वर्णे ज्ञानम्, तेन संस्कारः, तदनु द्वितीयवर्णज्ञानम्, तेन प्राक्तनेन संस्कारेणान्यो विशिष्टः संस्कारो जन्यत इत्यनेन [7]क्रमेणान्त्ये निखिलवर्णविषयः संस्कारो

[टि०]

[8]नन्वत्यन्ताप्रतीतानामर्थप्रत्यायकत्वं पूर्वप्रतीत्याप्रतीतानां त्वर्थप्रत्यायकत्वमिति नातिप्रसङ्ग इत्याह न हि प्रतीत्याप्रतीये इति । अस्ति चायं [9]प्रतीतिभेद इति एतेनार्थ[10]प्रतीत्यन्यथानुपपत्त्या स्फोटसिद्धावर्थापत्तिः प्रमाणं दर्शितम् ।

---

१ पूर्वेत्यादि यतः–क. १, कं. २ । २ एव हेतुः–कं. १, कं. २ । ३ अनुभवाधिकाधिक–जे. १ । ४ सर्वदा. प्रतीति–जे. १, जे. २ । ५ वर्णसाहित्यम्–क. १, कं. २, न वर्णवत् साहित्यम जे. ३ । ६ आद्यवर्णज्ञानं तदनु संस्कारः, तदनु तृतीयवर्णज्ञानम्, तेन प्राक्तनेन संस्कारेणान्त्यो–कं. १, कं. २ । ७ क्रमेणान्ते–कं. १, कं. २; क्रमेणान्त्यो–जे. २ । ८ नन्वत्यन्तानां सर्वार्था – अ, ब; नन्वत्यानामर्थाना – क । ९ प्रतीतभेद – अ, ब । १० प्रतीत्याथा – अ ।

न्यायकन्दली

जातो निखिलवर्णविषयामेकामेव स्मृतिं युगपत् करोतीत्याश्रीयते, तदा क्रमो [1]हीयते। क्रमो हि पौर्वापर्यम्, तच्च देशनिबन्धनं कालनिबन्धनं वा स्यात्, उभयमपि तद्वर्णेषु नावकाशं लभते, तेषां सर्वगतत्वान्नित्यत्वाच्च। बुद्धिक्रमनिबन्धनस्तु वर्णानां क्रमो भवेत्, स चैकस्यां स्मृतिबुद्धौ [2]विपरिवर्तमानानां प्रत्यस्तमित [3]इत्यक्रमाणामेव प्रतिपादकत्वम्। [4]ततश्च सरो रसो वनं नवं नदी दीनेत्यादिष्वर्थभेदप्रत्ययो न स्याद्वर्णानामभेदात्, क्रमस्य प्रतीत्यनङ्गत्वाच्च। अस्ति चायं प्रतीतिभेदः सवर्णेष्वनुपपद्यमानः? तद्व्यतिरिक्तं निमित्तान्तरमाक्षिपतीति स्फोटसिद्धिः।

ननु स्फोटोऽपि नानभिव्यक्तोऽर्थं प्रतिपादयति, [5]सर्वदार्थोपलब्धिप्रसङ्गात्। अभिव्यक्तिश्च न तस्य वर्णेभ्यः सम्भवति, उक्तेन न्यायेन तेषामेकै[6]कशः समुदितानामप्यसामर्थ्यात्, तस्मात् स्फोटादपि दुर्लभा अर्थप्रतीतिः।

अत्र वदन्ति। प्रयत्नभेदानुपातिनो वायवीया ध्वनयः प्रत्येकमेव तत्तद्वर्णात्मकतया स्फोटमस्फुटमभिव्य[7]ञ्जयन्तः पू[8]र्वपूर्वविषयसंस्कारसाचिव्यलाभाद[9]न्त्ये स्फोटमाभासयन्ति। तथा चान्ते प्रत्यस्तमितनिखिलवर्णवि[10]भागोल्लेखमक्रममनवयवमेकं विस्पष्टमर्थतत्त्वमनुभूयते। यदि हि वर्णा एव पदम्? न तदेकबुद्धिनिर्ग्राह्यमिति अनालम्बना बुद्धिः पर्यवस्यति। 'शब्दादर्थं प्रतिपद्यामहे' इति च व्यपदेशो न घटते। तस्माद्वर्णव्यतिरिक्तः कोऽपि सम्भवत्येको यस्मादर्थः स्फुटी[11]भवतीति।

[टि०]

**यदि हि वर्णा एव** इति :—एकं पदं मया [12]गृहीतमित्येवंबुद्धिरनालम्बना स्यात् बहुशब्दालम्बनत्वात्। [13]दूषणान्तरं चाह **शब्दादर्थम्** इति—किन्तु शब्देभ्योऽर्थं प्रतिपद्यामहे इति बहुवचनेन प्रयोगः स्यात्। **यदि हि तस्य** इति—पूर्वं 'घ' इति 'ट' च वर्णात्मतया ज्ञातस्यान्त्ये स्वरूपसंवेदनं स्फोटरूपस्य संवेदनम्। **किन्तु** [14]**वनप्रत्ययवद्** इति—यथा समुदितेषु वृक्षेषु वनमिति प्रत्ययस्तथा समुदितेषु वर्णेषु [15]एकं [पदं] इति [16]प्रत्ययः। [17]**प्रतीतिश्च नास्तीत्युक्तम्** इति प्रत्यक्षतो हि शब्दस्यैव प्रतीयमानत्वं न पुनः स्फोटस्येति।

---

१ हीयेत–कं. १, कं. २; जे. २। २ परिवर्तमानानां कं. १, कं २, विपरिवर्तितानां–जे. २। ३ इति क्रमाणामेव –जे. ३। ४ अतश्च–कं. १, कं. २। ५ सर्वदोपलब्धिप्रसङ्गात्–जे. १, जे. २. जे, ३। ६ मेकैकतः समुदितानां चासामर्थ्यात कं. १ कं २। ७ व्यञ्जन्तः–जे. २, जे ३। ८ पूर्वं–कं. १ कं. २। ९ अन्ते स्फोटमाभासयन्ते –कं. १, कं. २, आभासयन्ति–जे. ३, अन्त्ये स्फुटमाभासयन्ते–जे. २। १० विभागोल्लेखक्रम कं. १, कं. २। ११ भवति जे. १, जे. २, जे. ३। १२ गृहीत इत्येवं–अ, ब। १३ दूषणान्तरमाह–अ, ब। १४ वचन–अ, ब। १५ एकं मिति–अ, ब, क। १६ प्रत्यय–अ, ब। १७ प्रतीतिश्च–अ; प्रतीतिश्च–ब।

### प्रशस्तपादभाष्यम्

[231] प्रयत्नेन मनश्चक्षुषि स्थापयित्वाऽपूर्वमर्थं दिदृक्षमाणस्य विद्युत्सम्पातदर्शनवदादरप्रत्ययः तमपेक्षमाणादात्ममनसोः संयोगात् संस्कारातिशयो जायते । यथा देवह्रदे [1]राजतसौवर्णपद्मदर्शनादिति ।

### न्यायकन्दली

एवं प्राप्तेऽभिधीयते । गुण[2]रत्नाभरणः कायस्थकुलतिलकः [3]पाण्डुदास इत्यादिषु पदेषूच्चार्यमाणेषु क्रमभाविनो वर्णाः परं प्रतीयन्ते न [4]त्वन्ते वर्णव्यतिरिक्तस्य कस्यचिदर्थस्य संवेदनमस्ति । यदि हि तस्य पूर्वं वर्णात्मकतया संविदितस्यान्ते स्वरूपसंवेदनम्, पूर्वज्ञानस्य मिथ्यात्व[5]मवसीयते रजतज्ञानस्येव शुक्तिकासंवित्तौ । न चैवं प्रतिपत्तिरस्ति 'नायं वर्णः किं तु स्फोटः' इति । या चेयमेकार्थावमर्शिनी बुद्धिः, सापि नार्थान्तरमवभासयति, किन्तु वनप्रत्ययवद्वर्णसमुदायमात्र[6]मालम्बते । 'शब्दादर्थं प्रतिपद्यामहे' इति वर्णसमुदाय[7]मेवोरीकृत्य लोकः प्रयुङ्क्ते ।

न च प्रत्यक्षेणाप्रतीयमानः प्रमाणान्तरतः शक्यो निरूपयितुम्, उपायाभावात् । अर्थप्रतीत्यन्यथानुपपत्तिस्तदुपाय इति चेत् ? किमप्रतीयमानः स्फोटोऽ[8]र्थाधिगमहेतुः समर्थितो भवद्भिः ? प्रतीयमानो वा ? अप्रतीयमानस्य हेतुत्वे सर्वदार्थप्रतीतिप्रसङ्गः । प्रतीतिश्च तस्य नास्तीत्युक्तम्, अर्थप्र[9]त्ययोऽपि च वर्णानामेव तद्भावभावितामनुगच्छति, तेनैषामेव वरं व्युत्पत्त्यनुसारेणार्थप्रतिपादने कश्चिदुपाय [10]आश्रीयताम् न पुनरप्रतीयमानस्य गगनकुसुमस्येव कल्पना [11]युक्ता । न चेदं वाच्यं वर्णानां प्रतिपादकत्वे क्रमभेदे कर्तृभेदे व्यवधाने च प्रतीतिप्रसङ्ग इति । नहि विपरीतक्रमाः कर्तृभेदानुपातिनो देश-

[टि०]

[12]संस्काराः खलु इति यस्य वस्तुनः [13]रूपप्रख्यया स्वरूपज्ञानेन विभाविता जनितास्तत्रैव वस्तुनि [14]फलं स्मृतिरूपं ज्ञानं जनयति नार्थं, ततः संस्कारेभ्यो नार्थज्ञानम् । यद्यपि स्मृतिहेतुत्वम् इति कार्यान्तरेऽर्थप्रत्यायनरूपे । एतावता ग्रन्थेनार्थापत्तेरन्यथोपपत्तिर्दूषणं प्रतिपादितम् ॥ संस्कारः ॥

---

१ सौवर्णराजत–व्यो । २ रत्नाभरः–जे. ३ । ३ श्री इतिपाला: चाण्डुदास इति पाठान्तरम्–जे. १ । ४ न त्वन्यस्य –जे. १ । ५ अवसीयेत–जे. २, जे. ३ । ६ मद–कं. १, कं. २ । ७ मेवोररीकृत्य–कं. १, कं. २ । ८ र्थाधिगमे–कं. १, कं. २ । ९ प्रत्ययो–कं. १, क. २, प्रत्ययोऽपि जे. १ । १० आश्रितो–जे. १, जे. २ । ११ कृता–जे. १, जे. २ । १२ संस्कारा हि खलु मु.–जे. १, २, ३ । १३ प्रत्यक्षेया–अ, ब । १४ फल–अ, ब, क ।

न्यायकन्दली

कालव्यवहितास्त[1]दर्थधियः कारणम्, कार्योन्नेया हि शक्तयो भावानाम्, यथा तेभ्यः कार्यं दृश्यते, तथैव तेषां शक्तयः कल्प्यन्ते । यथोपदिशन्ति सन्तः–

यावन्तो यादृशा ये च यदर्थप्रतिपादने ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः ।। इति ।।

[2]अत एव नदीदीनेत्यादिष्वर्थभेदः, क्रमभेदात् । वर्णेषु क्रमो नास्ति स कथमेषामङ्गं स्यादिति चेन्न तेषामुत्पत्तिभाजामव्याप्यवृत्तीनां देश[3]कृतस्य कालकृतस्य च पौर्वापर्यस्य सम्भवात् । यच्चेदमुक्तम् [4]प्रत्येकशः समुदितानां च न सामर्थ्यमिति, तदपि न परस्य मतमालोचितम् । यद्यपि वर्णा अनवस्थायिनस्तथापि तद्विषयाः क्रमभाविनः संस्काराः संभूय पदार्थधियमातन्वते । यद्वा पूर्ववर्णसंस्कारस्मरणयोर[5]न्यतरापेक्षोऽन्त्यो वर्णः प्रत्यायकः, यथा चानेकसंस्काराः संभूय स्मरणं जनयन्ति तथोपपादितं द्वित्वे । अथ मन्यसे वर्णविषयात् संस्कारादर्थप्रतीतिरयुक्ता, संस्कारा हि यद्विषयोपलम्भसम्भावितजन्मानस्तद्विषयामेव स्मृतिमाधातुमीशते न कार्यान्तरम् । यथाह मण्डनः स्फोटसिद्धौ–

संस्काराः खलु यद्वस्तुरूपप्रख्या[6]विभाविताः ।
फलं तत्रैव जनयन्त्यतोऽर्थे धीर्न कल्प्यते ।। इति ।

तदप्यसमीचीनम् । यतः पदार्थप्रतीत्यनुगुणतया प्रत्येकमनुभवैराधीयमाना वर्णविषयाः संस्काराः स्मृतिहेतुसंस्कारविलक्षणशक्तय एवाधीयन्ते, तथाभूतानामेव तेषां कार्येणाधिगमात् । सन्तु वा भावनारूपाः संस्कारास्तथापि तेषामर्थप्रतिपादनसामर्थ्यमुपपद्यते, तद्भावभावित्वात् । यो हि स्फोटं कल्पयति, तेन स्फोटस्या[7]र्थप्रत्यायनशक्तिरपि कल्पनीयेति कल्पनागौरवम् । उभयसिद्धस्य संस्कारस्य सामर्थ्यमात्रकल्पनायां लाघवमस्तीत्येतदेव कल्पयितुमुचितम् । यथोक्तं न्यायवादिभिः–

यद्यपि स्मृतिहेतुत्वं संस्कारस्य व्यवस्थितम् ।
कार्यान्तरेऽपि सामर्थ्यं न तस्य प्रतिहन्यते ।। इति ।

तदेवं वर्णेभ्य एव संस्कारद्वारेणार्थप्रत्ययसम्भवादयुक्ता स्फोटकल्पनेति ।

---

१ तदर्थविषयः–जे. ३ । २ 'सर्वगतत्वान्नित्यत्वाच्च वर्णानां क्रमभावः' पाठोऽयं–जे–१, जे. २, जे. ३, पुस्तकेषु नास्ति, अत्र च न तस्य संगतिः अतो न स्वीकृतः सं. । ३ देशकालकृतस्य–कं. १, कं. २ । ४ एकैकशः–जे. ३ । ५ न्यतरसापेक्ष–कं. १, कं. २ । ६ तिभाविनाः–जे. १ । ७ प्रतिपादन–कं. १, कं. २ ।

## प्रशस्तपादभाष्यम्

[232] स्थितिस्थापकस्तु स्पर्शवद्द्रव्येषु [1]वर्तमानो घनावयवसन्निवेश[2]विशिष्टेषु कालान्तरावस्थायिषु स्वाश्रयमन्यथाकृतं [3]यथावस्थितं स्थापयति । स्थावरजङ्गमविकारेषु धनुःशाखा[4]शृङ्गदन्तास्थिसूत्रवस्त्रादिषु [5]भुग्नसंवर्तितेषु स्थितिस्थापकस्य कार्यं संलक्ष्यते। नित्यानित्यत्वनिष्पत्तयोऽस्यापि [6]गुरुत्ववत् ।

## न्यायकन्दली

[231] आदरप्रत्ययजं संस्कारं दर्शयति–प्रयत्नेनेत्यादिना । आदरः प्रयत्नातिशयः, तस्मादपूर्वमर्थं द्रष्टुमिच्छतो यद्विद्युत्सम्पातदर्शनवदर्थदर्शनं तदादरप्रत्ययः, तमेवापेक्षमाणादात्ममनसोः संयोगात् संस्कारातिशयो जायते, चिरकालातिक्रमेऽपि तस्यानुच्छेदात् । अत्रोदाहरणम्–यथा देवह्रदे [7]राजतसौवर्णपद्मदर्शनादिति। देवह्रदे चैत्रमासस्य चित्रानक्षत्रसंयुक्तायां पौर्णमास्यामर्धरात्रे राजतानि सौवर्णानि च पद्मानि दृश्यन्त इति वार्तामवगम्य तस्यां तिथौ दिदृक्षया मिलितानां सन्निधीयमानेऽर्धरात्रे प्रयत्नातिशयाच्चक्षुषि मनः स्थापयित्वा स्थितानामुत्थितेषु पद्मेषु क्षणमात्रदर्शनादादरप्रत्ययात् संस्कारातिशयः कालान्तरेऽपि स्फुटतरस्मृतिहेतुरुपजायते ।

[232] [8]स्थितस्थापकं कथयति–[9]स्थितस्थापकस्त्विति । अस्पर्शवद्द्रव्यवृत्तेर्भावनाख्यात् संस्कारात् स्पर्शवद्द्रव्यवृत्तित्वेन स्थित[10]स्थापकस्य विशेषमाख्यातुं तुशब्दः । [11]घना निबिडा ये अवयवसन्निवेशाः तैर्विशिष्टेषु स्पर्शवत्सु द्रव्येषु वर्तमानः स्थितस्थापकः स्वाश्रयमन्यथाकृतमवनामितं यथावत्स्थापयति पूर्ववद्[12]जूकरोति । ये प्रत्यक्षतोऽनुपलम्भात् स्थितिस्थापकस्याभावमिच्छन्ति तान् प्रति तस्य कार्येण सद्भावं दर्शयन्नाह–स्थावरजङ्गमविकारेष्विति । भुग्नाः [13]कुब्जीकृताः संवितताः पूर्वावस्थां प्रापिताः, भुग्नाश्च ते संवर्तिताश्चेति भुग्नसंवर्तिताः तेषु स्थितिस्थापकस्य कार्यं लक्ष्यते । किमुक्तं स्यात् ? धनुःशाखादिष्ववनामितविमुक्तेषु यत् पूर्वावस्थाप्राप्तिहेतोराद्यस्य कर्मणः एकार्थसमवेतमसमवायिकारणं स स्थितिस्थापकः संस्कारः, अन्यस्यासम्भवात् । अन्ये तु भुग्नसंवर्तिते-

---

१ वर्तमाने दे। २ विशिष्टे अकालान्तरा–दे। ३ यथावत्–दे। ४ दन्तशृङ्गास्थिषु–दे। ५ भस्म–दे। ६ गुरुत्ववद्द्रष्टव्याः–पा. ५. पु. दं। ७ इत्यादि–कं. १, कं. २। ८, ९, १०–स्थिति कं. १, कं. २। ११ ये घना–कं. १, कं. २। १२ पूर्ववदृजु–कं. १, कं. २। १३ आकुञ्चीकृताः–जे. १।

## प्रशस्तपादभाष्यम्

[233] धर्मः पुरुषगुणः । कर्तुः प्रियहितमोक्षहेतुः, अतीन्द्रियोऽन्त्यसुखसंविज्ञानविरोधी पुरुषान्तःकरणसंयोगविशुद्धाभिसन्धिजः[1] वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः ।

तस्य[2] तु साधनानि श्रुतिस्मृतिविहितानि वर्णाश्रमिणां सामान्यविशेषभावेनावस्थितानिद्रव्यगुणकर्माणि ।

## न्यायकन्दली

ष्विति सूक्ष्मस्त्रादिष्विति अस्येदं विशेषणमिति मन्यमानाः भुग्नानि यानि सूत्रादीनि संवर्तितानि तेष्विति व्याचक्षते । तस्य नित्यानित्यत्वनिष्पत्तयो गुरुत्ववत् । यथा गुरुत्वं परमाणुषु नित्यं [3]कार्येष्वनित्यं कारणगुणपूर्वकं च, तथा स्थितिस्थापकोऽपीत्यर्थः ।

[233] [4]धर्मः पुरुषगुणः । यो धर्मः, स पुरुषस्य गुणो न कर्मसामर्थ्यमित्यर्थः । कर्तुः प्रियहितमोक्षहेतुः । [5]कर्तुः प्रियं सुखम्, हितं सुखसाधनम्, मोक्षो नवानामात्मविशेषगुणानामत्यन्तोच्छेदस्तेषां हेतुः । कर्त्तुः प्रियादीनामेव यो हेतुः स धर्म इति व्याख्येयम् । न तु कर्त्तुरेव यः प्रियादिहेतुः स धर्म इति व्याख्या, पुत्रेण कृतस्य श्राद्धस्य पितृ[6]गामितृप्तिफलश्रवणात् । वृष्टिकामेन कारीर्यां कृतायां तदन्यस्यापि समीपदेशवर्तिनो वृष्टिफलसम्बन्धदर्शनात् ।

स्वर्गकामो यजेतेत्यादिवाक्ये यागेन स्वर्गं कुर्यादिति कर्मणः श्रेयःसाधनत्वं श्रूयते । यश्च निःश्रयसेन पुरुषं संयुनक्ति स धर्मः, तस्माद्यागादिकमेव धर्मः, न पुरुषगुणः । तथाहि, यो यागमनुतिष्ठति तं धार्मिकमित्याचक्षते । एतदयुक्तम् । क्षणिकस्य कर्मणः कालान्तरभाविफलसाधनत्वासम्बन्धात् । अथोच्यते । क्षणिकं कर्म, कालान्त-

[टि०] (॥ अथ गुणग्रन्थे धर्माधर्मनिरूपणम् ॥)

[233 to 235] **फलाय विहितम्** इति विहितं सद् यागादिकर्म [7]चिरभाविने फलाय भवति । **शक्तिः कार्यानुमेया** इति शक्तिस्तावत्प्रत्यक्षेन [8]न कर्मगतत्वेन नाप्यात्मगतत्वेनोपलभ्यते किन्तु कार्यानुमेया । ततो [9]यस्मिन्कर्मरूपे आश्रये गता अग्निष्टोमः [10]स्वर्गहेतुः इत्येवमुपलभ्यते तस्मिन्नेवाश्रये गताऽङ्गीकर्तव्या । स्वाश्रया यत्रैवाश्रये कर्मरूपे उत्पन्ना तदाश्रया ।

---

१ संयोगादुपजायते विशुद्धाभिसन्धिजः—दे । २ तस्य च—दे । ३ कार्येऽनित्यं—जे. ३ । ४ धर्मः पुरुषेति—कं. १, कं २ । ५ प्रिय सुखं—कं. १. कं. २ । ६ पितृगामिफलश्रवणात्—जे. १ । ७ चिरता—अ । ८ न तावत्कर्मगतत्वेन—अ, ब, क । ९ अस्मिन्—अ, ब । १० स्वर्ग इत्येव—अ, ब, क ।

न्यायकन्दली

भावि च स्वर्गफलम्, विनष्टाच्च कारणात् कार्यस्यानुत्पत्तिः, श्रुतं च यागादेः कारणत्वम्, तदेतदन्यथानुपपत्त्या फलोत्पत्त्यनुगुणं किमपि कालान्तरावस्थायि कर्मसामर्थ्यं कल्प्यते, यद्द्वारेण कर्मणां श्रुता फलसाधनता निर्वहति । तच्च प्रमाणान्तरागोचरत्वादपूर्वमिति व्यपदिश्यते ।

यथोक्तम्–

फलाय विहितं कर्म क्षणिकं चिरभाविने ।
तत्सिद्धिर्नान्यथेत्येतदपूर्वमपि कल्प्यते ॥

अत्रोच्यते । न कर्मसामर्थ्यं क्षणिके कर्मणि समवैति, शक्तिमति विनष्टे निराश्रयस्य सामर्थ्यस्यावस्थानासंभवात् । स्वर्गादिकं च फलं तदानीमनागतमेव, न शक्तेराश्रयो भवितुमर्हति । यदि त्वनुष्ठानानन्तरमेव स्वर्गो भवति ? अपूर्वकल्पनावैयर्थ्यम्, तदुपभोगश्च दुर्निवारः । विशिष्टशरीरेन्द्रियादि विरहादननुभवश्चेत् ? तर्ह्ययं तदानीमनुपजात एव स्वर्गस्योपभोग्यैकस्य स्वभावत्वात् । अनुपभोग्यमपि सुखस्वरूपमस्तीति अदृष्टकल्पनेयम् । तस्मान्न फलाश्रयमपूर्वम् । न चाकाशादिसमवेतादपूर्वादात्मगामिफलसम्भवः । वस्तुभूतं च कार्यमनाधारं नोपपद्यते, तस्मादात्मसमवेतस्यैव तस्योत्पत्तिरभ्युपज्ञेया । तथा सति न तत्कर्मसामर्थ्यं स्यात्, अन्यसामर्थ्यस्यान्यत्रासमवायात् । अथान्यस्याप्यन्यसमवेता शक्तिरिष्यते, तस्याः कार्यानुमेयत्वादिति चेत् ।

यथोक्तम्–

शक्तिः कार्यानुमेया हि यद्गतैवोपलभ्यते ।
तद्गतैवाभ्युपेतव्या स्वाश्रयान्याश्रयापि च ॥ इति ।

तदयुक्तम् । विनष्टे शक्तिमति तन्निरपेक्षस्य शक्तिमात्रस्य कार्यजनकत्वानुपलम्भा[1]दे एतेनैतदपि प्रत्युक्तम् । यदुक्तं मण्डनेन विधिविवेके–"तदाहितत्वात् तस्य

[टि०]

[2]अथवाऽन्या[3]श्रयाऽन्यस्मि[4]न्नात्मादावाश्रिता भवतु । [5]विनष्टे शक्तिमति इति – शक्तिमति कर्मणीत्यर्थः । तदाहितत्वाद् इति [6]तेन यागेन कृत्वा तस्य यागस्यैव शक्तिर्नत्वात्मन इत्यर्थः । [7]यागेना हि इति –

१ म्भादेव तेनैतदपि–कं. १, कं. २ । २ अथ या–अ, ब, क । ३ अस्मिन्नात्म–अ, ब । ४ आत्मदोषाश्रिता–अ, ब, क । ५ विनष्टे नष्टे–अ । ६ स न योगेन–अ, सेन योगेन–ब; तेन योगेन–क । ७ यागेनाहितत्वाद् मु. योगेन–अ, ब; यागेन–क, ड ।

न्यायकन्दली

शक्तिरिति” यागेनाहितत्वादपूर्वं यागस्य कार्यं स्यान्न तु शक्तिः, अपूर्वोपकृतात् कर्मणः फला[1]नुत्पत्तेः, तस्माच्चिरनिवृत्ते कर्मणि देशकालावस्थादिसहकारिणोऽपूर्वादेव फल[2]स्योत्पत्तिरित्यपूर्वमेव श्रेयः साधनम् । [3]करणत्वश्रुतिस्तु यागादरपूर्वजननद्वारेण न साक्षादिति प्रमाणानुरोधादाश्रयणीयम् । तथा सति युक्तं धर्मः पुरुषगुण इति । योऽपि यागादौ धर्मव्यपदेशः, सोऽप्यपूर्वसाधनतया प्रीतिसाधन इव स्वर्गशब्दप्रयोगः । स्वर्गसाधने हि चोदितस्य ज्योतिष्टोमस्य निरन्तरं प्रीतिसाधनतयार्थवादेन स्तुतेश्चन्दनादौ च प्रीतियोगे सति प्रयोगात्, तदभावे चाप्रयोगात्, प्रीतिनिबन्धनः स्वर्गशब्दः [4]तस्य यथालक्षणया प्रीतिसाधने प्रयोगः प्रीतिमात्राभिधानेऽपि, तस्मात् प्रीतिसाधनप्रती[5]त्युपपत्तेरुभयाभिधानशक्तिकल्पनावैयर्थ्यात् । एवं धर्मशब्दस्यापि लक्षणया तत्साधने प्रयोगः, एकाभिधानादेवोभयप्रतीतिसिद्धेरुभयाभिधानशक्तिकल्पनानवकाशादिति तार्किकाणां प्रक्रिया ।

अतीन्द्रियः केनचिदिन्द्रियेणायोगिभिर्न गृह्यत इत्यतीन्द्रियो धर्मः । अन्त्यसुखसंविज्ञानविरोधी । धर्मस्तावत् कार्यत्वादवश्यं विनाशी, न च निर्हेतुको विनाशः कस्यचिद्विद्यते । [6]अन्यतस्ततो विनाशे चास्य नियमेन फलोत्पत्तिकालं यावदवस्थानं न स्यात् । फलं च धर्मस्य कस्यचिदनेकसंवत्सरसहस्रोपभोग्यम्, तस्य यदि प्रथमोपभोगा[7]देव नाशः, कालान्तरे फलानुत्पादः । नचैकस्य निर्भागस्य भागशो नाशः सम्भाव्यते, तस्माद[8]न्त्यस्यैव सुखस्य सम्यग्विज्ञानेन धर्मो विनाश्यते । ये तु नित्यं धर्ममाहुस्तेषां [9]प्रायणानुपपत्तिः, धर्माधर्मक्षयाभावात् । पुरुषान्तः[10]करणसंयोगः । आत्मविशेषगुणत्वात् सुखादिवत् । वि[11]शुद्धोऽभिसन्धिनः । विशुद्धोऽभिसन्धिः दम्भादिरहितः संकल्पविशेषः, तस्माद्धर्मो जायते । [12]वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः । वर्णा ब्राह्मण-

[टि॰]

[13]अपूर्वमदृष्टपर्याय इति सिद्धान्तवादिनोऽभिप्रायः । [14]अपूर्वेण परमते शक्तिसञ्ज्ञकेनोपकृतात्सहिता च कर्मणः फलस्यानु-

---

१ नुपपत्तेः—जे. १ । २ स्योत्पत्तेरपूर्वं—कं. १, कं. २, जे. २ । ३ कारण—कं. १, कं. २ । ४ यस्य—कं. १, कं. २ । ५ पत्पत्तेः—कं. १, क. २ । ६ यतस्तता—जे. १, जे २ । ७ दपि—कं. १, कं. २, जे. १ । ८ न्त्यस्यैव—कं. १, कं. २ । ९ मरणानुपपत्तिः—जे. १ । १० करणेति—कं. १, कं. २ । ११ विशुद्धेति—कं. १, कं. २ । १२ वर्णाश्रमिणामिति—कं. १, कं २ । १३ पूर्वं—अ, ब । १४ पूर्वेण—अ, ब ।

प्रशस्तपादभाष्यम्

[234] तत्र सामान्यानि धर्मे श्रद्धा, अहिंसा, भूतहितत्वम्, सत्यवचनम्, अस्तेयम्, ब्रह्मचर्यम्, अनुपधा, क्रोधवर्जनमभिषेचनम्, शुचिद्रव्यसेवनम्, विशिष्टदेवताभक्तिरुपवासोऽप्रमादश्च ।

ब्राह्मणक्षत्रि[1]यविशां सामान्यानि धर्मसाधनानि इज्याध्ययनदानानि

ब्राह्मणस्य विशिष्टानि प्रतिग्रहाध्यापनयाजनानि स्ववर्ण[2]विहिताश्च संस्काराः ।

न्यायकन्दली

क्षत्रियविट्शूद्राः । आश्रमिणो ब्रह्मचारिगृहस्थवानप्रस्थयतयः । तेषां धर्मः प्रतिवर्णं प्रत्याश्रमं चाधिकृत्य विहितैः साधनैर्जन्यत इत्यर्थः ।

[234] अतीन्द्रियस्य धर्मस्य साधनानि कुतः प्रत्येतव्यानि तत्राह– तस्य त्विति । विशिष्टेनानुष्ठानेनाचार्यमुखाच्छ्रूयत एव न लिखित्वा गृह्यत इति श्रुतिर्वेदः, स्मृतिर्मन्वादिवाक्यं ताभ्यां विहितानि [3]प्रतिपादितानि । सामान्यविशेषभावेनावस्थितानि द्रव्यगुणकर्माणि सामान्यनि धर्मसाधनानि । तत्र सर्वेषां [4]वर्णानामाश्रमिणां च [5]सामान्यरूपतया धर्मसाधनानि कथ्यन्ते । धर्मे श्रद्धा धर्मे मनःप्रसादः । अहिंसा भूतानामनभिद्रोहसंकल्पः । प्रतिषिद्धस्याभिद्रोहस्य निवृत्तेरधर्मो न भवति, न धर्मो जायते । अनभिद्रोहसंकल्पस्य विहितत्वात् स्यादेव धर्मसाधनम् । [6]भूतहितं भूतानामनुग्रहः । सत्यवचनं यथार्थवचनम् । अस्तेयमशास्त्रपूर्वकं परस्वग्रहणं मया न कर्तव्यमिति संकल्पः, न तु परस्वादाननिवृत्तिमात्रमभावरूपम् । ब्रह्मचर्यम् स्त्रीसेवापरिवर्जनम् । एतदपि संकल्परूपम् । अनुपधा [7]भावे विशुद्धिः, विशुद्धेनाभिप्रायेण कृतानां कर्मणां धर्मसाधनत्वात् । क्रोधवर्जनं क्रोधपरित्यागः, सोऽपि संकल्पात्मक एव । अभिषेचनं स्नानम् ।

[टि०]

त्पत्ति कर्मणो विनाशात् । तेषां [8]प्रायणेति प्रकर्षेणागतं गमनं प्रायणं मरणमित्यर्थः । चक्रमादाय इति :–वंशादिमयं

१ वैश्यानामिज्याध्ययनदानानि – कं. १, कं. २ । २ नियताश्च – व्यो (६४०) दे । ३ प्रतिपादितानि वर्णाश्रमिणां – कं. १, कं. २ । ४ वर्णाश्रमिणां – कं. १, कं. २ । ५ सामान्यानि – जे. १ । ६ भूतहितत्वं – कं. १, कं. २ । ७ भावशुद्धि – कं १, कं २ । ८ प्रायेण – अ, ब, क ।

प्रशस्तपादभाष्यम्

क्षत्रियस्य सम्यक् प्रजापालनमसाधुनिग्रहो युद्धेष्वनिवर्त्तनं स्वकीयाश्च संस्काराः ।

वैश्यस्य क्रयविक्रयकृषिपशुपालनानि स्वकीयाश्च संस्काराः ।

शूद्रस्य [1]पूर्ववर्णपारतन्त्र्यममन्त्रिकाश्च क्रियाः ।

आश्रमिणां तु ब्रह्मचारिणो गुरुकुल[2]निवासिनः स्वशास्त्रविहितानि गुरुशुश्रूषाग्नीन्धनभैक्ष्याचरणानि मधुमांसदिवास्वप्नाञ्जनाभ्यञ्जनादिवर्जनं च ।

न्यायकन्दली

शुचिद्रव्यसेवनं शुचीनां तिलादिद्रव्याणां क्वचित्पर्वणि नियमेन सेवनं धर्मसाधनम् । विशिष्टदेवताभक्तिः त्रयीसंमतायां देवतायां भक्तिरित्यर्थः । उपवास एका[3]दश्यादौ भोजननिवृत्तिसंकल्पः । अप्रमादो नित्यनैमित्तिकानां कर्मणामव[4]श्यम्भावेन करणम् । एतानि सर्वेषामेव समानानि [5]धर्मसाधनानि ब्राह्मणक्षत्रियविशां सामान्यानि धर्मसाधनानि इज्याध्ययनदानानि । इज्या यागहोमानुष्ठानम् । अध्ययनं वेदपाठः । दानं स्वद्रव्यस्य परस्व[6]तापत्तिफलः संकल्पविशेषः । शूद्रस्यापि दानमस्त्येव, तेन यज्ञादिषु यद्दानं तदभिप्रायेणेदं त्रैवर्णिकानां विशिष्टं धर्मसाधनमुक्तम् ।

ब्राह्मणस्य विशिष्टान्यसाधारणानि धर्मसाधनानि प्रतिपादयति– प्रतिग्रहाध्यापनयाजनानि । प्रतिग्रहो विशिष्टाद् द्रव्यग्रहणम् । अध्यापनं तु प्रसिद्धमेव । याजनमार्त्विज्यम् । एतानि ब्राह्मणस्य धर्मसाधनानि, तस्यामीभिरेवोपायैरर्जितानां द्रव्याणां [7]धर्माधिकारात् – स्ववर्णविहिताश्चाष्टचत्वारिंशत्संस्काराः वैदिककर्मानुष्ठानयोग्यतापादनद्वारेण ब्राह्मणस्य धर्मसाधनम् ।

क्षत्रियस्य विशिष्टानि धर्मसाधनानि । सम्यक् प्रजापालनं न्यायवृत्तीनां प्रजानां परिरक्षणम् । असाधुनिग्रहः, दुष्टानां यथाशास्त्रं शासनम् । युद्धेष्वनिवर्त्तनं युद्धेषु विजयावधिः प्राणावधिर्वा आयुधव्यापारः । स्वकीयाश्च संस्काराः ।

[टि०] [8]कठिनं तापसभाजनं चक्रम् । पर्वणी इति पर्वणी शब्द ईकारान्तः पौर्ण[9]मास्यमावास्यावाचकः ।

१ शूद्रस्य पारतन्त्र्यम – दे । २ वासिनः – दे । ३ दश्यादि – कं. १, कं २, जे. ३ । ४ अवश्यकरणं–जे. १ । ५ धर्मसाधनानि – इज्या – कं. १, कं २ । ६ परस्वापत्ति संकल्पविशेषः – क. १, क. २ । ७ कर्माधिकारात्– जे. २ । ८ कठिनं – अ, ब । ९ मास्यामावाचकः –अ, ब ।

प्रशस्तपादभाष्यम्

[235] विद्याव्रतस्नातकस्य कृतदारस्य गृहस्थस्य शालीनयायावरवृत्त्यु[1]पार्जितैरर्थैर्भूत-मनुष्यदेवपितृब्रह्माख्यानां पञ्चानां महायज्ञानां सायम्प्रातरनुष्ठानम् । एकाग्निविधानेन पाकयज्ञसंस्थानां [ [2]च नित्यानां शक्तौ विद्यमानायामग्न्याधेयादीनां च हविर्यज्ञ-संस्थानामग्निष्टोमादीनां सोमयज्ञसंस्थानां च ] ऋत्वन्तरेषु ब्रह्मचर्यमपत्योत्पादनं च ।

ब्रह्मचारिणो गृहस्थस्य [3]वा वनवासो वल्कलाजिनकेशश्मश्रुनखरोम[4]धारणम् । वन्यहुतातिथिशेषभोजनानि [5]वनस्थस्य ।

न्यायकन्दली

वैश्यस्य क्रयविक्रयकृषिपशुपालनानि । मूल्यं दत्त्वा परस्माद् द्रव्यग्रहणं क्रयः, मूल्यमादाय परस्य स्वद्रव्यदानं विक्रयः, । कृषिः [6]परिकर्मितायां भूमौ बीजस्य वपनं रोपणं, च पशुपालनं गोजाविकादिपरिरक्षणम् । एतानि वैश्यस्य धर्मसाधनानि, तस्या-मीभिरेवोपायैरर्जितानां धनानां [7]धर्माङ्गत्वात् ।

शूद्रस्य पूर्वेषु वर्णेषु पारतन्त्र्यममन्त्रिकाश्च क्रिया धर्मसाधनम् ।

[235] आश्रमिणां तु धर्मसाधनमुच्यते । ब्रह्मचारिणो गुरुकुलनिवासिन इति । उपनीय यः शिष्यं साङ्गं सरहस्यं च वेदमध्यापयति स गुरुः, तस्य कुले गृहे वसनशीलस्य ब्रह्मचारिणः स्वशास्त्रविहितानि ब्रह्मचारिणमधिकृत्य शास्त्रेण विहितानि । [ [8]गुरुशुश्रू-षाग्नीन्धनभैक्ष्याचरणानि, मधुमांसदिवास्वप्नाभ्यञ्जनाञ्जनवर्जनं च व्रतरूपधर्मसाधनम् ।] गुरुशुश्रूषा गुरोः परिचर्या, गुरुशुश्रूषा च अग्निश्चेन्धनं च भैक्ष्यं च तेषामाचरणानि । गुरुशुश्रूषाभैक्ष्ययोः करणमेवाचरणम् । अग्नेराचरणम्, प्रत्यह[9]मग्नौ होमः इन्धनस्या-चरणमग्न्यर्थं वनादिन्धनस्याहरणमिति विवेकः ।

गृहस्थस्य धर्मसाधनम् कथयति–विद्याव्रतस्नातकस्येति । यो वेदाध्ययनार्थं गृहीतं व्रतमधीते वेदे विसर्जितवान् स विद्याव्रतस्नातकः, तस्य कृतदारस्य कृतपत्नीपरि-

१ पार्जितैर्भूत – दे । २ [ ] एतश्चिह्नान्तर्गतः पाठः दे पुस्तके नास्ति । ३ वा ग्रामान्निर्गतस्य – कं. १, कं. २ । ४ धारणं च – कं. १, कं. २ । ५ वानप्रस्थस्य – कं. १. कं. २ । ६ परिकर्षितायां – कं. १, क. २ । ७ कर्माङ्गत्वात् – जे. २ । ८ [ ] एतच्चिह्नान्तर्गतः पाठः कं. १, कं. २ पुस्तकयोर्नास्ति । ९ अग्नेर्होमः – जे. २ ।

## न्यायकन्दली

ग्रहस्य गृहस्थस्य शालीनयायावरवृत्त्युपार्जितैरर्थैर्भूतमनुष्यदेवपितृब्रह्माख्यानां पञ्चानां महायज्ञानां सायं प्रातरनुष्ठानम् । यावता धान्येन कुशूलमात्रं कुम्भीपात्रं वा परिपूर्यते, त्र्यहमेकाहं वा वर्तनं भवति, तावन्मात्रस्य परेण स्वयमानीयमानस्य श्रद्धया दीयमानस्य यः परिग्रहः सा शालीना वृत्तिः । परस्मादप्रतिगृह्णतश्चक्रमादाय यत्प्रत्यहं भिक्षाटनं सा यायावरवृत्तिः । ताभ्यामुपार्जितैरर्थैः पञ्चानां महायज्ञानां सायं प्रातरपराह्णे चानुष्ठानं गृहस्थस्य धर्मसाधनम् । भूतेभ्यो बलिप्रदानं भूतयज्ञः । अतिथिपूजनं मनुष्ययज्ञः । होमो देवयज्ञः । श्राद्धं पितृयज्ञः । ब्रह्मयज्ञो वेदपाठः । एकाग्निविधानेन पाकयज्ञसंस्थानां नित्यानां शक्तौ विद्यमानायामनुष्ठानम् । अनुष्ठानम् । एकाग्निरिति औपासनिकः । तस्य विधानं विवाहकाले परिग्रहः । तेन पाकयज्ञसंस्थानां पाकयज्ञविशेषाणामष्टकापार्वणीचैत्र्याश्वयुज्यादीनां नित्यानामवश्यकरणीयानां सति सामर्थ्येऽनुष्ठानम् । अग्न्याधेयादीनां हविर्यज्ञसंस्थानामग्निष्टोमादीनां सोमयज्ञसंस्थानां च । अनुष्ठानं धर्मसाधनम्, अग्न्याधेयशब्देनाग्न्याधानस्याभिधानम्, यद्ब्राह्मणेन वसन्ते क्रियते । हविर्यज्ञसंस्था हविर्यज्ञविशेषा दर्शपौर्णमासचातुर्मास्याग्रहायणादिका इष्टयः कथ्यन्ते । अग्निष्टोमादीति अग्निष्टोमोक्थ्यषोडशीवाजपेयातिरात्राप्तोर्यामाः सप्तसोमयज्ञविशेषाः सोमयज्ञसंस्था उच्यन्ते । ऋत्वन्तरेति । ऋतुकालादन्यकालेषु ब्रह्मचर्यव्रतरूपेण स्त्रीसेवापरिवर्जनं धर्मसाधनम् । अपत्योत्पादनमपि धर्मसाधनम्, पुत्रेण लोकाञ्जयतीति श्रुतेः ।

वनस्थस्य धर्मसाधनं कथयति–ब्रह्मचारिणो गृहस्थस्य वेति "यदहरेवास्य श्रद्धा भवति तदहरेवायं प्रव्रजेत्" इति श्रवणात् सति श्रद्धोपनये ब्रह्मचारिणो वनवासो भवति । गृहस्थस्य वा तस्य वानप्रस्थव्रतमाचरतो वल्कलाजिनकेशश्मश्रुनखरोमधारणम्, वन्यस्य फलमूलस्य भोजनं हुतशेषभोजनं, अतिथिशेषभोजनं च धर्मसाधनम् ।

---

१ ब्रह्माख्यानां महायज्ञानां – जे. १ । २ कुशूलपात्रं – कं. १, कं. २ । ३ दप्रतिग्रहणत – कं. १, कं. २ ।
४ यज्ञसंस्थानामिति – कं. १, कं. २ । ५ अग्न्याधेयादीनामिति – कं. १, कं. २ । ६ दार्शं – कं. १, कं. २ ।
७ ऋत्वन्तरेष्विति – कं. १, कं. २ । ८ दन्यकालेषु ब्रह्मचर्य – कं. १, कं. २ । ९ गृहस्थस्य वा वने वासो भवति – जे. १ ।

प्रशस्तपादभाष्यम्

[236] त्रयाणामन्यतमस्य श्रद्धावतः सर्वभूतेभ्यो नित्यमभयं दत्त्वा, संन्यस्य स्वानि कर्माणि, यमनियमेष्वप्रमत्तस्य षट्पदार्थप्रसंख्यानाद्योगप्रसाधनं प्रव्रजितस्येति ।

दृष्टं प्रयोजनमनुद्दिश्यैतानि साधनानि भावप्रसादं चापेक्ष्यात्ममनसोः संयोगाद्धर्मोत्पत्तिरिति ।

न्यायकन्दली

यः प्राजापत्यामिष्टिं निरूप्य सर्वस्वं दक्षिणां दत्त्वात्मन्यग्निं समाधाय पुत्रे भार्यां निक्षिप्य प्रव्रजितः, न तस्य होमो [1]नाप्यतिथिपरिग्रहः । यस्तु सह पत्न्या सहैवाग्निना वनं प्रस्थितः, तस्य हुतशेषभोजनमतिथिशेष[2]भोजनं च ।

[236] यतिधर्मं [3]कथयति–त्रयाणामिति । यत्या[4]श्रमपरिग्रहेऽपि नियमो नास्ति, श्रद्धोपगमे सति ब्रह्मचार्येव यतिर्भवति, गृहस्थो वा भवति, वानप्रस्थो वेत्यनेनाभिप्रायेणोक्तं त्रयाणामन्यतमस्येति । श्रद्धावतः चित्तप्रसादवतः सर्वभूतेभ्यो नित्यमभयं दत्त्वा भूतानि मया न जातु हिंसितव्यानीति अद्रोहसङ्कल्पं गृहीत्वा, स्वानि कर्माणि काम्यानि संन्यस्य परित्यज्य यमनियमेष्वप्रमत्तस्य । अहिंसासत्यादयो यमाः । यथाह भगवान् पतञ्जलिः– अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा इति । तपःशौचादयस्तु नियमाः । यथाह स एव [5]भगवान्–शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा इति । न्यायभाष्यकारस्तु प्रत्याश्रमं विशिष्टं धर्मसाधननियममाह । तेष्वप्रमत्तस्य ताननतिक्रमतः । षट्पदार्थप्रसंख्यानात् षण्णां पदार्थानां तत्त्वज्ञानाद्योगस्यात्मज्ञानोत्पादन[6]समर्थस्य समाधिविशेषस्य [7]प्रसाधनमुत्पादनं प्रव्रजितस्य धर्मसाधनम् । यथैतानि धर्मं साधयन्ति तथा कथयति–दृष्टं चेति । लाभपूजादिप्रयोजनमनुद्दिश्यानभिसन्धाय यदैतानि साधनानि

[टि०] [236] एवं तत्त्वेति [8]नास्मीत्यनेन क्रियायाः न मे इत्यनेन सम्बन्धस्य नाहमित्यनेन कर्तृत्वस्य निषेधः । तेन नि[9]वृत्तेति :– अर्थवशादित्यर्थः ।

---

१ न तस्या–कं. १, कं. २ । २ भाजनं च धर्मसाधनम्–कं. १, कं. २ । ३ निरूपयति–कं. १, कं. २ । ४ यत्याश्रय–जे. ३ । ५ भगवान् पतञ्जलिः–जे. ३ । ६ सामर्थ्यस्य–जे. ३ । ७ साधनम्–जे. २ । ८ भोऽस्मी–म । ९ वृतेति – म, ब, क ।

न्यायकन्दली

क्रियन्ते, तदेतानि साधनानि भावप्रसादं चाभिप्रायविशुद्धिं चापेक्ष्यात्ममनसोः संयोगाद्धर्मोत्पत्तिरिति ।

प्रत्यहं दुःखैरभिहन्यमानस्य तत्त्वतो [1]विज्ञातेषु दुःखैकनिदानेषु विषयेषु विरक्तस्यात्यन्तिकं दुःखवियोगमिच्छतः "आत्मख्यातिरविप्लवा हानोपायः" 'तस्याश्च समाधिविशेषो निबन्धनम्' इति श्रुतवतः "संन्यस्य सर्वकाम्यकर्माणि समाधिमनुति[2]ष्ठासतः" । तत्प्रत्यनीकभूयिष्ठं ग्रामं परित्यज्य वनमाश्रितस्य यमनियमाभ्यां कृतात्मसंस्कारस्य समाध्यभ्यासान्निवर्त्तको धर्मो जायते । तस्मादस्य प्रकृष्टः समाधिस्ततोऽन्यः प्रकृष्टतरो धर्मः, [3]तस्मादप्यन्यः प्रकृष्टतमः समाधिरित्यनेन क्रमेणान्त्ये जन्मनि स तादृशः समाधिविशेषः परिणमति यो द्वन्द्वेनाप्यभिभवितुं न शक्यते । दृष्टो हि किञ्चिदभिमतं विषयमादरेणानुचिन्तयतः तदेकाग्रीभूतचित्तस्य सन्निहितेषु प्रबलेष्वपि विषयेषु [4]असंबोधः, यथेषुकार इषो लब्धलक्ष्यो[5]ऽभ्यासे गच्छन्तमपि राजानं न बुद्धयते । तथा च भगवान् पतञ्जलिः–"अभ्यासवैराग्याभ्यां तन्निरोधः" इति । एवं परिणते समाधावात्मस्वरूपसाक्षात्कारिविज्ञानमुदेति । यथाहुः कापिलाः–

एवं तत्त्वाभ्या[6]सान्नास्ती न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ इति ।

अत आत्मज्ञाना[7]र्थं यतिना योगसाधनमनुष्ठीयते । ज्ञानं ज्ञेयाभिव्यक्तिमात्रफलम्, श्रौतात्मज्ञानेनाप्यात्मस्वरूपं प्राप्यते, किमस्य ध्यानाभ्यासात् प्रत्यक्षीकरणेनेति चेत् ? न, परोक्षस्य प्र[8]त्यक्षज्ञानबाधने सामर्थ्याभावात् । स्वरूपतस्तावदात्मा न कर्त्ता न भोक्ता, किन्तूदासीन एव । तत्र देहेन्द्रिय[9]सम्बन्धोपाधिकृतोऽहं ममेति कर्त्तृत्वभोक्तृत्वप्रत्ययो मिथ्याऽतस्मिंस्तदिति भावात् । एतत्कृतश्चानुकूलेषु रागः प्रतिकूलेषु द्वेषः, ताभ्यां प्रवृत्तिनिवृत्ती, ततो धर्माधर्मे, ततश्च संसारः । यथोक्तं सौगतैः–

आत्मनि सति परसंज्ञा स्वपरविभागात् परिग्रहद्वेषौ ।
अनयोः संप्रतिबद्धाः सर्वे भावाः प्रजायन्ते ॥

१ निर्जितेषु–जे. २ । २ तिष्ठामः–कं. १, कं. २ । ३ तस्मादन्यः–जे. १ । ४ सम्बधः–कं. १, कं. २ ।
५ लक्ष्याभ्यासो–कं. १, कं. २ । ६ नास्मि न मे नाह–कं. १, कं. २, जे. १ । ७ ज्ञानार्थिना–कं. १, कं. २ ।
८ प्रत्यक्षगाधने–कं. १, कं. २ । ९ सम्बन्धाद्युपाधि–कं. १, कं. २ ।

न्यायकन्दली

अनादिवासना[1]वासितोऽतिप्रबलो नि[2]सर्गसिद्धः सर्वः सांव्यवहारिकः [3]प्रत्यक्षेणैष प्रत्ययः। श्रौतमात्मतत्त्वज्ञानं क्षणिकमनुपलब्धसंवादं परोक्षं च। न च दृढतरः प्रत्यक्षावभासः परोक्षावभासेन शक्यते निषेद्धुम्। नहि शतशोऽपि प्रमाणान्तरावगते गुडस्य माधुर्ये दुष्टेन्द्रियजः तिक्तप्रतिभासस्तत्कृतश्च दुःखावगमो निवर्तते, तस्मात् प्रत्यक्षज्ञानार्थं समाधिरुपासितव्यः। प्रचिते समाधौ तत्सामर्थ्यात् कर्तृत्वभोक्तृत्वपरिपन्थिन्यात्मतत्त्वे स्फुटीभूते समाने विषये विद्याविद्ययोर्विरोधादहङ्कारममकारवासनोच्छेदे सन्नपि प्रपञ्चो नात्मानं स्पृशति। तथा च कापिलैरुक्तम्–

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्तौ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः॥

तेन तत्त्वज्ञानेन सता निवृत्तप्रसवां निवृत्तोपभोगजननसामर्थ्याज् ज्ञानधर्मवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्येभ्यः सप्तरूपेभ्यो विनिवृत्तां प्रकृतिं पुरुषः प्रेक्षकवदुदासीनः स्वस्थो रजस्तमोवृत्तिकलुषतया बुद्धया [4]नसम्भिन्नः पश्यतीत्यर्थः। यद्यप्यनादिरियं मोहवासना आदिमांश्च तत्त्वसाक्षात्कारः, तथाप्यनेन सा निरुद्धयते, तत्त्वावग्रहो हि धियां परमं बलम्।

---

१ वासित इति–कं. १, कं. २। २ निसर्गबद्धः–कं. १, कं. २। ३ प्रत्यक्षेणैवेष–कं. १, कं. २।
४ असम्भिन्नः–कं. १, कं. २।

प्रशस्तपादभाष्यम्

[237] अधर्मोऽप्यात्मगुणः । कर्त्तुरहितप्रत्यवायहेतुरतीन्द्रियोऽन्त्यदुःखसंविज्ञानविरोधी । तस्य तु साधनानि शास्त्रे [1]प्रतिषिद्धानि धर्मसाधनविपरीतानि हिंसानृतस्तेयादीनि, विहिताकरणं, प्रमादश्चै[2]तानि दुष्टाभिसन्धिं चापेक्ष्यात्ममनसोः संयोगादधर्मस्योत्पत्तिः ।

न्यायकन्दली

[237] अधर्मोऽप्यात्मगुणः । [3]न केवलं धर्मोऽधर्मोऽप्यात्मगुणः । [4]कर्त्तुरहितप्रत्यवायहेतुः । कर्त्तुरहितं दुःखसाधनम्, प्रत्यवायो दुःखम्, तयोरधर्मो हेतुः । [[5]अतीन्द्रियो न केनापीन्द्रियेण गृह्यत इत्यर्थः] अन्त्यदुःखसंविज्ञा[6]नविरोधी । अन्त्यस्य दुःखस्य सम्य[7]ग्विज्ञानेन विनाश्यते । तस्य साधनानि शास्त्रे प्रतिषिद्धानि धर्मसाधनविपरीतानि हिंसानृतस्तेयादीनि । हिंसा पराभिद्रोहः । अनृतं मिथ्यावचनम् । स्तेयमशास्त्रपूर्वं परस्वग्रहणम् । एवमादीनि धर्मसाधनविपरीतानि शास्त्रे प्रतिषिद्धानि यानि तान्यधर्मसाधनानि । [8]विहिताकरणं प्रमादश्च । विहिताकरणमवश्यकर्त्तव्याकरणम् । प्रमादोऽबुद्धिपूर्वकोऽतिक्रमः, एतदपि द्वयमधर्मसाधनम् । यथैतेभ्यो धर्मस्योत्पत्तिस्तद्दर्शयति—एतानि [9]च दुष्टं चाभिसन्धिमपेक्ष्यात्ममनसोः संयोगादधर्मोत्पत्तिरिति । यत्र कामनापूर्वकमधर्मसाधनानुष्ठानं तत्र दुष्टोऽभि[10]सन्धिः कारणम् । अकामकृते तु प्रमादेनास्य हेतुत्वम् ।

[टि०]

[237 to 241] [11]सन्तोषसुखं शरीरादिपरिखेदं च इति :— अधर्ममिश्रत्वाद्धर्मः शरीरादिपरिखेदे कारणम् । संस्कारवशादनुवर्तमानस्य इति :— देहपक्षे [12]संस्क्रियते आभ्या[13]मात्मा इति संस्कारशब्देन धर्मा[14]धर्मौ उच्येते । लोकेन

---

१ विप्रति—दे । २ एतानि च दुष्टं चाभिसन्धिमपेक्ष्य—कन्दल्याम् । ३ 'न केवलं धर्मोऽधर्मोऽप्यात्मगुणः' इति पाठो जे. १ पुस्तके नास्ति । ४ कर्तुरिति—कं. १, कं. २ । ५ [ ] एतच्चिह्नान्तर्गतः पाठः कं. १, कं. २, जे. २ पुस्तकेषु नास्ति । ६ नेति—कं. १, कं. २ । ७ विज्ञानं तेन—कं. १, कं. २ । ८ विहिताकरणं विहितस्यावश्यंकरणीस्याकर्तव्यता—कं. १, कं. २, जे. ३ । ९ चेति—कं. १, कं. २ । १० सन्धिरधर्मकारणम्—कं. १, कं. २ । ११ सन्तोषः सुखं शरीरादिपरिखेदे कारणम्—अ, ब, क । १२ स्क्रियते—अ । १३ आत्मात्मेति—अ । १४ धर्मा—अ, ब, क ।

प्रशस्तपादभाष्यम्

[1]अविदुषो रागद्वेषवतः प्रवर्त्तकाद्धर्मात् [2]प्रकृष्टात् स्वल्पाधर्मसहितात् ब्रह्मेन्द्रप्रजापतिपितृ[3]मनुष्यलोकेष्वाशयानुरूपैरिष्टशरीरेन्द्रियविषयसुखादिभिर्योगो भवति । तथा प्रकृष्टादधर्मात् स्वल्पधर्मसहितात् प्रेततिर्यग्योनिस्थानेष्वनिष्टशरीरेन्द्रियविषयदुःखादिभिर्योगो [4]भवति । एवं प्रवृत्तिलक्षणाद्धर्मादधर्मसहिताद्देवमनुष्यतिर्यङ्नारकेषु पुनः पुनः संसार[5]प्रबन्धो भवति ।

न्यायकन्दली

एवमधर्मस्य साधनमभिधाय संप्रति साध्यं कथयति–अविदुष इत्यादिना । यः कर्त्ता भोक्ता[6]स्मीत्यात्मानमभिमन्यते, परमार्थतो दुःखसाधनं च बाह्याध्यात्मिकविषयं सुखसाधनमित्यभिमन्यते सोऽविद्वान् । स च स्वोपभोगतृष्णा[7]परिप्लुतः सुखसाधन[8]त्वेनारोपिते विषये रज्यते, तदुपरोधिनि च द्विष्टो भवति । तस्य प्रवर्त्तकाद्धर्माद्देवो वा स्यां गन्धर्वो वा स्यामिति पुनर्भवप्रार्थनया कृताद् धर्मात् प्रकृष्टात् फलातिशयहेतोराशयानुरूपैः [9]कर्मानुरूपैरिष्टशरीरादिभिः सम्बन्धो भवति, ब्रह्मेन्द्रादिस्थानेऽपि मात्रया दुःखसम्भेदोऽस्ति । न चाधर्मादन्यद् दुःखसंवेदोऽस्ति । न चाधर्मादन्यद्दुःखस्य करणमतः स्वल्पाधर्मसहितादित्युक्तम् । यस्य प्रकृष्टो धर्मस्तस्य प्रकृष्टानि शरीरादीनि [10]भवन्ति, यस्य प्रकृष्टतरो धर्मः तस्य प्रकृष्टतराणि भवन्ति, यस्य प्रकृष्टतमो धर्मस्तस्य प्रकृष्टतमानीति प्रतिपादयितुमाशयानुरूपैरित्युक्तम् । इष्टशब्दः प्रत्येकं शरीरादिषु सम्बद्ध्यते, द्वन्द्वानन्तरं प्रयोगात् । तथा प्रकृष्टादधर्मात् प्रेतयोनीनां तिर्यग्योनीनां च स्थानेष्वनिष्टैः शरीरादिभिर्योगो भवति । प्रेतादिस्थानेऽपि मनाक् सुखमस्ति, तच्च धर्मस्य कार्यम्, अतः स्वल्पधर्मसहितादित्युक्तम् । उपसंहरति । एवमिति ।

[टि०]

हि इति संहर्षः सुखम्, आयासो दुःखं [11]ताभ्यां मुच्यते । वस्तुवृत्त्या तत्सम्भवेऽपि तद्गतरागाद्यभावात् । अन्तःकरणेति

१ अविदुषो प्रवतकाद्धर्मात्–व्यो (६४४) । २ प्रकृत्या–दे । ३ पितृगाथिमनुष्य–व्यो (६४४) । ४ इत्येवं–व्यो. (६४४) दे । ५ बन्धो–कं. १, कं. २, । ६ स्तो–कं. १, कं. २ । ७विप्लुतः–जे. १ । ८ त्वारोपिते–कं. १, कं. २., त्वेन बाह्ये विषये–जे. ३ । ९ नुरूपैरिष्टशरीरादिभिः–जे. १, धर्मानुरूपैरिष्टशरीरादिभिः–जे. २, धर्मानुरूपैविशिष्टशरीरादिभिः–जे. ३ । १० सम्भवन्ति–जे. १, जे. ३ । ११ ताभ्यामुच्यते–अ, ब, क ।

प्रशस्तपादभाष्यम्

[238-239-240] ज्ञानपूर्वकात्तु कृतादसंकल्पितफलाद्विशुद्धे कुले जातस्य दुःख[1]विगमोपायजिज्ञासोराचार्यमुपसङ्गम्योत्पन्नषट्पदार्थतत्त्वज्ञानस्याज्ञाननिवृत्तौ विरक्तस्य [2]रागद्वेषाभावात् तज्जयोर्धर्माधर्मयोरनुत्पत्तौ [3]पूर्वसञ्चितयोश्चोपभोगान्निरोधे सन्तोषसुखं

न्यायकन्दली

[238] एवं धर्मात् संसारं प्रतिपाद्यापवर्गं प्रतिपादयति ज्ञानपूर्वकात् त्विति। "स्वरूप[4]तश्चाहमुदासीनो बाह्याध्यात्मिकाश्च विषयाः सर्व एवैते दुःखसाधनम्" इति यस्य ज्ञानमभूत्, स दृष्टानुश्रविकविषयसुखवितृष्णः "एवमहं भूयासमिति मे भूयासुः" इति फलाकाङ्क्षया विना [5]निवृत्तिसाधनतया विहितमपरं चावश्यकरणीयं कर्म करोति। तस्मात् कर्मणो ज्ञानपूर्वकात् कृतादस्य [6]विशुद्धे कुले जन्म भवति। अकुलीनस्य श्रद्धा न भवति। न चाश्रद्दधानस्य जिज्ञासा सम्पद्यते। न चाजिज्ञासोस्तत्त्वज्ञानम्। तद्विकलस्य च नास्ति मोक्षप्राप्तिः। अतो मोक्षानुगुणमसंकल्पितफलं कर्म विशुद्धे कुले जन्म ग्राहयति, विशुद्धे कुले जातस्य प्रत्यहं [7]दुःखैरनुहन्यमानस्य दुःखविगमोपाये जिज्ञासा सम्पद्यते "कुतोनु खल्वयं मम दुःखोपरमः स्यात्" इति। स चैवमाविर्भूतजिज्ञास आचार्यमुपगच्छति, तस्य चाचार्योपदेशात् षण्णां पदार्थानां श्रौतं तत्त्वज्ञानं जायते। तदनु श्रवणमनननिदिध्यासनादिक्रमेण प्रत्यक्षं भवति। उत्पन्नतत्त्वज्ञानस्या[8]ज्ञानं सवासनं निवर्तते। विपर्ययज्ञानं तन्निवृत्तौ विरक्तस्य [9]विच्छिन्नरागद्वेषसंस्कारस्य रागद्वेषयोरभावात् तज्ज[10]योर्धर्माधर्मयोरनुत्पादः। क्लेशवासनोपनिबद्धा हि प्रवृत्तयस्तु[11]षावनद्धा इव तण्डुलाः प्ररोहन्ति। क्षीणेषु क्लेशेषु निस्तुषा इव तण्डुलाः कार्यं न प्रतिसन्दधते। यथाह भगवान् पतञ्जलिः–"सति मूले तद्विपाको जात्यायुर्भोगाः" इति।

[टि०]

[12]अन्तःकरणं कारणं यस्येति बहुव्रीहिः। [13]उत्पन्नो(त्पन्ना)पवर्गिण इतिः– [14]उत्पन्ननष्टस्येत्यर्थः॥ S[15]धर्मः॥

---

१ वियोगोपाय – व्यो. (६४४)। २ रागद्वेषाद्य – कं. १, कं. २। ३ सञ्चितयो – व्यो. (६४४) दे.। ४ स्वरूपतः स्वभावहम – जे. १, जे. २, स्वरूपमाऽहम – जे. ३। ५ निवृत्त – कं. १, कं. २। ६ हि शुद्धे – जे. १। ७ दुःखैरभि – कं. १, कं. २। ८ स्याज्ञाननिवृत्तौ सवासनविपर्ययज्ञाननिवृत्तौ – कं. १, कं. २। ९ रागसंस्कारस्य – जे. २, जे. ३। १० तज्जयो रागद्वेषजन्ययो – जे.२, जे. ३। ११ तुषाबद्धा – जे. ३। १२ अन्तःकारणं यस्येति – अ, ब, क। १३ उत्पन्नापवर्गिण इति प्रतीकं ब पुस्तके नास्ति। १४ उत्पन्नानष्टस्य – ड। १५ अत्र धर्माधर्मनिरूपणं समाप्तम्, अतः धर्माधर्मौ इति पदेन भाव्यम्।

प्रशस्तपादभाष्यम्

शरीरपरिखेदं चोत्पाद्य रागादिनिवृत्तौ निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्त्तते । [1]तदा निरोधात् निर्बीजस्यात्मनः शरीरादिनिवृत्तिः, पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्ष इति ।

न्यायकन्दली

यथाह भगवानक्षपादः– "न प्रवृत्तिः प्रतिसन्धानाय [2]हीनक्लेशस्य" इति । पूर्वसञ्चितयोश्च धर्माधर्मयोर्निरोध उपभोगात्, निवृत्तिफलहेतोश्च कर्मान्तरात् । सन्तोषसुखं शरीर[3]परिखेदं चोत्पाद्य रागादिनिवृत्तौ निवृत्तिलक्षणः केवलो धर्मः परमार्थदर्शनजं सुखं कृत्वा निवर्त्तते । निवर्त्तते संसारोऽनयेति निवृत्तिः, निवृत्तिर्लक्षणं यस्यासौ निवृत्तिलक्षणो निवृत्तिस्वभावो धर्मः रागादिनिवृत्तौ भूतायां केवलो व्यवस्थितः सन्तोषसुखं शरीर[4]परिखेदं चोत्पाद्य परमार्थदर्शनजमात्मदर्शनजं सुखं करोति, त[5]त्कृत्वा निवर्त्तते । [6]आगमाधिककार्यविधित्वात् तदा निर्बीजस्यात्मनः शरीरादिनिवृत्तौ पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्षः । यदा परमार्थदर्शनं कृत्वा निवृत्तो धर्मः, तदा निर्बीजस्यात्मनः शरीरादिबीजधर्माधर्मरहितस्यात्मन उत्पन्नानां शरीरादीनां कर्मक्षयान्निवृत्तौ भूतायामनागतानां कारणाभावाद[7]नुत्पत्तौ यथा दग्धेन्धनस्यानलस्योपशमः पुनरनुत्पादः, एवं पुनः शरीरानुत्पादो मोक्षः ।

[239] इदं निरूप्यते । किं ज्ञानमात्रान्मुक्तिः ? उत ज्ञानकर्मसमुच्चयात् ? ज्ञानकर्मसमुच्चयादिति वदामः । निवृत्तेतराभिलाषस्य काम्यकर्मभ्यो निवृत्तस्यापि नित्यनैमित्तिककर्माधिकारो न निवर्त्तते, तानि ह्युपनीतं ब्राह्मणमात्रमधिकृत्य विहितानि । मुमुक्षुरपि ब्राह्मण एव, जातेरनुच्छेदात् । स यद्यधिकारित्वे सत्यवश्यकरणीयान्यतिक्रमेत् प्रत्यवायोऽस्य प्रत्यहमुपचीयेत, तदुपचयाच्च बद्धो न मुच्यते । यथोक्तम्–

[टि०] ॥ [8]इति गुणपदार्थः ॥

[9][इति श्री मलधारिशिष्य पं. नरचन्द्रकृते कन्दली टिप्पणके गुणपदार्थः समाप्तः] ॥

---

१ तदा निर्बीजस्या – दे । २ हीन – जे. ३ । ३ परिच्छेदं – कं. १, कं. २ । ४ च्छेदं – कं. १, कं. २ । ५ कृत्वा – जे. १ । ६ आगमाधिककार्यविनिरोधात् – कं. १, कं. २ । ७ दनुत्पादे – जे. १, जे. २, जे. ३ । ८ इति श्रीमद् गुणपदार्थः इति अ, ब, क पुस्तकेषु । ९ [ ] एतच्चिह्नान्तर्गतः पाठः अ, ब पुस्तकयोर्नास्ति ।

न्यायकन्दली

यानि काम्यानि कर्माणि प्रतिषिद्धानि यान्यपि ।
तानि बन्धन्त्यकुर्वन्तं नित्यनैमित्तिकान्यपि ।। इति ।

विहिताकरणमभावः, न[1] न चाभावस्य भावहेतुत्वमस्ति । अतो नास्मात् प्रत्यवायोत्पत्तिरिति चेत् ? न, विहिताकरणेऽन्यकरणात् प्रत्यवायस्य सम्भवात् । अभावस्य हि स्वातन्त्र्येण हेतुत्वं नेष्यते, न तु भावोपसर्जनतया । न च शरीरी सन्ध्यादिकाले कायेन वाचा मनसा वा किञ्चिन्न करोति, शरीरधारणादीनामपि करणात् । यथोक्तम्—

कर्मणां प्रागभावो यो विहिताकरणादिषु ।
न चानर्थकरत्वेन वस्तुत्वान्नापनीयते ।।
स्वकाले यदकुर्वंस्तत्करोत्यन्यदचेतनः ।
प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते ।। इति ।

*अभावेन केवलेन नासौ जन्यत इत्यर्थः । प्रतिषिद्धाचरणात् प्रत्यवायः शरीरधारणादिकं च न प्रतिषिद्धम् । तत्कुर्वन्नपि यदि [2]सन्ध्यायां योगमभ्यस्यति को दोष* इति चेत् ? [3]तन्न, [4]तत्काले विहितस्यावश्यकर्तव्यताविधेरर्थात् केवलस्य शरीरधारणादेः करणं प्रतिषिद्धमिति । तदाचरतो भवत्येव प्रतिषिद्धाचरणनिमित्तः प्रत्यवायः । अथोच्यते । दीर्घकालादरनैरन्तर्यसे[5]वितभावनाहितविशदभावमात्मज्ञानमेव रागद्वेषौ मोहं च समूलकाषं कषद्विहिताकरणनिमित्तं प्रत्यवायमपि [6]कषतीति तदयुक्तम् । यत्र ह्यभ्यासः प्रसीदति, तत्र तत्त्वग्रहो जातः संशयविपर्ययौ व्युदस्यति, न त्वस्य वस्त्वन्तरनिर्वहणे सामर्थ्यं दृष्टपूर्वम् । यदि पुनरात्मज्ञानं [7]कर्माणि निरुणद्धि उपारूढफलभोगमपि कर्म निरुन्ध्यात्, ततः सुदूरं गता जीवन्मुक्तिः ? तत्त्वदर्शनानन्तरमेव विलीनाखिलकर्मणो देहपातात् । अस्ति चायं परमार्थदृष्टिनिरुद्धाखिलाविद्योऽपि चित्रलिखितमिवाभासमात्रेण सर्वं जगत् पश्यन्नेकत्राप्यनारूढाभिनिवेशः प्रारब्धफलं कर्मविशेष-

१ न चाभावो भावस्य हेतुरपि–कं. १, कं. २ । २ सन्ध्यया–कं. १, कं. २ । ३ चेन्न–कं. १, कं. २; चेत्–जे. १ ।
४ तत्काले हि–जे. २ । ५ सेविनाहित–जे. १, जे. ३ । ६ कषतीति चेत्–कं. १, कं. २, कषति–जे. २ ।
७ कर्मापि–जे. ३ ।

न्यायकन्दली

मुपभुञ्जानः कुलालव्यापारविगमे चक्रभ्रान्तिवत् संस्कारवशादनुवर्त्तमानस्य देहपातमुदीक्षमाणः। तथा च श्रुतिः जीवन्नेव हि विद्वान् संहर्षायासाभ्यां [1]विप्रमुच्यते, इति। [2]तथा चाहुः कापिलाः—

सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीरः॥ इति।

धर्मादीनामकारणप्राप्ताविति तत्त्वज्ञानेनोच्छिन्नेषु सवासनक्लेशेषु धर्मादीनां सहकारिकारणप्राप्त्यभावे सतीत्यर्थः। अलब्धवृत्तीनि कर्माणि तत्त्वज्ञानाद्विलीयन्त इति चेत्? न, तेषामपि कर्मत्वादारब्धफलकर्मवज्ज्ञानेन विनाशाभावात्। योऽपि 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे 'परावरे'[3] इत्युपदेशः, तस्याप्ययमर्थः—ज्ञाने सति अनागतानि कर्माणि न क्रियन्त इति। न पुनरयमस्यार्थः उत्पन्नानि कर्माणि ज्ञानेन विनाश्यन्त इति। तथा चागमान्तरम् 'नाभुक्तं क्षीयते कर्म कल्पकोटि[4]शतैरपि' अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् इत्यादि। ज्ञानं यदि न क्षिणोति कर्माणि? अनेकजन्मसहस्रसञ्चितानां कर्मणां कुतः [5]परिक्षयः? भोगात् कर्मभिश्च। तदर्थं चोदितैरनन्तानां कथमेकस्मिन् जन्मनि परिक्षय इति चेत्? न, कालानियमात्। यथैव तावत् प्रतिजन्म कर्माणि चीयन्ते, तथैव भोगात् क्षीयन्ते च। यानि त्वपरिक्षीणानि तान्यात्मज्ञेनापूर्वम[6]सञ्चिन्वता च क्रमेणोपभोगात् कर्मभिश्च [7]नाश्यन्ते। यथोक्तम्—

कुर्वन्नात्मस्वरूपज्ञो भोगात् कर्मपरिक्षयम्।
युगकोटिसहस्रेण कश्चिदेको विमुच्यते॥ इति।

तदेवं विहितमकुर्वतः प्रत्य[8]वायोपपत्तेस्तस्य च बन्धहेतुत्वादन्यतो विरामाभावात्, प्रत्यवायनिरोधार्थं मुक्तिमिच्छता योगाभ्यासाविरोधेन भिक्षाभोजनादिवद्यथाकालं विहितान्यनुष्ठेयानि, यावदस्यात्मतत्त्वं न स्फुटीभवति। स्फुटीकृतात्मतत्त्वस्यापि जीवन्मुक्तस्य तावत्कर्माणि भवन्ति, [9]यावद्देहयात्रानुवर्तते। आत्मैकप्रतिष्ठस्य त्वभ्यर्ण-

१ विमुच्यते–जे. १। २ यथाहुः–जे. २। ३ 'परविरे' अवश्यमेव कर्तव्यं कृतं कर्म शुभाशुभम्–इत्यधिकं जे. ३ पुस्तके। ४ शतैरपीत्यादि–कं. १, कं. २; शतैरपीति–जे. ३। ५ संक्षयः–जे. २। ६ मपूर्वं सञ्चिन्वता–कं. १, कं. २। ७ विलोप्यन्ते–जे. १, जे. २, जे. ३। ८ प्रत्यवायोत्पत्ते–कं. १, कं. २। ९ यावद्यात्रा–कं. १, कं. २।

न्यायकन्दली

मोक्षस्य परिक्षीणप्रायकर्मणः तानि [1]नश्यन्त्येव, बहिः संवित्तिविरहात्। परिणतसमाधिसामर्थ्यविशदीकृतमुपचितवैराग्याहितपरिपाकपर्यन्तमापादितविषयाद्वैतमुन्मूलितनिखिलविपर्ययवासनमेकाग्रीकृतान्तःकरणकारणमा[2]त्मज्ञानमेव केवलं तदानीं [3]सञ्जायते न बहिःसंवेदनम्, बाह्येन्द्रियव्यापारोपरमात्। तत्र कः संभवः कर्मणाम्? तथा च श्रुतिः 'न शृणोतीत्याहुरेकीभवति न पश्यतीत्याहुरेकीभवतीत्यादि। तदा चाकरणनिमित्तः प्रत्यवायोऽपि नास्ति, सन्ध्येयमुपस्थितेत्यादिकमजानतो ब्राह्मणोऽस्मीति प्रतीतिरहितस्य कर्माधिकारपरिभ्रंशात्। यथोक्तम्–

ब्राह्मणत्वानहंमानी कथं कर्माणि संसृजेदिति।

न चास्योपरतसमस्तव्यापारस्य काष्ठवदवस्थितस्यापि प्राणिहिंसापि संभवति। यत् पुनरस्य दृष्टद्रष्टव्यस्य क्षीणक्षेतव्यस्य वशीकृतमनसो विषयावबोधस्मरणसंकल्पसुखदुः[4]खादिरहितस्य ब्रह्मलग्नसमाधेरपि शरीरं कियन्तं चित् (कालमनुवर्तते) तच्छरीरस्थितिमात्रहेतोरायुर्विपाकस्य कर्मग्रन्थेरनुच्छेदात्। यदा तु यावन्तं कालमायुर्विपाकेन कर्मणा शरीरं धारयितव्यं तावत्कालप्राप्तिरभूत्, तदा स्वकार्यक[5]रणात् कर्मसमुच्छेदे तत्कार्यस्य शरीरस्य निवृत्तिः। तन्निवृत्तौ तत्कार्यस्य तत्त्वज्ञानस्यापि विनाशादात्मा कैवल्यमापद्यते। तत्रात्मतत्त्वज्ञानस्य विहितानां च कर्मणां बन्धहेतुकर्म[6]प्रतिबन्धे व्यापारादस्ति सम्भूयकारिता। शरीरादिविविक्तमात्मानं जानतश्च तदुपकारापकारावात्मन्यप्रतिसन्दधानस्याहङ्कारममकारयोरुपरमे सत्युपकारिण्यपकारिणि च रागद्वेषयोरभावादुदासीनस्याप्रवृत्तावनागतयोः कुशलेतरकर्मणोरसञ्चयात्, सञ्चितयोश्चोपभोगेन कर्मभिश्च परिक्षयाद्विहिताकरणनिमित्तस्य प्रत्यवायस्य च विहितानुष्ठानेनैव [7]प्रतिबन्धात्। क्षीणे कर्मण्यैहिकस्य देहस्य निवृत्तौ कारणान्तराभावादामुष्मिकस्य देहस्य [8]पुनरुत्पत्त्यभावे सत्यात्मनः स्वरूपेणावस्थानम्। यथोक्तम्–

नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्।
ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेत्॥
अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नरः। इति।

---

१ भ्रश्यन्ते–जे. १, जे. २, जे. ३। २ आत्मतत्त्वज्ञान–कं. १, कं. २। ३ सन्तायते–जे. २, जे. ३। ४ दुःखबहिष्कृतस्य–कं. १, कं. २। ५ कारणात्–जे. १। ६ प्रतिबन्ध–कं. १, कं. २। ७ प्रतिरोधात्–जे. २। ८ पुनरायत्यभावे–जे. २।

न्यायकन्दली

तथा परैरप्ययं गृहीतो मार्गः ।

कर्मणा सत्त्वसंशुद्धिर्ज्ञानेनात्मविनिश्चयः ।

भवेद्विमुक्तिरभ्यासात् तयोरेव समुच्चयात् ॥ इति ।

[240] किं पुनरात्मनः स्वरूपं येनावस्थितिर्मुक्तिरुच्यते ? आनन्दात्मतेति केचित् । तदयुक्तम् । विकल्पासहत्वात् । स किमानन्दो मुक्तावनुभूयते वा ? न वा ? यदि नानुभूयते ? स्थितोप्यस्थितान्न विशिष्यते, अनुपभोग्यत्वात् । अनुभूयते चेत् ? अनुभवस्य कारणं वाच्यम् । न च कायकरणादिविगमे तदुत्पत्ति[1]कारणं पश्यामः । अन्तःकरणसंयोगः कारणमिति चेत् ? न, धर्माधर्मोपगृहीतस्य हि मनसः [2]सहायत्वात्, तदखिलशुभाशुभबीजना[3]शोपरीभूतं नात्मानुकूल्येन वर्त्तते । योगजधर्मानुग्रहादात्मानमनुकूलयति चेत् ? योगजोऽपि धर्मः कृतकत्वादवश्यं विनाशीति तत्प्रक्षये मनसः कोऽनुग्रहीता ? अथ मतम्–अचेतनस्यात्मनो मुक्तस्यापि पाषाणादविशेषः, सोऽपि हि न सुखायते[4] न च दुःखायते, मुक्तोऽपि यदि तथैव, कोऽनयोर्विशेष. ? तस्मादस्त्यात्मनः स्वाभाविकी चितिः, सा यदेन्द्रियैर्बहिराकृष्यते, तदा बहिर्मुखीभवति । यदा त्विन्द्रियाण्युपरतानि भवन्ति, तदा स्वात्मन्येवानन्दस्वभावे निमज्जति ।

अयं हि चितेरात्मा यदि यं कञ्चिदवभासयति, यदि पुनरियं मुक्तावस्थायामुदास्ते, तर्हि [5]स्थितापि न स्थितैव । वरमात्मा जड एव [6]कल्पित इति चेत् ? अत्रोच्यते–किं चितेरानन्दात्मता स्वाभाविकी ? कारणान्तरजन्या वा ? न तावदवभासकारणं मुक्तावस्ति, कायकरणादीनां तत्कारणानां विलयादित्युक्तम् । स्वाभाविकी चेत् ? संसारावस्थायामप्यानन्दोऽनुभूयेत, चितिचैत्ययोरुभयोरपि सम्भवात् । अविद्याप्रतिबन्धादननुभव इति चेत् ? न, नित्यायाश्चितेरानन्दा[7]नुग्रहस्वभावायाः स्वरूपस्याप्रच्युतेः कः प्रतिबन्धार्थः ? प्रच्युतौ वा स्वरूपस्य का नित्यता ? तस्मान्नित्य आनन्दो नित्यया चित्या चेत्यमानो द्वयोरप्यवस्थयोरविशेषेण चेत्यते । न चैवमस्ति, संसारावस्थायामुत्पन्नापवर्गिणो विषयेन्द्रियाधीनज्ञानस्य सुखस्यानुभवात् । अतो नास्त्यात्मनो

---

१ कारणतां–कं १, कं. २; जे. २ । २ सहायता–जे. १, जे. ३ । ३ नाशोपगतं–कं. १, कं. २ । ४ न दुःखायते–कं. १, कं. २; जे. २, जे. ३ । ५ स्थितोऽप्यस्थित एव–कं. १, कं. २; स्थिताप्यनवस्थितैव–जे. ३ । ६ कल्प्यतामिति–कं. १, कं. २ । ७ नुभव–कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

[241] शब्दोऽम्बरगुणः श्रोत्रग्राह्यः, क्षणिकः, कार्यकारणोभयविरोधी, संयोगविभागशब्दजः, प्रदेशवृत्तिः, समानासमानजातीयकारणः । स द्विविधो वर्णलक्षणो [1]ध्वनिलक्षणश्च । तत्र अकारादिर्वर्णलक्षणः, शङ्खादिनिमित्तो [2]ध्वनिलक्षणश्च ।

न्यायकन्दली

नित्यं सुखं तदभावान्न [3]तदनुभवमयी मोक्षावस्था, किन्तु समस्तात्मविशेषगुणोच्छेदोपलक्षिता स्वरूपस्थितिरेव । यथा चायं पुरुषार्थस्तथोपपादितम् ।

[241] शब्दोऽम्बरगुणः आकाशगुणः । ननु संख्यादयोऽप्याकाशगुणाः[4]सम्भवन्ति । कथमिदं शब्दस्य लक्षणं स्यादत आह–श्रोत्रग्राह्य इति । श्रोत्रग्राह्यत्वे सत्यम्बरगुणो यः स शब्द इत्यर्थः । परस्य विप्रतिपत्तिनिराकरणार्थमाह–क्षणिक इति । आशुतरविनाशी शब्दो न तु नित्यः, उच्चारणादूर्ध्वमनुपलम्भात् । सद्भावे प्रमाणाभावेन [5]व्यञ्जकक्षणिकत्वकल्पनानवकाशात् । प्रत्यभिज्ञानस्य ज्वालादिवत्सामान्यविषयत्वेनोपपत्तेस्तीव्रमन्दतादिभेदस्य च व्यक्तिभेदप्रसाधकत्वात् । कार्यकारणोभयविरोधी आद्यः शब्दः स्वकार्येण विरुध्यते । [6]अन्त्यः स्वकारणेनोपान्त्यशब्देन विरुध्यते, अन्यस्य विनाशकारणस्याभावात् । मध्यवर्तिनस्तूभयथा विरुध्यन्ते । संयोगविभागशब्दजः । आद्यः शब्दः संयोगाद्विभागाच्च जायते, तत्पूर्वकस्तु शब्दादिति विवेकः ।

प्रदेशवृत्तिः अव्याप्यवृत्तिरित्यर्थः । एतच्चोपपादितम् । समानासमान[7]जातीयकारणः । शब्दजः शब्दः समानजातीयकारणः । संयोगजविभागजश्च असमानजातीयकारणः । स द्विविधो वर्णलक्षणः ध्वनिलक्षणश्च । अकारादिर्वर्णलक्षणः, शङ्खादिनिमित्तो ध्वनिलक्षणः ।

तत्र तयोर्मध्ये, वर्णलक्षणस्योत्पत्ति[8]रुच्यते । आत्ममनसोः संयोगात् पूर्वानुभूतवर्णस्मृत्यपेक्षात् तत्सदृशवर्णोच्चारणे कर्तव्ये इच्छा भवति । ततः प्रयत्नस्तं प्रयत्नं

१, २ अवर्णलक्षणश्च–व्यो (६५०) दे. ५ । ३ पो. २ । ३ तदनुभवो–कं. १, कं. २ । ४ सन्ति–कं. १, कं. २; भवन्ति–जे. २ । ५ व्यञ्जकत्वकल्पना–कं. १, कं. २ । ६ अन्त्यशब्दः–जे. १ । ७ जातीयेति–कं. १, क. २ । ८ रभिधीयत–जे. २ ।

## प्रशस्तपादभाष्यम्

तत्र वर्णलक्षणस्योत्पत्तिरात्ममनसोः संयोगात् स्मृत्यपेक्षाद्वर्णोच्चारणेच्छा, तदनन्तरं प्रयत्नः, तमपेक्षमाणादात्मवायुसंयोगाद्वायौ कर्म जायते । स चोर्ध्वं गच्छन् [1]कण्ठादीनभिहन्ति, ततः स्थानवायु[2]संयोगापेक्षात् स्थानाकाशसंयोगात् वर्णोत्पत्तिः ।

अवर्णलक्षणोऽपि भेरीदण्ड[3]संयोगाद्यपेक्षाद्भेर्याकाशसंयोगादुत्पद्यते । वेणुपर्व-विभा[4]गापेक्षाद् वेण्वाकाशविभागाच्च ।

## न्यायकन्दली

निमित्तकारणमपेक्षमाणादात्मवायुसंयोगादसमवायिकारणात् कौष्ठ्यवायौ कर्म जायते । [5]स च वायुरूर्ध्वं गच्छन् कण्ठादीनभिहन्ति हृत्कण्ठताल्वादीन् प्रदेशानभिहन्ति । ततोऽभिघा[6]तादनन्तरं स्थानस्य कण्ठादेः कौष्ठ्यवायुना सह यः संयोगस्त[7]न्निमित्तकारणभूतमपेक्षमाणात् स्थानाकाशसंयोगात् समवायिकारणाद्वर्णोत्पत्तिः ।

अवर्णलक्षणोऽपि भेरीदण्डसंयोगाद्दण्डगतं वेगमपेक्षमाणाद्भेर्याकाशसंयोगादुपजायते । भेर्याकाशसंयोगोऽसमवायिकारणम्, भेरीदण्डसंयोगो दण्डगतश्च वेगो निमित्तकारणम् । वेणुपर्ववि[8]भागाद्वेण्वाकाशविभागाच्च शब्दो जायते । शब्दाच्च शब्दनिष्पत्तिं कथयति–शब्दात् संयोगविभागनिष्पन्नाद्वीचीसन्तानवच्छब्दसन्तानः यथा जलवी[9]च्याः तदव्यवहिते देशे वीच्यन्तरमुपजायते, ततोऽप्यन्यत् ततोऽप्यन्यदित्यनेन क्रमेण वीचीसन्तानो [10]भवति, तथा शब्दादुत्पन्नात् तदव्यवहिते देशे शब्दान्तरं ततोऽप्यनयोर्गमनागमनाभावात् प्राप्तस्यैवोपलब्धिरिति ततोऽप्यन्यत् ततोऽप्यन्यदित्यनेन क्रमेण शब्दसन्तानो भवति । एवं सन्तानेन श्रोत्रदेशे समागतस्यान्त्यशब्दस्य ग्रहणम् ।

नन्वेषा कल्पना कुतः सिद्ध्यतीत्यत आह–श्रोत्रशब्दयोरिति । न श्रोत्रं शब्ददेशमुपगच्छति, नापि शब्दः श्रोत्रदेशम्, तयोर्निष्क्रियत्वात् । अप्राप्तस्य ग्रहणं नास्ति, इन्द्रियाणां प्राप्यकारित्वात् । प्रकारान्तरेण चोपलब्धिर्न घटते । दृष्टा च वीचीसन्ताने

१ उरःकण्ठादीन्–दे । २ संयोगापेक्षमाणात्–कं. १, कं. २ । ३ संयोगापेक्षाद्–कं. १, कं. २ । ४ विभागाद्–कं. १, कं. २ । ५ स वायु–जे. १ । ६ घातानन्तरं–कं. १, कं. २ । ७ त्निमित्तं–जे. १ । ८ विभागापेक्षाद्–जे. १ । ९ वीच्या–कं. १, कं. २ । १० जायते–जे. २ ।

प्रशस्तपादभाष्यम्

शब्दाच्च संयोगविभागनिष्पन्नाद्वीचीसन्तानवच्छब्दसन्तान इत्येवं स[1]न्तानेन श्रोत्रप्रदेशमागतस्य ग्रहणम्[3] । श्रोत्रशब्दयोर्ग[2]मनागमनाभावादप्राप्तस्य चानुपलब्धेः परिशेषात् सन्तानसिद्धिरिति ।

इति प्रशस्तपादभाष्ये गुणपदार्थः समाप्तः ।

न्यायकन्दली

स्वोत्पत्तिदेशे विनश्यतामपि स्वप्रत्यासत्तिमपेक्ष्य तदव्यवहिते देशे सदृशकार्यारम्भ-परम्परया देशान्तरप्राप्तिः, तेन शब्दसन्तानः [4]कल्प्यते । न चानवस्था, यावद्दूरं निमित्तकारणभूतः कौष्ठ्यवायुरनुवर्त्तते, तावद्दूरं शब्दसन्ताना[5]नुवृत्तेः । अत एव प्रतिवातं शब्दानुपलम्भः, कौष्ठ्यवायुप्रतीघातात् । अतीवायं मार्गस्तार्किकैः क्षुण्णस्ते-नास्माभिरिह भाष्यतात्पर्यमात्रं व्याख्यातम् नापरा युक्तिरुक्ता ।

गुणोपबद्धसिद्धान्तो युक्तिशुक्तिप्रभावितः ।
मुक्ताहार इव स्वच्छो हृदि विन्यस्यतामयम् ॥

इति [6]भट्टश्रीश्रीधरकृतायां पदार्थप्रवेशन्यायकन्दलीटीकायां गुणपदार्थः समाप्तः ।

---

१ सन्तानन्यायेन – व्यो. ६५० पा–६, ७ पु. । २ गमनासम्भवाद्–व्यो (६५०) । ३ ग्रहणं नास्ति–कं. १, कं. २ । ४ कल्पते–जे. १, जे. २, जे. ३ । ५ नुवृत्तिः कं. १, कं. २ । ६ इति श्री श्रीधर–जे. १, अत्र जे. १ पुस्तके गुणप्रकरणे सुवर्णमयसंस्थान इत्येकः श्लोकः पुष्पिकाया लेखनदोषादत्र प्रविष्टः–अन्यस्मिन् कस्मिंश्चिदपि पुस्तकेऽयं श्लोकः अत्र गुणप्रकरणान्ते नास्ति सं. ।

# अथ कर्मपदार्थनिरूपणम्

## प्रशस्तपादभाष्यम्

[242] उत्क्षेपणादीनां पञ्चानामपि कर्मत्वसम्बन्धः । एकद्रव्यवत्त्वं क्षणिकत्वं मूर्तद्रव्यवृत्तित्वमगुणवत्त्वं गुरुत्वद्रवत्वप्रयत्नसंयोगवत्त्वं स्वकार्यसंयोगविरोधित्वं संयोग-विभागनिरपेक्षकारणत्वमसमवायिकारणत्वं स्वपराश्रयसमवेतकार्यारम्भकत्वं समान-

## न्यायकन्दली

जगदङ्कुरबीजाय संसारार्णवसेतवे ।
नमो ज्ञानामृत[1]स्यन्दिचन्द्रायार्धेन्दुमौलये ॥

[242] उत्क्षेपणा[2]दीनां परस्परं साधर्म्यमितरपदार्थवैधर्म्यं च प्रतिपादयन्नाह– उत्क्षेपणादीनामिति । कर्मत्वं नाम सामान्यम्, तेन सह सम्बन्ध उत्क्षेपणादीनामेव । एकद्रव्यवत्त्वम् एकदा एकस्मिन् द्रव्ये एकमेव कर्म वर्तते, एकं कर्म एकत्रैव द्रव्ये वर्त्तत इत्येकद्रव्यवत्त्वम् । यद्येकस्मिन् द्रव्ये युगपद्विरुद्धोभयकर्मसमवायः स्यात्, तदा

॥ अथ [3]कर्म्म ॥

[टि०] [242 to 254] संयोगविभागानपेक्षकारणत्वम् इति :– ननु पूर्व[4]प्रदेशासंयोगविशिष्टं काल[5]मपेक्ष्य [6][कर्मणोत्तरप्रदेशे संयोगो जन्यते न तु पूर्वसंयोगे सत्येव यथा कार्यविनाशविशिष्टं कालमपेक्ष्य] विभागेनोत्तरविभागो जन्यते,तस्माद् विभागवदुत्तरसंयोगं प्रति कर्म्मणोऽपि सापेक्षकारणत्वमेवेति कथमनपेक्षकारणत्वम्?

[कु०] [242] *नन्वेकद्रव्यत्वं रूपादिष्वप्यस्ति तत्कथमिदमुत्क्षेपणादीना ततो वैधर्म्यमित्यत आह **एकदेति** (कं. २९०) यथा रूपादयः स्वसमानजातीयेन रसादिना सहैकस्मिन्द्रव्ये वर्तन्ते, नैवमुत्क्षेपणादयः स्वसमानजातीयैः सहैकस्मिन्द्रव्ये वर्तन्त इत्यर्थम् द्वितीयं तु व्याख्यानं संयोगादिवदनेकद्रव्यवृत्तित्वव्युदासाय स्वरूपादिसाम्यं प्रथमव्याख्यातेऽर्थे प्रमाणं सूचयितु तर्कमाह **यदीति** (कं. २९०) तत्र तावद्विरुद्धकर्मद्वयसमावेशाभावे प्रत्यक्षमेव प्रमाणम् । प्रतीयते ह्युत्क्षेपण-वदपक्षेपणाभावः । अविरुद्धकर्मद्वयसमावेशाभावे प्रमाणं विमतं(?) कर्मान्तराश्रिते न वर्तते । कर्मत्वात्संप्रतिपन्नवदिति द्वितीयव्याख्यातेऽर्थे प्रत्यक्षमेव प्रमाणमाह [**एकस्येति** (कं. २९०)] एकस्येव सहगच्छतोः संयोगिनोः गमनभेदः प्रत्यक्षसिद्ध इति भावः । क्षणिकत्वादिकं परस्परसाधर्म्यमात्रं रूपादिष्वपि संभवात् । **गुरुत्वेति** (कं. २९०) गुरुत्वादिष्वन्यतमेन समुदितैर्वा जायमानत्वमित्यर्थः । संयोगग्रहणस्य प्रयोजनमाह **नत्विति** (कं. २९०) । ननु गुणानामपि केषांचिदसमवायिकारणत्वं विद्यते कथमिदं वैधर्म्यमित्यत आह **यथेति** (कं. २९०) सत्ताव्यतिरिक्त-निमित्तकारणजातिहितत्वे सत्यसमवायिकारणत्वमुत्क्षेपणादीनामित्यर्थः । **स्वपराश्रयेति** (कं. २९०) इदं साधर्म्य-मात्रं संयोगविभागयोरपि समानत्वात्पराश्रय एवेति स्वाश्रे(श्र)याद् नास्मिश्चेत्यर्थः ।

* S'V. has not discussed the remaining Guṇas. After Buddhi, he directely comes to the discussion of Karma.

१ स्यन्द–जे. १ । २ दीनां च–कं. १, कं. २ । ३ अथ कर्म्मः–अ, ब । ४ प्रदेशा–क । ५ मपेक्ष्योत्तर-प्रदेशे–ब, क । ६ [ ] एतच्चिह्नान्तर्गतः पाठः अ पुस्तके नास्ति ।

प्रशस्तपादभाष्यम्

जातीयानारम्भकत्वं द्रव्यानारम्भकत्वं च प्रतिनियतजातियोगित्वम् । दिग्विशिष्ट-कार्यारम्भकत्वं च विशेषः ।

न्यायकन्दली

तयोः परस्परप्रतिबन्धाद्दिग्विशेषसंयोगविभागानुत्पत्तौ संयोगविभागयोरनपेक्षं कारणं कर्मेति लक्षणहानिः स्यात् । अथाविरुद्धकर्मद्वयसमावेशः, तदेकस्मादेव तद्देशद्रव्यसंयोग-विभागयोरुपपत्तेः द्वितीयकल्पनावैयर्थ्यम् । एवमेकं कर्म नानेकत्र वर्त्तते, एकस्य चलने तस्मात् कर्मणोऽन्यस्य चलनानुपलम्भात् । क्षणिकत्वमाशुतरविनाशित्वम् । मूर्तद्रव्यवृत्तित्वम् अवच्छिन्नपरिमाणद्रव्यवृत्तित्वम् । अगुणवत्त्वं [1]गुणरहितत्वम् । गुरुत्वद्रवत्वप्रयत्न[2]संयोगजत्वम् । [3]स्वकार्यसंयोगविरोधित्वम् । [4]स्वकार्येण संयोगेन विना-श्यत्व न विभागविनाश्यत्वम्, उत्तरसंयोगाभावप्रसङ्गात् ।

संयोगवि[5]भागनिरपेक्षकारणम् । यथा वेगारम्भे नोदनाभिघातविशेषापेक्षत्वं नैवं संयोगविभागारम्भे [6]नोदनाद्यपेक्षत्वमित्यर्थः । असमवायिकारणत्वम् यथा गुणानां निमित्तकारणत्वमपि नैवं कर्मणाम्, किं त्वसमवायिकारणत्वमेवेत्यर्थः । [7]स्वपरा-श्रयसमवेतकार्यारम्भकत्वम् । स्वाश्रये पराश्रये च व्यासज्य समवेतं यत्कार्यं संयोग-विभागलक्षणं तदारम्भकत्वम् । [8]समानजातीयानारम्भकत्वम् । कर्मणः कर्मान्तरारम्भे गच्छतो गतिवि[9]रामो न स्यात् । इच्छाप्रयत्नादिविरामादन्ते गतिविराम इति चेत् ? तर्हीच्छाप्रयत्नादिकमेवो[10]त्तरोत्तरकर्मणामपि कारणम् न तु कर्म । विवादाध्यासितं

[टि०]

नैवम्, पूर्वसंयोगनाशस्य उत्तरसंयोगप्रतिबन्धकनिवर्तनेनैव चरितार्थत्वात् । [11]प्रलयानन्तरावस्थामावि कर्मव्यतिरिक्तत्वे

[कु०] इच्छाप्रयत्नादीति (कं. २९१) आदिशब्देन वेगो गृह्यते । तर्हीच्छादेरेवान्वयव्यतिरेकानुविधानादिभेद इत्यर्थः । ननु तन्तुक्रियानन्तर पटो जायते तत्कथं द्रव्यानारम्भकत्वमित्यत आह उत्तरसंयोगादिति (कं. २९१) दिग्विशिष्टेति (कं. २९१) दिग्विशेषविशिष्टकार्यारभकत्वमिति व्याख्येयम् ।

१ गुणवत्व–कं. १, कं. २ । २ संयोगजन्यत्वम्–जे. ३; गुरुत्वद्रवत्वसंयोगजन्यत्वम्–जे. २ । ३ स्वकार्येति–कं. १, कं. २ । ४ स्वकार्यसंयोगविनाश्यत्वम्–जे. १ । ५ विभागेति–कं. १, कं. २ । ६ तदपेक्षत्वम्–जे. १, जे. २, जे. ३ । ७ स्वपराश्रयेति–कं. १, कं. २ । ८ समानेति–कं. १, .क २ । ९ विनाशो–कं. १, कं. २ । १० उत्तरकर्मणामपि–जे. १ । ११ महाप्रलया...मु. जे. १, २, ३ ।

प्रशस्तपादभाष्यम्

[243] तत्रोत्क्षेपणं शरीरावयवेषु तत्सम्बद्धेषु च यदूर्ध्व[1]भाग्भिः प्रदेशैः संयोगकारणमधो[2]भाग्भिश्च विभागकारणं कर्मोत्पद्यते [3]गुरुत्वप्रयत्नसंयोगेभ्यस्तदुत्क्षेपणम् ।

तद्विपरीतसंयोगविभागकारणं कर्मा[4]वक्षेपणम् ।

ऋजुनो द्रव्यस्याग्रावयवानां तद्देशैर्विभागः संयोगश्च, मूलप्रदेशैर्येन कर्मणावयवी कुटिलः सञ्जायते तदाकुञ्चनम् ।

न्यायकन्दली

कर्म कर्मकारणं न भवति, कर्मत्वात् अन्त्यकर्मवत् । अथवा विवादाध्यासितं कर्म कर्मसाध्यं न भवति, कर्मत्वादाद्यकर्मवत् । [5]द्रव्यानारम्भकत्वम् । उत्तरसंयोगान्निवृत्ते कर्मणि द्रव्यस्यो[6]त्पादात् । प्रतिनि[7]यतजातियोगित्वम् । उत्क्षेपणादिषु प्रत्येकमुत्क्षेपणत्वादियोग इत्यर्थः । एत[8]त्सर्वपञ्चानामपि साधर्म्यम् । दिग्विशिष्टकार्यकर्तृत्वमेव कथयति–तत्रेति ।

[243] शरीरावयवेषु हस्तादिषु तत्सम्बद्धेषु मुसलादिषु च यदूर्ध्वभाग्भिः प्रदेशैः संयोगकारणम्, अधोभाग्भिश्च विभागकारणं गुरुत्वसंयोगप्रयत्नेभ्यो जायते तदुत्क्षेपणम् ।

[9]तद्विपरीतसंयोगविभागकारणं कर्मावक्षेपणम् । अधोदेशसंयोगकारणमूर्ध्वदेशविभागकारणं [10]कर्मावक्षेपणमित्यर्थः ।

[11]ऋजुन इति । तद्देशैरग्रावयवसम्बद्धैराकाशादिदेशैः सञ्जायते इति, येन कर्मणेति सम्बन्धः ।

[12]अग्रावयवानां मूलप्रदेशविभागादुत्तरदेशसंयोगोत्पत्तौ सत्यामित्यर्थः ।

[टि०]

सति मनःकर्मत्वाद् इति :– अत्र योगिमनोऽव्यवच्छेदार्थम् 'अयोगिमनःकर्मत्वाद्' इति कर्तव्यम् ।

[कु०] [243] गुरुत्वसंयोगप्रयत्नेभ्य इति (कं. २९१) तुलमुषलादिषु गुरुत्वतारतम्य-उत्क्षेपणतारतम्यदर्शनाद् गुरुत्वमपि कारणम् । इह च समुदितानामेव कारणत्वम्, अन्यतमापाये [उ]त्क्षेपणानुत्पत्तेः । अपक्षेपणेऽपि कारणं

१ भाग्भिः संयोगकारणम्–व्यो. दे । २ भाग्भिश्च प्रदेशैः–कं. १, कं. २ । ३ गुरुत्वद्रवत्व–व्यो. (६५४) । ४ पक्षेपणं–कं. १ कं. २ । ५ द्रव्येति–कं. १, कं. २ । ६ त्पादनम्–कं. १, कं. २ । ७ नियतेति–कं. १, कं. २ । ८ सर्वमपि पञ्चानां–कं. १, कं २ । ९ तद्विपरीतेति–कं. १, कं. २ । १० कर्मापि–कं. १, कं. २ । ११, १२ सर्वेष्वपि ताडपत्रीयपुस्तकेषु प्रतीकरूपेण सम्पूर्णभाष्यस्य पाठो दत्तः सं. ।

## प्रशस्तपादभाष्यम्

तद्विपर्ययेण संयोगविभागोत्पत्तौ येन कर्मणावयवी ऋजुः सम्पद्यते तत्प्र[1]सारणम् ।

यदनियतदिक्[2]प्रदेशसंयोगविभागकारणं तद्गमनमिति ।

एतत्पञ्चविधमपि कर्म शरीरावयवेषु तत्सम्बद्धेषु च सत्प्रत्ययमसत्प्रत्ययं च । यदन्यत्तदप्र[3]त्ययमेतेष्वन्येषु च, त[4]द्गमनमेव । कर्मणां जाति[5]पञ्चत्वमयुक्तम् गमनाविशेषात् ।

## न्यायकन्दली

[6]सत्प्रत्ययमिति । प्रयत्नपूर्वकमप्रयत्नपूर्वकं च भवतीत्यर्थः । [7]यदन्यदिति । [8]एतेषु शरीरावयवेषु मुसलादिष्वन्येषु वा द्रव्येषु यत् तदप्र[9]त्ययजं कर्म जायते सत्प्रत्ययादन्यत् तद्गमनमेव ।

चोदयति–कर्मणामिति उत्क्षेपणादीनां कर्मणां जाति[10]पञ्चत्वमयुक्तम्, गमनात् सर्वेषामविशेषादभेदादिति चोदनार्थः ।

[टि०]

।। इति श्रीमल[11]धारिशिष्य प. श्रीनरचन्द्रकृतिकन्दलीटीप्पनके कर्मपदार्थः समाप्तः ।।

[कु०]

पूर्वोक्तमेव द्रष्टव्यम् । ननु प्रसारणेनाय(यं)संयोगः क्रियते पूर्वं(र्वं) तत्राग्रसम्बन्धाभावात्कथं तद्विपर्ययेणेति भाष्यमित्यत आह अवयवानामिति (कं. २९२) भवतीत्यर्थः । इति यथासंभवेनेति शेषः ।

---

१ सम्प्रसारणं–दे । २ दिग्देश–दे । ३ तदप्रत्ययमेव–कं. १, कं. २ । ४ तद्गमनमिति–कं. १, कं. २ । ५ पञ्चकत्व–कं. १, कं. २ । ६, ७ सर्वेष्वपि ताडपत्रीयेषु पुस्तकेषु प्रतीकरूपेण सम्पूर्णभाष्यस्य पाठो दत्तः सं । ८ एतेषु च मुसलादिष्वन्येषु वा–जै. १ जे. ३ । ९ प्रत्ययजं–कं. १, कं. २; जै. २, जे. ३ । १० पञ्चक–कं. १, कं. २ । ११ श्रीमल कर्मपदार्थः समाप्तः–अ, ब ।

प्रशस्तपादभाष्यम्

[244] [1]सर्वं हि क्षणिकं कर्म [2]गमनमात्रमुत्पन्नं स्वाश्रयस्योर्ध्वमधस्तिर्यग्वा [3]परमाणुविवरमात्रैः प्रदेशैः संयोगविभागान् करोति, [4]सर्वत्र च गमनप्रत्ययोऽविशिष्टस्तस्माद्गमनमेव सर्वमिति ।

न, वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनात् । इहोत्क्षेपणं परत्रापक्षेपणमित्येवमादि सर्वत्र वर्गशः प्रत्ययानु[5]वृत्तिव्यावृत्ती [6]दृष्टे, तद्धेतुः सामान्य[7]विशेषभेदोऽवगम्यते । तेषामुदाद्युपसर्ग[8]विशेषात् प्रतिनियतदिग्विशिष्टकार्यारम्भत्वादुपलक्षणभेदोऽपि सिद्धः ।

न्यायकन्दली

[244] सर्वेषां गमनादविशेषमेव कथयति–सर्वं हीत्यादिना । उत्क्षेपणादिषूर्ध्वं गच्छति अधो गच्छतीति प्रत्ययदर्शनात् सर्वमेवेदमुत्क्षेपणादिकं गमनमेव ।

समाधत्ते–नेति । यत् त्वयोक्तं तन्न, उत्क्षेपणादिषु वर्गशः प्रतिवर्गं प्रत्ययानुवृत्तिव्यावृत्त्योर्दर्शनात् । गोवर्गे अश्वादिवर्गव्यावृत्त्या प्रत्ययानुगमदर्शनाद् गोत्वं कल्प्यते यथा, तथोत्क्षेपणादिषु प्रतिवर्गमि[9]तरव्यावृत्त्या प्रत्ययानुगमदर्शनादुत्क्षे[10]पणत्वादिसामान्यकल्पनेत्यभिप्रायः । अस्य विवरणं सुगमम् ।

[11]तेषामिति । उपलक्षणभेदोऽपीत्यपिशब्दः कार्यारम्भादित्यस्मात् परो द्रष्टव्यः । उपलक्ष्यतेऽन्यविलक्षणतया प्रतिपाद्यते व्यक्तिरनयेत्युपलक्षणं जातिः । [12]तदयमत्रार्थः– न केवलमनुवृत्तिव्यावृत्तिप्रत्ययदर्शनादुत्क्षेपणापक्षेपणादीनां जातिभेदः सिद्धः, उदाद्युपसर्गभेदात् [13]प्रतिनियतदिग्विशिष्टकार्यारम्भादपि सिद्धः । अपरे तु तेषामुत्क्षेपणादीनामुदाद्युपसर्गविशेषाद्दिग्विशिष्टकार्यारम्भादुपलक्षणभेदोऽपि प्रतिपत्तिभेदोऽपि सिद्ध इति । अभेदे हि यथोत्क्षेपणमूर्ध्वसंयोगविभागहेतुरेवमपक्षेपणादिकमपि स्यात् ।

[कु०] [244] अस्यैव यथार्थस्य व्याख्यानपरं भाष्यं पठति यवन्यविति (कं. २९४) तद्व्याचष्टे एतेष्विति (कं. २९४) अत्र स प्रत्ययं शरीरावयवे तत्सम्बन्धवति पञ्चविधं चासत्प्रत्ययं त्वनियताधिकरणं गमनमेवेति । कः(?) प्रत्ययदर्शनाविति (कं. २९४) गतिप्रत्ययानुवृत्तिदर्शनादित्यर्थः ।

प्रत्ययानुवृत्तिव्यावृत्त्येति (कं. २९४) उत्क्षिपति वि(इ)त्यादिषु अनुवृत्तिव्यावृत्तिप्रत्ययवद् दृश्यत इति भावः ।

---

१ सर्वं क्षणिकं–दे । २ चलन–दे । ३ प्यणुमात्रैः–कं. १, कं. २ । ४ सर्वत्र–कं. १, कं. २ । ५ वृत्तिर्व्यावृत्तिश्च–व्यो. (६५८) पा. ५ पु । ६ दृष्टा–व्यो. (६५८) । ७ विशेषो–व्यो. (६५८) । ८ भेदात्–व्यो. (६५८) । ९ मितरवर्ग–कं. १, कं. २ । १० क्षेपणादि–जे १ । ११ अत्रापि सर्वेष्वपि ताडपत्रीयपुस्तकेषु सम्पूर्णमूलभाष्य पाठो दत्तः–सं । १२ तदयमर्थः–जे. १, जे. २, जे. ३ । १३ भेदाद् विशिष्टकार्यारम्भात्–जे. १, भेदाद् दिग्विशिष्टकार्यारम्भात्–जे. २, जे. ३ ।

प्रशस्तपादभाष्यम्

[245] [एवमपि पञ्चैवेत्यवधारणानुपपत्तिः । निष्क्रमणप्रवेशनादिष्वपि वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनात् ।] [1] यद्युत्क्षेपणादिषु सर्वत्र वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिदर्शनाज्जातिभेद इष्यते, [एवं च निष्क्रमणप्रवेशना[2]दिष्वपि] कार्यभेदात् तेषु प्रत्ययानुवृत्तिव्यावृत्तौ इति [3]चेत् ? न, उत्क्षेपणादिष्वपि कार्यभेदादेव प्रत्ययानुवृत्तिव्यावृत्तिप्रसङ्गः । अथ समाने वर्गशः प्रत्ययानुवृत्तिव्यावृत्तिसद्भावे उत्क्षेपणादीनामेव जातिभेदो न निष्क्रमणादीनामित्यत्र [4]विशेषे हेतुरस्तीति । न जातिसङ्करप्रसङ्गात् । निष्क्रमणादीनां जातिभेदात् प्रत्ययानुवृत्तिव्यावृत्तौ जातिसङ्करः प्रसज्यते । कथम् ?

द्वयोर्द्रष्ट्रोरेकस्मादपवरकादपवरकान्तरं गच्छतो युगपन्निष्क्रमणप्रवेशनप्रत्ययौ दृष्टौ, तथा द्वारप्रदेशे प्रविशति निष्क्रामतीति च । यदा तु प्रतिसीराद्यपनीतं भवति,

न्यायकन्दली

[245] पुनश्चोदयति–एवमपीति । यदि प्रतिवर्गं प्रत्यया[5]नुवृत्तिव्यावृत्तिदर्शनादुत्क्षेपणादिषु सामान्यमभ्युपेयते, तदा निष्क्रमणादिष्वपि प्रतिवर्गं प्रत्ययानुवृत्तिव्यावृत्तिदर्शनान्निष्क्रमणत्वादिकमभ्युपेयम्, ततश्च पञ्चैवेत्यवधारणानुपपत्तिः । अथ निष्क्रमणादिषु कार्यभेदात् प्रत्ययभेदो न जातिभेदात्, तदोत्क्षेपणादिष्वपि तथा स्यादित्याह–कार्यभेदात् तेष्विति । समाधत्ते नेति । यदि निष्क्रमणत्वादिजातय इष्यन्ते, तदा जातिसङ्करप्रसङ्गः । एकस्यां व्यक्तौ विरुद्धानेकजातिसमवायः प्रसज्यत इत्यर्थः ।

कथमिति पृष्टः सन्नाह–[6]द्वयोर्द्रष्ट्रोरिति । [7]द्वयोर्द्रष्ट्रोरेकस्मादपवरकादपवरकान्तरं गच्छतः पुरुषस्य यौ द्रष्टारौ तयोरेक[8]स्यां कर्मव्यक्तौ निष्क्रमणप्रवेशनप्रत्ययौ

[कु०] [245] पुनश्चोदयतीति (कं. २९५) न्यूनत्वचोद्यं समाधायाधिक्यं चो[illegible] । परस्परपरिहारेण स्थितानां जातीनामेकत्रसमावेशो जातिसंकर इत्याह एकस्यां व्यक्ताविति (कं. २९५) न केवलं निष्क्रमणप्रवेशनयोर्जातिसाङ्कर्यम, किञ्चित्किञ्चित्प्रत्ययानुवृत्तिरपि न(ना)स्तीति प्रदर्शनपरं भाष्यं विव्याचष्टे यथाऽनुवृत्तिप्रतीतिरिति (?) तस्माद्गमनमेवेति (कं. २९५) उत्क्षेपणादिचतुष्टयव्यतिरिक्तं कर्म सर्वं गमनमेव, न तु भ्रमणत्वादिना भिद्यत इति भावः ।

१ [ ] एतच्चिह्नान्तर्गतः पाठः दे पुस्तके नास्ति । २ [ ] एतच्चिह्नान्तर्गतः पाठः दे पुस्तके नास्ति । ३ चेत् उत्क्षे–दे । ४ विशेष–कं १, कं. २ । ५ नुवृत्तिदर्शनात्–जे. १ । ६ अत्र सर्वेष्वपि ताडपत्रीयेषु पुस्तकेषु प्रतीकरूपेण सम्पूर्णमूलभाष्यपाठः दत्तः । ७ 'द्वयोर्द्रष्ट्रोः' इति–जे. १, जे. २, जे. ३ पुस्तकेषु नास्ति । ८ एकस्यां व्यक्तौ–कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

तदा न [1]प्रवेशनप्रत्ययो नापि निष्क्रमणप्रत्ययः, किन्तु गमनप्रत्यय एव भवति । तथा नालिकायां वंशपत्रादौ [2]पतति बहूनां द्रष्टृणां युगपद् भ्रमणपतनप्रवेशनप्रत्यया दृष्टा इति जातिसङ्करप्रसङ्गः । न चैवमुत्क्षेपणादिषु प्रत्ययसङ्करो दृष्टः । तस्मादुत्क्षेपणादीनामेव जातिभेदात् प्रत्ययानुवृत्तिव्यावृत्ती, निष्क्रमणादीनां तु कार्यभेदादिति ।

कथं युगपत्प्रत्ययभेद इति चेत् ? अथ मतं यथा जातिसङ्करो नास्ति, एवमनेक[3]कर्मसङ्करोऽपि नास्तीत्येकस्मिन् कर्मणि युगपद् द्रष्टृणां भ्रमणपतनप्रवेशनप्रत्ययाः कथं भवन्तीति ?

न्यायकन्दली

दृष्टौ । यतोऽपवरकात् पुरुषो निर्गच्छति तत्र स्थितस्य निर्गच्छतीति प्रत्ययः, यत्र प्रविशति तत्र स्थितस्य प्रविशतीति प्रत्ययः । यदि जातिकृताविमौ प्रत्ययौ दृष्टौ तदैकस्यां व्यक्तौ परस्परविरुद्धनिष्क्रमणत्वप्रवेशनत्वजातिद्वयसमावेशो दूषण स्यात् । [4]तथा द्वारप्रदेशे प्रविशति निष्क्रामतीति यथैकस्मिन्नेव बहुप्रकोष्ठके गृहे प्रकोष्ठात् प्रकोष्ठान्तरं गच्छति पुरुषे पूर्वापरप्रकोष्ठस्थितयोर्द्रष्ट्रोर्द्वारप्रदेशे निर्गच्छति प्रविशतीति [5]प्रत्ययौ भवतः । यदा तु प्रतिसीराद्यपनीतं [6]मध्यस्थितं जवनिकाद्यपनीतं भवति, तदा न [7]प्रवेशनप्रत्ययो नापि निष्क्रमणप्रत्ययः किन्तु गमनप्रत्यय एव भवति । तस्माद् गमनमेव, तत्रोपाधिकृतश्च प्रत्ययभेद इत्यभिप्रायः ।

उदाहरणान्तरमाह–तथा नालिकायामिति । नालिकेति गर्त्तस्याभिधानम् । स्वपक्षे विशेषमाह–न चैवमिति । उपसंहरति-तस्मादिति । एकदैकस्मिन् द्रव्ये

[कु०]

उदाहरणान्तरमाह[इति] (कं. २९५) वक्तृजातिसांकर्यप्रदर्शनायेति शेषः । एकदेति (कं. २९५) एकं कर्म कथं कार्यहेतुः यतः प्रत्ययभेदः स्यादित्यभिप्रायः । अवयवकर्मस्विति (कं. २९५) आश्रयभेदेन कर्मभेदाद् भ्रमणप्रत्ययः; अपेक्षाभेदाच्च पवनप्रवेशप्रत्ययाविति भावः ।

१ न निष्क्रमणप्रत्ययो नापि प्रवेशनप्रत्ययः – दे । २ पतति द्रष्टृणां–दे । ३ कर्मसमावेश–कं. १, कं. २ । ४ तथा द्वारप्रदेशे प्रविशति निष्क्रामतीति यथै–कं. १, कं. २ । ५ प्रत्ययो भवतीति–जे. १; प्रत्ययौ भवति–जे. २, जे. ३ । ६ मध्यस्थित–जे. २ । ७ प्रवेशप्रत्ययो–जे. २ ।

प्रशस्तपादभाष्यम्

अत्र ब्रूमः । न, अवयवावयविनोर्दिग्विशिष्टसंयोगविभागानां भेदाद् । यो हि द्रष्टा अवयवानां पार्श्वतः पर्यायेण दिक्प्रदेशैः संयोगविभागान् पश्यति तस्य भ्रमणप्रत्ययो भवति, यस्त्ववयविन ऊर्ध्वप्रदेशाद् विभागमधःसंयोगं चावेक्षते तस्य पतनप्रत्ययो भवति । यः पुनर्नालिकान्तर्देशे संयोगं बहिर्देशे च विभागं पश्यति, तस्य प्रवेशनप्रत्ययो भवतीति सिद्धः कार्यभेदान्निष्क्रमणादीनां प्रत्ययभेद इति । भवतूत्क्षेपणादीनां जातिभेदात् प्रत्ययभेदः, निष्क्रमणादीनां तु कार्यभेदादिति ।

[246] अथ गमनत्वं किं कर्मत्वपर्यायः ? आहोस्विदपरं सामान्यमिति ? कुतस्ते संशयः ? समस्तेषूत्क्षेपणादिषु कर्मप्रत्ययवद् गमनप्रत्ययाविशेषात् कर्मत्वपर्याय इति गम्यते । यतस्तूत्क्षेपणादिवद्विशेषसंज्ञयाभिहितं तस्मादपरं सामान्यं स्यादिति ।

न्यायकन्दली

तावदेकमेव कर्म भवति, तत्र कथं युगपदनेककर्मप्रत्यय इत्याह–कथमिति । तद्विवृणोति–अथ मतमित्यादिना । अत्र ब्रूम इति सिद्धान्तोपक्रमः । यत् त्वयोक्तं तन्न, अवयवानामवयविनश्च दिशाविशिष्टानां संयोगविभागानां भेदात् । अस्य सुगमं विवरणम् । अवयवकर्मसु पार्श्वतः संयोगविभागकारणेषु भ्रमणप्रत्ययः, अवयविक्रियायां कार्यभेदात् पतनप्रवेशनप्रत्ययावित्यर्थः ।

[246] भवतूत्क्षेपणादीनां जातिभेदात् प्रत्ययभेदः । अथ गमनत्वं किं कर्मत्वपर्यायः, आहोस्विदपरं सामान्यमिति । सिद्धान्ती पृच्छति–कुतस्ते संशयः ? संशयोऽत्रानुपपन्न इत्यभिप्रायः । परः संशयमुपपादयति–समस्तेष्विति । उत्क्षेपणादिषु सर्वेषु यथा

[कु०] संशयो[ऽत्रा]नुपपन्न इति (कं. २९६) समानधर्माभावात्पृथगभिधानस्य च जातिभेदनिश्चयहेतोर्भावादिति भावः । समस्तभेद[व्याप]कत्वादिति (कं. २९६)–अयं भावः–एकस्यां व्यक्तौ सहनिरूप्यमाणत्वात्किं गमनत्व-कर्मत्वे हस्तत्व-करत्ववत्परस्परं भिद्यते, किं वा द्रव्यत्व-पृथिवीत्वादिवत् भिद्यते, [इति अत्र] विशेषाभिधानं च निर्णायकम् ।

[246] गमनत्वं कर्मत्वान्न भिद्यते । उत्क्षेपणादिचतुष्टयव्यापकत्वात्कर्मत्ववदिति सत्प्रतिपक्षत्वात्सत्प्रतिपक्षस्य

---

१ दिग्देश–व्यो. (६५९) । २ योहि–कं १, कं. २ । ३ वयविन्यूर्ध्व–व्यो. (६५९) । ४ प्रदेशैः–कं. १, कं. २ । ५ च प्रश्यति–दे । ६–७ देशेन–दे । ८ दिग्देश–कं. १, कं २ ।

## प्रशस्तपादभाष्यम्

न, कर्मत्वपर्यायत्वात् । आत्मत्वपुरुषत्ववत्कर्मत्वपर्याय एव गमनत्वमिति । अथ विशेषसंज्ञया किमर्थं गमनग्रहणं कृतमिति ? न, भ्रमणाद्यवरोधार्थत्वात् । उत्क्षेपणादिशब्दैरनवरुद्धानां भ्रमणपतनस्पन्दनादीनामवरोधार्थं गमनग्रहणं कृतमिति । अन्यथा हि यान्येव चत्वारि विशेषसंज्ञयोक्तानि तान्येव सामान्यविशेषसंज्ञाविषयाणि प्रसज्येरन्निति ।

## न्यायकन्दली

कर्मप्रत्ययश्च[1]लनात्मकताप्रत्ययस्तथा तेषु गमनप्रत्ययः, ऊर्ध्वं गच्छत्यधो गच्छति मूलप्रदेशं गच्छत्यग्रदेशं गच्छतीति प्रत्ययो भवतीति । तेन गमनत्वं कर्मत्वपर्याय इति गम्यते, समस्तभेदव्यापकत्वात् । [2]यत्तूत्क्षेपणादिवद् गमनमपि पृथगभिहितं विशेषसंज्ञया, तस्माद् गमनत्वमपरं सामान्यं स्यात्, अवान्तरभेदनिरूपणावसरे तस्य संकीर्तनात् ।

एवमुपपादिते परेण संशये सति [3]आचार्यः प्राह–नेति । न कर्तव्यः संशयः कुतः ? गमनत्वस्य कर्मत्वपर्यायत्वात् । एतद्विवृणोति–आत्मत्वपुरुषत्ववत्कर्मत्वपर्याय एव गमनत्वमिति । यथात्मत्वस्य पर्यायः पुरुषत्वं [4]समस्तभेदव्यापकत्वात् तथा गमनत्वं कर्मत्वस्य पर्यायः । अथ किमर्थं विशेषसंज्ञया, पृथग् गमनग्रहणं कृतम् ? इति चोदयति–अथेति ।

उत्तरमाह–नेति । उत्क्षेपणादिशब्दैरनवरुद्धा न संगृहीता भ्रमणादयः । यदि गमनग्रहणं न क्रियेत, तदा तेषां कर्मत्वेन संग्रहो न स्यात् । किन्तु विशेषसंज्ञयोद्दिष्टानामुत्क्षेपणादीनामेव परं कर्मत्वसंज्ञाविषयत्वं भवेत् । भ्रमणादयोऽपि च लोके [5]कर्मत्वेन प्रसिद्धाः, अतस्तेषां [6]परिग्रहार्थं पृथग् गमनग्रहणं कृतमिति ग्रन्थार्थः ।

[कु०]

च संशयहेतुत्वं प्रागेव निराकृतमिति । [7]आचार्यं प्राह इति (कं. २९७) एकादशमतमिति शेषः । अस्य च दुष्टत्वादेकादशिमतत्वं दोषश्च भ्रमणं कर्मत्वापरसामान्यवत्कर्मत्वात्, उत्क्षेपणवदित्यनुमानविरोधः ।

---

१ चलनात्मता–जे. १, जे. २, जे. ३ । २ यतस्तु–कं. १, कं. २ । ३ मुनिः–कं. १, कं. २ । ४ तथा यदि गमनत्वं समस्तभेद–जे. २ । ५ कर्मत्वेन लोकप्रसिद्धाः–कं. १, कं. २ । ६ परिग्रहणार्थं–जे. ३ । ७ मुनिः प्राह इति वि. पुस्तके ।

प्रशस्तपादभाष्यम्

अथवा अस्त्वपरं सामान्यं गमनत्वम् अनियतदिग्देशसंयोगविभागकारणेषु भ्रमणादिष्वेव वर्तते, गमन[1]शब्दश्चोत्क्षेपणादिषु भाक्तो द्रष्टव्यः, स्वाश्रयसंयोगविभागकर्तृत्वसामान्यादिति ।

[247] सत्प्रत्ययकर्मविधिः । कथम् ? चिकीर्षितेषु यज्ञाध्ययनदानकृष्यादिषु यदा हस्तमुत्क्षेप्तुमिच्छत्यपक्षेप्तुं वा, त[2]दा हस्तवत्यात्मप्रदेशे प्रयत्नः सञ्जायते । तं प्रयत्नं

न्यायकन्दली

अथ[3]वा अस्त्वपरं सामान्यं गमनत्वम्, तत्केषु वर्त्तते तत्राह–[4]अनियतदिग्देशे कुतस्तह्युत्क्षेपणादिषु गमनप्रत्ययः ? अत[5] आह–गमनशब्दस्त्विति । गमनशब्दग्रहणस्योपलक्षणार्थत्वाद् गमन[6]प्रत्ययोऽप्युत्क्षेपणादिषु भाक्तो [7]व्याख्येयः । उपचारस्य बीजमाह–स्वाश्रयसंयोगविभागकर्तृत्वसामान्यादिति । गमनं स्वाश्रयस्य संयोगविभागौ करोति, उत्क्षेपणादयोऽपि कुर्वन्ति, एतावता साधर्म्येणोत्क्षेपणादिषु गमनव्यवहारः । अनेन साधर्म्येण गमने कस्मादुत्क्षेपणादिव्यवहारो न भवति ? पैङ्गल्यपाटलत्वादिसाधर्म्येण वह्नावपि माणवकव्यवहारः कस्मान्न भवति ? अथोच्यते न कारणसद्भावे सत्युपचारकल्पना, किन्तु स्थिते व्यवहारे कारणकल्पनेति । एवं चेदत्रापि स एव परिहारः ।

[247] सत्प्रत्ययकर्मविधिः–प्रयत्नपू[8]र्वकः कर्मप्रकारः कथ्यत इत्यर्थः । कथमिति–पृष्टः सन्नाह–चिकीर्षितेष्विति । यज्ञादिषु कर्तुमभिप्रेतेषु सत्सु यदा पुरुषो हस्त[9]मुत्क्षेप्तुमवक्षेप्तुं वेच्छति, तदा हस्तवत्यात्मप्रदेशे प्रयत्नो जायते । तं प्रयत्नं निमित्तकारणभूतमपेक्ष-

[कु०] [247] एतत्प्रसिद्धत्वादनभिधाय सिद्धान्तभाष्यमुपादत्ते कर्मप्रकार इति (कं. २९८) कर्मोत्पत्तिप्रकारः कथ्यत इत्यर्थः । कर्मपटतरत्वं (कर्मोत्पादक ?) कीदृश इत्यत आह–संस्कारजनककर्मोत्पादक इति (कं. ३००) अभिघातस्य हस्ते भावादेवमुच्यते । अस्मिन्पक्ष इति (कं. ३००) उभयोरपि प्राक्तनसंस्कारसाम्यादेवमुच्यते ।

१ शब्दस्तु–दे । २ तदा तदा–दे । ३ अस्त्वपरं–जे. २ । ४ अनियतमि–कं. १, कं. २ । ५ अत आह–गमनशब्दग्रहणस्योपलक्षणत्वाद्–जे. १, अत आह गमनशब्दस्त्विति । शब्दग्रहणस्योपलक्षणत्वात्–जे. २ । ६ प्रत्यय उत्क्षेप–कं. १, कं. २ । ७ द्रष्टव्यः–कं. १ कं. २ । ८ पूर्वक–कं. १, कं २ । ९ मुत्क्षेप्तुमि–कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

गुरुत्वं चापेक्षमाणादात्महस्तसंयोगाद्धस्ते कर्म भवति, हस्तवत् सर्वशरीरावयवेषु पादादिषु शरीरे चेति ।

तत्सम्बद्धेष्वपि कथम् ? यदा हस्तेन मुसलं गृहीत्वेच्छां करोति 'उत्क्षिपामि हस्तेन मुसलम्' इति, तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्महस्तसंयोगाद्यस्मिन्नेव काले हस्ते उत्क्षेपणकर्मोत्पद्यते, तस्मिन्नेव काले तमेव प्रयत्नमपेक्षमाणाद्धस्तमुसलसंयोगान्मुसलेऽपि कर्मेति । ततो दूरमुत्क्षिप्ते मुसले तदर्थेच्छा निवर्तते । 'पुनरप्यपक्षेपणेच्छोत्पद्यते । तदनन्तरं प्रयत्नस्तमपेक्षमाणाद्यथोक्तात् 'संयोगद्वयाद्धस्तमुसलयोर्युगपदपक्षे-

न्यायकन्दली

माणादात्महस्तसंयोगादसमवायिकारणाद्धस्ते कर्म भवति । सत्यपि प्रयत्ने गुरुत्वरहितस्य उत्क्षेपणापक्षेपणयोरशक्यकरणत्वाद् गुरुत्वस्यापि कारणत्वम् । हस्तवत्स'र्वशरीरावयवेषु पादादिषु शरीरे चेति । पादे कर्मोत्पत्तौ पादवत्यात्मप्रदेशे प्रयत्नो निमित्तकारणम्, पादात्मसंयोगोऽसमवायिकारणम् । एवं सर्वत्र शरीरावयवक्रियोत्पत्तौ द्रष्टव्यम् । शरीरक्रियोत्पत्तावपि शरीरात्मसंयोगोऽसमवायिकारणम्, शरीरवदात्म'प्रदेशे प्रयत्नो निमित्तकारणम् ।

त'त्सम्बद्धेष्वपि, शरीरावयवसम्बद्धेष्वपि कथं कर्मोत्पत्तिरिति प्रश्नार्थः । यदा हस्तेन मुसलं गृहीत्वेच्छां करोति 'उत्क्षिपामि हस्तेन मुसलम्' इति, तदनन्तरं तस्या इच्छाया अनन्तरम्, प्रयत्नः हस्तेन मुसलमूर्ध्वमुत्क्षिपामीति हस्तमुसलयोर्युगपदु'त्क्षेपणेच्छातः प्रयत्नो जायमानस्तयोर्युगपदुत्क्षेपणसमर्थो विशिष्ट एव जायते । तं प्रयत्नं 'विशिष्टं निमित्तमपपेक्षमाणादात्महस्तसंयोगात् समवायिकारणाद्यस्मिन्नेव काले हस्ते

[कु०]

ननूत्क्षेपणे कर्तव्ये आकर्षणं विरुद्धमित्यत आह 'अनाकृष्टस्येति (कं. ३०१) अन्वयव्यतिरेकाभ्यां क्षेपणस्याकर्षणं कारणमित्यवगतमित्यर्थः ।

१ पुनः-दे । २ संयोगा-कं. १, कं. २ । ३ शरीरावयवेषु-जे. १ । ४ प्रदेशो-जे. ३ । ५ तत्सम्बद्धेषु शरीरसम्बद्धेषु-कं. १, कं. २; तत्सम्बद्धेष्वपि-जे. ३ । सम्बद्धेषु शरीरावयवसम्बद्धेष्वपि-जे. २ । ६ दुत्क्षेप्तुमिच्छतः-जे. १ । ७ विशिष्टमवे-जे. १, जे. २ । ८ अनाकृष्येति वि. पुस्तके ।

प्रशस्तपादभाष्यम्

पणकर्मणी भवतः, ततोऽन्त्येन मुसलकर्मणोलूखलमुसलयोरभिघाताख्यः संयोगः क्रियते, स संयोगो मुसलगतवेगमपेक्षमाणोऽप्रत्ययं मुसले उत्पतनकर्म करोति। तत्कर्माभिघातापेक्षं मुसले संस्कारमारभते। तमपेक्ष्य मुसलहस्तसंयोगोऽप्रत्ययं हस्तेऽप्युत्पतनकर्म करोति।

यद्यपि प्राक्तनः संस्कारो विनष्टस्तथापि मुसलोलूखलयोः संयोगः [पटुकर्मोत्पादकः संयोगविशेषभावात् तस्य संस्कारारम्भे साचिव्यसमर्थो भवति।

न्यायकन्दली

उत्क्षेपणकर्मोत्पद्यते, तस्मिन्नेव काले तमेव प्रयत्नमुभयार्थमुत्पन्नमपेक्षमाणाद्धस्तमुसलसंयोगादसमवायिकारणान्मुसलेऽपि कर्म भवति, कारणयौगपद्यात्। ततो दूरमुत्क्षिप्ते मुसले तदर्थेच्छा निवर्तते उत्क्षेपणेच्छा निवर्तते। पुनरप्यपक्षेपणेच्छोत्पद्यते हस्तेन मुसलस्यापक्षेपणेच्छोपजायत इत्यर्थः। तदनन्तरं प्रयत्नः सोऽपि जायमान उत्क्षेपणप्रयत्नवद् विशिष्ट एव जायते। तं प्रयत्नमपेक्षमाणाद्यथोक्तात् संयोगद्वयादात्महस्तसंयोगाद्धस्तमुसलसंयोगाद्धस्तमुसलयोर्युगपदक्षेपणकर्मणी भवतः। ततोऽन्त्येन मुसलकर्मणोलूखलमुसलयोरभिघाताख्यः संयोगः क्रियते। अपक्षिप्तस्य मुसलस्यान्त्येन कर्मणा उलूखलमुसलसमवेतो मुसलस्योत्पतनहेतुः संयोगः क्रियत इत्यर्थः। स संयोगो मुसलगतवेगमपेक्षमाणोऽप्रत्ययमप्रयत्नपूर्वकं मुसले उत्पतनकर्म करोति। उत्पतनकर्मोत्पत्तौ अभिघातोऽसमवायिकारणं मुसलगतो वेगो निमित्तकारणम्, मुसलं समवायिकारणम्। तत्कर्माभिघातापेक्षं मुसले संस्कारमारभते उत्पतनकर्म स्वकारणाभिघाताख्यं संयोगमपेक्षमाणं मुसले वेगमारभते। तं संस्कारमपेक्ष्य हस्तमुसलसंयोगोऽसमवायिकारणभूतोऽप्रत्ययमप्रयत्नपूर्वकं हस्तेऽप्युत्पतनकर्म करोति। योऽसौ

[कु०] कृतायुधाभ्यास इति (कं. ३०२) = तारतम्यानुविधानादभ्यासस्य कारणत्वम्। वामेनेति (कं. ३०२) उपलक्षणम्। सव्यसाचिनि विपर्ययदर्शनात्। कारणजौ(यौ)गपद्यादिति (कं. ३०२) प्रयत्नवदात्मसंयोगस्य–प्रयत्नवदात्मसंयुक्तसंयोगस्य च युगपद्भावादित्यर्थः।

१ मुसलवेग–दे। २ प्रयत्नमपे–जे. १। ३ तं च–कं. १, कं. २। ४ करोति वेगो निमित्तकारणं–कं. १, कं. २।

प्रशस्तपादभाष्यम्

अथवा प्राक्तन एव पटुः संस्कारोऽभिघातादविनश्यन्नवस्थित इत्यतः संस्कारवति पुनः संस्कारारम्भो नास्त्यतो यस्मिन् काले संस्कारापेक्षादभिघातादप्रत्ययं मुसले उत्पतनकर्म, तस्मिन्नेव काले तमेव संस्कारमपेक्षमाणान्मुसलहस्तसंयोगादप्रत्ययं हस्तेऽप्युत्पतनकर्मेति ।

पाणिमुक्तेषु गमनविधिः, कथम् ? यदा तोमरं हस्तेन [1]गृहीत्वोत्क्षेप्तुमिच्छोत्पद्यते, [2]हस्तेन तोमरमुत्क्षिपामि इति । तदनन्तरं प्रयत्नः, तमपेक्षमाणाद्यथोक्तात् संयोगद्वयात् तोमरहस्तयोर्युगपदाकर्षणकर्मणी भवतः । प्रसारिते च हस्ते तदाकर्षणार्थः प्रयत्नो निवर्तते ।

न्यायकन्दली

प्राक्तनोऽपक्षेपणसंस्कारो मुसलगतः [3]सोऽप्यभिघाताद्विनष्टः तदभावे कथं मुसलेऽप्रत्ययमुत्पतनकर्मोत्पतनसंस्कारमारभते ? [4]अपेक्षाकारणाभावादत आह–यद्यपि प्राक्तनः संस्कारो विनष्टः, तथापि मुसलोलूखलसंयोगः पटुकर्मोत्पादकः संस्कारजनककर्मोत्पादकः । कुतः ? संयोगविशेषभावात् संयोगविशेषत्वात् । किमतो यद्येवम् ? तत्राह–तस्य कर्मणः संस्कारारम्भे कर्तव्ये साचिव्यसमर्थो भवति, साहाय्ये समर्थो भवति । अस्मिन् पक्षे हस्तमुसलयोरुत्पतनकर्मणी क्रमेण भवतः । आशुभावाच्च यौगपद्यग्रहणम् ।

प्रकारान्तरमाह–अथवा प्राक्तन एव पटुः संस्कारोऽभिघातादविनश्यन्नवस्थित इति विशिष्टकारण[5]जन्यत्वादतिप्रबलः संस्कारः स्पर्शवद्द्रव्यसंयोगेनापि न विनश्यति । अतः संस्कारवति संस्कारान्तरारम्भो नास्ति, [6]अतः प्राक्तनापक्षेपणसंस्कारो न विनष्टः, अतः प्राक्तनसंस्कारवति मुसले संस्कारान्तरारम्भो नास्तीति प्रतीयते । यस्मिन् काले संस्कारापेक्षादभिघातादप्रत्ययं मुसले उत्पतनकर्म, तस्मिन्नेव काले तमेव संस्कारमपेक्ष-

[कु०] तेनेति (कं. ३०३) एकैकपरमाणुपरिमितेष्वाकाशादे(दि)ष्टेष्वन्त्यानां प्रत्येकमेव स्वकारणकर्मविनाशकत्वेनेत्यर्थः । नोदनाभिघातयोरिति (कं. ३०३) पूर्वपूर्वकर्मोत्पादनेन संस्कारस्यैकस्यैव कल्पनया गतितारतम्यसंभवा-

१ गृहीत्वेच्छां करोति–व्यो. (६६५) २ पाठोऽयं कं. १, कं. २ पुस्तकयोर्नास्ति । ३ सोऽभि–जे १, जे. २, जे. ३ । ४ अपेक्ष्य–जे. १, जे. २ । ५ कारणजत्वा–कं–१, कं. २ । ६ यतः–कं. १, कं. २, जे. २ ।

प्रशस्तपादभाष्यम्

तदनन्तरं [1]तिर्यगूर्ध्वं दूरमासन्नं वा क्षिपामीतीच्छा सञ्जायते । तदनन्तरं तदनुरूपः प्रयत्नस्तमपेक्षमाणस्तोमरहस्तसंयोगो नोदनाख्यः । तस्मात् तोमरे कर्मोत्पन्नं नोदनापेक्षं तस्मिन् संस्कारमारभते । ततः संस्कारनोदनाभ्यां तावत् कर्माणि भवन्ति यावद्धस्ततोमरविभाग इति । ततो विभागान्नोदने निवृत्ते संस्कारादूर्ध्वं तिर्यग् दूरमासन्नं वा प्रयत्नानुरूपाणि कर्माणि भवन्त्यापतनादिति ।

तथा यन्त्र[2]मुक्तेष्वपि गमनविधिः । कथम् ? यो बलवान् कृतव्यायामो वामेन करेण धनुर्विष्टभ्य दक्षिणेन शरं सन्धाय सशरां ज्यां मुष्टिना [3]गृहीत्वा आकर्षणेच्छां

न्यायकन्दली

माणाद्धस्तमुसलसंयोगादप्रत्ययं हस्तेऽप्युत्पतनकर्मेति । अस्मिन् पक्षे हस्तमुसलोत्पतनकर्मणोर्वास्तवमेव यौगपद्यम् ।

पाणिमुक्तेषु गमनविधिः कथम् ? पाणिमुक्तेषु द्रव्येषु गमनविधिः गमनप्रकारः कथमुत्पद्यत इति प्रश्ने कृते सत्याह–[4]यदा तोमरं गृहीत्वोत्क्षेप्तुमिच्छोत्पद्यते 'हस्तेन तोमरमुत्क्षिपामि इति' । तदनन्तरं प्रयत्नमपेक्षमाणाद्यथोक्तसंयोगद्वयादान्यहस्तसंयोगहस्ततोमरसंयोगाच्च हस्ततोमरयोर्युगपदाकर्षणकर्मणी भवतः । युगपदाकर्षणेति, अना[5]कृष्योत्क्षेप्तुमश[6]क्यत्वात् । प्रसारिते हस्ते तदाकर्षणार्थः प्रयत्नो निवर्तते इति तयोर्हस्ततोमरयोराकर्षण[7]प्रयोजनः प्रयत्नो निवर्तते, तद्विरोधिप्रसारणप्रयत्नोत्पादादित्यर्थः ।

[कु०]

त्संस्कारभेदकल्पने कल्पनागौरवमित्यर्थः यथा तरोस्तरुणस्येति (कं. ३०३) पूर्वपूर्वकर्मप्रध्वंससहाय एक एव संस्कारो मंद-तरतमात्मान्तरमेवेश्वरादि(?) भेदाभ(भे)दभिन्नं कर्म करोतीत्यमुमर्थं दर्शय(यि)तुमिदमुक्तम् । न तु दृष्टान्ततया काजो(र्यो)त्पत्त्या तरोर्भेदात् ।

---

१ ऊर्ध्वमधो दूरमासन्नं वा (व्यो. ६६६) । २ मुक्तेषु–कं १, कं. २ व्यो. (६६६) । ३ गृहीत्वेच्छां–व्यो. (६६६) । ४ यदा तोमरमिति–कं. १. कं. २ । ५ अनाकृष्य क्षेप्तुम्–जे. २ । ६ मशक्यत्वात्प्रयत्नो–कं. १, कं २ । ७ प्रयोजन–कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

करोति, सज्येष्वाकर्षयाम्येतद्धनुरिति । तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्महस्तसंयोगादाकर्षणकर्म हस्ते यदैवोत्पद्यते तदैव तमेव प्रयत्नमपेक्षमाणाद्धस्तज्याशरसंयोगाद् ज्यायां शरे च कर्म, प्रयत्नविशिष्टहस्तज्याशरसंयोगमपेक्षमाणाभ्यां ज्याकोटिसंयोगाभ्यां कर्मणी भवतो धनुष्कोटयोरित्येतत् सर्वं युगपत् ।

एवमाकर्णादाकृष्टे धनुषि नातः परमनेन गन्तव्यमिति यज्ज्ञानं ततस्तदाकर्षणार्थस्य प्रयत्नस्य विनाशस्ततः] ¹पुनर्मोक्षणेच्छा सञ्जायते तदनन्तरं ²प्रयत्नस्तमपेक्षमाणादात्माङ्गुलिसंयोगादङ्गुलिकर्म तस्माज्ज्या³ङ्गुलिविभागः, ततो विभागात् संयोगविनाशः, तस्मिन् विनष्टे प्रतिबन्धकाभावाद्यदा धनुषि वर्तमानः स्थितिस्थापकः संस्कारो मण्डली⁴भूतं धनुर्यथावस्थितं स्थापयति, तदा तमेव संस्कारमपेक्षामाणाद्धनुर्ज्यासंयोगा-

न्यायकन्दली

त⁵दनन्तरं । प्रसारणानन्तरम् । तिर्यगूर्ध्वं वा दूरमासन्नं वा क्षिपामीतीच्छोत्पद्यते । तदनन्तरं तदनुरूपः प्रयत्नः, तिर्यक्क्षेपणे⁶च्छायां तिर्यक्क्षेपणप्रयत्नो ⁷जायते । ऊर्ध्वक्षेपणेच्छायामूर्ध्वक्षेपणप्रयत्नो जायते । दूरक्षेपणेच्छायां महान् प्रयत्नः, आसन्नक्षेपणेच्छायां च शिथिलः प्रयत्नो जायत इति तदनुरूपशब्दार्थः । तमपेक्षमाणस्तोमरहस्तसंयोगो नोदनाख्यो नोद्यस्य तोमरस्य नोदकस्य च हस्तस्य सहगमनहेतुत्वात् । तस्मान्नोदनाख्याद्यथोक्तादिच्छानुरूपप्रयत्नापेक्षात् तोमरे कर्मोत्पन्नम् । तत्कर्म नोदनापेक्षम्, तस्मिन् तोमरे संस्कारमारभते । ⁸ततः संस्कारनोदनाभ्यां तावत्कर्माणि भवन्ति यावद्धस्ततोमरविभाग इति । ततो विभागान्निवृत्ते नोदने संस्कारादूर्ध्वं तिर्यग् दूरमासन्नं वा तदनुरूपाणि कर्माणि भवन्ति आपतनादिति । तोमरस्य पतनं यावत् ⁹संस्कारानुरूपाणि कर्माणि भवन्तीत्यर्थः ।

१ [पटुकर्मोत्पादः संयोगविशेषभावाद् इत्यारभ्य 'विनाशस्ततः' इत्येतत्पर्यन्तः पाठः दे पुस्तके भ्रष्टः संतु [ ] एतत् चिह्नद्वयेन दर्शितः सं. । २ तदनरूपः प्रयत्नः–व्यो. (६६७) । ३ अत्र कन्दल्यनुसारणे 'अङ्गुलिवभाग' इति पाठो दे पुस्तके तु अङ्गुलिविभाग इत्येव पाठः । ४ कृतं–दे । ५ तदनन्तरमिति–कं. १, कं. २ । ६ णेच्छायाः–जे. १ । ७ जायत इति–कं. १, कं. २ । ८ ततः संस्कारेति–कं. १, कं. २ । ९ संस्कारा-तदनु–कं, १, कं. २ ।

प्रशस्तपादभाष्यम्

ज्ज्यायां शरे च कर्मोत्पद्यते । [1]तत्स्वकारणापेक्षं ज्यायां संस्कारं करोति । तमपेक्षमाण इषुज्यासंयोगो नोदनम्, तस्मादिषावाद्यं कर्म [2]नोदनापेक्षमिषौ संस्कारमारभते । तस्मात् संस्कारान्नोदनसहायात् तावत् कर्माणि भवन्ति यावदिषुज्याविभागः, विभागान्निवृत्ते नोदने कर्माण्यु[3]त्तरोत्तराणीषुसंस्कारादेवापतनादिति ।

न्यायकन्दली

[4]यन्त्रमुक्तेष्वपि गमनविधिः । कथम् ? यो बलवान् । कृतव्यायामः कृतायुधाभ्यासो वामेन करेण धनुर्विष्टभ्य गाढं गृहीत्वा दक्षिणेन शरं सन्धाय ज्यायां शरं संयोज्य सशरां ज्यां शरेण सह वर्तमानां ज्यां मुष्टिना गृहीत्वा इच्छां करोति सज्येऽत्राकर्षयाम्येतद्धनुरिति । ज्येति धनुर्गुणस्याख्या, इषुरिति शरस्याभिधानम् । ज्या च इषुश्च ज्येषू, सह [5]ज्येषुभ्यां वर्तत इति सज्येषू, धनुरेतदाकर्षयामीतीच्छाया आकारो दर्शितः । तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्महस्तसंयोगादाकर्षणकर्म हस्ते यदैवोत्पद्यते, तदैव त[6]मेव प्रयत्नमपेक्षमाणाद्धस्त[7]ज्यासंयोगाज्ज्यायां [8]कर्म शरे च कर्म हस्तशरसंयोगात् । प्रयत्न[9]विशिष्टज्याहस्तसंयोगमपेक्षमाणाभ्यां ज्याकोटिसंयोगाभ्यां कर्मणी धनुष्कोटयोरित्येतत्सर्वं युगपत्, कारणयौगपद्यात् । एवमाकर्णादाकृष्टे धनुषि नातः परमनेन हस्तेन गन्तव्यमिति यज्ज्ञानं तस्मात् । तदाकर्षणार्थस्येति धनुराकर्षणार्थस्य प्रयत्नस्य विनाश इति ।

ततः शरस्य गुणस्य च [10]मोक्षणेच्छा । तदनन्तरं प्रयत्नो मोक्षणार्थः, तमपेक्षमाणादात्माङ्गुलिसंयोगादङ्गुलिकर्म । तस्मा[11]दङ्गुलिविभागः, शरगुणाभ्याम् । ततो विभागाच्छरगुणाङ्गुलिसंयोगविनाशस्तस्मिन् संयोगे विनष्टे प्रतिबन्धकाभावाद्यदा धनुषि

१ ततश्च–दे । २ तन्नोदनापेक्षं–दे । ३ कर्माण्युत्तराणि तु–दे । ४ पाठोऽयं–कं. १, कं. २, पुस्तकयोर्नास्ति । ५ ताभ्यां–जे. १, जे. २, जे. ३ । ६ तं–कं. १, कं. २ । ७ हस्तज्याशरसंयोगात्–कं. १, कं. २ । ८ अर्थदृष्ट्या अत्र कर्म इत्येतेन पदेन भाव्यम् अन्यथा हस्तशरसंयोगात् इति व्यर्थं स्यात् । ९ विशिष्टं–जे. २ । १० मोक्षणेच्छा च कं–१, कं. २ । ११ ज्याङ्गुलिविभागः–कं.–१, कं. २ ।

प्रशस्तपादभाष्यम्

बहूनि कर्माणि क्रमशः कस्मात्? संयोगबहुत्वात्। एकस्तु संस्कारः, अन्तराले कर्मणोऽपेक्षाकारणाभावादिति। [1]एवमात्माधिष्ठितेषु सत्प्रत्ययमसत्प्रत्ययं च कर्मोक्तम्।

न्यायकन्दली

वर्तमानः स्थितिस्थापकः संस्कारो मण्डलीभूतं धनुर्यथावस्थितं स्थापयति [2]तदा तं संस्कारमपेक्षमाणाद्धनुर्ज्यासंयोगाज्ज्यायां शरे च कर्मोत्पद्यते। तत् कर्म स्वकारणापेक्षं धनुर्ज्यासंयोगापेक्षं ज्यायां संस्कारं [3]वेगाख्यं करोति, [4]तं संस्कारमपेक्षमाण इषुज्यासंयोगो नोदनम्, नोद्यस्येषोर्नोदकस्य गुणस्य सहगमनहेतुत्वात्। तस्मात् नोदनादिषावाद्यं [5]कर्म भूतं नोदनापेक्षमिषौ संस्कारमारभते। तस्मात् संस्कारात् नोदनसहायात् तावत् [6]कर्माणि भवन्ति यावदिषुज्याविभागः। विभागान्निवृत्ते नोदने कर्माणि [7]उत्तरोत्तराणि संस्कारादेव वेगाख्याद् भवन्ति यावत्पतनम्, इषोरे[8]तस्य च पातो गुरुत्वप्रतिबन्धकसंस्कारक्षयात्।

अत्र चोदयति—बहूनि कर्माणि क्रमशः कस्मादिति। ज्याविभक्तस्येषोरन्तराले क्रमशो बहूनि कर्माणि भवन्तीति कस्मात् कल्प्यते? एकमेव कर्म कुतो न कल्पितमित्यभिप्रायः। समाधत्ते—संयोगबहुत्वादिति। उत्तरसंयोगान्तं कर्मेत्यवस्थितम्। क्षिप्तस्येषोरन्तराले बहवः संयोगा दृश्यन्ते। तेन बहूनि कर्माणि भवन्तीत्याश्रीयते। एकस्तु संस्कारः, अन्तराले कर्मणोऽपेक्षाकारणाभावात्। नोदनाभिघातयोरन्यतरापेक्षं कर्म संस्कारमारभते न कर्ममात्रम्, वेगाभावात्। न चान्तराले नोदनं नाप्यभिघातः, तस्मादेक एव शरज्यासंयोगापेक्षेण शरकर्मणा कृतो विशिष्टः संस्कारो यावत्पतनमनुवर्तते। यथा यथा चास्य कार्यकरणाच्छक्तिः क्षीयते, तथा तथा कार्यं मन्दतरतमादिभेदभिन्नमुपजायते। यथा तरोस्तरुणस्य फलं प्रकृष्यते[9]निःकृष्यते च जीर्णस्य।

१ धिष्ठितेषु तत्सम्बद्धेषु चलत्प्रत्ययमसहृत्प्रत्ययं च। २ तं–कं. १, कं. २। ३ वेगाख्यं–जे. १। ४ तं च–कं. १, कं. २। ५ कर्म संस्कार–कं. १, कं. २, कर्म नोदनापेक्षमिषौ संस्कार–जे. ३। ६ कर्माणि च–जे. २। ७ उत्तराणि–कं. १, कं. २। ८ तस्य च–जे. १, जे. २, जे. ३। ९ ऽपकृष्यते–कं. १, कं. २।

प्रशस्तपादभाष्यम्

[248] अनधिष्ठितेषु बाह्येषु चतुर्षु महाभूतेष्वप्रत्ययं कर्म गमनमेव नोदनादिभ्यो भवति ।

तत्र नोदनं गुरुत्वद्रवत्ववेगप्रयत्नान् समस्तव्यस्तानपेक्षमाणो यः संयोगविशेषो नोदनमविभागहेतोः[1] कर्मणः कारणम्, तस्माच्चतुर्ष्वपि महाभूतेषु कर्म भवति । यथा पङ्काख्यायां पृथिव्याम् ।

न्यायकन्दली

[248] उपसंहरति–एवमिति । अनधिष्ठितेषु बाह्येषु चतुर्षु महाभूतेष्वप्रत्ययं गमनमेव नोदनादिभ्यो भवति । आत्मना[2] असाधारणेन सम्बन्धिनानधिष्ठितेषु बाह्येष्वप्रयत्नपूर्वकं गमनाख्यमेव[3] कर्म भवति, नोत्क्षेपणादिरूपमित्यर्थः[4] । महाभूतेषु नोदनादिभ्यः कर्म भवतीत्युक्तम् । अथ[5] किमिदं नोदनमत आह– तत्र नोदनं गुरुत्वद्रवत्वप्रयत्नवेगान्[7] समस्तव्यस्तानपेक्षमाणो यः संयोगविशेषः । कथमयं[6][8] संयोगविशेषो नोदनमुच्यते तत्राह–नोदनमविभागहेतोः कर्मणः कारणमिति । नोद्यनोदकयोः परस्परविभागं न करोति यत्कर्म तस्य कारणं नोदनम् ।

किमुक्तं स्यात् ? अनेन संयोगेन सह नोदको नोद्यं नोदयति नान्यथा, तेनायं नोदनमुच्यते । नोदनं तु क्व कर्मकारणमत्राह–यथा पङ्काख्यायां पृथिव्यामिति । यदा पङ्कस्योपरि मन्दव्यवस्थापिता प्रस्तरगुटिका क्रमशः पङ्केन सममधो गच्छति, तदा गुरुत्वापेक्षः प्रस्तरपङ्कसंयोगो नोदनम् । यदा प्रयत्नेन दूरमुत्थाप्य प्रस्तरेणाभिहन्यते

[कु०] [248] ननु गुणविशिष्टमात्मान्तरमेवेश्वरः, न चेश्वरानधिष्ठितेषु कर्मोत्पद्यते, तस्य सर्वनिमित्तकारणत्वात्, तत्कथमात्माधिष्ठितेषु कर्मोच्यत इत्यर्थः (इत्यत आह ?) असाधारणेनेति (कं. ३०३) जीवेनेत्यर्थः ।

ननु समस्तव्यस्तगुरुत्वाद्यपेक्षत्वमभिघाते विद्यते कथमिदं नोदनस्य लक्षणमित्यभिप्रायेण पृच्छति 'कथमिदं संयोग इति (कं. ३०४) अविभागहेतुकर्मकारणसंयोगो नोदनमिति लक्षणं परिशिष्टं तु रूपकथनमिति भावः ।

---

१ हेतोरेकस्य–कं. १, कं. २ । २ अन्येना–जे. १ । ३ गमनाख्य–जे. २ । ४ नोत्क्षेपणापक्षेपणादिक–कं १, कं. २ । ५ अथ किं–कं १, कं. २ । ६ कथं–कं १, कं. २ । ७ विभागान्–जे. २ । ८ कथमेवं संयोगविशेष–कं. १ ।

प्रशस्तपादभाष्यम्

वेगापेक्षो यः संयोगविशेषो वि[1]भागहेतोरेकस्य कर्मणः कारणं [2]सोऽभिघातः। तस्मादपि चतुर्षु महाभूतेषु कर्म भवति, यथा पाषाणादिषु [3]निष्ठुरे वस्तुन्यभिपतितेषु।

न्यायकन्दली

पङ्कस्तदा गुरुत्वप्रयत्नवेगापेक्षः संयोगो नोदनम्, यदा जलेनाहन्यते तदा समस्तापेक्षः संयोगो नोदनमिति यथासम्भवमूह्यमिति।

वेगापेक्षो यः संयोग एकस्य विभागकृतः कर्मणः कारणं सोऽभिघातः, अभिघात्याभिघातकयोः परस्परविभागो यतः कर्मणो जायते तस्यैवैकस्य हेतुर्यः संयोगविशेषः सोऽभिघातः। तस्मादपि चतुर्षु महाभूतेषु कर्म भवति। यथा पाषाणादिषु निष्ठुरे वस्तुन्यभिपतितेषु। नोदनं परस्पराविभागहेतोरेवैकस्य कर्मणः कारणं न परस्परविभागहेतोः, एवमभिघातोऽपि परस्परविभागहेतोरेवैकस्य कर्मणः कारणं न परस्पराविभागहेतोरिवमुक्तमेकस्य कर्मणः कारणम्।

संयुक्तसंयोगं व्याचष्टे—पादादिभिर्नु[4]द्यमानायामभिहन्यमानायां वा पङ्काख्यायां पृथिव्यां यः संयोगो नोदनाभिघातयोरन्यतरापेक्ष—उभयापेक्षो वा संयुक्तसंयोगस्तस्मादपि ये प्रदेशा न नुद्यन्ते नाप्यभिहन्यन्ते तेष्वपि कर्म जायते। एकत्र पृथिव्यां पादेन नुद्यमानायामभिहन्यमानायां वा ये प्रदेशा न नुद्यन्ते नाप्यभिहन्यन्ते तेष्वपि कर्म दृश्यते। तत्र चलतां प्रदेशान्तराणां नुद्यमानाभिहन्य[5]मानभूप्रदेशैः सह संयुक्तप्रदेश-

[कु०]

प्रश्नपूर्वकमवयवार्थं व्याचष्टे किमुक्तमिति (कं. ३०४) लक्षणं विविनक्ति-अयं नोदनमिति (कं. ३०४) अन्यतरापेक्षस्य संयुक्तसंयोगस्य कर्मकारणत्वेन प्रसिद्धत्वादुभयापेक्षमुदाहरति तत्राभिघातकमिति (?) अभिघातकहस्तादिकं

१ परस्परविभागकृत—दे। २ सोऽभिघातः यथा पाषाणादिषु—व्यो. (६७२) सोऽभिघातः। तस्मादपि भूतेषु—दे। ३ 'निष्ठुरे वस्तुन्यभिपतितेषु' इति पदानि 'दे' पुस्तके न सन्ति सं.। ४ नुद्यमानायामिति—कं. १, कं. २। ५ मानैः—जे.।

प्रशस्तपादभाष्यम्

तथा पादादिभिर्नुद्यमानायामभिहन्यमानायां [1]वा पङ्काख्यायां पृथिव्यां यः संयोगो नोदनाभिघातयोरन्यतरापेक्ष उभयापेक्षो वा स संयुक्तसंयोगः, [2]तस्मादपि ये प्रदेशा न नुद्यन्ते नाप्यभिहन्यन्ते तेष्वपि कर्म जायते ।

[249] पृथिव्युदकयोर्गुरुत्वविधारकसंयोगप्रयत्नवेगा[3]भावे सति गुरुत्वाद्यदधोगमनं [4]तत्पतनम् । यथा मुसल[5]शरीरेष्वादिषूक्तम् । तत्राद्यं गुरुत्वात्, द्वितीयादीनि तु गुरुत्वसंस्काराभ्याम् ।

न्यायकन्दली

संयोगः कारणम् । यत्राभिघातकं द्रव्यं भूप्रदेशमभिहत्य किञ्चिदधो नीत्वोत्पतति, तत्र प्रदेशान्तरक्रियायामुभयापेक्षः संयुक्तसंयोगो हेतुः ।

[249] गुरुत्वस्य कर्मकारणत्वमाह । पृथिव्युदकयोर्गुरुत्वविधारकसंयोगप्रयत्नवेगाभावे गुरुत्वाद्यदधोगमनं तत्पतनम् । यथा मुसलशरीरादिषूक्तम् । गुरुत्वप्रतिबन्धकस्य हस्तसंयोगस्याभावे मुसलस्य यदधोगमनं तत्पतनं गुरुत्वाद्भवति । एवं गुरुत्वविधारक-प्र[6]यत्नाभावे शरीरस्य पतनम्, क्षिप्तस्येषोरन्तराले वेगाभावात् पतनं गुरुत्वात् । तत्राद्यं कर्म गुरुत्वाद् द्वितीयादीनि तु गुरुत्वसंस्काराभ्याम् । तेषु मुसलादिष्वाद्यं कर्म गुरुत्वाद्भवति तेन कर्मणा संस्कारः क्रियते, त[7]दनुत्तरोत्तरकर्माणि गुरुत्वसंस्काराभ्यां जायन्ते, द्वयोरपि प्रत्येकमन्यत्र सामर्थ्यावधारणात् ।

[कु०]

भूप्रदेशं कंतुकादिकं किंचिदधोनत्वोत्पतति । तत्र कंतुकसंयुक्तस्य कर्मोत्पत्तौ संयुक्तसंयोगेनोभयमपेक्षणीयमित्यर्थः । गुरुत्व(त्वा)भिधारकात्गुणान्वितव्यं (?) व्याचष्टे गुरुत्वप्रतिबन्धकस्येति (कं. ३०५) ।

[249] ननु गुरुत्वेनैकेन पतने संभवति संस्कारः किमर्थ[म]पेक्ष्यत इत्यत आह द्वयोरपीति (कं. ३०५) ।

१ वा यः संयोगो–दे । २ तस्मादपि पृथिव्यादिषु कर्म भवति । ये च प्रदेशा–कं. १, कं. २ । ३ वेगाभावे गुरुत्वा–दे । ४ 'तत्पतनम्' इति 'दे' पुस्तके नास्ति । ५ शरीरादिषु–कं. १, कं. २ । ६ प्रयत्नस्याभावे–जे. १, जे. २ ; विधारकस्य प्रयत्नस्याभावे–जे. २ । ७ तदनन्तरमुत्तरकर्माणि–कं. १, कं. २ ।

## प्रशस्तपादभाष्यम्

[250] स्रोतोभूतानामपां स्थलान्निम्नाभिसर्पणं यत्तद्द्रवत्वात् स्यन्दनम् । कथम् ? समन्ताद्रोधःसंयोगेनावयविद्रवत्वं प्रतिबद्धम्, अवयवद्रवत्वमप्येकार्थसमवेतं तेनैव प्रतिबद्धम्, उत्तरोत्तरावयवद्रवत्वानि संयुक्तसंयोगैः प्रतिबद्धानि । [1]यदा तु मात्रया सेतुभेदः कृतो भवति, तदा समन्तात् प्रतिबद्धत्वादवयविद्रवत्वस्य कार्यारम्भो नास्ति । [2]सेतुसमीपस्थस्यावयवद्रवत्वस्योत्तरोत्तरेषामवयव[3]द्रवत्वानां प्रतिबन्धकाभावाद् वृत्तिलाभः ।

## न्यायकन्दली

[250] द्रवत्वस्य कारणत्वं कथयति–स्रोतोभूतानामपां स्थलान्निम्नाभिसर्पणं [4]यत्तद् द्रवत्वात् स्यन्दनम् । अपां [5]यन्निम्नाभिसर्पणं तत्स्यन्दनं द्रवत्वादुपजायत इत्यर्थः । कथमिति प्रश्नः । समन्तादित्युत्तरम् । समन्तात् सर्वतो [6]रोधःसंयोगे कूलसंयोगे सति अवयविनो द्रवत्वं प्रतिबद्धं [7]स्यन्दनं न करोति । अवयवद्रवत्वमप्येकार्थसमवेतं तेनैव प्रतिबद्धम्, यस्मिन्नवयवे साक्षाद्रोधःसंयोगोऽस्ति तदवयव[8]गतं द्रवत्वं तेनैव रोधःसंयोगेन प्रतिबद्धम्, उत्तरोत्तराणि त्ववयवद्रवत्वानि संयुक्तसंयोगैः प्रतिबद्धानि, रोधःसंयुक्तेनावयवेन सह संयोगादवयवान्तरस्य द्रवत्वं प्रतिबद्धमिति । तत्संयोगादपरस्य प्रतिबद्धमित्यनेनैव न्यायेनोत्तरोत्तरद्रवत्वानि प्रतिबद्धानि । यदा तु मात्रया सेतुभेदः कृतो भवति, तदा समन्तात् प्रतिबद्धस्यावयविद्रवत्वस्य कार्यारम्भो नास्ति, दीर्घतरेण सेतुना समन्तात् प्रतिबद्धस्यावयविनो महापरिमाणस्यैकदेशकृतेनाल्पीयसा मार्गेण निर्गमाभावात् । सेतुसमीपस्थस्य त्ववयवद्रवत्वस्य वृत्तिलाभो भवति, अल्पस्यावयवस्य तेन मार्गेण निर्गतिसम्भवात् । तस्य वृत्तिलाभे चोत्तरेषामवय[9]वद्रवत्वानामपि प्रतिबन्धकाभावाद्वृत्तिलाभः स्वकार्यकर्तृत्वं स्यात् ।

[कु०] [250] अल्पीयसा मार्गेणेति (कं. ३०६) यावद्दीर्घोऽवयवी नोत्पद्यते तावत्पूर्वस्यावयविनो निर्गमाभावः प्रत्यक्षसिद्ध इत्यर्थः । ननु संयुक्तानामेवाभिसर्पणं तद्ध्वंसमवायिकारणनाशाभावात्पूर्वस्यावयविनो न नाश इत्यत आह तेन च न परस्परमिति ।

१ यदा तु सेतुभेदः–व्यो. दे । २ सूतोस्तु–दे । ३ द्रवत्वानामपि–दे । ४ यत्तु–जे २ । ५ यत्र स्थलान्–कं. १, कं. २ । ६ रोधः संयोगे सति–जे–२ । ७ स्यन्दनं वा–कं. १, कं २ । ८ गत–कं. १, कं. २ । ९ एवं द्रवत्वानामपि–जे. १ ।

प्रशस्तपादभाष्यम्

ततः क्रमशः संयुक्तानामेवाभिसर्पणम् । ततः पूर्वद्रव्यविनाशे सति प्रबन्धेनावस्थितैरवयवैर्दीर्घं द्रव्यमारभ्यते । तत्र च कारणगुणपूर्वक्रमेण द्रवत्वमुत्पद्यते । [१][तत्र च कारणानां संयुक्तानां प्रबन्धेन गमने यदवयविनि कर्मोत्पद्यते] तत् स्यन्दनाख्यमिति ।

[251] संस्कारात् कर्म इष्वादिषूक्तम् । तथा चक्रादिष्ववयवानां पार्श्वतः प्रतिनियतदिग्देशसंयोगविभागोत्पत्तौ यदवयविनः संस्कारादनियतदिग्देशसंयोगविभागनिमित्तं कर्म तद् भ्रमणमिति । [२][एवमादयो गमनविशेषाः ।]

न्यायकन्दली

ततः क्रमशः संयुक्तानामेवाभिसर्पणम् । सेतुसमीपस्थोऽवयवः प्रथममभिसर्पति, [३]तदनु तत्समीपस्थस्ततस्तत्समीपस्थ इत्यनेन क्रमेण सर्वेऽवयवा अभिसर्पन्ति । ते चाभिसर्पन्तो न परस्परभिन्नदेशा अभिसर्पन्ति, [४]किं तु तथाभिसर्पन्ति यथा परस्परसंयुक्ता भवन्तीत्येतदवद्योतनार्थमुक्तं संयुक्तानामेवाभिसर्पणम् । [५]न पुनरस्यायमर्थोऽप्रच्युतप्राच्यसंयोगानामेवाभिसर्पणमिति, संस्थानान्तरोपलम्भात् । ततः प्राक्तनसंयोगविनाशे पूर्वद्रव्यविनाशे प्रबन्धेनावस्थितैरवयवैः संयुक्तीभावेनावस्थितैरवयवैर्दीर्घं द्रव्यमारभ्यते । तत्र च कारणगुणपूर्वप्रक्रमेण द्रवत्वमुत्पद्यते । अवयवद्रवत्वेभ्यो दीर्घतरेऽवयविनि द्रवत्वमुत्पद्यते । तत्र च कारणानां संयुक्तानां प्रबन्धेन गमने यदवयविनि कर्मोत्पद्यते द्रवत्वात् तत्स्यन्दनम् । तत्र तस्मिन् द्रवत्वे उत्पन्ने सति कारणानामवयवानां प्रबन्धेन गमने [६]पङ्क्तीभावेनाभिन्नदेशतया गमने यदवयविनि द्रवत्वात् कर्मोत्पद्यते तत्स्यन्दनाख्यम् ।

[251] संस्कारात् कर्मेष्वादिषूक्तम्, तथा चक्रादिषु । तथाशब्दो यथाशब्दमपेक्षते, यत्तदोर्नित्यसम्बन्धात् । यथा इष्वादिषु संस्कारात् कर्म कथितम्, तथा चक्रादिष्वपि भवतीत्यर्थः । एतदेव दर्शयति–अवयवानां पार्श्वतः प्रतिनियतदिग्देशसंयोगविभागोत्पत्तौ

[कु०] [251] [७]दण्डविगमे वेति (कं. ३०७) यावत्संस्कारविनाशात्कर्मसंतानोपरम इत्यर्थः ।

१ [ ] एतच्चिह्नान्तर्गतः पाठः 'दे' पुस्तके नास्ति । २ [ ] एतच्चिह्नान्तर्गतः पाठो व्योमवत्यां नास्ति । ३ तदनु तत्समीपस्थ इत्यनेन च क्रमेण–जे. १ । ४ किन्तु यथापरस्परसंयुक्ता–जे. २ । ५ न पुनरयमर्थो–जे. १, न तु पुनरस्यायमर्थो–जे. ३., न पुनरयमस्यार्थो–जे. २ । ६ संसक्तीभावेना–जे. १, जे. ३ । ७ दंडविगमेश्विति–कं. २ ।

प्रशस्तपादभाष्यम्

[252] प्राणाख्ये तु वायौ कर्म आत्मवायुसंयोगादिच्छा[1]द्वेषप्रयत्नापेक्षाज्जाग्रत इच्छानुविधानदर्शनात्, सुप्तस्य तु जीवनपूर्वकप्रयत्नापेक्षात् ।

न्यायकन्दली

यदवयविनः संस्कारादनियतदिग्देशसंयोगविभागनिमित्तं कर्म तद् भ्रमणम् । पार्श्वतः प्रतिनियता ये दिग्देशास्तैः सहावयवानां [2]विभागसंयोगयोरुत्पत्तौ सत्यां यदवयविनः संस्कारादनियतदिग्देशैः सर्वतोदिक्कैर्विभागसंयोगयो[3]र्निमित्तं कर्म जायते तद्भ्रमणम् । प्रथमं चक्रावयविनि दण्डसंयोगात् कर्मोत्पद्यते । [4]उत्तरोत्तराणि कर्माणि [5]नोदनादभिघातात् कर्मजात् संस्काराच्च भवन्ति । [6]एवं वेगाद दण्डसंयुक्ते चक्रावयवे आद्यं कर्म दण्डसंयोगात्, अवयवान्तरेषु च संयुक्तसंयोगात्, दण्डसंयुक्तस्यावयवस्योत्तरोत्तरकर्माणि संस्कारान्नोदनाच्च । अपरेषां संस्कारात्, संयुक्तसंयोगाच्च । दण्डवि[7]गमे तु चक्रे तदवयवेषु च संस्कारादेव केवलात् । उपसंहरति–एवमादयो गमनविशेषा इति ।

[252] प्राणाख्ये [8]वायौ कर्म आत्मवायुसंयोगादि[9]च्छाद्वेषप्रयत्नापेक्षाद् जाग्रतः पुरुषस्य प्राणाख्ये वायौ कर्म इच्छाद्वेष[10]पूर्वकप्रयत्नाद् भवतीति । कथमिदं [11]ज्ञातमत आह–इच्छानुविधानदर्शनात् । रेचकपूरकादिप्रयोगेष्विच्छानुविधायिनी प्राणक्रियोपलभ्यते । नासारन्ध्रप्रविष्टे रजसि तन्निरासार्थं प्राणक्रिया द्वेषादपि भवति, अतः प्रयत्न[12]पूर्विकेत्यवगम्यते । सुप्तस्य जीवनपूर्वकप्रयत्नापेक्षादात्मवायुसंयोगात् । [13]प्राणक्रिया–सुप्तस्य प्राणक्रिया प्रयत्नकार्या प्राणक्रियात्वात् [14]जाग्रतः प्राणक्रियावत् । स चेच्छाद्वेषपूर्वको न भवति, सुप्तस्येच्छाद्वेषयोरभावात् । तस्माज्जीवनपूर्वक एव निश्चीयते, प्राणधारणस्य तत्पूर्वकत्वात् ।

[कु०] [252] कथमिदमिति (कं. ३०८) तद्विषये छायाऽप्रत्यक्षत्वात्प्रश्नः । [15]रेचकपूरकत्वादिष्विति (कं. ३०८) अनेन विमतं प्र(प्रा)णकर्म इच्छाकार्यम्, जाग्रं(!) प्राणकर्मत्वात्, प्राणायामवेलायां योगिप्राणकर्मवदिति प्रयोगः सूचितः । इच्छानुविधानदर्शनादिति (कं. ३०८) अत्र द्वेषोऽप्युपलक्ष्यते अतस्तस्य कर्मकारणत्वमुदाहरणे दर्शयति नासारन्ध्रेति (कं. ३०८) ।

१ द्वेषपूर्वकप्रयत्ना–कं. १, कं. २ । २ संयोगविभागयो–कं. १, कं. २ । ३ संयोगनिमित्तं–कं. १, कं. २ । ४ उत्तराणि–जे. १ । ५ नोदनात् कर्मजात्-जे. १, जे. २ । ६ एव दण्डसंयुक्तं–जे. १, जे. २, जे. ३ । ७ विगते–जे. ३ । ८ वायुकर्म–जे. २ । ९ इच्छाद्वेषपूर्वकप्रयत्नापेक्षाद् भवतीति–कं. १, कं. २ । १० पूर्वका–जे. १ । ११ जात–कं. १, कं. २ । १२ पूर्विकेयमव-जे. २ । १३ सुप्तस्य–कं. १, कं. २ । १४ जाग्रत्-जे. १, जे. २, जे. ३ । १५ पूरकत्वादिप्रयोगेष्विति कं. २ ।

प्रशस्तपादभाष्यम्

[253] आकाशकालदिगात्मनां[1] सत्यपि द्रव्यभावे निष्क्रियत्वं[2] सामान्यादिवदमूर्तत्वात् । मूर्तिरसर्वगतद्रव्यपरिमाणम्, तदनुविधायिनी च क्रिया, सा चाकाशादिषु नास्ति । तस्मान्न तेषां क्रियासम्बन्धोऽस्तीति ।

[254] सविग्रहे मनसीन्द्रियान्तरसम्बन्धार्थं जाग्रतः कर्म आत्ममनःसंयोगादिच्छाद्वेषपूर्वकप्रयत्नापेक्षात्, अन्वभिप्रायमिन्द्रियान्तरेण विषयान्तरोपलब्धिदर्शनात् । सुप्तस्य प्रबोधकाले जीवनपूर्वकप्रयत्नापेक्षात् ।

न्यायकन्दली

[253] चतुर्षु महाभूतेष्विवाकाशादिषु कस्मात् क्रियोत्पत्तिर्न चिन्त्यत इत्यत[3] आह आकाशकालदिगात्मनां[4] सत्यपि द्रव्यभावे निष्क्रियत्वं सामान्यादिवदमूर्तत्वात् । क्रियावत्त्वं मूर्तत्वेन व्याप्तं मूर्तत्वं चाकाशादिषु नास्ति, अतः क्रियावत्त्वमपि न विद्यत इत्यर्थः । एतदेव विवृणोति–मूर्त्तिरित्यादिना तद्व्यक्तम् ।

[254] मनसि कर्मकारणमाह–सविग्रह इति । जाग्रतः पुरुषस्य सविग्रहे मनसि सशरीरे मनसीन्द्रियान्तरसम्बन्धार्थं कर्म आत्ममनःसंयोगादिच्छाद्वेषपूर्वकप्रयत्नापेक्षाद्भवति । इच्छाद्वेषपूर्वकः प्रयत्नो जाग्रतो मनः[5]क्रियाहेतुरिति । कथमेतदवगतं तत्राह–अन्वभिप्रायमिन्द्रियान्तरेण विषयोपलब्धिदर्शनात् । जागरावस्थायामभिप्रायानतिक्रमेणेन्द्रियान्तरेण चक्षुरादिना विषयोपलब्धिर्दृश्यते । यदा रूपं जिघृक्षति[6] पुरुषस्तदा रूपं पश्यति, यदा रसं जिघृक्षते तदा रसं रसयति । न चान्तःकरणसम्बन्धमन्तरेण बाह्ये-[7]

[कु०] [253] चतुर्षु महाभूतेष्विति (कं ३०८) ।

[254] द्रव्यत्वा(त्व)स्य क्रियावत्त्वप्रयोजकत्वं मन्यमानस्य प्रश्नः । मूर्तत्वस्योपाधित्वाद् द्रव्यत्वमप्रयोजकमित्यभिप्रायवतः परिहार इत्याह अभिप्रायानतिक्रमणेति (कं. ३०९) इच्छानतिक्रमणेत्यर्थः ।

१ दिगात्मानः–व्यो. (६७३) दे । २ निष्क्रियाः व्यो. (६७३) दे । ३ चिन्तितेत्याह–कं. १, कं. २, न चिन्त्यत इत्याह–जे. २ । ४ दिगात्मनामिति–कं. १, कं. २ । ५ मनसि–कं. १, कं. २ । ६ जिघृक्षते–कं. १, कं. २ । ७ बाह्येन्द्रियस्य–कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

अपसर्पणकर्मोपसर्पणकर्म चात्ममनःसंयोगाददृष्टापेक्षात् । कथम् ? यदा जीवनसहकारिणोर्धर्माधर्मयोरुपभोगात् प्र[1]क्षयोऽन्योन्याभिभवो वा तदा जीवनसहाययोर्वैक[2]ल्ये तत्पूर्वकप्रयत्नवैकल्यात् प्राणनिरोधे सत्यन्याभ्यां ल[3]ब्धवृत्तिभ्यां धर्माधर्माभ्यामात्ममनःसंयोगस[4]हायाभ्यां मृतशरीराद्विभागका[5]रणमपसर्पणकर्मोत्पद्यते ।

न्यायकन्दली

न्द्रियविषयग्राहकत्वमस्ति । तस्मादिच्छाद्वेषपूर्वकात् प्रयत्नान्मनसि क्रिया भूतेति गम्यते । [6]सुप्तस्य प्रबोधकाले जीवनपूर्वकप्रयत्नापेक्षात् । सुप्तस्य पुरुषस्येन्द्रियान्तरसम्बन्धार्थं प्रबोधकाले मनसि क्रिया जीवनपूर्वकप्रयत्नापेक्षादात्म[7]मनःसंयोगात् ।

[8]अपसर्पणोपसर्पणकर्म चात्ममनःसंयोगाददृष्टापेक्षादुपजायते । [9]एतदेव कथमित्यादिना प्रश्नपूर्वकं कथयति । [10]विशिष्टात्ममनःसंयोगो जीवनम्, तस्य स्वकार्यकरणे धर्माधर्मौ सहकारिणौ । यदा तयोरुपभोगात् [11]प्रक्षयो विनाशोऽन्योन्याभिभवो वा परस्परप्रतिबन्धात् स्वकार्याकरणं वा, ततो जीवनसहाययोः धर्माधर्मयोर्वैकल्येऽभावे सति तत्पूर्वकप्रयत्न[12]वैकल्याद् जीवनपूर्वकस्य प्रयत्नस्य वैकल्यादभावात् प्राणवायोर्निरोधे सति पतिते[13]तस्मिन् शरीरे याभ्यां धर्माधर्माभ्यां देहान्तरे फलं भोजयितव्यं तौ लब्धवृत्तिकौ भूतावैहिकशरीरोपभोग्यधर्माधर्मप्रतिबद्धत्वाद् देहान्तर[14]भोग्याभ्यां धर्माधर्माभ्यां कार्यं न कृतम् । यदा त्वैहिकशरीरोपभोग्यौ धर्माधर्मौ प्रक्षीणौ तदा देहान्तरोपभोग्ययोर्धर्माधर्मयोर्वृत्तिलाभः प्रतिबन्धाभा[15]वो जातः ।

[कु०]

यदा रूपं जिघृक्षतीत्युत्तरग्रन्थपर्यालोचनया न त्वेतावता मनसि कर्मवत्त्वमवगम्यत इत्यत आह — [16]न चान्तःकरणमन्तरेणेति (कं. ३१०) । विशिष्टात्ममनःसंयोग इति (क. ३१०) उपभोजकादृष्टोपग्रह एव वैशिष्ट्यम् । परस्परप्रतिबन्धादिति (कं. ३१०) अंत्यसुखसंविज्ञानात्प्रमेव किञ्चित्कर्म बलवता कर्मान्तरेण निरुध्यत यथांगः(?)

---

१ प्रत्यक्षयो–दे । २ वैकल्यात्–कं. १, कं. २ । ३ वृत्तिलब्धधर्माधर्माभ्यां–व्यो. (६७६) दे । ४ सहकारिभ्यां–व्यो. (६७६) । ५ सम्पादितेन–व्यो. (६७६) दे । ६ सुप्तस्येति–कं.१, कं. २ । ७ मनसोः–कं. १, कं. २ । ८ अपसर्पणेति–कं. १, कं. २ । ९ एतदपि–कं. १, कं. २ । १० विशिष्टात्मसंयोगो–जे. २ । ११ क्षयो–जे. १ । १२ वैकल्यादभावात्–जे. १ । १३ अस्मिन्–कं. १, कं. २ । १४ भोगाख्य–जे. १ । १५ भावज्जातः–कं. १, कं. २ । १६ करणसम्बन्धमन्तरेणेति–कं. २ ।

### प्रशस्तपादभाष्यम्

ततः शरीराद्बहिरपगतं ताभ्यामेव धर्माधर्माभ्यां समुत्पन्नेनातिवाहिकशरीरेण सम्बध्यते, तत्संक्रान्तं च स्वर्गं नरकं वा गत्वा आशयानुरूपेण शरीरेण स[1]म्बद्ध्यते, तत्संयोगार्थं कर्मोपस[2]र्पणमिति ।

### न्यायकन्दली

ताभ्यां लब्धवृत्तिभ्यामैहिकदेहोपभोग्यात् कर्मणोऽन्याभ्यामात्ममनःसंयोगसहायाभ्यां-मृतशरीरान्मनसो विभागकारणमपसर्पणकर्मोत्पद्यते । अ[3]पसर्पणकर्मोत्पत्तावात्ममनः-संयोगोऽसमवायिकारणम्, मनः समवायिकारणम्, लब्धवृत्ती धर्माधर्मौ निमित्त-कारणम् । ततस्तदनन्तरं [4]तन्मनो मृतशरीराद्बहिर्निर्गतं ताभ्यामेव लब्धवृत्तिभ्यां धर्माधर्माभ्यां सकाशादुत्पन्नेनातिवाहिकशरीरेण सम्बद्धयते । तत्संक्रान्तं तदातिवाहिक-शरीरसंक्रान्तं मनः स्वर्गं नरकं वा गच्छति । तत्र गत्वा आशयानुरूपेण कर्मा-नुरूपेण शरीरेण सम्बद्धयते । स्वर्गे नरके वा यदुपजातं शरीरं तत्र तावन्मनःसम्बन्धेन भवितव्यम्, अन्यथा तस्मिन् देशे भोगासम्भवात् । न चात्मवदगत्वैव मनसो दे[5]हान्तरसम्बन्धोऽस्ति, अव्यापकत्वात् । गमनं च तस्यैतावद्दूरं केवलस्य न सम्भवति, महाप्रलयानन्तरावस्थाव्यतिरेकेणाशरीरस्य मनसः कर्माभावात् । तस्मान्मृतशरीरप्रत्या-सन्नमदृष्टवशादुपजातक्रियैरणुभिर्द्व्यणुकादिप्रक्रमेणारब्धमतिसूक्ष्ममनुपलब्धियोग्यं शरीरं

[कु०]

अनभ्यासेन वेदानाम्, आचारस्य च वर्य(र्ज)नात् (आचार्यस्य च वचनात्(?)आलस्यादनं(दीनां)दोषाच्च मृत्युर्विप्रां-जिघं(घां)सतीति(?)नियमेनान्त्यसुखदुःखज्ञानेनैव कर्म विनश्येत्तदेवं वचनमनर्थकमेव स्यादित्यर्थः ।

*ननु कोऽयं धर्माधर्मयोर्वृत्तिलाभ इत्यत आह ऐहिकशरीरेति (कं. ३१०) । मनस आमुष्मिकशरीरसंबन्धे प्रमाणं* सूचयितुं तर्कमाह **स्वर्गे नरके वेति** (कं. ३१०)–प्रमाणं चेदमामुष्मिकशरीरं मनःसंयुक्तमेव भोगं करोति, शरीरत्वात्, ऐहिकशरीरवदिति संयुक्तसंयोगेन सिद्धसाधनतामाशंक्य परिहरि(र)ति [6]**न चात्मवनेति** (कं. ३१०) आमुष्मिक-शरीरजन्यं सुख(खं) तावत्प्राय(यो)देशिकं विमु(भु?)कार्याणां(!)वा समवायिकारणां(णानां?) चानुरोधेनैव

---

१ संयुज्यते–व्यो. (६७६), पा. १–दे । २ पसर्पणाख्यमिति–व्यो. (६७६) । ३ अपसर्पणोत्पत्तौ–जे १, जे. २, जे. ३ । ४ मनो–जे. १ । ५ देशान्तर–जे. । ६ न चात्मवदगत्वैवेति–कं. २ ।

प्रशस्तपादभाष्यम्

योगिनां च बहिरुद्रेचितस्य मनसोऽभिप्रेतदेशगमनं प्रत्यागमनं च, तथा सर्गकाले प्रत्यग्रेण शरीरेण सम्बन्धार्थं कर्मादृष्टकारितम् ।

एवमन्यदपि महाभूतेषु यत्प्रत्यक्षानुमानाभ्यामनुपलभ्यमानकारणमुपकारापकारसमर्थं तदप्यदृष्टकारितम्, यथा सर्गादावणुकर्म, अग्निवाय्वोरूर्ध्वतिर्यग्गमने,

न्यायकन्दली

परिकल्प्यते । तच्च मृतशरीरमतिक्रम्य मनसः स्वर्गनरकादिदेशंप्रतिवहनधर्मकत्वादातिवाहिकमित्युच्यते । मरणजन्मनोरन्तराले मनसः कर्म शरीरोपगृहीतस्यैवोत्पद्यते, महाप्रलयानन्तरावस्थाभाविमनःकर्मव्यतिरिक्तत्वे सति मनःकर्मत्वाद् दृश्यमानशरीरवृत्तिमनःकर्मवत् । आगमश्चात्र संवादको दृश्यत इति । तत्संयोगार्थं च कर्मोपसर्पणमिति । तेन स्वर्गे नरके वा प्रत्यग्रजातेन शरीरेण मनःसंयोगार्थं कर्मोपसर्पणमिति ।

योगिनां च बहिरुद्रेचितस्य बहिर्निःसारितस्य मनसोऽभिप्रेतदेशगमनं प्रत्यागमनं च । तथा सर्गकाले प्रत्यग्रेण शरीरेण सम्बन्धार्थं मनःकर्मादृष्टकारितम् । न केवलमेतावत् सर्वमन्यदपि महाभूतेषु यत्प्रत्यक्षानुमानाभ्यामनुपलभ्यमानकारणमुपकारापकारसमर्थं तदप्यदृष्टकारितम्, यथा सर्गादावणुकर्म, अग्निवाय्वोर्यथासंख्यमूर्ध्वतिर्यग्गमने, महाभूतानां भूगोलकादीनां च प्रक्षोभणं चलनम्, परीक्षाकालेऽ-

[कु०]

प्रदं(?) नियमः सयोग ऐहिकसुखस्यासमवायिकारणम्, तथापि यद्यामुष्मिकं(क)शरीरसंयुक्तेन मनसा आत्मनः संयोगोऽसमवायिकारणं स्यात्, तदा आमुष्मिकाद्बहिरेव प्रसंग इति भावः । आतिवाहिकशरीरसद्भावे सतर्कप्रमाणमाह गमनं स(च)तस्येति (कं. ३१०), आतिवाहिकमित्युच्यत इति (कं. ३१०) "अतिक्रम्य वहनेति (कं. ३१०) चाह

१ अन्यदपि–दे । २ समर्थं च भवति–कं. १, कं. २ । ३ देशातिवा–कं. १, कं. २ । ४ वोपप–कं. १, कं. २ । ५ इति नाभिनिवेष्टव्यम्–जे. १ । ६ स्वर्गकाले–जे. १, जे. ३ । ७ मनसः कर्म–जे. १, जे. २, कर्मा–जे. ३ । ८ मेतत्सर्वं–जे. १, जे. २, जे. ३ । ९ अग्निवाय्वोरूर्ध्वतिर्यग्गमने–जे. १, जे. ३ । १० भूतानां–जे. ३ । ११ अतिक्रम्येति–कं. २ ।

प्रशस्तपादभाष्यम्

महाभूतानां प्रक्षोभणम् । [1]अभिषिक्तानां मणीनां तस्करं प्रति गमनम्, अयसोऽयस्कान्ताभिसर्पणं चेति ।

इति प्रशस्तपादभाष्ये कर्मपदार्थः समाप्तः ॥

न्यायकन्दली

भिषिक्तानां मणीनां तस्करं प्रति गमनम्, अयसोऽयस्कान्ताभिसर्पणं च सर्वमेतददृष्टकारितमिति ।

हिताहितफलोपायप्राप्तित्यागनिबन्धनम् ।
कर्मेति परमं तत्त्वं यत्नतः क्रियतां हृदि ॥

इति भट्टश्रीश्रीधरकृतायां पदार्थप्रवेशन्यायकन्दलीटीकायां कर्मपदार्थः समाप्तः ।

[कु०]

सप्रयोजनमस्यत्या (स्त्या) तिवाहिकम् । महाप्रलयानन्तरावस्थेति (कं. ३१०) स्वर्गादिशरीरहेतुमन[:]संभवाच्च व्यर्थं विशेषणत्वम् ।

[इति] कर्म ॥

१ अभिवासितमणीनां–दे.

प्रशस्तपादभाष्यम्

## अथ सामान्यपदार्थनिरूपणम्

[255] सामान्यं द्विविधम्–परमपरं च । स्वविषयसर्वगत[1]मभेदात्मकमनेकवृत्ति एकद्विबहुष्वात्मस्वरूपानु[2]वृत्तिप्रत्ययकारणं स्वरूपाभेदेनाधारेषु प्रबन्धेन वर्तमानमनु[3]वृत्तिप्रत्ययकारणम् ।

न्यायकन्दली

[255] जयन्ति जगदुत्पत्तिस्थितिसंहृतिहेतवः ।
विश्वस्य परमात्मानो ब्रह्मविष्णुमहेश्वराः ॥

[4]सामान्यं व्याचष्टे–द्विविधं सामान्यं परमपरं चेति । कृतव्याख्यानमेतदुद्देशावसरे । [5]सर्वं सर्वगतं सामान्यमिति केचित् । तन्निषेधार्थमाह–स्वविषयसर्वगतमिति । यत्सामान्यं यत्र पिण्डे प्रतीयते स तस्य स्वो विषयः, तत्र सर्वस्मिन् गतं समवेतम्, सर्वत्र तत्प्रत्ययात् । सर्वसर्वगतत्वाभावे त्वनुपलब्धिरेव प्रमाणम् । [6]अभेदात्मकम्, अभिन्नस्वभावम् । येन स्वभावेनैकत्र पिण्डे वर्तते सामान्यं तेनैव स्वभावेन पिण्डान्तरेऽपि वर्तते, तत्प्रत्ययाविशेषादित्यर्थः । [7]अनेकेषु पिण्डेषु वृत्तिर्यस्य तदनेकवृत्ति ।

[टि०] ॥ [8]अथ सामान्यम् ॥

[255 to 263] अत [9]एवात्र बाधकहेतव इतिः–यदेकं तदेकत्रैव वर्तते यथैकभाजनगतं तालफलादि । यदनेकवृत्ति तदनेकं यथानेकभाजन[10]गतं तालफलादि, इत्याद्यवयविवादोक्तबाधहेतवः । जातिरेव [11]च व्यक्तेः स्वरूपम्

[कु०] [255] कृतव्याख्यानमिति (कं. ३१२) एकव्यक्तिसमाविष्टयोर्नियमेन परापरभाव इत्यादि व्या(ख्या)त[मि]त्यर्थः । सर्वं सर्वगतमिति (कं. ३१२) आका[शा ?]दिसामान्येनेति शेषः । स तस्य स्वविषय इति (कं. ३१३) मस्याना (मत्स्यानां ?) जलविषय इति विषयशब्दस्यान्यत्रभावार्थत्वादित्यर्थः । तत्प्रत्ययाविशेषादिति (कं. ३१३) विशेषत्वेऽनुगमायोगादित्यर्थः । नन्वेतेन वृत्तितं ना(?)यथाऽनेकभाजनगत[ता]लफलानीत्यत आह–अभिन्नस्वभावमनेकत्रेति (कं. ३१३) इदमनुमानं धर्मिग्राहकप्रमाणमित्यर्थः । अभेदस्वभावमित्यादिपदत्रयं समुचितद्रव्यादिभ्यः सामान्यस्य वैधर्म्यप्रतिपादायेति दर्शयितुं संगतिं करोति द्वित्वादिकमपीति (कं. ३१३) यद्यप्यन्येनैव पदे[न] वैधर्म्यं

---

१ मभिन्ना–कं. १, कं. २ । २ नुगमप्रत्ययकारि–कं. १, कं. २ । ३ बुद्धि–अ. (६८६)यो दे, पा. ५ पु. । ४ सामान्यं परमपरं चेति–जे. २ । ५ सर्व–कं. १, कं. २, जे. २ । ६ अभिन्ना–कं. १, कं. २ । ७ अनेकेषु वृतियस्य–जे. १ । ८ 'अथ सामान्यम्' ङ-पुस्तके नास्ति । ९ एव तत्र–मु., एव चात्र–जे. २; एवात्र–जे. १, ३ । १० गत–अ, ब । ११ च न व्यक्तेः–मु. ।

प्रशस्तपादभाष्यम्

कथम् ? प्रतिपिण्डं सामान्यापेक्षं प्रबन्धेन ज्ञानोत्पत्तावभ्यासप्रत्ययजनिताच्च संस्कारादतीतज्ञानप्रबन्धप्रत्यवेक्षणाद् यदनुगतमस्ति तत्सामान्यमिति ।

न्यायकन्दली

अभिन्नस्वभावमनेकत्र वर्तत [1]इति च प्रतीतिसामर्थ्यात् समर्थनीयम् । नहि प्रमाणावगतेऽर्थे काचिदनुपपत्तिर्नाम । द्वित्वादिकमप्यभिन्नस्वभावमनेकत्र वर्तते, तस्मात् सामान्यस्य विशेषो न लभ्यते तत्राह–[2]एकद्विबहुष्वात्मस्वरूपानुवृत्तिप्रत्ययकारणमिति । सामान्यमेकस्मिन् पिण्डे द्वयोः पिण्डयोर्बहुषु वा पिण्डेष्वात्मस्वरूपानुगमप्रत्ययं करोति । एकस्य पिण्डस्य द्वयो[3]र्बहूनामप्युपलम्भे गौरिति प्रत्ययस्य भावात्, द्वित्वादिकं त्वेवं न भवतीति विशेषः । अनेकवृत्तित्वे सति यदेकद्विबहुष्वात्मस्वरूपानुगमप्रत्ययकारणं सत् सामान्यमिति लक्षणार्थः । एतदेव विवृणोति–स्वरूपाभेदेनेति । एकस्मिन् पिण्डे यत् स्वरूपं । [4]तत्पिण्डान्तरेऽपि तस्मादभेदेनाधारेषु प्रबन्धेनानुपरमेण पूर्वपूर्वपिण्डापरित्यागेन वर्तमानं [5]यदनुवृत्तिप्रत्ययकारणं स्वात्म[6]स्वरूपानुगमप्रतीतिकारणं सामान्यम् ।

[टि०]

इति:–स्वं स्वकीयमन्यस्माद् व्यावर्तकं रूपं स्वरूपम् । ननु निर्विकल्पकपृष्ठ[7]भूतः शब्दोल्लेखिज्ञानरूपो विकल्पः सङ्केतविषयो भविष्यतीत्याह नापि विकल्पः शब्दार्थं इति । शाबवदशक्यसङ्केतत्वाद् इति:–यथा सविकल्पक

[कु०]

सुप्रतिपाद(दितं) तथापि प्रागुक्तं भ्रमं निवारयितुमितरत्पदद्वयमुपात्तमिति भावः । अनेकवृत्तित्वे सतीति (कं. ३१३) एकस्वभावे चेति शेषः । एकस्मिन्पिण्डे यत्स्वरूपमिति (कं. ३१३) उत्तरप्रतीतिविषयस्य पूर्वप्रतीतिविषयभेदप्रतिपादनमेतत् । अनुपरमेणेति (कं. ३१३) पूर्वप्रतीतिविषयस्योत्तरप्रतीतिविषयादर्थसिद्धोऽभेदो तेन प्रतिपाद्यत इत्येतावताऽपौनरुक्त्यं परस्य प्रश्न इति प्रमाणविषय इति भावः । पिण्डं पिण्डं प्रतीति (कं. ३१३) अनेकेषु पिण्डेष्वित्यर्थः । [8]सामान्यापेक्षयेति (कं. ३१३) जात्याद्यवैलक्षण्येनानेकेषु ज्ञानेषूत्पद्यमानेषु सत्स्वित्यर्थः । ततश्चायं समुदायार्थः–यद्यनेकेषु पिण्डेष्वेवमनुवृत्तं किञ्चिन्न स्यादनुवृत्तप्रत्य[या ?]र्थसत्तासमर्थनादिकमुद्दृशे विसृत[म्] (?) ।

---

१ इति–जे. १, जे. ३ । २ एकद्विबहुष्विति–कं. १, कं. २ । ३ बहूनां वोपलम्भे सति–कं. १, क. २ । ४ पिण्डान्तरेऽपि–जे. १, जे. २, जे. ३ । ५ सद्–कं. १, कं. २, यदनुगत–जे. २ । ६ स्वरूपा–कं. १, कं. २ । ७ सूतः – अ, ब । ८ सामान्यापेक्षमिति–कं. १ ।

प्रशस्तपादभाष्यम्

[256] तत्र सत्तासामान्यं परमनुवृत्तिप्रत्ययकारणमेव । यथा परस्परविशिष्टेषु चर्मवस्त्रकम्बलादि[1]ष्वेकस्मान्नीलद्रव्याभिसम्बन्धा[2]न्नीलं नीलमिति प्रत्ययानुवृत्तिः, तथा परस्परविशिष्टेषु द्रव्यगुणकर्मस्वविशिष्टा सत्सदिति प्रत्ययानुवृत्तिः । सा [3]चार्थान्तराद् सम्बन्धाद् भवितुमर्हतीति यत्तदर्थान्तरं सा सत्तेति सिद्धा । [4]सत्तानुसम्बन्धात् सत्सदिति प्रत्ययानुवृत्तिः, तस्मात् सा सामान्यमेव ।

न्यायकन्दली

कथमिति परस्य प्रश्नः । कथमनेकेषु पिण्डेषु सामान्यस्य वृत्तिरवगम्यत इत्यर्थः । उत्तरमाह–प्रतिपिण्डमिति । पिण्डं पिण्डं प्रति सामान्यापेक्षं यथा भवति, तथा ज्ञानोत्पत्तौ सत्यां योऽभ्यासप्रत्ययस्तेन यः संस्कारो जनितः, तस्मादतीतस्य ज्ञानप्रबन्धस्य ज्ञानप्रवाहस्य प्रत्यवेक्षणात् स्मरणाद् यदनुगतमस्ति तत्सामान्यम् । किमुक्तं स्यात् ? एकस्मिन् पिण्डे सामान्यमुपलभ्य पिण्डान्तरे तस्य प्रत्यभिज्ञानादेकस्यानेकवृत्तित्वमवगम्यते । [5]अत एवात्र बाधकहेतवः प्रत्यक्षविरोधादपास्यन्ते ।

[256] यत्पूर्वमुक्तं परमपरं च द्विविधं सामान्यमिति तदिदानीं विविच्य कथयति–तत्र परं सत्तासामान्यमनुवृत्तिप्रत्ययकारणमेव । यद्यपि प्रत्यक्षेण प्रतीयते सत्ता, तथापि विप्रतिपन्नं प्रत्यनुमानमाह–यथा परस्परविशिष्टेष्विति । तद्व्यक्तम् । द्रव्यादिषु सत्सदितिप्रत्ययानुवृत्तिः व्यतिरिक्तप्रत्ययनिबन्धना, भिन्नेषु प्रत्ययानुवृत्तित्वात्, चर्मवस्त्रादिषु नीलप्रत्ययानुवृत्तिवत् । यस्मात् सत्ता त्रिषु[6] द्रव्यादिषु प्रत्ययानुवृत्तिं करोति न व्यावृत्तिम्, तस्मात् सामान्यमेव न विशेष इत्युपसंहारार्थः ।

[टि०]

ज्ञानमशक्यसङ्केतं तथा आकारोऽपीत्यर्थः । [7]तदेव सामान्यमित्यादि:–[8]भेदाभावोऽर्थरूपम्, स्वलक्षणमेकम्–१, विकल्पज्ञानं द्वितीयम्–२, ज्ञानाकारस्तृतीयम्–३, तदाकारस्य बहिरारोपश्चतुर्थरूपम्–४, इत्येवम[9]र्थपञ्चमरूपं

[256 to 258] प्राणिगतानीति (कं. ३१४) द्रव्यस्य पृथिवीत्वादिवत्पृथिवीत्वस्याघोत्वादयोऽवांतरविशेष इत्यर्थः । एवं नीलत्वादयोऽपि रूपत्वस्य कत्व-वत्वादयः शब्दस्येति । किं द्रव्यत्वादीनामिति (कं. ३१४) ।

---

१ ष्वन्यस्मान्–दे । २ नीलमिति–दे । ३ चार्थान्तराद् भवितुं–कं. १, कं. २ । ४ सत्तासम्बन्धात्–व्यो. (६८७), दे । ५ अत एव तत्र–कं. १, कं. २, अत एव चात्र–जे. २ । ६ द्रव्यादिषु–जे. १, द्रव्यादिषु त्रिषु–जे. २, जे. ३ । ७ तदेव च मु. जे. १, ३; तदेव–जे. २ । ८ भेदोऽभावो –अ, ब । ९ मर्थपञ्चमाकारमुच्यते–ब ।

## प्रशस्तपादभाष्यम्

[257] अपरं द्रव्यत्वगुणत्वकर्मत्वादि [1]अनुवृत्तिव्यावृत्तिप्रत्ययहेतुत्वात् सामान्यं विशेषश्च भवति । तत्र द्रव्यत्वं परस्परविशिष्टेषु पृथिव्यादिष्व[2]नुवृत्तिप्रत्ययहेतुत्वात् सामान्यम्, गुणकर्मभ्यो [3]व्यावृत्तिप्रत्ययहेतुत्वाद् विशेषः । तथा गुणत्वं परस्परविशिष्टेषु रूपादिष्वनुवृत्तिहेतुत्वात् [[4]सामान्यम्, द्रव्यकर्मभ्यो व्यावृत्तिहेतुत्वाद् विशेषः । तथा कर्मत्वं परस्परविशिष्टेषूत्क्षेपणादिष्वनुवृत्तिप्रत्ययहेतुत्वात् सामान्यम्, द्रव्यगुणेभ्यो व्यावृत्तिहेतुत्वाद्विशेषः] ।

## न्यायकन्दली

[257] अपरं द्रव्यत्वगुणत्वकर्मत्वादि अनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यं विशेषश्च भवति । द्रव्यत्व द्रव्येष्वनुवत्तिप्रत्ययहेतुत्वात् सामान्यम्, गुणकर्मभ्यो व्यावृत्तिहेतुत्वाद्विशेषः । गुणत्वं गुणेष्व[5]नुवृत्तिप्रत्ययहेतुत्वात् सामान्यम्, द्रव्यकर्मभ्यो व्यावृत्तिप्रत्ययहेतुत्वाद्विशेषः । तथा कर्मत्वं परस्परविशिष्टेषूत्क्षेपणादिष्वनुवृत्तिप्रत्ययहेतुत्वात् सामान्यं द्रव्यगुणेभ्यो व्यावृत्तिहेतुत्वाद्विशेषः ।

द्रव्यत्वादिवत् पृथिवीत्वादीनामप्यनुवृत्तिव्यावृत्तिप्रत्ययहेतुत्वात् सामान्यविशेषभावोऽस्तीत्याह–एवमिति । प्राणिगतानि सामान्यानि गोत्वाश्वत्वादीनि, अप्राणिगतानि घटत्वपटत्वादीनि । किं द्रव्यत्वादीनां सामान्य[6]रूपत्वं वास्तवम् ? किं वा

[टि०]

स्वलक्षणमेकमारोपितबाह्यत्वमिति चोच्यते । तत्सामान्यं संसर्गविषयः। एकप्रत्यवमर्शस्य इति प्रत्यवमर्शो विकल्पः । न च तस्मिन्प्रतीयमाने इति तस्मिन्नभावे इत्यर्थः । [7]शब्दस्यातद्विषयत्वाद् इति शब्दो ह्यभावविषयो (नार्थ)शब्दविषयोऽतो न शब्दादर्थप्रतीतिः । न च शब्दं विहायार्थप्रतिपत्ती प्रमाणान्तरमस्ति ॥ [8]सामान्यपदार्थः ॥

[कु०]

न भवन्तीति (कं. ३१५) भेदसाधकाभावादित्यर्थः । सामान्यविशेषयोः परस्परविरोधादन्यतरस्य गौणत्वमवश्यंभावि, तत्कतरदत्र गौणमिति प्रश्नार्थः । पृथक्कार्यनिरूपणमिति (कं. ३१५) बुद्धिरूपकार्यनिरूपणमित्यर्थः ।

---

१ अनुवृत्तिव्यावृत्तिहेतुत्वात्–कं. १, कं. २, दे, पा. ६ पु । २ अनुवृत्तिहेतुत्वात्–कं. १, कं. २ । ३ व्यावृत्तिहेतुत्वात्–कं. १, कं. २ । ४ [ ] एतच्चिह्नान्तर्गतः पाठः दे पुस्तके नास्ति । ५ व्यनुवृत्तिहेतुत्वात्–जे. ३ । ६ स्वरूपं–कं. १, कं. २ । ७ शब्दस्य–अ, ब, क । ८ पदार्थसमाप्तौ दृश्यमाना पुष्पिका सामान्यपदार्थसमाप्तौ नास्ति ।

प्रशस्तपादभाष्यम्

एवं पृथिवीत्वरूपत्वोत्क्षेपणत्वगोत्वघटत्वपटत्वादीनामपि प्राण्यप्राणिगतानामनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यविशेषभावः सिद्धः । [1]एतानि द्रव्यत्वादीनि प्रभूतविषयत्वात् प्राधान्येन सामान्यानि, स्वाश्रय[2]विशेषकत्वाद् भक्त्या विशेषाख्यानीति ।

[258-259] लक्षणभेदादेषां द्रव्यगुणकर्मभ्यः पदार्थान्तरत्वं सिद्धम् । अत एव च नित्यत्वम् ।

न्यायकन्दली

विशेष[3]रूपता ? आहोस्विदुभय[4]रूपता ? अत्राह–एतानीति । समानानां भावः सामान्यमिति सामान्यलक्षणं द्रव्यत्वादिषु विद्यते, स्वाश्रयं सर्वतो विशिनष्टीति विशेष इति तु लक्षणं नास्ति । अत एतानि मुख्यया वृत्त्या सामान्यान्येव न विशेषाः, विशेषसंज्ञां तूपचारेण लभन्ते । विशेषो हि स्वाश्रयं सर्वतो विशिनष्टि, द्रव्यत्वादिकमपि विजातीयेभ्यः स्वाश्रयस्य [5]विशेषकमित्येतावता साधर्म्येणोपचारप्रवृत्तिः ।

[258] [6]द्रव्यत्वादीनि द्रव्यादिव्यतिरिक्तानि न भवन्ति, अतस्तेषां पृथक्कार्यनिरूपणमन्याय्यमित्यत्राह–लक्षणभेदादिति । अनुगताकारबुद्धिवेद्यानि द्रव्यत्वादीनि, व्यावृत्तिबुद्धिवेद्याश्च द्रव्यादिव्यक्तयः, तस्मादेषां द्रव्यत्वादीनां लक्षणभेदात् प्रतीतिभेदाद् द्रव्यगुणकर्मभ्यः पदार्थान्तरत्वम् । अत एव च नित्यत्वम् । यत एव सामान्यस्य द्रव्यादिभ्यो भेदः, अत एव नित्यत्वम् । द्रव्याद्यभेदे सामान्यस्य द्रव्यादिविनाशे विनाशस्तदुत्पादे चोत्पादः स्यात्, भेदे तु नायं विधिरवतिष्ठत इति ।

[कु०]

अनुगताकारेति (कं. ३१२) बुद्धिभेदस्यैव तद्भेदसाधकतया निरूपणम्, नत्वन्यतः सिद्धभेदस्य बुद्धिरूपकार्यनिरूपणमिति भावः। अत एवेति (कं. ३१५) भेदसाधकस्यानुवृत्तिप्रत्ययस्यानुकूलस्तर्कः:– विनाशकारणभावे सति भावरूपत्वान्नित्यत्वं तद्द्रव्याद्यभेदेनोपपद्यत इत्यर्थः ।

१ एतानि तु–कं. १, कं. २ । २ विशेषात्तु–वे । ३, ४ स्वरूपता–कं. १, कं. २ । ५ विशेषण–कं. १, कं. २ । ६ द्रव्यत्वानि–जे. १, जे. ३ ।

### न्यायकन्दली

[259] **अत्रैके वदन्ति । भिन्नेष्वनुगता बुद्धिः सामान्यं व्यवस्थापयति । सा च प्रतिपिण्डं दण्डपुरुषाविव न [1]स्वतन्त्रे सामान्यविशेषलक्षणे द्वे वस्तुनी प्रतिभासयति । नापि तयोर्विशेषणविशेष्यभावः, [2]गोत्ववानित्येवमनुदयात् । किं तु तादात्म्यग्राहिणी प्रतीतिरियम्, गौरयमित्येकात्मतापरामर्शात्, उभयोरन्योन्यप्रहाणेन स्वरूपान्तराभावाच्च । अनुवृत्तता हि गोत्वस्येव सामान्यान्तरस्यापि स्वरूपम्, व्यावृत्ततापि गोव्यक्तेरिव[3] व्यक्त्यन्तराणामपि स्वभावः । सामान्यान्तरव्यावृत्तं तु गोत्वस्य स्वरूपम्, व्यक्त्यन्तरव्या[4]वृत्तिश्च गोव्यक्तेः स्वभावः परस्परात्मतामन्तरेणा[5]न्योन्यं न शक्यते निर्देष्टुम् । न च तस्य स एव स्वभावः स एव च सम्बन्धीत्युपपद्यते, निःस्वभावस्य सम्बन्धाभावात् । तस्माज्जातिव्यक्त्योः परस्परात्मतैव तत्त्वम् । एवं सति भेदाभेदवादोऽपि सिद्ध्यति । यथा हि शाबलेयो गौरित्येवं प्रतीयते तथा बाहुलेयोऽपि । न चास्ति कस्यचिद् बाधः शाबलेय एव गौर्न बाहुलेय इति । किन्तु सर्वेषामेकमतित्वमेव 'स गौरयमपि गौरिति' । तत्र प्रतीतिबलेन शाबलेयात्मकस्य गोत्वस्य बाहुलेयात्म-**

[कु०] [259] एवं प्रसाधितं जातिव्यक्त्योरात्यंतिकं भेदमसहमानात्परानुच्छपयति **अत्रेति** (कं. ३१५) **स्वतंत्र इति** (कं ३१५) अत्यंतभिन्न इत्यर्थः ।

नन्वभिन्नयोः कथं विशेषणविशेष्यभाव इत्यत आह–**नापि तयोरिति** (कं. ३१५) । ननु यदि भेदं विशेषणविशेष्यतां न गृह्णाति तत्कथं सामान्यं(म,)वस्थापयतीत्यत आह – **किन्त्विति** (कं. ३१५) **तादात्म्यग्राहिणीति** (कं. ३१५) तादात्म्यतया सामान्यग्रहणात(त्) तद्व्यवस्थापयतीत्यर्थः । [6]**एकाकारेणेति** सम्बन्धप्रतिपादकशब्दोल्लेखविरहेण सामान्याधिकरण्यावमर्शनादित्यर्थः ।

नन्वनुवृत्तत्व सामान्यस्य स्वरूपं व्यावृत्तत्वं च व्यक्तेः स्वरूपं परस्परपरिहारेणैव प्रतीयत इत्यत आह– **अनुवृत्तता हीति** (कं. ३१५) **सामान्यान्तरस्यापीति** (कं. ३१५) अश्वादिरित्यर्थः । ततश्च तन्मात्रं स्वरूपमित्यर्थः । तर्हि कीदृशमनयोः स्वरूपमित्यत आह–**सामान्यान्तरव्यावृत्तं त्विति** (कं. ३१५) तर्ह्ययमेव स्वरूपभेदोऽस्त्वित्यत आह– **परस्परेति** (कं. ३१५) सत्यमयं स्वरूपभेदः । स एव तु परस्परमन्तरेण न संभवतीत्यर्थः । नन्वन्यान्यव्यावृत्ततया परस्परात्मतामन्तरेणापि स्वरूपभेदोऽस्त्वित्यत आह – **न च तस्य स एवेति** (कं. ३१५) [7]**निःस्वभावत्वादिति** (कं. ३१५) अव्यावृत्तस्वभावविरहात्परस्परव्यावृत्ततया व्यावृत्तात्मकत्वे चेतरेतराश्रय प्रसंगादिति भावः । तत्किमत्यन्तमभेद एव जातिव्यक्त्योः, तथा सति व्यपदेशाभेदे तदभावे कथं तादात्म्यवाचोयुक्तिरपीत्यत आह–**तत्रेति**

१ स्वातन्त्र्येण–कं–१, कं. २ । २ गोत्वा गोत्ववान्–कं. १, कं. २, जे. ३; अत्र जे. १ पुस्तके 'गौः' इति पदमध्याहार्य गोत्ववान् इति समुचितः पाठोऽस्ति । ३ गोव्यक्तेः–कं. १, कं. २ । ४ व्यावृत्तेश्च–जे. १, जे. ३ । ५ णान्यो न–कं. १, कं. २ । ६ अयं पाठो नास्ति वि. पुस्तके । ७ भावस्य सम्बन्धाभावादिति वि. पुस्तके ।

न्यायकन्दली

कत्वे सिद्धे शाबलेयाद् भेदोऽपि सिद्धयति । अयमेव हि सामान्यस्य पूर्वपिण्डाद् भेदो यत् पिण्डान्तरात्मकत्वम् । इदमेव च सामान्यरूपत्वं यदुभयात्मकत्वम् । भेदाभेदावेकस्य विरुद्धाविति चेत् ? न, युक्तिज्ञस्य भवतः साम्प्रतमेतदभिधातुम् । तद्विरुद्धं यत्र बुद्धि[1]र्विपर्यस्यति । यत्तु सर्वदा प्रमाणेन तथैव प्रतीयते, तत्र विरोधाभिधानमेव विरुद्धम् ।

अन्यत्रैवं न दृष्टमिति चेत् ? किं वै प्रत्यक्षमपि अनुमानमिव दृष्टमनुसरति ? हतं तर्हीदमनवस्थया । अथेदं स्वसामर्थ्यात् प्र[2]वर्तते ? तदा [3]यथा यद्वस्तु यद्दर्शयति तथैव तत्, न त्वेतदन्यत्रादर्शनेन प्रत्याख्यानमर्हति [4]सर्वभावप्रत्याख्यानप्रसङ्गात् । तस्मात् सामान्यं व्यक्त्युत्पादविनाशयोरुत्पादविनाशवत्त्वाद्व्यक्त्यन्तरावस्थाने चावस्थानान्नित्यमनित्यं च, न पुनर्नित्य[5]मेव ।

एवं प्राप्तेऽभिधीयते–किं जातिव्यक्त्योरविलक्षणमाकारं [6]गृह्णतीप्रतीतिस्तयोरभेदं गृह्णाति ? आहोस्वित् परस्परविलक्षणावाकारौ ? आद्ये कल्पे तावदेकमेव वस्तु स्यात्, नोभयोरेकात्मकत्वम् अविलक्षणाकारबुद्धिवेद्य[7]त्वस्याभेदलक्षणत्वात् ।

[कु०]

(कं. ३१५) तत्र प्रतीतिबलेन परस्परभिन्नाभिन्नाभिर्व्यक्तिभिरयं गौरः [अय] श्याम इति जातेः सामानाधिकरण्यं विषयीकुर्वन्प्रत्यक्षप्रमाणं दर्शितम् । सम्प्रति तस्य प्रतिकूलतर्कमाशंक्य परिहरति [8]भेदाभेदावपीति (कं. ३१५) **युक्तिज्ञस्येति** (कं. ३१५) मैवं वक्तव्यम्, यादृशो विषयस्तादृश्येव बुद्धया भवितव्यम्, अन्यथादृशी तु सा तेन सह विरुध्यत इत्यर्थः । अस्त्वेवं ततः किमित्यत आह–**यत्त्विति** (कं. ३१५) **अन्यत्रेति** (कं. ३१५) दण्डपुरुषादावेवं भिन्नाभिन्नस्वभावत्वं दृष्टमित्यर्थः । **किं वै प्रत्यक्षमपीति** (कं. ३१६) व्याप्तिबलेन प्रवर्तते, यतोऽन्यत्रैवमदर्शनादिहापि नानुमन्यत इत्यर्थः । एवमनंगीकारे को दोष इत्यत आह–**हतमिति** (कं. ३१६) व्याप्तिग्राहकमपि प्रत्यक्षं प्रत्यक्षान्तरगृहीतां व्याप्तिमपेक्षते तथापि पक्षान्तरमित्यनवस्थया न क्वचित्प्रवर्तेत इत्यर्थः ।

नन्वेव तर्हि नश्यन्तीभिर्व्यक्तिभिः सह तादात्म्यात्सामान्येनापि नष्टव्यम्, न च नष्टव्यक्त्यन्तरे पुनरवस्थानं युज्यत इत्यत आह–**तस्मादिति** (कं. ३१६) यथा दर्शनानुसारेण भेदाभेदौ तथा नित्यत्वानित्यत्वेऽपीति भावः । **नोभयोरिति** (कं. ३१६) एकात्मत्वमुभयोर्वक्तव्यम् । न चाविलक्षणत्वे तत्संभवतीति भावः । [9]**नास्ति चेति**

१ विपर्येति–कं. १, कं. २ । २ प्रतीयते–जे. ३ । ३ यथा वस्तु-जे. १ । ४ सर्वाभाव–जे. ३ । ५ मेवेति–जे. १ । ६ गृह्णाति तत्प्रतीतिः? उत–कं. १, कं. २ । ७ वेद्यस्य–जे. १ । ८ भेदाभेदाविति कं २ । ९ 'च' इति वि. पुस्तके नास्ति ।

न्यायकन्दली

द्वितीये तु कल्पे व्याहतिरेव, विलक्षणाकारसंवित्तिरेव हि भेदसंवित्तिः । तस्याः सम्भवे सति तयोरभेदप्रतिपत्तिरेव [1]नास्ति, कथं भिन्नयोरभेदो व्यवस्थाप्यते ? कथं तर्हि तादात्म्यप्रतीतिः ? न कथञ्चिदिति वदामः ।

यदि तावदेक आकारोऽनुभूयते, एकस्यैव वस्तुनः प्रतीतिरियं नोभयोः । अथ द्वावाकारावनुभूयेते तदास्याः प्रतीतेरसम्भव एव । यत्पुन[4]र्गौरि[2]त्ययमविभागेन संवेदनं तत्समवायसामर्थ्यात् । संयोगे हि द्वयोः संसर्गाविभासः, समवायस्य पुनरेष महिमा यदत्र सम्बन्धिनावयःपिण्डवह्निवत् पिण्डीभूतावेव प्रतीयेते [3]जातिरेव च व्यक्तेः स्वरूपम् । तेन सत्यपि भेदे बदरादिवत् कुण्डस्य जातितो व्यक्तेः स्वरूपं पृथग् न निष्कृष्यते । परस्परपरिहारेण तूपलम्भोऽस्त्येव, दूरे गोत्वाग्रहणेऽपि पिण्डस्य ग्रहणात् । पूर्वपिण्डाग्रहणेऽपि पिण्डान्तरे गोत्वग्रहणात् । तस्माद्व्यक्तेरत्यन्तं भिन्नमेव सामान्यमिति तार्किकाणां प्रक्रिया ।

[कु०]

(कं ३१६) तथात्वे वा न क्वचिदात्यन्तिको भेदः स्यादिति भावः । **कथमिति** (कं. ३१६) न कथंचिदित्यर्थः । सुहृद्भूत्वा पृच्छति **कथं तर्हीति** (कं ३१६) भिन्नयोरेकत्वं तादात्म्यं किं वा भागेन संवेदनः(म्). तत्राद्यानंगीकार प॰गाहृन इत्यत आह–**न कथंचिदिति** (कं ३१६) कथमनंगीकार इत्यत्र प्राचीमेव युक्तिमनुवदति **यदि तावदिति** (कं. ३१६) । द्वितीयस्यान्यथासिद्धिरित्याह–[4]**यत्त्विति** (कं. ३१६) ।

ननु यदि जातिव्यक्त्योः समवायोऽपि संसर्गः स्यात्तर्हि दंडपुरुषसंयोग संयोग इव किमिति न प्रतीयत इत्यत आह–**संयोग इति** (कं. ३१६) **पिण्डीभूतावेवेति** (कं. ३१६) एवकाराभिन्नक्रमः सम्बन्धिनावित्यस्यानन्तरं द्रष्टव्यः । पिंड(डी)भूतावपृथग्भूतौ सम्बन्धिनावेवेच्छ(?) प्रतीयेते । सम्बन्धस्तु स्वं (?) विशिष्टप्रत्ययेण(न) न कार्येणानुमीयत इत्यर्थः ।

नन्वयःपिण्डो वह्निं विनापि क्वचिदुपलभ्यते, वह्निरप्यःपिण्डं विना; नैवं कदाचिदपि जातिव्यक्ती, तत्कथमनयोर्भेदसिद्धिरित्यत आह–**ईदृशत्वेति**(?)- अयं भावः किं जातिव्यक्त्योरसम्बद्धयोरनवस्थानाद्भेदो निराक्रियते, परस्परपरिहारे नानुपलंभाद्वा । तत्राद्योऽप्रयोजक अयुतसिद्धेरुपाधित्वात् द्वितीय असिद्ध एवेति । [5]**पृथक् निष्क्रयेति** (कं. ३१६) अवस्थितनये विशेषो द्रष्टव्यः । **तार्किकाणामिति** (कं ३१६) विशेषणपृथगवस्थितयोरनुपलंभस्याभेदहेतोरनुकूलतर्कविरहसूचयितुम् ।

---

१. नास्त्येव–जे २ । २ गौरियमिति–जे. १, जे. ३, गौरयमिति–जे. २ । ३ जातिरेव न च–कं. १, कं. २ । ४यत्पुनरिति–कं. १ । ५ पृथक न निष्क्रयत इति कं २ ।

## प्रशस्तपादभाष्यम्

[260-263] द्रव्यादिषु वृत्तिनियमात् प्रत्ययभेदाच्च परस्परतश्चान्यत्वम् । प्रत्येकं स्वाश्रयेषु लक्षणाविशेषाद्विशेषलक्षणाभावाच्चैकत्वम् ।

## न्यायकन्दली

[260] द्रव्यादिषु वृत्तिनियमात् प्रत्ययभेदाच्च परस्परतश्चान्यत्वम्, द्रव्यत्वादयः प्रत्येकं द्रव्यादिष्वेव नियताः । प्रत्ययभेदाश्चैतेषु दृश्यन्ते, तस्माद् द्रव्यादिषु वृत्तिनियमात् प्रत्ययभेदाच्च द्रव्यत्वादीनां परस्परतो भेदः ।

अभेदात्मकं सामान्यमिति पूर्वं प्रतिज्ञामात्रेणोक्तं तदिदानीं प्रमाणसिद्धं तस्य करोति–प्रत्येकं स्वा[1]श्रयेषु लक्षणाविशेषाद्विशेषलक्षणाभावाच्चैकत्वम् । लक्ष्यतेऽनेनेति लक्षणमनुग[2]ताकारं ज्ञानम् । प्रत्येकं प्रतिपिण्डमविशेषाद्वैलक्षण्याभावाद्विशेषे भेदे लक्षणस्य प्रमाणस्याभावाच्च सामान्यस्य स्वाश्रयेष्वेकत्वमभिन्न[3]स्वभावत्वमित्यर्थः ।

स्वविषये सर्वत्र सामान्यं समवैति नान्यत्रेति यत्पूर्वमुक्तं [4]तत्र कारणमाह–यद्यपीति । यद्यपि सामान्यानि यत्र तत्रोपजायमानेन पिण्डेन सम्बन्धादपरिच्छिन्नदेशान्यनियतदेशानि, तथाप्युपलक्षणस्याभिव्यञ्जकस्यावयवसंस्थानविशेषस्य नियमान्नियतत्वात् पिण्डोत्पादककारणसामग्रीनियमाच्च स्वविषये सर्वत्र समवयन्ति नान्यत्रेति ।

[कु॰] [260] **द्रव्यत्वादय इति** (कं. ३१६) परापरभूतानां न्यूनाधिकव्यक्तिवृत्तितया भेदः । विरुद्धानां तु मिथः परस्पराभाववद्व्यक्तिवृत्तितया तद द्रष्टव्यम् । **वैलक्षण्याभावादिति** (कं. ३१६) अनेनानुवृत्तिप्रत्ययरूपं प्रत्यक्षं मे (क्षमेव ?) विपक्षे बाधकतर्कसहितं सामान्यस्य व्यक्तिभेदविरहे प्रमाणं दर्शितकारणमाहेत्यर्थः ।

**अनियतदेशानीति** (कं. ३१७) **अत्रैवेति** (?) नियंतुं शक्यानीत्यर्थः । संस्थाननियम एव कुत इत्यत आह–**पिंडोत्पादकेति** (कं. ३१७) **सामग्रीनियमादिति** (कं. ३१७) सामग्रीस्वभावभेदातित्यर्थः ।

---

१ स्वाश्रयेष्विति–कं. १, कं. २ । २ अनुगताकार–कं. १, कं. २, जे. ३ । ३ स्वभाव–कं. १, कं. २ ।
४ तस्य–कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

यद्यप्यपरिच्छिन्नदेशानि [1]सामान्यानि, तथाप्युपलक्षणनियमात् कारणसामग्रीनियमाच्च स्वविषयसर्वगतानि । अन्तराले च संयोगसमवायवृत्त्यभावादव्यपदेश्यानीति ।

इति प्रशस्तपादभाष्ये सामान्यपदार्थः समाप्तः ।

न्यायकन्दली

[261] एतदुक्तं भवति–सास्नादिसंस्थानविशेषो गोत्वस्य व्यञ्जकः, केसरादिसंस्थानविशेषोऽश्वत्वस्य, विशिष्टग्रीवादिसंस्थानविशेषो घटत्वस्य, प्रतीतिनियमात् । एते च संस्थानविशेषा न सर्वेषु पिण्डेषु साधारणाः, अपि तु प्रतिनियतेषु भवन्ति । तत्र यद्यपि सर्वं सामान्यं सर्वत्रोपजायमानेन [2]स्वविषयेणेव पिण्डान्तरेणापि सम्बद्धुं क्षमते, तथापि [3]यस्याभिव्यञ्जकं यत्र पिण्डे सम्भवति तस्य तत्रैव समवायो नान्यत्र । एवं [4]सामग्रीनियमादपि सामान्यसम्बन्धनियमः । एष हि तन्त्वादीनां कारणानां स्वभावो [5]यदेतैरुत्पाद्यमाने द्रव्ये पटत्वमेव समवैति, [6]नान्यत् । एष हि मृत्पिण्डादीनां महिमा यत्तैः क्रियमाणे द्रव्ये घटत्वमेव समवैति, नान्यत् ।

न तावत् सामान्यमन्यतो गत्वान्यत्र सम्बध्यते, निष्क्रियत्वात् । तत्रापि यदि पूर्वं नासीत् ? तत्रोपजायमानेन पिण्डेनास्य सम्बन्धो न स्यात् । दृश्यते च सर्वत्रोपजायमानेन पिण्डेन सम्बन्धः, तस्मात् सर्वं सर्वत्रास्तीति कस्यचिन्मतं तन्निराकुर्वन्नाह–अन्तराले संयोगसमवायवृत्त्यभावादव्यपदेश्यानीति । अन्तरालमिति आकाशं वा दिग्द्रव्यं

**[कु०]** [261] विषयविशेषसमवायिसमवायनियमे प्रमाणस्यास्फुटत्वानुक्तमर्थं संगृह्य दर्शयति **एतदुक्तमिति** (कं. ३१७) –अत्र प्रतीतिनियम एव समवायनियमे प्रमाणम् । तत्र तु प्रयोजकः संस्थाननियमः । तथापि प्रयोजकः कारणस्वभाव इति विवेकः । एवं **सामग्रीनियमादपीति** (कं. ३१७) नियतप्रतीत्युत्पादकसंस्थानोत्पादनद्वारेणेति भावः ।

आगामिभाष्यं समर्थयितुमुक्तविद्यदन (?) माशंकते **न तावदिति** (कं. ३१७) न वा सम्बद्धानामेवेति शेषः । आधाराधेयभावस्य संबन्धांतरनान्तरीयकत्वादिति भावः । **वस्तुशक्तेरिति** (कं. ३१७) बलादन्यतो नागतमपि सामान्यं जायमानेन पिण्डेन संबध्यत इत्यंगीकर्तव्यमित्यर्थः ।

१. सामान्यानि भवन्ति–कं. १, कं. २ । २ स्वविषयेणैव–कं. १, कं. २, जे. ३; स्वविषयेण च–जे. २ । ३ तस्या–जे. ३ । ४ सामग्र्या–कं. १, कं. २ । ५ यदेतैरुत्पद्यमाने–कं. १, कं. २ । ६ नापरं–जे. २ ।

न्यायकन्दली

वा स्ति[1]मितवायुर्वा मूर्त्तद्रव्याभावो वा, तेषु गोत्वादिसामान्यानां न संयोगो नापि समवायः । न चासम्बद्धानामेव तेषामवस्थाने प्रमाणमस्ति । अतोऽन्तराले न सामान्यानि व्यपदिश्यन्ते न सन्तीत्यर्थः । कथं तर्हि तत्रोपजायमानेन पिण्डेन सम्बध्यन्ते ? कारणसामर्थ्यात् । संयोगो ह्यन्यतः समागतस्य भवति, तत्रै[2]वावस्थितस्य वा भवति । तस्माद्विलक्षणस्तु समवायो यत्र यत्रैव पिण्डोत्पत्तौ कारणानि व्याप्रियन्ते, तत्र तत्रैव कारणानां सामर्थ्यात् पिण्डेऽन्यतोऽनागतस्य तत्रस्थितस्यापि सामान्यस्य भवति, वस्तुशक्तेरपर्यनुयोज्यत्वात् ।

[262] अत्राहुः सौगताः—प्रतीयमानेषु भेदेषु मणिसूत्रवदेक[3]स्याकारस्यानुपलम्भात् सामान्यं नास्त्येवेति । तदयुक्तम्, अनेकासु गोव्यक्तिष्वनुभूयमानास्वश्वादिव्यक्तिविलक्षणतया [4]सामान्याकारप्रतीतिसम्भवात् । यदि शाबलेयादिषु परस्परभिन्नेष्वेकमनुवृत्तं न किञ्चिदस्ति, यथा गवाश्वव्यक्तयः परस्परविलक्षणाः [5]संवेद्यन्ते तथा गोव्यक्तयोऽपि संवेद्याः स्युः । यथा वा गोव्यक्तयः सरूपाः प्रतीयन्ते तथा गवाश्वव्यक्तयोऽपि प्रतीयेरन्, विशेषाभावात् । नियमेन तु गोव्यक्तयः प्रतीयमानाः सरूपाः स्ववर्गसाधारणमश्वादिव्यावृत्तं किञ्चिदेकं रूप[6]माक्षिपन्ति, एकार्थक्रियाकारित्वादेकहेतु[7]त्वाद्वा । गोव्यक्तीनामेकत्वमिति चेत् ? नासति सामान्ये [8]व्यक्तीनामिव व्यक्तिहेतूनां व्यक्तिकार्याणामपि परस्परव्यावृत्तानामेकत्वात्[9] । किञ्च,

[कु०] [262] [10]तत्राहुः सौगता इति (कं. ३१७) उक्तं प्रमाणमजानाना इति शेषः । उक्तमेवानुवृत्तिप्रत्ययरूपं प्रमाणं दर्शयति अनेकास्विति (कं. ३१७) अनुकूलं तर्कमाह यदीति (कं. ३१७) उपसंहरति नियमेनेति (कं. ३१८) एकार्थक्रियाकारित्वादिति (कं. ३१८) एकार्थनिदोहनवहनादिलक्षणा एको हेतुः उ(वृ)षभादिः । नासतीति (कं. ३१८) एकजातिक्रोडीकृतामेवार्थक्रियाणां हेतुनां चैकत्वमिति भावः । न चायं नियम इत्याह किं चेति (कं. ३१८) हेतुभेदे एकाकारां प्रतीतिं कार्यभेदेऽप्यनेकाकारां प्रतीतिं दर्शयति या च गौरिति (कं. ३१८) अपि चेति (कं. ३१८) सामान्यद्वारा शब्दार्थयोः संके[ते] सति वाच्यवाचकभावे घटते । सामान्यानंगीकारे तु न घटत एवेत्यर्थः ।

---

१ स्तिमितवेग–कं. १, कं २ । २ वा व्यवस्थितस्य–जे. २ । ३ एकस्यानुपलम्भात्–जे. १ । ४ समानाकार–जे. २ । ५ विद्यन्ते–जे. १ । ६ माक्षिपति–कं. १, कं. २ । ७ हेतुत्वाच्च–कं. १, कं. २ । ८ गोव्यक्तीनामिव–जे २ । ९ अत्र एकत्वादसम्भवात् इति मुद्रितः पाठः न तु 'एकत्वात्' तत्र–जे. १ इत्यत्र 'एकत्वाभावात्' जे. २, जे. ३ इत्यत्र 'एकत्वासम्भवात्' इति पाठः । अत्र एकत्वासम्भावात् इत्यनन्तरम् 'एकत्वम्' इति पदे अध्याहार्यमाणेऽर्थः समीचीनो भवति । तथा हि 'न असति सामान्ये व्यक्तीनामिव व्यक्तिहेतूनाम् एकत्वम् व्यक्तिकार्याणामपि परस्परव्यावृत्तानामेकत्वासम्भवात्' इत्यर्थः–सम्पादकः । १० अत्रा०–कं.

## न्यायकन्दली

यद्येकहेतुत्वादेकत्वम्, भिन्न[1]कारणप्रभवाणां व्यक्तीनामेकत्वं न स्यात् । दृश्यते चाभिन्नस्वभावानामपि कारणभेदो यथा वह्नेर्दारुनिर्मथनाद्विद्युत आदित्यगभस्तिक्षोभितात् सूर्यकान्तादपि मणेरुत्पत्तिः । एककार्यत्वादेकत्वे च विजातीयानामप्येकत्वापत्तिः, दृष्टा हि वाहदोहनादिक्रिया [2]गवादिव्यक्तीनामिव [3]महिष्यादिव्यक्तीनामपि । या च गौर्न दुह्यते न च वाह्यते सा गौर्न स्यात् ।

अपि च सामान्याभावे कोऽर्थः शब्दसंसर्गविषयः ? न तावत् स्वलक्षणम्, तस्य क्षणिकस्य सर्वतो व्यावृत्तस्य सङ्केतविषयत्वाभावात् । नापि विकल्पः शब्दार्थः, [4]तस्यापि क्षणिकत्वादसाधारणत्वाच्च । विकल्पाकारः शब्दार्थ इति चेत् ? किं विकल्पाकारो विकल्पव्यतिरिक्तः ? अव्यतिरिक्तो वा ? यदि भिन्नः, स किं सर्वविकल्पसाधारणः, किं वा प्रतिविकल्पं भिद्यते ? साधारणत्वे तावदेतस्य सामान्यादभेदः, यदि परम् ? तव ज्ञानधर्मोऽयमस्माकं चार्थधर्मं बहिर्मुखतया प्रतीयमानत्वादिति [5]न कश्चिद्विशेषः । यदि व्यतिरिक्तोऽयमाकारः प्रतिज्ञानं भिद्यते, अथवा ज्ञानादव्यतिरिक्त एव, उभयथापि न शब्दसंसर्गयोग्यता, ज्ञानवदशक्यसङ्केतत्वात् । [6]विकल्पः पारम्पर्येण तदुत्पत्तिप्रतिबन्धाद् बाह्यात्मतया स्वाकारमारोप्य विकल्पयति, तत्रायं शब्दसंसर्ग इति चेत् ? बाह्यत्वेनारोपितो विकल्पाकार [7]विकल्पैकाधीनस्वभावत्वाद्विकल्पे जायमाने जायमान इव, विनश्यति विनश्यन्निव प्रतीयमानः प्रतिविकल्पं भिन्न एवावतिष्ठते । न च भेदानु[8]पातिनी सङ्केतप्रवृत्तिरित्युक्तम् ।

अथोच्यते–यादृशमेको गोविकल्पे बाह्यात्मतया स्वप्रतिभासमारोपयति [9]गोविकल्पान्तरमपि तादृशमेवारोपयति, विकल्पाश्च प्रत्येकं स्वाकारमात्रग्राहिणो न परस्परा-

[कु०]

आकारे विकल्पाद्भिन्नः सर्वज्ञानसाधारण इति पक्षं दूषयित्वा अभेदपदो(दे?) साधारणत्वं सशंकमेवेति हृदि निधायोभयोरसाधार[ण]त्वे दूषणमाह–**यदि व्यतिरिक्तोऽयमिति** (कं. ३१८) **ज्ञानवदिति** (कं. ३१८) क्षणिकत्वेनेति शेषः । **पारम्पर्येण तदुत्पत्तिप्रतिबन्धादिति** (कं. ३१८)–बाह्यार्थममुच्छ(?) निर्विकल्प एकभावत्वम्, विकल्पस्य पारम्पर्येण बाह्यादुत्पत्तिस्तावन्मात्रसंबन्धात्स्वाकारं...बाह्यतया विकल्पो गोचरयतीति भावः ।

---

१ कारक–जे. १ । २ गवादीनामिव–जे. १, जे. ३; गवामिव–जे. ३ । ३ महिषीव्यक्तीनामपि–जे. १ जे. ३ । ४ तस्य–कं. १, कं. २ । ५ कश्चिद्विशेषः–कं. १, क. २ । ६ विकल्पपारम्पर्येण–जे. १ । ७ एकाधीन–कं. १, कं. २ । ८ पातिनि–कं. १, कं. २ । ९ विकल्पान्तरमपि–जे. ३ ।

## न्यायकन्दली

रोपितानामाकाराणां भेदग्रहणाय पर्याप्नुवन्ति, तस्योभयग्रहणाधीनत्वात् । तदग्रहणाच्च विकल्पारोपितानामाकाराणामेकत्वमारोप्य विकल्पानामेको विषय इत्युच्यते । तदेव च सामान्यं बहिरारोपितेभ्यो विकल्पाकारेभ्योऽत्यन्तभेदाभावेना[1]भावरूपं स्वलक्षणज्ञानतदाकारारोपितैश्चतुर्भिः सहाभिः समस्यार्द्धपञ्चमाकार इत्युच्यमानमारोपितबाह्य[2]त्वशब्दाभिधेयं शब्दसंसर्गविषयः । तदध्यवसाय एव स्वलक्षणाध्यवसायः, तदात्मतया तस्य समारोपात् । अन्यव्यावृत्तिस्वभावं भावाभावसाधारणं चेदम्, गौरस्ति नास्तीति प्रयोगात् । भावात्मकत्वे ह्यस्य गौरस्तीति प्रयोगासम्भवः, पुनरुक्तत्वात् । नास्तीति च न प्रयुज्यते, विरोधात् । एवं तस्याभावात्मकत्वे नास्तीति पुनरुक्तम्, अस्तीति विरुध्यते । यथोक्तम्–

[3]घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः ।
नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोः ॥ इति ।

एतस्मादेव च भिन्नानामपि व्यक्तीनामेकतावभासः । इदं हि सर्वेषामेव विकल्पानां विषयोऽस्य [4]चैकत्वाद्विकल्पानामप्येकत्वम् । [5]तेषामप्येकत्वाच्च तत्कारणानां [6]प्रतिपिण्डभाविनां निर्विकल्पकानामप्येकत्वम् । तेषामेकत्वाच्च तत्कारणानां व्यक्तीनामेकत्वावगमः । यथोक्तम्–

[कु०]

**आरोप्य विकल्पयतीति** (कं. ३१८) क्वा(?) निर्देशः कथमिति पर एव पृष्टव्याः । न हि क्षणिकस्य क्रमभाविव्यापारा त्वय (त्वयं) संभवः । [7]**विकल्पैकाधीनस्वभावादिति** (कं. ३१८) एकमेव विकल्प्यं प्रत्यसाधारणत्वादित्यर्थः । अपारमार्थिकस्वजन्मविनाशयोरसंभवाज्जायमानया इवेत्युक्तं **अत्यंतभेदाभावेनेति** (कं. ३१९) तद्धर्मितयाऽऽरोपितस्य तेभ्योऽत्यन्तमभेदेनेत्यर्थः । अर्थरूपं वाच्यरूपमेतच्च सामान्यमित्यस्य विशेषणं कथमस्य वाच्यमित्यत आह–**स्वलक्षणज्ञानतदाकारारोपितैरिति** (कं. ३१९) स्वलक्षणं ज्ञानं चानुभवविकल्परूपम्, उभयमप्याकारविकल्पस्यारोपितत्वं तस्यैव बाह्यत्वमिति । [8]**चतुर्भिः सहाभिसमस्य एकीकृत्यार्धपंचमाकार इति** (कं. ३१९) अर्ध-एकत्वरूपं सामान्यं पंचम आकारो यस्मिन्नध्यवसीयमाने तच्छब्दाभिधेयमित्यन्वय । **आरोपितबाह्यत्वं शब्देति** (कं ३१९) तु वचनं शब्दस्याप्येवंभूतसामान्यद्वारा वाचकत्वमिति दर्शयितुम् ।

---

१ नाभाव–कं. १, कं. २ । २ बाह्यत्वं–कं. १, कं. २ । ३ घटो नास्तीति–कं. १, कं. २ । ४ स्यैकत्वाद्–कं. १, कं २, जे. २ । ५ तेषामेकत्वात्–कं १, कं. २ । ६ 'प्रतिपिण्डभावानाम्' इति जे. १ पुस्तके नास्ति । ७ विकल्पाकार एकाधीनस्वाभावादिति कं । ८ समस्यार्धपं.–कं ।

न्यायकन्दली .

एकप्रत्यवमर्षस्य हेतुत्वाद्धीरभेदिनी ।
[1]एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता ॥ इति ।

एतदप्ययुक्तम्, विकल्पानुपपत्तेः । विकल्पाकाराणां भेदाग्रहणादारोपितमैक्यं सामान्यमाचक्षते भिक्षवः । अत्र ब्रूमः । किमाकाराणां भेदाग्रहणमेवाभेदसमारोपः ? आहोस्विदभेदग्रहणमभेदारोपः ? न तावदाद्यः कल्पः, भेद[2]समारोपस्यापि प्रसङ्गात् । यथा विकल्पाकाराणां भेदो न गृह्यते, तद्वदभेदोऽपि न गृह्यते । तत्र भेदाग्रहणादभेदारोपवदभेदाग्रहणाद् भेदारोपस्यापि प्रसक्तावभेदोचितव्यवहारप्रवृ[3]त्त्ययोगः । अभेदग्रहणमभेदारोप इत्यपि न युक्तम्, आत्मवादे एको ह्यनेकदर्शी तेषां भेदाभेदौ प्रत्येति । नैरात्म्यवादे नैकोऽनेकार्थद्रष्टा न कश्चिदस्ति, विकल्पानां प्रत्येकं स्वाकारमात्रनियतत्वात् । अस्तु वाऽनेकार्थदर्शी कश्चिदेकस्तथाप्येकं निमित्तमन्तरेण भिन्नेष्वाकारेषु नाभेदग्रहणमस्ति । भवद्वा गवाश्वमहिषाद्याकारेष्वपि भवेदविशेषात् ।

[263] गवाकारेष्वप्यगोव्यावृत्तिरेकं निमित्तमस्तीति चेत् ? के पुनरगावो यद्व्यावृत्त्या गवाकारेष्वेकत्वमारोप्यते ? ये गावो न भवन्ति तेऽगाव इति चेत् ? गावः के ? ते ये[4]ऽगावो न भवन्ति ते गाव इति चेत् ? [5]गवां स्वरूपे निरूपिते तद्व्यावृत्तत्वेनागवां स्वरूपं निरूप्यते, [6]अगवां च स्वरूपे निरूपिते तद्व्यावृत्त्या गवां स्वरूपनिरूपणमित्येकाप्रतिपत्तावितराप्रतिपत्तेरुभयाप्रतिपत्तिः । यथाह तत्रभवान्–

[कु०]

नन्वध्यवसायमान इत्युक्तं कोऽयमध्यवसाय इत्यत आह–**अन्यव्यावृत्तिस्वभावमिति** (कं. ३१९) भावत्वे च प्रभावरूपत्वे व (च) बाधकमभवादिति शेषः । तदेव बाधकमाह–**भावाभावेति** (कं. ३१९) अभावतयापि पारमार्थिकत्वं निराकर्तुमुभयसाधारण्यमुक्तम्, न केवलं सामान्यमेव । अपरमार्थसत्कर्तुः कारकव्यापारमारभ्य विजातीयसंतानोत्पादाद्यदिदमेकत्वम् लौकिकानामनुपपत्तेरित्यर्थः । पूर्वपूर्वविकल्पजनितवासनासंविलीनस्योत्तरोत्तरविकल्पस्योत्पत्तेरेकानेकद्रव्याणि [भविष्य](यं)तीत्यत आह–[7]**अस्तु तावदिति** (कं. ३१९) ।

[263] परमतमाशंकते **गवाकारेष्विति** (कं. ३२०) गूढाभिसन्धेः पृच्छति **के पुनरिति** (कं. ३२०) अभिसंधिमविदुषनुत्तरं या (ये) **गावो न भवती(न्ती)ति** (कं. ३२०) । पुनः पृच्छति **गावः क इति** (कं. ३२०) उत्तरं त इति (कं. ३२०) । अभिसंधिमुद्घाटयति **गवाश्वरूपे निरूपिते इति** (कं. ३२०) ।

---

१ एकधीहेतु–जे. २ । २ समारोपितस्य–कं. १, कं. २ । ३ त्ययोगात्–कं. १, कं. २ । ४ येऽगावो न भवन्तीति चेत्–कं. १, कं. २ । ५ गवाश्वस्वरूपे–कं. १, कं. २ । ६ अगवां–कं. १, कं. २ । ७ अस्तु वेति कं ।

## न्यायकन्दली

[1]सिद्धश्चागौरपोह्येत गोनिषेधात्मकश्च सः ।
तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते ।
गव्यसिद्धे त्वगौर्नास्ति तदभावे तु गौः कुतः ।। इति

अथान्यापोहः [2]शब्दार्थोऽनारोपितबाह्यात्वम् ? तत्राप्युच्यते, कोऽयमपोहो नाम ? किमगोरपोहो भावोऽभावो वा ? यदि भावः, स किं गोपिण्डस्वभावोऽथागोपिण्डात्मकः ? गोपिण्डात्मकत्वे तावदस्यासाधारणता, न चासा[3]धारणेऽर्थे शब्दप्रवृत्तिरित्युक्तम् । अगोपि[4]ण्डात्मकत्वेऽप्ययमेव दोषो दूषणान्तरं चैतदधिकम् । यद् गो[5]शब्दस्यागौरित्ययमर्थः प्राप्नोति । यदि तु पिण्डव्यतिरिक्तमनेकसाधारणं वस्तुभूतमपोहतत्त्वमिष्यते ? शब्दमात्रविषया विप्रतिपत्तिः । अथापोहोऽन्यव्यावृत्तिरूपत्वादभावस्वभाव इष्यते ? तदास्य प्र[6]त्यक्षेण ग्रहणं न स्यात्, ज्ञानजनकस्यैव ग्राह्यलक्षणत्वात् । अभावस्य च समस्तार्थक्रियाविरहलक्षणत्वात् । न च प्रत्यक्षागृहीतेऽर्थे सङ्केतग्रहणमस्तीत्यभावे शब्दस्याप्रवृत्तिरेव । न च तस्मिन् प्रतीयमाने श्रोतुरर्थविषया प्रवृत्तिः स्यात्, भावाभावयोरन्यत्वादसम्बन्धाच्च ।

स्वलक्षणात्मकत्वेनाभावप्रतीतावविवेकेन स्वलक्षणे प्रवृत्तिरिति चेत् ? [7]यथोक्तं दृश्यविकल्प्यावर्थावेकीकृत्यातत्सन्निवेशिन्या भ्रान्त्या प्रवृत्तिः प्रतिपत्तॄणाम् इति । तदयुक्तम् । अप्रतीते तदा[8]त्मकतया अभावसमारोपानुपपत्तेः । न च श्रोतुस्तदानीमर्थप्रति-

[कु०]

**किं(किम)गौरपोह इति** (कं. ३२०) गोशब्दार्थतया स्वीकृतोऽपोह इ[त्य]र्थः । **अयमेवेति** (कं. ३२०) असाधारणत्वमेवेतीत्यर्थः । **अगौरित्ययमर्थ इति** (कं. ३२०) अश्वादिरयमित्यर्थः । द्वितीयपक्षमनूद्य दूषयति **अथापोह इति** (कं. ३२०) **अभावस्वभावेति** (कं. ३२०) तश्च(च्च) ज्ञानकारणत्वाभावाद् बाह्यलक्षणत्वं नोपपद्यत इति भावः ।

---

१ सिद्धश्चा इति पाठोऽर्थदृष्टया समीचीन इति कं. २ पुस्तकसम्पादकस्य सूचनं स्वीकृत्य पाठोऽयं स्वीकृतः–सं । २ शब्दार्थे–जे. ३ । ३ साधारणात्मके–कं. १, कं. २ । ४ पिण्डात्मके–कं. १, कं. २ । ५ गोशब्दस्य गौरित्ययमर्थो न प्राप्नोति–कं. १, कं. २ । ६ प्रत्ययत्वेन–कं. १, कं. २ । ७ यथोक्तं–कं. १ पुस्तके नास्ति, कं. २ पुस्तके सम्पादकेन सूचितौ द्वावपि पाठौ जे. १, जे. २, जे. ३ पुस्तके चास्ति । अधिकं तु अतत्सन्निवेशिभ्योऽपि इति पाठान्तरं जे. १ पुस्तके, तत्तु जे. २ पुस्तके, कं. १, कं. २ पुस्तकयोश्चोपलभ्यते । ८ तदात्मतया–जे. १, जे. २ ।

न्यायकन्दली

पत्तिरस्ति शब्दस्यातद्विषयत्वात् प्रमाणान्तरस्याभावात् । अस्ति च शब्दा[1]दर्थप्रतिपत्तिस्तस्मान्नाभावोऽपि शब्दार्थः । न चान्यदेकं निमित्तं किञ्चिदस्ति । सर्वमिदमर्थजातं परस्परव्यावृत्तं प्रतिक्षणम[2]पूर्वमनुभूयमानं न शब्दात् प्रतीयते । नापि प्रत्य[3]क्षप्रतीतमपि हानोपादानविषयो भवेत्, अपरिज्ञातसामर्थ्यत्वात् । अस्ति च शाब्दो व्यवहारः, अस्ति च प्राणभृन्मा[4]त्रानुबन्धिनी प्रत्यक्षपूर्विका हिताहितप्राप्तिपरिहारार्था लोकयात्रा । सैव च भिन्नासु व्यक्तिषु सामान्यमेकं व्यवस्थापयति । [5]तद्विषया शब्दप्रवृत्तिर्यच्चोपलभ्यते तज्जातीयत्वेन तदर्थ[6]क्रियायोग्यतां विनिश्चित्यापूर्वाविगतेऽप्यर्थे लोकः प्रवर्तत इति ।

भिन्नेष्वनुगताकारा बुद्धिर्जातेर्निब[7]न्धनम् ।
अस्या [8]अभावे नैवेयं लोकयात्रा प्रवर्तते ॥ इति ।

इति भट्टश्रीश्रीधरविरचितायां पदार्थ[9]प्रवेशकन्यायकन्दलीटीकायां सामान्यपदार्थः समाप्तः ॥

[कु०]

नन्वप्रत्यक्षेऽपि शक्रादौ संक(के)तो दृश्यते तद्वदत्रापि भविष्यतीत्यत आह–**न च तस्मिन्निति** (कं. ३२०)। ननु शब्दोऽभावमेव प्रत्याक्षय (?) तु तत्रैव प्रवर्तमानः पुरुषो नांतरीयकतयाऽभावं प्रत्यास्यतीत्यत आह–**असंबन्धाच्चेति** (कं. ३२०) असम्बन्धमाशंक[ति] **स्वलक्षणात्मकत्वेनेति** (कं. ३२०) अनारोपितस्य लक्षणतादात्म्येनेत्यर्थः । **अप्र[ती]त इति** (कं. ३२०) तादात्म्यारोपा हि अधिष्ठानप्रतीतिपूर्वक एव भवतीत्यर्थः । सामान्यमंगीकुर्वतः संकेतामपपत्तिमुपसंहरति **सर्वमिदमिति** (कं. ३२०) अपरिज्ञात–**सामर्थ्यत्वादिति** (कं. ३२१) सामान्यानंगीकारे तज्जातीयलिंगानुसां-(सं)धानविरहादित्यर्थः ।

॥ [इति] सामान्यम् ॥

१ दर्थे प्रवृत्तिः–कं. १, कं. २, जे. २ । २ मपूर्वमपूर्वं–कं. १, क. २ । ३ प्रत्यक्षा–कं. १, कं. २ । ४ मात्रानुवर्तिनी । ५ यद्विषयाः शब्दात् प्रत्ययाः प्रवृत्तयश्चोपलभ्यन्तं–कं. १, कं. २ । ६ क्रियोप–कं. १, कं. २ । ७ निबन्धना–कं. १, कं. २ । ८ प्रभावेणैवेयं–जे. १ । ९ प्रवेश–कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

## अथ विशेषपदार्थनिरूपणम्

[264] [1]अन्तेषु भवा अन्त्याः, स्वाश्रयविशेषकत्वाद्विशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमाना अत्यन्तव्यावृत्तिबुद्धिहेतवः ।

यथास्मदादीनां गवादिष्वश्वादिभ्यस्तुल्याकृतिगुणक्रियावयवसंयोगनिमित्ता प्रत्ययव्यावृत्तिर्दृष्टा गौः शुक्लः शीघ्रगतिः [2]पीनः ककुद्मान् महाघण्ट इति । तथास्मद्वि-

न्यायकन्दली

[264] चतुर्युगचतुर्विद्याचतुर्वर्णविधायिने ।
नमः पञ्चत्वशून्याय चतुर्मुखभृते सदा ॥

विशेषव्याख्यानार्थमाह–अन्तेषु भवा अन्त्या इति । उत्पादविनाशयोरन्तेऽवस्थितत्वादन्तशब्दवाच्यानि नित्यद्रव्याणि, तेषु भवाः स्थिता इत्यर्थः । स्वाश्रयस्य सर्वतो विशेषकत्वाद् भेदकत्वाद्विशेषाः । एतद्विवृणोति–वि[3]नाशारम्भरहितेष्वित्यादिना । विनाशारम्भरहितेष्वित्यन्त्यपदस्य विवरणम् । अत्यन्तव्यावृत्तिबुद्धिहेतव इति च स्वाश्रयस्य विशेषकत्वादित्यस्य विवरणम् । प्रतिद्रव्यमेकैकशो वर्तमाना इति । द्रव्यं द्रव्यं प्रत्येकैको विशेषो वर्तत इत्यर्थः । एकेनैव विशेषेण [4]स्वाश्रयस्य व्यावृत्तिसिद्धेरनेकविशेषकल्पनावैयर्थ्यात् । यथा चेदं विशेषाणां लक्षणं भवति तथा [5]पूर्वं व्याख्यातम् ।

[पं०] [264] (अत्यं)तव्यावृत्तिस्वभावत्वादिति (कं. ३२४.१०) व्याख्यानपदम् । अत्र च वाक्येऽयं भावार्थः–अन्त्यविशेषा अत्यन्तव्यावृत्यात्मका अतस्तेषु स्वत एव प्रत्ययव्यावृत्तिर्न विशेषान्तरसम्बन्धात् । यथा प्रदीपे

[कु०] [264] नन्वन्तो नाम विनाशः, तत्र च निवृत्तकार्याऽवयव (वा) एव भवन्ति, न च ते विशेषा इत्यत आह–उत्पादविनाशयोरिति (कं. ३२३) इहैकैकवा (शः) इति (कं. ३२३) यद्येकस्मिन्नित्ययमर्थः स्यात्, तत एकस्मिन्द्रव्येऽनेके विशेषाः प्रसज्येरन्नित्यत आह–एकैक इति (कं. ३२३) प्रथमासमर्थाच्छसि(दि)त्यर्थः । व्यासज्यवृत्तिरत्यंतव्यावृत्ति-

१ अन्त्येषु–दे । २ पीन–कं. १, कं. २ । ३ प्रतीकमिदं–जे. १ पुस्तके नास्ति । ४ स्वाश्रयव्यावृत्ति–जे. ३ । ५ पूर्वमेव व्याख्यातम्–जे. २ ।

प्रशस्तपादभाष्यम्

शिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममनस्सु चान्यनिमित्तासम्भवाद् येभ्यो निमित्तेभ्यः प्रत्याधारं [1]विलक्षणोऽयं विलक्षणोऽयमिति प्रत्ययव्यावृत्तिः, देशकालविप्र[2]कर्षदृष्टे च परमाणौ स एवायमिति प्रत्यभिज्ञानं च भवति, तेऽन्त्या विशेषाः ।

यदि पुनरन्त्यविशेषमन्तरेण योगिनां योगजाद्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं च स्यात् ? ततः [3]किं स्यात् ? नैवं भवति । यथा न योगजाद्धर्मादशुक्ले

न्यायकन्दली

सिद्धे विशेषसद्भावे तेषां लक्षणाभिधानं युक्तं नासिद्धे, इत्याशङ्क्य विशेषाणां सद्भावं प्रतिपादयितुं ग्रन्थमवतारयति–यथेत्यादिना । यथा गवादिष्वश्वादिभ्यस्तुल्याकृतिनिमित्ता गौरिति, गुणनिमित्ता शुक्ल इति, क्रियानिमित्ता शीघ्रगतिरिति, अवयवनिमित्ता [4]पीन इति ककुद्मानिति, संयोगनिमित्ता महाघण्ट इति, [5]यथा अस्मदादीनां प्रत्ययव्यावृत्तिर्दृष्टा । तथास्मद्विशिष्टानां योगिनां तुल्याकृतिगुणक्रियेषु तुल्याकृतिषु तुल्यगुणेषु तुल्यक्रियेषु परमाणुषु मुक्तात्ममनस्सु चान्यनिमित्तासम्भवाद्येभ्यो निमित्तेभ्यः प्रत्याधारमयमस्माद्विलक्षण इति प्रत्ययव्यावृत्तिर्भवति तेऽन्त्या विशेषाः ।

यथास्मदादीनां गवादिव्यक्तिषु [6]प्रत्ययभेदो भवति, तथा परमाण्वादिष्वपि तद्दर्शिनां परस्परापेक्षया प्रत्ययभेदेन भवितव्यम्, [7]व्यक्तिभेदस्य सम्भवात् । न चास्य व्यक्तिभेद एव निमित्तम् । तदुपलम्भेऽपि स्थाण्वादिषु संशयदर्शनात् । निमित्तान्तरं

[पं०]

प्रकाशात्मके स्वत एव प्रकाशो न प्रदीपान्तरात् यथा वाऽश्वमांसे स्वत एवाशुचित्वम् । ये च परमाणवोऽतदात्मका अत्यन्तव्यावृत्त्यनात्मकाऽसाधारणधर्माणस्तेषु विशेषयोगादेव प्रत्ययव्यावृत्तिर्यथाऽप्रकाशात्मकेषु घटादिषु प्रदीपादेव

[कु०]

बुद्धिहेतव इति (कं. ३२३) अनेनैव निषिद्धा । पीनः ककुद्मानित्युदाहरणं द्वयं[क]कुद्श्रृंगवत्संयोगित्वनिवृत्तये हेत्वसिद्धिमाशंक्य परिहरति यथाऽस्मदादीनामिति (कं. ३२३) व्यक्तिभेदस्य संभवादिति (कं. ३२३) हेतु सिद्धिः(द्धेः)

१ विलक्षणोऽयमिति–दे । २ विप्रकर्षे–कं. १, कं. २, विप्रकृष्टदृष्टे–व्यो. (६९४), विप्रकृष्टे–पा. ७ पु । ३ को दोषः–व्यो. (६९४)दे पुस्तकेऽयं पाठो नास्ति । ४ पीनककुद्मान्–कं. १, कं. २ । ५ 'यथा'–कं. १, कं. २ पुस्तकयोर्नास्ति । ६ प्रत्ययव्यावृत्तिः–जे. २ । ७ व्यक्तिभेदसम्भवात्–कं. १, कं. २; व्यक्तिभेदस्य सद्भावात्–जे. २ ।

प्रशस्तपादभाष्यम्

शुक्लप्रत्ययः सञ्जायते, अत्यन्ता[1]दृष्टे च प्रत्यभिज्ञानम् । यदि स्यान्मिथ्या भवेत् । तथेहाप्यन्त्यविशेषम[2]न्तरेण योगिनां न योगजाद्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं वा भवितुमर्हति ।

अथान्त्यविशेषेष्विव परमाणुषु कस्मान्न स्वतः प्रत्ययव्यावृत्तिः कल्प्यत इति चेत् ? न, तादात्म्यात् । इहातदात्मकेष्वन्यनिमित्तः प्रत्ययो [3]भवति यथा घटादिषु

न्यायकन्दली

च नास्ति, आकृतेर्गुणस्य क्रियायाश्च तुल्यत्वात् । न च निर्निमित्तः प्रत्ययभेदो दृष्टः, तस्माद्यदस्य निमित्तं स विशेष इति । देशविप्रकर्षेण कालविप्रकर्षेण च दृष्टाः परमाणवः कस्यचित्प्रत्यभिज्ञाविषयाः सामान्यविशेषवत्त्वाद् घटादिवत् । न च पूर्वदृष्टेऽर्थे प्रत्यभिज्ञानं विशेषावगतिमन्तरेण भवति, अतोऽस्ति तस्य निमित्तं विशेषः ।

अत्र चोदयति–यदि पुनरिति । यथा योगजधर्मसामर्थ्याद्योगिनामतीन्द्रियार्थदर्शनं भवति, तथा विशेषमन्तरेणैव प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं च भविष्यतीति चोदनार्थः ।

समाधत्ते–नैवमिति । यथा योगिनामशुक्ले शुक्लप्रत्ययो न भवति, अत्यन्तादृष्टे च प्रत्यभिज्ञानं न स्यात् । यदि स्यात् ? मिथ्याप्रत्ययो भवेत् । तथा अन्त्यविशेषमन्तरेण प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं च न भवितुमर्हति । योगजाद्धर्मादतीन्द्रियार्थदर्शनं न पुनरस्मान्निर्निमित्त एव प्रत्ययो [4]भवतीत्यभिप्रायः ।

[पं०]

प्रकाशो न स्वतो यथा वाऽश्वमांसस्प्रष्टृणाम् (अ)श्वमांसस्पर्शादेवाऽशुचित्वं न स्वतः । सामान्यधर्मकेष्विति (कं. ३२४.१२) तुल्याकृतिगुणत्वादिति हेतुः ।

[कु०]

सिद्धसाधनत्वमाशंक्य निराकरोति–न चास्येति (कं. ३२३) सामान्यविशेषवत्त्वाविति (कं. ३२३) प्रमेयत्वादित्यर्थः । प्रत्येकमनुवर्तन्त इति (कं. ३२४) नित्यतया वर्तन्त इत्यर्थः ।

---

१ दृष्टपूर्वे–दे । २ मन्तरेण न योगजाद्–व्यो. (६९४) ३ दृष्टो–व्यो. (६९५) । ४ भविष्य–कं. १, कं. २ ।

प्रशस्तपादभाष्यम्

प्रदीपात्, न तु प्रदीपे प्रदीपान्तरात् । [1]यथा वाश्वमांसादीनां स्वत एवाशुचित्वं तद्योगादन्येषाम्, तथेहापि तादात्म्यादन्त्यविशेषेषु स्वत एव प्रत्ययव्यावृत्तिः, तद्योगात् [2]परमाण्वादिष्विति ।

इति प्रशस्तपादभाष्ये विशेषपदार्थः समाप्तः ।

न्यायकन्दली

पुनश्चोदयति–अथान्त्यविशेषेष्विति । न तावदन्त्यविशेषेष्वपि विशेषान्तरसम्भवोऽनवस्थानात् । यथा च तेषु विशेषान्तरमन्तरेण स्वत एव प्रत्ययव्यावृत्तिर्भवति योगिनां तथा परमाणुष्वपि भविष्यति ? किं विशेषकल्पनयेत्यत्रोत्तरमाह–नेति ।

यत्त्वयोक्तं तन्न, कुतस्तादात्म्यात् । एतदेव विवृणोति–इहेति । अतदात्मकेष्वन्यनिमित्तः प्रत्ययो भवति, न तदात्मकेषु । यथा घटादिष्वप्रकाशस्वभावेषु प्रदीपादेः प्रकाशस्वभावात् प्रकाशो भवति, न तु प्रदीपे प्रदीपान्तरात् प्रकाशः किन्तु स्वत एव । [3]यथा वाश्वमांसादीनां स्वत एवाशुचित्वम्, स्प्रष्टुः प्रत्यवायकरत्वं तद्योगात् । तत्सम्बन्धादन्येषामशुचित्वम् । तथेहापि तादात्म्यादत्यन्तव्यावृत्तिस्वभावत्वादन्त्यविशेषेषु स्वत एव स्वरूपादेव प्रत्ययव्यावृत्तिर्न [4]विशेषान्तरसम्बन्धात् । अतदात्मकेषु तु [5]परमाण्वादिषु [6]साधारणधर्मकेषु विशेषयोगादेव प्रत्ययव्यावृत्तिर्युक्ता न स्वरूपमात्रादिति ।

नित्यद्रव्येषु सर्वेषु परस्परसधर्मसु ।
प्रत्येकमनुवर्तन्ते विशेषा भेदहेतवः ॥

इति भट्टश्रीश्रीधरकृतायां पदार्थप्रवेशन्यायकन्दलीटीकायां
विशेषपदार्थः समाप्तः ॥

[पं०] इति मलधारी श्री शिडिलकसूरिशिष्य श्रीराजशेखरसूरिविरचितायां
श्रीन्यायकन्दलीपञ्जिकायां विशेषपदार्थः समाप्तः ।

[कु०] ॥ [इति] विशेषाः ॥

---

१ यथा गवाश्व–कं. १, कं. २ । २ परमाणुषु–व्यो. (६९५) । ३ यथा गवा–कं. १, कं. २ । ४ सम्भवात्–कं. १, कं. २ पुस्तकस्य सम्पादकेन सूचितः पाठः जे. १, जे. २, जे. ३ पुस्तकेष्वस्ति । ५ परमाणुषु–कं. १, कं. २ । ६ सामान्य–कं. १, कं. २ ।

**प्रशस्तपादभाष्यम्**

## अथ समवायपदार्थनिरूपणम्

**[265] अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इह प्रत्यय[1]हेतुः स समवायः । द्रव्यगुणकर्मसामान्यविशेषाणां कार्यकारणभूतानामकार्यकारणभूतानां वायुतसिद्धानामाधार्याधारभावेनावस्थितानामिहेदमिति बुद्धिर्यतो भवति, यतश्चासर्वगतानामधिगतान्यत्वानाम[2]विष्वग्भावः स समवायाख्यः सम्बन्धः ।**

**न्यायकन्दली**

[265] [3]तुभ्यं भव भिदे विश्वसंहारोत्पत्तिहेतवे ।
निर्मलज्ञानदेहाय नमः सोमाय शम्भवे ॥

**[4]समवायनिरूपणार्थमाह–अयुतसिद्धानामाधार्याधार[5]भूतानां यः सम्बन्ध इह प्रत्ययहेतुः स समवायः । तदेतत्कृतव्याख्यानमुद्देशावसरे । के ते अयुतसिद्धा येषां सम्बन्धः समवायो भवेत् ? अत आह–द्रव्यगुणकर्मसामान्यविशेषाणामिति । कार्यकारणभूता-**

[टि०] (॥ अथ समवायपदार्थनिरूपणम् ॥)

[265 to 270] [6]**अबाधितेहप्रत्ययत्वाद्** इति:–ग्रामारामान्तरालं [7]दूरादपश्यत 'इह ग्रामे [8]द्रुमाः' इति प्रत्ययः सम्बन्धमन्तरेणापि स्यात् तद्व्यवच्छेदार्थम् अबाधितेति विशेषणम् । नन्विह तन्तुषु पट इत्यादि

[पं०] [265 to 270] अथ समवायपदार्थे उद्देश्यावसरे द्रव्यपदार्थस्याभेदा **अवयवावयविनामिति** (कं. ३२५.१३) अत्र द्वन्द्वः । अवयवाः कारणम्, अवयवी कार्यः । **अनित्यद्रव्यतद्गुणानामिति** (कं. ३२५.१३) (अ)नित्यद्रव्याणि द्व्यणुकादीनि तद्गुणाश्च रूपादयः । अनित्यद्रव्याणि च तद्गुणाश्च अनित्यद्रव्यतद्गुणाः तेषाम् । अत्रापि कारणानि अनित्यद्रव्याणि, कार्याणि तु रूपादीनि । **नित्यद्रव्यतत्समवेतां [ नाम ] नित्यगुणानामिति** (कं. ३२५.१४) नित्यद्रव्याण्यात्मादीनि, तत्समवेताश्चानित्यगुणा बुध्यादयः । नित्यद्रव्याणि च तत्समवेता अनित्यगुणाश्चेति पूर्ववत् द्वन्द्वः ।

[कु०] [265] नन्वनियमकथनमित्युक्तं किं सर्वदैवानियमः, तथा सति विशेषाणामेव कार्यकारणभूतानां समवायः, तेषामेवाकार्यकारणभूतानामपि स्यात्, तथा च विरोधः स्यादित्यतो विषयव्यवस्थानियम आह–**अवयवावयविनामिति** (कं. ३२५) **अयुतसिद्धिनामिति नियम इति** (कं. ३२५) संयोगाद् व्यावर्तकधर्म इति भावः । [9]**आधार्याधारभूतानामि-**

---

१ हेतुः समवायः–दे । २ अविष्वग्भावेनावस्थितानाम–व्यो. (६९४) । ३ अन्तर्ध्वान्त–कं. १, कं. २ । ४ अथ समवाय–जे. १ । ५ भूतानां कार्यकारणभूतानामकार्यकारणभूतानां यः–कं. १, कं. २ । ६ अवधारितप्रत्ययत्वाद् मु., अबाधितनेहप्रत्ययत्वाद्–जे. १, २, ३ । ७ दूरादपदशत – अ, दूरादपशत – ब, क । ८ क्रमाः – अ । ९ आधार्याधारभावेनावस्थितानामित्यपीती – कं ।

प्रशस्तपादभाष्यम्

कथम् ? यथेह कुण्डे दधीति प्रत्ययः सम्बन्धे सति दृष्टः, तथेह तन्तुषु पटः, [1]इह वीरणेषु कटः, इह द्रव्ये गुणकर्मणी, इह द्रव्यगुणकर्मसु सत्ता, इह द्रव्ये द्रव्यत्वम्, इह गुणे गुणत्वम्, इह कर्मणि कर्मत्वम्, इह नित्यद्रव्येऽन्त्या विशेषा इति प्रत्यय-दर्शनादस्त्येषां सम्बन्ध इति ज्ञायते ।

न्यायकन्दली

नामकार्यकारणभू[2]तानामित्यनियमकथनम् । अवयवावयविनामनित्यद्रव्यतद्गुणानां नित्यद्रव्यतत्सम[3]वेतानां नित्यगुणानां कर्मतद्वतां कार्यकारणभूतानां समवायः, नित्य-द्रव्यतद्गुणानां सामान्यतद्वतामन्त्यविशेषतद्वतां चाकार्यकारणभूतानां समवायोऽयुत-सिद्धानामिति नियमः । एवमाधार्याधारभावेनावस्थितानामित्यपि नियम एव । इहेद-मिति बुद्धिर्यतः कारणाद्भवति यतश्चासर्वगतानां नियतदेशावस्थितानामधिगतान्यत्वा-नामधिगतस्वरूपभेदानामविष्वग्भावोऽपृथग्भावोऽस्वा[4]तन्त्र्यं स समवायः, भिन्नयोः परस्परोपश्लेषस्य सम्बन्धकृतत्वोपलम्भात् ।

[टि०]

प्रत्ययाना[5]मवयवावयव्यादि[6]तादात्म्यसम्बन्धनिमित्तत्वाभ्युपगमात् सिद्धसाधनमिदम् ? नैवम्, भिन्नसम्बन्धिद्वय-स्वीकारे तादात्म्यं समवायपर्याय एव स्यात् । अथाभिन्नौ सम्बन्धिनावेव तादात्म्यं तर्ह्यभिन्नयोः सम्बन्धाभावे 'न' [7]सिद्धसाधनता, सम्बन्धस्य सम्बन्धिद्वयाधारत्वादिति ॥ छ ॥

[पं०]

अत्र कारणानि आत्मादी[नि], कार्यं बुद्ध्यादयः । **कर्मतद्वतामिति** (कं. ३२५.१४) कर्माणि च उत्क्षेपणादीनि तद्वन्तश्च कर्मवन्तः, तेषां कर्मतद्वताम् । अत्रापि कारणानि कर्माणि कार्यास्तद्वन्तः । **कार्यकारणभूतानामिति** (कं. ३२५.१४) कारणकार्यभूतानामित्यर्थः । अल्पस्वरत्वात्तु कार्यशब्दस्य पूर्वनिपातः । **नित्यद्रव्यतद्गुणानामिति** (कं. ३२५.१५)

[कु०]

**स्योति** (कं. ३२५) साधारणतयाऽयमपि संयोगाद् व्यावर्तको धर्म इत्यर्थः । **यतश्चेति** (कं. ३२५) भाष्यं लक्षणपरं द्रष्टव्यम् । **एतदेवेति** (कं. ३२५) प्रमाणदर्शनेनेति शेषः ।

---

१ इह तन्तुषु पटः, इह द्रव्ये द्रव्यगुणकर्माणि । २ मिति नियम–कं. १, कं. २ । ३ समवेतानामनित्य–कं. १, क. २, जे. १ । ४ अस्वातन्त्र्य समवायः–जे. १ जे. २, जे. ३ । ५ मवयव्यादि–अ । ६ तादात्म्यं–ड । ७ साधनता–ड ।

### प्रशस्तपादभाष्यम्

[266] न चासौ संयोगः, सम्बन्धिनामयुतसिद्धत्वात्, अन्यतरकर्मादि[1]निमित्तासम्भवात्, विभागान्तत्वादर्शनात् अधि[2]करणाधिकर्तव्ययोरेव भावादिति ।

### न्यायकन्दली

एतदेव कथमित्यादिना प्रश्नपूर्वकमुपपादयति—यथा इह कुण्डे दधीति प्रत्ययः कुण्डदध्नोः सम्बन्धे सति दृष्टः तथेह तन्तुषु पट इत्यादिप्रत्ययानां दर्शनादस्त्येषां तन्तुपटादीनां सम्बन्ध इति ज्ञायते । इह तन्तुषु पट इत्यादिप्रत्ययाः सम्बन्धनिमित्तका अ[3]बाधितेहप्रत्ययत्वात्, इह कुण्डे दधीतिप्रत्ययवत् ।

[266] नन्वयं संयोगो भविष्यतीत्यत आह—न चासौ संयोग इति । असौ [4]तन्तु-पटादीनां सम्बन्धो न संयोगो भवति, कुतः ? इत्यत्राह—सम्बन्धिनामयुतसिद्धत्वादिति । संयोगो हि युतसिद्धानामेव भवति । अयं त्वयुतसिद्धानामिति । तथा संयोगोऽन्यतर-कर्मज उभयकर्मजः संयोगजो वा स्यादिति । इह तु अन्यतरकर्मादीनां निमित्तानाम-भावो भावोत्पादककारणसामर्थ्य[5]भावित्वात् । संयोगस्य विभागान्तत्वं विभागवि[6]नाशित्वं दृश्यते न समवायस्य । संयोगः स्वतन्त्रयोरपि भवति, यथोर्ध्वावस्थितयोरङ्गुल्योः । अयं त्वधिकरणाधिकर्तव्ययोरेव भवति, तस्मान्नायं संयोगः, किन्तु तस्मात् पृथगेव ।

[पं०]

नित्यानि द्रव्याणि आप्यादिपरमाणवो नित्यतद्गुणास्तद्रूपादयश्चेति व्याख्येयम् । पार्थिवास्तु परमाणवः पार्थिव-रूपादयश्च पाकजोत्पत्तौ परावर्तनशीला इति अनित्या अतस्तेऽत्र न ग्राह्याः । ततश्च नित्यद्रव्याणि च नित्यतद्गुणाश्चेति द्वन्द्वः । अधिगतस्वरूपभेदानामि[ति] पटस्य अन्यस्वरूपं तन्तूनामन्यस्वरूपम् ।

परवाक्यं नन्वयं संयोगो भविष्यतीति (कं. ३२६.४) । इह त्विति (कं. ३२६.९) तन्तुपटादिसम्बन्धे । भावोत्पादेत्यादि (कं. ३२४.९) भावोत्पादः पदार्थोत्पत्तिः । विभागविनाश्यत्वमिति (कं. ३२६.१०) विभागेन

[कु०] [266] संयोगो हि युतसिद्धानामिति (कं. ३२६) व्यतिरेकव्याप्तिप्रदर्शनमेतत् । प्रयोगस्तु — अवयवावय-व्यादीनां परस्परसम्बन्धः संयोगो न भवति । अयुतसिद्धसंम्बन्धत्वात् । न यदेवं न तदेवम् । यथादधिकुण्डयोरिति । कथमन्यतरकर्मादीनामसंभव इत्यत आह—भावोत्पादकेति (कं. ३२६) भावित्वादिति (कं. ३२६) अभिव्यंग्यत्वेनो-त्पत्तिविरहादित्यर्थः । अत्रापि पूर्ववद् व्यतिरेकी प्रयोगः द्रष्टव्यः ।

---

१ निमित्तप्रत्ययाभावात्—दे । २ करणकर्तव्ययोरेव—दे । ३ अवधारित—कं. १, कं. २ । ४ तन्तुषु पटादीनां—जे. ३ । ५ भावितत्वात्—जे. ३ । ६ विनाश्यत्वं—कं.१,कं.२ ।

### प्रशस्तपादभाष्यम्

[267] **स च द्रव्यादिभ्यः पदार्थान्तरं भाववल्लक्षणभेदात्। यथा भावस्य द्रव्यत्वादीनां स्वाधारेषु आत्मानुरूपप्रत्ययकर्तृत्वात् स्वाश्रयादिभ्यः परस्परतश्चार्थान्तरभावः, तथा समवायस्यापि पञ्चसु पदार्थेष्विहेतिप्रत्ययदर्शनात् तेभ्यः पदार्थान्तरत्वमिति।**

### न्यायकन्दली

[267] एवं स्थिते समवाये तस्य द्रव्यादिभ्यो भेदं प्रतिपादयति–स च द्रव्यादिभ्यः पदार्थान्तरमिति। कुत इत्यत आह–भाववल्लक्षणभेदादिति। एतद्विवृणोति–यथेति। भाव इति [1]सत्तामहासामान्यमुच्यते। द्रव्यत्वादीत्यादिपदेन गुणत्वादिपरिग्रहः। यथा भावस्य स्वाधारेषु द्रव्यगुणकर्मसु आत्मानुरूपः प्रत्ययः सत्सदितिप्रत्ययः, द्रव्यत्वस्य स्वाश्रयेषु द्रव्येष्वा[2]त्मानुरूपः प्रत्ययः द्रव्यं द्रव्यमितिप्रत्ययः, गुणत्वस्य स्वाश्रयेषु गुणेष्वात्मानुरूपः प्रत्ययो गुण इति प्रत्ययः, कर्मत्वस्य स्वाश्रयेषु कर्मसु आ[3]त्मानुरूपः प्रत्ययः कर्मेतिप्रत्ययः, तस्य कर्तृत्वाद् भावद्रव्यत्वादीनां स्वाश्रयादिभ्यः परस्परतश्चार्थान्तरभावः, तथा समवायस्यापि पञ्चसु पदार्थेष्विहेति प्रत्ययदर्शनात् तेभ्यः पञ्चभ्यः पदार्थान्तरत्वम्।

[पं०]

विनाश्यत्वम्। **न समवायस्येति** (कं. ३२६.१०) समवायस्य विभागविनाश्यत्वं न दृश्यते विनाशकस्य विभागस्यैवाभावात्। **अधिकरणाधिकर्तव्ययोरिति** (कं. ३२६.११) आधाराधारयोः।

**यथा भावस्येत्यादि** (कं ३२६.२२) [गद्ये] यथेति पदस्य **अर्थान्तरभाव** (कं ३२७.२) इत्यनेन सह सम्बन्धः। अत्रैव वाक्ये ([4]इत्य) भावस्येति सत्तायाः। **कर्तृत्वादिति** (कं. ३२७.१) विधायित्वात्। **भावद्रव्यत्वादीनामिति** (क. ३२७.१) [अ]परसामान्यानाम्। **स्वाश्रयादिभ्य** (कं ३२७.१) इति द्रव्यगुणकर्मभ्यः। आदिग्रहणात् समवेतसमवायः। यथा (घ)टे रूपं समवेतं रूपं च रूपत्वं समवेतमिति। **परस्परतश्चेति** (कं. ३२७.२) यथा द्रव्यत्वात् पृथिवीत्वमर्थान्तरभूतं गुणत्वाद्रूपत्वमर्थान्तरभूतं कर्मत्वादुत्क्षेपणत्वमर्थान्तरभूतमितिभावः इति।

[कु०] [267] एवं साधितसद्भावस्य लक्षणेनैव सिद्धस्य संभेदसंभा(भवा?)वयत्वस्य सुग्रहत्वाय **प्रपंचपरं भाष्यमुपादाय** व्याचष्टे **एवं स्थित इति** (कं. ३२६) **अत आहेति** (कं. ३२६)।

---

१ सत्तासामान्य–कं. १, कं. २। २ स्वात्मा–जे. २। ३ कर्मत्वा–जे. २। ४ इत्य **इति निरर्थकमर्थ**-दृष्ट्या – स.।

## प्रशस्तपादभाष्यम्

[268] **न च संयोगवन्नानात्वम्, भाववल्लिङ्गाविशेषात् विशेषलिङ्गाभावाच्च । तस्माद्भाववत्सर्वत्रैक. समवाय इति ।**

[1]ननु यद्येकः समवायः? द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः सह सम्बन्धैकत्वात् पदार्थसङ्करप्रसङ्ग इति ।

## न्यायकन्दली

[268] **किमयमेक आहोस्विदनेक इत्यत्राह–न च संयोगवन्नानात्वमिति** । यथा संयोगो नाना, नैवं समवायः । कुत इत्यत्राह–**भाववल्लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च** । यथा सत्सदितिज्ञानस्य लक्षणस्य सर्वत्राविशेषादवैलक्षण्याद्विशेषे भेदे लक्षणस्य प्रमाणस्याभावाच्च सर्वत्रैको भावः, तद्वदिहेतिप्रत्ययस्य लक्षणस्य सर्वत्रावैलक्षण्याद् भेदे प्रमाणाभावाच्च सर्वत्रैकः समवाय इति । उपसंहरति–**तस्मादिति** ।

चोदयति–[2]**यद्येकः समवाय इति** । समवायस्यैकत्वे य एव द्रव्यत्वस्य पृथिव्यादिषु योगः, स एव गुणत्वस्य गुणेषु, कर्मत्वस्य च कर्मसु । तत्र यथा द्रव्यत्वस्य योगः पृथिव्यादिष्वस्तीति [तेषां द्रव्यत्वम्, तथा तद्योगस्य गुणादिष्वपि सम्भवात् [3]तेषामपि द्रव्यत्वम्] यथा च गुणत्वस्य योगो रूपादिष्वस्तीति रूपादीनां तथा,

**[पं०]**

[4]**सत्ता तद्योगस्यैति** (कं. ३२७.२३) द्रव्यत्वयोगस्य । **सम्बन्धान्त[रेणे]ति** (कं. ३२८.५) उक्त संयोगादिना । **संयोगस्यैकत्वेऽपीति** (कं. ३२८.१४) एकत्वं द्विष्ठत्वात् ।

**तदुत्पादे** इति (कं. ३२९.१४) संयोगोत्पादे । **सम्बन्धिनामिति** (कं. ३२९.१५) तन्तुपटादि । **उपपादितमिति** (कं. ३२९.१६) द्रव्यपदार्थे ।

परवाक्यं **किमसम्बन्धमेवे**(कं. ३२९.१८)त्यादि । **तस्य द्रव्याश्रितत्वादिति** (कं. ३२९.२०) संयोगा हि गुणः स च(द्रव्य)श्रयीति कृत्वा । **वृत्त्यन्तरमिति** सम्बन्धान्तरम् ।

**[कु०]** [268] एकत्वं प्रमाणविशेषः । प्रमाणं च समवाय एकः । अवांतरभेदलक्षणविरहित्वात् । सत्तावत् । **न समवायसद्भावमात्रेणेति** (कं. ३२८) एकस्याप्युपाधिभेदाद्भेदकत्वमिति भावः । **पुनश्चोदयतीति** (कं. ३२८)

---

१ यद्येकः समवायो ननु–दे । २ यद्येक–कं. १, कं. २ । ३ अत्र जे. १ पुस्तके लेखक दोषात् [ ] एतचिह्नान्तर्गतः पाठः पुनरावृत्तः । ४ तथा – कं. १ ।

प्रशस्तपादभाष्यम्

न, आधाराधेयनियमात् । यद्यप्येकः [1]समवायः सर्वत्र स्वतन्त्रः, तथाप्याधाराधेयनियमोऽस्ति । कथं द्रव्येष्वेव द्रव्यत्वम्, गुणेष्वेव गुणत्वम्, कर्मस्वेव कर्मत्वमिति ।

न्यायकन्दली

तद्योगस्य द्रव्यकर्मणोरपि भा[2]वात् तयोरपि गुणत्वं स्यात् । एवं च कर्मस्वपि पदार्थानां सङ्कीर्णता दर्शयितव्या ।

समाधत्ते–नेति । न च पदार्थानां सङ्कीर्णता, कुतः ? आधाराधेयनियमात् । न समवायसद्भावमात्रेण द्रव्यत्वम्, किन्तु [3]द्रव्यत्वसमवायाद् द्रव्यत्वम् तत् समवायश्च द्रव्येष्वेव न गुणकर्मसु, अतो न तेषां द्रव्यत्वम् । एवं गुणकर्मस्वपि व्याख्येयम् । एतत्सङ्ग्रहवाक्यं विवृणोति–यद्यप्येकः समवाय इत्यादिना । [4]स्वतन्त्र इति संयोगवत् सम्बन्धान्तरेण न वर्तत इत्यर्थः । व्यक्तमपरम् ।

पुनश्चोदयति–एवमादि कस्मादिति । द्रव्येष्वेव द्रव्यत्वं वर्तते, गुणेष्वेव गुणत्वम्, कर्मस्वेव कर्मत्वमित्येवमादि कस्मात् त्वया ज्ञातमित्यर्थः । उत्तरमाह–अन्वयव्यतिरेकदर्शनादिति । द्रव्य[5]त्वनिमित्तस्य प्रत्ययस्य द्रव्येष्वन्वयो गुणकर्मभ्यश्च व्यतिरेकः, गुणत्वनिमित्तस्य प्रत्ययस्य गुणेष्वन्वयो द्रव्यकर्मभ्यश्च व्यतिरेकः, तथा कर्मत्व-

[पं०]

**स्वत एवायमिति**–अयं समवायः । **कारणसमवायस्य कार्यलक्षणत्वादिति**–कार्यं कारणसमवेतं यथा पटस्तन्तुषु समवेतः । संयोगस्य कृतकत्वात्कार्यरूपः स च स्वोत्पादककारणे समवेत इति सम्बन्धरूपाभिवृत्त्यन्तरं समवायलक्षणमपेक्षते । समवायस्तु स्वयमेव वृत्तिरूपः इति न वृत्त्यन्तरमपेक्षते । [**नैवं**] **समवायस्य वृत्तिसम्भव इति**–इन्द्रियेण संयुक्तं वस्तु, तत्समवेता सत्ता इति संयुक्तसमवायादिन्द्रियेण ग्राह्या । [ तथा न समवायः । ] नहि

[कु०]

उपाधीनामप्याधारनियमे कारणं पृच्छतीत्यर्थः । **समवायविशेष** इति (कं. ३२८) अन्वयव्यतिरेकोऽपि किं कृत इति शंकार्थः । **संयोगस्यैकत्वेऽपीति** (कं. ३२८) वस्तुस्वभावकृत इत्युत्तरार्थः ।

---

१ समवायः स्वतन्त्रः तथाधारा–दे । २ सम्भवात्–जे. २ । ३ द्रव्यसमवायाद् द्रव्यत्वं समवायश्च द्रव्ये एव–कं. १, कं. २ । ४ स्वतन्त्रः–कं. १, कं. २ । ५ द्रव्यत्वमिति तस्य–जे. १ ।

### प्रशस्तपादभाष्यम्

एवमादि कस्मात् ? अन्वयव्यतिरेकदर्शनात् । इहेति समवाय[१]निमित्तस्य ज्ञानस्यान्वयदर्शनात् सर्वत्रैकः समवाय इति गम्यते । द्रव्यत्वादिनिमित्तानां व्यतिरेकदर्शनात् [२]प्रतिनियमो ज्ञायते ।

यथा कुण्डदध्नोः संयोगै[३]कत्वेऽपि भवत्याश्रया[४]श्रयिभावनियमः । तथा द्रव्यत्वादीना[५]मपि समवायैकत्वेऽपि व्यङ्ग्यव्यञ्जकशक्तिभेदादाधाराधेयनियम इति ।

### न्यायकन्दली

निमित्तस्य प्रत्ययस्य कर्मस्वन्वयो द्रव्यगुणेभ्यश्च व्यतिरेको दृश्यते, तस्मादन्वयव्यतिरेकदर्शनाद् द्रव्यत्वादीनां नियमो ज्ञायते । अस्य विवरणं सुगमम् ।

समवायाविशेषे कुत[६] एवायं नियमः द्रव्यत्वस्य पृथिव्यादिष्वेव समवायो गुणत्वस्य रूपादिष्वेव कर्मत्वस्योत्क्षेपणादिष्वेव नान्यत्र ? इत्यत आह–यथेति । संयोगस्यैकत्वेऽपि कुण्डदध्नोराश्रयाश्रयिभावस्य नियमो दृष्टः, शक्तिनियमात् । कुण्डमेवाश्रयो [७]दध्येवाधेयं न तु कुण्डमाधेयं दधि वाऽऽधारः । तथा समवायैकत्वेपि द्रव्यत्वादीनामाधाराधेयनियमो व्यङ्ग्यव्यञ्जकशक्तिभेदात् । किमुक्तं स्यात् ? द्रव्यत्वाभिव्यञ्जिका शक्तिर्द्रव्याणामेव, तेन द्रव्येष्वेव द्रव्यत्वं समवैति नान्यत्रेति । एवं गुणकर्मस्वपि व्याख्येयम् ।

[पं०]

समवायोऽपि समवायान्तरसमवेतः । भावग्रहणेत्यादि अत्र भावः सत्ता । सम्बन्धा[भावाभिधानं]प्रलाप इति यदि...... विषयज्ञानमैन्द्रियकं तदेन्द्रियसंयुक्तात्[त्व]स्यैवं सम्बन्धत्वात्कुतः सम्बन्धाभाव इत्यर्थः । तदेव वाच्यमिति संवेदनमेव वाच्यम् । कथमस्य संवेदनमित्यर्थः । अप्रत्यक्ष इति अनुमेयः । स्वातन्त्र्यप्रतिरोधक इति । अवि...(?) साध[न?]रूपत्वात् । इति समवायपदार्थः समर्थितः । तत्समर्थनाय च समर्थितेयं भट्ट श्रीधरविरचिता न्यायकन्दलीवृत्तिरिति ।

अथ भट्ट श्रीधरो ग्रन्थप्रशस्तिं प्रस्तौति–सुवर्णेत्यादि पद्यैः । अक्षीणनिजपक्षेष्विति अक्षीणनिजप्रतिज्ञेषु विद्वत्सु इति यावत् । अब्धुकेति अम्भोकेत्यपि पाठः । षट्पदार्थहितामिति तर्कपक्षे षट्भ्यः पदार्थेभ्यः द्रव्यगुणकर्मसामान्य-

---

१ निमित्तज्ञानस्य–दे । २ प्रतिनियमोऽपि विज्ञायते–दे । ३ कत्वे–कं. १, कं. २ । ४ श्रयिनियमः–दे: । ५ त्वादीनां समवायैकत्वे–दे । ६ कुत एव–जे. २ । ७ दध्येवाश्रयि एवं–कं. १, कं. २, जे. २ ।

### प्रशस्तपादभाष्यम्

[269] **सम्बन्ध्यनित्यत्वेऽपि न संयोगवदनि[1]त्यत्वं भाववदकारणत्वात् । यथा प्रमाणतः कारणानुपलब्धेर्नित्यो भाव इत्युक्तं तथा समवा[2]योऽपीति । नह्य[3]स्य किञ्चित् कारणं प्रमाणत उपलभ्यत इति ।**

[270] **कया पुनर्वृत्त्या द्रव्यादिषु समवायो वर्तते ? न संयोगः सम्भवति, तस्य गुणत्वेन द्रव्याश्रितत्वात् । नापि समवायस्तस्यैकत्वात् । न चान्या वृत्तिरस्तीति ।**

### न्यायकन्दली

[269] किं पुनरयमनित्य आहोस्विन्नित्यः ? इति संशये सत्याह–सम्बन्ध्यनित्यत्वेऽपीति । यथा सम्बन्धिनोरनित्यत्वे संयोगस्यानित्यत्वम् न, तथा समवायिनोरनित्यत्वे समवायस्यानित्यत्वं भाववदकारणत्वादिति । एतद्विवृणोति–यथेत्यादिना ।

युक्तो हि सम्बन्धिविनाशे संयोगस्य विनाशः, तदुत्पादे सम्बन्धिनोः समवायिकारणत्वात् । समवायस्य तु सम्बन्धिनौ न कारणम्, सम्बन्धिमात्रत्वात् । यथा[4] चैतौ न कारणं तथोपपादितम् । तस्मादेतस्य सम्बन्धिविनाशेऽप्यविनाशः, सत्तावदाश्रयान्तरेऽपि प्र[5]त्यभिज्ञायमानत्वात् ।

[270] **किमसम्बद्ध एव समवायः सम्बन्धिनौ सम्बन्धयति ? सम्बद्धो वा ? न तावदसम्बद्धस्य सम्बन्धकत्वं युक्तम्, अतिप्रसङ्गात् । सम्बन्धश्चास्य न संयोगरूपः सम्भवति,**

[पं०]
विशेषसमवायेभ्य हितामिति । द्वितीयपक्षे भ्रमरार्थं हिताम् । पाण्डुदास इति कायस्थाख्यः । उपविकरोतीति[7] अपदैरेवार्थः शब्दपरावर्तनं । स्वग्रन्थान्तर्निक्षिपति ततश्च मयैव रचितमिति वक्तीत्यर्थः । पञ्चानामिति ब्रह्महत्या-सुरापान-स्तेय–गुर्वंगनागमन-तत्संसर्गाख्यानाम् इति न्यायकन्दलीप्रशस्तिः ।

[कु०] [269] तथोपपादितमिति (कं. ३२९) अन्यतरकर्मादीनां निमित्तादीनामभावादित्यत्र सत्तावदाश्रयान्तरेऽपीति (कं. ३२९) एकत्वस्य च प्रागेव साधितत्वादिति शेषः ।

[270] तस्यैकत्वादिति (कं. ३२९) वृत्तिवृत्तिमद्भावस्य च भेदाधिष्ठानत्वादिति शेषः । पर इति (कं. ३२९) सिद्धांतीत्यर्थः । यो आद्यः सम्बन्धः सः सर्वो वृत्तिमान्, यथा संयोग इति व्याप्तिः कार्यत्वेन सोपाधिकेत्याह कृतको होति

१ दनित्यत्वं, कथम्–दे । २ समवायोऽपि–दे । ३ अस्य–दे । ४ यथा न–कं. १, कं. २, जे. १, जे. ३ । ५ प्रत्यभिज्ञानात्–जे. २ । ६ इमे प्रतीके कं. पुस्तके न स्तः । ७ उपायं करोतीति अत्रत्यं जल्पं तैरेवार्थैः – मुद्रितः पाठः ।

## प्रशस्तपादभाष्यम्

न [1]तादात्म्यात् । यथा द्रव्यगुणकर्मणां सदात्मकस्य भावस्य नान्यः सत्ता-योगोऽस्ति । एवमविभागिनो वृत्त्यात्मकस्य समवायस्य नान्या वृत्तिरस्ति, तस्मात् स्वात्मवृत्तिः ।

## न्यायकन्दली

तस्य द्रव्याश्रितत्वात् । नापि समवायः, एकत्वात् । न च संयोगसमवायाभ्यां वृत्यन्तरमस्ति ।

तत्कथमस्य वृत्तिरित्यत आह–कया पुनर्वृत्त्या द्रव्यादिषु समवायो वर्तत इति । वृत्त्यभावान्न वर्तत इत्यभिप्रायः । [2]एतत् समाधत्ते नेति । वृत्त्यभावान्न वर्तत इत्येतन्न, तादात्म्याद् वृत्त्यात्मकत्वात् स्वत एवायं वृत्तिरिति । कृतको हि संयोग-स्तस्य वृत्त्यात्मकस्यापि वृत्त्यन्तरमस्ति, कारणसमवायस्य कार्यलक्षणत्वात् । समवायस्य वृत्त्यन्तरं नास्ति । तस्मादस्य स्वात्मना स्वरूपेणैव वृत्तिर्न वृत्त्यन्तरेणेत्यर्थः । अत[3] एवातीन्द्रियः सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभावात् । यथा सत्तादीनां प्रत्यक्षे-ष्वर्थेषु वृत्तिरस्ति तेन ते संयुक्तसमवायादिन्द्रियेषु गृह्यन्ते, नैवं समवायस्य वृत्ति-सम्भवः । अतोऽतीन्द्रियोऽयम्, संयोगसमवायापेक्षस्यैवेन्द्रियस्य भावग्रहणसामर्थ्यो-पलम्भात् । यदि समवायविषयमैन्द्रियकं संवेदनमस्ति ? सम्बन्धाभावाभिधानं प्रलापः । अथ नास्ति, तदेव वाच्यमित्यत्राह–स्वात्मगतसंवेदनाभावाच्चेति । यथेन्द्रियेण संयोग-प्रतिभासो नैवं समवायप्रतिभासः, सम्बन्धिनोः पिण्डीभावोपलम्भात्, अतोऽयमप्रत्यक्षः । उपसंहरति–तस्मादिति ।

[कु०]

(कं. ३२९) गृहावग्रहणव्यभिचारपरिहाराय विशेषणम् । अत्र प्रयोगः– समवायो न बाह्येन्द्रियग्राह्यः । विधिप्रत्यय-विषयत्वे सति संयोगसमवाययोरन्यतरेणापि संबंधेन इन्द्रियासंबद्धत्वात् । व्यवहितविप्रकृष्टवदिति । इन्द्रियजिज्ञास्य इच्छयाऽनुव्यवसायसंभवात्तस्य सदसत्त्वयोरनुव्यवसायसदसत्वे एवं प्रमाणं किमर्थ[म]नुमानोपन्यास इत्यर्थः ।

यथेन्द्रियेणेति (कं. ३३०) संयोगविषयं ज्ञानं प्रत्यक्षतयाऽनुव्यवसीयते । नैवं समवायविषयमित्यर्थः । स्वातन्त्र्य-प्रतिरोधक इति (कं. ३३०) भेदवृत्तीः पृथग्भावानवबोधादुपश्लेषोः नियतं पारतंत्र्यं यत् । कृतः समवाय इत्यर्थः ।

---

१ तादात्म्याद् भाववत्–दे । २ परः–कं. १, परस्य–जे. ३ । ३ अत एव चातीन्द्रियः–जे. ३ ।

प्रशस्तपादभाष्यम्

अत एवातीन्द्रियः, सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभावात्, स्वात्मगतसंवेदनाभावाच्च। तस्मादिह बुद्ध्यनुमेयः समवाय [1]इति।

इति प्रशस्तपादभाष्ये समवायपदार्थः
समाप्तः॥

न्यायकन्दली

परस्परोपसंश्लेषो भिन्नानां यत्कृतो भवेत्।
समवायः स विज्ञेयः स्वातन्त्र्यप्रतिरोधकः॥

इति भट्टश्रीश्रीधरकृतायां पदार्थप्रवेशन्यायकन्दलीटीकायां
समवायपदार्थः समाप्तः॥

[टि०] इति मलधारिशिष्य पं. श्रीनरचन्द्रकृतौ कन्दलीटिप्पनके समवायपदार्थः [2]समाप्तः॥
॥ [3]समाप्तं चेदं कन्दलीटिप्पनकम्॥
॥ [4]ग्रन्थाग्रं २५००॥

[पं०] श्रीप्रश्नवाहिनकुले कोटिकनामनि गणे जगद्वन्द्ये।
श्रीमध्यमशाखायां वंशे श्रीस्थूलभद्रमुनेः॥१॥
गच्छे हर्षपुरीये श्रीमज्जयसिंहसूरिवरशिष्यः।
षष्ठाष्टमतीव्रतपाः षड्विकृतित्यागसाहसिकः॥२॥

[कु०] इत्येवं युधि वैरिणामिव गुणं जित्वा शरैः कंदली–
टीकायां बहुधा विवादमतुलैर्न्यायैरसदर्शिनो।
विद्वद्भूपः प्रतिपादिताः स्वधिगमाः सर्वे पदार्थाः स्वयं
वज्रब्रह्म (?) नृपेण पर्वतसुजाता (ताजा) निः प्रसीदत्विति॥

स्वस्ति श्रीमन्महामंडलेश्वरेण शस्त्रशास्त्रविदां पत्या **शिडिलबोम्मिदेवेन** विरचिता न्यायकंदली व्याख्याने न्यायकुसुमोद्गमोदये समवायपदार्थः समाप्तः।

॥ छ॥ छ॥ श्रीः॥ छ॥

---

१ इति सिद्धम्। २ समाप्तः इति 'अ, ब' पुस्तकयोर्नास्ति। ३ इदं समाप्तिवाक्यं 'ब' पुस्तके पुष्पिकाश्लोकादनन्तरमस्ति। ४ ग्रन्थाग्रन्थ २३०० – अ, ग्रन्थाग्रन्थ २५०० – ब।

प्रशस्तपादभाष्यम्

[1]योगाचारविभूत्या यस्तोषयित्वा महेश्वरम् ।
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः ॥

[2]इति प्रशस्तपादविरचितं द्रव्यादिषट्पदार्थभाष्यं समाप्तम् ॥

न्यायकन्दली

सुवर्णमयसंस्थानरम्या सर्वोत्तरस्थितिः ।
सुमेरोः शृङ्गवीथीव टीकेयं न्यायकन्दली ॥१॥

अक्षीणनिजपक्षेषु स्थापयन्ती गुणानसौ ।
परप्रसिद्धसि[3]द्धान्तान् दलति न्यायकन्दली ॥२॥

[टि०] (॥ पुष्पिका ॥)

[4]पृथ्वीधरः सकलतर्कवितर्कसीमा–
धीमान् जगौ यदिह कन्दलीकारहस्यम् ।
व्यक्तीकृतं तदखिलस्मृतिबीजबोधं
प्रारोहणाय नरचन्द्रमुनीश्वरेण ॥ १ ॥

[पं०]

श्रुता — देव्याश्चक्रेश्वर्याः प्रतिपन्नसुतः श्रीतालिध्रगोविन्दः ।
श्री(अ)रभयसूरिरभवन्निस्सङ्गसिद्धबहुविद्यः ॥ ३ ॥

त्रिभिर्विशेषकम्
परसहस्रान्भूदेवान् (य)दक्षं कउभयं(?) चयः ।
प्रबोध्यमेदन्तपुरे वीरचैत्यमचीकरत् ॥ ४ ॥

श्रीगुर्जरेश्वरो दृष्ट्वा तीव्रं मलपरीषद्म्(?) ।
श्रीकर्णो बिरुदं यस्य मलधारीत्यघोषयत् ॥ ५ ॥

नाथं सुराष्ट्रराष्ट्रस्य — नाथं तु तं सुराष्ट्रस्य खगारप्रतिबोध्य यः ।
उज्जयन्ततीर्थपथं-खिलीभूतमयी वहत् ॥ ६ ॥

---

१ इदं पद्यं पु. ६ दे पुस्तके नास्ति । २ इति पदार्थप्रकाशाकाख्यं भाष्यं कृतिराचार्यभगवत्प्रशस्तकरणपदानाम् दे । ३ सिद्धानां–जे. १ । ४ पुष्पिकेयम् 'अ' पुस्तके नास्ति ।

न्यायकन्दली

आसीद्दक्षिणराढायां द्विजानां पु[1]ण्यकर्मणाम् ।
भूरिसृष्टिरिति ग्रामो [2]भूरिशिष्टजनाश्रयः ॥३॥

अम्भोराशेरिवैतस्माद् बभूव क्षितिचन्द्रमाः ।
जगदानन्द[3]कृद्वन्द्यो बृह[4]स्पतिरिति द्विजः ॥४॥

तस्माद्विशुद्धगुणरत्नमहासमुद्रो विद्यालतासमवलम्बनभूरुहोऽभूत् ।
स्वच्छाशयो विविधकीर्त्तिनदीप्रवाहप्र[5]स्यन्दसम्पदचलो बलदेवनामा ॥५॥

[टि०]

[6]मुनिनयनयक्षसङ्ख्ये
वर्षे १३२७ स्वपरार्थसिद्धये सुधिया ।
लिखितमिदं कन्दल्याः
टिप्पनकं कमुदचन्द्रेण ॥ २ ॥

( ॥ समाप्तोऽयं ग्रन्थः ॥ )

[पं०]

तस्योपदेशान्निर्मुच्य चतस्रश्चपलेक्षणाः ।
प्रद्युम्नो राजसचिवश्चारित्र्यं प्रत्यपद्यत ॥ ७ ॥

श्रीहेमचन्द्र इत्यासीत् सूरिर्भूरिगुणः स तु ।
ग्रन्थलक्षविनिर्माता निर्ग्रन्थानां विशेषकः ॥ ८ ॥

सिद्धभूधवमुद्दण्डैः प्रतिबोध्य...श्चद्रुमुदण्डैः कनकदण्डकलशैर्यः ।
उत्तंसितवान् परितः स्वदेशपरदेशचैत्यानि ॥ ९ ॥

---

१ भूरि–कं. १, कं. २ । २ भूरिश्रेष्ठि–कं. १, कं. २ । ३ दानन्दनाद्–कं १, कं. २ । ४ रिव–कं. १, कं. २, जे. ३ । ५ प्रस्पन्दनोत्तम–कं. १, कं. २ । ६ पुष्पिकेयं – 'अ, ब, ड' पुस्तकेषु नास्ति यत इयं न ग्रन्थकर्तुः किन्तु 'क' पुस्तकलेखकस्य 'अ' पुस्तकलेखकस्य तु पुष्पिका इत्थं वर्तते ।

आसीदत्र महामुनिश्च विजयानन्दाख्यसूरीश्वरः
श्रीलक्ष्मीविनयाख्यश्च सुगुणस्तस्याजनि शिष्यकः ।
तच्छिष्यस्य मुनीशहंसविजयस्यात्रोपदेशेन च
ग्रन्थोयं लिखितो बभूव भविनां मोक्षाख्यशर्मोदः ॥

न्यायकन्दली

तस्याभूद् भूरियशसो विशुद्धकुलसम्भवा ।
[1]अब्बोकेत्यर्चितगुणा गुणिनो गृहमेधिनी ॥६॥

सच्छायः स्थूलफलदो बहुशाखो द्विजाश्रयः ।
[2]ताभ्यां श्रीधर इत्युच्चैरर्थिकल्पद्रुमोऽभवत् ॥७॥

असौ विद्याविदग्धानामसूत श्रवणोचिताम् ।
षट्पदार्थहितामेतां रुचिरां न्यायकन्दलीम् ॥८॥

[पं०]

प्रतिवर्षं जीवरक्षामशीत्यहमशीत्यहम् ।
यस्योपदेशात् सिद्धेशस्ताम्रपत्रेष्वलीलिखत् ॥ १० ॥

श्री श्रीचन्द्रमुनीन्द्रो विबुधेन्द्रमुनिश्च तस्य वंश्यौ द्वौ ।
यौ लाटीयदेशमुद्रामुज्झित्वा जगृहतुर्दीक्षाम् ॥ ११ ॥

श्रीचन्द्रसूरिशिष्यः श्रीमुनिचन्द्रः प्रभुः सुचि(च)रित्रः ।
प्रव्राजयामास　　चौलुक्यमात(तु)लनृपं वाग्मी प्रवाज्ययोपहितः(?) ॥ १२ ॥

तत्क्रमिको देवप्रभसूरिः किल पाण्डवायनचरित्रम् ।
सुकवि　　श्रीधर्मसारशास्त्रं च निर्ममे सुकृतिकुलतिलकः ॥ १३ ॥

तदीय सिंहासनसार्वभौमस्तदीश्वरः श्रीनरचन्द्रनामा ।
सरस्वतीलि[ल]ब्धवरप्रसादस्त्रैविद्यमुष्टिन्धयधीर्बभूव ॥ १४ ॥

टिप्पनमनर्घराघवशास्त्रे किल टिप्पनं च कन्दल्याम् ।
सारं ज्योतिषमट्टमख्यः प्राकृतदीपिकामपि च ॥ १५ ॥

तस्य गुरोः प्रियशिष्यो ... प्रभुर्नरेन्द्रप्रभः प्रभावाढ्यः ।
योऽलंकारमहोदधिमकरोत्काकुत्स्थकेलिं च ॥ १६ ॥

राजानः प्रतिबोधिताः कति कति ग्रन्थाः स्वयं निर्मिताः
बौद्धाः कति[वि]निर्जिताः कति तपांस्युग्राणि तप्तानि च ।

---

१ अञ्चुके–जे. १, अम्भोके–जे. ३ ।　२ त स्याम्–कं. १, कं. २ ।

न्यायकन्दली

त्र्यधिकदशोत्तरनवशतशाकाब्दे न्यायकन्दली रचिता
श्रीपाण्डुदासयाचितभट्टश्रीश्रीधरेणेयम् ॥९॥

समाप्तेयं पदार्थप्रवेशन्यायकन्दलीटीका ।
समाप्तोऽयं ग्रन्थः ॥

[पं०]

सूत्रामभितन्मतिम्  श्रीमद्धर्षपुरीयगच्छमुकुटः श्रीसूरिसूत्रमिति ।
तच्छिष्यैर्मुनिभिश्च वेत्ति नपरं वागीश्वरी तन्मि(न्धि)तम्(?) ॥ १७ ॥

नरचन्द्रसूरिवंशे सूरि श्रीपद्मदेव इत्यासीत् ।
सूरिश्री श्रीतिलकस्तस्य मृगेन्द्रासने जयति ॥ १८ ॥

तच्चरणरेणुकणिकामुषितभालस्थलोऽत्र कन्दल्याम् ।
श्रीरा[जशेखरसू]रिः श्रीपञ्जिकामतनोत् ॥ १९ ॥

भेतद् ध्रुवं  पूज्यश्रीतिलकाभिधानसुगुरोः सामर्थ्यंतं [तम्] तद्भूतम्
मादृक्षोऽपि यदत्र सभ्यपुरतो धत्ते वचश्चापलम् ।
यद्दिम्भा अपि शुद्धसंस्कृतगिरः काश्मीरदेशोद्भवाः
वाग्देव्याः स खलु प्रभावविभवस्तत्रस्थितायाश्चिरम् ॥ २० ॥

यदत्र दोषकालुष्यं जातं मे मतिमान्द्यतः ।
तत्क्षालयन्तु सन्तः स्वबुद्धिगंगाम्बुधारया ॥ २१ ॥

— ॐ —

## Word Index

[ In this Index I stands for प्रशस्तपादभाष्यम् also called पदार्थधर्मसंग्रहः, II stands for न्यायकन्दली, III stands for न्यायकन्दली टिप्पणम्, IV stands for पञ्जिका and V stands for कुसुमोद्गम्. Devanāgarī nos. indicate the page nos. of the book. ]

[ अ ]


अक्षपादः — II. ६३२; V. ४, ५७७.

अणुः — I. २६५, २६७; II. २३५, २४६, २५०, २६८; III. २५१; IV. २६५, २६८; V. ७१, २३७, २५०.

अत्यन्ताभावः — II. ५४४, ५४५; III. १६; IV. ५४६; V. २६, ५४५.

अदृष्टम् — I. ३९; V. १७.

अधर्मः — I. २१९, २४१, २४७, २४८, २५०-२५२, २५४, ६२९; II. १५२, २४७, २४८, २५२, ६१९. ६२९; III. ३८, १५२; IV. २४, ३७; V. २५२, २५४.

अनध्यवसायः — I. ४२७, ४२८; II. ४२७, ४२८; III. ४२७; IV. ४२७, ४२८; V. ४२८.

अनादिः — II. ६२८.

अनित्यः — I. ९३, ११०; II. ५८, ६०, ६१, ९३; III. ६०, ६१, ९३; IV. ५७, ६०, ६१, ९३; V. ६०.

अनिर्वचनीयख्यातिवादिन् — V. ४२६.

अनुपपत्तिः — I. ६२०.

अनुमानम् — II. २४४; III. ३२, ३३, २०३; IV. ३६; V. ५, १७, १८, ३२, ३७, ७४, ७५, ८६.

अन्वयः — II. १९, २५३, २०३; IV. १४५; V. २१, १६६, २१९, २५३.

अन्वयव्यतिरेकः — I. ६९४; II. ३०८, ६९३, ६९४; IV. ३३५; V. ३५६, ३६९, ६९३.

अन्विताभिधानवादः (वादिन्) — II. ५५१; III. ५५१.

अप् — I. २९, १०७; II. ३०, ७७, ८३, १०७, ११५, २४१; III. ११५; IV. ८८, ११५; V. ८३.

अपरत्वम् I. ३८, ८५, १०७, १२४, २३३, २४१, २४३, २४८, २४९, २५५; III. ८, २५७; IV. ७०, ७७; V. ३६.

अपवर्गः II. ६३१.

अपाकजः I. २४७, २४८, २५७; II. २४७, २५७; IV. २४७; V. २४८.

अपूर्वम् II. १५, ६२०, ६२१; III. १४, ६२१.

अभावः II. २५, ३०, ३४, ४४, ५१, ५२, ५७, ७३ — ७५, १९७ — १९९, २३५; III. २५, ३४, ५१, ५७, ७३, १९७, १९९; IV. २५, ३६, ५१, ७३—७५, १९७ — १९९; V. २६, ३४, ३६, ५१, ५२, ७३, १९७, १९९.

अभाववादिन् IV. ५४३.

अभिहितान्वयवादः IV. ५५१, ५५२.

अयुतसिद्धिः II. ४८-५०, ११९; III. ४८, ४९; V. ४८, ४९, ५७.

अर्थापत्तिः I. ५२४; II. ५२४, ५२५, ५२७—५२९; III. ५२४, ५२६, ५३०, ५३१; IV. ५२५, ५२७—५३०; V. १५१, ३५५, ५२४, ५२६, ५३०.

अविद्या I. ४०५, ४३२; II. ४०५, ४३२; III. ४०५; IV. १३, १५२; V. ४०५.

असत्कार्यवादः II. ३५२.

असत्ख्यातिवादिन् IV. ३१८.

असमवायिकारणम् I. ४०१; II. १३८, २५३-२५५, २८२, ४०१, ६३८, ६४१; III. २५३, ३७२; IV. २३३, २५२-२५४, २६८, २८८, ३५५; V. २५३, २९१, ३७१, ४०१.

[ आ ]

आकाङ्क्षा II. १८, २२; III. १८; IV. २०.

आकाशम् I. २९, ७१, ७७, ३५३; II. ६१, ७१, ७७, १५३, २५६; III. ७१; IV. २१, ४९, ५०, ७१, ७७, १५३, १६४, २५२; V. ७१, ३५३.

आगमः V. ६०१.

आचार्यः II. ३२८, ५५७, ६८८; III. ३५३, ५००, ५५३; IV. २१८, ५५७; V. ४१९, ६४८.

आत्मा — I. २९, ७१, ७७, १७६, २१३, २५५; II. ६१, ७१, ७७; १७६, १७७, २११, २१४, २२५, २३०. २५३, २५५, ६२ ; III. ७१, १७६, २२५, २२६; IV. ७१, ७७, १७६, २२५, २२६, २३०; V. ७१, १७६, १७७, २२५, २२६, २४३.

आलयविज्ञानम् — V. १२.

[ इ ]

इच्छा — I. ३८, २१३, २१९, २४१, २४३, २४८, २५०, २५१, २५४, ६०५, ६०७; II. ३८, १५२, २११, २१४, २३५, २४८, २५०, २५१, ६०५, ६०६; III. ३७, ६०५; IV. २४, ३७, १५२, २३५. V. २८.

इतरेतरान्वयः — II. १८.

इतरेतराभावः — II. ५४४, ५४५; III. १६; IV. ३.

इन्द्रियम् — I. १०४, १२६, १७९, २१६; II. ९८, १०४, १०५, ११३, १२६, १७९–१८१, १८३, १८४, २०३–२०५, २१४, २१६, २१७; III. ९८, १०५, १२६, २०३, २०५, २१५, २१६; IV. ९८, १८५, १२६, १८०, १८१, २०४, २०५, २१६; V. ११, ९८, २०३, २१६.

[ ई ]

ईश्वरकृष्णः — IV. ३५१.

[ उ ]

उदयनाचार्यः — IV. २, ११४.

उद्योतकराचार्यः — II. ८५; IV. ६०, ८१, २२३, ५३५, ५७५; V. ६०, ८१, २२३, ५३६.

उपादानम् — II. १४६; III. ९; IV. १४६.

उम्बेकः — IV. २४.

[ ऐ ]

ऐतिह्यम् — I. ५४६; II. ५४६; III. ५०६; V. ५४६.

[ क ]

कणादः — I. १; II. ९–११, ३६६; III. ११; IV. २, ४, ९, १०, १२, २६, ३६६, ३६७; V. ८, १०.

| | |
|---|---|
| —सूत्रम् | IV. ४९९, ५०९, ५७५, ५७६, ५७९–५८१. |
| कन्दलीकारः | IV. ३३६, ४७६, ५४२. |
| कन्दलीटिप्पनम् | III. १. |
| कर्म | I. २३, ६१९, ६४२ ६५०, ६५१, ६५५, ६५६, ६५७, ६६६, ६८८; II. २४, २५, ३६, ४६, ५८, ६५, ८३, १५२; ६२२, ६३८, ६४०, ६४२, ६४३, ६५०, ६५१, ६५४–६५६, ६५७, ६६६, ६६७; III. २४, २५, ४६, ५३, ६०, ६४२, ६४३; IV. २, २४, २५, ४६, ५७, ६७, १५२, ६९४; V. २५, ४६, ६६७. |
| कर्मपदार्थः | I. ६६७; II. ६६७. |
| कर्मविपाकः | I. १३९; II. १३९, १४०. |
| कादम्बरी | II. ७. |
| कापिलः | II. ६२७, ६२८, ६३४. |
| कापोती | II. ९; III. ९; IV. ८. |
| कामः | I. ६०६; II. ६०६. |
| कारिका | II. ६०१. |
| कालः | I. २९, ७१, ७८, १५३, १६४, २९०, ३९७–३९९, ४०१; II. ६१, ७१, ७८, १५३, १५८, १६४, १६५, १७०, २९०, २९५, ३९७–३९९, ४०१; III. ७१, १६५, १६९, १७०, २३३, २७४; IV. ७१, ७८, १६५, १६९, २७३, २८९; V ७१, ७८, १५८, १६४–१६६. |
| कालिदासः | III. ५०८. |
| किरणावली | IV. २, V. ६. |
| कुमारिलमिश्रः | IV. ३२६. |
| क्रोधः | II. ६००. |
| क्लेशः | II. १५२; III. १३, १५२; IV. १३, १५२; V. १३. |

[ ग ]

| | |
|---|---|
| गन्धः | I. ३८, ८५, ८७, २४१, २४३, २४७, २४९, २५१, २५७, २६२; II. ३८, ८६, ८७, ९१, २४२, २४३, २४९, २५१, २५३, २६२, २६६; III. ८७, ९१, १०५, २५६, २५७, २६३; IV. ७७, ९१, ९५४; V. ३३, ८७, ९१, १०५. |

गुणः — I. २३, ३८, ३९, ५६, ६०, १६९, १७२, २१३, २१६, २१९, २३३, २३९, २४१, ६१९, ६३९, ६८८; II. २३–२५, ३३, ३६, ३८, ४०, ४४, ४६, ५२, ५८, ६५, ६८, ८३, १०५, १५५, १५८, १६०, १६९, २१४, २१६, २१७, २१९, २३३, २४१, ६२२, ६३९; III. २४, ३८–४०, ४६, ५२, ६०, १०५, १५५, १६०, २१६, २१९, २३९, २४१; IV. २, २४, २५, ४०, ४४, ४६, ५२, ५७, ६७, १०५, १५०, २१६, २३९, २४१, ६८८ ६९४; V. २४, २५, ३८, ४३, ४४, ४६, ५३, ८३, १५५, २१६, २१९, २४१.

गुणत्वम् — I. ३९, ७७, ८५, १०७, २४१, २४३, २४७, २५०–२५२, २५४, २५७, ६०८, ६४२, ६५०; II. ७७, ८०, ८६, २४७, २५०, २५२, २५४, २५५, ६०८, ६१९, ६५०; III. ७९, २५७; IV. ७७; V. ७९, २५०, २५४.

गौतमः — IV. १३७.

ग्रन्थकारमतम् — III. ५९०; IV. ५९०.

[ च ]

चक्षुः — I. २५९; II. ७३, २५९, २८५; III. ३४, २५७; IV. ३६, २५८, २५९, २८१; V. ३६, २५७, २५९, २६०.

चन्द्रहासः — IV. ३८०.

चार्वाकः — III. ४७४, ५९७; V. १७८, १७९, ४९५, ५९८.

[ ज ]

जैनः — III. ५११, ५६३; IV. ५६५.

जैमिनीयाः — IV. १६.

ज्ञानम् — I. २५०; II. २४४, २४५, २८१, २८२, २८४–२८६, ६२७; III. २९, २४४, २८४; IV. १५, २४४, २४५, २८१; V. २८, २४४, २८२.

[ त ]

तत्त्वोपप्लववादिन् — III. ५५५.

तथागतः — II. ५५५.

तन्त्र — IV. २४.

तन्त्रटीका — II. ६००.

तमः II. ३२; ३४–३६; III. ३२, ३४–३६; IV. २९–३२, ३६; V. ३२, ३४–३६.

तर्कः II. ४०८, ४०९; III. ४०८; IV. ४०८–४१०; V. ४०८–४१०.

तार्किकाः II. १७, ६२१, ६२९; IV. १९.

तेजस् I. २९, ११४; II. ३०, ३४, ७३, ७७, ८३, ११४, ११५, २४१; III. ११४, ११५, १२३; IV. ३०, ८१, ८८, ११४, १२४; V. ८०, ८१, ८३, ११५, १२४.

[ द ]

दिक् I. २९, ७१, ७८, १५३, १७१, १७२, १७४; II. ३१, ७१, ७८, १५३, १५८, १७२, १७४, १७५; III. ७१, १७२; IV. ७१, ७८, १७५; V. ७१, ७८, १५८, १७२.

दुःखम् I. ३८, २१३, २१९, २४१, २४३, २४४, २५०, २५१, २५४, ६०४; II. २३, २४, ३८, १५२, २११, २१४, २१८, २४१, २४८, २५०–२५२, ६०४, ६०५. III. ३८, ६३०; IV. २३, २४, ३७, २१८; V. ३६, १५२, २१८, २५०.

द्रवत्वम् I. ३९, ७९, ८५, १०७, २४१, २४३, २४७, २४८, २५०–२५२, २५४, २५७, ६०९; II. ७९, ८६, ९०, २४८, २५२, २५४, २५५, ६०९; III. ७९, ९०, २५७; IV. ७७; V. ९०.

द्रव्यम् I. २३, २९, ५६, ६२, ६७, ७६, १६१, १७०, ६१७, ६७६, ६८८; II. २३–२५, २९, ३०, ३२, ३३, ३६, ४४, ४६; ५६, ५८, ६२, ६५, ६७, ७६, ८३, १६१, १७१, ६२२, ६७६; III, ३०–३३, ३६, ४६, ५२, ६०, ६२, ६५, ६७; IV. २, २४, २५, ३०, ३५, ३६, ४८, ४६, ५६, ५७, ६२, ६७, ७६, १६४, ६८८, ६९४; V. २५, २६, ३२, ३३, ४३, ४६, ६२, ८३, ६७६.

द्रव्यपदार्थः I. २३७, २३८; II. २३७, २३८; III. २३८; IV. २३८; V. २३८.

द्वित्वम् I. २४१, २४९, २५५; II. २४९, २५५; III. ८, ७८, २५१; IV. २५१.

द्वेषः I. ३८, २४८, ६०६, ६०७; II. ३८, १५२, २१३, २१४, २१९, २३५, २४१, २४३, २४८, २५०, २५१, २५४, ६०६, ६०७, ६२७, ६३३; III. १३, १५२, २११, २५०, २५१; IV. १३, २४, ३७, २३५; V. १३, २७.

[ ध ]

धर्मः — I. २६, २९९, २४१, २४७, २४८, २५०–२५२, २५४, ६१९, ६३१; II. २६, २८, २९, १५२, २४७, २४८, २५२, ६१९, ६२१, ६२२, ६२६, ६२७, ६३२. III. २६, ३८, १५२; IV. २४, २६, ३७; V. २६–२८, ३८, २५२, २५४.

धर्मकीर्तिः — IV. २२९, ३१०.

[ न ]

नरचन्द्रटिप्पनकव्याख्यानम् — III. ६३२, ६४३, ६९७; IV. ३८६.

नास्तिकः — IV. २१८, ४९७.

नास्तिकवैतण्डिकाः — V. ५७.

नित्यम् — I. ९३, ११०, १६१, १७०; II. ५८, ९३, १७१; III. ३२; IV. ५७, ९३; V. २७, ५७.

निमित्तकारणम् — I. २५४, ४०१; II. १३८, १६३, २४९, २५३–२५५, २८२, २८८, २९३, ३७४, ४११, ६३८, ६३९, ६४९; III. ३७२; IV. २५१, २५३, २८८; V. २४९, २५४, २५५, ३७५, ४०१,

निर्ग्रन्थः ( जैनः ) — II. ४२२; IV. ४२१.

निर्विकल्पः — III. २८१.

निर्विकल्पकज्ञानम् — III. ३०२; IV. ३०२, ३१०.

—व्यापारः — II. ४३८–४४०, ४४५; III. ४४१; IV. ४३८, ४४१, ४४५, ४४६; V. ४३८, ४३९, ४४३.

निवृत्तिः — II. ६३२.

नैयायिकाः — II. ६१७; III १९१, ५२१, ५३९; IV. ३०, २८५, ४१४, ४७२, ५२१; V. १६८, ५६४.

नैरात्म्यवादिन् — V. ४७५.

न्यायकन्दली — II. ६३९; IV. १, २, ६९५; V. २, १७१, ६९७.

न्यायकन्दलीकारः — IV. ११.

न्यायभाष्यम् — II. ५५५, ५८९, ६२६.

न्यायमीमांसाभाष्यम् — II. ६; V. ६.

न्यायमीमांसाभाष्यकारः — II. ६. IV. ६.

न्यायवार्तिककारः — II. ५३५, ५७०, ६०५; IV. ५३५, ५७५; V. ५३७.

न्यायशास्त्रम् — IV. २९.

[प]

पक्षिलस्वामी — II. ६; IV. ६.

पतञ्जलिः — II. १५२, ४०३, ६२६, ६२७, ६३१;

( सूत्र ) — V. ४०३.

पदार्थ धर्म संग्रहः — I. १; II. १२; V. १२, २५.

परत्वम् — I. ३८, ८५, १०७, १२४, २३३, २४१, २४३, २४८, २४९, २५५; II. १२, ३८, ६१, ७०, ८६, २४१, २४८, २०९, २५५. III. ८, २५७; IV. ७०; V. ३६.

परत्वापरत्वम् — I. ३९३; II. ३९३, ३९६; III. ३९३, ३९५; IV. ३९३; V. ३६.

परमाणुः — I. २६५, ६४४; II. १७, ३२, ३३, ६१, १०१, १३७, २३५, २४३, २६५, २६६, २६७, २७०, २७२, ६८६, ६८७; III. १७, ३२, ७१, ७९, ८८, १५१, २६५, २६६, २६७. IV. ३१, ८३, १०१, २५०, २६५, २७०; V. १७, ३३, ७१, ७९, २५०, २६६.

परार्थानुमानम् — I. ५४०; II. ५४७, ५४८; III. ५४७, ५५३; V. ५४७, ५४८.

परिमाणम् — I. ३८, ८५, १०७, १२४, १५३, १६१, १६९, १७२, २१९, २३३, २४१, २४३, २४७, २४८, २५१, २५७; II. ३२, ३८, ६१, ७८, ८६, ९४, ९५, ९६, १०२, १५३, २३५, २४२, २४३, २४८, २५१, २५३; III. ९४, ९५, ९६, १०२, २५१, २५७; IV. ३७, ६१, ७७, ९४, ३५, ९६, १०२, १५२; V. ९५, २४८.

परोक्षम् — II. ६२८.

पाकजः — I. २६५; II. २५३, २५५, २५७, २६५; IV. २६५, २७५.

पाण्डुदासः — III. २३४; IV. २३२.

पुरुषः — II. ६२८.

पुरुषार्थः — II. १५ ६३७; V. १६.

पृथक्त्वम् — I. ३८, ८५, १०७, १२४, १५३, १६१, १६९, १७२, २१९, २३३, २४१, २४३, २४७, २४९, २५१, २५५, २५७. II. ३२, ३८, ७८, ८६, १५३, २३५, २४२, २४९, २५५; III. २५७; IV. ३७, ७७, १५२, १६३.

पृथिवी — I. २९, ६९, ८४; II. ३०, ६९, ७७, ८३, ८४, ८५, ८८, १५५, २४१; III. ३०, ८३, १०६, ११५; IV. ३०, ७७, ८५, ८८, १०६, ११५; V. ६९, ८३, ८४, ८८.

प्रकृतिः — II. १५, ६२८; IV. १६; V. १६.

प्रजापतिः — IV. १३७.

प्रत्यक्षम् — I. ७६, ४३३; II. १९, २०, ७६, ८६, ८८, २५६, ४३३, ६३१; III. ७६, ७९, ४३३, ६४०, IV. २०, २१, ७६, ८८, ४३३; V. ११, ३९, ८६, ४३३, ६४०.

प्रत्यक्षप्रमाणम् — IV. १४५.

प्रत्यभिज्ञा — II. २०६, २४७, २७२; III. २०६, २७२; IV. २०६; V. २०६, २७२.

प्रध्वंसाभावः — II. ५९, ६०, ५४४; III. २, १६, ५९, ६०, ६७, ३६८, ५४४; IV. ३, ५९, ६०, ६७, १६८, ५४५; V. २१. ६०.

प्रभाकरः — III. २३३; IV. २४.

प्रयत्नः — I. ३८, २१३, २१९, २४१, २४३, २४८, २५०, २५१, २५२, २५४; II. ३८, १५२, २११, २४८, २५०, २५१, २५२, ६०९; III. ३७, २५२; IV. ३७, १५२; V. २५१.

प्रलयः — V. ३५.

प्रशस्तकरदेवः — II. ९, १०; III. १०; IV. २, ४.

प्रशस्तदेवः — V. ११३, ४९४.

प्रशस्तपादभाष्यम् — I. ६३९; IV ५७६

प्रागभावः — II. ६०, ५४४, ६३३; III. २, ७, १६, ६०, ५४४; IV. ३, ६०, १६८, २९७, ३५६, ५४४, ५४५; V. ५७, ५९, ६०, ६४, ५४४, ५४५.

प्राभाकरः — III. ४२१, ४५१, ५०२, ५१२, ५५१; IV. ४२३, ४५१, ५०५, ५१९, ५४१, ५४३, ५४७; V. ५४१, ५६०.

प्राभाकराः — III. २५७; IV. २१, ४२, २३२, २४५.

[ ब ]

बाणः — V. ७.

बार्हस्पत्यम् — II. ४९७; IV. ४९७; V. ४९७,

बाह्य ( वस्त्वाभाव )वादिन् III. ३१२, ३१७, ३१८.
— बाह्यार्थवादिन्

बुद्धिः I. ३८, ६३, २११, २४१, २४३, २४८, २४९, २५४, ४०२; II. ३७, ३८, ४३, ६४, २४१, २४४, २४८, २४९, २५४, २८१, २८२, २८३, २८४, ४०२; III. ३७, ४७, ६४ ६५, २८२, २८३, २८४, ४०२; IV. २४, ३७, ४७, ६४, ६५, १५२, २४९, २८१, २८२, २८३, ४०२; V. १३, ६४, २४८, २४९, २५४, २८१, २८४, ४०२, ६०३.

बौद्धः II. ५६२; III. ३१९, ३२९, ३४०, ३४६, ४६९, ४७४, ४८४, ४८५, ५००, ५११, ५१२, ५४८, ५५४; IV. ३४२, ३४६, ४०३, ४०७, ४२१, ४७५, ४७७, ४७९, ४८१, ४८२, ४८३, ४८४, ४८५, ५०२, ५११, ५८८.

बौद्धमतम् III. १३, १९१, २००, २०६, २०७, २०८, २०९; IV. १३, २४, १४६, १७७, १८५, १८६, १८७, १९१, १९५, १९९, २०३, २०७; २०८, २२६, २३१, २६७, २८७; V. १७९, १९१.

ब्रह्मसिद्धिः II. ५१३; III. ५१२.

[ भ ]

भट्टाचार्याः IV. ३५०.
— भट्टाः III. २३५, ३५२.
- भाट्टः III. ५११, ५१२, ५२५, ७२९; IV. ४१७, ४२६ ४५७, ४५८, ५११, ५२५, ५२७, ५३७, ५४३, ५५४.
— भाट्टाः V. २४३.
—मिश्राः II. ४०६, ५७०; IV. ३५५, ५५७, ५६४, ५८३.

भविष्योत्तरम् V. ५.

भावना I. २४१, २४७, २४८, २५४; II. २४१, २४७, २४८, IV. २४७.

भावः I. ६०६; II. २३, २८, ३४, ३५, ३६, ५७, १९८, १९९; III. ३४, ३६, १९९; IV. ३५, ३६, १९९ २३५; V. ३४, ३६, ३९, ७३, १९९.

भाष्यम् III. ४९८, ५५८; IV. ३९२, ४११, ५९१; V. ४१६, ४९३, ४९५, ५०८, ५४८, ५४९.

—वचनम् IV. ५१३.
भाष्यकारः III. ५६५; IV. ३९०, ५७१, ५७५, ५७६, ५७८; V. ४९, १७५, १७६, ४१६, ५७६.
—( कृत् ) IV. ५७९; V. ४१५.
भूषणकारः IV. १६४.

[ म ]

मण्डनः II. ५१३, ५९८, ६१७, ६२०; III. ५१३.
मण्डनमिश्रः II. २४; III. ३२; IV. २३, २४.
मनः I. २९, १७९, १८२, २२६; II. ६१, १५८, १७९, १८०, १८२, १८३, १८४, २२६, २२७, २२८, २२९, २३५, २४१, २४३, २८५; III. २१५, २२६, २२७, २२८, २३७, २३८; IV. ६१, १८२, २२७; V. १३, १५८, १८२, २२६, २२७, २२९, २३७.
मनुः III. ६२२; IV. १३७
मलधारिः II. ६३२.
माध्यमिकः III. १३, ३१६, ३१७, ५४१; IV. १३, ५४१; V. ३१७.
मीमांसकः II. ५५०, ५६५; III. ४१६, ४७३, ५०६, ५०९, ५३५, ५४८, ६१३; IV. ३५४, ४५८, ४५९, ५०३, ५२४, ५३२, ५४०, ५४९, ५५०, ५५१; V. ५०२, ५०४, ५४९.
—( पूर्व ) II. ५२०; IV. ५१८.
—( जरद् ) III. ५१९.
मीमांसकाः II. १६८; III. ९; IV. ९, १९, १५४, २१९, २२०, २४६, २६०; V. १५९, ३६९.
मीमांसा III. १०; IV. ११
मीमांसाभाष्यम् III. १४३; IV. १४२.
मीमांसावार्तिककृत् II. ११; IV. ११.
मोक्षः I. ६३२; II. ६१९, ६३२, ६५५.
मोहः II. ६३३.

[ य ]

युतसिद्धिः I. ३८३; II. ४८, ४९, ११९, ३८३, ३८४; III. ४८, ४९, ३८३; IV. ११९, ३८३; V. ४८, ४९.

योगशास्त्रम् II. ११२.

योगाचारः III. ३०३, ३०४, ३०७, ३०९, ३११, ३१२, ३१५, ३१६; IV. १४, ३०३ ३०५, ३०९, ३१६, ३१८.

[ र ]

रसः I. ३८, ७६, ७७, ८५, ८७, १८७, २४१, २४३, २४७, २४९, २५१, २५७, २६२; II. ३८, ७७, ८६, १०५, २४२, २४३, २४७, २४९, २५१, २५३, २६२, २६६; III. ३८, २५६, २५७, २६२; IV. ७७, १०५, २५०, २६२; V. ३३, ७६, ८३, २६२.

रागः I. ६०५, ६०६; II. १५२, ६०६, ६२७, ६३३; III. १३, १५२; IV. १३, V. १३, २७.

रिसुंगोलः V. १.

रूपम् I. ३८, ८५, ८७, १०७, २४१, २४२, २४७, २४९, २५०, २५१, २५७, २५९, २६५; II. ३२, ३३, ३८, ७६, ८८, ९०, १०५, २४१, २४२, २४३, २४७, २४९, २५१, २५३, २५६, २५७, २५८, २५९, २६०, २६१, २६५, २६६; III. ३३, ३८, ७४, ७६, ९०, १०५, २५६, २५७, २५८, २६२, २६५; IV. ७७, ९०, १०५, २४१, २४२, २४७, २४९, २५४, २५८, २६२, २६५; V. ३३, ३८, ७६, ८३, ८७, ९०, २४७, २५७, २५८.

रेवणः IV. २४.

[ ळ ]

लिङ्गम् I. १६१, १७२, १७४, २१३; II. १२८, १६१, १७१, १७४, १७५, २११, २१३, २४४, २४५, २९७; III. १६१; IV. २९७; V. १८, १२९.

लीलावती IV. २.

लोकायतिकः II. ४२२.

[ व ]

वल्लभाचार्यः V. ८१.

वादिमतम् IV. ५९०.

वायुः I. २९, १२४; II. ३३, ७७, १२४, १२५, १२९; III. ३३, १२४, १२५, १३०; IV. १२४, १२५, १२९, १३०, १३२; V. ३३, १२५, १३०.

वार्तिककारमिश्राः II. २२३; IV. २२३.

वासना II. १४, ११८; III. १३, ११८; IV. १३, ११८; V. १३, ११८.

विज्ञानवादिन् III. ३१८; IV. ३१८, ५४१.

—( केवल ) III. ३१२, ३१५.

—( महायानिक ) II. ५४१; III. ५४१; IV. ५४१.

—( साकार ) V. ३१७.

विज्ञानात्मवादिन् V. २४६.

विद्या I. ४०१, ४०३; II. ४०५, ४३३; III. ४०५, ४३३; V. ४०५.

विधिविवेकः II. ६२०.

विनाशः I. ३९७, ३९८, ४००; II. ३९७, ३९८, ४००; V. ३९७.

विपर्यय I. ४१६, ४२१; II. ४१६, ४१७, ४१८, ४२०, ४२१, ४२२, ४२३, ४२६, ६३३; III. ४१६, ४२१, ४२२; IV. ४२६; V. ४१७, ४२०, ४२३, ४२६.

विपाकः II. १५२; III. १५२; IV. १५२.

विभागः I. ३६, ३८, ८५, १०७, १२४, १५३, १६१, १६९, १७२, २१९, २३३, २४१, २४३, २४९, २५०, २५१, २५४, २५५, ६४२, ६४३, ६४७, ६४९, ६५४; II. २४, ३१, ३२, ३६, ५२, ७८, ८६, १५३, २४२, २४९, २५१, २५५, ३७०, ६४२, ६४७, ६४९, ६५४; III. ८, २४, ३६, ५२, ५३, ७८, ३८९; IV. ३६, ३७, ५२, ७७, १५२, २४९, ३७०, ३८३, ३९२; V. २४, ३०, ३६, ५३, २४१, २४९, २५५, ३९२.

विभुः II. ६१; V. २७.

विभ्रमविवेकः II. ५९८; III. ५९८.

वियोगः II. ३८; IV. ३७.

विशेषः I. २३, २९, ४६, ६२, ६७, १७४, २५२, २५५, ६४८, ६८८; II. २४, ३०, ४०, ४५, ४६, ६२, ६३, १७१, १७४, १७५, २५२, २५५; III. ३०, ४५, ५३, ५४, ६२, ६३, ६५; IV. २, २४, ४०, ४१, ४३, ४७, ६२, ६३, ६४, ६७; V. २९, ३४, ४१, ४५, ५६, ६२, ६३, २५२, ६७७, ६८६.

विशेषपदार्थः I. ६८७; II. ६८७; IV. ६८७.

विषयः I. १०६, ११६, १२७; III. ९८, १०६, ११३, ११६, १२७, V. ९८, १२७.

वृत्तिकारः IV. ३९२.

वेगः I. २४१, २४३, २४७, २४९, २५१, २५२, २५४; II. २४९, २५२; III. २५७.

वेदान्ताः II. १७; III. २२०, २२२, २४६; IV. १९, २२२, २४६; V. १९.

वेदान्तिन् ( जरद् ) III. ४२२; IV. ४२६.

वैधर्म्यम् I. २३, ८२, ८४; II. २३, २४, २७, ६४, ७२, ८२, ८४, ८८, २३९, २४०, २५८; III. ५४, २५८; IV. ८४; V. २४, २६, २९, ३१, ८२, ८६, ८९.

वैभाषिकः III. ३०३, ३०५, ३११, ३१२; IV. १४, ३०३, ३०५.

वैयाकरणः IV २२, ४३८.

वैशेषिकः I. ७७, २४१; २४२; II. ७७, १५८, ४०७, ५५८, ५६१; III. २६, १९९, २०९, २४३, ३१२, ३१४, ३१९, ३५२, ४०७, ५०२, ५१०, ५११, ५७७; IV. ५०, ५२, १२१, १४६, १८६, १८७, १९५, १९९, २०८, २०९, २२६, ३०३, ३१२, ३५४, ३५५, ४१६, ४२०, ४५०, ४५९, ४८१, ५०५, ५४३, ५५०; V. १६८, २६५, ५६२, ५६४.

—( दर्शनम् ) IV. ४२१

व्यतिरेकः I. २१६; II. १९, १९१, १९३, २१६, २१८, २४९, २५३, २८३; III. ६४, १९१, २४९; IV. ६४, १९१, २१६, २४९; V. ३४, १९१, २१९, २४९, २५३.

व्यतिरेकवादिन् ( केवल ) IV. ४७५.

व्यतिरेकव्याप्तिः II. १४५; IV. १४५; V. ११, १६६.

व्यवहारः II. ४०; IV. ४०; V. ५७.

व्याप्तिः II. ६३; III. ३२, ६३; V. ८६, ८८.

व्योमवती IV. २.

व्योमशिवः III. १२७, १२८, ४९९; IV. २, १९, ३०, ५९, ६०, ६२, ६५, ६७, १२७, १६६, १६७, २३२, ३३३, ३३६, ३४७, ३४८, ३५७, ३६०, ३७१, ३९१, ४७६, ५००.

[ श ]


शबरस्वामिन् — II. ५२०; III. ५११.

शबरस्वामी — II. ६; III. १४४; IV. ६, १४२.

शब्दः — *I.* १५३, १५४, १६१, २४१, २४३, २४८, २४९, २५५, ५९४; II. १८, ६१, १०५, १५३, १५४, १६१, १६३, २४१, २४३, २४८, २४९, २५३, २५५, २५६, ५९३, ५९४, ५९५, ५९६, ६०३, ६३७, ६३८; III. १०५, १५४; IV. ६१, १०५, १५३, २४१; V. १८, ३६, १५३, २४८, २४९, ५९४.

शब्दशक्तिः — II. १८; III. १८.

शरीरम् — I. ९७, १७९, २१६; II. ९७, ९८, १००, १०१, १०२, १७९, १८०, १८४, २१४, २१५, २१६, २१७; III. ९७, ९८, १००, १०१, १०२, १७९, १८०, २१५, २१६; IV. ९७, ९८, १००, १०२, १८०, २१५, २१६; V. १३, ९७, ९८, १००, १०१, १०२, २१५, २१६.

शंकराचार्यः — IV. २३.

शाक्यः — I. ४२१; II. ४२१, ४२२; IV. ४२१.

शिलिक्षम्भूपतिः — V. २.

श्रीधरः — II. ६३९, ६८३, ६८७; IV. २९२, ३०९, ३१८, ३२२, ३२५, ३३५, ३४२, ३४५, ३५१, ३६३, ३७९, ३८०, ३८१, ३९१, ४०८, ४१२, ४१३, ४२८, ४४०, ४४८, ४५०, ४५१, ४५२, ४६६, ४७२, ४७६, ४८१, ४८४, ४८८, ४८९, ४९४, ५०१, ५०३, ५०५, ५०८, ५१४, ५१६, ५२७, ५२८, ५३१, ५३६, ५३७, ५३८, ५३९, ५४४, ५५१, ५५९, ५७७, ६९४; V. ६०२, ६९४.

श्रीधराचार्यः — II. २३८; IV. २, ४, २०, २२, ३६, ३९, ५७, ५९, ६४, ६६, ७४, ७५, ८२, ८९, ९६ १०८, १२०, १२१, १३०, १४३, १४४, १५४, १७३, १७५, १८८, १८९, १९८, २०१, २३२, २३३, २७६, २८१; V. ८१, १३२.

श्रीनिरचन्द्रः — III. २३८.

श्रीसारचन्द्रटिप्पणकम् — IV. १११.

श्रीराजशेखरसूरिः — IV. २३८, ६८७.

श्रीवत्साचार्यः — IV. २.

श्रीशिङ्किलवोंमिदेवः V. २३८, ६९७.

[ स ]

सत्ता I. ४१; II. ४१, ४२, ४४; III. ४१, ४३; IV. ४१, ४३; V. ४१, ४३.

सन्निधिः II. १८, २२, ७८; III. १८; IV. २०, ७८.

समवायः I. २३. ४७, ५६, ३८३, ६८८, ६९२, ६९३, ६९४, ६९५, ६९६; II. २४, २५, ४७, ४८, ४९, ५२, ५५, ५६, ५८, ५९, ६१, ६५, ६७, ३८४, ६७५, ६७७, ६९०, ६९२, ६९३, ६९४, ६९५; ६९६, ६९७; III. ४७, ४९, ५३, ५४, ५५, ५६, ५७, ५९, ६२, ७८, ६९७; IV. २, २४, ५२, ५६, ५९, ६२, ६७, ६८, ७१, ६९३, ६९५; V. २९, ३४, ४७, ४८, ४९, ५०, ५५, ५६, ५७, ६१, ८५, ८६, ८९, ३८२, ६८८, ६९३, ६९४, ६९६ ६९७.

समवायपदार्थः III. ६६६, ६८८.

समवायिकारणम् I. ४०१; II. १३८, १५५, १६३, २००, २४७, २४८, २५३, २५५, २८२, २९२, २९३, ३६०, ४०१, ६३८, ६६५; III. ८, ४४, २००, २५८, ३७७, ५४७; IV. ८, १६३, २२८, २३३, २४६, २४८, २५३, २५४, २८८, ३५५, ३५९; V. १६१, २१८, २५२, २५३, २५४, २६५, २९०, २९१, ३७३, ४०१, ५४७, ६६५.

समवायिन् II. ६१, ७६; IV. ८, ३६, ६१; V. ६१, ६५, ६८.

सम्बन्धः II. २९, ५८; III. ५७; IV. ३२; V. १६, ५७, ८५.

सविकल्पकः II. २८२, ४३८, ४३९, ४४०, ४४१, III. २८१, ४४१; IV. ४३८, ४३९; ४४०, ४४१; V. २८२, ४३८, ४३९, ४४१, ५३०.

संकल्पः I. ६०४, ६०५, ६०६; II. ६०६.

संख्या I. ३८, ८५, १०७, १२४, १५३, १६९, १७२, २१९, २३३, २४१ २४३, २५०, २५१, २७५; II. ३८, ७८, ८६, १२५, १५३, २३५, २४२, २४३, २७५; III. २५७; IV. ३७, ७७, १५२, २४१, २४२, २५१, २७५; V. ३८, २४२.

संग्रहटीका II. ३८१.

संयोगः I. ३८, ७१, ८५, १०७, १२४, १६१, १६९, १७२, २१९, २३३, २४१, २४३, २४८, ३४९, २५०, २५१, २५२, २५४,

२५५, ३४६, ३५७, ३५९, ३६३, ३६५, ३६६, ६४२, ६४३, ६४७, ६४९, ६५०, ६५१, ६५२, ६५४, ६५६, ६५७–६६२, ६६४, ६६५, ६७७, ६९०, ६९२, ६९५; II. ३२, ३८, ५२, ५९, ७१, ७३, ७८, ८०, ८६, १५३, १५८, १७०, १७७, २४२, २४८, २४९, २५०, २५१, २५२, २५४, २५५, २५६, ३४६, ३४७, ३५७, ३५८, ३५९, ३६०, ३६३, ३६४, ३६५, ३६६, ३६७, ३८२, ३८४, ६०९, ६४१, ६४२, ६४७, ६४९–६६७, ६७५, ६७७, ६७८, ६८५, ६९०, ६९२, ६९५, ६९६; III. ८, २५, ३९, ५२, ५३, ५७, ७३, ७८, १५३, १७०, २४२, २४८, २५६, ३४६, ३४७, ३५७, ३५८, ३६३, ३६४, ३६५, ३६६, ३६७.

संशयः — I. ४१४, ४१५; II. ६३, ४११, ४१२, ४१३, ४१४, ४१५, ६३३; III. ६३, ४११, ४१३, ४१५; IV. ६३, ६४, ४११, ४१३, ४१४, ४१५; V. ६३, ४११, ४१२, ४१४, ४१५,

संस्कारः — I. ३९, ८५, १०७, १२४, १२५, २१९, २३३, २५०, ६११, ६२२, ६२३, ६५१, ६५२, ६५३, ६५४, ६५५, ६५६; II. ३९ ८६, ८७, १५२, २०३, २०४, २०५, २५०, २५१, ६००, ६०९, ६१२, ६१३, ६१४, ६१७, ६१८, ६२१, ६५०, ६५२, ६५४, ६५६; III. ३९, ४०, १५२, २०३, २०४, ६१६, ६२९; IV. २४, ३७, ३८, ३९, ७५, ८१; V. १३, २८, ६४९, ६५३; IV. ३७, ५२, ५९, ७१, ७३, ७७, १५२, २४८, २४९, २५०, २५५, ३४६, ३४७, ३५७, ३५८, ३५९, ३६०, ३६३, ३६४, ३६६, ३६७, ३८२, ३८३, ६९०, ६९२; V. २६, ३४, ३६, ५३, ५६, ७१, ७३, १७७, २४१, २४८, २४९, २५१, २५५, २५६, ३४६, ३४७, ३५८, ३५९, ३६०, ३६४, ३६५, ३६६, ३६७, ३८२, ६५१, ६६४, ६६५, ६६६, ६७५, ६९०, ६९५, ६९६.

साङ्कर्यं — II. ३५०, ४३४, ५७७; III. ३५०, ३५१, ३५२, ५७७, IV. १५६, ३५०, ३५३, ३५४, ४०३, ४०४, ५४५, ५७९; V. ४०३, ५४५.

—(सन्ततिः) — IV. ३५१.

साधर्म्यम् — I. २३, ५४, ८२; II. २३ २४, ४३, ५४, ५६, ५८, ६२, ७२, ७८, ८२, ८६, २३९, ६४५; III. ५४, ६०, ६२, ७८, ८२, ३५८; IV. ६२; V. २४, २९, ३१, ४३, ६२, ६४, ८२.

सामान्यम् I. २३, २९, ४१, ६३, ६४८, ६४९, ६६८-६७२, ६७५, II. २५, ३०, ४१, ४५, ५२, ५८, ६३, ६५, ६६८–६७४, ६७७, ६७८, ६८८; III. ६६८–६७२; IV. २, २५, ३३, ४७, ६२, ६३, ६५ ६७, १९४; V. २९, ३१, ३४, ४१, ४४, ४६, ५३ ६१, ६३, ६७, ६६८, ६६९, ६७३, ६७७, ६७८, ६८०, ६८३, ६८६

सामान्यपदार्थ— I. ६६८, ६७७, II. ६८३.

सा(का)रिका— IV. २४.

सिद्धान्तवादिन् III. ५०१, ५२७, ५७१, ६२१.

सुखम् I. ३८, २१३ २१९, २४१, २४३, २४८, २५०, २५१, २५८, ६०५; II. २३, २४, २८, १५२, २११, २१४, २१८, २४१, २४८, २५०, २५१, २५२, ६०३, ६०४, ६०५; III. ३८, २५०, ६३०, IV. २४, ३७, २१८, २५०, २५१; V. १५९, २१८, २५०.

सूत्रकारः II. ३०, ३८, ८६, २३५, ५७९, ५८०, III. ८४, ३५८; IV. ५०६, ५८०; V. ८६.

—(—कृत) III. ५०७; IV. ५०७.

सूरिः IV. ३१०, ३१८, ३३०

—(वाक्यम्) IV. ३८१, ४०९, ४४०, ४४१, ४४३, ४४४, ५११, ५८९.

सौगतः II. ४३९, ४७९, ६२७; III. ४३९; IV. ४०७, ४४०, ४८८, ४९०, ५०८, ५४९; V. ४७९, ४८४

सौगताः II. ५९७, ६७८; IV. २८२; V. १३, १७९, १९१, १९२, २०८, २२६, २२८, २७६, ६७८.

सौत्रान्तिकम् III. २२९, २७७, ३०३, ३०४, ३०७, ३११; ३१५; IV. १४, २७६, २७७, २७८, ३०३, ३०५, ३१६.

स्नेहः I. ३९, १०७, २४१, २४३, २४७, २५१, २५७. II. २५१, २५३; III. २५७; V. २४९, २५१.

स्पर्शः I. ३८, ७६, ८५, ८७, १०७, १२४, २४१, २४३, २४७, २४९, २५०, २५१, २५४, २५७, २६४; II. ३३, ३८, ७६, ८६, ९२, १०५, १२४, २४१, २४३, २४९, २५१, २५३, २५४, २६४, २६६; III. ३३, ९२, १२४, २५६, २५७, २६४; IV. ७७, ९२, १०५, २५४, २६४. V. ३३, ७६, ९२, २५४.

स्फोटवादिन् II. ६१७; III. ६१३.

स्मृतिः II. ६०१; III. ५९८; V. ६००.

स्वतःप्रामाण्यवादिनः III. ५११.

स्वप्न ( ज्ञानम् ) I. ४२९, ४३०; II. ४२९, ४३०, ४३२, III. ४२९; V. ४२९, ४३२.

[ ह ]

हेतुः I. ४७, ६८८; II. ८, ४७, १९५, १९६, १९७, २८४, ६१९, ६८५, III. १७, २०, ४७, ७९, ८४, १९६, १९७, IV. ७८, १९६, १९७, २१६. ६८५; V. १३, १७, १९६, १९७, २१६.